This is a reproduction of a library book that was digitized by Google as part of an ongoing effort to preserve the information in books and make it universally accessible.

Google books

https://books.google.com

Digitized by Google

Lat L 350.2 (1-3)

HARVARD COLLEGE
LIBRARY

VE RI
TAS

FROM THE FUND OF
CHARLES MINOT
CLASS OF 1828

Digitized by Google

Digitized by Google

Digitized by Google

IX 760
Ind L 350.2

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. I. Benares June 1, 1866. Vol. I.

शालिकनाथीयप्रकरणपंचिकावर्णनम् ॥

एषु दिनेषु मीमांसासूत्रं जैमिनिकृतं शबरस्वामिकृतं तद्भाष्यं भट्टकुमारिलकृतं तद्वार्तिकं पार्थसारथिमिश्रकृता तद्व्याख्या शास्त्रदीपिका माधवाचार्यकृतो जैमिनीयन्यायमालाविस्तर आपदेवीयं लौगाक्षिभास्करो मीमांसापरिभाषेत्यादयो मीमांसाप्रक्रियाग्रन्थाः क्वचित् साकल्येन खंडशो वोपलभ्यन्ते परन्तु मीमांसकमतवादग्रन्था मीमांसासूत्रीयश्लोकवार्तिकयुक्तप्रथमपादस्य लुप्तप्रायतया तत्रत्यविषयविवेचनपरा भाट्टमतस्य गुरुमतस्य प्राभाकरमतस्योपपादका भाट्टमीमांसाप्रभृतयो नामतएव श्रूयन्ते तथापि प्राभाकरमतस्य ग्रन्थोऽद्यावधि नास्माभिः कोऽपि दृष्ट इत्ययं शालिकनाथमिश्रकृतः प्रकरणपञ्चिकानामकः प्राभाकरमतग्रन्थो मया पंचदशवर्षेभ्यः पूर्वं संगृहीतोऽस्ति। अत्र ग्रन्थलेखदृष्ट्याऽर्वाचीनचिन्तामणिप्रभृतिनैयायिकग्रन्थेभ्यः प्राचीन इत्यनुमीयते यत्तुपुस्तकं मया संगृहीतं तदपि प्रायेणातीतवर्षशतकद्वयात् पूर्वं लिखितमस्तीति तस्य जरया लिप्या चानुमीयते। अस्मिंश्चग्रन्थे प्रथमं सर्वमीमांसकग्रन्थरीत्यनुसारेण मीमांसाशास्त्रारंभसार्थक्यबोधकं शास्त्रमुखं नाम प्रकरणं। द्वितीयं शब्दस्य किमनुमानविधया प्रामाण्यमुत स्वातन्त्र्येणेति चिन्तनपरं नीतिपथो नाम। तृतीयं जातिर्द्रव्याद्भिन्ना प्रत्यक्षग्राह्येति व्यवस्थापनपरं जातिनिर्णयो नाम। चतुर्थं सर्वज्ञानानां यथार्थत्वव्यवस्थापनपरं नयवीथी नाम। पंचमं प्रत्यक्षानुमानोपमानशब्दार्थापत्तिरूपप्रमाणपंचकनिरूपणपरैः पंचभिर्मीमांसकान्तराभ्युपगताभावाख्यप्रमाणखंडनपरेणैकेनेति षड्भिरवान्तरप्रकरणैर्घटितं प्रमाणपारायणं नाम। षष्ठं पंचमप्रकरणस्यातिविस्तृतस्य समसनभूतममृतकला नाम। सप्तमं शब्दार्थसंबंधस्यापौरुषेयत्वव्यवस्थापनपरं निर्मलांजनं नाम। अष्टममात्मस्वरूपनिर्णयपरं तत्त्वालोको नाम। नवमं शब्दनित्यतास्थापनपरं न्यायशुद्धिर्नाम। एतानि नव प्रकरणान्यखंडितानि (७८) पत्रैरशुद्धिरहितैः (३२००) श्लोकमितग्रन्थयुतैर्गतानि। दशमंतु मीमांसाजीवरक्षा नाम क्षणिकतावादिबौद्धनिराकरणपरं मम समीपे पंक्तिदशकमितमेव वर्तते।

अथायं ग्रन्थः कियानवशिष्टः स्यादिति चिन्त्यते तथाहि पुस्तके ऽस्मिन् क्वचित् प्रकरणपंचिकेति क्वचिच्च प्रकरणपंजिकेति नाम लिखितमस्ति तत्र प्रथमनामानुसारेण च पंचभिरेव प्रकरणैर्भाव्यमुपलभ्यन्ते चाचोक्तरीत्या दश प्रकरणानि। यदि च प्रथमस्य द्वितीयं। तृतीयस्य चतुर्थं। पंचमस्य षष्ठं सप्तमंच। अष्टमस्य नवमंचांगानि कथंचिदर्थानुरोधात् कल्प्यन्ते तर्हि दशमप्रकरणं सांगं दशवा पंचदशवा पत्राणि स्यादिति संभावयितुं शक्यते। द्वितीयनामानुसारेणतु प्रकरणसंख्या न निश्चीयते पंजिकाशब्दस्य संग्रहमात्रार्थत्वात्। यदितु पंजिकाशब्दस्य पंचानां संग्रहएवार्थोऽतएव तिथिवासरनक्षत्रयोगकरणानां पंचानां संग्रहस्तिथिपंजीत्युच्यत इति तर्हि प्रकृतेऽपि पंचैव प्रकरणान्यत्र सिद्ध्यन्तीति। एतत्पुस्तकारम्भपृष्ठेऽर्वाचीनपश्चिमदेशीयलिप्या (शालीनाथप्रकरणपंचिका १०२६) इतिलिखितमस्ति तेन प्राप्ता षड्विंशत्युत्तरसहस्ररूपा संख्या न

Digitized by Google

ग्रन्थश्लोकानां नवा ग्रन्थपत्राणां किन्तु पुस्तकवेष्टनस्य यतो ये महान्तं पुस्तकगणं दधति ते सौकर्येण पुस्तकानां प्राप्तये व्यवस्थायैव वेष्टनं तदंतर्गतपुस्तकानि च समानेनैवांकेनांकयन्ति ।

सो ऽयमतिप्राचीन उत्तमो ग्रन्थः केनचिदंशेनान्तिमेन रहितोऽपि लोके प्रकाशमर्हति सुविचारमयत्वात् साधुसंस्कृतनिबद्धत्वाच्चेति काशीविद्यासुधानिधिनामके पत्रे प्रकरणशो विद्यारसिकजनानांविचारगोचरः करिष्यत इति शम् ॥

काशीस्थराजकीयपाठालयेसांख्यशास्त्राचार्यः विट्ठलशास्त्री ॥

॥ शालिकनाथीयप्रकरणपञ्जिकायाम् ॥

ॐ ॥ श्रीगणेशाय नमः ॥ श्रीमद्गुरुरामेश्वरचरणाभ्यां नमः ॥
श्रीसीतांबायै नमः ॥ श्रीरामचंद्राय नमः ॥

स्वाध्यायविधिवाक्यार्थविचारे प्रयतामहे ।
प्रभाकरगुरोर्दृष्ट्या मीमांसारंभसिद्धये ॥ १ ॥

अत्र केचिदाचक्षते न मीमांसाशास्त्रमारंभणीयमिति । नहि वेदवाक्यार्थविचारोपायभूतन्यायनिबंधनं नच वेदवाक्यार्थो विचार्यो विचारस्य विषयभूतो ऽस्ति नाप्यसौ विचार्य निर्णीतः प्रयोजनमवकल्पते ऽपुरुषार्थत्वात् पुरुषार्थत्वेहि तस्य चोदनैव प्रमाणं स्यात् । नचाविवक्षितार्था सा प्रमाणं भवितुमर्हति । ननु शब्दानामौत्पत्तिकत्वादर्थपरत्वस्य नाविवक्षितार्थता युक्ता । सत्यमेवं वेदेनैवत्वन्यपरतामवगमयता ऽविवक्षितार्थतापाद्यमाना न शक्या वारयितुं । तथाहि । स्वाध्यायो ऽध्येतव्य इति परप्रेरणात्मकविध्यवरुद्धा भावना तव्यप्रत्ययवाच्या प्रतीयते । सा च स्वभावतो भाव्यं करणमितिकर्तव्यतां चापेक्षते । तत्र न तावदध्ययनमेव समानपदोपात्तं भाव्यतया संबंधमर्हति अपुरुषार्थत्वात् तस्मिन्हि भाव्यतया स्वीक्रियमाणे पुरुषप्रवृत्त्यनुपपत्तेः परप्रेरणात्मकविधिव्यापारभंगप्रसंगात् । नाप्येकवाक्यतया समभिव्याह्रियमाणस्य स्वाध्यायस्य भाव्यतया संबंधो ऽवकल्पते विध्यानर्थक्यप्रसंगात् । अंतरेणापिहि विधिं प्रतीयत एवाध्ययनेन स्वाध्यायोऽवाप्यत इति । नच व्रीहीनवहंतीतिवत्नियमार्थो विधिरिति शक्यते वक्तुं अक्रत्वर्थत्वादध्ययनस्य । न खल्वध्ययनस्य क्रत्वर्थत्वे किंचन प्रमाणमस्ति अक्रत्वर्थश्च न नियमस्य विषयः । अवघातादयोहि क्रतावेव नियम्यंते न तंडुलनिष्पत्तये । अवघातेनैव संपादितैस्तंडुलैः क्रतुफलभावनासिद्धिरिति । प्रमाणांतरस्याविषयत्वात्तेनैव सिद्धिरिति न किंचिद्विरुद्धं । स्वाध्यायस्वरूपग्रहणंत्वध्ययनेनैव सिद्ध्यतीति नियम्यमानं मानांतरविरुद्धं स्वयमनधीयानस्यापि परपुरुषाधीयमानस्वाध्यायग्रहणदर्शनात् । नचाध्ययनस्वीकृतेनैव स्वाध्यायेन क्रतुफलभावनासिद्धिरिति अक्रत्वर्थतया क्रतुसंस्पर्शाभावेन नियमानुपपत्तेरिति । एतेनैवार्थावबोधस्यापि भाव्यतया संबंधो निरस्तो वेदितव्यः । तथाहि । यद्यप्यधीतात्स्वाध्यायात्फलवत्कर्मावबोधो दृश्यत इतितस्यैव भाव्यता ऽवसीयते तथापि विनापि विधिना ऽन्वयव्यतिरेकाभ्यामध्ययनस्यार्थावबोधसाधनत्वावगमाद्विधिरनर्थकएव । नचाध्ययनेनैवार्थावबोधो भावयितव्यइति नियमविधेरर्थवत्ता । प्रकारांतरेणापि तत्संभवान्नियमानुपपत्तेः । नचाध्ययनेनैवार्थमवबुध्यानुतिष्ठतां क्रतुफलभावनासिद्धिरिति नियमः संभवति अक्रत्वर्थत्वादध्ययनस्य । तस्माद्विश्वजिन्न्यायेन स्वर्गएव भाव्यतया कल्पयितव्ये प्राप्ते फलमात्रेयो निर्देशादित्यार्थवादिकमधुघृतकुल्यादितृप्तपित्रादिप्रसादलभ्यसर्वकामफलावाप्तिरेव भाव्यतया ऽवसीयते । नन्वाम्नाताध्ययने न किंचिदार्थवादिकं फलं श्रूयते तच्चैषामर्थवादानामश्रवणात् । धारणजपयज्ञविषयार्थवादाहृते तदाहुर्वार्त्तिककारमिश्राः । आम्नात्वध्ययनेमैव काचिदस्ति फलश्रुतिः । धारणे जपयज्ञे च या साप्येवं निवारितेति । सत्यमेवं । तथापि तेषामतिदेशतोऽपि लब्धैर्युक्तैव तदीयफलस्य भाव्यता तथाहि लिङादियुक्तेषु वाक्येषु द्वे भावने ऽवगम्येते शब्दभावना ऽर्थभावनाचेति । तत्र शब्दभावना परप्रेरणात्मिका तस्याः पुरुषप्रवृत्तिर्भाव्या । तयाच प्रेरणया सह यो लिङादीनां वाच्यवाचकभावः संबंधः स तत्र योग्यतया करणं । तदाहुर्वार्त्तिककारमिश्राः । लिङादयोऽपि प्रेरणां कुर्वंत्यभिदधतिचेति । प्रवर्त्यरुच्युत्पादनयोग्यतया चार्थवादिकी स्तुतिरितिकर्तव्यता । तदेवमध्ययनविधौ साक्षादश्रुतार्थवादके शब्दभावनायामितिकर्तव्यताभूतार्थवादकांक्षिण्यां जपयज्ञाध्ययनातिदेशेनार्थवादाः स्वीक्रियंते । तदाहुर्वार्त्तिककारमिश्राः । अनुषंगानुमानाद्यैर्लभ्यंते न्यतिदेशत इति । तेचातिदिष्टा अर्थवादा अर्थभावनायां फलं समर्पयंति रात्रिसत्रवत् एवमार्थवादिके फले भाव्यतयावसिते ऽध्ययनं समानपदोपात्तं करणाकांक्षापरिपूरकत्वेन सम्बध्यते । एवंच यद्वैकस्मादपूर्वं तदेतत्तदर्थमितिन्यायेन स्वाध्यायशब्दवाच्यो ऽक्षरराशिरप्यध्ययननिर्वृत्त्यर्थएवावसीयते । एवंचान्यपरत्वादक्षराणां तेभ्यो ऽर्थप्रतिपत्तिरेवानुपपन्ना व्युत्पत्तिविरहात् । वृद्धव्यवहारेह्यनन्यपराण्येवाक्षराण्यर्थावबोधकतया व्युत्पन्नानि । व्युत्पत्त्यपेक्षश्च शब्दोऽर्थावबोधकः । यःपुनरन्यपरेभ्यो ऽप्यक्षरेभ्यो ऽर्थावगमः स सामान्यतोदृष्टनिबंधनानन्यपरत्वभ्रांत्या भ्रांतिः

3154 5-5-71 19

Digitized by Google

र्ष्यैवेति मंतव्यं । अप्रतीयमानश्चार्थो न विचारस्य विषयः । नापि प्रयोजनमिति विचारस्तावदनारभ्यः । तदनारंभेच तदुपायभूतन्यायपरिज्ञानमप्यनुपयोगि तदनुपयोगेच तन्निबंधनं मीमांसाशास्त्रमनारंभणीयमितिपूर्वः पक्षः ॥

राद्धांतस्तु ॥ स्वाध्यायोऽध्येतव्यइति स्वाध्यायस्य कर्मत्वावगमात्सएव भाव्यतया वसीयते । यद्यपि नित्यस्यानिर्वर्त्यकर्मता नास्ति स्वाध्यायस्य विकार्यकर्मतावा । अध्ययनेन तस्य विकारानुपपत्तेः तथापि प्राप्यतया तस्य कर्मता नानुपपन्ना । अतएव प्राप्यकर्मोदाहरणं वृत्तिकारस्य वेदाध्ययनं यच्च कर्म तदर्थैव क्रिया युक्ता । सोयं श्रौतो विनियोगः । नच स्वाध्यायस्य क्रतुवच्छेषित्वमनुपपन्नं फलवदर्थावबोधोपयोगित्वात् । यद्यपिचार्थावबोधोपयोगित्वमध्ययनात्प्राङ्नावगम्यते तथापि पश्चाद्गम्यमानमपि भवत्येव प्रयोजनं भाविनापिचोपयोगेन शेषित्वं नानुपपन्नं यूपवत् । उत्पन्नानांह्यग्नीनां विनियोगावगमो नावगतविनियोगानामुत्पत्तिः आहवनीयादिशब्दानामलौकिकार्थतया प्रागुत्पत्त्यनवगमादर्थानवगतेः होमादिषु विनियोगासंभवात् तथाचोक्तं । भूतभाव्युपयोगंहि द्रव्यं संस्कारमर्हतीति । ननुचार्थावबोधोपयोगितया संस्कारविधिरनर्थकएवेत्युक्तं । नानर्थकोनियमार्थतया ऽर्थवत्त्वात् ननुच नियमो न संभवति क्रतुसंस्पर्शित्वाभावादित्युक्तं । न । संभवति स्वाभाविकार्थपरत्वानुसारेण क्रत्वनुप्रवेशेतुल्यतायाएवोचितत्वात् यदिस्वध्ययनविधेः क्रत्वनुप्रवेशिता नाश्रीयते तदा शब्दानां वृद्धव्यवहारव्युत्पन्नानां स्वाभाविकार्थपरता हीयते । अहृत्स्वार्थत्वं च न न्याय्यमिति क्रतुफलभावनानुप्रवेश्येवाध्ययनसंस्कारो युक्तः । तत्र कर्मविधिष्वेव नियमवर्णना अध्ययनाविर्भावितैरेव कर्मविधिभिरर्थमवबुध्यानुतिष्ठतां क्रतुफलभावनासिद्धिरिति । अर्थवादेषुत्वध्ययनाविर्भावितार्थवादप्ररोचिताः क्रियमाणाः क्रतवः फलभावनाया अलमिति । मंत्रेषु पुनरध्ययनपरिगृहीतैरेव मंत्रैः क्रतुषु स्मरणीयपदार्थस्मरणं फलभावनानुगुणमिति । अध्ययननियमाश्रितश्च कालनियमो व्रतादिनियमश्च श्रावण्यां प्रौष्ठपद्यांवा उपाकृत्य यथाविधि । युक्तश्छंदांस्यधीयीतमासान्विप्रो ऽर्धपंचमान् । भवत्पूर्वं चरेद्भैक्षमुपनीतो द्विजोत्तमः । भवन्मध्यंतु राजन्यो वैश्यस्तु भवदुत्तरमिति । एवंचान्यपरत्वादक्षराणां फलवत्कर्मावबोधोत्पत्तेर्विचारस्य विषयप्रयोजनलाभाच्छास्त्रस्यारंभणीयत्वं विषयप्रयोजनलाभेच विचारस्याध्ययनानंतरमुपनिपतितत्वाद्गुरुकुलस्थितेरर्थवत्त्वात्तद्विमुक्तिमध्ययनानंतरप्राप्तां स्मरद्वेदमधीत्य स्नायादिति स्मृतिवचनमपन्यायमूलं दर्शयदर्थावबोधपरतया स्वाध्यायस्य विवक्षितार्थतां मन्यमानः सूत्रकारो विचारस्य विषयं प्रयोजनंचाह अथातो धर्मजिज्ञासेति । एतच्च व्याख्यातं अथातोधर्मजिज्ञासासूत्रमात्रमिदं कृतं । धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनमिति ।

तदयुक्तं । नहि लिङादियुक्तवाक्येषु भावना भाव्यांतरमपेक्षते अपूर्वस्य भाव्यस्य स्वशब्देनाभिहितत्वात् लिङादयोहि भाव्यकोटिनिविष्टप्रधानभूतापूर्वोपसर्जनतापन्नामेवभावनामभिदधतीति विषयकरणीयेनिपुणतरमुपपादितं । अतो न पूर्वपक्षेभाव्याकांक्षायामर्थवादिकफलसंबंधः । नापि सिद्धांते स्वाध्यायस्य साध्यतयान्वयः कथं तर्हि विश्वजिदादिषु स्वर्गादिफलकल्पनं । यथातत्तथा निशम्यतां । यदपूर्वं कार्यभूतं प्रतीयते तद्विषयत्वेन संबंधकरणीभूतयागाद्यनुष्ठानाधीनात्मलाभं नच विना कर्त्रा तदनुष्ठानोपपत्तिः । नचाधिकारं विना कर्तृत्वलाभः । नच नियोज्यमंतरेणाधिकारसिद्धिः । नचाविशिष्टो नियोज्यो ऽवकल्पतइति विशेषणाभावेन स्वर्गकामनापरिकल्पते । स्वर्गकामनाचेन्नियोज्यविशेषणं ततो ऽग्निहोत्रादिवत् स्वर्गस्यापि नियोगतः सिद्धिरिति । भवत्वेवं अत्रापि तर्हि नियोज्यविशेषणतयैवार्थवादिकं फलं रात्रिसत्रवत्संबध्यतां । न अन्यतो ऽनुष्ठानसिद्धेः । कुतो ऽन्यतः । आचार्यकरणविधिप्रयुक्तेः । कः पुनराचार्यकरणविधिः । उपनीयतु यः शिष्यं वेदमध्यापयेद् द्विजः । सकल्पं सरहस्यंच तमाचार्यं प्रचक्षतइति स्मरणानुमितः शिष्यमुपनीय वेदाध्यापनेनाचार्यकं भावयेदित्येवंरूपः । अलौकिकंचाहवनीयादिवदाचार्यकमिति तच्छिष्यस्युपायविधानंयुक्तमेव । तत्रार्थादाचार्योबुभूषतएवाधिकारो धनार्जननियमवत् तत्र शिष्यंप्रति विहिततद्धिताचरणादिदानदर्शनात्तल्लिप्सोरेवाचार्यभवनेच्छा । यथा दीक्षणीयया दीक्षितत्वसिद्धिः तथा वेदाध्यापनेनाचार्यत्वसिद्धिः । उपनयनंच स्वाप्रत्ययेनाध्यापनसमानकर्तृकमवगम्यमानमेकप्रयोगतयाविना समानकर्तृत्वासंभवादंगांगिभावेनचविना एकप्रयोगत्वानुपपत्तेराचार्यकभावनाकरणीभूतमध्यापनंप्रत्यंगत्वेनावतिष्ठते । तदाश्रितश्चाष्टवर्षं ब्राह्मणमुपनयीतेत्येवमादिनियमः । उपनयनंच स्वभावत उपनेयासत्तिप्रयोजनकमिति तद्द्वारेणैव तस्यांगत्वं । नचाध्यापनंप्रत्यनुपयोगिन उपनेयस्यासत्तिरध्यायनोपयोगिनीत्युपनेयस्य कर्मापेक्षायामुपनयनं प्रक्रम्य स्वाध्यायो ऽध्येतव्य इति अध्ययनं विधीयमानमुपनेयस्य कर्मत्यवगम्यते । अध्ययनंचाध्यापनोपयोगीति सिद्धमेतत् । तेनायमध्येष्यमाणस्य माणवकस्योपनयनमध्यापनांगमित्यध्यायनविधिः स्वांगभूतमुपनयनं प्रयुंजानस्तस्यान्यथानुपपत्त्या ऽध्ययनमपि प्रयुंक्ते । तत्प्रयुक्ताध्ययननिष्पत्त्याच फलसिद्धिरध्ययननियोगो नाधिकारांतरमपेक्षते अतो नायं विश्वजिन्न्यायस्य विषयः । नापि रात्रिसत्रन्यायस्य अनन्यप्रयुक्तविषयनियमगोचरत्वात्तयोः । अतएव प्रयाजादिनियोगेषु

Digitized by Google

तयोरवसरः सिद्धांतेतु कामश्रुतिप्रयुक्तमध्ययनमिति विद्यासाध्येष्वपि कर्मसु शूद्रादीनामधिकारः स्यात् । अतो ऽध्यापनविधिप्रयुक्तत्वादध्ययनस्य येषामेवोपनयनं तेषामेव तत्प्रयुक्तमंत्रलाभाच्छूद्रादीनामनधिकारः । एवंच विध्यंतरप्रयुक्ते ऽध्ययने न रात्रिसत्रन्यायेन पूर्वपक्षाशंकोचिता । नचातत्प्रयुक्त्या पूर्वः पक्षः तत्प्रयुक्त्याच राद्धांत इति युक्तं । अतत्प्रयुक्तत्वे कारणाभावात् । यच्चोक्तं नियमार्थो विधिरिति । तदयुक्तं स्वाध्यायाध्ययनस्य नियोगनिष्पत्त्यर्थतया विधानेन वचनस्यार्थवत्त्वात् । स्वाध्यायो ऽध्येतव्य इति तव्यप्रत्ययेन विधिरभिधीयते । नचावहंत्यादिष्विव क्रतुविषयनियोगानुवादो ऽयमवकल्पते असंनिधानात्क्रतुनियोगानां । सन्निधानवशेनैव प्रकृतनियोगप्रत्यभिज्ञानात्तत्र क्रतुनियोगानुवादोपगमः । न चेह संनिधानमस्ति । नापि पर्णमयी जुहूर्भवतीतिवत् पदार्थसंबंधमुखेन क्रतुविनियोगप्रत्यभिज्ञानं स्वाध्यायस्य व्यभिचरितक्रतुसंबंधत्वात् । हुमित्येवमादीनामनर्थकानां स्वाध्यायांतर्गतिदर्शनात् । यतएवात्र नियोगः साध्यतया ऽवगम्यते ऽतएव स्वाध्यायस्य नेप्सितकर्मतया संबंधो ऽवकल्पते एकस्मिन्वाक्ये साध्यद्वयविरोधात् । नच स्वर्गादिवत् स्वाध्यायस्य नियोज्यविशेषणतया ऽन्वयादविरोधः अनियोगफलत्वात्स्वाध्यायग्रहणस्य । यदेवहि नैयोगिकं फलं तदेव साध्यतया नियोज्यविशेषणं नान्यदिति तृतीये दर्शितं अनभिज्ञो भवान्विषयनियोज्यानामित्यत्र । अतो ऽध्ययनविषयनियोगप्रतिपादनेनैव तस्यार्थवत्त्वाच्च क्रतुप्रवेशकल्पनया नियमार्थता विधेः ।

अन्येपुनरेवंपूर्वपक्षयंति अध्यापनविधिप्रयुक्तमध्ययनमध्यापनांगभूतं तन्निष्पत्त्यर्थतयाच स्वाध्यायस्यान्यपरत्वादविवक्षितार्थतेति । तदयुक्तं । प्रयुक्तिमात्रेण तादर्थ्यानुपपत्तेः । स्यान्मतं यथा प्रजापतिव्रतेषु स्वतंत्रकर्त्रवगमात्तद्धेतुभूताधिकारसिद्ध्यर्थं नियोज्यपरिकल्पनं तथा प्रयुक्तिदर्शनात्तादर्थ्यमिति तन्न । प्रयुक्तेस्तादर्थ्यव्यभिचारात् । असत्यपि तादर्थ्ये केवलोपकारकतामात्रेणाध्ययनस्य क्रतुविधिभिः प्रयुज्यमानत्वात् । कथं तर्हि पश्वेकत्वादीनामंगत्वं । नतावद्विभक्तिरेव क्रतुसंबंधितयैकत्वमभिधत्ते । येनाहवनीयवद्वाक्येन विनियोगः स्यात् । विभक्तेर्हि प्रातिपदिकार्थगतमेव स्वार्थं श्रुत्याभिदधाति । नापि करणीभूतस्यैकत्वमुच्यते संख्यान्वितस्यवा करणत्वं करणत्वैकत्वयोर्युगपदभिधानात् । अतो न वैनियोगिकं शेषत्वं विभक्त्यभिहितायाः संख्यायाः । उच्यतेच शेषत्वं तच्च प्रयुक्तिकृतमेव । नैवं । न तत्रापि शेषत्वमौपादानिकं किंतु लौकिकमेकवस्तुसामर्थ्यमेव लिंगमुच्यते । संख्याच स्वभावतएव संख्येयावच्छेदिकेति संख्येयार्थात्र किंतु संख्येयभूतप्रातिपदिकार्थमात्रसंबंधे ग्राहकान्वयव्याघातापत्तेर्ग्राहकीयभूतपश्वादिसंबंधेनौपादानिकः । सन्निधिसमाम्नानमात्रेणहि विभक्त्यर्थस्यापि ग्राहकंप्रत्यैदमर्थ्ये नान्वितस्यैवाभिधानं । तदन्यथानुपपत्त्या च केवलाभिधाननिबंधनं स्वरूपसंबंधमतिलंघ्य साधनीभूतसंख्येयसंबंधाध्यवसानमिति नौपादानिकं तत्रापि शेषत्वं । भवतु तर्हि लिंगादेवाध्ययनस्यापि अध्यापने विनियोगः । नैवं भवितुमर्हति सामान्यसंबंधसापेक्षत्वाल्लिंगविनियोगस्य नचास्य सामान्यसंबंधापादकं किंचिदस्ति प्रमाणं । ननु णिच्छ्रुतिः प्रकृत्यर्थभूतस्याध्ययनस्य शेषतामापादयतीति । तन्न । प्रयोजकव्यापारस्य प्रयोज्यव्यवहारोत्पत्तिहेतुत्वात् विपरीतशेषत्वापत्तेः । वाक्यप्रकरणस्थानसमाख्यानानित्वध्ययनस्याध्ययनंप्रति विनियोजकतया नाशंकनीयान्येव । ग्रंथविरोधस्त्वांगत्ववादिनां । यतएवमाह भगवान्प्रयोज्यत्वादनंगत्वाच्च भवति संशयः इति ।

तस्मादनंगतयैव पूर्वपक्षणीयं । कथंपुनरनंगतयापूर्वपक्षयितुं शक्यते । उच्यते । सर्वोहिविधिरधिकारपर्यवसायी । न चाध्ययनविधौ कस्यचिदधिकारो ऽस्तीत्युक्तमेव साक्षादश्रवणात् । अध्यापनविधिप्रयोज्यतया कल्पनानुपपत्तेः तत्र यएवासौ प्रयोजकविधावधिकारः सएव प्रयोजनमिति युक्तं प्रथमोपनिपातित्वात् । यदपि यस्यानंगं तदपि तस्य प्रयोजनं भवत्येव आधानस्येव होमादय इति । ननुचानंतरभाविकर्मविबोधफलकतया ऽध्ययनस्याध्येतुरेवाधिकारो ऽध्ययने प्रतीयत इति तत्प्रयोजनतैव स्वाध्यायविधेर्युक्ता अंतरंगत्वात् । न । तस्योत्तरकालभावित्वात् । तुल्यायांहि प्राप्तावंतरंगता बलीयसी । नचानयोरधिकारयोस्तुल्या प्राप्तिः प्रथमोपनिपातित्वात्प्रयोजकविध्यधिकारस्य उत्तरकालभावित्वाच्चार्थावबोधनिबंधनस्याधिकारस्य । यदाचाध्यापनविध्यधिकारसिद्धिरध्ययनस्य प्रयोजनमित्यध्ययनविधिना बोधितं तदा ऽध्ययननिष्पत्त्यर्थत्वात्स्वाध्यायस्यान्यपरत्वादविवक्षितार्थत्वं । अविवक्षितश्चार्थो न विचारणीय इति वेदाध्ययनमात्रेणैव गुरुकुलस्थितेः कृतार्थत्वादध्ययनोत्तरकालं गुरुकुलनिवृत्तिरेव युक्तेति मत्वा स्मृतं वेदमधीत्य स्नायादिति । अत्रच न स्नानमदृष्टार्थं विधीयते किंतु यो ब्रह्मचारिणो न स्नायादिति अस्नाननियमस्तस्य पर्यवसानमेतदध्ययनांगतया नियमानां तन्निवृत्तौ प्राप्तमुच्यते । अस्नाननियमतुल्यतयाच गुरुकुलवासादीनामपि निवृत्तिः प्राप्तैवेति सकलब्रह्मचारिधर्मनिवृत्तिरेवाध्ययनानंतरमुच्यते । एवंचाध्ययनविधिना विचारस्यानाक्षिप्तत्वात्तदुपायभूतन्यायनिबंधनं मीमांसाशास्त्रं नारंभणीयमिति पूर्वः पक्षः ।

राद्धांतस्तु । यद्यपि प्रयोजकविध्यधिकारः प्रथमभावी तथापि तन्निष्पत्तिः प्रयोजनमिति न युक्तं किंतु दृष्टार्थावबोधफलकतया ऽध्ययनोत्तरकालभाव्यप्यध्येतुरेवाधिकारः प्रयोजक-

Digitized by Google

नतया युक्त आश्रयितुं कर्तुसमवायित्वात् । यत्कर्तृकं हि यत्कर्म तस्यैव तत्रैश्वर्यमिति युक्तं । अंतरंगत्वात् । नच सहसैव विधिदर्शनादत्राधिकारपर्यवसानकल्पनाकरणमस्ति । परप्रयुक्त्यैवानुष्ठानस्य सिद्धत्वात् । यत्र खल्वधिकारपर्यवसानकल्पनामंतरेण प्रागनुष्ठानं न लभ्यते तत्रानुष्ठानात्प्रागनवगतो ऽधिकारः तदनुप्रवेशात्साध्यः । इह त्वध्यापनविधिप्रयुक्त्यैवाधिकारपर्यवसानकल्पनामंतरेणानुष्ठानं लब्धमिति प्राथम्यमकिंचित्करं । अंतरंगत्वादध्येतुरेवाधिकारो युक्त इति । तदेवमध्ययनविधेरन्यप्रयुक्त्यैवानुष्ठानसिद्धेर्नियोज्यो नास्ति । अधिकारीतु विद्यतएव । यदर्थं हि यत्कर्म स तत्राधिकारी । अर्थावबोधोपयोगेनचाध्येत्रर्थताध्ययनस्येति स तत्राधिकारी । सचायमधिकारः प्रागध्ययनाच्चावगम्यते अध्ययनोत्तरकालेचावगम्यते स्वाध्यायाध्ययनंत्वेवमभिनिर्वर्त्स्यते । श्रावण्यां प्रौष्ठपद्यांवा उपाकृत्य यथाविधि । युक्तश्छंदांस्यधीयीत मासान्विप्रो ऽर्द्धपंचमान् । ततः परंतु छंदांसि शुक्लेषु नियतः पठेत् । वेदांगानि रहस्यंच कृष्णपक्षेषु संपठेदिति । इत्थंचाध्ययने क्रियमाणेंगाध्ययनसंस्कृतस्य वेदवाक्यादर्थावगमो जायते । इदानीमध्येता मन्यते मदुपयोगिकर्मावबोधकतया मदर्थमध्ययनमिति । सोयं वेदाध्ययनमीमांसाश्रवणयोर्मध्ये ऽधिकारः सो ऽयं तात्कालिकः शास्त्रार्थः । इममेव तावदधिकारमालोच्य पित्रादयो ऽर्थदानादिना कांश्चिदानमय्य पुत्रादीनुपनाययंति । प्रवृद्धाश्च केचन स्वयमेवात्मानं । अन्यथा ऽध्ययनासंभवात् । अनुपनीतस्याध्ययननिषेधात् । नाभिव्याहारयेद् ब्रह्म स्वधानिनयनादृते । स शूद्रेण समस्तावद्यावद्वेदान्नजायते इति । एवंतावदध्यापनविधिं स्मृत्यनुमितं कस्यचिदप्यस्वाध्यायभूतमाश्रित्य राद्धांतवर्णना कृता ।

अन्येतु साक्षाच्छ्रुताध्यापनविध्यनुसारेणैवमाहुः यद्यध्यापनविध्यधिकारप्रयोजनता स्वाध्यायाध्ययनविधेः स्यात् तदाध्यापनविधेरपि स्वाध्यायांतर्गतत्वादविवक्षितार्थत्वेन तत्प्रयुक्ततापि न संभवति । स्वशाखाहि स्वाध्यायशब्देनोच्यते साक्षादधीतश्चाध्यापनविधिर्नूनं केषांचिच्छाखिनां स्वशाखांतर्गतो भवेदिति स्वाध्यायस्याविवक्षितार्थत्वेन तस्याप्यविवक्षितार्थत्वाच प्रयोजकत्वमवकल्पते इति पश्चाद्वाध्यर्थावबोधोपयोगितया ऽध्येतुरेवाधिकारो ऽध्ययनविधेः प्रयोजनमिति ।

ननु स्वाध्यायोध्येतव्य इति नियोगसिद्धेरवगमात्तद्विषयस्यार्थत्वादध्ययनस्यान्यपरत्वादर्थविवक्षा दुर्भणैव । मैवं । यदि केवलं नियोगनिष्पत्त्यर्थतैवाध्ययनस्य स्यात्स्यादेतदेवं । यदा त्वर्थावबोधोपि प्रयोजनतया स्वीक्रियते तदार्थपरता ऽप्यस्तीति नाविवक्षितार्थता । कथंपुनरेकस्मिन्वाक्ये प्रयोजनद्वयं । इष्यते । शाब्दं नियोगनिष्पत्तिरेव प्रयोजनं आर्थंत्वर्थावबोधनमिति न विरोधः । यच्च तदर्थावबोधाख्यं प्रयोजनं तच्च केवलाध्ययनसाध्यमिति अध्ययनविधिरेव स्वप्रयोजनसिद्धये विचारमाक्षिपति विचारस्यच न्यायनिबंधनत्वान्न्यायानां मीमांसाज्ञानगम्यत्वान्मीमांसाज्ञानस्य गुर्वायत्तत्वाच वेदाध्ययनानंतरं गुरुकुलान्निवर्त्तितव्यमिति मन्यमाने भगवान्सूत्रकारः पूर्वपक्षनयमूलतां स्मृतेर्दर्शयितुं धर्मजिज्ञासोपदेशमुखेनाध्ययनानंतरभाविनीं गुरुकुलनिवृत्तिं प्रतिषेधन्निदमाह अथातो धर्मजिज्ञासेति । वेदवाक्यार्थविचारविरोधिनीच गुरुकुलनिवृत्तिरेव केवला निवार्यते । न सकलेतरभिक्षाचरणब्रह्मचर्यादिधर्मनिवृत्तिः । असमाप्तसकलब्रह्मचारिनियमश्च न स्नातकइति न दाराधिगमे ऽधिक्रियते स्नातकस्य दाराधिगमस्मरणात् । स्नातकः सदृशीं भार्यां विंदेदिति । तस्माद्गुरुकुले स्थित्वा सकलेतरब्रह्मचारिधर्मान्परित्यज्य वेदार्थो विचारयितव्यः अविचारितस्यानिर्णीयमानत्वात् । अनिर्णीतवेदार्थश्च गुरुकुलान्निवर्तेत ततः कृतदारसंग्रहः श्रौताग्निहोत्रादिनित्यनैमित्तिकधर्माधिकारापातात्तदनुष्ठानं कर्तुमसमर्थः प्रत्यवेयात् । तस्मादध्ययनस्यानंतरमेव वेदार्थो विचारयितव्य इति विचारोपायभूतन्यायनिबंधनं मीमांसाशास्त्रमारब्धव्यमिति सिद्धं १ ॥

शास्त्रमुखंनाम गुरोराविष्कर्तुं गभीरमपि भावं ॥
शालिकनाथेन कृतं प्रकरणमेतत्प्रसन्नतरं ॥

॥ इति शास्त्रमुखंनाम प्रकरणं ॥ १ ॥

अर्थासंस्पर्शिताशंका यथा शब्दस्य वार्यते ॥
प्रभाकरगुरोः शिष्यैस्तथा यत्नो विधीयते ॥ १ ॥
अत्र लौकिकवाक्यानां व्यभिचाराभिमानतः ॥
अर्थासंस्पर्शितां केचिदाहुः शब्दस्य वादिनः ॥ २ ॥
निश्चयो ऽर्थस्य संस्पर्शः सचार्थाव्यभिचारिणः ॥
प्रत्यक्षादेरेव भवेच्छब्दस्तु व्यभिचारवान् ॥ ३ ॥
विनाप्यर्थं हि शब्देन प्रतीतिरुपजायते ॥
अंगुल्यग्रे ऽस्ति करिणां यूथमित्येवमादिना ॥ ४ ॥
नचात्र शक्यते वक्तुं शुक्तौ रजतबोधवत् ॥
अग्रहाद् भ्रांतिरेषेति कारणस्याविशेषतः ॥ ५ ॥
दुष्टाहि हेतवः कार्यं संपूर्णं कर्तुमक्षमाः ॥
तेन भेदाग्रहो युक्तः शुक्तिकारजतादिषु ॥ ६ ॥
इह तु ज्ञानहेतुर्यः शब्दः स न विशिष्यते ॥
विशिष्यते यस्तु वक्ता स ज्ञानस्य न कारणं ॥ ७ ॥
वक्तापि यदि विज्ञानहेतुः स्पर्शादिंद्रियादिवत् ॥

Digitized by Google

ततस्तस्यापि दोषेण भवेदग्रहणं तदा ॥ ८ ॥
वक्ता तु केवलं शब्दव्यक्तावेवोपयुज्यते ।
ज्ञानं तु शब्दमात्रेण निरपेक्षेण जन्यते ॥ ९ ॥
नच तस्येह दुष्टत्वं किंचिदप्युपलभ्यते ।
दोषश्चाग्रहणे हेतुस्तदभावे स्फुटो ग्रहः ॥ १० ॥
तेन शब्दोपजनितं ज्ञानमेवेदमीदृशं ।
अर्थं व्यतिक्रामतीति कुतस्तेनार्थनिश्चयः ॥ ११ ॥
येनापि हि विना यस्य सद्भाव उपपद्यते ।
निश्चयस्तत्र तेनेति सुभाषितमिदं वचः ॥ १२ ॥
नन्वेवमाप्तवाक्येभ्यः कथं व्यवहृतिर्भवेत् ।
व्यवहारो हि लोकस्य कथं स्यान्निश्चयं विना ॥ १३ ॥
उच्यते व्यवहारो हि संदेहादपि लौकिकः ।
प्रायशो दृश्यते तेन न किंचिदिह दुष्यति ॥ १४ ॥
अपिचाप्तत्वमालोच्य वक्तुस्तत्रार्थनिश्चयः ।
मानांतरवशेनापि कथंचिदुपपद्यते ॥ १५ ॥
वेदस्त्वलौकिकार्थत्वादभावाद्वक्तुरेवच ।
अहो बत दशां कष्टामुपनीतो ऽतिपंडितैः ॥ १६ ॥
अत्र प्रतिविधानाय यतंते मतिशालिनः ।
ज्ञानस्य व्यवहारित्वं नयवीथ्यां निवारितं ॥ १७ ॥
श्रूयतामवधानेन गतिर्नरगिरामपि ।
अनुमानात्पृथग्भावं तासां नेच्छंति सूरयः ॥ १८ ॥
वाक्यं हि पुरुषाधीनरचनं लौकिकं सदा ।
शंक्यमानायथार्थत्वं नार्थनिश्चायकं स्वतः ॥ १९ ॥
अन्योन्यानन्वितार्थानि पदान्यपि हि मानवाः ।
रचयंतो विलोक्यंते तेन नान्वयनिश्चयः ॥ २० ॥
केचित्तावद्भ्रमेणैव केचिदाशयदोषतः ।
प्रमादात्केऽप्यशक्तेश्च केप्यनन्वितवादिनः ॥ २१ ॥
तदुक्तानां पदार्थानां यद्यप्यन्वययोग्यता ।
तथाप्यनन्वितस्यापि दृष्टेर्नान्वयनिश्चयः ॥ २२ ॥
अत्र निश्चयशब्देन ज्ञानमेवाभिधीयते ।
अन्वयानिश्चये तेन ज्ञानमेवास्ति नान्वये ॥ २३ ॥
शंक्यमानायथार्थत्वरचनं तेन पुंवचः ।
श्रुतमात्रकमेवार्थं न तावन्निश्चयावहं ॥ २४ ॥
यावद्वक्तुरविज्ञातं पूर्वभाविप्रमांतरं ।
विवक्षितार्थविषयमिंद्रियार्थनिबंधनं ॥ २५ ॥
तस्य ज्ञानंच वाक्येन लिंगभूतेन गम्यते ।
ज्ञात्वैवार्थं ब्रवीतीति य एवमवधारितः ॥ २६ ॥
तस्य ज्ञानेन नियतं वाक्यं ज्ञानानुमापकं ।
ज्ञानंचार्थाविनाभावि तेनार्थोपि विनिश्चयः ॥ २७ ॥
ततो ऽर्थे निश्चिते पश्चात्सोऽर्थो वाक्येन गम्यते ।
तस्यां दशायां वाक्यस्य तस्य स्यादनुवादता ॥ २८ ॥
पूर्वंच लिंगभूतत्वं वक्तुर्ज्ञानावधारणे ।
वक्तुर्ज्ञानप्रसूतं हि वाक्यं तत्कार्यमिष्यते ॥ २९ ॥
कार्यात्कारणसिद्धिश्च सर्वेषामनुमानतः ।
पौरुषेयमतो वाक्यं न शास्त्रमभिधीयते ॥ ३० ॥
एवंचसति लिंगस्य व्यभिचारो ऽयमीक्ष्यते ।
न शास्त्रस्येति तस्य स्यादर्थासंस्पर्शिता कुतः ॥ ३१ ॥
लिंगस्यापि न चैवायं व्यभिचारो ऽस्ति किंतु यः ।
लिंगालिंगे न शक्नोति विवेक्तुं मूढचेतनः ॥ ३२ ॥
तस्यालिंगे लिंगरूपसाधारण्यनिबंधनः ।
लिंगसंव्यवहारोऽयं विपरीतः प्रवर्तते ॥ ३३ ॥
श्रुतिलिंगाधिकरणे विस्तरेणैवमीरितं ।
तेन न व्यभिचारो ऽस्ति द्वयोर्लैंगिकशास्त्रयोः ॥ ३४ ॥
नन्वर्थएव प्रथमं पुंवाक्येभ्योऽवगम्यते ।
अन्यथा हि कथं वक्तुर्धीर्विशिष्टा ऽनुमीयते ॥ ३५ ॥
अर्थेनैव विशेषो हि निराकारतया धियां ।
नचाप्रतीतेनार्थेन विशेषश्चावकल्पते ॥ ३६ ॥
अत्र ब्रूमो ऽयथार्थत्वशंकयाऽर्थो न निश्चितः ।
अनिश्चितश्च न ज्ञात इति तावद्व्यवस्थितं ॥ ३७ ॥
किंत्वज्ञातेपि शब्दार्थे पदजाते श्रुते सति ।
विमर्शो जायते श्रोतुरीदृशो मतिशालिनः ॥ ३८ ॥
अन्योन्यान्वययोग्यार्थं पदजातं ब्रवीत्ययं ।
आप्तस्तेनामुना नूनं ज्ञातस्तेषां समन्वयः ॥ ३९ ॥
न कदाचिदसंबद्धानर्थानेष विवक्षति ।
नवा ऽप्रतीतसंबंधानिति दोषो न कश्चन ॥ ४० ॥
नन्वेवं तुरगारूढस्तुरंगं विस्मृतो भवान् ।
वेदप्रामाण्यसिद्ध्यर्थमुत्थितस्तत्प्रहीणवान् ॥ ४१ ॥
लोकावगतशक्तिर्हि वेदे शब्दो ऽवबोधकः ।
लोकेच लिंगभावेन प्रतीतिर्भवता श्रिता ॥ ४२ ॥
स्वयंत्विह समाधानमाचार्येणैव दर्शितं ।

Digitized by Google

शब्दस्यार्थेन संबंध इति दर्शयता सता ॥ ४३ ॥
अन्विताथाभिधायित्वे पदानां हि स्थिते सति ॥
विशिष्टा वक्तृधीर्ज्ञातुं शक्यते नान्यथा यतः ॥ ४४ ॥
ज्ञातेषु हि पदार्थेषु श्रोता वक्तरि कल्पयेत् ॥
अन्योन्यान्वयविज्ञानं नान्यथेत्युपदर्शितं ॥ ४५ ॥
पदानां तत्पदार्थेषु शक्तिः स्वाभाविकी स्थिता ॥
पुंवाक्येषु विसंवादशंकया सा तिरोहिता ॥ ४६ ॥
वेदेषु त्वस्मर्यमाणकर्तृकेषु स्वरूपतः ॥
प्रमाणांतरसंस्पर्शरहितार्थावबोधिषु ॥ ४७ ॥
न कर्तुरनुमानं स्याद्वाक्यत्वादिति लिंगतः ॥
न कर्त्ता शक्नुयाद्वाक्यं कर्तुं कार्ये ह्यलौकिके ॥ ४८ ॥
तेन वेदे विसंवादशंका नास्ति कथंचन ॥
अर्थनिश्चयहेतुत्वादर्थसंदर्शिता स्थिता ॥ ४९ ॥
व्यपगतवाङ्मलपंकः प्रोद्धृतपरयुक्तिकंटकप्रकरः ॥
स्पष्टः प्रगुणतरोऽयं शालिकनाथेन नीतिपथः ॥ ५० ॥

इति शालिकनाथमिश्रकृतौ नीतिपथोनाम द्वितीयं प्रकरणं ॥ २ ॥

॥ श्रीः ॥

यस्येच्छयैव प्रकटत्वमाप्तं
ब्रह्माण्डभाण्डोदरवर्ति विश्वम् ।
अवगतो मूलमिवास्ति गूढं
कस्मैचिदस्मै महसे नमोऽस्तु ॥ १ ॥

अथ मानमन्दिराभिधवेधालयवर्णनम् ॥

अस्ति श्रीवाराणस्यां भागीरथीतीरे मणिकर्णिकाघट्टानातिदूरे दक्षिणपश्चिमदिग्भागे राजपुतानाख्यप्रसिद्धदेशान्तर्वर्त्यामेरसंज्ञनगर्याः स्वामिना मानसिंहाभिधेयेन राज्ञा विनिर्मितं सदनमेकं मानमन्दिरसंज्ञकं नाम। तत्र तस्य नृपतेर्वंश्येन प्रतापवता जयसिंहभूपेनेतः पूर्वं सार्धशतवर्षासन्नकाले ग्रहनक्षत्रवेधार्थं रचितानि ज्योतिषयन्त्राणि तदुपयोगजिज्ञासूनां सहृदयपुरुषाणां रञ्जनायेदानीमहं संक्षेपतो वर्णयामि ।

तत्र याम्योत्तरभित्तिसंज्ञं यन्त्रं दक्षिणोत्तररेखायां चूर्णेष्टकाप्रस्तरैर्निर्मितं कुड्यरूपं सत्र्यंशसप्तहस्तोच्छ्रायं सत्रिलवद्वयैकाङ्गुलाधिकचतुर्हस्तपरिणाहं सार्धषोडशाङ्गुलपिण्डं समीचीनसुधालेपेन चिक्कणीकृते तत्पूर्वपार्श्वे भूमेरङ्गुलद्वयेनानगरोच्छ्रितयोरन्योन्यं हस्तपञ्चकेन स्वचतुर्विंशांशाधिकेन विप्रकृष्टयोस्तत्पार्श्वोर्ध्वकोणद्वयासन्नदेशयो रोपितौ लोहकीलौ केन्द्रे कृत्वा कीलान्तरमितव्यासार्धेन लिखिताभ्यां मिथः संपातं कुर्वद्भ्यां वृत्तचरणाभ्यां स्वस्वाधोभागे तत्केन्द्रकोरेव क्रमेण पञ्चदशभिर्नवत्या नवशतेन च समं विभक्तैस्त्रिभिस्त्रिभिर्वृत्तचतुर्थांशैः सहिताभ्यामङ्कितं मन्दिरान्तः प्रविशद्भिर्यन्त्रविदृक्षुभिः प्रथममेवोपलभ्यते ।

अस्मिंश्च यन्त्रेऽत्र दक्षिणोत्तरमण्डलं याते सहस्रकिरणे वृत्तचरणे पतितां तत्केन्द्रस्थकीलच्छायां यावदपरकीलमूलात् तिग्मरश्मेरुन्नतांशास्ततश्च नतांशाः प्रत्यहमहर्दलेऽवगम्यन्ते । परमिह काश्यामक्षलवानां परमक्रान्तितोऽधिकत्वादुष्णगभस्तेः स्वस्वस्तिकादुदग्भागे संचारासंभवादस्मीह तस्योन्नतनतलवानामवगमाय याम्यकेन्द्रकस्यैव वृत्तचरणस्योपयोगः । यत्तु पुनरुदग्दक्षिणकेन्द्रकयोर्द्वयोर्वृत्तचरणयोरत्रोल्लेखनं तत्तु खमध्यादुत्तरे दक्षिणे च याम्योत्तरमण्डलं प्रविशतां सर्वेषामुडूनां वेधायेत्यतिरोहितमतिमतिमताम् ।

यन्त्राच्चास्माद्भवति तरणिपरमक्रान्तेरंशानां चावगमः सुगमः । तथाहि । प्रतिदिनं दिनदलेऽर्कस्य नतलवेष्ववलोकितेषु यावन्तः परमाधिका नतांशा यावन्तश्च परमाल्पा अवगम्येरंस्तद्विश्लेषदले परमापमांशा भवेयुः । तांश्च श्रीजयसिंहमहीपतिरष्टाविंशतिकलाधिकत्रयोविंशतिमितान् निरणायत् । एभिश्चोनीकृतेषु परमाधिकनतलवेष्वधिकीकृतेषु परमाल्पनतांशेषु वा संपद्यन्तेऽक्षांशाः ।

एवमवगताक्षांशेऽस्मिन् विषयेऽभीष्टदिने मध्याह्नेऽर्कस्य नतांशानवलोक्य तांश्चाक्षांशैर्विश्लेष्यावशेषमितं तस्मिन् दिने दिनेशस्यापमं पलांशेभ्यो नतांशानामल्पत्वे सौम्यमधिकत्वे च याम्यमवगच्छेत् । ततश्चरस्याहर्निशोः प्रमाणस्याक्षभोगस्य चावगमः सिद्धान्तविदोऽतिस्पष्टतरः ।

अस्ति चास्या दक्षिणोत्तरभित्तेः प्राग्भागे तत्सत्रैव तत्तुल्यविस्तारा दैर्घ्ये सप्तकरा पूर्वं जलवत् समीकृतापीदानीं किंचिदुच्चावचत्वं गता भूमिः । यस्यां तत्पूर्वदिक्ककोणासन्नदेशयोर्भित्तिस्थकीलद्वयसंसाधितप्राग्दिशि निखातौ सरन्ध्रौ लोहकीलौ द्वावास्ताम् । तयोरेक उत्तरदिक्क एवाधुनावशिष्यते ।

अस्याश्च भूमेः समीपदेश एव चूर्णेष्टकानिर्मितं सार्धनवाङ्गुलाधिकैकहस्तव्यासं समीकृतभूमिकमेकं मण्डलमन्यच्च प्रस्तरमयं समभूमिकं सप्ताङ्गुलाधिकहस्तद्वयव्यासमस्ति । तन्निकट एव चैकं पाषाणघटितं सममहीकमेकादशाङ्गुलोत्तरैकहस्तपरिमितबाहुकं वर्गाकारं चतुरस्रं वर्तते । एतन्मण्डलद्वयं वर्गक्षेत्रं चेदानीं परिमृष्टविभागचिह्नं पूर्वं शङ्कुच्छाया दिगंशांश्चावगन्तुं निरमायीति प्रतिभाति ।

Digitized by Google

अस्ति चास्य भित्तियन्त्रस्योत्तरदिशः किंचित् पूर्वदिग्भागे स्वमध्यस्थया संसाधितदक्षिणोत्तरकाष्ठायां चूर्णेष्टकापाषाणैर्निर्मितया हस्तत्रयविस्तारया दैर्घ्ये चतुर्विंशतिकरया प्रस्तरमयध्रुवाभिमुखोन्नतरथ्यीनोपरितनभागया दक्षिणदिशि मूलभागे साङ्घ्रिवेदकरैरुत्तरतोऽग्रभागे चाङ्गुलत्रितयोनपञ्चदशहस्तैरुच्छ्रितयान्तर्गतसोपानया शङ्कुसंज्ञिकया भित्त्या विशिष्टं पूर्वपश्चिमभागयोः प्रत्येकमेकैकेन वृत्तपरिधिचतुर्थांशाभ्यधिकदैर्घ्येण किंचिदूनकरचतुष्टयविस्तारेण सार्धनवाङ्गुलपिण्डेन शङ्कुपालिस्थितकेन्द्रेण षड्ढस्तपरिमितान्तर्व्यासार्धेन पाषाणमयचापेन सहितं चान्यदेकं यन्त्रसम्राडाख्यं महद्यन्त्रम् । यत्र प्रतिचापमुभयतः पाली वृत्तचतुर्थांशः समैः पञ्चदशभिर्घटीविभागैरङ्कितः । सोऽप्येकैको विभागस्तुल्यैः किंचिदूनाङ्गुलत्रयायामैः षड्भिर्विभागैश्चिह्नितोऽस्ति । शङ्कुपालौ च प्रतिचापपालिकेन्द्रस्थानमेकैकं लघु लोहमयवलयं वर्त्तते ।

अस्मिंश्च यन्त्रे दिवा चापपालौ शङ्कुमूलात् तत्पालिच्छायां यावद्यावन्तो घटीविभागास्तावत्यो नतघटिकाः शङ्कोः पाश्चात्यभागे छायापाते मध्याह्नात् पूर्वं पौरस्त्ये च ततोऽनन्तरमवगम्याः । एतच्छायाप्रान्तस्यांशस्य समीपतः सम्यगवलोकनाय प्रतिचापमुभयतः प्रस्तरा आरोहणमार्गा निर्मिताः सन्ति । किन्त्वत्रेदानीमुक्तचापयोः स्वाग्रभागे भारातिशयेन वास्तवस्थानादीषच्चलितत्वादत्रत्यच्छायातः कालज्ञानं किंचित् स्थूलं भवति ।

एवमत्रार्कात् पतिता शङ्कुपालिच्छाया यद्वद्व्यक्तमवलोक्यते न तद्वद्धिमांशोः स्पष्टा भवति । भौमादिग्रहनक्षत्रेभ्यस्तु छायैव नोत्पद्यत इत्यस्माद्यन्त्रात् कथं तेषां नतकालावगमः स्यादित्येतदर्थमुच्यते ।

अत्यन्तमृज्वीं धातुमयीं सूक्ष्मां नलिकां निर्माय तस्या एकमग्रं चापपालावपरं च शङ्कुपालौ तथा न्यसेद्यथा यस्य ग्रहस्य नक्षत्रस्य वा नतकालो ज्ञातव्यः स चापाधरपालिगतया दृष्ट्या नलिकासुषिरे दृश्येत । तथा च नलिकासक्तचापपालिस्थानान्नतकालावगमः स्फुटः स्याच्छङ्कुपालौ च यत्र नलिकासंगस्तस्मात् स्थानात् तच्चापपालिकेन्द्रं यावत् तस्य ग्रहस्य नक्षत्रस्य वा क्रान्तेः स्पर्शरेखा स्यात् । एवमस्माद्यन्त्रात् सूर्यादिग्रहाणां नक्षत्राणां च नतकाला अपमाश्च सम्यगवगन्तुं शक्यन्ते । नक्षत्रस्य विषुवकालोऽप्यस्मादवगम्यते । सचैवम् ।

अस्तं जिगमिषोर्भास्करस्य नतकालं विज्ञाय ततो यावता कालेनावगन्तव्यविषुवकालं नक्षत्रमाकाशे सम्यगवलोक्येत तावान् घटीयन्त्रेणावगम्यः । तस्यार्कनतकालस्य च योगस्तात्कालिकोऽहर्पतेर्नतकालो भवति । स च भास्वतस्तात्कालिकेन विषुवकालेन युक्तो दशमलग्नस्य विषुवकालो ज्ञायते । सोऽपि तस्य नक्षत्रस्य तत्कालेऽवगतेन नतकालेन प्रागपरकपालक्रमेण युतोनितस्तन्नक्षत्रविषुवकालो भवति ।

अस्मिन्नपि यन्त्रे शङ्कोः पूर्वपार्श्वेऽन्यदेकं भित्तियन्त्रं पूर्वोक्तवदेव विरचितमास्ते । किन्त्वत्र कीलयोर्विप्रकर्षोऽङ्गुलद्वयोनसप्तकरमितोऽस्ति ।

अस्माच्च यन्त्रात् पूर्वस्यां दिशि प्रास्तरमेकं नाडीमण्डलाभिधं यन्त्रं विषुवद्वृत्ततले वर्तते । यस्योत्तरपार्श्वेऽङ्गुलद्वयाधिककरत्रयव्यासमूर्ध्वाधरतिर्यग्रेखाभ्यां विहिततुल्यचतुर्विभागं प्रतिपदं नवत्या भागैरङ्कितं केन्द्रमध्यस्थध्रुवाभिमुखलोहकीलं वृत्तं कृतमस्ति । तस्य च कीलस्य छायया सौम्यगोले स्थितस्य रवेर्नक्षत्रस्य वा नतकालो ज्ञायते । एतद्यन्त्रदक्षिणपार्श्वमपि याम्यगोलस्थस्य भस्य भास्वतो वा नतकालावगमाय त्रयोदशाङ्गुलाधिकैकहस्तव्यासेन पूर्ववदूर्ध्वाधरतिर्यग्रेखाभ्यां भांशैश्चाङ्कितेन मण्डलेन मण्डितं वर्त्तते ।

अस्य च प्राग्भागे यन्त्रसम्राडाकारमेवान्यल्लघु यन्त्रं दैर्घ्ये सप्तदशाङ्गुलोत्तरषड्ढस्तमितेन विंशत्यङ्गुलविस्तारेण याम्यभागे सत्र्यंशकराभ्यां सौम्ये च सार्धपञ्चहस्तैरुच्छ्रितेन शङ्कुना विशिष्टमङ्गुलचतुष्टयाधिकैकहस्तविस्ताराभ्यां पञ्चाङ्गुलपिण्डाभ्यां सत्र्यंशहस्तद्वयविष्कम्भार्धबाह्यपालिभ्यां चापाभ्यां सहितं च वर्त्तते ।

अस्ति चास्य यन्त्रस्य निकट एव भित्तिद्वयमध्यवर्ति लोहमयं चलमण्डलं बाह्यपालौ पित्तलपत्रेणावृतं ध्रुवाभिमुखव्यासकमङ्गुलत्रयविस्तारमर्धाङ्गुलपिण्डं पार्श्वयोर्भांशैः प्रत्यंशं तुल्यैश्चतुर्भिर्विभागैश्चाङ्कितं केन्द्रस्थकीले प्रोतयाङ्गुलत्रयविस्तारया मध्यचिह्नितसूत्रया पित्तलपट्ट्या विशिष्टं चक्रयन्त्रं नाम ।

अस्माच्च यन्त्रात् खेटस्य भस्य वा क्रान्तेरवगमाय चक्रं तन्मध्यगतपट्टीं च तथा चालयेद्यथा यस्य क्रान्तिर्ज्ञातुमिष्यते तत् पट्ट्यधोगतया दृष्ट्या विलोकितं सत् पट्टीमध्यगतसूत्रे दृश्येत । तथा चास्य ध्रुवाभिमुखव्यासे योऽन्यो लम्बरूपो व्यासः स्यात् तस्य पट्ट्याश्च मध्ये यावन्तः परिध्यंशास्तावन्तस्तस्य खेटस्य नक्षत्रस्य वा क्रान्त्यंशा वेदितव्याः ।

अत्रैव यन्त्रे ग्रहनक्षत्राणां नतकालाद्यवगमायाधारवृत्तादीन्यन्यान्यपि वलयान्यासन् । परमिदानीं तानि नष्टानीति भाति । या चात्र पट्टी वर्तते तयेदानीं वक्रत्वं गतया प्रोक्तवत् क्रान्तिज्ञानं न भवति ।

अस्ति चास्माद्यन्त्रात् प्राच्यां दिशि विपुलं दिगंशयन्त्रम् । यन्मध्यगतो वृत्ताकारो दशाङ्गुलोत्तरहस्तद्वयव्यासो पादोनहस्तत्रयोत्सेधः स्वकेन्द्रस्थाननिखातसरन्ध्रायकीलः स्तम्भः स्वस्मात् चतुरङ्गुलोनकरपञ्चकान्तरे वर्तमानया स्तम्भतुल्योच्छ्रायया रूपहस्तमितविस्तारया भित्त्या वृतस्तद्भित्तेरपि किंचिदधि-

Digitized by Google

कहस्तद्वयान्तरे बहिर्भागे स्थितयोच्छ्राये पूर्वभित्तेर्द्विगुणया सञ्चंशैकहस्तविस्तारयापरभित्त्या चावेष्टितोऽस्ति । अनयोश्च भित्त्योः प्रत्येकमुपरितनभागो दिग्भिर्भांशैश्चाङ्कितो वर्तते। तथा बाह्यभित्तेश्चोपरि चतुर्दिक्षु चत्वारो लोहकीला निखाताः सन्ति ।

एवंविधमिदं महायन्त्रं दिगंशज्ञानार्थमुपयुज्यते। तथाहि। बाह्यभित्तेरुपरि रोपितयोः पूर्वपश्चिमकीलयोर्बद्धस्य सूत्रस्य तथाविधयोर्दक्षिणोदक्कीलयोर्बद्धेन सूत्रेण सह संपातो मध्यस्तम्भकेन्द्रस्योपरितनदेश एव वर्तते। ततस्तृतीयस्य प्रगुणस्य सूत्रस्यैकमग्रं स्तम्भकेन्द्रे दृढं बध्वान्यदग्रं बाह्यभित्तिपालौ नीत्वा तथा चालयेद्यथा यस्य ग्रहस्य दिगंशा वेद्यास्तस्मिन् मध्यभित्तिबाह्यपालिगतदृष्ट्या विलोक्यमाने स ग्रहः प्रोक्तसूत्रद्वयसंपातश्च तृतीयसूत्रगतौ स्याताम्। तथा च बाह्यभित्तिपालौ प्राक्चिन्हात् पश्चिमचिन्हाद्वा तृतीयसूत्रपर्यन्तं यावन्तोऽशास्तावन्तस्तस्य ग्रहस्य दिगंशा भवन्ति।

एवमुक्तेषु यन्त्रेषु विभागचिन्हानि प्रायो लोपमगमन्। कुचिद्यन्त्राण्यप्येकदेशे भग्नतां नतिं चाप्नुवन् ।

इत्थं संक्षेपतो मानमन्दिरान्तरवर्तिनाम् ।
यन्त्राणां वर्णितानीह स्वरूपाणि फलानि च ॥

॥ इति शिवम् ॥

एतस्य निर्माता

बापूदेवशास्त्री काशिकपाठालयीयज्योतिःशास्त्राध्यापकः ।

REMARKS ON PROF. GOLDSTÜCKER'S ENLARGED EDITION OF WILSON'S SANSKRIT DICTIONARY.

Although but six parts of this great Dictionary have yet appeared, not finishing even the first letter, a cursory glance over the pages is sufficient to strike the reader with the uncommon arduousness of the task which this eminent Sanskritist has undertaken. There is scarcely a page in the work that does not bear ample testimony to the vast erudition, profound grammatical knowledge and extensive researches of the author. But the work which the Professor has projected, is, I think, too vast to be accomplished by one man. Instead of contenting himself with giving all the different meanings of words, each illustrated, when necessary, by one or two examples, the Professor often writes under them elaborate articles on subjects connected with history, philosophy, grammar, rhetoric &c. &c., replete with a superabundance of quotations drawn from an infinite variety of sources. The consequence of this attempt to do too much is, that inaccuracies and errors have crept in, which are, not unfrequently, serious and bewildering.

I shall point out a few errors committed in the interpretation of some of the technical terms used in Rhetoric. The Professor writes :—

"अभिधान—A word; e. g. the Tíká on the Sáhityad: अन्विताभिधानवादिनो (i. e. those who argue that the words of a sentence are logically connected) मीमांसकगुरवस्तु क्रियाकारकयोः प्रथमत एवान्वयबोधो जायते ततः शक्तिग्रहः—[इत्याहुः]."

The term अभिधान is not used, as the Professor supposes, in the sense of *word* in the compound अन्विताभिधानवादिनः but in that of *expression, or an act of expressing.* अन्विताभिधानवादिनः (those who hold the expression of the logically connected) is the designation of the Mímánsakas, as contradistinguished from the old Naiyáyikas, the अभिहितान्वयवादिनः (i. e. those who hold the logical connection of the expressed). The former reject the tenet of the latter that the words of a sentence at first severally suggest *distinct* ideas, the *connection* whereof is *afterwards* suggested by the sentence as a whole, through that power belonging to it which is termed Purport. For, according to them, all our notions of agent, action, object, instrument, position and the like being necessarily connected, the words cannot convey distinct notions *to be* connected afterwards, but convey them *already* connected.

"अनुचितार्थ — Having an unknown or an unusual meaning (as a word; in rhetoric considered as one of the पददोष q. v.; e. g. if the word पशु, animal, is used in the sense of sacrificial animal in a poetical passage, while it has this sense only in the ritual literature, or with the intention of implying timidity which it does not imply."

The above term means 'Having an *improper* signification.' The passage referred to by the Professor is :—

शूरा अमरतां यान्ति पशुभूता रणाध्वरे ।

पशु is not faulty here because it is used in the sense of sacrificial animal, that meaning being by no means restricted to the ritual literature, but because it *does* imply timidity or wretchedness which was *not* intended to be implied, being inconsistent with the character of a hero शूर.

"अपरोपित — Thrown off, shot off; e. g.

यत्र पतत्यबलानां दृष्टि र्निशिताः पतन्ति तत्र शराः ।
तच्चापरोपितशरो धावत्यासां पुरः स्मरो मन्ये ॥"

The above stanza is no exemplification of the present word, for the *sandhi* in तच्चापरोपितशरः is not to be separated thus— तत् + च + अपरोपितशरः, but thus— तत् + चाप-रोपितशरः, as the former analysis brings in the unmeaning expletive च. Besides, the etymology of the word अपरोपित can not well warrant its use in the sense of *thrown off*, much less in that of *shot off*. The following line of an exactly similar import, occurring in the same book, *viz.*, the Sáhitya-darpaṇa, from which the above couplet is taken, seems to favour the latter analysis :—

ईक्षसे यत् कटाक्षेण तदा धन्वी मनोभवः ।

The Professor's rendering (p. 98, c. 2, l. 9), therefore, should be altered thus: "Wherever falls the look of woman there fall sharpened arrows; I think therefore that the God of love runs before them *with his bow furnished with arrows.*"

"अभवन्मतयोग — Not conveying accurately by a sentence the intended sense, (*a*) by connecting syntactically words which have no logical relation to each other, or (*b*) by disconnecting syntactically words which are logically connected, or (*c*) by erring in the mode of connection; e. g. (*a*) in the sentence :—

Digitized by Google

येषां तास्त्रिदशेभदानसरितः पीताः प्रतापोष्मभि-
र्लीलापानभुवश्च चन्दनतरुच्छायासु* यैः कल्पिताः ।
येषां हुङ्कृतयः कृतामरपतिक्षोभाः क्षपाचारिणां
किन्तैस्त्वत्परितोषकारि विहितं किञ्चित्प्रवादोचितम् ॥

There is no logical relation between the words in the relative and those in the correlative sentence.—"

The remark on the example is not correct, as will be evident from the following translation of the stanza:

'They, the flames of whose triumphant energy drank up those streams of juice *flowing from the temples* of the divine elephants, who made the shades of Indra's garden the places of their mirthful carousals, whose—the night-prowlers'—roarings troubled the prince of the gods—what have they done to thy satisfaction and in accordance with the report of their prowess?'

The blemish of the stanza consists in the use of the word क्षपाचारिन् (night-prowler) in one of the Protatic, or relative, clauses, when, as representing the subject of the sentence, it ought to have been employed in the Apodosis, or correlative clause. The example is exactly similar to the one cited by the Professor to illustrate his second division of the fault, marked *b*.

"अमतपरार्थ — Having another sense (*viz.*, one) which is at variance with (that of) the subject matter (as a sentence)—*Kávyaprak.* • • यथा ॥ राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी । गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा ; the erotic character of which sentence, as the *Kávyapra.* observes, is at variance with the character of the poem where it occurs."

The above stanza occurs in the 11th canto of the Raghuvanśa. It is scarcely necessary to add that its character is not erotic but disgustful. It is faulty not because its character is at variance with that of the poem in which it occurs (which is not the case, as the Raghuvanśa is of a varied character and devotes more than one canto to erotic descriptions), but because its *second* sense is erotic and is incongruous with the principal meaning.

Such errors are not confined to the explanation of technical terms. Words of common occurrence are also sometimes found misinterpreted. For instance, the word अक्लेद्य,† instead of being rendered 'not to be wet,' is rendered 'not to be distressed.' This error however is Prof. Wilson's and is only retained by the editor. The word अभव्य, besides other interpretations, is explained to mean *deceitful*, and the following śloka of the Mahábhárata is cited to anthorize this sense:—

एतस्मिन्नन्तरे रक्षो रावणः प्रत्यदृश्यत ।
अभव्यो भव्यरूपेण भस्मच्छन्न इवानलः ॥

अभव्यो भव्यरूपेण is rendered 'deceitful on account of his future appearance,' when it evidently means—'evil, with a good appearance.'

* चन्दनतरुच्छायासु is a mistake of the printed Kávya-prakáśa for नन्दनतरु——.

† There is indeed a root क्लिद् given in Wilson and Rádhákánta Deva and interpreted *to lament* or *bewail.* Even if it did mean *to distress*, that would be no ground for setting aside, in the present instance, the far more common meaning of *to wet.* Need I here remind the reader of that well known sublime couplet of the *Bhagavad-gítá?*—

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एवच ।
नित्यः सर्व्वगतः स्थाणुरचलोऽयं सनातनः ॥

Nowhere however in the pages of the Dictionary, I feel myself bound to observe, is the reader disgusted with any the faintest mark of that presumptuous and perverse pedantry which leads the author, while professing to write a *Sanskrit* Dictionary, outrageously to strip Sanskrit words of their native forms, and capriciously to force upon them foreign and uncouth shapes such as make it difficult even for those to recognize them who bear the most affectionate and natural relation to them—the Hindus. Great indeed would be the work—wondrous as the production of one man—though not entirely to be relied upon as an authority—even with errors such as have been pointed out, were there any chance of its ever being completed. As the case is, it is much to be wished that the Professor would circumscribe the sphere of his work within narrower limits, and secure the chance of soon finishing a comprehensive Sanskrit and English Dictionary, the want of which is daily felt with growing urgency.

PRAMADÁDÁSA MITTRA.
ASSTT. ANGLO-SANSKRIT PROFESSOR.

EXAMINATION IN SANSKRIT, CALCUTTA UNIVERSITY.

The following subjects in Sanskrit are appointed for the examination for Honours and M. A. degree in 1867.

KÁLIDÁSA, ...	Śakuntalá and Meghadúta.
BHAVABHÚTI,	Víracharita and Uttararámacharitra.
ŚÚDRAKA, ...	Mrichchhakatí.
VÁṆA BHAṬṬA,	Kádambarí.
BHÁRAVI, ...	Kirátárjuníya, I.-III, XI-XIV.
MÁGHA, ...	Śiśupálavadha, I.-VI., XII.-XVI.
ŚRÍHARSHA,...	Naishadhacharita, I.-V., IX.-XII., XVII.
MAMMAṬA BHATTA,	Kávyaprakáśa.
VIŚWANÁTHA PANCHÁNANA,	Bhááshá parichcheda and Siddhánta Muktávali.
VÁCHASPATI MIŚRA,	Tattva Kaumudí.
PÁṆINI, ...	Káraka, Samása, as in the Siddhánta Kaumudí of Bhaṭṭoji Díkshita.

The Pandit.

The PANDIT may be ordered of the Publishers, Medical Hall Press, Benares; or through MESSRS TRÜBNER and Co. LONDON.

Annual subscription, in advance, including postage, Indian and English, Rs. 12-0-0 *per annum.*

PRINTED and PUBLISHED by E. J. LAZARUS and Co., at the MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 2. Benares July 2nd, 1866. Vol. I.

॥ कुमारसम्भवोत्तरखण्डवर्णनम् ॥

श्रीमद्भारतवर्षीयकवीन्द्रः कालिदासोऽनतिप्रौढे वयसि खण्डकाव्यं षडृतुसंहारं महाकाव्यं कुमारसम्भवं नाटकं मालविकाग्निमित्रमित्येतानि निबबन्ध । ततः प्रौढे बुद्धिप्रतिभाद्यतिशयवति वयसि खण्डकाव्यं मेघदूतं महाकाव्यं रघुवंशं नाटकं शाकुन्तलं जगतो भूषणभूतं प्रकाशयाम्बभूव । अथ परिणामोन्मुखवयाः स एव खण्डकाव्यं राक्षसकाव्यं महाकाव्यं नलोदयं नाटकं विक्रमोर्वशीयं रसवन्त्यपि कष्टग्राह्यरसानि निर्ममे ।

तेषु च काव्येषु मध्ये कुमारसम्भवं सप्तमसर्गावध्येव व्याख्यानाध्ययनाध्यापनकर्मसु प्ररूढं न ततः परं । तत्र कारणं साहित्यशास्त्राचार्यैर्मम्मटादिभिः काव्ये दिव्यप्रकृतीनां सम्भोगवर्णनस्यानौचित्यात् प्रतिषेधकरणं ।

एवं स्थिते कालेन तद् विलोपं गन्तुं प्रवृत्तं तदा चैकं पुस्तकं कलिकातानगरे उपलब्धमपरं च वाराणस्यां तयोश्च वाराणसीस्थपुस्तकवर्तिनः पाठा यत्र शुद्धाः सन्ति तत्र तएव परिपालनार्हाः कलिकातापुस्तकं तु यत्र संशयोऽशुद्धिर्वा तत्र दर्शनमर्हति । अथैते सप्तैव सर्गाः कालिदासेन प्रणीता नेतरे दशेति ये वदन्ति तान्प्रति किञ्चिदुच्यते ॥

तथाहि । अष्टमसर्गस्थः षष्ठः श्लोकः सरस्वतीकण्ठाभरणव्याख्यायामुदाहृतोऽस्ति तद्यथा । यदि न वक्ष्यामि तदा गम्यामथ वक्ष्यामि तदा धृष्टामाकलयिष्यतीति जानन्त्या द्वयमुत्तरमौचित्यापन्नं स्यात् । शिरःकम्प एकाक्षरं च । तत्रायः कालिदासेन प्रयुक्तः । मूर्धकम्पमयमुत्तरं ददाविति ।

अथाष्टमसर्गात् परो यो ग्रन्थः सोऽपि कालिदासेनैव प्रणीत इत्यत्र हेतुः प्रदर्श्यते तथाहि । प्रथमे वयस्यारब्धं कुमारसम्भवनामाङ्कितं काव्यं कुमारोत्पत्तिमवर्णयित्वैव प्रेक्षावत्तमोऽप्युन्मत्त इवोत्सृजेदिति न सम्भाव्यते यदा तु कुमारोत्पत्तिं दशमे सर्गे वर्णयामास तदा तत्प्रयोजनतया सप्तमसर्गाभ्यन्तर एवोपन्यस्तं तारकासुरविजयं सप्तभिः सर्गैरुपन्यस्तवानिति ।

किञ्च कुमारसम्भवे ये श्लोकाः कालिदासेन सप्तमे सर्गे विवाहागतस्य हरस्य दर्शनायोत्सुकानां पौरवनितानामवस्थावर्णनाय विवाहक्रियावर्णनाय च विरचितास्त एव रघुवंशे सप्तमे सर्गेऽजस्य तादृशे प्रसङ्गे तयैवानुपूर्व्या प्रकरणानुरोधिविकारमात्रेण भिन्नयोपन्यस्ताः । तथा कुमारसम्भवे षोडशे सर्गेऽनुष्टुप्छन्दसा निबद्धा ये येऽर्था देवासुरयुद्धवर्णनप्रसङ्गे उपन्यस्तास्त एवाजस्य युद्धप्रस्तावे रघुवंशे सप्तमे सर्गे उपजातिच्छन्दसा तच्छन्दोनिर्वहणमात्रोपयोगिना विकारेणोपदर्शिताः । एवं कुमारसम्भवस्य द्वितीयतृतीयषष्ठदशमसर्गेषु स्थितान्यन्यान्यपि पद्यानि प्रस्तावमात्रोपयोगिविकृतिमन्ति रघुवंशस्य दशमषोडशपञ्चदशसर्गेषु दृश्यन्त इति सम्भाव्यते सप्तदशसर्गमितस्य कुमारसम्भवस्यैकोनविंशतिसर्गपरिमाणेन रघुवंशेन समानकर्तृकत्वमित्यलं बहुनेति शम् ।

काशीस्थराजकीयपाठालये सांख्यशास्त्राचार्यो

विट्ठलशास्त्री ।

Digitized by Google

॥ श्रीगणेशायनमः ॥

पाणिपीडनविधेरनन्तरं
शैलराजदुहितुर्हरं प्रति ।
भावसाध्वसपरिग्रहादभूत्
कामदोहदसुखं मनोहरम् ॥ १ ॥
व्याहृता प्रतिवचो न सन्दधे
गन्तुमैच्छदवलम्बितांशुका ।
सेवतेस्म शयनं पराङ्मुखी
सा तथापि रतये पिनाकिनः ॥ २ ॥
कैतवेन शयिते कुतूहलात्
पार्वती प्रतिमुखं निपातितम् ।
चक्षुरुन्मिषति सस्मितं प्रिये
विद्युदाहतमिव न्यमीलयत् ॥ ३ ॥
नाभिदेशनिहितः सकम्पया
शङ्करस्य रुरुधे तया करः ।
तन्नितम्बमभवत् तदा स्वयं
दूरमुच्छ्वसितनीविबन्धनम् ॥ ४ ॥
एवमालि निगृहीतसाध्वसं
शङ्करो रहसि सेव्यतामिति ।
सा सखीभिरुपदिष्टमाकुला
नास्मरत् प्रमुखवर्त्तिनि प्रिये ॥ ५ ॥
अप्यवस्तुनि कथाप्रवृत्तये
प्रश्नतत्परमनङ्गशासनम् ।
वीक्षितेन परिगृह्य पार्वती
मूर्द्धकम्पमयमुत्तरं ददौ ॥ ६ ॥
शूलिनः करतलद्वयेन सा
सन्निरुध्य नयने हृतांशुका ।
तस्य पश्यति ललाटलोचने
मोघयत्नविधुरा रहस्यभूत् ॥ ७ ॥
चुम्बनेष्वधरदानवर्जितं
सन्नहस्तमदयोपगूहने ।
क्लिष्टमन्मथमपि प्रियं प्रभो-
र्दुर्लभप्रतिकृतं वधूरतम् ॥ ८ ॥
यन्मुखग्रहणमक्षताधरं
दत्तमव्रणपदं नखं च यत् ।
यद्रतं च सदयं हरस्य तत्
पार्वती विषहतेस्म नेतरत् ॥ ९ ॥
रात्रिवृत्तमनुयोक्तुमुद्यतं
सा विभातसमये सखीजनम् ।
नाकरोदपकुतूहलं ह्रिया
शंसितुञ्च हृदयेन तत्वरे ॥ १० ॥
दर्पणेच परिभोगदर्शिनी
पृष्ठतः प्रणयिनो निषेदुषः ।
प्रेक्ष्य बिम्बमनु बिम्बमात्मनः
कानिकान्यपि चकार लज्जया ॥ ११ ॥
नीलकण्ठपरिभुक्तयौवनां
तां विलोक्य जननी समाश्वसीत् ।
भर्तृवल्लभतया हि मानसीं
मातुरस्यति शुचं वधूजनः ॥ १२ ॥
वासराणि कतिचित् कथञ्चन
स्थाणुना पदमकार्य्यत प्रिया ।
ज्ञातमन्मथरसा शनैः शनैः
सा मुमोच रतिदुःखशीलताम् ॥ १३ ॥
सस्वजे प्रियमुरोनिपीडिता
प्रार्थितं मुखमनेन नाहरत् ।
मेखलाप्रणयलोलतां गतं
हस्तमस्य शिथिलं रुरोध सा ॥ १४ ॥
भावसूचितमदृष्टविप्रियं
चाटु तत्क्षणवियोगकातरम् ।
कैश्चिदेव दिवसैस्तदा तयोः
प्रेम रूढमितरेतराश्रयम् ॥ १५ ॥
तं यथात्मसदृशं वरं वधू-
रन्वरज्यत वरस्तथैव ताम् ।
सागरादनपगाहि जाह्नवी
सोऽपि तन्मुखरसैकनिर्वृतिः ॥ १६ ॥
शिष्यतां निधुवनोपदेशिनः
शङ्करस्य रहसि प्रपन्नया ।
शिक्षितं युवतिनैपुणं तया
तत् तदेव गुरुदक्षिणीकृतम् ॥ १७ ॥

Digitized by Google

दष्टमुक्तमधरोष्ठमम्बिका
वेदनाविधुतहस्तपल्लवा ।
शीतलेन निरवापयत्क्षणं
मौलिचन्द्रशकलेन शूलिनः ॥ १८ ॥
चुम्बनादलकचूर्णदूषितं
शङ्करोऽपि नयनं ललाटजम् ।
उच्छ्वसत्कमलगन्धये ददौ
पार्वतीवदनगन्धवाहिने ॥ १९ ॥
एवमिन्द्रियसुखस्य वर्त्मनः
सेवनादनुगृहीतमन्मथः ।
शैलराजभवने सहोमया
मासमात्रमवसद्वृषध्वजः ॥ २० ॥
सोऽनुमन्य हिमवन्तमात्मभू-
रात्मजाविरहदुःखपीडितम् ।
तत्र तत्र विजहार सम्पत-
न्नप्रमेयगतिना ककुद्मता ॥ २१ ॥
मेरुमेत्य मरुदाशुवाहनः
पार्वतीस्तनपुरस्कृतः कृती ।
हेमपल्लवविभङ्गसंस्तरा-
नन्वभूत् सुरतमर्दनक्षमान् ॥ २२ ॥
पद्मनाभचरणाङ्किताश्मसु
प्राप्तवत्स्वमृतविप्रुषो नवाः ।
मान्दरेषु कटकेषु चावसत्
पार्वतीवदनपद्मषट्पदः ॥ २३ ॥
रावणध्वनितभीतया तया
कण्ठसक्तमृदुबाहुबन्धनः ।
एकपिङ्गलगिरौ जगद्गुरु-
र्निर्विवेश विशदाः शशिप्रभाः ॥ २४ ॥
तस्य जातु मलयस्थलीरते-
र्धूतचन्दनवनः प्रियाक्लमम् ।
आचचाम सलवङ्गकेसर-
श्चाटुकार इव दक्षिणानिलः ॥ २५ ॥
हेमतामरसताडितप्रिया
तत्कराम्बुविनिमीलितेक्षणा ।
खे व्यगाहत तरङ्गिणीमुमा
मीनपङ्क्तिपुनरुक्तमेखला ॥ २६ ॥
तां पुलोमतनयालकोचितैः
पारिजातकुसुमैः प्रसाधयन् ।
नन्दने चिरमयुग्मलोचनः
सस्पृहं सुरवधूभिरैक्ष्यत ॥ २७ ॥
इत्यभौममनुभूय शङ्करः
पार्थिवं च वनितासखः सुखम् ।
लोहितायति कदाचिदातपे
गन्धमादनवनं व्यगाहत ॥ २८ ॥
तत्र काञ्चनशिलातलाश्रयो
नेत्रगम्यमवलोक्य भास्करम् ।
दक्षिणेतरभुजव्यपाश्रयां
व्याजहार सहधर्मचारिणीम् ॥ २९ ॥
पद्मकान्तिमरुणत्रिभागयोः
सङ्क्रमय्य तव नेत्रयोरिव ।
सङ्क्षये जगदिव प्रजेश्वरः
संहरत्यहरसावहर्पतिः ॥ ३० ॥
शीकरव्यतिकरं मरीचिभि-
र्दूरयत्यवनते विवस्वति ।
इन्द्रचापपरिवेषशून्यतां
निर्झराः प्रसवितुर्व्रजन्ति ते ॥ ३१ ॥
दष्टतामरसकेसरस्रजोः
क्रन्दतोर्विपरिवृत्तकण्ठयोः ।
निघ्नयोः सरसि चक्रवाकयो-
रल्पमन्तरमनल्पताङ्गतम् ॥ ३२ ॥
स्थानमाह्निकमपास्य दन्तिनः
सल्लकीविटपभङ्गवासितम् ।
आविभातचरणाय गृह्णते
वारि वारिरुहबद्धषट्पदम् ॥ ३३ ॥
पश्य पश्चिमदिगन्तलम्बिना
निर्मितं कथमिदं विवस्वता ।
दीर्घया प्रतिमया सरोऽम्भसां
तापनीयमिवसेतुबन्धनम् ॥ ३४ ॥
उत्तरन्ति विनिकीर्य पल्वलम्
गाढपङ्कमतिवाहितातपाः ।

दंष्ट्रिणो वनवराहयूथपा
दष्टभङ्गुरबिसाङ्कुरा इव ॥ ३५ ॥
एष वृक्षशिखरे कृतास्पदो
जातरूपरसगौरमण्डलः ।
हीयमानमहरत्ययातपम्
पीवरोरु पिबतीव बर्हिणः ॥ ३६ ॥
पूर्वभागतिमिरप्रवृत्तिभि-
र्व्यक्तपङ्कमिव जातमेकतः ।
खं हृतातपजलं विवस्वता
भाति किञ्चिदिव शेषवत् सरः ॥ ३७ ॥
आविशद्भिरुटजाङ्गणं मृगै-
र्मूलसेकसरसैश्च वृक्षकैः ।
आश्रमाः प्रविशदग्निधेनवो
बिभ्रति श्रियमुदीरिताग्नयः ॥ ३८ ॥
बद्धकोशमपि तिष्ठति क्षणम्
सावशेषविवरं कुशेशयम् ।
षट्पदाय वसतिं ग्रहीष्यते
प्रीतिपूर्वमिव दातुमन्तरम् ॥ ३९ ॥
दूरमग्रपरिमेयरश्मिना
वारुणीदिगरुणेन भानुना ।
भाति केसरलतेव मण्डिता
बन्धुजीवकुसुमेन कन्यका ॥ ४० ॥
सामभिः सहचराः सहस्रशः
स्यन्दनाश्वहृदयङ्गमस्वरैः ।
भानुमग्निपरिकीर्णतेजसं
संस्तुवन्ति किरणोष्मपायिनः ॥ ४१ ॥
सोऽयमानतशिरोधरैर्हयैः
कर्णचामरविघट्टितेक्षणैः ।
अस्तमेति युगभुग्नकेसरैः
सन्निधाय दिवसं महोदधौ ॥ ४२ ॥
खं प्रसुप्तमिव संस्थिते रवौ
तेजसो महत ईदृशी गतिः ।
तत्प्रकाशयति यावदुद्गतं
मीलनाय खलु तावता च्युतम् ॥ ४३ ॥
सन्ध्ययाप्यनुगतं रवेः पदं
घर्ममस्तशिखरे समर्पितम् ।
येन पूर्वमुदये पुरस्कृता
नानुयास्यति कथं तमापदि ॥ ४४ ॥
रक्तपीतकपिशाः पयोमुचाम्
कोटयः कुटिलकेशि भान्त्यमूः ।
द्रक्ष्यसि त्वमिति सन्धिवेलया
वर्तिकाभिरिव साधु मण्डिताः ॥ ४५ ॥
सिंहकेसरसटासु भूभृताम्
पल्लवप्रसविषु द्रुमेषु च ।
पश्य धातुशिखरेषु चात्मनः
संविभक्तमिव सान्ध्यमातपम् ॥ ४६ ॥
पार्श्विमुक्तवसुधास्तपस्विनः
पावनाम्बुविहिताञ्जलिक्रियाः ।
ब्रह्म गूढमभिसान्ध्यमादृताः
सिद्धये विधिविदो गृणन्त्यमी ॥ ४७ ॥
तन्मुहूर्तमनुमन्तुमर्हसि
प्रस्तुताय नियमाय मामपि ।
त्वां विनोदनिपुणः सखीजनो
वल्गुवादिनि विनोदयिष्यति ॥ ४८ ॥
निर्विभुज्य दशनच्छदं ततो
वाचि भर्तुरवधीरणापरा ।
शैलराजतनया समीपगा-
माललाप विजयामहेतुकम् ॥ ४९ ॥
ईश्वरोऽपि दिवसात्ययोचितम्
मन्त्रपूर्वमनुतस्थिवान् विधिम् ।
पार्वतीमवचनामसूयया
प्रत्युपेत्य पुनराह सस्मितम् ॥ ५० ॥
मुञ्च कोपमनिमित्तकोपने
सन्ध्यया प्रणमितोऽस्मि नान्यया ।
किं न वेत्सि सहधर्म्मचारिणं
चक्रवाकसमवृत्तिमात्मनः ॥ ५१ ॥
निर्मितेषु पितृषु स्वयम्भुवा
या तनुः सुतनु पूर्वमुज्झिता ।
सेयमस्तमुदयञ्च सेव्यते
तेन मानिनि ममात्र गौरवम् ॥ ५२ ॥

Digitized by Google

तामिमां तिमिरवृत्तिपीडिताम्
भूमिलग्नमिव सम्प्रति स्थिताम् ।
एकतस्तटतमालमालिनीम्
पश्य धातुरसनिम्नगामिव ॥ ५३ ॥

सान्ध्यमस्तमितशेषमातपं
रक्तलेखमपरा बिभर्ति दिक् ।
सम्परायवसुधा सशोणितम्
मण्डलाग्रमिव तिर्यगुज्झितम् ॥ ५४ ॥

यामिनीदिवससन्धिसम्भवे
तेजसि व्यवहिते सुमेरुणा ।
एतदन्धतमसं निरङ्कुशं
दिक्षु दीर्घनयने विजृम्भते ॥ ५५ ॥

नोर्ध्वमीक्षणगतिर्न चाप्यधो
नाभितो न पुरतो न पृष्ठतः ।
लोक एष तिमिरोल्बवेष्टितो
गर्भवास इव वर्त्तते निशि ॥ ५६ ॥

शुद्धमाविलमवस्थितं चलम्
वक्रमार्जवगुणान्वितञ्च यत् ।
सर्वमेव तमसा समीकृतं
धिङ्महत्त्वमसतां हृतान्तरम् ॥ ५७ ॥

नूनमुन्नयति यज्वनाम्पतिः
शार्वरस्य तमसो निषिद्धये ।
पुण्डरीकमुखि पश्य दिङ्मुखं
केतकैरिव रजोभिरावृतम् ॥ ५८ ॥

मन्दरान्तरितमूर्त्तिना निशा
लक्ष्यते शशभृता सतारका ।
त्वं मया प्रियसखीसमागता
श्रोष्यतेव वचनानि पृष्ठतः ॥ ५९ ॥

रुद्धनिर्गमनमादिनक्षयात्
पूर्वदृष्टतनुचन्द्रिकास्मितम् ।
एतदुद्गिरति रात्रिनोदिना
दिग् रहस्यमिव चन्द्रमण्डलम् ॥ ६० ॥

पश्य पक्वफलिनीफलत्विषा
बिम्बलाञ्छितवियत्सरोऽम्भसा ।
विप्रकृष्टविवरं हिमांशुना
चक्रवाकमिथुनं विडम्ब्यते ॥ ६१ ॥

शक्यमोषधिपतेर्नवोदयाः
कर्णपूररचनाकृते तव ।
अप्रगल्भयवसूचिकोमलाः
छेत्तुमग्रनखसम्पुटैः कराः ॥ ६२ ॥

अङ्गुलीभिरिव केशसञ्चयं
सन्निगृह्य तिमिरं मरीचिभिः ।
कुड्मलीकृतसरोजलोचनं
चुम्बतीव रजनीमुखं शशी ॥ ६३ ॥

पश्य पार्वति नवेन्दुरश्मिभि-
र्भिन्नसान्द्रतिमिरं नभस्तलम् ।
लक्ष्यते द्विरदभोगदूषितम्
सप्रसादमिव मानसं सरः ॥ ६४ ॥

रक्तभावमपहाय चन्द्रमा
जात एष परिशुद्धमण्डलः ।
विक्रिया न खलु कालदोषजा
निर्मलप्रकृतिषु स्थिरोदया ॥ ६५ ॥

उन्नतेषु शशिनः प्रभा स्थिता
निम्नसंश्रयपरं निशातमः ।
नूनमात्मसदृशी प्रकल्पिता
वेधसेह गुणदोषयोर्गतिः ॥ ६६ ॥

चन्द्रपादजनितप्रवृत्तिभि-
श्चन्द्रकान्तजलबिन्दुभिर्गिरिः ।
मेखलातरुषु निद्रितानिमान्
बोधयत्यसमये शिखण्डिनः ॥ ६७ ॥

कल्पवृक्षशिखरेषु सम्प्रति
प्रस्फुरद्भिरविकल्पसुन्दरि ।
हारयष्टिगणनामिवांशुभिः
कर्तुमुद्यतकुतूहलःशशी ॥ ६८ ॥

उन्नतावनतभागवत्तया
चन्द्रिका सतिमिरा गिरेरियम् ।
भक्तिभिर्बहुविधाभिरर्पिता
भाति भूतिरिव मत्तदन्तिनः ॥ ६९ ॥

एतदुच्छ्वसितपीतमैन्दवं
वोढुमक्षममिव प्रभारसम् ।

Digitized by Google

मुक्तषट्पदविरावमञ्जसा
भिद्यते कुमुदमानिबन्धनात् ॥ ७० ॥
पश्य कल्पतरुलम्बि शुद्धया
ज्योत्स्नया जनितरूपसंशयम् ।
मारुते चलति चण्डिके चलम्
व्यज्यते विपरिवृत्तमंशुकम् ॥ ७१ ॥
शक्यमङ्गुलिभिरुद्धृतैरधः
शाखिनां पतितपुष्पकोमलैः ।
पत्रजर्जरशशिप्रभालवै-
रेभिरुत्कचयितुं तवालकम् ॥ ७२ ॥
एष चारुमुखि पश्य तारया
युज्यते तरलबिम्बया शशी ।
साध्वसादुपगतप्रकम्पया
कन्ययेव नवदीक्षया वरः ॥ ७३ ॥
पाकपाण्डुशरकाण्डगौरयो-
रुल्लसत्प्रतिकृतिप्रसन्नयोः ।
रोहतीव तव गण्डलेखयो-
श्चन्द्रबिम्बनिहिताक्षि चन्द्रिका ॥ ७४ ॥
लोहितार्कमणिभाजनार्पितम्
कल्पवृक्षमधु बिभ्रती स्वयम् ।
त्वामियं स्थितिमतीमुपस्थिता
गन्धमादनवनाधिदेवता ॥ ७५ ॥
आर्द्रकेसरसुगन्धि ते मुखम्
मत्तमेव नयनं स्वभावतः ।
अत्र लब्धवसतिर्गुणान्तरं
किं विलासिनि मदः करिष्यति ॥ ७६ ॥
मान्यभक्तिरथवा सखीजनः
सेव्यतामिदमनङ्गदीपनम् ।
इत्युदारमभिधाय शङ्करस्-
तामपाययत पानमम्बिकां ॥ ७७ ॥
पार्वती तदुपयोगसम्भवाम्
विक्रियामपि सतीं मनोहराम् ।
अप्रतर्क्यविधियोगनिर्मिता-
माम्रतेव सहकारतां ययौ ॥ ७८ ॥
तत्क्षणे विपरिवर्तितह्रियो-
र्नेष्यतोः शयनमिद्धरागयोः ।
सा बभूव वशवर्तिनी द्वयोः
शूलिनः सुवदना मदस्य च ॥ ७९ ॥
घूर्णमाननयनं स्खलद्वचः
स्वेदबिन्दुमदकारणस्मितम् ।
आननेन न तु तावदीश्वर-
श्चक्षुषा चिरमुमामुखं पपौ ॥ ८० ॥
तां विलम्बितपनीयमेखला-
मुद्वहन् जघनभारदुर्वहाम् ।
ध्यानसम्भृतविभूतिगोचरम्
प्राविशन्मणिशिलागृहं हरः ॥ ८१ ॥
तत्र हंसधवलोत्तरच्छदं
जाह्नवीपुलिनचारुदर्शनम् ।
अध्यशेत शयनं प्रियासखः
शारदाभ्रमिव रोहिणीपतिः ॥ ८२ ।
क्लिष्टकेशमवलुप्तचन्दनं
व्यत्ययार्पितनखं समत्सरम् ।
तस्य तच्छिदुरमेखलागुणम्
पार्वतीरतमभून्न तृप्तये ॥ ८३ ॥
केवलं प्रियतमादयालुना
ज्योतिषामवनतासु पङ्क्तिषु ।
तेन तत्परिगृहीतवक्षसा
नेत्रमीलनकुतूहलं कृतम् ॥ ८४ ॥
स व्यबुध्यत तया निशात्यये
शातकुम्भकमलाकरैः समम् ।
मूर्च्छनापरिगृहीतकैशिकैः
किन्नरैः समुपगीतमङ्गलः ॥ ८५ ॥
तौ क्षणं प्रशिथिलोपगूहनौ
दम्पती रचितमानसोर्मयः ।
पद्मभेदपिशुनाः सिषेविरे
गन्धमादनवनान्तमारुताः ॥ ८६ ॥
ऊरुमूलनखमार्गराजिभि-
स्तत्क्षणं हृतविलोचनो हरः ।
वाससः प्रशिथिलस्य संयमं
कुर्वतीं प्रियतमामवारयत् ॥ ८७ ॥

Digitized by Google

स प्रजागरकषायलोचनं
गाढदन्तपदताडिताधरम् ।
आकुलालकमरंस्त रागवान्
प्रेक्ष्य भिन्नतिलकं प्रियामुखम् ॥ ८८ ॥

तेन भिन्नविषमोत्तरच्छदम्
मध्यपीडितविसूत्रमेखलम् ।
निर्मलेऽपि शयनं निशात्यये
नोज्झितं चरणरागलाञ्छितम् ॥ ८९ ॥

स प्रियामुखरसं दिवानिशं
हर्षवृद्धिजननं सिषेविषुः ।
दर्शनप्रणयिनामदृश्यता-
माजगाम विजयानिवेदितः ॥ ९० ॥

समदिवसनिशीथं सङ्गिनस्तत्र शम्भोः
शतमगमदृतूनां सार्द्धमेका निशेव ।
नच सुरतसुखेभ्यश्छिन्नतृष्णो बभूव
ज्वलनइव समुद्रान्तर्गतस्तज्जलेषु ॥ ९१ ॥

इतिश्रीकुमारसम्भवे महाकाव्ये क-
वीन्द्रकालिदासकृतौ शिवयोः संभोग-
वर्णनोनामाष्टमः सर्गः ॥ ८ ॥

बहुधा जातिविषये विवदन्ते विपश्चितः ।
प्रभाकरमतेनायं तेषां प्रत्यास उच्यते ॥ १ ॥

केचिदाचक्षते जातिरिति विकल्पविलसितमिति । एकेतु सतीमपि जातिमाश्रयेभ्यो ऽभिन्नामनुमन्यन्ते । अन्येतु भिन्नामप्यनुमेयामाहुः । अपरेतु भिन्नाभिन्नामिच्छन्ति । तथाचाजातावपि जातिव्यवहारो बहुलमुपलभ्यते केषाञ्चिदिति तन्निराकरणायेदमारभ्यते ।

जातिराश्रयतो भिन्ना प्रत्यक्षज्ञानगोचरः ।
पूर्वाकारावमर्शेन प्रभाकरगुरोर्मता ॥ २ ॥

नन्वाश्रयएव द्रव्यं जातेरसदिति सौगताः । तथाहि । न परमाणुषु चतुर्विधेषु पार्थिवाप्यतैजसवायवीयेषु जातिराश्रिताऽभिमता । अनुवृत्ताकारप्रत्ययवियोगात् । भिन्नेषु यदभिन्ना जातिरूपेयते तत्रानुवृत्ताकारावभासिनी बुद्धिरेव निबन्धनम् । नच कस्यचन जन्तोः परमाणुषु करणपथविदूरवर्त्तिषु निपुणमपि निरूपयतो ऽनुवृत्ताकारानुवर्त्तिनी मतिराविर्भवति । यापिचेयं परमाणुरिति मतिः सापि परिमाणलक्षणगुणकारणिका मीमांसकैरपि सङ्गीर्यते । पृथिवीत्वादिकमपि तत्तदसाधारणगन्धादिगुणसमवायमात्रलब्धात्मलाभायां पृथिव्यादिबुद्धौ निबन्धनम् । नच स्थूलेषु द्रव्येषु जातिः समवेयात् तेषामेव दुरुपगमत्वात् । नखलु स्थूलद्रव्यसम्भवो घटते । तथाहि द्व्यणुकादिप्रक्रमेण स्थूलद्रव्यान्तरारम्भकत्वानुपपत्तेः । नह्येकैकद्रव्यव्यतिरिक्तमपरमारम्भकमस्ति । संयोगोऽपिच तयोरनुपपन्नएव । सहि नैकैकद्रव्यसमवेतः । नाप्येकद्रव्यसमवेतः । एकैकातिरेकेणानेकस्यानुपपत्तेः । अनेनैव मार्गेण त्र्यणुकस्य त्रिभिर्द्व्यणुकैरारम्भणीयस्य महिमगुणशालिनः सम्भवो निरस्तः । तदेवं दूरीभूता स्थवीयसामवयविनामारम्भसङ्कथा । अपिचावयविनः किमवयवेषु प्रत्येकं कार्त्स्न्येन वृत्तिर्व्यासङ्गेनवेतिचिन्तनीयम् । नतावत् कार्त्स्न्येन वृत्तिमुपलभामहे एकैकावयवगतस्य तस्याप्रतिपत्तेः । एकैकावयवगतेच कम्पे रागेवा सकलस्यावयविनः कम्परागप्रतीतिप्रसङ्गात् । तथावयवान्तरेच कम्परागविरहे कम्परागविरहसमासक्तिः । अवयवीच कम्पेत नकम्पेत रज्येत नरज्येतचेति विषमां दशामाविशेत् । नापि व्यासङ्गेनावयविनो वृत्तिरवयवान्तरविरहात् । अवयवशालिनोहि केनचिदवयवेन क्वचन केनचित् क्वचनेति व्यासङ्गिनी वृत्तिरुपपत्तिमती । किन्त्वेकैकत्रावृत्तेरवृत्तिरेव एकैकातिरिक्तानेकाभावात् । किञ्च सकलावयवग्रहणएव नियमेनावयवी ज्ञायेत । नच तथा सम्भवति । अवयवान्तरेणावयवान्तरतिरस्कारात् । नच प्रकारान्तरेण वृत्तिरिति वदितुं शक्यं अनुपपत्तेः प्रकारान्तरस्य । अवयवेभ्यश्चावयवी व्यतिरिच्यमानो ऽव्यतिरिच्यमानोवा न प्रमाणेन सङ्गच्छते । व्यतिरिक्तोहि तदग्रहेऽपि ग्रहणं कदाचिदनुभवेत् । नखलु भिन्नयोः सहोपलम्भनियमो घटयोरिव । तद्वदवयव्यपि भिद्यमानो नावयवैरेव सहोपलभ्येत । कस्याञ्चिदपि दशायामननुभूयमानेष्वप्यवयवेष्वनुभूयेत । नचावयविनमवयवानुभवमन्तरेण केचिदुपलभन्ते । अव्यतिरिच्यमानस्तु नास्त्येवेति वचनभङ्गिमात्रेणोक्तं भवति । तदेवमवयविद्रव्यमुपपत्तिभिरनुसन्धीयमानमेकान्ततो लीयते । कथंतर्हि स्थूलावभासिनी मनीषा समर्थनीया । इत्थं । उत्तराधरभावेन निरन्तरमुत्पन्नाः परमाणवएव समधिगतैन्द्रियकज्ञानजननयोग्यदशाविशेषाः प्रत्यक्षमीक्ष्यन्ते तांस्तु तथाभूताननुभवतस्तद्बलभावी मानस एव स्थूलविकल्पो विजृम्भते । दूरादिव तरुषु निरन्तरेषु समनुभूयमानेषु वनमिति मतिः । अतः स्थवीयसां द्रव्याणामाश्रयाभिमतानामयोगाज्जातिरपि तदाश्रिता नाभ्युपगममर्हति । अपिच जातिरपि नेन्द्रियज्ञानेन प्रतीयते । तस्या नित्यत्वेनाभ्युपगमात् । नहिनित्यं कस्मैचित् कार्याय पर्याप्तम् । तद्धि न शक्तस्वभावं नित्यं कार्योदयापत्तेः । अशक्तस्वभावंतु नित्यावि-

Digitized by Google

चिकित्सनायाशक्तिकं न किञ्चित् कुर्यात् । नचाञ्जनकमिन्द्रियज्ञानमनुभवति । योहि विषयः स्वस्यान्वयव्यतिरेकौ ज्ञानमनुकारयति स प्रत्यक्षः । किञ्च । समुन्मिषितचक्षुषश्चिराय विषयान्तरानुसन्धानव्यापृतस्य चित्तस्य पुरोवर्त्तिनौ स्वस्तिमतीं कामाक्षीं वा साक्षात्कुर्वाणस्य न जातिरपरा ऽवभासते । अन्यच्च जातिरसौ पिण्डैः सहोत्पद्यते विनश्यति वा । तथोपगमे स्वरूपहानिप्रसङ्गात् । एकाहि जातिरनेकाधिष्ठाना प्रतिज्ञायते । उत्पत्तिमती विनाशिनी चान्या ऽन्या स्यात् । विरुद्धधर्माध्यासस्य भेदापादकत्वात् । सेयं नित्या जातिरुदितवत्यां व्यक्तौ प्रतीयमाना नान्यत आगता निष्क्रियत्वात् । नच तत्रैवासीत् प्रागप्रतीतेः । नच स्थितिरपि युक्तिमती व्यक्तेरेवहि तस्या देशो नाकाशादिः । अनुत्पन्ना च व्यक्तिरिति क्वावतिष्ठतामाकृतिः । नचोत्पादो ऽप्यवतिष्ठते । तदेषा जातिरवतिष्ठते नावतिष्ठते चेति सङ्कटमापतितम् । किञ्च व्यक्तेरभिन्ना भिन्ना वोभयरूपा वा जातिरास्थेया । तत्र नाभिन्ना । तथाभावे व्यक्त्या सहोत्पादे विनाशे वा स्वरूपापहारापत्तिरिति पुरस्तादुपन्यस्तं व्यक्तिमात्राङ्गीकारे च को ऽस्मत्पक्षस्य भेद इत्यपि चिन्तया ऽन्तः सीदन्तु बहवः । अतो व्यक्तिमात्रमेव तत्त्वमिति वदतां साहायकमेवाचरितमनतिरेकिणीं जातिमुररीकुर्वाणैः । भिन्नत्वे ऽपि पिण्डग्रहणमन्तरेण ग्रहणापत्तिरुभयप्रतीतौ च सम्बन्धप्रतीतिसमासक्तिः । अस्त्येवेति चेत् । महदिदं वैयात्यं । कः खल्विह गवि गोत्वमिति मतिमभ्युपगच्छेदन्यत्र निरस्तत्रपायन्त्रणात् । भिन्नत्वे च वृत्तिप्रकारो दुर्निरूप एव । किं व्यासङ्गिनी वृत्तिरुत प्रत्येकपरिसमाप्तिमतीति । एकत्र परिसमाप्तावन्यत्र न वर्त्ततेति पुनरपि स्वरूपापहारः । अव्यासङ्गो ऽपि कालत्रयवर्त्तिनीषु व्यक्तिष्वनुपपन्न एव । प्रत्येकं च गौरिति प्रत्ययो विकल्पमात्रमित्यङ्गीकृतं स्यात् । नचोभयरूपता विरोधात् । नचोपलम्भबलेन विरोध एव नास्तीति चतुरस्रं । तथाविधस्योपलम्भस्यैवासम्भावनीयत्वात् । अभिन्नाकारबुद्धिबोध्यं हि वस्त्वभिन्नमिति लौकिकाः । विलक्षणाकारबोधविषयश्च भिन्नं । तत्र यदि विलक्षणाकारप्रतीतिसमये द्वे वस्तुनी विलक्षणेनाकारेणावभातस्तदा ऽभेदप्रतीतिदशायामेक आकारो ऽनुभवनीयः । स जातिभागस्य पिण्डभागस्य वा तत्रैकद्विरवभासो ऽयं स्यान्नतु जातिजातिमतोरभेदावभासः । अथ विलक्षणावप्याकारौ तादात्म्येनावसीयेते इति मतं तत्रापि पर्यनुयोजनीयः किमिदं तादात्म्यं नामेति । यद्येकाकारतेति ब्रूयात् तर्हि पूर्वोक्तमेव दूषणमात्मसात्कृतं । शब्दयोः सामानाधिकरण्यं तादात्म्यमिति चेत् । अयुक्तमेतत् गौर्वाहीक इत्यादावतादात्म्ये ऽपि दर्शनात् । उपचारस्तत्रेति चेत् । अत्रापि भिन्नजातिवादिन उपचारमेव मन्यन्ते वयंतु विवक्षामात्रपरतन्त्राः शब्दा न वस्तुव्यवस्थापनायेशत इति सर्वत्र मन्यामहे । कथंतर्हि नानाभूतासु व्यक्तिषु बुद्धिरनुवृत्तमाकारमुल्लिखन्ती समुपजायते । तेनास्या एव बुद्धेर्द्रढिम्नः कारणमनुमास्यामहे अस्ति तद्विशेषणं यदुपरागवशेनेयमभिन्नाकारानुसन्धायिनी धीरुदीयत इति । तदपि न जातिसाधनसमर्थं । कार्यभूताहि बुद्धिरेषा कारणमाक्षिपन्ती यदनंतरमेवोपजायते तदेव कारणं कल्पयति न पुनरप्रतीतमपरमपि किञ्चिदुपस्थापयति । सा चेयं स्वलक्षणविषयदर्शनसमनन्तरभाविनीति ता एव व्यक्तयः स्वनिर्भासा बुद्धीरुपजनय्य तन्मुखेन तामेकाकारानुभासिनीं धियमाविर्भावयन्ति नितान्तभेदवतीनां च व्यक्तीनां कासाञ्चिदेष महिमा न सर्वासामिति किमनुपपन्नं । यथाह्यभिन्नान्यपि चक्षुरालोकमनस्कारा एव सामग्रीसमनुपतिता एकविज्ञानोदयलक्षणं कार्यमारभन्ते तथा व्यक्तयो ऽपि किं नारभन्त इति नेदं प्रतिपत्तिकठिनं । साचेयं स्वाकारेणाभेदेनात्यन्तिकभेदयोगिनीनामपि व्यक्तीनामभेदं सम्पृञ्चन्ती सम्पृक्तिरित्यनुगीयते । एषा च मनीषा न स्वलक्षणं विषयीकरोति तस्य विशदावभासित्वात् । अस्याश्चाभिलापसंसर्गयोग्यार्थप्रतिभासत्वात् । अभिलापानां च विशदाकारमवभासितुमशक्तेः । अभिलापमात्रेण तथाविधप्रतिपत्त्यभावात् । तेनैषा न स्वच्छाकारावभासिनी । नन्वेतत् प्रतीतिपराहतमुदितं गौरयमिति बुद्धौ विशदावभासात् । उच्यते । न विशदावभासित्वमवजानीमहे तत्तु समानकालभाविनो निर्विकल्पकप्रत्ययस्य स्वलक्षणावलम्बिनः प्रसादात् । तदभावे तथात्वानुपलम्भात् । नचैतद्वाच्यमेकमेव वह्निस्विन्द्रियैर्विशदाकारमनुभूयते शब्दैश्चाविशदावभासमिति भिद्यमाने ऽपि बोधोपाये बोध्याभेदे बोधवैलक्षण्यानुपपत्तेः । नियताकारं च स्वलक्षणमनियतश्चाकारो ऽस्यां बुद्धौ चकास्ति । तदेवं विशदाविशदतया नियतानियततया च स्वलक्षणस्य विकल्पाकारस्य च भेदे सत्यपि विकल्पाः साक्षात्परम्परया वा स्वलक्षणविषयदर्शनप्रभवतया स्वलक्षणग्रहणाभिमानिनो जायन्ते तत एव तत्र प्रवर्त्तयन्तः पुरुषं व्यवहाराङ्गभावमनुभवन्ति पारम्पर्येण वस्तुनि प्रतिबन्धाद्वस्त्वपि प्रतिबद्धं भवति । मणिप्रभायां मणिबुद्धिवत् । यथाहि खलु मणिप्रभायां मणिधिषणायां मणिक्रियाविषयिणी मणिबुद्धिरयथार्थतया भेदमजुषमाणापि मणिमनुप्रतिबद्धेति मणिसमधिगमनिमित्तं भवेत् । तथेयमपि वस्तुतः स्वलक्षणमस्पृशन्त्यपि स्वलक्षणाद्दर्शनं दर्शनतो विकल्प इति स्वलक्षणप्रतिबद्धा सती तत्प्राप्तये प्रभवति । निर्विकल्पकप्रत्ययसमधिगतस्वलक्षणप्रापकतया च स्मृतिरियमुच्यते । तत एव च गृहीतग्राहित्वादप्रमाणमन्यथा वस्तुविषयतया वस्तुप्रतिलम्भकतया चानुमानमिव प्रमाणमेव स्यात् । सचायं तस्याकारः प्रथमानो न ज्ञान-

Digitized by Google

स्यैव बहिर्द्रूपेणावभासात् । नचार्थगतएवोक्तेन न्यायेन निरस्त-
त्वात् । किन्त्वयमसन्नेव ज्ञानमनुभासते शब्दमिव प्रतिशब्दः ।
एतत्तु शास्त्रचिन्तका विवेचयन्ति प्रतिपत्तारस्तु दृश्यविकल्पा-
वर्थावेकीकृत्य ताभ्यामेवानुमन्यमाना व्यवहारेषु प्रवर्त्तन्ते प्रवृ-
त्ताश्चार्थप्रतिलम्भेनाविसंवादं मन्यन्ते । कथंपुनरेकत्वाध्यव-
सायो दृश्यविकल्पयोः । अतद्व्यावृत्ततया सदृशत्वात् । यथा
दृश्यस्यातद्व्यावृत्तता तथा विकल्पस्यापि । तस्माज्जातिप्रत्ययो
विकल्पमात्रं परमार्थतस्तु न जातिर्नाम किञ्चित् । अपिच
द्रव्यसमवायिनी जातिरभिमता । नच गन्धादिव्यतिरिक्तं
द्रव्यमुपलभामहे । चक्षुरादीनां प्रत्येकं रूपादिष्वेव व्यापारा-
दिति पूर्वपक्षसङ्क्षेपः ॥ ॥ अत्रोच्यते ॥

संविदेवहि भगवती विषयसत्त्वावगमे शरणं । गवादि-
षुच स्थूलाकारावलम्बिनी बुद्धिरुदीयतइति निर्विवादं नय-
वीथ्यांच निर्णीतं प्रमाणं स्मृतिश्च प्रत्यय इति । ननु तदे-
वासदिति मन्यते । अवयव्यादीनामेकान्ततोऽनुपपन्नत्वात् ।
उच्यते । न दृष्टे काचिदनुपपत्तिः । ननूक्तावयविनोऽनुपपत्तिः ।
आरम्भकाभावात् । अनुपपन्नेयमनुपपत्तिः । कार्यं प्रतीतं
कारणकल्पनायां प्रमाणं । न पुनः स्फुटाबाधितं कार्यं कारणा-
निरूपणयापह्नवमर्हति । तेनावयवाएव समासादितसंयोग-
लक्षणसाधारणगुणा अवयविन उत्पादका भविष्यन्ति संयोग-
श्चैकएवानेकत्र वर्त्तते । एकैकत्र संयुक्तप्रत्ययानुदयात् । एका-
तिरिक्तानेकाभावेऽप्येकएव स द्वितीय आश्रयः संयोगस्येति न
दोषः । ननु द्रव्येएव तथोत्पन्ने संयोगविकल्पमाविर्भावयतो
न तु तदतिरेकी संयोगोनाम कश्चिद्गुणविशेषः । तन्न ।
प्रत्यभिज्ञायेतेहि द्रव्ये अनुवृत्ते । कादाचित्कौच तयोरपरेयं
दशा दृश्यतइति भवत्येव भेदसिद्धिः स्थापिता मीमांसाजी-
वरणायां प्रत्यभिज्ञा । अतः संयोगलक्षणसाधारणगुणासम-
वायिकारणोपगृहीता अवयवाएव समवायिकारणमवयविन
उपपद्यन्ते यश्चायमवयविनो वृत्तिविकल्पे दोष उक्तः सोऽप्य-
वयविनः प्रतीतौ स्थितायामनुपपन्नः । व्यासक्त एकावय-
वेष्ववयवी नैकत्र जातिवत् परिसमाप्तः । अवयवांतरैरपि-
चविना स तस्य कोऽपि महिमा य एकएवानेकावयवानुस्यूत
इति किं न कल्प्यते । यद्यपिचावयविन एकैकत्रावृत्तिस्त-
थापि नावृत्तिदोषः संयोगसचिवाएवावयवाजनकाएव आ-
श्रयभूता यतः । जनकतयैवाश्रयत्वात् समवायिकारणानां ।
अतएव संयोगः सद्वितीयाश्रयइति न दोषः । नच सकला-
वयवोपलम्भसापेक्षा तदुपलब्धिरवयविनस्तेभ्यो भिन्नत्वात् ।
नचैतावता एकावयवग्रहणमात्रेऽपि ग्रहणपर्यनुयोगो युक्तः ।
कार्यानुगुणत्वात् कारणकल्पनायाः । कार्यसिद्ध्यर्थंहि कारणं
परिकल्प्यते न कार्यविनाशाय । तेन यावतामवयवानां ग्रहणे
तदुपलम्भस्तावतामेवावगमस्तदवयमनिबन्धनमितिदर्शनबले-
नाभ्युपेयते । भिन्नत्वेऽपि ततएव सहोपलम्भनियमः । उपेयो-
पायभावात् । उपेयभूतोऽवयवी उपायपदवर्त्तिनश्चाव-
यवाः । प्रत्येकंतु तेषां शक्यतएवासहोपलम्भोऽपि वक्तुं ।
अवयवान्तरयोगिनोऽवयविनोऽपि परिग्रहे इतरावयवव्यतिरे-
कोऽपि सुवचएव । इयंच भेदसाधने युक्तिः । अन्वयव्यतिरे-
काभ्यांहि वस्त्वंतरत्वमवसीयते । अवगम्यमानोऽपिचावयवी
विलक्षणो बुद्धिगोचरतामाचरत्येव । अवयवीहि स्थवीयानेको
हृदयमागच्छति । अवयवास्तु क्षोदीयांसो भूयांसश्च । सचा-
यमवयवी महत्त्वाद्रूपवत्त्वाच्च चाक्षुषः स्पार्शनोवा । पार्थि-
वोवाम्भसीयोवा तैजसोवा । वायवीयस्तु महत्त्वात् स्पर्शव-
त्त्वाच्च स्पार्शनएव । द्व्यणुकस्तु चातुर्भौतिकोऽप्यमहत्त्वाद-
प्रत्यक्षएव । तस्यचामहत्त्वमवयवबहुत्वमहत्त्वप्रचयविशेषाणां
महिमगुणकारणानामभावात् । गगनादीनांतु महतामपि
रूपस्पर्शविधुरतया न प्रत्यक्षगोचरतेत्यलमतिविस्तरेण ॥ ननु
सकलावयवसमाश्रितत्वादवयविनस्तिरोहितैरवयवैःसहेन्द्रिया-
संनिकर्षे कथमवयविना समागमः । नचासङ्गतमेव बहिरिं-
द्रियमवबोधकमिति प्रतिज्ञा युज्यते अवयवानामप्यसन्निकृष्टे-
न्द्रियबोध्यत्वापत्तेरिति । उक्तोत्तरमेतत् । भिन्नत्वादवयविनो-
ऽवयवान्तरसंयोगेऽपि संयोगबुद्धेः पटादिरूपपन्नएवेन्द्रियसन्नि-
कर्षोऽवयविनः । तदनया दिशा तावदुपपन्नमाश्रयद्रव्यमाकृतेः
पृथुलम् । ननूक्तं रूपादिव्यतिरेकि द्रव्यं नोपलभ्यतइति ।
किमिदं पश्यतोहरत्वं प्रतीयतेहि महानवयवी रूपादिव्यति-
रेकी । अतएव जपाकुसुमसन्निधानाभिभूतरूपमपि स्फटिक-
द्रव्यं प्रत्यभिज्ञायेत । कथंनामागृहीतं प्रत्यभिज्ञायेत । अपिच
दर्शनस्पर्शनाभ्यामेकार्थग्रहणाद्रूपस्पर्शव्यतिरेकि द्रव्यं स्फुटत-
रप्रतीतं नापन्होतुमुचितं । वनादिषु बाधकप्रत्ययबलेन कल्पनेयं
प्रसरति दूरतयान्तरालाग्रहणनिबन्धनो ऽयमभेदग्रहव्यवहारः
प्रवर्त्ततइति । अवयविनितु बाधकन्नाम नास्तीति पुरस्ता-
दावेदितम् । तेनाश्रयद्रव्याभावाज्जातेरपलापः प्रलापमात्र-
मिति स्थितम् । यच्चेदमुदितं नित्यतया जातेरात्मविज्ञान-
जननेऽपि न शक्तेति । तदपि क्षणभङ्गनिराकरणपर्वणि विस्तरेण
नित्यानामप्यर्थक्रियाकारित्वसमर्थनेन प्रत्यूढं । मावा स्ववि-
ज्ञानमपिजातिर्जीजनत् तथापि कथङ्कारमसावप्रत्यक्षा । नख-
ल्वियमाज्ञा राज्ञः कारणभूतएवप्रत्यक्षेण प्रचरितव्यमिति । यत्तु
यतः प्रतीयते स तस्य विषयइति सार्वलौकिकम् । ननु प्रत्य-
क्षमप्यविसंवादादेव प्रमाणमविसंवादश्च तस्मादात्मलाभात् ।
अन्यतस्तु भवतो नित्यभूतस्यवाऽभावेऽपि भावसम्भवान्नियमे-
न संवादायोगादिति बलादभ्युपेयं प्रत्यक्षस्य कारणमेव विषय-
इति । अतएवच प्रत्यक्षमनुमानंच द्वेएव प्रमाणे तयोरेवार्था-

Digitized by Google

विसंवादकत्वात् ॥ प्रत्यक्षं साक्षादर्थेन प्रतिबद्धमनुमानंत्वर्थप्रतिबद्धलिङ्गजन्मतया पारम्पर्येण प्रतिबद्धम् । यस्यतु न साक्षान्नापिपरम्परयाऽर्थप्रतिबन्धो न तस्य प्रामाण्यमुचितं तस्य तदविसंवादनियमाभावात् । अर्थाविसंवादिच प्रमाणं व्यवजिहीर्षमाणा लौकिका आद्रियन्ते । सिद्धेदयं मनोरथो यदि ज्ञानान्तरनिबन्धनो विसंवादः प्रार्थनीयः । यद्विषयमेवच यद् ज्ञानं तेनैव तस्मिन् विषये पर्युपस्थापिते नास्ति प्रत्ययान्तरनिबन्धनाविसंवादप्रार्थना । अर्थेनाप्रतिबद्धमपिच ज्ञानं स्वमहिमपर्युपस्थापितार्थमविसंवादकमेव संप्रवर्त्तते। तेनोत्पत्तिमात्रएव विज्ञानस्य परापेक्षा न प्रामाण्ये ऽर्थाविसंवादलक्षणे । अतः सिद्धं शास्त्रादीनामपि अर्थप्रतिबन्धविरहिणां प्रामाण्यम् । एतदर्थमेव नयवीथ्यां सर्वं ज्ञानं विषयाव्यभिचारीति प्रतिपादितम् । अतो नित्यायामपि जातौ भवत्येव प्रत्यक्षस्य प्रामाण्यम् । यत् पुनरुक्तमेकभावेन मनसा समाकलयतः कालाक्षौं स्वस्तिमतींवा नास्ति जातिप्रतीतिरिति । तदसिद्धम् । आकारोहि सा । प्रतीयतेचाकारो यदिपरमर्थान्तरानुसन्धानविकलतया तस्यानुवृत्तिर्नावसीयते । अनुवृत्ताच जातिर्नानुवृत्तिः । अग्रहणेऽपिच धर्मस्यधर्मिणो ग्रहणं नानुपपन्नम् । अतएवच पिण्डान्तरसमधिगमे पूर्वाकारपरामर्शिनी मनीषा प्रत्यभिज्ञासमाख्यातोदीयते । यच्चोक्तमनाश्रयतया तत्रैव प्रागनवस्थिता निष्क्रियतयाचान्यस्मादनागच्छंती स्वरूपहानिप्रसङ्गेन व्यक्त्यासहानुपजायमाना कथं सम्बन्धमनुभवति जातिरिति । तदिदं मायामोहजननं यथाज्ञातजनोद्वेजनमात्रं । संयोगोह्युभयकर्मजो भवति मल्लयोरिव । अन्यतरकर्मजोवा स्थाणुश्येनयोरिव । संयोगजोवा यथातन्तुतुरीसंयोगादुत्पन्नमात्रस्य पटस्य तुरीसंयोगः । सच कर्म प्राक्सन्निधानंवापेक्षते समवायस्तु संयोगाद्विभिन्नो न कर्मवा तत्रवा प्राक्सत्तामपेक्षते । यतएवतु पिण्डस्योदयः समवायिकारणात् ततएव जातिसमवायोऽपि तस्य सम्पद्यते । समवायंच न वयं काश्यपीयाइव नित्यमुपेमः । विनष्टायामपि व्यक्तौ न जातिरन्यत्र याति नच तत्रावतिष्ठते नच विनश्यति केवलं तद्व्यक्तिसमवायस्तस्या निवर्त्तते । तेन तस्या अनुपलम्भनं तथाहि । न याति निष्क्रियत्वाच्चावतिष्ठते व्यक्तिमात्राश्रयत्वात् तदभावे ऽवस्थानासम्भवात् । न विनश्यति पिण्डान्तरेऽपि प्रत्यभिज्ञायमानत्वादिति । विनाशोहिनामात्यन्तिको ऽनुपलम्भइत्यमृतकलायामुक्तम् । अतो न सङ्कटं किञ्चित् । यच्च पिण्डेभ्यो जातेरभिन्नत्वमुभयरूपत्वंच दूषितं तदस्माकं साहायकमेवाचरितं कोहिनाम सचेतनः पदार्थान्तरप्रतिज्ञामभेदाश्रयणेन साधयेत् । कोवा परस्परविरोधिनी एकस्य द्वे रूपे प्रतिजानीते । भेदवादः पुनरस्माकमपि सम्मतएव । नच तत्रेहप्रत्ययापत्तिदोषः । प्रतीत्यक्षाधारमाधेयंच सम्बद्धंच प्रतीयात् । सर्वंच रूपं रूपिग्रहणमन्तरेण न प्रतीयते ऽतो न समानेन्द्रियग्राह्यतया जातिरपि व्यक्तिप्रत्ययानुप्रवेशिनीति नेहप्रत्ययसम्भवः । कर्मणि त्वनुमेये भवत्येवेहप्रत्ययः । वृत्तिविकल्पेतु कृत्स्नसमाप्तिरेवाङ्गीकरणीया । नचान्यत्रावृत्तिदोषः प्रत्यक्षावगमाद्वृत्तेः प्रत्यभिज्ञायाः स्थापितत्वात् । पृथगग्रहणंतु जातेरसिद्धमेव । व्यक्त्यन्तरेहि जातिः प्रतीयमाना प्राच्यपिण्डपरिहारेण प्रकाशते । उदीच्यपरिहारस्तु प्राक्तनसमधिगमसमये सिद्धमेवेति परिहृतनिखिलानुपपत्तिकमुपपादितं गवादिषु साधारणाकारानुभवसिद्धं जातितत्त्वमुपपन्नं । प्रत्यक्षवेद्यत्वं जातेरिन्द्रियव्यापारानुविधानेन प्रतीतेः संयुक्तसमवायलक्षणश्च सन्निकर्षोऽपि नानुपपन्नः गौरयमितिच मतिर्विशदतरार्थनिर्भासिनी न शक्यते ऽपवदितुम् । समसमयसम्भवनिर्विकल्पकदर्शनबलेनेत्थमियं प्रथतइति तथाभावेप्रमाणाभावात् । शब्दमात्रेतु केवलाकारपरिगृहीताकारिप्रतीते रूपान्तरानवभासाच्चाविशदावभासः । ऐन्द्रियकेतु संवेदने प्रचुरतररूपावभासाद्विशदावगमइति नाबाह्यविषयत्वापत्तिः । नन्वेषा जातिप्रतीतिर्भिन्नामेव व्यक्तिमभेदेनावगमयन्ती जायतइति भ्रान्तिरेषा न प्रत्यक्षं प्रमाणं । इयंतु भ्रान्तिर्निर्बीजा न युज्यतइति बीजभावेन जातिरनुमीयते । तत्समवायश्च । दृष्टाहि सन्तापसञ्चारितदहनपरमाणुसंवलितायोगोलके दहनाकारानुकारिणी प्रतीतिरिति । तदिदमुक्तोत्तरमपि पुनः पर्यनुयोज्यामहे विस्मरणापराधादिति मन्यामहे । भिन्नाहि जातिरवगम्यते । न खल्वाकारमाकारिणंचैकमेव मन्यन्ते केवलं शब्दप्रयोगे समाधिर्वक्तव्यः । तत्रच लौकिकः प्रयोगएव शरणं । प्रयोगश्च श्रुत्या लक्षणया गौण्या वा वृत्त्या नानुपपन्नः । समवायस्तु भवतु वस्त्वन्तरे सिद्धे ऽनुमेयः प्रत्यक्षेण तदनवगमात् । आकृतिस्तु नप्रत्यक्षप्रमाणसिद्धा ऽनुमेया । नचानुमानमपि शक्यं शाक्येषु प्रतिबद्धेष्वित्यलमतिविस्तरेण । अत्रकेचिद्द्रव्यादितुल्यतया द्रव्यगुणकर्मस्वपि सत्ताजातिमङ्गीकुर्वन्ति भवतिहि सर्वेष्वेव सत्सदितिप्रत्ययानुवृत्तिरितिसंवदन्तः तदिदमपरामृष्टजातितत्त्वानामुपर्युपरिकल्पितं । पूर्वरूपानुकारिणी यद्धिधीरुदीयते ततो ऽभ्युपेयतैव जातिः । नच नानाजातीयेषु द्रव्येषु सर्षपमहीधरादिषु गुणेषु गन्धरसादिषु समानाकारानुभवो भवति केवलंतु सत्सदिति शब्दमात्रमेव प्रयुज्यते । भवतिच विनापि जात्या याचकमीमांसकादिशब्दप्रवृत्तिः । नन्वेकशब्दप्रवृत्तिरपि नैकनिबन्धनमन्तरेणोपपद्यते । सत्यमस्त्येवोपाधिरेकः प्रमाणसम्बन्धयोग्यतानाम । तत्रान्यः पण्डितम्मन्यो मन्यते । नन्विदमसमंजसमुच्यते । सर्वत्रह्युपाधिभेदमवगम्यौपाधिकशब्दानुविद्धः प्रत्ययो भवति

Digitized by Google

न पुनः प्रागेव सहवा । इहच प्रमाणमेवजायमानमस्तीत्येव ज्ञायते । प्रमाणोदयोत्तरकालंह्यनया भवितव्यम् । किञ्च सत्यपि प्रमाणयोगे किञ्चिदस्तीति गम्यते किञ्चिच्चासीदिति तथान्यद्भविष्यतीति । तत्र प्रमाणसम्बद्धस्यवर्त्तमानत्वात् सर्वत्र वर्त्तमानसत्ताप्रत्ययेन भवितव्यं । तदतिरेकिणितु सत्त्वे तस्य त्रेधा व्यवस्थानाद्युक्तस्त्रिधा ऽवभासः अपिच भूमितलनिखातेषु चिरतरकालवर्त्तिषु प्रलीनज्ञातृपुरुषेषु लिङ्गादिरहितेषु सकलप्रमाणप्रत्यस्तमयेऽपि वर्त्तमानसत्तासन्देहः । सच प्रमाणसम्बधातिरेकिणीं सत्तामन्तरेणानुपपन्नइति । तदिदमनाकलितपरवचनस्य केवलं गलगर्जितं । उक्तमस्माभिः प्रमाणसम्बन्धयोग्यतोपाधिः । यदिहि प्रमाणसम्बन्ध उपाधिरिति वदेम तत इत्थमुपालभ्येमह्यपि । योग्यतातु प्रमाणसम्बन्धातिरिक्ता प्रमाणेनावसीयतइति युक्तएवास्तीति प्रमाणोदयः । तस्याश्च त्रैकाल्यात्त्रैकाल्यावगमोऽपि समर्थितएव । तस्याश्चसंशयिततापि युक्तैव । कापुनरियं प्रमाणसम्बन्धयोग्यता नाम । ननु नामान्तरेण महासामान्यमेवेदमुररीकृतं । नैतदेवं योहि महासामान्यं सत्तां संगिरते सोऽपि स्वरूपमात्रं पदार्थानां मन्यतएव । अन्यथा शशविषाणादीनामनुत्पन्नानिवृत्तानांच किमिति महासामान्येन सम्बन्धएव नस्यादिति पर्यनुयोगे कः परिहारः । तेन स्वरूपवत्त्वैव प्रमाणसम्बन्धयोग्यता । यस्यहि स्वरूपमस्ति तत् प्रमाणेन परिच्छिद्यते । त्रैकाल्यमपि स्वरूपस्यैव युक्तं । नच महासामान्यस्य नित्यत्वात् । तथा संशयिततापि तस्यैव नपुनरसंशयिते स्वरूपे अपरः सत्तासन्देहो भवति । अथ नित्यायाअपि सत्तायाः सम्बन्धो यः स त्रिकालः । तस्यैव त्रैकाल्यं कुतः । नान्यदत्रोत्तरं स्वरूपत्रैकाल्यादित्यतः । तस्मात्स्वरूपसत्तोपाधिकएव सच्छब्दो नपुनरेक आकारः सत्तानाम द्रव्यगुणकर्मणां । अपिच काश्यपीयानां जातिसमवायविशेषेषु स्वरूपसत्तोपाधिकएव सच्छब्द इत्यभ्युपगमः । तस्यच द्रव्यगुणकर्मस्वपि तथाभावोऽस्तीति । तदेव मयाकृते पदार्थस्वरूपातिरेकिणि महासामान्ये सत्ताख्ये यत्स्वमनीषानिर्मितकुतर्कबलेन सन्मात्रविषयं प्रत्यक्षमितिसाधितं तदतिदूरोत्सारितं । एतेनैव न्यायेन शब्दत्वमपि निरस्तं वेदितव्यं नहि ककारगकारयोरेकमाकारमनुगतं परामृशन्ती मनीषा समुन्मिषति । योऽपिचायं शब्दशब्दः सोऽपि श्रोत्रग्रहणोपाधिबललब्धप्रवृत्तिरिति न जातु जातिकल्पनायै विभवति । तत इदमपहस्तितं । यदाहुः शब्दत्वमेव तत्तदभिव्यञ्जकध्वनिनिबन्धनया नानावर्णरूपया विभ्रमीभवत् तस्यतस्यार्थस्यावगमाय कल्पतइति । अनयैवच दिशा ब्राह्मणत्वादिजातिरपि निवारिता नहि नानास्त्रीपुरुषव्यक्तिषु पुरुषत्वादर्थान्तरभूतमेकमाकारमात्मसात्कुर्वन्ती मतिराविर्भवति । नहि क्षत्रियादिभ्यो व्यावर्त्तमानं सकलब्राह्मणेष्वनुवर्त्तमानमेकमाकारमतिचिरमनुसंदधतोऽपि बुध्यन्ते । यदप्याहुः यद्यप्यापातसंजातयाधिया ब्राह्मण्यं नावसीयते तथापि ब्राह्मणभूतमातापितृसम्बन्धानुसन्धानप्रभवायां बुद्धौ तत्त्वकास्तीति । तदपिच स्वमानसविसंवादि । अनुसन्दधानोऽपि मातापितृसम्बन्धं को जात्येकमाकारमवबोद्धुं प्रभवति । यच्चोपदर्शितं यथा विलीनमाज्यं तैलादव्यतिरिच्यमानं गन्धग्रहणसहकारिणा चक्षुषैव भिन्नमवगम्यतइति । तदपि न सुंदरं नहि तदानीं चाक्षुषस्य संवेदनस्य विषयातिरेकः किन्त्वनुमानमेव तत्र सर्पिषो यस्तु निपुणदर्शी सूक्ष्ममपि रूपमीक्षितुं क्षमः स चक्षुषैवाज्यजातिमपि प्रत्येति । न गन्धग्रहणमपेक्षते । नन्वेवं बहुवहीनं किंनिबन्धनोहि तदानीमाहवनीयादिसाध्यकर्मसु केषांचिदधिकारो नान्येषाम् । किंनिबन्धनाच ब्राह्मणशब्दस्य प्रवृत्तिव्यवस्था । अत्रोच्यते अनादौ संसारे जन्यजनकभावेन व्यवस्थितास्तावत् काश्चिदेव पुरुषसन्ततयः सन्ति तासामन्योन्यव्यतिरेकजाताः स्त्रीपुंसव्यक्तयो ब्राह्मणशब्दवाच्याः । अनिदम्प्रथमतयाच सन्ततेः सर्वेषां तत्सन्ततिपतितत्वात् सिद्धा ब्राह्मणशब्दवाच्यता । तेन सन्ततिविशेषप्रभवत्वमेव ब्राह्मणशब्दप्रवृत्तावुपाधिः । तत्प्रभवानामेव कर्मस्वधिकारइति न किंचिदवहीनं केपुनस्तेसन्ततिविशेषाः । न ते परिगणय्य निर्देष्टुं शक्यन्ते किन्तु लोकतएव प्रसिद्धाः प्रत्येतव्याः । तथाच तज्जन्यत्वेऽवगते ब्राह्मणशब्दं प्रयुञ्जते लोकाः । कथंपुनस्तज्जन्यत्वमेव शक्यमवगन्तुं स्त्रीणामपराधसम्भवात् । सम्भवन्तिहि पुंश्चल्योऽपि स्त्रियः परिणेतारं व्यभिचरन्त्यः । उच्यते उक्तमेतद् दृश्यादर्शनमेवाभावइति । यत्र यावदुपलब्धिसामग्री तावत्यां सत्यामपि यासां व्यभिचारो न दृश्यते तासां नास्त्येव व्यभिचारइति लोकप्रमाणकमेतत् । अपिच अप्रमत्तैः स्त्रियो रक्षणीयास्तासु नास्त्येव व्यभिचारसम्भावनावकाशो यासुत्वस्ति माभूत् तदपत्येषु तत्सन्ततिप्रभवत्वनिश्चयः । नचैतावता यत्रापि निश्चयः शक्यस्तत्राप्यनिश्चयइति युक्तमिति । यच्च बह्नीषु ज्वालास्वेकवर्त्तिवर्त्तिनीषु ज्वालात्वं सामान्यं प्रत्यभिज्ञागोचरः कैश्चिदिष्यते तदपि गुरुरस्माकं न मृष्यति । सखल्वेवं निरीक्षाज्ज्वाल अनन्यथासिद्धा बुद्धिः सामान्यकल्पनाबीजं । इयंतु भेदाग्रहणेन शुक्तिकारजतप्रत्ययवदुपपद्यतइति नालं सामान्यमुपस्थापयितुं । तेन भेदग्रहणपुरस्सरमभेदज्ञानं भिन्नेषु जात्यभ्युपगमे शरणमिति निरवद्यम् ॥ * ॥

शालिकनाथेन कृतं कृतमतिना जातिनिर्णयाख्यमिदं ॥
बहुविधविवादहरणं प्रकरणमुरुणावधानेन ॥ ३ ॥

इति शालिकनाथमिश्रकृतौ जातिनिर्णयाख्यं प्रकरणं तृतीयम् ॥ ३ ॥

Digitized by Google

ON THE NYÁYA SYSTEM OF PHILOSOPHY, AND THE CORRESPONDENCE OF ITS DIVISIONS WITH THOSE OF MODERN SCIENCE.*

PROBABLY no one of our readers requires to be told, that the three leading schools of Indian philosophy are the *Vedánta*, the *Sánkhya*, and the *Nyáya*. The first is an attempt to deduce a philosophical theory of the universe from the doctrines of the *Vedas*. Its conclusion is, the non-existence of anything besides God. The second is an attempt to account for the universe without the supposition of Deity at all. It keeps up for a long time a not very definite antithesis between Soul and Nature, and ends in a way which tasks all the ingenuity of its advocates to avoid the conclusion that the author of the system believed in the existence of neither the one nor the other. The third is not so mystical as the *Vedánta*, nor so fanciful as the *Sánkhya*; and, though mystical and fanciful enough, yet possesses a scientific character. This, we think, may be turned to useful account; and, with the view of showing how, we have proposed here to attempt to determine what correspondence may exist between its divisions and those of modern Science, Incidentally, we shall have occasion to vindicate the Hindú syllogism from some undeserved reproach, and also to decline for it some undeserved commendation.

One undeserved reproach that the whole system has met with, originated, we think, in the practice of calling the *Nyáya* the "Hindú logic," under which character it cannot but be regarded as meddling with a great variety of irrelevant matters. But, it we bear in mind that it is an attempt to account for the universe, we must be aware that nothing whatever can lie beyond the province of which it legitimately takes cognizance. The word *nyáya*, signifying "propriety, fitness, good government," is derived from a verb signifying, "to go," combined with a preposition signifying "in." We are not prepared to decide how far this ("going in" a right way) may answer to the μέθοδος of the Greek; but we entertain no doubt that the proper way in which to regard the *Nyáya*, is in the light of what Harris calls, a "Philosophical Arrangement." It is an attempt to treat "de omnibus rebus," or "de omni scibili," in some such well-ordered fashion as Coleridge inculcates the value of in his dissertation on "Method," prefixed to the *Encyclopedia Metropolitana*, the compilation of which his suggestion led to.

For information respecting the writers on the *Nyáya*, and other particulars not bearing upon our present design, the reader can consult Mr. Colebrooke's celebrated discourse published in the Transactions of the Royal Asiatic Society, vol. i. p. 92—118, and re-published in the first volume of his "Miscellaneous Essays." The founder of the system, the inspired sage *Gautama*, left a collection of succinct aphorisms in five books. With the intention, apparently, rather of supplying what was incomplete in this exposition, than of disputing it, *Kanáda* put forth another collection of similar aphorisms.—It is with *Kanáda's* arrangement chiefly that we are at present concerned.—In Bengal, we believe the student usually makes his first acquaintanee with *Kanáda's* views in the pages of the *Bháshá-parichheda*, a work of *Viśwanáth Panchánana Bhatta*, which, along with its commentary, the *Sidhánta-muktávali* of the same author, was published in Calcutta, under the authority of the Committee of Public Instruction, with the somewhat inappropriate English title of "An Elementary treatise on the terms of Logic."—A simpler compendium is the *Tarka-sangraha* of *Annam Bhatta*, which contains nearly all that we shall have occasion to refer to at present.

Our author begins with an enumeration of the Categories, or most general heads, under one or other of which every name current in the world is capable of being classed. These are enumerated as follows:—"Substance *(dravya)*, Quality *(guṇa)*, Action *(karmma)*, Community *(sámánya)*, Difference *(viśesha)*, Intimate or material Relation *(samáváya)*, and Non-existence *(abháva)*." These seven our text-book designates by the term *padártha*, which, in ordinary language, means "a thing." We shall not stay to enquire at present how far this popular application of the word may have served to give the system an appearance of being more decidedly Realistic than in fact it is. Neither shall we stay to enquire whether *Kanáda's* Categories exhaust the matter of nomenclature, or whether they sub-divide it in the most unexceptionable fashion. These are enquiries to which we may address ourselves some other time, but they are beside the business in hand. We ourselves, though we doubt whether the pandits will agree with us, take the term *padártha* to have been used by *Kanáda* in its etymological sense *(padasya artha)* to signify "that which is meant by a word;" and of course the meaning of every word that is a common term must be comprised under one or other of the categories which constitute a correct division of Names.

The first of the Categories, *viz.*, Substance, is subdivided into the nine following; *viz.*, "Earth, Water Light, Air, Ether, Time, Space, Soul, and Mind." Before sub-dividing these further, our text-book proceeds

* From the pen of the lamented Dr. BALLANTYNE: reprinted from the extinct BENARES MAGAZINE. Vol. I. 1849.

Digitized by Google

to sub-divide the second category, *viz.*, Quality, of which there are reckoned twenty-four species; *viz.*, "Colour, savour, odour, feel, number, quantity, individuality, conjunction, disjunction, priority, posteriority, gravity, fluidity, viscidity, sound, intelligence, pleasure, pain, desire, aversion, volition, virtue, vice and faculty." The third category, *viz.*, Action, is sub-divided into "Casting upward, casting downward, contraction, dilatation, and going on." The fourth category, *viz.*, Community, is divided into "the higher and the lower." These bear to each other the relation of genus and species. The Differences, which make up the fifth category, are stated to be endless. The sixth category, or Intimate Relation, such as that between a jar and the clay of which it is formed, is of only one kind. The last category, Non-existence, is split into four kinds, *viz.*, antecedent non-existence, (or the state of anything before it began to be); emergent non-existence (or the state of anything after it has ceased to be); absolute non-existence; and mutual non-existence, or difference.

Having thus advanced a step in the subdivision of each category, our text-book reverts to the first of them, and proceeds to sub-divide Earth. This is stated to be of two kinds, "Eternal, and Transient—Eternal in the form of Atoms, Transient in the form of Products." The same sub-division is made of Water, Light, and Air. Taking these together, we arrive here at one of the points beyond which the Hindú mind has not satisfactorily advanced. The division of matter into Atom and Mass, provided nothing be assumed in regard to atoms that has not been fairly established, is a convenient one; and the division corresponds with the modern division of physical science into the Chemical and the non-Chemical. This, then, we note as the first point in the system at which we can distinctly and intelligibiy acquaint the learned Hindú with one of our own marked scientific divisions. Matter, not in the form of atoms, is sub-divided into "organized body, organs of sense, and inorganic mass." As regards the fanciful notion that the organs of sense are formed of the matter of the supposed elements, the reader can consult Professor H. H. Wilson's edition of the *Sánkhya Káriká*, p. 122. Of organized bodies we must necessarily ignore those which, to complete the system, the *Nyáya*, like Paracelsus, feigns the existence of—fiery in the solar realms—aqueous in those of Neptune—and aerial in the shape of goblins. But we agree with the Hindús that animals and plants have organized bodies, the difference between the two being in general sufficiently well marked by their own criterion, the presence or absence of the power of locomotion. Here then, in the *Nyáya* arrangement, is the place for Zoology and Botany, descriptive, anatomical, and physiological. Again, when the unorganized products of matter are spoken of, we come to the consideration of the globe itself, which may be considered superficially, substantially, or as a unit in a larger system. Here then we place Geography, Geology, and Astronomy.—Leaving Ether as we find it, and passing over Time and Space, which metaphysicians in general are puzzled whether to regard as mere fictitious non-entities, or as the only entities in their own right—seeing that this "par nobile fratrum" must necessarily remain even were all else to be annihilated, we come to Soul, which our text-book defines as "the receptacle of knowledge." This is divided into two—God, the Supreme Soul, unconnected with pain or pleasure; and the soul of living creatures, of which there is one to each body, distinct and eternal.—Here we may place Theology, and also Mental Philosophy, for the next topic that presents itself is the Mind, which our text-book regards as the "organ of the soul."—Into the pertinency of the definition we are not now going to enquire.

Our text-book, having disposed, for the present, of the category of Substance, now reverts to that of Quality. Of the qualities, those cognizable by the senses, and considered as phenomena existing only in as much as they are perceived, can be best disposed of when the senses themselves are under consideration. Considered objectively as the causes, in posse, of phenomena, they come under another division—that of Motion or Action, where we place Mechanics in its widest acceptation.

The citation of the Qualities of Number and Quantity, fixes, in the system, the place of the corresponding sciences, on which we need not dwell.

As the objective qualities (or causes of sensation), Colour &c., belong to the division of Motion, so the qualities of Intelligence, Memory and the like, must be remitted to the division in which we placed Mental Philosophy; and from that division would branch out the department of Ethics, private and public, occupying itself about the qualities "Volition, Virtue, Vice," &c.

Under the head of Intelligence our text-book treats of Cause and Effect, in terms directly answering to those of Aristotle, and of course readily resolvable into the simpler language of modern philosophy. Under the same head it treats largely of Inference, which as we have already remarked, appears to have been too generally regarded as the only province with which the *Nyáya* was legitimately concerned.

Deduction (*anumána*) is defined as the efficient cause of an inference or conclusion (*anumiti*). "An inference (*anumiti*)," our text-book goes on to say, "is knowledge "produced from a logical datum (*parámarśa*). The "logical datum consists of the knowledge of a general

Digitized by Google

"principle combined with the knowledge that the case in "question is one to which it is applicable (*vyápti-visish-"ta-pakshadharmatá-jnyána.*) For example, the know-"ledge that 'This hill is characterized by invariably-fire-"attended smoke' is a logical datum, the knowledge pro-"duced from which, *viz.* that 'The hill is fiery,' is an "inference."

Now, in this form of the syllogism (which we do not find alluded to in Mr. Colebrooke's essay,) there is neither more nor less than there is in the Aristotelic syllogism. The wonder would have been if there had. The first formal difference observable, is the wrapping up of the premises in one logical datum. The reason for preferring to regard these as two inseparable members of a single statement appears to be this, that it is only when simultaneously present to the mind, that the premises suggest the inference; and this simultaneousness of cognizance is secured by combining the two assertions in a period, or sentence, of which the whole becomes intelligible only when the last word in it has been uttered. It might appear that such a form of statement is not the most convenient for enabling an objector to declare which part of it his objection applies to:—but this, were it granted, does not matter—for we shall find that the *Naiyáyikas* have another way of arranging their argument, when it is to be brought under the consideration of another person. If we separate the two members of the logical datum in the example above-cited, we obtain the following:—

"Whatever smokes is fiery:
The hill smokes:
Therefore the hill is fiery."

Another formal difference that requires to be noticed is the fact, that whilst the European logic employs a phraseology founded on classification, the *Nayáya*, in testing the validity of an argument, operates by means of the terms on which a classification would be based. The former infers that "Kings are mortal," because kings are men—a class of beings who are mortal. The latter arrives at the same inference by means of the consideration that mortality is inherent in humanity and humanity in kings. We shall not here enquire how far the habitual employment of abstract terms as the fonudations of all truth, may help to foster Realistic notions. What we wish to impress in regard to this is, the necessity (if both parties wish to understand each other) of acquiring readiness and dexterity in transforming the one phraseology into the other,—for, a person habituated to the one form, finds the other at first both repulsive and perplexing, because the rules which he has previously been accustomed to trust to, do not apply directly to the form of expression propunded, and are of no use to him till he has got the matter into the shape in which it might have been advantageously presented to him at the outset. The European logician will have no difficulty in bringing to the test of his own rules a statement presented to him in any intelligible shape by a pandit or any one else, but he will place a needless obstacle in the way of his own argument, if he leaves to a pandit the task of doing the same thing for himself.

Here then is the place, in the *Nyáya* system, to be allotted to Deductive Logic, and also to the process of Induction, which is indicated, in the above-quoted definition of the logical datum, by the term *vyápti*, a term importing the invariable attendance of a given property on its ascertained sign.

In regard to the import of a proposition which the logic of Europe calls a Universal Affirmative, such as "All men are mortal," the *Naiyáyika* would say that there is pervading inherence *(vyápti)* of mortality in humanity—and he would state the proposition thus:—"Where there is humanity, there is mortality." In elucidation of two other terms connected with the important question of *vyápti-nischaya*, (or the "ascertainment of pervading inherence" as we would propose to render the term Induction,) we may remark that, in a Universal Affirmative, the predicate, or major term, connotes the "pervader" *(vyápaka)* or invariable concomitant of the characteristic connoted by the subject, or minor term, which is "pervaded" *(vyápya)* by it. The term *paksha*, quoted a little way back, means the subject, or minor term, of the conclusion; and the compound word of which it forms a part, *paksha-dharmatá*, means "the possession of the character which entitles its possessor to the subject of the conclusion"—the condition of a mountain, for instance, in so far as the *vyápya*, or characteristic connoted by the subject of the major premiss, *viz.*, the characteristic "smoke," belongs to the mountain, which is thereby entitled to be the subject of the conclusion. In the language of European logic, it is the agreement of the minor term of the syllogism with the middle term.

The expression "vyáptivisishta-pakshadharmatá-jnyánam" corresponds to the Aristotelic "dictum de omni et nullo," for it tells us that the knowledge constituting an inference results from the knowledge that the subject of the proposition to be proved possesses a characteristic which is invariably accompanied by the property the presence of which in the subject we wish to establish. This is tantamount to saying, in terms of the classificatory view, that "what may be asserted of every individual in a class, may be asserted of any individual which can be ascertained to belong to the class"—things being spoken of as belonging to a class for no other reason

Digitized by Google

than their possessing a common characteristic. The statement of the *Nyáya* includes the "dictum de nullo," because the absence *(abháva)* of a characteristic is reckoned as itself a characteristic.

Of the process of Induction our text-book gives the following account. "Having repeatedly observed, in "the case of culinary hearths and the like, that where "there is smoke there is fire, *having assumed that the* "*concomitancy is invariable,*" and so on:—but we may as well let out author finish his sentence—"having "gone near a mountain, and being doubtful as to whe- "ther there is fire in it, having seen smoke on the "mountain, one *recollects* the invariable concomitancy "of fire where there is smoke."—This *recollection* of a previously established general principle, belongs to the same place in the logical system as the Enthymeme. The un-expressed premiss is held by the Greek to be "in the mind," by the Hindú "in the memory."

The arrival at a conclusion in the manner above described is said to be a process of "Inference for one's *(swárthánumána)*—and this is all that belongs to European Logic, even when the term is taken in the extended sense preferred by Mr. J. S, Mill, so as to include the process of Induction.

Injustice has been done to the *Nyáya* system by treating as its Logic what is in reality its Rhetoric. This we shall proceed to explain, after having shown where *Gautama* and *Kanáda* stopped short in their analysis of the reasoning process, whilst Aristotle took the further step of separating the matter of the syllogism from the form of it, and showing that the latter can be made the subject of a science as abstract and as certain as Arithmetic. And what wonder is it that the Hindú mind did not take this magnificent stride, when the European mind (in the bulk of the individual minds that go to make up its aggregate) has positively slid back from the point that had been thus attained?

(to be continued.)

PROPOSED EDITION OF SANSKRIT CLASSICS.

The following letter has been addressed to the Director of Public Instruction (Bombay) by Professors Bühler and Kielhorn. We beg to invite the attention of scholars to the rules suggested by them for the editing of Sanskrit texts.

To Sir Alexander Grant, Bart.,
Director of Public Instruction, Bombay.

Sir,—Since the establishment of a regular course of Sanskrit studies in connection with the Indian Universities the urgent want of correct and cheap editions of the Sanskrit Classics, made in harmony with the principles of modern philology, has been felt both by the professors and by the students of the Indian High Schools and Colleges. Some attempts to supply this want have been made in Calcutta, at the suggestion and under the supervision of Professor Cowell. But, unfortunately, they have heen interrupted by Professor Cowell's departure from India, and the editions published extend over a very small part of the field of Sanskrit classical literature.

2. Considering the great interests at stake, it seems to us highly desirable that a new attempt be made to produce a series of class-books for the study of the Sanskrit language. We beg, therefore, to submit to you the annexed plan for the publication of a collection of Sanskrit Classics for the use of Indian High Schools and Colleges. The principles of our plan are partly in accordance with those followed by Professor Cowell, but we trust that we have succeeded in adapting it still more to the requirements of modern criticism, and in making the books more generally serviceable for Anglo-Indian education by the addition of English notes, introductions and collections of *variæ lectiones.*

3. We beg to point out also that, besides its value for practical instruction, the publication of a series of critical editions of Sanskrit Classics may be made a palæstra for the young native Sanskritists, by inviting their co-operation, and thus may serve to realize the high aims of Indian University education.

4. In order to ensure a greater stability for the undertaking, and to remove the material difficulties which authors in India have to battle with, we humbly beg to suggest that the "collection" be made a departmental undertaking, under the conditions specified in our plan.

We trust that, though no doubt a considerable outlay will be required at the beginning, there will eventually be no actual loss of money, especially if you should see fit to invite the assistance of the Directors of Public Instruction in other parts of India.

We have the honour to be, &c.,

G. BÜHLER,
F. KIELHORN.

A Plan for the publication of a collection of Sanskrit Classics for the use of Indian High Schools and Colleges.

I.—Works to be included in the collection of Sanskrit Classics:—

1. Kálidása's Raghuvanśa.
2. Kálidása's Vikramorvaśí.
3. Kálidása's Kumárasambhava.

Digitized by Google

4. Kálidása's Ritusamhára.
5. Kálidása's Malavikágnimitra.
6. Kálidása's Nalodaya.
7. Bhartṛihari's Sentences.
8. Panchatantra.
9. Viśákhadatta's Mudrárákshasa.
10. Ratnávali.
11. Bhavabhúti's Málatímádhava.
12. Veṇísamhára.
13. Kirátárjuníya.
14. Mágha's Śiśupálavadha.
15. Daṇḍin's Daśakumáracharita.
16. Bánabhaṭṭa's Kádambarí.

Other works to be added if it seem advisable on further consideration.

II.—Rules for editing the texts :—

(1.) Works for which commentaries are obtainable are to be edited with the commentaries, or with verbal extracts from the same.

(2.) If more than one commentary exist, the oldest is to be chosen for edition, and, if possible, that redaction of it which is current in Western India.

(3.) The texts of the works are to be printed in strict conformity with the readings given by the commentaries.

(4.) The texts of works for which no commentary is procurable are to be based on manuscripts which give the same redaction. But, if it seems absolutely necessary, corrections from other redactions may be introduced.

(5.) A description of the manuscripts on which the edition is based, the chief *variæ lectiones* contained in them, and corrections of the text made by the editor, are to be given in a separate appendix at the end of each work.

III.—Orthography :—

(1.) The strictest attention is to be paid to the rules of Sanskrit orthography as laid down by Pâṇini. In optional cases one principle is to be followed throughout the whole book.

(2.) Special rules of Orthography:

(*a.*) It shall not be allowable to use the Anusvára instead of the nasals in the interior of simple words, or of a final dental *n*; *e.g.*, write अङ्ग not अंग ; सिञ्चति, not सिंचति.

(*b.*) It shall not be allowable to use the Anusvára instead of a final म् (*m*) at the end of a sentence or verse, or before vowels.

(*c.*) It shall not be allowable to use the Avagraha (ऽ).

(*d*) It shall not be allowable to use European stops.

(*e.*) The words of a sentence or hemistich shall be written continuously only so far as it is made indispensable by the laws of Sandhi ; *e.g.* आसीद्राजा नलो नाम वीरसेनसुतो बली.

IV.—Notes :—

Short notes in English shall be added at the end of each book or fascicle, elucidating difficult points of grammar or construction, incidental questions regarding geography, history, mythology, philosophy, &c., and containing explanations of the metres, together with references to sources of fuller information.

V.—Introduction :—

An introduction is to be prefixed to each work or its first fascicle, detailing briefly the life of the author of the work, its position in literature, and giving a short summary of its contents.

VI.—Form of the books :—

(1.) Each work to be printed in octavo.

(2.) Each work may be published in fascicles with reference to the regulations of the Bombay University.

VII.—Publication :—

(1.) The expenses of printing to be borne by the Educational Department, and the copyright to vest in the Director of Public Instruction.

(2) The editors to be remunerated at the rate of Rs. 30 per sheet of sixteen pages octavo, from which sum the editors are to defray the expenses of buying, copying, or collecting manuscripts.

(3) The publication of the books to be placed under the supervision of the Professors of Sanskrit at the Elphinstone and Poona Colleges, who will invite Native Sanskrit scholars to join the undertaking.

G. BÜHLER,
F. KIELHORN.

Bombay Educational Record Vol. II. No. 5., May 1866.

The Pandit.

The PANDIT may be ordered of the Publishers, Medical Hall Press, Benares; or through MESSRS TRÜBNER and Co. LONDON.

Annual subscription, in advance, including postage, Indian and English, Rs. 12-0-0 per annum.

PRINTED AND PUBLISHED BY E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 3. Benares August 1st, 1866. Vol. I.

तथाविधे ऽनङ्गरसप्रसङ्गे
मुखारविन्दे मधुपः प्रियायाः ।
संभोगवेश्म प्रविशन्तमन्त-
र्ददर्श पारावतमेकमीशः ॥ १ ॥
सुकान्तकान्तामणितानुकारं
कूजन्तमाघूर्णितरक्तनेत्रम् ।
प्रस्फारितोन्नम्रविनम्रकण्ठं
मुहुर्मुहुर्नर्त्तितचारुपुच्छम् ॥ २ ॥
विशंखलं पक्षतियुग्ममीष-
द्दधानमानन्दगतं मदेन ।
शुभ्रांशुवर्णं जटिलाग्रपाद-
मितस्ततो मण्डलकैश्चरन्तम् ॥ ३ ॥

॥ त्रिभिर्विशेषकम् ॥

रतिद्वितीयेन मनोभवेन
ह्रदात् सुधायाः प्रविगाह्यमानात् ।
तं वीक्ष्य फेनस्य चयं नवोत्थ-
मिवाभ्यनन्दत् क्षणमिन्दुमौलिः ॥ ४ ॥
तस्याकृतिं कामपि वीक्ष्य दिव्या-
मन्तर्भवच्छद्मविहङ्गमाग्निम् ।
विचिन्तयन् संविविदे स देवो
भ्रूभङ्गभीमश्च रुषा बभूव ॥ ५ ॥
स्वरूपमास्थाय ततो हुताश-
स्त्रासस्खलत्कंप्रकृताञ्जलिः सन् ।
प्रवेपमानो ऽतितरां स्मरारि-
मिदं वचो व्यक्तमथाभ्युवाच ॥ ६ ॥

असि त्वमेको जगतामधीशः
स्वर्गौकसां त्वं विपदो निहंसि ।
अतः सुरेन्द्रप्रमुखाः प्रभो त्वा-
मुपासते दैत्यवरैर्विधूताः ॥ ७ ॥
त्वया प्रियाप्रेमवशंवदेन
शतं व्यतीये ऽषमवन्नृतूनाम् ।
रहःस्थितेन त्वदनीक्षणेन
दैन्यं परं प्राप सुरैः सुरेन्द्रः ॥ ८ ॥
त्वदीयसेवावसरप्रतीक्षै-
रभ्यर्थितः शक्रमुखैः सुरैस्त्वाम् ।
उपागतो ऽन्वेष्टुमहं विहङ्ग-
रूपेण विद्वन् समयोचितेन ॥ ९ ॥
इति प्रभो चेतसि संप्रधार्य्य
तं नो ऽपराधं भगवन् क्षमस्व ।
पराभिभूता वद किं क्षमन्ते
कालातिपातं शरणार्थिनो ऽमी ॥ १० ॥
प्रभो प्रसीदाथ सृजाशु पुत्रं
यं प्राप्य सेनान्यमसौ सुरेन्द्रः ।
स्वर्गैकलक्ष्मीप्रभुतामवाप्य
जगत्त्रयं पाति तव प्रसादात् ॥ ११ ॥
स शङ्करस्तामिति जातवेदो-
विज्ञापनामर्थवतीं निशम्य ।
अभूत् प्रसन्नः परितोषयन्ति
गीर्भिर्गिरीशा रुचिराभिरीशम् ॥ १२ ॥
प्रसन्नचेता मदनान्तकारः

Digitized by Google

स तारकारेर्जयिनो भवाय ।
शक्रस्य सेनाधिपतेर्जयाय
व्यचिन्तयच्चेतसि भावि किञ्चित् ॥ १३ ॥
युगान्तकालाग्निमिवाविषह्यं
परिच्युतं मन्मथरङ्गभङ्गात् ।
रतान्तरेतः स हिरण्यरेत-
स्यथोर्द्ध्वरेतास्तदमोघमाधात् ॥ १४ ॥
अथोष्णबाष्पानिलदूषितान्तं
विशुद्धमादर्शमिवात्मदेहम् ।
बभार भूम्ना सहसा पुरारि-
रेतःपरिक्षेपविवर्णमग्निः ॥ १५ ॥
त्वं सर्वभक्षो भव भीमकर्म्मा
कुष्ठाभिभूतो ऽनल धूमगर्भः ।
इत्थं शशापाद्रिसुता हुताशं
तथारतानन्दसुखस्य भङ्गात् ॥ १६ ॥
दक्षस्य शापेन शशी क्षयीव
प्लुष्टो हिमेनेव सरोजकोशः ।
बहन् विरूपं वपुरुग्ररेत-
श्चयेन वह्निः किल निर्जगाम ॥ १७ ॥
स पावकालोकनतो विलक्षां
स्मरत्रपास्मेरविनम्रवक्त्राम् ।
विनोदयामास गिरीन्द्रपुत्रीं
शृङ्गारगर्भैर्मधुरैर्वचोभिः ॥ १८ ॥
हरो विकीर्णं घनघर्मतोये-
र्नेत्राञ्जनाङ्कं सदयं प्रियायाः ।
द्वितीयकौपीनचलाञ्चलेन
हरन्मुखेन्दोरकलङ्किनो ऽस्याः ॥ १९ ॥
मन्देन खिन्नाङ्गुलिना करेण
कम्प्रेण तस्या वदनारविन्दात् ।
परामृशन् घर्मजलं जहार
हरः सहेलं व्यजनानिलेन ॥ २० ॥
॥ युग्मम् ॥
रतिश्लथं तत्कबरीकलाप-
मंसावसक्तं विगलत्प्रसूनम् ।
स पारिजातोद्भवपुष्पमय्या
स्रजा बबन्धामृतमूर्त्तिमौलिः ॥ २१ ॥
कपोलपाल्यां मृगनाभिचित्र-
पत्रावलीमिन्दुमुखः सुमुख्याः ।
स्मरस्य सिद्धस्य जगद्विमोह-
मन्त्राक्षरश्रेणिमिवोल्लिलेख ॥ २२ ॥
रथस्य कर्णावभि तन्मुखस्य
ताटङ्कचक्रद्वितयं न्यधात् सः ।
जगज्जिगीषुर्विषमेषुरेष
ध्रुवं यमारोहति पुष्पचापः ॥ २३ ॥
तस्याः स कण्ठे ऽभिघनस्तनं यां
न्यधत्त मुक्ताफलहारवल्लीम् ।
सा प्राप मेरुद्वितयस्य मूर्द्ध्नि
स्थितस्य गङ्गौघयुगस्य लक्ष्मीम् ॥ २४ ॥
नखव्रणश्रेणिधरे बबन्ध
नितम्बबिम्बे रसनाकलापम् ।
चलत्स्वचेतोमृगबन्धनाय
मनोभुवः पाशमिव स्मरारिः ॥ २५ ॥
भालेक्षणाग्नेः स्वयमञ्जनं स
न्यक्षा दृशोः साधु निवेश्य तस्याः ।
नवोत्पलाढ्याः पुलकोपगूढः
कण्ठे विनीले ऽङ्गुलिमुज्जघर्ष ॥ २६ ॥
अलक्तकं पादसरोरुहाग्रे
सरोरुहाढ्याः किल संनिवेश्य ।
स्वमौलिगङ्गासलिलेन हस्ता-
रुणत्वमक्षालयदिन्दुमौलिः ॥ २७ ॥
भस्मानुलिप्ते वपुषि स्वकीये
सहेलमादर्शतलं विमृज्य ।
नेपथ्यलक्ष्मीपरिभावनार्थं-
मदर्शयज्जीवितवल्लभां सः ॥ २८ ॥
प्रियेण दत्ते मणिदर्पणे च
संयोगचिह्नं स्ववपुर्विभाव्य ।
त्रपावती तत्र घनानुरागं
रोमाञ्चदंभेन बहिर्बभार ॥ २९ ॥
नेपथ्यलक्ष्मीं दयितोपक्लृप्तां
सस्मेरमादर्शतले विलोक्य ।

Digitized by Google

अमंस्त सौभाग्यवतीषु धुर्य्य-
मात्मानमुद्भूतविलक्षता सा ॥ ३० ॥
अन्तः प्रविश्यावसरे ऽथ तत्र
स्निग्धे वयस्ये विजया जया च ।
उमां तदोपाचरतां कलाभां
दूरेस्थितां तां शशिखण्डमौलेः ॥ ३१ ॥
व्यधुर्बहिर्मङ्गलगानमुच्चै-
र्वैतालिकाश्चित्रचितचारुवेद्याम् ।
जगुश्च गन्धर्वगणाः सशंख-
ध्वनिं प्रमोदाय पिनाकपाणेः ॥ ३२ ॥
ततः स्वसेवावसरे सुराणां
गणास्तदालोकनतत्पराणाम् ।
द्वारि प्रविश्य प्रणतो ऽथ नन्दी
निवेदयामास कृताञ्जलिः सन् ॥ ३३ ॥
महेश्वरो मानसराजहंसीं
करे दधानस्तनयां हिमाद्रेः ।
सम्भोगलीलालयतः सहेलं
हसन् बहिस्तानभि निर्जगाम ॥ ३४ ॥
क्रमान्महेन्द्रप्रमुखाः प्रणेमुः
शिरोनिबद्धाञ्जलयो महेशम् ।
प्रालेयशैलाधिपतेस्तनूजां
देवीञ्च लोकत्रयमातरं ते ॥ ३५ ॥
यथागतं तान् विबुधान् विसृज्य
प्रसादमानक्रियया प्रतस्थे ।
स नन्दिना दत्तभुजो ऽधिरुह्य
वृषं वृषाङ्कः सह शैलपुत्र्या ॥ ३६ ॥
मनो ऽतिवेगेन ककुद्मता स
प्रतिष्ठमानो गगनाध्वनीनः ।
तौ पारिजातप्रसवप्रसक्तौ
मरुत् सिषेवे गिरिजागिरीशौ ॥ ३७ ॥
पिनाकिना ऽपि स्फटिकाचलेन्द्रः
कैलासनामा कलितांबरांशः ।
धृतार्द्धसोमो भृतभोगिभोगो
विभूतिधारी स्वइव प्रपेदे ॥ ३८ ॥
विलोक्य यत्र स्फटिकस्य भित्तौ
सिद्धाङ्गनाः स्वं प्रतिबिम्बमारात् ।
भ्रांत्या परस्याभिमुखीभवन्ति
प्रियेषु मानग्रहिला नमत्सु ॥ ३९ ॥
सुबिंबितस्य स्फटिकांशुगुप्ते-
श्चन्द्रस्य चिह्नप्रकरः करोति ।
गौर्य्या ऽर्पितस्येव रसेन यत्र
कस्तूरिकास्थासकुलस्य लीलाम् ॥ ४० ॥
यदीयभित्तौ प्रतिबिंबिताङ्ग-
मात्मानमालोक्य रुषा करीन्द्राः ।
मत्तान्यनागभ्रमतो ऽतिभीम-
दन्ताभिघातव्यसनं वहन्ति ॥ ४१ ॥
निशासु यत्र प्रतिबिंबितानि
ताराकुलानि स्फटिकालयेषु ।
दृष्ट्वा रतान्तच्युततारहार-
मुक्ताभ्रमं बिभ्रति सिद्धवध्वः ॥ ४२ ॥
नभश्चरीमण्डनदर्पणश्रीः
सुधानिधिर्मूर्द्धनि यस्य तिष्ठन् ।
अनर्घ्यचूडामणितामुपैति
शैलाधिराजस्य शिवालयस्य ॥ ४३ ॥
समीयिवांसो रहसि स्मरार्त्ता
रिरंसवो यत्र सुराः प्रियाभिः ।
एकाकिनो ऽपि प्रतिबिंबभाजो
विभान्ति भूयोभिरिवान्विताः स्वैः ॥ ४४ ॥
दिष्टो ऽपि गौर्य्या सह चन्द्रमौलि-
र्यदृच्छया स्फाटिकशैलशृङ्गे ।
शृङ्गारचेष्टाभिरनारताभि-
र्मनोहराभिर्व्यहरच्चिराय ॥ ४५ ॥
देवस्य तस्य स्मरसूदनस्य
हस्तं समालंब्य सुविभ्रमश्रीः ।
सा नन्दिना वेत्रभृतोपदिष्ट-
मार्गा पुरोगेन कलं चचाल ॥ ४६ ॥
चलद्विषाणो विकटाङ्गभङ्गः
सदन्तुरः शुष्कसुतीक्ष्णतुण्डः ।
भ्रुवोपदिष्टः स तु शङ्करेण
तस्या विनोदाय ननर्त्त भृङ्गी ॥ ४७ ॥

Digitized by Google

कण्ठस्थलीलोलकपालमाला
दंष्ट्राकरालाननमभ्यनृत्यत् ।
प्रीतेन तेन प्रभुणा प्रणुन्ना
काली कलत्रस्य मुदे प्रियस्य ॥ ४८ ॥
भयङ्करौ तौ विकटं नटन्तौ
विलोक्य बाला भयविह्वलाङ्गी ।
सरङ्गमुत्सङ्गमनङ्गशत्रो-
र्गाढं प्रसह्य स्वयमालिलिङ्ग ॥ ४९ ॥
उत्तुङ्गपीनस्तनपीडपीडं
ससंभ्रमं तत्परिरम्भमीशः ।
प्रपद्य सद्यः पुलकोपगूढः
स्मरेण रूढप्रमदो ममाद ॥ ५० ॥
इति गिरिसुतया विलासलीला-
विविधविभङ्गिभिरेष तोषितः सन् ।
अमृतकरशिरोमणिर्गिरीन्द्रे
कृतवसतिर्वशिभिर्गणैर्ननन्द ॥ ५१ ॥

इति श्रीकुमारसम्भवे महाकाव्ये कवीन्द्रकालि-
दासकृतौ कैलासगमनोनाम नवमः सर्गः ॥

॥ नयवीथी ॥

प्रकरणपञ्चिकायां चतुर्थं प्रकरणम् ॥ ४ ॥

यथार्थं सर्वमेवेह विज्ञानमिति सिद्धये ।
प्रभाकरगुरोर्भावः समीचीनः प्रकाश्यते ॥ १ ॥
तत्र तावदिदं केचिदूचिरे चारुचेतसः ।
भ्रमसन्देहविज्ञाने अयथार्थे उभे इति ॥ २ ॥
इदं रजतमित्येषा या शुक्तिशकले मतिः ।
साचेद्यथार्था भ्रान्तित्वं तदा तस्यास्तु कीदृशम् ॥ ३ ॥
यथावस्थितवस्त्वात्ममपि ज्ञानं यदा भ्रमः ।
प्रमाणेषु तदाऽऽपन्ना सर्वेषु भ्रमरूपता ॥ ४ ॥
विवेकाग्रहणं भ्रान्तिरितिचेन्नैतदीदृशम् ।
सुषुप्तेऽपि भ्रमापत्तेः सर्वभेदापरिग्रहात् ॥ ५ ॥
भेदाग्रहे गृहीतेच यदि स्याद् भ्रमरूपता ।
दूरात् सामान्यमात्रस्य दर्शनं स्याद्भ्रमस्तदा ॥ ६ ॥
यथार्थदर्शनत्वेच बाधको ऽपि न युज्यते ।
अज्ञानभेदग्रहणे न बाधकमितिर्भवेत् ॥ ७ ॥
यथार्थतापि चेतस्याः कथमित्यपि चिन्त्यताम् ।
एषा ऽपि रजतत्वेन शुक्तिकामध्यवस्यति ॥ ८ ॥
रजतत्वं न शुक्तेश्च रजतस्य न शुक्तिता ।
तयोरन्योन्यभिन्नत्वं प्रत्यक्षेणावधारितम् ॥ ९ ॥
अथेयं रजतत्वेन न शुक्तिमवलम्बते ।
सामानाधिकरण्येन प्रतिपत्तिर्विरुध्यते ॥ १० ॥
रूप्यार्थिनः प्रवृत्तिश्च शुक्तौ स्यान्निर्निबन्धना ।
अग्रहो ऽपि न भेदस्य प्रवृत्तौ कारणं यतः ॥ ११ ॥
रजतप्रतिपत्तिश्च नेयमन्धस्य जायते ।
तेनेयमिन्द्रियाधीना संयुक्तेचेन्द्रियं धियम् ॥ १२ ॥
समर्थमुत्पादयितुं शुक्तिसंयोगिचेन्द्रियम् ।
तेन सैवेन्द्रियेणेह रजतत्वेन गृह्यते ॥ १३ ॥
स्यान्मतं शुक्तिकामात्रमिन्द्रियेणावसीयते ।
तदेव सदृशत्वेन रजतस्मृतिकारणम् ॥ १४ ॥
सदृशप्रत्ययेणेह संस्कारोद्बोधहेतुना ।
तदित्युल्लेखरहिता रजते भवति स्मृतिः ॥ १५ ॥
स्मृतावस्यां मनोदोषात् तदित्यंशो ऽवखण्डितः ।
तेनेन्द्रियानुकारित्वमन्यथासिद्धमित्यसत् ॥ १६ ॥
अनुभूतेऽपि विषये तत्परामर्शवर्जितम् ।
न बोधं स्मृतिमिच्छन्ति धारावाहिकबोधवत् ॥ १७ ॥
अपरोक्षपुरोवर्त्तिसामानाधिकरण्यतः ।
नेयं स्मृतिः किन्तु शुक्तौ भ्रान्तो ऽयं रजतग्रहः ॥ १८ ॥
स्मृत्युद्बोधनिमित्तंच स्वप्ने किञ्चिन्न विद्यते ।
पीतशङ्खावबोधेच द्विचन्द्रग्रहणे तथा ॥ १९ ॥
दिङ्मोहालातचक्रादिभ्रान्तयश्च कथं पुनः ।
स्मृतित्वाश्रयणेनैता वर्णनीया यथार्थतः ॥ २० ॥
तेनेन्द्रियादिदोषेण जायन्ते भ्रान्तिबुद्धयः ।
बुध्यमानावस्तुरूपमन्यथास्थितमन्यथा ॥ २१ ॥
स्थाणुर्वा पुरुषोवेति सन्देहो यो ऽपि जायते ।
अभावात् तादृशो ऽर्थस्य स यथार्थः कथं भवेत् ॥ २२ ॥
अत्र ब्रूमो यएवार्थो यस्यां संविदि भासते ।
वेद्यः सएव नान्यद्धि वेद्यावेद्यस्य लक्षणम् ॥ २३ ॥
इदं रजतमित्यत्र रजतंचावभासते ।
तदेव तेन वेद्यं स्यान्नतु शुक्तिरवेदनात् ॥ २४ ॥
तेनान्यस्यान्यथाभानं प्रतीत्यैव पराहतम् ।

Digitized by Google

परस्मिन् भासमानेहि न परं भासते यतः ॥ २५ ॥

नन्वेवं रजताभासः कथमेष घटिष्यति ।
उच्यते शुक्तिशकलं गृहीतं भेदवर्जितम् ॥ २६ ॥

शुक्तिकाया विशेषा ये रजताद्भेदहेतवः ।
ते न ज्ञाता अभिभवादज्ञाता सामान्यरूपता ॥ २७ ॥

अनन्तरंच रजते स्मृतिर्जाता तयापिच ।
मनोदोषात् तदित्यंशपरामर्शविवर्जितम् ॥ २८ ॥

रजतं विषयीकृत्य नैव शुक्तेर्विवेचितम् ।
स्मृत्याऽतो रजताभास उपपन्नो भविष्यति ॥ २९ ॥

धारावाहिकवन्नेयं स्मृतिरित्युदितंच यत् ।
उच्यते ऽनन्यगतितः स्मृतिरत्रावगम्यते ॥ ३० ॥

नह्यसन्निहितं तावत् प्रत्यक्षं रजतं भवेत् ।
लिङ्गाद्यभावान्नान्यस्य प्रमाणस्य न गोचरः ॥ ३१ ॥

परिशेषात् स्मृतिरिति निश्चयो जायते पुनः ।
तस्मात् कारणसद्भावाद्धारावाहिकधीषुतु ॥ ३२ ॥

प्रत्युत्पन्नेन्द्रियग्रामसामग्री ग्रहकारणम् ।
ग्रहणे स्मरणेचेमे विवेकानवभासिनी ॥ ३३ ॥

सम्यग्रजतबोधात्तु भिन्ने यद्यपि तत्त्वतः ।
तथापि भिन्ने नाभातो भेदाग्रहसमत्वतः ॥ ३४ ॥

सम्यग्रजतबोधश्च समवेकार्थगोचरः ।
ततो भिन्ने अबुध्वातु स्मरणग्रहणे इमे ॥ ३५ ॥

समानेनेव रूपेण केवलं मन्यते जनः ।
अपरोक्षार्थबोधेन समानार्थग्रहेणच ॥ ३६ ॥

अवेलक्षण्यसंवित्तिरिति तावत् समर्थितम् ।
व्यवहारोऽपि तत्तुल्यस्ततएव प्रवर्त्तते ॥ ३७ ॥

समत्वेनच संवित्तेर्भेदस्याग्रहणेनच ।
मिथ्याभावोऽपि तत्तुल्यव्यवहारप्रवर्त्तनात् ॥ ३८ ॥

रजतव्यवहारांशे विसंवादयतो नरात् ।
बाधकप्रत्ययस्यापि बाधकत्वमतो मतम् ॥ ३९ ॥

प्रसज्यमानरजतव्यवहारनिवारणात् ॥ ४० ॥

सन्निहितरजतशकले रजतमतिर्भवति यादृशी सत्या ।
भेदानध्यवसायादियमपि तादृक् परिस्फुरति ॥ ४१ ॥

साधारणंहि रूपं तस्या अस्याश्च विद्यते तेन ।
तन्मात्रप्रतिभानात् समानतामेव मन्यन्ते ॥ ४२ ॥

तत्तुल्यव्यवहारप्रसक्तिरपि युज्यतेचातः ।
तद्विनिवारणकरणाद्बाधकता बाधकस्यापि ॥ ४३ ॥

एवं स्वप्नेऽपि वस्तूनि स्मर्यमाणानि सन्त्यपि ।
अनुभूतांशमोषेण भासन्ते गृह्यमाणवत् ॥ ४४ ॥

ग्रहणस्य विशेषोहि गृहीतग्रहणं स्मृतिः ।
सा गृहीतांशमोषेण गृहीतिरिति तिष्ठति ॥ ४५ ॥

संस्कारोद्बोधहेतुश्च तत्रादृष्टं प्रकल्प्यते ।
विपरीतख्यातिपक्षेऽप्येषा तुल्याहि कल्पना ॥ ४६ ॥

अदृष्टस्यतु हेतुत्वाज्जायतस्तादृशी न धीः ।
अवस्थापिह्यदृष्टस्य सामग्री फलसम्भवे ॥ ४७ ॥

पीतशङ्खावबोधेच पित्तस्येन्द्रियवर्त्तिनः ।
पीतिमा गृह्यते द्रव्यरहितो ऽश्विव तिम्मता ॥ ४८ ॥

शङ्खस्येन्द्रियदोषेण शुक्लिमाच न गृह्यते ।
केवलं द्रव्यमात्रंतु प्रथते रूपवर्जितम् ॥ ४९ ॥

गुणे द्रव्यव्यपेक्षेच द्रव्येच गुणकाङ्क्षिणि ।
भासमाने तयोर्बुद्धिरसम्बन्धं न बुध्यते ॥ ५० ॥

सत्यपीतावभासेन समे भातो मती इमे ।
व्यवहारोऽपि तत्तुल्य एवमत्रापि युज्यते ॥ ५१ ॥

यत्तु नेत्रगतस्यापि कज्जलस्य न कालिमा ।
गृह्यते कारणं तत्र तेनेन्द्रियनिरोधनम् ॥ ५२ ॥

अतसीपुष्पसङ्काशं यत् तावन्नेत्रमण्डलम् ।
तत्रस्थमञ्जनं यत्तत् तेजोवृत्तिनिरोधकम् ॥ ५३ ॥

मण्डलान्तरसंस्थंतु यन्नाम नयनेऽञ्जनम् ।
तस्यानार्जवदोषेण नीलिमा नावगम्यते ॥ ५४ ॥

इन्द्रियोपरिभागेऽपि लिप्तेन स्वच्छभावतः ।
पित्तेन नायनं तेजः काचेनेव न रुध्यते ॥ ५५ ॥

प्रसरन्नायनं तेजो ग्राहकं नाश्रयस्थितम् ।
पित्तस्याग्रहणं सौक्ष्म्यात् प्रभायामिव तेजसः ॥ ५६ ॥

मधुरे तिक्तधीरेवं व्याख्याता पित्तवर्त्तिनः ।
तेनत्यस्य रसहीनस्य गुडस्यच परिग्रहात् ॥ ५७ ॥

तथा द्विचन्द्रबोधेऽपि भिन्नमेवेन्द्रियं महः ।
भिन्ने जनयति प्रख्ये एकस्मिन्नेव शीतगौ ॥ ५८ ॥

संवित्ती ते न भिद्येते तद्द्वित्वे सति मन्यते ।
भिन्नार्थबुद्धितुल्यत्वमत्रापि खलु पूर्ववत् ॥ ५९ ॥

स्मरतोऽप्येकतां तेन भ्रमो ऽयमुपपद्यते ।
नहि स्मृतिप्रमोषेण सर्वत्रैव भ्रमो मतः ॥ ६० ॥

दिङ्मोहे दृष्टसामर्थ्याद्दिक्स्वरूपानवग्रहात् ।
दिगन्तरस्वरूपस्य स्मरणाच्च भ्रमो मतः ॥ ६१ ॥
अलातचक्रे ऽलातस्य भ्रमतः सर्वतो ऽद्भुतम् ।
निरन्तरं धियो जाताश्चक्रबुद्धिसमा मताः ॥ ६२ ॥
कालभेदस्तु शीघ्रत्वाद्धियां तासां न लक्ष्यते ।
चक्रधीव्यवहारश्च तेनास्मिन्नपि युज्यते ॥ ६३ ॥
एतेनैव प्रकारेण सर्वभ्रान्तिषु पण्डितैः ।
ऊहनीया हेतुभेदा यथार्थज्ञानसिद्धये ॥ ६४ ॥
स्थाणुर्वा पुरुषोवेति सन्देहेऽपि यदा द्वयम् ।
स्मर्यते ऽन्योन्यनिर्मुक्तं तदा ऽर्थविरहः कुतः ॥ ६५ ॥
यदिचार्थं परित्यज्य काचिद्बुद्धिः प्रवर्त्तते ।
व्यभिचारवती स्वार्थे कथं विश्वासकारणम् ॥ ६६ ॥
नन्वज्ञाप्यरजतधीतुल्यताशङ्कया समः ।
अविश्वासस्तत्र दोषविरहाच्चेद्विनिर्णयः ॥ ६७ ॥
सममेतद्विपरीतख्यातिपक्षेऽपि दृश्यते ।
अहो बत महानेष प्रमादो धीमतामपि ॥ ६८ ॥
ज्ञानस्य व्यभिचारेहि विश्वासः किंनिबन्धनः ।
ज्ञानस्य व्यभिचारेऽपि ज्ञानं यत् सत्यमेव तत् ॥ ६९ ॥
अज्ञानमपि किन्त्वस्ति रूपभेदनिबन्धनम् ।
जिज्ञासा ज्ञायते येयं साप्यन्येन निवर्त्तते ॥ ७० ॥
यत्नेनान्विष्यमाणेऽपि रूपं तच्चेन्न दृश्यते ।
तदा पूर्वैव संवित्तिर्नास्तित्वेनोपदिश्यते ॥ ७१ ॥
अयथार्थत्वपक्षेच ज्ञानं साकारमापतेत् ।
आकारो भासते योहि ज्ञानएवावतिष्ठते ॥ ७२ ॥
अयथार्थस्य बोधस्य नोत्पत्तावस्ति कारणम् ।
दोषाच्चेन्नहि दोषाणां कार्यशक्तिविघातिता ॥ ७३ ॥
भस्मकादिषु कार्यस्य विघातादेव दोषता ।
अग्नेर्हि रसनिष्पत्तिः कार्यं जठरवर्त्तिनः ॥ ७४ ॥
विद्यमानवस्तुरूपग्रहणे प्रतिबन्धृता ।
दोषाणामुपपन्नेति भ्रान्तिर्ग्रहनिबन्धना ॥ ७५ ॥
विषयाव्यभिचारित्वं साधयितुं सर्वसंविदामेषा ।
निरमीयत नीतिविदा शालिकनाथेन नयवीथी ॥ ७६ ॥
मिश्रशालिकनाथेन नयवीथीतिसंज्ञितम् ।
कृतं लोकहितार्थाय प्रभाकरमतं यथा ॥ ७७ ॥

इति श्रीमहामहोपाध्यायशालिकनाथमिश्रकृतिरियं नयवीथी समाप्ता ॥

॥ श्रीः ॥

॥ सायनवादः ॥

यः सर्वशास्त्रैः सततं विमृग्यः
सदा भजन्ते खलु योगिनो यम् ।
यश्चास्ति पारे सकलागमानां
सोऽव्याद्दयालुः परमेश्वरोऽस्मान् ॥ १ ॥

अथ ज्योतिःशास्त्रातिगहनविचारचातुरीधुरीणानामनेकगम्भीरविद्याकूपारपारदृश्वनामप्यस्पृष्टगर्वलेशानां परगुणश्रवणानन्दितमानसानां तत्त्वजिज्ञासूनां मनोरञ्जनायातिचमत्कृतिजनकं ज्योतिःशास्त्रविचारसारभूतमिमं सायनवादमेतादृग्गहनविषयविचाराक्षमोऽप्यहमासादितानेकप्रबलावष्टम्भकोऽप्याकुलं संक्षेपतो निरूपयामि। प्राचीनातिप्राज्ञभारतवर्षीयकार्तान्तिकप्रणीतग्रन्थानामवलोकनेनेदं स्पष्टमवगम्यते यदियं ज्योतिर्विद्याऽतिप्राचीनकालादस्मिन् भारते वर्षे प्रचरिताऽस्तीति । परमस्त्येतदखिलविद्वज्जनानां सुविदितं यदेतत्कालप्रसिद्धेषु प्राचीनज्योतिःशास्त्रग्रन्थेषु महदन्तरमस्ति। तच्चान्तरं ज्योतिर्विद्यायाः केवलं वेधमूलकत्वादतिसूक्ष्मयन्त्रद्वारा सततं कृतैर्वेधैरेवापाकर्तुं शक्यते। सुदीर्घकालश्चात्यगान्न कोऽप्यस्मिन् भारतवर्षेऽनवरतकृतवेधद्वारा ग्रहाणां गतीः सम्यगवलोक्यैतच्छास्त्रग्रन्थेषु कालवशाद्विसंवादयस्तानर्थानपानैषीत् । अतोऽतिप्राचीनज्योतिःशास्त्रग्रन्थोक्तग्रहगणितप्रकारैः साधितानि ग्रहोदयास्तग्रहणादीनि तत्तत्कालेषु न घटन्ते। पूर्वं ग्रन्थग्रथनावसर एवैतादृशो बहवो विरुद्धार्थाः प्राचीनग्रन्थेषूपनिबद्धा य इदानीं सूक्ष्मयन्त्रद्वारा कृतैर्वेधैरुपपत्त्या च तथा नोपलभ्यन्ते। ते यस्मिन्नंशे सान्तरास्तद्दर्शयितुमत्र कतिपयनवीनप्राचीनसिद्धान्तान् निदर्शयामि ।

प्राचीनसिद्धान्ताः	नवीनसिद्धान्ताः
१ । भूरियं स्थिरा सूर्यादयो ग्रहाः तामभितो भ्रमन्ति ।	१ । भूः स्वाक्षं परितो भ्रमन्ती सूर्यं परिक्रामति ।
२ । भूव्यासे षड्शत्यधिकसहस्रं १६०० योजनानि सन्ति ।	२ । भूव्यासे ८७० सप्तत्यधिकाष्टशतं योजनानि सन्ति ।
३ । विधुबिम्बव्यासोऽ ४८० शीत्यधिकचतुःशतं योजनानि ।	३ । विधुबिम्बव्यासोऽ २३८ षट्त्रिंशदधिकद्विशतं योजनानि ।
४ । सूर्यबिम्बव्यासः ६५०० पञ्चशत्यधिकषट्सहस्रं योजनानि ।	४ । सूर्यबिम्बव्यासः ९७००० सप्तनवतिसहस्रं योजनानि ।
५ । भूकेन्द्रात् ५१५६६ एतन्मितयोजनान्तरे चन्द्रोऽस्ति ।	५ । भूकेन्द्रात् २६१३४ एतावति योजनात्मकेऽन्तरे चन्द्रो वर्तते ।
६ । भूकेन्द्रादादित्य ६८६३७७ एतावद्योजनान्तरेऽस्ति ।	६ । भूकेन्द्रादादित्य १०४४२१५४ एतावद्योजनान्तरे वर्तते ।
७ । कुजादिग्रहाणां बिम्बमानानि	७ । कुजादिग्रहाणां बिम्बमानानि

	कलाः	विकलाः		विकलाः
कुजः	४	४५	कुजः	६ . २६
बुधः	४	१५	बुधः	४ . ४६
गुरुः	७	२०	गुरुः	३६ . ७४
शुक्रः	६	०	शुक्रः	१६ . १
शनिः	५	२०	शनिः	१६ . २

८। भूकेन्द्राद्यावत्यन्तरे सूर्योऽस्ति तदष्टगुणान्तरे सर्वाणि नक्षत्राणि वर्तन्ते तानि च सूर्यतेजसा प्रकाश्यन्ते।	८। भूकेन्द्रादनन्तान्तर इमानि नक्षत्राणि सन्ति। इदं च सम्यक् निर्णीतं यत् तानि सर्वाणि भूकेन्द्रात् समानान्तरे न वर्तन्ते। अपिच स्वीयेनैव तेजसा तानि प्रकाशन्ते।
९। सर्वेषां ग्रहाणां योजनात्मिका गतिस्तुल्यैव तेषां कक्षाश्च वृत्तरूपाः।	९। ग्रहाणां योजनात्मिका गतिर्विषमा दीर्घवृत्ताकाराश्च तेषां मार्गाः।
१०। एकस्मिन् निरयणसौरवर्षे दिनाद्यमेतावत् ३६५ दिनानि १५ घटिकाः ३० पलानि इत्यादि।	१०। एकस्मिन्निरयणसौरवर्षे दिनाद्यमेतावत् ३६५ दिनानि १५ घटिकाः २२½ सार्द्धद्वाविंशतिः पलानि इत्यादि।
११। चन्द्रस्य चक्रभोगकालः २७ दिनानि ७ होराः ४३। १६.०३।	११। चन्द्रस्य चक्रभोगकालः २७ दिनानि ७ होराः ४३। ११ . ५४।
१२। सूर्यस्य परमा क्रान्तिः २४ अंशाः	१२। सूर्यस्य परमा क्रान्तिः २३ अंशाः २७ कलाः
इत्यादि।	इत्यादि।

एवमादीनि बहून्यन्तराणि प्राचीनग्रन्थेषूपलभ्यन्ते। तत्र यद्यपि भूर्भ्रमति स्वतेजसा च सर्वाणि नक्षत्राणि प्रकाशन्त इत्यादिविषयाणां वस्तुतो याथार्थ्यादवश्यं ते मन्तव्यास्तथापि यत् ते नाङ्गीक्रियन्ते तत्रेदमेव मुख्यं बीजं यत् तेषामनङ्गीकारेऽपि गणित इतिकर्तव्यतायां न कोऽपि दोषः संभाव्यते। अतएवाचार्याः प्राचीनग्रन्थेषु भूः सूर्यं परितो भ्रमतीति नोचुः। परमहमिदं सम्यगुपपादयितुं शक्नोमि यत् प्राचीनाचार्या भूरेव सूर्यं परितो भ्रमतीति निश्चिन्वानाः शास्त्राणि प्राणैषुः। किन्त्वयं नैतादृशः सुगमो विषयो यत् तमहमस्मिन् संक्षिप्ते प्रघट्टके विस्तरतो वर्णयितुं पारयेयमिति। तत्र न किमपि ब्रुवे। भूभ्रमणानङ्गीकार एतच्छास्त्राध्येतॄणां गोलस्थितेः सौकर्येणावगमात् सूर्यगतेरेवापाततः प्रतीयमानत्वाद्गणिते दोषादर्शनाच्च शास्त्रकाराः सूर्य एव भूमिं परितो भ्रमतीति लिलिखुः। अतएव स्वल्पस्यापि दोषस्य व्यवहारेऽदर्शनादेतादृशविषयाणामनङ्गीकारे न कापि क्षतिः। परन्तु सूर्यस्य परमा क्रान्तिस्तस्य चक्रभोगकालश्चेत्यादिपदार्थाः कालान्तरेऽवश्यं विकुर्वन्ति। यथाह भगवान् वसिष्ठः।

इत्थं माण्डव्य संक्षेपादुक्तं शास्त्रं मयोदितम्।
विश्लिष्टौ रविचन्द्राद्यैर्भविष्यति युगे युगे ॥

अतएवैतादृग्विषयान् ये च ग्रन्थग्रथनावसर एव पूर्वं विरुद्धतयोक्ता विषयास्तांश्च तत्तत्काले सूक्ष्मवेधैरनुमानेन प्रत्यक्षतो वा याथातथ्येनावगम्य दृग्गणितैक्यं च कृत्वा प्राज्ञैर्ग्रन्थरचनायां प्रवर्तितव्यम् ॥

तथाच श्रूयते।

यस्मिन् पक्षे यत्र काले येन दृग्गणितैक्यकम्।
दृश्यते तेन पक्षेण कुर्यात् तिथ्यादिनिर्णयम् ॥

इममेव सिद्धान्तमनुसृत्य सकलज्योतिर्विदामग्रणीर्महाप्राज्ञो गणेशदैवज्ञः सर्वान् ग्रहान् स्वकालोपलभ्यैर्यन्त्रैः सम्यग्विद्ध्वा यद्यदन्तरं ग्रहगतिष्वद्राक्षीत् तत् तत् संशोध्याखिलकरणग्रन्थावतंसभूतं ग्रहलाघवं नामापूर्वं करणग्रन्थमकरोत्। ननु पूर्वोक्तानां प्राचीननवीनसिद्धान्तानामन्यतमस्याप्यत्रोपपत्तेरनुक्तत्वात् कथं नवीनसिद्धान्तानामेव वास्तविकत्वमवधेयम्। सत्यम्। संक्षेपतो वर्ण्यमानेऽस्मिन् सायनवादे पूर्वोक्तसकलसिद्धान्तोपपत्तीनां यौगपद्येन वक्तुमशक्यत्वात् प्रकृते तेषां याथार्थ्योपपादनाय केवलमिदमेव कथयामि यद्यैर्यैः सिद्धान्तैः साधिता ग्रहोदयास्तकालास्तदीयस्थानानि च दिवि घटेरंस्तएव सिद्धान्ता वस्तुभूताः। प्राचीनसिद्धान्तैः साधितानि ग्रहाणामुदयास्तग्रहणादीनि तु प्रायो न घटन्त इति स्पष्टमेवैषामवास्तविकत्वम्। नवीनसिद्धान्तानुसारेण प्रतिवर्षं विरचिते नाविकपञ्चाङ्गे लिखितानां दैनंदिनग्रहोदयास्तक्रान्तीनामाकाशे तत्तत्काले तथैव दर्शनान्निःसन्दिग्धमस्ति नवीनसिद्धान्तानां वास्तविकत्वम्। अत्र विषये सन्दिहानैरवश्यं तत्पञ्चाङ्गलिखितपदार्थानामाकाशेऽवलोकनेन प्रतातिरुत्पाद्या। अथ पूर्वं यान्यन्तराण्यदर्शयं तेभ्योऽतिरिक्तमेकमन्तरमस्ति सकलग्रन्थेषु तदिदानीं दर्शयामि। यदेतदाकाशे राशिचक्रं क्रान्तिवृत्ताभिधं कल्पितं तस्य समा द्वादश मेषवृषादयो विभागा राशिसंज्ञकाः कल्पिताः। इमे च विभागाः शास्त्रे द्विधोपलभ्यन्ते। क्रान्तिवृत्ताभिधस्य राशिचक्रस्य कमपि प्रदेशं स्थिरं मूलं मत्वा ततः कल्पिता ये तद्वृत्तस्य समा द्वादश मेषवृषादयो राशिसंज्ञका विभागास्ते स्थिरराशयो निरयणराशयश्चोच्यन्ते। दिविषदां तत्तदतिक्रमणकालाश्च राशिसंक्रान्तयो निरयणसंक्रान्तयश्चाभिधीयन्ते। एवं क्रान्तिवृत्तं विषुवद्वृत्ते ययोर्द्वयोः स्थानयोः संपातं विदधाति तयोर्यस्मात् संपातात् क्रान्तिवृत्तं विषुवद्वृत्तादुत्तरतो याति ततः कल्पिता ये क्रान्तिवृत्तस्य समा मेषवृषादयो राशिसंज्ञका विभागास्ते तत्संपातस्य सततं प्रतीपगमनाच्चलराशयः सायनराशयश्चाभिधीयन्ते। ग्रहाणां तत्तदतिक्रमणकालाश्च चलसंक्रान्तयः सायनसंक्रान्तयश्चोच्यन्ते। तत्र राशिसंक्रान्तेः केषांचिन्मतानुसारेण पुण्यदातृत्वेऽपि तस्याः क्रान्तिवृत्तस्थित्यननुसारित्वेनाज्ञागलस्तनस्येवाकिंचित्करत्वाच्चलसंक्रान्तेः पुण्योत्पादक-

Digitized by Google

त्वेन बहुसंमतत्वात् क्रान्तिवृत्तस्थित्यनुसारित्वाच्च राशिसंक्रान्तिगणनानश्चलसंक्रान्तिगणनैव शास्त्रे मुख्यत्वेनाभिहितास्ति। यथाह भगवान् वसिष्ठः ।

चलसंस्कृततिग्मांशोः संक्रमो यः स संक्रमः ।
अजागलस्तन इव राशिसंक्रान्तिरुच्यते ॥
पुण्यदां राशिसंक्रान्तिं केचिदाहुर्मनीषिणः ।
नैतन्मम मतं यस्मान्न स्पृशेत् क्रान्तिकक्षया ॥

भगवान् पुलस्त्योऽपि

अयनांशसंस्कृतो भानुर्गोले चरति सर्वदा ।
अमुख्या राशिसंक्रान्तिस्तुल्यः कालविधिस्तयोः ॥
स्नानदानजपश्राद्धव्रतहोमादिकर्मभिः ।
सुकृतं चलसंक्रान्तावक्षयं पुरुषोऽश्नुते ॥

रोमशसिद्धान्तेऽपि

दिनरात्रिप्रमाणानां निर्णयो न भसंक्रमात् ।
यतः सकलकर्माणि पुण्योऽतश्चलसंक्रमः ॥

एवं सूर्यसिद्धान्तस्य द्वादशाध्यायान्तर्गतपञ्चत्वारिंशच्छ्लोकोत्तरकतिपयश्लोकाऽर्थे सम्यग्विचारिते स्पष्टमेतत् प्रतीयते यदयनं ऋतवः संवत्सरश्च सायनएव क्रान्तिपातसंज्ञकाद्राशिवृत्तविषुवद्वृत्तयोः संपातादेव च मेषवृषादिराशिगणना मुख्येति । यावत्कालमादित्य उत्तरगोले चरति तावद्गीर्वाणनिलयभूतस्य वसुन्धरोत्तरकेन्द्रनिष्ठकनकाद्रेस्तत्किरणसंबन्धाद्यावच्च दक्षिणगोले स चरति तावत् तस्य तत्किरणसंबन्धाभावाच्च तत्र निवसतां सुमनसां षण्मासं दिनं षण्मासं च रात्रिरिति मनुष्यसंवत्सरमितं सुराणामहोरात्रं शास्त्रकाराः संजगदुः परमसौ संवत्सरः सायनो न निरयणः । सकलदैनंदिनशुभकार्याणां निशीथादामध्याह्नं नैशकार्याणां च मध्याह्नादानिशीथमाचरणस्य शास्त्रे विहितत्वात् तत्तत्कर्मानुष्ठातॄणामामुष्मिकश्वोवसीयसोत्पत्त्यै सांहितिकाः सूर्यस्योत्तरायणं देवानां दिनं दक्षिणायनं च रात्रिरिति यत्संहिताग्रन्थेषु लिलिखुस्तदेतद्दैवनिशीथादामध्याह्नमुत्तरायणं तन्मध्याह्नादानिशीथं च दक्षिणायनमित्येते सूर्यस्योत्तरायणदक्षिणायने सायनमानेनैवोत्पद्येते न निरयणमानेनातः सायनगणनैव मुख्या न निरयणगणना । एवं यद्यपि बहुभिः प्रकारैः शास्त्रतो युक्त्या च सायनगणनैव मुख्या निरयणगणना च गौणीति सिद्ध्यति । तथापि येयं गौण्येव निरयणगणनेदानीं लोके प्रचरिता तत्रायं हेतुर्यत् पूर्वं कस्मिंश्चित् काले यदा क्रान्तिपात एव निरयणमेषादिरासीत् तदा द्वे अपि गणने एकरूपे एवास्तां तत ऊर्ध्वं क्रान्तिपातचलने लोकानामननुसंधानाद्गौण्येव निरयणगणना लोके प्रचरिता । मन्ये इमां गौणीमपि निरयणगणनां स्वीकुर्वन्तु लोका यदि ते राशिचक्रमूलभूतं निरयणमेषादिं निश्चिनुयुः सति कुड्ये चित्रकर्म इति न्यायात् परमयं निरयणमेषादिः कथमपि न निर्णेतुं शक्यते । तथाहि । सूर्यसिद्धान्तादिग्रन्थेष्वेवं लिखितं यत् सूर्यो ३६५ दिनानि १५ घटिकाः ३१ पलानि २४ विपलानि इत्येतावता सावनकालेन द्वादश निरयणराशीन् भुङ्क्ते । परंतु सूक्ष्मयन्त्रद्वारा कृतैर्वेधैः सुनिश्चिताच्चक्रभोगकालादयं प्रोक्तश्चक्रभोगकालः किंचिदधिकाष्टौ पलान्यधिकस्ततो यदा प्रतिवर्षमेतावदन्तरं चक्रभोगकाले तदा कल्पगतैरेवंविधचक्रभोगकालरूपैरवास्तवैर्निरयणवर्षैः साधितं सूर्यस्य स्थानमवश्यमशुद्धमायात्यतएवैवं साधितात् सूर्यस्थानाच्च निरयणमेषादिनिर्णयः। एवं सकलग्रहस्थानेभ्योऽपि राशिमूलस्यानिर्णयएव । यदि ब्रूथ नक्षत्रताराध्रुवकेभ्यस्तत्स्थानस्य निर्णयः सुशक इति तदपि न घटते यतः प्राचीनसकलज्योतिर्ग्रन्थेषु ये नक्षत्रयोगताराध्रुवका ये च तेषां क्षेपकाः पठितास्ते सांप्रतं सूक्ष्मवेधैरुपलब्धेभ्यस्तत्तन्नक्षत्रध्रुवकेभ्यो भिन्नाः सन्ति । तथाहि । अश्विनीनक्षत्रयोगतारेदानीं ग्रन्थोक्तस्थानादग्रे किंचिदधिकांशद्वयान्तरे दृश्यते । भरणीनक्षत्रयोगतारा सपादद्व्यंशान्तरेऽग्रेऽस्ति। आर्द्रानक्षत्रयोगताराऽनुमानतोंऽशत्रयान्तरेऽग्रेऽवलोक्यते । चित्रानक्षत्रयोगतारांऽशत्रयान्तरेऽग्रेऽस्ति । विशाखानक्षत्रयोगतारा उक्तस्थानात् सार्द्धद्व्यंशान्तरे पृष्ठत उपलभ्यते । एवमेवान्यनक्षत्रविषयेऽपि बोध्यम् । एवं नक्षत्राणां याम्योत्तरान्तरेष्वपि बह्वन्तरमुपलभ्यते । अतः सकलग्रहाणां निरयणस्थानगणनामूलभूतनिरयणमेषादेः पठितनक्षत्रध्रुवकेभ्योऽपि निर्णयो दुःशक एवेत्यस्त्येतन्महदन्तरं सकलप्राचीनग्रन्थेषु । अतो निरयणसंक्रान्तीनां निःसंदिग्धतया ज्ञानाभावात् तासां क्रान्तिवृत्तस्थित्यननुसारित्वाच्छास्त्रे गौणत्वेनोक्तत्वाच्च तास्वाचरितैर्धर्मानुष्ठानैः सुकृतोत्पत्तिस्तु दूरे प्रत्युत दोषशङ्का प्रसज्यतेऽतः सायनसंक्रान्तीनां याथातथ्येनावगमात् स्मृत्यादौ मुख्यत्वेनोक्तत्वाच्च ता एव धर्मकार्येष्वौचित्यैकपक्षपातिभिराश्रयणीयाः । एवं सायनसंक्रान्तीनामङ्गीकारे मासा अपि सायनमानेनैव ग्राह्यास्तेषां संक्रान्त्युपलक्षितत्वात् । तथाच ब्रह्मसिद्धान्ते ।

मेषादिस्थे सवितरि यो यो मासः प्रपूर्यते चान्द्रः ।
चैत्राद्यः स ज्ञेयः पूर्तिद्वित्वेऽधिमासोऽन्त्यः ॥

ननु मेषादिस्थे सवितरि यो यो मासश्चान्द्रः प्रपूर्यते स चैत्राद्यो ज्ञेयोऽत्र मेषादिस्थे सवितरीत्यनेन सायनमेषादिस्थे

सवितरीति कथमवधार्यम् । सत्यमत्रेत्थं शास्त्रकारा व्यवास्थापयन् यद्वसन्तर्तौ चैत्रो मासः पतति सायनमेषसंक्रान्तिरपि तत्रैव जायतेऽतः स चान्द्रो मासश्चैत्रो ज्ञेयो यः सायनमेषस्थे पूषणि पूर्यते । एवं सर्वर्तूनां सायनत्वाच्चैत्र इव वैशाखादयोऽपि मासाः सायना एव बोध्यास्तेषां निरयणत्वाङ्गीकारे क्रान्तिपातस्य सततं प्रतीपगमनात् कालान्तरे माघपौषादिमासेषु वसन्तर्त्वापत्तेः । नच सूर्यसिद्धान्तादिग्रन्थेषु क्रान्तिपातस्य निरयणमेषादेः प्राक् परतश्चासप्तविंशांशमेव भ्रमणस्योक्तत्वात् कथमुक्तदोषः प्रसज्यत इति वाच्यम् । यतो मुंजालादिग्रन्थेषु क्रान्तिपातस्य द्वादशराशिष्वपि भ्रमणस्योक्तत्वात् तदीयतादृग्भ्रमणस्यैव युक्तिसिद्धत्वाच्च निरयणगणनाङ्गीकारे माघपौषादिमासेषु वसन्तर्तुपतनापत्तिस्तदवस्थैव । तदानीं ज्योतिःशास्त्रस्य तत्त्वमबुध्वैव लेखकाः कलेरयं दुर्धरः प्रभावो यदन्यकालिकमन्यकाल एव घटत इति ब्रूयुः । ननु मुंजालादीनामनृषित्वेन कथं तन्मताश्रयणेनोक्तदोषः प्रसज्यत इति चेत् । मैवम् । मुंजालादीनां मतं यद्युपपत्तिमन्नाभविष्यत् तर्हि तेषामृषित्वेऽपि तदीयमतावलम्बनमन्याय्यमेवाभविष्यत् अत्र गणितस्कन्ध उपपत्तिमत एवागमस्य प्रामाण्यात् परं तन्मतस्यैव युक्तिसिद्धत्वात् तेषां पुरुषत्वेऽपि तन्मताश्रयणस्यैव न्यायतः प्राप्ततयोक्तदोषतादवस्थ्यात् । किंचोपपत्तिमत एव मतस्याश्रयणं सर्वथा वरम् । यदि तत्र कश्चनातिराग्यनुपपन्नमप्यर्थं हठात् समाश्रयेत तर्हि स सुखेन तथाऽनुतिष्ठासतु न कोऽप्येनं बोधयितुं शक्नुयात् । इममेवार्थं योगवासिष्ठीयमुमुक्षुप्रकरणस्याष्टादशसर्गस्थैस्त्रिभिः पद्यैर्भगवान् वसिष्ठः स्वयं स्पष्टमेवावादीत् । तथाहि ।

अपि पौरुषमादेयं शास्त्रं चेद्युक्तिबोधकम् ।
अन्यत्त्वार्षमपि त्याज्यं भाव्यं न्याय्यैकसेविना ॥ १ ॥
युक्तियुक्तमुपादेयं वचनं बालकादपि ।
अन्यत् तृणमिव त्याज्यमप्युक्तं पद्मजन्मना ॥ २ ॥
योऽस्मत्तातस्य कूपोऽयमिति कौपं पिबेत् पयः ।
त्यक्त्वा गाङ्गं पुरस्थं तं कोऽनुशास्त्यतिरागिणम् ॥ ३ ॥

अतस्तत्त्वज्ञा न्यायपथैकावलम्बिनः सकलव्यवहारमूलभूतमेतच्छास्त्रं विसंवादयस्तांस्तदीयानर्थानपनुद्य शास्त्राणि व्याकुर्वन्तु येनायतौ लोकानां महानुपकारो जायेत तेन चेत्क्षमाशासे यदेतादृशोपकृतिजनककार्ये व्यापृतानां तेषामिमं यत्नं सकललोकानुकम्पी भगवाननुगृह्णात्विति ॥

इत्थं मया तत्त्वविदां मुदे यद्विचारितं तद्विमृशन्तु सन्तः ।
खलाः सुखं ब्रूयुरिदं विरुद्धं यतस्तदर्थे मम नोद्यमोऽयम् ॥

॥ गोविन्ददेवशास्त्री ॥

यस्मिन् समादधच्चित्तं कैवल्याय प्रकल्पते ।
क्लेशाद्यैरपरामृष्टमीश्वरं तमुपास्महे ॥ १ ॥

इह खलु प्रामाणिकागमविधीयमानं परमेश्वरप्रणिधानं परमेश्वरपदव्यवहार्यज्ञानमन्तरा दुर्घटमिति परमेश्वरपदव्यवहार्यजिज्ञासायां स्वस्वमतानुसारेणोपन्यासि तान्त्रिकैः । तथाहि । तार्किकास्तावत् क्षित्यङ्कुरादीनां कार्यत्वहेतुकेन सकर्तृकत्वस्यानुमानेनास्मदादिकर्तृकत्वसम्भवाभावसहकृतेनास्मदादिविलक्षणं क्षित्यादिकर्तारं नित्यज्ञानाद्याश्रयं सकलजगन्नियन्तारं परमेश्वरपदव्यवहार्यं साधयन्ति ।

पाञ्चरात्रीयास्तु भगवान् वासुदेवः सर्वकारणं परमेश्वरस्तस्मादुत्पद्यते सङ्कर्षणाख्यो जीवस्तस्मान्मनः प्रद्युम्नस्तस्मादनिरुद्धोऽहङ्कारः सर्वे चैते भगवतो वासुदेवस्यैवांशभूतास्तदभिन्ना एवेति भगवतो वासुदेवस्य मनोवाक्कायवृत्तिभिराराधनं कृत्वा कृतकृत्यो भवतीति वदन्तो जीवोत्पादकमंशिनं परमेश्वरं वर्णयन्ति ।

एवं पाशुपता अपि पशूनां कार्यरूपाणां जीवानां पतिः कारणमीश्वरस्तत्र चित्तस्य समाधानं योगस्तेन दुःखान्तसञ्ज्ञको मोक्षः सम्पद्यत इति कथयन्तो जीवस्य कारणमेव परमेश्वरं निरूपयन्ति ।

पातञ्जलास्तु क्लेशकर्मविपाकाशयैरपरामृष्टं पुरुषविशेषम् ।

साङ्ख्यास्तु जगतः कर्त्तारं परमेश्वरं प्रतिषिद्ध्यादिविद्वांसमेव परमेश्वरपदव्यवहार्यत्वेनाभिप्रयन्ति । एवमन्येऽपि स्वस्वसिद्धान्तानुसारेण परमेश्वरपदव्यवहार्यं व्यवस्थापयन्ति । तत्र तार्किकप्रभृतयस्तावद् घटपटादिसृष्टेस्तत्तदुपादानगोचरापरोक्षज्ञानचिकीर्षादिमत्कुलालकुविन्दादिकर्तृकत्वस्य दृष्टत्वेन दृष्टानुसारित्वाच्च कल्पनायाः क्षित्यङ्कुरप्रभृतीनामपि तादृशज्ञानादिमत्कर्तृकताया एव क्लृप्तत्वेन ज्ञानादिमान् परमेश्वर एव तत्कर्त्तेति सिद्धान्तयन्तः प्रकृतिकर्तृकत्वनिराकरणपुरस्सरं विशेषतः साङ्ख्यशास्त्राभ्युपगतं निरीश्वरवादं दूषयन्ति ।

तत्र यद्यपि साङ्ख्यशास्त्रस्य पुरुषार्थतत्साधनीभूतप्रकृतिपुरुषविवेकख्यात्योरेव प्रतिपादने मुख्यतात्पर्यस्य सत्त्वेनेश्वरासिद्धेरित्यादीश्वरप्रतिषेधप्रकरणस्य विवेकज्ञानप्रतिबन्धनिरासार्थमैश्वर्यवैराग्यायैवाभ्युपगमवादप्रौढिवादादिनैवेश्वरप्रतिषेधकतायाः साङ्ख्यभाष्येऽसकृत् सुव्यक्तमुक्तत्वेन सूत्रस्यासिद्धिपदस्वारस्येन च यत्परः शब्द इतिन्यायेन तदंशे तस्याभ्युपगमवादत्वकल्पनेऽपि न्यत्यभावेन परमेश्वरसत्त्वोपगमोऽपि न

Digitized by Google

दुनोति साङ्ख्यतन्त्रानुयायिनस्तथापि यथाश्रुतार्थग्राहिणामर्वाग्दृशां सन्तोषाय सङ्क्षेपतो निरीश्वरवाद उपपाद्यते ।

प्रथमं तावद् यदेभिर्ज्ञानादिमत ईश्वरस्य कर्तुः सिद्धौ घटपटादिकर्तुर्ज्ञानादिमतो दृष्टान्ततयोपादानङ्कृतं तत्र ज्ञानेच्छादिमत्या बुद्धेर्दृष्टान्तत्वं विवक्षितमाहोस्वित् पुरुषस्य। अन्त्ये जीववृत्तित्वेनाभिमतं ज्ञानादिकं नित्यमनित्यं वा ऽभिप्रेतम्। न तावदाद्यसम्भवः । उत्पत्तेः प्रत्यक्षसिद्धत्वात् । सुषुप्त्यवस्थायां ज्ञानाद्यभावस्य पामरपर्यन्तं प्रसिद्धत्वात् । किञ्च ज्ञानादेर्नित्यत्वे ऽनिर्मोक्षप्रसङ्गः । नित्यस्य ज्ञानदुःखादेर्नाशायोगात् । दुःखात्यन्तनिवृत्तिर्मोक्ष इति हि सर्वानुमतम् । ज्ञानादिकार्याणां शरीरव्यापारणादीनां सार्वकालिकत्वापत्तिश्च। यदिच कारणान्तरविरहप्रयुक्तस्तत्तत्कार्योत्पत्तिविरह उपपाद्यते तर्हि स्वप्रतियोगिकाभावप्रयोजकाभावप्रतियोगिनस्तस्यैवान्वयव्यतिरेकानुविधायिनः कारणत्वकल्पनयोपपत्तौ ज्ञानादीनां तत्तन्निरूपितकारणतायाएवासिद्ध्यापत्तिः।

ज्ञानादीनामनित्यत्वोपगमे तु पुरुषस्य परिणामित्वापत्तिः। उपादेयकार्यस्योपादानपरिणामरूपत्वात् । किञ्च पुरुषे ज्ञानादिकं स्वाभाविकमभिप्रेतं नैमित्तिकं वा । आद्येऽनिर्मोक्षप्रसङ्गः । वह्नेरौष्ण्यस्येव स्वाभाविकस्यापायायोगात् । स्वाभाविकत्वं च स्वप्रतियोगिकाभावेतराभावप्रयोज्यत्वाभाववत्त्वस्वप्रतियोगिकाभावप्रयोज्यत्वोभयसम्बन्धेन स्वविशिष्टाभावप्रतियोगित्वम् । भवति चौष्ण्यं वह्न्यभावेतराभावाप्रयोज्यस्य वह्न्यभावप्रयोज्यस्याभावस्य प्रतियोगीतिसङ्गतिः । संयोगादावतिव्याप्तिवारणाय प्रथमसम्बन्धस्योपादानम् । गगनादावतिप्रसङ्गभङ्गाय द्वितीयस्य । तथाच स्वाभाविकाभावस्य स्वाभावेतराप्रयोज्यत्वेन स्वस्मिन् सति तदभावस्य वक्तुमशक्यत्वात् । नान्त्यः । कालादिप्रसिद्धपदार्थानां निमित्ततायाः दुर्वचत्वात् । तथाहि । पुरुषे ज्ञानादिकस्य कालसम्बन्धनिमित्तकत्वे नित्यस्य व्यापकस्य कालस्य सर्वावच्छेदेन सर्वदा सर्वपुरुषेषु सम्बन्धस्य सम्भवात् सर्वत्र सर्वदा सर्वेषां ज्ञानादिप्रसङ्गः। इदमेव देशादिसम्बन्धनिमित्तकत्वेऽपि बाधकं युज्यतएव । किञ्चिदनित्यमनआदिसंयोगस्य कारणत्वकल्पने तु आत्ममनस्तत्संयोगानां त्रयाणां कारणत्वकल्पने कल्पनागौरवेण लाघवादन्तःकरणेष्वेव तत्स्वीकारस्यौचित्यात् । प्रलयादौ ज्ञानादेरनुपलम्भेनान्वयव्यतिरेकाभ्यां सुखदुःखमोहात्मकान्तःकरणस्यैव वृत्तिपदवाच्यपरिणामविशेषरूपज्ञानादेः सिद्धेश्च ।

नन्वहं जानामि करोमीच्छामि सुख्यहं दुःख्यहमित्यादिप्रत्ययैरात्मनि ज्ञानादिकं सिद्ध्यतीति चेत्-मैवम्-एवं सत्यहं गौरः स्थूलो गच्छामि कृशोऽहमित्यादिप्रत्ययैर्गौरत्वादेरप्यात्मनि सिद्ध्यापत्तेः । तथाच तेषां प्रत्ययानां शरीरधर्म्मिकत्ववज्जानामीत्यादिप्रत्ययानामन्तःकरणधर्म्मिकत्वेनैवोपपत्तौ नात्मनि ज्ञानादिसाधकत्वसम्भवः ।

अतो बुद्धेरेव ज्ञानेच्छादिमत्या दृष्टान्ते कर्तृत्वं पर्यवसन्नम् । ततश्च कर्तृत्वादेश्चेतनवृत्तित्वस्य दृष्टान्तएवासिद्ध्या कथं दार्ष्टान्तिके तत्सिद्धिरिति दृष्टान्तानुरोधेन बुद्धेरेव क्षित्यादिकर्तृत्वसिद्ध्या सोऽयं भवतां प्रयत्नो ज्ञानादिमत्परमेश्वरसाधनेच्छया जनित उपजीव्यं विरुन्धानस्तत्रभवत आदिविदुषः कपिलाचार्यस्यैव बुद्धिसाधने पर्यवसन्नो विनायकं प्रकुर्वाण इत्याभाणकमनुकुर्वाणोऽसमीक्ष्यः प्रेक्षावद्भिरिति ।

किञ्च ईश्वरस्वीकारेऽपि तदिच्छायाः कार्यमात्रं प्रति कारणत्वमुपेयते तद्विशेषं प्रति वा । नाद्यः। अवश्यक्लृप्ताभिरन्वयव्यतिरेकानुविधायिनीभिः कुलालादीच्छाभिरेवोपपत्तौ घटादिकं प्रति तस्या अन्यथा सिद्धत्वेन कारणत्वकल्पनासम्भवात्। नान्त्यः । तादृशेच्छावतः कतिपयवस्तुनिर्मातुरीश्वरत्वासम्भवात् । तथाविधस्य साङ्ख्यशास्त्रे प्रतिषेधाभावाच्च । लोके चेच्छायाः प्रयत्नद्वारैव कार्यनिष्पादकत्वस्य दृष्टत्वेन भगवत्प्रयत्नस्य च नित्यत्वस्वीकारेण तस्याः कारणत्वस्य वक्तुमशक्यत्वाच्च ।

किञ्च समदर्शिनस्तत्रभवतो भगवतो द्वेषाद्यभावेन सुखिदुःख्यादिविविधसर्गानुपपत्त्याऽदृष्टकारणत्वकल्पनाया आवश्यकत्वेन तेनैवोपपत्तौ भगवदिच्छादेः कारणत्वे प्रमाणाभावः । एतदेवेश्वरकृष्णेनाभ्यधायि । वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्येतिप्रभृतिग्रन्थेन ।

किञ्च कर्तृत्वेन भवदनुमत ईश्वरो बद्धो मुक्तो वा। नाद्यः। असर्वज्ञत्वेनेश्वरत्वानुपपत्तेः । नान्त्यः । रागाद्यभावेन कर्तृत्वानुपपत्तेः ।

तस्मात् परमेश्वरपदव्यवहार्य आदिविद्वानेव न तार्किकाद्यनुमत इति सिद्धम् ।

ये च पाञ्चरात्रीयादयो वासुदेवादेरंशिनो जगत्कारणस्य परमेश्वरपदप्रतिपाद्यत्वं तत्कार्यस्य सङ्कर्षणत्वं जीवत्वं च वदन्ति तेऽपि जगदुपादानस्य प्रकृतेरेव शब्दान्तरैरीश्वरत्वं तत्प्रथमकार्यस्य महत्तत्त्वस्यैव सङ्कर्षणत्वं जीवत्वं च ब्रुवत इति न ते साङ्ख्याचार्याणामत्यन्तं प्रतिपक्षाः । एवं पातञ्जला अपि तार्किकप्रदर्शितानुमानादिभिर्नेश्वरं साधयन्ति अपितु प्रणिधानादिविध्यन्यथानुपपत्त्यादिभिरिति तेऽपि न साङ्ख्यपरिपन्थिनः प्रत्युताभिप्रेतार्थसाधकाएवेत्यलं विस्तरेणेति शम् ।

साङ्ख्यशास्त्राभ्युपगतनिरीश्वरवादोपपादनम् ॥

॥ बालशास्त्री ॥

Digitized by Google

KÁLIDÁSA AND M. HIPPOLYTE FAUCHE.

In a note appended to his translation of the Kumára-Sambhava M. Hippolyte Fauche expresses a hope that the missing cantos of the poem may yet be discovered in some unexplored library or in some hitherto unknown place in India, Thibet, Persia or China. He tells us also that there is in Paris "au Dépôt des Manuscrits," a copy in Bengalee characters of the Kumára-Sambhava con taining an eighth canto, which he promises, if God lends him life, to translate into Latin and French.

We really think Kálidása has suffered enough at the hands of M. Fauche, and we hope that the cantos of which we publish the second instalment in the present Number of the Pandit may be translated for the first time by some one who knows something of Sanskrit and of India. We cannot understand how M. Fauche could, after having gone through, even in a cursory way, translations of the Rámáyana, the Raghuvansa, the Kumára-Sambhava, Sakuntalá and Vikramorvasí, be guilty of blunders so numerous and so unpardonable. So numerous are they, that we cannot attempt to point out more than a very few in a few cantos of one poem. They are unpardonable, because ignorance and conceit have led him to despise the guidance of former translators and the assistance of an elementary dictionary. The only excuse we can imagine for M. Fauche is that he is no better acquainted with Latin than he is with Sanskrit, and that he has sneered at Stenzler chiefly because he misunderstood him.

We proceed to give from the Raghuvansa a few specimens of the way in which M. Fauche improves upon Stenzler, whose Latin version, in such cases, he frequently quotes.

CANTO I. Śl. 32. कलत्रवन्तमात्मानमवरोधे महत्यपि ।
तया मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः ॥

"And, though his love was shared by girls besides,
She and dear Fortune were his only brides."

This śloka M. Fauche thus translates: "ce monarque de la terre n'avait que cette vertueuse épouse avec Lakshmî; et cependant il s'estimait posséder en elles seules les épouses d'un nombreux gynœcée." To this translation is appended the following note: "Rex, etsi frequenti gynæceo gaudebat," dit la traduction latine, hanc feminam prudentem atque Lakshmim præcipuas suas uxores estimabat." Elle se trompe, si je ne me trompe moi-même. La version du texte sanscrit me semble être, mot à mot, et dans l'ordre, celle qui vient ci-dessous: *semet uxores in gynæceo magno habere putabat, illâ quidem sapienti conjuge Lakhmyâque* (sic) *totius orbis dominator*. M. Fauche's Latin version is more wonderful than the French: his ablative *Lakhmyâ*, is perfect.

Śl. 50. नीवारभागधेयोचितैर्मृगैः

This M. Fauche renders: "Gazelles, *dignes de leur étoile* et nourries largement de riz naturel."

CANTO II. Śl. 36.

अमुं पुरः पश्यसि देवदारुं
पुत्रीकृतोऽसौ वृषभध्वजेन ।
यो हेमकुम्भस्तननिःसृतानां
स्कन्दस्य मातुः पयसां रसज्ञः ॥

Look yonder King! Before thee stands a Pine
Loved like a daughter by my Lord divine.
In its first youth 'twas gentle UMÁ's joy
To nurse it even as she nursed her boy.

M. Fauche's version is as follows: "Tu vois devant tes yeux ce *pin* dévadârou: il fut adopté pour fils par celui, sur les drapeaux duquel est peint le taureau, ce Dieu à qui la mère de Skanda fit connaître la saveur du lait distillé de ses mamelles, semblables à des jarres d'or".

By this mistranslation, which it is painful to transcribe, this scholar who has given to the world a French version of the Kumára-Sambhava, represents Umá, the heroine of that poem, as nourishing, with the treasures of her own bosom, her divine husband Mahádeva.

In the 42nd Śloka *Tryambaka* is said in a note to be "Le Dieu aux trois yeux, un des noms de Çiva par allusion à sa faculte de voir sous le même regard le passé, le présent et l' aveuir."

Śl. 57. एकान्तविध्वंसिषु मद्विधानां
पिण्डेष्वनास्था खलु भौतिकेषु ।

M. Fauche is not satisfied with giving the following mysterious rendering: "car ceux de ma sorte, qui ne s'inquiétent pas d'ensevelir avec eux les offrandes aux mânes de leurs aïeux, sout mis, on ne peut en douter, au nombre des mauvais Génies;" his evil Genius leads him to add in a foot note: "Nous ne saurions adopter le sens de M. Stenzler; qu'on juge le sien et le nôtre sur le texte de l'original: "Mei similes, dit il, haud sane solliciti sunt de libis istis, quæ, ex elementis facta, certæ morti obnoxia sunt."

But perhaps the most wonderful mistranslation is that in the 25th Śloka of the 4th Canto: वाजिनीराजनाविधौ he translates thus: "au moment ou le roi, dans une oblation parfaite, lui sacrifia une cavale suivant les rites;" converting the well known martial ceremony of the Lustration of the Chargers into the hitherto unheard of Sacrifice of a mare! May the discovery of her nest reward and encourage this profound and accurate scholar!

Digitized by Google

ON THE NYA'YA SYSTEM OF PHILOSOPHY.

(Continued from page 25.)

Hampered by the currency of a nomenclature founded on the correct analysis which they did not correctly apprehend, Locke and Stewart and their followers ended by being inferior logicians to the Bráhmans, whose logic offers a correct analysis so far as it goes, though they hold that to be one (as, in their physics they still do air or water) which a more searching analysis has discovered to be of two constituent parts. We take leave, in passing, to offer our thanks to Mr. Knighton for the very neat way in which he has shown that Bacon is not chargeable with holding the inaccurate opinions on this subject which have been imputed to him by those who, holding an inaccurate opinion themselves, thought that they were doing a service to Bacon in attributing it to him also. Mr. Knighton (in his lecture delivered to the students of the Hindú College, Calcutta, on "The utility of the Aristotelian Logic,") allots to Bacon the precise amount of blame due to his neglect in not guarding against the misapplication of so weighty an authority as his own, by directing his censures (at the commencement of the Organum) explicitly, instead of implicitly, against the abuse of a science, of the legitimate use of which he subsequently indicates his thoroughly correct appreciation. It would not be difficult to anticipate Bacon's reply to this residuary censure. Some other time we may throw it into the shape of a dialogue among the parties concerned.

With regard to the difference of opinion existing among thinking men in Europe as to the proper province of Logic, the title of Professor De Morgan's work, from which we gave extracts in an earlier Number, supplies the means of getting rid of all that is of any moment in the controversy. "Formal Logic" is an abstract Science, just as Arithmetic or Algebra is. Whatever therefore is not, as in Algebra, expressible by symbols, the meaning of which, provided it do not change without notice being given, does not require to be known, lies beyond the province of that distinctly bounded science to which exclusively Whately restricts the name of Logic —a name which, in order to accommodate the world in general and put an end to misconception, may advantageously, we think, retain the badge put upon it by De Morgan, though, to Whately's eye, it must always suggest a tautology, and, to his mind if not his lips, a protest against the inveterate abuse of language which rendered the tautology expedient. To state the case in homely language, the term had been so long ill-handled, that it indispensably required patching; and Professor De Morgan has patched it so neatly, that though *not* as good as new, it is, as patched, better than anything that could be substituted for it.

Before quitting the subject of Formal Logic, for which ("like an ass for a thistle," as a practical man might illustratively suggest,) we own a liking, let us advert to the question how it comes that, by the wise—that is to say, by the people who make money,—formal logic is scouted as an abstraction; whilst Arithmetic—equally abstract—is admitted as Gospel, "according to Cocker," by men who admit no Gospel of any other description. The answer "lies in a nutshell"—in the difference between the tangible, reddish-brown, marketable solidity of a half-penny; and the intangible, unmarketable, unprofitable nature of truth.

To return to our text-book—the author tells us that a man after having, to the satisfaction of his own mind, inferred the presence of fire from the perception of smoke, may wish to impart his conviction to another. In other words—having ascertained the truth as a logician, he may wish, as a rhetorician, to establish it to the satisfaction of somebody else. Here we step distinctly out of the province of Logic, and enter that of Rhetoric. In order to show that, in saying so, there is not here a case of "holding a candle to the sun," or a case where "there needs no ghost" to tell us what is told, we proceed to quote from Mr. Colebrooke's essay, of which he promised a continuation. The non-fulfilment of the promise (Miscellaneous Essays, vol i. p. 267) we lament.

Mr. Colebrooke says (p. 292 *ibid*):—

"A regular argument, or complete syllogism *(nyáya)*, consists of five members *(avayava)* or component parts. 1st, the proposition *(pratijnyá)*; 2nd, the reason *(hetu* or *apadesa)*; 3rd, the instance *(udáharana* or *nidarsana)*; 4th, the application *(upanaya)*; 5th, the conclusion *(nigamana)*. Example:—

1.—This hill is fiery:
2.—For it smokes.
3.—What smokes, is fiery: as a culinary hearth.
4.—Accordingly, the hill is smoking:
5.—Therefore it is fiery."

"Some," Mr. Colebrooke adds, (alluding, in a note, to the followers of the *Mímánsá* school,) "confine the syllogism "*(nyáya)* to three members; either the first, or the "three last. In this latter form it is quite regular." Dr. Heinrich Ritter ("History of Ancient Philosophy," vol. 4, p. 365 of Morrison's translation) does not grant even thus much. Amidst all the perplexity that he is left in by the scantiness of the information at his command, "One point alone," to him "appears certain," in regard to the *Naiyáyikas*, and that is, "that they can lay but slight claims to accuracy of exposition. This," he conceives, "is proved clearly enough by the form of "their syllogism, which is made to consist of five in-"stead of three parts." Into this disparaging opinion Ritter may have been led by supposing that the example in Mr. Colebrooke's essay represented what answers

Digitized by Google

to the European syllogism; whereas we have seen that what really answers thereto consists. not of five parts, but only of two. But, whilst Mr. Colebrooke is ready to admit that the syllogism of *Gautama* is "qnite regular," provided two of the members be lopped off, Ritter bolds that not only are two of the members "manifestly superfluous," but that "by the introduction of an "example in the third, the universality of the conclusion "is vitiated." This is an injustice from which we have undertaken to vindicate the *Nyáya*,—an injustice not chargeable upon Ritter, but upon the scantiness of his information. Those to whom he owed his information did not perhaps calculate upon the necessity under which so speculative a mind as his lies of drawing provisional conclusions—and they had better have been, under all the circumstances, stated as provisional—not merely from what is adduced, but from the absence of what is not adduced. Our own conclusions, we beg it may be understood, are provisional only; and very much obliged shall we be to any one who can and will set us right in regard to any point which we may have misconceived.

Not only, owing to the confounding of the Rhetorical with the Logical section of the *Nyáya* philosophy, has undeserved censure been directed against its Rhetoric, but equally undeserved praise has been bestowed upon it, under the notion that its Rhetoric is a better kind of Logic than that of Aristotle. Sir Graves Haughton (in his "*Prodromus*," p. 214, note,) after referring the reader who may take an interest in the subject of Hindú logic, to the essay of Mr. Colebrooke from which we have recently been quoting, says:—

"In the *Asiatic Journal* for February 1837, Colonel Vans Kennedy has given an exposition of Hindú logic; in which he differs, apparently with reason, from Mr. Colebrooke, and I think the following passage deserving of quotation:—'But it seems, at the same time, evident, that the argument of Gautama, and the syllogism of Aristotle, are too essentially different, in both form and substance, to admit of its being supposed that the one was derived from the other. For the validity of the syllogism depends on this axiom, that *if two terms agree with one and the same third, they agree with each other*; but the nature and properties of the term which should be employed as the middle term have not been explained by Aristotle. Gautama, on the contrary, founds the conclusiveness of his argument, on such a property being assigned, as a reason for affirming the proposition, as will prove the predicate; and, on the applicability of the reason being shown, by adducing, in its support, the instance of some object which possesses the property specified in the reason and predicate. In this case, therefore, it is not sufficient to lay it down as a rule, that if A can be attributed to every B, and B to every C, then A is attributable to every C, and to frame syllogisms with the letters of the Alphabet: for the argument of Gautama cannot be formed, unless a distinct notion of the properties of the subjects by which the question is to be proved has been first conceived. When, however, this argument is duly considered, it will, perhaps, be admitted, that it exhibits a more natural mode of reasoning than is compatible with the compressed limits of the syllogism, and that its conclusion is as convincing as that of the syllogism.' p. 146."

To every reader who has derived his notions of logic, as Colonel Kennedy would seem to have done, from Lock, Stewart, Reid, Brown, or Campbell, the foregoing remarks will appear to decide the matter. That Sir Graves Haughton should be among the number, we marvel. To any one who has read and understood Whately, it will be obvious that Colonel Kennedy's mistake turns on his preference of Rhetoric to Logic, as if the one were the preferable of two articles of the same kind. We must therefore repudiate Colonel Kennedy's irrelevant compliment to the Oration at the expense of the Syllogism; which compliment our *Naiyáyika*, after having decided that the syllogism ought to have even more "compressed limits" than those assigned to it by Aristotle, would assuredly have begged leave to decline. We have sought in vain (sending to Calcutta, Bombay, Agra, and elsewhere,) for the Number of the *Asiatic Journal* containing Colonel Kennedy's essay.—We are sure that we should learn much from the remarks of so eminent a Sanskrit scholar, though the passage which we have been obliged to quote at secondhand, satisfies us that we should learn nothing from Colonel Kennedy in regard to the analysis of the reasoning process.

The five-membered expression, so far as the arrangement of its parts is concerned, is a summary of the *Naiyáyika's* views in regard to Rhetoric, "an offshoot from Logic," (see Whately's Elements of Rhetoric, p 6,) and one to which, after "the ascertainment of the truth by investigation," belongs "the establishment of it to the satisfaction of another." Disregarding what is called rhetorical artifice, *Kanáda* directs his rhetorician to commence, as Euclid does, by laying down the proposition to be proved. The reason is next to be alleged; and then the general principle, or major premiss, is to be brought forward along with an example in *confirmation*. This is what Ritter objects to;—and if Logic, not Rhetoric, had been in question, the objection would have been relevant. But, remember that we are now concerned about Rhetoric, and read the following from Whately (Rhetoric, p. 124): "Aristotle accordingly has remarked "on the expediency of not placing Examples in the "foremost rank of Arguments: in which case, he says, "a considerable number would be requisite; whereas, "*in confirmation*, even one will have much weight." With this view the *Naiyáyika* cites his one Example, confirmatory, and also suggestive. The auditor is then to be reminded that there is no dispute that the case in question possesses the character which brings it within the rule; and the Oration winds up with the re-introduction of the original proposition in the new character of an established conclusion; just as Euclid's argument winds up by re-introducing the now triumphant proposi-

Digitized by Google

tion with a flourish of trumpets in the shape of a "Quod erat demonstrandum." Thus, rhetorically considered, the five-membered expression is a very suitable framework for a straight-forward argumentative speech, making no appeal to the passions, and not hesitating to table, without exordium, the proposition which it undertakes to establish. Logically considered, the five-membered expression, with its suggestive Example, is a combination of the Inductive with the Deductive Syllogism.—It aims at laying before the auditor, for his conviction, an exposition, conjointly, of the two processes which are described as having previously led to the conviction of the speaker himself.

Here then we would fix, in the *Nyáya* system, the place of Rhetoric, of which the *Alankára-śástra*, literally "the Institutes of Decoration," may be regarded as an appendage, if we concur in Cicero's decision, that an orator, having first found something to say, and in the next place disposed it judiciously, ought in the third place "vestire et ornare oratione."—The Hindús have themselves associated Poetry with their Institutes of Decoration, and there is no occasion to disturb the arrangement. *(To be continued.)*

PANDIT RAM JASAN'S HITOPADEŚA.

We notice with pleasure a new edition of the Hitopadeśa,* with a Hindi Translation, by Pandit Rámajasan of Queen's College, Benares. The book is well printed and neatly got up, and the translation possesses the merit of being easy and idiomatic, yet closely literal. On opening the book, however, we are somewhat astonished to miss the beautiful benediction (मङ्गलाचरण). Has the editor purposely omitted it? if so, what reason has he for thus tampering with the text? Were it not that the editor is a Hindu and Brahman, one might indeed fancy that the omission savoured of the bitter intolerance of a Muhammadan. While glancing over the pages of the book, we chanced to light upon some instances in which the translator not having understood the text and having had recourse to the mere words has given a rendering which, no doubt, must be as unintelligible to himself as to his readers. As

स जातो येन जातेन याति वंशः समुन्नतिम् ।
परिवर्त्तिनि संसारे मृतः को वा न जायते ॥ p. 3.

The second line is rendered. घूमनेवाले संसार में मरा अथवा कौन नहीं जनमता. The Pandit, evidently solicitous to make the sentence somewhat more significant, substitutes, in the errata, the word अनित्य for घूमनेवाले. But the unhappy correction, instead of rendering the passage clear serves only to prove that the translator has not comprehended the sense of the śloka. परिवर्त्तिन् the epithet of संसार was better, though blindly rendered घूमनेवाला: it has nothing to do with the perishableness (अनित्यता) of the world, but refers to the doctrine of the transmigration of souls. Again, the particle वा does not here imply, as the Pandit supposes, an alternative, but an interrogation. The line, therefore, properly rendered would stand thus;—घूमतेहुये (better परिवर्त्तनशील) संसार में कौन भला मरकर नहीं जनमता.

This is another instance;—

अरावप्युचितं कार्य्यमातिथ्यं गृहमागते ।
छेत्तुः पार्श्वगतां छायां नोपसंहरते द्रुमः ॥ p. 31.

The second line of this couplet is rendered वृक्ष काटनेवाले की पार्श्ववर्त्ती छाया का संहार नहीं करता instead of वृक्ष काटनेवाले से (अपनी) पार्श्ववर्त्ती छाया को नहीं खींच लेता. We should prefer Prof. Max Müller's reading of the verse with the ablative पार्श्वगतात् instead of the accusative पार्श्वगताम्, as it not only renders the construction free from ambiguity, but makes the epithet more pertinent by applying it to छेत्तुः and making it correspond to the qualification गृहमागते added to अरौ in the foregoing line.

The following is an instance partaking of the ludicrous;—

निर्भिन्नस्य पदं करोति हृदये तस्य स्वतन्त्रस्पृहा (sl. 128, p. 131) rendered बिगड़े का पांव उसके हृदय में स्वतन्त्रता की इच्छा करता है *i. e.* The foot of a corrupted man (having somehow got?) into his heart wishes for independence! In pity to his readers, the Pandit should have added a commentary serving to unriddle this mysterious enigma.

But while we point out these errors, let us not be supposed to imply that the book abounds in misinterpretations. On the contrary, we believe the blemishes of the work are far outweighed by its merits, and can therefore confidently recommend it not only to all beginners of Sanskrit in this part of India, but also to those candidates for the Civil Service who may wish to acquire a knowledge of that widely spoken vernacular, the Hindí, founded upon an acquaintance with Sanskrit. In this respect, we may add, it will serve as a useful companion to Prof. Max Müller's Handbooks for the Study of Sanskrit. In conclusion we would express our pleasure at finding that this fair Mother of fables is gradually being welcomed into all the tongues of the world, ancient and modern, The only thing that now remains to be done for the Salutary Advice is, for an erudite Sanskritist to prepare an edition tracing its verses, as far as possible to their sources and thus possessing an enhanced interest for the Sanskrit Scholar.

* Published by Messrs. E. J. Lazarus & Co., Medical Hall Press, Benares.

PRINTED AND PUBLISHED BY E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 4. Benares September 1st, 1866. Vol. I.

॥ प्रमाणपारायणं नाम ॥

प्रकरणपञ्चिकायां पञ्चमं प्रकरणम् ॥ ५ ॥

स्वरूपसङ्ख्यार्थफलेषु वादिभि-
र्यतो विवादा बहुधा वितेनिरे ।
ततो वयं तत्प्रतिबोधसिद्धये
प्रमाणपारायणमारभामहे ॥ १ ॥

किं पुनरिदं प्रमाणं नाम न तावदविसंवादिज्ञानं प्रमाणं । स्मृतेरपि तथाभावप्रसक्तेः । अथ स्मृतिर्विकल्परूपतया परमार्थसत् स्वलक्षणमगृह्णती सम्पृक्तिसन्तमाकारमवस्तुभूतमुल्लिखन्ती द्विचन्द्रादिबोधवच्चाविसंवादिनीति मतं । एवमपि नानुमानं प्रमाणं स्यात् । तस्यापि विकल्परूपत्वात् । अथ विकल्परूपमप्यनुमानमवस्तुविषयमपि वस्तुविषयमिवाध्यवसीयतइत्यध्यवसीयमानवस्तुभूतस्वलक्षणाविसंवादितया तत् प्रमाणं । स्मृतिरपि तथा स्यात् । सापिहि स्वलक्षणाध्यवसायिन्येव जायते । अपिचावस्तुभूतं स्वविषयं वस्तुतयाध्यवस्यच्छुक्तिकारजतबोधवत् कथमनुमानमविसंवादि । किञ्च यद्यनुमानं विकल्परूपतया स्वलक्षणं न गृह्णाति कथं तदध्यवस्यत्यपि । नहि ग्रहणादन्योऽध्यवसायो नाम । योह्याकारो न गृह्यते स कथमध्यवसीयेतापि । प्रतीतिविरुद्धं चेदमुच्यते । स्मृतिरनुमानवद् बाह्यं वस्तु न विषयीकुरुत इति । विकल्पभूतयोरपि तयोः प्रत्यक्षप्रतीतवस्तुग्राहकत्वप्रतीतेः । अथोच्यते । न वयं यथावस्थितार्थग्राहकमविसंवादकमभिदध्महे किन्त्वर्थक्रियासमर्थवस्तुपरिप्रापकं । यथाभूतंहि येन वस्तूपदर्शितं प्रवृत्तोऽपि यदि तथाभूतमेव प्रतिलभते तदा तदविसंवादि ज्ञानं प्रमाणमुच्यते । तथाचोक्तं प्रमाणमविसंवादि ज्ञानमर्थक्रियास्थितिः । अविसंवादनमिति । तथा नह्याभ्यामर्थं परिच्छिद्य प्रवर्त्तमानोऽर्थक्रियायां विसंवाद्यतइतिच । एवमपि स्मृतेः प्रामाण्यापत्तिः । अथ मतं स्मृत्वार्थं प्रवर्त्तमानो नियमेनार्थं न प्रतिलभतइति । एवमपि भूतार्थविषयमनुमानमप्रमाणं स्यात् । नहि तदुपदर्शितार्थस्य प्रतिलम्भोऽस्ति । अथ यद्यप्यनुमानप्रतीतस्य भूतस्य वस्तुनः प्राप्तिर्नास्ति तथापि तत्प्रतिबद्धलिङ्गजन्मतया तस्य प्राप्तियोग्यता तावदस्त्येव । तावताच तस्य प्रामाण्यमिति । एवमपि स्मृतिः प्रमाणमापद्येत । स्मृतिरपिह्यनुमानवदर्थं पारम्पर्येण प्रतिबद्धैव । यथाहि वह्निस्वलक्षणाद्धूमस्वलक्षणं । ततश्च धूमदर्शनं ततश्च धूमविकल्पः । तस्माच्चानुमानमित्यनुमानमर्थं पारम्पर्येण प्रतिबद्धत्वादर्थप्रापणसमर्थं । तथा स्मृतिरप्यर्थादनुभवः । ततः संस्कारः संस्काराच्च स्मृतिरित्यर्थप्रतिबद्धैवेति तत्प्राप्तियोग्यतया प्रमाणमापद्येत । यदि मन्वीत सत्यामपि प्राप्तियोग्यतायां स्मृतेर्यत् तया प्रापयितव्यं स्वलक्षणं तदनुभवेनैव प्रापितमिति न प्रमाणं स्मृतिः । अनुमानंत्वप्राप्तस्वलक्षणप्रापकतया प्रमाणमिति । एवमप्यर्थक्रियासमर्थवस्तुपरिप्रापकतामात्रं न प्रमाणलक्षणं किन्तु विशेषणमुपादेयं । अप्राप्तप्रापकमविसंवादि ज्ञानं प्रमाणमिति । अथोच्यते । प्राप्तं प्रति प्रापकत्वमेवापरस्य नास्तीति । तदसत् । अर्थप्रतिबद्धताहि प्रापकता साच ज्ञानान्तरस्यापि नानुपपन्ना । यद्युच्येत । न प्रापकतामात्रेण प्रामाण्यमपितु प्रवर्त्तकतयापि । यत् प्रापयतिच प्रवर्त्तयतिच तत् प्रमाणमिति । एतदपि न किञ्चित् । प्रवर्त्तकतापि ज्ञानान्तरस्यापि घटतएव । प्रवृत्तियोग्यार्थोपदर्शकत्वमेव प्रवर्त्तकत्वं तच्च भूतार्थविषयानुमानस्येव स्मरणस्याप्यस्ति । प्रवर्त्तकत्वेच प्रमाणलक्षणानुवेशिनि निर्विकल्पज्ञानानामप्रमाणता स्यात् । स्वयं व्यवहारप्रवर्त्तकत्वाभावात् । तदुत्थास्तु विकल्पाएव प्रापकतया प्रवर्त्तकतयाच प्रमाणभूताः स्युः । धारावाहिकज्ञानेषुच पूर्वज्ञानार्थविषयत्वादुत्तरेषां प्रमितित्वं न स्यात् । अथोच्यते । दृश्यतएव तेषामप्रमाणतेति । तदयुक्तं । लोके तेषां पूर्वस्मादविशिष्टत्वात्

Digitized by Google

प्रमाणाभावस्य । लौकिकंच प्रमाणं परीक्षकैरप्यनुसरणीयं । अथ भिन्नत्वादर्थक्षणानां सर्वेषामप्यप्राप्तप्रापकत्वमस्तीति । तदसत् । क्षणभेदस्यापरामर्शाच्च तदपेक्षा प्रमाणतोचितेति । क्षणिकताच मीमांसाजीवरक्षायां प्रतिक्षिप्तैवेति कृतमतिविस्तरेण ।

नापि दृढमविसंवाद्यगृहीतार्थग्राहकं प्रमाणमिति प्रमाणलक्षणमुपपद्यते । धारावाहिकज्ञानानामुत्तरेषां पुरस्तात्तनप्रतीतार्थविषयतया प्रामाण्यापाकरणात् । नच कालभेदावसायितया प्रामाण्योपपत्तिः । सतोऽपि कालभेदस्यातिसौक्ष्म्यादनवग्रहात् । अपिच दृढमिति किं निवर्त्त्यं । संशयज्ञानमिति चेत् । कः पुनरयं संशयः । साधारणधर्मदर्शनादेकैकशो विरुद्धधर्मान्वितस्यानेकस्यच धर्मस्यावगमाद्वादिनामध्यवसीयमानविशेषाणां विप्रतिपत्तेश्चाध्यवसितविशेषे वस्तुन्यनियतविशेषणविषयं ज्ञानमिति तार्किकाः । यथा सन्तमसतिरोहितविशेषवस्तुनि दूरवर्त्तिन्यूर्ध्वतामात्रदर्शनेन किमयं स्थाणुरुत पुरुषोवेति । तथा प्रत्यक्षो वायुः स्पर्शवत्त्वात् पृथिवीवत् । अप्रत्यक्षो वायुररूपिद्रव्यत्वाद् गगनवदिति । केचिन्नित्यं शब्दमाहुः । केचिदनित्यं । भवति वादिनां विवादात् तत्त्वजिज्ञासोस्तत्र संशयः । तदसत् । यौहि धर्मौ संशय्येते ययोरेकमिदं विज्ञानं नोदयते किन्तु द्वे एते विशेषणस्मरणे । तयोश्च विशेषयोरेकस्यापि तस्मिन् धर्मिणि निश्चयो नास्तीत्येकान्तव्यवहारं प्रतिपत्ता प्रवर्त्तयितुमशक्नुवन् संशेत इवेति संशयव्यवहारः । येच ते स्मरणे तयोर्गृहीतग्राहकतयैव प्रामाण्यं निरस्तमिति किं दृढग्रहणेन । अविसंवादि ग्रहणमपि सर्वज्ञानानामर्थाव्यभिचारादविशेषकं । ननु शुक्तिकायां रजतमिदमिति ज्ञानं प्रतिबिम्बज्ञानंच व्यभिचारि दृश्यते । नैतदेवं यदि रजतज्ञानं रजतविषयं न स्यात् ततो व्यभिचरेदर्थं । रजतविषयेतु को व्यभिचारः । ननु नेदं रजतविषयं किन्तु शुक्तिकाविषयमेव । उच्यते । शुक्तिकाविषयमिति कोऽर्थः । किं याऽसौ शुक्तिका व्यक्तिस्तामेव विषयीकरोत्युत शुक्तिकात्वमेवेति । न तावद्व्यक्तिरनेन विषयीकर्त्तुं शक्या । भिन्नत्वादाकारस्याकारिणश्च । समीचीनरजतव्यक्तिरपि न रजतत्वबुद्ध्या गोचरीभवति । शुक्तिकात्वं पुनरभासमानमेव विषयइति नोपपद्यते । अथोच्यते । व्यवहारयोग्यतापत्तिर्विषयत्वमिति तथापि शुक्तिकात्वमविषयएव । नहि तद् व्यवहारयोग्यतामापद्यते । अवभासमानतैवच विषयत्वं । तेन रजतत्वमेव विषयः । तच्च पुरोवर्त्तिनि न सम्भवतीति तद्विषयिणी स्मृतिरेवेयं कुतोऽस्या व्यभिचारः । प्रतिबिम्बज्ञानंतु मुखाद्यवभासं मुखादिविषयमेव । भासुरेहि दर्पणादौ नयनरश्मिर्निपतितः प्रतिहतः परावृत्तो मुखादिना सम्प्रयुक्तस्तदेव मुखादि ग्राहयति । नन्वेवमपि सव्यदक्षिणविपर्यासो देशविशेषपरिमाणाल्पत्वमहत्त्वप्रतिभासश्च किंनिबन्धनः । अत्राभिधीयते । मुखादेर्देशो न गृह्यते दर्पणादीनांच ग्रहणमिति मुखादयस्तद्देशाइव भान्ति । अभिमुखेन मुखादिना नयनरश्मिः संयुक्तइति तथैव तदवगमात् सव्यदक्षिणविपर्यासोऽपि युक्तः । अल्पत्वमहत्त्वेच दर्पणादे रश्मिप्रतिघातहेतोरल्पतया महत्तयाच दोषभूतया मुखादिपरिमाणाग्रहाद्दर्पणादिपरिमाणग्रहणाच्च मुखादिष्विव भासेते । तेनात्रापि नास्ति व्यभिचारः । एवमादि च नयवीथ्यां निपुणतरमुपपादितमिति तयैव दिशा सर्वत्राव्यभिचारो वर्णनीय इति नेदमपि प्रमाणलक्षणं ।

तत्राह । प्रमाणमनुभूतिः । नच स्मृतेः प्रामाण्यापत्तिरिति दर्शयति । सा स्मृतेरन्या । अथ का स्मृतिः । स्मृतिः पुनः पूर्वविज्ञानसंस्कारमात्रजं ज्ञानमुच्यते । नचैवं धारावाहिकोत्तरज्ञानानां स्मृतित्वं । इन्द्रियार्थसन्निकर्षजत्वात् । पूर्ववत् । मात्रग्रहणाच्च प्रत्यभिज्ञाज्ञानस्य न स्मृतित्वं । इन्द्रियार्थसन्निकर्षसचिवसंस्कारजत्वात् । अथ कथं स्मृतिर्न प्रमाणं । अत्राह । न प्रमाणं स्मृतिः पूर्वप्रतिपत्तिव्यपेक्षणात् । स्मृतिर्हि तदित्युपजायमाना प्राचीं प्रतीतिमनुरुध्यमाना न स्वातन्त्र्येणार्थं परिच्छिनत्तीति न प्रमाणं । स्मृतिप्रमोषस्तर्हि प्रमाणं । न । सोऽपि पूर्वप्रतीतिसापेक्षएव । तज्जन्यसंस्कारमात्राधीनजन्मत्वात् । धारावाहिकेषु तर्ह्युत्तरविज्ञानानि स्मृतिप्रमोषाद्विशिष्टानि कथं प्रमाणानि । तत्राह । अन्योन्यनिरपेक्षास्तु धारावाहिकबुद्धयः व्याप्रियमाणेहि गुर्वविज्ञानकारणकलाप उत्तरेषामप्युत्पत्तिरिति न प्रतीतित उत्पत्तितो वा धारावाहिकविज्ञानानि परस्परस्यातिशेरतइति युक्ता सर्वेषामपि प्रमाणता । यद्यनुभूतिमात्रं प्रमाणं ततो रजतमिदमिति भ्रान्तं यद्धि ज्ञानं तदपि प्रमाणं स्यात् । अत्रोच्यते । रजतमिदमिति नैकं ज्ञानं किन्तु द्वे एते विज्ञाने । तत्र रजतमिति स्मरणं । तस्याननुभवरूपत्वान्न प्रामाण्यप्रसङ्गः । इदमित्यपि विज्ञानमनुभवरूपं प्रमाणमिष्यतएव । भ्रान्तिरूपताचास्य रजतज्ञानस्य स्मरणरूपस्यैव ग्रहणव्यवहारप्रवर्त्तकतया व्यवहारकाले विसंवादकत्वात् । येऽपिचैकमिदं विज्ञानं मिथ्याभूतमित्यास्थिषत तेऽपि बाधकप्रत्ययाधीनं मिथ्यात्वमभ्युपगच्छन्तो नेदमंशस्य मिथ्याभावं वदितुमीशते तत्र बाधकाभावात् । बाधकप्रत्ययदशायामपीदमंशस्यानुवृत्तेः । एकमपिच विज्ञानमर्थावच्छेदमाश्रितभेदं प्रमाणमप्रमाणं च युक्तमेव । पीतशङ्खादिज्ञानं तर्हि प्रमाणं प्रसक्तं । तत्रहि पीतिमा शङ्खस्वरूपंच द्वयमप्यनुभूयतएव । नयनगतपित्तवर्तीहि पीतिमानुभूयतएवेति नयवीथ्यां निपुणतरमुपपादितं । शङ्खस्वरूपेचानुभूतिर्निर्विवादैव । नायं दोषः । कोनाम पीतशङ्खज्ञानमप्रमाणमाह प्रमाणमेवहि तद् यथार्थवि-

Digitized by Google

चयत्वात्। विज्ञानद्वयं चैतदेकसाधारणरूपं। तच्चैकविज्ञानसाधारणरूपावमर्शादेकमिव ज्ञानं सदृशव्यवहारप्रवर्त्तकतया व्यवहारदशायां विसंवादमावहत् प्रमाणमपि सद्भ्रान्तमित्युच्यते। यत्र तु व्यवहारविसंवादो नास्ति तत्र भ्रान्तिरपि न व्यपदिश्यते। यथोष्णजलज्ञाने। तत्रापि हि न जलगतमौष्ण्यमनुभूयते किन्तु वह्न्यवयवगतमेव। जलगतस्यौष्ण्यस्य वह्निसंयोगेनोत्पादनानभ्युपगमात्। पाकजो हि गुणः पाकान्तरेणैव निवर्त्तते। जलगतस्य चौष्ण्यस्यानपेक्षितपाकस्यैवाग्निसंयोगविच्छेदेनैव निवृत्तिः। गत्वरा हि तेजोऽवयवाः सञ्चारितास्तेष्वन्यत्र गतेष्वपरतेजोऽवयवसञ्चरणाविच्छेदे युक्तैवौष्ण्यस्य निवृत्तिरिति पीतशङ्खादिज्ञानतुल्यत्वमुष्णजलज्ञानस्य। तस्मात् पीतशङ्खादिज्ञानं प्रमाणमेव भ्रान्तं चेत्यनवद्यं। यस्तु विपरीतख्यातिवादुष्णजलज्ञानमप्रमाणं भ्रान्तमाह तस्य सर्वलोकविरोधः।

कतिविधं पुनः प्रमाणमित्यत्राह। तच्च पञ्चविधं मानं। अनेनैकादिसङ्ख्या षडादिसङ्ख्या च व्यावर्त्तिता। काः पुनस्ता विधा इत्यत्राह। प्रत्यक्षमनुमा तथा। शास्त्रं तथोपमानार्थापत्ती इति गुरोर्मतं। किं पुनः प्रत्यक्षस्य लक्षणं।

केचिदाहुः। इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षमिति। इन्द्रियस्यार्थेन सन्निकर्षाद्यदुत्पद्यते ज्ञानं तत् प्रत्यक्षं स च सन्निकर्षः षोढा भिद्यते। संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः समवायः समवेतसमवायः संयुक्तविशेषणता चेति। तत्र संयोगात् पार्थिवाप्यतैजसानां द्रव्याणां चक्षुःस्पर्शनाभ्यां ग्रहणं। प्राप्यकारि चक्षुर्बहिरिन्द्रियत्वात्। तैजसं च तद् रूपप्रतीतिहेतुत्वाद् दीपवत्। तस्य रश्मयः प्रसरन्तो द्रव्येण संयुज्यन्ते। ते च पृथ्वया इति पृथून्यपि द्रव्याणि व्यश्नुवते। नन्वेवं सान्तरग्रहणं न स्यात् प्राप्यकारित्वात् स्पर्शनवत्। किञ्च संयोगस्य गतिनिबन्धनत्वाद् गतिमतां च क्रमेणासन्नदूरगमनात् समकालमासेदुषां दवीयसां च पदार्थानां दर्शनं नोपपद्यते। उच्यते। भौमायतनापेक्षिततया सान्तरग्रहणं तावदुपपन्नं। समसमयसंवेदने तु केचित् परिहारमेवं वर्णयन्ति। सकलानर्थान् व्याप्य युगपदवस्थितेन बाह्येन तेजसा सहैकीभूतास्ते चाक्षुषा रश्मयो युगपद्ग्रहणहेतवइति। तत्रापरे दूषयन्ति। इत्थं प्राप्तावभ्युपगम्यमानायामतिदूरव्यवहितानामप्यर्थानां ग्रहणं दुर्निवारमिति। अन्येत्वाहुः क्षेपीयस्तया तेषां रश्मीनां कालभेदानवग्रहाद्यौगपद्याभिमानइति। तदप्यन्ये नानुमन्यन्ते। अतिसन्निकृष्टेषु वस्तुषु गतिकालभेदः पद्मपत्रशतव्यतिभेदवन्मा नामावसायि। अनेकयोजनसहस्रान्तरितेषु भूमिष्ठेष्वर्थेषु ध्रुवे च कालभेदानध्यवसायो न बुद्धिमनुरञ्जयतीति। वयं तु वदामः। अदृष्टसापेक्षत्वाददोषः। नयनरश्मिभिरेकीभूतेऽपि बाह्ये तेजसि यावानेव तस्य भागोऽदृष्टवशेनोपलब्धिहेतुतयोपात्तस्तावानेवोपलब्धये प्रभवति न सर्व इति न सर्वोपलम्भो युगपच्च भौमध्रुवादिदर्शनसिद्धिः। ननु प्राप्यकारिणि नयनतेजसि काचाभ्रपटलान्तरितेषु कथमुपलब्धिः। तैर्नयनरश्मीनामप्रतिघातात्। ये पुनरप्राप्यकारि चक्षुराहुस्तेषां व्यवहितविप्रकृष्टार्थग्रहणं दुर्निवारं। सन्निधानइव विप्रकृष्टेऽपि स्फुटतरमणीयांसोऽप्यर्था गृह्येरन्। प्राप्य ग्रहणे तु तेजसोऽवयवानामप्रचुरतरतया युक्तमस्फुटदर्शनं दवीयसां क्षोदिष्ठानां चादर्शनं। अथ कस्माद्गुणा पार्थिवादिद्रव्यमाकाशकालदिगात्मानश्च प्रत्यक्षेण न गृह्यन्ते। उच्यते। महत्त्वमेकद्रव्यत्वं रूपविशेषश्च सन्निकर्षइव प्रत्यक्षत्वे हेतुः। अनेकद्रव्यानाश्रितत्वात् परमाणोरदर्शनं। अमहत्त्वाद्द्व्यणुकस्य। आकाशादीनां त्वरूपत्वादद्रव्यद्रव्यत्वाच्चेति वेदितव्यं। अत्रेदं त्रिविधं द्रव्यं संयोगाद्दर्शनस्पर्शनाभ्यां गृह्यते। संयुक्तसमवायाच्च तद्गतानां रूपादीनां गुणानां कर्मणां च ग्रहणं। संयुक्तसमवेतसमवायाच्च गुणत्वकर्मत्वरूपत्वादीनां। समवायाच्च शब्दग्रहणं। कर्णशष्कुलीपरिच्छिन्नं हि गगनमेव श्रोत्रं। तद्गुणश्च शब्दइति तत्त्वालोके निपुणमुक्तं। समवेतसमवायाच्च शब्दत्वप्रतीतिः। संयुक्तविशेषणतया चाभावग्रहणं। अफलवती शाखेति।

तदेतदयुक्तं। यदि महत्त्वानेकद्रव्यत्वरूपवत्त्वानि प्रत्यक्षत्वे निमित्तानि तदा वायोरप्रत्यक्षता स्यात्। न च वाच्यमिष्यतएवेति। स्पर्शनेन तदुपलम्भात्। स्पर्शमात्रं तेनोपलभ्यते न द्रव्यमिति चेत्। न। शीतोष्णानुष्णाशीतेषु स्पर्शेषूपलभ्यमानेषु प्रत्यभिज्ञायमानत्वाद्द्रव्यस्य। यदा हि तैजसमुष्णत्वं जलगतं च शीतत्वं वायोश्चानुष्णाशीतत्वं स्पर्शनेन वायौ वाति प्रतीयते तदा प्रत्यभिज्ञायते द्रव्यं तदेवेदमिति। तेन न स्पर्शमात्रस्य प्रतीतिः। तस्माद्रूपवत्त्वमिव स्पर्शवत्तापि प्रत्यक्षे हेतुरित्युपसङ्ख्यानं कर्त्तव्यं। यत्तु संयुक्तसमवेतत्वात् कर्मणः प्रत्यक्षमुक्तं। तदयुक्तं। तस्य संयोगविभागलक्षणफलानुमेयत्वात्। एतच्च पञ्चिकाद्वये प्रपञ्चितं। अत्रापि चानुमानपरिच्छेदे वक्ष्यामः। यत्तु संयुक्तसमवेतसमवायाद्गुणत्वादिग्रहणमिष्टं। तदपि तेषामभावादेवायुक्तं। समवेतसमवायाच्च शब्दत्वग्रहणमप्येवमेवानुपपन्नं। संयुक्तविशेषणतया चाभावग्रहणमत्रैव निराकरिष्यते। अन्यच्च समवेतविशेषणतापि सन्निकर्षान्तरं किमिति नेष्यते यथा हि गोरश्वस्य चान्योन्याभावप्रतीतये संयुक्तविशेषणतानाम सन्निकर्षान्तरमास्थीयते तथा ककारखकारयोरपीतरेतराभावावगमाय समवेतविशेषणतालक्षणं सन्निकर्षान्तरमुपगन्तुमुचितं। तस्मात् त्रिविधएव सन्निकर्षः प्रत्यक्षत्वे हेतुः। संयोगः संयुक्तसमवायः समवायश्चेति। अव्यप-

देश्यमिति किमर्थं । इन्द्रियार्थसन्निकर्षोत्पन्नस्य शाब्दता-
शङ्कानिवृत्त्यर्थं । यदाहि रूपं रूपमिति प्रतिपद्यते तदा शब्द-
सञ्जल्पसम्भवाच्छाब्दताशङ्का कस्यचित् स्यात् तन्निवृत्तये-
ऽव्यपदेश्यमित्युक्तं । नह्यीन्द्रियार्थसन्निकर्षजे ज्ञाने शब्दस्य
व्यापृतिरस्ति यतः शाब्दता स्यादिति । तदिदमयुक्तं । लक्ष-
णंहि प्रत्यक्षस्य वक्तव्यं । येनच रूपेण सजातीयविजातीयेभ्यो
भेदस्तल्लक्षणं । तच्चतावच्छाब्दाद्भेद इन्द्रियार्थसन्निकर्षजत्वे-
नैव सिद्धः । शब्दसञ्जल्पनानुविद्धस्यतु प्रत्यक्षस्य शाब्दत्वाशङ्का
शाब्दपर्यायेण निराकर्तुमुचिता । अनुमानत्वशङ्केव सर्वस्य शाब्द-
प्रत्ययस्य । अव्यभिचारिपदंच विपर्ययनिराकरणाय यदुक्तं तत्
सर्वज्ञानानामव्यभिचारित्वादविशेषकमित्युक्तं । व्यवसायात्म-
कतापि संशयनिवृत्त्यर्थं न वक्तव्या । स्थाणुर्वा पुरुषोवेतिहि
स्मृतिज्ञानद्वयमेतत् तच्च नेन्द्रियार्थसन्निकर्षजमिति न तस्य
प्रत्यक्षत्वप्रसक्तिः । किञ्चाव्यभिचारिपदेनैव संशयस्यापि निवृ-
त्तिः सिद्धा । तस्यापि यथाज्ञायमानार्थव्यभिचारित्वात् । अपिचा-
व्यभिचारिता व्यवसायात्मकताच न प्रत्यक्षलक्षणं किन्तु प्रमा-
णलक्षणमिति । तेन सामान्येन प्रमाणलक्षणं कृत्वा तद्विशेषस्य
प्रत्यक्षस्य प्रातिस्विकं सजातीयविजातीयव्यावृत्तिसमर्थमेव
लक्षणं वाच्यं । इन्द्रियार्थसन्निकर्षोत्पन्नं प्रत्यक्षमिति । अस्मि-
न्नपिच लक्षणेऽनुमानादिप्रमितिः स्वात्मनि प्रमातरिच न
प्रत्यक्षा स्यात् । अनिन्द्रियजत्वात् ।

अपरे पुनराहुः । प्रत्यक्षं कल्पनापोढमभ्रान्तमिति । कल्पना
नामजात्यादियोजना तया रहितं यद्विज्ञानं तत् प्रत्यक्षं ।
यथाभूतमेव तैमिरिकादीनां केशोण्डुकादिज्ञानं मा प्रत्यक्षं
प्रसाङ्क्षीदित्युक्तमभ्रान्तमिति । तच्चतुर्विधमिन्द्रियजं ज्ञानं ।
सर्वचित्तचैत्यानां स्वसंवेदनं मानसं योगिज्ञानंचेति । यदिन्द्रि-
याणामर्थस्यच सन्निकर्षादुपजायते तदिन्द्रियजं ज्ञानं पञ्चसु
रूपादिषु पञ्चविधं । सर्वज्ञानानां स्वसंवेदनं विकल्पविरहात्
प्रत्यक्षं । सुखादयश्च विज्ञानाभिन्नहेतुकतया न तस्माद्भि-
द्यन्तइति तेऽपि स्वसंविदिताएव । मानसंत्विन्द्रियजविज्ञानेन
स्वविषयलक्षणानन्तरक्षणसहकारिणा जन्यते तस्यचेन्द्रियज्ञान-
ग्राह्यानन्तरएव क्षणो ग्राह्यः । ननु जन्यज्ञानसमये जनकस्यार्थ-
लक्षणस्यातीतत्वात् कथं ग्राह्यता । उच्यते । एतदेव ग्राह्य-
त्वमर्थानां यदुत्पादकत्वं स्वरूपार्पकत्वंचेति । अर्थाकारंहि
प्रत्यक्षं ज्ञानं । अन्यथा निराकारं हि संवित्तिमात्रं कथं रूपादि-
विषयं व्यवस्थितां लभते । अतएवार्थसारूप्यं प्रमाणं । तस्यैव
व्यवस्थाहेतुत्वात् । अर्थेनहि सारूप्यं विज्ञानं घटयति ।
नेन्द्रियादीति न तत् प्रमाणं नन्वेकस्याकारस्य प्रतीतेस्तस्यच
ज्ञानएव व्यवस्थितत्वात् कथमर्थस्य प्रत्यक्षता । उच्यते । योऽर्थो
ज्ञानस्याकारमात्मनोऽन्वयव्यतिरेकावनुकारयति स प्रत्यक्षइति
न दोषः । अवश्यंच साकारता ज्ञानस्याश्रयणीया । अन्यथा
स्वप्नादिष्वसति बहिरर्थे कस्याकारः प्रकाशेत । प्रकाशात्मक-
ज्ञानबहिर्भूतस्याकारः कथं प्रकाशते । जडस्य प्रकाशायोगात् ।
अपिचार्थस्य वित्तेश्च सहोपलम्भो नियतः सच भेदादनियम-
व्याप्तात्व्यापकविरुद्धोपलब्ध्या निवृत्तोऽभेदे व्यवतिष्ठमानमर्थं-
मनुमापयति । भेदावसायस्तु द्विचन्द्रादिप्रतीतिवदनादिवास-
नानिबन्धनइति परिकल्पनीयं । भूतार्थभावनाप्रकर्षपर्यन्तजं च
योगिज्ञानं प्रमाणं । प्रतीतमर्थं परोक्षमपि भावयतो यद्भावनायाः
परमे प्रकर्षे सत्यपरोक्षावभासं ज्ञानं जायते तत् प्रत्यक्षं ।
स्पष्टप्रतिभासत्वेन निर्विकल्पकत्वात् । नहि विकल्पानुविद्धस्य
स्पष्टप्रतिभासतास्ति ।

तदेतदप्यनुपपन्नं । सविकल्पकज्ञानानां जात्यादियोजनया
हीयमानानामिन्द्रियजानां प्रत्यक्षत्वापाकरणात् । अथोच्यते ।
जातिगुणयोर्द्रव्यात् पृथक्त्वेनाग्रहणाद्भेदएव नास्ति । तेन ताभ्या-
मविद्यमानाभ्यां योजयित्वा जायमानं जातिगुणकल्पनाज्ञानं
न प्रत्यक्षमिति । तदसत् । एकैकद्रव्यातिरेकेण द्रव्यान्तरे
ग्रहणात् । पृथक्त्वेनाग्रहणस्यासिद्धेः । एकस्मिन्नपिच द्रव्ये
द्रव्यान्तराद्व्यावर्त्तमानेऽनुवर्त्तमानयोर्जातिगुणयोर्भेदावगमा-
दिति जातिनिर्णये निर्णीतं । कर्मकल्पनातु न प्रत्यक्षमित्यनु-
मतमेवानुमेयत्वात् कर्मणः । द्रव्यकल्पनातु विषाणी दण्डी-
तिच न प्रत्यक्षतामतिवर्त्तते । इन्द्रियानुविधायित्वात् ।
नामकल्पनापि प्रत्यक्षा । इन्द्रियानुविधायित्वात् । देवदत्तो-
ऽयमिति । तत्र यद्यपि वर्णात्मकं नाम स्मरणनिविष्टं तेन
सह वाच्यवाचकभावोऽपि स्मृतिसमारूढएव । तथापि संज्ञा
प्रत्यक्षतां न मुञ्चति । नहि संज्ञा तत्सम्बन्धोवा तदानीमेकज्ञाने
विशेषत्वेन प्रतिभातः किन्तु तौ स्मृत्यारूढावेव । संज्ञिनिहि
दृश्यमाने प्रागनुभूतौ तौ स्मृतिमारोहतः । अतएवचोक्तं ।
संज्ञाहि स्मर्यमाणापि प्रत्यक्षत्वं न बाधते । संज्ञिनः सा
तटस्थाहि न रूपाच्छादनक्षमेति । अतश्च नामयोजनयापि
जायमानं ज्ञानं न प्रत्यक्षमिति येऽपि मन्यन्ते तेऽप्यनयैव दिशा
निराकृताः । ऐन्द्रियके ज्ञाने नामयोजनाया असम्भवात् ।
अपिच जातिगुणयोरप्रत्यक्षत्वमिच्छतो न किञ्चित् प्रत्यक्षमव-
तिष्ठते । नहि रूपशून्या काचिदपि रूपिबुद्धिरस्ति । जाति-
गुणावेव रूपिणां रूपे । सर्वाहि प्रतीतिरेवमिति भवति प्रका-
रश्चैवंशब्दार्थः । जातिगुणौचार्थानां प्रकारभूतौ । ततश्च ताभ्यां
योजयन्त्येव सर्वेन्द्रियप्रतीतिः समुत्पद्यत इति निर्विषयं कल्प-
नापोढपदमिति । अभ्रान्तपदमपि सर्वज्ञानानां स्थूलावभासि-
त्वाद् ग्राह्यग्राहकसंवित्तिभेदयोगित्वाच्च सौगतानां निर्विष-
यमेव । यच्च मानसं नाम प्रत्यक्षमुक्तं तद्धारावाहिकेन्द्रियज्ञा-
नान्नातिरिक्तं मन्यामहे । स्यान्मतं अनुपरतेन्द्रियस्यैन्द्रियजं

Digitized by Google

ज्ञानं उपरतेस्वनंतरक्षणप्रभवं मानसमिति । तदयुक्तं । इन्द्रियव्यापारोपरमस्यापरोक्षार्थप्रतीतिफलसम्भवे सत्यसिद्धत्वात् । यच्चातीतार्थविषयं मानसमित्युक्तं । तदयुक्तं । वर्त्तमानस्याकारस्य प्रतीतेः । नचायमाकारो वित्तेरेव । वेद्यतया वित्तेः पृथगवभासनात् । वित्तिर्हि वित्तितया वेद्यश्चाकारो वेद्यतयावभाति । अतो न तयोस्तादात्म्यमुपपद्यते । यच्चोक्तं भेदावभासो भ्रमइति । तदपि कारणाभावादयुक्तं । नचार्थवित्तिव्यवस्थैव भेदे हेतुः। निराकाराणां वित्तीनां स्वभावतएव विशिष्टार्थसम्बन्धितया स्फुरणात् । सारूप्यंच यद्व्यवस्थाकरणमुक्तं तदसिद्धं । स्थूलावभासित्वाज्ज्ञानानामणुरूपत्वाच्चार्थस्य । किंच यदि तत्सारूप्यं तत्समुत्पत्तिसंवेद्यतालक्षणं । ततः समानाकारस्य समनन्तरप्रत्ययस्यापि वेद्यता स्यात् । स्वप्नादिष्वपिच बाह्यस्यैवार्थस्याकारः स्मृतौ प्रथत इति नयवीथ्यां साधितं । यच्च जडस्य प्रकाशायोगादित्यभेदकरणमुक्तं । तदयुक्तं । जडस्यैव प्रकाशसम्बन्धो घटते । तादात्म्येतु नेष्यतएव । अपिच यदि ज्ञानानतिरिक्तस्यैव प्रकाशस्तर्हि ग्राह्यग्राहकसंवित्तीनां भेदस्य कथं प्रकाशः। तस्यालीकस्य ज्ञानरूपाननुप्रविष्टत्वात् । यच्च सहोपलम्भनियमादभिन्नत्वमाकारस्य वित्तेश्चोक्तं तदप्यसारं । भेदेऽप्यस्यार्थस्य नियमोपपत्तेः । यैवहि संवित्तिः सैव तस्यार्थस्योपलब्धिरिति कथमसौ तां विना प्रकाशेत । यच्च स्वसंवेदनं सर्वसंवित्तीनां प्रत्यक्षमुक्तं। तदनुमन्यामहे । सुखादीनां यत् तदभिन्नहेतुतया तदभेदात् स्वसंवेदनमिष्टं । तदनुपपन्नं । हेत्वभेदस्यासिद्धेः। अर्थस्य ज्ञानहेतुत्वात् । ज्ञानस्यच सुखादिनिमित्तत्वात् । असन्निहितेऽप्यर्थे तज्ज्ञानमात्रात् स्वप्नादिषु सुखाद्युपपत्तेः । यच्च योगिज्ञानं प्रत्यक्षमुक्तं । तदसत् । प्रमाणविशेषोहि प्रत्यक्षं नच भूतार्थभावनाप्रकर्षपर्यन्तजस्य योगिज्ञानस्य प्रमाणतैव सम्भवति । स्मृतिरूपत्वात् । प्रमाणेनहि भूतार्थं परिच्छिद्य या भावना सा स्मृतिसन्ततिरेव । तत्प्रकर्षजमपि ज्ञानं स्मृतिविशेषएवेति न प्रमाणं नच प्रत्यक्षमित्यलमतिविस्तरेण ।

यदपि मन्यन्ते । सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षमिति प्रत्यक्षलक्षणं तदप्यव्यापकत्वादलक्षणं । आत्मनिहि लिङ्गजापि प्रतीतिः प्रत्यक्षत्वेनेष्यते । सकलप्रतीतीनांच स्वरूपं प्रति प्रत्यक्षताभिमतेति । किंतर्हि इदं सत्सम्प्रयोगइति । उच्यते । शुक्तिकारजतज्ञानादिष्वपि प्रत्यक्षतामाहुस्ते निराक्रियन्ते । प्रमेयेषुहि तदेव प्रत्यक्षत्वेनोच्यते यद्विषयं ज्ञानं तेनैवेन्द्रियाणां सम्प्रयोगे यत् पुरुषस्य ज्ञानं जायते । नच शुक्तिसंयुक्ते चक्षुषि यद् रजतज्ञानं जायते तदेवंविधं। तस्माच्च तत् प्रत्यक्षं । रजतज्ञानंहि रजतविषयं । नच रजतेनेन्द्रियं संयुक्तं । रजतस्य तत्रासन्निहितत्वात् । तस्माच्च रजतज्ञानं प्रत्यक्षं किं तर्हि स्मरणमेतदिति दर्शयितुं सूत्रमिदं वर्णनीयम् ।

॥ एतत्प्रकरणशेष उत्तराङ्के भविष्यति ॥

आससाद शुनासीरं सदसि त्रिदशैः सह ।
गत्वा त्र्यंबकं तीव्रं वहन् वह्निर्महन्महः ॥ १ ॥
सहस्रेण दृशामीशो द्युसदां सोऽतिसादरम् ।
दुर्दर्शनं ददर्शाग्निं धूम्रधूमितमण्डलम् ॥ २ ॥
दृष्ट्वा तथाविधं वह्निमिन्द्रः क्षुब्धेन चेतसा ।
व्यचिन्तयच्चिरं किंचित् कन्दर्पद्वेषिरोषजम् ॥ ३ ॥
स्रवज्जलमुखेदैवैर्वीज्यमानः चणांचणम् ।
उपाविशत् सुरेन्द्रेणादिष्टं सादरमासनम् ॥ ४ ॥
हव्यवाह त्वयासादि सुमहादुर्दशा कुतः ।
इति पृष्टः सुरेन्द्रेण स निश्वस्य वचोऽवदत् ॥ ५ ॥
अनतिक्रमणीयात् ते शासनात् सुरनायक ।
अतिगौरीरतासक्तं अगामाहं महेश्वरम् ॥ ६ ॥
पारावतं वपुः प्राप्य वेपमानोऽतिसाध्वसात् ।
कालस्येव स्मरारातेरुपान्तमहमासदम् ॥ ७ ॥
दृष्ट्वा छद्मविहङ्गं मां सुधी विज्ञाय ध्यानभृत् ।
ज्वलद्वालानले होतुं कोपतोऽयममन्यत ॥ ८ ॥
वचोभिर्मधुरैः सार्थैर्विनम्रेण मया स्तुतः ।
प्रीतिमानभवद्देवः स्तोत्रं कस्य न तुष्टये ॥ ९ ॥
शरण्यः सकलत्राता मामत्रायत शङ्करः ।
क्रोधाग्नेर्ज्वलतो ग्रासत्रासतो दुर्निवारतः ॥ १० ॥
परिहृत्य परीरंभरभसं दुहितुर्गिरेः ।
कामकेलिरसोत्सेकाद्व्रीडया विरराम सः ॥ ११ ॥
रङ्गभङ्गच्युतं रेतस्तदमोघं सुदुर्धरम् ।
त्रिजगद्दाहकं सद्यो मद्विग्रहमधि न्यधात् ॥ १२ ॥
तेनाहं दुर्विषह्येण तेजसा दहनात्मना ।
निर्दग्धमात्मनो देहं दुर्वहं वोढुमक्षमः ॥ १३ ॥
रौद्रेण दह्यमानस्य महसातिमहीयसा ।
मम प्राणपरित्राणप्रगुणो भव वासव ॥ १४ ॥
इति श्रुत्वा वचो वह्नेः परितापोपशान्तये ।
हेतुं विचिन्तयामास मनसा विबुधेश्वरः ॥ १५ ॥

Digitized by Google

तेजोदग्धानि गात्राणि पाणिनास्य परामृशन् ।
किञ्चित् कृपीटयोनिं तं दिवस्पतिरभाषत ॥ १६ ॥

प्रीतः स्वाहास्वधाहन्तकारैः प्रीणयसे स्वयम् ।
देवान् पितॄन् मनुष्यांस्त्वमेकस्तेषां मुखं यतः ॥ १७ ॥

त्वयि जुह्वति होतारो हवींषि ध्वस्तकल्मषाः ।
भुंजते स्वर्गमेकस्त्वं स्वर्गप्राप्तौ हि कारणम् ॥ १८ ॥

हवींषि मन्त्रपूतानि हुताश त्वयि जुह्वतः ।
तपस्विनस्तपःसिद्धिं यान्ति त्वं तपसां प्रभुः ॥ १९ ॥

नयसे हुतमर्काय स पर्जन्योऽभिवर्षति ।
ततोऽन्नानि प्रजायन्ते तेनासि जगतः पिता ॥ २० ॥

अन्तश्चरोऽसि भूतानां तानि त्वद्बलवन्ति च ।
त्वत्तो जीवितमूयस्त्वं जगतः प्राणदोऽसि तत् ॥ २१ ॥

अमीषां सुरसैन्यानां त्वमेकोऽर्थसमर्थने ।
विपदोऽपि पदं श्लाघ्योऽपकारयति नो हि सः ॥ २२ ॥

देवी भागीरथी पूर्वं भवत्यास्माभिः प्रतोषिता ।
निमज्जतस्तवोदीर्णं तापं निर्वापयिष्यति ॥ २३ ॥

गङ्गां तद्गच्छ माकार्षीर्विषादं हव्यवाहन ।
अर्थेष्ववश्यकार्येषु सिद्धये चिप्रकारिता ॥ २४ ॥

शंभोरंभोमयी मूर्त्तिः सैव देवी सुरापगा ।
त्वत्तः स्मरद्विषो बीजं दुर्द्धरं धारयिष्यति ॥ २५ ॥

इत्युदीर्य सुनासीरो विरराम सचानलः ।
तद्विसृष्टस्तमामन्त्र्य प्रतस्थे स्वर्धुनीमभि ॥ २६ ॥

हिरण्यरेतसा तेन देवी स्वर्गतरङ्गिणी ।
तीर्णाध्वना प्रपेदे सा निःशेषाघविनाशिनी ॥ २७ ॥

स्वर्गारोहणनिःश्रेणिः स्वर्गमार्गाधिदेवता ।
उदारदुरितोद्गारहारिणी दुर्गतारिणी ॥ २८ ॥

महेश्वरजटाजूटवासिनी पापनाशिनी ।
सागरान्वयनिर्वाणकारिणी धर्मधारिणी ॥ २९ ॥

विष्णुपादोदकोद्भूता ब्रह्मलोकादुपागता ।
त्रिभिः स्रोतोभिरश्रान्तं पुनाति भुवनत्रयम् ॥ ३० ॥

॥ कुलकम् ॥

जातवेदसमायान्तमूर्मिहस्तैः समुच्छ्रितैः ।
आजुहावास्य संसिद्धौ सुप्रसादादरेव सा ॥ ३१ ॥

संमिलद्भिर्मरालैः सा कलं कूजद्भिरुन्मदैः ।
ददे श्रेयांसि दुःखानि निहन्मीति तमभ्यधात् ॥ ३२ ॥

कल्लोलैरुद्गतैरर्वाचीनं तटमभिद्रुतैः ।
प्रीत्येव तमभीयाय स्वर्धुनी जातवेदसम् ॥ ३३ ॥

अथाभ्युपेत्य तापार्त्तो निममज्जानलः किल ।
विपदा परिभूताः किं व्यवस्यन्ति विलम्बितुम् ॥ ३४ ॥

गङ्गावारिणि कल्याणकारिणि श्रमहारिणि ।
स मग्नो निर्वृतिं प्राप पुण्यकारिणि तारिणि ॥ ३५ ॥

तत्र माहेश्वरं धाम संचक्राम हविर्भुजः ।
गङ्गायामिद्धभङ्गायामन्तस्तापविपद्भृतः ॥ ३६ ॥

कृशानुरेतसो रेतस्याहृते सरिता तया ।
निश्चक्राम ततः सोऽयं हव्यवाहो वहन् बहु ॥ ३७ ॥

सुधासारैरिवांभोभिः परिषिक्तो हुताशनः ।
यथागतं जगामाथ परां निर्वृतिमादधत् ॥ ३८ ॥

सा सुदुर्विषहं कामं धाम कामजितो महत् ।
आदधाना परीतापमवाप व्योमवाहिनी ॥ ३९ ॥

बहिरार्त्ता युगान्ताग्नेस्तप्तानीव शिखावतेः ।
हित्वोष्णानि जलान्यस्या निर्जग्मुर्जलजन्तवः ॥ ४० ॥

तेजसा तेन रौद्रेण तप्तानि सलिलान्यपि ।
समुदञ्चंति चण्डानि दुर्भराणि बभार सा ॥ ४१ ॥

जगत्सु वपुषि चण्डांशो किञ्चिदभ्युदयोन्मुखे ।
जग्मुः षट् कृत्तिका माघे मासि स्नातुं सुरापगाम् ॥ ४२ ॥

शुभ्रैरभङ्गुरैरूर्मिशतैः स्वर्गमनं सताम् ।
कथयन्तीमिवालोकावगाहाचमनादिना ॥ ४३ ॥

सुस्नातानां मुनीन्द्राणां बलिकर्मार्चितैरलम् ।
बर्हिः पुष्पोत्करैः कीर्णतीरां दूर्वाक्षतान्वितैः ॥ ४४ ॥

ब्रह्मध्यानपरैर्योगपरैः पद्मासनस्थितैः ।
योगनिद्रां गतैर्भोगिभोगबद्धैरुपाश्रिताम् ॥ ४५ ॥

पादाङ्गुष्ठाग्रभूमिष्ठैः सूर्यसंविष्टदृष्टिभिः ।
ब्रह्मर्षिभिः परं ब्रह्म गृणद्भिरुपसेविताम् ॥ ४६ ॥

॥ कुलकम् ॥

अथ देवीं धुनीं देवीमभ्यनन्दन् विलोक्य ताः ।
कं नाभिनन्दयत्येषा देवी पीयूषवाहिनी ॥ ४७ ॥

चन्द्रचूडामणिर्देवो यामुद्वहति मूर्धनि ।
तस्या विलोकनं पुण्यं भद्रधुस्ता मुदा हृदि ॥ ४८ ॥

दिष्ट्या विष्णुपदीं देवीं निर्वाणपददेशिनीम् ।
निर्द्धूतकल्मषां मूर्ध्ना सुप्रह्वास्तां ववन्दिरे ॥ ४९ ॥

स्वभाग्यैः खलु संप्राप्तां मोक्षप्रतिभुवं सताम् ।
भक्त्या च तुष्टुवुस्तास्तां श्रद्दधानाः सिषेविरे ॥ ५० ॥
मुक्तिस्त्रीसङ्गदौत्यज्ञैस्तत्र ता विमलैर्जलैः ।
प्रक्षालितमलाः सद्यः सुस्नातास्तपसान्विताः ॥ ५१ ॥
स्नात्वा तत्र सुरम्यायां भाग्यैः परिपचेलिमैः ।
चरितार्थमिवात्मानं बहु ता मेनिरे मुदा ॥ ५२ ॥
कृशानुरेतसो रेतस्तासामभि कलेवरम् ।
अमोघं सञ्चचाराथ सद्यो गङ्गावगाहनात् ॥ ५३ ॥
रौद्रं सुदुर्धरं धाम दधाना दहनात्मकम् ।
परितापमवापुस्ता मग्ना इव विषाम्बुधौ ॥ ५४ ॥
अक्षमा दुर्वहं वोढुमम्बुनो बहिरातुराः ।
अग्निं ज्वलन्तमन्तःस्थं दधाना इव निर्ययुः ॥ ५५ ॥
अमोघं शाम्भवं बीजं सद्यो नद्यां स्थितं महत् ।
तासामभ्युदरं तीव्रं स्थितं गर्भत्वमागमत् ॥ ५६ ॥
मुग्धा विज्ञाय ता गर्भभूतं तद्वोढुमक्षमाः ।
विषादमदधुः सद्यो गाढं भर्तृभयाद्ध्रिया ॥ ५७ ॥
अकाममरणं जातमकाण्डं भाविनोऽर्थतः ।
संभूयान्योन्यमात्मानं शुशुचुस्तास्तदाविलम् ॥ ५८ ॥
ततः शरवणे शापभयेन व्रीडया सह ।
तद्गर्भजातमुत्सृज्य ता गृहानभितो ययुः ॥ ५९ ॥
ताभिस्तत्रामृतकरकलाकोमलं भासमानं
तन्निक्षिप्तं वनमभि नभो गर्भमभ्युज्जिहानैः ।
स्वैस्तेजोभिर्दिनकरशतस्पर्द्धमानैरमानै-
र्वक्त्रैः षड्भिः स्मरहरशिरःस्पर्द्धयेव प्रपेदे ॥ ६० ॥

इति कुमारसम्भवे दशमः सर्गः ॥

अभ्यर्थ्यमाना विबुधैः समस्तैः
प्रह्वैः सुरेन्द्रप्रमुखैरुपेत्य ।
तं पाययामास सुधाभिपूर्णं
सुरापगा स्वस्तनमाशु धात्री ॥ १ ॥
पिबन् स तस्याः स्तनयोः सुधौघं
चवंचवं साधु समेधमानः ।
प्रपाकृतिं कामपि षड्भिरेव
निषेव्यमाणः खलु कृत्तिकाभिः ॥ २ ॥
भागीरथीपावककृत्तिकाना-
मानन्दबाष्पाकुललोचनानाम् ।
तं नन्दनं दिव्यमुपात्तुमासीत्
परस्परं प्रौढतरो विवादः ॥ ३ ॥
अथान्तरे पर्वतराजपुत्र्या
समं शिवः स्वैरविहारहेतोः ।
नभो विमानेन विगाहमानो
मनोऽतिवेगेन जगाम तत्र ॥ ४ ॥
निसर्गवात्सल्यविवृद्धचेतः-
पृथुप्रमोदौ गलदश्रुनेत्रौ ।
अपश्यतां तौ गिरिजागिरीशौ
षडाननं तद्दिनजातमात्रम् ॥ ५ ॥
अथाह देवी शशिखण्डमौलिं
कोऽसौ शिशुर्दिव्यवपुः पुरस्तात् ।
कस्याथवा धन्यतमस्य पुंसो
माता च का भाग्यवतीषु धुर्या ॥ ६ ॥
स्वर्गापगापावनलोऽयमेताः
षट् कृत्तिकाः किं कलहायमानाः ।
पुत्रो ममायं न तवायमित्थं
मिथोऽतिवेलत्यमुदाहरन्ति ॥ ७ ॥
एतेषु कस्येदमपत्यमीशा-
खिलत्रिलोकीतिलकायमानम् ।
अन्यस्य कस्याप्यथ देवदैत्य-
गन्धर्वसिद्धोरगराक्षसेषु ॥ ८ ॥
श्रुत्वेति वाचं हृदयप्रियायाः
कौतूहलिन्या विमलस्मितश्रीः ।
सान्द्रप्रमोदोदयसौख्यहेतु-
भूतं वचोऽवोचत चन्द्रचूडः ॥ ९ ॥
जगत्त्रयीनन्दन एष वीरः
प्रवीरमातस्तव नन्दनोऽयम् ।
कल्याणि कल्याणकरः सुराणां
त्वत्तोऽपरस्याः कथमेष सर्गः ॥ १० ॥
देवि त्वमेवास्य निदानमार्ये
स्वर्गे जगन्मङ्गलगानहेतोः ।
सत्यं त्वमेवेति विचारयस्व
रत्नाकरे युज्यत एव रत्नम् ॥ ११ ॥

Digitized by Google

अतः शृणुष्वावहितेन वृत्तं
बीजं यदग्नौ निहितं मया तत् ।
सङ्क्रान्तमन्तस्त्रिदशापगायां
ततो विगाहे सति कृत्तिकासु ॥ १२ ॥
गर्भत्वमाप्तं यदमोघमेतत्
ताभिः शरस्तम्बमधि न्यधायि ।
बभूव तत्रायमभूतपूर्वो
महोत्सवोऽशेषचराचरस्य ॥ १३ ॥
अशेषविश्वप्रियदर्शनेन
धुर्य्या त्वमेतेन सुपुत्रिणीनाम् ।
अलं विलम्ब्याचलराजपुत्रि
सुपूर्णमुत्सङ्गतलं विधेहि ॥ १४ ॥
अथेतिवादिन्यमृतांशुमौलौ
शैलेन्द्रपुत्री रभसेन सद्यः ।
सान्द्रप्रमोदेन सुपीनगात्री
धात्री समग्रस्य चराचरस्य ॥ १५ ॥
किरीटबद्धाञ्जलिभिर्नभःस्थै-
र्नमस्कृता सत्वरनाकलोकैः ।
विमानतोऽवातरदात्मजं तं
ग्रहीतुमुत्कण्ठितमानसाभूत् ॥ १६ ॥
स्वर्गापगापावककृत्तिकादीन्
कृताञ्जलीनानमतोऽपि भूम्ना ।
हित्वा सुकान्तं सुतमाससाद
पुत्रोत्सवे माद्यति को न हर्षात् ॥ १७ ॥
प्रमोदबाष्पाकुललोचना सा
न तं ददर्श क्षणमग्रतोऽपि ।
परिस्पृशन्ती करकुड्मलाभ्यां
सुखान्तरं प्राप किमप्यपूर्वम् ॥ १८ ॥
सविस्मयानन्दविकस्वरायाः
शिशुर्गलद्बाष्पतरङ्गितायाः ।
विवृद्धवात्सल्यरसोत्तराया
देव्या दृशो गोचरतां जगाम ॥ १९ ॥
तमीक्षमाणा क्षणमीक्षणानां
सहस्रमाप्तुं विनिमेषमैच्छत् ।
सुनन्दनालोकनकौतुकेन
क्षणंक्षणं तृप्यति कस्य चेतः ॥ २० ॥
विनम्रदेवासुरपृष्ठगाभ्या-
मादाय तं पाणिसरोरुहाभ्याम् ।
महोदयात् पार्वणचन्द्रचारुं
गौरी स्वमुत्सङ्गतलं निनाय ॥ २१ ॥
स्वमङ्कमारोप्य सुधानिधान-
मिवात्मनो नन्दनमिन्दुवक्त्रा ।
तमेकदेवं जगदेकदेवी
बभूव पूज्या धुरि पुत्रिणीनाम् ॥ २२ ॥
निसर्गवात्सल्यरसौघसिक्ता
सान्द्रप्रमोदामृतपूरपूर्णा ।
तमेकपुत्रं जगदेकमाता
मुत्सङ्गिनं प्रस्रविणी बभूव ॥ २३ ॥
अशेषलोकत्रयमातुरस्याः
षाण्मातुरः स्तन्यसुधामधासीत् ।
सुरस्रवन्त्याऽनलकृत्तिकाभि-
र्मुहुर्मुहुः सस्पृहमीक्ष्यमाणः ॥ २४ ॥
सुधाप्रपूर्णेन मृगाङ्कमौलेः
कलत्रमेकेन मुखाम्बुजेन ।
तस्यैकनालोद्गमपञ्चपद्म-
लक्ष्मीं क्रमात् षड्वदनीं चुचुम्ब ॥ २५ ॥
हैमं फलं हेमगिरेर्लतेव
विकस्वरं नाकनदीव पद्मम् ।
पूर्वेव दिङ्नूतनमिन्दुमाभात्
तं पार्वती नन्दनमादधाना ॥ २६ ॥
प्रीतात्मना सुप्रयतेन दत्त-
हस्तावलम्बा शशिशेखरेण ।
कुमारमुत्सङ्गतले दधाना
विमानमभ्रंलिहमारुरोह ॥ २७ ॥
महेश्वरोऽपि प्रमदप्ररूढ-
रोमोद्गमो भूधरनन्दनायाः ।
अकाण्डमादत्त तमङ्कतः स
तस्यास्तु सौम्यात्मजवत्सलत्वात् ॥ २८ ॥
दत्त्वाऽनया नेत्रसुधैकपात्रं
पुत्रं पवित्रं सुतया तथाद्रेः ।

Digitized by Google

संश्लिष्यमाणः शशिखण्डवाही
विमानवेगेन गृहं जगाम ॥ २९ ॥
अधिष्ठितः स्फाटिकशैलशृङ्गे
तुङ्गे निजे धामनि कालरम्ये ।
महोत्सवाय प्रमथान् स नाथः
पृथून् महिम्ना स्वमुदादिदेश ॥ ३० ॥
पृथुप्रमोदः प्रगुणो गणानां
गणः समग्रो वृषवाहनस्य ।
गिरीन्द्रपुत्र्यास्तनयस्य जन्म-
न्यथोत्सवं संववृते विधातुम् ॥ ३१ ॥
स्फुरन्मरीचिच्छुरिताम्बराणि
सन्तानशाखिप्रसवाञ्चितानि ।
उच्चिक्षिपुः काञ्चनतोरणानि
गणाश्चलानि स्फटिकालयेषु ॥ ३२ ॥
महोत्सवे तत्र समागतानां
गन्धर्वविद्याधरसुन्दरीणाम् ।
सम्भावितानां गिरिराजपुत्र्या
गृहेऽभवन्मङ्गलगीतकानि ॥ ३३ ॥
सुमङ्गलोपायनपूर्णहस्ता-
स्तं मातरो मातृवदभ्युपेत्य ।
निधाय दूर्वाक्षतकानि मूर्ध्नि
निन्युः स्वमङ्कं गिरिजातनूजम् ॥ ३४ ॥
ध्वनत्सु तूर्येषु सुमन्द्रमङ्गा-
लिङ्गोर्ध्वकेष्वप्सरसो रसेन ।
सुसन्धिबन्धं ननृतुः सुतन्त्रि
गीतानुगं भावरसानुविद्धम् ॥ ३५ ॥
वाता ववुः सौख्यकराः प्रसेदु-
राशा विधूमो हुतभुग्दिदीपे ।
जलान्यभूवन् विमलानि तत्रो-
त्सवेऽन्तरिक्षं प्रससाद सद्यः ॥ ३६ ॥
गम्भीरशङ्खध्वनिमिश्रमुच्चै-
र्दिवि ध्रुवा दुन्दुभयः प्रणेदुः ।
दिवौकसां व्योम्नि विमानसङ्घा
विमुञ्चतां पुष्पचयान् प्रसस्रुः ॥ ३७ ॥
इत्थं महेशाद्रिसुतासुतस्य
जन्मोत्सवः संमदयाञ्चकार ।
चराचरं विश्वमशेषमेतत्
परं चकम्पे किल तारकश्रीः ॥ ३८ ॥
ततः कुमारः स मुदो निदानैः
स्वबाललीलाललितैर्विचित्रैः ।
गिरीशगौर्योर्हृदयं जहार
मुदे न हृद्या किमु बालकेलिः ॥ ३९ ॥
महेश्वरः शैलसुतापि हर्षात्
सहर्षमेकेन मुखेन गाढम् ।
अजातदन्तानि मुखानि सूनो-
र्मनोहराणि क्रमशश्चुचुम्ब ॥ ४० ॥
क्वचित् स्खलद्भिः क्वचिदस्खलद्भिः
क्वचित् प्रकम्पैः क्वचिदप्रकम्पैः ।
बालः सलीलं चलनप्रयोगै-
स्तयोर्मुदं कन्दलयाञ्चकार ॥ ४१ ॥
अहेतुहासच्छुरिताननेन्दु-
र्गेहाङ्गणक्रीडनधूलिधूम्रः ।
मुहुर्वदन् किञ्चिदलक्षितार्थं
मुदं तयोरङ्कगतस्ततान ॥ ४२ ॥
गृह्णन् विषाणे हरवाहनस्य
स्पृशन्नुमाकेसरिणः सटालीः ।
स भृङ्गिणः सूक्ष्मतरं शिखायं
कर्षन् बभूव प्रमदाय पित्रोः ॥ ४३ ॥
एको नव द्वौ दश पञ्च सप्ते-
त्यजीगणन्मञ्जु मुखं प्रसार्य ।
महेशकण्ठोरगदन्तपङ्क्तिं
तदङ्कगः शैशवमुग्धमेधाः ॥ ४४ ॥
कपर्दिकण्ठान्तकपालदाम्नो-
ऽङ्गुलिं प्रवेश्याननकोटरेषु ।
दन्तानुपातुं रभसीबभूव
मुक्ताफलभ्रान्तिकरान् कुमारः ॥ ४५ ॥
शंभोः शिरोऽन्तः सरितस्तरङ्गान्
विगाह्य गाढं शिशिरान् रसेन ।
सञ्जातजाड्यो निजपाणिपद्म-
मतापयद्भालविलोचनाग्नौ ॥ ४६ ॥

किञ्चित्कलं भङ्गुरकण्ठरम्य-
नमज्जटाजूटधरस्य शम्भोः ।
प्रलंबमानं किल कौतुकेन
चिरं चुचुम्बे मुकुटेन्दुखण्डम् ॥ ४७ ॥
इत्थं शिशोः शैशवकेलिवृत्ते-
र्मनोभिरामैर्गिरिजागिरीशौ ।
मुदा विनोदैकरसप्रसक्तौ
दिवानिशं नाविदतां कदाचित् ॥ ४८ ॥
इति बहुविधं बालक्रीडाविचित्रविचेष्टितं
ललितललितं सान्द्रानन्दं मनोहरमाचरन् ।
अलभत परां वृद्धिं षष्ठे दिने नवयौवनं
स किल सकलं शास्त्रं शस्त्रं विवेद विभोरपि ॥ ४९ ॥

इति कुमारसम्भवे कुमार-
कौमारवर्णनं नामैकादशः सर्गः ॥ ११ ॥

ON THE NYA'YA SYSTEM OF PHILOSOPHY.

(Continued from page 40.)

Whilst *Kaṇáda*, in his rhetorical section, gives the framework for a set harangue, to be delivered without interruption, *Gautama* supposes an opponent, and a chairman, or Speaker of the House. In his first aphorism, (see the "Logical Aphorisms of Gotama," published in Calcutta, p. 2; Colebrooke's Essay, p. 265; or Ward's "View, &c. of the Hindoos," v. 4, p. 239,) he sketches, by an enumeration of the sixteen topics following, what may be regarded as "the natural history of a debate." What is to be admitted as proof (*pramáṇa*) having been pre-determined, and the subject of discussion (*prameya*) having been mooted, the impartial chairman, not having yet heard the arguments, is in a state of doubt (*sanśaya*), both as to what is the fact of the matter, and also as to there being any sufficient motive (*prayojana*) for entertaining the question. The asserter of the proposition explains the importance of the question, which furnishes the motive for entertaining it; and he supports his own opinion on the matter by citing examples (*drishṭánta*) sufficient, he conceives, to make out an established case (*siddhánta*). An opponent rises, and takes the reasoning to pieces (*avayava*), putting it, that is to say, into the form of the five-membered discourse, and trying to show its insufficiency The first speaker makes a refutation (*tarka*) of these objections, and thus furnishes confirmation (*nirṇaya*) of his own position. The objector, who, being, by hypothesis, in the wrong, is of course obstinate, begs that a fair discussion (*váda*) may be allowed; and he proceeds to offer a wrangling rejoinder (*jalpa*); and, in default of better arguments, he brings forward cavils (*vitaṇḍa*), fallacies (*hetwábhása*), ambiguous expressions, and such-like disingenuous artifices (*chhala*). By these unworthy proceedings he lays himself open to the confutation (*játi*) to which a reasoner is liable who evidently contradicts himself, and the assembly being no longer disposed to listen to him, he is voted a nuisance, and finds himself in the predicament of being rebuked (*nigraha-sthána*) by the president, who puts him down, and declares that "the Ayes have it."

Kaṇáda's six categories belong, in the foregoing enumeration of topics, to the head of *prameya*—things, the existence of which is to be proved.

After the rhetorical section of our text-book, we come to the chapter on Fallacy, or "the mere appearance of a reason" (*hetwábhása*). The examples, as might have been expected, are all regarded as being "extra dictionem," and the refutation is made to turn on the citation of instances in which there is avowedly present or avowedly absent that property, the existence of which in the subject *(paksha)* is in question.—"That which certainly possesses the property in question," says our text-book, "is called an instance on the same side *(sa-paksha)*; as the culinary hearth, in our example. "That which is certainly devoid of the property in question is called an instance on the opposite side (*vi-paksha*); as the great deep lake, in the same example."

The *sa-paksha* corresponds to Bacon's *instantiæ convenientes* "quæ in eâdem naturâ conveniunt, per materias licet dissimillimas." The *vi-paksha* answers to the instantiæ "quæ naturâ datâ privantur"—(Organum. Lib. 2. Aph. xi. and xii.)

The five kinds of allegation that present merely the semblance of a reason (*hetwábhása*), are specified as follows:—(1) that which would prove too much "(*savyabhichára*); (2) that which would prove the contradictory (*viruddha*); (3) that than which there is a "stronger argument on the other side (*satpratipaksha*); "(4) the inconclusive (*asiddha*); and (5) the self-refuted "(*bádhita*)." "The alleged reason which would prove too much," (*sa-vyabhichára*,—i. e. which wanders away to cases where the property is absent, instead of being exclusively predicable in cases where the property is present,) is described as "that which has several conclusions" (besides the one wanted.) "As, for instance, if "one should say, 'The mountain is fiery, because the "existence of the mountain is capable of proof,'" (the reason assigned would be liable to this objection,) "be-

Digitized by Google

"cause the capability of having its existence proved, be-"longs (equally) to a lake, which is characterized by the absence of fire."

The result of this, translated into the language of European logic is this, that in such a case an opponent would deny the supressed premiss, essential to the validity as an argument—viz. that "All that is demonstrable is fiery"—the truth of which is a question not of formal logic but of fact—a question to be determined by inductive investigation. If the suppressed premiss be merely that "Some things demonstrable are fiery," then of course the middle term is not distributed.

It is obvious (see Whately's Logic, Book 3, § 1.) that it is impossible, in the case of a fallacy propounded as an Enthymeme, to tell whether the fallacy is in the form or in the matter; but there is no doubt that our text-book views it as residing in the matter, seeing that what is brought forward, in refutation, is an instance designed to disprove the universality of the suppressed major.

Under the same division of fallacies our text-book places two other varieties—that in which the reason alleged is "not common" (*asádháraṇa*), being a property of the subject under consideration and of nothing besides;—and that which is "non-exclusive" (*anupasaṇhárí*). Of the former the example given is, "Sound is eternal, because it has the nature of sound"; on which our text-book remarks that "the nature of sound resides "in sound alone, and in nothing else, whether eternal or "non-eternal." This fallacy corresponds to what has been ungallantly termed "Ladies' logic"—the proving of a proposition by re-asserting it—"It is so."—"Why?" —"because it is so." Of the other variety, the example given is, "Everything is non-eternal, because the existence "of everything is capable of proof." To this our text-book objects, that "since *everything* is taken as the subject of the "proposition, nothing is left to furnish examples," by means of which the truth of the assertion might be tested. This view of the matter is taken under the impression that truth can be ascertained only by an induction of examples; the *Naiyáyikas* agreeing rather with Mr. Mill than with Mr. Whewell on this point.

Of the second class of fallacies we find the following example—"Sound is eternal, because it is created"—an argument to be rejected, according to our text-book, "because the fact of its having been created implies, not "eternity, but the negation thereof." In this case the denial of the major, viz., that "Everything created is eternal," rests on the ground that the very reverse is the fact. Whether sound be created or uncreated, is a disputed point among Indian philosophers,—the Grammarians, of course, taking the side in the dispute which tends most to exalt the subject-matter of their own science.

As an example of the third class of fallacies, we are told that if one should argue that "Sound is eternal, "because it is audible, as the nature of sound (*śabdatwa*) "is (by both parties admitted to be,)" it might be argued with equal force, on the other side, that "Sound is non-eternal, because it is a product—as a jar is."

Wherever there appears to be an equiponderance of arguments, the case is of course one for further enquiry into facts. As for the example just quoted, a Buddhist would dispose of it by denying that anything exists in reality answering to the term *śabdatwa*, "the abstract nature of sound." Granting that there were such a thing, and that it were eternal as here assumed, there is a fallacy of equivocation in the attribution to it at once of the terms "audibleness" and "eternity." The term *śabdatwa* is audible, like other words, only in the sense of what is called in the Logic of the schools its *suppositio materialis* (the *anukaraṇa* of the Sanskrit Grammarians)—in so far as it is a pronounceable collection of vowels and consonants; but it is held to be eternal in quite a different sense—in the sense of its being an abstract entity—in which sense it is no more audible than is the abstract nature of a jar, or any other kindred pseudo-Platonic Universal.

The fourth class of fallacies, that of the inconclusive *asiddha*) is sub-divided into three kinds, (1) "where there is not established the existence of any such locality as that where the property is alleged to reside" (*áśrayásiddha*); (2) "where the inconclusiveness is apparent "from the form of the expression" (*swarúpásiddha*); and (3) "where invariableness of concomitancy is not established," (*vyápyatwásiddha*). As an example of the first kind, our text-book supposes one to argue that "The sky-lotus is fragrant, because the "nature of a lotus resides in it, as in the lotuses of the lake." And it is remarked that "the sky-lotus which is here (alleged "as) the locality (of the nature of a lotus) does not exist."—Mr. Mill (Logic, vol. 1, p. 200,) treating of the nature of Definition, has the following remarks, which noticeably illustrate the case in hand.

He says:—

"Let this, for instance, be our definition; A dragon is a serpent "breathing flame. This proposition, considered only as a definition, is "indisputably correct. A dragon *is* a serpent breathing flame: the "word *means* that. The tacit assumption, indeed, (if there were any "such understood assertion,) of the existence of an object with pro-"perties corresponding to the definition, would, in the present instance "be false. Out of this definition we may carve the premisses of the "following syllogism:—

"A dragon is a thing which breathes flame.
But a dragon is a serpent!
From which the conclusion is
Therefore some serpent or serpents breathe flame:"—

Digitized by Google

"An unexceptionable syllogism, in the first mode of the third "figure, in which both premisses are true, and yet the conclusion false; "which every logician knows to be an absurdity. The conclusion be-"ing false, and the syllogism correct, the premisses cannot be true. "But the premisses, considered as parts of a definition, are true: there "is no possibility of controverting them. Therefore, the premisses "considered as parts of a definition cannot be the real ones. The "real premisses must be:

"A dragon is a *really existing* thing which breathes flame:—

"A dragon is a really existing serpent:

"Which implied premisses being false, the falsity of the conclusion "presents no absurdity."

The example given of an argument "the inconclusiveness of which is apparent on the face of it," is the following: "Sound is a quality, because it is visible, as colour is;"—in the case of which argument, we are told, every one would perceive at once that "visibility does "not reside in sound, for sound is recognized by the "hearing" (not by vision). This is the case of notorious falsehood in the minor premiss.

The third case in this class, viz., the case "where in-"variableness of concomitancy is not established," exhibits an approach to a recognition of the formal necessity of the distribution of the middle term;—but, as treated, it falls under the head of the procedure "a dicto secundum quid, ad dictum simpliciter." The example given is the following:—"The mountain must be smoky, because it is fiery;" whereupon our text-book remarks justly, that things may be ignited, like a red-hot iron ball, without being smoky; and, less justly, that smoke can be looked for only where "wet fuel" is in the way. The term *upádhi* ("a special cause for a general effect' —Wilson's Dict.) answers to the "quid" in the "dictum secundum quid."

Of the last kind of fallacy treated of, the futile or self-contradictory, the following is given as an example:—"Fire is devoid of heat, because it is a substance, as a jar is." In this case, says our text-book, the alleged proof is defeated by the opposition of a thoroughly ascertained one—for we know, by the evidence of our senses, that "fire *is* hot."—If we did not the argument is not the less a non sequitur.

Having thus pursued Fallacy down to its lowest hiding-place in sheer nonsense, our text-book goes on to cite Comparison as a separate kind of proof. We agree with the *Sánkhya* in declining to recognise this as a special kind of proof:—so we pass it over, and proceed to "Testimony" (*śabda*), which is defined as "the word of one worthy" (to be received as an authority). Here is the starting point for an enquiry into the truth of history—a question of the greatest moment in our dealings with Hindú thinkers, and a question in regard to which we fear their notions are at present of the crudest.

Our text-book next proceeds to some considerations about the nature of language, indicating the place in the system for the Philosophy of grammar:—and then come some of the Qualities which we have already remitted to the province of Psychological and Ethical science; our text-book itself here remarking that "the eight qualities in the list, beginning with "Intellect, belong to soul only."

The last of the qualities, viz. Faculty (*sanskára*) is said to be of three kinds, viz. (1) Momentum (*vega*); (2) Imagination (*bhávaná*); and (3) Elasticity (*sthiti-sthápaka*). It seems strange to class together things so seemingly different as these three. Our own view of the classification, (which those pandits that we have got to understand us seem to concur in,) is this—that for the production of such an effect, or the establishment of such a product, as a jar, two causes at least must co-operate; viz. the maker and the material:—for the clay may be said to make the jar, as reasonably as the potter can be said to make it. So again, in order that there may be Perception, both the Mind and an external Object must co-operate. But equally in the case of the Mind's exerting the faculty of Memory, a bent bow's righting itself on the removal of the strain, and of a body's continuing its course after disjunction from that which originated the motion, an agent is recognized as operating *by itself*. Looking at the etymology of the word *sanskára*—(*sam* "with," and *kṛi* "do")—one might imagine the word to be better fitted to express what is done, by the mind, &c. in co-operation with something else, than what is done without such co-operation: but occasionally, in a compound verb, the separate force of the constituent elements is nearly as little obvious as the character of the acid or the alkali in a neutral salt.

Our text-book, having finally disposed of the two first categories—Substance and Quality,—reverts to the third —that of Action, which is defined as "consisting in motion."—Here, as we stated before, we find the place, in the *Nyáya* system, for all the physical sciences dependent on the laws of motion. On the remaining four categories, (Community, Difference, Intimate Relation, and Non-existence,) it would be needless here to add to what has been already said.

Now, reviewing the ground that we have gone over with the view of finding out its available points, we think we have shown that the *Nyáya* system furnishes starting points, from which the learned mind of India may be invited to advance into the scientific paths of Chemistry, Zoology, Botany, Geography, Geology, Astronomy, Psychology, Ethics, Mathematics, Formal Logic, the Philosophy of Induction, Rhetoric, and Mechanical Philosophy.

Digitized by Google

Why we think the determination of these points a matter of some importance, and how we think they might be turned to practical account, we propose to set forth in a paper "On the Prospects of India, Religious and Intellectual."—K.

THE SÁHITYA-DARPAṆA,

OR

MIRROR OF COMPOSITION.

CHAPTER X.

The Declaration of Ornaments.

He now declares the Ornaments, the occasion *for treating of them* having arrived, *after the discourse on Faults, Excellences and Styles**, *the other accompaniments of Poetry.*

TEXT.

No. 631. Those non-permanent attributes of a word and its sense, that add to their beauty and aid the flavour† or the like,‡ are styled Ornaments, being like bracelets and the like *that adorn the human form.*

COMMENTARY.

a. As bracelets and the like, by promoting the beauty of the person, advantage the man, so Alliteration, Simile and other figures, which, by adding to the beauty of word and sense, serve to aid the flavour or the like, are termed Ornaments.

b. 'Non-permanent'—*i. e.* their (the ornaments') presence is not necessary like that of the excellencies, or the merits of Sweetness, Energy, and Perspicuity (see Chapter VIII).

c. Since of a word and its sense, the word becomes first the object of apprehension *and then the sense,* it is proper to speak first of the ornaments of word; and the semblance of Tautology, though an ornament of word and sense, being by the ancients defined among ornaments of word, he declares first.

TEXT.

No. 632. What at first sight appears to be the repetition of a sense, is called the Semblance of Tautology, § and this consists in the use of different words *of the same apparent import.*

COMMENTARY.

a. This is an example :—

भुजङ्गकुण्डली व्यक्तशशिशुभ्रांशुशीतगुः ।
जगन्त्यपि सदाऽपायादव्याच्चेतोहरः शिवः ॥

"Bhujanaga-kundalí vyakta-śaśi-śubhránśu-śítaguh
Jagantyapi sadápáyádavyách chetoharah Śivah."

(He who has a serpent for his earring, *on whose head* is manifest the moon with the camphor-white rays, may the heart-ravishing Śiva ever preserve the worlds !).

Here, the *compounded* words भुजङ्गकुण्डली (bhujanga-kuṇḍalí), for example, seeming at first sight *both* to mean a serpent, bear the appearance of being tautological, but afterwards they come to convey a distinct sense, viz., 'one who wears a serpent for an earring.' In पायादव्यात् (páyádavyát) the ornament consists in *the seeming tautology* of an action, for *the seeming verb* पायात् (páyát) terminates in being recognized as अपायात् (apáyát), *the* अ (a) *having coalesced in sandhi, or combination, with the* आ (á) *of* सदा (sadá). Of the words भुजङ्गकुण्डली (bhujanga-kuṇḍalí), the former only admits of being exchanged *for a synoym ;* of हरः शिवः (harah Śivah) the latter only, and both of शशि-शुभ्रांशु (śaśi-śubhránśu).

b. In the sentence भाति सदा ऽनत्या ऽगः* "Bháti sadá 'natyá 'gah," '(A mountain shines by never bowing),' neither of the seeming words दान (dána) and त्यागः (tyágah) can be exchanged. Thus the figure in question is an ornament both of word and sense, inasmuch as it can partially endure an exchange of words.

TEXT.

No. 633. A similarity of sounds, notwithstanding a difference in the vowels is what is called Anuprása, or Alliteration.

COMMENTARY.

a. A similarity in mere vowels, not being striking, is not counted *an embellishment.*

b. Anuprása *(anu+pra+ása* from *as* to throw*) means etymologically,* a throwing or setting together *of words* in an excellent manner, favourably to flavour.

TEXT.

No. 634 The Chheka is a similarity *occuring* once and in more than one way among a collection of consonants.

COMMENTARY.

a. The Chheka—*i. e.* the Chhekánuprása.

b. 'In more than one way'—*i. e.* both in the nature *of the sound* and in the order *of their succession.* The similarity, for instance, in रसः सरः with a difference of order is not the subject of this ornament.

c. This is an example of my revered father's :—

आदाय बकुलगन्धानन्धीकुर्व्वन् पदे पदे भ्रमरान् ।
अयमेति मन्दमन्दं कावेरीवारिपावनः पवनः ॥

* These are respectively treated of in the 7th, 8th and 9th chapters of the Sáhitya-Darpaṇa.

† This is Dr. Ballantyne's rendering of the term रस (rasa), or Poetical Relish. Of this there are generally reckoned nine varieties, *viz.*, the Erotic, the Comic, the Pathetic, the Furious, the Heroic, the Terrible, the Disgustful, the Marvellous, and the Quietistic.

‡ This expression sums up all those sentiments that excite poetical delight, though they are not fully developed, from the want of some of its requisites, into Relish properly so called. See the Mirror of Composition (Bib. Ind), pp. 39 and 132.

§ Or Paronomasia of Synonyms.

* Wrongly divided in Roer's edition—भाति सदा न त्यागः

"Ádáya Vakula-gandhánandhíkurvan pade pade bhramarán
Ayameti mandamandam Káverí-vári-pávanah pavanah."

(Wafting the perfumes of the Vakula,* intoxicating the bees at every step, here blows softly and slowly the purifying breeze from the *holy* waters of the Káverí.)

There is here the recurrence of two combined consonants in गन्धानन्धी (gandhánandhí); of two separate, in कावेरीवारि (Káverí-vári); and of many, in पावनः पवनः (pávanah pavanah).

d. 'Chheka' means skilful, and as being used by them, this figure *is called* the Chhekánuprása, or the 'Alliteration of the skilful.'

TEXT.

No. 635. Similarity among a number of consonants in one way, or that occurring more than once (which distinguishes it from the above ornament) and in more than one way, or the same single consonant recurring even once is termed Vṛittyanuprása, or Harmonious Alliteration.

COMMENTARY.

a. 'In one way'—*i. e.* in nature only and not in order too. 'In more than one way'—*i. e.* in order as well as in nature. In the expression 'even once' by the word 'even' is implied 'also more than once if possible.'

b. The following is an example:—

उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर-
क्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः ।
नीयन्ते पथिकैः कथंकथमपि ध्यानावधानक्षण-
प्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः ॥

"Unmílan-madhu-gandha-mugdha-madhupa-vyádhúta-chú-
tánkura—
Kríḍat-kokila-kákali-kalakalairudgírṇa-karṇa-jwaráh
Níyante pathikaih kathankathamapi dhyánávadhána-kshaṇa-
Prápta-práṇa-samá-samágama-rasollásairamí vásaráh."

(Hardly and with difficulty are passed these days by the wandering *lovers,* enjoying the fancied bliss of the company of their sweethearts obtained but in the *transient* moments of meditative vision—*these vernal days* when the ear is tormented with the sweet confusion of the warbles of kokilas sporting on the mango sprays, which are shaken by bees allured by the scent of the overflowing honey.)

In this *example* the two *r*'s (र) and *s*'s (स) are similar in one way only, their order not being the same. In the second line of the stanza the consonants क (k) and ल (l) recur more once and in the same order; in the first line the letter त (t) recurs once and ध (dh) more than once.

c. An arrangement of letters ministering to the heightening of flavour is termed 'vṛitti' (*i. e.* style adapted to the sentiment) *and the present ornament is called* 'Vṛittyánuprása' since it consists in an excellent disposition of words in conformity with that arrangement.

* Mimusops Elongi. *Wilson.*

TEXT.

No. 636. When there is a similarity among consonants alone, as being pronounced by the same organ of speech, such as the palate, the teeth or the like, this is styled Śrutyanuprása, or Melodious Allitration.

COMMENTARY.

a. For example:—

दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः ।
विरूपाक्षस्य जयिनीस्ताः स्तुमो वामलोचनाः ॥

'Dṛiśá dagdham Manasijam jívayanti dṛiśaiva yáh
Virúpákshasya jayinís táh stumo váma-lochanáh."

(Them who with a look recall to life the mind-born god who was burnt by a look—we glorify the fair-eyed *women* the conquerors of the fierce-eyed divinity [*Śiva*])

Here, *in the words* जीवयन्ति (jívayanti) याः (yáh) and जयिनीः (jayiníh) the consonants ज (j) and य (y) being uttered from the same part *of the mouth, viz.,* the palate, are similar. Similarly might it be exemplified of the gutturals, dentals &c. And this is named Śrutyanuprása because of its being extremely delightful to the ear (śruti) of the man of taste.

TEXT.

No. 637. If a consonant, its predicament unaltered, together with the foregoing vowel, is repeated at the end *of words or lines,* it is termed Antyánuprása, or Final Alliteration.

COMMENTARY.

a. 'Its predicament unaltered'—*i. e.* joined, as the case may be, with an anuswára, visarga, vowel or another consonant.

b. And this *figure* is generally to be used at the end of verses or of words. Coming at the end of verses, this is illustrated in *the following stanza of* mine:—

केशः काशस्तवकविकाशः कायः प्रकटितकरभविलासः ।
चक्षुर्दग्धवराटककल्पं त्यजति न चेतः काममनल्पम् ॥

"Keśah káśa-stavaka-vikásah,
Káyah prakaṭita-karabha-vilásah,
Chakshur dagdha-varáṭakakalpam,
Tyajati na chetah kámamanalpam."

(The hair bears the appearance of a bunch of the *Kása* grass*: the body *bent down and hunch-backed* displays the beauty of a young camel's frame: the eyes are facsimiles of a burnt *cowri*: yet the heart quits not its exorbitant desires.)

c. Coming at the end of words, this figure is instanced in मन्दं हसन्तः पुलकं वहन्त इत्यादि. "Mandam hasantah, pulakam vahantah &c."

(Sweetly smiling, with their hairs erect with joy &c.)

TEXT.

No. 638. A repetition of sound and sense when there is a difference in the mere purport, is spoken of as the Láṭánuprása.

* Saccharum Spontaneum. *Wilson.*

Digitized by Google

COMMENTARY.

a. For example :—

स्मेरराजीवनयने नयने किं निमीलिते ।
पश्य निर्ज्जितकन्दर्पं कन्दर्पवशगं प्रियं ॥

"Smera-rájíva-nayane kim nimílite,
Paśya nirjita-kandarpam kandarpa-vaśagam-priyam".

(Why hast thou closed thine eyes, fair lady with eyes like the smiling lotus? behold thy love who surpasses Cupid, by Cupid brought to subjection.)

Here though the meanings of the cases endings *of the repeated words* are different, yet the more important ideas of the concrete objects, conveyed by their crude portions are the same, hence there is here a case of the Láṭánuprása.

b. In the example—"His eyes are eyes indeed in whose presence will be this fair-faced one," the second 'eyes' differs in meaning simply in being designed to imply a possession of such attributes as good fortune or the like. *This, then, is also an instance of the same ornament though assuming here the character of what, in Greek Rhetoric, is designated* PLOKE, πλόκη.

c. Or to take another example :—

यस्य न सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य ।
यस्य च सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य ॥

"Yasya na savidhe dayitá dava-dahanas Tuhina-dídhitistasya,
Yasya cha savidhe dayitá dava-dahanas Tuhina-dídhitistasya."

(To him who has not his love by him, the cool-beamed *moon* is a conflagration, and *to him who* has his love by him a conflagration is the cool-beamed *moon.*)

In this example we have a repetition of many words.

d. This figure is termed Láṭánuprása from its being generally liked by the people *of the country* Láṭa.*

TEXT.

No. 639. Anuprása (Alliteration) then is fivefold.

COMMENTARY.

a. The text is clear.

TEXT.

No. 640. The repetition, in the same order, of a collection of vowels and consonants, the sense, where there is one, being different is styled Yamaka, or Rhyme.

COMMENTARY.

a. In this *ornament* both the sounds repeated are sometimes significant and sometimes meaningless; sometimes one of them has a meaning and the other, none: hence is the clause 'where there is one' inserted *in the text.* 'In the same order'—this implies that such repetitions as दमो मोद (damo moda) have no connection *with the present figure.*

b. And this figure, consisting of the repetition of a word, a line, a half stanza and a stanza is abundantly divisable, because of the numerous ways in which the repetition of a word &c., may be made.

* The upper part of the Dekhin, *Lár* or *Larice.* Wilson.

c. A. part only is exemplified *as follows* :—

नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजं ।
मृदुलतान्तलतान्तमलोकयत् स सुरभिं सुरभिं सुमनोभरैः ॥

"Nava-paláśa-paláśa-vanam purah
Sphuṭa-parága-parágata-pankajam,
Mṛidula-tánta-latántamalokayat,
Sa surabhim surabhim sumanobharaih."

(He saw before him the spring, fragrant with an exuberance of flowers, under whose influence the Paláśa* forest had assumed a fresh foliage, the lotus was filled with manifest pollen and the tender ends of plants were fading.)

Here we have the repetition of words. In पलाश पलाश (paláśa paláśa) as also in सुरभिं सुरभिं (surabhim surabhim) both the sounds repeated are significant, in लतान्त लतान्त (latánta latánta,) the former is meaningless; in पराग पराग (parága parága,) the latter *bears no sense.* Similarly might the other cases be exemplified.

d. According to the rule, *viz.*, "ड (*d*) and ल (*l*), व (*v*) and ब (*b*), ल (*l*) and र (*r*) are to be held the same *letter* in the Rhyme or the like," there is no violation of this figure *in this verse of Kálidása* भुजलतां जडतामबलाजन : (Bhujalatám jaḍatámabalá-janah.)

TEXT.

No. 641. When one construes a speech of another in a sense different from what is intended, by a Paronomasia or a change of voice, it is termed Vakrokti or crooked speech, and is twofold according *as it is founded on the one or the other.*

COMMENTARY.

a. 'Twofold' as being Paronomastic Crooked Speech and Accentual Crooked Speech.

b. For examples *of these two kinds* in their order :—

'के यूयं'—'स्थल एव सम्प्रतिवयं'–'प्रश्नो विशेषाश्रयः'
'किं ब्रूते विहगः स वा फणिपति र्यत्रास्ति सुप्तो हरिः'।
'वामा यूय' 'अहोविडम्बरसिकः कीदृक् स्मरो वर्त्तते
येनास्मासु विवेकशून्यमनसः पुंस्वेव योषिद्भ्रमः' ॥

"'Ke yúyam?'—'Sthala eva samprati vayam'—'Praśno viśeshásrayah.'
'Kim brúte vihagah sa vá phaṇipatir yatrásti supto harih'?—
'Vámá yúyam'—'Aho viḍamba-rasikah-kídrik smaro vartate
Yenásmásu viveka-śúnya-manasah pumsweva yoshidbhramah!"

"Who (*ke*) are you ?'—*playing upon the word* क *which means water also, the addressees reply*—'Forsooth, we are on the ground just now.' 'Nay *my* question is touching the particularity (*viśesha*) *of your caste or country.*' 'What says the bird (*vi*) or the lord of the serpents (*śesha*) on whom Vishnu is sleeping?'—'You are perverse (*váma*')—'Aha, how fond is cupid of deluding people—this man, robbed of all discrimination, mistakes us men for women (*vámá*)!"

* Butea Frondosa. *Wilson.*

Digitized by Google

Here in the word *viśesha* there is a 'Paronomasia with division', as *viśesha*, divided into *vi* and *śesha* comes to be connected with the two meanings of 'bird' and 'serpent.' In the other instances there is that 'without division.'

"In the season noisy with the Kokila's warbles and delightful with the blooming mango plants, her heart grieves not *(na dúyate)* to have abandoned her offending *lover*."

Here the negative (*na*) used in the sense of denial by one of the fair friends of the lady, is by another construed into an affirmative signification through an *interrogative* change of voice, thus—'*Grieves not her heart?*—it DOES.'

P. D. M.

(To be continued.)

MANU'S BULL.

In the Journal of the German Oriental Society, Vol. VI., Fasciculus III., Dr. Weber observes, in a foot-note in page 303 of his translation of the 1st Book of the Śatapatha Bráhmaṇa, that Dr. A. Kuhn compares the Bull of Manu with the Grecian Minotaurus; and adds, truly enough, that the resemblance is obvious, but that the detailed comparison is attended with considerable difficulties.

It appears to me that points of resemblance will multiply and difficulties decrease if we compare the Bull of Manu not with the Minotaurus, but with his father the Bull of Minos. In the Śatapatha Bráhmaṇa (Book I., Adhyáya I., Bráhmaṇa IV.), it is written: "Manu had a bull. Into him had entered a voice that slew Asuras and Fiends. With his snorting and bellowing the Asuras and Rakshasas were ever trodden under foot. Then the Asuras said among themselves, Alas! this bull worketh us woe: how may we now prevail over him? Now Kiláta and Ákuli were the chief priests of the Asuras: and they said, Surely Manu is faithful: now shall we know it. They went to him, therefore, and said, O Manu, we will sacrifice for thee. And he said, Wherewithal *will ye sacrifice?* And they answered, Even with this *thy* bull. And he said, Be it so. And the voice of the bull that was sacrificed went away and entered into Manáví, the wife of Manu."

The Grecian legend tells us that Minos was the son of Zeus, in his Bull-avatár, and Europa. He was a great law-giver while he lived upon earth, and after death a righteous Judge among the shades. Once, as he was sacrificing to the God of the Sea, he prayed that a bull might come forth from the sea and promised to sacifice the animal to the God. The bull appeared, * but Minos, struck with his beauty, spared him, and sacrificed another in his place. The God of the Sea in his anger made the bull mad, and caused Pasiphaë, the wife of Minos, to fall in love with the animal, by whom she became the mother of the Minotaurus, a man-eating monster with a human body and a bull's head.

There are several striking points of resemblance in these two stories, quite sufficient to indicate a common origin for both. Manu, the Indian law-giver, is, of course, the prototype of his Cretan namesake, the law-giver and king, whose name and fame were once in Greece almost what Manu's are now in India. In the words of the Bráhmaṇa quoted above in translation, Manu had a bull (*Manorha vá 'ṛishabha ása*): Minos, himself begotten by a God in the form of a bull, prayed for and obtained a miraculous bull. Manu gave his bull to be sacrificed: Minos vowed to sacrifice his, but failed to keep his vow. The voice of the sacrificed bull entered into the wife of Manu, and tormented the Asuras and Fiends more grievously than before: the love of the bull that was spared from the slaughter inflamed the wife of Minos, and she became the parent of a monster that lived upon the flesh of foreign youths and maidens.

So much for the points of resemblance in the two legends. It should be remembered that the Bull, the possession of which is attributed to both the Indian and the Cretan law-giver, was in India the symbol of justice. As such, he is the favourite animal of Mahádeva, and in this form Justice or Righteousness (Dharma) is represented in the Srí-Bhágavat Puráṇa (Book I. Ch. 17.), the four legs that support him being Mortification, Purity, Charity, and Truth.

* Cf. *Sahasraśṛingo vṛishabho yah samudrád udácharat.* Rig-veda VII. 55. But in this passage the bull is the Sun, according to Sáyaṇa; the Moon, according to Professor Aufrecht, whose interpretation is the more probable one, as a night-scene is described (Indische Studien. Vierter Band. Drittes Heft. p, 313.). In either case the thousand horns are the light-beams, and the rising up from the sea is obvious. Is there any connection between light, as represented by horns, and the Minotaurus the bull-headed son of Pasiphaë the daughter of the Sun?

Communications of a literary nature should be addressed to the EDITOR: *all letters on business, to the Proprietors,* MESSRS. E. J. LAZARUS & Co., *to whom Drafts should be made payable.* ADVERTISEMENTS *will be charged for according to the space occupied.*

The PANDIT may be ordered of the Publishers, or through MESSRS TRÜBNER and Co., LONDON.

Subscription, in advance, including postage, Rs. 12-0-0 *per annum.*

PRINTED AND PUBLISHED BY E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 5. Benares October 1st, 1866. Vol. I.

॥ प्रकरणपञ्जिकायाः पञ्चमप्रकरणस्य ॥

प्रमाणपारायणस्य प्रक्रान्तपूर्वं प्रथमपरिच्छेदेऽवशिष्टांशः ।

स्वाभिमतमिदानीं प्रत्यक्षलक्षणमाह । साक्षात्प्रतीतिः प्रत्यक्षम्। ननु भावनाप्रकर्षजापि स्मृतिः साक्षात्कारवती प्रत्यक्षं प्रसज्यते । न । प्रमाणाधिकारात् । अनुभूतिश्च प्रमाणम् । तद्विशेषश्च प्रत्यक्षमिति न स्मृतौ प्रत्यक्षत्वापत्तिः ।

प्रत्यक्षस्य विशेषमाह। मेयमातृप्रमासु सा। तत्र विभागमाह। मेयेष्विन्द्रिययोगोत्था । द्रव्यजातिगुणेष्विन्द्रियसंयोगोत्था सा प्रत्यक्षा प्रतीतिः । मेयेष्विन्द्रियसंयोगेन तत्संयुक्तसमवायेन तत्समवायेनच जायते । कानि पुनरिन्द्रियाणि । घ्राणनयनरसनत्वक्श्रवणानि बाह्यानि आन्तरंच मनः । किंपुनरेषामस्तित्वे भेदेच प्रमाणम्। उच्यते । विषयावबोधस्तावत् कादाचित्को दृश्यते । तस्यचात्मा समवायिकारणमसमवायिकारणेनच विना कार्यं न जायतइति । तच्च समवायिकारणप्रत्यासन्नं भवति । प्रत्यासत्तिश्च द्विधा दृष्टा । तत्समवायस्तत्कारणसमवायश्च । अग्निसंयोगोहि पाक्यद्रव्यसमवेतोऽसमवायिकारणभूतस्तत्रैव गन्धादिकमारभते। तन्तुरूपाणिच पटकारणभूतेषु तन्तुषु समवेतानि पटस्य रूपारम्भेऽसमवायिकारणभूतानि।तत्रतावदात्मनो नित्यत्वात् तत्कारणसमवेतमसमवायिकारणं न भवतीत्यात्मसमवेतमेव गुणान्तरमसमवायिकारणमाश्रयणीयम् । तत्रच नित्यद्रव्यसमवायिनो वैशेषिकगुणस्य द्रव्यान्तरसंयोगएवासमवायिकारणत्वेनावधारितः । पार्थिवपरमाणुषुहि रूपादयोऽग्निसंयोगमेवासमवायिकारणमाश्रित्योत्पद्यमानाः प्रतीता इत्यात्मनोऽपि बोधाख्यो धर्मो द्रव्यान्तरसंयोगमेवासमवायिकारणमाश्रयति । तस्यच द्रव्यस्याश्रयभूतद्रव्यान्तरसद्भावे प्रमाणाभावादद्रव्यद्रव्यत्वं निश्चीयते । द्विविधं चाद्रव्यद्रव्यम्। परममहदाकाशादिकं परमाणुरूपंच । तत्रास्य द्रव्यान्तरस्य परममहत्त्वोपगमे संयोगएवानुपपन्नः । संयोगकारणाभावात् । योहि संयोगः साक्षात् प्रतीयते सोऽन्यतरकर्मजोवोभयकर्मजोवा संयोगजोवा तेन नियतकारणत्वेन संयोगस्यावगतत्वात् तदभावे संयोगएव नास्तीति निश्चीयते । नच परममहतोः साक्षात्संयोगो भवति नचाप्यनुमातुं शक्यतइति पारिशेष्यादणुत्वमेव तस्य द्रव्यान्तरस्याश्रीयते । अणुत्वे तत्कर्मवशादेव संयोगोदयोऽनुपपन्नो न भवति । तत्कर्मोत्पत्तौ प्रयत्नवदात्मसंयोगएव कारणम् । शरीरकर्मवत् । प्रयत्नेचासत्यदृष्टवदात्मसंयोगस्य कारणता वायुतिर्यक्पवनवत्।तदुक्तम्।अग्नेरूर्ध्वज्वलनं वायोस्तिर्यक्पवनमणुमनसोश्चाद्यं कर्मेत्यदृष्टकारितान्येतानीति । सुखदुःखेच्छाद्वेषप्रयत्नानुभवेच तद् द्रव्यान्तरं मनःशब्दाभिधेयं निरपेक्षं कारणम् । सर्वार्थस्मृतौच पूर्वजनितसंस्कारोद्बोधसहकार्यनुगृहीतमिति वेदितव्यम्। एतेन यदाहुः षण्णामनन्तरातीतं विज्ञानं यत् तन्मनइति । तदपि निराकृतम्। द्रव्यान्तरसंयोगस्यैव नित्यद्रव्यगतवैशेषिकगुणारम्भेऽसमवायिकारणत्वेन दृष्टत्वात् । रूपग्रहणे रूपवदालोकस्य निमित्तत्वदर्शनाद्रूपवदेवेन्द्रियं रूपग्रहणनिमित्तमिति परिकल्पनीयम् । तथा गन्धवदेव गन्धग्रहणे । स्पर्शवत् स्पर्शग्रहणे। रसवच्च रसबोधे। शब्दवदेव शब्दग्रहणइति । तेन गन्धवत्त्वात् पार्थिवं घ्राणं गन्धग्रहणकारणम्। रसवत्त्वाच्चाम्भसं रसनं रसानुभवनिमित्तम् । रूपवत्त्वाच्च तैजसं चक्षू रूपालोकहेतुः । त्वगिन्द्रियंच स्पर्शवत्त्वाद्वायवीयम् । शब्दगुणत्वाच्चाकाशं श्रोत्रेन्द्रियम् । इन्द्रियसम्बन्धापन्नस्यापि चार्थस्य विषयान्तरासक्तचित्तेनाप्रतिपत्तेर्मनःसंयोगापेक्षेन्द्रियाणामाश्रीयते । तेनाभ्यन्तराणां सुखादीनां ग्रहणे सन्निकर्षद्वयं कारणम् । आत्ममनःसन्निकर्षः संयोगाख्यः सुखादिमनःसन्निकर्षश्च संयुक्तसमवायलक्षणः । बाह्यरूपादिग्रहेच सन्नि-

Digitized by Google

कर्षचतुष्टयं कारणम्। आत्ममनःसन्निकर्षो मनइन्द्रियसन्निकर्षो द्रव्येन्द्रियसन्निकर्षो रूपादीन्द्रियसन्निकर्षश्चेति ।

प्रमेयविभागमाह । द्रव्यजातिगुणेषु सा । सेन्द्रियसंयोगोत्था प्रतीतिः। स्पर्शवन्महत्त्वयुक्तंच द्रव्यं पार्थिवमाप्यं तैजसं वायवीयं चतुर्विधमैन्द्रियकम्। तथाविधद्रव्योदयकारणंच प्रमाणमिति निर्णयनिर्णीतम् । जातिसद्भावोऽपि जातिनिर्णयएवोक्तः। गुणास्तु रूपरसगन्धस्पर्शाः सङ्ख्या परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे सुखदुःखेच्छाद्वेषप्रयत्नाश्च प्रत्यक्षग्राह्याः क्वचिच्च द्रव्याग्रहणेऽपि रूपादीनां ग्रहणं रूपाद्यग्रहणेपिच द्रव्यस्येति नास्ति द्रव्यगुणयोर्ग्रहणंप्रति नियमः। द्विधाचेयं द्रव्यजातिगुणेषु । सविकल्पाऽविकल्पाच प्रत्यक्षा बुद्धिरिष्यते । विभजते । आद्या विशिष्टविषया स्वरूपविषयेतरा । प्रथमंहि स्वरूपमात्रज्ञानं द्रव्यजातिगुणेषूपपद्यते। तच्च स्वानुभवसिद्धम्। समाहितमनस्को विषयान्तरानुसन्धानशून्य इन्द्रियसंयुक्तं वस्तु साक्षादुपलभतइति स्वसंविद्वेवात्र प्रमाणम्। तस्यच न स्वलक्षणमात्रं विषयः । जात्याकारावग्राहित्वस्य स्पष्टत्वात् । नापि सामान्यमात्रविषयत्वं भेदग्रहणस्य प्रतीतिसिद्धत्वात्। लब्धरूपे क्वचित्किञ्चिदित्यादिच यदुच्यते तदितरेतराभावविषयम्। नतु वस्तुविषयम्। वस्तुभेदप्रतीत्यनन्तरकालं परस्पराभावोऽवसीयते। घटंच घटाकारतया विदित्वा पटंच पटाकारतयायं स न भवतीतीतरेतराभावं प्रतिपद्यते । पटाकारविधानंच वस्त्वन्तरग्रहणानपेक्षमित्यप्रतिपद्यापि वस्त्वन्तरं तद्ग्रहो नानुपपन्नः । तस्मात् सामान्यविशेषौ द्वे वस्तुनी प्रतिपद्यमानं प्रत्यक्षं प्रथममुत्पद्यते किन्तु वस्त्वन्तरानुसन्धानशून्यतया सामान्यविशेषरूपता न प्रतीयते । अनुगतंहि सामान्यमुच्यते व्यावृत्तश्च विशेषः। नच वस्त्वन्तरानुसन्धानमन्तरेणानुगतव्यावृत्ती प्रत्येतुं शक्येते । अप्रतिपद्यमानोऽपि ते शक्नोत्येव स्वरूपं तयोः प्रतिपत्तुमिति निर्विकल्पकमसामान्यविशेषविषयम् । सविकल्पकं तु तत्पृष्ठभावि तेएव वस्तुनी सामान्यविशेषात्मना प्रतिपद्यते । ननुच वस्त्वन्तरानुसन्धाने नेन्द्रियं समर्थम् । इन्द्रियसामर्थ्यसमुत्थंच प्रत्यक्षमिति कथं सामान्यविशेषात्मता प्रत्यक्षस्य विषयः । उच्यते । भवेदेतदेवं यदीन्द्रियाण्येव चेतनानि स्युः । ज्ञानानिवा । आत्मात्वेकः सर्वानुभवितव्यानुभविता संस्कारवशेन वस्त्वन्तरमनुसन्दधदिन्द्रियसंयोगि सामान्यविशेषात्मना वस्तु शक्नोति प्रत्येतुम्। तथाहि । निर्विकल्पकेन सामान्यविशेषौ द्वे वस्तुनी प्रतिपद्यमानेनापि तयोर्भेदो ग्रहीतुं न शक्यते । नहि वस्तुभेदमात्रेण भेदसिद्धिः किन्तु धर्मान्तरग्रहेऽपि भेदबुद्धौ सहकारी । तेनानुगतव्यावृत्ती धर्मान्तरभूते अगृहीतः सत्यपि सामान्यविशेषयोर्भेदे भेदबुद्धिर्नासीदुत्तरकालेच वस्त्वन्तरानुसन्धानेन ते प्रतीत्य भिन्नत्वमवसीयते । भेदेच सति विशेषणविशेष्यभावावसायइति न निर्विकल्पकदशायां विशिष्टबुद्धिः । सविकल्पकंतु विशेषणविशेष्यभावमनुगच्छति । गुणप्रतीतावपि निर्विकल्पकं न विशिष्टतया द्रव्यमवच्छिनत्ति । द्रव्यगुणयोर्भेदानवगमात् । अन्वयव्यतिरेकाभ्यां गुणजात्योर्द्रव्याद्भेदोऽवगम्यते । नच निर्विकल्पकेऽन्वयव्यतिरेकानुसन्धानमस्तीति न तेन भेदग्रहणम्। अगृहीतभेदस्तु न विशिष्टतां ग्रहीतुमीष्टइति सविकल्पकएव विशिष्टप्रत्ययः । नामकल्पनायामपि शब्दवाच्यतायाः स्मर्यमाणाया एव विषयत्वं कर्मकल्पनाप्येवमेव व्याख्येया । प्रत्ययान्तरोपस्थितेचापि विशेषणे विशिष्टप्रत्ययो भवत्येव । आत्मनः प्रमातृत्वान्निर्विकल्पकपृष्ठभाविनश्च सविकल्पकस्य गृहीतग्राहित्वेऽपि धारावाहिकज्ञानन्यायेन प्रामाण्यं वेदितव्यं विशेषणविशेष्यभावातिरेकेणागृहीतग्राहितापि सम्भवत्येव सविकल्पकस्याबाह्यवस्तुविषयत्वंच जातिनिर्णये निर्णीतम्। नचेदमनिन्द्रियजं ज्ञानम्। इन्द्रियाधीनवृत्तित्वात् । अपरोक्षावभासोह्ययं सविकल्पकप्रत्ययः । तादृशो नेन्द्रियव्यापारमन्तरेणास्ति ।

सम्प्रति मातरि मितौच प्रत्यक्षं व्याख्यातुमाह । सर्वविज्ञानहेतूत्था मितौ मातरिच प्रमा । साक्षात्कर्तृत्वसामान्यात् प्रत्यक्षत्वेन सम्मता । यावती काचिद्ग्रहणस्मरणरूपा प्रतीतिस्तत्र साक्षादात्मा प्रतिभाति । नह्यात्मन्यनवभासमाने विषया भासन्ते । सर्वाहि प्रतीतिरेवमुपजायतेऽहं जानामीति । नपुनर्जानातीति काचिद्बुद्धिरस्ति । तथाहि स्वपरवेद्ययोरनतिशयः स्यात्। नच प्रमान्तरविषयत्वेन नियमः सम्भवति । एकप्रतीतिविषयत्वेतु युक्तएव सहोपलम्भनियमः । तस्मात् सर्वैरेव ज्ञानहेतुभिरात्मनि साक्षात्कारवती धीरुपजन्यते । नन्वेवंतर्हि सर्वं प्रत्यक्षं प्रसक्तम्। यदि मात्रभिप्रायम् । इष्टमेव । प्रमेयाभिप्रायमितिचेत् । न । सर्वत्र प्रमेयस्यापरोक्षत्वनियमाभावात् । स्मृतिष्वनुमानान्तरेषुच न प्रमेयमपरोक्षम्। तेन प्रमेयापेक्षया प्रमाणान्तरव्यपदेशइति मन्तव्यम्। सर्वाश्च प्रतीतयः स्वयं प्रत्यक्षाः प्रकाशन्ते तासांच युक्तमेव स्वात्मनि प्रत्यक्षत्वं मानत्वंच । मेयमातृप्रमाणानांत्वेष प्रतीतिविशेषः । मेये मातरिच व्यतिरिक्ता प्रतीतिः साक्षात्कारवती मितौत्वव्यतिरिक्ता । इदमहं स्मरामि गृह्णामीतिच त्रितयमेवावभासते। मेयमात्रुभयरूपा संविदेका । न तस्याः संविदन्तरं चकास्ति। नच सा नावभाति । तदनवभासे सर्वानवभासप्रसङ्गात् । किञ्चाप्रकाशस्वभावानि मेयानि माताच प्रकाशमपेक्षन्ताम् । प्रकाशस्तु प्रकाशात्मकत्वान्नान्यमपेक्षते । जाग्रतोहि मेयानि माताच प्रकाशन्ते । सुषुप्तस्यच न द्वयमपि प्रकाशते । नच तदानीं तन्नास्त्येव । प्रबोधे सति प्रत्यभिज्ञानात् । नच प्रकाशात्मकत्वे सुषुप्तिदशायामपि द्वयं

प्रकाशेत । तस्मादप्रकाशात्मकमेतद् द्वयमित्यङ्गीक्रियते । प्रकाशस्यत्वप्रकाशमानस्य सत्तैव नाभ्युपेयते । तस्मादप्रकाशकएव मेयमात्रप्रकाशः । किञ्च । स्वतएव यदुपपद्यते न तत्र परापेक्षा युक्ता । मेयानां मातुश्च स्वतः प्रकाशो नोपपद्यतइति युक्ता तयोः परापेक्षा । मितौच काचिदनुपपत्तिर्नास्तीति स्वयंप्रकाशैव मितिः ।

॥ शेष उत्तराङ्के ॥

अथ प्रपेदे त्रिदशेरशेषैः
क्रूरासुरोपप्लवदुःखितात्मा ।
पुलोमपुत्रीदयितोऽन्धकारिं
तृषातुरश्चातकवत् पयोदम् ॥ १ ॥
दृप्तासुरत्रासखिलीकृतात् स
कथञ्चिदम्भोदविहारमागात् ।
अथाततारात्रि गिरिं गिरिश-
गौरीपदन्यासविशुद्धमिन्द्रः ॥ २ ॥
सङ्क्रन्दनः स्यन्दनतोऽवतीर्य
मेघात्मनो मातलिदत्तहस्तः ।
पिनाकिरम्यालयमुच्चचाल
शुचो पिपासाकुलवज्जलौघम् ॥ ३ ॥
इतस्ततोऽपि प्रतिबिम्बभाजं
विलोकमानः स्फटिकाद्रिभूमौ ।
आत्मानमप्येकमनेकधा स
व्रजन् विभोरास्पदमाससाद ॥ ४ ॥
विचित्ररत्नन्मणिभङ्गिसङ्गि
सौवर्णदण्डं दधतातिचण्डम् ।
स नन्दिनाधिष्ठितमध्यतिष्ठत्
सौधाङ्गणद्वारमनङ्गशत्रोः ॥ ५ ॥
ततः स कक्षाहितहेमदण्डो
नन्दी सुरेन्द्रं प्रतिपद्य सद्यः ।
प्रतोषयामास सुगौरवेण
गत्वा सदोमण्डलमीश्वरस्य ॥ ६ ॥
भ्रूसंज्ञया तेन कृताभ्यनुज्ञः
सुरेश्वरं तं जगदीश्वरेण ।
प्रवेशयामास सुरैः पुरोगः
समं स नन्दी सदनं हरस्य ॥ ७ ॥
स चण्डिभृङ्गिप्रमुखैर्गरिष्ठै-
र्गणैरनेकैर्विविधस्वरूपैः ।
अधिष्ठितं संसदि रत्नवत्यां
सहस्रलोकः शिवमाललोके ॥ ८ ॥
कन्दर्पमूर्द्धस्थमहाहिमूर्द्ध-
रत्नांशुभिर्भासुरमुल्लसद्भिः ।
दधानमुच्चैस्तरसिद्धधातोः
सुमेरुशृङ्गस्य समत्वमाप्तम् ॥ ९ ॥
बिभ्राणमुत्तुङ्गकपालमालां
गङ्गां जटाजूटतलं भजन्तीम् ।
गौरीं तदुत्सङ्गजुषं हसन्ती-
मिव स्वफेनैः शरदभ्रशुभ्रैः ॥ १० ॥
गङ्गातरङ्गैः प्रतिबिम्बितैस्तै-
र्बभ्रूभवन्तं शिरसा सुधांशुम् ।
चलन्मरीचिप्रचयैस्तुषारै-
र्गौरैर्दिगुद्द्योतिनमुद्वहन्तम् ॥ ११ ॥
भालस्थले लोचनमेधमानं
धामाधरीभूतरवीन्दुनेत्रम् ।
युगान्तकालोचितहव्यवाहं
मीनध्वजप्लोषणमादधानम् ॥ १२ ॥
सुबद्धया कण्ठिकयेव नील-
माणिक्यमय्या कुतुकेन गौर्या ।
नीलस्य कण्ठस्य परिस्फुरन्त्या
कान्त्या महत्याच विराजमानम् ॥ १३ ॥
महार्हरत्नाश्रितयोरुदार-
स्फुरत्प्रभामण्डलयोः समन्तात् ।
कर्णस्थिताभ्यां शशिभास्कराभ्या-
मुपासितं कुण्डलयोश्छलेन ॥ १४ ॥
कालार्दितानां त्रिदशासुराणां
चितारजोभिः परिपाण्डुराङ्गम् ।
महन्महेभाजिनमुन्नताभ्र-
प्रालेयशैलश्रियमुद्वहन्तम् ॥ १५ ॥
पाणिस्थितब्रम्हकपालपात्रं
वैकुण्ठकङ्कालकरालकायम् ।
सुरास्थिकण्ठाभरणं रत्नान्त-

मूलं त्रिशूलं कलयन्तमुच्चैः ॥ १६ ॥
पुरातनीं ब्रम्हकपालमालां
कण्ठे वहन्तं पुनराश्वसन्तीम् ।
उद्गीर्णवेदां मुकुटेन्दुवर्ष-
त्सुधौघसंप्लावनलब्धसंज्ञाम् ॥ १७ ॥
सलीलमङ्कस्थितया गिरीन्द्र-
पुत्र्या नवाष्टापदतुल्यभासा ।
विराजमानं शरदभ्रखण्डं
परिस्फुरन्त्याऽचिररोचिषेव ॥ १८ ॥
दृप्तान्धकप्राणहरं पिनाकं
गजासुरस्त्रीविधवात्वहेतुम् ।
करेण गृह्णन्तमसह्यशूलं
पुरासुरप्रोषणकेलिकारम् ॥ १९ ॥
भद्रासनं काञ्चनपादपीठं
महार्हमाणिक्यविभङ्गिचित्रम् ।
अधिष्ठितं चन्द्रमरीचिगौरै-
रुद्वीज्यमानं चमरैर्गणाभ्याम् ॥ २० ॥
शस्त्रास्त्रविद्याभ्यसनैकसक्तैः
सविस्मयैरेत्य गणैः सुदृष्टम् ।
संवीज्यमानेऽम्बिकयाञ्चलेन
सानन्दनिर्दिष्टदृशं कुमारे ॥ २१ ॥
॥ कुलकम् ॥
तथाविधं शैलसुताधिनाथं
पुलोमपुत्रीदयितो निरीक्ष्य ।
आसीत् स्वयं क्षोभपरोऽन्तकस्य
मनो नहि क्षुभ्यति धामधाम्नि ॥ २२ ॥
विकस्वराम्भोजवनश्रिया तं
दृशां सहस्रेण निरीक्षमाणः ।
सर्वाङ्गनेत्रो वृषपतिर्बभासे
पुष्पोत्कराकीर्णइवाश्मशाखी ॥ २३ ॥
दृष्ट्वा सहस्रेण दृशां महेश-
मभूत् कृतार्थः खलु तेन शक्रः ।
सर्वाङ्गजानेत्रदलं त्रिपूरं
पुरा प्रियालोकपरं विवेद ॥ २४ ॥
ततः कुमारं कनकाद्रिसारं
पुरन्दरः प्रेक्ष्य धृतास्त्रशस्त्रम् ।
महेश्वरोपान्तिकवर्त्तमानं
शचीजेयाशां मनसा बबन्ध ॥ २५ ॥
श्रीनीलकण्ठ वृषपतिः पुरोऽस्ति
त्वयि प्रणामावसरं च पृच्छन् ।
सहस्रनेत्रोऽत्र भव त्रिनेत्र
दृष्ट्वा प्रसादप्रवणो महेश ॥ २६ ॥
इति प्रबद्धाञ्जलिरेत्य नन्दी
निधाय कक्षामभि हेमदण्डम् ।
प्रसादपात्रं पुरतो भविष्णु-
मध्यन्धकारातिमुवाच वाचम् ॥ २७ ॥
॥ युग्मम् ॥
मुदाऽसुरारिं सुरसङ्घसेव्यं
त्रैलोक्यसेव्यस्त्रिपुरासुरारिः ।
प्रीत्या सुधासारविसारिणेव
ततोऽनुजग्राह विलोकनेन ॥ २८ ॥
किरीटकोटिच्युतपारिजात-
पुष्पेण भक्त्यानमितेन मूर्ध्ना ।
स्वर्गैकवन्द्यो जगदेकदेवं
ननाम देवः स सहस्रनेत्रः ॥ २९ ॥
अनेकलोकैकनमस्क्रियार्हं
महेश्वरं तं त्रिदिवेश्वरः सः ।
भक्त्या नमस्कृत्य कृतार्थतायाः
पात्रं पवित्रं परमं बभूव ॥ ३० ॥
सुभक्तिभाजामधिपादपीठं
प्रीताशिभिर्नम्रतरैः शिरोभिः ।
ततः प्रणेमुः पुरतः सुराणां
गणाः सशक्राः क्रमतः स्मरारिम् ॥ ३१ ॥
गणोपनीते प्रभुणोपदिष्टे
नृपासने हेममये पुरस्तात् ।
प्रापोपविश्य प्रमदं सुरेन्द्रः
प्रभुप्रसादोहि मुदे न कस्य ॥ ३२ ॥
क्रमेणचान्येऽपि विलोकनेन
सम्भाविताः सस्मितमीश्वरेण ।
उपाविशुस्तोषविशेषमाप्ता

दृग्गोचरे तस्य पुरः समेताः ॥ ३३ ॥
अथाह देवो बलवैरिमुख्यान्
गीर्वाणमुख्यान् करुणार्द्रचेताः ।
कृताञ्जलीकानसुरैर्विधूतान्
ध्वस्तप्रियान् शीर्णमुखानवेत्य ॥ ३४ ॥
अहो बतानन्तपराक्रमाणां
दिवौकसां वीरवरायुधानाम् ।
हिमोदबिन्दुम्लपितस्य किं वः
पद्मस्य दैन्यं दधते मुखानि ॥ ३५ ॥
स्वर्गौकसः स्वर्गपरिच्युताः किं
सुपुण्यराशौ सुमहत्तरेऽपि ।
चिह्नं चिरोढं बत यूयमेते
निजाधिपत्वस्य परित्यजध्वम् ॥ ३६ ॥
दिवौकसो देवगृहं विहाय
मनुष्यसाधारणतामवाप्ताः ।
यूयं कुतः कारणतश्चरध्वे
महीभृतो मानधना महान्तः ॥ ३७ ॥
अनन्यसाधारणसिद्धसुखैः
सुदैवतं धाम निकामकामम् ।
कस्मादकस्मान्निरगाद्यमाद्ये-
श्चिरार्जितं पुण्यमिवापवादात् ॥ ३८ ॥
सुराः पुरारातिपुरः सुवर्णं
समीयुषां सामसमातुराणाम् ।
तद्भूतलोकत्रयजित्वरात् किं
महासुरात् तारकतो विरुद्धम् ॥ ३९ ॥
पराभवं तस्य महासुरस्य
निषेद्धुकामोऽहमलंभविष्णुः ।
दावानलप्लोषविपत्तिमन्यो-
ऽरण्यस्य हर्तुं जलदात् प्रभुः किम् ॥ ४० ॥
इतीरिते मन्मथमर्दनेन
सुराः सुरेन्द्रप्रमुखा मुखेषु ।
सान्द्रप्रमोदाः सुचिरस्मितेषु
दधुः श्रियं सत्वरमाश्वसन्तः ॥ ४१ ॥
ततो गिरीशस्य गिरां विताने
जगाद लब्धेऽवसरे सुरेशः ।
भवन्ति वाचोऽवसरे प्रयुक्ता
ध्रुवं प्रविस्पष्टफलोदयाय ॥ ४२ ॥
ज्ञानप्रदीपेन तमोऽपहेना-
विनश्वरेणास्खलितप्रभेण ।
भूतं भवद्भावि च यच्च किञ्चित्
सर्वज्ञ सर्वं तव गोचरस्तत् ॥ ४३ ॥
दुर्वारदोर्दुर्मददुःसहेन
यत् तारकेणामरघस्मरेण ।
तदीश नन्वात्मपदान्निरस्ता
वयं दिवोऽमी बत किं न वेत्सि ॥ ४४ ॥
विधेरमोघं सुवरप्रसाद-
मासाद्य सद्यस्त्रिजगज्जिगीषुः ।
सुरान् स जम्भारिमुखान् प्रचण्ड-
दोर्दण्डदण्डो मनुते तृणाय ॥ ४५ ॥
स्तुत्या पुरास्माभिरुपासितेन
पितामहेनेति निरूपितं नः ।
सेनापतिः संयति दैत्यमेनं
पुरा स्मरारातिसुतो निहन्ति ॥ ४६ ॥
अथासतोऽनन्तरमद्ययावत्
सुरा अदान्तस्य पराभवार्त्तिम् ।
विषेहिरे तस्य हृदन्तशल्य-
माज्ञानियोगं चिदिवौकसोऽमी ॥ ४७ ॥
त्रैलोक्यलक्ष्मीहृदयैकशल्यं
समूलमुत्खाय महासुरं तम् ।
अस्माकमेषां पुरतो भविष्णु-
र्दुःखापहारं युधि यो विधत्ते ॥ ४८ ॥
महाहवे नाथ तवास्य सूनोः
शस्त्रैः शितैः कृत्तशिरोधराणाम् ।
महासुराणां रमणीविलापै-
र्दिशो दशैता मुखरीभवन्तु ॥ ४९ ॥
महारणक्षोणिपशूपहारे
कृतेऽसुरे तत्र तवात्मजेन ।
बन्दिस्थितानां सुदृशां करोतु
वेणिप्रमोक्षं सुरलोक एषः ॥ ५० ॥
इत्थं सुरेन्द्रे वदति स्मरारिः

Digitized by Google

सुरारिदुश्चेष्टितजातरोषः ।
कृतानुकम्पस्त्रिदशेषु तेषु
भूयः स भूताधिपतिर्बभाषे ॥ ५१ ॥
अहो अहो देवगणाः सुरेन्द्र-
मुखाः शृणुध्वं वचनं ममैते ।
विचेष्टते शङ्कर एष देव-
कार्याय सज्जः सकलं शुभाय ॥ ५२ ॥
पुरा मयाकारि गिरीशपुत्र्याः
प्रतिग्रहोऽयं नियतात्मनापि ।
तत्रैकहेतुः खलु तद्भवेन
वीरेण यद्धन्यत एष शत्रुः ॥ ५३ ॥
अथोपपन्नं तदितो नियुज्य
कुमारमेनं पृतनापतित्वे ।
निहन्तु शत्रुं सुरलोकमेष
पुनातु भूयोऽपि सुरैः सुरेन्द्रः ॥ ५४ ॥
॥ कुलकम् ॥
इत्युदीर्य भगवान् स्वमात्मजं
घोरसङ्गरमहोत्सवोत्सुकम् ।
नन्दनेहि जय देवविद्विषः
संयतीति निजगाद शङ्करः ॥ ५५ ॥
शासनं पशुपतेस्तु कुमारः
स्वीचकार शिरसा विनतेन ।
सर्वथैव पितृभक्तिरतानां
मेषएव परमः खलु धर्मः ॥ ५६ ॥
असुरयुद्धविधौ विबुधेश्वरे
पशुपतौ वदति प्रियमात्मकम् ।
गिरिजया मुमुदे सुतविक्रमे
न किमु नन्दति संयति वीरसूः ॥ ५७ ॥
सुरपरिवृढः प्रौढं वीरं कुमारमुमापते-
र्बलवदमरारातिस्त्रीणां दृगञ्जनगञ्जनम् ।
जगदभयदं सद्यः प्राप्य प्रमोदपरोऽभवद्
ध्रुवमभिमते कोवा पूर्णे मुदा नहि माद्यति ॥ ५८ ॥
इति कुमारसम्भवे कुमारसेनापत्यवर्णनं नाम
द्वादशः सर्गः ॥ १२ ॥

परिभाषेन्दुशेखरटिप्पणीपरीक्षायाः

भूमिका

अथ तत्रभवता भगवता पाणिनिना स्वीयशास्त्रेऽनुपनिबद्धान्यपि तच्छास्त्रीयप्रवृत्तिनिवृत्तिप्रयोजकतया भगवतोऽनुमतत्वेनानुमितानि भगवता महाभाष्यकारेण स्थानेस्थाने कण्ठतउट्टङ्कितानि कतिपयवचनानि तान्त्रिकैः परिभाषापदेन व्यवह्रियन्ते । अथच सर्वेषां तेषां तत्त्वतो ज्ञानसंपादनस्य प्रकृतदर्शने व्युत्पित्सूनां परमावश्यकतया तस्य च सकलमहाभाष्यकैय्यटपर्यालोचनमन्तरा दुर्घटत्वेन तदालोचनस्यातिदुष्करोपायत्वेनायासासहिष्णूनां न घटेत तज्ज्ञानसंपादने प्रवृत्तिरतः प्रतिपित्सूनां प्रतिपत्तिसौकर्याय तदेतत् परिभाषाजातं भाष्यतउद्धृत्योदाहरणप्रत्युदाहरणाद्युपन्यासपुरःसरं श्रीमत नागेशेन परिभाषेन्दुशेखरनामकग्रन्थेनोपन्यबन्धि । सचायं ग्रन्थः सङ्क्षिप्तोऽपि सारभूतार्थप्रतिपादकः कृत्स्नपरिभाषार्थतात्त्विकज्ञानसंपादकइति परमादरपुरःसरं पण्डितानां पठनपाठनप्रभृतिव्यवहारविषयो बभूव । ततश्च साम्प्रतिकानां दौर्भाग्यवशाद् बहवो विबुधाः स्वस्ववाग्वैभवमविभावयन्तो विविधा व्याख्या व्यरचयन् । तथाहि । प्रथमतः पायगुण्डोपनामकवैद्यनाथो गदाम् । १ । भीमाचार्यः परिभाषार्थमञ्जरीम् । २ । शङ्करः शाङ्करीम् । ३ । मन्युदेवोऽप्येकाम् । ४ । सदाशिवभट्टश्चैकाम् । ५ । विष्णुभट्टश्चैकाम् । ६ । भैरवमिश्रश्चैकाम् । ७ । राघवेन्द्राचार्यस्त्रिपथगाभिधाम् । ८ । कश्चिद् गौडदण्डी प्रदर्शितव्याख्याभ्यएव कतिपयपङ्क्तीरुद्धृत्यैकाम् । ९ । अन्यः कश्चन सङ्ग्रहाभिधाम् । १० । कश्चन मैथिलोऽप्राप्तसमीचीनव्युत्पत्तिरध्ययनकालएव गुरुबोधितार्थाभिज्ञानाय कथञ्चिदुद्ग्रन्थनग्रथितामम्बाकर्त्रीति प्रसिद्धाम् । ११ । उमापतिरिन्दिरापतिम् । १२ । स्वोदयं कर्तुकामेनोदयङ्करेणापि प्रकृतं निबन्धमसमीचीनमभिमन्वानेनाध्यायत्रयात्मकः परिभाषाप्रदीपार्चिरभिधोऽभिनवो ग्रन्थः प्राणायि । १३ ।

एतैश्च व्याख्यातृभिर्व्याख्येयपदे मुनिव्रतैर्हितशत्रुभिरिव निःसारबहुलैर्व्याख्यानैः परिभाषेन्दुशेखरोऽनीयतानुन्नतिम् । यस्त्वासु कुत्रचित् सारभूतोंऽश उपलभ्यते स प्रायः स्थलान्तरे नागेशकैय्यटोपाध्यायप्रभृतिप्राचीननिबन्धकृदुपनिबद्धएवोपलभ्यते । गतानुगतिकन्यायेन च तद्ग्रासङ्कुशालिनामसारवाग्व्यापारव्यापृतमनस्कानां मुधैवायुःक्षयमन्तरा न कापि समीहितफलसिद्धिरनुभूयते । एतेषां च लेखनदर्शनादिभिरेव सकलकालचयेण परमव्युत्पादकमहाभाष्यकैयटादिप्राचीनग्रन्थानामनभ्यासेन दिनेदिने दुर्बोधएव वर्द्धते । ततोऽधुनाऽस्माभिर्दोषज्ञतोषपोषायाध्येतॄणामनायासतो बोधाय समस्त-

व्याख्यानां सारासारविवेकपूर्वकं गुणदोषप्रकाशनाय च यथाशक्ति पराक्रम्यते । आशास्महे चात्रातः सूक्तिमौक्तिकग्राहिणां बुद्धिमतां समादरम् । तत्रच सारासारविवेकपाटवप्रदानेन भगवता परमेश्वरेण वयमनुग्राह्यामहइति बद्धाञ्जलिपुटाः सन्तः प्रार्थयमानाः सर्वज्ञं सर्वशक्तिमन्तं सर्वाभीष्टप्रदं श्रीमन्तं परमेश्वरमुपास्महइति ॥

॥ श्रीपरमेश्वराय नमः ॥

परिभाषेन्दुशेखरटिप्पणीसारासारविवेकः ॥

॥ प० ॥ नत्वा साम्बशिवं ब्रह्म नागेशः कुरुते सुधीः ।
बालानां सुखबोधाय परिभाषेन्दुशेखरम् ॥ १ ॥

मङ्गलादीनीत्यादिवृद्धिसूत्रादिस्थभाष्येण प्रथनादिफलोद्देशेनानुष्ठेयतया बोधितं मङ्गलमाचरन् प्रेक्षावत्प्रवृत्त्युपयोग्यनुबन्धचतुष्टयमपि बोधयन्नुपश्लोकते । नत्वेति । जगज्जननकर्तृत्वप्रवृत्तिनिमित्तकेन प्रकृते धर्मपरेणाम्बापदेन बहुव्रीहौ साम्बपदस्य जगदुत्पादकत्वविशिष्टोऽर्थः । शेतेऽस्मिन् सर्वं जगदिति व्युत्पत्त्या शिवपदस्य जगल्लयाधिकरणं जगदव्यक्तमर्थः । अन्तर्भावितण्यर्थाद् बृंहेर्मनिना व्युत्पन्नस्य ब्रह्मशब्दस्य जगत्पालकोऽर्थः । तथाच साम्बेत्यादिपदत्रयेण जगदुत्पत्तिस्थितिलयकारणस्य परमेश्वरस्य नतिकर्मत्वं बोधितम् । नागेशइति । आत्मनामेत्यादिनिषेधात् स्वनामोल्लेखोऽत्रायुक्तइति तु न शङ्क्यम् । तन्निषेधउच्चारणार्थस्य ग्रहेरुपादानेन तस्योच्चारणविषयकत्वेऽपि लेखने दोषप्रतिपादकत्वाभावात् । अतएव गोनर्दीय आह भट्टोजिदीक्षितकृतिरित्यादि तत्रतत्र ग्रन्थकृतां लेखनं शैलीपरिशीलितं लक्ष्यते । कुरुतइति । बालसमवेतसुखबोधजन्यापूर्वस्यैव प्रकृतक्रियाफलत्वेनाभिप्रेततया तस्य कर्तृगामित्वादात्मनेपदम् । सुधीरिति । अनेन स्वस्य ग्रन्थकर्तृत्वसामर्थ्यं सूच्यते । बालानां भाष्यकैय्यटाद्याकरग्रन्थतः परिभाषार्थनिर्णयासमर्थानां भाष्यादितः परिभाषार्थनिर्णयायासासहिष्णुत्वे सति परिभाषार्थग्रहणशक्तिमत्त्वं तत्त्वमिति पर्यवसितम् । सुखबोधाय स्तोकायासेनैव निखिलपरिभाषार्थतत्त्वबोधाय परिभाषेन्दुशेखरं ग्रन्थम् । अत्र बालानामित्युक्त्या निरुक्तपरिष्कृतबालत्वविशिष्टानामधिकारित्वं सुखबोधयेत्युक्त्या च तादृशसुखबोधस्य प्रयोजनत्वं परिभाषेन्दुशेखरमित्युक्त्या परिभाषार्थनिर्णयस्य विषयत्वं चेत्यनुबन्धत्रितयं सूचितम् । सम्बन्धरूपानुबन्धश्च स्फुटत्वान्नोक्तः । अनुबन्धत्वं च प्रवृत्तिप्रयोजकज्ञानविषयत्वम् । अधिकारिणः प्रवृत्तिप्रयोजककृतिसाध्यत्वप्रकारकज्ञानविषयतया प्रयोजनविषययोश्च तादृशेष्टसाधनत्वप्रकारकज्ञानविषयीभूततया च लक्षणसमन्वयः ।

यत्त्वत्र मन्युदेवेन ।

स्वनामग्रहणस्य स्वकीर्त्यनुवृत्तिफलकतया शिष्टाचारानुगृहीतत्वात् तद्बाधकानुमितस्मृतिवाक्येन विशेषेण सामान्यस्यास्य निषेधवाक्यस्य सङ्कोचादस्य स्वकीर्त्यनुवृत्तिप्रयोजकस्वनामग्रहणातिरिक्तविषयकत्वं कल्प्यतइति नात्र दोषइत्युक्तम् ।

तन्न सुन्दरम् ।

विषयभेदेन बाध्यबाधकभावासम्भवात् । तथाहि । आत्मनाम न गृह्णीयादितिनिषेधेन हि स्वनामग्रहणस्य दुःखसाधनत्वं बोध्यते नतु स्वकीर्त्यनुवृत्त्यप्रयोजकत्वमपि निरुक्तशिष्टाचारानुमितस्वकीर्त्यनुवृत्तिकामः स्वनाम गृह्णीयादितिवाक्येन तु स्वनामग्रहणस्य स्वकीर्त्यनुवृत्तिसाधनत्वमुच्येत नतु दुःखाजनकत्वमपि । नहि स्वकीर्त्यनुवृत्तिप्रयोजकत्वदुःखजनकत्वयोरस्ति कश्चिद् विरोधः न चासति विरोधे बाध्यते कोऽपि । दृष्टान्तेऽपि क्रतूपकारकत्वदुःखजनकत्वयोर्विरोधाभावेन भूतहिंसानिषेधकवाक्ये प्रकरणान्तरस्थेनाग्नीषोमीयपश्वालम्भनबोधकवाक्येन सङ्कोचाभावएव वक्तुमर्हः । रोगविशेषमपचिकीर्षोः सुरापानादिविधायकेन चिकित्साशास्त्रीयवाक्येन धर्मप्रवर्तकमन्वादिसुरापाननिषेधकवाक्यार्थबाधाभाववत् । अतएव यागीयपशुवधजन्यदुरितदूरीकरणाय प्रायश्चित्ताचरणमपि शिष्टव्यवहारविषयो दृश्यते ।

वस्तुतस्तु स्वकीर्त्यनुवृत्त्युद्देशेन स्वनामोच्चारणस्य शिष्टाचारविषयत्वमेवाप्रामाणिकमिति ध्येयम् ।

यदपि तेनैवोक्तम् ।

निषेधोऽयं पारिभाषिकनामविषयको न यौगिकनामविषयकः । नागेशइति हि यौगिकं नामेति न दोषइति ।

तदपि न ।

पारिभाषिकनामान्तरानुपलम्भात् । अनेनैव सर्वत्र व्यवहारात् सङ्कोचे प्रमाणाभावाच्च ।

यदपि राघवेन्द्राचार्याः कूपखानकन्यायेन समाहितवन्तस्तदपि न मनोहरम् ।

मङ्गलस्य शिष्टाचारविषयत्वहेतुकानुमानप्रमितवचनेन ग्रन्थसमाप्त्यादिप्रतिबन्धकदुरितनिवर्तकत्वस्य क्लृप्तत्वेऽपि स्वनामग्रहणादिजन्यदुरितनिवर्तकत्वे मानाभावात् । अतएव यागीयपशुहिंसादिजन्यदुरितदूरीकरणाय यागान्ते प्रायश्चित्तान्तराचरणं शिष्टानां सङ्गच्छते । अन्यथा यागजन्यापूर्वेणैव तद्दूरीकरणसम्भवे तदाचरणं निष्फलमेव स्यात् ।

यदप्यत्र मन्युदेवभीमाचार्यौ ।

आत्मानमात्मना हन्तीत्यादावन्तःकरणशरीराद्युपाधिकृतभेदपरिकल्पनवदहं करोमीत्यनुक्त्वा नागेशः कुरुतइत्युक्त्यावाक्यप्रयोक्तृत्वग्रन्थकर्तृत्वरूपोपाधिकृतभेदपरिकल्पनाच्च निषेधविध्युल्लङ्घनमित्याहतुः ।

तदप्यसन्तोषकरम् ।

एवंविधोपाधिकृतभेदपरिकल्पनेन विधिनिषेधाप्रवृत्तिकल्पने देवदत्तेन हतेऽपि गवां सहस्रे नाहं हन्ता किन्तु देवदत्तइति ब्रुवाणस्य दुरितसंसर्गित्वानापत्तेः । निषेधविधिप्रायश्चित्तविधीनां निर्विषयत्वप्रसङ्गाच्च ।

यदपि च भीमाचार्यः ।

घोषवदादीत्यादिविधिबोधितनामग्रहणएव स निषेधः । अतएव निषेधे श्रेयस्कामइति विशेषणं सङ्गच्छते । इत्याद्यवादीत् ।

तदप्यसत् ।

निषेधशास्त्रघटकनामपदार्थे विधिबोधितनामभिन्नातिरिक्तत्वेन सङ्कोचे प्रमाणाभावात् । निषेधस्य सामान्यतो नामग्रहणविषयकत्वेऽपि श्रेयस्कामइतिविशेषणवैयर्थ्योपपादनस्य दुर्निरूपत्वाच्च ।

यदपि च सएव ।

आपत्कालादिष्वित्यादिपदेन ग्रन्थारम्भसन्ध्यावन्दनप्रोषिताभिवादनानि गृह्यन्तइत्याह ।

तदपि न चारुतरम् ।

सन्ध्यावन्दनाभिवादनयोर्मन्वादिवाक्यान्तरैकवाक्यतयादिपदजन्यबोधीयतात्पर्यविषयत्वकल्पनेऽपि ग्रन्थारम्भस्य तत्त्वे मानाभावात् । गोनर्दीय आहेत्यादिषु तटस्थोक्तित्वस्यापि सम्भवात् ।

यदपि ।

भाष्यकारस्यापि मुनित्वाविशेषेण तदुक्त्या षोडशिग्रहणाग्रहणयोरिव पर्यायपरिकल्पनमित्यपि सएव समादधौ ।

तदप्यकिञ्चित्करम् ।

तदुक्तेः शब्दसाधुत्वानुशासनप्रवृत्तिनिवृत्त्युपयोगित्वेऽपि धर्मशास्त्रप्रवृत्तिनिवृत्तिप्रयोजकत्वे प्रमाणाभावात् । मन्वादीनामेव तत्र प्रामाण्यात् । अन्यथा सीतायाः पतये नमः क्लीबे च पतिते पतावित्यादिमुनिवाक्यानुमितवाक्येन घिसंज्ञाविधायकशास्त्रस्यापि पर्यायत्वापत्त्या लोकेऽपि तादृशशब्दानां साधुत्वापत्तिः । अतएवाशुद्धशब्दोच्चारणेऽपि तपोमाहात्म्येन मुनीनां न दोषइत्येवोक्तं शेखरे । एवमत्र महाभाष्यकारस्य स्वनामग्रहणे दोषाभावकल्पनेऽपि तत्प्रयोगस्यात्मनामग्रहणे दोषाभावइत्येतदर्थकवचनानुमापकत्वस्य दुर्वचत्वादिति दिक् ।

काशीस्थराजकीयपाठशालायां
धर्मशास्त्राध्यापको राजारामशास्त्री
सांख्यशास्त्राध्यापकसहकारी बालशास्त्री

॥ श्रीगणेशाय नमः ॥

गौतमेन महर्षिणा प्रणीतस्य न्यायशास्त्रस्य सुपरिष्कृतविचारेण व्यवस्थापितानां सिद्धान्तनिर्मलरत्नानां प्राप्तिस्थानभूततयाकरग्रन्थमूर्द्धन्यो न्यायचिन्तामणिर्नाम गङ्गेशोपाध्यायेन मिथिलादेशालंकरणभूतेन प्रणीतः प्रथमं चक्रवर्तिप्रगल्भपक्षधरमिश्रसार्वभौममथुरानाथप्रभृतिभिर्बहुभिर्मैथिलपण्डितैर्विस्तृतं व्याख्यातः पश्चाद् रघुनाथशिरोमणिना नैयायिकप्रवरेण भवानन्दजगदीशगदाधरादिमहानैयायिकव्याख्याततया मणिदीधितिनामिकया व्याख्यया विशदीकृत इदानीन्तननैयायिकपण्डितैः पुस्तकाभावात् कार्त्स्न्येन न परिशीलितः क्वचिदेव देशे कस्यचिदेव पण्डितस्य पुस्तकालय उपलभ्यत इत्युत्तमतमोऽप्यत्यन्तविरलप्रचारः संजातः ।

सोऽयं निबन्धराजो दशसहस्रश्लोकमितोऽप्यल्पेनैवांशेन बाधान्तानुमानखण्डात्मकेन कलिकातानगरे प्रकाशं प्राप्य तत्रत्यानामनुमानभक्ततार्किकाणां महान्तमुपयोगमसाधयत् ।

अतोऽहं काशीविद्यासुधानिधिचकोरान् प्रार्थये तैरस्य ग्रन्थस्य मुद्राद्वारेण प्रकाशने प्रयतितव्यमिति । अस्मिंश्च पत्रे तस्य प्रकरणशोऽपि निवेशो दुःशकोऽतिविततत्वात् । परन्तु यदि केऽपि भारतीयविद्यारसिका एतद्ग्रन्थसुवेचसंस्करणे बद्धपरिकराः स्युस्तर्हि पुस्तकशोधनटिप्पण्यादिनाध्ययनाध्यापनादिनाच विद्वदिष्टेन कर्मणा काशीस्थजनोऽपि तेषां सहायतां कर्तुमुत्सुको वर्तत इति शम् ।

विठ्ठलशास्त्री

न्यायचिन्तामणौ ये विषया विवेचितास्ते श्रोतृजनबोधाय प्रकाश्यन्ते ।

चिन्तामणिप्रकरणसूचीपत्रम् ।

प्रत्यक्षखण्डे

१ मङ्गलवादः ।

१ प्रामाण्यवादः ।

प्रामाण्यं स्वतो ग्राह्यमिति पूर्वपक्षः ।

प्रामाण्यं परतो ग्राह्यमिति सिद्धान्तः ।

प्रामाण्यं परतउत्पद्यते ।

{ प्रामाण्यं स्वतएवोत्पद्यते ज्ञायतेचेति
प्राभाकरास्तन्निरासः । }

प्रामाण्यस्वरूपविचारः ।

अन्यथाख्यातिर्नास्तीति पूर्वपक्षः ।

अस्तीति सिद्धान्तः ।

प्रत्यक्षलक्षणम् ।

१ प्रत्यक्षविशेषे सन्निकर्षविशेषस्य कारणतास्थापनम्
२ विषयालोकसंयोगस्यालोकोद्भूतरूपस्य चक्षूरूपस्य विषयोद्भूतरूपस्य महत्त्वस्य प्रत्यक्षकारणत्ववर्णनम्
३ वायुर्न प्रत्यक्षः
४ सुवर्णं प्रत्यक्षं तैजसंच
५ मन इन्द्रियमणुच
६ वर्तमानं ज्ञानं मानसम्
७ प्रत्यक्षं द्विविधम्
८ प्रकारो द्विविधः
९ तत्तास्वरूपं स्मृतिप्रमात्वयाथार्थ्ययोर्विचारः

अनुमानखण्डे

व्याप्तिः
व्याप्तिग्रहोपायः
उपाधेर्लक्षणं भेदो दूषकताबीजमाभासाश्च
पक्षतालक्षणम्*
विशिष्टज्ञानं हेतुर्नतु ज्ञानद्वयम्
परामर्शः कारणं नतु लिङ्गम्
केवलान्वय्यनुमानम्
केवलव्यतिरेक्यनुमानम्
अर्थापत्तिर्न मानान्तरम्
न्यायतदवयवलक्षणम्
हेत्वाभासानां लक्षणं भेदाः
ईश्वरानुमानम्
शक्तिर्न कारणत्वादधिका
मोक्षलक्षणम्
ज्ञानान्मोक्षः

उपमानखण्डे

सादृश्यमतिरिक्तमिति पूर्वपक्षः
नातिरिक्तमिति सिद्धान्तः
उपमानं न प्रमाणान्तरमिति पूर्वपक्षः
तत् प्रमाणान्तरमिति सिद्धान्तः
उपमानलक्षणम्

शब्दखण्डे

शब्दलक्षणम्
शब्दप्रामाण्ये
सौगतमतम्
वैशेषिकमतम्
स्वमतम्
जरन्मीमांसकमतम्
प्राभाकरमतम्
आकाङ्क्षा
योग्यता
आसत्तिः
तात्पर्याधीनं शब्दप्रामाण्यम्
वेदस्य पौरुषेयत्वम्
वेदलक्षणम्
पौरुषेयत्वलक्षणम्
शब्दानित्यत्वम्
वेदानां प्रवाहाविच्छेदो नोच्छेददर्शनात्
उच्छिन्नत्वेनाभिमतो वेदो नित्यानुमेयः
प्रलयस्थापनम्
प्रवर्तकज्ञाननिरूपणम्
शक्तिवादे
कार्यान्विते
अन्विते
जातौ
जातिविशिष्टव्यक्तौ
योगरूढविचारः
साधुत्वविचारः
लक्षणा
समासविचारः
आख्यातविचारः
उपसर्गद्योतकताविचारः

॥ श्रीः ॥

कुमारसंभवोत्तरखण्डवर्णयितृपण्डितान् प्रति लेखोऽयम् ॥

यावत्पर्यन्तं कुमारस्य संभवस्तावत्पर्यन्तमेव कुमारसंभवाख्यं काव्यं ज्ञेयम्। सप्तमसर्गान्तं न तु महादेवक्रीडाकुमारोत्पत्तितारकासुरविजयान्तं सप्तदशसर्गान्तम्। अष्टमसर्गतोऽधिकं यत् तत् सर्वं केनचिद्दाक्षिणात्येन कल्पितम्। साहित्यग्रन्थेष्वपि कुत्रापि प्रकाशादिषु तदुदाहरणं नेति क्व कालिदासालङ्कारादिच्छाया क्व चाष्टमसर्गादिरचना बहुधा दिग्विजयकारकमाधवाचार्येत्यभिनवकालिदासेति स्वसंज्ञामभिकथयत एव बहुधा छायास्ति। यदि तारकासुरविजयान्तं तत् काव्यं भवेत् तदा तारकविजयेत्याख्यां तारकवधाख्यां वा शिशुपालवधवल्लभेत वृत्तान्तनाम्ना काव्यं कविनाम्ना चेति श्रव्यकाव्यलक्षणे सम्यगुक्तं साहित्यदर्पणादौ। तारकवधान्तं यदि तत् काव्यं स्यात् तदावश्यमेव तारकवधाख्यां लभेत कुमारसंभवमात्रं तु यावता तदुत्पत्तिसंभव इति हरविवाहान्तं सप्तमसर्गान्तमेव कुमारसंभवेत्याख्यां लब्धुमर्हतीति यावत्पर्यन्तं कुमारस्य संभवस्तावत्तत्र तादृशी संज्ञा घटते हरविवाहेनैव च तत्संभव इति सप्तमसर्गान्तमेव कुमारसंभवकाव्याख्या जातेति। सप्तमसर्गतोऽधिके च तादृशे हरसंभोगतारकवधादिवर्णनपर्यन्ते यदि तत् काव्यं स्यात् तदा च तारकवधेत्याख्यां शिशुपालवधवल्लभेत। संभवश्च कुमारस्य तावत्तत्र हरविवाहेनेति तदन्तस्य कुमारसंभवेत्याख्या युक्ता घटत इति। तथैव मल्लिनाथेन तावत्पर्यन्तमेव विवृतमस्ति। मल्लिनाथात् पश्चाच्च केनाप्याधुनिकेनाष्ट

Digitized by Google

मसर्गतोऽधिकरचना या सा कृतेति स्पष्टमेव । तादृशव्याकरणव्युत्पन्नसप्तमसर्गान्तरचना क्व तादृशान्वितवाक्यरचना च क्व सप्तमान्ततादृशवर्णायथोचितसंघटना चेति सहृदयसंवेद्यमेतत् । अत एव चाष्टमसर्गतोऽधिकसर्गपद्यानि कुत्रापि साहित्यग्रन्थे नैवोदाहृतानि प्राचीनैः । सरस्वतीकण्ठाभरणाभिनवव्याख्यायामेकं यत् पद्यं तत्त्वन्यग्रन्थीयत्वेनापि तादृशपद्यस्य तत्रोदाहरणं स्यात् । यावत् कालिदासकाव्यव्याख्यातृमल्लिनाथेन सप्तमसर्गान्तमेव व्याख्यातं नैव ततोऽधिकस्य कापि चर्चा शङ्का वा तेन धृतेति । यदि कालिदासकृतं सप्तमसर्गतोऽधिकं स्यात् तदा व्याख्यायेत ध्रुवं तेनेति । तत्समये च सप्तमसर्गतोऽधिकचर्चैव न स्थिता । मल्लिनाथपश्चादेतावती रचनाधुनिककृतेति । तदिदं काव्यत्रयं विक्रमादित्यनवरत्नमध्यस्थकालिदासेन ज्योतिर्विदाभरणग्रन्थे लिखितमस्तीति । विक्रमशकवर्षे चैतावति गते २४ सतीति लिखितं ज्योतिर्विदाभरणे । नाटकादिनलोदयादिऋतुसंहारादिग्रन्थास्तु कृता भोजराजनवरत्नस्थकालिदासेनेति । नवरत्नपण्डितसंग्रहो विक्रमादित्यस्यापि भोजस्यापि तथाऽकबरस्यापीति । एवं वाराहादिभेदोऽपि वर्तते । संहितायां ह्ययनांशाङ्कभेदादिति । एवं कालिदासत्रयं तत्तन्महाराजत्रयनवरत्नत्रयपण्डितजनसंकलनादिति । अकबरकालिदासकृतार्यादण्डकचण्डवृष्टिप्रयातेति काव्यप्रकाशविशेषरचनाविशेषश्चेति । एकेन कालिदासेन रचितं दृश्यं श्रव्यं रघुवंशादिकमपीति यल्लिखितं तदपि न सत्यम् । दृश्यकाव्यनाटकनाटिकादिऋतुसंहारनलोदयादिभोजकालिदासकृतिरिति ज्योतिर्विदाभरणे काव्यत्रयेतिलेखेन विक्रमनवरत्नस्थकालिदासीयं काव्यत्रयं ज्योतिर्विदाभरणं चेति । भोजनवरत्नस्थकालिदासस्य दृश्यकाव्यनाटकनाटिकादिश्रव्यनलोदयादिऋतुसंहारान्तानि काव्यानि चेति । अकबरीयनवरत्नस्थकालिदासेन त्वार्याचण्डवृष्टिप्रयातदण्डकस्तवकाव्यप्रकाशविशेषभङ्गिरचनादि चेति कालिदासत्रयम् ॥ शि० ॥

THE SÁHITYA-DARPAṆA,

OR

MIRROR OF COMPOSITION.

(*Continued from page* 56.)

TEXT.

No. 642. When a sentence is formed of words which are the same in a variety of tongues, it is named Bháshá-sama, or Linguistic Sameness.

COMMENTARY.

a. For instance *this stanza* of mine:—

मञ्जुलमणिमञ्जीरे कलगम्भीरे विहारसरसीतीरे ।
विरसासि केलिकीरे किमालि धीरे च गन्धसारसमीरे ॥

"Manjula-maṇi-manjíre kala-gambhíre vihára-sarasí-tíre
Virasási kelikíre kimáli dhíre cha gandhasára-samíre!"

(Dost thou, fair friend, take no delight *now* in the charming anklet of gems sounding with deep melody, in the border of the pleasure-lake, in thy fondled parrot, or in the gentle breeze wafting the perfume of sandal?)

This stanza is the same in the Sanskrit, Prákrit, Śaurasení, Práchí, Ávantí, Nágara, and Apabhranśa *tongues.*

b. In such a sentence however as "Sarasam kaiṇa kavvam" (Sweet is the poem of the poet), though the word *sarasam* is the same in Sanskrit and Prákrit, it is no ornament, for the sameness does not pervade the whole sentence and is therefore not striking.

TEXT.

No. 643. When more than one sense is conveyed by *distinct* words coalescing *into indentity,* it is termed Paronomasia or Coalescence (Ślesha). And this is eightfold according to the coalescence of Letters, Affixes, Genders, Verbal Bases, Inflected Words, Inflections, Numbers and Tongues.

COMMENTARY.

a. For examples in their order :—

प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता ।
अवलम्बनाय दिनभर्तुरभून्न पतिष्यतः करसहस्रमपि ॥

"Pratikúlatámupagate hi vidhau
Viphalatwameti bahusádhanatá
Avalambanáya Dina-bharturabhún
Na patishyatah kara-sahasramapi."

(When Fate (or the moon) stands in opposition, an abundance of resources becomes fruitless: the Lord of day while falling, could not be held up by a thousand rays.)

Here in *vidhau* there is a coalescence of the LETTERS *i* and *u* of the words *vidhi* (fate) and *vidhu* (moon), these letters being changed into *au in the locative.*

b. किरणा हरिणाङ्कस्य दक्षिणश्च समीरणः ।
कान्तोत्सङ्गजुषां नूनं सर्व एव सुधाकिरः ॥

"Kiraṇá Hariṇánkasya dakshiṇaścha samíraṇah,
Kántotsanga-jushám núnam sarva eva sudhákirah."

(The beams of the moon, the breeze of the Southern quarter—all shed ambrosia to those who are seated in the lap of their beloved.)

We have here *the coalescence* of the *kwip* and *ka* AFFIXES* in *sudhákirah* (ambrosia-shedding), *kirah as plural being formed by the addition of the former to the verbal root kṛí, and, as singular, by that of the latter.* Besides, there is also here a coalescence of NUMBERS from the singular and plural numbers assuming the same form in *sarva* † and *sudhákirah.*

c. विकसन्नेत्रनीलाब्जे तथा तन्व्याः स्तनद्वयी ।
तव दत्तां सदा मोदं लसत्तरलहारिणी ॥

"Vikasan-netra-nílábje tathá tanvyáh stanadvayí
Tava dattám sadá modam lasat-tarala-háriṇí."

(Those charmingly bright and tremulous eyes of the slender-bodied *lady* that shine like blue lotuses, and those breasts with the bright and tremulous necklace—may they ever be a source of delight to thee!)

Here we have a coalescence of the neuter and feminine genders in *the epithet lasat-tarala-háriṇí* which, as neuter dual, applies to *vikasan-netra-nílábje* (eyes shining like blue lotuses); and, as feminine singular, to *stanadwayí* (couple of breasts). There is also a coalescence

---

* Both of these form participal adjectives.

† *Sarve* (plural) and *sarvah* (singular) coalesce into *sarva* before एव, according to the rules of 'Sandhi'.

Digitized by Google

of numbers *in the said word and dattám, which latter in the "Parasmai-pada" is the dual imperative of dá (to give,) and, in the "Atmane-pada" the singular imperative of the same verb.*

d. अयं सर्वाणि शास्त्राणि हृदि ज्ञेषु च वक्ष्यति ।
सामर्थ्यकृदमित्राणां मित्राणाञ्च नृपात्मजः ॥

"Ayam sarváṇi śástráṇi hṛidi jṇeshu cha vakshyati,
Sámarthyakridamitráṇám mitráṇáñcha nṛipátmajah."

(This prince will carry all scriptures in his heart and expound them to the wise, will give strength to his friends and destroy the power of his foes.)

Here we have a coalescence of the BASES *vah* (to cut) and *vach* (to tell or expound) in *vakshyati,* and of *kṛit* (to cut) and *kṛi* (to do) in *sámarthyakṛit* (creator, or destroyer of strength.)

e. पृथुकार्त्तस्वरपात्रं भूषितनिःशेषपरिजनं देव ।
विलसत्करेणुगहनं सम्प्रति सममावयोः सदनम् ॥

"Pṛithukártaswarapátram,
Bhúshitanihśeshaparijanam deva,
Vilasatkareṇugahanam,
Samprati samamávayoh sadanam."

(Our houses, O king, are now *literally* alike—*mine* filled with the distressful cries of children, *thine* with vessels of massive gold: *mine* with the whole family lying on the ground, *thine* with unnumbered attendants decorated; *mine* with holes filled with heaps of dust, *thine* thronged with majestic elephants.)

Here there is a coalescence of INFLECTED WORDS *(pada),* not of mere bases, for when the compounds are analysed *in relation to either of the two meanings,* the inflections and composition *(samása) in each compound* are, *in the case of one sense,* different *from those in the case of the other: that is to say not only do different bases coalesce into identity but different case-endings and different varieties of Composition.**

f. And so—

नीतानामाकुलीभावं लुब्धैर्भूरिशिलीमुखैः ।
सदृशे वनवृद्धानां कमलानां तदीक्षणे ॥

"Nítánámákulíbhávam lubdhair bhúri-śilímukhaih
Sadṛiśe vana-vṛiddhánám kamalánám tadíkshaṇe."

[Her eyes are like lotuses full grown in water, agitated by greedy swarms of bees; or (as the same words import) they are like the eyes of wild deer, overwhelmed with a multitude of arrows *shot* by the *eager* hunters.]

—Here, although there is a coalescence in the words *lubdha* (greedy or hunter) and *śilímukha* (bee or arrow), there is *admitted* the coalescence of BASES *only,* because of the sameness of the inflections in either of the coalescent words. Otherwise, *i. e. if we do not recognize a coalesence of bases in such cases as this,* we should have to hold a coalescence of inflected words in every case.

g. सर्वस्वं हर सर्वस्य त्वं भवच्छेदतत्परः ।
नयोपकारसाम्मुख्यमायासि तनुवर्त्तनम् ॥

"Sarvasvam Hara sarvasya tvam bhavachhedatatparah
Nayopakárasámmukhyamáyási tanuvartanam."

[O Hara (Śiva) thou art my all, and busy art thou in liberating all creatures from this *miserable* mundane existence; and thou manifestest thyself in a corporeal form, the very presence of virtue and beneficence.*]

Here in the case of one sense '*Hara*' is an address of Śiva and the inflection is nominal; in the other case it is formed from the root *hṛi* (to plunder) by a verbal inflection So there is here a coalescence of INFLECTIONS; similarly in *bhava* &c. And this sort, though included under the coalescence of AFFIXES, is separately mentioned from its peculiar strikingness, arising from the circumstance of its belonging to inflected forms of nouns and verbs which cannot be obtained by the addition of other affixes *than those that take the name of inflection.*

h. महदे सुरसन्धम्मे तमव समासङ्गमागमाहरणे ।
हर बहुसरणं तं चित्तमोहमवसर उमे सहसा ॥

"Mahade surasandhamme
Tamava samásangamágamáharaṇe,
Hara bahu-saraṇam tam
Chitta-mohamavasara Ume sahasá."!

(O thou light bestowing Umá, foster in me that fondness for the acquirement of knowledge, wished for *even* by the gods, and destroy that mental delusion that, on every occasion, creeps through many *an object.*)

As Maháráshtṛí this is turned into Sanskrit thus:—

मह्यं देहि रसं धर्म्मे तमोवशामाशां संसाराद्धर नः ।
हरवधु शरणं त्वं चित्तमोहोऽपसरतु मे सहसा ॥

(Give me, O consort of Śiva, a love of virtue and destroy our fondness for the world that is born of ignorance. Thou art my refuge, O Goddess! May my mental darkness be at once removed!)

Here there is a coalescence of *the two distinct tongues,* Sanskrit and Mahárásḥṭrí.

TEXT.

No. 644. This (Paronomasia), again, is threefold *viz.,* (1) that 'with division,' (2) 'without division' and (3) consisting of both these sorts *combined.*

COMMENTARY.

a. These three divisions are to be recognized, according to propriety, under the said eight varieties. Or

* For instance, the Bahuvrihi and Tatpurusha in prithukártaswarapátram.

* For men are thus enabled to purify themselves by contemplating thee, who in thy true spiritual nature art beyond human conception. The following amiable advice of a demon to his son is the other import of the stanza:—

"Plunder thou the whole property of all, let murder be thy chief business, drive off benevolence from thy presence and carry on a trade of *perpetual* persecution."

Digitized by Google

we may exemplify *the first two sorts in the following stanza* :—

> येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतो
> यश्चोद्वृत्तभुजङ्गहारवलयो गङ्गांच योऽधारयत् ।
> यस्याहुः शशिमच्छिरो हर इति स्तुत्यंच नामामराः
> पायात् स स्वयमन्धकक्षयकरस्त्वां सर्वदोमाधवः ॥

"Yena dhwastamanobhavena Balijitkáyah purástríkṛito
Yaśchodvṛittabhujangahráravalayo Gangáncha yo 'dhárayat
Yasyáhuh śaśimachchhiro Hara iti stutyancha námámaráh
Páyát sa swayamandhakakshayakaras twám sarvadomádhavah."

(May the Lord of Umá ever preserve thee!—He who destroyed the demon Andhaka and the deity of love, who of old made a weapon of Vishṇu's body, who wears huge serpents for his necklace and bracelets, who bore on his head Gangá *descending from the heavens*, whose head the deities declare ornamented with the moon and whose adorable name they celebrated as 'Hara.')*

Here there is a 'coalescence with division' in *yena dhwastamanobhavena* (which, in the case of the other sense, is to be differently divided thus—*yena dhwastam anah abhavena*); and one 'without division' in *Andhaka-kshaya-karah*. The third variety consisting of those 'with division' and 'without division'—for these may be combined in the same instance—is not separately exemplified, for fear of swelling the work.

b. Here some say—the only case of the Paronomasia of words is the 'Paronomasia with division' wherein two words that are distinct, as being pronounced by distinct efforts through a difference of accent in the shape of the acute or the like, coalesce in analogy to the lac and wood. Whilst that 'without division' is no other than a Paronomasia of Sense. In this the meanings coalesce, or are bound together, analogously to a couple of fruits supported by the same footstalk; for the word, *in relation to both the senses*, is one and the same, as being pronounced by one and the same effort, from the identity of the accent. *And our opinion that these two kinds, with and without division, are Paronomasiæ respectively of word and sense is reasonable indeed*, for an ornament is the ornament of what it is set or founded on: the ornamented and the ornament being recognized, as in every day life, as the place and what is placed."

c. This others do not admit. For here, *in the province of poetical criticism*, the division of Suggestion, Subordinate Suggestion (see Chap. IV), Faults, Excellences and Ornaments as belonging to a word or sense is regulated by their comformity with the word or sense in their presence and absence, or, in other words, by the circumstance of their appearing and disappearing with the word or sense. Nor is the word *Andhaka*, for instance, in *Andhaka-kshaya-karah** indentical *in conveying the two meanings of the demon so called and the Yádava family*, for it is a maxim that a word differs from a difference of sense. Besides, since in the case *of a 'Paronomasia without division'* it is the word that is suggested by the poet's genius as the principal means of producing a striking effect, it is no other than an ornament of word. And this strikingness is wanting in a composition of two dissimilar words, and it is the strikingness that is reckoned as an embellishment. If the figure in question be held an ornament of sense because of its having an eye to the sense, then even such ornaments as Alliteration and the like would have to be ranked as ornaments of sense, for they too, as being intended for *the heightening of* the flavour, look to the sense. If you count it an ornament of sense, from the word's being pronounced by one and the same effort, then in such a case as '*Pratikúlatámupagate hi Vidhau*' (see § 643. *a*) you would be forced to admit an ornament of sense notwithstanding the difference of words. Hence both the cases *of Paronomasia, with and without division*, must be *classed as* ornaments of word.

d. Where however the Paronomasia is not destroyed even by an exchange of words, there it is a case of Paronomasia of sense; as—

"From a slight cause they rise and from a slight cause they fall: O how exactly similar are the conditions of the wicked and the extremity of a balance."

P. D. M.

(To be Continued.)

* A similar representation of Vishṇu is the other import, which need not be rendered here.

* See the foregoing example.

THE ETERNITY OF SOUND;

A DOGMA OF THE MI'MA'NSA'.

By Dr. Ballantyne.

[From the Benares Magazine, August, 1852.]

At page 305, vol. 1, of Mr. Colebrooke's *Collected Essays*, where he is treating of Jaimini's system of philosophy, the *Mímánsá*, we read as follows:—"In the first chapter of the lecture occurs the noted disquisition of the *Mímánsá* on the original and perpetual association of articulate sound with sense." What this dogma means, and why the question forced itself upon Jaimini at the opening of his work, we here propose to consider.

"The object of the Mímánsá"—to employ the words of Mr. Colebrooke,—"is the interpretation of the *Vedas*." As he adds,—"Its whole scope is the ascertainment of duty." This is declared in the opening aphorism, which, interspersing an explanatory comment, we may render as follows:—"Well, then, [O student, since thou hast read the *Vedas* while residing in the family of thy preceptor,] therefore a desire to know *Duty* [which know-

Digitized by Google

ledge, without further aid, thou wilt scarcely gather from the texts with which thy memory is stored, ought now to be entertained by thee]."* But what do you *mean* by "Duty?"—enquires the student. To expound the entire import of the term would be difficult, if not impossible, at the outset; so Jaimini, following the recognised method of laying down a "characteristic" *(lakshaṇa)*, by which the thing, though not fully described, may be securely *recognised*, declares as follows:—"A duty is a matter which may be recognised [as a duty] by the instigatory character [of the passage of Scripture in which it is mentioned]."† As Mr. Colebrooke observes—"Here *duty* intends sacrifices and other acts of religion ordained by the *Vedas*. The same term *(dharma)* likewise signifies *virtue*, or moral merit; and grammarians have distinguished its import according to the gender of the noun. In one (the masculine), it implies virtue; in the other (neuter), it means an act of devotion. It is in the last-mentioned sense that the term is here employed." We may add, in explanation of this, that the discussion of the gender of the word was provoked by Jaimini's choosing to employ the masculine form (as may be observed in the original aphorism given in the note), instead of the neuter. To the query, why Jaimini was guilty of this grammatical solecism, one of his commentators coolly replies,—"take [and be content with] as the reason thereof, the fact that he [Jaimini] is a great sanctified sage,—[and therefore entitled to give the word what gender he pleases]." Arguments of this lofty Pope Hildebrand order, which were doubtless rolled out with unction *et ore rotundo*, in the palmy days of Hinduism, the Bráhmans now-a-days are most amusingly ashamed of;—those of them, at least, who are not prepared to join cordially in a broad grin over the "bumptiousness" of the pretension.

Whilst Jaimini contents himself with giving, in the first instance, a 'characteristic' by which *duty* may be recognised, his commentator supplies an account of its *nature*,—i. e. what constitutes that a Duty to which the characteristic in question belongs. According to him, what constitutes anything a Duty is "the fact of its not producing more pain than pleasure—[or, in other words, its being calculated to produce more pleasure than pain]." The agreement of this with the Benthamite definition of the Useful is noticeable. Another thing which we wish here to take an opportunity of noticing, is a correspondence, in point of terminology, between the systems of the East and of the West. That which constitutes anything what it is, was called by Plato its *Idea*. Aristotle disliked the term; and he sought to convey the same meaning by a term which the Schoolmen rendered *Form*. Bacon adopted the word *Form* in this sense, and the exactly corresponding Sanskrit word—viz. *swarúpa*—is the one here employed, and generally employed, to convey the notion of what is the abiding cause of a thing's being what it is. When a Hindu writer, at the opening of a treatise on anything, says "I shall declare the *lakshaṇa* and the *swarúpa* of the thing in question," he means to say, that he will tell first how we are to recognise the thing as *the* thing that we are talking about, and that he will tell next—*all about it*. The *lakshaṇa* is the mark on the sealed package, by which we recognise it among other packages;—the *swarúpa* is the contents of the package. The reason why we think it worth while to advert to the import of the phraseology in question is this, that we ourselves once took a good deal of pains unprofitably to reconcile these two terms with the "genus" and the "specific difference" which together make up the "definition" according to European logic. The one set of terms and the other, however, belong to different aspects of thought.

To return to Jaimini:—having intimated that the cause of our knowing anything to be a duty was simply an instigation, in the shape of a passage of Scripture holding out the promise of a reward for the performance of a given act, he next thinks proper to show how nothing else *could* be the evidence for it. "An examination," he says, "of the cause of [our recognising] it [—viz. a duty,—is to be made];"*—and he explains, as follows, how our organs of Sense cannot supply the evidence of it. "When a man's organs of sense are rightly applied to something *extant*, that birth of knowledge [which then takes place] is Perception,—[and this Perception is] *not* the cause [of our recognising a duty], because the apprehension [by the senses] is of what is [then and there] existent, [—which an act of Duty is *not*]."† Since Perception is not the evidence of a thing's being a duty, it follows, according to the commentator, that Inference, or Analogy, or anything else, "which has its *root* in Perception," cannot be the evidence; and, consequently, precept—express or implied—is the only evidence of a thing's being a duty.

But here the doubt presents itself, whether the evidence in favour of a thing's being a duty may not be as fallacious as is the evidence of the senses. According to the objector,—"after words and meanings have presented themselves, since the connection between the two is one devised by *man*,—consisting, as it does, of the conventions which man has devised,—therefore, as sense-knowledge wanders away from truth when it mistakes

* अथातो धर्मजिज्ञासा ॥ १ ॥ † चोदनालक्षणो धर्मः ॥ २ ॥

* तस्य निमित्तपरीष्टिः ॥३॥

† सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं वर्तमानोपलम्भात् ॥४॥

Digitized by Google

mother-o'pearl for silver, so language is liable to part company with veracity in matters of assertion, and consequently the instigatory nature of a passage which, being couched in words, is liable to be misunderstood, cannot be the instrument of certain knowledge in respect of duty." Jaimini, in reply, denies that this doubt affects the evidence of Scripture. "But the natural [—i. e. the *eternal* and not conventional—] connection of a word with its sense, *is* [the instrument of] the knowledge thereof, and the intimation [of Scripture which is] infallible though given in respect of something imperceptible. This [according to our opinion as well as that] of Bádaráyaṇa [the author of the *Vedánta* aphorisms] is the evidence [by means of which we recognise a duty,] for it has no respect [to any other evidence—such as that of sense]."* Assertions in regard to ordinary things, such as the assertion that there is fire in this or that place, meet with credit, because people have opportunities of verifying such assertions by ocular inspection. This is not the case with regard to the assertion that this or that act is a duty; and therefore Jaimini,—in the absence of the possibility of verification,—rests the evidence of testimony, in the case of Scripture, on its *infallibility*. The mention of the name of Bádaráyaṇa (who is the same as Vyása,) in this fifth aphorism goes to prove that Jaimini's work, the *púrva-mímánsá*, was not antecedent in time to Vyása's *uttara-mímánsá*. Mr. Colebrooke's rendering of the terms *púrva* and *uttara* by "prior" and "later" (—see *Essays*, vol. i. pp. 227 and 295—) would seem to have led Dr. Ritter to suppose that Jaimini's system was the earlier in order of publication. Dr. Ritter says (at p. 376. vol. iv. of his History of Philosophy,—Morrison's version—) that "according to Colebrooke, the adherents of this school may be divided into the earlier and the later",—and then he goes on to speak of "the older and genuine Vedánta:"—but in fact the terms "prior" and "later" refer not to time but to the divisions of the *Veda* which Jaimini and Vyása respectively expound,—the latter directing his attention to the *Upanishads*, or theological sections, which stand last in *order*. The word *mímánsá* means "a seeking to understand"——and the *púrva mímánsá* is "a seeking to understand the prior (or ritual portion of the *Vedas*"), while the *uttara-mímánsá* is "a seeking to understand the latter (or theological portion of the *Vedas*)." These two compounds, in short, to speak grammatically, are not *Karmadháraya*, but *Shashṭhí-tatpurusha*.

Jaimini, we have just seen, denies that the connection of a word with its sense is dependent on human convention. This he was obliged to do in order to remove the *Vedas* beyond the imputation of that fallibility which attaches to all that is devised by man. The *eternal* connection between a word and its sense, the commentator here remarks, "is dependent on the eternity of *Sound*,"—seeing that if Sound were not eternal, then words which consist of sound could not be eternal, nor consequently could the relation of such to their significations be eternal. Being compelled, therefore, to demonstrate that sound *is* eternal, Jaimini, in pursuance of the established method of procedure, first grapples with the arguments which, *primâ facie*, might seem to countenance an opposite view of the matter. The first objection to the eternity of Sound is its being made by effort. Thus, according to Jaimini, "Some [—viz., the followers of the Nyáya—] say that it is a product, for, in the case of it, we *see* [the effort made for its production]"* Jaimini is far too secure in the strength of his own position, to be under any temptation to stop the mouths of objectors before they have said their say. Half a dozen objections he allows to be tabled against the eternity of Sound, the second of them being "Because of its transitoriness,"†—because "beyond a moment, it is no longer perceived." Moreover, the Naiyáyikas contend, in the third place, that sound is not eternal, because it is stamped as factitious by the usage of language,—"Because of [our employing, when we speak of sound,] the expression '*making*.'"‡ When you talk of *making* something, as a jar for instance, you talk of something that has a commencement, else where were the need of its being *made*? Fourthly, according to the Naiyáyikas, the alleged eternity of Sound is incompatible with its undeniable *multeity*;—and the fact that multeity *does* belong to it is inferred "From its being simultaneously in another person [occupying a different place from some first person whom it also affects]."§ According to the explanation of the scholiast, "The scope of the present objection is this, that an argument which establishes the *eternity* of sound will equally establish its *unity*; and thus we should have to admit that a numerically single and eternal entity is simultaneously present to the senses, both of those near and those far off, —which is an inconsistency." And the Naiyáyikas infer that Sound is not eternal, because, "Also, of the original and altered forms"|| of words,—a condition incompatible with the changelessness of eternity;—and, finally, because, "Also, by a multitude of makers there is an augmentation of it."¶ A thousand lamps, rendering a jar manifest, do not make the jar seem larger than a

* श्रौत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशो ऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात् ॥५॥

* कर्मैके तत्र दर्शनात् ॥६॥ † अस्थानात् ॥७॥

‡ करोतिशब्दात् ॥८॥ § सत्त्वान्तरे यौगपद्यात् ॥९॥

|| प्रकृतिविकृत्योश्च १० ॥ ¶ वृद्धिश्च कर्तृभूम्नास्य ॥ ११ ॥

Digitized by Google

single lamp does; yet a thousand persons uttering a sound in concert, make a proportionately greater sound than one person does; so this must be a case not of manifesting a previously existent sound, but of *making* one.

Before stating the arguments in support of his own view, Jaimini addresses himself to the refutation of the foregoing objections; and antecedently to this also he judiciously seeks to narrow the ground of contention by determining how far both parties *agree*. "But alike," he says, "is the *perception* thereof,"*—according to both views,—both agreeing that the *perception* of Sound is only for a moment, whatever difference of opinion there may be as to sound itself being momentary. But though acquiescent so far as *this* point is concerned, Jaimini cannot allow that the sound which we perceive for the moment was *produced* at the moment. He explains:—"Of this [Sound], while it really exists, the non-perception at another time [than that when the sound is perceived] is due to the non-application [of a manifester] to the object [—the then unheard sound]."† In like manner a jar, seen by a flash of lightning, is not then *produced*, nor does it cease to exist on its ceasing to be perceived. The same jar may be manifested for another moment by a subsequent flash. According to the commentator—"Sound is eternal, [as we are constrained to admit] by force of the recognition that "This is that same letter K" [—viz., the same‡ sound that I heard yesterday, or fifty years ago—], and in virtue of the *law of parsimony*,"—one of the fundamental laws of philosophizing acknowledged by philosophers both of the East and of the West, and implying that we must never assume more causes of a given effect than are sufficient to account for it. Europeans hold that sound is due to vibration. Jaimini's commentator admits that it is not perceived when there is *no* vibration; but with perverse ingenuity, he argues that the absence of vibration, or the stillness of the air, is what prevents us from perceiving the sound, which never ceases to *exist*, whether perceived or not. "The conjunctions and disjunctions [—or undulations]—of the air issuing from the mouth, remove the *still* air which was the obstacle to the perception of sound, and thence it becomes perceptible."

Replying to the objection conveyed in Aph. 8, Jaimini says "This [expression 'making'] means *employing*;"*—we talk of *making* a sound when we only make *use* of it. Then, as for the objection that sound cannot be *one*, because its perception is present to many at a time, he replies, "The simultaneousness is as in the case of the sun;"†—which is explained to mean, that, "As the Sun, which is but one, is seen simultaneously by those stationed in different places, so, like the sun, Sound is a great object, not a minute one"—such as cannot come at once under the cognizance of persons at any distance from one another. Then, as for the objection that sound cannot be eternal since it undergoes changes in the hands of the grammarian, he says—"This [—e. g. the letter *y* coming in the room of *i*—] is another letter, not a modification"‡—of that whose place it takes. As the commentator adds—"The *y* is not a modification of the *i* as a mat is a modification of the straw. If it were so, then, as the maker of a mat is under the necessity of providing himself with straw to make it of, the man that employs the letter *y* would be under the necessity of taking the letter *i* to make it of." Finally, to the objection that Sound must be a product, because there is the more of it the more numerous are those employed in making it, he replies—"It is the increase of *noise* that becomes great,"*—and not of *Sound*.

(To be continued.)

* समन्तु तत्र दर्शनम् ॥ १२ ॥

† सतः परमदर्शनं विषयानागमात् ॥ १३ ॥

‡ In opposition to the Mímánsakas the Naiyáyikas contend that the form of expression 'This is that same letter K' is grounded merely on the fact that the things referred to are of the same *kind*,—just as is the case with the expression 'He has taken the same medicine that I did.' See the *Siddhánta Muktávali*, p. 103; and compare the remarks of Whately (in the Appendix to his Logic) on the ambiguity of the word 'Same.'

* प्रयोगस्य परम् ॥ १४ ॥ † आदित्यवद्यौगपद्यम् ॥ १५ ॥

‡ वर्णान्तरमविकारः ॥ १६ ॥

THE RIJU VYA'KHYA'

BY

PANDIT RÁMAGATI NYÁYARATNA,

OF THE BERHAMPOOR COLLEGE.

We gladly acknowledge the receipt of a copy of the "Riju Vyákhyá," a key to Pandit Íswarachandra Vidyáságara's "Rijupáṭha," Part III, which is the Sanskrit course for the first examination in arts of the Calcutta University. We need not enter into any minute criticism on the literary merit of this little key, which is the production of a Sanskrit Professor and is executed in a scholar-like manner.

It is written in the usual style of commentators, on the model of Mallinátha and others. Its object, as the author tells us in his preface, is to help students who are going up for the Little-go examination. Although candidates for the Little go, whose knowledge of Sanskrit does not extend beyond Vidyáságara's Upakramaṇiká, will find this key almost as difficult as the text of the Rijupáṭha itself, still we think, with the aid of the teacher, it will prove of much service to them in learning Sanskrit parsing, as also in acquiring and retaining a clear comprehension of the sense of the more difficult passages.

The next point that calls for remark is that the book is printed in the Bengali character, and will consequently be of local use only, not for all the university students. As it is

Digitized by Google

printed in the Bengali character it should have been written in the vernacular tongue too, so that at least every Bengali student might have been able to read and understand it.

We have already said that the book is written in the usual style of Sanskrit commentators.

But we wish the author had not travelled entirely on the beaten path of his predecessors. He might have improved a little upon the old mode of commentary writing. To the meanings, derivations, and grammatical construction, which he has given, he should have added biographical, historical and geographical notes.

For instance, while commenting on the history of Yayáti, he should have given a short account of the king, how he came to be cursed by Śukra, what relation he bore to Śukra, and similar matters. Instead of merely substituting the word Śukra, for Uśanas, he should have given a short account of that great Guru of the Daityas. The author should have borne in mind that a biographical and mythological Dictionary is not within the reach of every student.

Again (in page 42) he puts Hastinapura for Gaja-Sahwaya, both words of the same age and of the same meaning, the one receiving little light from the other. This is of as little use to the student as the literal translation of the same word into English, "the city named after the elephant."

In spite of these drawbacks the author of this commentary deserves much credit for his work; and his brother Pandits would do well to imitate him and give the fruits of their labours to the public rather than to confine their erudition to controversial discussion in their literary assemblies.

TO THE EDITOR OF THE PANDIT.

Sir,—Allow me to make a few remarks on the "Plan" published in your July number, for the publication of Sanscrit classics as proposed by Messrs. G. Bühler and F. Kielhorn.

I. The gentlemen appear to ignore what has been done in this respect by native scholars in Calcutta. Excellent editions of most of the works in their list have already issued from the Calcutta Press. If any of them be out of print, let the publishers by all means be encouraged to reprint them. But it appears somewhat strange to attempt, under the name of a new collection, what would simply amount to a *pirating* of Calcutta editions, unless indeed the intention be to add *a great deal more* in the way of *original* notes or translations than I believe is intended by the projectors.

II. It is proposed to give preference to the "oldest commentary" of a work merely *as such*, and to give the reading according to the commentary adopted—i. e. the *oldest commentary* available. Now sir, I am a great reverer of antiquity, and I dare say the oldest will in many cases be the best. But to tie a person to the dicta of a long by-gone age, and to exclude all *Sanscrit criticism* of a comparatively modern date, is not acting in the spirit of improvement.

III. The gentlemen desire the strictest attention to be paid to the rules of Orthography as laid down by Pánini. The principle is very good, but who will decide in difficult cases *what* was Pánini's rule? I do not agree with the great Oxford professor who believes that writing was unknown in Pánini's days, but we have no right to call anything by that name which does not appear from his own Sútras.

The gentlemen add that in "optional cases one principle is to be followed throughout the whole book." I simply ask, *why* curtail a liberty given by Pánini and all his successors? If the principle be carried out to any length, it may require a poet never to write रेजे in case he has once committed himself to रराजे; never to countenance वाचा if he has once patronized वाक्; in fact to repeal all विभाषा by stereotyping one of the alternatives. An editor may restrict *himself* if he prefers a restriction, but why should he trespass on the liberty of others.?

Considering that there is hardly one work unpublished, and that most of the works in the list have had very excellent editions, the stress laid on the "expenses of buying, copying, or collecting manuscripts" appears somewhat unintelligible.

But the projectors say nothing on one important point. Should the revoltingly indecent passages in *Kumára-sambhava*, *Kirátárjuníya*, *Śiśupálavadha*, the last Canto of the *Raghuvaṅśa &c.*, be published under the anthority of a Government Department, or should they be expurgated.?

CALCUTTENSIS.

Now ready.—Price Rs. 16.

A TRILINGUAL DICTIONARY; being a comprehensive Lexicon in ENGLISH, URDÚ, and HINDÍ, exhibiting the syllabication, pronunciation, and etymology of English words, with their explanation in English, and in Urdú and Hindí in the Roman character, by Mathurá Prasáda Miśra, Second Master Queen's College, Benares.

"*Concentrates in itself the utility of the dictionaries of Webster, Richardson, Smart, Worcester, D'Rozario, Shakespear, Forbes and Monier Williams.*"

This work, containing nearly 1350 demy 8vo. pages of closely printed matter, in Brevier type, is too heavy to be sent by book post. It may be procured direct from us, by Bangy Dâk; from any bookseller in Calcutta, Madras or Bombay; or from Trübner & Co., London.

Communications of a literary nature should be addressed to the EDITOR: *all letters on business, to the Proprietors,* MESSRS. E. J. LAZARUS & Co., *to whom Drafts should be made payable.* ADVERTISEMENTS *will be charged for according to the space occupied.*

The PANDIT may be ordered of the Publishers, or through MESSRS TRÜBNER and Co., LONDON.

Annual subscription, in advance, including postage, Rs. 12.

PRINTED AND PUBLISHED BY E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 6. Benares November 1st, 1866. Vol. I.

तत्राहुः । स्वयम्प्रकाशाचेन्मितिरभ्युपेयते तदा निराकारस्य प्रकाशायोगादवश्यमाकारो ऽभ्युपगमनीयइति कश्चायमाकारो ऽवसीयते । तेन प्रकाशएव तदाकारइति युक्तं । किञ्च निराकारत्वे प्रकाशस्य प्रतिकर्म व्यवस्था नोपपद्यते । नहि तस्य सर्वार्थेषु कश्चिद्विशेषः । अर्थाकारत्वेच यदाकारो ऽसौ तस्येति घटते प्रतिविषयं व्यवस्था । तदाहुः । नहि वित्तिसत्तैव तद्वेदना युक्ता । तस्याः सर्वत्राविशेषात् । तांतु सारूप्यमाविशत्स्वरूपतां घटयेत् । अतएवच सारूप्यमेव प्रमाणमिति युक्तं । व्यवस्थापकतयाहि प्रमाणत्वं । सारूप्यंच व्यवस्थाहेतुः । न चक्षुरादिकं । तस्यानेकार्थसाधारणत्वात् । किञ्च वित्तिवेद्ययोः सहोपलम्भो नियतमुपलभ्यते न कदाचिदपि वित्तिमन्तरेण वेद्यस्योपलब्धिः नापि वित्तेर्वेद्यरहितायाः । येच परस्परव्यतिभिन्ना भावास्तेषां न सहोपलम्भो नियतः । नहि पटस्य घटस्यवा नियमेन सहोपलम्भस्तेन भेदादनियमव्याप्तान्नियमो व्यावर्त्तमानो ऽभेदएवावतिष्ठमानो ऽभेदं साधयति । तदुक्तं । सहोपलम्भनियमादभेदो नीलतद्धियोरिति । एतेनैव न्यायेनाहङ्कारास्पदीभूतस्याप्यंशस्य वित्तेरभेदो युक्तः । कथं तर्हि ग्राह्यग्राहकगृहीतयः परस्परविभिन्नाः प्रतिभासन्तइति । अत्राहुर्भेदश्च भ्रान्तविज्ञानैर्दृश्यतेन्दोरिव द्वयं । तथाचापरमुक्तं । परिच्छेदो ऽन्तरा ऽन्यो ऽयं भागो बहिरवस्थितः । ज्ञानस्याभेदिनो भेदप्रतिभासो ह्युपप्लवइति । भेदभ्रान्तौचानादिभेदवासनैव निमित्तं। एतच्च विचारणीयं । सेयमाकारविशेषयोगिनी प्रतीतिः किं बाह्यादर्थादुपजायते किंवा समनन्तरप्रत्ययादिति । तदुक्तं । अथ बुद्धिस्तथाकारा यार्थाकारविशेषणा । सा बाह्यादन्यतोवेति विचारमिदमर्हति । अत्र मन्यन्ते । समनन्तरप्रत्ययमात्रादाकारविशेषो न घटते देशकालप्रतिनियमायोगात् । घटज्ञानानन्तरमपिहि पटज्ञानं जायते ।

यदि घटज्ञानमात्रमेव पटज्ञानोत्पत्तौ हेतुस्तर्हि यदा यत्र पटो नास्ति तत्र तदापि पटज्ञानं स्यात् । नचैवं । अतोस्ति समनन्तरप्रत्ययादप्यधिको ऽर्थो ज्ञानाकारोत्पत्तिहेतुः । किञ्च यथा वीचिकाजलज्ञाने जलार्थिनः प्रवृत्तस्यार्थक्रिया न सम्भवति तथा सम्यग्जलज्ञानादपि स्यात् । नह्यर्थशून्यत्वाविशेषे सम्यग्जलज्ञानमिदमिदंनेति विभागः परिकल्पते तस्माद् बाह्योप्यर्थोस्तीति स्वीकर्त्तुमुचितं । तदप्यपरे आकाशभ्रान्तमिदमिति मन्यन्ते तथाहि । नतावत्क्वचिदर्थस्याकारविशेषोपधायकत्वं साक्षादवगतं । कल्पनीयंतु तत् । तच्च दृष्टे समनन्तरप्रत्ययएव वरं कल्पनीयं । कार्यभूतनान्तरवैलक्षण्ये समनन्तरप्रत्ययस्यैव वैलक्षण्यं हेतुरस्तु । तेन किञ्चिदेव ज्ञानं कस्यचिदेव कुत्रचिदेव कदाचिदेव हेतुरिति प्रतिनियमसिद्धिरिति । बाह्यार्थशून्यविज्ञानवादीचार्थक्रियामपि ज्ञानरूपामेव मन्यते । तेन किञ्चिदेव ज्ञानमर्थक्रियाकारिज्ञानसमर्थं किञ्चिच्च नेत्ययमपि नियमः सिद्धः । अवश्यंचार्थमन्तरेणापि विशेष्याकारज्ञानोत्पत्तौ समनन्तरप्रत्ययस्य सामर्थ्यमास्थेयं । अन्यथा स्वप्नादिष्वाकारप्रतिभासप्रतिनियमो न स्यात् । नच देशान्तरकालान्तरवर्त्तिनामेव तत्र सामर्थ्यं । अविद्यमानस्य सामर्थ्यायोगात् । अनुभवजनितात्संस्कारात्तत्राकारप्रतिनियमइति । अस्तुतावदेवं । योपित्वसावनुभवः सोपि तद्वंज्ञानुभवान्तरजनितात्संस्कारादेवास्त्वित्यनया दिशा किमर्थाभ्युपगमेन । संस्कारोपिच पूर्वकज्ञानविज्ञानपरम्पराहि कार्यकारणभावेन प्रवर्त्तते । तेनार्थभवाकाराद्यञ्चान्तरमुत्पद्यते तद्विशिष्टस्वभावं ततोपि यदपरं तदपि विशिष्टस्वभावमिति विज्ञानस्वभावविशेषएव वासनेत्यादिभिः शब्दैर्व्यपदिश्यते । अर्थक्रियाकारविज्ञानाविसंवादयोग्यंच ज्ञानं प्रमाणमितरच्च नेति प्रमाणाप्रमाणभेदोप्युपपन्नः । तस्माद्विज्ञानान्येवाकारविशेषयोगीनि हेतुफलभावेनानादिसन्तानवाही-

Digitized by Google

नि सन्ति । तदतिरेकी नतु कश्चिदर्थानामेति ।

अत्रोच्यते । यत्तावदुक्तं ज्ञानस्य साकारत्वसिद्धये नार्थसारूप्यमन्तरेण प्रतिकर्मव्यवस्थासिद्धिरिति । तदयुक्तं । नहि कस्यचिदप्यर्थस्य स्वरूपमनुभूतं साकारविज्ञानवादिना । ज्ञानाकारपर्यवसितत्वात्सर्वविज्ञानानां । यस्यच स्वरूपमेव नावसितं न तेनेह कस्यचित्सारूप्यकल्पनं । नचापि ज्ञानाकारोदयवशेनार्थो व्यवस्थाप्यमानः सरूपतया परिकल्पयितुं शक्यते । असरूपादपि कार्यभूताकारोदयोपपत्तेः । तथाहि लाक्षारक्तबीजाङ्कुरावस्थायां विशेषानवगमेपि रक्तकार्यस्योत्पत्तिर्भवति । नहि यदाकारं ज्ञानमुत्पद्यते तदाकारोऽर्थस्तस्योत्पत्तौ निमित्तमिति किञ्चित्प्रमाणं प्रक्रमते । अपिच स्थूलाकारं ज्ञानमुत्पद्यते परमाण्वात्मकश्चार्थः । साधारणाकाराच बुद्धिरसाधारणश्च विषयइति सारूप्यं न भवति । किञ्च सारूप्यमात्रेण वेद्यत्वे वेद्यवेदकव्यवस्था नोपपद्यते । एकार्थविषयाणां सन्तत्यन्तरज्ञानानां वेद्यत्वापत्तेः अथोत्पादकं सरूपंच वेद्यं तथापि धारावाहिकज्ञानेषु पूर्वपूर्वमुत्तरस्य वेद्यं स्यात् । अथाकारविशेषाधायकं वेद्यं एवमपि पूर्वपूर्वविज्ञानमात्रं वेद्यमापद्यते । पूर्वकमेवहि ज्ञानमाकारविशेषोदयेपि कारणमुक्तं । अपिच निराकारत्वे संविद्रां प्रतिकर्मव्यवस्था नानुपपन्ना । अर्थप्रतिबद्धव्यवहारविशेषप्रवृत्त्यनुगुणोहि पुरुषस्य धर्मविशेषः संवेदनं । तच्च स्वयम्प्रकाशं यदर्थप्रतिबद्धव्यवहारानुगुणतया प्रकाशते तत्तदर्थसंवेदनमिति व्यवस्थाप्यते । सहोपलम्भनियमश्च भेदेप्युपपद्यते । यैव सा नीलधीः सैवहि नीलस्योपलम्भः । कथञ्च नीलं नीलमन्तरेणोपलभ्यते । किंचेदमनिष्टमापद्यते । उपलम्भमन्तरेणाप्युपलभ्येतेति । सर्वस्यैवहि वस्तुन उपलम्भमन्तरेणैवोपलम्भ इष्यते । नह्युपलम्भनएवोपलम्भः । किञ्चोपलम्भोपलभ्ययोर्भेदो ऽसहोपलम्भनियमव्याप्तइति नियमस्ततो निवर्त्तमानोऽभेदएवातिष्ठमानस्तेन व्याप्तस्तं गमयेत् । उपलम्भोपलभ्ययोस्तु भेदेपि नियम उपपद्यते । उपलभ्यमन्तरेणोपलम्भासम्भवात् । तेनच तयोर्भेदेपि सहोपलम्भनियमो दृष्टो नाभेदं साधयितुं क्षमः । किञ्च वित्तिवेद्ययोर्भेदेपि सहोपलम्भनियमोस्तीति तस्यापि वित्तिरूपतापत्तेरेकत्वं वित्तेर्हीयते ततश्च भेदएव सहोपलम्भनियम इत्यापद्येत । किञ्च यो वित्तेर्वेद्यस्याभेदमाह सोपितावद्भेदप्रतिभासं नापजानीते तथाच कथमनुमानमुत्पत्स्यते । नहि प्रतीतिविपर्ययेणानुमानस्यात्मलाभोस्ति । यदपि ज्वालादिष्वभेदानुमानं तदपि न प्रतीतिं स्वार्थाद्व्यावर्तयति किन्तु सैवेयं ज्वालेति स्मरणग्रहणरूपे द्वे प्रतीती व्यवस्थितविषये दर्शयति । इहतु भेदप्रतीतिः प्रत्येतव्यादेव व्यावर्त्तनीयेति न तद्विरोधेनुमानमुत्पद्यते । भेदश्च भ्रान्तविज्ञानैर्दृश्येतेन्द्वादिविषद्वयेइतिचानुपपन्नं नहि तत्राभेदो दृश्यते किन्त्वेकस्मिन्नेव चन्द्रमसि नेत्रवृत्तिभेदेन द्वे प्रतीती जायेते । तथेन्द्रियवृत्तिभेदाद्भिन्नेपि चन्द्रमसर्थद्वयविषयप्रतिपत्तिद्वयं व्यवहारविमूढाः प्रवर्त्तयन्तीति तत्तत्रोक्तं । यच्चेदमुक्तं । स्वयम्प्रकाशायाः संविदो ऽभ्युपगताया नीलाद्याकारोस्त्विति । तदप्ययुक्तम् । संविद्विषयस्यार्थस्य भासमानस्याकारस्य संविद्रूपाश्रयणानुपपत्तेः । निराकारा संवित्कथं प्रकाशेतेतिचेत् । निराकारेति किमुक्तं । निःस्वभावेतिचेत् । तन्नास्ति संवित्स्वभावाभ्युपगमात् । अथ न नीलाद्याकारेति । नेयं राज्ञ आज्ञा नीलाद्याकारेणैव प्रकाशितव्यं नान्येनेति । प्रकाशेतु सति यद्यथाभूतं प्रकाशते तत्तथाभूतमित्यभ्युपगमो युक्तः । यच्चोक्तं स्वप्ने ज्ञानस्यैवाकारो ऽवभासतइति । तदप्ययुक्तं । तत्रापिहि बहिरवभासत्वात्संविदः । नच सा बहिर्विषया न सम्भवति । पूर्वानुभवाहितभावनोद्बोधवशेन पूर्वानुभूतवस्तुविषयत्वात् । कथंतर्हि पूर्वानुभूतत्वं नानुसन्धीयते । कथंवा ऽनुभूयमानत्वाध्यवसानमिति । उच्यते । संस्कारोद्बोधनिमित्तेयं स्मृतिरिष्यते । संस्कारोद्बोधश्चादृष्टनिबन्धनः । तस्य सुखदुःखहेतुत्वात् । स्वप्नेपिच सुखदुःखानुभवात् । तेन तावत्येवांशे तददृष्टं संस्कारमुद्बोधयति यावत्येव सुखं दुःखंचोपपद्यते । नचानुभूतांशस्मरणे सुखदुःखोदयइति न तत्र संस्कारोद्बोधो नापि स्मृतिः । अतएव गृहीतिसाधारणरूपावभासमात्रमवशिष्यतइत्यनुभवाध्यवसायोपि समर्थितः । यत्पुनराहुः । जडस्य प्रकाशायोगात्प्रकाशात्मकएवाकारइति । तदपि न चतुरस्रं । जडइति किमुक्तं । अप्रकाशात्मकइति । अप्रकाशात्मकस्यैव प्रकाशव्यतिरिक्तस्य प्रकाशइति प्रकाशाद्वेव सिद्धं । किञ्च चित्रपटज्ञाने नानाभूतानामाकाराणामेकप्रकाशात्मकत्वविरोधादसद्भूतत्वमेवाभ्युपगतं । चित्रावभासेष्वर्थेषु यद्ध्येकत्वं न युज्यते । सैव तावत्कथं बुद्धिरेका चित्रावभासिनीति चोदयित्वोक्तं । इदं वस्तुबलायातं यद्वदन्ति विपश्चितः । यथायथा ऽर्थाश्चिन्त्यन्ते विविच्यन्ते तथातथा । यथायथा ऽऽकारा विचार्यन्ते तथातथा ऽघटमाना विविच्यन्ते शून्या भवन्ति असद्भवन्तीत्यर्थः । एवञ्च ते तावदाकारा असद्भूताः प्रकाशात्मानो न भवन्ति कथं प्रकाशन्ते तथा ग्राह्यग्राहकसंवित्तीनां भेदो ऽत्यन्तासद्रूपः प्रकाशाननुप्रवेशी कथं प्रकाशते । प्रमेयविमर्शात्वास्तु बाह्यार्थापन्हवप्रकारा जातिनिर्णयएव प्रायशो निराकृताइति नेह प्रस्तूयन्ते येपुनर्जाग्रद्दृष्टादिप्रत्ययानां स्वप्नादिप्रत्ययदृष्टान्तेन प्रत्ययत्वादित्यनेन हेतुना बाह्यार्थशून्यत्वं प्रतिपादयन्ति तेषां बाह्यविषयसकलप्रतीतिविरुद्धः पक्षः । दृष्टान्तीकृतस्यापि स्वप्नादिप्रत्ययस्य बाह्यग्राह्यसमर्थनेन हेतोर्विरुद्धत्वं दोषो दृष्टान्तस्यच साध्य-

Digitized by Google

विकलत्वमुद्भावनीयं। तस्मात्स्वयम्प्रकाशत्वे संविदो न बाह्यबाह्यापह्नवदति स्थितं। यत्त्वाहुः। अङ्गुल्यग्रं यथात्मानं नात्मना स्प्रष्टुमर्हति। स्वांशेन ज्ञानमप्येवं नात्मानं ज्ञातुमर्हति। तच्च यदि कर्मकर्तृत्वानुपपत्तिरुच्यते ततो न किञ्चिदवहीयते। नहि वयं कर्मकर्तृभावमभ्युपेमः। यथान्यप्रकाशरूपतया स्वयम्प्रकाशता निवार्यते ततः प्रतीतिविरोधः। किञ्च प्रतीतिबलेनैव यैरेकस्यात्मनः कर्तृकर्मभावो ऽभ्युपगम्यते ते कथमिव संविदो ऽपह्नुवीरन्। अपिच ज्ञानमनुमेयमिष्यते। तदनुमानेच नार्थसत्तामात्रं लिङ्गं तस्य तदविनाभावनियमाभावात्। यथार्थज्ञानमित्युच्यते। तदपि नोत्पत्तिमात्रेण लिङ्गं। अनवभासमाने उत्पन्नानुत्पन्नयोरविशेषात्। नह्यनवभासमानमेव लिङ्गं लिङ्गिनमनुमापयति। नचार्थज्ञानस्य ज्ञानान्तराधीनमवभासनं। ज्ञानान्तरानवगमात्। तस्मादर्थज्ञानं स्वयम्प्रकाशमेवाभ्युपगन्तव्यं। एतेन ये सुखादिवन्मानसप्रत्यक्षं ज्ञानान्तरमेव ज्ञानसद्भावे प्रमाणमाहुस्ते निराकृताः। स्वयम्प्रकाशत्वेनाभ्युपपत्तौ पराधीनकल्पना ऽनुपपन्नेत्युक्तमेव। किंत्वनुमीयते ज्ञानं। ननु न तत्संविदः स्वयम्प्रकाशाया भिन्नमुपलभ्यते। सत्यमतएवानुमीयते। ननु किं तदिति। न तद्विद्मः। संविदुत्पत्तिकारणमात्ममनःसन्निकर्षाख्यं तदित्यकाम्य परितुष्यतामायुष्मता।

प्रमाणफलभावं विविनक्ति। मानत्वे संविदो बाह्यं हानादानादिकं फलं। ज्ञानस्यतु फलं सैव व्यवहारोपयोगिनी। यदि प्रमितिः प्रमाणमिति भावसाधनं मानमाश्रीयते तदा संविदेव मानं स्वं। तस्याश्च व्यवहारानुगुणस्वभावत्वाद्धानोपादानोपेक्षाः फलं। प्रमीयते ऽनेनेति करणसाधने प्रमाणशब्दे आत्ममनःसन्निकर्षात्मनो ज्ञानस्य प्रमाणत्वे तद्भाविनी फलसंविदेव बाह्यव्यवहारोपयोगिनी सती। चापेक्षिकंच करणं मन इन्द्रियमेववा। तदर्थसन्निकर्षोवा मानंचेत्पूर्वकं फलं। यद्वाच साधकतमस्य करणत्वादतिशयस्यच बाह्यापेक्षत्वादालोकाद्यपेक्षमिन्द्रियमेव प्रमाणं तस्य वा विषयसन्निकर्षः तस्यवा मनःसन्निकर्षः प्रमाणं तदापि संविदेव फलं। तदर्थप्रवृत्तत्वात्साधनानां। येपुनः प्रमाणादभिन्नं फलमाहुस्तेच कार्यकारणयोरैक्याभावादेवोपेक्षणीयाः॥

इति श्रीमहामहोपाध्यायश्रीशालिकनाथविरचिते
प्रमाणपारायणे प्रथमः परिच्छेदः समाप्तः ॥

प्रस्थानकालोचितचारुवेषः
स स्वर्गिवर्गैरनुगम्यमानः ।
ततः कुमारः शिरसा नतेन
त्रैलोक्यभर्तुः प्रणनाम पादौ ॥ १ ॥

जहीन्द्रशत्रुं समरे ऽमरेश-
पदं स्थिरत्वं नय वीर वत्स ।
इत्याशिषा तं प्रणमन्तमीशो
मूर्द्धन्युपाघ्राय मुदा ऽभ्यनन्दत् ॥ २ ॥

प्रह्वीभवन् नम्रतरेण मूर्द्धा
नमश्चकाराङ्घ्रियुगं स मातुः ।
तस्याः प्रमोदाश्रुपयःप्रपूर-
स्तस्याभवद्वीरवराभिषेकः ॥ ३ ॥

तमङ्कमारोप्य सुता महाद्रे-
राश्लिष्टगात्रं सुतवत्सला सा ।
शिरस्युपाघ्राय जगाद शत्रुं
जित्वा कृतार्थीकुरु वीरसूं माम् ॥ ४ ॥

उद्दामदैतेयविपत्तिहेतुः
श्रद्धालुचेताः समरोद्धुरः सः ।
आपृच्छ्य भक्त्या गिरिजागिरीशौ
ततः प्रतस्थे ऽभिदिवं कुमारः ॥ ५ ॥

देवं महेशं गिरिजांच देवीं
ततः प्रणम्य त्रिदिवौकसोपि ।
प्रदक्षिणीकृत्य सुरेशमुख्याः
सुराः समस्तास्तमथानुजग्मुः ॥ ६ ॥

अथ व्रजद्भिस्त्रिदशैः सरोषैः
स्फुरत्प्रभाभासुरमण्डलैस्तैः ।
ततो बभासे परितो ऽवकाशो
दिवापि नक्षत्रगणैरिवौघैः ॥ ७ ॥

रराज तेषां व्रजतां सुराणां
मध्ये कुमारो ऽधिककान्तिकान्तः ।
नक्षत्रताराग्रहमण्डलाना-
मिव त्रियामादयितो नभोन्ते ॥ ८ ॥

गिरीशगौरीतनयेन सार्द्धं
पुलोमपुत्रीदयितादयस्ते ।
उत्तीर्य नक्षत्रपथं मुहूर्त्तं
प्रपेदिरे लोकमथो मुनीनाम् ॥ ९ ॥

तं स्वर्गलोकं चिरकालदृष्टं
महासुरत्रासवशंवदत्वात् ।
सद्यः प्रवेष्टुं न विषेहिरे तत्

सर्वं व्यलम्बन्त सुराः समस्ताः ॥ १० ॥
पुरोऽत तत् त्वं न पुरो भवामि
न वः पुरोगोऽस्मि पुरः स्मर त्वम् ।
इत्थं द्विषा तेन कृते स्ववध्ये
स्वर्गं प्रवेष्टुं कलहं वितेनुः ॥ ११ ॥
सुरात्वरालोकनकौतुकेन
मुदा सुविस्मेरविलोचनस्य ।
दधुः कुमारस्य मुखारविन्दे
दृष्टिं द्विषत्साध्वसकातरास्ते ॥ १२ ॥
सहेलहासोद्धुरिताननेन्दु-
स्ततः कुमारः पुरतो निविष्टः ।
स तारकापातमवेक्षमाणो
रणप्रवीरोऽभि सुरानवोचत् ॥ १३ ॥
भीत्याऽलमद्य त्रिदिवौकसोऽमी
स्वर्गं भवन्तः प्रविशन्तु सद्यः ।
अद्यैव मे दृक्पथमेतु शत्रु-
र्महासुरो यः खलु कालदृष्टः ॥ १४ ॥
स्वर्लोकलक्ष्मीकचकर्षणाय
दोर्मण्डलं यस्य बलातिचण्डम् ।
इहैव तच्छोणितपानकेलि-
मह्नाय कुर्वन्तु शरा ममैते ॥ १५ ॥
शक्तिर्ममासावहतप्रचारा
प्रभावसारा सुमहःप्रसारा ।
स्वर्लोकलक्ष्म्या विपदा सहारेः
शिरो हरन्ती दिशतां सुखं वः ॥ १६ ॥
इत्यन्धकारातिसुतस्य दैत्य-
वधाय बद्धोत्सवमानसस्य ।
सर्वे सुविस्मेरमुखारविन्दं
गीर्वाणवृन्दं वचसा ननन्द ॥ १७ ॥
सान्द्रप्रमोदः पुलकोपगूढः
सर्वाङ्गसंलग्नसहस्रनेत्रः ।
तस्योत्तरीयेण निजाम्बरेण
निरुञ्छनं चारु चकार शक्रः ॥ १८ ॥
घनप्रमोदाश्रुपरिप्लुताक्षै-
र्मुखैश्चतुर्भिः प्रचुरप्रमोदः ।

क्रमाम्बुकुम्भे विधिरादिवृद्धः
षडाननं षट्सु शिरःसु हर्षात् ॥ १९ ॥
दिव्यर्षयस्तस्य वचो वरार्थं
तदभ्यनन्दन् किल नारदाद्याः ॥ २० ॥
ततः सुराः शक्तिधरस्य तस्या-
वष्टम्भतः साध्वसमुत्यजन्तः ।
आनन्दयन् वीर जयेति वाचा
गन्धर्वविद्याधरसिद्धसङ्घाः ॥ २१ ॥
सुसाधुसाध्वित्यभितः प्रशस्य
मुदा कुमारं त्रिपुरासुरारेः ।
निरुञ्छनं चक्रुरथोत्तरीयै-
श्चामीकरीयैर्निजवल्कलैश्च ॥ २२ ॥
अथाभिपृष्टे गिरिजासुतस्य
पुरन्दरारातिजयं चिकीर्षोः ।
सुरा निरीयुस्त्रिपुरं दिधक्षो-
रिव स्मरारेः प्रमथाः समन्तात् ॥ २३ ॥
सुराङ्गनानां जलकेलिभाजां
प्रक्षालितैः सन्ततमङ्गरागैः ।
प्रपेदिरे पिञ्जरवारिपूरां
स्वर्गौकसः स्वर्गधुनीं पुरस्तात् ॥ २४ ॥
दिग्दन्तिनां वारिविहारलीलां
कराहतैर्भीमवराहयूथैः ।
अशंसयन् सादरमद्रिपुत्री-
महेशपुत्राय पुरःपुरोगाः ॥ २५ ॥
स कार्त्तिकेयः पुरतः परीतो
वियच्चरैर्लोलतरैस्तरङ्गैः ।
आप्लावयन्तीं मुहुरालवाल-
श्रेणीस्तरूणां गुरुतीरजानाम् ॥ २६ ॥
लीलालसाभिः सुरकन्यकाभि-
र्हिरण्यहंसाभिरुताभिरुच्चैः ।
माणिक्यगर्भाभिरुपाहिताभिः
प्रकीर्णतीरां वरवेदिकाभिः ॥ २७ ॥
सौरभ्यलुब्धभ्रमरावकीर्णै-
र्हिरण्यहंसावलिकेलिलोलैः ।
चामीकरीयैः कमलैर्विनिद्रै-

श्च्युतैः परागैः परिपिञ्जतोयाम् ॥ २८ ॥

कुतूहलाद्द्रष्टुमुपागताभि-
स्तीरे स्थिताभिः सुरकन्यकाभिः ।
अभ्यूर्मिराजीः प्रतिबिम्बिताभि-
र्मुदं दिशन्तीं व्रजतां जनानाम् ॥ २९ ॥

ननन्द शक्रश्चिरकालदृष्टां
विलोक्य सद्यः सुरदीर्घिकां ताम् ।
अपूर्वदृष्टामिव लोकमानः
स विस्मयस्मेरविलोचनोऽभूत् ॥ ३० ॥

उपेत्य तां तत्र किरीटकोटि-
न्यस्ताञ्जलिर्भक्तिपरः कुमारः ।
मीर्वाणवृन्दैः प्रणुतां प्रणुत्य
नम्रेण मूर्ध्ना नमितो ववन्दे ॥ ३१ ॥

प्रपाटितस्मेरसरोजराजिः
पुरः परीरम्भमिलन्महोर्मिः ।
कपोलपालिश्रमवारिहारी
भेजे गुहं स्वःसरितः समीरः ॥ ३२ ॥

ततो जवान्नन्दननामधेयं
लीलावनं जम्भजितः पुरस्तात् ।
विभिन्नभग्नोन्नतशाखिसङ्घं
प्रेक्षाञ्चकार स्मरशासनसूनुः ॥ ३३ ॥

सुरद्विषोपप्लुतमेवमेव
वनं बलस्य द्विषतो गतश्रि ।
इत्थं विचिन्त्यारुणलोचनोऽभू-
द्भ्रूभङ्गदुष्प्रेक्ष्यमुखः स कोपात् ॥ ३४ ॥

निर्लूनलीलोपवनामपश्य-
दसञ्चरीभूतविमानमार्गाम् ।
विध्वस्तसौख्यप्रचयां प्रमृष्ट-
विश्वौकसाराममरावतीं सः ॥ ३५ ॥

गर्भश्रियं वैरिवराभिभूतां
दशां सुदीनामभितो दधानाम् ।
नारीमवीरामिव तामवेक्ष्य
सबाष्पमन्तः करुणापरोऽभूत् ॥ ३६ ॥

दुश्चेष्टिते दैवरिपौ सरोष-
स्तस्यां विषण्णः समरायचोत्कः ।
तथाविधां तांच विवेश पश्यन्
सुरैः सुराधीश्वरराजधानीं ॥ ३७ ॥

दैत्येन्द्रदन्तावलदन्तघातैः
सुवर्णान्तरस्फाटिकहर्म्यपङ्क्तीः ।
महाहिनिर्मोकपिनद्धजालाः
संवीक्ष्य तस्यां विषसाद सद्यः ॥ ३८ ॥

उत्कीर्णचामीकरपङ्कजानां
दिग्दन्तिदानद्रवदूषितानाम् ।
हिरण्यहंसव्रजवर्जितानां
तदीर्णवैडूर्यमहाशिलानाम् ॥ ३९ ॥

आविर्भवद्बालतृणाञ्चितानां
तदीयलीलागृहदीर्घिकाणाम् ।
सुदुर्दशां वीक्ष्य विरोधिजां तां
विषादवैलक्ष्यभरं बभार ॥ ४० ॥

युग्मम्

तद्दन्तिदन्तक्षतहेमभित्ति-
सुतन्तुजालाकुलरत्नजालम् ।
निन्ये सुरेन्द्रेण पुरोगतेन
स वैजयन्ताभिधमात्मसौधम् ॥ ४१ ॥

निर्दिष्टवर्त्मा विबुधेश्वरेण
सुरैः समग्रैरनुगम्यमानः ।
स प्राविशत् तद्विविधात्मरश्मि-
च्छन्नेन सोपानपथेन सौधम् ॥ ४२ ॥

निसर्गकल्पद्रुमतोरणाङ्कं
स पारिजातप्रसवस्रजाढ्यम् ।
दिव्यैः कृतस्वस्त्ययनो मुनीन्द्रै-
रन्तः कुमारः प्रमदं प्रपेदे ॥ ४३ ॥

पादौ महर्षेः किल कश्यपस्य
कुलादिवृद्धस्य सुरासुराणाम् ।
प्रदक्षिणीकृत्य कृताञ्जलिः स
षड्भिः शिरोभिर्विनतैर्ववन्दे ॥ ४४ ॥

स देवमातुर्जगदेकवन्द्यौ
पादौ तथैव प्रणनाम कामम् ।
मुनेः कलत्रस्यच तस्य भाव्या
प्रह्वीभवन् शैलसुतातनूजः ॥ ४५ ॥

स कश्यपः सा जननी सुराणां
तमेधयामासतुराशिषा द्वे ।
यथा ऽनया ऽनेकजगज्जिगीषुं
जेता मृधे तारकमुग्रवीर्यम् ॥ ४६ ॥
तद्दर्शनार्थं समुपेयुषीणां
स देवतानामदितिप्रितानाम् ।
पादौ ववन्दे विनयेन तास्त-
माशीर्वचोभिः पुनरभ्यनन्दन् ॥ ४७ ॥
पुलोमपुत्रीं विबुधाधिभर्तु-
स्ततः शचींनाम कलत्रमत्र ।
नमश्चकार स्मरशत्रुसूनु-
स्तमाशिषा सा समुपाचरच्च ॥ ४८ ॥
अथादितीन्द्रप्रमुखाः समेताः
स मातरः सप्त घनप्रमोदाः ।
उपेत्य भक्त्या नमतिस्म शर्व-
पुत्राय तस्मै ददुराशिषस्ताः ॥ ४९ ॥
समेत्य सर्वे मुदमादधाना
महेन्द्रमुख्यास्त्रिदिवौकसो ऽत्र ।
आनन्दकल्लोलितमानसास्ते
तमभ्यषिञ्चन् पृतनाधिपत्ये ॥ ५० ॥
सकलविबुधलोकः स्रस्तनिःशेषशोकः
कृतरिपुविजयाशः प्राप्तबुद्धावकाशः ।
अकृत हरसुतेनानन्तवीर्येण तेना-
खिलविबुधचमूनां प्राप्य लक्ष्मीमनूनाम् ॥ ५१ ॥

इति श्रीकुमारसम्भवे महाकाव्ये कवीन्द्रकालि-
दासकृतौ कुमारसेनापत्याभिषेकोनाम त्रयोदशः सर्गः ॥

रणोत्सुकेनान्धकशत्रुसूनुना
स्वयं प्रयुक्तैस्त्रिदशैर्जयैषिणा ।
महासुरं तारकसञ्ज्ञितं द्विषं
प्रसह्य हन्तुं समनह्यत द्रुतम् ॥ १ ॥
स दुर्निवारं मनसो ऽतिवेगिनं
जयप्रियः सङ्गमनं सुदुःसहम् ।
विजित्वरंनाम तदा महारथं
धनुर्द्धरः शक्तिधरो ऽध्यरोहत ॥ २ ॥
सुरालयश्रीविपदां निवारणं
सुरारिसम्पत्परितापकारणम् ।
केनापि दध्रे ऽस्य विरागदारणं
सुचारु चामीकरधर्मवारणम् ॥ ३ ॥
शरद्बलच्चन्द्रमरीचिरोचिभिः
स वीज्यमानो वरचारुचामरैः ।
पुरःसरैः किन्नरसिद्धचारणै
रणोत्सुको ऽस्तूयत वाग्भिरुत्तमैः ॥ ४ ॥
प्रयाणकालोचितचारुवेषभृद्-
वज्रं वहन्पर्वतपक्षदारणम् ।
ऐरावणं स्फाटिकशैलसोदरं
ततो ऽधिरुह्य द्युपतिस्तमभ्यगात् ॥ ५ ॥
तमन्वगच्छद् गिरिशृङ्गसोदरं
मदोद्धुरं मेषमधिष्ठितः शिखी ।
विरोधिविद्वेषरुषा ऽधिकं ज्वल-
न्महा महौजस्तरसा युधे दधे ॥ ६ ॥
नवेन्द्रनीलाचलखण्डविग्रहे
विषाणविध्वस्तमहाशिलोच्चये ।
स्थितो ऽतिमत्ते महिषे ऽसुभीषणो
रणोत्सुको दण्डधरस्तमभ्यगात् ॥ ७ ॥
मदोद्धुतः प्रेतवराधिरूढ-
स्तमन्धकद्वेषितनूजमभ्यगात् ।
महासुरद्वेषविशेषभीषणः
सुरोषणश्चण्डरणाय नैर्ऋतः ॥ ८ ॥
नवोदयास्तोरणघोरदर्शनं
युधे ऽधिरूढो मकरं महत्तरम् ।
दुर्वारपाशो वरुणो रणोल्वणं
तमन्वियाय त्रिपुरान्तकात्मजम् ॥ ९ ॥
दिगम्बराद्रिक्रमणोल्वणं रणा-
न्मृगं महीयांसमरुद्धविक्रमम् ।
अधिष्ठितः सङ्गरकेलिलालसं
मरुन्महेशात्मजमभ्यगाद्द्रुतम् ॥ १० ॥
विरोधिनां शोणितपारणेप्सितां
गदामनूनां नरवाहनो वहन् ।
महाहवाम्भोधिविगाहनोद्धतं

यियासुमभ्यागमदीशनन्दनम् ॥ ११ ॥
महाहिनिर्व्वेद्धजटाकलापिनो
ज्वलत्त्रिशूलप्रवरायुधा युधि ।
रुषा तुषाराद्रिसरवं महावृषं
ततो ऽधिरूढास्तमयुः पिनाकिनः ॥ १२ ॥
अन्येपि सन्नह्य महामहोत्सव-
प्रद्धालवः स्वर्गिगणास्तमन्वयुः ।
स्ववाहनानि प्रवराण्यधिष्ठिता:
प्रमोदविस्मेरमुखाम्बुजश्रियः ॥ १३ ॥
उद्दण्डहेमध्वजदण्डसङ्कुला-
स्वज्रद्विचित्रातपवारणोल्बणाः ।
घनाघनाःस्यन्दनघोषभीषणाः
करीन्द्रघण्टारवचण्डचीत्कृताः ॥ १४ ॥
स्फुरद्विचित्रायुधकान्तिकन्दले-
रुद्द्योतिताशावलयाम्बरान्तराः ।
दिवौकसां सो ऽनुवहन् महाचमूः
पिनाकपाणेस्तनयस्ततो ययौ ॥ १५ ॥
युग्मम् ।
कोलाहलेनोच्छलता दिवौकसां
महाचमूनां गुरुभिर्द्ध्वजायैः ।
घनैर्निरुच्छ्वासमभूदलन्तरां
दिङ्मण्डलं व्योमतलं महीतलम् ॥ १६ ॥
सुरारिलक्ष्मीपरिकम्पहेतवो
दिक्चक्रवालप्रतिनादमेदुराः ।
नभोन्तकुक्षिम्भरयो घनस्वना
निहन्यमानैः पटहैर्वितेनिरे ॥ १७ ॥
प्रमथ्यमानार्णवगर्जितस्वनै-
र्वैरारिनारीगणगर्भपातनैः ।
नभश्चमूधूलिकुलैरिवाकुले-
रराम गाढं पटहप्रतिस्वनैः ॥ १८ ॥
क्षिप्रं रथैर्वाजिभिराहतं खुरैः
करीन्द्रकर्णैः परितः प्रसारितम् ।
धृतं घनैः काञ्चनशैलजं रजो
वातैर्हतं व्योम ससार तत्क्रमात् ॥ १९ ॥
खातं खरै रथ्यतुरङ्गपुङ्गवै-
रुपत्यकानां कनकस्थलीरजः ।
गतं दिगन्तान् प्रखरैः समीरणै-
र्द्धाहभ्रमं भूरि बभार भूयसा ॥ २० ॥
अधस्तथोर्ध्वं पुरतो ऽथ पृष्ठतो
ऽभितोपि चामीकररेणुरुच्चकैः ।
चमूषु सर्पन् मरुदाहतो ऽहरत्
तत्कालबालातपवैभवं बहु ॥ २१ ॥
बलोद्धुतं काञ्चनभूमिजं रजो
बभौ दिगन्तेषु नभस्तले स्थितम् ।
अकालसन्ध्याघनरागपिङ्गितं
घनं घनानामिव वृन्दमुद्यतम् ॥ २२ ॥
हेमावनीषु प्रतिबिम्बमात्मनो
मुहुर्विलोक्याभिमुखं महागजाः ।
रसातलोत्तीर्णगजभ्रमेण
दण्डप्रकाण्डप्रकृतानि तेनिरे ॥ २३ ॥
सुजातसिन्दूरपरागपिञ्जरैः
कलं चलद्भिः सुरसैन्यसिन्धुरैः ।
गुहासु चामीकरशैलभूमिषु
व्यदृश्यत स्वं प्रतिबिम्बमग्रतः ॥ २४ ॥
इतिक्रमेणामरराजवाहिनी
महाहवारम्भविलासलालसा ।
अवातरत् काञ्चनशैलतो द्रुतं
कोलाहलाकृत्तविधूतकन्दराः ॥ २५ ॥
महाचमूनां करिचण्डचीत्कृतै-
र्विलोलघण्टाक्वणितोपबृंहितैः ।
सुरेन्द्रशैलेन्द्रमहागुहाशयाः
सिंहा महास्वप्नसुखं न तत्यजुः ॥ २६ ॥
गम्भीरभेरीध्वनितैर्भयङ्करै-
र्महागुहान्तःप्रतिनादमेदुरैः ।
महारथानां गुरुनादनिःस्वनै-
रनाकुलैस्तैर्मृगराजता ऽऽपि ॥ २७ ॥
समुच्छ्रितेन त्रिदिवौकसां चमू-
रवेण तेनाद्रितटान्तदारिणा ।
प्रपेदिरे केसरिणो ऽधिकं मदं
स्ववीरलक्ष्मीमृगराजतावशात् ॥ २८ ॥

भिया सुरानीकविमर्द्दजन्मना
विदुद्रुवुर्दूरतरं द्रुतं मृगाः ।
गुहागृहान्तानभिसृत्य हेलया
तस्थुर्विनिःशङ्कतरा मृगाधिपाः ॥ २९ ॥
विलोकिताः कौतुकिना ऽमरावती-
जनेन दृष्टं प्रमदेन दूरतः ।
सुराचलप्रान्तभुवि प्रपेदिरे
सुविस्तृतायां प्रसरं न सैनिकाः ॥ ३० ॥
भुवं विगाह्य प्रययौ महाचमूः
क्वचिन्न मान्ती दिवमभ्यगात् ततः ।
अखर्वगन्धर्वपुरोदयभ्रमं
बभार भूम्ना सुतरामितस्ततः ॥ ३१ ॥
महास्वनः सैन्यविमर्दसम्भवः
कर्णान्तमूलङ्कषतामुपेयिवान् ।
पयोनिधेः क्षुब्धतरस्य मन्थने
बभूव भूम्ना भुवनोदरम्भरिः ॥ ३२ ॥
महागजानां गुरुबृंहितैः स तैः
सुहेषितैर्घोरतरैश्च वाजिनाम् ।
घनैरथानां चलचक्रचीत्कृतै-
स्तिरोहितो ऽभूत् पटहस्य निःस्वनः ॥ ३३ ॥
महासुराणामवरोधयोषितां
कचाचिपक्ष्मस्तनमण्डलेषु ।
ध्वजेषु नागेषु रथेषु वाजिषु
क्षणेन तस्थौ सुरसैन्यजं रजः ॥ ३४ ॥
चलैर्विलोक्य स्थगितार्कमण्डले
च्चमूरजोभिर्निचितं नभस्तलम् ।
अवापि हंसैरभिमानसं घन-
भ्रमेण सानन्दमनर्त्ति केकिभिः ॥ ३५ ॥
सान्द्रैः सुरानीकरजोभिरम्बरे
नवाम्बुदानीकविलासिभिः श्रिते ।
चकासिरे स्वर्णमयध्वजव्रजाः
परिस्फुरन्तस्तडितां गणा इव ॥ ३६ ॥
विलोक्य धूलीपटलैर्भृशं भृतं
द्यावापृथिव्योरलमन्तरं महत् ।
किमूर्द्धतो ऽधःकिमधस्तदूर्ध्वतो
रजो ऽभ्युपैतीति जनैरतर्क्यत ॥ ३७ ॥
नोर्द्ध्वं नचाधो न पुरो न पृष्ठतो
न पार्श्वतो ऽभूत् खलु चक्षुषो गतिः ।
सूच्ययभिन्नैः पृतनारजोभरैः
सुनिर्भरं प्राणिगणस्य सर्वतः ॥ ३८ ॥
दिगन्तदन्तावलदानहारिभि-
र्विमानरन्ध्रप्रतिनादमेदुरैः ।
अनेकवाद्यध्वनितैरनारते-
र्जगर्ज्ज गाढं गुरुभिर्नभस्थलम् ॥ ३९ ॥
उद्दामदानद्विपबृंहितैस्त-
र्नितान्तमुत्तुङ्गतुरङ्गहेषितैः ।
चलद्ध्वजस्यन्दननेमिनिःस्वनै-
रभून्निरुच्छ्वासमथाकुलं तत् ॥ ४० ॥
महागजानां गुरुभिस्तु गर्ज्जितै-
र्विलोलघण्टारणितैरथोज्ज्वलैः ।
वीरप्रभेदैः प्रमदप्रमेदुरै-
र्वाचालतामादधिरेतरां दिशः ॥ ४१ ॥
दन्तीन्द्रदानाम्बुधिवारिवीचिभिः
सद्योपि नद्यो बहु ताः पुपूरिरे ।
धाराजोभिस्तुरगैः क्षितिर्भृता
या पङ्कतामेत्य रथैः स्थलीकृता ॥ ४२ ॥
निम्नप्रदेशाः स्थलतामुपागमन्
निम्नत्वमुच्चैरपि सर्वतः स्थलम् ।
तुरङ्गमानां व्रजतां खुरैः क्षिती-
रथैर्गजेन्द्रैः परितः समीकृता ॥ ४३ ॥
नभोदिगन्तप्रतिघोषभीषणो-
महामहीभृत्तटदारणोल्वणैः ।
पयोधिनिर्धूतककेलिभिर्जग-
द्बभूव भेरीस्वनितैः समाकुलम् ॥ ४४ ॥
इतस्ततो वातविधूतचञ्चले-
रारोधिताशागगनैर्ध्वजांशुकैः ।
लसत्क्वणत्काञ्चनकिङ्किणीकुलै-
रमज्जि धूलीजलधौ नभोगतैः ॥ ४५ ॥
घण्टारवैरोद्धतरैर्निरन्तरै-
र्विसृत्वरैर्गर्जरवैः सुभैरवैः ।

मदद्विपानां प्रथयाम्बभूविरे
न वाहिनीनां पटहस्य निःस्वनाः ॥ ४६ ॥
करालवाचालरवैश्चमूरवैः
ग्रस्ताम्बरा वीक्ष्य रजस्वला दिशः ।
तिरोबभूवे गहने दिनेश्वरो
रजोन्धकारे परितः कुतोप्यसौ ॥ ४७ ॥
आक्रान्तपूर्वा रभसेन सैनिकै-
र्दिगङ्गना व्योमरजोभिदूषिता ।
भेरीरवाणां प्रतिशब्दितैर्घनै-
र्जगर्ज गाढं गुरुमत्सरादिव ॥ ४८ ॥
गुरुसमीरसमीरितभूधरा
इव गजा गगनं विजगाहिरे ।
गुरुतराइव वारिधरा धरो-
भुवमतीहविमर्म्मरवाभवत् ॥ ४९ ॥
खरतरसुरलोकानल्पसंहारकाले
निरवधयइवाम्भोराशयो घोरघोषाः ।
गुरुतरपरिमज्जद्भूभृतो देवसेना
ववृधुरपि सुपूर्णाव्योमभूम्यन्तरालाः ॥ ५० ॥

इति श्रीकुमारसम्भवे महाकाव्ये कवीन्द्रकालिदास-
कृतौ सेनाप्रयाणंनाम चतुर्दशः सर्गः ॥

॥ परिभाषेन्दुशेखरटिप्पणीसारासारविवेकः ॥

॥ श्रीपरमेश्वराय नमः ॥

॥ प० ॥ प्राचीनवैयाकरणतन्त्रे वाचनिकानि अत्र पाणिनीये तन्त्रे ज्ञापकन्यायसिद्धानि भाष्यवार्त्तिकयोरुपनिबद्धानि यानि परिभाषारूपाणि तानि व्याख्यायन्ते ॥ प० ॥

श्लोकघटकतुरीयचरणसूचितं विषयरूपमनुबन्धमध्येतृणामवधानाय स्पष्टं प्रतिपादयति । प्राचीनेत्यादिना । अत्रेत्यस्य व्याख्यायन्तइत्यनेनान्वयः। व्याख्यानं च प्रकृतशास्त्रप्रवृत्तिनिवृत्त्युपयोगित्वेन प्रतिज्ञानविशिष्टमत्र विवक्षितम् । तेनाकृत-व्यूहाइत्याद्युपन्यासेऽपि न प्रतिज्ञाविरोधः ।

अत्र व्याख्येयपरिभाषारूपाणां ज्ञापकन्यायसिद्धत्वेन विशेषणाद् वाचनिकानामग्रहणेन न्यूनतामुद्भाव्य ज्ञापकन्यायसिद्धानीत्यस्य प्रायेणेति शेषं कल्पयित्वा न्यूनतां परिहरन्ति वैद्यनाथभट्टाः । तदेवानुवदन्ति भैरवमिश्रचिपथगाकारसङ्ग्रहकाराः ।

सदाशिवभट्टास्तु वाचनिकसङ्ग्रहायाह "भाष्येति" सामानाधिकरण्ये तु अकृतेत्यादिव्याख्यानं विरुध्येत सङ्ग्रहश्च न स्यादिति बोध्यमिति ग्रन्थेन भाष्यवार्तिकेत्यादेः पृथक्कोटित्वोपवर्णनेन समादधते । एतदनुसारेणैव राघवेन्द्राचार्यैरपि भाष्यवार्तिकयोरुपनिबद्धानीति पृथक्कोटिः अनेन परिभाषासूत्रव्युदासइति प्रकारान्तरेण समाधीयते ।

भीमाचार्यास्तु ज्ञापकन्यायशब्दावर्शआद्यजन्तौ सिद्धशब्दश्चोच्चारणक्रियानिष्पन्नार्थोवाचनिकपरः तेन वाचनिकानां सङ्ग्रहः । यद्वा । वाचनिकानीत्यस्यावृत्त्या प्राचीनवैयाकरणतन्त्रे इत्यत्र पाणिनीये तन्त्रे इत्यत्र च योजना कार्या । गामश्वं पुरुषमित्यादौ विनापि चं समुच्चयदर्शनाद् वाचनिकानि ज्ञापकन्यायसिद्धानिचेत्यादिरर्थइत्यतोवाचनिकानां नासङ्ग्रहइति प्रकारद्वयेन समादधुः ।

केचित्तु प्राचीनवैयाकरणतन्त्रे वाचनिकान्यपि पाणिनीयतन्त्रे ज्ञापकन्यायसिद्धान्यपि यानिभाष्यवार्तिकयोरुपनिबद्धानि तान्येव व्याख्यायन्तइत्यादि व्याचख्युः ।

वयन्तु ज्ञापकन्यायासिद्धानि व्याख्येयपरिभाषारूपाणि न सन्त्येवेति प्राचीनेत्यादेर्यथाश्रुतार्थएव समीचीनः । यस्मिन्विधिरित्यादौ वाचनिक्येवेत्यादिग्रन्थस्य ज्ञापकासिद्धा नेयमिति नाशयः किन्तु भाष्ये एतस्याज्ञापकं नोपन्यस्तं स्वरूपमात्रमुत्कीर्तितमितीति ब्रूमः । ज्ञापकानि तु तत्रतत्र प्रदर्शयिष्यन्तेऽस्माभिः ।

परिभाषात्वं च सङ्केतग्राहकभिन्नत्वे सति गुणशास्त्रत्वम् ।

तत्त्वं च शब्दधर्मिकसाधुत्वप्रकारकशास्त्रजन्याप्रामाण्यज्ञानानास्कन्दितबोधे सहकारित्वेन मुन्यभिप्रेतत्वम् ।

व्याख्येयपरिभाषागतमनुगतरूपं च पाणिन्युच्चारितभिन्नत्वे सति गुणशास्त्रत्वम् । गुणशास्त्रत्वं तु निरुक्तमेव । एतदेव रूपं परितोव्यापृतां भाषां परिभाषां प्रचक्षतइति श्लोकार्द्धेनाभियुक्तैः प्रोच्यते । तथा हि । परितइत्यस्य स्वलिङ्गलिङ्गितशास्त्रजन्यबोधेष्वित्यर्थः । व्यापृतामित्यस्य च व्यापारविशिष्टामित्यर्थः । व्यापारश्च लिङ्गितप्रवृत्तिनिवृत्त्यन्यतरपर्यवसायी विषयसङ्कोचादिलक्षणः । भाषापदेन च शाब्दबोधजनकपरेण स्वातन्त्र्येण वाक्यार्थधीप्रयोजकत्वरूपमधिकारादिव्यावृत्तं रूपं सूचितमिति ध्येयम् ।

यत्तूदयङ्करेण ।

लिङ्गवत्त्वे सति सन्दिग्धार्थनियामकत्वं परिभाषात्वमुक्त्वा पदकृत्यं प्रादर्शि । दीधीवेवीटामित्यादौ नधातुलोपइत्यादौ च निषेधः किमिक्परिभाषायाउत गुणवृद्ध्योरिति सन्दिग्धार्थस्य नियामकत्वात् परिभाषात्वं स्यादतः सत्यन्तम् । सञ्ज्ञासूत्राणां विधिप्रदेशीयसञ्ज्ञाबोधकपदरूपलिङ्गवत्त्वे सत्यर्थनियामकत्वे-

Digitized by Google

नातिव्याप्तिः सन्दिग्धेति । तथा सति क्वचिट्टेरे घोःकिरित्यादौ विशेषरूपेण लोकप्रसिद्धार्थप्रत्यायकत्वात् क्वचित् पुनः सिचि-वृद्धिरित्यादावसन्दिग्धार्थकत्वाददोषः । परिभाषाणां तु सूत्रोपात्तानां षष्ठीस्थानेयोगेत्यादीनां विधिप्रदेशगतषष्ठीपदादिश्रवणरूपलिङ्गवत्त्वेन व्याख्यानतइत्यादीनां च ज्ञापकन्यायसिद्धानां सन्दिग्धपदादिश्रवणरूपलिङ्गवत्त्वेन सन्दिग्धार्थनियामकत्वाद्यथोक्तव्यवहारः सिद्ध्यति । वर्णाश्रये नास्ति प्रत्ययलक्षणमेकदेशविकृतमनन्यवदित्यादीनां निषेधातिदेशरूपाणां प्राचीनस्तथा व्यवहारः पारार्थ्यसाधर्म्यादित्यादि ।

तच्च विचारसहम् ।

षष्ठीस्थानेयोगेत्यादीनामिकोयणचीत्यादाविकपदोत्तरषष्ठ्याः कीदृक्सम्बन्धबोधतात्पर्यकत्वमिति सन्देहे स्थानपदार्थानुयोगिकसम्बन्धबोधकत्वमेवास्याइति तात्पर्यनिर्णायकत्वस्येव दीधीवेवीटामित्यादीनां तथात्वस्याभावात् । गुणवृद्धीनिषेध इतेक्परिभाषायाइति सन्देहस्य च व्याख्याननिवर्त्यतया दीधीवेवीटामित्यादीनां प्रदर्शितपरिभाषायाइव सन्देहनिवर्तकत्वाभावात् सत्यन्तफलप्रदर्शनस्यासमीचीनत्वात् । किञ्च । सन्दिग्धार्थनिर्णायकत्वस्य बह्वीषु परिभाषास्वसम्भवः । यथा तस्मिन्निति निर्दिष्टे इत्यादेः । यत्तु पूर्वस्य परस्य वेत्यादिसन्देहनिवर्तकत्वं कैश्चिदुच्यते । तदसत् । उद्देश्यतावच्छेदकावच्छेदेन विधेयान्वये शास्त्रतात्पर्यस्य निर्णीतत्वेनेकोयणचीत्यादेः पूर्वपरव्यवहिताव्यवहितेङ्मात्रे प्रवृत्तेरेवनिश्चयस्य परिभाषाभावे सम्भावितत्वेन पूर्वस्य परस्य वेत्यादिसन्देहस्य कथमपि सम्भावयितुमशक्यत्वेन तन्निवर्तकत्वस्य सुतरामभावात् । किञ्च । सञ्ज्ञाशास्त्राणामपि लिङ्गवत्त्वमभ्युपगच्छत उपस्थितिप्रयोजकतावच्छेदकस्यैव लिङ्गपदार्थत्वमभिप्रेतमित्यनुमीयते । तस्य चात्रापि सत्वेन सत्यपि सत्यन्ते तत्रातिव्याप्तिस्तदवस्थैव ।

वस्तुतोलिङ्गपदार्थश्च शास्त्रीयत्वेन या परिभाषाप्रवृत्तिप्रयोजकतावच्छेदकता तदाश्रयः शब्दार्थान्यतरः । सार्वधातुकार्धधातुकयोरित्यादौ विधेयताप्रयोजकगुणपदोपश्लेषिकाधिकरणबोधकसप्तम्याविकोगुणवृद्धीतस्मिन्निति निर्दिष्टेइत्यनयोः प्रवृत्तिप्रयोजकतावच्छेदके भवतइति तयोस्तत्तत्परिभाषालिङ्गत्वव्यवहारः । नहि विधिशास्त्रीयत्वेन रूपेण विधिशास्त्रीयं शब्दमयं योद्देश्यतावच्छेदकीकृत्य संज्ञाशास्त्राणि प्रवर्त्तन्ते येन तेषामपि लिङ्गवत्त्वं शक्येतोपपादयितुमिति सन्दिग्धपदकृत्यप्रदर्शनमपि तथैव ।

किं च सूत्ररूपाणामित्यर्थबोधतात्पर्येण सूत्रोपात्तानामिति लेखनं प्रामादिकम् । सूत्ररूपेणोपात्तानामित्यादिक्लिष्टकल्पनया योजने तूपात्तपदमधिकं योजनाक्लेशश्च ।

एवं व्याख्यानतइत्यादीनामपि सन्दिग्धार्थकशास्त्रीयाणिणादिपदादिकमेव लिङ्गमिति तासां सन्दिग्धपदादिश्रवणरूपलिङ्गवत्त्वकथनमपि तथैव । यतः पदांशे जायमानस्य सन्देहस्य करणापाटवादिप्रयोज्यतया तस्य प्रमाणान्तरेण निवारणीयतया तन्निवृत्तौ व्याख्यानस्य नास्त्यपेक्षा । योपि कुत्र चिदानुनासिक्यादिसन्देहः सोपि पाठयितापठितृप्रमादप्रयुक्तइति सोपि न परिभाषाघटकसन्देहपदेन धर्तुं शक्यइति सन्दिग्धपदश्रवणस्य तल्लिङ्गत्वं न सम्भवति । सन्दिग्धपदेत्यस्य सन्दिग्धार्थकपदेत्येवं व्याख्यानेन योजनं तु क्लिष्टमिति विचारणीयं सुधीभिरिति शम् ॥

काशीस्थराजकीयपाठशालायाम् ।
धर्मशास्त्राचार्यराजारामशास्त्री
साङ्ख्यशास्त्राध्यापकसहकारी बालशास्त्री

॥ श्रीः ॥

जयति स जगदीशो यस्य नानाविधाना-
मचरचरचयानां निर्मितौ क्वापि नाभूत् ।
कथमपि लघुसाध्यं कार्हिचिद्गौरवेण
विरचितमिह नूनं चेतनं वा जडं वा ॥

॥ अथ प्राचीनज्योतिःशास्त्राचार्याशयवर्णनम् ॥

इह खलु ग्रहभ्रमणविषये द्वे मते तावत् सुप्रसिद्धे । एकं भूः स्थिरा तामभितश्च सूर्यादयो ग्रहा भ्रमन्तीति । अन्यच्च रविरचलस्तं परितः सभूमयः सर्वे ग्रहाः पर्ययं कुर्वन्तीति ।

तत्राद्यमतवादिनः प्रत्येकं ग्रहः पूर्वदिशं चरन् यावता कालेन भुवमभित एकं भगणं पूरयेत् तस्मात् कालादनुपातेन ग्रहस्यैकदिनसंबन्धिनीं समानां गतिं निश्चित्य तां मध्यमामभिदधानास्तस्याः सकाशादभीष्टकाले खेटस्य भचक्रेऽवगतं स्थानं मध्यमग्रहशब्देन व्यवहरन्ति । एतन्मते रविज्ञशुक्राणां वसुमत्याः समन्तादेकेनैव हायनेनैकं भ्रमणं भवतीति तेषां मध्यमा गतिस्तुल्यैव जायते । तथैव मध्यमं स्थानमपि ।

अन्त्यमतवादिनस्तु प्रत्येकं खेटस्य सूर्यमभितः परिभ्रमणकालमवगम्य । अत्र मते बुधशुक्रयोर्मध्यमे गती स्थाने चाद्यमतीयाभ्यां गतिभ्यां स्थानाभ्यामन्योन्यं च भिद्येते । सूर्यमभितो भगणपूर्तिकालस्य भेदात् । सूर्यभूम्योरन्तरे कदाचिदप्यसंचरतां कुजजीवरविजानां तु मध्यमगतयः स्थानानि चाद्यमतीयाभ्यो गतिभ्यः स्थानेभ्यश्च न भिद्यन्ते । यतस्ते प्रत्येकं तरणिं धरणिं च तुल्येनैव कालेन परिभ्रमन्ति ।

तत्र भारतवर्षीयाः सकलमूलग्रन्थकाराः सर्वे ग्रहास्तरणिं

परितो भ्रमन्तीत्यभिप्रेत्य ग्रहपातभगणान् निरणायिषतेत्येतदुपपादनार्थमुच्यते ।

द्वयोरपि मतयोर्वादिभिर्विक्षेपकेन्द्रार्थं मन्दस्पष्टे ग्रहे पातस्य योजनमङ्गीक्रियते । ग्रहाणां विक्षेपकेन्द्रमप्युभयत्र समानम् । तत्र ये मध्यमा ग्रहा उभयमतेऽपि समाना अत एव स्वस्वमन्दफलसंस्कृता अपि साम्यं न जहति तेषां पाता मतद्वये तुल्या एव स्युः । विक्षेपकेन्द्रस्योभयत्र तुल्यत्वात् । यथा कुजगुरुशनीनाम् । अतएव तेषां पठिताः पातभगणा अप्युभयत्र समानाः । मध्यमौ बुधशुक्रौ त्वाद्यमते मध्यमसूर्यतुल्यौ । अन्त्यमते च मूलग्रन्थोक्तशीघ्रोच्चसमानौ । यत एतन्मते बुधस्य किंचिदूनाष्टाशीतिसावनदिनैरेकं भगणं पूरयतः प्रत्यहं स्वकक्षायां द्वात्रिंशद्विकलाधिकपञ्चचत्वारिंशदुत्तरशतद्वयमितकलारूपा गतिः शुक्रस्य चैषच्यूनैः पादोनतत्त्वदस्रैः कुदिनैरेकं पर्ययं कुर्वतोऽनुदिनं निजमार्गे विकलाष्टकाधिकषण्णवतिकलात्मिका मूलग्रन्थेषु तत्तच्छीघ्रोच्चगतित्वेनोपन्यस्तेति तयोः पातौ नोभयमते तुल्यौ । विक्षेपकेन्द्रस्य तुल्यत्वेऽपि मध्यमस्य भेदात् । अतएव तयोः पातभगणाभ्यामपि नोभयत्र तुल्याभ्यां भाव्यम् । तावेतौ पातावस्मन्मूलग्रन्थकारैर्मन्दस्पष्टयोर्बुधशुक्रयोर्न प्रक्षिप्येते । अपितु मन्दफलसंस्कृते तत्तच्छीघ्रोच्च इत्यतः स्फुटमेतदवगम्यते यत् पठितेभ्यः सूर्यकेन्द्रकभ्रमणभगणाविरुद्धेभ्यो भगणेभ्य उत्पन्नेषु मध्यमेषु कुजजीवरविजेषु प्रक्षेपयोग्यं तद्विरुद्धेभ्य उत्पन्नयोश्च बुधभार्गवयोः प्रक्षेपायोग्यं तत्तच्छीघ्रोच्चे च प्रक्षेपयोग्यं पातं साधयन्तः पठिता ग्रहपातभगणा मूलोक्तबुधशुक्रशीघ्रोच्चरूपमध्यमबुधशुक्रसंपादकतरणिकेन्द्रकभ्रमणवादिमतीया इति । कथमन्यथा मध्यमबुधशुक्रप्रक्षेपयोग्यपातसंपादकाः शीघ्रकेन्द्रभगणाधिकाः पातभगणा न पठेरन् ।

अतएव भौमादीनां पञ्चानामपि ग्रहाणां सूर्यकेन्द्रकं भ्रमणं मूलकाराणामभिमतमित्यवसीयते । अन्यथा तन्मतीयपातभगणपठनानौचित्यात् ।

ननु ज्ञशुक्रयोः सूर्यकेन्द्रकं भ्रमणमस्तु मूलकाराणामभिमतम् । आद्यमताविरुद्धानां तयोः पातभगणानां पठनात् । कुजजीवरविजानां तु भूमिकेन्द्रकमेव स्यान्न सूर्यकेन्द्रकम् । तत्पातभगणानामाद्यमताविरुद्धत्वादिति चेन्न । रविकेन्द्रकभ्रमणास्वीकारे सूर्यस्य भौमादिशीघ्रोच्चत्वानुपपत्त्या रविकेन्द्रकभ्रमणस्यैव मूलकाराभिप्रेतत्वात् । तथाहि । भूमेरतिदूरो ग्रहकक्षायाः प्रदेशो ग्रहस्य शीघ्रोच्चम् ।

उच्चस्थितो व्योमचरः सुदूरे
नीचस्थितः स्यान्निकटे धरित्र्याः ।

इत्युक्तत्वात् । कक्षान्तर्गताया भूमेर्निर्गतया केन्द्रं स्पृशन्त्या रेखया स्पृष्टः कक्षाप्रदेश एव च भूमेर्दूरतरः । तत्र रवेः केन्द्रगतत्वाभावे रविसंमुख एव किमिति स्यात् । केन्द्रातिरिक्तस्थलस्थस्य रवेः केन्द्रसमानगतिकस्य मूलकृदभिप्रेतत्वकल्पनमपेक्ष्य तु रवेरेव केन्द्रत्वकल्पनाया लघीयस्या मूलकृदभिप्रेतत्वकल्पनमुचितम् ।

नच सूर्यमभितो ग्रहभ्रमणमभिप्रयतामाद्याचार्याणां भूमिं परितो भ्रमणप्रदर्शनमसंगतमिति वाच्यम् । लोकप्रतीत्यनुसृतये लाघवेन गोलस्थित्यवगतये च सूर्यधर्माणां धरण्यामारोपणस्य तैरङ्गीकरणात् ।

तद्वेवमारोपरसिका आचार्या बोधलाघवं लोकप्रतीतिं चानुसरन्त एव कल्पनालाघवेन सिद्धे अपि तरणिसहितस्य भपञ्जरस्य धरण्याश्चाचलत्वचलत्वे अन्योन्यस्मिन्नारोप्यैव तरणिं भचक्रं च चलं धरणिं चाचलां वर्णयांचक्रुरित्यपि प्रतीयते । भवति हि लाघवमयं रविः प्रातस्तत्रस्थ इदानीमत्रास्तीति बोधयितुं जानन्ति चैवमेव लोकाः । एवं रवे राश्यन्तरसंचारमपि । कल्पनायां तु भवत्येव तरणेर्धरणिं परितो भ्रमणस्याङ्गीकरणे तरणिं परिभ्रमतां व्योमचारिणामपि भुवमभि भ्रमणमनायत्या स्वीकृतमिति गौरवम् । मतान्तरे च धरणेरेकस्या एवेति लाघवम् ।

तदेवं भूमेर्मूलोक्तस्य भचक्रभ्रमस्य सजातीयं स्वाक्षं परितो भ्रमणं रविभ्रमस्य सजातीयं क्रान्तिवृत्ते भ्रमणं च मूलकाराणामभिप्रेतमिति सिद्धम् ।

स एष विषयोऽर्वाचीनैर्ग्रन्थकारैर्न व्यज्ञायि । यतस्तेषु केचन कुजगुरुरविजेषु पातं संयोज्य साधिताद्विक्षेपकेन्द्राच्छरस्यानयनमुपलब्ध्यतिरिक्तोपपत्तिसहितं मन्यमाना बुधशुक्रयोः शीघ्रोच्चे पातप्रक्षेपेण शरानयनमुपलब्ध्यतिरिक्तोपपत्तिरहितमवगम्य बुधशुक्रयोः शीघ्रोच्चस्थाने यावान् विक्षेपस्तावानेव यत्रकुत्रस्थितयोरपि तयोर्भवतीत्यत्रोपलब्धिरेव वासनेत्याहुः । अन्ये च बुधशुक्रयोर्मूलग्रन्थेषु पठितान् वास्तवानपि पातभगणानवस्तुभूतान् स्वल्पतया सुखमात्रार्थकांश्चाहुः । दैवगत्यार्यभटस्य बुद्धिपथमारूढम्

अनुलोमगतिर्नौस्थः पश्यत्यचलं विलोमगं यद्वत् ।
अचलानि भानि तद्वत् समपश्चिमगानि लङ्कायाम् ॥

इत्यादिना प्रकाशितमपि भचक्रस्याचलत्वं क्षोण्याश्च स्वाक्षं परितो भ्रमणं ब्रह्मगुप्तः

आवर्तनमुर्व्याश्चेन्न पतन्ति समुच्छ्रयाः कस्मात् ।

इत्यनेन भ्रमणप्रारम्भोत्तरकाले संयुक्तानां पृथ्व्याश्लिष्टानां वस्तूनां पतनाभावमजानन् प्रारम्भकालिकभ्रमणस्वभावमेवावगच्छन्नपालपत् । लल्लश्च

यदि च भ्रमति क्षमा तदा

स्वकुलायं कथमाप्नुयुः खगाः ।
इषवोऽपि नभः समुज्झिता
निपतन्तः स्युरपांपतेर्दिशि ॥
पूर्वाभिमुखे भ्रमे भुवो
वरुणाशाभिमुखो व्रजेद्घनः ।
अथ मन्दगमात् तथा भवेत्
कथमेकेन दिवा परिभ्रमः ॥

इत्यनेन भूवायुसहितायाः क्षितेर्भ्रमणमजानन् । श्रीपतिश्च

यद्येवमम्बरचरा विहगाः स्वनीड-
मासादयन्ति न खलु भ्रमणे धरित्र्याः ।
किंचाम्बुदा अपि न भूरिपयोमुचः स्यु-
र्देशस्य पूर्वगमनेन चिराय हन्त ॥
भूगोलवेगजनितेन समीरणेन
केत्वादयोऽप्यपरदिग्गतयः सदा स्युः ।
प्रासादभूधरशिरांस्यपि संपतन्ति
तस्माद्भ्रमत्युडुगणस्त्वचलाऽचलैव ॥

इत्यनेनोभयमप्यजानन् ।

ननु तरणिमभितो धरण्याः क्रान्तिवृत्ते भ्रमणे स्वीकृते रवेरिव नक्षत्राणामपि स्थिराणामुदग्दक्षिणायनं ध्रुवतारोन्नतिभेदश्चोपलभ्येत । तथापरिमेयां भचक्रदूरतामपेक्ष्य धरणिभ्रमणमार्गस्यात्यन्तमल्पतया न तथोपलब्धिरिति वाच्यम् । भकक्षादूरतायाः षष्टिगुणरविकक्षादूरत्वतुल्याया एव

भवेद्भकक्षा तीक्ष्णांशोर्भ्रमणं षष्टिताडितम् ।

इत्याद्यागमाभिहितत्वादिति चेन्न । छेद्यके कक्षावृत्ते प्रतिवृत्ते चैकस्यामेव दिशि मेषादिस्थितिं प्रदर्शयतामाद्याचार्याणामपरिमेयस्यैव भचक्रदूरत्वस्याभिमततया तद्विरुद्धसुसंपत्तिशून्यं दूरत्वं बोधयतस्तस्य वचनस्यानभिज्ञप्रक्षिप्ततायाः स्फुटमेव प्रतीयमानत्वादिति शम् ।

प्राचीनज्यौतिषाचार्यवर्याणामेवमाशयः ।
बापूदेवाभिधानेन यथाबुद्धि प्रदर्शितः ॥

THE ŚAHITYA-DARPAṆA,

OR

MIRROR OF COMPOSITION,

(Continued from page 68.)

e. It is the opinion of some that since this Figure (Paronomasia) cannot have a subject distinct from that of other ornaments, and since the ornaments coexisting with it, mentioned as they are by the sage afterwards frustrate or nullify it, it is to be recognized as the means of the perception of those ornaments. *The point* is thus discussed *by them*: In such an ornament as the Modal Metaphor (see § 703) or Indirect Description (see § 706), the second sense not being intended to be expressed *but to be suggested*, there is not even a shadow of Paronomasia. Even in such a Paronomastic Metaphor as that in the expression "Vidwan-mánasa-hańsa" (Thou swan of that Mánasa lake—the mind of the learned) though the word *mánasa* bears the meanings both of mind and the lake so named, the Paronomasia is nullified by the Metaphor, for the sense of the lake being what the word *mánasa* ultimately terminates in is the principal *signification*: and in Paronomasia both the meanings have an equal prominence. In such a Semblance of Contradiction as that in "*Sannihita-bálándhakárá bháswan-múrtih*" (She of the radiant form accompanied with the darkness of the hair; or, she of the solar form accompanied with new-born darkness) there is no Paronomasia, for the incongruous sense which is just perceived is not fully developed. So in the Semblance of Tautology (§ 632). Now *the above ornaments being dismissed as not properly coexistent with Paronomasia we arrive at certain others which do coexist with it.* For example: The figure Equal Pairing* (see §695) does exist in "*Yena dhawastamanobvahena*" &c. (§ 644. *a*) and "*Nítánám,*" &c. (§ 643. *f*,), as with the same facts (*viz.* 'preserving thee' and 'resembling the eyes,' respectively) are associated two distinct representations both connected with the subject-matter in the one case and both unconnected with the subject-matter in the other.

स्वेच्छोपजातविषयोऽपि न याति वक्तुं
देहीति मार्गणशतैश्च ददाति दुःखं ।
मोहात् समुत्क्षिपति जीवनमप्यकाण्डे
कष्टं प्रसूनविशिखः प्रभुरल्पबुद्धिः ॥

"Swechchhopajáta-vishayo'pi na yáti vaktum
Dehíti márgaṇa-śataiśch dadáti duhkham†
Mohát samutkshipati jívanamapyakáṇḍe
Kashṭam Prasúna-viśikhah prabhuralpabuddhih."

[The God of the flowery shafts and the master with a little mind are *equally* troublesome. *The one* while he himself has made a person the object *of desire* goes not *to him* to speak *in behalf of the party inflamed by him*, nay torments him with hundreds of arrows *perhaps* in envy of his body—*himself having none, nor stops here* but distracts him and untimely wrests his life. *The other*, while his will can command all wealth, is never disposed to say 'give,' and gives only pain on a hundred importunities, and under a mental delusion or groundless suspicion violently deprives men of their lives.]

* This and some other renderings of names of Indian figures of speech, I have adopted from Mr. Griffith's paper on "the Figures of Indian Poetical Rhetoric as illustrated in the Bhaṭṭi Kávya" appended to his 'Specimens of old Indian Poetry.'

† The scholiast explains the first half thus. While at his will he can make any one his subject, he obtains not the epithet *corporeal*, yet he can torment with hundreds of shafts.

Digitized by Google

Here we have the *ornament called* Illuminator (see § 696), since two persons, one (Káma) not connected with the subject-matter, the other (a little-minded master) connected with it, are associated with attributes *verbally* the same. In such *an example* as "*Sakalakalam purametajjátam samprati Sudháṅśu-vimbam*" (The city with its tumultuous noise,—or as the same words import—full in all its digits, has now become the lunar orb) there exists the ornament of Simile. Now as Paronomasia cannot possibly exist apart from *one of* these *figures* and as these may exist apart from Paronomasia, and since the latter, *coexisting as it does with some of these figures*, is felt to have a stronger strikingness, such cases properly go under the designation of Paronomasia, otherwise the designation would be altogether abolished.

f. To this we say: It is not true that Paronomasia has not a province distinct from that of other ornaments. For in "*Yena dhwasta*" &c. (§ 644 *a.*) it HAS a distinct subject, the figure of Equal Pairing (§ 695) in which BOTH the senses are not, as a rule, intended to be expressed having no place in it. Now, *for the sake of including the Equal Pairing in the present example*, if it be determined that of the two deities represented, Mádhava and Umádhava, only one is intended to be actually mentioned, the other would needs have to be *held as* hinted at, *and thus it would no longer be a case of Paronomasia.** Moreover in the Equal Pairing a single attribute only is apprehended as connected with more than one subject, whilst here more than one subject is apprehended as associated with distinct attributes. Nor in such a case as "*Sakala &c.*" (§ *e.*) is the Paronomasia the source of the apprehension of the simile, for on this supposition the Complete Simile (§ 648) would be without a subject. Should you say there is such a subject of the Complete Simile as 'this face is charming like the lotus,' I would reply—no, for if in '*Sakala &c.*' there is no *real* simile because there is a Paronomasia of words, what fault has the Paronomasia of sense committed in such an expression as 'charming'† *so as not to preclude, in this case too, a recognition of the simile.* The truth is that a verbal resemblance as well as one of quality or action may be made the basis of a Simile according to the direction of Rudraṭa: 'The Simile and the Conjunction (see § 739) are both clearly ornaments of sense but they may also be founded on a mere verbal resemblance.'

* An equal prominence of the two meanings being its condition.

† The reader must note a nice distinction here, before he can understand the passage. The charmingness of the face and that of the lotus are not one, nor even exactly similar, but are identified, by a Paronomasia of sense, into a point of resemblance, in the comparison of the two objects.

g. 'But then,' our opponent might further object, 'a sameness of quality or action alone is the proper basis of a simile, the resemblance in such a case being real; whilst a verbal sameness is not a reasonable support for the ornament, the resemblance here being unreal. Consequently the sameness of quality or action alone, not a verbal resemblance as in "Sakala &c.," is the proper subject of the Complete Simile, the Paronomasia of sense being set aside from such cases and *virtually from all cases,* seeing that otherwise there would be no room for the Complete Simile.'

h. I would again reply: No; for the unqualified definition of a Similitude that it is a community of attribute *or circumstance* is not exclusive of verbal sameness. And if in a case of verbal sameness the community, not being real, does not produce a Simile, then how in such an expression as "*Vidwanmánasa*" *(§ e.),* does the attribution of the nature of a lake to the mind (figured as a place) *founded merely on the verbal identity of* "*mánasa*" *(mind)* and "*mánasa*" *(the lake Mánasa),* become the occasion for the metaphor in the shape of ascribing the nature of a swan to the king. Moreover if the simile is to be admitted only in the case of a real resemblance, then why do you too recognize a frustrated simile in such a case as 'Sakala &c." *(§ e).* Further it is the Paronomasia that sustains the similitude, not that the similitude sustains the Paronomasia, for the similitude is impossible prior to the Paronomastic composition. So it is proper that the ornament recognized or marked out in such cases be the simile, which is the principal,—according to the maxim that designations are made after what is chief.

i. 'But', *it might be further objected,* 'in the province of the ornaments of word there is not admitted the Commixture (see § 757) *of figures* as principal and sub-ordinate, how then is it here maintained in respect of the Paronomasia and Simile?' I would reply—no, that non-admission respects only such figures as the Alliteration or the like, where a reference to the sense is wanting. Similarly is it to be understood of such ornaments as the Illuminator (§696) and the like, *when founded upon a verbal similitude, that it is these* that are the principal, the Paronomasia *being sub-servient thereto.*

j. To anticipate an error :

सत्पक्षा मधुरगिरः प्रसाधिताशा मदोद्धतारम्भाः ।
निपतन्ति धार्त्तराष्ट्राः कालवशान्मेदिनीपृष्ठे ॥

"Sat-pakshá madhura-girah prasádhitáśá madoddhatárambháh
Nipatanti dhártaráshṭráh kála-vaśánmediní-prishṭhe."

(Prologue to the drama *Veṇí-saṅhára*).

("The well-winged, sweet-voiced swans *(haṅsa),* under the influence of the season, are now descending upon the plains, ornamenting the quarters and uttering

Digitized by Google

loud cries of joy." Or "The sons of Dhṛitaráshṭra, of agreeable discourse and of proudly valiant undertakings, who are assisted by noble partisans, who have won all the quarters of the earth, now by fate's command fall *dead* upon the ground."

Here the words '*dhártaráshṭráh &c.*' being restricted to the signification of 'swan' &c. by the description of the Autumn which is in hand, the sense of 'Duryodhana' &c. is a suggestion of matter, originating in the power of the words (see chap. IV §257). And here since the second representation resulting from the present composition is meant only to be hinted *as the subject matter of the drama*, a comparison is not intended, and so there is neither the suggestion of a simile nor a Paronomasia. Thus *our present subject is* all clear *now.*

(To be continued.)

THE ETERNITY OF SOUND;
A DOGMA OF THE MI'M'A'NSA'.
BY DR. BALLANTYNE.

[From the Benares Magazine, August, 1852.]

(Concluded from page 71.)

Here we begin to perceive that this notable dispute is somewhat of a verbal one, and that Jaimini does not mean by Sound what his opponents mean by it. Sound, according to Jaimini, like the music spoken of in Othello, is of a kind "that may not be heard,"*—a "silent thunder" in its way. But let us hear Jaimini, who, having, disposed of the offered objections, proceeds to defend his own theory. "But it must be eternal [—this Sound —], because its exhibition is for the sake of another";†—and the commentator adds, in explanation,—"If it were not eternal, then, as it would not continue till the hearer had understood our meaning [—the *perceived* sound ceasing on the instant that it reaches the ear—] the understanding [of what was uttered] would not take place because of the absence of the cause;—for, to explain further, the understanding of what is uttered must *follow*—at however short an interval—the perception of the sound uttered; and if the sound perish on the hearing, as the *noise* does, then being no longer in existence, it cannot be the *cause* of anything. If, on the other hand, it continue to exist, for any period however short, after ceasing to be perceived,—it is impossible to assign any other instant at which there is any evidence of the discontinuance of its existence,—whence its eternity is inferred. Moreover, as it is prospectively eternal, so was it antecedently, which he considers to be proved, "By there being everywhere simultaneousness"* in the recognition of it by ever so many hearers, who could not *recognise* it if it were a new production. For example, when the word *cow* is uttered, a hundred persons recognise the word alike; and, the commentator adds, "a hundred persons do not simultaneously fall into an error,"—this being as unlikely as it is that a hundred arrows discharged simultaneously by a hundred archers should all by *mistake* hit the same object. Then, again, Sound is proved to be eternal. "By the absence of number;"†—for, *e. g.*, "When the word *cow* has been uttered ten times, we say 'The word *cow* has been uttered ten times,' but not 'Ten words of the form *cow* have been uttered.'" Further, Sound, as being indestructible, is proved to be eternal. "By there being no ground for anticipation"‡ of its destruction. "As, on the mere inspection of a web, one feels certain that 'This web was produced by the conjunction of threads, and it will be destroyed by the destruction of the conjunction of the threads,'—so, from the absence of the knowledge of any cause that should lead to the destruction of *Sound*, we conclude that *it* is eternal."

But some one may contend that Sound is a mere modification of the Air, and he may cite the *Śikshá*—that appendage of the Vedas which treats of pronunciation, which tells us that "Air arrives at the state of being Sound" after undergoing such and such treatment;—so Jaimini anticipates and repels this, "Because [if it were so], there would be no perception [by the organ of Hearing [of any object appropriate to it."§ He means to say that "modifications of the *Air* are not what the organ of Hearing takes cognizance of, Sound not being something *tangible*," as the Air is held by the Naiyáyikas to be, which Sound, they admit, has an altogether different substratum, viz., the Ether. Here Jaimini, though he does not himself hold Sound to be a quality of Ether, does not however disdain to avail himself of the *argumentum ad hominem.*

Finally, to put the seal upon the evidence of Sound's eternity, he refers to the Hindu scriptures;—"And [Sound is proved to be eternal] by our seeing a proof"|| of this, in the text which the commentator supplies, viz.,

* *Clown.* If you have any music that may not be heard, then to't again: but, as they say, to hear music, the general doth not greatly care.
Musician. We have none such, sir.
Clown. Then put up your pipes.
Othello. *Act* iii, sc. 1.

† नित्यस्तु स्याद्दर्शनस्य परार्थत्वात् ॥ १८ ॥

* सर्वत्र यौगपद्यात् ॥ १९ ॥

† संख्याभावात् ॥ २० ॥ ‡ अनपेक्षत्वात् ॥ २१ ॥

§ प्रख्याभावाच्च योग्यस्य ॥ २२ ॥

|| लिङ्गदर्शनाच्च ॥२३॥

Digitized by Google

"By language, that alters not, eternal," &c. Here ends the topic of Sound; and assuredly Jaimini does not make it very clear what he means by the term. Let us therefore turn to a fuller exposition of the dogma in question, and this may be found in the *Mahábháshya*, and its commentaries.

Patanjali commences the *Mahábháshya*, or "Great * Commentary" on the Grammatical Aphorisms of Pánini, by saying "Now, the teaching of Sounds:"—"Of *what* Sounds?" he asks,—and he replies, "Of those secular and those sacred." Kaiyata remarks on this as follows:—"Since the word "Sound" signifies sound in general, having reflected that—since, but for the question in hand, &c., there would have been nothing to determine the species,—the teaching also of the sounds of fiddle-strings, and of the cries of crows, &c., might have suggested itself, he asks "*Of what,*" &c." Then, "having further reflected, that since Grammar is an appendage of the Veda, from the sense of the terms the species [of sounds with which Grammar is concerned] may be inferred, he says [—in order to give a useful reply to his own question—] '*Of secular*' &c." After several pages of such disquisition, which provoke twice as many more from Nágésa Bhaṭṭa, Patanjali is allowed to go on again. "Of these, the secular, in the first place, are such as *cow, horse, man, elephant, bird, deer, bráhman.* The scriptural are verily indeed such as *sauno devírabhíshtaye* ('may the goddess be propitious to my prayers,')" &c. He goes on to say—"Well—'*cow,*'—here which is the *word*? That which is in the shape of a thing with dewlap, tail, hump, hoofs and horns,—pray, is *that* the word? Nay, replies he,—that is verily a *thing*. Then, the hints, gestures, and winking,—is *that* the word? Nay, he replies, that verily is *action*. Then the white, the blue, the tawny, the spotted,—is *that* the word? Nay, he replies, that verily is *quality*. Then, that which in [many] different is [one and] not different,—and which is not destroyed in things which [by disintegration] are destroyed,—that which is the common nature,—is *that* the word? Nay, he replies, that verily is the *form* [—implying the genus, or Platonic 'idea'—the ἐν ἐπὶ πολλων.]—What then *is* the word? † The word ['cow'] is that through which, when uttered, there, is the cognition of things with dewlap, tail, hump, hoofs and horns." We must not at present indulge ourselves in a *réchauffement* of all the drolly sagacious things that Kaiyaṭa and Nágésa take occasion to propound with reference to these remarks of His Snakeship * Patanjali. We must confine ourselves to the question of what is *eternal*, or held to be eternal, in the matter of sound.

Everybody allows that the constituent *letters* of a word are non-significant; because, says Kaiyaṭa, "if letters severally were significant, the pronunciation of the second, or of any subsequent [letter in any word] would be purposeless;—but, assuming that they are severally non-significant, then, on the theory that they *arise*, since they cannot arise *simultaneously;* and [then again] on the theory that they are *manifested*, since, from their being manifested *successively*, there is no [stable] aggregate,—if those that are impressed on a single [page of] memory were what express [the meaning connected with these letters so recorded], then we should find no difference between the sense gathered in the case of *sara* 'an arrow' and *rasa* 'a taste' [—the letters of which are the same.] In the *Vákyapadíya* [of Bhartrihari] it is diffusely established, that what denotes [the thing denoted] is [—so to speak—] a 'disclosure' (*sphoṭa,*) other than these [letters, and, at the same time] revealed by utterance." What is here called *sphoṭa*—a 'disclosure'—is what Jaimini meant by the term sound (*śabda,*) though he chose, for prudential reasons of his own, not to point out to his opponents—what they ought to have had perspicacity enough to discern for themselves—that he was "paltering with them in a double sense." Possibly, again, the case may have been an exemplification of the Hudibrastic principle, that.

Sure the pleasure is as great
Of being cheated, as to cheat.

The Naiyáyikas had no interest in really clearing up a confusion of ideas which allowed Jaimini to settle the eternity of the *Veda*, on which all the six schools repose, while at the same time it left a world of cloud-land available for endless and luxurious logomachy. The Naiyáyikas were *humbugs* when they did not come down upon Jaimini with the sledge-hammer of Gautama's 52nd Aphorism. They *knew* that he was "paltering in a double sense,"—but then their philosophical virtue was not of the termagant order, but rather of the kind that coyly resists with sheathed claws. Paying no further attention to the Naiyáyikas, let us attend to the conception which the Grammarians, in accordance with the Mímánsakas, denominate *sphoṭa*.

At page 305 of the first volume of his *Essays*, Mr. Colebrooke says—"Grammarians assume a special category, denominated *sp'hóta*, for the object of mental perception, which ensues upon the hearing of an articulate

* Its 'greatness'—though the commentator Kaiyata, with allusion to its bulk, styles it an 'ocean of a commentary'—is explained by *his* commentator, again. Nágésa Bhaṭṭa, to consist in its being, unlike ordinary commentaries, a subsequent authority, and not a mere exegesis.

† The enquirer is supposed to ask this after having run through all the categories, which the grammarians reckon to be four,—the four above-mentioned.

* Whilst the author of the *Mahábháshya* (and of the *Yoga* Aphorisms) honoured the world with his presence, he is understood to have been a serpent.

Digitized by Google

sound, and which they consider to be distinct from the elements or component letters of the word. Logicians disallow that as a needless assumption." Of this *sphoṭa*, which the Grammarians—as Vedántins—assume to be the only real entity in the universe, Nágesa Bhaṭṭa speaks as follows: "The cognition 'This is one word,' 'This is one sentence,' is proof of there being such a thing as *sphoṭa*, and of its unity [—it being held to be one with knowledge, or one with God—]; because too there is no solid evidence of the fact that memory is exactly according to the order of apprehension [—so that *sara* and *rasa* might come to suggest each the same idea —] since we *see* things that were apprehended in one order recollected even in the inverse order. But, in my opinion, as there becomes gradually, in a web, a tincture of various hues deposited by various dye-stuffs, so in that [*sphoṭa*] which is perfectly single, by the course of utterance does there take place a quite gradual tincture in the shape of each letter; and this is permanent, and it is this that the mind apprehends." He adds, that this *sphoṭa*—this substratum of unqualified but diversely qualifiable knowledge—is *one* thing, though "common to the denomination of jars, webs, &c;" and he mentions, that, in another work of his, the *Manjúshá*, he has shown how "the apprehension of the difference is reflectional,"—as when the pellucid crystal* assumes successively the hue of the red, blue, or yellow flower beside it.

This illustration of the web, to which a succession of tints may be communicated, reminds us of the contrivance of an editor in the backwoods of America, where printing materials were scarce. Each of his subscribers was provided with a towel, on which the current number of the journal was stamped, not with ink but with the black mud from the neighbouring swamp. When this had been duly perused by the family, the towel was washed and sent back to receive the next day's impression. The towel of the subscriber, like the *sphoṭa* of the Grammarian, remained one and the same towel throughout, whether serving as the substratum of a democratic harangue, a defence of repudiation, or an advertisement of wooden nutmegs.

We observed, that, by the Vedántin grammarians the *sphoṭa* is regarded as the sole entity:—with them the 'word, (*śabda*) is 'God' (*Brahma.*) This remarkable expression would require to be carefully considered when the question has reference whether to the adoption or the avoidance of such and such terms in conveying the doctrines of Christianity. The pandits furnish a striking exemplification of Bacon's remark, that, by men in general, "those things which are new in themselves will still be understood according to the analogy of the old." Employ a term that holds a definite place in any of the current systems, and the whole of the pandit's thoughts will immediately run in the mould of that system, to which he will strive to accommodate what he hears,—rejecting whatever refuses to be so accommodated. A pandit remarked to us one day, for example, that the very first verse of the Bible contained a palpable contradiction. "It is stated here," said he pointing to the first verse in the Sanskrit version of Genesis by the Baptist Missionaries, "that God, in the beginning, created Earth (*prithiví*) and Ether (*ákáśa*); and then it is added that the Spirit of God moved upon the face of the *Water*—an element the creation of which is nowhere mentioned in the chapter, the next verse going on to speak of the creation of Light. If Water and Air did not require to be created, why did the other three?" Here the unfortunate employment of the terms *prithiví* and *ákáśa* had marshalled his thoughts at once under the categories of the Nyáya. Our explanation, that the one term was intended to denote all the matter of this globe, and the other term all that is material, external to this globe, satisfied him that the contradiction did not exist which he had supposed; but he felt sure that the words would raise precisely the same notions in the mind of every Naiyáyika that they had raised in his own. The terms *bhúmi* and *diva*, not being technically appropriated, would be free from the objection.

K

* Cf. Sánkhya Aphorisms, §19. *c.* The word *sphota* is derived from *sphut* 'to open as a bud or flower,' being that by means of which each particular meaning is opened out and revealed. It means *meaning in general*, the foundation of all particular meaning.

Now ready.—Price Rs. 16.

A TRILINGUAL DICTIONARY; being a comprehensive Lexicon in ENGLISH, URDÚ and HINDÍ, exhibiting the syllabication, pronunciation, and etymology of English words, with their explanation in English, and in Urdú and Hindí in the Roman character, by Mathurá Prasáda Miśra, Second Master Queen's College, Benares.

May be procured direct from us, by Bangy Dâk; from any bookseller in Calcutta, Madras or Bombay; or from Trübner & Co., London.

Communications of a literary nature should be addressed to the EDITOR: *all letters on business, to the Proprietors,* MESSRS. E. J. LAZARUS & CO., *to whom Drafts should be made payable.* ADVERTISEMENTS *will be charged for according to the space occupied.*

The PANDIT may be ordered of the Publishers, or through MESSRS TRÜBNER and Co., LONDON.

Annual subscription, in advance, including postage, Rs. 12.

PRINTED AND PUBLISHED BY E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 7. Benares December 1st, 1866. Vol. I.

॥ प्रकरणपञ्चिकायां ॥

॥ प्रमाणपारायणे ॥

॥ अनुमानपरिच्छेदः ॥

श्रीरघुनाथभट्टेभ्योनमः ।

ज्ञातसम्बन्धनियमस्यैकदेशस्य दर्शनात् ।
एकदेशान्तरे बुद्धिरनुमानमबाधिते ॥ १ ॥

ज्ञातः सम्बन्धनियमो यस्य तस्यैकदेशस्य दर्शनादेकदेशान्तरे बुद्धिः सा ऽनुमानमित्यर्थः। कः पुनरयं सम्बन्धः।

अविनाभावस्तादात्म्यतदुत्पत्तिनिबन्धनइति केचित्। द्विविधोह्यर्थः। स्वविषयबोधजनकश्चातज्जनकश्च। तत्राद्ये प्रत्यक्षमेव प्रमाणं इतरस्यतु सत्तानिश्चयो दुर्लभएव। यज्जनितंहि यज्ज्ञानं तत्तेन विना सत्तामलभमानं तस्य सत्तां निश्चाययितुमलं। यस्यतु न स्वजनितं ज्ञानमस्ति तस्य सत्ता कुतो निश्चीयते। नचार्थान्तरजनितं ज्ञानं तत्सत्तां निश्चाययितुमलमविसंवादनियमे कारणाभावात्। तस्यतु तदविनाभावित्वे युक्तो ऽविसंवादनियमः। पारम्पर्येणापिहि यत्प्रतिबद्धं तत्तदविसंवादकं भवत्येव। धूमादिजन्यंहि पावकादिज्ञानं धूमाद्यविनाभावि। धूमादिकमपि पावकाद्यविनाभावीति तदविसंवादनियमोपपत्तिः। अविनाभावनियमश्च नाप्रतिबद्धस्योपपद्यते। प्रतिबद्धश्च तादात्म्येन तत्कार्यतयावा सम्भवेन्नान्यथा। तदुक्तं। कार्यकारणभावाद्वा स्वभावाद्वा नियामकात्। अविनाभावनियमो ऽदर्शनान्न न दर्शनात्। सपक्षे दर्शनमात्राच्चाविनाभावनियमो नापि विपक्षे ऽदर्शनमात्रादित्यर्थः। कार्यंहि कारणायत्तात्मलाभं न कारणेनविना भवितुमलमित्यविनाभावनियमकारणम्। यदात्माच यो भावस्तंविना स कथं भवेदिति तादात्म्येपि युक्तएवाविनाभावनियमः कार्यकारणभावावगमस्तु प्रत्यक्षानुपलम्भदर्शने सम्भवति। सत्यग्नौ धूम उपलभ्यते ऽसत्यग्नौ सत्स्वपि तदितरेषु कारणेषु नोपलभ्यतइत्येतावदेवच कार्यस्य कार्यत्वं यत्तस्मिन्सत्येव भावो ऽसतिच तस्मिन्नभावइति। तन्मात्रानुबन्धसिद्ध्याच तादात्म्यसिद्धिः। तन्मात्रानुबन्धसिद्धिरपि विपक्षे बाधकप्रमाणप्रवृत्त्यायत्ता। बाधकंच प्रमाणमनुपलब्धिरूपमेव। सर्वप्रतिषेधानामनुपलब्धिनिबन्धनत्वात्। तदाह। यावान्कश्चित्प्रतिषेधः स सर्वो ऽनुपलब्धेरिति।

तदिदमनुपपन्नं। तथाहि। अग्नावसति धूमइतितावत्प्रत्यक्षेणावगम्यतां असतित्वग्नौ धूमो नास्तीति किं प्रमाणं। नन्वनुपलब्धिलिङ्गकमनुमानमेवेति। अनुपलब्धावपितर्ह्यभावः पर्येषितव्यः। सतावच्च तादात्म्येन तन्मात्रानुबन्धेनहि तादात्म्यं सिध्यति। तन्मात्रानुबन्धसिद्धिरपि विपर्यये बाधकप्रमाणप्रवृत्तेः। अनुपलब्धिरेवच बाधकं प्रमाणं। सर्वनिषेधानामनुपलब्धिसाधनत्वात्। बाधकप्रमाणभूतानुपलब्धावपिचोक्तेन न्यायेनानुपलब्ध्यन्तरापेक्षायामनवस्थाप्रसङ्गात्। नापि तदुत्पत्त्या ऽविनाभावसिद्धिः। कार्यकारणभावविपक्षानुपलब्धिसापेक्षत्वेनानवस्थाप्रसङ्गादेव। तदेवं तदुत्पत्तेरविनाभावावसायो दुर्लभः। तादात्म्येनापि तादात्म्यस्यानुपलब्धिनिबन्धनतन्मात्रानुबन्धसिद्ध्यधीनत्वादनवस्थाप्रसङ्गादेवाविनाभावो दुरवसेयः। किञ्च यदपि यस्य कार्यं तदपि तेनविना किमिति न भवति। कारणाभावादितिचेत्। कारणाभावे कार्यं न भवतीत्येतदेव कुतः। अकारणस्य नित्यं सत्त्वमसत्त्वंवा स्यादिति कादाचित्कत्वात् कारणेनविना कार्यं न भवतीति निश्चीयते। तदुक्तं। नित्यं सत्त्वमसत्त्वंवा हेतोरन्यानपेक्षणात्। अपेक्षातोहि भावानां कादाचित्कत्वसम्भवइति। अतएवच कारणान्तरादपि कार्यस्य सम्भवो निरस्तः। कारणान्तरजन्मनोहि कार्यस्य द्वयमपि कारणं न स्यात्। एकत्र भवतो ऽन्याभावेपि भावात्। ततश्चाकारणत्वापत्तेः कादाचित्कत्व-

Digitized by Google

विरोधइतिचेत् । न । अनपेक्षस्य नित्यं सत्त्वमसत्त्वमित्यस्यैव निश्चयस्य प्रमाणाभावेनानवकॢप्तेः । कादाचित्कत्वस्य सापेक्षत्वं व्यापकमुपलब्धं । व्यापकाभावेच व्याप्यं न भवतीत्यनपेक्षस्य कादाचित्कत्वानुपपत्तेस्तस्य नित्यं सत्त्वमसत्त्वंवा स्यादिति निश्चीयतइतिचेत् । न । व्यापकाभावे व्याप्यं नास्तीत्यस्यैव निश्चयस्यानवकल्पनात् । किञ्चातद्वात्मनोऽतत्कार्यभूताच्च रसाद्रूपानुमानं न स्यात् । यदि तादात्म्यतदुत्पत्तिभ्यामेवाविनाभावनियमः । अथोच्यते । रसस्तावत्कार्यतया रसहेतुमनुमापयति प्रवृत्तसामर्थ्यरूपोपादानकारणसहकारीच स रसहेतूरसं जनयतीति तादृशस्वहेत्वनुमानेन रसाद्रूपहेतोः प्रवृत्तसामर्थ्यस्यानुमानं । प्रवृत्तसामर्थ्याच्च कारणात्कार्यभूतस्य रूपस्यानुमानमिति । तन्न । लोकस्येत्थमप्रतीतेः । रूपमेव रसाल्लोकः प्रतिपद्यते । लौकिकीच प्रतीतिः परीक्षकैरप्यनुसरणीया । यत्रतु कारणात्कार्यानुमानं न तत्र हेतोः कार्यत्वं नापि तादात्म्यमिति नाविनाभावः स्यात् । अपिच चन्द्रोदयात्समुद्रवृद्ध्यनुमाने कृत्तिकोदयाच्च रोहिण्यासत्त्यनुमाने नैषापि कल्पना सम्भवति । तादात्म्येच यदनुमानं तदपि न साधीयः । सिद्धंहि लिङ्गं साध्यं लैङ्गिकं । न सिद्धस्य साध्यस्यच तादात्म्यमुपपद्यते । परमार्थतो वृक्षत्वशिंशपात्वयोर्भेदो नास्तीतिचेत् । न । वस्तुभूतसामान्यवादिनां भेदाभ्युपगमात् । काल्पनिकवादिनांत्वभेदो नास्ति भेदाभेदयोर्वस्तुविषयत्वात् । अपिच काल्पनिकमेव धर्मधर्मिविभागमाश्रित्यानुमानानुमेयव्यवहारः तत्र कल्पनावशाद्भेदएव वृक्षशिंशपात्वयोः । अथ भेदेपि शिंशपामात्रानुबन्धित्वाद्वृक्षत्वस्य शिंशपात्वं वृक्षत्वाविनाभावि । एवंतर्हि साधनधर्ममात्रानुबन्धित्वेनैवाविनाभावित्वं । तच्चाकार्यस्यातदात्मनोपि यदि सम्भवति तदा तस्यापि गमकत्वमुपपन्नं । सम्भवतिचान्यस्यापि तदितीहैव वक्ष्यामः । एतेनैव न्यायेन येपि कार्यकारणभावसंयोगसमवायैकार्थसमवायविरोधाख्यान् पञ्च सम्बन्धानस्येदं कारणं कार्यं सम्बन्ध्येकार्थसमवायि विरोधिचेति लौकिकमित्यनुमानकारणमाहुस्तेपि निराकृताः । समुद्रवृद्ध्यादौ यथोदितसम्बन्धाभावेप्यनुमानदर्शनात् । संयोगसमवायैकार्थसमवायास्तु नानुमानोत्पत्तौ कारणं । नहि कमण्डलुना छात्रानुमानं । नापि रूपादेः पृथिव्याद्यनुमानं । नापि रूपाद्रसानुमानमिति । यच्च विरुद्धस्यानुमानत्वोदाहरणं । भूतं वर्षणकर्माभूतस्य वाय्वभ्रसंयोगस्यानुमापकं । तथाऽभूतं वर्षणकर्म भूतस्य वाय्वभ्रसंयोगस्यानुमापकमिति । तदनुपपन्नं । भावाभावयोरत्र गम्यगमकता । नच तयोर्विरोधोस्ति । नियमानुगमव्याप्तिरूपास्तु सम्बन्धाएवानुपपन्नाः । क्रियागर्भत्वात्सम्बन्धस्य । अग्न्यादीनांच धूमादीन्प्रति अनुगमननियमनव्यापनक्रियाऽसम्भवात् । तस्मात्कार्यकारणभावादयएव सम्बन्धा यस्य येन नियता अव्यभिचारिणः स हेतु रिति दर्शयितुं ज्ञातसम्बन्धनियमस्येत्युच्यते । धूमस्यहि कार्यकारणसम्बन्धो नियतो ऽग्नेस्त्वनियतः । तथा रसस्य रूपेणसहैकार्थसमवायलक्षणः सम्बन्धो नियतो न रूपस्य रसेन । गन्धस्य पृथिव्यासह समवायलक्षणः सम्बन्धो नियतो न रसादीनामिति । अनया दिशा सर्वहेतुषु सम्बधे नियमो ऽनुसरणीयः ।

किंपुनः सम्बन्धनियमावगमे प्रमाणं नतावत्प्रत्यक्षं । सन्निहितदेशवर्तमानकालवस्तुविषयनियमात् । येनहि प्रमाणेन सर्वदेशेषु सर्वकालेषुच धूमादीनामग्न्यादिसम्बन्धो ऽवगम्यते तेन तेषां सम्बन्धनियमो ऽवगम्यते । नच प्रत्यक्षं तत्र समर्थं । कतिपयदेशकालगतसम्बन्धावगममात्रेणाच नियमो ऽनावगम्यते । अग्नेरपि सम्बन्धनियमप्रसङ्गात् । नाप्यनुमानेन सम्बन्धनियमावसायो ऽनवस्थाप्रसङ्गात् । शास्त्रंत्वपूर्वकार्यार्थविषयनियतप्रामाण्यमत्र शङ्कामपि नायाति । तथोपमानमपि सादृश्यमात्रविषयं नात्र प्रमाणं । अर्थापत्तिरपि सम्बन्धनियमसापेक्षा ऽनवस्थाप्रसङ्गादेव नानुमानवत्प्रमाणं । सम्बन्धनियमकल्पनयाचविना कस्यानुपपत्तिः । धूमादीनामग्न्यादिकार्यत्वस्येतिचेत् । न । वन्हिकार्यस्यापि धूमस्यान्यकार्यत्वसम्भवात् । न दृश्यते तावदन्यकार्यतेतिचेत् । सत्यं । तथापि शङ्कानिराकरणमशक्यं । कारणभेदे कार्यभेदादेकस्यानेकस्माद्भवो नोपपद्यतेइतिचेत् । न । यद्यपि क्वचित्कारणभेदे कार्यभेदो दृश्यते तथापि न सर्वत्रैव तथेति शक्यमवधारयितुं । अतो ऽग्निकार्यस्यापि धूमस्य देशान्तरे कालान्तरेवा कारणान्तरादपि सम्भवाशङ्कया न सम्बन्धनियमाध्यवसानं युक्तं । शतशो ऽग्नौ धूमदर्शनं शतशश्चानग्नौ धूमादर्शनं सम्बन्धनियममन्तरेण नोपपद्यतइति यद्युच्येत । तन्न । यत्र यदाच दर्शनमदर्शनंवा तत्रतदाचैव सम्बन्धभावाभावाभ्यां तदुपपत्तेर्देशान्तरे कालान्तरेच भावाभावनिश्चयायोगादिति नार्थापत्त्या सम्बन्धनियमसिद्धिः ।

कश्चित्तु मानसं प्रत्यक्षमत्रप्रमाणमित्याह तदनुपपन्नं । मनश्चेद्बहिर्विषये कारणान्तरनिरपेक्षं प्रवर्त्तेत तदा सर्वः सर्वदर्शी स्यादविशेषात् । अथ भूयोदर्शनसंस्कारसचिवं बहिरपि प्रवर्त्तेत इत्युच्यते । तन्न । संस्कारस्य स्मृतिमात्रहेतुत्वादधिकार्थपरिच्छेदासम्भवात् । किञ्च यद्यपि सर्वप्रमाणसाधारणं मनस्तथापि न सर्वं मानसं प्रत्यक्षं किन्त्वसाधारणकारणानुप्रवेशेन प्रमाणान्तरव्यवहारः । एवंचेदसाधारणभूयोदर्शनसंस्कारानुप्रवेशात्प्रमाणान्तरमापद्येत । अपिच भूयोदर्शनापेक्षाविशेषादग्नावपि सम्बन्धनियमज्ञानं किं न स्यात् । तथाभूतमपि तद्व्यभिचरति ततो नानुमानमितिचेत् । धूमोपि तर्हि न व्यभिचरिष्यतीति किं प्रमाणं । अपिचासत्यां गतौ मानसं प्रत्यक्ष-

Digitized by Google

मित्याश्रीयते अस्तिचान्या गतिरिति वक्ष्यामः ।

अत्रोच्यते । वन्हिधूमादीनांतावत्संयोगादिसम्बन्धः प्रत्यक्षादिभिरवसीयते । तत्रापि संयोगो विशेषणत्वेन गुणादीनां द्रव्यपरतन्त्रस्वभावत्वात् । विशेष्यतयाच स्वतन्त्रभूतं द्रव्यं प्रकाशते । देशकालावपि विशेषणत्वेनैवावभासतः । सन्निहितदेशवर्त्तमानकालताहीदन्ता । साच विशेषणमेव । एवञ्च देशकालाभ्यां संयोगादिसम्बन्धेनच विशिष्टौ द्रव्यभूतौ वन्हिधूमाववगम्येते नपुनर्देशकालाभ्यां सम्बन्धस्य विशिष्टस्यावगतिः । तथाहि । संयुक्ताविमाविति प्रतियन्ति नपुनरयमनयोः संयोगइति देशकालानवच्छिन्नः प्रथममग्निधूमयोः संयोगलक्षणः सम्बन्धो द्वयोरप्यवगम्यते । तत्रापि कदाचिदग्नेर्धूमासंयुक्तस्याप्यवगमात् संयोगासंयोगयोश्च परस्परविरोधात्कालभेदमाश्रित्याविरोधः कल्प्यते । तेनाग्नेर्धूमसम्बन्धस्य कालावच्छेदो ऽनुप्रवेक्ष्यते । धूमस्यतु कदाचिदप्यग्निसंयोगरहितस्यावगमो नास्ति । यद्यपिच घटादिवर्त्ती धूमो विनाप्यग्निसंयोगं वर्त्तते तथापि यादृशस्यानवच्छिन्नोदयस्य गगनतलवर्त्तिनो लिङ्गत्वमिष्यते तादृशस्य नास्त्येवाग्निसंयोगविरहिणो दर्शनमिति तस्याग्निसंयोगो देशकालानवच्छिन्नो धूममात्रानुबन्धी नियतइति निश्चीयते । तथाचसति धूमसत्त्वैव देशान्तरे कालान्तरेवा प्रमाणमपेक्षते नतु तस्यां सत्यामग्निसंयोगः । तस्य धूममात्रानुबन्धित्वेनावगमात् । नन्वग्नावसंयुक्तस्यापि दर्शनाददृष्टोप्यन्यसंयोगो धूममपिप्रत्याशङ्कामर्हति । उच्यते । वह्नेरार्द्रेन्धनोपाधिको धूमसम्बन्धयोगस्तदभावे भवत्येव वह्नेर्धूमसंयोगाभावः । धूमस्यतु वह्निसंयोगो नौपाधिकः । कथमसौ नभविष्यतीत्याशङ्क्यते । कथमनौपाधिकावगमः । प्रयत्नेनान्विष्यमाणे औपाधिकत्वानवगमात् । तच्चैतद्भूयोदर्शनायत्तमिति मन्वाना आचार्या भूयोदर्शनमदृष्टवंतः । नन्वेवं सम्बन्धनियमावसायसमयएव यावद्धूमादिभावितया वह्न्यादिसम्बन्धस्यावगतत्वाद् धूमादिसत्तानिश्चयादधिकं निश्चेतव्यं नावशिष्यते इत्यनुमानमप्रमाणं स्यात् । सत्यं । स्यादनधिगतार्थगन्तृ प्रमाणमिति प्रमाणलक्षणं स्यात् । अनुभूतिस्तु प्रमाणमित्युक्तं । धूमाच्चाग्निज्ञानमनुभवाकारप्रवृत्तं धारावाहिकवत् । नचात्र स्मृतिप्रमोषकल्पना प्रत्युत्पन्नकारणासम्भवात् । अनुभवकारणासम्भवेन शुक्तिकारजतादिषु स्मृतिप्रमोषः प्रतीत्यनारूढोप्याश्रितः । इहतु सम्बन्धनियमस्मरणमेकदेशदर्शनंवा ऽनुभवकारणमस्तीति यथाप्रतीत्यनुभूतिरूपतैवाश्रयितुमुचितेति युक्तमेवानुमानस्य प्रामाण्यं । केचित्तु देशकालातिरेकेण प्रत्यभिज्ञानरूपमनुमानमाहुः । तदयुक्तं । लिङ्गस्यहि देशकालावतिरिच्येते । अशेषदेशकालवर्त्तिनस्तु लिङ्गस्य लैङ्गिकसम्बन्धः सम्बन्धनियमावधारणसमयएवावधृतो ऽन्यथा सम्बन्धनियमएवानवगतः स्यात् । एतेन विशेषे ऽनुगमाभावः सामान्ये सिद्धसाध्यतेति प्रत्युक्तं । धूमवताद्युपलक्षितानां देशकालविशेषाणां सम्बन्धनियमावधारणात् । योयो धूमवान्सर्वो ऽग्निमानिति । यःकश्चिद्येन यस्येह सम्बन्धो निरुपाधिकः । प्रत्यक्षादिप्रमासिद्धः स तस्य गमको मतइति सङ्ग्रहश्लोकः । ज्ञातसम्बन्धनियमस्यचैकदेशस्य स्मरणेनोपकारकं । लैङ्गिकैकदेशविषयं सम्बन्धनियमं स्मरतः पुरुषस्य नियतसम्बन्ध्येकदेशदर्शनाद्या बुद्धिस्तदनुमानं । एकदेशश्चाश्रित उच्यते । एकदेशान्तरदृत्पन्नैकदेशशब्द आश्रितवचनएव । नचाश्रितस्याश्रयमन्तरेण सम्भवोस्तीति आश्रयाक्षेपे नैकदेशाभ्यां भिन्नस्याश्रयस्याक्षेपः । एकाक्षेपेणैवोपपत्तेः । अपिचान्तरशब्दोपि समानाश्रयएव समर्थितो भवति । अतश्चैकाश्रयाश्रितयोरेव गम्यगमकतोक्ता । उदाहरणंतु महानसादौ ज्ञाताग्निसंयोगनियमस्य धूमस्य पर्वतोपरिवर्त्तिनो दर्शनात्पर्वतनितम्बगतेग्नौ ज्ञानं । ननु नितम्बोपरिदेशयोर्भेदाच्चैकाश्रयाश्रितत्वमग्निधूमयोरिति कथमनुमानं । तस्माद्धूमाश्रितो ऽग्निसंयोगः साध्यते । तदाश्रितंच धूमत्वं हेतुरिति युक्तं । उच्यते । नतावदेवं सर्वत्र लोकस्य प्रतीतिः किन्तु पर्वतादिगतमप्यग्निं लोको ऽनुमिनोति । नचाश्रयभेद एकत्वात्पर्वतावयविनस्तदाश्रितत्वादग्निधूमयोः । नितम्बोपरिभागौतु तस्यैवावयवाविति न कश्चिद्दोषः । अत्रच ज्ञातसम्बन्धनियमस्येत्यनेन ज्ञातशब्देनासाधारणस्याहेतुत्वमुक्तं । यथा रसवती गन्धवत्त्वादिति । अस्त्येवहि गन्धाख्यस्यैकदेशस्य रसाख्येनैकदेशेनैकार्थसमवायलक्षणः सम्बन्धो नियतः । सतु सम्बन्धनियमो न प्रतीतपूर्वः । पृथिवीव्यतिरेकेणान्यत्र गन्धस्यावर्त्तमानत्वात् । पृथिव्याश्च जिज्ञासितधर्मत्वात् । सचायमसाधारणः संशयहेतुरितिचेत् । तदयुक्तं । योहि येन सम्बद्धो दृष्टः स तमुपकल्पयितुमलं यश्चोभयधर्मसम्बन्धी प्रतीतः स उभयोः स्मृतिं जनयन्नेकस्योभयात्मकत्वविरोधात्सन्देहमापादयति । यस्यतु केनचिदपिसह सम्बन्धो नावधारितः स क्वचिदपि स्मृतिं जनयितुमक्षम इति कथं संशयं प्रसुवीत तस्माद्धर्मिस्वरूपवदसाधारणोपि धर्मो न संशयहेतुः । सम्बन्धग्रहणेनच बाधकस्य हेत्वाभासत्वमुक्तं । यथा नित्यः शब्दः कृतकत्वादिति । कृतकत्वस्यहि नित्यत्वेनसह सम्बन्धएव नास्ति किन्त्वनित्यत्वेनैवसहायं प्रतीतसम्बन्धनियमः स्वसामर्थ्येनानित्यत्वमुपस्थापयन्नित्यत्वं बाधतइति सिषाधयिषितधर्मबाधाद्बाधको हेत्वाभासः । नियमग्रहणेनच साधारणस्य निरासः । यथा नित्यः शब्दः प्रमेयत्वादिति प्रमेयत्वस्य नित्यत्वेन सम्बन्धोस्ति ज्ञातश्च किंत्वनियतो नित्येष्वपि प्रमेयत्वदर्शनात् । संशयहेतुश्चायं नित्यत्वानित्यत्वोभयसम्बन्धा-

Digitized by Google

अवगमात्। उभयत्र स्मृतिजनकत्वादेकस्यच धर्मिणो नित्यानित्यत्वविरोधात्। सचायमनैकान्तिकइति गीयते। तथैकदेशदर्शनादित्यनेकदेशभूतस्य हेत्वाभासत्वमुक्तं। यथा व्योम प्रत्यक्षं रूपवत्त्वादिति। रूपवत्त्वं व्योमैकदेशत्वेनासिद्धं। उन्मीलितेहि चक्षुषि गृहोपदारादिषु यद्रूपमुपलभ्यते तत्तैजसमोदकंवेत्युक्तं तत्वालोके। तथा यस्य पक्षंप्रत्येकदेशत्वमनेकदेशत्वंच तस्याप्यतएव निरासः। यथा वेदः कृतक उपाख्यानात्मकत्वादिति। विधिभागंत्वुपाख्यानात्मकता न व्याप्नोति। ननु धूमोपि न हेतुः स्यात्। कृत्स्नपर्वतव्यापकत्वाभावात्। मैवं। तत्रावयवी पर्वत एकस्तस्यैकदेशएव धूमः। इहतु न वेदावयव्येकइति युक्तं भागासिद्धत्वं। दर्शनग्रहणेन स्वरूपासिद्धं हेत्वाभासं दर्शयति। यथा बुद्धो धर्माधर्मौ प्रत्यक्षमीक्षते सर्वज्ञत्वादिति नहि बुद्धस्य सर्वज्ञत्वं केनचिदपि प्रमाणेनावगन्तुं शक्यतइत्युक्तं। तथा विद्यमानस्याप्येकदेशस्य यावद् दर्शनं नास्ति तावदहेतुत्वमुक्तं। यथान्धकारे धूमस्य। एकदेशान्तरइति स्वतन्त्रस्याग्न्यादेर्गम्यत्वं निराकरोति। अन्तरग्रहणेनच भिन्नाधारयोर्गम्यगमकभावो निराकृतः। ननु चन्द्रोदयात्समुद्रवृद्ध्यनुमाने कृत्तिकोदयाच्च रोहिणीसन्निधानकल्पने कथं समाश्रयत्वं। अत्रोच्यते। एककालवर्त्तित्वं चन्द्रोदयसमुद्रवृद्ध्योः सम्बन्धस्तत्र कालएवैक आश्रयइति। तथा कृत्तिकोदयरोहिण्यासत्त्योरप्येकाहोरात्रवर्त्तित्वेन सम्बन्धः। तेन कृत्तिकोदयादहोरात्रजएवासन्नरोहिण्युदयो ऽनुमीयते। एतेन मध्यगतनक्षत्रदर्शनादष्टमनक्षत्रास्तमयोदयानुमानमुक्तं। अधो नदीपूराच्चोपरिवर्षणानुमानमप्येवमेव वर्णयितव्यं एकाहि नदी तत्राप्याश्रयइति। पित्रोस्तु ब्राह्मणतया यत्पुत्रस्य ब्राह्मण्यानुमानं केचिदिच्छन्ति तत्प्राभाकरा नानुमन्यन्ते। ब्राह्मणभूताभ्यांहि पितृभ्यामुत्पत्तिरेव ब्राह्मणता नान्या। तेन ब्राह्मणशब्दवाच्यस्त्रीपुंसप्रसूतत्वादन्यद्ब्राह्मण्यं नास्तीति नास्त्यनुमानानुमेयभावः। अबाधितइत्यनेन प्रमाणान्तरबाधिते विषये नानुमानमुत्पद्यतइति दर्शयति। यथा वह्निरनुष्णो द्रव्यत्वादिति। ननु द्रव्यत्वस्यानुष्णत्वेनसह सम्बन्धएव नास्ति वह्नावेवासत्यनुष्णत्वे द्रव्यत्वस्य दर्शनात्। तेन सम्बन्धनियमाभावादेवानुमानानुदयो नपुनर्बाधितत्वादिति। उच्यते। यदि बाधितविषयेप्यनुमानमुत्पद्यते तदा द्रव्यत्वस्य सम्बन्धनियमाभावएव न भवेत्। वह्नेरप्यनुमानेनैवानुष्णत्वस्य सिद्धत्वात्। सर्वत्रानुमाने ऽनुमित्सितविषयनिरपेक्षमेव सम्बन्धावधारणमुपयोगि। द्रव्यत्वस्यच वह्निनिरपेक्षं सर्वत्रानुष्णत्वेनसह सम्बन्धनियमावधारणं जातमिति तद्बलेनानुमानोदये पाश्चात्योपि सम्बन्धनियमभङ्गो नात्मानं लभते। तस्माद्बाधितविषयत्वादेवानुमानानुदयात्सम्बन्धनियमोपि भज्यतइत्यबाधितविषयत्वमनुमानस्य कारणं। अतो द्रव्यत्वं वह्नौ प्रत्यक्षबाधितविषयं नानुमानमुत्पादयति। अनुमानबाधोदाहरणं। शब्दः श्रोत्रग्राह्यो न भवति गुणत्वादित्यनुमानस्य विषयो ऽनुमानेन बाधितः। यद्विषयाहि यत्प्रतीतिर्यत्कारणिका तदिन्द्रियं तस्य ग्राहकमुच्यते। शब्दविषयायाश्च प्रतीतेरन्वयव्यतिरेकाभ्यां श्रोत्रकारणत्वमवगम्यते। अनुपहतेहि श्रोत्रे शब्दप्रतीतिरुपजायते उपहतेच नोपजायतइति श्रोत्रान्वयव्यतिरेकानुकारिणी शब्दप्रतीतिः श्रोत्रकारणिका तदन्वयव्यतिरेकानुविधायित्वंहि तत्कारणत्वे नियतसम्बन्धं। अतः शब्दप्रतीतिः श्रोत्रकारणिका श्रोत्रान्वयव्यतिरेकानुविधायित्वादित्यनेनानुमानेन श्रोत्रग्राह्यत्वमवधृतंसद् यो वादी नास्तीत्याह तस्यानुमानमनुमानेन बाध्यते। ननु सम्बन्धनियमग्रहणतत्स्मरणैकदेशदर्शनसापेक्षस्यानुमानस्यार्थान्तरावगमनिरपेक्षोत्पत्तिकं प्रत्यक्षं शीघ्रजन्मतया ऽवश्यंभावितयाच विषयहानादुत्पत्तिं प्रतिबध्नाति अनुमानेनत्वनुमानस्य कथमुत्पत्तिप्रतिबन्धइति वक्तव्यं। उच्यते। येननाम श्रोत्रग्राह्यत्वं शब्दस्य निराकर्त्तव्यं तेनावश्यं ग्राह्यग्राहकसम्बन्धः प्रथममवगन्तव्यः। अन्यथा निषेधानवकल्पनात्। अवगतमेव वस्तु विषयान्तरे प्रतिषिध्यते नतु सर्वथानवगतमेव। तेनान्यत्रग्राह्यग्राहकसम्बन्धमभ्युपगच्छताङ्गीकृतातावदन्वयव्यतिरेकानुविधायितालिङ्गकस्यानुमानस्य प्रवृत्तिरिति शीघ्रभाव्यनुमानमनुमानान्तरस्य विषयमपहरद्बाधकतां प्रतिपद्यते। यथानुमानपूर्वकानुमानात्प्रत्यक्षपूर्वकमनुमानं प्रथमभावि तथा प्रसिद्धाङ्गकमनुमानं प्रसाध्याङ्गकादनुमानादाशुतरभावीति वेदितव्यं। शास्त्रेणचानुमानस्य विषयापहारः। यथा नास्ति कर्मफलसम्बन्धइति। अवश्यम्भाविताच प्रत्यक्षवदागमस्याप्यनुसरणीया। उपमानबाधस्तु न गौर्गवयसदृशइति। अर्थापत्त्याचानुमानविषयापहारो यथा जीवन्देवदत्तो वेश्मन्यविद्यमानो बहिरपि नास्तीति।

शेष उत्तराङ्के।

सेनापतिं नन्दनमन्धकद्विषो
युद्धे पुरस्कृत्य बलस्य शासवः ।
सैन्यैरुपैतीति सुरद्विषां पुरो
ऽभूत् किंवदन्ती हृदयस्य कम्पिनी ॥ १ ॥
चमूपतिं मन्मथमर्द्दनात्मजं
विजित्वराभिर्विजयश्रिया श्रितम् ।
श्रुत्वा सुराणां पृतनाभिरागतं
चित्तेश्चिरं चुक्षुभिरे महासुराः ॥ २ ॥
समेत्य दैत्याधिपतेः पुरःस्थिताः

किरीटबद्धाञ्जलयः प्रणम्य ते ।
न्यवेदयन् मन्मथशत्रुसूनुना
युयुत्सया जम्भजितं समागतम् ॥ ३ ॥
दासीकृताशेषजगत्त्रयं तु मां
जिगाय युद्धे कतिशः शचीपतिः ।
गिरीशपुत्रस्य बलेन साम्प्रतं
ध्रुवं विजेतेव सकाकु सो ऽहसत् ॥ ४ ॥
ततः क्रुधा विस्फुरिताधराधरः
स तारको दर्पितदोर्बलो बलात् ।
युद्धे त्रिलोकीजयकेलिलालसः
सेनापतीन् सन्नहनार्थमादिशत् ॥ ५ ॥
महाचमूनामधिपाः समन्ततः
सन्नह्य सद्यः सुतरामुदायुधाः ।
तस्थुर्विनम्रक्षितिपालसङ्कुले
तदङ्गणद्वारि बहिःप्रकोष्ठके ॥ ६ ॥
स द्वारपालेन पुरः प्रदर्शितान्
कृतानतीन् बाहुवरानधिष्ठितान् ।
महाहवाम्भोधिविधूननोद्धतान्
ननन्द पश्यन् पृतनाधिपान् बहून् ॥ ७ ॥
ततोवलारातिबलातिशातनं
दिश्यन्तिदानद्रवतानिनःस्वनम् ।
महीधराम्भोधिनिवारितक्रमं
ययौ रथं घोरमथाधिरुह्य सः ॥ ८ ॥
युगक्षयक्षुब्धपयोधिनिःस्वना-
श्चलत्पताकाकुलवारितातपाः ।
धरारजोग्रस्तदिगन्तभास्कराः
प्रतिप्रयातं पृतनास्तमन्वयुः ॥ ९ ॥
चमूरजः प्राप दिगन्तदन्तिनां
महासुरस्याभिसुरं प्रसर्पतः ।
दन्तप्रकाण्डेषु सितेषु शुभ्रतां
कुम्भेषु दानाम्बुघनेषु पङ्कताम् ॥ १० ॥
महीभृतां कन्दरदारणोल्बणै-
स्तद्वाहिनीनां पटहस्वनैर्घनैः ।
उद्वेजिताश्चक्षुभिरे महार्णवा
नभःस्रवन्ती सहसा ऽभ्यवर्द्धत ॥ ११ ॥

सुरारिनाथस्य महाचमूस्वनै
विगाह्यमाना तुमुलैः सुरापगा ।
अभ्युच्छ्रितैरूर्मिशतैरवारितै-
रप्लावयन्नाकनिकेतनावलीः ॥ १२ ॥
अथ प्रयाणाभिमुखस्य नाकिनां
द्विषः पुरस्तादशुभौघदायिनी ।
मुहुर्महारिष्टपरम्परा परा
परापतन्मृत्युमहापताकिनी ॥ १३ ॥
भविष्यदैत्याशनकेलिकामिनी .
द्युपक्षिणां घोरतरा परम्परा ।
दधौ पदं व्योम्नि सुरारिवाहिनी
रुपर्युपर्यत्यनिवारितातपा ॥ १४ ॥
मुहुर्विभिन्नातपवारणध्वज-
श्चलद्धराधूलिकुलाकुलेक्षणः ।
अनाश्रमातङ्गमहारथव्रजा-
नवेत्यमाणः प्रसभं प्रभञ्जनः ॥ १५ ॥
सद्योविभिन्नाञ्जनपुञ्जसन्निभा
मुखैर्विषाग्निं विकरन्त उच्चकैः ।
पुरःपथोत्पातमहाभुजङ्गमा
भयङ्कराकारभृतो भृशं ययुः ॥ १६ ॥
मिलन्महाभीमभुजङ्गभीषणं
प्रभुर्दिनानां परिवेषमादधौ ।
महासुरस्य द्विषतो नमत्सरा-
दिवात्तमास्वप्रयतुर्भयङ्कराः ॥ १७ ॥
त्विषामधीशस्य पुरोभिमण्डलं
शिवाः समेताः परुषं ववाशिरे ।
सुराधिराजस्य रणान्तशोणितं
प्रसह्य पातुं द्रुतमुत्सुका इव ॥ १८ ॥
दिवापि तारास्तरलास्तदानीं
परापतन्तीः परितोभिवाहिनीम् ।
विलोक्य लोको मनसा व्यचिन्तयत्
प्राणात्ययान्तं व्यसनं सुरद्विषः ॥ १९ ॥
चलद्भिरुच्चैरभितः प्रभाभरै
रुद्भासिताशेषदिगन्तराम्बरम् ।
रवेश्च रौद्रैश्च दिगन्तदारणं

पपात वज्रं नभसो निरम्बुदात् ॥ २० ॥
ज्वलद्भिरङ्गारचयैर्नभस्तलं
ववर्ष गाढं सहशोणितास्थिभि: ।
धूम्रं ज्वलन्त्यो व्यसृजन् मुखैरजो
दधुर्दिशो रासभकण्ठधूसरम् ॥ २१ ॥
निर्घातघोषो गिरिशृङ्गघातनो
धराम्बराशाकुहरोदरम्भरि: ।
बभूव भूम्ना श्रुतिभित्तिभेदन:
प्रकोपिकालोर्जितगर्जितस्वन: ॥ २२ ॥
चलन्महेभं प्रपतत्तुरङ्गमं
परस्पराश्लिष्टजनं समन्तात् ।
संक्षुभ्यदम्भोधि विभिन्नभूधरं
पुरो द्विषोभूदवनिप्रकम्पन: ॥ २३ ॥
ऊर्द्ध्वीकृतास्या रविदत्तदृष्टय:
समेत्य सर्वे ऽसुरविद्विष: पुर: ।
श्वान: स्वरेण श्रवणान्तशातिना
मिथोरुदन्त: करुणेन निर्ययु: ॥ २४ ॥
इति प्रपश्यन् परिणामदारुणां
महत्तरां गाढमरिष्टसन्ततिम् ।
दुर्दैवदृष्टो न खलो निवर्तते
क्रुधा प्रयाणव्यवसायतो सुर: ॥ २५ ॥
अरिष्टमाशंक्य विपाकदारुणं
निवार्यमाणो विबुधैर्महासुरै: ।
पुर: प्रतस्थे महतां वृथाभवे-
दसद्ग्रहान्धस्य हितोपदेशिता ॥ २६ ॥
शितो निरस्तं प्रतिकूलवायुना
तदीयचामीकरधर्मवारणम् ।
रराज मृत्योरिव पारणाविधौ
प्रकल्पितं राजतपानभाजनम् ॥ २७ ॥
विजानता भावि शिरोविकर्त्तनं
प्रस्तेन शोकादिव तस्य मौलिना ।
मुहुर्गलद्भिस्तरलैरलन्तरा
मरोदिमुक्ताफलबाष्पबिन्दुभि: ॥ २८ ॥
निवार्य्यमाणैरभितोनुयायिभि
र्गृहीतुकामैरिव तं मुहुर्मुहु: ।
अपाति गृध्रैरभिमौलिचाकुलै
स्तस्याननूत्थानविनाशदर्शिभि: ॥ २९ ॥
सद्योनिकृत्ताङ्गनसोदरं क्वचित्
फणामणिप्रज्वलदंशुमण्डलम् ।
निर्यद्विषोत्क्वाथतगर्भफूत्कृतं
ध्वजे जनस्तस्य महाहिमैक्षत ॥ ३० ॥
रथ्यस्य केशावलिकर्णचामरान्
ददाह आशासनबालबालधीन् ।
अखण्डनश्चण्डतरो हुताशन-
स्तस्यातनुस्यन्दनधूर्युगोद्गत ॥ ३१ ॥
इत्याद्यनिष्टैरशुभोपदेशिभि
र्विहन्यमानोप्यसुर: पुन: पुन: ।
यदा मदान्धो नच विन्यवर्त्तता-
म्बरे तदा ऽभून्महतां सरस्वती ॥ ३२ ॥
मदान्ध मागा भुजदण्डचण्डिमा-
वलेपतो मन्मथशत्रुसूनुना ।
सुरै: सनाथैस्त्रिदिवेश्वरादिभि-
स्समं समन्तात्समरे विजित्वरै: ॥ ३३ ॥
महासुरै: षड्दिनजातमात्रको
निदाघधामेव निशातमोभरै: ।
विमुह्यते सो ऽभिमुखं न सङ्गरे
कुतस्त्वियं तेनसमं विरोधिता ॥ ३४ ॥
अभ्रंलिहै: शृङ्गशतै: समन्ततो
दिक्चक्रवालस्थगितस्य भूभृत: ।
क्रौञ्चस्य रन्ध्रं शिखरे विनिर्म्ममे
येनाहवे तेन कुत: सहो भवान् ॥ ३५ ॥
लब्ध्वा धनुर्वेदमनङ्गविद्विष-
स्त्रिस्सप्तकृत्व: समरे महीभुजाम् ।
कृताभिषेको रुधिराम्बुभिर्घनै:
स्वक्रोधवह्निं शमयाम्बभूव य: ॥ ३६ ॥
न जामदग्न्य: क्षयकालरात्रिकृत्
स क्षत्रियाणां समराय वल्गति ।
येन त्रिलोकीतिलकेन तेन
कुतोवकाशो सह विग्रहग्रह: ॥ ३७ ॥
॥ युग्मम् ॥

Digitized by Google

श्रुत्वेति वाचं वियतो वरीयसीं
क्रोधादहङ्कारपरो महासुरः ।
प्रकम्पिताशेषजगत्त्रयोपि
प्राकम्पतोच्चैर्दिवमभ्यगात्ततः ॥ ३८ ॥
त्यजाशु दर्पं मदमूढ मास्मगाः
स्मरारिसूनोर्वरशक्तिगोचरम् ।
तमेव नूनं शरणं व्रजाधुना
जगत्प्रवीरं सुचिराय जीव तत् ॥ ३९ ॥
किं ब्रूथ हे व्योमचरा महासुरा
मखारिसूनुप्रतिपक्षवर्त्तिनः ।
मदीयबाणव्रणवेदनामहो-
धुनैवविस्मृत्य गताः स्वपृष्ठतः ॥ ४० ॥
कटुस्वरैरीरयथाम्बरास्थिताः
शिशोर्बलात् षड्दिनजातकस्य किम् ।
श्वानः प्रवृत्ताइव कार्त्तिकीनिशि
स्वैरं वनान्ते मृगधूर्त्तकाइव ॥ ४१ ॥
सङ्गेन वो भर्गतपस्विनः शिशु-
र्वराक एषो ऽन्तमवाप्स्यति ध्रुवम् ।
अतस्वरं तस्करसङ्गतो यथा
तद्वो निहन्मि प्रथमं ततस्त्वमुम् ॥ ४२ ॥
इतीरयत्युग्रतरं महासुरे
महाकृपाणं कलयत्यलं ध्रुवम् ।
परस्परोत्पीडितजानवो भया-
न्नभश्चरा दूरतरं विदुद्रुवुः ॥ ४३ ॥
ततोवलेपाद्विकटं विहस्य सो-
भिक्रोशमाधादसिमंशुभासुरम् ।
रथं द्रुतं प्राप्य वासवान्तिकं
व्रजेत्यवोचत्प्रतिसारथिं द्रुतम् ॥ ४४ ॥
मनोतिवेगेन रथेन सारथि-
प्रचोदितेन प्रचलन्महासुरः ।
ततः प्रपेदे सुरसैन्यसागरं
भयङ्कराकारमपारमग्रहः ॥ ४५ ॥
पुरः सुराणां पृतनां प्रथीयसीं
विलोक्य वीरः पुलकं प्रमोदजम् ।
बभार भूम्ना बहु बाहुदण्डयोः
प्रचण्डयोः सङ्गरकेलिकौतुकी ॥ ४६ ॥
ततोऽसुरेन्द्रानुचराश्चमूचरा
रणान्तलीलारभसेन भूयसा ।
पुरः प्रचेलुर्मनसो ऽतिवेगिनो
युयुत्सुभिः किं समरे विलम्ब्यते ॥ ४७ ॥
पुरःसरा दैत्यरिपोश्चमूचराः
सुरद्विषः सैन्यसमुद्रमभ्ययुः ।
भुजं समुत्क्षिप्य सहेलमात्मनो
ऽभिधानमुच्चैरभितो न्यवेदयन् ॥ ४८ ॥
पुरोगतं दैत्यचमूमहार्णवं
दृष्ट्वाऽभितश्चुक्षुभिरे ऽखिलाः सुराः ।
स्मरारिसूनोर्नयनैककोणके
ममौ पुरोभाविरणोहि हेलया ॥ ४९ ॥
द्विषद्बलत्रासविसङ्कुलां चमूं
दिवौकसामन्धकशत्रुनन्दनः ।
अपश्यदुद्वीक्ष्य महाहवे बलं
प्रसादपीयूषधरेण चक्षुषा ॥ ५० ॥
उत्साहिताः शक्तिधरस्य दर्शना-
न्मृधे महेन्द्रप्रमुखाःसुधाशिनः ।
अहंयुषो जेतुमरीनरीरम-
न्न कस्य वीर्याय वरस्य सङ्गतिः ॥ ५१ ॥
परस्परं वज्रधरस्य सैनिका
द्विषोपि योद्धुं प्रचरोद्धतायुधाः ।
वैमानिकैः श्रावितमानसत्क्रमा-
भिधानमीयुर्विजयैषिणो रणे ॥ ५२ ॥
सङ्ग्रामप्रलयाय सन्निपततो वेलामतिक्रामतो
वृन्दारासुरसैन्यसागरयुगस्यारोहदिग्व्यापिनः ।
कालातिथ्यपृथुप्रदानबहलःकोलाहलःक्रोधिनः
शैलोत्तालतटीविघट्टनपटुर्ब्रह्माण्डकुक्षिम्भरिः ॥५३॥
इति कुमारसम्भवे महाकाव्ये सुरासुरसैन्य-
सङ्घट्टोनाम पञ्चदशःसर्गः ॥

परिभाषेन्दुशेखरटिप्पणीसारासारविवेकः

॥ श्रीपरमेश्वराय नमः ॥

॥ प० ॥ (१) ननु लवहउङ्गणयोर्वकारस्यैवोपादाने-

नाणिग्ग्रहणेषु (२) सन्देहादनिर्णयोऽतआह । व्याख्यानतोविशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम् । विशेषस्यान्यतराद्यर्थरूपस्य (३) व्याख्यानात् शिष्टकृतात् प्रतिपत्तिर्निश्चयः (४) हि यतः सन्देहाच्छास्त्रमलक्षण (५) मननुष्ठापकं लक्षणमलक्षणं तथा न शास्त्रस्य निर्णयजनकत्वौचित्यादित्यर्थः । (६) असन्दिग्धानुष्ठानसिद्ध्यर्थेऽत्र शास्त्रे (७) सन्दिग्धोच्चारणरूपाचार्यव्यवहारेण सन्देहनिवृत्ते (८) व्याख्यानातिरिक्तनिमित्तानपेक्षत्वं बोध्यतइति यावत् । तेनाणुदित्सवर्णस्येत्येतत्परिहाय पूर्वेणाण्ग्रहणं परेणेण्ग्रहणमिति लणसूत्रे भाष्ये स्पष्टम् ॥ प० ॥

अथेमाः परिभाषाः सन्दर्भविशुद्धये प्रकरणशउपनिबद्ध्य व्याख्यातव्यास्तासां चात्र त्रीणि प्रकरणानि सम्भवन्ति । लक्षणत्वसम्पादनोद्देशः बाधबीजनिरूपणम् शास्त्रशेषश्चेति ।

तत्र प्रथमं व्याख्यानतइत्यारभ्यैकदेशविकृतमनन्यवदित्यन्तं प्रकरणं तत्रतत्र पदमर्थं वा परिपूर्य सन्देहं वा निराकृत्य कुत्र चित् कं चिद्धर्मं वारोप्य शास्त्रस्य पारमार्थिकबोधजनकत्वं सम्पादयन्तीभिः परिभाषाभिरुल्लसितं भवतीति लक्षणत्वसम्पादनोद्देशनामव्यवहार्यत्वमर्हति ।

पूर्वपरनित्यान्तरङ्गाणामित्यारभ्योभयनिर्देशे पञ्चमीनिर्देशोबलीयानित्यन्ते च द्वितीये प्रकरणे विरुद्धानां शास्त्राणां बाध्यबाधकभावे बीजानामुपन्यासात्तद् बाधबीजनिरूपणाख्यामर्हति ।

तृतीयं च प्रकरणं प्रातिपदिकग्रहणइत्यारभ्यानिबन्धसमाप्तेस्तत्र च प्रकरणद्वयशेषभूतानां परिभाषाणामुपन्यासात् पराभिमतानां संज्ञापूर्वकइत्यादीनां च परिभाषाणां खण्डनात् तच्छास्त्रशेषपदेन व्यवहारमर्हति ।

यथा साङ्ख्यसूत्रषष्ठाध्यायस्य पूर्वसिद्धान्तितार्थशेषोपन्यासात् नास्तिकादिमतानां निराकरणात् शास्त्रशेषाध्यायइति व्यवहारः ।

तत्र तृतीयं प्रकरणं शेषत्वादेवान्ते व्याख्येयम् । आद्ययोस्तु प्रकरणयोर्मध्ये बाधबीजनिरूपणप्रकरणे लक्षणयोर्विरोधज्ञानस्य मूर्द्धाभिषिक्तबीजत्वात्तस्य च वाक्यार्थज्ञानपरिपूर्तिपूर्वकत्वात्तस्याश्च लक्षणत्वसम्पादनोद्देशप्रकरणाधीनत्वादुपजीव्योपजीवकभावसङ्गत्या तदेव प्रकरणं प्रथमं निबन्धनीयम् तत्र च तात्पर्यनिर्णायकप्रमाणनिरूपणात् सर्वशास्त्रोपकारकत्वेन वर्णसमाम्नायस्यमहेश्वरीयणकारानुबन्धनज्ञापितत्वेन चाभ्यर्हितत्वात् प्रथमोपन्यासमर्हन्तीं परिभाषां व्याचिख्यासुरवतारयति । (१) नन्विति ।

(२) सन्देहादनिर्णयइति । तात्पर्यसन्देहाच्छाब्दबोधानुदयइत्यर्थः । नन्वादिरन्त्येनेतिशास्त्रेणाद्यन्ताक्षिप्तसमुदायघटकबोध्यस्येवाजादिपदप्रतिपाद्यतायाबोधितत्वेनाकारादिणकारान्तसमुदायान्तःपातिवर्णबोध्यतावच्छेदकरूपप्रकृताण्पदशक्यतावच्छेदकत्वावकारादिणकारान्तत्वेनानुगतरूपेणैव समुदायप्रवेशात्सङ्केतभेदाभावेन द्वयोरपि समुदाययोर्घटकबोध्यस्याण्पदजन्यबोधतात्पर्यकत्वनिश्चयस्य सम्भवात्सन्देहस्य नावकाशः। यथा पशुपदशक्यतावच्छेदके लोम्नामनुगतरूपेणैव प्रवेशात्तत्पशुपदधर्मिकः शुक्ललोमवल्लाङ्गूलावच्छिन्नबोधतात्पर्यकं वा नीललोमवल्लाङ्गूलावच्छिन्नबोधतात्पर्यकं वेति सन्देहोनावतरतीति चेत् । उच्यते । एवं सति वर्णसमाम्नायीयपूर्वणकारवैयर्थ्यापत्त्या प्रदर्शितधर्मस्याण्पदशक्यतावच्छेदकतायामनभ्युपगमेन त्रिकवृत्तिचतुर्दशवृत्त्योर्व्याप्यव्यापकयोरन्यतमत्वयोरेव तदवच्छेदकत्वस्य कल्पनेन नानार्थत्वात् सन्देहस्य निष्प्रत्यूहत्वात् ।

(३) व्याख्यानादिति । व्याख्यानंचेत्यमभियुक्तैः सङ्गृह्यते । पदच्छेदः पदार्थोक्तिर्विग्रहोवाक्ययोजना । आक्षेपोऽथ समाधानं व्याख्यानं षड्विधं स्मृतमिति ।

(४) हि यतइति । हिशब्दस्त्वर्थइति तु परे ।

(५) अननुष्ठापकं लक्षणमिति । लक्षणत्वं च बोधजनकत्वं । अनुष्ठापकत्वं च प्रवृत्तिप्रयोजकत्वम् । अनुष्ठानं हि प्रवृत्तिः । सा च प्रत्यासत्त्योच्चारणानुकूलैव विवक्ष्यते तदनुकूलश्चेष्टसाधनत्वप्रकारकज्ञानविधया साधुत्वनिश्चयः । तज्जनकत्वात् शास्त्रस्यापि प्रवृत्तिप्रयोजकत्वम् । एवं चानुष्ठापकत्वं शब्दविशेषधर्मिकसाधुत्वप्रकारकनिश्चयजनकत्वरूपं प्रकृते पर्यवसितम् । इत्थं च तात्पर्यसन्देहे शाब्दबोधो नोत्पद्यतइति मते प्रकृते लक्षणत्वमेव न भवितुमर्हति शाब्दसंशयवादिमते त्वनुष्ठापकता नेति योजनीयम् ।

(६) असन्दिग्धेति । भावेक्तः असन्दिग्धपूर्वकं लक्षणमिति मध्यमपदलोपी समासः ।

(७) सन्दिग्धेति । अर्थव्याप्यजन्यं सन्देहजनकमित्यर्थकम् ।

(८) व्याख्यानातिरिक्तनिमित्तानपेक्षत्वं बोध्यतइति । अयं भावः । तात्पर्यसन्देहे सति प्रकरणादिभिस्तन्निश्चयकरणस्य लोके परमप्रसिद्धत्वेन विनैव परिभाषारम्भं बोद्धारोव्याख्यानेन सन्दिग्धार्थकाणिणादिपदस्थले भगवतस्तात्पर्यं निश्चिनुयुरितीयं व्यर्था सती व्याख्यानस्येतरतात्पर्यनिश्चायकापेक्षया प्राबल्यं बोधयति । तथा च यत्र व्याख्यातृवाक्यप्रयोज्यतात्पर्यनिश्चयापेक्षया प्रमाणान्तरस्यान्यादृशतात्पर्यनिश्चयजनकत्वं सम्भाव्यते तत्र व्याख्यानेनैव तात्पर्यं निश्चेतव्यमिति पर्यवस्यति । तेन हृदयस्य हृल्लेखयदण्लासेष्वित्यत्र भगवताऽण्पदस्योपादानेन लिङ्गेन जायमानस्य लेखेत्यस्य घञन्तबो-

Digitized by Google

धतात्पर्यकत्वनिश्चयस्य न लक्ष्यसंस्कारोपयोगिवाक्यार्थबोधप्रयोजकत्वं किं तूत्तरपदाधिकारइतिपरिभाषाज्ञापकपरभाष्यप्रयोज्यस्याणान्तधर्मिकलेखपदजन्यबोधविषयत्वप्रकारकभगवत्तात्पर्यनिश्चयस्यैवेति सिद्धम्। तदेतद् बोधयितुमेव व्याख्यानापेक्षत्वं बोध्यतइति सरलमपहाय तदतिरिक्तनिमित्तानपेक्षत्वं बोध्यतइति वक्रोक्तिः। इत्थं च व्याख्यातृवचसां तात्पर्यग्राहकमुख्यत्वस्यैवेयं बोधिका भगवता महेश्वरेण सन्दिग्धार्थकणकारोच्चारणेन बोधितेति तदेतदर्थतः सिद्धं यथोत्तरं मुनीनां प्रामाण्यमिति। अस्य चोत्तरोत्तरमुनिबोधितेऽर्थएव पूर्वपूर्वमुनीनां तात्पर्यमित्येवार्थो न तूत्तरमुनिवचनविरुद्धपूर्वमुनिवचनस्याप्रामाण्यमित्यर्थः। मुनिवाक्यानामप्रामाणिकत्वस्य मुनीनामज्ञानस्य च कल्पनायाअयुक्तत्वादिति दिक्।

अत्राणुदित्सूत्रे परेणाण्ग्रहणमित्यंशे ज्ञापकं लणसूत्रस्यभाष्यप्रदर्शितमुर्ऋदितिसूत्रस्थं तपरकरणमणुदित्सूत्रस्थशब्दरत्ने प्रपञ्चितम्। तद्धि चुरादिण्यन्तात् कृतधातोर्लुङ्यचीकृतदित्यत्र ऋकारस्य स्थाने ह्रस्वएव यथा स्यादित्येतदर्थम्। पूर्वणाण्ग्रहणे तूद्देश्येन विधेयेन च ऋकारेणानण्त्वाद्विवकालाग्रहणेन न तस्य स्थानित्वं न वादेशत्वं प्रसक्तमिति व्यर्थं तत्स्यात्। न च तपरसूत्रेण लृकारग्रहणार्थं तत्। स्थानेन्तरतमपरिभाषया ऋकारस्थाने तस्य वारणेन तद्ग्रहणे फलाभावादितिप्रभृतिग्रन्थेन।

अत्रोदयङ्करः। यस्त्वित्यादिना प्रदर्शितं शब्दरत्नग्रन्थमनूद्य तच्च शङ्कैव तावन्न संगच्छते। सूत्रकारमते ऋकारलृकारयोः सावर्ण्याभावेन तद्ग्रहणस्य दूरापास्तत्वात्। वार्तिककृन्मते तत्सम्भवेऽपि अणुदित्सूत्रेऽण्ग्रहणस्य तेन प्रत्याख्यातत्वात् सन्देहाभावादितिग्रन्थेन दूषयामास।

तदेतद्दूषणमुद्दिधीर्षुणा मन्युदेवेन उरण्रपरइतिसूत्रे रप्रत्याहारस्य तव मते सत्त्वेन तस्य च तयोः सावर्ण्यसत्त्वएव सफलत्वेन सूत्रमतेऽपि तयोः सावर्ण्यानुमानात्। सिद्धान्ते रप्रत्याहारासम्भवेन तस्यानुमापकत्वासम्भवेऽप्यकोकिदीर्घइत्येव वाच्ये होतृलृकारइत्येतदर्थं कृतेनाकःसवर्णइतिसवर्णग्रहणेन प्रथमयोः पूर्वइत्येव वक्तव्ये गमॢनित्येतदर्थं कृतेन सवर्णग्रहणेन च सूत्रमते तयोः सावर्ण्यानुमानाच्चेत्यभ्यधायि।

तथैव भीमाचार्येणाप्यकःसवर्णइत्यत्रत्यसवर्णग्रहणस्य ऋकारलृकारयोः सावर्ण्ये ज्ञापकत्वमुपपादि।

तदेतदुभयमप्यसमीचीनमभिमन्यमानेनेन्दिरापतिकारेण तथान्यासस्य व्यक्तिपक्षे तदानन्त्यादियत्ताज्ञानाभावेन यथासङ्ख्यासिद्धौ सवर्णग्रहणस्य कृतार्थत्वादवक्तव्यत्वमेव। जातिपक्षे तु सवर्णाच्चवदिति न्यासेन तु सावर्ण्यम्। प्रथमयोः पूर्वसवर्णइत्यत्र पूर्वइति न्यासे पूर्वस्य दीर्घत्वाभावेन सामर्थ्यात्तत्सजातीयइत्यर्थकल्पनवद्दीर्घइत्यस्य निवृत्तेः कल्पनस्यापि सम्भवइति न सावर्ण्यानुमाने बीजमितिग्रन्थेन खण्डनमकारि।

तदिदमस्मभ्यं न रोचते। यथासङ्ख्यसूत्रस्येकोयणचीत्यत्रत्यशब्दरत्नोक्तदिशा धर्मसाम्येऽपि प्रवृत्तेः स्वीकारेण व्यक्तिपक्षेऽप्यकोकीति न्यासस्योद्भावयितुं शक्यत्वात्। एवं प्रथमयोरित्यत्र दीर्घइत्यस्य निवृत्तेः कल्पनं न शोभनम्। दीर्घपदनिवृत्तेः कल्पनेऽपि पूर्वसजातीयइत्यर्थस्यावश्यकल्पनीयत्वात्। परविभक्त्यवयवनिवृत्तिमात्रकल्पने शब्दानित्यत्वप्रसङ्गात् किं च परसजातीयइत्यर्थाकल्पने दीर्घपदनिवृत्तिमात्रकल्पनेऽमिपूर्वइति सूत्रस्य वैयर्थ्यप्रसङ्गः। किं च पूर्वस्य दीर्घत्वे एव तत्प्रवृत्तौ नादिचीति सूत्रस्य दीर्घाज्जसिचेतिसूत्रस्थदीर्घग्रहणस्य च वैयर्थ्यापत्त्या तत्सामर्थ्यादिति लेखनीये पूर्वस्य दीर्घत्वाभावेन सामर्थ्यादिति लेखोऽप्यसमञ्जसइति विभावनीयं सूरिभिः।

वस्तुतस्तूदयङ्करोमन्युदेवश्च द्वावपि स्थूलदृश्वानौ। तथाहि। अनुपदं दर्शितदिशा वार्तिककाराद्युक्तवचनेषु सूत्रकारानुमतत्वस्य निश्चयेन वार्तिककाराद्युक्तार्थज्ञानपूर्वकस्य कुलटायाबा कतन्तेभ्यस्तिरसस्तिर्यलोपइत्यादिप्रयोगस्य च दर्शनेन प्रकृतऋलृवर्णयोः सावर्ण्यवचनस्यापि सूत्रकारेण ज्ञातत्वस्य निश्चयात् सूत्रकारस्य सावर्ण्यवचनाज्ञानं वदन् वार्तिककारेण जातिपक्षे तत्प्रत्याख्यानेऽपि व्यक्तिपक्षे तत्प्रत्याख्यानाभावेन ऋकारलृकारयोः साजात्यमनुक्त्वा सावर्ण्यविधानस्वारस्येन वार्तिककृतोऽपि व्यक्तिपक्षाभ्युपगमस्य कल्पनेन तत्पक्षे वार्तिककृन्मतेऽप्यण्ग्रहणस्य सत्त्वात्सन्देहसम्भवेन वार्तिककृन्मते सन्देहाभावमुपपादयंश्चोदयङ्करः स्थूलदृश्वा। तदेतदज्ञात्वा बकबन्धनप्रयासायमानं ज्ञापकोपपादनप्रयासं कुर्वन् मन्युदेवोऽपि स्थूलदृश्वा। परमार्थतस्तु तदुपपादितज्ञापकान्यप्यसमीचीनान्येव। तथाहि। प्रथमं तावद् रप्रत्याहारस्य ऋलृवर्णयोः सावर्ण्यसत्त्वएव साफल्येन तत्सावर्ण्यानुमानं यदुक्तं तन्न समीचीनम् रप्रत्याहाराश्रयणसामर्थ्येन मनोरौवा वाद्रुहेत्यादिवत् स्थानेन्तरतमपरिभाषाबाधकल्पनेन ऋकारस्थानएवोभयोर्विधानापत्तेः। एवमकः सवर्णे प्रथमयोरित्यत्रत्यसवर्णपदयोरपि ज्ञापकत्वोपवर्णनमसमीचीनमेव। सावर्ण्यज्ञापनेऽपि वैयर्थ्यस्य तादवस्थ्यात्। अकोकीतिन्यासेऽप्यणुदित्सूत्रबोधिताकारसवर्णत्वादिवर्णसमाम्नायघटकाकारादिप्रतिपाद्यतावच्छेदकधर्मसाम्यमादाय यथासङ्ख्यसूत्रप्रवृत्तेः कल्पनेन होतृलृकारइत्यादावपि दीर्घसिद्धेर्निराबाधत्वात्। गम्लादेरनभिधानेन सवर्णग्रहणस्य गमॢनित्येतदर्थकत्वकल्पनाया अनुचितत्वादिति शम्।

Digitized by Google

काशीस्थराजकीयपाठशालायाम् ।
धर्म्मशास्त्राचार्यराजारामशास्त्री
साङ्ख्यशा०बालशास्त्री

THE THREAD OF GAUTAMA'S APHORISMS.

BY THE LATE DR. BALLANTYNE.

(From the Benares Magazine February 1852.)

It is curious that the Sanskrit word which is most conveniently rendered 'Aphorism'—i. e. a sentence with marked limits—"totus, teres, atque rotundus"—should mean literally a 'thread.' The Aphorisms of Hindu Philosophy offer at first sight much more the appearance of distinct beads, placed in rows indeed, but with no very obvious thread of connection. That there *is* a thread of connection we propose to show in the case of the first Book of GAUTAMA's Aphorisms, the groundwork of the Nyáya Philosophy. The Aphorisms, it will be seen, form a well-arranged and well connected string of texts; but this cannot be the reason why the name of 'thread' was given to each one of them separately. The name would, on that view, have belonged, more properly, in the singular, to the entire aggregate. Possibly the Aphorisms were called threads because with these the teacher wove the rich web of his philosophical exposition. If the name was an after-thought, it may have been given when commentators began to string comment after comment on each text of the master; but the relation of the threads to the web is more probably the one contemplated.

Of the five books into which the Aphorisms of GAUTAMA are divided, the first is a complete work in itself,—embracing, as it does, the whole range of topics which furnish matter for discussion in the remaining Books. Of this we propose now to give our version,—with a sprinkling of gloss within brackets. The 'general reader,' if he has not been repelled by the title of the article, had better skip the translation, and refer back to it in order to verify the estimate of GAUTAMA's method which we append to it.

SECTION I.

The end of the proposed Enquiry.

Aph. 1—Proof—[i. e. the instrument of right notion];—that which—[as having a proof]—is the object of right notion; doubt; motive; instance; demonstrated truth; confutation; ascertainment; disquisition; controversy; objection; semblance of a reason; perversion; futility; and occasion for putting down; from knowing the truth in regard to these [sixteen things], there is the attainment of Beatitude *(nihśreyasa.)*

Aph. 2.—Pain *(duhkha)*, birth *(janman)*, activity *(pravritti)*, fault *(dosha)*, false notions *(mithyá-jnána)*,—since, on the successive annihilation of these in turn, there is the annihilation of the one next it, there is Beatitude *(apavarga)*.

The remembering of the order of the steps towards Beatitude, in *Aph.* 2, may be facilitated, to some readers, by availing one's self of the distributively cumulative form of exposition employed in the nursery tale of "The House that Jack built." Thus—

DUHKHA.

This is the '*pain*' that the man had.

JANMAN.

This is the '*birth*'—again renewed—
That gave room for the 'pain' that the man had.

PRAVRITTI.

This is '*activity*'—requiring reward—
That led to the 'birth' (again renewed)
That gave room for the 'pain' that the man had.

DOSHA.

This is the '*fault*'—of 'desire, or 'dislike'—
Alike to be shunned—or 'stupidity'—which,
In the man who, if wise, had done nothing at all,
Begot the 'activity' (requiring reward)
That led to the 'birth' (again renewed)
That gave room for the 'pain' that the man had.

MITHYA'-JNA'NA.

This means the '*wrong-notions*' (of that man unversed
In the truth-teaching Nyáya Philosophy) which,
Since the man knew no better, gave rise to the 'fault'
Of 'desire' or 'dislike' or 'stupidity,' which,
In the man who, if wise, had done nothing at all,
Begot the 'activity' (requiring reward)
That led to the 'birth' (again renewed)
That gave room for the 'pain' that the man had.

APAVARGA.

This last is '*beatitude*'—promised as fruit
Of the truth-teaching Nyáya Philosophy, which
Gives us *right* ones instead of the '*wrong* notions,' which
Gave rise to what GAUTAMA styles a 'fault'
Inasmuch as it mischievously begot
The 'activity' carefully shunned by the wise;—
For 'activity'—shaping itself in acts
That are good or bad, and require reward
Of a like description, occasions a man
To be born again,—and 'twas this same fault
That gave room for the 'pain' that the man had.]*

* Mr. Colebrook, in his celebrated Essay on the Nyáya, (see Essays, vol. I) stating concisely the Nyáya view of the attainment of beatitude, describes (at p. 290) soul as "not earning fresh merit or demerit by deeds done with desire." Here he makes, as GAUTAMA does, the 'desire' (which is one of the three meant by the technical word *dosha* 'fault'—see the Essay, p. 290, I. 1,) to be the producer of acts, from which acts, in turn, arises merit or demerit. But, at p. 289, when he says "From acts proceed faults *(dosha)*; "including under the designation, passion or extreme desire; aversion or "loathing; and error or delusion *(móha)*," he adopts an order the reverse of that enjoined in GAUTAMA's 8th Aphorism. If the passage in the Essay be correctly edited, it would seem as if Mr. Colebrooke, when giving to his Essay a final revision after having laid it aside for a time, had been struck with the oddness of the expression that "from faults proceed acts," and had reversed it without adverting to the technical definition of 'faults,' in the same sentence, as the *passions* which give *rise* to action. GAUTAMA, the votary of Quietism, gives to the passions the name of 'faults, with a significance akin to that which the word bore in the remark of Talleyrand on the murder of the Duc D'Enghien—"ce n'était pas une crime—c'était une *faute*;"—it was an absolute *blunder*. The wise man, according to GAUTAMA, is he who avoids the three *mistakes* of having a liking for a thing, and acting accordingly; or of having a dislike for a thing, and acting accordingly; or of being *stupidly* indifferent, and thereupon acting; instead of being *intelligently* indifferent, and not acting at all.

Digitized by Google

SECTION. II.

The Instruments available in prosecuting the Enquiry.

Aph. 3.—Proofs—[i. e. see § 1—instruments of right notion]—are (1) the deliverances of sense; (2) the recognition of signs; (3) the recognition of likeness; and (4) words.

Aph. 4.—By a deliverance of sense is meant knowledge which has arisen from the contact of a sense with its object—[and this knowledge may be] indeterminate [as when one in consequence preceives 'this is *something*'—we know not, or think not, what; but] not erroneous—[for, if erroneous, it would be no 'instrument of right notion:'—or it may be] determinate—[such a degree of attention having been exerted as to determine that 'this is so and so—and not any thing else.]

Aph. 5.—Now the recognition of a sign, which is preceded thereby—[i. e. is preceded by a deliverance of sense—else the recognition of the sign were impossible]—is of three kinds—(1) having [as the sign] the *prior*, or (2) having [as the sign] the *posterior*, or else (3) [consisting in] the *perception of homogeneousness.*

[By 'prior'—the author means a '*cause*,'—from which, when recognised, its effect may be inferred as about to follow. So again, by 'posterior' he means an '*effect*'—from which, when recognised, one can infer that such and such a cause has been at work. By the 'perception of homogeneousness' he means the recognition of the subject as being referable to some class, and as being thence liable to have predicated of it whatever may be predicable of the class. The three 'signs' belong to the three arguments 'à priori,' 'à posteriori,' and 'from analogy.']

Aph. 6.—The 'recognition of likeness' is the instrument [in the ascertaining] of that which is to be ascertained through its similarity to something [previously] well known.

Aph. 7.—A 'word' [κατ' ἐξοχην] is the precept [or instructive assertion] of one worthy [to have his words implicitly accepted as an authority.]

Aph. 8.—It [i. e. a 'word'] is of two kinds, in respect that it may be that 'whereof the matter is seen,' or that 'whereof the matter is unseen'—[i. e. it may be susceptible of verification or not susceptible of verification.]

SECTION III.

The Objects about which the Enquiry is concerned.

Aph. 9.—But soul, body, sense, sense-object, knowledge, the mind, activity, fault, transmigration, fruit, pain, and beatitude, are what we ought to get right notions regarding.

Aph. 10.—Desire, Aversion, Volition (*prayatna*), Pleasure Pain, and Knowledge, are the signs [i. e. the characteristics] of the Soul.

Aph. 11.—The body is the site of [muscular] action (*cheshtá*), of the organs of sensation (*indriya*), and of the sentiments [of pain or pleasure experienced by the soul].

Aph. 12.—The organs of sensation [originating, or not differing], from the Elements, are Smell, Taste, Sight, Touch, and Hearing.

Aph. 13.—Earth, Water, Light (*tejas*), Air, Ether,—these are the Elements (*bhúta*).

Aph. 14.—Their 'objects' (*artha*) are the qualities of Earth, &c. viz., odour, savour, colour, tangibility, and sound.

Aph. 15.—Understanding (*buddhi*), apprehension (*upalabdhi*) knowledge (*jńána*)---these are not different in meaning.

Aph. 16.—The sign [i. e. the characteristic] of the Mind (*manas*) is [that habit in virtue of which] it does not give rise simultaneously to notions [more than one].

Aph. 17.—Activity is that which originates the [utterances of the] voice (*vák*), the [cognitions of the] understanding, and the [gestures of the] body.

Aph. 18.—Faults [or failings] have the characteristic that they cause Activity.*

Aph. 19.—'Transmigration' [or mortal life] means the being produced again [and again].†

Aph. 20.—'Fruit' is that thing which is produced by Activity and by [the originator of Activity—viz., our constitutional faults or] Failings.—[see §18.]

Aph. 21.—'Pain' is that which is in the shape of Vexation.

[The word 'pain,' (according to the commentator) in a secondary sense‡ of the term, is employed to denote the body, the senses and their objects, since these are the instruments of pain, and to denote *pleasure*, because of its being ever closely connected with pain. And only therefore (i. e. since the one term 'pain' implies the *whole* of these) is 'pain' referred to, in the aphorism following, by the term 'that.']

Aph. 22.—Absolute deliverance from that [i. e from pain as understood in its widest acceptation] is 'Emancipation.'

SECTION IV.

Completing the Topic of the Pre-requisites of Reasoning.

Aph. 23.—Doubt is a conflicting judgment [in regard to one and the same object] respecting its distinction [or precise character;—this conflicting judgment arising] from unsteadiness in the recognition [of some mark which, if we could make sure of it, would determine the object to be so and so], or [from unsteadiness] in the non-recognition [of some mark which, were we sure of its absence, would determine the object to be *not* so and so;—this state of things, moreover, resulting] from the recognition [in the object] of [only such] properties [as are] common [to a variety of things, and therefore not distinctive,] or of several properties [such as cannot really belong to one and the same thing] or from conflicting testimony.

* Mr. Colebrooke appears to have viewed these '*producers* of Activity' as 'the *products* of Activity,'—for, with reference to this, GAUTAMA's definition of 'fault' (*dosha*), he says—(see Essays, vol. I, p. 289. —"From acts proceed faults (*dosha*): including under this designa-) tion, passion," &c. See further in our note on *Aph.* 2.

† Mr. Colebrooke's definition of *pretyabháva* as the "condition of the soul after death"—(see Essays, vol. I, p. 290)—while it is literally correct, may mislead the reader if he does not bear it in mind that this, according to Hindu notions, is the condition of every man *now alive*—for, as we are all supposed to have lived and died no one knows how often, we are each of us always in the condition "*after death*."

‡ This is what is to be understood by the varieties of evil which Mr. Colebrooke (Essays vol. I, p. 290) mentions as "primary or secondary." It is not *degrees* of evil that are to be understood as thus referred to; but, the author, we are told, chooses to employ the word 'pain' *technically*—in a 'transferred sense'—to denote the *causes* of pain also, as well as pain itself.

Digitized by Google

SECTION V.

Of Positions, not familiar, that may be employed in reasoning without requiring to be each time demonstrated.

Aph. 26.—A 'Tenet' [*siddhánta*] is that, the steadfastness of the acceptance of which rests on a treatise [of weight and authority].

Aph. 27.—['Tenets' are divided into the species that are described in the succeeding aphorisms] through the difference between a 'Dogma of all the schools,' a 'Dogma peculiar to some school,' a 'Hypothetical Dogma,' and an 'Implied Dogma.'

Aph. 28.—That [position or tenet] which is not in opposition to any of the schools, and which is claimed [as a tenet] by [at least] some one school, is [what we mean by] a 'Dogma of all the schools.'

Aph. 29.—That [position] which is [held] established, in the same school, and which in another school [is regarded as] not established, is [what we mean by] a 'Dogma peculiar to some school.'

Aph. 30.—That, if which be [held] established, there is the establishing of another point, is [what we mean by] a 'Hypothetical Dogma.'

Aph. 31.—An 'Implied Dogma' is determined by the mention of a particular fact in regard to any thing, not expressly declared in an aphorism, [our knowledge of the fact coming so immediately] from what *is* recognised, [by the maker of the aphorisms, as to render a demonstration superfluous—the act being thus entitled to rank not as a deduction but as a dogma].

SECTION VI.

The Method of Argumentative Exposition.

Aph. 32.—The members [of a demonstration] are (1) the Proposition, (2) the Reason, (3) the Example, (4) the Application, and (5) the Conclusion.

Aph. 33.—The 'Proposition' is the declaration of what is to be established.

Aph. 34.—The 'Reason' is the means for the establishing of what is to be established; [and this force it may derive either] from the Example's having a character which involves another, or through the Example's wanting a character the want of which involves the absence of another.

Aph. 35.—The 'Example' is some [undisputed] 'familiar case of a fact' [see *Aph.* 25], which, through its having a character which is invariably attended by what is to be established, establishes [in conjunction with the Reason] the existence of that character which is to be established.

Aph. 36.—Or the 'Example', on the other hand, wanting some character the want of which involves the absence of some given character, [may co-operate in establishing what is to be established] by a process the converse of that [declared in the preceding aphorism].

[As when we argue that the vapour seen rising from a lake is *not* smoke, because a lake is invariably devoid of fire.]

Aph. 37.—The 'Application' is the re-statement of that in respect of which something is to be established,—this re-statement declaring it to be *so* or *not so* as regards the Example.'

Aph. 38.—The 'Conclusion' is the re-statement of the Proposition' [as being now authorized] by the mention of the 'Reason.'

SECTION VII.

Concluding the Topic of Demonstration.

Aph. 39.—'Confutation' [which is intended] for the ascertaining of the truth in regard to a question, the truth in regard to which is not accurately apprehended—is reasoning from the supposition of [the cessation of] the cause [to the cessation of the effect—for, on the admitted cessation of the cause, the observed resulting phenomenon ought of course to cease also].

Aph. 40.—'Ascertainment' is the determination of a question by [hearing] both what is to be said for and against it, after having been in doubt.

SECTION VIII.

The Topic of Controversy.

Aph. 41.—'Discussion' is the undertaking—[by two parties respectively—of the one side and the other in regard to what [conclusion] has been arrived at by means of the five-membered [process of the demonstration already explained—see §32;—this procedure] consisting in the defending [of the proposition] by proofs [on the part of the one disputant] and the assailing it by objections [on the part of the other,—the discussion being conducted on both sides] without discordance in respect of the tenets [or principles on which the conclusion is to depend].

Aph. 42.—'Wrangling,' consisting in the defence or attack [of a proposition] by means of frauds [see §50], futilities [see §58], and what procedure deserves [nothing but] an indignant] rebuke [see §59], is what takes place after the procedure aforesaid—[that is to say, after a fair course of argumentation,—supposing this to have failed to bring the disputants to an agreement].

Aph. 43.—That—[viz. Wrangling, §42,]—when devoid of [any attempt made for] the establishing of the opposite side, of the question, is Cavilling.

SECTION IX.

Of Fallacies, or what only look like reasons, by means of which a man may deceive himself or another.

Aph. 44.—The Semblances of a reason are (1) the Erratic, (2) the Contradictory, (3) the Equally available on both sides (4) that which is in the same case with what is to be proved, and (5) the Mistimed.

Aph. 45.—That [semblance of a reason] is Erratic which arrives at more ends than the one [required].

Aph. 46.—That [semblance of a reason] is the Contradictory which is repugnant to what is proposed as that which is to be established.

Aph. 47.—That from which a question may arise as to whether the case stands this way or the other way, if employed with the view of determining the state of the case, is [a mere semblance of a reason—being] equally available for both sides [of the dispute].

Digitized by Google

Aph. 48.—And it [the alleged reason] is in the same case with what is to be proved, if, standing itself in need of proof, it does not differ from that which is to be proved.

Aph. 49.—That [semblance of a reason] is Mistimed which is adduced when the time is not [that when it might have availed].

Section X.

Of the Tricks employed by the dishonest disputant to thwart the other party.

Aph. 50.—'Unfairness' [in disputation] is the opposing of what is propounded by means of assuming a different sense [from that which the objector well knows the propounder intended his terms to convey].

Aph. 51.—It is of three kinds, (1) Fraud in respect of a term, (2) Fraud in respect of a genus, and (3) Fraud in respect of a trope.

Aph. 52.—'Fraud in respect of a term' is the assuming a meaning other than [the objector well knows] was intended by the speaker when he named the thing by a term that happened to be ambiguous.

Aph. 53.—'Fraud in respect of a genus' is the assuming that something is spoken of in respect whereof the thing asserted is impossible, because [forsooth] this happens to be the same in kind with that of which the thing asserted *is* possible.

Aph. 54.—'Fraud in respect of a trope' is the denial of the truth of the matter, when the assertion was made in one or other of the modes, [viz literal or metaphorical,—which it suits the purpose of the objector to invert].

Aph. 55.—Fraud in respect of a trope [§54—some one may fancy at first sight]—is just Fraud in respect of a term [§52], for it does not differ therefrom.

Aph. 56.—It is not so—[as supposed in §55]—because they do differ [although, it may be, agreeing in the respect just mentioned].

Aph. 57.—Or if there were no distinction where there is *any* similarity of character, we should have but *one* kind of Fraud.

Section XI.

Of futile Objections and hopeless Stupidity.

Aph. 58.—'Futility' consists in the offering of objections founded on [some mere] similarity or difference of character [without regard to the question whether the fact asserted bears any invariable relation to that character].

Aph. 59.—'Unfitness to be argued with' consists in one's stupidly] misunderstanding or *not* understanding at all.

[The term here rendered 'Unfitness' to be argued with signifies literally the place, i. e. the suggester, of censure or rebuke;—for if a man stupidly misunderstands you, or does not understand you at all, and yet still persists in trying to make a show of opposition, then the matter has come to that point where there is nothing left for it but to rebuke him as a blockhead, and to turn him out or quit his company.]

Aph. 60. Since there are various kinds, there are many sorts of 'Futility' and of 'Unfitness to be reasoned with'—[but, as other questions are more pressing, their subdivision is not made here].

Let us bestow a retrospective glance on this Lecture in which Gautama lays down the plan of the whole Nyáya system; and let us enquire whether Gautama's exposition is obnoxious to such a charge as is brought against it, for example, by Dr. Ritter, who says, (at p. 366, Vol. iv. of the English version of his History of Philosophy,) "In its "exposition the Nyáya is tedious, "loose, and unmethodical. Indeed the whole form of "this Philosophy is a proof of the incapacity of its expositors to enter into the intrinsic development of ideas, "whatever knowledge they may have possessed of the "external laws of composition." Setting aside the latter of these sentences, which has possibly been mistranslated, we venture to say that the Nyáya—up to the point that we have here reached in Gautama's exposition of it—can be tedious only to him who does not understand it or who has no taste for philosophical enquiries; that it can appear loose to any one only as the chain-cable heaped upon the deck of a man-of-war appears loose in the eyes of the landsman who never saw it stretched; and that it can appear unmethodical only to him who has failed to discern its method. We blame no one for having failed to discern its method, but we do blame those, including Dr. Ritter, who, having failed to discern it, take upon them to deny its existence. The method in Gautama's exposition is, one might think, sufficiently clear. Let us try to make it if possible clearer. Aiming at this, we shall now give our Synopsis of Gautama's method, noting, in each instance, as we go along, the Aphorism to which our statements have reference.

Gautama starts with the grand question of all questions—the enquiry as to how we shall attain the *summum bonum*,—the 'chief end of man,' as the Westminster Catechism literally represents the Sanskrit *paramapurushártha*. The general answer to this he states in his first aphorism—where he lays down further the position that deliverance from evil can be reached only through knowledge of the truth. [see §1.]

Few are likely to dispute this first position—[those few being such as are to be remitted to the category noticed under §59,]—and the next question is,—have we *instruments* adapted to the acquisition of a knowledge of the truth? According to Gautama we are furnished with four instruments adapted to this purpose. [These he enumerates in §3, and describes severally in §4—8.]

Digitized by Google

But, if we have instruments, let us know what are the *objects*, in regard to which it is worth while obtaining a correct knowledge by means of the appropriate instruments. [These he enumerates in §9, and he defines them severally in §10—22.]

But the bare enunciation and definition of these Objects does not ensure a correct and believing knowledge of them. [The state intermediate between hearing and believing, viz. Doubt, he defines in §23.]

But how is a man to get out of doubt? He will be content to remain in doubt if there be no *motive* for enquiring further. [Here—§24—he takes occasion to explain what constitutes a Motive.]

But, in every enquiry, to reach the unknown we must start from the *known*;—there must be *data*. The knowledge which, in any enquiry, we may treat as requiring no demonstration, is either popular—being that on which the unlearned and the learned are at one—the only ground available in dealing with the unlearned [see §25]; or it is scientific—belonging to the schools [see §26]. This latter, again, is divisible into four—viz., tenets received in every school [§27]; tenets peculiar to particular schools, and furnishing the grounds of *argumenta ad hominem* only [§20]; tenets postulated, and available only where the hypothesis is conceded [§30]; and tenets which, though not expressly laid down by the founders of the schools, are yet so clearly implied as to require no special demonstration, being inevitable Corollaries [§31].

The data being determined, it is proper to determine the order of procedure in demonstrating thereby something not granted. [This order of procedure is intimated in §32 and explicated in §33—38.]

(To be continued.)

THE SÁHITYA-DARPAŃA,

OR

MIRROR OF COMPOSITION.

(Continued from page 86.)

TEXT.

No. 645. When the letters, *under a particular disposition*, induce the shape of the lotus &c., it is termed the Fancy Ornament (Chitra).

COMMENTARY.

a. By the '&c.' are implied a sword, a drum, a wheel, the *Gomútriká** and others.

b. The letters, though striking through that particular disposition of them in writing, being tropically identified with the *vocal* letters striking by means of that particular *succession in which they come in* contact with the ether of the ear, it is reckoned an ornament of word.

c. Among its *many* varieties, the composition of the Lotus is instanced in *this couplet of* mine:—

मारमासुषमा चारुरुचा मारवधूत्तमा ।
मात्तधूर्त्ततमावासा सा वामा मेऽस्तु मा रमा ॥

"Mára-má-sushamá cháru-ruchá Mára-vadhúttamá
Mátta-dhúrttatamávásá sá vámá me 'stu má Ramá."

(May that lovely lady be mine, who equals Káma's mother—*Lakshmí*, in beauty, who, in fair radiance, excels his consort—I care not for Fortune, no I never care for that goddess, who takes her dwelling with the vilest rogues.)

This Composition of an Octopetalous Lotus has its letters, *or rather syllables*, in the primary quarters coalescent by exit and entrance, but not so in the secondary quarters, the syllable of the pericarp, *which is repeated eight times*, being of course coalescent.† Similarly may the composition of the sword &c. be inferred.

* According to the *Saraswatí-kanthábharana* (another Rhetorical work) the uneven flow of a cow's urine is what is meant here.

† This requires explanation. First draw a lotus of eight petals pointing respectively to the eight quarters. Begin with reading and writing the first syllable मा (*má*) in the seed-vessel, go out into the eastern petal with the next two syllables रमा (*ra-má*), then enter, at its point, the south-eastern petal, with the next two syllables सुष (*su-sha*), then come back to मा (*má*) in the seed-vessel, make your exit by the southern petal, with चारु (*chá-ru*), return the same way, with रुचा (*ru-chá*), to मा (*má*), and so on reading two syllables in each petal, but repeating them inversely in the four primary ones, till you make your final entrance into the seed-vessel through the same petal (the eastern) that you first started by.



Digitized by Google

TEXT.

No. 646.—The Enigma *(Prahelikā)*, which, being opposed to flavour, is no ornament and is *as useless and ugly* in poetry as a hump *in the human body*, is not dwelt upon here. It consists merely in a turn of words, in the shape of the want and addition of a syllable, &c.

COMMENTARY.

a. The expression 'in the shape of the want and addition of a syllable' implies three varieties of the enigma, viz. (1) one with a syllable wanting, (2) with a syllable added, and (3) with a syllable wanting and a syllable added. For example:—

कूजन्ति कोकिलाः साले यौवने फुल्लमम्वुजं ।
किं करोतु कुरङ्गाक्षी वदनेन निपीडिता ॥

"Kújanti kokiláh sále, yauvane phullamambujam,
Kiṅ karotu kuraṅgákshí vadanena nipíḍitá."

(The kokils warble on the mango tree, the lotus blooms in the water: what may the fawn-eyed lady do, oppressed as she is by love? *)

Here '*sále*' being said for '*rasále*,' the *syllable* '*ra*' is wanting; '*yau*' is added in '*yauvane*' which is read instead of '*vane*,' '*ma*' is omitted and '*va*' added in *vadanena* used in place of '*madanena*.'

b. By the '&c.' (in the text) is meant the concealment of a verb, a case or the like. Of these the concealment of a verb, as:—

पाण्डवानां सभामध्ये दुर्य्योधन उपागतः ।
तस्मै गाञ्च हिरण्यञ्च सर्व्वाण्याभरणानिच ॥

"Páṇḍavánáṅ sabhá-madhye Duryodhana upágatah,
Tasmai gáñcha hiraṇyañcha sarváṇyábharaṇánicha."

(In the midst of the assembly of the Páṇḍavas, came Duryodhana: to him land and gold and all ornaments.)

Here the verb '*aduh*' (they gave) is concealed in '*duryodhanah*' which is to be analysed into '*aduh yah adhanah*;' *the enigma being explained—Any pauper that entered the assembly of the Páṇḍavas, they gave him land &c.* So in the other *varieties*.

c. Now the occasion having arrived for treating of the ornaments of sense, and those that are founded on similitude, as being the principal, having to be defined *first*, he begins with stating the ornament of simile, which, even of these, forms the essence.

TEXT.

No. 647. A resemblance between two things, EXPRESSED by a SINGLE sentence, and unaccompanied with a contrast *or difference*, is *termed* Simile.

* Rendered according to the riddle it would read thus: "The kokils warble on the Sál tree, the lotus blooms in youth: what may the fawn-eyed lady do, distressed as she is by the face."

COMMENTARY.

a. In the Metaphor (*rúpaka*—§ 669) and the like the resemblance is suggested; in the Dissimilitude or Contrast (§ 700) the difference too is expressed; in the Reciprocal Simile (see § 667) there are employed two sentences; and in the Comparison Absolute (§ 666) there is only one object compared, *i. e. compared to itself.* Thus we see the difference of the present Ornament.

TEXT.

No. 648. This is Complete, when the common attribute, the words implying comparison, the object compared and that compared to, are *all* expressed.

COMMENTARY.

a. 'This'—i. e. the Simile. The 'common attribute' i. e. the quality or action of two objects which occasions their similitude, such as charmingness or the like.—'Words implying comparison' such as '*iva*' (as) or the like.—'The object compared' i. e. a face, for instance. 'The object compared to'—for example, the moon.

TEXT.

No. 649. This again is Direct (śrautí) when *the comparison is expressed by* such words as '*yathá*,' '*iva*,' '*vá*' (all answering to the English *as*) or by the affix '*-vat*' as equivalent to '*iva*;' Indirect (árthí) when such words as '*tulya*' (equal) '*samána*' (like) &c., are employed, or the affix '*-vat*' in the sense of 'equal.'

COMMENTARY.

a. Though the particles '*yathá*,' '*iva*,' '*vá*' &c., *or the English* '*as*,' are equivalent to the terms '*tulya*' (like) &c., used in the other sort of Simile, yet since they at the very hearing convey the notion of the relation of similarity between the objects compared together, their employment makes a Simile direct. So in the employment of '*-vat*,' when affixed *locatively or possessively* in the sense of '*iva*' (as) according to *Páṇini's* rule "*Tatra Tasyeva* (V., 1, 116)."

The terms 'like' &c., on the other hand, rest with the object compared, as in 'The face is like the lotus;' or with the object to which the comparison is made, as in 'The lotus is the like of the face;' or with both, as in 'The lotus and the face are alike:' so it is through our looking after their *implied* sense that these words come to express a comparison and consequently their use makes a Simile indirect, or virtual *(árthí)*.* So in the case of the employment of '*-vat*' in the sense of 'like' according to the rule "*Tena tulya*" &c., (Páṇini V,1,115)

* The particles '*iva*' &c., implying, as they do, nothing else but resemblance in the abstract, directly express a comparison. While the words 'like,' 'equal' &c. being concrete terms do not directly convey the abstract notion of resemblance, but through calling up the idea of *something resembling*, which has to be apprehended in identity with what they are put in apposition to (*viz.*, any one of the objects compared together or both), before the comparison can be perceived.

Digitized by Google

TEXT.

No. 649.* The two *kinds are possible* in a nominal affix (taddhita), a compound, and in a sentence *or phrase.*

a. 'The two *kinds*'—i. e. the Direct and the Indirect

b. For example:

सौरभमम्भोरुहवन्मुखस्य कुम्भाविवस्तनौ पीनौ ।
हृदयं मदयति वदनं तव शरदिन्दुर्यथा बाले ॥

'Saurabhamambhoruhavanmukhasya kumbháviva stanau pínau
Hridayañ madayati vadanañ tava śaradinduryathá bále."

(The fragrance of thy mouth is as-*the-odour-of*-the lotus, thy breasts are plump as-jars, and thy countenance, O girl, gladdens the heart as the autumnal moon.)

Here, '*ambhoruha-vat,*' '*kumbháviva,*' *and* '*śaradinduryathá*' are respective instances of the three varieties of the direct *Simile.*

मधुरः सुधावदधरः पल्लवतुल्यो ऽतिपेलवः पाणिः ।
चकितमृगलोचनाभ्यां सदृशी चपले च लोचने तस्याः ॥

"Madhurah sudhávadadharah pallava-tulyo'tipelavah páṇih
Chakita-mṛiga-lochanábhyáñ sadṛiśí chapale cha lochane tasyáh."

(Sweet like-ambrosia is her under-lip, soft like-the-tender-leaf is her hand, and her eyes are tremulous like those of the frightened deer.)

Here the Indirect Simile, in its three kinds, is respectively exemplified in '*sudhá-vat,*' '*pallava-tulyah*' and '*chakita-mṛigalochanábhyáñ sadṛiśí.*'

TEXT.

No. 650. Thus the complete Simile is sixfold.

COMMENTARY.

a. *The text* is clear.

TEXT.

No. 651. It is Elliptical when one, two, or three of *the four* beginning with the 'common attribute' (see § 648) are omitted, and this also, like the former (the complete simile) is direct or indirect.

COMMENTARY.

a. 'This'—the Elliptical.—He states its varieties.

TEXT.

No. 652. This, in the omission of the attribute, is like the complete, save *that* the Direct *is not possible* in a nominal affix.

COMMENTARY.

a. 'This'—the Elliptical Simile—, 'in the omission of the attribute'—i. e. of the common quality or action, 'is like the complete,' that is to say, it is sixfold in the aforesaid manner, but the direct not being possible in a nominal affix, it is *in fact*, fivefold.

* This number is, by mistake, repeated in Dr. Roer's edition of the original.

b. For example:

मुखमिन्दुर्यथा पाणिः पल्लवेन समः प्रिये ।
वाचः सुधाइवोष्ठस्ते विम्बतुल्यो मनोऽश्मवत् ॥

"Mukhamínduryathá páṇih pallavena samah priye,
Váchah sudháivoshṭhaste vimba-tulyo mano 'śma-vat,

(Thy face, my love, is as the moon, thy hand is equal to the tender-leaf, thy words are as-nectar, thy lips are like-the Vimba-fruit, but stone-like is thy heart.)

(To be continued.)

THE RIJU VYA'KHYA'.

TO THE EDITOR OF THE PANDIT, BENARES.

Sir, I see from your notice of this work in your October number, that Pandit Rámgati Nyáyaratna has published a key to Pandit Íshwarchandra Vidyáságar's Rijupáth Part III. But I regret to observe that such a work should have been printed in the Bengali character, as it entirely restricts the use which otherwise would have been made of it.

All publishers of Sanskrit Literature must bear in mind that if the publications they issue are to do any practical service they must publish them in the *Devanágarí* character, which is the one channel of rendering them accessible to students of Sanskrit in all parts of India: remembering that Sanskrit is the common inheritance of *all* India.

I trouble you with these remarks, simply because I should like to have gone through the work to see how a modern Bengali Sanskrit scholar performs the work of commenting in Sanskrit. But the fact of its having been published in the Bengali character prevents my curiosity from being satisfied.

In case the author publishes a second edition of his work (which I doubt not he may soon have an opportunity of doing, judging from your favourable remark thereon), I hope, he will be induced to publish it in the *Devanágarí* character.

Yours faithfully
A BOMBAYITE.

Bombay, 12th November, 1866.

Communications of a literary nature should be addressed to the EDITOR: *all letters on business, to the Proprietors,* MESSRS. E. J. LAZARUS & Co., *to whom Drafts should be made payable.* ADVERTISEMENTS *will be charged for according to the space occupied.*

The PANDIT may be ordered of the Publishers, or through MESSRS TRÜBNER and Co., LONDON.

Annual subscription, in advance, including postage, Rs. 12.

PRINTED AND PUBLISHED BY E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्य्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 8. Benares January 1st, 1867. Vol. I.

केचित्तु बाधितविषयत्वमिवासाधितविषयत्वमप्यनुमानकारणमाहुः । प्रमाणान्तरसिद्धेपि विषये नानुमानं वर्त्तते यथा प्रत्यक्षावगते वह्नेरौष्ण्ये । तत्प्रभाकरमतानुसारिणो नानुमन्यन्ते । सिद्धविषयमेवमनुमानमित्युक्तं । तद्यथा सम्बन्धनियमावधारणसिद्धविषयं तथा प्रत्यक्षादिसिद्धविषयमपि किमिति नोपपद्यते । प्रमातारस्तु निवृत्तप्रमित्सास्तत्र सम्बन्धनियमानुसन्धानंप्रति नाद्रियन्तइति नानुमानमुदेति यदिचानुसंहितसम्बन्धनियमैकदेशदर्शनेपि विषयसिद्धौ नानुमानमुत्पद्यते ततो भवेद्देवासाधितविषयत्वमप्यनुमानकारणं । नैवमस्ति । तस्मात्पूर्णमिदमनुमानकारणपरिगणनं । नियतसम्बन्धैकदेशदर्शनं सम्बन्धनियमस्मरणंचाबाधकंचाबाधितविषयत्वंचेति । यद्यबाधितविषयत्वमप्यनुमानकारणं कथंतर्हि ज्वालाभेदग्राहिणो ऽनुमानस्योदयः । प्रत्यक्षेणहि सैवेयं ज्वालेत्यभेदे प्रतीतेपि गृहोदराद्विवर्त्तिप्रभामण्डलदर्शनाद्भेदो ऽनुमीयते । प्रभाविततिर्हि तेजोवयवविसरणमन्तरेण नोपपद्यते । अवयवविसरणेचावयविनो नियतो विनाशः । दृष्टोहि तन्तुविभागात्पटविनाशः । तेन विनष्टायां ज्वालायां दृश्यमाना ज्वाला ततो भिन्ना ऽनुमीयते । यथा पटे विनष्टे दृश्यमानस्तन्तुस्ततो भिद्यते । पूर्वज्वाला विनष्टा विशीर्णावयवत्वात्पटवत् । दृश्यमाना ज्वाला विनष्टाया भिन्ना तस्यां विनष्टायामुपलभ्यमानत्वात्पटविनाशे पटान्तरवदिति । उच्यते । बाधितविषयत्वं यत्र निश्चितं तत्रानुमानं नोत्पद्यते यत्रतु विषयबाधा सन्दिग्धा तत्रानुमानमुत्पद्यतएव । इहतु सैवेयं ज्वालेतिप्रतीतौ जातायामपि शङ्का ऽवतरत्येव । सादृश्येन शुक्तिकारजतयोर्भेदानवसायादेवंविधा प्रतीतिर्भेदेपि दृष्टा । तेन किं भेदेपि सादृश्यवशेन भेदाग्रहणादेवंविधा प्रतीतिरुताभेदेनैवेति शङ्कोदयाद्बाधितविषयत्वं सन्दिग्धमिति नानुमानोत्पत्तिप्रतिबन्धः । अतएव समानवर्त्तिकावर्त्तिनीषु बह्वीषु ज्वालासु ज्वालात्वं सामान्यं नाश्रीयते । भेदाग्रहणेनापि प्रतीतेरुपपन्नत्वात् । वह्नेरनुष्णत्वप्रतीतिरन्यथा सम्भावयितुमशक्येति निश्चितं बाधितविषयत्वमतस्तत्र युक्तएवानुमानविरोधः ।

अन्येपुनरसत्प्रतिपक्षत्वमप्यनुमानकारणमाहुः । यथोदितलक्षणोपि हेतुर्यथोदितहेत्वन्तरप्रतिबद्धो नानुमानं जनयति किन्तु संशयं । तथा ऽप्रत्यक्षो वायुर्द्रव्यत्वेसत्यरूपत्वादित्यनेन प्रतिपक्षेण हेत्वन्तरेण प्रतिबद्धः प्रत्यक्षो वायुर्महत्त्वेसति स्पर्शवत्त्वादित्ययं हेतुर्वायौ प्रत्यक्षत्वाप्रत्यक्षत्वसंशयमापादयति नत्वनुमानं जनयितुमलमिति । तदनुपपन्नं । यथोदितलक्षणयोर्हेत्वोरेकत्र समवायाभावात् । भावेवा वस्तुनो नित्यसंशयितधर्मत्वापत्तेः । तथाहि । अरूपवत्त्वादित्ययं हेतुः स्पर्शेन्द्रियान्वयव्यतिरेकानुविधायितया वायुप्रतीतेरनुमानबाधितविषयः । इदंचानुमानं यथा शीघ्रभावि तथोदितमेव प्राक् । प्रत्यक्षंहि निषेधता क्वचिदवश्यं प्रत्यक्षलक्षणमङ्गीकरणीयं । इन्द्रियान्वयव्यतिरेकानुविधायी प्रत्ययः प्रत्यक्षमित्यभ्युपेयं । ननु न स्पर्शनेन वायुः प्रतीयते किन्तु स्पर्शमात्रमेव । नेत्युच्यते । स्पर्शान्तरप्रत्ययेपि द्रव्यप्रत्यभिज्ञानात् । यदि स्पर्शमात्रमेव स्पार्शनं भवेत्तदा स्पर्शभेदेपि किं प्रत्यभिज्ञायेत । ननु वायोः स्पर्शभेदो न सम्भवति । अनुष्णाशीतैकस्पर्शएव वायुः । तस्यतु तोयसम्पर्कात्तद्गतः शीतस्पर्शः प्रतिभाति । एवं तेजःसंयोगादुष्णस्पर्शइति । उच्यते । सत्यं वायोरनुष्णाशीतएव स्पर्शः । तोयतेजोगतौच शीतोष्णस्पर्शौ तथापि ताभ्यामभिभूते स्पर्शे शी-

Digitized by Google

तोप्यस्पर्शावपिप्रति यतोऽन्वयिनी प्रतिपत्तिः। साच स्पर्शमात्रप्रत्यये नोपपद्यतइति वदामः। तस्मादनुमानबाधितविषयत्वादरूपत्वादित्यप्रत्यक्षत्वं नोपस्थापयति । स्पर्शवत्वादित्येतदेव निःप्रतिपक्षमनुमानं जनयति । तस्माद्यथोदितलक्षणः सर्वएव सत्प्रतिपक्षइति नेदं पृथग्लक्षणं ।

प्रमेयमनुमानस्य दृष्टादृष्टस्वलक्षणं ।
प्रत्यक्षवच्च कर्त्तव्या प्रमाणफलवर्णना ॥

द्विविधमनुमानस्य प्रमेयं । किञ्चिद् दृष्टस्वलक्षणं । यथा वह्न्यादिकं । किञ्चिच्चादृष्टस्वलक्षणं । यथा कर्मादिकं । कथंपुनर्यस्य स्वलक्षणं न प्रतीतं तदनुमानं शक्यते। येनहिसह हेतोः सम्बन्धः प्रतिपन्नः स तस्माद्धेतोरनुमातुं शक्यते । नचादृष्टस्वलक्षणेनसह सम्बन्धनियमावधारणं कस्यचित्सम्भवतीति नादृष्टस्वलक्षणमनुमातुं शक्यते । उच्यते। सामान्यतोपि सम्बन्धनियमावगमो भवत्येवानुमानोत्पत्तौ निमित्तं। यथा यत् कादाचित्कं तदागन्तुकाज्जायमानं यथा तन्तुसंयोगेभ्यः पटः । कादाचित्कौच द्रव्यस्य संयोगविभागाविति ताभ्यामागन्तुकं वस्तु प्रतीयते । नच द्रव्यमेवागन्तुकं तस्य प्रत्यभिज्ञानेन स्थिरत्वावगमात् । नच शक्यते वक्तुं भिन्नान्येव द्रव्याण्यत्यन्तसादृश्येनाप्रतीयमानभेदानि तत्प्रत्ययविषयाणीव भासन्ते ज्वालादिवदिति । द्रव्यभेदे प्रमाणाभावात् । ज्वालादिप्रमाणमुपन्यस्तमेव विभागसंयोगादिकार्योत्पत्तिस्तु यथाप्रतीते द्रव्यस्थैर्ये सत्यप्यागन्तुककर्माभ्युपगमेनाप्युपपद्यतइति न द्रव्यभेदे प्रमाणमस्ति ।

अत्र कश्चिदाह । न कर्मादृष्टस्वलक्षणं प्रत्यक्षत्वात्कर्मणः । तदाह भगवान्काश्यपः । सङ्ख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे कर्मच रूपिद्रव्यसमवायाच्चाक्षुषाणीति । तथाहि । गच्छत्ययमितिप्रतीतिरिन्द्रियान्वयव्यतिरेकानुकारिणी । तदेवच प्रत्यक्षत्वे कारणं । नच वाच्यं कर्मफलभूतविभागसंयोगविशेषबलेनैवेयं प्रतीतिरिति । तन्निबन्धनत्वे स्थाणावप्येकश्येनवियुक्ते श्येनान्तरसंयुक्तेचापत्तेः । चलित्वा स्थितेपिच चलतीति वर्त्तमानावभासप्रसक्तेः विभागसंयोगयोर्वर्त्तमानत्वात् । अतीन्द्रियेणच व्योम्ना संयोगविभागयोरप्यतीन्द्रियत्वात् पतति पतत्त्रिणि चलतीति प्रत्ययानुत्पत्तिप्रसङ्गात् । नचानुमातुमपि कर्म शक्यते । तद्धि न नित्यं । विभागसंयोगयोः सदोदयप्रसक्तेः । अनित्यत्वे तस्याप्यसमवायिकारणमवश्यमाश्रयणीयं । तद्वरं विभागसंयोगयोरेवास्त्विति न कर्मानुमाने किञ्चिदपि लिङ्गं समर्थं। तदुक्तं ।

नित्यत्वे च सदा जन्म स्यात्संयोगविभागयोः ।
अनित्यत्वे ऽस्य यो हेतुस्तयोरेवास्तु तेन किं ॥

तदिदमसारं । प्रत्यक्षेणहि गच्छति द्रव्ये विभागसंयोगातिरिक्तविशेषानुपलब्धेः। यस्त्वयं गच्छतीति प्रत्ययः स विभागसंयोगानुमितक्रियालम्बनः । साच क्रिया न स्थाणावनुमीयते । उत्पततः श्येनस्य यो देशान्तरसंयोगस्तस्य ततो निष्पत्त्यनवकल्पनात् । तद्गतकर्मान्तरानुमानप्रसङ्गात् । निपततश्च श्येनान्तरस्य प्राग्देशविभागोत्पत्तये कर्मान्तराश्रयणापत्तेश्च । श्येनयोस्तु कर्मणोरनुमितयोरुपपद्येते तयोर्देशान्तरसंयोगविभागौ । तस्मात् स्थाणौ चलतीति न युज्यते। चलित्वा स्थितस्यापिच देशान्तरसंयोगेन क्रियाविनाशात् वर्त्तमानक्रियाप्रत्ययानुत्पादः । अतीन्द्रियत्वेपिच व्योम्नो वियति विततालोकावयवसंयोगविभागनिबन्धना पतति पतत्त्रिणि विशिष्टबुद्धिस्तद्बलेनच क्रियानुमानमपि सुकरमेव। नच कर्मान्तरकल्पनमपि दोषः। कर्महेतोः संयोगविभागोत्पत्त्यसम्भवात् । तथाहि। शरीरेतावत्प्रयत्नापेक्षादात्मसंयोगात्कर्मोत्पद्यते । नच ततः शरीरदेशविभागसंयोगयोरुत्पत्तिरवकल्पते । संयोगोहि स्वाश्रये स्वाश्रयसमवेतेवा द्रव्यान्तरे कार्यमारभतइति नियतं। यथा तन्तुसंयोगास्तन्तुषु पटमारभन्ते प्रचयाख्यश्च संयोगो ऽवयवेषु समवेतः स्वाश्रयसमवेते ऽवयविनि महत्त्वं जनयति । योपि संयोगः संयोगं जनयति सोपि तस्य स्वाश्रयस्वाश्रयसमवेतयोर्जनकः। तन्तुतुरीसंयोगोहि पटतुरीसंयोगस्य जनयितेष्यते। तस्य तुरीतावदाश्रयएव । पटोपि तन्त्वाश्रितत्वात्स्वाश्रयसमवेतः । आत्मशरीरसंयोगश्चात्मनि शरीरेच समवेतः स कथं देशे कार्यमारभेत । तत्रासमवायात्तेनसहैकार्थसमवायाभावाच्च । कर्मतु स्वाश्रये शरीरे जनयितुं शक्नुयादेवेति कर्महेतोर्विभागसंयोगावनुत्पद्यमानौ ततोन्यत्कारणं कल्पयन्तौ कर्मानुमापयतः । एतेन नोदनाभिघातात्मकौ कर्महेतू संयोगौ व्याख्यातौ । नोदनाख्योहि शरज्यासंयोगस्तयोस्तत्समवेतेवा कार्यमाविर्भावयितुमलमिति न ततः शरीराकाशगतौ संयोगविभागावुत्पत्तिं लभेयातां। तथा ऽभिघातात्मकोपि वेगवन्मुसलोलूखलसमवेतः कथमुत्पतत ऊर्ध्वं मुसलस्यचाकाशस्यच संयोगविभागावारभेत । यश्च वेगाख्यः संस्कारः कर्महेतुरिष्यते ततोपि संयोगविभागावनुपपन्नौ । संस्कारस्य स्वाश्रयएव कार्यारम्भनियमात् । भावनाख्योहि संस्कार आत्मसमवेत आत्मन्येव स्मरणलक्षणं कार्यं जनयन्दृष्टइति कथं वेगात्मा संस्कारः शरवर्त्याकाशेन तेजोवयवैः स्तिमितैश्च वायुभिः सह संयोगविभागावारभतइति न शक्यमाश्रयितुं कर्महेत्वभिमतादेव विभागसंयोगावुत्पद्येतेइति युक्तमेव कर्मानुमानं। नच कर्मणः प्रत्यासन्नद्रव्यवर्त्तिकार्यारम्भनियमो ऽवधारितः तस्य कार्यावगम्यत्वात् । यादृशेनहि कार्येण यदनुमीयते तादृशमेव तस्य कार्यं। यदिच तस्याप्ययं नियमः स्यात्तदा

Digitized by Google

कार्यमेव नोपपद्येत । तच्च कर्म सर्वमेव विभागपूर्वकं संयोगमारभते । किञ्चित्तु वेगाख्यं संस्कारमपि । संयोगाच्च तस्योपरतिर्मूर्त्तद्रव्याणि च तस्याश्रयभूतानीत्यादि प्रमेयपारायणे प्रपञ्चितं ।

सर्वभावानांच शक्तिरदृष्टस्वलक्षणापि कार्येणानुमीयते । अग्नेर्यथाभूतादेव दाहो दृष्टस्तथाभूतादेव मन्त्रौषधिप्रणिधाने कार्यं न दृश्यते न तत्र दृष्टमेव रूपं कारणं । तस्याजनकावस्थातो विलक्षणत्वाभावात्कार्यानुदयप्रसङ्गात् । यच्च खलु अजनकदशातो निरतिशयं ततः कार्यं नोत्पद्यते कुण्ठादिव कुठारात् । यदातु ततएव कार्यं दृश्यते तदा तदवस्थातोऽस्त्येव वैलक्षण्यं तीक्ष्णत्वमिव । अग्नौच कार्यानुदयदशातो विलक्षणं न कार्योदयसमये प्रत्यक्षदृश्यं रूपमुपलक्ष्यते । भवितव्यंच वैलक्षण्येनान्यथाकार्यानुत्पत्तिप्रसङ्गादिति कार्योदयेऽतीन्द्रियं किञ्चिद्रूपं वह्नेरनुमीयते । तस्य मन्त्रौषधिप्रयोगेण विनाशात् कार्यं नोत्पद्यते । नच वाच्यं मन्त्रौषधादिभिरतीन्द्रियं रूपं न किञ्चिद्विनाश्यते किन्तु मन्त्रौषधादिसन्निधाने नैव कार्योन्वयइति । कारणवैगुण्ये कार्योदयविघातासम्भवात् । अथोच्यते मन्त्राद्यप्रयोगोपि कार्योत्पत्तिनिमित्तं सम्प्रयोगेचाप्रयोगो निवर्त्ततइत्यस्ति कारणवैगुण्यमिति । तन्न । अप्रयोगस्य प्रयोगाभावरूपत्वात् सर्वभावानांच भावकारणनियतत्वदर्शनात् । अभावस्य क्वचिदपि कार्यं जनकत्वाश्रयणानुपपत्तेः । यच्च तदतीन्द्रियमग्निरूपं तच्छक्तिसामर्थ्यादिशब्दवाच्यतया लोके प्रतीतं तस्यच कार्यानुत्पत्तौ द्वयी गतिरभिभवोवा विनाशोवा । यत्र कदाचिदपि पुनः कार्यं न दृश्यते तत्र विनाशएव वस्तुनः । यत्रपुनः प्रतीकारवशेनकार्योदयस्तत्राभिभवमात्रं । तस्यचैवं वह्न्यादिप्रसिद्धस्य सर्वभावेषु कार्योदयानुकूल्यं कार्योत्पादकानुमानेन परिकल्पनीयं । तस्यच नित्याश्रयाश्रितस्य नित्यत्वमनित्याश्रयाश्रितस्य तदुत्पत्तिकारणादेवोत्पत्तिः । संस्काराच्चास्यायमेव विशेषः । संस्कारोहिनाम नित्येष्वनित्यो ऽनित्येषुच कारणान्तरायत्तइति ।

प्रत्यक्षवच्चास्यापि प्रमाणफलवर्णना कर्त्तव्या । यदानुमितिरनुमानमिति प्रमितिः प्रमाणमिति चावसीयते तदाग्न्यादिविषया लिङ्गदर्शनसापेक्षादात्ममनःसन्निकर्षादुत्पन्ना ऽधिगतिरेवानुमानं प्रमाणं । फलंचोपादानादिक्रिया । यदाचानुमीयते ऽनेनेत्यनुमानं प्रमीयतेचानेनेति प्रमाणमिति करणाश्रयणं तदात्ममनःसन्निकर्षो ऽनुमानं । सम्बन्धनियमस्मरणमेकदेशदर्शनंचेतिकर्त्तव्यता । फलंच लौकिकविषयानुमितिः । साधकतमत्वा करणाश्रयत्वात्तमबर्थस्यचातिशयरूपत्वात्तदव्यवहितापेक्षयाच सन्निहितस्यातिशययोगाल्लिङ्गदर्शनादीनां प्रमाणत्वं ।

परप्रत्यायनेच्छूनामनुमोदयसाधनं ।
वचनं दूषणैःसार्धमर्थादेतेन वर्णितं ।

द्वेधाऽनुमानमुत्पद्यते । स्वयमनुसंहितयावा ऽनुमानोत्पादसामग्र्या परप्रयुक्तवाक्योद्बोधितयावा । तत्रानुमानोत्पत्तिसामग्रीप्रतिपादनेनैव तत्प्रतिपादकवाक्यस्वरूपमपि सूचितमेव । तत्राबाधितइति प्रतिज्ञा । ज्ञातसम्बन्धनियमस्येत्यनेन दृष्टान्तवचनं । एकदेशदर्शनादिति हेत्वभिधानं । तदेवं त्र्यवयवसाधनं । साध्यनिर्देशः प्रतिज्ञा यथा शब्दो नित्यइति । अनेनचानुमानस्य विषयो निर्दिश्यते निर्दिष्टेच विषये तस्याबाधितत्वं शक्यतेवगन्तुमिति । तथा एकदेशान्तरइत्यनेनापि एकदेशान्तरभूतस्यानुमानमित्युक्तं । तदपि प्रतिज्ञावचनेन गम्यते । तेन साधनप्रयोगे प्रथमं साध्यनिर्देशाय प्रतिज्ञा कर्त्तव्या एतेनैव प्रत्यक्षादिबाधितपक्षादिनिर्देशः प्रतिज्ञाभासइत्युक्तं भवति । दर्शितानि प्रत्यक्षादिबाधोदाहरणानि एकदेशभूतस्यच साध्यत्वं दर्शयितुं सिद्धं धर्मिणमुद्दिश्य साध्यविधिर्दर्शयितव्यइत्यप्रसिद्धविशेष्यः पक्षाभासः । सर्वज्ञो वीतरागइति । प्रतिज्ञाभासस्तु माता मे वन्ध्येति उद्दिश्यहि मातरं न वन्ध्यात्वं विधातुं शक्यते । तस्या अन्वयायोग्यत्वेनान्विताभिधानस्यासम्भवात् । यावज्जीवमहं मौनीत्यत्रानुमानबाधएव न स्ववचनबाधः । शब्दश्रवणाद्धि कार्याच्छब्दोच्चारयितृत्वमनुमीयते । शब्दानुच्चारकत्वंच मौनित्वमित्यनुमानबाधएव । स्ववचनंतु मौनितामाह नपुनरमौनितामिति न तेन बाधः । गम्यैकदेशान्तरसम्बन्धनियमश्च गमकैकदेशस्य दर्शनीयः परस्येति तदर्थं दृष्टान्तवचनं प्रयोक्तव्यं । यावद्धि कस्मिंश्चिद्धर्मिणि एकदेशस्यैकदेशान्तरेण प्रमाणसिद्धः सम्बन्धनियमो न प्रदर्श्यते तावदनुमानमेवोत्पादयितुं न शक्यते । यत्र धर्मिणि सम्बन्धनियमो दृश्यते स दृष्टान्तो महानसादिः । सचेत्थं दर्शयितव्यः । पर्वतोग्निमानिति प्रतिज्ञाय योयोधूमवान्ससोग्निमानिति यथा महानसादिरिति । यस्तु साध्यविकलः साधनविकलस्तदुभयविकलः सम्बन्धनियमविकलश्च स दृष्टान्ताभासः यथा शब्दः प्रयत्नोत्थस्तदनन्तरमुपलब्धेर्मनोमोदकादिवदिति । मनोमोदकादिषु प्रयत्नोत्थत्वं नास्तीति तत्सम्बन्धनियमो हेतोस्तत्र दर्शयितुमशक्यः । शब्दो ऽनित्यो मूर्त्तत्वाद्घटवदिति घटस्यामूर्त्तत्वं नास्तीति तस्यानित्यत्वेन सम्बन्धनियमो दर्शयितुं न शक्यते । तथा शब्दोऽनित्यः कृतकत्वाद्गगनवदिति गगने ऽनित्यत्वं कृतकत्वंच नास्तीति न तत्र सम्बन्धनियमः शक्यो दर्शयितुं । यथा शब्दो ऽनित्यः प्रमेयत्वाद् द्रव्यवदिति किञ्चिद् द्रव्यं नित्यं परमाण्वाकाशात्ममनोदिक्कालादिरूपं । किञ्चिच्चानित्यं द्व्यणुकादि । तत्र प्रमेयत्वस्यानित्यत्वेनसह सम्बन्धनियमो नास्तीत्यशक्यमेव दर्शयितुं । येनच वचनेन

Digitized by Google

सत्त्वपि साध्यसाधनधर्मयोः सम्बन्धनियमो नाभिधीयते तदप्याभासमेव । तद्द्विविधमप्रदर्शितसम्बन्धनियमं विपरीतसम्बन्धनियमंच । यथा पर्वतो ऽग्निमान्धूमवत्त्वान्महानसवदिति । यद्यपि महानसे ऽग्निधूमौ स्तस्तथापि यावद्धूमस्याग्निनासह सम्बन्धो नोच्यते तावदगमकएव । तथास्मिन्नेव प्रयोगे यदैवमुच्यते । योयोग्निमान्सस धूमवानिति तदापि गमकाभिमतस्य धूमस्य गम्याभिमतेनाग्निनासह सम्बन्धनियमस्यादर्शितत्वाद्धूमस्य न समर्थितं गमकत्वमिति साधनाभासत्वं । सम्बन्धनियमं स्मरत एकदेशदर्शनादनुमानमुत्पद्यते इत्येकदेशत्वं हेतुवचनं प्रयोक्तव्यं । यथाग्निमत्वे साध्ये धूमवांश्चायमिति तेन यस्यैकदेशत्वं नास्ति तस्याभासत्वमुक्तमेव । येन वचनेन सदपि दर्शयितुं न शक्यते तदप्याभासभूतमेव । यथा ऽवाचकशब्दप्रयोगादयः । असाधारणादयश्च हेत्वाभासाः सर्वएवात्रापि योजयितव्याः । दृष्टान्तहेतुवचनयोश्च प्रयोगे क्रमनियमो नादरणीय एकदेशदर्शनपूर्वकादपि सम्बन्धनियमस्मरणादनन्तरं शब्दसाध्यज्ञानं जायते । तथा सम्बन्धनियमस्मरणपूर्वकमप्येकदेशदर्शनमनुमानमुत्पादयत्येव । तत्रैकदेशदर्शनपूर्वकसम्बन्धनियमस्मरणं कुर्वता प्रतिज्ञानन्तरं हेतुवचनं प्रयोक्तव्यं । पर्वतो ऽग्निमान्धूमवत्त्वादिति । दृष्टान्तश्च योयो धूमवान्ससोग्निमानिति पश्चादुपादातव्यः । दृष्टान्तपुरःसरेतु प्रयोगे प्रतिज्ञामुपादाय योयो धूमवान्ससोग्निमान्महानसादिवदितिचाभिधाय धूमवांश्चायमिति हेतुवचनं वक्तव्यं अन्येतु प्रतिज्ञानन्तरं धूमवत्त्वादिति हेतुमभिधाय दृष्टान्तवचनं ततोप्यनन्तरमुपनयनं प्रयुञ्जते धूमवांश्चायमिति । तत्र हेतूपनयनयोरन्यतरप्रयोगेणापि साध्यसिद्धेरुभयोपादानमनर्थकमिति मीमांसकाः । तस्माद्धूमवत्त्वादयमग्निमानिति निगमनमप्यनर्थकमेव । यथोदितहेतुबलसिद्धत्वादर्थस्य ।

वैधर्म्यदृष्टान्तोपादानंच केचित्साधनवाक्ये कुर्वन्ति । यथा ऽग्निर्नास्तियत्र तत्र धूमोपि नास्ति यथा जलह्रदइति । तदनुपपन्नं । साध्यधर्मसम्बन्धबलेन हेतोर्गमकत्वं । तच्च साधर्म्यदृष्टान्तेनैव समर्थितं । अथोच्यते साधर्म्यदृष्टान्तमात्रेण साध्यधर्मवति हेतोर्वृत्तिरवगम्यते न तद्विरहिणो निवृत्तिः । नच तयाविना हेतोः साध्यसम्बन्धनियमो ऽवकल्पते अतस्तदर्थं वैधर्म्यदृष्टान्तोऽप्युपादेयइति । तच । नहि साध्यधर्मवति हेतेर्वृत्तिमात्रं साधर्म्यदृष्टान्तेनोच्यते किन्तु नियतएव साध्यधर्मसम्बन्धो दृश्यते । तथाहि । साधनधर्मोद्देशेन साध्यधर्मविधिः साधर्म्यदृष्टान्तेन क्रियते । तत्र धूमवत्तयोपलक्षणेन सर्वधूमवतामुद्दिष्टत्वात् । प्रत्युद्देश्यं वाक्यपरिसमाप्तेः सर्वेषां धूमवतामग्निमत्ता विहितेति नास्ति सम्भावना विनाप्यग्निना धूमो भवेदिति । उद्देश्यताच प्रथमप्रयोगेणावगम्यते धूमवानयमग्निमानिति । क्वचिच्च यच्छब्दप्रयोगेण । सोग्निमान्यो धूमवानिति । प्रत्युद्देश्यविधानबलेनैव सिद्धां व्याप्तिमन्यतो निवृत्तिंच स्पष्टीकर्तुं वीप्सावधारणवचनयोः प्रयोगः क्रियते योयो धूमवान्ससो ऽग्निमानेवेति तस्मात्सम्यक्साधर्म्यदृष्टान्तप्रयोगेणैव सम्बन्धनियमावगतेरनर्थकं वैधर्म्यदृष्टान्तोपादानं । अथोच्यते माभूद्दृष्टान्तद्वयोपादानं किन्तु विकल्पो ऽस्तु । वैधर्म्यदृष्टान्तेनापिहि साध्यधर्मविरहिणमुद्दिश्य साधनधर्मविरहविधौ कृते सर्वसाध्यविरहिणां साधनधर्मविरहव्याप्त्यवगमादन्यत्र साधनधर्मो ऽवकाशमलभमानः साध्यधर्मवत्येव वर्त्ततइति साध्यधर्मसम्बन्धनियमावगतेर्वैधर्म्यदृष्टान्तेनापि हेतुत्वं समर्थितमेव भवतीति तुल्यकार्यतया साधर्म्यवैधर्म्यदृष्टान्तयोर्विकल्पो न्याय्यइति । तदयुक्तं । ऋजुमार्गेणार्थसिद्धौ न वक्रमार्गमाश्रयते यतः । साधर्म्यदृष्टान्तश्च साध्यसम्बन्धाव्यभिचारावगतौ ऋजुमार्गः । वैधर्म्यदृष्टान्तो वक्रइति न विकल्पो युक्तः अतुल्यत्वादुपायभावस्य । स्यान्मतं यथा साध्यसम्बन्धाविनाभावो ऽनुमानमार्गः तथा तदभावव्यावृत्तत्वमपि । तच्च वैधर्म्यदृष्टान्तेनोच्यतइति विकल्पाश्रयणमिति । तन्न । व्यावृत्तेरभावरूपायाः कचिदपि कारणत्वासम्भवात् । सर्वकार्याणि भावसाधनानीत्युक्तं । नच विपक्षव्यावृत्तिः शक्यते ऽवगन्तुं । विपक्षाणामनन्तत्वात् । साध्यधर्मसम्बन्धाव्यभिचाररूपस्तु सम्बन्धनियमो यथा ऽवगन्तुं सुकरस्तथोदितमेव । तस्मात्सर्वत्र साधर्म्यदृष्टान्तएव केवलः प्रयोक्तव्यइति स्थितं ।

यत एवंविधं समानमतो दूषणमपि पक्षस्य प्रत्यक्षादिबाधितत्वमप्रसिद्धविशेष्यताच । हेतोः स्वरूपासिद्धत्वमेकदेशासिद्धत्वमसाधारणत्वं साधारणत्वं बाधकत्वंचेति । दृष्टान्तस्यच साध्यविकलता साधनविकलता सम्बन्धनियमविकलताच नियमशून्यता विपरीतनियमता । प्रतिज्ञादीनामवाचकता ऽप्रयोगश्चेति । प्रतिज्ञासामान्याच्च प्रतिज्ञाहानिरभिचैव । संन्यासोपि दूषणान्तरपूर्वकत्वाददूषणमेव । दूषितपक्षोहि वादी प्रतिज्ञानमपन्हुते । अतएवच प्रतिज्ञान्तरमपि पृथग् दोषो न भवति । दूषितपूर्वप्रतिज्ञस्यैव प्रतिज्ञान्तरालम्बनात् । हेतुप्रतिज्ञाविरोधेपि न दूषणान्तरं । अप्रसिद्धत्वे हेतोरसिद्धतैव दोषः सिद्धत्वेत्रा तद्ग्राहकप्रमाणबाधात्पक्षस्य दोषः । अप्रसिद्धविशेषणतात्वदृष्टस्वलक्षणस्याप्यनुमानावदोषः ॥ :: :: ॥

इति महामहोपाध्यायश्रीशालिकनाथकृतौ प्रमाणपारायणे द्वितीयः परिच्छेदः ॥ :: ॥ :: ॥

Digitized by Google

अथान्योन्यं विमुक्तास्त्र-
शस्त्रजालैर्भयङ्करम् ।
युद्धमासीत् सुनासीर-
सुरारिबलयोर्द्वयोः ॥ १ ॥
पत्तिः पत्तिमभीयाय
रणाय रथिनं रथी ।
तुरङ्गस्थं तुरङ्गस्थो
दन्तिस्थं दन्तिनि स्थितः ॥ २ ॥
पठिता बन्दिवृन्देन
प्रवीरविरुदावलीः ।
क्षणं विलम्ब्य चित्तानि
दधुर्युद्धोत्सुकान्यपि ॥ ३ ॥
सङ्ग्रामानन्दवर्द्धिष्णौ
विग्रहे पुलकाङ्किते ।
आसीत् कवचविच्छेदो
वीराणां मिलतां मिथः ॥ ४ ॥
निर्द्दयं खड्गभिन्नेभ्यः
कवचेभ्यः समुच्छ्रितैः ।
आसन् व्योमदिशस्तूलैः
पलितैरिव पाण्डुराः ॥ ५ ॥
खड्गा रुधिरसंलिप्ता-
श्चण्डांशुकरभासुराः ।
हतस्ततोऽपि वीराणां
वैद्युतं वैभवं दधुः ॥ ६ ॥
विसृजन्तो मुखैर्ज्वाला
भीमाइव भुजङ्गमाः ।
विसृष्टाः सुभटैस्तुष्टै-
र्व्योम व्यानशिरे शराः ॥ ७ ॥
गाढं वपूंषि निर्भिद्य
धन्विनां निघ्नतां मिथः ।
अशोणितमुखा भूमिं
प्राविशन् दूरमाशुगाः ॥ ८ ॥
निर्भिद्य दन्तिनः पूर्वं
पातयामासुराशुगाः ।
पेतुः प्रवरयोधानां
प्रीतानामाहवोत्सवे ॥ ९ ॥
ज्वलदग्निमुखैर्बाणै-
र्नीरन्ध्रैरितरेतरम् ।
उच्चैर्वैमानिका व्योम्नि
कीर्णैर्दूरमपासरन् ॥ १० ॥
विभिन्नं धन्विनां बाणै-
र्वंशायाइव विह्वलम् ।
रराम विरसं व्योम
सेनापतिरवच्छलात् ॥ ११ ॥
चापैराकर्णमाकृष्टै-
र्विमुक्ता दूरमाशुगाः ।
अधावन् रुधिरास्वाद-
लुब्धाइव रणैषिणाम् ॥ १२ ॥
गृहीताः पाणिभिर्वीरै-
र्विकोशाः खड्गराजयः ।
कान्त्या ऽऽननच्छलादाने-
र्व्यहसन् समदाइव ॥ १३ ॥
खड्गाः शोणितसन्दिग्धा
नृत्यन्तो वीरपाणिषु ।
रणोघनरणे ऽनन्ते
विद्युतां विभ्रमं दधुः ॥ १४ ॥
कुन्ताश्चक्रासिरे चण्ड-
मुल्लसन्तो रणार्थिनाम् ।
जिह्वाभोगा यमस्येव
लेलिहाना रणचये ॥ १५ ॥
प्रज्वलत्कान्तिचक्राणि
चक्राणि वरचक्रिणाम् ।
चण्डांशुमण्डलश्रीणि
रणव्योमनि बभ्रमुः ॥ १६ ॥
केचिद् धीरैः प्रणादैस्तु
वीराणामभ्युपेयुषाम् ।
निपेतुः क्षोभतो बाह्वा-
दपरे मुमुहुर्मदात् ॥ १७ ॥
कश्चिदभ्यागते वीरे
जिघांसो मुदमादधौ ।

Digitized by Google

परावृत्य गते युद्दे
विषसादाहवप्रियः ॥ १८ ॥
बहुभिः सहयुद्धानः
परिभ्रम्य रणोल्बणाः ।
नामग्राहमुपेयुः केऽ-
प्यये पूर्ववृता वयं ॥ १९ ॥
अभितोऽप्यागतान् वीरान्
योधी रणमदोल्बणान् ।
प्रत्यहन् तद्भुजादण्डे
रोमोद्गमभृतो मदात् ॥ २० ॥
शस्त्रभिन्नेभकुम्भेभ्यो
मौक्तिकानि च्युतान्यधुः ।
आहवक्षेत्रमभ्युप्र-
कीर्त्तिबीजोत्करश्रियम् ॥ २१ ॥
वीराणां विषमैर्घोषै-
र्विद्रुता वारणा रणे ।
शास्यमाना अपि चाशा-
द्भ्रेमुर्धूताङ्कुशा दिशः ॥ २२ ॥
रणे बाणगणैर्भिन्ना
भ्रमन्तो भिन्नयोधिनः ।
निममज्जुर्गलद्रक्त-
निमग्नाः सुमहागजाः ॥ २३ ॥
अपरे ऽप्रसरित्पूरे
रणेषूच्चैस्तरेष्वपि ।
रथिनोऽभिक्रुधा क्रुद्ध-
हूङ्कृतैर्व्यसृजन् शरान् ॥ २४ ॥
खड्गनिर्लूनमूर्द्धानो
निपतन्तोऽपि वाजिनः ।
प्रथमं पातयामासु-
रसिना दारितानरीन् ॥ २५ ॥
वीराणां शस्त्रभिन्नान्नं
शिरांसि निपतन्त्यपि ।
अधावन् दन्तदष्टोष्ठ-
भीषणान्यरिषु क्रुधा ॥ २६ ॥
शिरांसि वरयोधाना-
मर्द्धचन्द्रहृतान्यपि ।
आददाना भृशं पादैः
श्येना व्यानशिरे दिशः ॥ २७ ॥
शस्त्रच्छिन्नगजारोहा
विभ्रमन्त इतस्ततः ।
युगान्तवातचलिताः
शैलाइव गजा बभुः ॥ २८ ॥
क्रोधादभ्याप्तदन्ति-
दन्ताक्रूढा नृवाजिषु ।
अश्वारूढा गजारोह-
प्राणान् प्रासैरुपाहरन् ॥ २९ ॥
गजारूढान् मिलद्दन्ति-
दन्तसङ्घर्षजोऽनलः ।
योधान् शस्त्रहृतप्राणा-
नदहत् सहसा ऽरिभिः ॥ ३० ॥
उत्क्षिप्ता अपि हस्तीन्द्रैः
कोपनैः पत्तयः करैः ।
तद्विपूनहरन् खड्ग-
पातैः स्वस्य पुरः प्रभोः ॥ ३१ ॥
उत्क्षिप्य करिभिर्दूरं
मुक्तानां योधिनां दिवः ।
प्रापि जीवात्मभिर्द्दिव्या-
ङ्गनाकण्ठपरिग्रहः ॥ ३२ ॥
खड्गैर्द्दुवलधाराले-
र्निकृत्य करिणां करान् ।
येर्मुखापि समं वृद्धः
शस्त्या तां पत्तयो ऽहरन् ॥ ३३ ॥
उत्क्षिप्याभिदिवं नीताः
पत्तयः करिभिः करैः ।
दिव्याङ्गनाभिरादातुं
रक्ताभिर्वृतमम्बरम् ॥ ३४ ॥
मिलितेषु मिथो योद्धुं
दन्तिषु प्रसभं भटाः ।
अगृह्णन् सहयुध्वानः
शस्त्रैः प्राणान् परस्परम् ॥ ३५ ॥

Digitized by Google

धन्विनस्तुरगारूढा
गजारोहान् शरैः शतान् ।
प्रत्येयन् मूर्च्छितान् भूयो
योद्धुमाश्वसतश्चिरम् ॥ ३६ ॥
क्रुद्धस्य दन्तिनः पत्ति-
र्जिघृक्षोरसिना करम् ।
निर्भिद्य दन्तमुसला-
न्नारुरोह जिघृक्षया ॥ ३७ ॥
खड्गेनामूलतो हत्वा
दन्तिनोऽङ्घ्रिचतुष्टयम् ।
प्रपतिष्णोः प्रविष्टोऽपि
पदातिर्निरगाद्द्रुतम् ॥ ३८ ॥
करेण करिणा वीरः
सुगृहीतोऽपि कोपिना ।
असिना ऽसून् जहाराशु
तस्यैव स्वयमक्षतः ॥ ३९ ॥
तुरङ्गी तुरगारूढं
प्रासेनाहत्य वक्षसि ।
पततस्तस्य नाज्ञासीत्
प्रासघातं स्वके हृदि ॥ ४० ॥
तुरङ्गसादिनं शस्त्र-
हृतप्राणं गतं भुवि ।
अंशाद्योऽपि महावाजी
नाश्रस्तनयनो ऽत्यजत् ॥ ४१ ॥
द्विषा प्रासहृतप्राणो
वाजिपृष्ठदृढासनः ।
हस्तोद्धृतमहाप्रासो
भटो जीवन्निवाभ्रमत् ॥ ४२ ॥
खड्गेन शितधारेण
भिन्नोऽसि रिपुणा ऽश्वगः ।
नामूर्च्छत् कोपतो हन्तु-
मियेषच पतन्नपि ॥ ४३ ॥
मिथः प्रहारतो वाजि-
च्युतौ भूमिगतौ रुषा ।
शस्त्र्या युयुधतुः कौचित्
केशाकेशि भुजाभुजि ॥ ४४ ॥
रथिनो रथिभिर्बाणै-
र्हृतप्राणा दृढासनाः ।
कृतकार्मुकसन्धानाः
सप्राणा इव मेनिरे ॥ ४५ ॥
न रथी रथिनं भूयः
प्राहरच्छस्त्रमूर्च्छितम् ।
प्रत्याश्वसन्तं मत्वैनं
नागमद्युद्धलोभतः ॥ ४६ ॥
अन्योन्यं रथिनो कौचि-
द्धृतप्राणौ दिवं गतौ ।
एकामप्सरसं प्राप्य
युयुधाते वरायुधौ ॥ ४७ ॥
मिथो ऽर्द्धचन्द्रनिर्लून-
मूर्द्धानौ रुषितौ रुषा ।
खचरैर्भुवि नृत्यन्तौ
स्वकबन्धाववपश्यताम् ॥ ४८ ॥
रणाङ्गणे शोणितपङ्कपिच्छिले
कथंकथञ्चिन्ननृतुर्धृतायुधाः ।
नदत्सु तूर्येषु परेतयोषितां
गणेषु गायत्सु कबन्धराजयः ॥ ४९ ॥
इति सुररिपुवृत्ते युद्धे सुरासुरसैन्ययो-
रुधिरसरितां मज्जद्दन्तिव्रजेषु तटेष्वलम् ।
अरुणनयनः क्रोधासीनभ्रमद्भ्रुकुटीमुखः
सपदि ककुभामीशानभ्यासमत् स युयुत्सया ॥५०॥

इति श्रीकुमारसम्भवे महाकाव्ये कवीन्द्रश्रीकालि-
दासकृतौ द्वन्द्वप्रथनंनाम षोडशः सर्गः ॥ १६ ॥

श्रीगणेशाय नमः ।

यो भक्तानामुपरि कृपयैवात्तनेकावतारो
भूमेर्भारानुदधरदतिप्रौढदैत्यादिघातैः ।
यं वै नित्यं श्रुतिरनुपदं स्तौति नाप्नोति पारं
तं सर्वेषामधिपतिमजं भावयेऽभीष्टसिद्ध्यै ॥ १ ॥

इह खलु व्याकरणशास्त्रेऽव्ययप्रकरणे चादिगणे सिद्धान्तकौमुद्यादिषु पुदित्यव्ययं पठ्यते तदिदमव्ययमन्तस्थादि वोष्ठ्यादि वेति संशयमापन्नेन मया बहूनि पुस्तकान्यनुसृत्य लेखकप्रमादवशात् केषुचिदन्तस्थादि केषुचिच्चौष्ठ्यादिकमवलोक्य

निर्णयमलभमानेन पुनः सातिशयं व्याख्याग्रन्थानालोडयता पुष्कलप्रमाणान्युपलभ्य तान्येवावष्टभ्य च शाकटायनमपहाय सर्ववैयाकरणमते पुदित्यव्ययमोष्ठ्यादि तकारान्तमिति शाकटायनमते चोष्ठ्यादि लकारान्तमिति न तु कस्यापि* मतेऽन्तस्थादीति निरणायि । अत्र प्रमाणान्यधो लेखिष्यमाणानि गणरत्नमहोदध्यादयः षड्ग्रन्था अवसेयाः । तत्र तावत् प्रथमं प्रमाणं गणरत्नमहोदधिः । तद्यथा सत्फट्क्लिच्चिरराचायविभाषेतिनचेत्पुत इति । सत् फट् क्लित् चिरराचाय विभाषा इति न चेत् पुत् इत्येतान्यव्ययानि भवन्तीति पद्यार्थः । यदि पुदित्यव्ययमन्तस्थादि स्यात् तर्ह्यवश्यमत्र पद्ये चेदिति तकारस्य युति परे जश्त्वेन चेद्युत इति स्यात् । चेत्पुत इति चर्त्वघटितं रूपं कदापि न ब्रूयाद्गणरत्नमहोदधिकारः । उपलभ्यते च गणरत्नमहोदधिपुस्तकमात्रे चेत्पुत इत्येव पाठ इति । द्वितीयं गणरत्नमहोदधिकारेणैव कृता तद्व्याख्या । तथाहि चेदित्यन्तं व्याख्याय गणरत्नमहोदधिकारः स्वकृतटीकायामुदाजहार पुत् कुत्सायां पुत् कुत्सितं कसति गच्छति पुत्कस इति पुलिति लान्तमिति शाकटायन इति च जगाद । अनेन व्याख्यानेन पुत्पुलोर्मतभेदेन तान्तलान्तत्वविषये विकल्पः स्फुटतरं प्रतीयते न त्वन्तस्थादित्वं पुत्कसपुल्कसशब्दयोरोष्ठ्याद्योरमरादिकोशेष्वत्यन्तं प्रसिद्धत्वात् । तृतीयमव्ययप्रकरणे चादिगणविवरणे शब्दकौस्तुभे भट्टोजिदीक्षितकृतः । पुत् कुत्सायां कुत्सितमवयवं छादयतीति पुच्छः । डः । पुलिति लान्तमव्ययमिति शाकटायनः । तदुदाहरणं तु कुत्सितं कसति गच्छति पुल्कस इति । अनेनापि शब्दकौस्तुभोदितव्याख्यानेन पुत्पुलोरेवौष्ठ्याद्योर्मतभेदात् प्रतिभाति विकल्पो न पुनरन्तस्थादित्वं पुत्कसपुल्कसशब्दयोः पुच्छशब्दस्य चौष्ठ्यादित्वस्य कोशादिषु सुप्रसिद्धत्वात् । रामाश्रमाचार्यस्तु पुच्छ प्रमाद इति पवर्गीयादिं धातुमभ्युपगम्य तस्मादच्प्रत्ययं विधाय पुच्छशब्दस्य साधुत्वं वदन् बभ्राम बोपदेवकृतकाव्यकामधेनुसंज्ञकधातुपाठविरोधात् । तत्र हि छान्तवर्गे आछि आयाम इत्यारभ्य मुर्छा मोहसमुच्छ्राययोरित्यन्तमकारादिक्रमेण मकारादिधात्वन्तमभिधाय यरलवान्यतमादिधातुवर्णनप्रसङ्गे युच्छ प्रमाद इति रेफादिच्छान्तधातोरभावादथ लच्छ लच्छीत्यादि चाभिहितम् । क्षीरस्वामिना चात एवौष्ठ्यादिं पुच्छधातुमनङ्गीकुर्वता रामाश्रमपरिशीलितं पन्थानं परिवर्ज्य पुत्पूर्वकाच्छादेर्डप्रत्ययमामीय पुच्छशब्दस्य साधुत्वमभ्यधायि । अत एव च कैयटः शूडनुनासिके चेति सूत्रस्थभाष्ये पुतं गुदं छादयतीति पुच्छं कर्मण्यण् पृषोदरादित्वात् पूर्वोत्तरपदयोष्टिलोप इति पुच्छशब्दसाधुत्वाय रामाश्रमातिरिक्तामेव विधामङ्गीकुर्वतः कैयटस्योक्तिः संगच्छते । अतो निःसंशयं युच्छ प्रमाद इत्यन्तस्थादिर्धातुरस्ति नौष्ठ्यादिरिति स्थितम् । अनयैव च दिशा पुच्छ प्रमादे धातुरोष्ठ्यादिरिति वदन्तोऽन्येऽपि मुकुटभानुदीक्षितादयो निराकृता वेदितव्याः । चतुर्थममरकोशीयं क्षीरस्वामिकृतं व्याख्यानम् । तथाहि द्वितीयकाण्डगतसिंहादिवर्गस्थपुत्तिकाशब्दमनुष्यवर्गस्थपुत्रशब्दयोर्व्याख्याने पुत् कुत्सितं तनोति पुत्तिकेति पुन्नरकात् त्रायते पुत्र इति च क्षीरस्वामी निरुवाच । अत्र यदि क्षीरस्वामिमते पुदित्यव्ययं न स्यात् तर्हि पुतं कुत्सितं तनोति पुतो नरकादिति च वदेत् । अनव्ययत्वेन सलिङ्गवचनत्वाद्द्वियमाणस्य विवरणस्य चात्र समानविभक्तिकत्वौचित्येन तत्तद्विभक्तावागतायां लोपाप्रसक्तेः । ननु पुत् कुत्सितमिति तु क्षीरस्वामिग्रन्थोऽनव्ययत्वेऽपि नानुपपन्नो भवितुमर्हति नरकं पुदिति ख्यातमिति हरिवंशप्रामाण्येन पुतो नपुंसकलिङ्गत्वादिति चेन्न नरकार्थकपुदित्यव्ययेनैव हरिवंशप्रयोगस्योपपत्तेर्नपुंसकत्वे मानाभावात् । पञ्चममसरकोशव्याख्या रामाश्रमकृता । सा यथा द्वितीयकाण्डे सिंहादिवर्गे पतङ्गिका पुत्तिका स्याद्दंशस्तु वनमक्षिकेति पद्यस्थपुत्तिकाशब्दविवृतौ पुत् कुत्सितं तायते ताय् संतानपालनयोर्बाहुलकात् को यलोपः केऽण इति ह्रस्वः प्रत्ययस्थादित्तीत्वम् । यद्वा पुत् कुत्सितं शब्दं तनोतीत्यन्येभ्योऽपीति डः । स्वार्थे कन् । अत्रापि पुत्तिकाशब्दोपरि पुत् कुत्सितं तायते इति व्याख्यानात् पुत् कुत्सितं शब्दमिति विवरणाच्चौष्ठ्यादि पुदित्यव्ययं प्रतीयतेऽन्यथा यद्वेति पक्षे पुत्प्रमिक्रि रामाश्रमो ब्रूयात् । अनेनापि व्याख्यानेन नौष्ठ्यादित्वेऽव्ययत्वे च संदेहः । पुत्तिकाशब्दस्योपायसहस्रेणापि कथमप्यन्तस्थादित्वस्यासंभवात् । तथा तस्मिन्नेव काण्डे मनुष्यवर्गे आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी इति पद्यव्याख्यावसरे पुत्रशब्दविवृतौ रामाश्रमाचार्यः । पुनाति पूयते वा पूञ् पवने पुवो ह्रस्वश्चेति क्रः । यद्वा पुन्नरकात् त्रायते सुपीति कः । पुन्नाम्नो नरकाद्यस्मात् त्रायते पितरं सुतः । तस्मात् पुत्र इति ख्यातः स्वयमेव स्वयंभुवेति । अत्र यद्वेत्यारभ्य पुत्रशब्दस्य द्वितीये निर्वचनेऽविद्यमानविभक्तिकपुच्छब्दस्य नरकादिति विवरणं कुर्वतो रामाश्रमाचार्यस्य पुदित्यव्ययमोष्ठ्याद्यभिमतं भवतीत्यवगम्यते । तथैव द्वितीयकाण्डे शूद्रवर्गे निषादश्वपचावन्तेवासिचाण्डालपुत्कसा इति श्लोकार्थवर्णनसमये पुत्कसशब्दविवरणे पुत् कुत्सितं पुण्यं पुमांसं वा कसति कस गतावच् । मूलविभुजादिको वा । अत्रापि पुदित्यस्याविद्यमानविभक्तिकस्य पुमांसमित्यर्थं वदन् पुतोऽव्ययत्वमोष्ठ्यादित्वं चाभ्युपगच्छति

* किंतु श्रीयुतकोल्ब्रुक्साहेबवर्येण श्रीलकेरीसाहेबोत्तमेन स्वकृतव्याकरणे श्रीमन्महामहिममहामहात्मविल्सन्नामधेयसाहेबश्रेष्ठेन च स्वरचितमहाकोशेऽन्तस्थादि युदित्यव्ययमिति निरूपितमिति बोद्धव्यम् ।

रामाश्रमाचार्य इत्यसंदिग्धत्वमोष्ठ्यादित्वस्याव्ययत्वस्य च पुतः। पुल्कसशब्दस्यौष्ठ्यादिकस्य लोके बहुलं प्रसिद्धेश्च। तृतीयकाण्डे च पुंलिङ्गसंग्रहवर्गे पुरस्तुरप्रचुक्राश्च गोलहिङ्गुलपुद्गला इति पद्यव्याख्याने पुद्गलशब्दनिर्वचने स्पष्टमाह रामाश्रमः। पुदिति कुत्सायामव्ययम्। पुद्गिलति गीर्यते वा गॄ निगरणे पचाद्यच्। च्छदोरल्वा। अचि विभाषेति वा लः। पुद्गलति वा गल अदने स्रावे वा अच्। पुद्गलः सुन्दराकारे त्रिषु पुंस्यात्मदेहयोः। इति। अनेन पुद्गलशब्दव्याख्यानेन स्पष्टमेवौष्ठ्यादित्वमव्ययत्वं च पुच्छब्दस्य शक्यते निर्णेतुमिति। पुद्गलशब्दस्यौष्ठ्यादेर्जैनग्रन्थेषु बहुषु स्याद्वादमञ्जर्यादिष्वन्यत्र चाधिक्येन प्रसिद्धत्वात्। जैनग्रन्थेष्वप्येवमेव व्युत्पत्तिस्वीकाराच्च। षष्ठं भानुदीक्षितकृतामरव्याख्या। सा यथा पतञ्जिका पुत्तिका स्यादित्यस्य व्याख्यायां पुत् कुत्सितं तायते ताय् संतानपालनयोर्बाहुलकात् को यलोपः केऽण इति ह्रस्व इति। सुतः पुत्रः स्त्रियां स्वमी इति पद्यव्याख्यायां पुनाति पूयते वा पूञ् पवने पुवो ह्रस्वश्चेति क्तः। यद्वा पुत्रकात् त्रायते सुपीति कः। पुन्नाम्नो नरकाद्यस्मात् त्रायते पितरं सुतः। तस्मात् पुत्र इति ख्यातः स्वयमेव स्वयंभुवेति। तथा निषादश्वपचावन्तेवासिचाण्डालपुल्कसा इति पद्यव्याख्यायां पुत् कुत्सितं पुण्यं वा पुमांसं वा कसति गच्छति कस गतावच्। मूलविभुजादिको वा। तथा गोलहिङ्गुलपुद्गला इति पद्यव्याख्यायां पुदिति कुत्सायामव्ययम्। पुद्गिलति गीर्यते वा गॄ निगरणे पचाद्यच्। च्छदोरल्वा। अचि विभाषेति वा लः। पुद्गलति वा गल अदने स्रावे वाऽच् इति। इयं च सर्वाऽव्याख्या रामाश्रमकृतव्याख्यानुपूर्वीतुल्यैवेति वक्तव्यांशस्य तत्रैवोक्तत्वाच्च किंचिदिहोच्यते विस्तरभयादिति। तस्मान्नास्ति कस्यापि मतेऽन्तस्थादिकं युदित्यव्ययमित्यध्यवसीयत एवेति। अथ पुदस्त्राणात् ततः पुत्रमिहेच्छन्ति परत्र चेति हरिवंशप्रामाण्यादमरटीकायां पुतो छादयति पुच्छ इति क्षीरस्वाम्युक्त्यनुरोधाच्च दान्तस्तान्तो वा पुच्छशब्दसाधनावसरे पूर्वपदटिलोपप्रतिपादकप्रोक्तचरकैयटप्रामाण्याद्दन्तो वाव्ययभिन्नोऽपि पुच्छब्दः पुतशब्दश्चास्तीत्यन्यदेतत्। चादिगणपठितस्यैवौष्ठ्यादित्वस्याव्ययत्वस्य च मया सप्रमाणमभिहितत्वात्। तदेवं निराकृतेऽपि कश्चिद्वङ्गदेशीयमहात्मा सिद्धान्तकौमुद्याः स्वकृतसरलानामकटीकायां चादिगणगताव्ययविवरणे युत् कुत्सायामिति व्याजहार स यदि लेखकप्रमादपरंपरया मुद्रकाणां दोषमङ्गीकुर्यात् स्वाभिमतं चौष्ठ्यादित्वं तस्याव्ययस्योररीकुर्यात् तर्हि न तं प्रति किमपि ब्रूमः। यदि तु तदव्ययमन्तस्थादि नौष्ठ्यादीति मतं तर्हि प्रतिपादितपूर्वतत्तद्ग्रन्थविरोधः सिद्धान्तकौमुदीरचयितुरेव भट्टोजिदीक्षितस्य ग्रन्थेन शब्दकौस्तुभेन विरोधश्च दुर्वारः। शब्दकौस्तुभे हि पुच्छशब्द' पुल्कसशब्दः शाकटायनमतौ पुल्कसशब्दश्चानेनैव पुदित्यव्ययेन पुलित्यव्ययेन च साधितः। राधाकान्तदेवोऽपि स्वकृतशब्दकल्पद्रुमाख्यमहाकोशे युदिति नपुंसकलिङ्गमन्तस्थादि पदं प्रातिपदिकवर्गेऽवोचच्च पुनरव्ययमिति। इदं तु मिश्रणामिश्रणार्थकयुधातोः क्विपि तुकि सिध्यत्येव नैतावता मम कापि क्षतिरिति स्वाभिप्रायस्य वर्णितपूर्वत्वात्। अन्येषामपि चादिगणेऽन्तस्थादि युदित्यव्ययमिति मन्यमानानां निराकृत्यर्थमयमेव मयोदितः पन्थाः सुगमः प्रतिभातीति। तदित्थमव्ययप्रकरणे चादिगणे पुदित्यौष्ठ्याद्यव्ययं सप्रमाणं सिद्धमेवेत्यलं बहुविलेखनेन विस्तरभयादुपरम्यत इति शम्॥

सन्तः सर्वे यद्दुरुक्तं मयास्मिन्
यच्चापल्याच्चापि नोक्तं कथंचित्।
तत् क्षन्तव्यं सारभागात्तचित्ता
बद्ध्वा युष्मानञ्जलिं प्रार्थयेऽहम्॥ १॥

॥ पण्डितबेचनरामत्रिपाठी॥

॥ कणादाक्षपादौ॥

इहतावदतिलौकिका अपि जना न विमतिं दधति यज्ज्ञानं सर्वपुरुषार्थानां तत्साधनानामपि च साधनमिति सर्ववस्तुभ्योऽधिकस्पृहणीयं। न तेन विना, दायक्रमाद्वा, कस्यचिदधिकारिविवेचननिपुणानाविनाकृतस्य महाराजाधिराजस्यानुग्रहाद्वा, लब्धं निधिपतित्वं भूपतित्वं वा, सुखस्य लेशमपि जनयितुं जनस्यालं। प्रबुद्धाश्च पार्थिवा अपि राष्ट्रनियमनादिव्यापारेषु, निर्ज्ञानं न विनियुञ्जते, नापि कंचिदत्युपकारकर्मापि तादृशमनुगृह्णन्ति, अनुगृह्णन्तोऽपि वा तस्माज्जनादनुग्रहानुरूपं प्रत्यभिनन्दनमलभमाना, अस्थानानुग्रहिणमात्मानं मन्यमाना, न विषीदन्ति। तदेवं लौकिकेऽतिनिकृष्टेऽपि विषये सर्वपुरुषार्थतत्साधनमूलत्वं सर्वसुखभोगानुकूलत्व प्रबुद्धव्यवहाराधिपतिजनानुग्रहहेतुत्व च बोधविवेकचित्तप्रकाशाद्यपरपर्यायस्य ज्ञानस्य नैसर्गिक्यैव लोकमत्या सिद्धमिति पारमार्थिकेऽपि परमोत्कृष्टविषये, ज्ञानं विना, सुखस्य वा भगवदनुग्रहस्य वा नास्त्येवाशा। भगवदनुग्रहो हि प्रपत्त्याराधनोपासनभक्त्यादिनामकं भगवच्छरणोपसादनं विना दुर्लभः, शरणोपसादनं च, भगवतः षड्गुणैश्वर्यस्य दृढनिश्चयेन, स्वस्य धनदारशरीरबुद्ध्याद्यभिमानपरिहारपूर्वकपरमदैन्यनिर्णयेन च विना, न शक्यं। तावच्च तादृङ् निर्णयोऽपि दुर्लभ एव न यावद् भगवद्भक्तसमागमः, खलजनसंगपरिहारः, परमेण चित्तैकाग्र्येण दीर्घकालादरपरिशीलनं च भवति। लौकिकेऽपि विद्याभ्यासे, तद्विद्यजनसहवासं, क्रीडाविनोदशो-

लसंगपरिहारं; निरादरनिरन्तरमनोयोगंचान्तरेण, समीचीनबोधफललाभो बुद्धिमतामप्यसम्भाव्यएव । तस्माद्, व्यवहारे, परमार्थेवा, ऽभीप्सितफललाभस्त तत्फलसाधकतत्तदुपायपूर्णपरिचयंविना, न, कस्याप्यनुग्रहेण, सिद्ध्यति । इदंतु संभवेद् यद् यथा सम्प्रत्यज्ञानसागरनिमग्नमिमं भारतवर्षीयं जनमुन्नतपदप्रदानादिना ऽनुजिघृक्षुर्देवी विजयिनी, ज्ञानप्रकर्षं विना तत्पदप्रदानासम्भवाद्- दत्तस्यापि तस्य दातृस्वीकर्तृसन्तोषानाधायकत्वात्, ज्ञानप्रकर्षसिद्ध्यनुकूलशिक्षासाधनभूतपाठालयमुद्रायन्त्रादिभिस्तं जनं ज्ञानिनं कर्तुं प्रयतते, तथा परमेश्वरोऽपि जनानां स्वस्वकर्मकृतां दीनतामवलोक्य, तादृक्कुकर्मनिवृत्त्यनुकूलज्ञानातिरेकसाधकानुपायान् संनिहितान् करोतीति । पश्यत यदितावत् कृतानुग्रहाणामपि गुरुराजपितृमात्रादिनिरभिसंधिहितचिन्तकजनैः सह व्यवहरणं महताऽवधानेन साध्यं तर्हि कल्पयत सर्वज्ञस्य सर्वकर्तुर्न्यायदयार्जवनिर्दोषतानिधानस्य प्रबोधनवर्द्धनरक्षणाद्यनेकविधभक्तसुखदव्यापारप्रवर्तकस्य भगवतः शरणागमने कियच्चित्तैकाग्र्यं तदर्थंच कियज्ज्ञानमपेक्षितं । यदिहि भगवाननुगृह्यापि सर्वपुरुषार्थमौलिमपवर्गं प्राणिनां करतलामलकं कृत्वापि बोधातिशयेन नैनं जीवं युक्तं कुर्यात् तर्हि सोऽनुग्रहोऽनर्घ्यः सचापवर्गोऽपि व्यर्थएव भवेत् । यदि पुनरतिदुर्गतिमतोपि जन्तुरीश्वरेण ज्ञानदानपात्रीक्रियेत, तर्हि स स्वयमेव तां दुर्गतिमतीत्य, भगवदिष्टप्रकारेण भगवत्सन्निधिं व्रजेत् । तथाच, यदि पूर्वमेव दैवयोगादीश्वरानुग्रह, स्तर्हि पश्चादात्मपरमात्मनोरशेषविशेषपरिचयपूर्वकं भगवत्सान्निध्यं; यदिच पूर्वमेव कयापि सामग्र्या तादृक् परिचय, स्तर्हि पश्चाद् भगवदनुग्रहपूर्वकं तत्सान्निध्यं; सर्वथापि ज्ञानंविना भगवत्सान्निध्यं न भवेत्, भवदपिवा, पाषाणादीनां महाराजाधिराजकेलिभवनसंसर्गइव, नोचितस्वतुष्ट्यै भवेत्, किन्तु यथा श्रीमतां गृहेषु गृह्यकाणां शुकादीनां तत्रत्यानद्भुतान् रूपरसगंधस्पर्शशब्दानुपभुंजतामपि, क्रीडनकत्वादधिकां कामपि योग्यतामनर्हतां, निंद्या दशा, सुबोधविरहेण पारतन्त्र्यात्, तथा भगवतो मंदिरे स्वर्गे निवसतां, तत्रत्यमतुल्यं सुखं भुंजतामपि, मुक्तानां तद्गृहमंडनीभूतकाष्ठपाषाणादिमपेक्ष्यानतिप्रशस्यएवोत्कर्षो भवेत् । यदिहि स्वर्गवासिनो मुक्ता अनेकानद्भुताचिन्त्यनवान् पदार्थाननुभवन्तोपि तत्तत्त्वजिज्ञासवो न भवेयुस्तर्हि चेतनधर्माद् बहिर्भवेयुर्नहि चेतनस्यापूर्वं पश्यतो न तज्जिज्ञासोदेति । साचेयं देवानुगृहीतानां जिज्ञासा ज्ञानेनैव निवर्त्या इच्छाया विषयलाभनिवर्त्यतायाः स्वाभाविकत्वात् एवंच क्रमेण तेषां स्वात्मपरात्मनोरशेषविशेषबोधः स्यात् ज्ञातेचाशेषविशेषबोधे भगवदनुग्रहवशादेव तेषां भगवत्तुल्यं जगत्स्रष्ट्रादिसामर्थ्यमपि न दूरे तथाच कियतापि कालेनेश्वरानुग्रहलब्धसर्वज्ञानक्रियाशक्तयः सम्यक् पाठिताश्छात्राः स्वप्रज्ञादीप्तिवशादाचार्यादिव मुक्ताअपि भगवतो ऽतिरिच्येरन् तथाचसति भगवतः परममैश्वर्यं नाममात्रमवशिष्येत यदित्वस्मादेव भयादीश्वरो मुक्तानात्मनि विषये नम्रतरान् कर्तुं तेषां जिज्ञासां नैव निवारयेत् तर्हि वृथा तेषां भगवदनुग्रहसंपादनायासइति दुष्पुत्रादपुत्रइव जिज्ञासातोत्रप्रहारदूषितात् ज्ञानात् ज्ञानसामान्याभावएव वरमिति प्राप्नुयात् । यदिचेश्वरो ज्ञानातिशयवंचनेन मुक्तानां नम्रतां रक्षेत् तर्हि भारतवर्षे एतेषु दिनेषु प्रचरत् न स्त्रियो लिपिव्याकरणधर्मशास्त्रगणितादिज्ञानं लंभनीया यतस्तास्तथासति ज्ञानकृतविशेषाभावात् पत्यादीन् मान्याननादृत्य वर्तेरन्निति मौर्ख्यं स्वर्गमपि गतमिति स्वीकृतं स्यात् । तस्मात् किमपि ज्ञानमीश्वरानुग्रहेण न लभ्यं नास्तीति पूर्वोक्तो ऽतिप्रसंगः सुदृढएव । तदेतत् प्रसक्तानुप्रसक्तमित्यलमिदानीमेतेन प्रसंगोद्भावनीयेन विवेचितेन ।

एवंच भगवदनुग्रहलभ्येप्यपवर्गे तत्संबद्धस्वात्मपरमात्मगताशेषविशेषविज्ञानमत्यावश्यकं तदन्तरेण पूर्णस्य परमेश्वरोत्कर्षस्वात्मगतापकर्षविषयकसंशयविपर्ययानध्यवसायादिभ्रमकलंकविरहितनिश्चयस्यानुत्पत्तेः तंचविना कायवाङ्मनोभिर्भगवच्छरणगमनस्यासंभवात् तच्चान्तरेण भगवदनुग्रहस्य दुःसंपादनत्वात् । असंपादितेच भगवदनुग्रहे कुनाम मोक्षवार्तापीति ।

एतदेवच विज्ञानमात्मानात्मविवेकइत्युच्यते । यश्च पामराणामपि देहेंद्रियादिभ्योऽनात्मभ्य आत्मनो भेदाधिगमः स न विवेकः । अशेषविशेषसाक्षात्कारकृतो भेदसाक्षात्कारो हि सः । तथाहि न परस्य धनमपहरणीयमिति लोकान् शिक्षयन्तो ऽपि यत् परधनमपहरन्ति तत् तेषां तादृशधर्मशास्त्रशाब्दबोधमात्रं न विवेक इत्यनुमापयति शाब्दबोधमात्रं तु परधनविषयकरागातिशयेन तस्य तिरोधीयते तथैव योयं देहादिभ्य आत्मनो भेदावगमः स लोकस्यानुमानिकः शाब्दो वा सर्वथाप्यतिचिरन्तनाविवेकवासनाधीनरागातिशयप्रतिबध्यइति युक्तं तादृशधर्मनिश्चयवतामिवोक्तप्रकारकात्मानात्मभेदज्ञानां पुनःपुनरधर्मइव देहाद्यात्मीकरणे ऽत्याग्रहपूर्वं प्रवर्तनं । अतो यदा भगवत्कृपया जातेन सर्वविशेषसाक्षात्कारमूलकभेदसाक्षात्कारेण दिक्प्रत्यक्षेणेव दिग्भ्रमस्य देहाद्यभिमानस्य निवृत्तिः स्यात् तदैव सर्वसंसारसंतापोपशमस्य मोक्षस्य सिद्धिः स्यादिति ।

अथ यदि ज्ञानं मोक्षे ऽप्यावश्यकमुक्तरीत्या प्राप्तं कथं तर्हि नैयायिकैर्वैशेषिकैश्चैकविंशतिदुःखमध्ये ज्ञानं परिगण-

यद्विज्ञानस्यापि निवृत्तिर्मुक्तिकाले ऽभ्युपगता न विरुद्धा। मैवम्। तात्पर्याज्ञानात्। यतो ऽनादिप्रवाहप्रचलितानि यादृशानि ज्ञानेन्द्रियशरीराणि तानि सर्वथा ऽद्यावधि दुःखमेवाजनयन्निति तानि सर्वपुरुषार्थश्रेष्ठे मोक्षे सर्वथा वर्जनीयानीति विचार्य न्यायवैशेषिकाचार्यैस्तथा ऽभिहितमिति।

मोक्षदशायां किं किमावश्यकं किंचानावश्यकं तदखिलं "जैमिनिबादरायणौ" नामके प्रकरणे विविच्य दर्शयिष्यामः।

सर्वविचारकानुभवसिद्धं ह्येतद् यत् सांसारिकात्यल्पतुच्छनश्वरपरतंत्रज्ञानेंद्रियशरीरैरवश्यं वियोगो ऽपेक्ष्यइति।

॥ २ ॥

अनन्ता जीवाः परमाणव आकाशः कालो देशश्च परमेश्वरवदेवानाद्यविनाशिनो ऽङ्गीक्रियन्ते नच तावता भगवतः परमं स्वातंत्र्यं लेशेनापि हीयते तेषां सत्तायाः कार्योपयोगितायाश्च भगवदिच्छैकनियम्यत्वात् भगवतइव तेषामुत्पत्तिविरहे ऽपि नियामकान्तराधिष्ठानानपेक्षसर्ववस्तुसत्तापरिपालनसामर्थ्यलक्षणस्वातन्त्र्याभावात् नहि स्वातिरिक्तवस्तुनः सत्ताया अनादितामात्रेण चिकीर्षितोपयोगमात्रेणच कर्तुः स्वातन्त्र्यं बाध्यते जगत्सृष्टेः पूर्वं परमाणूनां जीवानां चानभ्युपगमेपि कालदेशयोः सत्त्वावश्यकत्वेन स्वातन्त्र्यभंगस्याप्रतीकारात् कालदेशयोश्चानभ्युपगमे भगवतएवानाद्यनन्तव्यापकत्वानां विलयप्रसंगात् यथाहि कालदेशयोरनादिरपि सत्ता भगवदिच्छैकमूलिकैवेति न तत्स्वातन्त्र्यक्षतिकरी तथा परमाण्वादीनामपि। यदिह्यनादिजीवादिसत्तया भगवतः स्वातन्त्र्यहानिः शंक्यते तर्ह्यनन्तयाऽपि जीवादिसत्तया तद्धानिशंकाप्युचितैव भगवदिच्छानुसारित्वाद् यद्यनन्ता न बाधिका तर्हि ततएवानादिरपि सत्ता न तथेति। यदि भगवान् परमाण्वादिसत्तां नेच्छेत् तदापि सा निवृत्तियोग्या नेति स्वातन्त्र्यक्षतिशंकातु यदि परमेश्वरो ऽपूर्वोत्पादितानामपि जीवानां सत्तां नेच्छेत् तदापि सा निवृत्तियोग्यता नेति स्वातन्त्र्यक्षतिशंकया समानसमाधाना। यतो याननन्तस्थायित्वेन भगवानिच्छति तेषां निवृत्तिं कथमिच्छेदेतदपि यैः स्वेच्छापरिपालितसत्ताकैः परमाण्वादिभिः कार्याण्यपाराणि दुरवगाहानि देवः सृष्टवांस्ताननादिस्वानुग्रहविषयान् निवर्तयितुं कथमिच्छेदित्यनेन तुल्यं।

अथ परमाण्वादिसत्ताया अनादित्वे भगवतः स्वातन्त्र्यक्षतिर्न बाधिका तथापि तत्र न किमपि प्रमाणमस्ति भगवतो ऽचिन्त्यशक्त्यैवोपादानोपादेययोरुत्पत्तिसंभवादिति मन्यते तदा विभाव्यतां परमेश्वरस्यापि तदानीमेवाचिन्त्यशक्त्यैवोत्पत्तिसंभवात् तस्याप्यनादित्वं न स्यात्। यदिच लोके ऽतितुच्छस्याऽत्यल्पनियमापेक्षस्यापि कार्यस्योत्पत्तेः सर्वस्या उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्पूर्वकत्वदर्शनादस्य विश्वस्यासंख्यातगूढनियमसंततस्योत्पत्तिर्विना कर्तारमनुपपन्नेति जगदुत्पत्तेः पूर्ववर्ती कर्ता सिद्ध्यतीति मन्यते तर्हि भगवता ऽस्मदादिभिश्च सृष्टानां सर्वेषां कार्यद्रव्याणां सूर्यचंद्रतारकक्षितिसमुद्रप्रभृतीनां ग्रामनगरोपवनायतनदुर्गशस्त्रादीनां चावयवपूर्वकत्वं दृष्टमिति निरवयवकार्यद्रव्यासंभवात् कार्यद्रव्याणां च निरवयवचरमावयवकत्वस्यावश्यकत्वात् स चरमावयवो नित्य इत्येव परिशिष्यते यथाच नित्येनापि तेन न भगवत्स्वातन्त्र्यक्षतिस्तथोपपादितमधस्तात्। दृष्टमुल्लंघ्याचिन्त्यशक्तिमात्रोपष्टंभेन सर्वकारणान्यथाकरणे परमेश्वरस्याप्युत्पत्तिः प्रसज्यते धर्माधर्माचरणनिबंधनत्वंच स्वर्गनरकयोः शरणागमननिबन्धनत्वंच भगवदनुग्रहस्य न स्वीकर्तव्यमेव अचिन्त्यशक्त्यैव तस्य सर्वस्योपपत्तेः। आप्तोक्तत्वात् तत् सर्वं तथैव स्वीक्रियतइति यदि तर्हि परमाणूनामनादितापि हेतुतः स्वीकर्तव्यैव कोहि सल्लिंगाप्तवचनयोरपूर्वज्ञापकत्वे विशेषइति। यद्विचोपादानापेक्षित्वाद् भगवतः कुलालकुविंदादिसाम्यं प्रसज्यत इति शंक्यते तर्हि सप्रयोजनप्रवृत्तिमत्त्वविवेकित्वादिभिः कुलालादिसाम्यं प्रसज्यतइत्युपादानानपेक्षित्वमिव निष्प्रयोजनप्रवृत्तिमत्त्वाविवेकित्वादिकमपि भगवतः स्वीकर्तव्यमापतेत् तस्मादुपादानापेक्षातोऽल्पेष्युपादानानां परमसूक्ष्मत्वादृश्यत्वापरिगणनीयत्वादिभिरत्यन्तवैधर्म्येणोत्कृष्टत्वात् तेषामधिष्ठातुर्भगवतः कुलालादीनपेक्ष्यात्यधिकमैश्वर्यं स्फुटमेव। एवंसति कथमीश्वरस्याचिन्त्या शक्तिर्दृष्टसदृशत्वादितितु न शंकितुं युक्तं अचिन्त्यत्वस्य जन्यज्ञानाविषयाशेषविशेषत्वरूपस्यापरिगणितप्रभेदापूर्वकार्यकारणप्रबंधविषयकत्वरूपस्यवा केनचिदेकेन धर्मेण दृष्टसादृश्यवत्यामपि भगवच्छक्तावविरुद्धत्वात्।

॥ ३ ॥

ईश्वरस्तावदपारदयासागरो न्यायिनां मूर्द्धन्यः सर्वस्वेष्टकार्यसमर्थः प्रेक्षावांश्च भूत्वा गुणदोषसंपर्कशून्यानसतोऽपि जीवानुत्पाद्य स्वयमेवच पापपुण्ययोस्तान् स्वतंत्रान् विधाय तान् सर्वात्मना पापान्निवारयितुं दयां न्यायं शक्तिं च दधदपि न निवारयति प्रत्युत तेषां पापमोचने स्वयं समर्थो ऽपि ये तस्योपदेशमतिलंघ्य वर्तन्ते तान् क्लिलापारे नरकज्वलने पातयिष्यतीति न कदाप्युचितविचारकाणां मनः स्पृशति। किं कश्चिद् राजा पिता गुरुर्वा स्वयमेव योऽपराधानुष्ठाने स्वतंत्रीकृतो ऽपराधाच्च निवारितश्च तं दीनं जनं पुत्रं शिष्यं वा तमेवापराधमुद्भाव्योद्भाव्य यावज्जीवं दंडयेदेव नतु कदापि स्वेच्छैकमूलकं तदीयं तीव्रदुःखवेगं पश्यन्नपि दया-

प्रेरितः संस्तं पुनरुद्धरेत् । नचाप्येतादृशेन कर्मणा सर्वलोकगर्हणीयचरितः स्यात् । कथंकिलोत्पत्तितो बलतो धनतः परिजनतो ज्ञानतश्चेश्वरैकाधीनो जनः सर्वनियंत्रा ऽचिंत्यशक्तिमता स्वतंत्रेण न्यायिना चेश्वरेणैव कुपथाद् व्यावर्तयितुं न शक्यइति बुद्धिमन्तः प्रत्येष्यन्ति । तथात्वे तस्य सर्वसामर्थ्यव्याघातात् । दयावैयर्थ्यात् । न्यायनैष्फल्यात् । सुफलोद्देशेन कृतस्य कर्मणो दुष्टफलपर्यवसानेन विसंवादिप्रवृत्तिकतया परमैश्वर्यविलयाच्च । किंच तेषां मुक्तानां स्वर्वासिनां, सदैव नरके ऽतितीव्रतापं साक्षात्कुर्वतः पुनरुद्धाराशाशून्यान् जनान् पश्यतां, मुक्तिसुखं दुर्लभमेव । दीनोद्धरणे स्वतः सामर्थ्याभावात् । अचिन्त्यशक्तिमताचेश्वरेण स्वां शक्तिं दयांचाननुसंधानेनापुनरावृत्तये स्वतोनिर्दोषाणामेव जीवानां स्वकल्पितैरेव दोषैर्नरके पातितत्वेन स्वकृतमेतत्कर्मानुचितत्वेन दृष्टमपि नान्यथाकर्तव्यमिति प्रतिज्ञायहठवशादन्यथाकर्तुमनिच्छत ईश्वरस्य तज्जनोद्धरणविषयकप्रार्थनाया नैष्फल्यनिश्चयाच्च । यदिच जीवेभ्यः पापफलं दददीश्वरस्तानुद्धर्तुं न शक्तस्तर्ह्यस्मिन् विषये तस्य न्यायितया दयया परमस्वातन्त्र्येणाचिन्त्ययाच शक्त्या क्व पलायितं । यदिचानन्तमेव फलं पापेन जन्यतइति तेन स्थापितमतस्तद्विरुद्धं कथं तानुद्धरेदिति मन्यते तर्हि तेन स्वीयापारदयाविरुद्धं कथंनु तथा स्थापितं कथं सृष्टिकाले यानिमाचिरपराधान् दुःखानर्हान् स्वमाहात्म्याभिनंदनायोत्पादयामि तेषां शरीरबुद्धीन्द्रियप्राणांश्च परमेण वैचित्र्येण भूषयामि तदेतत् सर्वं यथा व्यर्थं परमानर्थफलकं च न भवेत् तथा यतिष्य इति सावधानं न प्रवृत्तं । कथंवा सर्वज्ञस्येदृशः प्रमादोपि शंक्यते यस्य प्रेरणया विना ऽनन्तेष्वपि भौवनेषु पिंडेषु तृणमपि चलितुमपि नप्रभवति । एवंचापूर्वाननपराधानसमर्थान् स्वतःपापपुण्यपरिचयहीनान् सुखदुःखविषयकस्वाभाविकरागद्वेषवतः परतंत्रान् जीवान् सृष्ट्वा समस्तदुःखपापविपरीतसुखैकमयपरमपवित्रस्वभावोपि तेषु पूर्वपूर्वपुरुषक्रमेण पापं तन्मूलकदुःखंच संचार्यासर्वसाधारणेनोपायेन कांश्चिदेवोद्धरिष्यति न सर्वानित्येतद् बुद्धिमतां दयान्यायपवित्रतासर्वैश्वर्ययोग्यं न भाति । जीवानामनादिमिथ्याज्ञानवासनावशतया सुखदुःखाभावोद्देशेन स्वस्वमतिपरिणामानुसारेण कुशलमकुशलंवा कर्म कुर्वतां तदनुसारेण न्यायिना नियामकेन भगवता दत्तं सुखं दुःखं वोपभुंजानानां मध्ये यः सद्गुरुसमागमैकहेतुकसद्विद्यामूलकसदसद्विवेकेन पापहेतून् वर्जयन् भगवन्तं शरणं व्रजेत् स दयालुना तेन ज्ञानोत्कर्षप्रदानादिक्रमेण वितीर्णमपवर्गसुखमनन्तमनुभवेदितितु विचारकाणां बुद्धिमतां स्फुटं प्रतिभातीति ।

॥ ४ ॥

यदि तावद् यस्य ग्रन्थस्यैतिहासिकैः प्रमाणैश्वरन्तनत्वमविकृतत्वं बहुभिर्विचारकैरपक्षपातिभिः परिगृहीतत्वं सिद्ध्यति तस्यार्थे स्वकपोलकल्पनाविजृम्भिते सहस्रशोऽनुपपत्तियस्ते साधकवर्जिते विश्वासं कृत्वा स्वाभाविक्या उपपत्तिजिज्ञासायाः शान्तये परमेश्वरस्तदुपपत्तिं जानातीति कल्पयित्वा वर्तनमुचितं तर्हि स्वतः सिद्धस्य विपरीतबाधकप्रमाणवतो ऽनेकोपपत्तिसिद्धस्यान्यथानुपपत्त्यनुगृहीतस्यार्थस्य प्रतिपादके शब्दे विश्वासं कृत्वा स्वाभाविक्या ऐतिहासिकप्रमाणजिज्ञासायाः शान्तये परमेश्वरस्तस्यैतिहासिकप्रमाणं जानातीति मत्वापि वर्तनमुचितमेव ।

यदि चोपपन्नेऽप्यर्थे ऐतिहासिकप्रमाणविरोधेन बाधः शंक्यते तर्ह्यैतिहासिकप्रमाणवत्यप्यर्थे उपपत्तिविरोधेन बाधः सम्भवत्येव ।

प्रत्युत स्वतः संभविनोऽर्थस्य प्रतिपादकानामितिहासविलोपेपि प्रामाण्यमर्थबलात् स्वतएव सिद्धमितीतिहासादिकं नापेक्षते नहि द्वौद्वौ मिलितौ चत्वारइत्यादेरर्थस्य तत्प्रतिपादकशब्दीयेतिहासविलोपेप्यविश्वासयोग्यता ।

अनुपपन्नस्यचार्थस्य प्रतिपादकानां शब्दानां सत्स्वप्यैतिहासिकप्रमाणेषु विचारकाणां नोचितो विश्वासः । नचैतावता खृष्टीयधर्मग्रन्थानामप्रामाण्यमस्माकमभिप्रेतमिति शंक्यं तस्यापि मीमांसातर्कपरिशोधिते निर्बाधे खृष्टधर्मप्रचारोपजीविजनैरग्राह्यएवार्थे प्रामाण्यस्य व्यवस्थापनीयत्वात् ।

॥ विट्ठलशास्त्री ॥

THE THREAD OF GAUTAMA'S APHORISMS.

By the late Dr. Ballantyne.

(From the Benares Magazine February 1852)

(Concluded from page 102.)

But, thus far, we have been shown an arrangement for hearing only one side of the question,* and how can we be sure that the opposite side is not the right one? [Before making up our minds we must hear both sides—§39—40.]

But an honest enquirer may have heard both sides and still be in perplexity. Is he to be turned adrift? Not at all. Honest discussion, with one who holds the same first principles, is open to him [§41].

There are yet others, besides honest enquirers, that are not utterly to be rejected. A person, not hopelessly irreclaimable, may shabbily *wrangle* for the sake of a seeming victory. [Here, therefore, he defines wrangling, §42.]

* Prov. xviii. 17.

Digitized by Google

A person, not perhaps hopelessly irreclaimable, may descend to even a lower depth of shabbiness than the wrangler, and may carp at others without undertaking to settle any thing himself. [Here, therefore, he defines cavilling, §43.]

Wranglers and cavillers, in default of good reasons, must take up with bad ones—with what *look* like reasons; and even an honest enquirer may mislead himself by taking the semblance of a reason for a real one. [The various possible semblances of a reason he, therefore, defines and divides, §44—49.]

But, whilst there are fallacies by which a man may deceive himself as well as others, there are other frauds which are employed only dishonestly for the deception of others. [These frauds he defines and divides, §50—57.]

Descending a stage lower, an opponent may employ arguments so futile as to be capable of deceiving no one. It is well to know in what consists the futility of such objections. [This he shows, §58.]

Finally, an opponent, sinking even below the former one, who *knew* what he was opposing though he could make none but a futile opposition), may be unable to understand the proposition [§59—60]. Here GAUTAMA'S patience is exhausted, *but not before.* Against every thing but that invincible combination of the spirit of contradiction with stupidity he seeks to arm himself at all points. An objection the most frivolous—or even futile —provided it be tendered by one who understands the proposition—he does not refuse to deal with. The objection might perplex some honest enquirer, and therefore GAUTAMA, or the follower who has imbibed his spirit, does not consider himself entitled to consult his own ease by scouting it, though he himself may see its futility plainly enough. It is fair to remember this when we meet with ludicrously frivolous objections gravely treated in a Nyáya work. The author is not to be supposed to have *invented* the objection. It was offered to him—offered very possibly for the purpose of vexatiously puzzling and perplexing—and the Naiyáyika will not allow himself to be puzzled and perplexed. The most cavilling opponent is not to be allowed the semblance of a victory; he shall not be allowed to boast even of having put the philosopher out of temper. This single triumph—such as it is—is reserved for the absolute blockhead.

Now, we should like to learn from the undervaluers of the *method* of the Nyáya, how could that method be much improved? You are not to imagine that you have answered this question when you have shown that there are some important matters not here noticed by GAUTAMA. You must be able to show either that there are important matters for which his system provides no place, or that he misarranges the order of procedure. We have explained his order of procedure, according to our own view of it. The question whether there is any thing within the range of conception, for which his system does not furnish its appropriate place, we have already discussed, after a fashion, in an article in a former number "on the Nyáya system of philosophy, and the correspondence of its divisions with those of modern science." On some of the points considered in that and in some subsequent papers we have seen reason to modify our opinion, and with a hasty notice of one of these points we shall conclude the present paper. Our corrections belong chiefly to the section of Inference, which the strictures of an anonymous critic constrained us to look into with more attention than we had done at the time of penning our first article on the subject.

At page 280, Vol. I. of the Magazine we remarked that we did not find in Mr. Colebrooke's Essay any reference to the condensed form of the syllogism exhibited in our text-book. It is not referred to by Mr. Colebrooke; and the reason is sufficiently obvious—viz., that Mr Colebrooke was engaged in giving a summary of the fundamental Aphorisms of GAUTAMA—of those Aphorisms that we have just presented to the reader,—and the consideration of the condensed syllogism did not fall in his way. It is in the works of the commentators that the condensed syllogism makes its appearance; and, when treating of these works, we may have occasion to say something more about it. From the Halls of Oxford, of Edinburgh, and of Germany, queries have reached us that have been elicited by our papers—all too crude as we admit our papers to have been. To these queries we shall strive to give, in due time, satisfactory replies. Meantime we shall not encroach upon the space of the present number of the Magazine further than to revoke our explanation of the terms concerned in Inference—wherever we may have spoken of the term *anumána* as signifying the act of inferring. It signifies—we now find—no such thing. It signifies, not the process but, the instrument employed in the process. This instrument, as explained by our authorities, is 'the consideration of a Sign':—it is, in other words, such knowledge as, when expressed in words, constitutes a *Universal Proposition* embodying the result of a process of Induction. The truths which embody themselves in such propositions may be looked upon as deposited in the memory, like the instruments of a man's trade in his workshop; and as looms produce webs, so do these (Major Premises *in posse*) produce inferences, only when they are brought into *operation.* The operation is, by the Naiyáyikas, technically named *parámarśa*—which signifies the application of a general principle to a particular case, or the recognition of a particular case as falling under some general principle

Digitized by Google

—in short, syllogizing. If the *anumána* had signified the process, instead of the instrument, the additional step of the *parámarśa* would have been an absurdity; and we apologize to the Naiyáyikas for having been so far misled by the familiar—and familiarly unobjectionable—use of the term *anumána* as to fall, for the time, into the error of supposing them open to the charge of holding any absurdity of the kind.

VAIDIK ECHOES.

Śushṇa and Cycnos.

Among the most ancient fragments attributed to Hesiod is a piece of 480 verses in which is related the combat between Hercules and Cycnos. This Cycnos is not a Swan, as the name might lead one to suppose: he is a personage whose name is not Greek, and who is often mentioned in the Veda. The hymns of the Indian collection relate the same combat in numerous passages with poesy several features of which re-occur in the fragment of Hesiod. Every one knows that the Greek Hercules is a solar personification identical with, or closely anloogous to the Indra of the Orientals; as regards Cycnos, he is Śushṇa (the dry) or the power which retains the rain within the clouds, and causes drought and sterility. The strife of Hercules and this demon is, consequently, the struggle of the sun against that power, whose defeat will cause the rain to fall. Cycnos, son of Ares, mounted upon a chariot with his father, raised the dust and infested the sacred groves. Apollo sends against him Hercules and his trusty squire Iolaos. The chariot is drawn by the immortal horse Arion* (in Sanskrit Arwan). Hercules is armed with a celestial shield which is to make him invincible. The combat of the two champions takes place in the height of summer. "When the shrill cicala, with dark wings, perched upon a branch, begins to sing summer to men, the cicala whose food and drink is the freshening dew, and who pours forth his song at morning and all day long in the fiercest heat, when the Dog-star scorches the skin; then the son of Zeus, Iolaos, shouted terribly to his horses, and at his voice they whirl the chariot on and raise up the dust of the plain: earth groaned beneath them. The foes too advanced like fire and storm."

* The whole history of this mythological horse, the name of which is in the Veda only the general term for a horse, has been localized by the primitive Greeks in the middle of Arcadia. There are the great Aroanian mountains, and the river of the same name which falls into the Ladon, an affluent of the Alpheus; on the bank of the Ladon, from the love of Neptune and Démétér sprang Arion, the primordial horse, who under the Greek name of Chrysaor has been regarded as the symbol of all aquatic animals. In a grotto on the banks of the Alpheus was an ancient wooden statue of Démétér with a horse's head, and bearing on the body the figures of a great number of animals. By discovering the Aryan origin of the name Arion comparative Philology gives us the key of all this legend.

The enemies challenge, alight, and hurl themselves upon each other like rocks that roll down from the mountains. The spear of Cycnos cannot pierce the brazen shield: but the lance of Hercules wounds Cycnos in the throat and casts him lifeless to the ground. Here are some passages of a hymn of the Veda taken from among many:

"Indra has taken his quiver and his arrows. Thou hast smitten with thine arm the robber laden with prey. Śushṇa dared to strive against the Gods. Indra, from the height of the air, in the sight of heaven and earth, mounted upon thy car, firm and terrible, thou hast breathed upon this wretched one. He has touched with his thunder-bolt those clouds which descended not from heaven to earth, and which with their magic wings seemed to envelope that robber laden with his spoils. He has caused the milk of the celestial cows to gush forth. The waters poured down as we desired. Indra during several days has destroyed the hope of the robber: he has burst the gate of his cavern where he held the waters shut up; he has broken down his airy fortresses. He has torn Śushṇa in pieces, and at sight of his foe overthrown he has given up his soul to joy."

From the French of M. Emile Burnouf. Revue des-deux Mondes 1*st October* 1866.

VAIDIK ECHOES.

Hymns.

When the Aryan peoples quitted their common home in Asia they bore with them the ancient customs which were common to all their race; one of them is found at the bottom of all their traditions, that of sacrificing with fire and of singing while sacrificing. This measured and rhythmical chant is the *hymn*, a word which in Greek has no etymological signification, but which under its Vaidik form *(Sumna)* signifies good and beautiful thought, that is to say the expression of thought *par excellence.* The presence of this word in the most ancient Greek language proves that the Aryans of the Oxus composed hymns before the departure of the Hellenic and Indian migrations. These chants then were composed in the common tongue before they were written in more recent dialects. Time has caused to disappear all the hymns brought or produced by the Grecian migrations, although the sanctuaries of Greece may have preserved several of them till the time of her decay.

Digitized by Google

India alone has preserved hers, and the Veda is found to be the Aryan record which connects us most closely with our origin: its hymns may be considered as types of the sacred songs of all the peoples of our race and as the real Sacred Scripture of the East and of the West.

(From the same.)

RÁVAN DOOMED. *

Rámáyana, Book I. Bombay Edition.

Thus to the Lord by whom the worlds were made
The Gods of Heaven in full assembly prayed:
"O Brahmá, mighty by thy tendered grace
Fierce Rávan, leader of the Giant race,
Torments the Gods, too feeble to withstand
The ceaseless fury of his heavy hand.
From thee well pleased, he gained, in days of old,
That saving gift by which he waxes bold;
And we, obedient to that high behest,
Bear all his outrage, patient and oppressed.
He scourges—impious fiend—earth, hell, and sky;
And Indra, lord of Gods, would fain defy.
Mad with thy boon, he vexes in his rage
Fiend, Angel, Seraph, Bráhman, Saint, and Sage.
From him the Sun restrains his wonted glow,
Nor dares the Wind upon his face to blow;
And Ocean, necklaced with the wandering wave,
Stills the wild waters till they cease to rave.
O Father lend us thine avenging aid,
And slay this fiend, for we are sore afraid."
They ceased. Then, pondering in his secret mind,
One way," He said, "to stay this scourge, I find.
Once, at his prayer, I swore his life to guard
From God and Angel, Fiend, and Heavenly Bard:
But the proud Giant, in o'erweening scorn,
Recked not of mortal foe, of woman born.
Man, only man, this hideous pest may slay:
None else can take his charmëd life away."
When Brahmá's speech the Gods and Sages heard,
Their fainting souls with hope reviving stirred.
Then, crowned with glory like a mighty flame,
Lord Vishnu timely to the council came:
Shell, mace, and discus in his hands he bore;
And royal raiment, tinged with gold, he wore.
Hailed by the Gods, most glorious to behold,
With shining armlets, forged of burnished gold,
He rode his eagle through the reverent crowd,
Like the sun borne upon a darksome cloud.
Lost in deep thought he stood by Brahmá's side,
While all the Immortals praised his name, and cried:
"O Vishnu, Lord divine, thine aid we crave,
Friend of the worlds, the ruined Worlds to save.
Divide thy godhead, Lord, and for the sake
Of Gods and men man's nature on thee take.*
Shrined in the bodies of four children, spring
From the three wives of fair Ayodhyá's king:
High rank with saints that godly prince may claim,
And those sweet queens, with Beauty, Grace, and Fame.
Assume man's nature thus, and slay in fight
This common scourge, who laughs at heavenly might:
This giant Rávan who, in senseless pride,
Has, trusting to his own right arm, defied
The hosts of Heaven, and ever plagues with woe
Seraphs and Gods above and Saints below.
Crushed are the Blest, who roam through Nandan's shade,
The Saint, the Seraph, and the Heavenly Maid.
We, with the Sages, Lord, to thee draw nigh,
And crave thy succour that the Fiend may die.
Angel and Bard before thee humbly bow:
Our surest hope, O conquering Lord, art thou.
Arise, O Lord, regard the world below,
And slay in fight the Gods' tremendous foe."
Thus prayed the Children of the Sky; the lord
Supreme of Gods, by all the worlds adored,
Thus to the suppliants in answer spake:
"Fear not, ye sons of Heaven, but comfort take;
Rávan, your terror, by this hand shall fall,
With son and grandson, lord and captain; all
His friends and counsellors, his kith and kin,
Shall share his ruin as they share his sin.
Thus will I triumph o'er the foe, and then
Dwelling on earth among the sons of men,
The while ten thousand seasons roll away,
Will guard her with mine own imperial sway."
Then Nymph and angel, and the Minstrel throng,
With heavenly voices, raised their choral song:†
And all the region, filled with music, rang
With lauds to Madhu's victor, while they sang:
'Go forth and fight, and strike the monster dead,
The scourge of Saints, immortal Indra's dread;
The fell fiend Rávan, ravener‡ abhorred;
Slay him, and all his race, avenging Lord!
Then turn triumphant to thine home on high,
And reign for ever in the ransomed sky."

---

* The following lines are at present rough-hewn only; the translator will be thankful for criticisms and suggestions.

* Cf. Paradise Lost. Book III. 281.
"Their nature also to thy nature join.,
And be thyself man among men on earth."

† Cf. Paradise Lost. Book III. 344.
"No sooner had the Almighty ceased, but all
The multitude of angels, with a shout
Loud as from numbers without number, sweet
As from blest voices, uttering joy, Heaven rung
With jubilee, and loud Hosannas filled
The eternal regions."

‡ *virávanam rávanam.* Literally Rávan who causes weeping: both words being formed from the root *ru* (Lat. *raucus rumor*): from which too comes the English word raven.
For a similar play upon the word cf. Paradise Regained.
"And saw the *ravens* with their horned beaks
Food to Elijah bringing, even and morn,
Though *ravenous*, taught to abstain from what they brought."

Digitized by Google

ADVERTISEMENTS.

Dr. Ballantyne's publications, procurable from the English Librarian, *Queen's College Benares.*

	Rs.	As.	P.
Aphorisms of the Sánkhya, Books II. III. IV. Sanskt. and English, ...	0	12	0
" " Books V and VI. do.	0	12	0
" " Yoga, Sanskrit and English, Part II.	0	8	0
Bhasha Parichchheda and Siddhanta Muktavali Sanskt. and English Part I.	0	7	0
Bacon's Novum Organum, Sanskrit and English Part I.	0	12	0
" " with Commentary Fasciculus II., ...	0	14	0
" " " " III.,... ...	0	8	0
" " Sanskrit Version Book I., ...	0	12	10
" " Fasciculus II, ...	1	8	0
" " " III, ...	0	7	6
" " " IV, ...	0	6	0
Elements of English Grammar, Sanskrit and English, ...	0	6	0
Synopsis of Science, Sanskrit and English Vol. I,... ...	1	0	0
" " II,... ...	0	14	0
" " III,... ...	1	0	0
" " Sanskrit / " " English } (both included)	3	8	0
Discourse on Translation, ...			
Heliographic Rules and Reasons, ...	0	4	0
Lectures on the Chemistry of the five Hindu Elements, ...	1	4	0
Lectures on the Subdivisions of Knowledge Part I, ...	0	4	0
" " II, ...	0	4	0
" " III, ...	0	4	0
Macbeth with Paraphrase, ...	1	8	0
"Does the Moon rotate?"			
Reprints for the Pandits No. I.			
Harris's Dialogue on Art, ...	0	4	0
" " No. II. Physical Science, ...	0	8	0
" " Part II. Hydrostatics and Pneucs, ...	1	1	0
" " No. III. Method of Induction (J. S. Mill),...	0	12	0
Reprints for the Pandits No IV. Metaphysics and Mental Philosophy Vol. I (from Berkeley), ...	0	8	0
" " " Vol. II. (from Stewart),	2	0	0
" " " V. Bacon's Novum Organum,	0	12	0
" " Tracts on Metaphysics, Logic and Mental Philosophy (from "An Outline of Metaphysical Enquiries,")...	0	12	0
" " VI. Elements of Logic (from Whately), ...	1	2	0
" " VIII. Political Economy Vol. I. (from Whately and De Quincy), ...	0	12	0
" " VIII. Elements of Rhetoric (from Whately)	1	4	0
" " IX. Chemistry Vol. I. (from Griffith and Faraday), ...	1	8	0
" " X. Physical Geography, (Mrs. Somerville),	1	12	0

DR. BALLANTYNE'S "BIBLE FOR THE PANDITS." Consisting of the first three chapters of Genesis, diffusely and unreservedly commented in Sanskrit and English, with a lengthy introduction in English. Rs. 3-0-0.

LAGHU KAUMUDÍ VYÁKARAN in Sanskrit. The text is taken from DR. BALLANTYNE's last Edition. Rs. 1-2-0,

MÁNAVÁ DHARMASÁR, or the Ordinances of Manu, comprising the Indian system of duties, abridged and translated from the original Sanskrit by BÁBÚ ŚIVA PRASÁD. 2nd Edition. As. 8-0.

BODH CHATUSPATH CHANDRIKÁ, a Hindí and Sanskrit Primer. As. 4-0.

MAP of the CITY and SUBURBS of BENARES, defining the Mohullas and subdivisions of the Genaral Police jurisdictions; including also the CIVIL STATION and CANTONMENT OF SECROLE. SCALE 220 yards to the inch, Colored Rs. 5-0, Mounted on cloth and bound, book-shape 8 Rs.

ANNOUNCEMENT.

In the Press, and shortly to be published, in one Vol. 8 vo. price 8 Rupees. A new Edition, corrected and enlarged, of

THE LAGHU KAUMADÍ.

A SANSKRIT GRAMMAR.

With an English version, commentary and references by Dr. Ballantyne, late Principal of the Sanskrit College, Benares, re-edited by Ralph Griffith Esq., M. A. Principal of the Sanskrit College, Benares.

"The Translation of the Laghu Kaumudí made by the late Dr. Ballantyne has enabled even beginners to find their way through the labyrinth of Native Grammar." *Prof. Max Müller.*

May be procured from Messrs. Trübner & Co., London, the English Publishers.

Now ready.—Price Rs. 16.

A TRILINGUAL DICTIONARY; being a comprehensive Lexicon in ENGLISH, URDÚ and HINDÍ, exhibiting the syllabication, pronunciation, and etymology of English words, with their explanation in English, and in Urdú and Hindí in the Roman character, by Mathurá Prasáda Miśra, Second Master Queen's College, Benares.

"*Concentrates in itself the utility of the dictionaries of Webster, Richardson, Smart, Worcester, D'Rozario, Shakespear, Forbes and Monier Williams.*"

This work, containing nearly 1350 demy 8vo. pages of closely printed metter, in Brevier type is too heavy to be sent by book post. It may be procured direct from us, by Bangy Dâk; from any bookseller in Calcutta, Madras or Bombay; or from Messrs. Trübner & Co., London.

Communications of a literary nature should be addressed to the EDITOR: *all letters on business, to the Proprietors,* MESSRS. E. J. LAZARUS & Co., *to whom Drafts should be made payable.* ADVERTISEMENTS *will be charged for according to the space occupied.*

The PANDIT may be ordered of the Publishers, or through MESSRS. TRÜBNER and Co., LONDON.

Annual subscription, in advance, including postage, Rs. 12.

PRINTED AND PUBLISHED BY E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 9. Benares February 1st, 1867. Vol. I.

॥ प्रकरणपञ्चिकायां प्रमाणपारायणे ॥

॥ शब्दपरिच्छेदः ॥

॥ तृतीयः ॥

शास्त्रं शब्दविज्ञानादसन्निकृष्टे ऽर्थे बुद्धिः । शब्दविज्ञानापेक्षादात्ममनःसन्निकर्षाद्यदसन्निकृष्टार्थविषयं ज्ञानं तच्छास्त्रं नाम प्रमाणं । कः शब्दो ऽभिमतः । वर्णाः । तेषामेव श्रोत्रग्राह्यत्वात् । श्रोत्रग्राह्येहि वस्तुनि शब्दपदं वर्त्तते । नच सत्त्वशब्दत्वयोरतिप्रसङ्गः । सत्तादिसामान्याभावात् । अनुवृत्ताकारावभासिनीहि बुद्धिः सामान्यसिद्धौ निबन्धनं । नच द्रव्यगुणादिष्वनुवृत्ताकारं परामृशन्ती बुद्धिरुदेति । यतो महासामान्यं सत्ताख्यं सिद्ध्येत् नापि ककारखकारादिष्वेक आकारो ऽवभासते यतः शब्दत्वमभ्युपगम्येत । सदादिशब्दप्रतीतिस्त्वौपाधिकी । प्रमाणग्रहणयोग्यतौपाधिकः सच्छब्दः । श्रोत्रग्राह्यतौपाधिकश्च शब्दशब्दः ।

ननु वर्णातिरिक्तं पदमपि श्रोत्रमेव । तथाहि । नदीदीनेत्यादिषु वर्णाभेदेपि पदान्यत्वं प्रतीयते । नच वाच्यं वर्णा एव पदं । नदीदीनेत्यादिषु क्रमभेदेन पदभेदबुद्धिरिति । वर्णानामक्रमिकत्वात् । देशनिबन्धनोवा क्रमो भवेत्कालनिबन्धनोवा । उभयविधोपि न वर्णेष्वास्पदं लभते । तेषां सर्वगतत्वान्नित्यत्वाच्च । बुद्धिस्तु तेषां क्रमवती । तदनुरोधेन वर्णा अपि क्रमवन्तइति प्रत्येकं श्रवणेष्ववभासन्ते । एकक्षणावर्त्तिन्यां तु पदबुद्धावेकस्यां बुद्धिनिबन्धनोपि क्रमो नोपपद्यतइति कुतस्तद्भेदेनापि भेदप्रतिभासोपपत्तिः । किञ्च वर्णा इव एकविषयाच पदबुद्धिरिति वर्णेभ्यो भिन्नं पदं । यदिच वर्णेभ्यो भिन्नं पदं नावभासते ततस्तेभ्यो ऽर्थप्रत्ययएव नोपपद्यते । एकैकवर्णप्रतीतौ तावदर्थस्य नावगमः । नच सकलवर्णोपलम्भो युगपत्सम्भवति वर्णानां क्रमोच्चारणात् । उच्चारणानुसारित्वाच्चोपलब्धेः । वर्णानां च वाचकत्वे क्रमभेदे वक्तृभेदेचार्थप्रत्ययः स्यात् । तस्माद्वर्णेभ्यो ऽसम्भवदर्थप्रत्ययस्तदतिरेकिस्वनिमित्तपदप्रतीतिं प्रसाधयति ।

उच्यते । नदीदीनेत्यत्रापि वर्णातिरिक्तवस्त्वन्तरावभासो नास्ति । नकारादयएवहि प्रतीयन्ते । बुद्धिभेदस्तु क्रमभेदनिबन्धनः । नचेयमेका बुद्धिर्यतो वर्णानां बुद्धिनिबन्धनोपि क्रमो न स्यात् । भिन्नवर्णविषया भिन्नाएवहि बुद्धयो निरन्तरतयैकतामिवापद्यन्ते । तथाहि । श्रवणेन्द्रियनिबन्धनास्तावद्वर्णोच्चारणानुबन्धिन्यो बुद्धय उच्चारणभेदेनोत्पद्यन्ते । एवं स्मृतिरपि प्रत्येकवर्णोपलम्भप्रतिभावितभावनावशेन भवन्ती न सर्वविषयैका ऽवकल्पते । भावनानां भेदात् । एकपदबुद्धिस्त्वेकार्थप्रतिपत्त्युपायत्वनिबन्धना । अर्थप्रतिपत्तिश्चाप्रत्यक्षं तावन्निमित्तं न शक्नोति कल्पयितुं । तस्य निमित्तत्वानुपपत्तेः । न तस्य सत्तामात्रेण निमित्तता । सर्वदार्थप्रत्ययापत्तेः । प्रत्यक्षं भिन्नपदावभासि न भवतीत्युक्तमेव । तेन वर्णेष्वेव प्रत्यक्षेष्वर्थप्रतिपत्त्युपपत्तये कश्चिद्विशेष आश्रयितुं युक्तः । सर्वपूर्वपूर्वोपलम्भापेक्षत्वादन्त्यवर्णस्य । उपलम्भस्यच क्षणिकतया स्वतो विशेष्टुमशक्यत्वात्पूर्ववर्णोपलम्भजन्यः संस्कारएवाश्रीयते । सच स्मृतिहेतोः संस्काराद्भिन्नएव । स्मृतिहेतुर्हि संस्कारो यदुपलम्भप्रभावितस्तन्नैवोपलम्भान्तरं जनयितुमलं नार्थान्तर इत्यर्थविषया ततः प्रतीतिरनुपपन्नेति तदतिरेकिणः संस्कारस्याश्रयणं । तस्यच कार्यकल्प्यत्वादन्यथाभावे प्रतीतिद

Digitized by Google

र्शनं तथाभावएवोत्पत्तिरनुमीयते । तेन क्रमविपर्यये व्यक्तिभेदे व्यवधानेच कार्यादर्शनात्तत्रसंस्कारस्यानुदयादर्थप्रत्ययाभावः। यस्ययस्यचार्थस्य प्रतीतौ यस्ययस्य वर्णस्य निमित्तभावस्तस्यतस्य तदर्थप्रतीत्यनुगुणसंस्कारापेक्षत्वं स्वाभाविकं । सहायविरहात्तु कार्यानुदयः सहायाप्तेश्च कार्योत्पत्तिरिति तेभ्यएवार्थप्रत्ययः । तस्माच्च प्रत्यक्षतो ऽनुमानतोवा वर्णव्यतिरिक्तपदोपपत्तिरिति वर्णात्मकमेव पदं ।

कः पुनरर्थः । अभिधेयः । अभिधेयएव कः । येनसह शब्दस्यापौरुषेयः सम्बन्धः । अथ कः सम्बन्धः । प्रत्याय्यप्रत्यायकभावः । नतर्ह्यपौरुषेयः सम्बन्धः । स्वभावतः शब्दस्याप्रत्यायकत्वात् । यदिहि स्वभावतएव शब्दोर्थं प्रत्याययेत्ततः प्रथमश्रुतः किं न प्रत्याययेत्ततोवगच्छामो ऽपेक्षते किञ्चिच्छब्दइति । देवदत्तादिपदेषुच पुरुषसङ्केतायत्ता ऽर्थप्रतीतिर्दृष्टेति गवादिष्वपि तदपेक्षैवाश्रीयते । तदपेक्षा चेदर्थावगतिर्न तर्ह्यपौरुषेयं शब्दस्य प्रत्यायकत्वं ।

उच्यते । यद्यपि प्रथमश्रुताच्छब्दादर्थं नावबुध्यन्ते तथापि स्वाभाविकमेव शब्दस्यार्थप्रत्यायकत्वं पुनः सङ्केतापेक्षं । तथाहि । वृद्धयोर्व्यवहरतोरेकस्य वाक्यं श्रुत्वा परस्य प्रवर्त्तमानस्य प्रवृत्त्या बुद्धिमनुमापयति । तस्याश्च शब्दश्रवणानन्तरभावित्वाच्छब्दस्य हेतुतां तावदवधारयति । किन्तु तेषां पार्श्ववर्त्तिनां व्युत्पित्सूनां ततः शब्दात् स्वयमर्थमप्रतियतां पुनरेषा विचिकित्सोदयते यदि प्रत्यायकः शब्दस्ततो ऽस्मानपि किमिति नार्थं प्रतिपादयति अथाप्रत्यायकएव ततो वृद्धमपि कथमवबोधयति । तेषामेवं विचिकित्सतां पुनरेषाकल्पना प्रसरति । नूनमस्ति कश्चिदस्य वृद्धस्य विशेषो यतोर्थमवबुध्यते । कोसौ विशेषइति निर्णीयतां । पुनः शब्दश्रवणे वृद्धव्यवहारावगतार्थप्रत्यायकत्वमात्रेण स्वयमर्थावगमदर्शनादर्थप्रत्यायकत्वावगमएव विशेषइति निर्धारणा जायते । न पुनःसङ्केतप्रतीतिर्वृद्धस्य विशेषइति कल्पना शक्या सङ्केतस्यैव तदानीमप्रतीतेः । व्युत्पन्नेतरशब्दार्थोहि सङ्केतवाक्यादर्थमवबुध्यमानः सङ्केतं प्रतिपद्यते । नान्यथा । ननूत्तरकालं सङ्केतदर्शनात्किमिति सङ्केतभूतमेव प्रत्यायकत्वं नाश्रीयते । न । शब्दस्वभावतएवार्थप्रतीतिरूपकार्यसिद्धेः । यदिहि शब्दमात्रादर्थप्रतीतिर्न सम्पद्यते ततः सङ्केतोपि तत्कालमिति कल्प्यते नान्यथा उपपद्यतेतु शब्दमात्रादेवार्थावगतिः प्राच्येन मार्गेण । नन्वेवंसति देवदत्तादिष्वपि कथं सङ्केतस्य कारणत्वं । उच्यते । प्रत्यक्षपरिदृष्टस्तत्रसङ्केतो नतु कल्पयितव्यः । तेन देवदत्तादिषु तस्यैवार्थप्रतीतिकारणत्वं । गवादिषुतु केवलकार्यदर्शनकल्पनीयो नावकाशं लभतइत्यपौरुषेय एतेषामर्थेन प्रत्याय्यप्रत्यायकलक्षणः सम्बन्धइति सिद्धं ।

असन्निकृष्टइति किमिदं । प्रमाणान्तरेणाप्रतीतइति । यद्येवं कथमसौ शब्दैरवबोध्यते । उक्तं वृद्धव्यवहारावगतसम्बन्धः शब्दो ऽवबोधकइति । यश्चार्थो न प्रमाणान्तरेणावगम्यते कथं तद्विषयो वृद्धव्यवहारो ऽवसीयते । कथंतरांच तद्विषया प्रतीतिरनुमीयते । कथंतरांच वाचकशक्तिः शब्दस्य कल्प्यतइति वाक्यार्थमातृकायामभ्यासो विधीयतामित्यत्रोत्तरं ।

सपुनरसन्निकृष्टो ऽर्थो नियोगार्थएव । नियोगोहि प्रमाणान्तरानवगतमपूर्वमर्थमवबोधयतीति वाक्यार्थमातृकायामुक्तं । नच नियोगएवैकस्तस्यावबोधकः । विषयव्यतिरेकेण तदप्रतीतेः । पदान्तराणामपि तदन्वयिस्वार्थपरतयैव व्युत्पत्तेस्तेन वाक्येनैव नियोगार्थः प्रतीयते । तत्र लिङादिप्रत्ययो नियोगार्थशरीरमेवाभिदधाति । प्रकृतिस्तद्विषयं । पदान्तराणिच विषयविशेषणं नामधेयं नियोज्यंचाभिदधति नियोगार्थप्रतीतौ व्याप्रियन्ते । सन्निपत्योपकारकाङ्गवाक्यानिच यद्यपि नियोगान्तरशून्यानि तथापि प्रधाननियोगान्वितस्वार्थाभिधायकतया तन्नियोगप्रतिपत्तावेव पदान्तरवद्वर्त्तन्ते । विनियुक्तमन्त्रसमाम्नायोपि द्रव्यभूतं नियोगजातं नियोगाङ्गतया समर्पयंस्तद्विशिष्टनियोगावगतावेवोपक्षीयते । नियोगाङ्गतातु योग्यतया प्रयोगकाले नैयोगिककर्मतत्साधनस्मारणेन मन्त्रजातस्य । अनुवादाश्चापि विधेयस्तुतिमुत्पादयन्तः स्तुतिविषयनियोगप्रतिपत्तिपराएवेति कृत्स्नएव वेदो ऽवबोधे ऽपूर्वे कार्यात्मनि प्रमाणं । अतएव को वेदार्थइति जिज्ञासमानेभ्यश्चोदनासूत्रेण कार्यात्मा वेदार्थइत्युक्तं ।

ननु सिद्धोपि ब्रह्मात्मको वेदान्तानामर्थः प्रतीयते । उच्यते । व्युत्पत्त्यपेक्षः शब्दोर्थमवबोधयति । व्युत्पत्तिश्च वृद्धव्यवहारे व्यवहारश्च कार्यप्रतीतिनिबन्धनः कार्यप्रतिपादकतयैव शब्दव्युत्पत्तिः । तत्रापि कश्चिच्छब्दः साक्षादेव कार्यप्रतिपादकतया व्युत्पद्यते कश्चिच्च कार्यान्वितस्वार्थपरतया

ननु विनापिव्यवहारं सिद्धार्थप्रतिपत्तिपरादपि लौकिकवचनात्सम्भवत्येव व्युत्पत्तिः । यथा पुत्रस्ते जातइति । अत्रहि मुखप्रसादादिभिर्लिङ्गैर्लौकिकैः श्रोतुर्हर्षोत्पत्तिरनुमीयते । हर्षोत्पत्तिश्च हर्षहेतुमन्तरेण न सम्भवति प्रियार्थप्रतीतिश्च हर्षहेतुरिति स्वात्मनि प्रतीतं तेन पुत्रस्ते जातइति वाक्येन प्रियोर्थो बोधितइति कल्प्यते । पुत्रजन्मैवास्य प्रियमुत्पन्नमिति प्रमाणान्तरावगतमिति तदभिधायकत्वमेव कल्प्यते । प्रतिपदमावापोद्धाराभ्यां व्यवहारइव स्वार्थविशेषसम्बन्धाध्यवसायः । तथा व्युत्पन्नेतरपदविभक्त्यर्थाः काष्ठैः पचतीति वर्त्तमानोपदेशेपि यत्पाके कारणं तत्काष्ठशब्देन प्रतिपाद्यतइत्यवगम्य प्रत्यक्षेण काष्ठानां करणभावमवगच्छन्तः काष्ठशब्दे व्युत्पद्यन्ते । किञ्चास्य शब्दस्यायमर्थइत्यपि व्युत्पत्तिर्दृश्यते

Digitized by Google

न तत्र शक्यते वक्तुं कार्यान्वय्येव शब्दस्यार्थइति । अपिच येननामाकार्यान्विताभिधायित्वं तावताच कार्यान्विताभिधानस्याप्युपपत्तेर्न शक्यते विशेषान्विताभिधानशक्तिः कल्पयितुं । लोकेच सिद्धार्थान्येव प्रायशो वाक्यानि प्रश्नोत्तराणि दृश्यन्ते । कुशलं ते कुशलं ममेत्यादीनि ।

अत्रोच्यते। सर्वपुरुषाणांतावद्वृद्धव्यवहारएव प्रथमं व्युत्पत्तिरङ्गीकरणीया । नखलु व्यवहारमन्तरेण सिद्धान्वाख्याने व्युत्पत्तिरवकल्पते । यद्यपि मुखप्रसादादिभिर्हर्षोत्पत्तिरनुमीयते। हर्षोत्पत्त्याच हर्षहेत्ववगमस्तन्निमित्तताच शब्दस्य तथापि पुत्रस्ते जातइति वाक्यस्य पुत्रजन्माख्यहर्षहेतुप्रतिपादकता हर्षहेतूनामानन्त्याद् दुरनुमाना । नच पारिशेष्येण तत्प्रतिपादकत्वाध्यवसायः । भूतभविष्यद्वर्त्तमानानां सन्निहितव्यवहितानां पारिशेष्यावधारणाया अत्यन्तदुःकरत्वात् । व्यवहारः पुनः प्रत्यक्षविशिष्टार्थविषय उपलभ्यमानस्तद्बुद्ध्यनुसारेण तद्गतामेव शब्दस्य वाचकतामनायासेनापादयन् व्युत्पत्त्युपायतां गन्तुमलं । व्यवहारश्चेद्व्युत्पत्त्युपायः कः कार्यान्विताभिधानं शब्दानामपहरेत् । नहि कार्यावगमंविना व्यवहारो ऽवकल्प्यतइत्युक्तं वाक्यार्थमातृकायां । एवं लोके यः सिद्धार्थपरतया पदानां प्रयोगः स लाक्षणिको भविष्यति । कार्यान्वयोहि परस्परपदार्थान्वयव्यभिचारीत्यविवक्षित्वा कार्यान्वयं परस्परपदार्थान्वयविवक्षयापि लोकाः शब्दं प्रयुञ्जते। विवक्षाबलेनच लक्षणया तत्परतापि तत्र निर्वहति । वेदेतु लक्षणानिबन्धनं किञ्चिन्नास्तीति स्वाभाविककार्यपरत्वं नापहर्तुं शक्यते । एवं सिद्धपरेपि वाक्ये या व्युत्पत्तिः सापि कार्यपरतां न विहन्ति । सर्वपदानामेवहि स्वाभाविकी वृद्धव्यवहारसिद्धा कार्यपरता । लाक्षणिकीच सिद्धपरतेति । सर्वव्यवहारेषु कार्यान्वयाव्यभिचारात् तदन्विताभिधायिता न शक्यते हातुमिति न सामान्यनार्थान्तरमात्रान्विताभिधानं शक्याश्रयणं अतश्च वेदान्तानामप्यात्मा ज्ञातव्यइत्यपुनरावृत्तये समाम्नातेन विधिनैकवाक्यतामाश्रित्य कार्यपरत्वमेव वर्णनीयं । अथ सिद्धार्थप्रतिपत्तिपरत्वेन व्युत्पत्तेरभावाद्वृद्धव्यवहारावगतायाः पदानामन्विताभिधायितायाएवानुपपत्तेः कार्यपरत्वेच प्रमाणान्तरावगतात्मस्वरूपानुवादकत्वेनैव वर्णनं कर्त्तव्यं । अपिच सिद्धार्थपरत्वेपि शब्दस्य न वेदान्तानां परमानन्दादिरूपत्वे ब्रह्मणः प्रामाण्यमवकल्पते । तत्रहि ब्रह्मस्वरूपानुवादेनानन्दादिरूपविधिरास्थेयः । ब्रह्मस्वरूपंच प्रमाणान्तरसिद्धमेवाश्रयणीयं । ब्रह्मशब्दस्यच लोकेप्रमाणान्तरसिद्धात्मवाचित्वेन सिद्धेर्वेदेपि सएवार्थः । तथाचसति नित्यप्रकाशपरमानन्दरूपावधिः सकलप्रतिपत्तिविरुद्धः । सर्वप्रतिपत्तिषुहि प्रमाणस्मृतिभूतास्वात्मा प्रकाशते । नच तत्र परमानन्दः संवेद्यते । नच सांसारिकदुःखाभिभूतत्वात्तस्याप्रकाशः । अभिभवानुपपत्तेः । अवच्छिन्नंहि दुःखमनवच्छिन्नश्चानन्दइति नाल्पीयसा महतो ऽभिभवः सम्भवति । स्वप्रकाशस्यचाभिभवावरणानभिव्यक्तीनामसम्भवएव । अभिन्नात्मतत्त्वप्रतिपादनमपि प्रमाणान्तरविरुद्धमेवेत्युक्तं तत्त्वालोके । सकलविकारशून्यतापि विज्ञानादिविकारोत्पत्तेः प्रमाणान्तरविरुद्धैवेति परस्परान्वयायोग्यतया नानन्दादिप्रतिपत्तिपरत्वं । अजरामरत्वयोस्तु प्रमाणान्तरप्रसिद्धेरेवानुवादत्वादप्रामाण्यमिति ।

नन्वशास्त्रमपि शाब्दमस्ति लौकिकं । तत्किमिति न लक्षितं ।

उच्यते । न शास्त्रव्यतिरिक्तं शाब्दमस्ति शब्दाद्धि यद्विज्ञानमसन्निकृष्टे तच्छास्त्रं स्यात् । नच वेदव्यतिरेकेण तत्सम्भवति लौकिकंहि वाक्यं नार्थे स्वयं निश्चयमापादयति लौकिकवचसामनृतभूयिष्ठत्वादर्थव्यभिचारस्य शङ्कितत्वात् ।

नन्वेवमपि वैदिकमपि वचो नार्थनिश्चायकं स्यात् शब्दोत्थापितस्यार्थज्ञानस्य लोके ऽर्थव्यभिचारित्वात् । अथोच्येत वैदिकाद्वचनात् स्वतस्तावन्निश्चयो जायते । पश्चात्तनस्तु संशयस्तद्विरोधादात्मानं न लभते । यथा स्थाणौ समीपवर्त्तिनि स्थाणुरूपतया निश्चिते नपुनरूर्ध्वता स्थाणुपुरुषसंशयं प्रसूते । उपलब्धौह्यव्यवस्थितायां सन्देहो जायते । यदाच निश्चितो ऽर्थस्तदोपलब्धिर्व्यवस्थितेति संशयो न युक्तः नचाव्यभिचारनिश्चयपूर्वकं शब्दस्य निश्चायकत्वं येन व्यभिचारे निश्चयो न स्यात् किन्तु स्वभावत इन्द्रियवच्छब्दो निश्चयहेतुरिति । तन्न । शब्दजनितं निश्चयमेवोभयथा दृष्ट्वा यः संशयः स निश्चयेनैव न शक्यते निरोद्धुं । वाक्यहेत्वन्तरोत्थोहि संशयो निश्चयेन निरुध्यते । यः पुनस्तत्प्रभवएव नासौ तेन निरुध्यते ।

उच्यते । युक्तस्तावल्लौकिके वचसि सन्देहः । पुरुषाहि प्रायेणानन्वितान्येव पदान्याशयदोषेणवा भ्रमेणवा प्रमादेनवा ऽशक्त्यावा प्रयुञ्जाना दृश्यन्ते । ततश्च यद्यपि तदुक्तानां पदानामन्विताभिधानसामर्थ्यमस्ति तथाप्यनन्वितार्थत्वशङ्कया नान्वयो निश्चीयते । कथंतर्हि लौकिकवाक्येभ्यो व्यवहारप्रवृत्तिः । उच्यते । अर्थसंशयेनापि लोको व्यवहरति । सन्दिग्धायामपि वृष्टौ वृष्ट्यायत्तफले कर्मणि प्रवर्त्तन्ते । अथवास्त्येव निश्चयोपायः । योहि पुरुष एवमवधारितो नायमशक्तो न प्रमादी सम्भवदेतदर्थविषयप्रमाणः सकलाशयदोषरहितश्च नायमविज्ञायार्थमन्वितार्थानि प्रयुङ्क्तइति तद्वाक्यप्रयोगस्यान्वयज्ञानपूर्वकत्वादन्वयज्ञानंतावदनुमीयते । अन्वयज्ञानाच्चान्वयोप्यनुमीयते । ज्ञानंहि ज्ञेयाविनाभावि ज्ञे-

यानुमाने भवत्येव लिङ्गं । तदेवं लौकिकाद्वचसो लिङ्गभूताद्वक्तृज्ञानमनुमीयते । ततो ऽर्थं निश्चित्य व्यवहारः प्रवर्त्तते । एवञ्च निश्चिते ऽन्वये निवृत्तानन्वयाशङ्काद्वाक्यादप्यर्थनिश्चयो जायते । किन्तु तस्यां दशायामनुवादकतैव । अतएव लौकिके वचने न शाब्दं प्रमाणं । अभिप्राये शब्दो लिङ्गं अभिप्रायोप्यर्थे लिङ्गं । शब्दस्त्वर्थे पश्चान्निश्चयं जनयन्नप्यनुवादकत्वान्न प्रमाणं । नन्वशक्तप्रमादिभ्रान्तदुष्टाशयप्रयुक्तानां पदानामनन्वितार्थत्वदर्शनात्पुरुषान्तरवचनेष्वनन्वितार्थत्वाशङ्का जायते तन्निवृत्तिमात्रएव पुरुषस्य वक्तुः शक्तत्वाप्रमादित्वाभ्रान्तत्वशुद्धाशयत्वज्ञानं व्याप्रियतां अर्थनिश्चयस्तु वाक्यादेवापास्तसन्देहादस्तु । माभूद्वक्तृज्ञानादनुमितादर्थनिश्चये जाते वाक्यस्यानुवादकत्वमिति । उच्यते । अभ्रान्तत्वंनाम पुरुषस्य यथार्थज्ञानयोगित्वं । आशयदोषविरहश्च यथाविदितार्थविवक्षायोगः । शक्तत्वंच यथाविवक्षितपदप्रयोगसमर्थत्वं । शक्तस्यापि यथाविवक्षिताविक्षेपश्चाप्रमादो यस्यैतच्चतुष्टयमस्ति स प्रत्ययितः । तस्यैतदवगतं । सम्यग्ज्ञाननियतो ऽस्य वाक्यप्रयोगइति । तेन तदीयवाक्यश्रवणे तद्गतसम्यग्ज्ञाननिश्चयो जायतएव । समीचीनंचेदं ज्ञानमुच्यते यदर्थाविसंवादि यस्य यथाप्रतीयमानो ऽर्थोस्ति । तेन समीचीनज्ञाननिश्चयो ऽन्तर्भावितार्थनिश्चयएवेति न संशयनिवारणमात्रे पुरुषविशेषविज्ञानं व्याप्रियते किन्त्वर्थनिश्चयएवेति निश्चिते ऽर्थे निवृत्तेच संशये वाक्यमर्थनिश्चयं कुर्वदप्यनुवादकत्वान्न प्रमाणं । ननुतर्हि वक्तृज्ञानस्यान्यतोनवगतस्यावगमकं पौरुषेयं वाक्यं तत्रैव शाब्दं प्रमाणमस्तु । न । तत्रानुमानत्वात् । वक्तृज्ञानेहि निश्चितसम्बन्धं प्रत्ययितवचनं । वक्तातु धर्मी । ज्ञानविशेषयोगिवाक्यप्रयोगिते तस्यैकदेशाविति । अतएवच भगवान्काश्यपो वेदान्पौरुषेयानमन्यमानः शाब्दमनुमानेन्तर्भूतमुवाच । तस्येदं कारणं कार्यमिति लैङ्गिकमुक्त्वा एतेनैव शाब्दमप्युक्तमिति । वक्तृज्ञानंहि कारणं वाक्यंच कार्यं । अतएवान्येनाप्युक्तं । वक्तुरभिप्रायंतु सूचयेयुरिति । सएव तथा प्रतिपाद्यमानतया आश्रयइति । ननु यदि वाक्याद्वक्तृज्ञानानुमानं वक्तृज्ञानाच्चार्थानुमानं तर्ह्यनवगतेर्थे कथं ज्ञानविशेषो ऽनुमातुं शक्यः । अर्थेनैव निराकारस्य ज्ञानस्य विशेषो यथानिर्ज्ञातोर्थो ज्ञाने विशेषमापादयति । उच्यते । अनवगतेप्यर्थे ज्ञानविशेषो ऽनुमातुं शक्यतएव । यादृशार्थप्रतिपादनयोग्यानि पदानि प्रयुक्तानि तादृशार्थविषयं ज्ञानमनुमीयते । नन्वेवं वेदस्य प्रामाण्यमपास्तं । व्युत्पत्त्यपेक्षोहि वेदे शब्दादर्थावगमो वृद्धव्यवहारेच व्युत्पत्तिः । वृद्धवाक्यानिचेल्लिङ्गभूतानि न तर्हि स्वार्थे प्रमाणतया व्युत्पन्नानि । उच्यते । यावद्धि पदानामर्थविशेषवाचकत्वं नाश्रीयते तावद्वक्तृज्ञानविशेषोपि नानुमीयते । विशिष्टाद्धि वाक्याद्विशिष्टं ज्ञानमनुमातव्यं । नचार्थविशेषप्रतिपादकत्वादन्यो वाक्यस्य विशेषोस्तीत्याश्रयणीयमर्थविशेषप्रतिपादनसामर्थ्यमेतेषां । अर्थप्रतिपादनसामर्थ्यावधारणमेवच व्युत्पत्तिस्तावतैवार्थप्रतीतिः । अनुवादकत्वेपिच शब्दानामस्त्येव प्रतिपादकत्वं । वेदेच व्युत्पत्तिवशेनार्थप्रतिपत्तौ जातायां प्रामाण्यमुपपद्यतएव । ननु वेदेपि शङ्कया भवितव्यमित्युक्तं । सत्यमुक्तमयुक्तं तत् । नतावदन्वयनिश्चयानुपपत्तिर्वेदे सम्भवति । अशक्त्यादिकर्तृदोषवशेनह्यनन्वितार्थपदप्रयोगो लोके दृष्टः । नच वेदे कर्त्ता पुरुषोऽस्ति । तेन तदाश्रितास्तावद्दोषा अनन्वितार्थपदवचने हेतवो वेदे शङ्कामपि नावतारयन्तीत्यर्थनिश्चयस्तावज्जायते । नच पौरुषेयवाक्यजन्यनिश्चयस्य व्यभिचाराद्वैदिकेपि निश्चये व्यभिचारशङ्कोचिता । शङ्काया दर्शनमूलत्वात् । यथाभूतेहि यद्दृष्टं तत् तथाभूतएव पुनः शङ्कामवतारयति । अपिच लौकिकस्यापि तत्र व्यभिचारो नास्ति । प्रत्ययितवचनाद्ध्यप्रत्ययितवचनमपि भेदेन न प्रतिपद्यमानः प्रत्ययितवचने दृष्टज्ञानपूर्वकत्वं स्मरन् तच्च स्मरणं ग्रहणाद्विवेकेनानवबुध्यमानो ग्रहणव्यवहारं प्रवर्त्तयति । तत्र न कश्चिद्विचारः ।

ननुच पदसङ्घातात्मकतया वेदाअपि पौरुषेयाएव । पदसङ्घाताहि पौरुषेयाएव दृश्यन्ते भारतादिवत् । तथाच काठकादिसमाख्यापि वेदे प्रवर्त्तते । नचेयं प्रवचननिमित्ता समाख्येति कल्पयितुं युक्तं । साधारणत्वात्प्रवचनस्य । बहवोहि प्रब्रूयुः । कर्त्तापुनरसाधारणो भवति । कृतस्य करणायोगात् । असाधारण्येन व्यपदेशा भवन्ति । यथा वैयासिकी भारतसंहितेति । अतः पौरुषेयत्वेन वेदानां तदर्थस्य प्रमाणान्तरविषयत्वात्तद्विषये वक्तुः प्रमाणाभावादनन्वितार्थत्वाशङ्का तत्पदेषु भवन्ती केन वार्यते ।

उच्यते । पुरुषकृतत्वंतावद्वेदानां साक्षाद्भारतादिवन्न स्मर्यते समाख्यातु पौरुषेयी प्रमाणान्तरानुसारिणी न शक्नोति स्वयमर्थव्यवस्थां कर्त्तुं । यदि विचारयन्तः कृतकतामेव निर्णेष्यामस्ततः करणनिबन्धना समाख्या भविष्यति । अथतु यत्नेनान्विष्यन्तोपि पौरुषेयतां नोपलप्स्यामहे ततः प्रवचननिबन्धनेति वक्ष्यामः । तदपिह्यसाधारणं स्यात् । प्रकृष्टं हि वचनं कस्यचिदेव कुत्रचिदेव तावत्सङ्घातात्मकत्वं न पौरुषेयतामनुमापयितुमलं । वेदार्थविषयवाक्यविरचनासामर्थ्यानुपपत्तेः । परस्परसंहतार्थतयातावद्वेदा उन्मत्तप्रणीताइति न शक्यते वक्तुं । उन्मत्तप्रणीतस्यचेयतो ग्रन्थराशेः प्रथममध्ययनं कथं प्रवर्त्तते । केहि सचेतस उन्मत्तोक्तमेतावन्तं ग्रन्थराशिं महता क्लेशेनाधीयीरन् धारयेयु रध्यापयेयुश्च । नच बुद्धादिग्रन्थवद्बुद्धिपूर्वकारिणा प्रोत्साहिता महत्यप्यायासे प्रवर्त्तेरन्नतो

Digitized by Google

बुद्धिपूर्वकारिप्रणीता वेदा इति वाच्यं । नहि बुद्धिपूर्वकारी वेदान् रचयितुमलं । तदर्थस्य बुद्धावारोपयितुमशक्यत्वात् । प्रमाणान्तराविषयोह्यपूर्वात्मा वेदार्थः स प्राग्वेदवचनेभ्यो बुद्धिस्थतामापादयितुमशक्यः । ननु बुद्धादिवचनान्यप्येवमेवापौरुषेयाणि स्युः । न । तेषां साध्यसाधनभावमात्रपरत्वात् । साध्यसाधनभावस्य कल्पयित्वापि बुद्धावारोपयितुं शक्यत्वात् । ज्योतिष्टोमादिषु दृष्टं स्वर्गसाधनत्वं चैत्यवन्दनादावारोपयितुं शक्यते । अपूर्वत्वपूर्वत्वादेवारोपणापि नावतरति । अथ कथं तुल्येपि लिङादिप्रयोगे बुद्धादिवचनानि साध्यसाधनभावमात्रपराणि न वेदवाक्यानि । उच्यते । बुद्धादिवचनानि तावत्साक्षाद्दृष्टकर्तृपुरुषाणि । तेन यदेव पुरुषाः प्रमाणान्तरेण बुद्धिस्थीकर्तुमीशते तद्विवक्षाप्रयुक्तान्येवेति निश्चीयते । पुरुषाश्च नापूर्वं बुद्धौ निवेशयितुमलं । साध्यसाधनभावंत्वन्यत्र दृष्टं बुद्धिस्थीकृत्य विरचयितुं क्षमन्ते । वेदेषुतु साक्षात्कर्ता नोपलब्धः । तेन स्वमहिमानुसारेणतावदर्थो बोद्धव्यः । सचापूर्वात्मकः प्रतीयते । प्रतीतेच तस्मिन् शक्तता तद्विषयवाक्यरचने बुद्धिपूर्वकारिणामिति पौरुषेयत्वं नानुमीयते । यएवहि पदसङ्घाताः पौरुषेयैर्विरचयितुं शक्यन्ते तत्रैव पौरुषेयत्वं दृष्टमित्यशक्यविरचनेषु पौरुषेयत्वानुमानं न क्रमते । नच पौरुषेयत्वंविना पदसङ्घातात्मकतैव नोपपद्यते । उच्चारणवशेनहि पदानि संहततामापद्यन्ते । तच्चोच्चारणान्तरपूर्वकंवा स्यात्स्वबुद्धिप्रभवंवा । दृश्यतेह्यनेनापि प्रयुक्तमन्येनाधीयमानं भारतादिवत् । यथाद्यतनाः पुरुषा भारतादिकमुच्चारणान्तरमधीयते तथा वेदानपि सर्वपुरुषाएवेति किमनुपपन्नं । अतः सिद्धमपौरुषेयाइति । अपौरुषेयाश्चेन्नास्ति प्रमाणान्तरापेक्षा प्रत्यक्षवत् । अतः प्रमाणमनपेक्षत्वादित्युक्तं ।

दृष्ट्वा ऽभ्युपेतमथ तंच पतिं पुरस्तात्
सङ्ग्रामकेलिकुतुकेन घनप्रसादम् ।
योद्धुं मदेन मिमिलुः ककुभामधीशा
बाणान्धकारितदिगम्बरगर्भमेत्य ॥ १ ॥

देवद्विषां परिवृढो विकटं विहस्य
बाणावलीभिरभितः कुपितो ववर्ष ।
शैलानिव प्रबलवारिधरो गरिष्ठा-
नम्भस्ततीभिरथ गाढमनारताभिः ॥ २ ॥

जम्भद्विषत्प्रभृतिदिक्पतिचापमुक्ता
बाणाः शिता असुरराजकबाणसङ्घान् ।
अह्नाय तार्क्ष्यनिवहाइव नागपूगान्
सद्यो विचिच्छिदुरलं कणशो रणान्ते ॥ ३ ॥

तैः प्रज्वलत्फलमुखैर्विशिखैः सुरारिं
नामाङ्कितैः पिहितदिग्गगनान्तरालैः ।
प्राच्छादयंस्तृणचयैरिव हव्यवाहं
चिच्छेद सोपि सुरसैन्यशरान् शरौघैः ॥ ४ ॥

दैत्येश्वरो ज्वलितरोषविशेषभीमः
सद्यो मुमोच युधि यान् विशिखान् सहेलम् ।
ते प्रापुरुद्भटभुजङ्गमभीमभावं
बाढं बबन्धुरपि तांस्त्रिदशेन्द्रमुख्यान् ॥ ५ ॥

ते नागपाशविशिखैरसुरेण बद्धाः
श्वासाकुलाकुलमुखा विमुखा रणान्तात् ।
दिङ्नायका बलरिपुप्रमुखाः स्मरारि-
सूनोः समीपगमन् विपदन्तहेतोः ॥ ६ ॥

दृष्टिप्रपातवशतोपि पुरारिसूनो-
स्ते नागपाशघनबन्धविपत्तिदुःखात् ।
इन्द्रादयो मुमुचिरे स्वयमस्य देवाः
सेवां व्यधुश्च पुनरेत्य महाजिगीषोः ॥ ७ ॥

उद्यत्प्रकोपदहनो ऽथ सुरेन्द्रशत्रु-
रह्नाय सारथिमवोचत चण्डबाहुः ।
बद्धा मया सुरपतिप्रमुखाः प्रसह्य
बालस्य धूर्जटिसुतस्य निरीक्षणेन ॥ ८ ॥

मुक्ता बभूवुरधुना तदिमान् विहाय
कर्त्तास्म्यहं समरभूमिपशूपहारम् ।
तत् स्यन्दनं सपदि वाहय शम्भुसूनुं
द्रष्टास्मि दर्पितभुजाबलमाहवाय ॥ ९ ॥

॥ युग्मम् ॥

तत्स्यन्दनः सपदि सारथिसम्प्रणुन्नः
प्रारब्धवारिधरधीरगभीरघोषः ।
चण्डं चचाल दलिताखिलशत्रुसैन्य-
मांसास्थिशोणितसुपङ्कविलुप्तवेगः ॥ १० ॥

दृष्ट्वा रथं प्रलयवातचलद्गिरीन्द्र-
कल्पं दलद्बलविरामविशेषरौद्रम् ।
अभ्यागतं सुररिपोः सुरराजसैन्यं
क्षोभं जगाम परमं भयवेपमानम् ॥ ११ ॥

प्रक्षुभ्यमानमवलोक्य दिगीशसैन्यं
शम्भोः सुतं समरकेलिकुतूहलोत्कम् ।

Digitized by Google

उद्दामदोःकलितकार्मुकदण्डचण्डः
प्रोवाच वाचमुपगम्य स कार्त्तिकेयम् ॥ १२ ॥
रे शम्भुतात्तव शिशो बत मुञ्च मुञ्च
दोर्दृप्यमद्य विरम त्रिदिवेशकार्य्यात् ।
शश्वत् किमद्य भवतो ऽनुचितेश्वरित्वे-
र्बालाब्जकोमलभुजाक्रम भीरुभूते: ॥ १३ ॥
एकस्त्वमेकतनयो ऽसि गिरीशगौर्य्योः
किं यासि कालविषयं विषमैः शरैर्मे ।
तत् त्वासतो ऽपसर जीव पितुर्जनन्याः
पूर्णं प्रविश्य वरमङ्कतलं विधेहि ॥ १४ ॥
सम्यक् स्वयं किल विमृश्य गिरीशपुत्र
जम्भद्विषो ऽस्य जहिहि प्रतिपक्षमाशु ।
एष स्वयं पयसि मज्जति दुर्विगाहे
पाषाणनौरिव निमज्जयते पुरा त्वाम् ॥ १५ ॥
इत्थं निशम्य वचनं युधि तारकस्य
कम्राधरो विकचकोकनदारुणाक्षः ।
कोपात् त्रिलोचनसुतो धनुरीक्षमाणः
प्रोवाच वाचमुचितां परिमृज्य शक्तिम् ॥ १६ ॥
दैत्याधिराज भवता यदवादि गर्वात्
तत् सर्वमप्युचित मेव तवैव किन्तु ।
दृष्टास्मि ते प्रवरबाहुबलं वरिष्ठं
शस्त्रं गृहाण कुरु कार्मुकमाततज्यम् ॥ १७ ॥
इत्युक्तवन्तमवदत् त्रिपुरारिपुत्रं
दैत्यः क्रुधोष्ठमधरं किल निर्विभुज्य ।
युद्धार्थमुद्भटभुजाबलिदर्पितोपि
बाणान् सहस्व मम शोणितरक्तपृष्ठान् ॥ १८ ॥
दुःप्रेक्षणीयमरिभिर्धनुराततज्यं
सद्योविधाय विषमान् विशिखान् न्यधत्त ।
सक्रोधभीमभुजगेन्द्रनिभं स्वचापं
चण्डप्रभं यशसि जैत्रपरं कुमारः ॥ १९ ॥
कर्णान्तमेत्य दितिजेन विकृष्यमाणं
कोदण्डदण्डमभितः सुषुवे शरौघान् ।
व्योमाङ्गणे लिपिकरान् स्वकरप्रहासा-
न्दद्रेरशेषककुभांपतिवत् करिष्यत् ॥ २० ॥
बाणैः सुरारिधनुषः प्रसृतैरनन्तै-
र्निर्घोषभीषितभटैर्लसदंशुजालैः ।
अन्धीकृताखिलसुरेश्वरसैन्यको ऽसौ
छन्नाकृतिः प्रविषयं न जगाम दृष्टेः ॥ २१ ॥
देवेन मन्मथरिपोस्तनयेन गाढ-
माकर्णकृष्टमभितो धनुराततज्यम् ।
बाणानसूत विविधान् युधि यान् विशेष-
स्तैः सायका विविदिरे सहसा सुरारेः ॥ २२ ॥
रेजे सुरारिशरदुर्दिनके तिनस्ते
सद्यः स्वयं निखिलखेचरखिन्नदेहे ।
देवप्रभोः प्रभुरिव स्मरशत्रुसूनुः
प्रद्योतनः सुघनदुर्द्धरधामधाम ॥ २३ ॥
तत्राथ दुःसहतरं तरसा तरस्वी
धामाद्धावधिकधीरतरः कुमारे ।
मायामयं समरमाशु महासुरेन्द्रो
मायाप्रपञ्चचतुरो रचयाञ्चकार ॥ २४ ॥
अह्नाय कोपकलुषो विकटं विहस्य
व्यर्थां समर्थ्य वरशस्त्रयुधं कुमारे ।
जिष्णो जगद्विजयदुर्ललितः सहेलं
वायव्यमस्त्रमसुरो धनुषि न्यधत्त ॥ २५ ॥
सन्धानमात्रसममस्य युगान्तकाल-
भूतभ्रमं परुषभीषणघोषघोषः ।
उद्धूतधूलिपटलीपिहिताम्बराङ्गः
प्रच्छन्नचण्डकिरणो व्यवहत् समीरः ॥ २६ ॥
कुन्दोज्ज्वलानि सकलातपवारणानि
धूतानि तेन मरुता सुरसैनिकानाम् ।
उड्डीयमानवरहंसकुलोपमानि
सङ्ग्रामधूलिमलिने नभसि प्रसस्रुः ॥ २७ ॥
विध्वस्य तेन सुरसैन्यमहापताका
नीता नभस्तलमलं नवमल्लिकाभाः ।
स्वर्गापगाजलमहौघसहस्रलीलां
व्यातेनिरे दिविचरीं चिरविभ्रमेण ॥ २८ ॥
भ्रष्टाः खरेण मरुता रथराजयोपि
दोधूयमाननिपतिष्णुतुरङ्गमध्ये ।
विस्त्रस्तसारथिवरप्रकराः समन्ता-
द्व्यावृत्तिमापुरवनौ सुरवाहिनीनाम् ॥ २९ ॥

Digitized by Google

धूतानि तेन सुरसैन्यमहागजानां
सद्यः कुलानि विधुराणि दलत्कुथानि ।
पेतुः क्षितौ कुपितवासववज्रलून-
पक्षस्य भूधरकुलस्य तुलां वहन्ति ॥ ३० ॥

छित्वा ऽऽयुधानि सुरसैन्यतुरङ्गधारा-
वेगेन तेन विधुना विधुरा रणान्ते ।
शस्त्राभिघातमनवाप्य निपेतुरुर्व्यां
स्वीयेषु वाहनवरेषु पतत्सु सत्सु ॥ ३१ ॥

तेनाहतास्त्रिदशसैन्यपदातयोपि
ग्रस्तायुधाः भुविधुराः परुषं रसन्तः ।
वायोर्द्विवृन्तदलवृन्दमिवेत्य दूरं
निःपेतुरम्बरतलाद्वसुधातलेपि ॥ ३२ ॥

इत्थं विलोक्य सुरसैन्यमशेषमेव
दैत्येश्वरेण विधुरीकृतमस्त्रयोगात् ।
स्वर्लोकनाथकमलाकुशलैकहेतुं
दिव्यं प्रभावमतनोदतनुं स देवः ॥ ३३ ॥

तेनोद्गतं सकलमेव सुरेन्द्रसैन्यं
स्वास्थ्यं प्रपद्य पुनरेव युधे प्रवृत्तम् ।
दृष्ट्वा ऽसृजद्दहनदैवतमस्त्रमिद्ध-
मुच्चैःप्रकोपदहनः सहसा सुरारिः ॥ ३४ ॥

तत्कालजातजलदद्युतयो नभोन्ते
तथान्धकारितदिशो घनधूमसंघाः ।
सद्यः प्रसस्रुरसितोत्पलदामभासो
दृग्गोचरत्वमखिलं द्युसदां हरन्तः ॥ ३५ ॥

दिक्चक्रवालमिलितैर्मलिनैस्तमोभि-
र्लिप्तं नभस्तलमलं घनवृन्दसान्द्रैः ।
धूमैर्विलोक्य पिहिताः खलु राजहंसा
गन्तुं सरः सपदि मानसमीषुरुच्चैः ॥ ३६ ॥

जज्वाल वह्निरतुलः सुरसैनिकेषु
कल्पान्तकालदहनप्रतिमःसमन्तात् ।
आशामुखान्यपिदधन्निखिलानि कीला-
जालैरलं कपिलयन् सकलं नभोपि ॥ ३७ ॥

उज्जागरस्य दहनस्य निरर्गलस्य
ज्वालावलीभिरतुलाभिरनारताभिः ।
कीर्णे पयोदनिवहैरिव धूमसंघै-
र्व्योमाम्बलक्ष्यत कुलैस्तडितामिवोच्चैः ॥ ३८ ॥

तत्प्रान्ततो क्षियतिवाद्भुतसञ्चरेण
दीर्घेण तेन दहनेन सुदुःसहेन ।
दन्दह्यमानमनिशं सुरराजसैन्य-
मत्याकुलं शिवसुतस्य समीपमायात् ॥ ३९ ॥

इत्यग्निना घनतरेण ततो ऽभिभूतं
तद्दैवसैन्यमखिलं विकलं विलोक्य ।
सस्मेरवक्त्रकमलो ऽन्धकशत्रुसूनु-
र्बाणासनेऽथ समधत्त स वारुणास्त्रम् ॥ ४० ॥

घोरान्धकारनिकरप्रतिमो युगान्त-
कालानलप्रबलधूमनिभो नभोऽन्ते ।
गर्ज्जारवैर्विधमयन्नवनीधराणां
शृङ्गाणि मेघनिवहो घनमुज्जगाम ॥ ४१ ॥

विद्युल्लता वियति वारिदवृन्दवर्त्मे
गम्भीरभीषणरवे कपिशीकृताशा ।
घोरा युगान्तचलितस्य भयङ्करस्य
कालस्य लोलरसनेव चमच्चकार ॥ ४२ ॥

कादम्बिनी विरुरुचे विसकण्ठिकाभि-
र्हृत्तालकालरजनीव रदावलीभिः ।
व्योम्न्युच्चकैरचिररोचिररोचताये
दृष्टिच्छलाद्विषमकोपविभीषणेव ॥ ४३ ॥

व्योम्नस्तलं पिदधतां ककुभां मुखानि
गर्जारवैरविरतैस्तुदतां मनांसि ।
अम्भोभृतामतितरामनणीयसीभि-
र्धारावलीभिरभितो ववृषे समूहैः ॥ ४४ ॥

बह्वीयसा ऽधिकतराः सहसा रसेन
घ्नन्त्यस्तटे निजकुलेप्यसुरप्ररूढे ।
मेघान्धकारपटलीपिहिते नभोऽन्ते
नद्यः प्रचेलुरभितः प्रमदाहवाय ॥ ४५ ॥

आप्लावितो बहुभवो ऽपिहिताम्बराणां
गम्भीरगर्ज्जनिपतद्विधुरासुराणाम् ।
वृष्ट्या तया जलमुचां वरुणास्त्रजानां
विश्वोदरंभरिरथ प्रशशाम वह्निः ॥ ४६ ॥

दैत्योपि रोषकलुषो निशितैः क्षुरप्रै-
राकर्णकृष्टधनुरुत्पतितैः स भीमैः ।

Digitized by Google

तद्भीतिविद्रुतसमस्तसुरेन्द्रसैन्ये-
गाढं जघान मकरध्वजशत्रुसूनुम् ॥ ४७ ॥
देवोपि दैत्यविशिखप्रकरं सचापं
बाणैश्चकर्त्त कणशो रणकेलिकारः ।
योगीव योगविनिषत्तमना यमाद्यैः
सांसारिकं विषयवर्गममोघवीर्य्यैः ॥ ४८ ॥
भ्रूभङ्गभीषणमुखो ऽसुरचक्रवर्त्ती
सन्दीप्रकोपदहनो ऽथ रथं विहाय ।
क्रीडत्करालकरवालकरो दधान-
श्चर्माभ्यधावदभितस्त्रिपुरारिपुत्रम् ॥ ४९ ॥
अभ्यापतन्तमसुरेश्वरमीशपुत्रो
दुर्वारबाहुविभवं सुरसैनिकैस्तैः ।
दृष्ट्वा युगान्तदहनप्रतिमां मुमोच
शक्तिं प्रमोदविकसद्वदनारविन्दः ॥ ५० ॥
उद्द्योतिताम्बरदिगन्तरमंशुजालैः
शक्तिः पपात हृदि तस्य महासुरस्य ।
हर्षाश्रुभिःसह समस्तदिगीश्वराणां
शोकोत्थवाष्पसलिलैःसह दानवानाम् ॥ ५१ ॥
शक्त्या ऽथ तारमसुरेश्वरमापतन्तं
कल्पान्तवातहतिभिन्नमिवाद्रिशृङ्गम् ।
दृष्ट्वा प्ररूढपुलकाङ्कितचारुदेहा
देवाः प्रमोदमगमंस्त्रिदिवेशमुख्याः ॥ ५२ ॥
यथापतत् स दनुजाधिपतिः परासुः
संवर्त्तवातनिपतच्छिखरीन्द्रकल्पः ।
तथादधत् फणिपतिर्धरणीं फणाभि-
स्तद्भूरिभारविधुराभिरधोव्रजन्तीम् ॥ ५३ ॥
स्वर्गापगासलिलशीकरिणी समन्तात्
सौरभ्यलुब्धमधुपावलिसेव्यमाना ।
कल्पद्रुमप्रसववृष्टिरभून्नभस्तः
शम्भोः सुतस्य शिरसि त्रिदशारिशत्रोः ॥ ५४ ॥
पुलकभरविभिन्नचारुदेहा
भुजविभवं बहु तारकस्य शत्रोः ।
ससुरवरगणा महेन्द्रमुख्याः
प्रमदमुखद्युतिसम्पदो ऽभ्यनन्दन् ॥ ५५ ॥
इति विषमशरारेः सूनुना जिष्णुना ऽऽजौ
त्रिभुवनखलशल्ये प्रेरिते दानवेन्द्रे ।
बलरिपुरपि नाकस्याधिपत्यं प्रपद्य
व्यजयत सुरचूडारत्नघृष्टाग्रपादः ॥ ५६ ॥

इति श्रीकुमारसम्भवे महाकाव्ये कवीन्द्रमुकुटमाणिक्यश्री कालिदासकृतौ तारकासुरवधोनाम सप्तदशः सर्गः ॥१७॥

॥ समाप्तंचेदं कुमारसम्भवम् ॥

॥ कुमारसम्भवोत्तरखण्डोपसंहरणम् ॥

तदित्थं द्वितीयेऽङ्के प्रक्रान्तं कुमारसम्भवं काव्यं काशीविद्यासुधानिधेर्नवमेऽङ्के पर्याप्तिं गतं तत्रच प्रतिसर्गं द्वित्राणि पद्यानि यद्यप्यलग्नकानि सन्ति तथापि यन्मूलपुस्तकमादायैतन्मुद्रितं तस्यातिजीर्णतया तन्मूलभूतस्य तन्मूलकस्य तत्सजातीयपाठवतोवा पुस्तकान्तरस्यालब्धत्वाल्लब्धानामपि भिन्नपाठानां पुस्तकानां सन्दिग्धस्थलनिर्णये साहाय्यमगतवतां पाठान्तरवैचित्र्यमात्रप्रदर्शनोपयोगित्वात् तानि पद्यानि तादृशवर्णानुपूर्वीमन्त्येवोपन्यस्तानि येन नवीननिबन्धदर्शनरसिकास्तेषु ससंशयता जिज्ञासवो भूत्वा तदर्थप्रकाशनप्रयत्नफलप्राप्त्या विचारकमण्डलीं तोषयेयुः ।

पुस्तकान्तरलब्धपाठान्तराणां मुद्राप्रमादशोधकानवधानमूलकाशुद्धानांच परिगणनाय प्रकरणान्तरं नेह विरचितं विचारकजनानां पुरतः प्रकाशनीयस्य विषयवैचित्र्यस्याभावात् तद्दर्शने कालक्षेपातिरिक्तफललाभस्यासम्भावितत्वात् ।

यत्पुनः पञ्चमेऽङ्के केनापि कुमारसम्भवरघुवंशयोः शिशुप्राढदशापन्नैककविविरचितत्वसम्भावनाहेतून् विचारयितुमसमर्थेन गौडेनोपन्यस्तम्

(१) यावत्पर्यन्तं कुमारस्य सम्भवस्तावत्पर्यन्तमेव कुमारसम्भवाख्यं काव्यं ज्ञेयं सप्तमसर्गान्तं । नतु महादेवक्रीडाकुमारोत्पत्तितारकासुरविजयान्तं सप्तदशसर्गान्तं ।

(२) साहित्यग्रन्थेष्वपि कुत्रापि प्रकाशादिषु तदुदाहरणं न ।

(३) क्व कालिदासालङ्कारादिच्छाया क्वचाष्टमसर्गादिरचना ।

(४) यदि तारकासुरविजयान्तं तत् काव्यं भवेत् तदा शिशुपालवधवत् तारकवधाख्यां लभेत ।

(५) तथा मल्लिनाथेनापि सप्तमसर्गान्तमेव व्याख्यातमस्तीति ततः परस्यार्वाचीनरचितत्वं स्पष्टम् ।

(६) सप्तमसर्गान्तरचना व्याकरणव्युत्पत्त्या ऽन्वितवाक्यवती यथोचितवर्णसंघटनावतीचेति सहृदयसंवेद्यमेतत् ।

तत्रोच्यते ।

(१) उपक्रमस्तावदभ्याससहितस्तस्यार्थस्योपसंहारे बीजं यदि तावद् वारंवारमुपक्रान्तोऽर्थो नोपसंह्रियेत कथंकारं तद् वचनं प्रेक्षावन्तः शृणुयुः कथंवा निरुपसंहारादुपक्रमविरुद्धोपसंहाराद्वा वचसो निराकांक्षप्रतिपत्तेराशापि । द्वितीयोहि सर्गः कुमारसम्भवस्योपक्रमग्रन्थः । तथाहि देवानां चतुर्मुखेनसह संवादमुखेन कविनोपक्रान्तं ।

तस्मिन् विप्रकृताः काले तारकेण दिवौकसः ।
तुरासाहं पुरोधाय धाम स्वायम्भुवं ययुः ॥ १ ॥
एवं यदात्थ भगवन्नामृष्टं नः परैः पदम् ।
प्रत्येकं विनियुक्तात्मा कथं न ज्ञास्यसि प्रभो ॥ ३१ ॥
त्वया दत्तवरोदीर्णस्तारकाख्यो महासुरः ।
उपप्लवाय लोकानां धूमकेतुरिवोत्थितः ॥ ३३ ॥
तदिच्छामो विभो स्रष्टुं सेनान्यं तस्य शान्तये ।
कर्मबन्धच्छिदं धर्मं भवस्येव मुमुक्षवः ॥ ५२ ॥
गोप्तारं सुरसैन्यानां यं पुरस्कृत्य गोत्रभित् ।
प्रत्यानेष्यति शत्रुभ्यो बन्दीमिव जयश्रियम् ॥ ५३ ॥
सम्पत्स्यते वः कामोऽयं कालः कश्चित् प्रतीक्ष्यताम् ।
नत्वस्य सिद्धौ यास्यामि सर्गव्यापारमात्मना ॥ ५५ ॥
संयुगे सांयुगीनं तमुद्यन्तं प्रसहेत कः ।
अंशादृते निषिक्तस्य नीललोहितरेतसः ॥ ५८ ॥
तस्यात्मा शितिकण्ठस्य सैनापत्यमुपेत्य वः ।
मोक्ष्यते सुरबन्दीनां वेणीर्वीर्यविभूतिभिः ॥ ६२ ॥
उमारूपेण ते यूयं संयमस्तिमितं मनः ।
शम्भोर्यतध्वमाक्रष्टुमयस्कान्तेन लोहवत् ॥ ६३ ॥

अनेन श्लोकनवकेन चरमप्रयोजनतया तारकवधस्तदुपायतया गोत्रभित्पुरस्करणीयसुरविजयश्रीप्रत्यानयनक्षमदेवसैन्यगोप्तृकसेनान्युत्पत्तिस्तस्याप्युपायतया हिमाचलसुताकरणकसमाधिस्थशम्भुमनोवशीकरणमुपक्रान्तमिति स्पष्टतरं प्रतीयते एवंस्थिते यादृशेन साध्यसाधनभावेन ये पदार्था उपक्रान्तास्तेषां तेन क्रमेणोपसंहारो न्याय्यवचनशीलानामुन्मत्तवचनव्यावृत्तो विशेषः । तदनुरूपमेवच कालिदासेनाप्रौढेनापि सताऽष्टमसर्गसमाप्तिं यावदुमासाधनकशम्भुमनोवशीकरणं ततः सर्गत्रयेण समहोत्सवकुमारसम्भूतिं ततः परेण सर्गद्वयेन कुमारस्य सैनापत्यप्राप्तिमुपसंहृत्य चरमेण सर्गचतुष्टयेन तारकवध उपसंहृत इति न्याय्यवचोरचनाविदग्धेन विदग्धतानुसार्याचरितम् । अतः पूर्वोक्तार्थावधानिनां सहृदयानां कथं सप्तमसर्गएव य उपक्रान्तार्थत्रयमध्ये कस्याप्येकस्योपसंहारस्थानतां नानुभवति स समग्रकाव्यस्योपसंहारस्थानं भवतीत्येषोऽर्थो हृदयं स्प्रष्टुमर्हतीति ।

(२) काव्यप्रकाशेतावत् प्रदर्शितरीत्या सप्तदशसर्गात्मकतया सिद्धात् कुमारसम्भवाद् बहूनि पद्यान्युदाहृतानि दृश्यन्ते यदिचाष्टमसर्गप्रभृतेर्ग्रन्थादुद्धृतं किमपि प्रकाशे न दृश्यते ऽतस्तस्य कालिदासप्रणीतत्वे संशय इति तर्हि किं द्वितीयसर्गस्थं पद्यं कस्मिंश्चित् साहित्यग्रन्थे दृष्टं येन तस्य कालिदासकृतत्वाश्वासः अपि च काव्यप्रकाशग्रन्थस्याप्रमादया निराग्रहया दृशा निरीक्षणे स्फुटमेतत् प्रतीयते यदष्टमसर्गादिर्ग्रन्थः कुमारसम्भवघटकतया मम्मटाचार्यस्याभिमत इति । तथाहि । काव्यप्रकाशे सप्तमोल्लासशेषे मम्मटः । " तत्र रतिहासशोकाद्भुतान्यदिव्योत्तमप्रकृतिवद्दिव्येष्वपि । किन्तु रतिः सम्भोगशृङ्गाररूपोत्तमदेवताविषया न वर्णनीया । तद्वर्णनंहि पित्रोः सम्भोगवर्णनमिवात्यन्तमनुचितं ।

क्रोधं प्रभो संहर संहरेति
यावद् गिरः खे मरुतां चरन्ति ।
तावत् स वह्निः शिवनेत्रजन्मा
भस्मावशेषं मदनं चकार ॥

इत्युक्तवद्भ्रुकुट्यादिविकारवर्जितः सद्यःफलदः क्रोधः स्वर्गपातालगमनगगनसमुद्रोल्लंघनाद्युत्साहश्च दिव्येष्वेव " ॥ अत्र कुमारसम्भवस्याष्टमनवमसर्गौ बुद्धिस्थीकृत्य सम्भोगवर्णनप्रतिषेधः । तृतीयपञ्चमौ बुद्धिविषयीकृत्य विप्रलम्भस्य चतुर्थमभिप्रेत्य शोकस्य सप्तमनवमसर्गान्तौ हासस्य सप्तमस्य त्रिंशत्प्रभृतिश्लोकानद्भुतस्य स्वर्गगमनस्य त्रयोदशं गगनोल्लंघनस्यचाष्टमं बुद्धिस्थीकृत्य वर्णनाभ्यनुज्ञानमाचार्येण कृतमन्यथा क्वान्यत्रोत्तमप्रकृतीनां सम्भोगवर्णनोदाहरणं निरुदाहरणश्च कथं प्रतिषेधोपि ।

(३) कालिदासः खलु शब्दालङ्कारेष्वनुप्रासमर्थालङ्कारेषुचोपमार्थान्तरन्यासौ प्रायेण प्रयुङ्क्ते तेषांच प्रतिश्लोकं सत्त्वं काव्यस्योत्कर्षे न प्रयोजकमपितु वृत्तस्य चमत्कारहेतुषु प्रदेशेषु तेनहि समस्तस्य काव्यस्य शोभा सम्भवति तेचोक्ता अलंकारा अष्टमसर्गप्रभृतावुत्तरग्रन्थेऽपि प्रतिसर्गं वृत्तप्रदेशेषु पूर्वग्रन्थादविशेषेणैवोपलभ्यन्ते तदेतदपि तस्य ग्रन्थस्यापेक्षाबुद्धिपूर्वकदर्शनं विना दुर्ज्ञेयं यतोऽलसाः श्रमद्वेषिणो जना विरलप्रचारतया सम्भवल्लेखकप्रमादकीटोपघाततैलजलसम्पर्कजराभिभवादिकृताशुद्धबाहुल्यसंवलितानि पुस्तकान्यवलोकनमात्रेण तिरस्कुर्वन्तस्तान्येवाशुद्धानि ग्रन्थकारदूषणानि मत्वा ग्रन्थकारानेवोपालभन्ते न यदि ते प्रसिद्धनामानः स्युः । तेषां प्रसिद्धत्वेच स ग्रन्थो ग्रन्थांशोवा तेन कविना न कृत इति वदन्तो या जातिर्यावा व्यक्तिः स्वस्य निकृष्टत्वेनाभिमता स्यात् तज्जातीयेन केनापि तयावा व्यक्त्या विरचितोऽयं ग्रन्थ उपेक्षाम

Digitized by Google

ह्रेतीति प्रसिद्धिं कृत्वा तस्य ग्रन्थस्य प्रचारविरलतायाः साहाय्यं कुर्वन्तः सन्तुष्यन्ति ।

(४) अस्य काव्यस्य तारकवधमिति नाम कविना न कृतं कुमारसम्भव इतितु कृतमिति नामकरणविरोधादुत्तरग्रन्थो न कालिदासप्रणीत इति शङ्का न विचारसहा । सप्तमसर्गान्तेपि कुमारोत्पत्तेरवर्णितत्वेन नामकरणविरोधस्य स्पष्टदृश्यत्वात् । वृत्तनाम्ना काव्यमिति पक्षे सर्वेषां वृत्तानां न काव्यनामकरत्वमतिप्रसङ्गात् किन्तु यद् वृत्तं कवेः प्राधान्येनाभिमतं काव्यस्य व्यापकं तदेव काव्यनामकरमित्यंच कुमारोत्पत्तेरेवात्रत्यैकादशसर्गरूपमहाप्रदेशव्यापितया तेनैव काव्यव्यपदेशः प्रधानेन व्यपदेशा भवन्तीति न्यायात् तन्मूलकत्वादेवच वृत्तनाम्ना काव्यमित्युक्तेः ।

(५) मल्लिनाथेन सप्तमसर्गान्तस्य व्याख्यानात् ततोऽधिकं न कालिदासकृतमिति वचनंतूपहासास्पदं मल्लिनाथोहि मम्मटाचार्यादर्वाचीनइति तेन कृतामुत्तरग्रन्थस्य निन्दां श्रद्दधानः श्रद्धापरवशानां लोकानां निन्दातो बिभ्यच्च तं व्याख्यातवान् नहि तेनास्य काव्यस्य सप्तमसर्गान्तत्वं कण्ठरवेणोक्तम् । उक्तत्वेवा पूर्वोक्ते सप्तमसर्गान्तत्वबाधके तस्यापि निरुत्तरत्वप्रसङ्गोऽस्त्येव । किं मल्लिनाथेन शिशुपालवधं व्याख्यातवता चरमौ द्वौ श्लोकौ कविवंशवर्णनपञ्चश्लोकीच न व्याख्याता न दृष्टा येन तदीयव्याख्यानपरिसमाप्तिर्ग्रन्थसमाप्तिसाधकतया मता स्यात् । अमङ्गलोत्कीर्तनात् स्पष्टार्थत्वाच्च न व्याख्यातं तदिति चेदश्लीलार्थत्वस्य साहित्याचार्यैः प्रदर्शितत्वेन स्फुटार्थत्वेनचाव्याख्यानं प्रकृतेपि सम्भवत्येव ।

(६) अष्टमप्रभृतिग्रन्थेपि रसानुसारिणी वर्णघटना दृश्यतएव वाक्यान्यप्यनन्वितार्थानि क्वापि न दृष्टानीति क्वचिद् व्याकरणविरुद्धानि कतिपयानि पदान्यवशिष्यन्ते तत्राधुनिकानां व्याकरणाननुसन्धानमपि मूलं यथाऽत्र देववाची वृन्दारशब्दः प्रयुक्तो व्याकरणे पुनर्वृन्दशब्दादारकन्प्रत्ययेन व्युत्पादितः कोशेचापि तथैव पठित इति परन्तु यद् व्याकरणं वृन्दशब्दादारकन्प्रत्ययं विदधाति तदेव शृङ्गशब्दादपि तमेव प्रत्ययं शास्ति एवं स्थितेऽपि कयाचिद् व्युत्पत्त्या रसविशेषवाची शृङ्गारशब्दोऽपि साधुः साहित्यशास्त्रे प्रकृतो यथा तथैव वृन्दारशब्दोपीति न तावता कालिदासकृतत्वव्यतिरेकोऽस्य शक्यशङ्कः अपिच यदि भारविप्रभृतीनां भट्टिमाघादीनां चापशब्दप्रयोगः स्पष्टदृष्टो वैयाकरणैर्निरंकुशाः कवय इत्यभिधायोपेक्षितो नतु तस्य कवेरेषा कृतिरेव न भवतीत्यपलपितस्तदाऽनतिप्रौढकालिदासविरचितेपि यदि क्वचित् किमप्यशुद्धं दृश्यते तर्हि तावतैव कालिदासकृतमेतन्न भवतीत्यपलापोऽपक्षपातिनां विदुषामनुचितएव । विट्ठलशास्त्री ।

THE SÁHITYA-DARPAṆA,

OR

MIRROR OF COMPOSITION.

(*Continued from page* 104.)

TEXT.

No. 653. *This* again may be five-fold, being possible in the two sorts of *the affix 'kyach'* respectively applied in the sense of position and object, in *the affix kyań,'* * and in *the adverbial affix 'ṇamul'* added in an active or passive sense.

COMMENTARY.

a. 'The elliptical *Simile,* in the omission of the common attribute'—*these words* are to be supplied *in the present text from the foregoing one.*

b. The *kyach, kyań* and *ṇamul are named yin, ṇáyi* and *ṇam* in the technicality of *the grammar* Kalápa.

c. For examples in their order :—

अन्तःपुरीयसि रणेषु, सुतीयसि त्वं
पौरं जनं, तव सदा रमणीयते श्रीः ।
दृष्टः प्रियाभिरमृतद्युतिदर्शमिन्द्र-
सञ्चारमत्र भुवि सञ्चरसि क्षितीश ॥

"Antahpuríyasi *(kyach* 1*)*† raṇeshu, sutíyasi *(kyach* 2*)* twań
Pauraṅ janań, tava sadá ramaṇíyate *(kyań)* Śríh :
Dṛishṭah priyábhiramṛita-dyuti-darśam *(ṇamul)* Indra-
Sańcháram *(ṇamul* 2*)* atra bhuvi sańcharasi kshitíśa."

(In the battle-field thou actest as if thou wert in thy *Zenana* and thou treatest the people of thy city as if they were thy sons; Fortune behaves, as a wife, towards thee, and looked upon by thy beloved ladies as the Nectar-beamed *moon,* thou walkest upon the earth, O monarch, like the Royal God (Indra) himself.

Here the points of resemblance are omitted, *viz.* the circumstance of being a place for pleasant sports, in *the phrase 'antahpuríyasi,'* and (the king's) being full of loving-kindness. Similarly in the other *expression of comparison.*

And in these *varieties,* because of the absence of the words *yathá* &c., and *tulya* &c., we have not to consider such specialities as *that of being of* the Direct sort or the like.

Some instance these as cases of the omission of *the affix '-vat'* expressive of comparison. This is not right,

* These two affixes are for forming verbs from nouns, to imply comparison. The words thus formed answer to such expressions in English as 'out-heroding,' 'hectoring' &c.

† Milton's beautiful figure '*Imparadised* in one another's arms' is an instance answering to the '*Kyach*' of the first kind.

Digitized by Google

for the *affixes kyań* &c., also, being added in the sense of *vat* imply comparison. Nor should it be said that the *affixes kyań* &c., cannot well imply comparison because, as being affixes, they are not independently expressive, and *such words of comparison as* 'iva' &c., are not employed in these cases. For the same might be said of *the affix* '*kalpap*' and others *which are allowed to be expressive of comparison.* Nor *will it avail to argue that* the '*kalpap*' &c., as being equivalent to '*iva*' &c., are expressive of comparison and that the '*Kyań*' &c. are only suggestive *of it,* for it is not certain that even '*iva*' *&c.*, are expressive. Or granting that the '*kalpap*' &c., are expressive, there can be no difference between the affixes of the '-vat' class and those of the 'Kyań' class, according to either of the two opinions touching affixes, viz. (1) 'The inflected word in its integrity is expressive' and (2). The base and the affix have each its own signification.' As to the assertion of some that the affixes of the class of '-vat' are directed *by Páṇini* to be employed in the sense of '-iva' and the like, whilst 'kyań' &c. are, in the meaning of 'behaviour'—this too is wrong, for 'kyań' &c., do not simply imply 'behaviour,' but 'similar behaviour.' So the Elliptical is thus tenfold, when the attribute is omitted.

TEXT.

No. 654. It is twofold, in the omission of the object compared to,—being possible in a phrase and a compound.

COMMENTARY.

a. For example:

"Naught exists equal to her face in charmingness, or like-to-her-eyes."

Here, objects answering to the face and eyes being hinted at, *but, of course, as inferior to them in charmingness,* we have an instance of the object compared to being omitted.

b. And in this very stanza, on our reading *mukhań yathedam*' instead of '*mukhena sadriśam*', and '*drigiva*' instead of '*nayana-tulyam*', we should have the direct sort: thus though, the two divisions of the present variety being subdivisible into the direct and the indirect, we obtain four sorts, yet after the manner of the ancients we have spoken of it as of two sorts only.

TEXT.

No. 655. In the omission of the *word or affix* expressive of comparison, it is twofold, being possible in a compound or the '*kwip*' affix.*

COMMENTARY.

a. For examples in their order:—

"*He* acts the ass *(gardabhati),* loudly and hoarsely screaming before the great."

Here '*kwip*' expressive of comparison is omitted in *gardabhati.*' It should not however be supposed that the object of comparison too is omitted here, inasmuch as it is indicated by the expression 'screaming.'

"The face of the fawn-eyed one is Moon-enchanting."

TEXT.

No. 656. It is twofold, in the omission of the *common* attribute and the object compared to,—*being possible* in a compound and a phrase.

COMMENTARY.

a. We shall have examples of these two *varieties* by our reading 'in the world' in place of 'in charmingness' in the sentence beginning 'Naught exists' (see §654. *a*).

TEXT.

No. 657. In the omission of the attribute and the word of comparison, it is twofold, according as it occurs in the '*kwip*' *affix* or a compound.

COMMENTARY.

a. For example:—"Her lotus-face shines like the moon (vidhavati)." Here in '*vidhavati*' there is the *grammatical* rejection of the '*kwip*' affix signifying comparison and of the point of resemblance, viz. 'charmingness.' But some, *recognizing a distinct division of the Elliptical Simile arising from the omission of an affix,* instance the present example as an illustration of the same. 'Lotus-face' is an example of the present variety residing in a compound.

TEXT.

No. 658. In the omission of what is compared, it is single, occurring in the '*kyach*' *affix.*

COMMENTARY.

a. For example:—

"With eyes flashing at the sight of the foeman's valour, and with his rod-like hand bristling with the sword, he behaves (sahasráyudhíyati) *in the battlefield* as if he wielded a thousand weapons."

Here the object compared, viz. 'himself,' is omitted, for the expression '*sahasráyudhíyati*' is to be interpreted 'behaves HIMSELF like one with a thousand arms.' For the reasons already stated (§653 *e*) there is no omission here of the term of comparison. Here some say, the word '*sahasráyudhíyati*' being derived from '*sahasráyudha,*' or one associated with a thousand arms, and interpreted 'he acts like such a one,' we have here the omission of the object compared, not in the shape of 'himself,' but of the particular action of the hero which is not literally mentioned, but simply figured by the expression '*sahasráyudhíyati.*' This view of the case cannot endure a discussion, since the employment of '*kyach*' in an active sense is opposed to the rule *of Paṇini.* *(To be continued.)*

* The difference between this and the affix '*kyań*' (§653), which also is added to an object of comparison in the nominative case lies, in the circumstance of the former leaving no sign of itself in the verb formed by its addition; as *gardabhati* 'he asses.' This still more corresponds to the English 'hectoring.'

Digitized by Google

THE BIRTH OF RÁMA.

(Raghuvanśa Canto X.)

With costly sacrifice, with praise, and prayer,
Ayodhyá's king had claimed from Heaven an heir;
When from the shrine, where burnt the holy flame,
Scaring the priests, a glorious angel came,
With arms that trembled as they scarce could hold
A flood of nectar in a vase of gold :
A weight too vast for even him to bear,
For Vishnu's self, the first of Gods, was there.
With reverent awe the Lord of Kośal's land
Received the nectar from the angel's hand,
As erst Lord Indra from the milky wave
Took the sweet drink that troubled ocean gave.
Soon as the queens had shared that mystic bowl,
Hope, sure and stedfast, filled each lady's soul.
They saw, in dreams, a glorious host who kept
Their watch around them, as they sweetly slept.
They mounted skyward on the feathered king,
Who spread a glory with each golden wing,
And as he shot through plains of ether drew
The cloudy rack to follow where he flew.
Now Lakshmí, with her consort's mystic gem
Sparkling upon her breast, for love of them
Came from the skies, and her own radiant hand
Their slumbering eyelids with a lotus fanned.
Then from their homes on high—their holy hair
Damp from the lucid stream that wanders there—
Came, in a glorious dream, the star-throned Seven,
Whispering softly of the Lord of Heaven.
Proud waxed the Monarch, as each happy queen
Told the bright visions that her eyes had seen :
No king, he deemed, with him in bliss could vie ;
No, nor the Father of the earth and sky.
As many a river lends its silver breast
Where the calm image of the moon may rest,
So in the bosom of each lady lay
That God, divided, who is one for aye.
Soon, like the luminous herb, which, ere 'tis night,
Wins from the setting sun a ray of light,
Kauśalyá gained a son, a lovely star,
To chase the shadow of the night afar :
A babe so bright, that every torch grew dim
In the queen's chamber, when it shone near him.
They named him Ráma, for the child shall bring
Eternal joy to all who hail him king.
Then the young mother, languid, pale, and worn,
Looked, as she nursed her babe, her newly born,
Like Gangá by the autumn heat oppressed,
With one sweet lotus on her island-breast.
And queen Kaikeyí bare a noble child,
Named Bharat, beautiful, and meek, and mild :
By fond affection and obedience, sent
To be his mother's pride and ornament :
Like gentle modesty that lends new grace
To each dear winning charm of Beauty's face.
Then queen Sumitrá, fairest of the fair,
Twin children, Lakshman and Satrughna, bare :
Thus self-control and knowledge spring to light
When fruitful Learning is employed aright.
The babes were born : then sin and sorrow fled,
And joy and virtue reigned supreme instead ;
For Vishnu's self disdained not mortal birth,
And heaven came with him as he came to earth.
Once more the regions, where each guardian lord
Had quailed before the giant he abhorred,
Were cheered with breezes pure from dust and stain,
And freed from terror hailed a gentler reign.
The fire was dimmed by cloudy smoke no more,
And the sun shone untroubled as before.
But Rávan's Glory poured her sorrows down
In jewels dropping from the giant's crown ;
While drums of triumph beaten in the sky
Woke the King's music to a glad reply ;
And the first rite to bless the joyful hour
Was the rich down-pour of a fragrant shower
Of blossoms falling, from the heavenly trees,
On the proud monarch's gilded galleries.
Graced with the holy rites, and nursed with care,
As the babes strengthened, fairer and more fair,
So with their growth increased their father's joy—
An elder brother to each darling boy.
Modest by nature, gentle nurture's aid
More modest still the youthful princes made :
Thus, when the sacred oil its influence lends,
In brighter spires the hallowed flame ascends.
With virtues blent in sweet accord to grace
The ancient line of Raghu's sinless race—
As all the seasons of the year combine
To deck the garden where the Gods recline—
They loved as brothers in their royal home,
But still in pairs they ever loved to roam.
Ráma and Lakshman closer ties allied,
And Bharat wandered by Satrughna's side,
Linked in eternal love, like wind and flame,
Or the dear moon and Ocean, whence he came.
As when, at summer's close, dark clouds arise,
Bringing sweet comfort to men's longing eyes,
So the fair children won the people's hearts
By gentle graces and attractive arts :
Men deemed that duty, profit, love, and bliss,
Had come incarnate from their world to this.
And with more pride the father's bosom glowed
For the rare virtues and the love they showed,
Than for the pearls, in countless tribute poured
By the four oceans, to delight their lord.

PRINTED AND PUBLISHED BY E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

SUPPLEMENT
TO THE PANDIT.

AIDS FOR CANDIDATES FOR UNIVERSITY EXAMINATIONS.

No. 9. A Benares February 1st, 1867. Vol. I.

BHAṬṬI KÁVYA.

(Calcutta University B. A. Examination 1868.*)*

INTRODUCTION.

The BHAṬṬI KÁVYA is an epic poem composed in the silver age of Sanskrit literature for the purpose of illustrating by numerous examples the rules of Grammar, Poesy, and its sister Rhetoric. Valuable as the work is to the Sanskrit student for its copious illustration of the grammatical treatises of PÁṆINI and VOPADEVA, (to whose *Sútras* constant reference is made in the excellent commentaries on the poem), and curious as a portion of it is as an Art of Poetry teaching by example only, it has additional claims to consideration in its comparative antiquity of composition, and its classic purity and elegance of style; nor is the poem without passages of great descriptive power and general poetic merit. Notwithstanding the prosaic nature of its object, which is not once lost sight of, the BHAṬṬI KÁVYA describes the oft-told adventures of RÁMA, "the subject of all verse." His birth and life, his sufferings and triumphs, are celebrated at length, and in language and style not unworthy of the inspiring theme. The poem is divided into twenty-two Books, containing about fifteen hundred stanzas. Of its object there are two grand divisions, *Śabda-lakshaṇa* or the Illustration of Grammar, and *Kávya-lakshaṇa* or the Illustration of Poesy and its Rhetoric. The Author tells us that he wrote his poem at VALABHÍ in the reign of ŚRÍDHARASENA (काव्यमिदं विहितं मया वलभ्यां श्रीधरसेननरेन्द्रपालितायां B, XXII 35) most probably ŚRÍDHARASENA I, who was king of Guzerat and reigned at BALLABHI from about A. D. 530 to 545. The Author's name was BHARTṚIHARI son of ŚRÍDHARASWÁMIN, according to the Scholiasts VIDYÁVINODA, and BHARATA compiler of the MUGDHABODHINÍ; but the compiler of the commentary entitled *Jayamaṅgalá* more correctly calls him BHAṬṬI and his father ŚRÍSWÁMIN.

TRANSLATION.

BOOK I.

1. There was a prince, the friend of the Gods, a conqueror, versed in the Scriptures, named DAŚARATHA, whom, pre-eminent by his qualities, the Eternal, for the sake of the good of the worlds, sought as father of his own free will.

2. He read the Vedas, sacrificed to the Gods, gave oblations to the Manes, respected his kinsfolk, conquered the class of six *vices*, rejoiced in regal polity and slew his foes uprootingly.

3. He scattered riches as the cloud *pours down* water, he sat on one throne with the mountain-cleaver, he worshipped none other than the Three-eyed *God*, he eclipsed the glories of all archers.

4. Pure, waited on by the assembly of great Bráhmans, excellent gratifier of the Dwellers of the Sky, that King shone for the welfare of the worlds, as the consecrated fire in the sacrifice.

5. He of pure fame, like the Lord of the Hundred Sacrifices, dwelt in AYODHYÁ equal in prosperity to MAHENDRA'S City, happy in all the seasons, inhabited by Bráhmans of enlightened understanding.

6. Which *Ayodhyá* the limit, as it were, amid things that are desired, of the skill of Him who sits upon the Lotus, expert in creating, stood as if laughing the city of INDRA to scorn with her upward gleaming jewel-rays.

7. Whose houses were like the peaks of MERÚ, with divers minerals, and with groves possessing pearls and diamonds and fair jewels, filled with women as with troops of heavenly nymphs.

8. From whose houses flashes of flaming gems stored within, streaming, forth by the window-lattices, gleam like the fall of the waters of GAṄGÁ from the slope of the Mountain of Snow.

9. As a Sage *delights* in sciences, that king rejoiced in three excellent queens, virtuous, bringing love, gain, and fame, esteemed in the world, married in season.

Digitized by Google

10. By him desiring a son by the best of women, RISHYAŚRIṄGA was brought to his city, a Saint wise, experienced in sacrifices, with matured course of knowledge, intelligent, honourable.

11. The king, of self-subdued mind, wished to cause that chief of Saints to perform the sacrifice whose fruit is a son: then, knowing his intention, that experienced *Saint* arranged his sacrificial rite connected with offspring.

12. The Rákshasas around the altar he drove away. He offered the subordinate sacrifices on both sides of the chief sacrifice: he made the concluding fire-offerings, and the excellent saint sought a boon to obtain a son for the king.

13. The regular rite, in which the assembly of priests were satisfied with gifts, having reached completion, the three nobly-born wives of the King ate the residue of the burnt offering to produce four goodly sons.

14. Of KAUŚALYÁ RÁMA first was happily born. Then of KEKAYÍ was BHARATA born; SUMITRÁ alone produced ŚATRUGHNA of noble deeds, together with LAKSHMAṆA.

15. The wise hermit VASISHṬHA, best of ascetics, honoured the twice-born finders of the highest gain, prevented the terrifying bands of shades from *approaching*, and initiated those *princes* at the proper time.

16. The whole Veda, with its supplements, was studied by them, the victorious weapons were mastered: they dwelt with their good qualities simultaneously in the minds of the people though locally separated.

17. Then the son of GÁDHI, the performance of whose sacrifices was impeded by Rákshasas, came to the lord of the land to choose RÁMA for protection: the king paid him honour with a dish of honey in his hand.

18. The prince said: "Is that meditation of thine propitious which thou hast desired for victory over another birth, which has ceased from knowing form etc., by which thou hast understood the inscrutable truths?"

19. The saint declared the prosperity of his meditation, but said the Rakshasas impeded his sacrifices in the wood:- them let RÁMA, subduing the power of his enemies, with LAKSHMAṆA, destroy.

20. When he heard that speech of the saint, the king unable to bear separation from his son fainted: then the prosperous prince was addressed in this speech by the proud chief of ascetics;

21. "By me thou hast been sought as a refuge in alarms; we have been sought by thee for the increase of thy religious merit: Kingship and Bráhmanhood are for each other's sake; make no hesitation, send forth thy son.

22. By him will be slain the great enemy who will stand before him in battle: do not, O great of soul, disrespect me; one like me lays not a mighty burden on one unfit for it."

23. "The Bráhman, like a fire, if enraged, will burn up my family: my son about to go will consume me with grief:" thus the prince first reflected; then he assented to the going of his son.

24. The saint, having honoured the king with blessings, set forth, delighted, to his hermitage: the prince lowly, bearing weapons burning on the wicked went behind his back.

25. The bold three-mothered LAKSHMAṆA master of all weapons and arms, was his companion, rejoicing in the prosperity of RÁMA who was about to go to the sacred wood, victorious, radiant of mien.

26. As the lion of RAGHU'S race went on, the archer about to slay the fiends, holding, grasped in his fist, his bow not to be borne by his enemies, with his variegated finger-guard bound on, the damsels of the city with difficulty refrained, through their sore grief, from weeping, wishing him good luck.

27. Then Bráhmans loudly uttered blessings upon him; others beat the drum with loud melodious sound; his arm throbbed auspiciously betokening the wished result, and favouring birds sang loudly on the trees.

Thus ends the first Canto of the BHAṬṬI KÁVYA entitled the BIRTH OF RÁMA.

NOTES ON ṚIJUPAṬHA PART III.

C. U. Entrance Examination 1868; *& First Arts.* 1867.

अस्ति—3rd person, singular, present of **अस्** = to be; dual **स्तः** plural **सन्ति**.

2nd person **असि–स्थः–स्थ**–and first person **अस्मि–स्वः–स्मः ।**

तीर—n. 1. A shore 2. An arrow (**तीर** = to finish + **अच्** aff.) **तट**.

विशाल—Adj. Great, large—(**वि** particle and **शालच्** affix or **विश** = to enter + **कालन्**.) **महत्**.

तरु—m. A tree (**तॄ** = to proceed + **उ** = aff.) **वृक्ष**. The word 'tree' comes from the same root.

आगत्य—Having come (**आ** and **गम्** = to go.) **क्त्वा** is changed into **ल्य** on account of **उपसर्ग**.

रात्रि—s. f. Night (**रा** = to give + **त्रिप्** aff.) **निशा**.

पक्षिन्—m. A bird (**पक्ष** = a wing + **इन्** aff.) **विहग**.

निवसन्ति—3rd person, pres: plural of **वस** = to dwell, dual **वसतः**, singular **वसति**.

अवसन्न—Past Ptc. Ended. (**अव** + **सद्** = to end + **क्त** aff.) **समाप्त**.

अस्ताचल—The mountain which is supposed to be the place where sun and moon set (**अस्त** = Setting + **अचल** a mountain.)

Digitized by Google

चूडा s. f. Top, summit (चुल = to elevate, अङ् and टाप् aff. ल changed to ड and the vowel lengthened) शिखर.

अवलम्बिन्—Resting, depending—(अव+लबि = to go+अच् aff+इन् aff.) आश्रय.

भगवत्—The venerable (भग = fortune+मतुप् aff.) ऐश्वर्य्यवत्.

चन्द्रमस्—s. m. The moon—(चन्द्र = camphor+मा = to measure +असि aff.—rendering all objects white like camphor.) इन्दु.

वायस्—m. A crow (वय् = to go+असच् aff.) काक.

प्रबुद्ध—Past Ptc. Being awake (प्र+बुध = to know+क्त aff.) जागरित.

कृतांत—m. 1-Death personified. 2-Fate. 3-Sinful action. 4-Saturday—(कृत = act, (actum) done+अन्त = end) यम.

अटत्—Ptc. Pres. Roaming (अट् = to go+शतृ aff.) भ्राम्यत्.

व्याध—m. 1 A hunter 2—A wicked man (व्याध = to pierce+ण aff.) लुब्धक.

अपश्यत्—3rd person, sing, past prœterite of दृश् = to see. It is thus conjugated :—

3rd person,	अपश्यत्	अपश्यतां	अपश्यन्.
2nd do.	अपश्यः	अपश्यतं	अपश्यत.
1st do.	अपश्यं	अपश्याव	अपश्याम.

अवलोक्य—Ger. Having seen (अव+लोक = to see.) दृष्ट्वा.

अचिंतयत्—1st prœterite. It is conjugated like अपश्यत्.

अनिष्ट—Past Ptc. Unwished (अन्+इष = to desire+क्त aff.) अनभिलषित.

दर्शन—n. Sight (दृश् = to see.) अवलोकन.

जात—Ptc. Past. Produced, (जन् = to be born.) उत्पन्न. S.

जाने—1st Sing. pres. of ज्ञा = to know मन्ये. It is thus conjugated :—

3rd person,	जानीते	जानाते	जानते
2nd „	जानीषे	जानाथे	जानीध्वे
1st „	जाने	जानीवहे	जानीमहे

अनभिमत—Past. Ptc. Disagreeable (अन्+अभि+मन = to know +क्त.) अप्रिय.

दर्शयिष्यति—3rd Sg. 2nd Fut. caus of दृश् = to see.

उक्त्वा—Ger. from वच् = to say. कथयित्वा.

अनुसरण—n. Following. (अनु+सृ = to go+अन् aff.) अनुगमन.

क्रम—m. Way. (क्रम = to go). प्रकार.

व्याकुल—Adj. Perplexed. (वि+आ+कुल = to accumulate.) संक्षुब्ध.

चलित—Past Ptc. Moved. (चल = to go.) गत.

कण—m. s. Grain of corn. (कण = to contract+अच् aff.) लव

विकीर्य—Ger. (वि+कॄ = to scatter.)

जाल—n. 1. A net. 2. Window. 3. Multitude. 4. Pride (जल = to encompass, to hide or to screen+अण् aff.) पाश.

विस्तीर्य—Ger. Having spread (वि+स्तॄ = to cover.) प्रसार्य.

प्रच्छन्न—Past Ptc. Hidden (प्र+छद = to cover+क्त aff.) पिहित.

काल—m. Time (कल = to count+अच् aff.) समय.

कपोत—m. 1. A pigeon. 2. A bird in general (कब = to tinge +ओतच् aff. ब changed into प.)

राजन—m. 1. A king 2. The moon (राज् = to shine+कनिन् aff) Here राज is अकरान्त on account of being compounded.

परिवार—m. 1. Retinue 2. Dependent 3. A sheath. (परि = round+वृ = to surround+घञ् aff.)

वियत्—n. s. Sky, heaven (वि+यम = to refrain+क्विप् aff+ तुक् final.) आकाश.

विसर्पत्—Pr. Ptc. of वि+सृप = to go. Flying about. उड्डीयमान

लुब्ध—Past Ptc. of लुभ = to covet. Desiring. विमोहित.

आह—3rd sg. pres. of ब्रू = to speak. 'In the present tense the inflexions of आह in the three numbers of the third person, and singular and dual of the second, in the same sense, 'he speaks, &c, but with the terminations of the 2nd prœterite, are considered to be optionally substit ted for those of ब्रू—' as आह—आहतुः—आहुः—आत्थ—आहथुः—

सम्भव—m. 1. Production 2. Possibility (सम् implying perfection+भव = being.) शक्यता.

निरूपण—n. s. 1. Investigation 2. Sight (नि implying certainty, रूप = to have form+ल्युट् aff.) निरूप्यतां is 3. Sg. Imp. pass.

भद्र—Adj. 1. Fortunate. 2. Pious. 3. Gold. 4. Steel. 5. Siva. 6. A heap. (भदि = to be happy+रन् aff and the nasal rejected.) शुभ.

भवितव्य—Adj. Ptc. Fut. of भू = to be. To be fared.

मग्न—Past Ptc. Plunged [मस्ज = to plunge into water+क्त aff,]

पङ्क—Mn. 1. Mire 2. Sin. (पचि = to spread+घञ aff.)

दुस्तर—m. Difficult to be crossed (दुस्+तॄ = to cross.)

व्याघ्र—m. 1-A tiger 2-Pre-eminent (वि+आङ् before, घ्रा = to smell+क aff.) शार्दूल.

संप्राप्त—Past Ptc. 1-Obtained 2-Effected (सं+प्र+आप् = to obtain+क्त aff.) आक्रान्त.

पथिक—m. A traveller (पथिन् = a road+ठक् aff.) यात्रिक.

ऊचुः—3rd pl. 2 prœt of वच् = to say.

अब्रवीत् 3 sg. 1st prœt of ब्रू = to say. It is thus conjugated:—

3rd person,	अब्रवीत्	अब्रूतां	अब्रुवन्
2nd „	अब्रवीः	अब्रूतं	अब्रूत
1st „	अब्रवं	अब्रूव	अब्रूम

दक्षिण—mfn. 1-South 2-Right (not left) 3. Candid. 4. Subject. 5. Clever. (दक्ष = to prosper+इनन् aff.) आवाच्य.

स्नात—Sg. Past Ptc. 1 Bathed 2 An initiated householder. (ष्णा = to bathe+क्त aff.) अवगाहित.

कुशहस्तः—कुशो हस्ते यस्य स कुशहस्तः बहुव्रीहि. With kusa (a grass) in his hand.

ब्रूते—3rd Sg. Pres. Átm—of ब्रू = to say. It is thus conjugated :—

3rd person,	ब्रूते	ब्रुवाते	ब्रुवते
2nd „	ब्रूषे	ब्रुवाथे	ब्रूध्वे
1st „	ब्रुवे	ब्रूवहे	ब्रूमहे

गृह्यतां—3. Sg. Imp. Pass of ग्रह = to take. Let be taken.

लोभाकृष्ट. लोभेन आकृष्टः लोभाकृष्टः तृतीया तत्पुरुष. Attracted by desire. [लोभ+आ+कृष = to draw+क्त aff.]

Digitized by Google

भाग्य—n. 1-Luck. [**भज** = to divide+**घ्यत्** aff or **भाग** = a part+ **यत्** added.] **विधि.**

आत्मसन्देह—**आत्मनः सन्देहः आत्मसंदेहः षष्ठी तत्पुरुष** Risk of life. [**अत्** = to go+**मनिन्** aff+**सम**+**दिह** = to collect +**घञ्** aff]. **आत्मविनाशशङ्कायुक्त विषय**

(To be continued.)

VENÍ SAṄHÁRA.

CALCUTTA UNIVERSITY B. A. EXAMINATION 1869.

(From Professor Wilson's Specimens of the Hindu Theatre.)

CHARACTERS.

Yudhishthira.—The elder of the Pándava princes, and their king.
Bhíma.—The brother of Yudhishthira.
Arjuna.—The third Pándava prince.
Sahadeva. } *Nakula.* } The two younger Pándava princes, twin brothers.
Krishna.—The friend and ally of the Pándavas.
Dhriratashtra.—The father of the Kaurava princes, and uncle of the preceding.
Duryodhana.—The elder of the Kaurava princes, the son of Dhritaráshtra.
Kerna.—The friend and ally of Duryodhana.
Kripa—An ally of Duryodhana.
Aswatthámá.—A martial Brahman and sage, the son of Drona and nephew of Kripa.
Sanjaya.—The charioteer of Dhritaráshtra.
Sundaraka.—An attendant on Kerna.
Chárváka.—A Rákshasa, in the disguise of a holy ascetic.
A Rákshasa, or male goblin.
The Charioteer of Duryodhana.
Attendants, Soldiers, &c.
Draupadí.—The wife of the Pándavas.
Bhánumatí.—The wife of Duryodhana.
Gándhári.—The mother of Dhritaráshtra.
Attendant on Draupadí.
Attendant on Bhánumatí.
The mother of Jayadratha, king of Sindhu.
A Rákshasí, or female goblin.
Attendants.

The *Vení Samhára* is a drama founded on the Mahábhárat. The name alludes to an incident described in the latter part of the *Sabhá Parva* of that poem, Draupadi's being dragged by the *vení*, or braid of hair, into the public assembly by the hand of Duhsásana, one of the Kaurava princes, a disgrace that weighed most heavily upon the Pándavas, and was most bitterly revenged.

The introduction of this play presents a *nándí* or preliminary benediction of six stanzas : an extravagance unwarranted by the practice of the best writers, and prohibited by positive rule. Two of these, indeed, are omitted by the commentator, and the last is censured by the author of the *Kávya Prakása*, as inconsistent with the reverence due to Hari and Lakshmí, whose amorous sports it describes in a style suitable to mere mortals alone.

The manager then informs the audience that the play is a novelty, the composition of the poet "Bhatta Náráyana; also designated by the title *Mriga Rája* or *Sinha*, meaning the same thing, the lion. It is an odd grouping of names, however, and leaves the character and person of the bard rather doubtful, the termination *Sinha* being most correctly applicable to a man of the regal or military caste, whilst *Bhatta* is an adjunct belonging to a Brahman.

The occasion of the performance, which it is usual to mention, is not adverted to, and the manager and actor go off to prepare for an exhibition of song and dance in honour of Krishna's return to the Pándava camp from a visit to the Kaurava princes, as a mediator between the contending chiefs. The business of the play begins with a conversation between Bhíma and Sahadeva, in which the former expresses his refusal to have any share in the negociations instituted by Krishna, and his determination to make no peace with the enemy until the insult offered to Draupadí is avenged. He expresses his resolution, in case the dispute be amicably adjusted, to disclaim all connexion with his own brothers, and throw off obedience to Yudhishthira.

Shall I not grind the Kauravas to dust,
Nor drink the blood of arrogant Duhsásana :
Shall not my mace upon the breast descend
Of proud Suyodhana, and crush the wretch,
Because your monarch seeks the price of peace?

The price is the demand of five villages or towns, Indraprastha, Tilaprastha, Mansadam, Váranávatam, and another: the Mahábhárat gives different names, as Avisthalam, Vrihasthalam, and Mákandi; the fourth is the same. Sahadeva attempts to calm the fury of Bhíma, but in vain ; and Draupadí, with her hair still dishevelled, and pining over her ignominious treatment, comes to inflame his resentment. She complains also of a recent affront offered by the queen of Duryodhana, in an injurious comment upon her former exposure, which serves to widen the breach. A messenger now arrives to announce that Krishna's embassy has been unsuccessful, and that he has effected his return only by employing his divine powers against the enemy. All the chiefs are summoned by the trumpet to prepare for battle.

Draup. Yet ere you go attend to my request ;
Let not my shame so far inflame your wrath,
That heedless of your lives, you headlong plunge
Into the conflict : the chieftains of the enemy
Are neither rash nor timorous.

Bhím. True, warrior dame.
The sons of *Pandu* are well skilled to ford
The ocean of the fight, amidst whose waves
Floats many a headless corse ; and howling monsters,
Gorged with the sanguine beverage, re-echo
The trumpet's sound. Foremost they lead the troops
O'er crashing cars and dying elephants,
The fierce encounter of whose ponderous brows
Has strewed the floating field with brains and gore.

(To be continued.)

PRINTED AND PUBLISHED BY E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 10. Benares March 1st, 1867. Vol. I.

ननु चित्रया यजेत पशुकाम इत्यादिचोदनाः पश्वादिफलानुबद्धस्वार्थं बोधयन्ति नच कर्मानन्तरं फलमुपलभ्यते नच कालान्तरे फलं भविष्यतीति शक्यं । कर्माभावात् । अतः प्रमाणान्तरबाधादप्रमाणं शास्त्रं ।

उच्यते । नतावच्छास्त्रेणानन्तरभावितया फलं श्राव्यते येनानन्तरफलादर्शनेन बाधः स्यात् । नच कालान्तरे कर्माभावात्फलोत्पादासम्भवः । कालान्तरावस्थायिनो ऽपूर्वादेव फलोत्पत्त्यवगमात् । नच कालान्तरे प्रतिग्रहादिकारणान्तरदर्शनमपूर्वस्य फलसाधनतां बाधते । कामं प्रमाणद्वयसमर्पितमुभयं फलसाधनमस्तु । शास्त्रेणापूर्वं फलसाधनमवबोधितं । प्रत्यक्षादिभिः प्रतिग्रहादिकमिति । नच कालान्तरभाविनि फले कर्तुर्भोक्तृत्वमनुपपन्नं । नित्यत्वात् । बुद्धीन्द्रियशरीरेभ्योहि भिन्नः पुरुषः कर्मणां कर्त्ता सच नित्यतया कालान्तरभावीन्यपि फलानि भोक्तुमलमिति न प्रमाणान्तरबाधादपि शास्त्रस्य प्रामाण्यमाक्षेप्तुं शक्यं ।

अत्रापि शिष्टिः शास्त्रमिति ज्ञानं शास्त्रं । शिष्यतेऽनेनेतितु शब्दः । सच द्विविधः प्रत्यक्षो ऽनुमेयश्च । किंपुनः शब्दानुमाने लिङ्गं । अष्टकाः कर्त्तव्याइति वचनं । कथं । इयंतावत्स्मृतिस्त्रैवर्णिकैरविगानेन परिगृहीता । नच निर्मूलायाः परिग्रह उपपद्यते । मूलंच न प्रत्यक्षादि सम्भवति । तस्य कार्यत्वविषयत्वाभावात् स्मृतेश्चापूर्वकार्यावगमात् शास्त्रं सम्भवति मूलं । ननुच तदपि मूलं नावकल्पते । प्रयत्नेनाप्यालोच्यमानस्यानुपलम्भात् । नचानुपलब्धः शब्दो ऽर्थमवबोधयति । नचार्थमनवगमयन्मूलं भवितुमर्हति । उच्यते । सत्यम् । वयमिव मन्वादयोपि तच्छास्त्रं प्रत्यक्षं नोपलभन्ते ऽनुमानंतु तेषामप्यस्माकमिव सम्भवति । स्मृत्यन्तरंहि महाजनपरिगृहीतं दृष्ट्वा तेपि तत्कर्तुः स्मृत्यन्तरानुमितं शास्त्रं मूलभूतमनुमातुं शक्नुवन्त्येवमनादित्वात्स्मृतिपरम्पराया लिङ्गभूतायाः सम्भवाच्चानुमानविघातः । शब्दार्थसम्बन्धवत् । यथाहि वृद्धव्यवहारदर्शनेन प्रयोज्यवृद्धस्यार्थप्रतिपत्तिं प्रकल्प्य तस्याश्च शब्दश्रवणानन्तरभावित्वेन शब्दस्य तत्कारणतां प्रतीत्य कथंपुनरमुमर्थमप्रतिपादकः शब्दो ऽस्यार्थप्रतिपादकइतिच वितर्क्य पुनः स्वयं ततः शब्दादर्थमवगम्य प्रतिपादकत्वेनावगतः शब्दो ऽर्थमवबोधयतीति निश्चित्य वृद्धस्यार्थप्रतिपत्तिसामर्थ्यं कल्पयित्वा स कथमनेन वृद्धेनार्थप्रतिपादकतया शब्दो ऽवधारितइति विचिन्त्य नूनमस्यापि वृद्धव्यवहारान्तरदर्शनमेव व्युत्पत्त्युपायभूतं ममेव वृद्धान्तरस्याप्यपरवृद्धव्यवहारान्तरदर्शनमेवेत्यनादिवृद्धव्यवहाररूपलिङ्गपरम्परां परिकल्प्य लोको व्युत्पद्यते । तथा स्मृतिपरम्परामनादिमेव कल्पयित्वा शास्त्रानुमानमपि कुर्वन्ति । नचानुमितस्य शास्त्रस्यार्थप्रतिपादकत्वमनुपपन्नं । लिप्यनुमितवत् । सर्वदाच तस्याश्रवणमनाम्नातत्वात् । अनाम्नानमेव कस्मादितिचेत् । आचार्यैरनाम्नातत्वात् । तदपि कथमितिचेत् । आचार्यान्तरैरनाम्नानादिति न दोषः । नच तस्याशब्दत्वं । वर्णात्मकत्वात् । प्रत्येकंच वर्णानां श्रोत्रेन्द्रियग्राह्यत्वात् । वेदत्वंच तस्याप्यपौरुषेयवाक्यरूपत्वात् तन्मात्रवर्त्तित्वाच्च वेदशब्दस्य । तस्मादनुमेयमपि शास्त्रमस्ति ।

प्रत्यक्षमपि शास्त्रं किञ्चिदध्याहारापेक्षं पिण्डपितृयज्ञादिशास्त्रं वैदिकशास्त्रंच । पिण्डपितृयज्ञादौहि नियोज्यपदाश्रवणादपरिपूर्णं वाक्यं । ननु पदानामन्विताभिधायित्वेन व्युत्पत्तेर्भवत्वेकपदप्रयोगे ऽन्वितार्थान्तरापेक्षत्वादन्विताभिधानस्य

तदर्थसद्भावपरिपूर्णता। अनेकपदप्रयोगेत्वन्विताभिधानस्य सिद्धत्वात्किंनिबन्धनमपरिपूर्णत्वं । उच्यते । अत्राप्यभिहितार्थस्यानुपपत्त्या भवत्येवापरिपूर्णता । अत्रापि लिङादिभिरपूर्वं कार्यरूपमभिधीयते । नचानुष्ठानमन्तरेण कार्यरूपता निर्वहति । नच कर्त्तारमन्तरेणानुष्ठानोपपत्तिः । नचाधिकारमप्रतीत्य कर्मणि कर्तृतां प्रतिपद्यते। कर्मणिचाधिकारो नियोगे नियोज्यस्यावकल्पते । योहि ममेदं कार्यमिति प्रतिपद्यते स स्वकीयकार्यसाधनं कर्म स्वार्थतया प्रतिपद्यमानो ऽधिकारी स्यादिति नियोज्याश्रवणेपि कार्यत्वानिर्वाहादुपपन्नमपरिपूर्णत्वं । अतो लोके ऽपरिपूर्णवाक्यपरिपूरकतया ऽवधारितो ऽध्याहारो वेदेप्याश्रीयते । कःपुनरयमध्याहारोनाम । अधिकत्वस्य बुद्धौ निवेशनं । बुद्धौ सन्निहिते श्रूयमाणः शब्दः स्वार्थमन्वितमभिधत्ते । तस्यतु विशेषावगतौ योग्यत्वं लाघवंच कारणं । तथाहि । यद्यपि जीवनमंतरङ्गं नित्यंच तथापि तस्मिन्नियोज्यविशेषणे समाश्रीयमाणे विधेरपरमनुष्ठानाक्षेपकत्वं कल्पयितव्यं काम्येत्वधिकारिविशेषणे तदर्थितयैव प्रधाने प्रवृत्तेर्विधेरनुष्ठानाक्षेपकत्वकल्पना न कर्त्तव्या । यद्यपिचोपात्तदुरितक्षयोपि पुरुषैरिष्यते तथापि तस्योपात्तदुरितसत्तासापेक्षत्वाद्गौरवं तस्मात्सकलपुरुषाभिलषणीयं सकलदुःखसम्भेदरहितं सुखं स्वर्गपदाभिधेयं नियोज्यविशेषणं कल्प्यते । कथंपुनस्तादृशसुखवाचकता स्वर्गशब्दस्यावसीयते । उच्यते । ज्योतिष्टोमेन स्वर्गकामो यजेतेत्येवमादिसमाम्नायं सकलदुःखसम्भेदरहिताभिलाषोपनीतदीर्घतरसुखसाधनत्वेनार्थवादैः स्तूयमानं कर्म दृश्यते । स्वर्गशब्दोपि लोके कस्मिंश्चिदर्थे श्रौत्या वृत्त्या प्रयुज्यमानो दृश्यते । योप्यस्य चन्दनादौ प्रयोगः सोपि प्रीत्यपगमे तत्रैवाप्रयोगात्प्रीतिसाधनवाचकत्वकल्पनेपि प्रीतेरपि वाच्यत्वाश्रयणात्प्रीतिमात्रवाचकस्य तत्साधने लक्षणयापि प्रयोगोपपत्तेर्लाक्षणिकएव । तत्र यदि विध्युद्देशगतः स्वर्गशब्दस्तथासुखे वर्त्तते ततो ऽर्थवादानां मुख्यैव वृत्तिः स्तुतावपि स्यादिति तादृशसुखवाचकता स्वर्गपदस्याश्रीयते । चन्दनादिष्वपि यो लाक्षणिकः प्रयोगः सोपि प्रशंसार्थः सुतरां तद्विधसुखसाधनत्वापादनेनैवोपपद्यते । तथाच यावत्तावत्सुखसाधने स्वर्गशब्दं न प्रयुञ्जते किन्तु सातिशयप्रीतिजनके । स्वर्गपदाभिधेयसुखसम्भवश्चोक्तेन न्यायेनाम्नायएव प्रमाणं । तदन्यथानुपपत्त्याच तदुपभोगयोग्यदेहदेशसद्भावोपि नानुपपन्नः । सामान्यतोदृष्टानुमानंतु न नियोज्यकल्पनायां प्रमाणं । अध्ययनादौ व्यभिचारदर्शनात् । विध्यन्तरप्रयुक्त्याचानुष्ठानलाभादपरिपूर्णतापि नास्ति विकृतिषु करणोपकारजनकपदार्थवर्गाणामनाम्नानात्तद्व्यतिरेकेणोपकारासम्भवात्तदभावे करणस्य कार्यसाधनासमर्थत्वात्कार्यस्य कार्यत्वानिर्वाहादपरिपूर्णत्वेसति परिपूरणार्थमध्याहारः कर्त्तव्यः तत्रतावत्स्वतन्त्रपदार्थाध्याहारो नोपपद्यते विशेषावगमे कारणाभावात् । करणोपकाराध्याहारेपि प्रकृतिवदपरिकॢप्ताध्याहारे पुनरपि पदार्थानामभावे निर्वाहासम्भवात्प्रकृतोपकाराध्याहारः कर्त्तव्यः । तत्रापि प्रकृतीनां बहुत्वाच्चोदनालिङ्गसामान्याद्या बुद्धौ सन्निधीयते तदीयोपकाराध्याहारो युक्तः । तदध्याहारे तथैवापरिपूर्त्तेः पदार्थाकांक्षायां तदुपकारोपस्थापितैः पदार्थैरन्विताभिधानं । यद्यपिचासावुपकारः प्रकृतौ तत्पदार्थजन्यतया निर्ज्ञातः तथाप्यपूर्वप्रयुक्तत्वात्पदार्थानां प्राकृतापूर्वसम्बद्धस्यैवसतस्तस्योपकारस्य ते पदार्था जनका नापूर्वांतरसम्बद्धस्येति सम्प्रति वैकृतापूर्वसम्बन्धमुपगतः करणोपकारो न तत्पदार्थजन्यतया ऽवसीयतइत्यस्ति तज्जनकपदार्थापेक्षेति पूर्वप्रतीतसम्बन्धेनोपकारेणोपस्थापितैः पदार्थैरन्वितो विध्यर्थः स्वशब्देनाभिधीयते । उपमानंतु प्राकृतोपकारपदार्थसम्बन्धे न प्रमाणं । सादृश्यमात्रविषयत्वात् । अतो ऽध्याहारापेक्षमपि प्रत्यक्षं शास्त्रं ।

तथा प्रत्यक्षमपि शास्त्रं वचनव्यक्त्यवधारणाय लोकप्रसिद्धन्यायापेक्षं । यावद्धि लोकप्रसिद्धन्यायानुसारेण वचनव्यक्त्यवधारणं न क्रियते न तावत्समीचीनार्थबोधोत्पादनक्षमं शास्त्रं । तथाहि । उद्भिदा यजेत पशुकामइति किं गुणविधिरुत नामधेयमिति सन्देहे न्यायाभासापादितगुणविधिनिराकरणं सम्यङ्न्यायानुसारेण कृत्वा नामधेयाध्यवसानेन व्यक्तिनिर्धारणं यावन्न क्रियते तावत्समीचीनवाक्यार्थबोधो नास्तीत्यनेन मार्गेण न्यायापेक्षं शास्त्रं। अतएवेतिकर्त्तव्यताभूता वेदस्य स्वार्थमवबोधयतो मीमांसा । तथाचाहुः ।

धर्मे प्रमीयमाणेहि वेदेन करणात्मना ।
इतिकर्त्तव्यताभागं मीमांसा पूरयिष्यतीति ॥

कियत्पुनः पदजातमेकं शास्त्रं । नच शक्यं वक्तुं यावतां पदानामेकार्थत्वं तावदेकं शास्त्रं । अर्थभेदेतु शास्त्रभेदो मन्त्रवत् । यथा मन्त्रेषु यावता पदजातेनैको ऽर्थः प्रतीयते तावदेकं वाक्यमित्यवगम्यते तथा शास्त्रमपीति । युक्तं मन्त्रेषु प्रमाणान्तरप्रमितार्थेषु तत्रहि तत्वमन्यथात्वंवा ऽर्थस्यावधारयितुं शक्यते । शास्त्रंतु प्रमाणान्तराप्रतीतार्थावबोधकं । तदर्थस्य तत्वमन्यथात्वंवा शक्यते नान्यतो ऽवसातुं । उच्यते। शब्दानामर्थावच्छेदेनैव सर्वत्रैकतोपपत्तेः । पदतापि वर्णानामर्थावच्छेदेनैव । सत्वर्थो ऽवच्छेदकः शास्त्रस्य शास्त्रादेवावगम्यते । कः पुनरसौ । विषयः । साध्यंच । कःपुनर्विषयोनाम । उच्यते । कार्यमेवहि विध्यर्थः कार्यंच कृतिसाध्यं । कृतिश्च प्रयत्नः । सच सर्वएव भावार्थसम्बद्धः । तेन कार्यं प्रतीयमानं कृतिविशिष्टं प्रतीयते । नान्यथा । कृतिरपि

Digitized by Google

भावार्थेन विशिष्यते । तेन भावार्थः कृतिं विशिंषन् कार्यं विशिनष्टीति विषय उच्यते । योहि येन विशिष्यते स तस्य विषयः । अतश्च यावति पदसङ्घे एको विषयस्तावत्येको नियोगार्थः तदैक्याच्चैकं शास्त्रं । तत्रनियोगाभेदस्यापि विषयाभेदाधेयत्वाद्विषयाभेदादेव शास्त्रमेकं व्यवस्थाप्यते । तद्भेदाच्च भिन्नं । पञ्चधाच विषयभेदो ऽवसीयते । तत्र यजति जुहोति ददातीत्यभिधानभेदाद्यागादीनां भेदो ऽवगम्यते । देवतोद्देशेन द्रव्यत्यागो यागः । कापुनर्देवता । कश्चोद्देशः । कश्चत्यागः । उच्यते । स्तोत्रं शस्त्रं यद्गुणवचनं यदुद्देशेनच हविषां त्यागश्चोद्यते सा देवता । तत्रैव याज्ञिकवृद्धानां देवताशब्दप्रयोगात् । यत्रह्याग्नेयादिदेशनार्थानुष्ठाने प्रवृत्तो ऽग्निमुद्दिश्य हविस्त्यजति तत्रैवमाहुरग्निरत्र देवतेति । उद्देशश्च चतुर्थ्यन्ततद्वाचकशब्दप्रयोगः । त्यागश्च सम्बन्धिनि स्वे प्यौदासीन्यसङ्कल्पः । सचानभिसंहितपरस्वत्वापत्तिफलो यागः । देशविशेषगतद्रव्यप्रक्षेपोपाधिकश्च सएव होमः । अभिसंहितपरस्वत्वापत्तिफलंच दानमिति । अभिधानभेदाद्यजत्याद्यनुबन्धभेदावगमः । तथा विध्युच्चारणादसत्यप्यभिधानभेदे भावार्थभेदो ऽवगम्यते । असन्निकृष्टार्थावबोधनस्वरसंहि सर्वमेव विध्याम्नानं । तदर्थबोधेनैवमवसीयते नूनं भिन्ना इमे धात्वर्था इति । तद्भेदे विषयभेदाद्विषयिणो भेदोपपत्तेरसन्निकृष्टावबोधस्वभावता विध्याम्नानस्य निर्वहति । नन्वेवंतर्हि पुरुषः स्वेच्छया पुनर्विधिमामनति तदापि तर्हि विषयभेदः स्यात् । न । स्वतन्त्रत्वादुच्चारणस्य । यद्धि न पूर्वोच्चारणदर्शनपूर्वकमुच्चारणं तदपौरुषेयं स्वातन्त्र्येण परिच्छेदकं । यत्पुनरस्वतन्त्रं तत्पौरुषेयं प्रमाणान्तरोपात्तार्थावबोधकं । नच तत्र भेदे प्रमाणमस्तीति न भेदो विषयस्य । शाखान्तरगतस्तर्हि विध्याम्नानाभ्यासो भेदकः स्यात् । नेत्युच्यते । अभ्यासाभावात् । यत्रह्येकएव वक्ता पुनःपुनस्तमेवार्थमुच्चारयति तत्राभ्यासो व्यपदिश्यते । शाखान्तरगतं विधिं पुरुषांतरं पठतीति नाभ्यासः शक्यते वक्तुं । एवमपि पुरुषान्तराम्नानमेव कस्माद्विषमर्थं न प्रतिपादयति । उच्यते । एकार्थप्रतिपादकत्वेपि तदाम्नानस्यासन्निकृष्टार्थत्वोपपत्तेः । तस्यहि पुरुषस्य सोप्यर्थो ऽसन्निकृष्टएव यद्यपि पुरुषान्तरेण प्रतीतः । एकत्वंतु कथं । विषयैक्यात् । तदैक्यंचाभिधानैक्यात् । तथा साध्यमपि तत्रैकमेव । यद्येवंतर्हि य एवंविद्वान्पौर्णमासीं यजतेइत्यत्रापि तद्भेदः स्यात् । न । अभ्यासकल्पस्य भेदस्यानिर्वाहात् । रूपभेदेनहि भेदो निर्वहति । यागस्यहि द्रव्यदेवते रूपं । ताभ्यांहि स रूप्यते । नर्तेहि ताभ्यां स भवतीति । यद्यप्यत्र द्रव्यमविहितमपि यत्किञ्चिदुपादाय क्रिया सिध्यति यद्यपिचावाचनिकमपिध्रौवमाज्यं द्रव्यं गम्यते तथापि देवता नाविहिता भवतीति विधानमन्तरेण तदलाभः । नच यजिरेव तदन्वितस्वार्थमात्रवचनो देवतां विधातुमलं । विशेषावगमे कारणाभावात् । नापि वार्त्रघ्नीममावास्यायामनूच्येतेइति मन्त्रविधानान्मन्त्रवर्णोक्तदेवताश्रयणं सम्भवति । मन्त्रविधेरभावात् । आज्यभागयोर्ह्ययं विधिर्द्विवचनानुरोधादिति स्थितं । तस्मादनुवादमन्तरेण रूपालाभादनुवादोयमिति नाभ्यासात्कर्मभेदः । नन्वेवंतर्हि प्रकृतसर्वरूपयागानुवादः किमिति न स्यात् । ततश्चानूदितानां दर्शपूर्णमासाभ्यां यजेतेत्यधिकारसम्बन्धाद्राजसूयवत्सर्वयजीनां प्राधान्यं स्यादङ्गत्वमाघारादीनां न सिद्ध्येत् । उच्यते । सर्वानुवादाश्रयणे दर्शपूर्णमासाभ्यामिति द्विवचनं नोपपद्यते । सर्वसमुदायानुवादद्वयेन सर्वेषामेव दर्शशब्दवाच्यता पूर्णमासशब्दवाच्यताचावगम्यते । ततश्च दर्शश्च पूर्णमासश्चेति कर्मधारयो ऽयं समासः । तत्र यजीनां विशेष्याणां बहुत्वाद्बहुवचनं स्यान्न द्विवचनं । अतस्तदनुरोधेन केषाञ्चिदेव तावद्य एवं विद्वान्पौर्णमासीं यजतइत्यनुवादो न सर्वेषां । तथा य एवं विद्वानमावास्यां यजतइति केषाञ्चिदेवानुवादः । तेनानुवादद्वयेन समुदायद्वयापत्तेर्द्विवचनान्तोपपदवशेन तेषामेवाधिकारसम्बन्धः । तत्र केषां पूर्णमासीयुक्तो ऽनुवादः केषांचामावास्यायुक्तइत्यपेक्षायां कालनिमित्तोपपदानुसारेणोत्पत्तिकालयोगिनामेवानुवादइति निश्चयो जायते । अन्यथा विशेषाग्रहणादिति न सर्वानुवादो न सर्वेषां प्राधान्यमिति । तथा गुणान्तरयोगादप्यनुबन्धभेदो ऽवगम्यते । उत्पत्तौ यत्कालानुबद्धं यत्कर्म प्रतीयते ततो ऽन्येन कारकेणानुबद्धुं तन्न शक्यते ऽवगन्तुमित्यनुबन्धभेदावगमः । तथा सञ्ज्ञान्तरादप्यनुबन्धभेदो ऽवगम्यते । अन्याय्यंह्येकस्यार्थस्यानेकशब्दत्वमिति भेदस्तावदौत्सर्गिकः । यत्रतु बलीयसा प्रमाणेनानेकशब्दत्वमपि गम्यते भवति तत्रैक्यं । तथा विधानान्तरादपि कर्मान्यत्वावगमः । विधानान्तरंच सन्निहिते कर्मण्यनेकगुणसंयुक्तकर्मग्रहणात् । तत्रहि गुणविधिस्तावन्न सम्भवत्यनेकगुणश्रवणादनेकगुणविधाने वाक्यभेदप्रसङ्गात् । गुणविशिष्टकर्मविधौतु तस्यैवैकस्य विधानादेकवाक्यत्वनिर्वाहात् कर्मैव विधेयं । विधीयतेचेत्ततः प्रकृतादन्यत्व । तथा ऽसन्निधानादप्यप्रत्यभिज्ञानात्कर्मविधानावगमाद्भेदावगमः । प्रकरणान्तरमपि कर्मणः प्रक्रियान्तरं विधानान्तरमेव । सङ्ख्यातु भावार्थमात्रभेदे प्रभवति न विषयभेदे । यथा सप्तदश प्राजापत्यानिति प्राजापत्यप्रातिपदिकोपात्तानां द्रव्यदेवतासम्बन्धानां नियोगविषयत्वं । तेच सकृदेवाभिहिताः सकृदेव सम्बध्यन्ते दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेतिवदिति न भेदेन विषयभावं भजन्ते । साध्यभेदादपि शास्त्रभेदो ऽवसीयते । यथा दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत

Digitized by Google

यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेतिच । नहि यावज्जीववचोदना कामाधिकारे कालविधानार्था । लक्षणाप्रसङ्गात् । यावज्जीवनलक्षितोहि कालो विधेयः किन्तु जीवनकालएव नियोगस्य प्राप्तत्वाद्यावदर्थसम्बन्धेन विधेयत्वं । तावांश्च कालो नानभ्यस्तेन प्रयोगेण शक्यते व्याप्तुमितियजेतेत्यपि यागमभ्यसेदिति वर्णयितव्यं । ततश्चाभ्यासलक्षणाप्यपरेति जीवतोधिकारान्तरमेतदाश्रयणीयं । जीवनेह्यधिकारिविशेषणे सति जीवतो ऽवश्यं यागेन भवितव्यमिति सिद्धा यागेन जीवनव्याप्तिरभिधीयते यावज्जीवमिति । ततश्च नियोज्यभेदान्नियोगस्यापि भेदो ऽवश्यंभावी । तद्भेदाच्च शास्त्रभेदएव । नियोज्योहि स्वसम्बन्धितया ममेदंकार्यमिति नियोगमवबुध्यते तेन स्वकृतिसाध्यमपूर्वं प्रतिपद्यते । कृतिभेदेनच कार्यस्यापि भेदः । तेन नियोज्यः कृतिं भिन्दन् कार्यमपि भिनत्ति । अतो नियोगभेदस्यापि शास्त्रभेदहेतोर्नियोज्यभेदाधेयत्वात्तद्भेदेनैव शास्त्रभेदो व्यपदिश्यते । नियोज्यभेदेनावश्यं साध्यभूतस्यैश्वर्यलक्षणस्याधिकारस्य भेदइति साध्यभेदोपलक्षणीयो ऽयं शास्त्रभेदः । साध्यभेदेनचानुबन्धभेदभिन्नानामप्यङ्गप्रधानोत्पत्तिशास्त्राणामधिकारशास्त्रावस्थायामभेदः। एकस्याधिकारिनियोगस्य तावतां प्रतिपाद्यत्वादिति ।

एतच्च शास्त्राख्यं प्रमाणमनुमानतः स्पष्टभेदमेव । नह्यत्र गम्येनार्थेन गमकशब्दस्य सम्बन्धनियमो ऽवगतो नापि गम्यस्यार्थस्य किञ्चित्प्रत्येकदेशत्वं नापिच गमकस्येति सामग्रीभेदादनुमानाशङ्कापि नास्ति । किंपुनरत्र निर्वर्त्तितं । उच्यते । अर्थग्रहणेनाभिधेयवचनेन लौकिकवक्तुरभिप्रायज्ञानमशास्त्रं । असन्निकृष्टग्रहणेन पौरुषेयवाक्याभिधेयस्यार्थस्य वक्त्रभिप्रायनिश्चयपुरःसरं यद्विज्ञानं तच्च शास्त्रमिति दर्शितं । तथा वेदेप्यर्थवादानां नस्वतन्त्राणां शास्त्रत्वं किन्त्वर्थवादतया विध्यर्थवादतया विध्यन्तरानुप्रवेशेनेति । शब्दग्रहणेनैत्रार्थस्याशास्त्रत्वमुक्तं । यथा प्रकृतौ वाससि मिनोति वाससाचोपावहरतीति यस्मिन्नेव वाससि सोमो मीयते तेनैव तेनैव वाससोपावह्रियतइति । एकत्वात्कर्मणो ऽचोदितमपि तदर्थात्सम्पन्नं । अहर्गणेतु पृथक्त्वात्सोमस्यैकस्मिन्नपि वाससि नानाभूतस्यापि प्रमातुं शक्यत्वात् । उपावहरणंतु पुटीकृतस्य वाससा नयनं तदेकेन न शक्यमिति मानवाससो ऽन्यस्तदर्थमुपादीयते । एकत्वंतु वाससः प्रकृतावार्थं न शास्त्रार्थइति न चोदकेन व्याप्यतइति तत्र वासस एकत्वज्ञानं न शास्त्रमिति । विज्ञानादिति न्यायाभासाद्वाक्यस्य वचनव्यक्तिमवधार्य यत्तदर्थज्ञानं तच्च शास्त्रमिति प्रकटितं । नहि तच्छब्दविज्ञानाद्यादृशं तत्सम्यङ्न्यायावधार्यवचनव्यक्तिकं शास्त्रं तादृशमविज्ञाय तद्ज्ञानमिति न शास्त्रम् ॥

इति महामहोपाध्यायश्रीशालिकनाथकृतौ
प्रमाणपारायणे तृतीयः परिच्छेदः
॥ समाप्तः ॥

॥ श्रीगणेशाय नमः ॥

॥ कादम्बरीकथासारः ॥

श्रियं दिशन्तुवः शौरेर्द्वये तुल्यश्रमाः क्रमाः ।
येचादौ गोष्पदं पश्चात् त्रैलोक्यं क्रामतश्च ये ॥ १ ॥
सरसाः सदलङ्काराः प्रसादमधुरा गिरः ।
कान्तास्तातजयन्तस्य जयन्ति जगतां गुरोः ॥ २ ॥
गुणोद्द्योतनदीपानां सतां न परमुज्ज्वलं ।
यावन्मलिनमप्येषां कर्म दृष्टेः प्रसाधनं ॥ ३ ॥
गुणः कृशोपि प्रथते पृथुरप्यपचीयते ।
प्राप्य साधुखलौ चन्द्रः पक्षाविव सितासितौ ॥ ४ ॥
शक्तिर्नामाभवद्गौडो भरद्वाजकुले द्विजः ।
दीर्घाभिसारमासाद्य कृतदारपरिग्रहः ॥ ५ ॥
तस्य मित्राभिधानो ऽभूदात्मजस्तेजसां निधिः ।
जनेन दोषोपरमप्रबुद्धेनार्चितोदयः ॥ ६ ॥
स शक्तिस्वामिनं पुत्रमवाप श्रुतिशालिनं ।
राज्ञः कर्कोटवंशस्य मुक्तापीडस्य मन्त्रिणं ॥ ७ ॥
कल्याणस्वामिनामाऽस्य याज्ञवल्क्यइवाभवत् ।
तनयः शुद्धयोगर्द्धिनिर्द्धूतभवकल्मषः ॥ ८ ॥
अगाधहृदयात् तस्मात् परमेश्वरमण्डनं ।
अजायत सुतः कान्तश्चन्द्रो दुग्धोदधेरिव ॥ ९ ॥
पुत्रं कृतजनानन्दं .सजयन्तमजीजनत् ।
व्यक्ता कवित्ववक्तृत्वफला यत्र सरस्वती ॥ १० ॥
वृत्तिकारइति व्यक्तं द्वितीयं नाम बिभ्रतः ।
वेदवेदाङ्गविदुषः सर्वशास्त्रार्थवादिनः ॥ ११ ॥
जयन्तनाम्नः सुधियः साधुसाहित्यतत्ववित् ।
सूनुः समभवत् तस्मादभिनन्दइति श्रुतः ॥ १२ ॥
काव्यविस्तरसन्धानखेदालसधियंप्रति ।
तेन कादम्बरीसिन्धोःकथामात्रं समुद्धृतं ॥ १३ ॥
बभूव विदिशानाम पुरी वेत्रवतीतटे ।
या पुण्यकर्म्मणां तेजः शालिनां द्यौरिवास्पदं ॥ १४ ॥
रेजे रत्नगृहज्योतिर्ज्वालैरिन्द्रायुधप्रभैः ।
तस्यां निजभुजोद्योगविजितारातिमण्डलः ॥ १५ ॥

आखंडलइव श्रीमान् राजा शूद्रकइत्यभूत् ।
अष्टानां लोकपालानां रूपं बिभ्रदपि प्रजाः ॥ १६ ॥
यश्चदानन्दयंस्ताभिश्चंद्रमाइत्यवेदि यः ।
स मेदिनीं विनिर्जित्य चतुरम्भोधिमेखलाम् ॥ १७ ॥
सचिवार्पिततद्भारस्तस्यामास्ते यथासुखं ।
तेनानुद्वेजितजनैरन्योन्यमविरोधिभिः ॥ १८ ॥
विनोदैरत्यनीयन्त नवे वयसि वासराः ।
तस्यचानन्यलभ्यानां सुखानां पारदृश्वनः ॥ १९ ॥
यूनोपि सुरतक्रीडापराङ्मुखमभून्मनः ।
प्रयत्नेनापि नाऽवापि सा योषिद्विषमेषुणा ॥ २० ॥
हर्तुं शशाक या तस्य हृदयं चतुरेक्षणा ।
अथ बाह्याङ्गणस्थानवर्तिनं तं कदाचन ॥ २१ ॥
प्रसृत्य प्रश्रयप्रह्वा प्रतीहारी व्यजिज्ञपत् ।
दूरादुपायनीकृत्य शुकमाश्चर्य्यचेष्टितं ॥ २२ ॥
चण्डालदारिका काचिदागता दर्शनार्थिनी ।
श्रुत्वा क्षणं परामृश्य मुखमालोक्य मन्त्रिणः ॥ २३ ॥
समादिदेश तां राजा को दोषः प्रविशत्त्विति ।
निजेन लक्ष्मणा लोकस्पर्शं परिहरंत्यथ ॥ २४ ॥
मातङ्गकन्यका काचिदनुयाता नृपाङ्गणम् ।
तयाचसह हस्तस्थसशुकस्वर्णपञ्जरः ॥ २५ ॥
वहन्नहिंस्रमाकारं चंडालः स्थविरो ऽविशत् ।
प्रविशन्तींतु तां दृष्ट्वा कन्यामद्भुतदर्शनाम् ॥ २६ ॥
परं व्यस्मयत क्ष्मापः क्षणं चेतस्यचिन्तयत् ।
इदं रूपमियं कान्तिरिमे लावण्यशीकराः ॥ २७ ॥
मर्त्त्यतामपि न प्राहुर्म्मातंगत्वेतु का कथा ।
मेनकामिव पश्यामि नूनं मातङ्गमायया ॥ २८ ॥
छन्नेयंदेवता काचिन्मर्त्त्यलोकमुपागमत् ।
इत्यादि चिन्तयंतं सा प्रगल्भवनितेव तं ॥ २९ ॥
प्रणनाम महीपालमनाकुलविलोकिनी ।
ततः क्षितितलन्यस्तजानुः प्रणतकन्धरः ॥ ३० ॥
गाढोभयकरासक्तपञ्जरः स्थविरो ऽब्रवीत् ।
वैशंपायननामा ऽयं रत्नमत्यद्भुतं शुकः ॥ ३१ ॥
रत्नानांचास्पदं देवो दुग्धोदधिरिवापरः ।
इत्यादरेण नः स्वामि दुहित्रा ऽयमुपाहृतः ॥ ३२ ॥
प्रसादः क्रियतामस्याः पतगः परिगृह्यतां ॥ ३३ ॥

इत्युक्त्वा सो ऽग्रतोराज्ञः पञ्जरं मणिकुट्टिमे ।
विनिधाय प्रणम्यैनं सप्रश्रयमपासरत् ॥ ३४ ॥
इङ्गितज्ञा प्रतीहारी विवृतद्वारसम्पुटम् ।
अकरोत्पञ्जरं तस्मान्निर्य्ययौ स विहंगमः ॥ ३५ ॥
उत्क्षिप्य दक्षिणं पादं जयशब्दमुदीर्य सः ।
प्रयुक्तवेदमन्त्राशीरिमामार्य्यामथाऽपठत् ॥ ३६ ॥

स्तनयुगमश्रुस्नातं
समीपतरवर्त्ति हृदयशोकाग्नेः ।
चरति विमुक्ताहारं
व्रतमिव भवतो रिपुस्त्रीणां ॥ ३७ ॥

तामाकर्ण्य महीपालो विस्मयोत्फुल्ललोचनः ।
कुमारपालनामानं प्रधानामात्यमब्रवीत् ॥ ३८ ॥
दृष्टं भवद्भिराश्चर्य्यमीदृशं श्रुतमेववा ।
तिर्य्यक्त्वे ऽतिशयः सोयं यो मनुष्येषु दुर्लभः ॥ ३९ ॥
श्रुताध्ययनसंस्कारो मातङ्गजनसङ्गतिः ।
मातङ्गस्यच कन्येयमिति चित्रपरम्परा ॥ ४० ॥
अमात्यस्त्वभ्यधादेनं पूर्व्वसंस्कारकारिताः ।
भवंत्यतिशयाः प्रायः प्राणिनां कोत्र विस्मयः ॥ ४१ ॥
एतानि तानि लिङ्गानि परलोकानुमांप्रति ।
तार्क्किकैः प्रतिपाद्यंते लोकायतनिराकृतेः ॥ ४२ ॥
विचित्रा वेधसः सृष्टिर्विचित्राः कर्म्मवासनाः ।
विचित्रास्तद्विपाकाश्च विचित्रः कालपर्य्ययः ॥ ४३ ॥
इत्यादिशुकसंबंधकथाविच्छेदकारणं ।
उद्भूत्तारगंभीरो मध्याह्नपटहध्वनिः ॥ ४४ ॥
वहिः प्रकल्प्यतामस्याः सुखमावसथादिकम् ।
अयंचाभ्यंतरं पत्ररथभूपः प्रवेश्यतां ॥ ४५ ॥
इत्यादिश्य प्रतीहारीं सभामौज्झन्महीपतिः ।
विसर्ज्जय राजन्यचक्रं सेवार्थमागतं ॥ ४६ ॥
ततः कृताल्पव्यायामः स्नातः पूजितदेवतः ।
हुताग्निः श्रुतविप्राशीर्भुक्त्वा शय्यागृहं ययौ ॥ ४७ ॥
तत्र पर्यंकमारुह्य ध्यात्वाच किमपि क्षणं ।
समंतःपुरविश्रान्तं शुकमानाययत्पुनः ॥ ४८ ॥
तंच कंचुकिनानीतमादौ पृष्ट्वा सुखादिकं ।
पप्रच्छ कौतुकाक्षिप्तस्तद्वृत्तांतमनंतरम् ॥ ४९ ॥

वैशंपायन कोनु त्वं क्व जात: क्वोषितश्चिरं ।
कुतस्त्यमिदमीदृक् ते कलाशास्त्रादिकौशलं ॥ ५० ॥
अपि जातिस्मर: कोपि भवान् भूमिमिमां गत: ।
नह्यस्त्यतिशयप्राप्तिरियती पक्षिजातिषु ॥ ५१ ॥
केनवा भवतो नाम कृतं विप्रजनोचितं ।
ईदृशान्यभिधानानि कुतो ऽन्यजनवेश्मसु ॥ ५२ ॥
कथं चांडालसंपर्क इहवा कथमागम: ।
इति कार्त्स्न्येन वृत्तांतमात्मनो वक्तुमर्हसि ॥ ५३ ॥
इति पृष्ट: क्षितीशेन बहुमानपुरस्सरं ।
क्षणं बुद्ध्या ऽनुसंधाय शुको वक्तुं प्रचक्रमे ॥ ५४ ॥
देव विंध्याटवीतावत्तव श्रुतिपथं गता ।
पूर्वाऽपरपयोराशिवेलासंस्पर्शशालिनी ॥ ५५ ॥
यदेकदेशे कंकूलगंडभेदलितद्रुमे ।
उषितो दंडकारण्ये ससीतो रामलक्ष्मणौ ॥ ५६ ॥
यत्रागस्त्यमुनेरासीदाश्रम: शमिनां मत: ।
लोपामुद्राकराक्षिप्तजलसंवर्द्धितद्रुम: ॥ ५७ ॥
तस्योपकंठे पंपाख्यमस्ति पुण्यजलं सर: ।
सीताकरतलोल्लूनश्रवणाभरणोत्पलं ॥ ५८ ॥
तस्याऽस्ति पश्चिमे तीरे जीर्ण: शाल्मलिपादप: ।
आरोहपरिणाहाभ्यां व्याप्तव्योमदिगंतर: ॥ ५९ ॥
तस्मिन्कृतकुलायानि वीतभीतिनि दुर्गमे ।
विहङ्गमसहस्राणि निवसंति निरंतरं ॥ ६० ॥
दिवा तान्यभिनिर्गत्य प्राणयात्रामितस्तत: ।
कृत्वागत्य स्वनीडेषु सुखं रात्रिषु शेरते ॥ ६१ ॥
तत्रैव वद्धवसती अभूतां पितरौ मम ।
जातो ऽहमेकस्तनयो ययोर्वयसि पश्चिमे ॥ ६२ ॥
उद्वोढुमसमर्था सा तीव्रां प्रसववेदनां ।
तयैव पंचतां नीता जननी मे दुरात्मन: ॥ ६३ ॥
जायाविरहदग्धोपि पिता पुत्रैषणातुर: ।
शोकमुत्सृज्य मत्प्राणपोषणे यत्नमग्रहीत् ॥ ६४ ॥
न शशाक क्वचिद्गंतुमात्मन: प्राणवृत्तये ।
मां वक्षसि निधायास्ते नीडएव दिवानिशं ॥ ६५ ॥
अन्यपत्ररथानीतभुक्तोज्झितफलांबुना ।
मदाप्यायनशिष्टेन सो ऽकरोद्वृत्तिमात्मन: ॥ ६६ ॥
अतिक्रामति काले ऽथ किंचिदुद्भिन्नपक्षतौ ।
तातवक्षस्थलस्थेपि मय्युड्डुयनलालसे ॥ ६७ ॥

अकस्मादेवसंभ्रांतमृगपक्षि कुलप्लुत: ।
अभूत्कलकलस्तस्मिन्नरण्ये यमदुंदुभि: ॥ ६८ ॥
ततस्तातोरस: किंचिदुन्नमय्य शिरोधरां ।
कुतूहलवशाच्चतुर्द्दिक्षु विक्षिप्तवानहं ॥ ६९ ॥
अथाऽपश्यमसंख्यातकिरातपरिवारिते ।
वने शबरसेनान्यमायातं मृगयारसात् ॥ ७० ॥
तत: पीतमिवात्मानमुत्खातमिव शाल्मलिं ।
परिवृत्तमिवारण्यं भयेनाऽहमतर्कयं ॥ ७१ ॥
हतप्राणिसहस्रौघै: स्रवद्रुधिरचर्च्चितै: ।
मुहूर्तादिव तद्व्याधैस्तदरण्यमपूर्य्यत ॥ ७२ ॥
सेनापतिस्सनिस्त्रिंशो मृगयाजनितश्रम: ।
निषसाद तत: पंपासरसस्तीरशाड्वले ॥ ७३ ॥
क्षणं विश्रम्य पीत्वाप: प्राश्य बालमृणालिका: ।
पुलिंदै: सह सेनानीस्स जगाम यथागतं ॥ ७४ ॥
एको जरत्पुलिंदस्तु पापस्तत्र विलंबित: ।
प्रांशुर्भयंकराकार: कृतांतस्येव किंकर: ॥ ७५ ॥
अजातपिशितप्राप्तिरनुभूतवृथाश्रम: ।
यमदूतीमिव दृष्टिं स ददौ तत्र शाल्मलौ ॥ ७६ ॥
स दुरारोहतां तस्य जानन्नपि महातरो: ।
जाताऽनध्यवसायोपि यत्नमारोहणे ऽकरोत् ॥ ७७ ॥
ततो ऽहमसमत्रासविपर्यासितमानस: ।
अविशं पितुरुत्संगं तत्पक्षावृतविग्रह: ॥ ७८ ॥
सतु पापस्तमारुह्य तरुं नीडनिवासिन: ।
हत्वाहत्वा यथाशक्ति शुकान् भूमावपातयत् ॥ ७९ ॥
क्रमेण स दुराचारस्तातस्यापि शिरोधरां ।
बभंज तंच चिक्षेप क्षितौ विगतजीवितं ॥ ८० ॥
तदा मम न तच्छोको नान्यत्किंचन चेतसि ।
केवलं सहजातेन भयेनैवाऽस्मि विप्लुत: ॥ ८१ ॥
ततो ऽहं पितुरुत्संगाद्विनिर्गत्य ससाध्वसं ।
अंतरं तरुशीर्णानां पर्णानां तूर्णमाविशं ॥ ८२ ।
पाप: सोप्यवरुह्याऽथ: शाल्मलेर्मूलवर्त्तिन: ।
शुकान्गतासूनादाय व्याधाननुसरन्नगात् ॥ ८३ ॥
अहं विधिनियोगात्तु तेन दु:कृतकारिणा ।
जीर्णपर्णसवर्णत्वात्तदानीं नावधारित: ॥ ८४ ॥
ततो दूरमतिक्रांते तस्मिन्दारुणकर्म्मणि ।
संजातजीविताशं मां पिपासा पर्य्यबाधयत् ॥ ८५ ॥

Digitized by Google

अनुड्डयनसामर्थ्यात्पद्भ्यामेव यथातथा ।
पंपापुलिनपर्यंतं गंतुमैच्छं पिपासित: ॥ ८६ ॥
तथा पथि निरुत्साह: पतन्मुकुलितेक्षण: ।
तमेव पापकर्म्माणं शंकमान: पदेपदे ॥ ८७ ॥
चिरं हा ताततातेतिशोचन्कंठांतवर्त्तिभि: ।
प्राणैरायास्यमानोऽहमतिदुर्मतिनिष्ठुर: ॥ ८८ ॥
तस्मादनतिदूरेऽथ सरसस्तपसांनिधे: ।
निर्द्धूतक्लेशजालस्य जाबालेराश्रमो मुने: ॥ ८९ ॥
ततस्तस्य सुतस्तस्मिन्सरसि स्नातुमागत: ।
हारीतनामा मां तत्र तदवस्थं व्यलोकयत् ॥ ९० ॥
कष्टं केनापि पापेन पातित: शुकबालक: ।
कुलायात् क्लाम्यतीत्येव कृपया मां करेऽग्रहीत् ॥ ९१ ॥
अपाययत् पयोबिंदून्सरुताश्वासयन्मुहु: ।
कृताह्निकश्च कारुण्यादनयत्पितुराश्रमं ॥ ९२ ॥
समाश्वस्तस्य हारीततातं दृष्ट्वेव पश्यत: ।
पदं स्थिरमिव न्यस्तं हृदि मे जीविताशया ॥ ९३ ॥
नीडच्युतो ऽयमानीतो मया विहंगपोतक: ।
इति पित्रे प्रणम्याऽसौ पाणिस्थं मामदर्शयत् ॥ ९४ ॥
अथ जाबालिमद्राक्षं साक्षादिव पितामहं ।
महात्मभि: परिवृतं सानुकंपैस्तपोधनै: ॥ ९५ ॥
जटाधवलमूर्द्धानं धाम्ना प्रसरता बहि: ।
अनतिस्फुटसंलक्ष्यशरीरावयवाकृतिं ॥ ९६ ॥
स तु मां क्षणमुद्वीक्ष्य स्मयमानइवाऽवदत् ।
इदंहि भुज्यते ऽनेनफलं स्वस्यैव कर्म्मण: ॥ ९७ ॥
त्रिकालदर्शी भगवान्सहि दिव्येन चक्षुषा ।
विश्वं पश्यति पाणिस्थं करस्थामलकं यथा ॥ ९८ ॥
वचस्तदाकर्ण्य कुतूहलाकुला:
समेत्य सर्वे मुनयस्तमब्रुवन् ।
बभूव कोऽयं भगवन् भवांतरे
किमस्यवा दुश्चरितं तदुच्यतां ॥ ९९ ॥
अभ्यर्चितो मुनिभिरित्यनुबध्यमान-
स्तानब्रवीत् कुरुततावदह:क्रिया: स्वा: ।
सांध्यं विधाय विधिमस्खलितावधान-
माकर्णयिष्यथ कथां पृथुमेतदीयां ॥ १०० ॥
उक्तास्तथा भगवता मुनयो निजेन
कर्मक्रमेण दिवसं गमयांबभूवु: ।
हारीतहस्तनिहितेन मनोविनोदै-
स्तैस्तैरनीयत मयापि दिनावशेष: ॥ १०१ ॥
इति श्रीभट्टजयंतस्य सूनोरभिनंदस्य कृतौ
कादंबरीकथासारे प्रथम: सर्ग: ॥ १ ॥

यथोद्देशकार्यकालपक्षोपपादकपरिभाषेन्दु

शेखरटिप्पणम्

॥ श्रीपरमेश्वराय नम: ॥

यथा व्याख्यानतरति परिभाषा सकलशास्त्रोपकारिका तथा यथोद्देशमित्यादिपरिभाषाद्वयमपि सर्वपरिभाषाविषयकमितीतरपरिभाषानिरूपणात: पूर्वं यथोद्देशमित्यादिपरिभाषाद्वयं व्याख्यातुमुपक्रमते । तत्रेति । शास्त्रे इत्यर्थ: । एतेन प्रत्येकं सञ्ज्ञादिषु पक्षद्वयमिति भ्रममपाकरोति । गृहीतशक्येति । सञ्ज्ञाविषयमेतत् । अनेन सञ्ज्ञाशास्त्रजन्यवाक्यार्थबोधरूपशक्त्यनुभवाहितसंस्कारेणैव तत्तत्साङ्केतिकविधिशास्त्रघटकपदानुभवोद्बुद्धेनोपस्थितिशाब्दबोधयोर्निर्वाहे विधिदेशे सञ्ज्ञाशास्त्रप्रतिसन्धानस्य नोपयोगइति सूचयति । यद्येवं सञ्ज्ञाविषये कार्यकालपक्षानुत्थिति: प्रदर्शितदिशैवोपस्थित्याद्युपपत्त्या विधिप्रदेशे सञ्ज्ञाशास्त्रजन्यवाक्यार्थबोधस्यानुपयोगादिति चेन्न । अनुभवेनोपस्थित्यौपयिकसंस्कारे जननीये ऽपेक्षाधियोऽपि सहकारितया यस्य श्रोतुर्यत्सञ्ज्ञाशास्त्रजनितबोधोत्तरमुपेक्षाबुद्धिर्जायेत तत्सञ्ज्ञाशास्त्रघटकसङ्केतकपारिभाषिकपदस्य तदर्थानुभावकतायास्तत्र विधिप्रदेशेऽसम्भवेन पुनस्तत्र सञ्ज्ञाशास्त्रजन्यबोधस्यावश्यकत्वात् । इच्छापेक्षाधीसहकृते तत्तद्वाक्यार्थबोधे सति दृढतरसंस्कारस्य जननाद्वारंवारं तत्तद्बोधस्यानपेक्षितत्वेनापेक्षाधियश्च यथोद्देशपक्षबीजतोपेक्षायां कार्यकालबीजता च पर्यवस्यति । स्पष्टमन्यत् । केचित्त्विति । सकलतत्तदिति । पर्यालोचनायां यस्य यस्योपस्थितिसामग्रीतत्सकलेत्यर्थस्तद्विषयश्च च यथोद्देशपक्षइति भाव: । गुणभेदम् । गुणशास्त्रविधेयभेदम् । एकवाक्यतयैवेति । पदैकवाक्यतयेत्यर्थ: । इदमुपलक्षणमेकवाक्यार्थतायाअपि । तथा च पदोपस्थापकपरिभाषाविषये पदैकवाक्यतया ऽर्थोपस्थापकपरिभाषाविषये ऽर्थैकवाक्यार्थतयेत्यर्थ: । तत्र पदैकवाक्यता च गुणशास्त्रविधेयेन पदेन सह विधिशास्त्रीयपदानां परस्परनिरूप्यनिरूपकभावापन्नविषयताप्रयोजकत्वरूपा । अर्थैकवाक्यार्थता च गुणशास्त्रविधेयेनार्थेन सह विधिशास्त्रीयपदार्थानां परस्परनिरूप्यनिरूपकभावापन्नविष-

Digitized by Google

यताश्रयत्वरूपेति बोध्यम् । त्रिपाद्यामपीति । शास्त्रत्वावच्छिन्नोद्देश्यकासिद्धं बहिरङ्गमित्यादिपरिभाषाणां पक्षद्वयेऽपि त्रिपाद्यां नोपस्थितिः । शास्त्रत्वसम्पादिकानां तु पक्षद्वयेऽप्युपस्थितिरिति बोध्यम् । एतद्बीजन्त्वनुपदमेव स्फुटीकरिष्यामः । अधिकारशब्देनेति । अधिकारत्वं च स्वदेशे लक्ष्यसंस्कारोपयोगिविधिशास्त्रीयवाक्यार्थबोधोपकारकवाक्यार्थाननुभावकत्वे सति विधिशास्त्रीयलक्ष्यसंस्कारोपयोगिवाक्यार्थबोधप्रयोजकत्वम् । सञ्ज्ञादिष्वतिव्याप्तिवारणाय सत्यन्तम् । शेषरत्यादेर्विधिसूत्रत्वस्यापि सत्वात्स्वदेशे वाक्यार्थानुभावकत्वेऽपि तद्बोधस्य लक्ष्यसंस्कारोपयोगिविधिशास्त्रीयवाक्यार्थबोधोपकारकत्वाभावान्नाव्याप्तिः । विधिशास्त्रस्यापि स्वदेशे विध्यन्तरीयवाक्यार्थबोधोपकारकवाक्यार्थाननुभावकत्वादतिव्याप्तिवारणाय विशेष्यदलम् । परिभाषात्वन्तु पूर्वोक्तं परिष्कृतमेव । तैरेकवाक्यतेति । क्रियत इति शेषः । तेन समानकर्तृकत्वात् क्त्व उपपत्तिः । पर्युदासन्यायेनेति । नञोभेदपरतया क्ङितिनेत्यस्य विधावुपस्थितौ क्ङिद्भिन्नसार्वधातुकार्द्धधातुकयोरित्यादिक्रमेणार्थं स्वप्रयोज्यविषयतानिरूपितविषयताप्रयोजकत्वरूपपदैकवाक्यतेत्यर्थः । ननु घटो न भूतल इत्यतो भूतलभेदवद्वृत्तित्वस्य घटादावप्रतीत्या प्रथमान्तान्यसमभिव्याहृतासमस्तनञोन भेदबोधकत्वमत आह । प्रसज्येति । एकवाक्यताव्यवहार इति । उपजीव्योपजीवकभावापन्नविषयताप्रयोजकत्वरूपवाक्यैकवाक्यतेत्यर्थः । निषेधशास्त्रस्य निषेध्यशास्त्रीयपदधर्मिकार्थविशेषविषयकबोधजनकत्वप्रकारकतात्पर्यग्राहकत्वाद्विषयतानामुपजीव्योपजीवकभावो बोध्यः । सञ्ज्ञाशास्त्रस्यत्विति । तुरप्यर्थे । न पृथग्वाक्यार्थबोध इति । लक्ष्यसंस्कारोपयोगी नेत्यर्थः । यथोद्देशपक्ष एवेति । एवमन्योऽयमेकदेशविकृतन्यायस्य यथान्येन न विरुणद्धि तथा तत्रैवोपपादयिष्यते । आहुरिति ।

परे तु सञ्ज्ञापरिभाषाशास्त्राणां प्रत्येकं पक्षद्वयस्वीकारे न फलम् । किन्तु सञ्ज्ञाविषये यथोद्देशपक्ष एवाभ्युपगन्तव्यः । परिभाषाविषये तु कार्यकाल एव । अयादिभ्यः परैव प्रगृह्यसञ्ज्ञेतिभाष्यस्य परशब्द उत्कृष्टवचनोऽपवादत्वपर एव । तत्त्वं च गुणशास्त्राणां विधितुल्यत्वातिदेशात् । अनुदात्तंपदमित्येतद्विषयेऽपि कार्यकालपक्ष एव । त्रिपाद्यामप्रवृत्तिस्त्वन्तरङ्गपरिभाषावदित्याहुः ।

अष्टाध्यायीपाठकृतेति । अत्रेदं तत्त्वम् । यत्र लक्ष्यसंस्कारोपयोगिबोधाधिकरणीभूतदेशवृत्तित्वमादाय व्यवस्था संभवति तत्र तद्देशकृतपरत्वमेव तत्प्रवृत्तौ बीजम् । तेनायादिभ्यः परैव प्रगृह्यसंज्ञेति भाष्यमुपपन्नम् । यत्र च व्यवस्था न संभवति तत्र पाठकृतमेव । तेनोभयनिर्देशे इत्यस्य सङ्गतिः । यथोद्देशपक्षे सुपिचेत्यतः परत्वाद् बहुवचने झल्येदित्यस्य चेति ।

उच्छृङ्खलास्तु यथोद्देशकार्यकालपक्षयोर्नियतबीजकत्वे विधिशास्त्रादावपि तत्सम्भवेन सञ्ज्ञापरिभाषामात्रविषयकत्वमशक्यं वक्तुम् । किञ्च । यथोद्देशमित्यादेः परिभाषात्वव्यवहारप्रयोजकविषयसङ्कोचकत्वादेरभावेन परिभाषात्वमप्यशक्यं वक्तुम् । अतएव वाक्यसंस्कारपदसंस्कारपक्षादीनां परिभाषात्वादिना व्यवहारः शास्त्रकृच्छैलीपरिशीलितः क्वचिदपि नोपलभ्यते । भाष्ये तत्रतत्र यथोद्देशंकार्यकालमित्याद्युल्लेखस्तु प्रकारद्वयस्यैव सम्भवाद्वस्तुस्वरूपपरिकीर्तनपरः । किञ्च । प्रदर्शितमूलकैतत्पक्षद्वयोपन्यासस्य विशिष्य फलमप्यशक्यं वक्तुम् । तथाहि । न तावत्तस्मिन्नितीत्यादेस्त्रिपाद्यां प्रवृत्तिः कार्यकालपक्षफलम् । शास्त्रत्वसम्पादकपरिभाषाणां त्रिपाद्यां प्रवृत्तेः पक्षद्वयेऽपि सूपपादत्वात् तद्दृष्ट्या त्रिपाद्या असिद्धत्वन्तु न । त्रैपादिकविधिशास्त्राणां शास्त्रत्वसम्पादकगुणशास्त्रप्रवृत्तितः प्रागप्रामाण्यज्ञानानास्कन्दितबोधजनकत्वरूपशास्त्रत्वस्यैवासम्भवाच्छास्त्रत्वमुपजीव्यासिद्धत्वबोधकेन पूर्वत्रासिद्धमित्यनेनासिद्धत्वबोधनस्याशक्यत्वात् । पूर्वत्रासिद्धमित्यनेन च शास्त्रत्वेन रूपेणैवासिद्धत्वबोधनमावश्यकम् । अतएव रोरीत्यादावुत्वादिघटितनिर्देशसङ्गतिः । शास्त्रत्वावच्छिन्नोद्देश्यताकासिद्धं बहिरङ्गमन्तरङ्गेऽनुदात्तंपदमेकवर्जं विप्रतिषेधेपरंकार्यमित्यादयस्तु त्रिपाद्यां न प्रवर्तन्ते । एतत्प्रवृत्तितः पूर्वमेव शास्त्रत्वस्य सिद्धतया पूर्वत्रासिद्धमित्यनेनासिद्धत्वबोधनस्य दुर्निवारत्वात् । एवं यथोद्देशपक्षस्यागकृतमग्नी ३ इत्यत्र प्रगृह्यत्वसिद्धिः फलमित्यपि न । विरामोऽवसानमित्यवसानसञ्ज्ञाया वैयर्थ्यापत्त्या संस्कारकशास्त्रदृष्ट्या संस्कार्यशास्त्रस्य नासिद्धत्वमिति कल्पनात् । तेन प्रगृह्यसञ्ज्ञाशास्त्रदृष्ट्या प्लुतस्यासिद्धत्वात्स्वसंस्कार्यानुनासिकविधेरत्र सिद्धत्वादग्नी ३ इत्यादावनुनासिकत्वप्रतिबन्धः सिद्धः । विप्रतिषेधेपरं पूर्वत्रासिद्धमित्यत्र परत्वपूर्वत्वे अष्टाध्यायीपाठकृते एव । एवं स्थिते योऽत्र बहुशः प्राचीननवीनमतविवेकपरिश्रमः पदैकवाक्यतावाक्यैकवाक्यतेत्यादिविचारः स सर्वोऽपि काकदन्तपरीक्षावदुपेक्षणीय एवेति वदन्ति ।

अत्रत्यमूलस्यैव फल्गुतया तट्टिप्पणीनामतिफल्गुतया विचारानर्हत्वेऽपि विद्वज्जनमनःकुतूहलाय तत्सारासारं उत्तराङ्के विवेचयिष्यते इति शम् ।

काशीस्थराजकीयपाठशालायाम् धर्म्मशास्त्राचार्य्यो
राजारामशास्त्री साङ्ख्यशास्त्राध्यापकसहकारी
बालशास्त्री

Digitized by Google

कुमारसम्भवोत्तरखण्डोपसंहरणस्य

शेषांशः ॥

एवं तावत् पूर्वोपन्यस्ता अष्टमसर्गादिकुमारसम्भवग्रन्थस्य कालिदासकृतत्वव्यतिरेकशङ्काहेतवो निराकृता अतो विद्यारसिकाः पण्डितजनाश्चिराभ्यस्तां केवललोकप्रवादागतां तद्ग्रन्थपुरोभागितां परित्यज्य काशीविद्यासुधानिधेर्द्वितीयाद्यङ्काष्टकेन प्रकाशितं कुमारसम्भवोत्तरखण्डं परिशीलयन्तु प्रकाशयन्तुच तत्रत्यानि लेखकशोधकमुद्राक्षरयोजकादिजनानवधानमूलान्यशुद्धानि मूलपुस्तकान्तरान्वेषणप्राप्तानि तत्स्थानीयशुद्धानिच लिखित्वा श्रीमतो वाराणसीस्थराजकीयसंस्कृतपाठालयाध्यक्षस्य समीपे प्रेषयन्तु येन शुद्धाशुद्धप्रकाशनद्वारा स ग्रन्थः सतां श्रवणयोग्यः स्यात् । परित्याज्याचैषा सद्भिर्दोषैकदृष्टिः ।

॥ तदुक्तम् ॥

नचापातीव कर्तव्यं दोषदृष्टिपरं मनः ।
दोषोह्यविद्यमानोऽपि तद्दृष्टीनां प्रकाशते ॥ १ ॥

तदेवं तस्य ग्रन्थस्य कालिदासकृतत्वव्यतिरेकनिश्चये कारणाभावाद् रघुवंशरचनयासह तुलने तेनैव कविना नातिप्रौढदशापन्नेन विरचितत्वस्य सम्भावनायां भूयोधर्मदर्शनरूपकारणसत्त्वात् तयोः समानकर्तृकत्वं सम्भाव्यत इति सम्यगुक्तम् तथाहि । कुमारसम्भवे द्वितीयसर्गे देवकृतब्रह्मस्तुतौ

नमस्त्रिमूर्तये तुभ्यं प्राक् सृष्टेः केवलात्मने ।
गुणत्रयविभागाय पश्चाद् भेदमुपेयुषे ॥ ४ ॥
तिसृभिस्त्वमवस्थाभिर्महिमानमुदीरयन् ।
प्रलयस्थितिसर्गाणामेकः कारणतां गतः ॥ ६ ॥
ब्रह्मत्वे सृजते लोकान् विष्णुत्वे पालयत्यपि ।
रुद्रत्वे संहरत्येवं तिस्रोऽवस्थाः स्वयम्भुवः ॥ ७ ॥
जगद्योनिरयोनिस्त्वं जगदन्तोऽप्यनन्तकः ।
जगदादिरनादिस्त्वं जगदीशोऽप्यनीश्वरः ॥ ८ ॥
इति तेभ्यः स्तुतीः श्रुत्वा यथार्थहृदयंगमाः ।
प्रसादाभिमुखो वेधाः प्रत्युवाच दिवौकसः ॥ १७ ॥
पुराणस्य कवेस्तस्य चतुर्मुखसमीरिता ।
प्रवृत्तिरासीच्छब्दानां चरितार्था चतुष्टयी ॥ १८ ॥

रघुवंशेतु दशमे सर्गे या देवकृता विष्णोः स्तुतिः सा सम्यगेव कुमारसम्भवप्रणेतुर्बालभावं स्वप्रणेतुश्चातिप्रौढभावं स्फुटमेव दर्शयति परन्तु ये श्लोका उभयत्रार्थतः शब्दतश्च तुल्यास्तत्रातिस्पष्टं वैलक्षण्यं दृश्यतइति रघुवंशस्था उक्तश्लोकतुल्याः श्लोका उपन्यस्यन्ते ।

नमो विश्वसृजे पूर्वं विश्वं तदनु बिभ्रते ।
अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधास्थितात्मने ॥ १६ ॥
सर्वज्ञस्त्वमविज्ञातः सर्वयोनिस्त्वमात्मभूः ।
सर्वप्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक् ॥ २० ॥
इति प्रसादयामासुस्ते सुरास्तमधोक्षजम् ।
भूतार्थव्याहृतिः साहि न स्तुतिः परमेष्ठिनः ॥ ३३ ॥
पुराणस्य कवेस्तस्य वर्णस्थानसमीरिता ।
बभूव कृतसंस्कारा चरितार्थैव भारती ॥ ३६ ॥

अस्मिन् प्रकरणे यावदन्तरमुभयोः काव्ययोस्तावदेव युद्धवर्णनप्रसङ्गे तथाहि कुमारसम्भवे षोडशे सर्गे देवासुरद्वन्द्वप्रधनवर्णने ।

पत्तिः पत्तिमभीयाय रणाय रथिनं रथी ।
तुरंगस्थं तुरंगस्थो दन्तिस्थं दन्तिनि स्थितः ॥ २ ॥
न रथी रथिनं भूयः प्राहरच्छस्त्रमूर्च्छितम् ।
प्रत्याश्वसन्तं मत्वैनं नागाद् युद्धप्रलोभतः ॥ ४५ ॥
अन्योन्यं रथिनौ कौचिद्धतप्राणौ दिवं गतौ ।
एकामप्सरसं प्राप्य युयुधाते वरायुधौ ॥ ४६ ॥
मिथोऽर्धचन्द्रनिर्लूनमूर्द्धानौ रुषितौ रुषा ।
खचरौ भुवि नृत्यन्तौ स्वकबन्धावपश्यताम् ॥ ४७ ॥

रघुवंशेतु सप्तमे सर्गे ऽजस्य परेषांच द्वन्द्वयुद्धवर्णने ।

पत्तिः पदातिं रथिनं रथेश-
स्तुरंगसादी तुरगाधिरूढम् ।
यन्ता गजस्याभ्यपतद् गजस्थं
तुल्यप्रतिद्वन्द्वि बभूव युद्धम् ॥ ३७ ॥
पूर्वं प्रहर्ता न जघान भूयः
प्रतिप्रहाराक्षममश्वसादी ।
तुरंगमस्कन्धनिषक्तदेहं
प्रत्याश्वसन्तं रिपुमाचकाङ्क्ष ॥ ४७ ॥
परस्परेण क्षतयोः प्रहर्त्रो-
रुत्क्रान्तवाय्वोः समकालमेव ।
अमर्त्यभावेऽपि कयोश्चिदासी-
देकाप्सरःप्रार्थितयोर्विवादः ॥ ५३ ॥
कश्चिद् द्विषत्खड्गहृतोत्तमाङ्गः
सद्यो विमानप्रभुतामुपेत्य ।
वामाङ्गसंसक्तसुराङ्गनः स्वं
नृत्यत् कबन्धं समरे ददर्श ॥ ५१ ॥

इत्यादिरीत्याऽन्येष्वपि बहुषु स्थलेषु श्लोकानां तुलापरीक्षया कुमारसम्भवस्य सप्तदशसर्गमितस्य रघुवंशस्यचैकोनविंशतिसर्गैः प्रसिद्धस्यापि सम्प्रति धारानगरनिवासिकालिदासवंश्यानां समीपे षड्विंशतिसर्गैर्युक्ततया श्रूयमाणस्य न कर्तृभेदः

Digitized by Google

किन्तु कर्त्तुरवस्थाभेदएव बाहुल्येन सम्भाव्यत इत्यलं स्वतः सर्वविवेचनदक्षाणां सरलमतीनामपक्षपातिनां सहृदयानां विचारकाणां पुरतो वाग्विस्तरेणेति ।

॥ विट्ठलशास्त्री ॥

नतिपुरःसरमेतावद्विज्ञापनमस्माकम् ।

काशीविद्यासुधानिधौ यद्यदिङ्ग्लण्डीयभाषया लिख्यते न तत् केवलसंस्कृतभाषाध्यायिनां बोधगम्यतित्यवगम्यतएव श्रीमद्भिः ।

यदि कश्चिदभ्यर्हिततमो विषयस्तयैव लिखितोऽस्तीति लिख्यतइत्यभिप्रायस्तर्हि संस्कृतभाषामात्राध्यायिनामुपकाराय सोऽप्यनूद्य संस्कृतभाषयैव लिख्यताम् । अधुना हि इङ्गण्डीयभाषाध्यायिन एव बहुलमुपलभ्यन्ते लोकास्ते चावलोक्य तद्भाषया लिखितानि पुस्तकान्यवगच्छन्ति तं तमभ्यर्हितमपि विषयं । न शक्नुवन्ति तु संस्कृतभाषामात्रविदस्तेभ्यस्तमवगन्तुमित्यनूद्यैव लेखनं साम्प्रतमिति प्रतिभाति । प्रचरन्ति हि बहूनि संवादपत्राणि सामयिकपत्राणि चेङ्लण्डीयभाषाध्यायिनामुपकाराय काशीविद्यासुधानिधिरेष तु केवलमवलम्बनमितरेषाम् । तदत्रानवकाश एव युज्यते भाषान्तरस्येति ।

किञ्चान्यत् । ईदृशसंस्कृतरचनाबोद्धारो हि प्रायेण भाषान्तरानभिज्ञा एवास्माभिरुपलभ्यन्ते येपि तदभिज्ञास्तेषामपि न तदनुशीलनोपायदौर्लभ्यं दौर्लभ्यं पुनरन्येषामित्यावेदितमेवाधस्तात् ।

अनुमीयतेचैवं सति ग्राहकसङ्ख्यापि वृद्धिमेष्यतीति । कतिपयेहि संस्कृतभाषामात्रविदो भाषान्तरमपि लिख्यत इत्यनयैवाख्या जिघृक्षवोऽपि काशीविद्यासुधानिधिं न गृह्णन्तीत्यलमनल्पजल्पितेन ।

एषापि प्रार्थना यदन्ततः प्रत्युत्तरप्रेषणयापि कृतार्थीकर्त्तव्योऽयं जनः सोढव्यञ्च वङ्गाक्षरलेखनमिति ।

१७८८ शकाब्दे
माघस्य ५ } वशंवदग्राहकश्रीचन्द्रकान्तशर्म्मणाम्
दिने

पत्रलेखकं श्रीमच्चन्द्रकान्तशर्म्माणं प्रति सम्पादकस्योत्तरमिदम्।

काशीविद्यासुधानिधिपत्रमेतद्देशीयानां विदेशीयानाञ्च संस्कृतविद्यारसिकानाम्पाठार्थं तत्रचाङ्गल्या भाषया लिखितो भागः संस्कृतशास्त्रार्थजिज्ञासूनामप्यसम्यक्परिचितगीर्वाणभाषाणां प्रायेण यूरोपीयाणामेवाध्ययनाय तत्रापि केचनार्थाः संस्कृतादेवाविकलमवतारिताः साहित्यदर्पणादयः केचनच भारतीयशास्त्रसम्पर्किणो विचाराः । एतेषाञ्च द्विविधानां विषयाणामेकेऽपीतरसामयिकपत्राभ्यान्तरेऽवकाशं न लभेरन् साधारणपाठकानुरञ्जनासमर्थत्वात् । अनेन हेतुनाऽङ्गलभाग आवश्यकः पत्रिकाग्राहकसंख्यापोषकत्वात् । आङ्गलभाषासम्पर्कमात्रेणोपादेये संस्कृतार्थेऽप्यरुचिं कुर्वाणानामाचरणं हृदयंगमं न भवति । स्वीक्रियते तावदाङ्गलभाषाया हेयता तथापि किमितरधातुसंसर्गमात्रेण महार्घं काञ्चनं बुद्धिमता हीयत इत्यलम् ।

मि० फा० व० २ बु०

THE SÁHITYA-DARPAṆA,

OR

MIRROR OF COMPOSITION.

(Continued from page 131.)

TEXT.

No. 659. *We have* another sort in the omission of the attribute and the object compared.

COMMENTARY.

a. For example :—

"As thy fame is diffused, all the seas act the ocean of milk (kshírodíyanti)."

Here *the nominal verb 'kshírodíyanti' being explained* 'they behave themselves like the milky ocean', we have the omission of 'themselves' the thing compared, and of 'whiteness' the common attribute.

TEXT.

No. 660. When three *of the four essentials of comparison* (§648) are omitted, it (the Elliptical) is possible in a compound.

COMMENTARY.

a. As—"The stag-eyed one shines." Here the compound *'stag-eyed'* being explained—'She whose eyes are tremulous like those of a stag,' there is an omission of the word expressive of comparison, the common attribute, and the object compared to.

TEXT.

No. 661. Thus the divisions of the Simile amount to twenty seven.

COMMENTARY.

a. The sixfold Complete and the twenty-one sorts of the Elliptical, combined, make up twenty seven kinds of the Simile.

b. Among these divisions of the Simile, he now explains a peculiarity of those in which the common attribute is not omitted.

TEXT.

No. 662. The common attribute, or point of resemblance, is sometimes (generically) one and the same in both the objects of comparison and sometimes distinct. When the points of resemblance are distinct, they correspond to each other as the type and the antitype, or they may be merely verbally different.

COMMENTARY.

a. Among these *cases*, that where *the point of resemblance* is the same, has already been illustrated in the stanza beginning "Sweet like ambrosia is her underlip (§649 *b*)."

b. The case of the Type and the Antitype is instanced *in the following stanza of the Raghu-vaṅśa* :—

"He covered the earth with their (the Persians') bearded heads, severed by the lance, as with honeycombs teeming with bees."

Here *the epithet* 'bearded' is represented by 'teeming with bees,' analogously to the ornament of Exemplification (Drishṭánta §698).

c. When the difference lies merely in words, we have the following example :—

"The slender-bodied lady, as her eyes expanded upon me like a full-blown blue lotus, told me the whole of the secret purpose that lay in her heart."

Digitized by Google

Here the 'expansion' and the 'full blowing' though identical, are expressed by a difference of words, as is the case in the Typical Comparison (Prativastúpamá—§ 697).

TEXT.

No. 663. Partial Simile *(ekadeśa-vivartiní upamá)* is when the resemblance is expressed and implied.

COMMENTARY.

a. As—

"Lake-beauties, at every step, shine with blue lotuses as with eyes, with water-lilies as with faces, and with Brahmany ducks as with breasts."

Here the resemblance of the eyes &c., to the blue lotus &c., are expressed, and that of Lake-beauties, or beautiful lakes, to fair women is implied.

TEXT.

No. 664. If an object of comparison is turned, further and further, into what is compared to, it is termed the Girdle of Similes.

COMMENTARY.

a. As in the following description of Autumn:—

"The swan, in its white lustre, resembles the moon; lovely women, in their charming gait, resemble the swan; the waters, in their delightful touch, resemble lovely women; and the heavens, in their clearness, resemble the waters."

TEXT.

No. 665. The Garland, or String of Similes is, when we have several comparisons of the same object.

COMMENTARY.

a. For example:—

"As a lake with the lotus *is pleasant;* as night *is delightful* with the moon; as a fair woman, *ornamented* with youth, *is charming;* so Fortune attended with Virtue ravishes the heart."

b. In the present figure, we sometimes find both the objects of comparison connected with the subject-matter *as in the succeeding stanza:*

"On the arrival of Autumn, the swan shines *bright* like the Moon, the waters are *as clear* as the heavens, and the stars *glitter* pure like the water-lilies."

c. "Princely treasures, by princes presented, shine in the house of this monarch, as (those) born of the Celestial Tree, in Indra's palace."

Here we have a case of the Simile of Intimation *(ákshepopamá),* since by the 'treasures,' which are the object of comparison, are intimated the treasures compared to,—through the expression 'as (those) born of the Celestial Tree.' In this very example, since the sense of 'in the house' is repeated by 'in (Indra's) palace,' we have also the Simile of Repetition. These and such others have not been *regularly* defined *here,* for a thousand such varieties might be made out.

TEXT.

No. 666. When the same object is in the predicament of what is compared and what is compared to, *that is to say when a thing is compared to itself,* it is Comparison Absolute.

COMMENTARY.

a. The comparison, as we gather from the context, *is to be expressed* by a single sentence.

For example:—

"When Autumn had begun to manifest itself, the lotus *blushed* like the lotus, the waters *shone* like themselves, and *now* resembling *none but* herself, beamed forth the unslumbering Moon."

Here the self-comparison of the lotus &c., is figuratively intended to intimate that they have not their like. The province of this *ornament* is distinct from the Láṭánuprása (§638), since, *without repeating the word expressive of the object of self-comparison, we might read the above stanza*—'rájívamiva páthojam' &c. (the lotus is like the water-born). The employment, however, of the same word is better, as being suitable *for letting one readily understand the indentity of the object.* As has been said:

'In the Comparison Absolute, a sameness of terms used from its expediency, is only accidental, whilst in the *Láṭánuprása* it is essentially necessary.'

TEXT.

No. 667. This when alternated between two things is held Reciprocal Comparison.*

COMMENTARY.

a. 'This' i. e. 'the predicament of what is compared and what is compared to,'—*supplied from the foregoing text.*

b. This interchange of comparisons must of course *be expressed* by a couple of sentences.

c. This is an example:—

"Ever, *O king,* shines thy intellect like thy fortune and thy fortune like thy intellect, thy beauty like thy frame and thy frame like thy beauty, thy firmness like the earth thou rulest, and this *again* like thy firmness *itself.*"

Here what is purported is that there is nothing ELSE equal to the prosperity &c., of the king.

TEXT.

No. 668. A recollection of an object, *arising* from the perception of *something* like *to it,* is termed Reminiscence.

* The commentator adds, as a condition, the sameness of the point of resemblance in each of the two comparisons involved in this figure. The following, for instance, is no example of it:—

पल्लवमिवारुणं करतलं करतलमिव पल्लवम् ।

Digitized by Google

COMMENTARY.

a. As:—

"Seeing this lotus beautiful with the sporting wagtail, I recollect that fair face of her with the tremulous eyes."

b. This is not the ornament in the stanza beginning 'O how well I recollect that ever-smiling face of the lotus-eyed one' (§190. *a.*) the recollection, here, being raised without the cognizance of resemblance.

c. Rághavánanda, the great minister, however, would have the figure of Reminiscence, even where the recollection *arises* from dissimilarity or contrast. Here follows his own example of the same:—

"Whenever Sítá, tender like the śirísha *flower*, on the mountains experienced hundreds of hardships, Ráma shedding tears, called to mind the unnumbered felicities she enjoyed at home."

TEXT.

No. 669. The Metaphor consists in the superimposition of a fancied character upon an object unconcealed or uncovered *by negation.*

COMMENTARY.

a. By *the qualification* 'fancied,' *the present ornament* is distinguished from the figure of Commutation (see §679). This point we will discuss when we come to speak of that ornament.—"Unconcealed" this is for distinguishing it from the ornament of Concealment (see §683 and 684).

TEXT.

No. 670. This is threefold, according as it is Consequential, Entire, or Deficient.

COMMENTARY.

a. 'This' i. e. the Metaphor.

b. Of these divisions.

TEXT.

No. 671.—The Consequential is when a superimposition, undetermined *by a resemblance,* is the cause of another, and (1) rests or (2) does not rest upon a Paronomasia. It is fourfold as each *of the two cases* occurs singly or serially.

COMMENTARY.

a. Of these the Single Consequential resting upon a Paronomasia, as:—

"Blessing to thy arm, great monarch Nrisinha, mighty controller of the world—arm that, in war, is the Monster of Darkness (Ráhu*) to that full moon—the entire assemblage of princes *hostile to thee (Rája†-mandala).*"

Here the superimposition, *viz.* that of the nature of the lunar orb upon the assemblage of princes, by the paronomastic expression *rája †-mandala,* is the occasion of ascribing the character of Ráhu to the arm of the king.

b. The Serial *Consequential resting upon a Paronomasia,* as:—

"Unique thou art, O king, upon the earth—the Lord of day in causing the expansion of the lotus (with which by means of the pun* is identified 'the acquirement of fortune')—the God of wind in constantly stirring (in being the resort of the good)—the thunder-bolt of Indra *in cleaving* the mountains (the *hostile* princes)."

Here the acquirement of fortune is intended to be understood in identity with the blooming of the lotus, the attendance of the good with perpetual stirring, the princes with the mountains. Thus this series of fancied superimpositions or attributions of characters are the occasion of the ascribing of the nature of the sun &c., to the king.

c. The Single *Consequential* not resting upon a Paronomasia; as:—

"May the four cloud-dark hands of Hari, rough by the stroke of the string of his horny bow, preserve you, —hands that are the pillars to the Dome of the Triple World!"

Here the attribution of the character of a dome to the triple universe is the occasion of ascribing the nature of a pillar to the hands of Vishnu.

d. The Serial; as:—

"That white umbrella of the royal Deity of Love, or the ornamental mark of sandal in fair Firmament's *forehead,* or the white lotus of the Celestial lake,—the orb of the Moon—shines bright like a large lump of camphor."

Here the ascribing of royalty &c., to Cupid &c., is the occasion of superimposing the character or nature of an umbrella &c., upon the lunar orb.

e. With respect to these *four examples of the Consequential Metaphor,* it is the opinion of some (—the reverse of mine—) that the speaking of the arm of the king, &c., under the character of Ráhu, &c., is the occasion of investing the assemblage of princes, &c., with the nature of the lunar orb, &c.

TEXT.

No. 672. If a principal object is metaphorically figured or represented, together with those subordinate, it is Entire Metaphor (see §670), and either (1) dwells in all of the objects or (2) resides in a part.

COMMENTARY.

a. Of these *two sorts*:—

* The demon of the ascending node that, by endeavouring to devour the sun and moon, causes their eclipse.

† This word means both a king and the moon.

* 'Padmodaya' being separable both into *padma-udaya* and *padmá-udaya* and *padma* meaning 'lotus' and *padmá,* fortune.' So for the other puns.

Digitized by Google

TEXT.

No. 673 The First is held to be when all the *constituent* metaphors* *are expressed.*

COMMENTARY.

a. 'The First'—i. e. what dwells in all of the objects. For example :—

"That *benign* dark cloud—Krishṇa disappeared, having thus rained the nectarine water of his words upon the deities—the corn withered by the drought of Rávaṇa's *destructive tyranny.*"

Here the nature of a cloud being attributed to Krishṇa, his words &c., are represented under the metaphor of nectarine water &c.

TEXT.

No. 674. It (see §672) is said to 'reside in a part' when any is understood.

COMMENTARY.

a. 'Any'—i. e. any of the *constituent* metaphors, —The following is an example :—

"What clusters of bees—eyes of people—would not drink of that blooming face of her richly filled with beauty's honey."

Here the attribution of *the nature of* honey &c. to beauty &c. is expressed and that of the nature of a lotus to the face is implied. The present is no case of the Partial Simile† (see § 663), as the attribute of bloomingness chiefly or literally resides in a lotus the nature of which is superimposed *upon the face,* whilst to the latter it belongs only metaphorically.

TEXT.

No. 675. If *a principal object* (see §672) is ALONE figured it is Deficient Metaphor, which too is twofold, being (1) Serial or (2) Single.

COMMENTARY.

a. Of these *two species,* the Deficient Metaphor Serial is instanced thus :—

"She of the lotus eyes is the very skill of the Divine Maker in creating, the Moon-shine to the world's eyes, the pleasure-house of the incorporeal one (Káma)"!

b. The Single, as :—

"When a servant commits offence, the master's kicking *him* is but proper, so it is not for that I grieve, my fair lady, but that thy tender foot is pricked by the points of those thorns, the hard shoots of my hairs that stand erect *at the thrilling touch,* this is my *sore* distress."

TEXT.

No. 676. Thus of the Metaphor there are eight kinds.

* In the original 'áropya' (what is to be superimposed.)

† '*Lávaṇya-madhu*' (beauty-honey) and the other compound might be interpreted as instances of the Elliptical Simile as '*mukhábja*' (lotus-face' under §657, but the epithet 'blooming' decides the character of the present stanza as an example of metaphor.

COMMENTARY.

a. Conclude *the text by the words*—'spoken of by the ancients.'

b. Sometimes the Consequential Metaphor (§671) too dwells in a part ; as:—

"That Guard *(sauvidalla)* of Earth—the sword of that Indra of men, triumphs in war."

Here the implied attribution of the nature of a queen to the earth is the occasion of ascribing the nature of a guard to the sword. An instance of this sort occurring serially also like the former sorts is to be searched out by the reader for himself.

TEXT.

No. 677. We sometimes see even in the Entire Metaphor that the images are founded upon a Paronomasia.

COMMENTARY.

a. Of *the new* sorts *thus obtained* I shall exemplify that dwelling in a part (§674) resting on a Paronomasia, by *the following stanza of* mine :—

"Lo the Nectar-beamed *moon* having laid his hands (or rays—*kara*) on the breast of the Eastern Mountain from which the vesture of thick darkness has fallen off, kisses the face *(mukha)* of Indra's Quarter with sparkling lily-eyes."

b. 'That dwelling in all the objects' (§673) would be exemplified by reading in this very *stanza* '*chuchumbe haridabalá-mukhamindu-náyakena*' instead of '*vichumbati,* &c., *or by our adding in the English the words* '*the lover*' *and* '*that lady*' *before* '*the Nectar-beamed Moon*' *and* '*Indra's Quarter*' *respectively.*

c. The present is not a case of the Paronomastic Consequential (§671), for in that figure e. g. '*Bhúbhriddávali-dambholi*' (the thunder-bolt to the mountains—the princes) without speaking of the princes under the *punning* figure of mountains, the representation of the monarch in question under the character of the thunder-bolt would be, from the absence of resemblance, altogether absurd. 'How then would you admit the Consequential in such an expression as *Padmodaya-dinádhísa* when a comparision between the king and the sun is possible, founded upon *the common attribute of* glory.?'—Say not so, for the resemblance of the king to the sun as arising from glory is indeed manifest but not intended in the example, *padmodaya* (or the Paronomastic identity of the acquirement of fortune and the bloming of the lotus,) being what is meant as the common attribute of the two. Whilst here in the example under the text the proportionate similarity of the mountain, for instance, to the *female* breast, in bulkiness and height, being clearly evident, it is no case of the Paronomastic Consequential.

Digitized by Google

d. Sometimes the Metaphor is found WITHOUT A COMPOUND. For instace "Thy face, O deer-eyed, is lotus, not otherwise."

e. Sometimes it is used WITHOUT AN APPOSITION; as, "The Creator formed here a line of bees under (the shape of) the eye-brow (bhrú-latayá)."

f. Sometimes, UNDER A NEGATION OF THE ATTRIBUTE FIGURED; as:—

"They who *inspired* with foolish hopes, have served the princes of this Iron Age—the sandy desert for the water of goodness, the aërial wall for the *ornamental* pictures of noble deeds, the fourteenth night of the dark fortnight for the moon-shine of merit, the very elegance of the dog's tail in respect of rectitude,—for these *hard but vain toilers,* how much ability would there be required to serve the God of the trident (Śiva) who is to be obtained by faith alone.?"

g. The stanza is mine.—Among the metaphors exemplified *under the foregoing texts,* though some are founded upon a Paronomasia of words, they are counted as ornaments of sense, as being species of the Metaphor. Thus is it to be understood with respect to ornaments to be spoken of.

(To be continued.)

THE PANDITS AND THEIR MANNER OF TEACHING.
BY DR. BALLANTYNE.

[From the Benares Magazine, October, 1849.]

The fourth act opens with Duryodhana's being brought in by his charioteer, wounded: Duhsásana has been killed and the army of the Kauravas put to the rout. On his recovery, the charioteer announces Duhsásana's death, and Duryodhana gives vent to his sorrows. He is joined by Sundaraka, a follower of Kerna, who gives in Prákrit a long and tedious account of the conflict between Arjuna and Vrishasena, the son of Kerna, the death of the young prince, and his father's distress; he also brings a leaf on which Kerna has written to Duryodhana, with an arrow dipped in his own blood, a message for aid. Duryodhana orders his chariot, and prepares to seek the fight again, when he is prevented, by the arrival of his parents, Dhritaráshtra and Gándhári, who with Sanjaya commence the fifth act.

The old couple and Sanjaya endeavour to prevail upon Duryodhana to sue for peace, but he refuses.

My fall has Partha vowed, when he has left
Me brotherless; and all his brethren slain,
How shall Duryodhana endure to live?
Nor will I hear of peace until my mace
Shall crush and scatter to the winds that foe,
Remorseless Bhíma, whose ferocious wrath
Drank my young brother's, brave Duhsásan's, blood.

Digitized by Google

A tumult behind, and the entrance of the king's charioteer, announce the death of Kerna. Duryodhana, after expressing his grief, determines to go and avenge him, and mounts the car of Sanjaya for that purpose, when Arjuna and Bhíma arrive in search of him. On finding the seniors there, Arjuna purposes to withdraw; but Bhíma insists on first addressing them, which they do, but in insulting terms.

Arj. Parents, the middle Pándava salutes you,
Who in the battle's front has, victor, slain
The son of Rádhá, he whose pride beheld
The world as grass, and by whose vaunted prowess
Your children hoped to triumph o'er their foes.
Bhim. Bhíma in reverence bows his head to you:
He, who has overthrown the sons of Kuru,
He who inebriate, has like nectar quaffed
The blood of vile Duhsásana, and soon
Shall lay the proud Duryodhana in dust.

Dhritaráshtra reproaching them for this language, is told they use it not in pride, but in requital of his having witnessed, without interfering to prevent, the oppression and barbarous treatment the Pándavas experienced from his sons. Duryodhana interferes and defies Bhíma, who is equally anxious for the combat; but Arjuna prevents it, and the brothers are called off by a summons from Yudhishthira, who orders the battle to cease for the day and the dead bodies of either party to be burnt. Aswatthámá then enters and is disposed to be reconciled to Duryodhana: but the prince receives his advances coldly, and he withdraws in disgust. Dhritaráshtra sends Sanjaya after him to persuade him to overlook Duryodhana's conduct. Duryodhana mounts his car, and the aged couple seek the tent of Salya, king of Madrá.

In the sixth act Panchála brings to Yudishthira and Draupadí an account of Duryodhana's having been discovered concealed in a swamp, and compelled to fight with Bhimasena, by whom he will be slain. Yudishthira orders public rejoicings on the occasion. Chárváka, a Rákshasa disguised as a Muni, then enters, requiring rest and water. He tells them that he has seen Arjuna engaged with Duryodhana, Bhíma having been previously slain by the latter, and Krishna forcibly taken away by Ráma, and gives them to understand that Arjuna also has fallen. Draupadí determines to mount the funeral pile, and Yudishthira to put an end to himself, when the Rákshasa, satisfied with the success of his scheme, which was intended to prevail on this couple to perish, departs. The pile is prepared, and Yudhishthira and Draupadí are about to sacrifice themselves, when they are disturbed by a great clamour. Supposing it to precede the approach of Duryodhana, Yudishthira calls for his arms, when Bhíma, his club smeared with blood, rushes in. Draupadí runs away; he catches her by the hair, and is seized by Yudhisthira—on which the mistake is discovered. The episode is very absurd and impertinent.

The braid of Draupadí's hair is now again bound up. Arjuna and Vásudeva arrive, and announce that they have heard of the fraud of the Chárváka, and Yudhishthira adds that the mendicant has been slain by Nakula, on which Krishna expresses great satisfation. The author has introduced the Chárváka, apparently, merely to have a hit at the atheistical sect, possibly intending the Bauddhas.

There is much good writing in this piece, although the style is rather powerful than polished: there is also poetry in the thoughts, but it is the poetry rather of passion than fancy, and the pathos and horror in which it delights are relieved by no brilliancy of illustration: both too are overdone, and the pathos becomes tiresome and the horror disgusting. The chief merit of the drama is individuality of character; the ferocity of Bhíma, the pride of Kerna, the fiery but kindly temperament of Aswatthámá, and the selfish arrogance of Duryodhana, are well delineated. The chief defect of the play is its undramatic construction. The business is clumsily contrived; the situations are ineffective or ludicrous; the scenes are awkwardly put together, and much too considerable a portion of the piece is thrown into narrative for the interest to be successfully supported. With exception of the last defect, the Veni Samhára is calculated to remind us very forcibly of the early attempts of the French and English dramatists.

There is nothing in the play to furnish a clue to its date. It is frequently cited in the Kávya Prakás, the Dasa Rúpaka, and Sáhitya Derpana, to which works it is consequently anterior. According to tradition, the author, Bhatta Náráyana, was one of the Kanouj Brahmans invited into Bengal by Adi Sura, from whom the Brahmans of that province are descended: he was of the Sándilya family. Adi Sura is supposed to have reigned three centuries before our era: but if we may place any dependance on Abulfazl's list of Bengal kings, he was the twenty-second prince in ascent from Belál Sen, who it is well known reigned in the thirteenth century. Assigning then the moderate duration of about three hundred years to these intermediate princes, and admitting the tradition with respect to Bhatta Náráyana, the Vení Samhára might have been written about the eighth or ninth century: a period not at all incompatible with the comparative harshness of its style and the rudeness of its execution, particularly if we conclude, agreeably to the tradition, that it was amongst the early results of the introduction of Brahminical literature into Bengal. there are considerable varieties in the manuscripts of this drama, and the name is also differently given as the *Veni Samvarana* or *Veni Samhára*: the import is the same, "The Binding of the Braid." There is a commentary on the drama, by *Jagaddhara*, entitled *Mahopádhyá*, implying a teacher; and *Dharmádhikárika*, which mey be merely an honoric epithet, although it should signify a judge or administrator of the law.

PRINTED AND PUBLISHED BY E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 11. Benares April 1st, 1867. Vol. I.

॥ प्रमाणपारायणे ॥

॥ उपमानपरिच्छेदः ॥

सादृश्यदर्शनोत्थं ज्ञानं सादृश्यविषयकमुपमानं । दृष्टगोः पुरुषस्य गवयं तत्सदृशं पश्यतो यद्गोविषयकं गवयसदृशज्ञानं तदुपमानं । किंपुनरिदं सादृश्यं । नेदं द्रव्यगुणकर्मसामान्यसमवायविशेषाणामन्यतमं । एष्वपाठात् । उच्यते विषयोस्य वित्तिसिद्धो ऽन्यो द्रव्यादिभावेभ्यः । सर्ववस्तूनि संविदेकशरणानि । अस्तिचेयं सदृशइति संवित् । साच सर्वैव विषयाव्यभिचारिणीति दर्शितं नयवीथ्यां । अतः संवित्स्वभावसिद्धं सादृश्यं न पाठाभावादपह्नवमर्हति । तच्च न द्रव्यं गुणकर्मणोरप्याश्रितत्वात् । गंधादयोपिहि सदृशबोधगोचरीभवन्ति भवन्तिच कर्माण्यपि कर्मान्तरसदृशबुद्धिबोध्यानि । अतएव न गुणत्वं नापि कर्मत्वं । अनुवृत्तप्रत्ययनिमित्तत्वाभावाच्च न सामान्यं । समवायस्तु सम्बन्धरूपइति न तत्र सादृश्यान्तर्भावः। विशेषाख्यंतु पदार्थं प्रमाणविदो नानुमन्यन्ते। सहि पृथक्त्वादतिरिक्तो नानुमातुं शक्यते । पृथक्त्वंहि परमाणूनां द्रव्यारम्भलक्षणकार्यावसेयं । तदतिरेकिणितु विशेषे न किञ्चिदनुमानं । नच परमाणुपृथक्त्वमेव लिङ्गं । नित्यत्वात् । कार्यंहि स्यात्कारणस्य लिङ्गं । नच परमाण्वाश्रितं पृथक्त्वं कार्यमिति प्रमेयपारायणे निर्णीतं । अतः पदार्थान्तरमेवेदं शक्तिवत्संख्यावच्चेति प्रमेयपारायणएवोक्तं । तच्च सादृश्यं प्रत्यक्षद्रव्यवर्त्ति प्रत्यक्षग्रहणावयवगुणकर्मसामान्यग्रहणनिबन्धनं प्रत्यक्षं अन्यत्र सामान्यान्तबाहुल्यानुमेयं ।

तदिदमुपमानं न प्रत्यक्षं तिरोहिते गवि चक्षुःसन्निकर्षातिवर्त्तिनि जायमानत्वात् । नच स्मृतिः । गोदर्शनसमये ऽप्रतीतगवयस्य तत्सादृश्यानुभवाभावात् । नानुमानं । लिङ्गाभावात् । एकदेशोहि लिङ्गं । नचगोर्गवयस्तद्गतंवा गोसादृश्यमेकदेशः । ज्ञातसम्बन्धनियमश्च हेतुः । न गोगतेन सादृश्येनसह कश्चिदपि गवयवर्त्तिनः सादृश्यस्य सम्बन्धो ऽस्तीति कुतस्तरां तस्य नियमावगमः । नचापि परस्परसदृशवस्त्वन्तरदर्शनसापेक्षेयं प्रतीतिर्यतः सम्बन्धनियमज्ञानबलभाविनीत्युच्यते । प्रथममप्येकं वस्त्वीदृशमीक्षमाणस्य परस्मिन्वस्तुनि सादृश्यमतिराविर्भवति । नन्ववयवसामान्यबाहुल्यादनुमानं सम्भवत्येव । गवयंहि गवावयवसामान्यबाहुल्यभाजं प्रतीत्यैवावधारणा जायते । यो यदवयवसामान्यबाहुल्यवान्स तत्सदृशइति । तेन गां गवयावयवसामान्यबाहुल्ययोगिनं स्मरतो गवयसादृश्यविषयमनुमानमुपपन्नमेव । तथाहि गवयवर्त्तिना गोसादृश्येनसहावयववर्त्तिनां सामान्यानामेकार्थसमवेतसमवायलक्षणः सम्बन्धोस्ति । गवयेहि सादृश्यं समवेतं तस्मिन्नेवावयवास्तदीयाः समवेतास्तेषु तत्सामान्यानि समवेतानीत्युपपन्न एकार्थसमवेतसमवायलक्षणः सम्बन्धः । तन्नियमोपिचास्त्येव सामान्यबाहुल्यस्य । गोधर्मतापि तस्योपपन्ना । समवेतसमवायलक्षणसम्बन्धयोगित्वात् । अतो घटतएवानुमानसामग्रीत्युपमानमनुमानान्न भिद्यते । उच्यते । सम्बन्धनियमस्मरणमनुमानोदयकारणं । नपुनः सम्बन्धनियमावधारणमेव । अत्रचावयवसामान्यभाजो गवयस्य सदृशताप्रतीयमानस्यैवोपमानहेतुत्वमिति कारणभेदादुपमानमनुमानाद्भिन्नं । प्रत्यक्षवत् ।

Digitized by Google

अत्रच सादृश्यदर्शनोत्थमित्यनेनैन्द्रियकस्य सदृशज्ञानस्योपमानता निराकृता । सादृश्यविषयकं ज्ञानमिति किं निराकृतं । उच्यते । गोसदृशो गवयइति पुरुषवचनाद्गोसादृश्यं गवयस्य प्रतीत्य यत्तदवयवसामान्यबाहुल्यज्ञानं गवये जायते नत्वोपमानमित्युक्तं । यत्तु सदृशदर्शनमात्रेण कस्मिंश्चिदर्थे तत्सदृशस्वरूपमात्रे स्मरणं तस्योपमानत्वमेव न प्रसक्तं । प्रमाणलक्षणाधिकारात् । स्वरूपस्मरणंहि न प्रमाणं । प्रमाणविशेषस्यचेदं लक्षणमाख्यायते । तेन तन्निवृत्त्यर्थं सादृश्यविषयग्रहणमयुक्तं । एतेनैवासदृशात्तत्सदृशभ्रान्तिविषयात्तत्सदृशविषयज्ञानं तदप्युपमानं नाशङ्कनीयमेवाप्रमाणत्वादित्युक्तं ।

यत्तु प्रसिद्धार्थस्य साधर्म्यादप्रसिद्धार्थसाधर्म्यमुपमानमित्युक्तं तदयुक्तं । तथाहि । यादृशो गौस्तादृशो गवयइति श्रुतातिदेशवाक्यस्य वने गवयमुपलभमानस्यायं गवयइति प्रतीतिरुपमानफलमुच्यते । तत्रतावद्गोसदृशो गवयइति प्रथमावगतिः पुरुषवाक्यमात्रप्रभवा नोपमानं भवति । यदपि वनगतस्य गवये तद्गतेच गोसादृश्ये ज्ञानं तदपि प्रत्यभिज्ञाप्रत्यक्षं । यात्वेतस्य गवयशब्दवाच्यतावगतिः सापि गवयशब्दप्रयोगादानुमानिकी । यस्य शब्दस्य यत्र प्रयोगस्तस्य तद्वाच्यतया सम्बन्धनियमो ऽवगतः । वनेच सञ्ज्ञिनमुपलभ्यैतस्यैव सा मया सञ्ज्ञावगतेति तज्ज्ञानं स्मरणमेवेति नोपमानस्यावकाशः । तस्माद्यथोक्तलक्षणमेवोपमानमिति स्थितं ॥ :: ॥

इति महामहोपाध्यायश्रीशालिकनाथकृतौ प्रमाणपारायणे चतुर्थः परिच्छेदः समाप्तः ॥ :: ॥ :: ॥

॥ प्रमाणपारायणे ॥

॥ अर्थापत्तिपरिच्छेदः ॥

विनाकल्पनया ऽर्थेन दृष्टेनानुपपन्नताम् ।
नयता दृष्टमर्थं या सा ऽर्थापत्तिस्तु कल्पना ॥ १ ॥

दृष्टेनार्थेन दृष्टस्यार्थस्यार्थान्तरकल्पनायामसत्यामनुपपत्तिमापादयता या ऽर्थान्तरकल्पना सा ऽर्थापत्तिः । यथा जीवतो देवदत्तस्य गृहादर्शनेन बहिर्भावस्यादृष्टस्य कल्पना ।

नन्वेतद्गृहाभावदर्शनाज्जीवतो बहिर्भावकल्पनमनुमानमेव । तथाहि । यो जीवन्नेकत्र नास्ति सो ऽन्यत्रास्तीति स्वात्मन्येव प्रतीतं तेन प्रतीतसम्बन्धनियमादेकत्राविद्यमानत्वादन्यत्रविद्यमानत्वावगमो ऽनुमानमेव युक्तं । तथाहि । जीवत एकत्राभावान्यत्राभावावेककालत्वलक्षणसम्बन्धयोगिनौ समुद्रवृद्धिचन्द्रोदयवदेकदेशभूतौच कालस्येति । यदा जीवन्नेव देवदत्तो गृहे नास्ति तदा बहिरस्तीत्यनुमानं भवति । तथैकत्राभावेसति विद्यमानत्वाद्योयो गृहाभावेसति विद्यमानः सस ततो ऽन्यत्रास्ति यथाहमेवेति प्रमातुरनुमानमुत्पद्यते ।

अत्रोच्यते । नतावद्विद्यमानत्वं लिङ्गं सम्भवति । स्वयं सन्देहास्पदीभूतत्वात् । विद्यमानताहि देवदत्तस्य गृहाधिकरणैव येननाम प्रतीता तस्य बहिर्देशसम्बन्धे ऽप्रत्याकलिते गृहाभावदर्शनेन देवदत्तस्य विद्यमानता प्रमाणान्तरप्रतीतापि सन्देहमावहति । गृहे देवदत्तो ऽविद्यमानः कथं विद्यमानइति । प्रतीतेपिहि वस्तुनि पूर्वाप्रतीतरूपान्तरावगमः संशयमापादयितुमलमेव । देवदत्तस्यच विद्यमानता गृहसम्बद्धैवावगतेति तदभावप्रतीतौ बहिर्देशसम्बन्धेचानवगते सन्दिह्यते । तेन सा सन्देहग्रस्तासती न लिङ्गतां गन्तुमलं । बहिर्देशसंयोगावगमादपगतसन्देहा भविष्यति लिङ्गमितिचेत् । न । अनुमेयाभावात् । बहिर्देशसम्बन्धएवहि देवदत्तादेरनुमित्सितः सचेत्प्रतिपन्नो न मेयमवशिष्यते ।

तदाहुर्वार्त्तिककारमिश्राः ।

तेन मेयानपेक्षस्य सन्दिग्धत्वादहेतुता ।
हेतुत्वं यावतित्वस्ति ततो नान्यत्प्रमीयते ॥

तेन सन्देहास्पदीभूता विद्यमानतातावदवगत्यन्तरप्रसवसमर्था न भवति । नच गृहाभावो बहिर्देशसम्बन्धावगमे लिङ्गमित्युपपन्नं । तस्यहि न केवलस्य लिङ्गत्वमभ्युपगमनीयं किन्तु जीवनविशिष्टस्य । शुद्धस्य गृहाभावमात्रस्य मृतेषु जनिष्यमाणेषुच विनापिबहिर्भावमुपपत्तेः तदुक्तं ।

गेहाभावस्तु यः शुद्धो विद्यमानत्ववर्ज्जितः ।
स मृतेष्वपि दृष्टत्वाद्बहिर्वृत्तेर्न साधकइति ॥

जीवनंच विशेषणभूतं सन्दिग्धमिति न तद्विशिष्टस्य लिङ्गत्वं । तस्मात्केवलस्याभावस्यैव स्वयंनिः सन्दिग्धस्य गमकत्वं युक्तं । नच तस्य सन्देहापत्तौ किञ्चन प्रमाणमस्ति । ननु तस्य केवलस्य गमकत्वे मृतस्य जनिष्यमाणस्यच बहिर्देशसम्बन्धावगतिः प्रसज्येत । उच्यते । अर्थान्तरकल्पनायामनुत्पन्नायां यः ससंशयं कञ्चिदनुमापयितुमलं तस्य गमकत्वं । तथाहि बहिर्देशकल्पनायामजातायां गृहाभावो देवदत्तस्य विद्यमानतां संशयमापादयन्बहिर्देशसम्बन्धस्य गमकः । मृतजनिष्यमाणयोश्चाभावो न कञ्चिदपि संशयमापादयतीति न गमकः । अतो नातिप्रसङ्गः । तदेवचात्र गम्यं यत्कल्पनायामसत्यां सन्देहापत्तिः कल्पनायांच तद्विगमः । माचैवंसत्यप्यभावस्य गमकत्वेनानुमानत्वं । ज्ञानोदयप्रकारभेदात् । सम्बन्धनियमस्मरणोपकृतादेकदेशदर्शनाज्ज्ञानमनुमानं । गृहाभावस्तु बहिर्देशसम्बन्धकल्पनायामनुत्पन्नायां सत्यां विद्यमानतायां संशयमापाद्य संशयसंशमाय बहिर्देशसम्बन्धं कल्पयतीति ना-

Digitized by Google

नुमानत्वसम्भवः । धूमादिकंतु लिङ्गं न कस्यचित्संशयमापाद्याग्निं गमयतीति नार्थापत्तिसम्भवः ।

श्लोकौ च भवतः ।

तत्सन्देहव्युदासाय कल्पना या प्रवर्त्तते ।
सन्देहापादकादर्थादर्थापत्तिरसौ स्मृता ॥
यत्कल्पनां विना योर्थः प्रतीतोप्येति संशयं ।
तेन तत्कल्पनामेकेत्वर्थापत्तिं प्रचक्षते ॥

यस्मिन्नकल्पिते योर्थः प्रमितोपि दृष्टरूपान्तराभावेन संशयरूपामनुपपत्तिं भजते सोर्थः स्वगतसंदेहव्युदासाय तस्यार्थान्तरस्य कल्पनां प्रसूते साचार्थापत्तिः । प्रमाणप्रतीतश्चार्थो दृष्टरूपार्थान्तराभावेन संशयमापन्नएवार्थापत्तेर्जनकइति दर्शनबलादाश्रीयते यथाह्यनुमानस्य निश्चितं लिङ्गं जनकं तथा ऽर्थापत्तेः सन्देहयस्तमिति नास्ति विरोधः । अतएवचानुमानादपि भेदः । निश्चितएव धूमोग्नेर्गमको न तस्य किञ्चिदर्थान्तरमनुपपत्त्यापादकमस्ति गृहाभावस्तु विद्यमानताया अनुपपत्तिमातनोति । तेन गृहाभावेन विद्यमानतैव बहिर्देशसम्बन्धकल्पनायामभूतायामनुपपत्तिमापादिता स्वात्मनो बहिर्देशसम्बन्धं कल्पयतीति भिन्ना ऽनुमानादर्थापत्तिः । तदेवं गृहाभावो बहिर्भावकल्पनया विद्यमानताया अनुपपत्तिमापादयन्बहिर्भावं कल्पयति । अथवा विद्यमानतैव गृहाभावेनानुपपत्तिमापादिता स्वोपपत्तये बहिर्देशसम्बन्धमुपकल्पयतीति । यस्तु मन्यते । गृहाभावएवान्यथानुपपद्यमानो गमकइति ।

तदयुक्तं । तथाहि का गृहाभावस्यान्यथानुपपद्यमानता । यदितावद्बहिर्देशसम्बन्धेनविना नास्तिता । जीवतो गृहाभावो बहिर्देशसम्बन्धेनविना नास्तीति । यद्येवं साध्याभावेन हेतुभावव्यतिरेकलक्षणो ऽयं । सच हेतुभावस्य साध्यभावनियतसम्बन्धित्वेन सम्पद्यते नान्यथा । नह्यनन्तेषु साध्याभाववत्सु विपक्षेषु हेत्वभावनियमो ऽन्यथा ऽवधारयितुं शक्यते यावद्धेतुभावस्य साध्यभावेन सम्बन्धनियमो नावधार्यते । अवधारितेहि तस्मिन्नर्थापत्त्या साध्याभावे हेत्वभावनियमो ऽवसीयते । द्वेहि कोटी । हेतुभावो हेत्वभावश्चेति । तत्र हेतुभावकोटौ साध्यभावेन सम्बन्धनियमे सिद्धे साध्याभावस्तत्रावकाशं न लभते । स यदि हेत्वभावकोटावपि न स्यात्तदा नोपपद्येतैव । तेन हेतुभावकोटौ साध्यभावेन सम्बन्धनियमो ऽवगतो हेत्वभावकोट्यनुप्रवेशकल्पनायामनुपजातायां साध्याभावस्यानुपपत्तिमापादयन्हेत्वभावकोटिनिवेशं कल्पयति । तथासति हेत्वभावेन साध्याभावो नियतसम्बन्धः सम्पद्यते । तस्मात्साध्याभावे ऽयं नास्त्येवेत्यवगम्य या प्रतीतिः सा सम्बन्धनियमावगमपूर्विकेत्यनुमानान्न भिद्येत । अथ गृहाभावस्य बहिर्देशकल्पनायामनुपपत्तिः संशय्यमानता न सा सम्भवति । नहि गृहाभावस्य संशयापत्तौ किञ्चित्कारणमस्ति । विद्यमानतायास्तु गृहसम्बन्धितयैव दर्शनाद्गृहाभावेन संशयमापाद्यतइत्युच्यते ।

अत्रकेचित् पीनो देवदत्तो दिवा न भुङ्क्तइति वाक्येन दिवासम्बन्धितया ऽवगतस्य भोजनस्य दिवा निषिद्धस्य पीनत्वानुमितस्यानुपपत्त्या रात्रौ भुङ्क्तइति वाक्यमेव कल्प्यतइति वदन्ति । तदयुक्तं । अत्राप्यर्थस्यैव कल्पयितुमुचितत्वात् । यस्मिन्ह्यकल्पिते ऽनुपपत्तिस्तदर्थापत्त्या प्रतीयते । रात्रिसम्बन्धेह्यनवगते भोजनस्यानुपपत्तिः । कालान्तरसम्बन्धाभावेनह्येषा ऽनुपपत्तिः सा कालान्तरसम्बन्धमेव कल्पयितुमलं । अथोच्यते । अर्थसद्भावमेव कल्पयितुमर्थापत्तिः प्रवर्त्तमाना स्वार्थस्य सविकल्पकज्ञानवेद्यत्वात् सविकल्पकज्ञानानांच शब्दपुरःसरत्वात् पुरोवर्त्तिनि शब्दएवार्थापत्तिः पर्यवस्यति - सच शब्दः स्वार्थमुपस्थापयति । नचेदमाशङ्कनीयं । लौकिकमैन्द्रियकंच सर्वं सविकल्पकं शब्दएवानेन न्यायेन पर्यवस्येदिति । यतो निर्विकल्पकदशायामिन्द्रियस्य लिङ्गस्यचार्थएव सामर्थ्यं दृश्यते तेन सविकल्पकावस्थायामप्यर्थएव तयोर्व्यापारः परिकल्प्यते । श्रुतार्थापत्तिबोधस्तु निर्विकल्पको न सम्भवति । शब्दव्युत्पत्तिपूर्वकत्वात् । व्युत्पन्नशब्दएवहि पूर्वं वाक्यस्यार्थमवबुध्य तदन्यथानुपपत्त्या ऽर्थान्तरमवबुभुत्सते । अथोच्यते । दृष्टार्थापत्तावर्थएवार्थापत्तेः प्रमाणत्वं दृष्टमिति श्रुतार्थापत्तेरपि तत्रैव प्रामाण्यं स्यादिति । तच्च । यस्मिन्नवगते ऽनुपपत्तिः शाम्यति तत्रार्थापत्तेः प्रामाण्यं । शब्देपिचावगते शाम्यत्येवानुपपत्तिरतस्तत्रापि प्रामाण्यं नायुक्तमिति । अत्रोच्यते । रात्रिसम्बन्धेहि भोजनस्यानवगते ऽनुपपत्तिरापतति । साताव्च्छब्दस्वरूपमात्रे ऽवगतेपि न शाम्यति यावत्ततः शब्दाद्रात्रिसम्बन्धो भोजनस्य नावगम्यते । नहि पीनो देवदत्तो दिवा न भुङ्क्तइति प्रयुज्य यदापुनरेवमुच्यते यामिन्यामत्तीति तदा यामिनीशब्दे ऽत्ताचाव्युत्पन्नस्य पूर्ववाक्यार्थविषयानुपपत्तिरुपरमति । अतोर्थस्यैवसाक्षादुपपादकत्वं न शब्दस्य । उपपादकविषयाचार्थापत्तिर्दृष्टार्थापत्तौ प्रतीतेति न क्वचिदुपपादकावबोधे शब्दे प्रमाणतामर्हति । किञ्चान्यचतावत्सविकल्पके शब्दस्य स्मृतिविषयताङ्गीकरणीया । एवंचेदत्रापि स्मृतिविषयएव शब्दोस्तु माभूदस्य प्रमाणविषयता । अतः श्रुतार्थापत्तिरपि शब्दग्राहिणी न भवति किन्तूपपादकार्थग्राहिण्येवेति स्थितं ॥ :: ॥ :: ॥

इति श्रीशालिकनाथकृतौ प्रमाणपारायणे
पञ्चमः परिच्छेदः ॥ :: ॥

अथ सांख्यास्समाद्धृतास्समाप्य मुनयः क्रियाः ।
शुश्रूषवस्समागम्य यथास्थानमुपाविशन् ॥ १ ॥

Digitized by Google

अहमप्यात्मवृत्तान्तविस्तारश्रवणोत्सुक: ।
संहृत्य चापलं सर्व्वमासं स्थिरमनास्तदा ॥ २ ॥
दुग्धाब्धिजलकल्लोलधवलैरमृताश्रितै: ।
सिञ्चन्निव करैरिन्दुरुदगादाश्रमस्थली: ॥ ३ ॥
भगवानथ जाबालि: सुखासीन: स्वविष्टरे ।
वल्कलाहितपर्य्यङ्कबन्धो वक्तुं प्रचक्रमे ॥ ४ ॥
सर्व्वे दत्तावधाना: स्त शृणुतेमां तपोधना: ।
अमुष्य पूर्व्ववृत्तान्तप्रस्तावोपचितां कथां ॥ ५ ॥
अस्त्यवन्तिषु संसारलक्ष्म्या: प्रसवभूरिव ।
निधिरुज्जयिनीनाम नगरी गुणसंपदां ॥ ६ ॥
लङ्काऽलकाऽमरावत्यो येषां वसतय: प्रिया: ।
तेपि यामभिपश्यन्त: सुखं तासु न शेरते ॥ ७ ॥
यस्यां किमन्यत्कैलासनिवासरसमुज्झता ।
महाकालाभिधानेन रुद्रेण स्वयमास्यत ॥ ८ ॥
तस्यां भरतमांधातृभगीरथपृथूपम: ।
तारापीडइति श्रीमान् बभूव पृथिवीपति: ॥ ९ ॥
परस्परविरोधेन विप्रकीर्णैरितस्तत: ।
विस्रब्धमास्यते यत्र संभूय कुशलैर्गुणै: ॥ १० ॥
विहसन् बुद्धिविभवैर्भृगुद्रुवबृहस्पतीन् ।
अमात्य: शुकनासाख्यो ब्राह्मणस्तस्यचाभवत् ॥ ११ ॥
त्रिविक्रमवदाक्रम्य स राजा पृथिवीमिमाम् ।
तस्मिन्मंत्रिणि तद्भारं निश्चिक्षेप भरक्षमे ॥ १२ ॥
तथाच पालयामास स मंत्री सकला: प्रजा: ।
यथा त्रिविधमप्येता न दु:खं किंचिदस्पृशत् ॥ १३ ॥
यथायथाच लोको ऽस्मिन्पितरीवानुरज्यते ।
राजा तथातथात्मानं कृतकृत्यम मन्यत ॥ १४ ॥
अक्लेशमर्पितं तेन स्वभुजे जगदर्जनं ।
संभोगविघ्नकारीति पालनं मंत्रिसात्कृतं ॥ १५ ॥
कृतकृत्यतयाचासौ कार्य्यशेषमचिन्तयन् ।
विषयेष्वाहितप्रीतिरासांचक्रे यथासुखम् ॥ १६ ॥
शोभाहि कृतकृत्यस्य राज्ञो भोगविभूतय: ।
असमाप्तजिगीषस्य तास्त्वेतु विडंबना: ॥ १७ ॥
स युवा मधुराकारतरुणीनयनोत्सव: ।
कलासु कुशल: कामी बुभुजे भोगसंपद: ॥ १८ ॥

न ते भावा न ता: क्रीडा न ता गोष्ठ्यो न ते रसा: ।
न ते विलासा यत्रास्य पारगं नाऽभवन्मन: ॥ १९ ॥
समग्रसुखसंभोगभूमिष्ठोपि स भूपति: ।
सुखमेकंतु नाऽज्ञासीदपत्यालोकनोद्भवं ॥ २० ॥
यथायथाच कालेन व्यतीयाय नवं वय: ।
अनपत्यतया शोको वर्द्धतेस्म तथातथा ॥ २१ ॥
मुख्यभूताच सर्व्वस्मिन्नंत: पुरकदंबके ।
राज्ञी विलासवत्याख्या यास्य प्राणसमा ऽभवत् ॥ २२ ॥
सा राजमहिषी गौरीमभ्यर्थयितुमेकदा ।
देवतायतनं बाह्यं ययौ भर्त्तुरनुज्ञया ॥ २३ ॥
पुराणे वाच्यमानेतु प्रसंगात्पतितां श्रुतिं ।
अपुत्रस्य कुतो लोकइति शुश्राव तत्र सा ॥ २४ ॥
प्रतप्तलोहसूचीव सा श्रुति: श्रवणांतरं ।
विवेश दधती तस्या: परां कामपि वेदनां ॥ २५ ॥
तत: प्रतिनिवृत्ताच प्रविश्य भवनं निजम् ।
वस्त्रावृतमुखी भूमावुपविश्य रुरोद सा ॥ २६ ॥
सखीभि: प्रार्थ्यमाना सा न स्वामिभजत स्थितिं ।
नोदस्थात्कर्त्तुमाहारं विरराम न रोदनात् ॥ २७ ॥
अथोपलभ्य तत्पीडावार्त्तां परिजनान्नृप: ।
प्रविश्यान्त: पुरं प्राह स्वैरमेनां प्रसादयन् ॥ २८ ॥
प्रिये किमिदमारब्धं रुद्यते किमकारणं ।
न त्वया मत्कृतो मन्युरनुभूत: कदाचन ॥ २९ ॥
अन्योपि मत्सुखापेक्षी मदधीनात्मजीवित: ।
कस्तवोत्पादयेन्मन्युं यस्मै कुप्यसि सुंदरि ॥ ३० ॥
इति प्रसाद्यमाना सा यदा नोवाच किंचन ।
तदावेदितवृत्तांतस्तत्सख्या नृपति: कृत: ॥ ३१ ॥
तेन व्यतिकरेणाऽथ सोपि दु:खपरायण: ।
रुरोद वक्षसि न्यस्तसवाष्पदयितामुख: ॥ ३२ ॥
चिरं रुदित्वा नि:शब्दं स्वयमुन्मृज्य लोचने ।
जगाद गद्गदं राजा महिषीमुपसांत्वयन् ॥ ३३ ॥
ममापि नन्वियं देवि चिरात्प्रभृति दुस्सहा ।
दुनोति हृदयं चिंता नि:प्रतीकाररोगवत् ॥ ३४ ॥
विफलं बत मे राज्यं विफला मम संपद: ।
विफला मम संभोगा विफलं मम जीवितं ॥ ३५ ॥

Digitized by Google

कुतो ऽस्माकमभाग्यानामियत्यो भाग्यसंपदः ।
यद् द्रक्ष्यामस्तवोत्संगं बालकापत्यमंडितं ॥ ३६ ॥
वांछन्क्रीडनकं किंचित्किमप्यव्यक्तमालपन् ।
आकृक्ष्यति सुतः कूर्च्चं कदा मे पापकर्म्मणः ॥ ३७ ॥
इत्यादि विलपत्यस्मिन् बाष्पाकुलितलोचने ।
शुकनास इमां वार्त्तां ज्ञात्वा सत्वरमाययौ ॥ ३८ ॥
निरपत्यः कृतः सोपि राजेव हतवेधसा ।
तस्याप्यनेन शोकेन गृहे रोदिति गेहिनी ॥ ३९ ॥
सतु स्वामिगतं दुःखं दुःखमित्यवधारयन् ।
तद्दुःखापनयोपायप्रवणो धीरमब्रवीत् ॥ ४० ॥
क्व धीरप्रकृतिर्देवः क्वेयं विक्लवचित्तता ।
शोको ऽवकाशं लभते हृदये न भवादृशां ॥ ४१ ॥
यदीह स्त्रीस्वभावेन देवी विक्लवतां गता ।
तत्किं प्रलंबकूर्च्चस्य युक्तं देवस्य रोदनं ॥ ४२ ॥
कोयं हिताहितप्राप्तिपरिहारक्रियाक्रमः ।
यत्कपोलतलन्यस्तहस्तं निश्वस्यते चिरं ॥ ४३ ॥
यदि दुःखस्थितिः सत्यमनपत्यतया तव ।
बुद्धिराधीयतां धर्म्मे धर्म्मात्सर्वमवाप्यते ॥ ४४ ॥
दीयतां वसु विप्रेभ्यः पूज्यंतां सर्वदेवताः ।
प्रवर्त्त्यंतां प्रपारामाः खन्यंतां सलिलाशयाः ॥ ४५ ॥
नास्तिनाम जगत्यस्मिन्पुरुषार्थस्स कश्चन ।
यो धर्म्मनिरतैर्द्धीरैस्त्वादृशैर्न्नाधिगम्यते ॥ ४६ ॥
इत्यादि शुकनासोक्तमाकर्ण्य विगतज्वरौ ।
उत्थाय स्वस्थवत्सर्वा दंपती चक्रतुः क्रियाः ॥ ४७ ॥
ततःप्रभृति दानानि यागहोमतपांसि तौ ।
चिचाश्चयकुरुतां सर्व्वा व्यस्मयंत ततः प्रजाः ॥ ४८ ॥
कदाचिदथ भूपालः स्वप्ने ऽपश्यन्निशाकरम् ।
विलासवत्या वदनं प्रविशंतमखंडितं ॥ ४९ ॥
तथा मनोरमानाम शुकनासस्य गेहिनी ।
स्वप्ने सपुंडरीकांका सापि तेन व्यलोक्यत ॥ ५० ॥
अन्येद्युरुदये भानोर्म्मंगलाचारपूर्व्वकम् ।
तं स्वप्नं कथयामास शुकनासाय भूपतिः ॥ ५१ ॥
सानंदं सोभ्यधादेनं संपूर्णास्ते मनोरथाः ।
अचिरात्सोष्यते देवी पुत्रं पूर्णेन्दुसुंदरं ॥ ५२ ॥

दिनेष्वथ व्यतीतेषु केषुचिद् गर्भमग्रहीत् ।
महिषी तत्सखीभ्यश्च तमश्रासीन्नरेश्वरः ॥ ५३ ॥
ताभ्यः प्रादात्स वासांसि चित्राण्याभरणानिच ।
क्रमेण गर्भलिंगेषु व्यक्तेषु मुमुदेतराम् ॥ ५४ ॥
शुकनासायचोवाच प्रहर्षोत्फुल्ललोचनः ।
चकांक्ष चातको मेघानिव प्रसववासरान् ॥ ५५ ॥
प्राप्ते ऽथ दशमे मासे देवी पुत्रमसूत सा ।
हर्षेणाच जगत्सर्वं परिवृत्तमिवाऽभवत् ॥ ५६ ॥
राजा महोत्सवानंदपूर्णपात्रं मुदा हृतं ।
दृष्ट्वा लोकेषु मातिस्म न चिविक्रमवर्त्तिषु ॥ ५७ ॥
शुकनासस्तु राजानं कंठे जग्राह निर्भरं ।
औत्सुक्यात्सूतिकावासं तावुभावपि जग्मतुः ॥ ५८ ॥
ततो ददृशतुर्व्यक्तसकलांगं कुमारकं ।
इंदोरुदयरागार्द्रं नवं बिंबमिवोदितं ॥ ५९ ॥
शुकनासो निरूप्यांगमेकैकं निपुणं शिशोः ।
हस्ते भूपालमालंब्य हर्षगर्भमभाषत ॥ ६० ॥
अयं शंख इदं चक्रमिदंचाखंडमम्बुजं ।
पश्य बालस्य चिन्हानि दृश्यंते चक्रवर्त्तिनां ॥ ६१ ॥
योऽसौ स्वप्ने त्वया दृष्टश्चंद्रो देवामुखे ऽविशत् ।
सएवाऽयमिहोत्पन्नइति मा संशयं कृथाः ॥ ६२ ॥
इति तद्दर्शनानंदसुधाप्लावितयोस्तयोः ।
शुकनासगृहाद्वृद्धा तत्पुत्रोत्पत्तिमभ्यधात् ॥ ६३ ॥
शुकनासमथोदारमालिलिंग महीपतिः ।
उत्तरीयं जहाराऽस्य पूर्णपात्रमिति स्वयं ॥ ६४ ॥
उवाचचेनं पश्येदं सुखस्योपरि नः सुखम् ।
इमे ते पतिताः सत्यं तुहिने सोमरश्मयः ॥ ६५ ॥
साध्विदं वेधसारब्धं चिन्तानुगुणमावयोः ।
सहैव पात्रतां नीतौ यदावां सुखदुःखयोः ॥ ६६ ॥
ततस्तूर्य्यरवैर्न्नित्यं चर्च्चरीतालनिस्वनैः ।
सिंदूरघनसारादिविनोदैः कुंकुमकर्द्दमैः ॥ ६७ ॥
अनपेक्षितनीचोच्चव्यवहारनिरर्गला ।
केलिः प्रववृते तत्र राजगेहमहोत्सवे ॥ ६८ ॥
राजातु स्वगृहे केलिविमर्द्दं वीक्ष्य तादृशं ।
शुकनासगृहं गत्वा द्विगुणं तमकारयत् ॥ ६९ ॥

Digitized by Google

कृते ऽथ जातकर्मादौ वृत्ते षष्ठीप्रजागरे ।
विलासवत्यां स्नातायां शुचौ काल उपस्थिते ॥ ७० ॥
प्रशस्ते ऽहनि दैवज्ञैरनुज्ञातो महीपतिः ।
स्नातः सुवर्णं स ददौ पूजयित्वा द्विजोत्तमान् ॥ ७१ ॥
स भूषणानि वासांसि वर्षन् परिजने शिशोः ।
चंद्रापीडइति स्वप्नसदृशं नाम निर्म्ममे ॥ ७२ ॥
शुकनासोपि संपूज्य विप्रान्विप्रजनोचितं ।
वैशंपायनइत्यात्मसूनोर्नाम प्रणीतवान् ॥ ७३ ॥
क्रमेण वर्द्धमानो ऽथ कृतचूडादिमंगलः ।
चंद्रापीडो ऽभवत्पित्रोः परमुत्संगमंडनं ॥ ७४ ॥
आकारेणेंदुतुल्येन मधुरैर्बालवल्गितैः ।
अव्यक्तवर्णैरालापैरहरत्स तयोर्म्मनः ॥ ७५ ॥
प्राप्ते ऽथ सप्तमे वर्षे विद्यागृहमकारयत् ।
चंद्रापीडस्य नगराद्बहिर्बहुगुणं नृपः ॥ ७६ ॥
कृतोपनयनंचैनं काले सज्जनोचिते ।
तत्र न्यवेशयद्राजा विद्याधिगमसिद्धये ॥ ७७ ॥
तर्कव्याकरणाभिज्ञान् धनुर्वेदविशारदान् ।
दंडनीत्यादिनिपुणानाचार्यान् पर्यकल्पयत् ॥ ७८ ॥
शुकनासोपि तं पुत्रमुपनीय यथाविधि ।
राजपुत्रानुगं चक्रे विद्यागृहनिवासिनम् ॥ ७९ ॥
नृपतिस्त्वगमद् द्रष्टुं पुत्रं गुरुगृहे स्थितं ।
प्रार्थितोपि स तन्मात्रा नैनमानाययद् गृहं ॥ ८० ॥
पूर्णषोडशवर्षस्तु राजपुत्रः कुशाग्रधीः ।
सकृदध्यापितो विद्याः पूर्वाभ्यस्ताइवाग्रहीत् ॥ ८१ ॥
सर्ववादेषु वक्ता ऽभूत्सर्वशास्त्रेषु कोविदः ।
प्रौढः कलासु सर्व्वासु दक्षस्सर्वेषु कर्म्मसु ॥ ८२ ॥
सर्वसंव्यवहारेषु सो ऽभूदस्खलितक्रमः ।
सर्वशास्त्रार्थतत्वज्ञः सर्वभाषासु सत्कविः ॥ ८३ ॥
क्रमेण वर्द्धमानश्च स व्यायाममसेवत ।
शुशुभेच तदभ्यासात्प्राप्तसर्वांगसौष्ठवः ॥ ८४ ॥
प्रलंबबाहुः पीनांसः पृथुवक्षास्तनूदरः ।
गंभीरनाभिर्वृत्तोरुस्तोरणः करिणीगतिः ॥ ८५ ॥
शुकनाससुतस्तस्य प्रतिबिंबइवाभवत् ।
गुणैरशेषैरन्यत्र शरीरप्राणगौरवात् ॥ ८६ ॥

अथ राजा सुतं बुद्ध्वा कृतार्थं गुरुवेश्मनः ।
शुकनासगिरा गेहमानेतुमुपचक्रमे ॥ ८७ ॥
स बलाहकनामानमाहूय ध्वजिनीपतिं ।
पुण्ये ऽह्नि प्राहिणोत्पुत्रमानेतुं कृतमंगलः ॥ ८८ ॥
तथेंद्रायुधनामानं प्रेषयामास वाजिनं ।
जितोच्चैःश्रवसं तैस्तैरनन्यसुलभैर्गुणैः ॥ ८९ ॥
सहस्रं राजपुत्राणां विनीतं बाहुशालिनाम् ।
व्यसर्जयच्च तेनैवसह पुत्रानुवर्त्तिनां ॥ ९० ॥
बलाहकस्ततो गत्वा विद्यागृहकृतास्पदं ।
अद्राक्षीद्राजपुत्रं तं प्रणनामच सादरं ॥ ९१ ॥
आचचक्षे स राजाज्ञां गृहमागम्यतामिति ।
सनामग्रहणंचासौ राजपुत्रान् न्यवेदयत् ॥ ९२ ॥
ततो बलाहकाख्यातशौर्यादिगुणगौरवाः ।
राजपुत्राः प्रणेमुस्तं पुरुहूतमिवाऽमराः ॥ ९३ ॥
पर्याणरत्नज्योतिर्भिर्जनितेंद्रायुधप्रभं ।
इन्द्रायुधं प्रवेश्याथ पुनराह बलाहकः ॥ ९४ ॥
इममारोह सिंधूत्थमश्वरत्नमयोनिजं ।
पारसीकाधिपतिना देवस्योपायनीकृतं ॥ ९५ ॥
चंद्रापीडस्तु तं वीक्ष्य तुरंगममनुत्तमं ।
परं विस्मयमापेदे चिरंचैवं व्यचिंतयत् ॥ ९६ ॥
हृदयं मे ब्रवीतीति नैष सत्यं तुरंगमः ।
कोपि केनापि पापेन नूनं तुरगतां गतः ॥ ९७ ॥
अयोनिजत्ववार्त्तेयमेतदुक्ता च साक्षिणी ।
रंभाकिलाप्सरः कन्या शापेन वडवाऽभवत् ॥ ९८ ॥
गरुत्मतीदमुच्चत्वमुच्चैःश्रवसिवा भवेत् ।
तेजसामाकृतिर्वापि न सामान्येषु वाजिषु ॥ ९९ ॥
इति बुद्ध्वा विकल्प्याथ बलाहकसमर्पितैः ।
कुसुमस्रगलंकारदुकूलैः कृतमंगलः ॥ १०० ॥
गुरूनामंत्र्य दत्ताशीर्ब्राह्मणैर्वेदिभिः स्तुतः ।
वैशंपायनमारूढमालोक्य तुरगांतरम् ॥ १ ॥
योसि सोसि नमस्तुभ्यमारोहातिक्रमस्त्वया ।
मर्षणीयो ऽयमस्माकमारुरोहेति तं वदन् ॥ २ ॥
स इंद्रायुधमारुह्य वैनतेयमिवाऽच्युतः ।
अपिचिज्जगतीं कृत्स्नां मेने हस्तगतामिव ॥ ३ ॥

Digitized by Google

सवैशंपायनस्तो ऽथ निर्गत्य भवनात् ततः ।
राजपुत्रैः परिवृतो विवेश नगरीं ततः ॥ ४ ॥
तमथ पुरतरुण्यो राजमार्गेण यांतं
ददृशुरतुलकांतिं सौधवातायनस्थाः ॥
व्यपगतगुरुलज्जासंभ्रमोत्कंपितांग्य:
स्मरजनितविकारैर्लोचनैरर्च्चयंत्य: ॥ १०५ ॥
इति कादंबरीकथासारे द्वितीय: सर्गः ॥ २ ॥

विद्याशिल्पयोरैहिकसुखोत्कर्षानुकूलउत्कर्षइह
भारते वर्षे पुरैव बभूवाहोस्विदद्यत्वेऽप्यस्ति ।

हे सभ्यायूयं भगवता जगत्कर्त्रा बाह्याभ्यन्तररिपुगणाक्रमणविपत्प्रलयजलधिनिमग्नानामेतद्देशीयजनानां भयाभावाय प्रेरितेन निजकृपाकटाक्षेण युरोपीयजनानवतार्य विनिवारितबाह्यविपदोविद्याशिल्पयोरभावनिबन्धनाभ्यन्तरविपन्निवृत्तये बद्धपरिकराः केचिद् युरोपीयमहाजनपरिगृहीतं परेऽर्वपारसीकजनाङ्गीकृतं बहवोवेदोपदिष्टं चैहिकामुष्मिकव्यवहारमार्गं सुविचारवशात् पितृपितामहप्रचरणवशाच्चाश्रिता अविचारिकलहैकरसिकदोषैकविदृत्तुधर्माधर्मचिन्तनैकव्यवसायदम्भोपजीविजनोत्प्रेक्ष्यमाणान्योन्यविरोधाप्रामाण्यादिकलंकेनापि तत्त्वतोविचारे लेशतोऽपि स्वप्नेऽपि स्वल्पयापि दोषवार्तयाऽप्यस्पृष्टेन स्वस्वमार्गेण पूतशान्तदान्तमृदुनिरीर्ष्यहृदया जनानामैकमत्यं हितबोधं सदाचरणमैहिकामुष्मिकसुखं चेच्छन्तस्तदुपायमन्विष्यमाणा एतद्देशीयजनानां पुराद्यतनकालयोर्विद्यानां शिल्पानां चोत्कर्षमपकर्षं च यथावस्तु जिज्ञासथ ।

सेयं युष्मदीया जिज्ञासा भारतवर्षीयप्राचीनव्यवहारनियमप्रदर्शकानां स्मृतिपुराणेतिहासग्रन्थानां तथैतद्देशीयप्राचीनव्यवहारस्थितिदर्शकानां कोशव्याकरणकाव्यनाटककथाख्यायिकाग्रन्थानां तथा विद्याशिल्पोत्कर्षप्रमाणभूतानां गजशास्त्राश्वशास्त्रवैद्यशास्त्रगीतशास्त्रनाट्यशास्त्रवास्तुशास्त्रगणितशास्त्रादीनां विक्रमार्कशालिवाहनराज्यकाले परःसहस्रैर्विचारकवर्यैरहरहर्महता यत्नेन लोकमिमं स्थावरजंगमात्मकं परीक्ष्यपरीक्ष्य वृद्धिमापादितानां प्राचीनव्यवहारप्रतिबिम्बाधारनिर्मलवाङ्मयरत्नदर्पणभूतानां विलोकनेन तथेदानीन्तनजनानुष्ठियमाणव्यवहारानुसन्धानद्वाराऽन्तर्बहिश्चैतद्देशदशापरीक्षया च निवृत्ता भविष्यतीति मत्वा प्रोक्तग्रन्थानां यावद् दर्शनं यावच्च विमर्शनं मच्छक्तिसाध्यं तावदनुसृत्य तं विषयं भवतां पुरतोवक्तुमुत्सहे । एवंप्रकारे च ग्रन्थदर्शनाद्देशव्यवहारनिर्णयने ऽत्रत्यविदुषां प्रवर्तनेन तथा तन्निर्णयद्वारा स्वदेशीयव्यवहारपरिशोधने ऽत्रत्यक्षत्रियभूपतीनां प्रवर्तनेन स्वतएव सर्वलोकानुकंपी भगवानेतं मम प्रयत्नमनुगृह्णात्विति चाशासे ।

तथाहि यथेदानीं यः कोपि यथायथमिंग्लंडीयभाषायामर्वदेशभाषायां वा व्युत्पन्नो भवेत् स तथातथा तद्भाषानिबद्धानां तद्देशीयविद्याशिल्पग्रन्थानां सम्यगर्थतात्पर्यमवगच्छेदिति दृष्टं तथैव यथायथा संस्कृतभाषायां व्युत्पत्तिरधिका तथातथा तद्भाषानिबद्धानां गजतुरगौषधस्वराभिनयगृहसंख्यानशिष्टाशिष्टव्यवहृतिधर्माधर्मलोकवृत्तसुभाषितादितत्त्वप्रतिपादकग्रन्थानामर्थस्यावगमस्तदुपदेशसामर्थ्यं च भवेदिति स्पष्टमतोयुष्माभिर्विचार्यतां यद् भारते वर्षे यथायथा कालस्य प्राचीनता तथातथा संस्कृतभाषाप्रचाराधिक्यमिति संस्कृतं सर्वविद्याशिल्पानामाधारोऽत्रदेशे जनपदभाषा चेति ज्ञानिवर्यैः परिगृहीतमित्यस्य सुनिश्चितत्वात् संप्रति यावती संस्कृतभाषाव्युत्पत्तिर्यावच्च तन्मूलकं शास्त्रविद्याशिल्पपरिज्ञानं यावन्तश्च तन्मूलकाश्चित्तशुद्धिः शरीरशुद्धिर्वाक्शुद्धिः स्वतन्त्रता भगवद्भक्तिर्भूतदया चेत्यादयोगुणाद्विजजने दृश्यन्ते ततः सहस्रगुणाधिका व्युत्पत्त्यर्थज्ञानमहद्गुणा विक्रमार्कस्य शालिवाहनस्य च राज्यकाले प्रजानामासन्नेवेति विद्यातारतम्येन ज्ञानगुणतारतम्यस्य सर्वदेशसर्वकालसाधारणतया निश्चीयते ।

अपिच क्रियाशक्तिर्ज्ञानशक्तेरधीनेति कृत्वा यस्मिन् काले ज्ञानशक्त्याधिक्यं तत्र प्रजानां क्रियाशक्त्याधिक्यमपि । अतएव द्विसहस्रवर्षेभ्यः पूर्वं मृच्छकटिकशाकुन्तलविक्रमोर्वशीप्रभृतिनाटकीयवस्तुप्रदर्शने सूत्रधाराणां परमं शिल्पमासीत् विमानादिव्यवहारश्चैतद्देशे भूयान् बभूव तादृशस्य च शिल्पस्येदानीं कस्यापि मनसि कल्पनैव नोदेति प्रत्युत संस्कृतग्रन्थस्थं सर्वं कल्पनामात्रमित्येव पामरामन्यन्ते यथा यः प्रस्तरस्तम्भोऽधुना काशीस्थसंस्कृतपाठालयोदीच्यद्वाराभिमुखोजनपदान्तरादानीयेंग्लंडीययादृशशिल्पयन्त्रोपयोगेन संस्थापितः सएव त्रिशतवर्षेभ्यः पूर्वं देशान्तरीयविद्याशिल्पयोः सहकारमन्तरैव पाठालयोत्तरांगणदृश्यमानायां सुमहत्यां शिलायां गाधिजपुरनिकटे तादृशशिल्पयन्त्रोपयोगेन श्रीमता कीर्तिपालदेवेन संस्थापितोन तु तादृशशिल्पकल्पना कस्याप्याधुनिकस्य मनस्युदेति एतेन विजयनगरादावष्टशतवत्सरेभ्यः पूर्वमनुत्प्रेक्ष्यशिल्पोपयोगेनोत्तमोत्तमपरममहाप्रस्तरमयदेवालयादिनिर्माणं तथा जयपुरात् पूर्वोत्तरदिशि द्विसहस्रवर्षेभ्यः पूर्वं चित्रवाटाख्यदुर्गनिर्माणं च व्याख्यातं । भगवानेतान् प्रजापालनकुशलान् युरोपदेशवासिनोविद्याव्यसनिनोजनान् सततवर्धमानविद्यालक्ष्मीकान् करोतु परन्तु यद्येतएव विद्या-

Digitized by Google

शिल्पोत्कर्षावाप्तसमृद्धीनां प्राचीनार्यजनानां सन्ततिप्रभवा भारतीयसांप्रतजना इव भोगविलासालस्यैश्वर्यमदपारवश्यबुद्धिशरीरमांद्यादिदोषग्रस्ता भूत्वा व्याकरणाद्यनवधानात् कृतकृत्यताभिमानाच्च स्वदेशभाषां विस्मरेयुस्ततश्च तद्भाषानिबद्धानां विद्याशिल्पग्रन्थानां सिद्धान्तानितिकर्तव्यताश्च न जानीयुरतश्च ते सर्वे ग्रन्थालोपं प्राप्नुयुः क्रमेण च मुद्रायन्त्रं विद्युद्दूरलेखयन्त्रं बाष्पनौर्बाष्पगंत्री कालमानयन्त्रं वायुगुरुत्वमानयन्त्रं वृष्टिज्ञानयन्त्रं क्षेत्रकर्षणयन्त्रं प्रालेयोत्पादनयन्त्रं कार्पासवयनयन्त्रं सूक्ष्मदर्शकयन्त्रं दूरदर्शकयन्त्रं रविकिरणकूर्चिकाचित्रलेखयन्त्रं तथा ज्योतिषवैद्यकगणितगतिरसायनौषधिखनिजभूगर्भभूपृष्ठजलवायुविद्युदादिविद्या इत्येवमादीन्यात्यन्तिकावश्यकोपयोगानि युरोपदेशीयजनानां वस्तुतत्त्वान्वेषणे परमोत्साहपरमफलावाप्तिसततप्रवृत्त्यादिसद्गुणपताकाभूतानि व्यवहारसाधनानि विशीर्णान्युच्छिन्नानि च स्युस्तदा यदि कश्चित् कतिपयवर्षैरेव कोट्यादिक्रोशान्तरे वृत्तज्ञापने कतिपयमुहूर्तैः सहस्रावधिक्रोशान्तरे स्थलजलवर्त्मना देशान्तरीयवस्तुप्रापणे युगपदेकपुरुषव्यापारमात्रेणानेकशतसहस्रप्रस्थभारोत्तोलने तथैवानेकग्रन्थीयसहस्रावधिपुस्तकानां झटिति मुद्रणे चेत्याद्यद्भुतकार्येषु सामर्थ्यं युरोपीयजनानामासीदिति वदेत् तर्हि तत्कालोत्पन्ना जना उक्तकार्योपायेतिकर्तव्यतानभिज्ञतया तत् तस्य वचनं सर्वथा विश्वासानर्हं पक्षपातमूलकमुपहासार्हं च मन्येरन् यथा सम्प्रति भारतवर्षीयाणां विद्याशिल्पसामर्थ्योत्कर्षकथां परदेशीयास्तत्संसर्गादिहत्याश्चापि बहवो मन्यन्ते प्राचीनेतिहासाच्चेहत्यजनानां पुराकाले प्रकृष्टं नीतिनैपुण्यं शिल्पप्राबल्यं परदेशीयजनमान्यत्वं चानुमीयतेऽतो यथा बेकनेन वस्तुस्वभावविशेषज्ञानात्पूर्वं लोकास्तत्कल्पनामुपहसंतीत्युक्तं तथा वस्तुस्वभावविशेषस्य पूर्वपरिचितस्य केनचित् कारणेन विस्मरणेपि तत्कल्पनां लोका उपहसन्तीति मया मन्यते ।

अपिच यदा वयं द्यूतकन्दुकचौर्यपाकगंडूषलेखाद्यतिक्षुद्रविषयेष्वपि सत्फलपर्यवसानं यथा भवेत् तथा नियमदर्शकान् शिल्पग्रन्थान् प्राचीनसंस्कृतग्रन्थदर्शनादवगच्छामस्तदा यद्वा च द्विसहस्रवर्षेभ्योपि पूर्वं भारतीयविद्याशिल्पोत्कर्षः सर्वदेशान्तरीयविद्याशिल्पोत्कर्षमतिशिश्ये परन्तु भारतीयातिप्राचीनविद्याशिल्पोत्कर्षसदाचरणपावित्र्ययोर्ह्रासकालएव सोऽभवदिति च प्रमाणैः पश्यामस्तदापि भारतीयविद्याशिल्पयोरुत्कर्षः पुरा साम्प्रतकालापेक्षयाऽत्यधिक आसीदिति सविस्मयं निश्चिनुमः । एतावन्मया प्राचीनैतद्देशीयस्थितिविषये युष्मासु निवेदितम् ।

अथेदानीन्तनैतद्देशस्थितिविषये किञ्चित् संक्षिप्य दर्शयामि तथाह्येतेषु दिवसेषु भारतवर्षीयाः प्रायेण जन्मनआरभ्य स्वगृहे लोकव्यवहारे चार्वपारसीकयुरोपीयजनानां वेषस्य भाषाणां लिपीनां च व्यवहारवशात् क्रियमाणं परिग्रहं तत्परिग्रहमूलिकामेव च स्वजनानामशनाच्छादनभोगविलासादिप्राप्तिं स्वदेशीयविद्याधर्मव्यवहारांश्च शब्दतः श्रूयमाणानप्यर्थतोऽननुष्ठीयमानान् दृष्ट्वा स्वदेशे क्वचित्क्वचिदुपलभ्यमानान्यपि सर्वोत्कृष्टानि शिल्पानि केवलं परदेशीयशिल्पमूलकानीति विवेकविरहान्मत्वा भक्ष्यपेयगम्यकार्याद्युतरुचयः सन्तः स्वस्यैकव्यक्तिपर्यवसितसुखसिद्धयएवान्धा इव यं कमपि पंथानमाद्रियन्ते न तु स्वदेशीयजनानां हितं केनोपायेन स्यादिति स्वप्नेपि पश्यन्ति प्रत्युत स्वमृत्युरेव जगत्प्रलय इति प्रलपन्तःसंसर्गिणो जनानपि परकार्याद् व्यावर्तयन्ति । एते तावद् युरोपीयजना एतद्देशीयजनोपकाराय विद्याप्रचारणे बद्धपरिकराः प्रयतमाना अपि यदिष्टं फलं न लभन्ते लभमाना अपि वा पर्वतविदारणान्मूषकलाभवत् परमेण प्रयत्नेनात्यल्पमेव लभन्ते तत् परदेशीयभाषाद्वारेण देशान्तरे विद्याप्रचारणे विलम्बस्य तत्तद्देशीयजनपदभाषाणां चापरिष्कृततया गंभीरविचारैकगम्यविषयव्याख्यानसामर्थ्याभावस्य स्वभावसिद्धस्य फलं । यदि त्विहत्या धनिकाः प्रत्यहं भोगार्थं धर्मार्थं वा क्रियमाणस्य व्ययस्य शतांशमपि निष्कृष्याद्यो यत् किमपि युरोपीयजनैरितिहासे ततो विद्यासु ततः शिल्पेऽवगतं स्वभाषया निबद्धुं च तस्य सर्वस्य संस्कृतभाषयाऽवतारणे तन्मुद्रणे तदध्यापने तथा लुप्यमानसंस्कृतग्रन्थानां जीर्णोद्धरणपूर्वकतत्त्वपरीक्षया सदसद्विभागपूर्वकस्वदेशीयव्यवहारपरिशोधनानुकूलाभिनवनीतिग्रन्थनिर्माणे प्रोक्तकार्यनिर्वहणसमर्थानां विदुषां स्वस्वोचितकर्मनियोजनद्वारा वृत्तिकल्पने च विनियोजयेयुस्तर्हि संस्कृतभाषायाः सर्वार्थानां सौकर्येण प्रतिपादने समर्थत्वादेतद्देशीयजनस्वभावपरिचितत्वादस्मिन्नपि काले सुप्रचरितव्याकरणकत्वाच्चाविलंबेनैव सर्वेष्टसिद्धिः स्वपरदेशीयविद्याबीजानामेकैकक्षेत्रवापात्पूर्ववद्विद्यावृत्तसिद्ध्या चतुर्वर्गफलप्राप्तिः स्यादिति भवन्तः स्वतएवोचितसर्वव्यवहाररुचिमन्तो विदांकुर्वन्तु ।

स्यादेतत् यदिदमुपन्यस्तं परदेशीयभाषाद्वारेणैतद्देशे विद्याशिल्पवृद्धेरविलम्बेन सर्वसाधारण्येन चाशा नास्ति परदेशीयभाषातत्त्वज्ञानमात्रेणैवैकपुरुषायुषपर्यवसानात् तादृशतत्त्वज्ञानस्य विद्यावर्द्धनकालोपयोगासम्भवात् नापीहत्यप्राकृतभाषाद्वारेण तासां सूक्ष्मविषयप्रकाशनानुकूलशब्दकोशराहित्येन सर्वविधज्ञानप्रचारणसामर्थ्याभावात् भारतवर्षीयसर्वप्रदेशसाधारण्याभावाच्च केवलंत्वेतद्देशीयसर्वभाषामूलभूतसाधुतमव्याकरणपरिशोधितसुप्रसन्नप्रसिद्धसंस्कृतभाषाद्वारेण सर्वेष्टसि-

द्वाशा वर्त्तत इति । तत् सर्वं ब्राह्मणानामेव संस्कृतज्ञत्वात् संस्कृतस्य वर्द्धने तद्द्वारा परदेशीयविद्याशिल्पेतिहाससंग्रहे च ब्राह्मणानां जीवनोपायवृद्धिः स्यादिति स्वार्थलोभमूलकमिति कृत्वा न प्रामाण्येन ग्राह्यमिति । मैवम् । विना भाषां तावज्ज्ञानवृद्धेराशा नास्त्येवेति यस्या एव भाषाया अनुसरणं तदर्थं क्रियेत तद्भाषाविदां जीवनोपायः सिद्ध्येदेव भाषान्तराणां चैतत्फलसाधनविनियोगयोग्यत्वाभावः प्रतिपादितदिशा स्पष्टः संस्कृतभाषायाः पूर्वोक्तहेतुना तद्योग्यत्वं च स्फुटमिति यदि संप्रति संस्कृतविदो ब्राह्मणा एव सन्तीति हेतोस्तेषां कृशवृत्तीनां बुद्धिमतां स्वदेशोत्कर्षसिद्ध्यंगतया जीवनोपायलाभः स्यात् तर्हि ब्राह्मणद्वेषिणो जनान् विहायान्येषां किमप्यनिष्टं न स्यात् नहि संस्कृतभाषाज्ञानं ब्राह्मणैरेव संपादनीयमिति शास्त्रेषु निर्द्धारितं प्रत्युत तस्या एतद्देशभाषारूपाया इदानीन्तनैः पशुप्रायैरलसैरुपेक्षितत्वाद् ब्राह्मणजातिमात्ररक्ष्यत्वं नहि देशभाषाभावात् प्रच्यावनायास्याः पुनरपि तत्पदारोपणं ब्राह्मणानां दृष्टं । तं हि दिवसं धन्यं मन्ये यस्मिन्नेतद् भारतं वर्षं संस्कृतभाषिसर्वजनोपेतं तद्भाषानिबद्धसर्वस्वपरदेशीयविद्याशिल्पेतिहासपरिशीलनतदनुसारिव्यवहरणजनितबाह्याभ्यन्तरशुद्धि परदेशीयैः सविस्मयमीक्ष्यमाणं परस्परसहायताप्रवृत्तैकमतसर्वलोकं च भूत्वा चिरातीतकालभवं निजं भूमण्डलमुकुटभावमासाद्य युरोपीयजनानामात्मप्रबोधप्रयत्नसाफल्यं विदधत् कृतज्ञतां विज्ञतां सरलतां साधुतां शुचितां रसिकतां भगवत्परायणतां पराक्रमणशीलतां स्वतन्त्रतां तपस्वितामैहिकामुष्मिककल्याणपात्रतां चात्मनः स्वाभाविकीं पूर्वसिद्धां लभेत ।

विद्यावृद्ध्यनुकूलप्रयत्नकारिणां दक्षिणालाभाभावादपि विद्यावृद्धेः प्रतिबन्धो भवतीत्येतच्च मयैवैकेनोत्प्रेक्षितं किन्तु परीक्षैकमूलकसिद्धान्तपरिग्राहिणाऽत्यन्त विदुषा त्रिशतवर्षेभ्यः पूर्वमिंग्लंडीयमंत्रिवर्यपदव्यां वर्तितवता सर्वं युरोपदेशं मिथ्याकल्पनाजालैर्दृढं बद्धमिवेतस्ततो भ्रममाणं स्वप्रयत्नेनाभिनवतत्त्वज्ञानोपायप्रदर्शनानुकूलेन सुमार्गं प्रापितवता बेकनाख्येनापि विद्यावृद्धिप्रतिबन्धकहेतुनिरूपणप्रस्तावे निर्द्धारितमिति ।

नन्विदानीमपि सहस्रशो लोका इंग्लंडीयभाषानिबद्धानामपारसीकादिभाषानिबद्धानां च विद्याशिल्पानामभ्यासशीलास्तद्द्वाराऽभिवृद्धधनपदवीका विलोक्यन्ते तत् कथमुच्यते स्वदेशेऽधुना विद्याशिल्पयोरिहोत्कर्ष इति । सत्यं । परन्तु स सर्वोऽप्युत्कर्षो निजनिजतत्तद्वृत्तिमात्रपर्यवसितविषयोपभोगोद्देश्यकत्वादेतद्देशस्यप्राचीनजनापेक्षया साम्प्रतकालिकलोकानामुत्कर्षापकर्षविचारेऽत्यन्ततुच्छ एव सह्युत्कर्षः साम्प्रतिकैतद्देशीयजनान्तरापेक्षया केषांचित्सांप्रतिकजनानामेव न त्वेतद्देशीयप्राचीनजनापेक्षया सांप्रतिकजनानां । यदि तु सर्वेतिहासग्रन्थापरिचितप्राचीनकालमारभ्याद्ययावदविकृततया संस्कृतभाषया सर्वविधस्वपरदेशीयविद्याशिल्पानामुपनिबन्धनं तथेतिहासग्रन्थानामवतारणं च स्यात् तर्हि झटित्येव सर्ववर्णेषु विद्याशिल्पेतिहासज्ञानप्रचारणेन देशान्तरीयेभ्य एतद्देशीयप्राचीनजनेभ्यश्च साम्प्रतैतद्देशीयजनानां विद्याशिल्पादिविषयक उत्कर्षः सम्भवेत् ।

यदा यस्मिन् देशे तद्देशीयभाषया तत्रत्यपंडितैस्तद्देशीयजनप्रार्थनया नीतिविद्याशिल्पग्रन्था विरच्यन्ते तदा तस्मिन् देशे नीतिविद्याशिल्पानां सत्त्वं वृद्धिश्च भवति नान्यथा । सैषा स्थितिः पुरैव नादृता यतस्तदैव शुक्रबृहस्पतिनारदकमंदकचाणक्यादिभिर्विस्तृतानि नीतिशास्त्राणि चरकसुश्रुतवाग्भटप्रभृतिभिश्चिकित्साग्रन्था भास्करगणेशादिभिर्गणितज्योतिषग्रन्था मंदपालसहदेवशालिहोत्रप्रभृतिभिर्गजतुरगशास्त्राणि च लोकोपयोगाय विरचितानि लोकैः परिगृहीतानि च इदानीन्तु नोक्तप्रकारकग्रन्थानां निर्माणमस्मद्देशीयो जन इच्छति यतो ये कतिपये नीतिचिकित्साग्रन्था अवशिष्टाः सन्ति ते तावद् व्यवहारेणात्यन्तासम्बद्धा इति नवीनानां प्रचारस्य कथैव नोदेति । ये चेंग्लंडीयादिभाषानिबद्धा विद्याशिल्पग्रन्थाः सार्वलौकिकव्यवहारानुपयुक्ता अपि वृत्तिमात्रेण निमित्तेनेहत्यैः परिशील्यन्ते तेऽपि तज्ज्ञैः पुरुषैर्विचार्येहत्यव्यवहारोपयोगिनो न क्रियन्ते । अविज्ञास्त्वविज्ञा एवेति सर्वथा हतप्रायैवैतद्देशोत्कर्षवृद्धीच्छा । ये चेदानीं वंगांगमगधमध्यदेशेषु कलिंगकर्नाटकमद्रमहाराष्ट्रसुराष्ट्रगुर्जरपांचालदेशेषु च तत्तद्देशीयभाषयाऽवतारिता इंग्लंडीयविद्याशिल्पग्रन्था दृश्यन्ते ते सर्वे संख्यया बहवोऽप्यर्थतोऽतिदरिद्राः पुनःपुनरुद्घुष्टसमानस्वल्पसिद्धान्तगर्भा अत एव व्यवहारेऽत्यल्पफला विद्याप्रचारप्रारम्भिकयुरोपीयजनकर्मकरैस्तद्रुच्यनुसारेण स्वदेशीयजनबोधप्रकारव्यवहारप्रकाराननुसंधायैव निर्मितास्तन्निर्माणप्रवर्तकयुरोपीयजनानामितो देशादपगमे सत्युपेक्षिता अतश्च यदि युरोपीयजनैरेतद्देशीयजनेषु विद्याप्रचारोत्साहः परित्यज्येत तर्हि सम्भाविताऽत्यन्तविलया इति स्वतोऽस्माकं स्वदेशीयसर्वभाषामूलभूतसंस्कृतविद्याया वर्द्धने तया क्षीयमाणस्वदेशीयविद्यानां जीर्णोद्धरणे तथा तयैव वर्द्धमानपरदेशीयविद्यानां प्राचीनेतिहासानां च संग्रहे धनिकानां विदुषां च परस्परसाहाय्येन प्रवृत्त्यैव भारतवर्षस्योत्कर्षावस्थायाः पुनः प्राप्तिः सम्भाव्यत इति शम् ।

बोद्धारो मत्सरग्रस्ताः
प्रभवः स्मयदूषिताः ।

Digitized by Google

अबोधे पहतश्चान्ये
जीर्णमंगे सुभाषितम् ॥ १ ॥

अपिच पश्यतैतत् परमद्भुतं यदिहत्येभ्य इदानीन्तनजनेभ्यो युरोपीयानां व्यवहारप्रकारः केवलं स्वदेशीयप्राचीनव्यवहारपरित्यागायैव रोचते न तु युरोपीयजनानामुत्तमोत्तमसम्प्रदायपरिग्रहाय तथाहि युरोपीयाः परमेण विश्वासेन परमेण च प्रेम्णा स्वदेशभाषां स्वपूर्वजानुसृतां व्यवहारपरमार्थयोरीतिं स्वदेशीयजनप्रकाशितविद्याशिल्पप्रन्यान् दृढमभ्यस्य परदेशीयभाषाव्यवहारविद्याशिल्पविषये यत् किमपि स्वदेशीयप्राचीनजनैर्विचार्य व्यवस्थापितं तद् विज्ञायाधिकं विज्ञातुं स्वयं परदेशीयभाषादीनां परिचयं कृत्वा यत् किमपि सदसद् वा जानन्ति तत् सर्वं वर्तमानोत्पत्स्यमानस्वदेशीयजनोपकाराय स्वदेशभाषया निबध्नन्ति तमेतमुत्तमं युरोपीयजनसम्प्रदायं दूरतएवोत्सृज्येदानीन्तनाइहत्याः केवलं तदीयान् बाह्यान् निरनुरोधत्वभक्ष्यपेयाद्यद्भुतरुचित्ववस्त्रवेष्टितसर्वशरीरत्वदशाविशेषीयनिरुष्णीषकञ्चुकधारित्वसर्वप्रदेशोपानद्धारित्वादीन् व्यवहाराननुकुर्वाणास्तेनचात्मानं वस्तुतस्तेन कारणेन तैरुपहस्यमानमपि तेषामनुगृहीतं मन्यमाना वर्धमानेन गर्वेण दुर्गृहीतस्वल्पयुरोपीयभाषाविद्याशिल्पैः कृतार्थतामात्मनोऽभिमत्य स्वदेशीयान् निर्दोषप्राचीनव्यवहारानुसारिणो जनान् युरोपीयजनप्रदर्शितदोषविशेषारोपेण तिरस्कृत्य वयं भारतवर्षीयप्राचीनजनेभ्योऽपिविद्याशिल्पादिभिरुत्कृष्टाः स्म इति चक्षुषीनिमील्य सुखमवतिष्ठन्ते न पुनरयं सर्वोऽप्यस्मद्देशीयः सीदन् जनः परदेशीयजनानां श्रममनपेक्ष्य कीदृशेन साधारणेन सर्वदेशसर्वकालसुलभेन निर्दोषेण चोपायेन विपज्जलधेरुद्धृतः स्यादिति विचारयितुं श्रममनुभवन्ति ।

तच्चेदमस्मद्वचनं तात्पर्यतोन विचार्यमाणं कदाचिदस्मासूक्तविधेहत्यजनद्वेषसम्भावनामुत्पाद्य तन्निन्दापरत्वेन गृहीतं स्यात् परन्तु ते सर्वे जनाः समानदेशसंबंधात् समानभाषासंबंधात् समानपूर्वजपुरुषसंबंधात् समानकालसंबंधाच्च भ्रातरो मित्राणि च तेन विमार्गानुसरणे परस्परहितोपदेशो हिताचरणं च तेषामस्माकं च स्वाभाविकं संबंधिजनकृत्यमिति तैरस्मद्वचनं न निर्भर्त्सनमपि तु प्रबोधनमित्येव भारतवर्षीयजनानामुदयानुकूलस्येश्वरस्य कृपया मन्येतेत्यस्माकमतिमहत्याशा तस्यैव करुणया सफला भविष्यतीति शम् ।

KUMÁRA-SAMBHAVA,

WITH NOTES IN ENGLISH.

BY

REV. K. M. BANERJEA.

Calcutta: Thacker Spink & Co., London: Williams and Norgate, 1867.

It is with real pleasure that we notice another edition of Kálidása's Kumára-Sambhava, one of the most charming narrative or descriptive poems in Sanskrit, and perhaps in any language. Besides the intrinsic attractiveness of the book before as, as containing on good paper and in large neat type, a poem which combines tenderness of feeling with the most exquisite delicacy of fancy, it has the additional interest, published as it is under the auspices of the Calcutta University, of being a tangible mark of the impetus already given to Sanskrit study in India by the recent regulation of that Institution which substitutes the classical language of the Hindoos in place of their vernaculars in the Arts Examinations.

In the Preface, the Editor has drawn an interesting comparison between Sanskrit and Greek Prosody, which, though limited within the range of the metres used in the poem, reflects no small credit upon him as a Greek Scholar. The notes on the text itself, consisting of literal interpretations in English, word for word and phrase for phrase, and indicating with sufficient clearness the construction of the sentences, will not only be a help to candidates for the Calcutta University Examination (for whom the work is specially designed) but to all Sanskrit students, whether European or native, who can understand English. We have to remark, however, with reference to the notes, that they would have been still more useful, had they been accompanied with *regular* explanations of the compounds which are so essential an element of the Sanskrit language, especially of that of the Classical Poems.

Here and there in the renderings we meet with slight slips, but in justice to Kálidása we have to say, in particular, that the Reverend Editor has been incautious in charging the poet's imagination with being 'rather too exuberant' in the following description of unmarried Umá's nourishing the trees—

अतन्द्रिता सा स्वयमेव वृक्षकान्
घटस्तनप्रस्रवणैर्व्यवर्द्धयत् । V. 14.

the sense of which is, without a doubt, as Stenzler interprets it, that is to say the jars of Umá are represented as her breasts, *not* that her breasts are likened to jars. The Commentary of Mallinátha is quite explicit on this point. Stenzler was indeed wrong, along with the Pandits of the Fort William College, in his rendering of a similar stanza in Canto II of the Raghuvanśa. The denoting of the 'exemplar', as the Editor calls the object compared to, by the *second* word of a compound, is not only not 'opposed to Sanskrit idiom' but is precisely the idiom,* the reverse being true only in the *Bahuvríhi* compound, *when a simile is implied*† as in

---

* Páṇini II, 1, 56, S. K. (Táránátha's) I, 359.

† When a *metaphor* is intended, the 'exemplar' must follow in the *Bahuvríhi* too, as in III, 39.

Digitized by Google

घटस्तनी, the epithet of a woman. This very poem furnishes numerous instances of the same. We would particularly call the Editor's attention to III, 39, 27, 30, and VII, 74, the first of which stanzas has four consecutive instances. There is another stanza in Raghuvanśa, XIV, 78, similar to the verses of the Kumára-Sambhava in question, which dropping, as it does, the comparison to the breast, unmistakably conveys the meaning of Kálidása, with whom the figure, like many others, was a favourite one.

We notice a few slips in the Editor's English, such as *Konches* for *conchs* (p. 8.) &c., which we hope to see corrected in a second edition of this very meritorious School-book. Such expressions as 'young lady' and 'jolly woman' offend us in a translation of Kálidása, and we could point out other renderings nearly as objectionable. We hope that in a future edition too the Editor will be able to "pass over the reference to the 'Serpent-damsel' without making the following extract from (his) own Introduction to the *Márkandeya Puráṇa*:...............The word *nágas* is evidently the same as the *náchas* of Genesis, and we feel no difficulty in recognizing, in the Brahmanical theology, a confirmation of the Biblical account of the serpent............" We need hardly say that there cannot, by any possibility, be the slightest connection between the Aryan and the Semitic word; *nága* coming from *naga* which comes from na and gam, no and go, and náchash (not *náchas*) נָחָשׁ being an onomatopoetic word, signifying the "hisser;" the *sh* in the Hebrew word being its most important radical, the *s* in the Sanskrit word being merely a case-ending.

In spite of a few drawbacks we can strongly recommend this book to the young student.

LETTER TO THE EDITOR.

My dear Sir,

Can you kindly procure for me the following information? When I was at College, I made a note of a Hindu legend of the human race having been destroyed by the growth of a thick forest all over the world. Certain sages escaped by sheltering themselves in the sea for a time, and when they returned to the land the trees gave way before them. I cannot find any reference to this story in Wilson's Index to the Vishṇu Puráṇa. Can you tell me where it is to be found?

Yours truly,

8*th March*, 1867. WILLIAM WATERFIELD, C. S.
Allahabad.

*** Our correspondent will find the legend in the Bhágavata Puráṇa. Book iv. Ch. xxx. Sl. 44.

RÁMA AND SÍTÁ.

IV.

High on the palace roof KAIKEYÍ's maid,
The crook back MANTHARÁ, the town surveyed.
She saw the water sprinkled o'er the street,
And flowery heaps and garlands fresh and sweet:
Saw pennons playing in the scented air,
And busy Brahmans bustling here and there.
From every corner, as she gazed around,
She heard a concert of glad music sound;
While every temple shone with purest white,
That the maid marvelled at the festive sight.
She turned to RÁMA's nurse, who, standing by,
Gazed on the scene with rapture-rolling eye,
And cried, "I pray thee, aged matron, say
Does RÁMA's mother scatter gifts to-day?
Have the gods listened to KAUSALYÁ's vow,
And made the frugal queen so lavish now?"
The white-robed nurse, with transport uncontrolled,
All the glad story to the damsel told:
"To-morrow's happy light will see," she cried,
"Prince RÁMA regent by his father's side."
Down from the roof, high as KAILÁSA's head,
In furious haste the crook-back maiden sped:
Planning accursed guile, her soul aflame,
Where queen KAIKEYÍ lay asleep, she came.
"Up, queen!," she cried, "unclose thy heedless eyes,
Huge peril threatens thee, awake! arise!
Art thou still sleeping, still too blind to see
The load of misery that crushes thee?
Boast of thy husband's love, and find too late
His vaunted favour but disguises hate.
Ruin to thee and thine, thy lord has planned
To make Prince RÁMA Regent o'er the land.
In fear and grief and rage thy faithful slave
Has hither fled to warn thee and to save.
Are not my fortunes closely knit with thine?
Thy gain and peril, both, are also mine.
And thou, the scion of a royal race,
Shouldst know the frauds which royal hearts disgrace.
Poor queen, he loves thee not: thy treacherous lord
Can smile upon thee while he bares the sword:
And thy sweet soul, pure from all thought of sin,
Sees not the cruel snares that hem thee in.
Kind flattering words he makes thine empty dower,
But queen KAUSALYÁ has the wealth and power.
Far from thy side thine own dear son he sends
To live an exile with his mother's friends,
And, every rival thus removed away,
He gives to RÁMA all the royal sway.
Alas! deluded lady, thou hast pressed
A deadly serpent to thy foolish breast,
Lavishing love on him who works thee woe,
No loving husband but a mortal foe.
Nay, worse than all by snake or foeman done,

Digitized by Google

His plot against thee, lady, and thy son.
Come, rouse thee, mistress, while there yet is time,
Ensure thy safety and prevent the crime.
Up from thy careless ease, awake, and be
The saviour of thy son, thyself, and me."
Up rose KAIKEYÍ radiant with delight,
Like the calm moon upon the autumn night,
And spoke these words in answer, as she gave,
For the glad news, a necklace to the slave:
"Take this, dear damsel, thou hast earned it well:
No happier news thy pleasant tongue could tell.
I joy that RÁMA shares his father's throne:
I love KAUŚALYÁ's son e'en as I love mine own."
The handmaid's soul with grief and fury burned;
She cried in anger, as the gift she spurned:
"What! on the sea of whelming ruin tossed,
Canst thou rejoice when all but hope is lost?
Heart-sick I am, yet smile to see thy joy
When peril theatens and will soon destroy.
If thou wert wise thou scarce wouldst hail, I ween,
For king, the offspring of a rival queen.
Soon wilt thou stand in menial habit dressed,
And move obedient to her high behest.
Yea, thou wilt serve with us who serve thee now,
And see thy child before his brother bow.
Then RÁMA's wife will triumph, queen of all,
And thy poor daughter be a helpless thrall."
"The virtuous RÁMA," thus the dame replied,
"From virtue's path will never turn aside.
Obedient, grateful, pure from stain, and true,
As eldest born he only gains his due.
His lords and brethren many a year will share,
Blest in his rule, his kind paternal care:
And when a hundred years have passed away,
My son, dear BHARAT, will enjoy the sway.
I love Prince RÁMA as mine own dear son;
I see no fault to stain him, no not one.
Not to his mother could his worship be
More kind and tender than it is to me.
What though he rule, there is no cause of fear,
To him his brethren as his soul are dear:
And though in name his father's place he fill
BHARAT will share the royal sceptre still."
KAIKEYÍ ceased: the impatient maiden sighed,
And thus with tears of grief and spite replied:
"Ah queen, what frenzy has assailed thy mind,
And made thee thus to instant danger blind?
Too blind to mark the seas of grief and woe,
That o'er thy head with whelming fury flow.
For after RÁMA RÁMA's son will reign,
Nor hope of kingship for thy son remain.
One heir is monarch when a monarch dies,
El[illegible] wild confusion in the realm would rise:
And be he good or bad, the power will fall
To [illegible], the eldest born, and lord of all.
Know, tender mother, that thy son must roam,
A poor sad outcast, from his royal home.
RÁMA, when king, thy darling son will drive
An exile hence, if haply left alive.
Come take the counsel that is wise and good,
And banish RÁMA to the distant wood.
Then we who serve thee well, a faithful train,
Will hail with joy Prince BHARAT's happier reign.
How shall he, worthy of a nobler fate,
From birth the object of his brother's hate,
Poor and despised, his weathy tyrant's scorn,
Obey the mandates of the elder born?
Arise, sweet queen, to save thy child, arise!
Prostrate beneath his brother's feet he lies.
Like some young elephant, who, proud to lead
His trooping consorts through the woods to feed,
Meets with a hungry lion in the way,
And sinks in death, his ruthless victor's prey."

Rámáyana II. 7—8.

ON

THE RELATIONS OF THE PRIESTS
TO THE OTHER
CLASSES OF INDIAN SOCIETY IN THE VEDIC AGE.

BY J. MUIR ESQ.

(Continued from page 152.)

x. 107, 6. "They call him a rishi, him a ***priest***, reverend, a chanter of Sâma verses *(sâma-gâm)*, and reciter of *ukthas*,—he knows the three forms of the brilliant (Agni) —the man who first worshipped with a largess."

x. 117, 7. "A *priest*[1] who speaks is more acceptable than one who does not speak."

(See Dr. Haug's remark on this verse, Ait. Br. Introd. p. 20; also the contexts of the two last passages in my article "Miscellaneous Hymns from the R. and A. Vedas," pp. 32 f.)

x. 125, 5. "I (says Vâch) make him whom I love formidable *(ugram)*, him a *priest*, him a rishi, him a sage *(sumedhâm)*."

II. In the passages which follow the word *brahman* does not seem to signify so much a "sage or poet," as a "worshipper or priest."

i. 10, 1. "The singers *(gâyatrinah)* sing thee, the hymners *(arkinah)* recite a hymn, the *priests (brahmanah)*, O Śatakratu, have raised thee up like a pole."

(Compare i. 5, 8; i. 7, 1; viii. 16, 9. See Dr. Haug's remark on this verse, Ait. Br. Introd. p. 20).

[1] The word here seems to indicate an order or profession, as the *silent* priest is still a priest.

Digitized by Google

i. 33, 9. "Thou, Indra, with the believers, didst blow against the unbelievers, with the *priests* thou didst blow away the Dasyu."

i. 101, 5. "Indra, who is lord of all that moves and breathes, who first found the cows for the *priest*, who hurled down the Dasyu."

i. 108, 7. "When, O adorable Indra and Agni, ye are exhilarated in your own abode, or with a *priest* or prince *(brahmaṇi râjani vâ)*,[1] come thence, ye vigorous (deities), and then drink of the poured out soma."

i. 158, 6. "Dîrghatamas, son of Mamatâ, being decrepit in his tenth lustre, (though) a *priest*, becomes the charioteer of (or is borne upon) the waters which are hastening to their goal."

(Prof. Aufrecht understands this to mean that Dîrghatamas is verging towards his end, and thinks there is a play on the word "charioteer" as an employment not befitting a priest).

ii. 39, 1. "Ye (Aśvins) are like two vultures on a tree; like two *priests* singing a hymn at a sacrifice."

iv. 50, 7 ff. "That king overcomes all hostile powers in force and valour who maintains Bṛihaspati in abundance, who praises and magnifies him as (a deity) enjoying the first distinction. 8. He dwells prosperous in his own palace, to him the earth always yields her increase,[2] to him the people bow down of themselves,—that king in whose house a *priest* walks first[3] *(yasmin brahmâ râjani pûrva eti)*. 9. Unrivalled, he conquers the riches both of his enemies and his kinsmen—the gods preserve the king who bestows wealth on the *priest* who asks his assistance."[4]

(The benefits resulting from the employment of a domestic priest *(purohita)* are also set forth in A. V. iii. 19, translated in my former article, "Miscellaneous Hymns from the R. and A. Vedas," in the volume of this Journal, p. 33).

iv. 58, 2. "Let us proclaim the name of butter *(ghṛta)*, let us at this sacrifice hold it (in mind) with prostrations. May the *priest* (Agni?) hear the praise which is chanted. The four-horned bright-coloured (god) has sent this forth."

[1] A distinction of orders or professions appears to be here recognized. In the following verse (v. 54, 7) a *rishi* and a prince are distinguished much in the same way as a *priest* and king are in i. 108, 7: "That man, whether rishi or prince, whom ye, O Maruts, support, is neither conquered nor killed, he neither decays nor is distressed, nor is injured; his riches do not decline, nor his support." Compare v. 14, where it is said, "Ye, O Maruts, give riches with desirable men, ye protect a rishi who is skilled in hymns *(sâma-vipra)*; ye give a horse and food to Bharata, ye make a king prosperous." In iii. 43, 5, reference is found to Visvâmitra, or the author, being made by Indra both a prince and a rishi.

[2] Compare R. V. v. 37, 4 f.

[3] Compare viii. 69, 4; x. 39, 11; x. 107, 5; and the word *purohita*, used of a ministering priest as one *placed in front*. Prof. Aufrecht, however, would translate the last words, "under whose rule the *priest* receives the first or principal portion."

[4] See on this passage Roth's Art. on Brahma and the Brâhmans, *Journ. Germ. Or Soc.*, i. 77 ff. See also Aitareya Brâhmaṇa viii. 26.

v. 29, 3. "And, ye Maruts, *priests*, may Indra drink of this my soma which has been poured out," etc.

v. 31, 4. "The men[1] have fashioned a car for thy (Indra's) horse, and Tvashṭṛ a gleaming thunderbolt, O god greatly-invoked. The *priests*, magnifying Indra, have strengthened him for the slaughter of Ahi."

v. 32, 12. "I hear of thee thus rightly prospering and bestowing wealth on, the sages *(viprebhyah)*. What do the *priests*, thy friends, obtain who have reposed their wishes on thee, O Indra?"

v. 40, 8. "Applying the stones (for pressing soma), performing worship, honouring the gods with praise and obeisance, the *priest* Atri placed the eye of the sun in the sky, and swept away the magical arts of Svarbhânu."

vii. 7, 5. "The chosen bearer (of oblations), Agni, the *priest*, having arrived, has sat down in a mortal's abode, the upholder."

vii. 33, 11. "And thou, O Vasishṭha, art a son of Mitra and Varuṇa (or a Maitravaruṇa-priest), born, O *priest*, from the soul of Urvaṣî. All the gods placed in the vessel thee, the drop which had fallen through divine contemplation."

vii. 42, 1. "The *priests*, the Angirases, have arrived," etc.

viii. 7, 20. "Where now, bountiful (Maruts), are ye exhilarated, with the sacrificial grass spread beneath you? What *priest* is serving you?"

viii. 17, 2 f. "Thy tawny steeds with flowing manes, yoked by prayer *(brahma-yujâ)*,[2] bring thee hither, Indra; listen to our prayers. 3. We *priests*, offerers of soma, bringing oblations, continually invoke the drinker of soma."

viii. 31, 1. "That *priest* is beloved of Indra who worships, sacrifices, pours out libations, and cooks offerings."

viii. 32, 16. "There is not now any debt due by the active *priests* who pour out libations. Soma has not been drunk without an equivalent."

viii. 33, 10. "Look downward, not upward; keep thy feet close together; let them not see those parts which should be covered; thou, a *priest*, hast become a woman."

viii. 45, 39. "I seize these thy tawny steeds, yoked by our hymn *(vacho-yujâ)* to a splendid chariot, since thou didst give (wealth) to the *priests*."

viii. 53, 7. "Where is that vigorous, youthful, large-necked, unconquered (Indra?) What *priest* serves him?"

viii. 66, 5. "Indra clove the Gandharva in the bottomless mists, for the prosperity of the *priests*."

[1] Ṛbhus?

[2] Compare viii. 45, 39, below.

Digitized by Google

viii. 81, 30. "Be not, O lord of riches (Indra), sluggish like a *priest*.[1] Be exhilarated by the libation mixed with milk."

viii. 85, 5. "When, Indra, thou seizest in thine arms the thunderbolt which brings down pride, in order to slay Ahi, the (aerial) hills and the cows utter their voice, and the *priests* draw near to thee."

ix. 96, 6. "Soma, resounding, overflows the filter, he who is *priest* among the gods, leader among poets, rishi among the wise, buffalo among wild beasts, falcon among kites, an axe among the woods."

ix. 112, 1. "Various are the thoughts and endeavours of us different men. The carpenter seeks something broken, the doctor a patient, the *priest* some one to offer libations.[2]

ix. 113, 6. "O pure Soma, in the place where the priest, uttering a metrical hymn, is exalted at the soma sacrifice through (the sound of) the crushing-stone, producing pleasure with soma, O Indu (soma) flow for Indra."

x. 28, 11. (The word *brahmaṇah* occurs in this verse, but the sense is not clear).

x. 71, 11. (See translation of this verse below, where the entire hymn is given).

x. 85, 29. "Put away that which requires expiation (?) Distribute money to the *priests*. 35. Behold the forms of Súryá. But the *priest* purifies them."

x. 141, 3. "With hymns we invoke to our aid king Soma, Agni, the Ádityas, Vishṇu, Súrya, and Bṛhaspati, the *priest*.

III. In the following passages the word *brahman* appears to designate the special class of priest so called, in contradistinction to *hotri*, *udgátri*, and *adhvaryu*.

ii. 1, 2 (=x. 91, 10). "Thine, Agni, is the office of *hotri*, thine the regulated office of *potri*, thine the office of *neshṭri*, though art the *agnidh* of the pious man, thine is the office of *prasástri*, thou actest as *adhvaryu*, thou art the *brahman*, and the lord of the house in our abode. 2. Thou, Agni, art Indra, the chief of the virtuous, thou art Vishṇu, the wide-stepping, the adorable, thou, O Brahmaṇaspati, art the *priest (brahmá)*, the possessor of wealth, thou, O sustainer, art associated with the ceremonial."

iv. 9, 3. "He (Agni) is led round the house, a joyous *hotri* at the ceremonies, and sits a *potri*. 4. And Agni is a wife (*i. e.* a mistress of the house) at the sacrifice, and a master of the house in our abode, and he sits a *brăhmăn*."

x. 52, 2. "I have sat down an adorable *hotri;* all the gods, the Maruts, stimulate me. Day by day ye Aşvins, I have acted as your *adhvaryu;* the *brahman* is he who kindles the fire: this is your invocation."

I shall now bring forward the whole of the texts in which the word Brâhmăṇa, meaning a son, or descendant, of a *brăhmăn*, occurs in the Rig-veda.[1] They are the following:

i. 164, 45. "Speech consists of four defined grades. These are known by those Brâhmans who are wise. They do not reveal the three which are esoteric. Men speak the fourth grade of speech."

This text is quoted and commented upon in Nirukta xiii. 9.

vi. 75, 10. "May the Bráhman fathers, drinkers of soma, may the auspicious, the sinless, heaven and earth, may Púshan preserve us," etc. etc.

vii. 103, 1 (=Nirukta 9, 6). "After lying quiet for a year, those rite-fulfilling Bráhmans[2] the frogs have (now) uttered their voice, which has been inspired by Parjanya...7. Like Bráhmans at the Atirátra soma rite, like (those Bráhmans) speaking round about the full pond (or soma-bowl[3]) you frogs surround (the pond) on this day of the year, which is that of the autumnal rains. 8. These soma-offering Bráhmans (the frogs) have uttered their voice, performing their annual devotion *(brahma);* these adhvaryu priests sweating with their boiled oblations (or in the hot season) come forth from their retreats like persons who have been concealed."

x. 16, 6. "Whatever part of thee any black bird, or ant, or serpent, or wild beast has mutilated, may Agni cure thee of all that, and Soma who has entered into the Bráhmans."[4]

x. 71, 1.[5] "When, O Bṛhaspati, men first sent forth

[1] Dr. Haug (Introd. to Ait, Br. p. 20) refers to Ait. Br. v. 34, as illustrating this reproach. See p. 376 of his translation. This verse clearly shows that the priests formed a professional body.

[2] This verse also distinctly proves that the priesthood already formed a professon. Verse 3 of the same hymn is as follows: "I am a poet, my father a physician, my mother a grinder of corn." Unfortunately there is nothing further said which could throw light on the relations in which the different professions and classes of society stood to each other.

[1] There are two more texts in which the word *bráhmaṇa* is found, viz., i. 15, 5, and ii. 36, 5, on which see the following note. The word *brahmaputra*, son of a brahman, is found in ii. 43, 2: "Thou O bird, singest a sáma verse like an *udgátri;* thou singest praises like the son of a *brahman* at the libations."

[2] In the Nighantus. iii. 13, these words *brahmaṇá vrata-chárinah* are referred to as conveying the sense of a simile, though they are unaccompanied by a particle of similitude. In his Illustrations of the Nirukta, p. 126, Roth thus remarks on this passage: "This is the only place in the first nine mandalas of the R. V. in which the word Bráhmaṇa is found with its later sense, whilst the the tenth mandala offers a number of instances. This is one of the proofs that many of the hymns in this book were composed considerably later (than the rest of the R. V.). The word *bráhmaṇa* has another signification in i. 15, 5; ii. 36, 5; and vi. 75, 10. (In the first of these texts, Roth assigns to the word the sense of the Bráhman's soma-vessel. See his Lexicon, *s. v.* It does not appear what meaning he would give to the word in vi. 75, 10. He has in this passage overlooked R. V. i. 164, 45, which, however, is duly adduced in his Lexicon). See Wilson's translation of the hymn; as also Müller's, in his Anc. Sansk. Lit. p. 494 f.

[3] *Saras.* See R. V. viii. 66. 4, quoted in Nirukta v. 11, where Yáska says, "The ritualists inform us that at the mid-day oblation there are thirty *uktha* platters destined for one deity, which are then drunk at one draught. These are here called *saras*." (Compare Roth's Illustrations on the passage.) See also R. V. vi. 17, 11, and viii. 7. 10, with Sáyana's explanations of all three passages).

[4] Compare A. V. vii. 115, 1 ff—xii. 5, 6.

[5] I cannot pretend that I am satisfied with the translation I have attempted of this very difficult hymn. Verses 4 and 5 are explained in Sáyaṇa's Introduction to the Rig-veda, pp. 30 f., of Müller's edition.

Digitized by Google

the earliest utterance of speech, giving a name (to things), then all that was treasured within them, most excellent and pure, was disclosed through love.

2. =Nirukta iv. 10). "Wherever the wise,—as if cleansing meal with a sieve,—have uttered speech with intelligence, there friends recognize acts of friendliness; good fortune[6] dwells in their speech.[1]

3. "Through sacrifice they came upon the track of speech, and found her entered into the rishis. Taking, they divided her into many parts:[2] the seven poets celebrate her in concert."

4. (=Nir. i. 19.) "And one man, seeing, sees not speech, and another, hearing, hears her not;[3] while to a third she discloses her form, as a loving well-dressed wife does to her husband."

5. (=Nir. i. 20.) "They say that one man has a sure defence in (her[4]) friendship; he is not evercome even in the conflict (of discussion). But that person consorts with a vain delusion who has listened to speech without fruit or flower."

6. "He who abandons a friend who understands friendship, has no portion whatever in speech. All that he hears, he hears in vain, for he knows not the path of righteousness."

7. "Friends gifted both with eyes and ears have proved unequal in mental efforts. Some have been (as waters) reaching to the face or armpit, while others have been seen like ponds in which one might bathe."

8. (=Nir. xiii. 13.) "When Bráhmans who are friends strive (?) together in efforts of the mind produced by the heart,[5] they leave one man behind through their acquirements, whilst others walk about boasting to be priests." (This is the sense Prof. Aufrecht suggests for the word *ohabráhmáṇah.* Prof. Roth *s. v.* thinks it may mean "real *priests.*" The author of Nirukta xiii 13, explains it as meaning "reasoning *priests,*" or "those of whom reasoning is the sacred science.")

9. "The men who range neither near nor far, who are neither (reflecting) Bráhmans nor yet pious worshippers at libations,—these, having acquired speech, weave their web imperfectly, (like) a female weaver,[6] being destitute of skill."

10. "All friends rejoice at the arrival of a renowned friend who rules the assembly; for such a one, repelling evil, and bestowing nourishment upon them, is thoroughly prepared for the conflict (of discussion)."

11. (Nir. i. 8.) "One man possesses a store of verses *(ṛchám);* a second sings a hymn *(gáyatra)* during (the chanting of) the *śakvarís;* one who is a *priest (brahman)* declares the science of being *(játa-vidyám),* whilst another prescribes the order of the ceremonial.[1]

R. V. x. 88, 19 (=Nir. vii. 31). "As long as the fair-winged Dawns do not array themselves in light, O Mátariṣvan, so long the Bráhman coming to the sacrifice, keeps (the fire), sitting below the hotri-priest."

(See Prof. Roth's translation of this verse in his Illustrations of the Nirukta, p. 113).

x. 90, 11 (=A. V. xix. 5, 6; Váj. S. xxxi.). "When they divided Purusha, into how many parts did they distribute him? What was his mouth? what were his arms? what were called his thighs and feet? 12. The Bráhman was his mouth, the Rájanya was made his arms, that which was the Vaiṣya was his thighs, the Śúdra sprang from his feet."

(See the translation of this entire hymn in Sanskrit Texts, i. 6 ff.; and in my paper on "The Progress of the Vedic Religion," in Journal Roy. As. Soc. vol. i. new series, pp. 353 ff.).

x. 97, 22. "The plants converse with king Soma,[2] (and say), "for whomsoever a Bráhman acts (*kṛṇoti,* officiates), him, O king, we deliver."

x. 109, 1. "These (deities), the boundless, liquid Mátariṣvan (Air), the fiercely-flaming, ardently-burning, beneficent (Fire), and the divine primeval Waters, first exclaimed against the outrage on a *priest (brahma-kilbishe).* 2. King Soma,[3] unenvious, first gave back the priest's wife; Varuṇa and Mitra were the inviters; Agni, the invoker, brought her, taking her hand. 3. When restored, she had to be received back by the hand, and they then proclaimed aloud, 'This is the *priest's* wife; she was not committed to a messenger to be sent:—in this way it is that the kingdom of a ruler (or Kshattriya) remains secured to him.[4] 4. Those ancient deities, the Rishis, who sat down to perform austerities, spoke thus of her, 'Terrible is the wife of the Bráhman; when approached, she plants confusion in the highest heaven.[5] 5. The Brahmachárin[6] (religious student) con-

[1] I quote here as somewhat akin to this hymn another from the A. V. vi. 108, being a prayer for wisdom or intelligence. 1. "Come to us, wisdom, the first, with cows and horses: (come) thou with the rays of the sun; thou art to us an object of worship. 2. To (obtain) the succour of the gods, I invoke wisdom the first, full of prayer, inspired by prayer, praised by rishis, imbibed by Brahmachárins 3. We introduce within me that wisdom which Ṛbhus know, that wisdom which divine beings *(asuráh)* know, that excellent wisdom which rishis know. 4. Make me, O Agni, wise to-day with that wisdom which the wise rishis —the makers of things existing—know. 5. We introduce wisdom in the evening, wisdom in the morning, wisdom at noon, wisdom with the rays of the sun, and with speech" *(vachasá).*

[2] Compare x. 125, 3; i. 164, 45; (x. 90, 11); and A. V. xii. 1, 45.

[3] Compare Isaiah vi. 9, 10; and Matthew xiii. 14, 15.

[4] *Yák-sakhye,* Yáska.

[5] Compare i. 171, 2; ii. 35, 2; vi. 16, 47.

[6] Such is the sense which Prof. Aufrecht thinks may, with probability, be assigned to *siris,* a word which occurs only here.

[1] According to Yáska (Nir. i. 8), these four persons are respectively the *hotri, udgátri, brahman* and *adhvaryu* priests. The brahman, he says, being possessed of all science, ought to know everything; and gives utterance to his knowledge as occasion arises for it *(játe játe).* See Dr. Haug's remarks on this verse. Ait. Br. Introd. p. 20.

[2] Compare *oshadhíh Soma-rájníh,* "the plants whose king is Soma," in *vv.* 18 and 19 of this hymn.

[3] Compare R. V. x. 85, 8 f., 40 f.; and my contributions to Vedic Mythology, No. ii., p. 2 f.

[4] I am indebted to Prof. Aufrecht for this explanation of the verse.

[5] See R. V. i. 164, 34, 35, above.

[6] See my paper on the Progress of the Vedic religion, pp. 374 ff.

Digitized by Google

tinues to perform observances. He becomes one member[1] of the gods. Through him Bṛhaspati obtained his wife, as the gods obtained the ladle which was brought by Soma. 6. The gods gave her back, and men gave her back; kings, performing righteousness, gave back the *priest's* wife. 7. Giving back the *priest's* wife, freeing themselves from sin against the gods, (these kings) enjoy the abundance of the earth, and possess a free range of movement."

This hymn is repeated in the Atharva-veda, with the addition of ten more verses, which I subjoin.

Atharva-veda, v. 17.

(*vv.* 1-3=*vv.* 1-3 of R. V. x. 109).

4. "That calamity which falls upon the village, of which they say, 'this is a star with dishevelled hair,' is in truth the *priest's* wife, who ruins the kingdom which is visited by a hare attended with meteors."

(*vv.* 5-6=*vv.* 5-4 of R. V. x. 109).

7. "Whenever any miscarriages take place, or any moving things are destroyed, whenever men slay each other, it is the *priest's* wife who kills them. 8. And when a woman has had ten former husbands not Bráhmans, if a *priest (brahmá)* take her hand (*i.e.* marry her), it is he alone who is her husband. 9. It is a Bráhman only that is a husband, and not a Rájanya, or a Vaiṣya. That (truth) the Sun goes forward proclaiming to the five classes of men *(panchabhyo mánanebhyah.*"

(*vv.* 10-11=*vv.* 6-7 of R. V. x. 109).

12. "His (the king's) wife does not repose opulent *(śatavâhí)* and handsome upon her bed, in that kingdom where a *priest's* wife is foolishly shut up. 13. A son with large ears *(vikarṇah)* and broad head is not born in the house in that kingdom, etc. 14. A charioteer with golden neckchain does not march before the king's hosts (?)[2] in that kingdom, etc. 15. A white horse with black ears does not make a show, yoked to his (the king's) chariot in that kingdom, etc. 16. There is no pond with blossoming lotuses in his (the king's) grounds in that kingdom where, etc. 17. His (the king's) brindled cow is not milked by his milkmen in that kingdom, etc. 18. His (the king's) milch cow does not thrive, nor does his ox endure the yoke, in that country where a Bráhman passes the night wretchedly without his wife."

I will now refer to a number of texts in which liberality to the authors of the hymns is mentioned with approbation.

Of these passages i. 125; i. 126; v. 27; v. 30, 12 ff.; v. 33, 8 ff.; v. 61, 10; vi. 27, 8; and vi. 47, 22 ff., may be consulted in Prof. Wilson's translation; and a version of R. V. x. 107 will be found in my article, "Miscellaneous Hymns from the Rig and Atharva Vedas," p. 32 f. The following are further instances:[1]—

[1] See A. V. x. 7, 1 ff., 9, 26.

[2] The word here in the orginal is *súnánám*, with which it is difficult to make any sense. Should we read *senánám*?

vii. 18, 22 ff. "Earning two hundred cows and two cars with mares, the gift of Sudás the grandson of Devavat and son of Pijavana, I walk about, as a priest does round a house, offering praises. 23. The four robust richly caparisoned brown[2] horses of Sudás, the son of Pijavana, standing on the earth, carry me, son to son,[3] onward to renown in perpetuity." (See the translation of these verses in Roth's Litt. u. Geschichte des Weda, p. 100.) In i. 126, 3, and vi. 27, 8, also, the word *vadhúmantah* is used as here, and is probably to be taken in the first of these passages of mares, and in latter of cows, *vinśatim gá vadhúmanto*, being "twenty bulls with their cows." The same sense of cows or mares is probably to be understood in viii. 19, 36. That the preceding passages refer to the females of bulls or horses is made likely by comparing viii. 57, 17, which will be quoted below. In viii. 46, 37, however, reference is distinctly made to the gift of a woman *(yoshaṇá)*

viii. 3, 21. "(The horse?) which Indra, the Maruts, and Pákasthâman, the son of Kurayáṇa, gave to me, the most brilliant of all, like (the sun) careering in the sky. 22. Pákasthâman gave me a tawny (horse), well broken in, and filling his traces, an indication of riches. 23. Like to which other ten swift steeds also bear the yoke, like those which carried the son of Tugra to his home. 24. Soul, food, body, raiment, the giver of vigour, and ornament—(all this Pákasthâman is). I celebrate him as the fourth liberal bestower of a tawny horse."

[1] The fourth volume of Professor Wilson's Rig-veda, edited by Mr. Cowell, having been published since this paper was written, the reader may compare his verson of such of the following passages as are included in it with mine.

[2] The word here rendered is *smaddishṭayah.* In his explanation of this passage Sáyaṇa considers it to mean *praśastátisarjanaśraddhádidánángayutkáh. i. e.* "possessing the approved constituents of a gift, viz., generosity, faith," etc. It occurs in three other texts, viz., in iii. 45, 5, as an epithet of Indra, where Sáyaṇa takes it to signify *bhadravákya,* "speaking auspicious words;" in vi. 63, 9, where he takes it as—*praśasta-darsanán,* "of approved look;" and in x. 62 9, Prof. Aufrecht considers the word to mean "strong," "robust" a sense which suits the context of iii. 45, 5 (where it cannot possibly bear the interpretation assigned by Sáyaṇa on vii. 18, 23), and apparently also that of x. 62, 9. From the etymology (apparently *smat* for *sumat,* "good" or "well," and *dishṭi,* "pleasure" or "good luck,") one would suppose it ought to mean "blessed" or "fortunate," a sense which might also suit the context of iii. 45, 5.

[3] *Tokam tokáya.* The sense is obscure.

(To be continued.)

Communications of a literary nature should be addressed to the Editor : *all letters on business, to the Proprietors,* Messrs. E. J. Lazarus & Co., *to whom Drafts should be made payable.* Advertisements *will be charged for according to the space occupied.*

The PANDIT may be ordered of the Publishers, or through Messrs. Trübner and Co., London.

Annual subscription, in advance, including postage, Rs. 12.

PRINTED AND PUBLISHED BY E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

षड्दर्शनमयूखः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 12. Benares May 1st, 1867. Vol. I.

॥ प्रकरणपञ्चिकायां प्रमाणपारायणे ॥

॥ अभावसंभवैतिह्यप्रामाण्यनिराकरणं नाम ॥

॥ षष्ठः परिच्छेदः ॥

ये पुनरभावाख्यं षष्ठं प्रमाणमिच्छन्ति तत्प्रतिबोधनाय सम्प्रति यत्न आरभ्यते । तथाहि । सर्वं प्रमाणं प्रमेयाविनाभावि । नचाभावाख्यस्य प्रमाणस्य प्रमेयं किंचित् प्रतीतिमवतरितुम् । एवमभावाख्यमपि प्रमाणं न शक्नोति स्वसामर्थ्येनैव प्रमेयमुपकल्पयितुं । तथाहि । इह भूतले घटो नास्तीति तावदस्ति प्रतीतिः सा तावद्भूतलमात्रविषया न भवति सत्यपि घटे प्रसङ्गात् । अथ केवलभूतलविषयेत्युच्यते । तथापि चिन्तनीयं । किमिदं कैवल्यं । यदि तावद्भूतलस्वरूपमेव तदा सत्यपि घटे तस्यानपायान्नास्तीति धीः स्यात् । अथ भूतलधर्मः कैवल्यम् । अस्ति तर्हि प्रमेयं कैवल्यं । तच्चेदं विचारणीयं । किं तत् प्रत्यक्षादिबोध्यमुत प्रमाणान्तरप्रमेयमिति । तत्र प्रत्यक्षप्रमेयं तावन्न भवति । इन्द्रियव्यापारमन्तरेण प्रतीतेः । नन्विदमयुक्तं । व्यापृतेन्द्रिय एव हीह भूतले घटो नास्तीत्यवबुध्यते नान्धादिः । अत्रोच्यते । क्वचित् कस्यचिदभावः प्रतीयते तेन यत्राभावः प्रत्येतव्यस्तद्ग्रहणायेन्द्रियव्यापारापेक्षा नाभावग्रहणाय । कथं पुनरयं विभागोऽवसीयते । उच्यते । भावग्रहणमात्रोपरतेन्द्रियव्यापारस्याप्यभावप्रतीतिदर्शनाद्भावमात्र एवेन्द्रियव्यापारापेक्षेति विज्ञायते । तथाहि । स्वरूपमात्रेण गृहादिकं प्रतिपन्नवतो देशान्तरगतस्यापि तत्र भावान्तरसत्तां जिज्ञासमानस्याभावावगमो जायते नच शक्यते वक्तुं गृहीत एव तथापि प्रागेवाभाव इति । भावान्तरस्यैव तदानीं बुद्ध्यनारोहात् । तेनेन्द्रियव्यापारानपेक्षाऽभावप्रतीतिर्नैन्द्रियकीति न प्रत्यक्षमेयं कैवल्यं । नच वाच्यं प्रवृत्तिनिवृत्ती द्वे गती सर्वप्रमाणानां तत्र प्रवर्तमानं प्रमाणं भावसाधकं निवर्तमानं त्वभावसिद्धिनिबन्धनमिति । या निवृत्तिः प्रमाणस्य स्वतस्तावदवगतिरूपा न भवति सा कथमभावसिद्धिमाविर्भावयति । प्रवृत्तिस्तु प्रमाणानामवगमात्मिका तावद्व्यवस्थापयितुमलम् । अथ प्रमाणनिवृत्तिरवगत्यन्तरं जनयित्वाऽभावं व्यवस्थापयति । आयातं तर्हि प्रमाणान्तरं । भवतु प्रत्यक्षात् प्रमाणान्तरम् । अनुमानात् तु भेदो नास्ति । दृश्यस्य हि सत्त्वं दर्शनेन व्याप्तं । दर्शनं निवर्तमानं दृश्यमपि निवर्तयति । व्यापकनिवृत्तिर्हि व्याप्यनिवृत्त्या व्याप्ता । व्याप्याच्च व्यापकावगतिरनुमानमेव भवति । तदिदमयुक्तं । सर्वत्र हि व्याप्यं व्यापकं चावगम्य व्याप्तिरवसीयते । इह च व्याप्या च व्यापिका च निवृत्तिरेव । सा चाभावात्मिका न भावग्राहकप्रमाणावसेयेति न व्याप्त्यवधारणं संभवतीति कथमनुमानता । लिङ्गभूतप्रमाणनिवृत्त्यनवक्लृप्तेश्चानुमानत्वासंभवः । तस्माद्भावग्राहकप्रमाणानुत्पत्तिरेवाभावाख्यमं प्रसूते । तच्चाभावाख्यं प्रमाणं । यद्भावग्रहणयोग्यं तन्निवृत्तिरेवाभावमवबोधयतीति नातिप्रसङ्गदोषोऽत्र जायते । अतोऽभावाख्यमपि प्रमाणं स्वमहिम्नैव विषयमुपकल्पयति भावग्राहकप्रत्यक्षादिप्रमाणपञ्चकवत् । अपिच कण्टकादिविरहिणि भूतलादौ यो निःशङ्कः पादन्यासादिव्यवहारः प्रवर्तते स तावद्भूतलमात्रपरिच्छेदनिबन्धनो नाभ्युपगमनीयः । कण्टकादिसंयोगिन्यपि प्रसङ्गात् । अथ केवलभूतलादिपरिच्छेदनिबन्धन इत्युच्यते । तथापि

विकल्पनीयं । किं केवलस्य भूतलादेः परिच्छेदाद्व्यवहारप्रवृत्तिः । अथ केवलाद्भूतलपरिच्छेदादिति । तत्राद्यिमपक्षपरिग्रहे भूतलादिस्वरूपातिरिक्तकैवल्यपरिच्छेदाभ्युपगमादङ्गीकृतमभावस्य प्रमेयत्वं । पश्चिमपक्षावलम्बने तु भूतलमात्रपरिच्छेदे जाते श्लक्ष्णेषु कण्टकादिष्वनवगतेषु व्यवहारो यदि प्रवर्तते तदा सूक्ष्मकण्टकजिज्ञासा निष्फला भवेत् । प्रयत्नपूर्विकयापि हि जिज्ञासया केवलभूतलपरिच्छेद एव लब्धव्यः । स चेद्विनापि प्रयत्नं लब्धो निष्फलं प्रयत्नपूर्वकं सूक्ष्मकण्टकाद्यन्वेषणं । कैवल्यपरिच्छेदपूर्वके तु व्यवहारे कैवल्यपरिच्छेदस्य प्रयत्नमन्तरेणाशक्यत्वाद्युक्त एव प्रयत्नः । दृश्यादर्शनं ह्यभावावगमकारणं । नच सूक्ष्माः कण्टकादयः प्रयत्नमन्तरेण दृश्यतामापाद्यन्त इति दृश्यत्वापत्तये युक्तैव प्रयत्नपूर्विका जिज्ञासा । अपिच शशादीनां शृङ्गाद्यनुमानं स्यादभावस्यापरिच्छेद्यत्वात् । अभावस्य तु प्रमेयत्वे बाधितविषयत्वेनानुमाननिरोधो युक्त इति । उच्यते । द्वयी भूतलादिभावानामवगतिः । एका तावद्भावान्तरसंसृष्टविषया । अपरा च तदेकविषया । यापि च सा तदेकविषया बुद्धिः । सा च द्वेधा । तदन्येषु भावान्तरेषु तत्सङ्गिषु दृश्येष्वदृश्येषु च । तत्र येयं दृश्येषु प्रतियोगिषु बुद्धिः सैव तेषां प्रतियोगिनामभाव इत्युच्यते । योऽपि हि प्रमेयमभावमाह सोऽपि प्रतियोगिषु दृश्येषु तदेकविषयां बुद्धिं तावदवश्यमभ्युपैति न हि संसृष्टविषयबुद्ध्युदयेनाप्यदृश्ये प्रतियोगिन्यभावोऽवगम्यते । किंच दृश्यादर्शनमभावावगमे प्रमाणं । नच प्रमाणमन्तरेण प्रमेयसिद्धिरस्तीति यत्राभावोऽभ्युपगमनीयस्तत्रावश्यं दृश्यादर्शनमाश्रयणीयं । तुल्योपलम्भयोग्यस्य चार्थान्तरदर्शनेन दृश्यानुपलम्भोऽवधार्यते । अतो दृश्यप्रतियोगिविषया तदेकोपलब्धिरेव वरमभावोऽस्तु । ननु यत्राभावो नास्ति कथं तर्हि यत्र प्राक्संसृष्टबुद्धिरासीत् तत्र तदेकविषया बुद्धिराविर्भवति प्रध्वंसाभावाभ्युपगमे तु सा स्यात् । अपिच विनापि तदेकविषयां बुद्धिमभावावगतिरस्ति । अनुमानाद्येकविषयाणां भावानामनुमानाद्यभावेऽभावो दृश्यते । तत्र तुल्योपलम्भयोग्यभावान्तरैकविषया बुद्धिर्नास्त्यथ चाभावोऽवगम्यत इति तदेकविषयबुद्धिव्यतिरेकेणाप्यभावोऽवगम्यते । अत्राभिधीयते । यस्यापि मते प्रध्वंसाभावः स्वीक्रियते तमपि प्रति पर्यनुयोगोऽयं शक्यते यस्य यत्र भाव आसीत् कथं तस्य तत्राभाव इति । स चेत् पर्यनुयुक्तो ब्रूते यत् कारणोपनिपातवशेन तस्मिन्नेवाभावो जायते ततो वयमपि वदितुं शक्ताः । कारणोपनिपातादेव तदेकविषया बुद्धिराविर्भवतीति । यथैव स वादी प्रध्वंसाभावस्य कारणमाह तथैव तदेकविषयाया बुद्धेरपि वयं वदितुं क्षमाः । अथोच्यते । मुद्गराभिघातादिः क्षणिकोऽभावस्य कारणं स कथं कालान्तरे तदेकविषयां बुद्धिं जनयति । हन्त तर्हि कपालाद्युत्पत्तिस्तदेकविषयबुद्धिकारणमस्तु । एतेन देशान्तरनीते वस्तुनि तदेकविषया बुद्धिर्व्याख्याता । अत्रापि देशान्तरं नीतस्य तत्र स्थितिरेव तदेकविषयबुद्धिनिमित्तमित्याश्रयणीयं । ननु च भवतु स्वकारणोपनिपातात् तदेकविषया बुद्धिः संसृष्टविषयापि तु किमिति न स्यात् । तस्याः कारणविनाशात् सा न स्यादिति चेत् । अङ्गीकृतस्तर्हि नाशापरपर्यायोऽभावः । उच्यते । न वयमपि संसृष्टबुद्धेः कारणविनाशमभावं ब्रूमः किंतु भावान्तरोदय एव कारणविनाश इति ब्रूमः । ननु निरन्वयविनाशानां बुद्ध्यादीनां कस्य भावान्तरस्योदयो विनाशः । उच्यते । धर्मिणः स्वरूपमात्रेणावसानं तत्र भावान्तरं । ननु किमिदं स्वरूपमात्रं । न तावत् स्वरूपमेव तस्य धर्मोदयकालेऽप्यविनाशात् । तस्माद्धर्माभाव एव धर्मिणः स्वरूपमात्रमित्यङ्गीकरणीयम् । उच्यते । न भावातिरिक्तोऽभावोऽङ्गीक्रियते भाव एव स्वैकाकी सद्वितीयश्चेति द्वयीमवस्थामनुभवति । तत्रैकाकी भावः स्वरूपमात्रमुच्यते । योऽपि चाभावाख्यं तत्त्वान्तरमभ्युपैति तेनापि तावदेकाकिभावोपलम्भनमाश्रित्याभावप्रमितिरङ्गीकरणीया । न ह्यप्रतीते भावेऽभावः प्रतीयते । तत्र कीदृशस्य तावद्भावस्य प्रतीतिरभावावगतौ निमित्तमिति चिन्तनीयं । किं सद्वितीयस्याथ भावविशिष्टस्याथवा भावाभावानपेक्षस्यैकाकिन इति । तत्र न तावत् सद्वितीयस्य भावपुरःसरमभावज्ञानं संभवति विद्यमानस्यैवाभावावगमप्रसङ्गात् । नाप्यभावविशिष्टभावावसायनिमित्ताभावावगतिः । आत्माश्रयदोषप्रसङ्गात् । अभावं हि प्रतीत्य तद्विशिष्टं भावमवसायाभावः प्रतिपत्तव्य इत्यभावावगतिरेवाभावबोधोदये कारणमिति व्यक्तमात्माश्रयत्वं । किंचाभावप्रतीत्यनुप्रवेशिन्यां भावावगतौ नाभावाख्यं प्रमाणान्तरं स्यात् ।

स्वरूपमात्रदृष्टं हि वेश्माद्यर्थे स्मरन् पुनः ।
तत्रान्येनास्तितां पृष्टस्तदैव प्रतिपद्यते ॥

इत्यभावस्य प्रमाणान्तरत्वे युक्तिः । प्राक्तनस्वरूपावगतावेव चेदभावोऽपि प्रतीतो न प्रमेयमवशिष्यते । प्रमेयानवशेषे न प्रमाणान्तरमवकल्पते । तस्मादेकाकिभावप्रतीतेरेकाकिन्येवाभावप्रतीतिर्निमित्तमित्यास्थेयम् । अतोऽप्रतीतेऽप्यभावे स्वरूपमात्रं प्रतीयत इतीतरेतराभावो मात्रशब्देन प्रतिपद्यत इति । अतो भावान्तरोदयादेव तदेकविषयबुद्ध्युदयः । संसृष्टबुद्ध्यनुदयोऽपि स एवेति न किंचिद्दूषणं । यच्च तदेकविषयबुद्धिव्यतिरेकेणाप्यभावोऽवगम्यत इत्युक्तम् । अत्रोच्यते । न प्रत्यक्षरूपैव तदेकविषयबुद्धिरभावरूपेष्यते किंत्वनुमानाद्यात्मिकापि तदेकविषया बुद्धिरुत्पद्यते । सैवाभावो व्यपदिश्यते । ननु च तदेकविषया यदि बुद्धिरभावः कथं तर्हि घटाभावादिव्यवहारः । न हि तस्याः

Digitized by Google

कश्चिदपि घटादिभिः सह संबन्धोऽस्ति। उच्यते। न तदेकविषयबुद्धिमात्रमभावोऽभिधीयते किंतु दृश्ये प्रतियोगिनि या तदेकविषया बुद्धिः सा तदभावो व्यपदिश्यते। तेन यस्मिन् प्रतियोगिनि दृश्ये या तदेकविषया बुद्धिः सा तदभाव इति विशेषव्यपदेशः प्रवर्तते। तेनेह भूतले घटो नास्तीति किमुक्तं भवति दृश्येऽपि घटे भूतलमात्रमुपलभ्यत इति। तदेकविषया च संवित्तिः स्वप्रकाशतया न प्रमाणान्तरमपेक्षते। किंच प्रमाणान्तरवादिनापि प्रमाणान्तराभावः सत्त्वमात्रेणाभावबुद्धिजनको नाभ्युपगमनीयः किंतु विदितत्वेन। तथाहि। कस्यचिद्वस्तुनः क्वचिददृष्टस्य पुनस्तस्मिन्नेव दृश्यमानस्य दर्शनकालभाविनमभावं प्रतिपद्यते नासीदयमिहेति। तदा च तत्र दर्शनाभावो निवृत्तः कथमभावावगमं जनयेत्। यदि सत्तयाऽभावबोधस्ततो भवेत्। बुद्ध्युपारूढस्य हि जनकत्वेऽतीतस्यापि सम्प्रत्यनुसंधीयमानस्य घटत एवाभावबोधोपपादकत्वं। तथा चक्षुरादिकं सत्तामात्रेण स्वकार्यकारि नचातिवृत्तं स्वकार्यं जनयति लिङ्गं च बुद्धिविषयापन्नं लैङ्गिकावबोधे जनकमतीतमपि स्मर्यमाणं स्वकालवृत्तिलैङ्गिकमनुमापयति तथेदं द्रष्टव्यम्। एवं चातिपतितस्यापि प्रमाणाभावस्याभावावगमकत्वाद् बुद्ध्यारूढस्य जनकत्वमङ्गीकरणीयं। तत्र यदि प्रमाणाभावस्तु यः सोऽभावरूपस्तदा तस्याप्यवगतिर्विदितादेव कारणादङ्गीकरणीयेत्यनवस्था। यदि तु भावान्तरसंवित्तिरेव प्रमाणाभावोऽभ्युपगम्यते ततस्तस्याः स्वयंप्रकाशतया नानवस्थापद्यते। तथा च सति भावान्तरसंवित्तिरेव स्वयंप्रकाशा प्रमाणाभावरूपा प्रमेयाभावोऽस्तु किमपरेण प्रमेयाभावेन नास्तीत्यादिशब्दप्रयोगोऽपि तस्यामेव स्वयंप्रकाशायां भावान्तरोपलब्धौ युज्येत न पुनर्नास्तीत्यादिबुद्धिराविर्भवति। बोध्यान्तरानवभासात्। योऽपि पदन्यासादिव्यवहारः सोऽपि दृश्ये प्रतियोगिनि तदेकविषयबुद्धिनिबन्धन इति दृश्यत्वापत्तये युक्तैव सूक्ष्मजिज्ञासा। तथाविधप्रतिपत्त्युदय एव चाभाव इति ज्ञाते तस्मिन्ननुमानं भावसाधकं न प्रवर्तते। ननु यथा प्रमाणाभाव एवावश्यंभावितया प्रमेयाभावोऽङ्गीक्रियते तथा प्रमाणसद्भाव एव तर्हि प्रमेयसद्भावः स्यात्। प्रमेयसद्भाववादिनापि हि प्रमाणसद्भावोऽवश्याश्रयणीय इति प्राप्तो बाह्यार्थापलापः। नैतदेवं। प्रमेयस्य हि बहिरर्थस्य स्वरूपान्तरप्रतिभासात्। प्रमितिर्हि प्रमित्येकरूपतयैवावभासते। प्रमेयं नीलाद्याकारतया। अभावस्य तु स्वरूपावगतिर्नास्तीति न प्रमाणाभावादन्यः प्रमेयाभावः। प्रमाणाभावोऽपि च स्वरूपान्तरानवगमादेव न भावान्तरप्रमितेर्भिद्यते। भावान्तरप्रमितिश्च स्वयंप्रकाशरूपा न प्रमेयतामनुभवतीति प्रमेयमभावाख्यस्य प्रमाणस्य नोपपद्यते। प्रमेयासद्भावाच्च न प्रमाणान्तरमवकल्पत इति स्थितं।

यत् पुनः संभवाख्यं प्रमाणमिच्छन्ति। शतादिसंख्यापरिच्छिन्नेषु वस्तुष्वन्तरगतानां विंशत्यादिसंख्यानां ग्राहकं तदनुमानान्न भिद्यते। तथाहि। ये महासंख्यायोगिनस्तेषामवयवेष्ववान्तरसंख्यायोगो दृश्यते तेनावयवानामवान्तरसंख्यायोगनियतसंबन्धा महासंख्या अवयववर्तिनीमवान्तरसंख्यामनुमापयतीति व्यक्तमनुमानत्वं।

ऐतिह्यमप्यप्रतीयमानमूलभूतप्रमाणान्तरपरंपरावचनमात्रं न प्रमाणतां प्रतिपद्यते। लोकेऽपि प्रत्यक्षादिप्रमाणव्यतिरिक्तः कश्चिच्चोपलक्ष्यते प्रतिभावितार्थनिश्चयसमर्थ इति न प्रमाणतां प्रतिपत्तुमर्हतीति पञ्चैव प्रमाणानीति। ननु यदिन्द्रियपथातिवर्तिनि ह्रस्वज्ञानं तत् प्रमाणान्तरं भवितुमर्हति। तथाहि। तत् तावन्न प्रत्यक्षं। केवलह्रस्वदर्शने ह्रस्वबुद्ध्यभावात्। दीर्घदर्शनह्रस्वदर्शनपूर्वकं भवतु प्रत्यक्षं। तत्प्रतीतौ पुनरज्ञातायां यदिन्द्रियातिपतिते स्वरूपमात्रेणावसिते ह्रस्वज्ञानं तन्न प्रत्यक्षं। नापि तदनुमानं। ह्रस्वदीर्घयोः परस्परसंबन्धनियमाभावात्। न शास्त्रम्। अपूर्वार्थत्वाभावात्। नोपमानम्। असादृश्यविषयत्वात्। नचार्थापत्तिः। ह्रस्वकल्पनायामसत्यां कस्यचिद्दीर्घत्वानुपपत्त्यापादकस्याभावात्। उच्यते। परिमाणविशेषा एते यदणुत्वं महत्त्वं दीर्घत्वमिति। परिमाणं च प्रत्यक्षद्रव्यवर्ति प्रत्यक्षमिष्यते। तदाह भगवान् काश्यपः। संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे च रूपिद्रव्यसमवायाच्चाक्षुषाणीति। तेन दीर्घमप्रतियतः परिमाणविशेषज्ञानं ह्रस्वे वस्तुनि जातमेव किंतु ह्रस्वशब्दस्तत्र न प्रवृत्तः। तत्प्रवृत्ते* दीर्घप्रतीतिसापेक्षत्वात्। अल्पदेशव्यापि हि ह्रस्वमुच्यतेऽधिकदेशव्यापि च दीर्घं। हस्तादिसंख्याल्पत्वमहत्त्वाभ्यां च देशस्याल्पत्वं महत्त्वं च। पूर्वापरभावनियमेन च संख्याल्पत्वमहत्त्वे अवधार्येते। तेन पूर्वसंख्यापरिच्छिन्नहस्तादिसंख्याव्यापि ह्रस्वशब्देनोच्यते। परसंख्यापरिच्छिन्नहस्तादिप्रमेयदेशव्यापिदीर्घशब्दवाच्यवस्तुप्रतीतिसापेक्षा ह्रस्वशब्दप्रवृत्तिः। तथा च ययोरल्पान्तरत्वेन साक्षादूनाधिकदेशव्यापिता न प्रतीयते तत्र दीर्घह्रस्वशब्दौ न प्रवर्तेते। हस्तादिना तु परिच्छिद्य तत्संख्याल्पत्वमहत्त्वे अवधार्य तौ प्रयुज्येते। संख्यानां च परस्परं पूर्वापरभावः प्रत्यक्षसिद्ध एवेति न प्रमाणान्तरं व्याप्रियत इति।

तस्माद्यथोदितलक्षणविषयफलानि पञ्चैव प्रमाणानीति सिद्धम्॥ :: ॥ :: ॥ :: ॥

इति महामहोपाध्यायश्रीशालिकनाथकृतौ प्रमाणपारायणे षष्ठः परिच्छेदः॥

समाप्तं चेदं प्रमाणपारायणं नाम पञ्चमं प्रकरणम् :: ॥

* तत्प्रतीते- इति क्वचित् पाठः

Digitized by Google

॥ अमृतकला नाम ॥

॥ प्रकरणपञ्चिकायां षष्ठं प्रकरणम् ॥

स्वरूपसंख्यार्थफलेषु वादिभि-
र्यतो विवादा बहुधा वितेनिरे ।
अतो वयं तत्प्रतिबोधसिद्धये
प्रमाणपारायणमारभामहे[1] ॥ १ ॥

अनुभूतिः प्रमाणं सा स्मृतेरन्या स्मृतिः पुनः ।
पूर्वविज्ञानसंस्कारमात्रजं ज्ञानमुच्यते ॥ २ ॥
न प्रमाणं स्मृतिः पूर्वप्रतिपत्तेरपेक्षणात् ।
अन्योन्यनिरपेक्षास्तु धारावाहिकबुद्धयः ॥ ३ ॥
तच्च पञ्चविधं मानं प्रत्यक्षमनुमा तथा ।
शास्त्रं तथोपमानार्थापत्ती इति गुरोर्मतं ॥ ४ ॥
साक्षात्प्रतीतिः प्रत्यक्षं मेयमातृप्रमासु सा ।
मेयेष्विन्द्रिययोगोत्था द्रव्यजातिगुणेषु सा ॥ ५ ॥
सविकल्पाऽविकल्पा च प्रत्यक्षा बुद्धिरिष्यते ।
आद्या विशिष्टविषया स्वरूपविषयेतरा ॥ ६ ॥
सर्वविज्ञानहेतूत्था मितौ मातरि च प्रमा ।
साक्षात्कर्तृत्वसामान्यात् प्रत्यक्षत्वेन संमता ॥ ७ ॥
मानत्वे संविदां बाह्यं हानादानादिकं फलं ।
ज्ञानस्य तु फलं सैव व्यवहारोपयोगिनी ॥ ८ ॥
आपेक्षिकं च करणं मन इन्द्रियमेव वा ।
तदर्थसंनिकर्षो वा मनश्चेत् पूर्वकं फलं ॥ ९ ॥
ज्ञातसंबन्धनियमस्यैकदेशस्य दर्शनात् ।
एकदेशान्तरे बुद्धिरनुमानमबाधिते ॥ १० ॥
यः कश्चिद्येन यस्येह संबन्धो निरुपाधिकः ।
प्रत्यक्षादिप्रमासिद्धः स तस्य गमको मतः ॥ ११ ॥
प्रमेयमनुमानस्य दृष्टादृष्टस्वलक्षणं ।
प्रत्यक्षवच्च कर्तव्या प्रमाणफलवर्णना ॥ १२ ॥
शास्त्रं शब्दविदा यदसंनिकृष्टार्थविज्ञानं[2] ।
सादृश्यदर्शनोत्थं ज्ञानं सादृश्यविषयमुपमानम्[1] ॥ १३ ॥
सादृश्याद्दृश्यमानाद्यत् प्रतियोगिनि जायते ।
सादृश्यविषयं ज्ञानमुपमानं तदुच्यते ॥ १४ ॥
विना कल्पनयार्थेन दृष्टेनानुपपन्नतां ।
नयता दृष्टमर्थं या सार्थापत्तिस्तु कल्पना ॥ १५ ॥
अभावेन गृहे भावो बहिष्कल्पनया विना ।
नयतानुपपन्नत्वं कल्प्यमानो बहिर्यथा ॥ १६ ॥
गम्यस्यानुपपन्नत्वमिह कल्पनया विना ।
मानान्तरविरोधेन संदेहापत्तिलक्षणं ॥ १७ ॥
देशेन हि विनाभावो न कदाचन दृश्यते ।
विनाभावेन सिद्धोऽपि तेन संदेहमार्च्छति ॥ १८ ॥
तत्संदेहव्युदासाय कल्पना या प्रवर्तते ।
संदेहापादकादर्थादर्थापत्तिरसौ स्मृता ॥ १९ ॥
गमकस्यानुमाने तु विपक्षासत्त्वलक्षणं ।
गम्यतेऽनुपपन्नत्वं विना गम्येन वस्तुना ॥ २० ॥
तत्सामग्रीविभेदेन भिन्ने एते परस्परम् ।
अर्थापत्त्यनुमानाख्ये प्रमाणे इति निश्चितम् ॥ २१ ॥
अभावाख्यं प्रमाणं ये षष्ठमाहुर्मनीषिणः ।
तेषां प्राभाकरैरेवं प्रत्यादेशोऽयमुच्यते ॥ २२ ॥
प्रमाणं खलु कस्यापि प्रमेयस्यावबोधकं ।
तस्याभावस्य किं तावत् प्रमेयमिति चिन्त्यतां ॥ २३ ॥
ननु नास्तीति बुद्धौ तु बोध्यं यदुपकल्पितम् ।
अभावस्य प्रमाणस्य तत् प्रमेयं भविष्यति ॥ २४ ॥
भूतलेऽत्र घटो नास्तीत्येषा या जायते मतिः ।
सा न भूतलमात्रे स्यात् प्रसक्तेर्घटवत्यपि ॥ २५ ॥
केवले भूतले चेत् स्यात् कैवल्यं तत्र कीदृशं ।
स्वरूपमात्रं नो तावद्धर्मान्तरमथोच्यते ॥ २६ ॥
प्रमेयान्तरमेवात्र तावताङ्गीकृतं भवेत् ।
तच्च नेन्द्रियविज्ञानं तद्व्यापारानपेक्षणात् ॥ २७ ॥
स्वरूपमात्रदृष्टे हि भावे दूरगतोऽपि सन् ।
कथंचिज्जातजिज्ञासो नास्तित्वं प्रतिपद्यते ॥ २८ ॥
तेन यद्यपि नास्तित्वं बुध्यते व्यापृतेन्द्रियः ।
भावांशमात्रे तत्रापि प्रत्यक्षस्य प्रमाणता ॥ २९ ॥

---

१ प्रमाणपारायणनामकप्रकरणस्य समासभूतमिदं प्रकरणमित्यस्यापि प्रमाणपारायणमिति नामान्तरं पुनः प्रथमपद्योपन्यासादवसीयत इति ।

२ शब्दविज्ञानापेक्षादात्ममनःसंनिकर्षाद्यदसंनिकृष्टार्थविषयं ज्ञानं तच्छास्त्रं नाम प्रमाणम् ।

१ दृष्टगोः पुरुषस्य गवयं तत्सदृशं पश्यतो यद्गोर्निष्ठं गवयसादृश्यज्ञानं तदुपमानं नाम प्रमाणम् ।

नास्तित्वं च प्रमाणानामनुत्पत्त्यैव गम्यते ।
नास्तित्वप्रतिपत्तिर्हि तां विना नास्ति कुत्रचित् ॥ ३० ॥
योग्यप्रमाणानुत्पत्तेः कारणत्वपरिग्रहात् ।
अतिप्रसङ्गदोषोऽपि नावकाशमुपाश्नुते ॥ ३१ ॥
अनुत्पत्तिश्च न ज्ञाता सती कारणमक्षवत् ।
तेन लिङ्गत्वशङ्कापि दूरादेव निराकृता ॥ ३२ ॥
अनुत्पत्तिश्च विज्ञानहेतुश्चेल्लिङ्गवद्भवेत् ।
अनवस्था प्रसज्येत नास्तित्वं नापि सिध्यति ॥ ३३ ॥
किंच पादविहारादिव्यवहारश्च भूतले ।
न भूतलपरिच्छेदमात्रेणैव प्रवर्तते ॥ ३४ ॥
प्रसङ्गस्तत्र दुर्वारः कण्टकाद्यन्वितेऽपि हि ।
अथ केवलभूभागपरिच्छेदात् प्रवर्तते ॥ ३५ ॥
विकल्प्यं तत्र कैवल्यं ग्राह्यस्य ग्रहणस्य वा ।
ग्राह्यस्य चेत् पुरैवोक्तो दोषस्तर्हि प्रसज्यते ॥ ३६ ॥
ग्रहणस्य चेत् तदा सूक्ष्मजिज्ञासा निष्फला भवेत् ।
ज्ञाता हि केवला संविद्वस्तुनो भूतलादिनः ॥ ३७ ॥
एका संसृष्टविषया तन्मात्रविषया परा ।
तन्मात्रविषया या च द्विधा सापि प्रभज्यते ॥ ३८ ॥
प्रतियोगिन्यदृश्ये च दृश्ये च प्रतियोगिनि ।
तत्र तन्मात्रधीर्येयं दृश्ये च प्रतियोगिनि ॥ ३९ ॥
नास्तित्वं सैव भूभागे घटादिप्रतियोगिनः ।
ननु संसृष्टबुद्ध्या यः पुरस्तादवधारितः ॥ ४० ॥
कथं तन्मात्रधीस्तत्र ज्ञाता भावेन तस्य चेत् ।
शक्यते तदभावेऽपि वक्तुं यो यत्र सन्नभूत् ॥ ४१ ॥
तस्याभावः कथं तत्र ब्रूयाच्चेत् तत्र कारणं ।
तन्मात्रधिय एवास्तु वरं तत्कारणं ततः ॥ ४२ ॥
तस्याः सम्प्रतिपन्नत्वाद्वादिनोरुभयोरपि ।
चक्षुर्वदपरामृष्टं न कारणमदर्शनं ॥ ४३ ॥
स्वापावस्थागतस्यापि कारणत्वप्रसङ्गतः ।
विशेषापादिका तस्य न निषेध्यस्य दृश्यता ॥ ४४ ॥
भावरूपविशेषो हि नाभावस्योपपद्यते ।
अदर्शने निवृत्तेऽपि पुनर्भावस्य कस्यचित् ॥ ४५ ॥
प्राङ्नास्तित्वं व्यपदिशन्त्यदृष्टस्य पुरा क्वचित् ।
दृश्यस्यादर्शनं तेन ज्ञातं सदवबोधकं ॥ ४६ ॥
दृश्यादर्शनतस्तस्य ज्ञानं चेदव्यवस्थितं ।
यदि तन्मात्रसंवित्तिरूपं तु स्याददर्शनं ॥ ४७ ॥
तदा तस्याः स्वसंवित्तेरनवस्था निवर्तते ।
तेनावश्याभ्युपेतव्यो विमर्शो दृश्यगोचरः ॥ ४८ ॥
अदर्शनमभावो हि तन्मात्रानुभवात्मकं ।
तन्मात्रानुभवश्चायं यददर्शनरूपतः ॥ ४९ ॥
विमृश्यते भूतलादौ तदभावः प्रपद्यते ।
तन्मात्रानुभवश्चायं न मेयः फलभावतः ॥ ५० ॥
किंच स्वयंप्रकाशोऽसाविति न्यायविदो विदुः ।
नास्तीति शब्दस्तत्रैव स्वयंवेद्ये प्रवर्तते ॥ ५१ ॥
तेन नास्तीति विज्ञानन्यायेन न समागतं ।
मेयाभावे ततो मानमभावाख्यं कथं भवेत् ॥ ५२ ॥
घटसत्ता न लभ्या हि नासत्ता चोदितक्रमात् ।
अभावव्यवहारोऽपि निःशङ्कगमनादिकः ॥ ५३ ॥
तन्मात्रानुभवेनैव यथोक्तेन प्रवर्तते ।
यदा यत्र च दृश्यत्वे सत्यप्यनुपलम्भनं ॥ ५४ ॥
तदभावव्यवहृतिस्तदानीं संप्रवर्तते ।
सूक्ष्मसंभवजिज्ञासाप्यतः सार्थकतां गता ॥ ५५ ॥
तां विना न हि दृश्यत्वं सूक्ष्मसत्ताधिरोहति ।
व्यवहारप्रवृत्तिश्च दृश्या दृष्टिनिबन्धना ॥ ५६ ॥
तेन दृश्यत्वसिद्ध्यर्थं सार्थकं सूक्ष्मवीक्षणं ।
नन्वेवं लक्षणग्रन्थस्यार्थस्तर्ह्यस्य कीदृशः ॥ ५७ ॥
मीमांसार्णवसंभूतं पीयतां समयामृतं ।
प्रत्यक्षाद्यपरिच्छेद्यमभावाख्यं चतुर्विधं ॥ ५८ ॥
प्रमेयं साधयन् मानमभावाख्यं वदन्ति ये ।
तन्निराकरणार्थोऽयं यत्नो भाष्यकृता कृतः ॥ ५९ ॥
अभावोऽसंनिकृष्टस्य नास्तीत्यस्यावबोधकः ।
प्रमाणान्न भवतीति प्रमाणाभावतोच्यते ॥ ६० ॥
किं निराकरणस्येह फलमित्यथ चेन्मतं ।
उच्यते लक्षणग्रन्थः प्रत्यक्षादेः समर्थ्यते ॥ ६१ ॥
प्रमाणं कार्यगम्यं हि सर्वत्रेति विनिश्चितं ।
निश्चयश्च प्रमाणस्य कार्यमित्यपि संमतं ॥ ६२ ॥
निश्चयश्चेदमेवेति संवित्तिः सर्ववस्तुषु ।
सच वस्त्वन्तराभावसंवित्त्यानुगमे सति ॥ ६३ ॥
प्रमाणानुदयात् तत्र यद्यभावोऽवसीयते ।
तदा तेन सहैव स्यात् प्रत्यक्षादेः प्रमाणता ॥ ६४ ॥

Digitized by Google

लक्षणं क्रियमाणं हि तथाभूतस्य युज्यते ।
न कृतं च तथा तेन न कृतं साधु लक्षणम् ॥ ६५ ॥
इमां शङ्कां निराकर्तुं निराकरणमुच्यते ।
कथं पुनरियं शङ्का भवत्यत्र निराकृता ॥ ६६ ॥
अभावाख्यो नाम योऽस्ति यदयं प्रार्थ्यते पुनः ।
प्रमाणानामनुत्पादः साधु तल्लक्षणं कृतं ॥ ६७ ॥
इति पूर्वप्रमाणानां लक्षणानि समादधत् ।
भाष्यकार इमं ग्रन्थं चक्रे नाभावलक्षणं ॥ ६८ ॥
नन्वेवमपि पञ्चाह शब्दं हित्वा कथं पुनः ।
भाष्यकारः प्रमाणानि चित्राक्षेपं न संदधत् ॥ ६९ ॥
उच्यते व्यवहारस्य हेतुभूतप्रसिद्धये ।
एवमाहोभयात्मापि व्यवहारः प्रतिष्ठितः ॥ ७० ॥
तत्र भावव्यवहृतिः पञ्चस्वेवोपलभ्यते ।
अभावव्यवहारस्तु दृश्यादृष्टिविमर्शतः ॥ ७१ ॥
सा हि भूभागसद्भावमात्रावच्छेदबन्धना ।
यदा भावव्यवहृतिरिति प्रागेव दर्शितम् ॥ ७२ ॥
मीमांसाजलराशे-
रशेषनयरत्ननिकषनिजधाम्नः ।
इति शालिकनाथ इमा-
ममृतस्य कलामुदाहरद्धीरः ॥ ७३ ॥

इति प्रकरणपञ्चिकायाममृतकला
नाम षष्ठं प्रकरणं समाप्तम् ॥

स प्राप्य नृपतिद्वारमवतीर्य तुरंगमात् ।
राजधानीं ससेनानीः सवैशम्पायनोऽविशत् ॥ १ ॥
प्रविश्य च सभामध्ये हर्षबाष्पार्द्रचक्षुषः ।
न्यस्तजानुः क्षितौ मूर्ध्ना ववन्दे चरणौ पितुः ॥ २ ॥
आलिलिङ्ग सुतं राजा चुचुम्ब शिरसि क्षणं ।
ग्रहीतुमैच्छदुत्सङ्गे स तु भूमावुपाविशत् ॥ ३ ॥
द्रष्टुं पुनः पुनः प्रष्टुमतृप्तेनापि भूभुजा ।
विसृष्टोऽथ मुहुः स्थित्वा मातरं वन्दितुं ययौ ॥ ४ ॥
तां सुतालोकनानन्दक्षरत्क्षीरपयोधरां ।
प्रणम्य जननीः सर्वा नन्दयामास वन्दनैः ॥ ५ ॥
अभिनन्द्य कृतं ताभिरवतारणमङ्गलं ।
शुकनासमथ द्रष्टुमायासीत् तस्य मन्दिरं ॥ ६ ॥
द्वारि वाजिनमुत्सृज्य प्रविश्य प्रश्रयेण तं ।
पितृवत् प्रणनामासौ मौलिना मेदिनीं स्पृशन् ॥ ७ ॥
नमन्तमेनमुत्थाप्य स्वयमुत्थाय सादरं ।
शुकनासस्तु जग्राह कण्ठे पुलकिताननः ॥ ८ ॥
कृतयत्नोऽपि नाध्यास्त चारुचामीकरासनं ।
चन्द्रापीडः क्षितावेव तस्य न्यविशताग्रतः ॥ ९ ॥
शुकनासं च मुञ्चन्तमासनं स्वं न्यवारयत् ।
तत्र क्षणमिव स्थित्वा द्रष्टुं प्रागान्मनोरमां ॥ १० ॥
सप्रश्रयं प्रणम्याथ तां विलासवतीमिव ।
ततोऽवाप्तविचित्राशीर्मङ्गलो निरियाय सः ॥ ११ ॥
चन्द्रापीडस्य यादृक्षो दर्शनालिङ्गनक्रमः ।
स वैशम्पायनस्यापि तादृगेव गृहद्वये ॥ १२ ॥
न कश्चन सुतस्नेहविशेषश्च तयोरभूत् ।
मन्त्रिणो राजपुत्रे वा मन्त्रिपुत्रे नृपस्य च ॥ १३ ॥
सर्वोपकरणोपेतं पित्रा पूर्वं प्रकल्पितं ।
जगाम चन्द्रापीडोऽथ कुमारभवनं महत् ॥ १४ ॥
सुसंनिवेशमालोक्य तत्र रेमे चिराय सः ।
स्थितिमिन्द्रायुधस्यापि स्वावासे पर्यकल्पयत् ॥ १५ ॥
ततः स्नातानुलिप्ताङ्गं कृताहारं सुखस्थितं ।
मात्रा विसृष्ट आगत्य कञ्चुकी तमभाषत ॥ १६ ॥
इयं हि पत्रलेखाख्या काम्बोजेश्वरकन्यका* ।
केनापि दैवयोगेन परिभ्रष्टा पितुर्गृहात् ॥ १७ ॥
बालेव †वर्धिता देव्या स्वयमन्तःपुरे निजे ।
योग्या सकलविस्रम्भभूमिस्ते पार्श्ववर्तिनी ॥ १८ ॥
मत्वेति देव्या प्रहिता कुमार प्रतिगृह्यतां ।
इत्युक्त्वोपाहरत् कन्यां विनीतां प्रियदर्शनां ॥ १९ ॥
सा तु तेनार्पिता कन्या ततःप्रभृति तं तथा ।
असेवत यथा चास्य निजं चित्तमिवाभवत् ॥ २० ॥
चकार तां च ताम्बूलकरङ्कस्याधिकारिणीं ।
तुतोष च गुणैरस्याः शीलाचारनयादिभिः ॥ २१ ॥
कियत्स्वपि व्यतीतेषु दिवसेष्वथ पार्थिवः ।
यौवराज्यविधौ सूनोः संविधानमशिश्रियत् ॥ २२ ॥
संमन्त्र्य शुकनासेन सह विस्रम्भनिर्भरं ।

---

* कुन्तलेश्वर— इति पाठान्तरम् ।
† बाल्येऽपि इति पाठान्तरम् ।

Digitized by Google

संभारसंग्रहारम्भमकरोत् कृतमङ्गलः ॥ २३ ॥
संनिकृष्टाभिषेकं च दर्शनार्थमुपागतं ।
चन्द्रापीडमथोवाच शुकनासः सविस्तरं ॥ २४ ॥
तात विज्ञातशास्त्रस्य विनयाचारशीलिनः* ।
नाल्पमप्युपदेष्टव्यमस्तिस्थिरमतेस्तव ॥ २५ ॥
किंतु लोकोत्तरा लक्ष्मीरभिराममिदं वपुः ।
नवं वयः परा शक्तिरिति दुर्विषहो भरः ॥ २६ ॥
लक्ष्मीर्नाम परं पुंसामन्यथाभावकारणं ।
विरलास्ते विकाराय न येषां तत्परिग्रहः ॥ २७ ॥
पुष्णाति तीक्ष्णमूष्माणं हिनस्ति व्यक्तवादितां ।
करोति भक्तविद्वेषमसमः श्रीकृतो ज्वरः ॥ २८ ॥
x. 33, 4. "I, a rishi, have solicited king Kuruṣravaṇa, descendant of Trasadusyu, the most bountiful of sages. 5. Let me celebrate, at the (sacrifice), attended with a thousand gifts, (that prince) whose three tawny mares convey me excellently in a car. 6. Of which father of Upamaṣravas, the agreeable words were like a pleasant field to him who uttered them. 7. Attend, O Upamaṣravas, son (of Kuruṣravaṇa), and grandson of Mitrátithi—I am the encomiast of thy father. 8. If I had power over the immortals, or over mortals, my magnificent (patron) should still be alive. 9. The man even of a hundred years lives not beyond the period ordained by the gods;[4] so hath (everything) continually revolved."

x. 62, 6. "The Virúpas, who sprang from Agni, from the sky, Navagva, and Daṣagva, who perfectly possesses the character of an Angiras, is elevated to the gods. 7. The sages (princes) in concert with Indra lavished a herd of cows and of horses. 'Men have exalted to the gods[5] the renown of me, Ashṭakarṇí, who, bestowed a thousand. 8. Let this man[1] now multiply; may he shoot up like a sprout, he who at once lavishes a thousand hundred horses for a gift. 9. No one equals him, as no one suceeds in grasping the summit of the sky.[2] The largesses of the son of Savarṇa have been diffused as widely as the sea. 10. Yadu and Turva gave two robust bondmen to serve (me) with abundance of kine. 11. Let not this man, the leader of the people who lavishes thousands, suffer calamity. Let his largesses go on vying with the sun. May the gods prolong the life of the son of Savarṇa, from whom we, without fatiguing labour [or without cessation], have received food."

x. 93, 14. "I have spoken this (in praise) of Duhsíma, Pṛthavána, Vena, and Ráma,—a god among the magnificent,—who, having yoked five hundred (horses) for our benefit,—their (liberality) became renowned by (this) course. 15. Over and above this, Tánva straightway assigned, Párthya straightway assigned, Máyva straightway assigned (to us) here seventy-seven."

If we consider that the various texts which have just been quoted are the productions of the class whose pretentions they represent and whose dignity they exalt, and further, if we take into account the indications, supplied by various other passages which I shall cite below, of indifference to the gods and to their ministers manifested by the other sections of the community, we may think it necessary to make some deduction from the impression which we had at first received of the estimation in which the priestly order was held at the time when the hymns of the Rigveda were composed. But after every such allowance has been made, it will remain certain that the *brahman*, whether we look upon him as a sage and poet, or as an officiating priest, or in both capacities, was regarded with respect and reverence, and even that his presence was considered an important condition of the efficacy of the ceremonial. Thus, in i. 164, 35, the priest is described as "the highest heaven of speech;" in x. 107, 6, a liberal patron is called a rishi and a priest, as epithets expressive of the greatest eulogy; in x. 125, 5, the goddess Vách is said to make the man who is the object of her special affection a priest and a rishi; in vi. 45, 7; vii. 7, 5; viii. 16, 7; and ix. 96, 6, the term "priest" is applied honorifically to the gods Indra, Agni, and Soma; in iv. 50, 8, 9, great prosperity is declared to attend the prince by whom a priest is employed, honoured, and succoured; and in iii. 53, 9, 12; v. 2, 6; vii. 33, 2, 3, 5; and vii. 83, 4,

[1] Roth, *s. v.* *dása*, conjectures that instead of *dáse*, the proper reading is here *dásán*, which would alter the sense to, "I received a hundred slaves from Balbútha."

[2] Langlois *in loco* refers for illustration of this to R. V. iv. 42, 8.

[3] Sáyaṇa here understands *vadhúmataḥ*, of mares, *vaḍavábhis tadvataḥ*.

[4] Compare R. V. viii. 28, 4: "As the gods desire so it comes to pass; no one—no mortal, however hostile—can hinder that (will) of theirs."

[5] Compare viii. 54, 12, above.

[1] In my article on "Manu, the progenitor of the Aryan Indians," Jour. R. A. S., xx, p. 416, note, I translated this word *manu* as a proper name, perhaps wrongly.

[2] Comp. S. P. Br. xiii. 5, 4, 14: "Neither former nor later men of the five races have reached this great work of Bharata (performed) today, as no mortal has reached the sky with his arms."

Digitized by Google

the highest efficacy is ascribed to the intervention and intercession of priests.

Again, although the commendations which are passed in the hymns on liberality to priests have been composed by interested parties, and though the value of the presents bestowed has no doubt been enormously exaggerated, there is no reason to doubt that the ministers of public worship, who possessed the gift of expression and of poetry, who were the depositaries of all sacred science, and who were regarded as the channels of access to the gods, would be largely rewarded and honoured.[1]

It is further clear, from some of the texts quoted above (ii. 1, 2; iv. 9, 3; x. 52, 2), as well as i. 162, 5, and from the contents of hymns ii. 36; ii. 37; ii. 43; and x. 124, 1,[2] that in the later part of the Vedic era, to which these productions are probably to be assigned, the ceremonial of worship had become highly developed and complicated, and that different classes of priests were required for its proper celebration.[3] It is manifest that considerable skill must have been required for the due performance of these several functions; and as such skill could only be acquired by early instruction and by practice, there can be little doubt that the priesthood must at that period have become a regular profession. The distinction of king or noble and priest appears to be recognized in i. 108, 7, as well as in iv. 50, 8, 9; whilst in v. 47, 7, 14, a similar distinction is made between king and rishi; and it is noticeable that the verse, in other respects nearly identical, with which the 36th and 37th hymns of the eighth mandala respectively conclude, ends in the one hymn with the words, "Thou alone, Indra, didst deliver Trasadasyu in the conflict of men, magnifying prayers" *(brahmáni vardhayan)*; whilst in the other the last words are, "magnifying (royal) powers" *(kshattráṇi vardhayan)*, as if the former contained a reference to the functions of the priest, and the latter to those of the prince.

[1] It is to be observed that, in these eulogies of liberality, mention is nowhere made of Bráhmans as the recipients of the gifts. In two places, viii. 4, 20, and x. 33, 4, a rishi is mentioned as the receiver. In later works, such as the Śatapatha Bráhmaṇa, on the contrary, the presents are distinctly connected with Bráhmans. Thus it is said in that work, ii. 2, 2, 6: "Two kinds of gods are gods, viz., the gods (proper), whilst those Bráhmans who have the Vedic tradition, and are learned, are the human gods. The worship (*yajna*) of these is divided into two kinds. Oblations constitute the worship offered to the gods, and presents *(dakshiná)* that offered to the human gods, the Bráhmans, who possess the Vedic tradition, and are learned. It is with oblation that a man gratifies the gods, and with presents that he gratifies the human gods, the Bráhmans, who possess the Vedic tradition and are learned. Both these two kinds of gods, when gratified, place him in a state of happiness" *(sudháyám)*; (or "convey him to the heavenly world," as the expression is varied in the parallel passage of the same work, iv. 3, 4, 4.)

[2] See also i. 94, 6, where it is said: "Thou (Agni) art an *adhvaryu*, and the earliest *hotri*, a *praśástri*, a *potri*, and by nature a *purohita*. Knowing all the priestly functions *(ártvijyá)* wise, thou nourishest us," etc.

[3] See Prof. Müller's remarks on this subject, Anc. Sansk. Lit., pp. 485 ff.; and Dr. Haug's somewhat different view of the same matter in his Introd. to Ait. Br., pp. 11 ff.

[4] In regard to the great importance and influence of the priests, see Müller's Anc. Sansk. Lit., pp. 485 ff.

While, however, there thus appears to be every reason for supposing that towards the close of the Vedic period the priesthood had become a profession, the texts which have been quoted, with the exception of one (x. 90, 12) which will be further adverted to below, do not contain anything which necessarily implies that the priests formed an exclusive caste, or, at least, a caste separated from all other by insurmountable barriers, as in later times.[1] There is a wide difference between a profession or even a hereditary order, and a caste in the fully developed Brahmanical sense. Even in countries where the dignity and exclusive prerogatives of the priesthood are most fully recognized (as in Roman Catholic Europe), the clergy form only a profession, and their ranks may be recruited from all sections of the community. So, too, is it in most countries, even with a hereditary nobility. Plebeians may be ennobled at the will of the sovereign. There is, therefore, no difficulty in supposing that in the Vedic era the Indian priesthood—even if we suppose its members to have been for the most part sprung from priestly families—may have often admitted aspirants to the sacerdotal character from other classes of their countrymen. Even the employment of the words *bráhmaṇa* and *rájanya* in the Rig-veda does not disprove this. The former word, derived from *brahman*, "priest," signifies, as already intimated, nothing further than the son or descendant of a priest (the word *brahmaputra*, "son of a priest," is, as we have seen, actually used in one text),—just as the latter *(rájanya)* means nothing more than the descendant of a king or chief *(rájan)*.

The paucity of the texts (and those, too, probably of a date comparatively recent) in which the word *bráhmaṇa* occurs, when contrasted with the large number of those in which *brähmán* is found, seems to prove conclusively that the former word was but little used in the earlier part of the Vedic era, and only came into common use towards its close. In some of these passages (as in vii. 103, 1, 7, 8; x. 88, 19) the Bráhman is merely alluded to as a priest, and in vii. 103, the comparison of

[1] Dr. Haug, in his tract on the "Origin of Bráhmanism," p. 5, thus states his views on this question: "It has been of late asserted that the original parts of the Vedas do not know the system of caste. But this conclusion was prematurely arrived at without sufficiently weighing the evidence. It is true the caste system is not to be found in such a developed state, the duties enjoined to the several castes are not so clearly defined as in the Law Books and Puráṇas. But nevertheless the system is already known in the earlier parts of the Vedas, or rather presupposed. The barriers only were not quite so insurmountable as in later times." This view he supports by a reference to the Zend Avesta, from which he deduces the conclusion that the people had been divided into three classes even before the separation of the Indian from the Iranian Aryans, and adds: "From all we know, the real origin of caste appears to go back to a time anterior to the composition of the Vedic hymns, though its development into a regular system with insurmountable barriers can be referred only to the latest period of the Vedic times." As thus stated, the difference between Dr. Haug and other European scholars is one of degree and age, not of principle, for none of them assert any distinction of race, or congenital difference, between the castes or classes.

Digitized by Google

frogs to Bráhmans may seem even to imply a want of respect for the latter and their office.[1] In other places (i. 164, 45, and x. 71, 8, 9) a distinction appears to be drawn between intelligent and unintelligent Bráhmans, between such as were thoughtful and others who were mere mechanical instruments in carrying on the ceremonial of worship,[2] which, however, certainly points to the existence of a sacerdotal class. In another passage (x. 97, 22) the importance of a Bráhman to the proper performance of religious rites appears to be clearly expressed. In x. 109, where the words bráhmán (*passim)* and bráhmaṇa (in *v.* 4) seem to be used interchangeably—the inviolability of Bráhmans' wives, the peril of interfering with them, and the blessing attendant on reparation for any outrage committed against them, are referred to in such a way as to shew at once the loftiness of the claims set up by the Bráhmans on their own behalf, and to prove that these pretensions were frequently disregarded by the nobles. In x. 16, 6, the Bráhmans are spoken of as inspired by Soma, and in vi. 75, 10, the manes of earlier Bráhmans are reckoned among those divine beings who have power to protect the suppliant. But in none of these texts is any reference made to the Bráhmans constituting an exclusive caste or race, descended from an ancestor distinct from those of the other classes of their countrymen. In fact, it is proved by one of the additions (cited above) which have been made in the Atharva-veda (v. 17, 8 f.) to one of the hymns just referred to (x. 10, 9), that, even at that later period when that addition was made, Bráhmans had but little regard to the purity of the sacerdotal blood, as they did not intermarry with women of their own order only, or even with women who had previously lived single, but were in the habit of forming unions with the widows of Rájanyas or Vaṣyas, if they did not even take possession of the wives of such men while they were alive.[4] Even if we suppose these women to have belonged to priestly families, this would only show that it was no uncommon thing for females of that class to be married to Rájanyas or Vaiṣyas—a fact which would, of course, imply that the caste system was either quite unknown, or only beginning to be introduced among the Indians of the earlier Vedic age. That, agreeably to ancient tradition, Bráhmans intermarried with Rájanya women at the period in question, is also distinctly shewn by the story of the Rishi Chyavana and Sukanyá, daughter of king Saryáta, narrated in the Śatapatha Bráhmaṇa, and quoted in my former paper, "Contributions to a Knowledge of Vedic Mythology," No. ii., pp. 11 ff. See also the stories of the Rishi Syáváṣva, who married the daughter of king Rathaviti, as told by the commentator on Rig-veda, v. 61, and given in Prof. Wilson's translation vol. iii. p. 344.

We have, however, still to consider the single text of the Rig-veda, x. 90, 11, 12, which seems at first sight to prove the existence of a belief in the separate creation of the four castes at the time when it was composed. A careful examination of the context in which these verses are found,[1] or even of the verses themselves, will, however, I think, lead to the conclusion that the representation is allegorical, and implies no opinion regarding the literal origination of the four classes. It is not even said that the Bráhman was produced from the mouth, the Rájanya from the arms, or the Vaiṣya from the thighs of Purusha; but that these classes formed respectively those members of his body. It is the Súdra alone who is asserted to have sprung from the part of the body with which he is associated—the feet.

[1] See Müller's remarks on this hymn in his Anc. Sansk. Lit., p. 494.

[2] In R. V, viii. 50, 9, it is said: "Whether an unwise or a wise man, O Indra, has offered to thee a hymn, he has gladdened (thee) through his devotion to thee."

[3] That the remarriage of women was customary among the Hindus of those days is also shewn by A. V., ix. 5, 27 f., quoted in my former paper on Yama, p. 299.

[4] This latter supposition derives a certain support from the emphasis with which the two verses in question (A. V. v. 17, 8, 9) assert that the Bráhman was the only true husband. Whence, it may be asked, the necessity for this strong and repeated asseveration, if the Rájanya and Vaisya husbands were not still alive, and prepared to claim the restoration of their wives? The verses are, however, explicable without this supposition.

It is to be observed, however, that no mention is here made of Súdras as a class with which Bráhmans intermarried. Súdras were not Aryas, like three upper classes. This distinction is not recognised in the following verse of the A. V. xix. 62, 1: Make me dear to gods, dear to princes, dear to every one who beholds me, both to Súdra and to Árya." (Unless we are to suppose that both here and in xix. 32, 8, *ărya* = a Vaisya, and not *árya*, is the word.) In Śatapatha Bráhmaṇa, Káṇva Sákhá (Adhvara Káṇḍa, i. 6), the same thing is clearly stated in these words, for a copy of which I am indebted to Professor Müller: - -*Tan na sarva eva prapadyeta na hi deváh sarveṇaiva sangachhante* | *árya eva bráhmaṇo vá kshattriyo vá vaisyo vá te hi yajniyáh* | *no eva sarveṇaiva samvadeta na hi deváh sarveṇaiva samvadante áryeṇaiva bráhmaṇena vá kshattriyeṇa vá vaisyena vá te hi yajniyáh* | *yady enam súdreṇa sámvádo vindet "ittham enam nichakshva" ity anyam brúyád esha dikshitasyopachárah.* "Every one cannot obtain this (for the gods do not associate with every man), but only an Arya, a Bráhman, or a Kshattriya, or a Vaisya, for these can sacrifice. Nor should one talk with every body (for the gods do not talk with every body), but only with an Árya, a Bráhman, or a Kshattriya, or a Vaisya, for these can sacrifice. If any one have occasion to speak a Súdra, let him say to another person, 'Tell this man so and so.' This is the rule for an initiated man."

In tho corresponding passage of the Mádhyandina Sákhá (p. 224 of Weber's Edition) this passage is differently recorded.

From Manu (ix. 149-157; x. 7 ff.) it is clear that Bráhmans intermarried with Súdra women, though the offspring of these marriages were degraded.

[1] The entire hymn is translated in my paper on the Progress of the Vedic Religion, pp. 353 ff., and also in "Sanskrit Texts," vol. i. pp. 6 ff., where somo remarks are made on it.

(To be continued.)

Communications of a literary nature should be addressed to the EDITOR: *all letters on business, to the Proprietors,* MESSRS. E. J. LAZARUS & CO., *to whom Drafts should be made payable.* ADVERTISEMENTS *will be charged for according to the space occupied.*

The PANDIT may be ordered of the Publishers, or through MESSRS. TRÜBNER and Co., LONDON.

Annual subscription, in advance, including postage, Rs. 12.

PRINTED AND PUBLISHED BY E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

INDEX TO VOL I.

	Page.
Chintámaṇiprakaraṇasúchípatram,	64
Gautama's Aphorisms, the thread of,	98,116
Goldstücker's Dictionary,	9
Hymns,	118
Kálidása and M. Fauche,	37
Kádambaríkathására,	136,155,174
Kumárasambhava—Sarga VIII—XIX,	59,75,92,109,125
Kumárasambhavottarakhaṇḍavarṇana,	11
Kumárasambhava, Letter on,	65
" Revd. K. M. Banerjea's Edition of,	162
Kumárasambhavottarakhaṇḍopasaṅharana,	128,141
Kaṇáda and Akshapáda,	113
Manu's Bull,	56
Mánamandirábhidhavedhálayavarṇana,	7
Nyáya System of Philosophy, on the,	22,38,50
Paribháshenduśekharaṭippaṇíparíkshá,	62,81,95,139
Pandits, and their manner of Teaching,	146
Práchinajyotihśástráchárváśayavarṇana,	82
Prema Chandra Tarkabagíśa, Notice of,	184
Priests, Relations of the, to the other classes of Indian Society, in the Vedic age (from Journal R. A. S.)	150,164,185
Ráma, The Birth of, (from the Raghuvanśa,)	132
Rámáyaṇa, translations from the,	119,149,163,178
Rám Jasan's Hitopadeśa,	40
Rijuvyákhyá, Notice of,	71
Letter on,	104
Śálikanáthíyaprakaraṇapañchiká,	41,57,73,89,105,121,133,153,169
" varṇanam,	1
Sáhitya Darpaṇa, translation of the,	53,66,84,102,130,142,181
Sáńkhya, on the,	35
Sáyanaváda,	32
Sanskrit Classics, Proposed edition of,	25
" Remarks on Plan of,	72
Sound, the Eternity of,	68,86
Sushṇa and Cycnos,	118
Vidyáśilpayoraikihasukhotkarshánukúla utkarsha iha bharate varshe puraiva babhuvahoswid adyatwe' pyasti,	159
Viṭṭhala Śástrí, Pandit, Notice of,	177
Yut or Put,	111

Digitized by Google

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
शुभ्ररश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 13. Benares June 1st, 1867. Vol. II.

॥ निर्मलाञ्जनं नाम ॥

॥ प्रकरणपञ्जिकायां सप्तमं प्रकरणम् ॥

अपौरुषेये संबन्धे सिद्धे शब्दार्थयोर्द्वयोः ।
प्रामाण्यं वेदवाक्यानामिति स प्रतिपाद्यते ॥ १ ॥

यदि पौरुषेय एव शब्दानामर्थैः सह संबन्धो भवेत् तदा प्रमाणान्तरगोचरेष्वेवार्थेषु पुरुषाणां संकेतकरणशक्तेरपूर्वात्मनि च वेदार्थे प्रमाणानामनवकाशाभावात् तत्र संकेताभावादसंकेतिते च वाचकत्वाभ्युपगमे दुर्लभमेव वेदवाक्यानां प्रामाण्यमापद्यत इत्यर्थवानेवायमपौरुषेयशब्दार्थसंबन्धप्रतिपादनयत्नः ।

तत्र शब्दार्थसंबन्धं पौरुषेयं प्रचक्षते ।
जगदीश्वरनिर्माणं वदन्तो वेदवादिनः ॥

अनादौ हि वृद्धव्यवहारपरम्परायां सत्यां वृद्धव्यवहारप्रसिद्धो वाच्यवाचकभावः शब्दार्थयोरपौरुषेयः प्रसिध्येत् । तथाहि । वृद्धानां स्वार्थेन व्यवहारप्रमाणमुपशृण्वन्तो बालाः शब्दश्रवणसमनन्तरभाविना चेष्टाविशेषेण विशिष्टार्थविषयां मनीषां कल्पयन्तो वाच्यवाचकतां शब्दस्याध्यवस्यन्ति । तेऽपि वृद्धा यदा बाला आसंस्तदा तेऽप्यनयैव दिशा व्युत्पद्यन्ते स्म । येभ्यश्च वृद्धेभ्यस्ते व्युत्पत्तिमलभन्त तेऽप्यन्येभ्यस्तेऽप्यन्येभ्य इति विनापि संकेतयितारं पुरुषमुपपद्यत एव शब्दार्थयोरनादिवृद्धपरम्पराव्यवहारदर्शनसिद्धः संबन्धः । नो खल्वनादितैव वृद्धव्यवहारपरम्परायां उपपत्तिमती । तथाहि विदांकुर्वन्तु भवन्तः । तत्भुवनादिकं सर्वं सावयवमवसीयते । यच्च नाम सावयवं तदवयवव्यतिषङ्गबलसमासादितात्मलाभं। पश्यामो हि वयं तन्तुव्यतिषङ्गाधीनात्मलाभं पटं। कटं च वीरणसंयोगसंपादितसत्ताकं सावयवम् । एषा च दिक् आमादन्त्यावयविभ्योऽवतरन्त्याद्व्यणुकमवतिष्ठते । अर्थैश्च नियतसंयोगो नियतोऽन्यतरकर्मज उभयकर्मजो वाभ्युपगमनीयः । कर्म च परमाणुष्वदृष्टवत् क्षेत्रज्ञसंयोगादन्यस्य कारणस्याभावात् । नचादृष्टमलब्धप्रवृत्ति कार्याय पर्याप्तमचेतनत्वाद्वासीवत् । नचानधिष्ठितं प्रवृत्तिमुपलभते । न खल्वनधिष्ठिता वर्धकिना वासी वर्धनाय प्रवर्तते । तदेवमदृष्टमपि क्षेत्रज्ञसमवायि चेतनाधिष्ठितं कार्याय प्रवर्तत इति दर्शनबलेनावश्यमभ्युपेतव्यं । नचेदमिह चिन्तनीयं य एव क्षेत्रज्ञास्त एव तेषामदृष्टानामधिष्ठातारो भवेयुरिति । तेषामज्ञत्वात् । न हि ते स्वसमवायिनी अपि धर्माधर्मलक्षणे अदृष्टे स्वरूपतः कार्यतो वा वेदितुमीशते । य एव यत् स्वरूपतः कार्यतो वा वेद स एव तस्याधिष्ठाता यथा तक्षा वास्याः । तस्मादन्यः क्षेत्रज्ञेभ्यः सकलक्षेत्रसमवायिधर्माधर्मलक्षणादृष्टसाक्षात्करणागोचरचिन्तनीयशक्तिविभवः कोऽपि चेतनातिशयोऽधिष्ठाता दिव्यप्रतिष्ठः स्वतन्त्रोऽभ्युपगमनीयः । नचेदं वाच्यं केन प्रमाणेन तस्य क्षेत्रज्ञेष्वसंभाविनी धर्माधर्मसाक्षात्करणशक्तिरवगम्यत इति । यतो यत एव प्रमाणात् तस्य सद्भावोऽवगम्यते तत एव तस्य ज्ञानशक्तिरपि गम्यते । अन्तर्भावितज्ञानशक्तिरेवासौ सामान्यतोदृष्टानुमानगोचरः । अत एव कथमसावधिष्ठास्यतीत्यपि पर्यनुयोगस्यानवकाशः । किं तस्याधिष्ठाने प्रयोजनमित्यपि पर्यनुयोगश्चेतनातिशयानुमानाङ्गीकरणपराहतः । क्षेत्रज्ञो हि प्रयोजनमुद्दिश्य प्रवर्तते स च क्षेत्रज्ञविलक्षणो नापेक्षितप्रयोजन एव स्वतन्त्रः प्रवर्तते । अत एव स्वातन्त्र्यात् कादाचित्की तस्य प्रवृत्तिरुपपत्तिमती । स्वात-

Digitized by Google

न्यमपि तस्य सत्तानुमानसमधिगम्यमेवेति न पृथग्लक्षणसव्यपेक्षम् । अतः सिद्धं भुवनस्यादिमत्त्वमुत्पत्तिमत्त्वं च । तथा भावितया च विनाशित्वं । कृतका हि भावा ध्रुवभाविविनाशास्तथा दृष्टचरा घटादय इति वृद्धव्यवहारपरम्परया नानादित्वं । तेन बलात् पुरुषसंकेतवशादेव शब्दस्यार्थं प्रति बोधकत्वमास्थेयम् । अपिच देवदत्तादिशब्देष्वविवादा तावत् पुरुषसंकेतनिबन्धना वाचकता । तद्दर्शनाद्गवादिशब्दानामपि तथाविधत्वमेवमेवानुमातुमुचितम् । अयमेव हि सामान्यतो दृष्टस्य विषयो यदन्यत्र दृष्टमन्यत्रावगम्यत इति । देवदत्तादिषु स्वाभाविकं सर्वार्थविषयबोधकत्वमित्यपि न समीचीनं । प्रमाणाभावात् । संकेतानपेक्षत्वप्रसङ्गाच्च । न हि नियमे संकेतस्य व्यापारः प्राक्संकेतादनियतार्थप्रत्ययोदयप्रसङ्गेऽपि क्लेशमात्रफलमिदमुच्यते गवादिष्वपि नियतार्थप्रतिपत्तिः पुरुषसंकेतायत्तैव । स्वाभाविकी तु सर्वार्थप्रतिपादनशक्तिरुपयोगिन्येव विशिष्टार्थप्रतिपत्तावित्यलमनुना प्रतिपन्नार्थविघातिना निर्बन्धेन । किंच यथोदितप्रमाणबलसिद्धे भगवति सकलजगन्निर्माणप्रवीणे धर्माधर्मयोः साक्षात्कारिणि तत्कर्तृकत्वेनापि सिध्यति वेदानामपूर्वेऽर्थे प्रामाण्यमिति मीमांसकानां विद्वेषमात्रनिबन्धनोऽयं पौरुषेयत्वपक्षप्रतिक्षेपः । मन्त्रार्थवादानां च भूयसामनुमर्थमञ्जसा वदतामन्यथा वर्णनमिति ।

औत्पत्तिकस्तु संबन्धः शब्दस्यार्थेन संभवः ।
वृद्धसंव्यवहारस्य प्रवाहानादिता यतः ॥

वेदार्थविदामग्रगस्य भगवतः सकलनयनिधेर्जैमिनेरपौरुषेयः शब्दस्यार्थेन संबन्धोऽभिमतः । स हि मेने । यद्यपि देवदत्तादीनां पुरुषसंकेतनिबन्धनं वाचकत्वं तथापि गवादिष्वनुमानं न शक्यते कर्तुम् । अर्थप्रतिपत्तिलक्षणस्य कार्यस्यान्यथाप्युपपत्तेरनैकान्तिकत्वादिति वृद्धव्यवहारनिबन्धनवाचकशक्तिज्ञानादपि बालानां शब्दार्थप्रतिपत्तिर्दृश्यते । तेनैकान्ततः संकेत एव कल्पयितुं न शक्यते । अपिच शक्तिज्ञाननिबन्धनार्थप्रतिपत्तिरिति प्रत्यक्षमेतत् । नच प्रत्यक्षे सति कारणे कारणान्तरमनुमातुं शक्यते । देवदत्तादिषु तु यस्य संकेतनिबन्धनार्थप्रतिपत्तिर्भवति तस्य संकेत एव कारणं । तेष्वपि व्यवहारदर्शनादेव वाचा तामवगम्यार्थं प्रतिपद्यन्ते ये तेषामपि व्यवहारदर्शनप्रसूतं शक्तिज्ञानमेवार्थप्रतिपत्तिकारणं न संकेतः । किंतु तत्र संकेतपूर्वक एव व्यवहारोऽर्थप्रतिपत्तिश्च । तथा च तत्पूर्वमपि वाचकत्वज्ञानं । गवादिपदेषु तु सर्वेषां शक्तिज्ञानादेव व्यवहारसंभवादर्थावगतिरिति वैषम्यं । ननु देवदत्तादिपदेषु दर्शनात् किमिति गवादिपदेष्वपि पूर्वभावी संकेत एव न कल्प्यते । प्रत्यनुमानग्रस्तत्वात् । शक्यते हि तत्रैवमनुमानं संभावयितुं । पूर्वेऽपि पुमांसो गवादिषु शब्दात् साक्षादिमत्यर्थं वृद्धव्यवहारसिद्धशक्तिज्ञानादर्थप्रतिपत्तियोगिनः । गवादिशब्देभ्यः साक्षादिमदर्थप्रतिपत्तियोगित्वादधुनातनशब्दवदिति । तदेवं प्रत्यनुमानग्रस्तेऽनुमाने निरस्ते सकलप्रमाणविरहादपौरुषेयत्वमेव सिध्यति शब्दार्थावगतेः । अत इदमपहस्तितं । यदाहुर्बौद्धाः ।

यज्जातीयो यतः सिद्धः स तस्मादग्निकाष्ठवत् ।
अदृष्टहेतुरपि नो विशिष्टः संप्रतीयते ॥

इति । ननु च सिध्येदयं मनोरथो यदि तु वृद्धव्यवहारपरम्पराया अनादिता सा तु प्राचीननयनिवारिता । अत्र वदामः । भवतु सावयवं सर्वमवयवसंयोगारब्धसत्ताकमवयवसंयोगापाये च विनश्वरमिति तथाप्येकदैव सकलजनस्य समुत्पादो विलयश्चेति नास्ति नः प्रमाणं । प्रत्युत यथादर्शनमेतावदवसातुमुचितं क्रमेणोदयः क्रमेण च विलय इति । किंच यथाद्यतना जना मातापितृसंयोगनिबन्धनात्मलाभास्तथा पूर्वेऽपि जना जनत्वादिति शक्यमेवानुमातुं । नच योनिजानां केवलेन धर्माधिपत्येन संस्वेदजानामिव संभवो घटते । जरायुजाण्डजानां तथा दर्शनासंभवात् । दृष्टानुसारि हि सर्वत्रानुमानं । तेन संस्वेदजेषु नियमेन दृष्टं न जरायुजाण्डजयोरप्ययोनिजत्वं शक्यतेऽनुमातुं । नहि पाण्डिममात्रेण बाष्पादपि वन्हेरनुमानं किंतु यादृशमेव पाण्डुरद्रव्यं नियमेन वन्हिनियतं प्रतिसंपन्नं तादृशमेव तस्यानुमापकमुचितम् । यच्चेदमुक्तं धर्माधर्मौ चेतनातिशयाधिष्ठानाविति तदप्यसिद्धमेव । यस्यैव तौ चेतनस्य स एवाधिष्ठातास्तु । अथाज्ञत्वात् तस्याधिष्ठानं नोपपद्यते तर्ह्यन्यस्यापि कथमुपपद्यते । न हि तस्यापि परपुरुषवर्तिधर्माधर्मज्ञानमुपपद्यते कारणाभावात् । न हि तस्येन्द्रियाणि कारणम् । इन्द्रियाणां तत्रासामर्थ्यात् । नच केवलं मनः केवलस्य मनसो बाह्येष्वप्रवृत्तेः । न हि धर्माधर्मरहितस्येन्द्रियमनःसंबन्धोऽस्ति धर्माधर्मनिबन्धनत्वात् तत्संबन्धस्य । अथ कारणमन्यदेवेश्वरबुद्धेः । तदयुक्तं । प्रसिद्धकारणत्वाद्बुद्धेः । प्रसिद्धानि हि कारणानि बुद्धेः । यत् कारणं च यत्कार्यं दृष्टं तत्कारणमेव तदिति युक्तम् । अन्यथा चेतनाधिष्ठाना वासी दृष्टेति कथं धर्माधर्मयोरपि तदधिष्ठितत्वं भविष्यति । अथाकारणा नित्यैवेश्वरबुद्धिरिति । तदप्यसुन्दरं । बुद्धित्वस्य नित्यत्वाभावात् । नित्या सती बुद्धिरेव न स्यात् । बुद्धिमता चाधिष्ठानं दृष्टं न पुनरन्येन । अथादृष्टमपि बुद्धेर्नित्यत्वमङ्गीक्रियते । तदा न चेतनाधिष्ठितत्वमेव किमिति नाङ्गीक्रियते । अथ सिद्धेऽधिष्ठातृत्वे ज्ञानमपि कल्प्यत इति । ज्ञानाननुबद्धस्याधिष्ठातृत्वस्य कारणाभावात् प्रतिक्षिप्ते ज्ञाने सत्यनुमातुमशक्तेः । तेन शक्यज्ञानमेवाचेतनं चेतनाधिष्ठितमिति व्याप्तिराश्रयणीया । तथा दर्शनात् । तक्षादयो हि शक्यज्ञानान्येव

Digitized by Google

वास्यादीन्यधितिष्ठन्तो दृश्यन्ते नान्यानि । अपिचाधिष्ठानार्थोऽपि चिन्तनीयः । न तावत् संयोगो धर्माधर्मयोर्गुणत्वेन संयोगाभावात् । समवायोऽपि परपुरुषसमवायिनोर्धर्माधर्मयोरीश्वरं प्रत्यनुपपन्नः । वास्यादिषु तक्षादीनां करसंयोगादिरेवाधिष्ठानं । तथा प्रवृत्तिरपि कीदृशी । न तावत् क्रिया गुणभूतयोर्धर्माधर्मयोः क्रियाभावात् । उत्पत्तिश्चेत् तर्हि सा चेतनादेव समवायिकारणादात्ममनःसंयोगाच्चासमवायिकारणादभिसंध्यादिनिमित्तकारणोपगृहीतत्वात् फलदानमिति चेत् । न । देशकालावस्थादिसहकारिसहिताभ्यामेव फलं न चेतनव्यापारापेक्षं । यदपि केचिदाहुः परमाणव एवेश्वरेच्छया प्रवर्तन्त इति । तदपि न युक्तं । क्वचित् तथाविधस्याधिष्ठानस्यादर्शनात् । शरीरे तथा दर्शनादिति चेत् । न । तस्य धर्माधर्मोपसंगृहीतत्वात् । नच परमाणव एवेश्वरस्य धर्माधर्मोपगृहीताः । नच तस्येच्छामात्रेण प्रवृत्तिः किंतु प्रयत्नवशात् । नचेच्छायामपि हेतुरस्ति । नच नित्यैवेच्छा नित्यत्वप्रसङ्गात् । यथाऽचेतनत्वाच्चेतनाधिष्ठितत्वमनुमीयते तथा प्रयोजनाभावादप्यनधिष्ठानमिति ज्ञायते । कतरदत्रानुमानं बलीय इति न विद्मः । तेन यत्रैव प्रयोजनं तदेव चेतनाधिष्ठितमिति व्याप्तिरभ्युपगमनीया । तथा दर्शनात् । अपिच व्याप्तिग्रहणपुरःसरमनुमानम् । अन्वयव्यतिरेकाभ्यां च व्याप्तिरवगम्यते । यथा च चेतनोऽधिष्ठातेति प्रतीयते तथा विग्रहादिमानपि । तेनानुमानं तथाविधमेवानुमापयेत् । नच तस्य धर्माधर्मौ परमाणून् वा प्रत्यधिष्ठातृतोपपद्यत इत्यनधिष्ठानमेव । तेन विग्रहादिमदधिष्ठानमेवाचेतनं चेतनाधिष्ठितमिति व्याप्तिराश्रयणीया । नन्वेवं सति प्रसिद्धस्याप्यनुमानस्योच्छेदः प्राप्नोति । यथाभूतेन हि महानसादिवर्तिना व्याप्तिरवगता न तथाविधस्यानुमानं । यथाविधस्यानुमानं न तथाविधस्य व्याप्तिधीसमयेऽवधारणमिति । तदयुक्तं देशकालाद्युपाधिपरित्यागेन सामान्येन हि संबन्धग्रहणं । तेनेहापि भवत्येतद्वास्यादिषु दृष्टं धर्माधर्मयोरपीति यादृशस्वरूपं व्यापकमुपलभ्यते तदेवानुमातुं शक्यते नान्यत् । इह तु विग्रहवत्त्वादपि व्याप्त्यनुप्रवेशीति तदनुमातव्यं न तदनुमातुं शक्यत इति परं चेतनानुमानबाध एव तदनुबद्धस्य तस्यानुमानस्य स्यात् । नचेश्वरस्य सर्वज्ञानमपि सिध्यति ज्ञानहेत्वभावेन ज्ञानाभावनिश्चयात् । तेनानादिरेव वृद्धपरम्परा शब्दार्थावगमे हेतुर्न सृष्ट्यादावीश्वरकृतः संकेतः । तस्यैव कर्तुमशक्तेः । न चस्वाद्या जनाः संकेतस्यार्थमनवबुध्यमानाः संकेतं प्रतिपद्यन्ते । तस्मादनादिरेव वृद्धपरम्पराभ्युपगमनीया । एवं पुरुषस्य धर्मप्रतीतिं प्रति प्रमाणान्तरेणोपायाभावात् पौरुषेयत्वे वेदस्यापूर्वात्मके वेदार्थे प्रामाण्योपपत्तिरित्यपौरुषेयत्वाश्रयणं ।

कथं पुनरपौरुषेयत्वं वेदानां । पुरुषस्य कर्तुरस्मरणात् । नचानुमानमपि कर्तुरुपपद्यते । प्रमाणान्तरेणाप्रतीते पुरुषाणां वाक्यस्य रचनायामशक्तेः । काठकादिसमाख्यापि न कर्तृसद्भावमुपकल्पयितुमलम् । प्रवचनेनापि तदुपपत्तेः । मन्त्रार्थवादाश्च न स्वातन्त्र्येणार्थमवगमयितुमीशते किंतु विध्युद्देशानुसारेण तदनुगुणमर्थमिति न सिद्धार्थप्रतिपादनेनैषां प्रामाण्यमिति सिद्धमपौरुषेयत्वं शब्दार्थसंबन्धस्येति ॥ :: ॥ :: ॥

दुस्तर्कतिमिरं भेत्तुं शिष्याणां दृष्टिरोधकम् ।
इदं शालिकनाथेन विहितं निर्मलाञ्जनम् ॥

इति महामहोपाध्यायश्रीशालिकनाथकृतौ प्रकरणपञ्चिकायां निर्मलाञ्जनं नाम सप्तमं प्रकरणम् ॥ :: ॥ :: ॥

॥ अथ कादम्बरीकथासारः ॥

स तद्गुणप्रभावर्द्धिवर्धमानकुतूहलः ।
तामवोचत माधुर्यविनयोदारया गिरा ॥ १ ॥
त्वत्प्रसादकृतेनैव प्रागल्भ्येन ममामुना ।
मनो भगवति प्रश्नचापले विनियुज्यते ॥ २ ॥
न मादृशदृशां भूमिरियमाश्चर्यसंततिः ।
तदाख्यानप्रसादेन जनोऽयमनुगृह्यतां ॥ ३ ॥
कतमो मुनिगन्धर्वसिद्धविद्याधरादिषु ।
पुण्येन जन्मना वंशो भगवत्या विभूषितः ॥ ४ ॥
पञ्चभूतात्मकं चेदं धत्ते धवलतां वपुः ।
कथं कामपि दिग्दन्तिदन्तकान्त्यतिशायिनीं* ॥ ५ ॥
नवे वयसि किंचाति†तीव्रवैराग्यकारणं ।
येनारण्यनिवासादि दुःखमीदृग्विषह्यते ॥ ६ ॥
इति तस्मिन् वदत्येव स्थूलाश्रुकणवर्षिणी ।
रुरोद वल्कलच्छन्नवदना दिव्यकन्यका ॥ ७ ॥
अकम्पत मनश्चैनां चन्द्रापीडस्य पश्यतः ।
इयमप्याकृतिर्नाम द्वन्द्वैर्यदभिभूयते ॥ ८ ॥
असौ चिरं रुदित्वा च वल्कलोन्मृष्टलोचना ।
दीर्घमुष्णं च निश्वस्य व्याहर्तुमुपचक्रमे ॥ ९ ॥
राजपुत्र किमेतेन शोकैकवसतेर्मम ।
पापाया मन्दभाग्याया वृत्तान्तेन श्रुतेन ते ॥ १० ॥
तथापि यदि ते चित्तं कुतूहलवशीकृतं ।

---

* — त्यभिभाविनीम् इति पाठान्तरम् ।
† चेदं पुस्तकान्तरपाठः ।

तदिदं वर्ण्यते सर्वमाकर्णय यथाक्रमं ॥ ११ ॥
सुप्रसिद्धमिदं तावद् गतं श्रुतिपथं तव ।
यत् सन्त्यप्सरसो नाम सुरसद्मनि कन्यकाः ॥ १२ ॥
चतुर्दश च तद्वंशाः पृथक्पृथगवस्थिताः ।
सोमामृतसमीरार्कदक्षकन्यादिसंभवाः ॥ १३ ॥
दक्षकन्योद्भवं तेषु गन्धर्वाणां कुलद्वयं ।
कन्ये मुनिररिष्टेति द्वे दक्षस्य बभूवतुः ॥ १४ ॥
तत्र चित्ररथो नाम गन्धर्वाणामधीश्वरः ।
मुनेः श्रुतयशाः पुत्रश्चित्रसेनादिपूर्वजः ॥ १५ ॥
तुम्बुरुप्रभृतीनां तु ज्येष्ठोऽरिष्टासुतः कृती ।
हंसाभिधानो गन्धर्वराजः प्रथितपौरुषः ॥ १६ ॥
अकृत्रिममनुत्पन्नमन्युकालुष्यदूषणं ।
गाढं*परस्परं प्रेम तयोर्गन्धर्वराजयोः ॥ १७ ॥
इतश्च नातिदूरेऽस्ति नानारत्नोज्ज्वलो गिरिः ।
हेमकूट इति ख्यातः स निवासस्तयोर्द्वयोः ॥ १८ ॥
तस्मिन् वसन्त्यसंख्यातास्तद्भुजस्तम्भसंश्रिताः † ।
गन्धर्वास्तौ च विश्रम्भभूमिर्जम्भद्विषः परा ॥ १९ ॥
अथ यत् सोमसंभूतमेकमप्सरसां कुलं ।
गौरी नामोदभूत् कन्या तस्मिन् प्रतिकृतिः श्रियः ‡ ॥ २० ॥
हंसो गन्धर्वराजस्तामुद्वाह हिमप्रभां ।
ततो यथार्थतामाप सर्वथा हंसगामिनी ॥ २१ ॥
चिरसंभृतविश्रम्भनिर्भरं गृहवासिनोः ।
तयोरुदभवत् सूनुरेकोऽपि न महात्मनोः ॥ २२ ॥
अहं तु मन्दभाग्यैका कन्या दुष्कृतकारिणी ।
उदभूवं तयोरस्य दुःखभारस्य भाजनम् ॥ २३ ॥
अनपत्यतया तातो मज्जन्म सुतजन्मवत् ।
अभ्यनन्दत् कृतानन्दः कृतोदारमहोत्सवः ॥ २४ ॥
देहच्छायामिमां वीक्ष्य तातः सोमक्रमागतां ।
चक्रे वर्णानुरूपं स महाश्वेतेति नाम मे ॥ २५ ॥
साहं पितृगृहे बाला वल्लकीव कलस्वना ।
संचरन्ती स्वबन्धूनामङ्कादङ्कमहर्निशम् ॥ २६ ॥
अनवाप्तरसास्वादस्नेहाद्विद्वन्द्वसंतति ।
अत्यवाहयमक्लेशपेशलस्थिति शैशवं ॥ २७ ॥
अथ बाल्यात् परं प्राप्तं मया नानारसोचितं ।
मनोभवविकाराणामेकमायतनं वयः ॥ २८ ॥
कदाचिदथ रम्येषु मधुमासदिनेष्वहं ।
अच्छोदसरसि स्नातुमागताऽहं सहाम्बया ॥ २९ ॥
अदृष्टपूर्वामन्यत्र विभूतिमहमार्तवीं * ।
सखीभिः सह पश्यन्ती कानने व्यचरं चिरं ॥ ३० ॥
कस्मिंश्चिदपि देशेऽन्यपुष्पगन्धाभिभाविनं ।
अभ्यजिघ्रमनाघ्रातपूर्वमामोदमद्भुतं ॥ ३१ ॥
तस्य प्रभवजिज्ञासारसेन विहितत्वरा ।
नातिदूरं ततो गत्वाऽपश्यं मुनिकुमारकम् ॥ ३२ ॥
अस्पृष्टमिव कन्दर्पमीशाननयनार्चिषा ।
कलङ्कविप्रुषा बिम्बमदूषितमिवैन्दवं ॥ ३३ ॥
विरुद्धैरपि रूपस्य मेखलाजिनवल्कलैः ।
कृताधिकमनोहारिरूपातिशयविभ्रमं ॥ ३४ ॥
तेन कर्णे कृता काचिदपूर्वा तरुमञ्जरी ।
ततः प्रवृत्तमामोदं समर्थितवती मुहुः ॥ ३५ ॥
तं कुतोऽप्यागतं कान्तं लावण्यामृतनिर्झरं ।
चक्षुषेव पिबन्तीव कौतुकोत्क्षिप्तपक्ष्मणा ॥ ३६ ॥
रूपैकपक्षपातेन गुणदोषानपेक्षिणा ।
ततः कुसुमबाणेन नीतास्मि वशमात्मनः ॥ ३७ ॥
ततोऽपसर्तुकामाहमप्रगल्भतया मुहुः ।
केनापि प्रेर्यमाणेव तदन्तिकमुपागमम् ॥ ३८ ॥
वन्द्यो मुनिजनश्चेति प्रचलन्मणिकुण्डलम् ।
अकार्षं वन्दनं तस्मै तन्मुखन्यस्तलोचना ॥ ३९ ॥
ततः कृतप्रणामायां मयि सोऽपि मनोभुवः ।
पतितो गोचरे चित्रमवन्ध्या भवितव्यता ॥ ४० ॥
स्मरोपदिष्टयेवाथ बुद्ध्या तद्विकृतिं धिया ।
लब्धावकाशा रूपादिप्रश्ने प्रागल्भ्यमागमम् ॥ ४१ ॥
अथ पार्श्वस्थमद्राक्षमन्यं मुनिकुमारकं ।
तुल्यतेजस्तपोवेषं ‡ तस्य सब्रह्मचारिणं ॥ ४२ ॥
भगवन् कथ्यतां कोऽयं किमाख्यः किमिहागतः ।

---

* रूढं पाठान्तरमेतत् ।
†—संभृताः इति क्वचित् पाठः ।
‡—तिर्विधोः क्वचिदेव पाठः ।

*—मिह माधवीम् इति पाठान्तरम् ।
† एकस्मिंस्तु प्रदेशेऽस्य सर्वपुष्पाभि — इति पाठान्तरम् ।
‡—तेजोवयो — इति क्वचित् पाठः ।

कर्णे च निहितानेन कस्येयं मञ्जरी तरोः ॥ ४३ ॥
सोऽब्रवीत् सुरलोकेऽस्ति सुरासुरशिरोऽर्चितः ।
श्वेतकेतुरिति ख्यातो रूपेणाप्रतिमो मुनिः ॥ ४४ ॥
पुण्डरीकसरः स्नातुमयासीत् स कदाचन ।
नित्यं संनिहिता तत्र लक्ष्मीरेनं व्यलोकत ॥ ४५ ॥
सा तदालिङ्गनेनेव दर्शनेनैव केवलं ।
पुण्डरीके कृतार्थत्वमवाप स्वासनीकृते ॥ ४६ ॥
उदपादि तदैवाथ कुमारः स तया * श्रिया ।
तव पुत्रोऽयमित्युक्त्वा न्यवेदि श्वेतकेतवे ॥ ४७ ॥
सोऽपि योगदृशा दृष्ट्वा यथावत् सुतमग्रहीत् ।
नाम जन्मानुगं चास्य पुण्डरीक इति व्यधात् ॥ ४८ ॥
योजयामास संस्कारैरेनं मुनिजनोचितैः ।
अतीतबालभावं तु न्ययुङ्क्त तपसे पिता † ॥ ४९ ॥
अयं स पुण्डरीकस्ते वर्णितः शृणु मञ्जरीम् ।
चतुर्दशीति कृत्वाद्य ‡ प्रस्थितोऽयं शिवालयं ॥ ५० ॥
व्रजतो नन्दने चास्य वनदेवतया स्वयं ।
त्वदाकृतेरलंकारस्तुल्योऽयमिति सादरं ॥ ५१ ॥
पारिजातद्रुमादेषा दुग्धोदधिसमुद्भवात् ।
आदाय मञ्जरी कर्णेऽनिच्छतोऽपि निवेशिता ॥ ५२ ॥
इति तस्मिन् वदत्येव चपले गृह्यतामियम् ।
किमनेन तव प्रश्नखेदेनेत्यभिधाय माम् ॥ ५३ ॥
अनायि मुनिना तेन सा सुरद्रुममञ्जरी ।
अपनीय निजात् कर्णान्मम कर्णावतंसतां ॥ ५४ ॥
मत्कपोलतलस्पर्शप्रकम्पतरलाङ्गुले: ;
भ्रश्यन्ती तेन नाज्ञायि स्वाक्षमाला निजात् करात् ॥ ५५ ॥
अप्राप्यैव च सा भूमिमग्राहि सहसा मया ।
तस्मिन्नवसरे छत्रग्राहिणी मामवोचत ॥ ५६ ॥
स्नाता देवी चिरं भर्तृदारिके १ गम्यतामिति ।
तस्मात् प्रतिनिवृत्तायां मयि तस्य सखाऽवदत् ॥ ५७ ॥
वयस्य किमिदं चेतस्तव विप्लुतमीदृशं ।
हृतामप्यनयाऽज्ञासीरक्षमालां न कन्यया ॥ ५८ ॥

* सत्यया इति पाठान्तरम् ।
† वने क्वचिदयं पाठः ।
‡ मत्वाद्य इति क्वचित् पाठः ।
१ राजपुत्रि ।

हृता नामेयमनया हृदयं ननु रक्ष्यतां ।
ततोऽसौ पुनरागत्य कृतकोपमिवाब्रवीत् ॥ ५९ ॥
अपहृत्याक्षमालां मे क्व चोरि ननु गम्यते ।
अथ मन्दं विहस्यैव मयास्य निहिता करे ॥ ६० ॥
अवमुच्याक्षमालेति कण्ठान्मुक्तावली निजात् ।
साप्यलक्ष्यत नानेन मन्मुखासक्तदृष्टिना ॥ ६१ ॥
सखीभिरपि मे दृष्टमिदं चापलमुच्चकैः ।
किंचित्संजातलज्जेव सरस्तटमुपागमम् ॥ ६२ ॥
तत्राहमस्वतन्त्रेव मुहुः स्नात्वा यथा तथा ।
क्व गतास्मि किमायाता दृष्टः कोऽसावहं च का ॥ ६३ ॥
किमिदं कः प्रकारोऽयमिति नाज्ञासिषं तदा ॥ ६४ ॥
मुहूर्तादिव ताम्बूलकरङ्क१ग्राहिणी मम ।
प्रिया तरलिका नाम संप्रविश्येदमब्रवीत् ॥ ६५ ॥
कर्णे मुनिकुमारेण कृता ते येन मञ्जरी ।
त्वय्यागतायां पृष्टास्मि स्वरूपं तेन तावकं ॥ ६६ ॥
तच्छ्रुत्वा मदियं तेन लिखित्वा वस्त्रपट्टिका * २ ।
एकाकिन्यै त्वया तस्यै देयेत्युक्त्वा समर्पिता ॥ ६७ ॥
ततस्तरलिकायास्तां हस्तादादाय पट्टिकां ।
तस्यां तल्लिखितामार्यामिमामहमवाचयं ॥ ६८ ॥
दूरं मुक्तालतया बिससितया विप्रलभ्यमानो † मे ।
हंस इव दर्शिताशो मानसजन्मा त्वया नीतः ॥ ६९ ॥
सा तु तैमिरिकस्येव बभूव बहुलक्षपा ।
मोहायायाप्यनार्येव सुतरां मनसो मम ॥ ७० ॥
वद तेन किमुक्तासि स किमुक्तस्त्वयापि वा ।
तदन्तिके च विस्रब्धमुषितासि कियच्चिरं ॥ ७१ ॥
एवं तरलिकां तत्र चालपन्ती पुनः पुनः ।
कांचिदह्नस्ततो मात्रामुन्मत्तेवात्यवाहयम् ॥ ७२ ॥
अथ प्रलम्बमानेऽर्के प्रतीहारी प्रविश्य मे ।
भर्तृदारिकया दृष्टौ यौ तौ मुनिकुमारकौ ॥ ७३ ॥
तयोरन्यतरो द्वारि तिष्ठतीति न्यवेदयत् ।
शीघ्रं प्रवेशयेत्युक्ता मया तदभिशङ्कया ॥ ७४ ॥
सा च प्रवेशयामास तस्य तं सहचारिणं ।

* पत्रपट्टिका इति पाठान्तरम् ।
१ नारिकेलफलास्थिसदृशं भाजनं करङ्कः ।
२ परिधृतवल्कलखण्डम् ।
† विप्रलोभ्य—इति पाठान्तरम् ।

सत्कारैर्योचितैर्माहं भक्त्या चैनमपूजयं ॥ ७५ ॥
मुहूर्तमिव विश्रम्य पर्यङ्के मदुदाहृते ।
मदुत्तरीयसंमृष्टमाधौतचरणद्वयं ॥ ७६ ॥
दृष्टिं तरलिकायां च वक्तुकामः क्षणं व्यधात् ।
मया सोऽथापि पृष्टस्तु*लज्जमान इवाभ्यधात् ॥ ७७ ॥
अहं कपिञ्जलो नाम तस्य बालसुहृन्मुनेः ।
न वाक् प्रवर्तते चास्मिन्ननभ्यस्त इवाध्वनि ॥ ७८ ॥
क्वायं मुनिजनः शान्तः क्व चामी रागविभ्रमाः ।
तथापि व्यवसायो मे सुहृत्स्नेहरुगाश्रितः ॥ ७९ ॥
तदुच्चये प्रयातायां राजपुत्रि तदा त्वयि ।
हस्ते मुक्तावलीं बिभ्रत् स ममान्तिकमागतः ॥ ८० ॥
अहो रम्याक्षमालेयं त्वया नीतेति तत्क्षणं ।
विहस्य स मया किं किं नोक्तश्चित्तोपशान्तये ॥ ८१ ॥
नोपदेशप्रकारोऽसौ न स दृष्टान्तविस्तरः ।
न सोऽस्त्युपायो मन्त्रो वा यो मया नाभ्यधीयत ॥ ८२ ॥
वचोभिः खिद्यमानो मे त्रपानतशिरोधरः ।
क्षणमन्तर्हितो मत्तः सुतरां मामपीडयत् ॥ ८३ ॥
कृच्छ्रादिव मया लब्धो विचित्य सकलं वनम् ।
अन्य एव स संवृत्तो वचसां यो न गोचरः ॥ ८४ ॥
तदवस्थं तमालोक्य विरताशः प्रबोधने ।
अहं तत्प्राणरक्षार्थमेवं यत्नपरोऽभवम् ॥ ८५ ॥
आस्तीर्य नलिनीपत्रशयनं चन्दनोक्षितं ।
तत्रस्थस्यास्य कर्पूरपांशूनङ्गेष्ववाकिरं ॥ ८६ ॥
त्रपया तदवस्थोऽपि स किंचिद्वक्तुमक्षमः ।
सबाष्पमलिनां दीनां मयि दृष्टिमपातयत् ॥ ८७ ॥
ततोऽहमिदमेवात्र प्राप्तकालमचिन्तयं ।
राजपुत्रि सुहृत्प्राणरक्षार्थमुपागतः ॥ ८८ ॥
अतः परं तु सामर्थ्यगतार्था मम या गिरः ।
कण्ठे विपरिवर्तन्ते काश्चित्ता त्वमपि वेत्सि ताः ॥ ८९ ॥
इति तस्मिन् वदत्येव प्रविश्य प्राह कञ्चुकी ।
त्वमस्वस्थशरीरेति ज्ञात्वा देवी समागता ॥ ९० ॥
तच्छ्रुत्वा जनसंमर्दभीरुर्यातः कपिञ्जलः ।
न स प्रतिवचः किंचिन्मामकीनमपेक्षत ॥ ९१ ॥

* संज्ञाविनिर्दिष्टो इति पाठान्तरम् ।
† क्वचित् पाठान्तरमेतत् ।

तदुक्तां तु दशां तस्य जनस्यावेद्य तादृशीम् ।
आगतां वा गतां वापि नाहमम्बामलक्षयं ॥ ९२ ॥
ततः कमलिनीं त्यक्त्वा रागे*क्वापि गते रवौ ।
उदिते सर्वथा वामे विधौ वैधुर्यदायिनि † ॥ ९३ ॥
उन्मूलितेव कामेन दग्धेव विरहाग्निना ।
पुनस्तरलिकामेव साश्रुकण्ठमवादिषम् ॥ ९४ ॥
अहं यथा तथा वापि भवेयं स तु मत्कृते ।
कथं भविष्यतीत्येषा चिन्ता दोलायतीव‡माम् ॥ ९५ ॥
इतः शास्त्रं कुलाचारो लज्जा गुरुजनाद्भयम् ।
इतः कामो वसन्तेन्दू विरहो मरणाद्भयम् ॥ ९६ ॥
वद किं करवाण्यत्र मुह्यतीव मनो मम ।
माभून्मे दुस्तरे विप्रवधैनसि निमज्जनम् ॥ ९७ ॥
इत्यादि विलपन्त्या मे तत्कालसुलभोदया ।
जहार चेतनां मूर्छा निद्रेव नयनद्युतिम् ॥ ९८ ॥
अथ मां ग्राहयित्वासौ संज्ञां शीतजलानिलैः ।
निपत्य पादयोः साश्रुनेत्रा तरलिकाऽवदत् ॥ ९९ ॥
गन्धर्वाणां विवाहोऽयमिच्छयान्योन्यसंगमः ।
शास्त्रेषु पठितस्तस्मात् तूर्णमुत्तिष्ठ गम्यतां ॥ १०० ॥
किं शास्त्रं गुरवः के वा का लज्जा का कुलस्थितिः ।
रक्ष्यन्तामात्मनः प्राणा यूनस्तस्य च सर्वथा ॥ १ ॥
तयैवमुक्ता तत्कालयोग्यवेषग्रहा गृहात् ।
तामेकामग्रतः कृत्वा निर्गताहमलक्षिता ॥ २ ॥
अभ्यागममिमां भूमिमौत्सुक्यचटुलैः पदैः ।
तदा मे दक्षिणं चक्षुरस्पन्दत मुहुर्मुहुः ॥ ३ ॥
अव्यक्तमिव चाश्रौषं § कानने रुदितध्वनिं ।
तेनैवोत्पन्नशङ्काहमगच्छमधिकत्वरा ॥ ४ ॥
पदानि कतिचिद्गत्वा हा वयस्य तपोनिधे ।
पुण्डरीक क्व यातोऽसि शून्यं कृत्वा जगत्त्रयं ॥ ५ ॥
हा हतोऽस्मि विलीनोऽस्मि दग्धोऽस्मि करवाणि किं ।
गत्वा तातस्य वक्ष्यामि श्वेतकेतोः किमग्रतः ॥ ६ ॥
अयि पापे महाश्वेते न तुष्टास्यक्षमालया ।

* रक्तां क्वचिदयं पाठः ।
† वै धैर्यनाशिनि इति क्वचित् पाठः ।
‡ दारयतीव इति क्वचित् पाठः ।
§ अथास्फुटमिवाश्रौषं क्वचित् पाठोऽयम् ।

Digitized by Google

हृता मे सुहृदोऽमुष्य प्राणवृत्तिरपि त्वया ॥ ७ ॥
वयस्य देहि मे वाचं न जीवामि त्वया विना ।
तथाऽश्रौषमित्यादि विलपन्तं कपिञ्जलम् ॥ ८ ॥
अथ प्रकम्पमानाङ्गी विसंष्ठुलपदक्रमा १ ।
केनाप्युत्क्षिप्य नीतेव तं प्रदेशमयासिषं ॥ ९ ॥
गत्वा तमहमद्राक्षं तत्त्वयोत्क्रान्तजीवितं ।
किं चिरेणागतासीति रुषित्वेव तथा स्थितम् ॥ १० ॥
एतावदुक्त्वा मूर्छान्धा स्ववृत्तान्तमनन्तरं ।
विवचन्तीव सा कन्या निपपात शिलातले ॥ ११ ॥
प्रनष्टचेतनां चैनां चन्द्रापीडो विलोकयन् ।
प्रश्नकारिणमात्मानं कृतागसममन्यत ॥ १२ ॥
ससंभ्रमं समुत्थाय कदलीदलमारुतैः ।
तोयैश्च शिशिरैः स्वच्छैः संज्ञामेनामजिग्रहत् ॥ १३ ॥
अथाप्तचेतना चासौ स्मृत्वा तद्व्यसनं निजं ।
तदैवानुभवन्तीव रुरोद विललाप च ॥ १४ ॥
तरूणामप्यभज्यन्त हृदयानि तदा शुचा ।
प्रतिशब्देन चैवोच्चैर्दिशोऽपि रुरुदुश्चिरं ॥ १५ ॥
चन्द्रापीडोऽपि तामाह बाष्परुद्धविलोचनः ।
आस्तां न शक्यते वक्तुं श्रोतुं वान्यदतः परं ॥ १६ ॥
कथमप्युपसंहृत्य शोकावेगं तु साऽवदत् ।
किमतः परमस्त्यन्यद्वाच्यं श्रोतव्यमेव च ॥ १७ ॥
किंतु क्लेशाय येनाशाबन्धेन धृतजीवितं ।
राजपुत्र बिभर्मीदं तदाश्चर्यं ब्रवीमि ते ॥ १८ ॥
तदा तस्यातितीव्रस्य दुःखभारस्य* तादृशः ।
न काचिन्मरणादन्या मयाग्राहि प्रतिक्रिया ॥ १९ ॥
मरणव्यवसायनिश्चयं
कृतवत्यस्मि च संविधानकं ।
निरियाय च चन्द्रमण्डलात्
पुरुषः कोऽपि हिमोपमद्युतिः ॥ २० ॥
सोऽवतीर्य गगनान्महीतले
तं निधाय भुजपञ्जरान्तरे ।
उत्पतन् दिवमुदात्तया गिरा
मामवोचत पितेव सान्त्वयन् ॥ २१ ॥

१ स्खलनशीलचरणविन्यासा ।
*—दारुणस्य इति पाठान्तरम् ।

विरम मरणोपायादस्मात् प्रियेण तवामुना
पुनरपि महाश्वेते वत्से भविष्यति संगमः ।
इति गिरमिमां श्रुत्वा तस्मात् ससंभ्रमविस्मया
किमिदमिति तं तथापृच्छं प्रसृत्य कपिञ्जलं ॥ २२ ॥
प्रियसखमपहृत्य क्वाधुना गच्छसीति
स्फुरितविकटकोपाटोपमुक्तार्द्रदृष्टिः ।
मम वचनमदत्त्वा किंचिदेवातिवेगात्
कृतपरिकरबन्धः सोऽप्यगादन्तरिक्षं ॥ २३ ॥
प्रत्यक्षं मम* ते त्रयोऽपि विविशुः शीतत्विषो मण्डलं
तत्संप्रत्ययसंहृतोचितविधिः † सास्मि श्रितेदं व्रतं ।
तातेनापि ततः प्रभृत्यहमिहासीनैव नेतुं गृहं
यत्नेनापि न पारितेति स चिरं स्थित्वा गतः स्वान् गृहान् ॥ २४ ॥

॥ इति कादम्बरीकथासारे चतुर्थः सर्गः ॥ ४ ॥

इत्यावेदितनिर्व्याजवृत्तान्तबहुविस्तरा ।
विरराम महाश्वेता निश्वासम्लपितद्रुमा‡ ॥ १ ॥
चन्द्रापीडस्तु तद्ध्यायन् मनोभवविजृम्भितं ।
संकम्पविस्मयोऽप्यन्तस्तामथोवाच सान्त्वयन् ॥ २ ॥
मया ते चिरवृत्तोऽपि परिणाममपश्यता ।
शोकः प्रत्ययतां नीतः कौतुकाक्षिप्तचेतसा ॥ ३ ॥
सा त्वमर्हसि कल्याणि न शोकं कर्तुमीदृशम् ।
आश्वासितासि देवेन नूनं चन्द्रमसा स्वयं ॥ ४ ॥
कोऽन्यस्तथाविधाकारस्तच्छशिमण्डलात् ततः ।
निर्गत्य तत्रैव वियन् निशि संभाव्यते नरः ॥ ५ ॥
श्रूयन्ते गतयश्चित्रा देवतानामनेकशः ।
वरशापतपःशक्तियोगवैचित्र्यनिर्मिताः ॥ ६ ॥
श्वेतकेतुश्च तस्यास्ते§ प्रजापतिसमः पिता ।
नास्त्येव तस्य तपसामवश्यं‖ नाम किंचन ॥ ७ ॥
इत्यादियुक्त्युपन्यासैरितिहासनिदर्शनैः¶ ।
महाश्वेतां समाश्वास्य पुनः पप्रच्छ तामसौ ॥ ८ ॥
सा ते तरलिका नाम विस्रम्भनिभृता सखी ।

* पश्यन्त्यां मयि इति पाठान्तरम् ।
†—संचितोचितविधिः इति पाठान्तरम् ।
‡—म्लपिताधरा इति क्वाचित्कः सुपाठः ।
§ तस्यासौ इति क्वचित् पाठः ।
‖—मसाध्यं क्वचिदयं पाठः ।
¶—हासनिदर्शनैः इति पाठान्तरम् ।

Digitized by Google

गता भगवति क्वाद्य न हि सा त्वां विमुञ्चति ॥ ९ ॥
पृष्टोवाच महाश्वेता क्वासौ याति तपस्विनी ।
श्रूयताचापि निमित्तं मे यथासौ प्रहिता मया ॥ १० ॥
यश्च चित्ररथो नाम गन्धर्वाधिपतिर्मया ।
वर्णितो येन देवोऽयं प्रत्यक्षोऽपि महेश्वरः ॥ ११ ॥
येन खानितमत्यच्छमच्छोदाख्यमिदं सरः ।
येन चैत्ररथं नाम कृतमेतच्च काननं ॥ १२ ॥
तस्यामृतसमुत्पन्ने प्रसूताप्सरसां कुले ।
महिषी मदिरा नाम जीवितादपि वल्लभा ॥ १३ ॥
तयोः कादम्बरी नाम कन्यास्ति नवयौवना ।
लक्ष्मीमुपहसन्तीव रूपलावण्यविभ्रमैः ॥ १४ ॥
तया सह महाप्रेम बाल्यात् प्रभृति मे तथा ।
यथैकमेव जानाति जनो जीवितमावयोः ॥ १५ ॥
विदित्वा दग्धवृत्तान्तमिमं सपदि मामकं ।
साग्रहीन्नियमं बाला वार्यमाणापि बन्धुभिः ॥ १६ ॥
महाश्वेतास्य* दुःखस्य यावन्न लभतेऽवधिं ।
तावन्मया न सोढव्यं पाणिग्रहणमात्मनः ॥ १७ ॥
यतो† यथा यथा तस्या यौवनश्रीर्विजृम्भते ।
तत‡स्तथा तथा खेदं धत्ते चित्ररथः परं ॥ १८ ॥
संदिष्टं तेन मे पूर्वं यतस्त्वावहिता तथा ।
यथेमं दुर्ग्रहग्रन्थिं विमुञ्चति तव स्वसा ॥ १९ ॥
ततस्तरलिका तत्र मया प्रकरणोचितं ।
प्रहिता बहु संदिश्य श्वश्चागन्तेव सा ततः§ ॥ २० ॥
इतीत्थं कथया नीत्वा महाश्वेताश्रमे दिनं ।
चन्द्रापीडः प्रयातेऽस्तमर्के सन्ध्याविधिं व्यधात् ॥ २१ ॥
तत्रेन्द्रायुधमानीय संयम्य निचुले¹ क्वचित् ।
महाश्वेतोदिते देशे पर्णशय्यामकल्पयत् ॥ २२ ॥
तस्य शय्यानिषण्णस्य श्रान्तस्यापि यथा तथा‖ ।
कथामाश्चर्यबहुलां तामेव ध्यायतश्चिरं ॥ २३ ॥

* स्व– इति पाठान्तरम् ।
† ततो इति पाठान्तरम् ।
‡ तात– इति पाठान्तरम् ।
§ पुनः इति पाठान्तरम् ।
१ स्थलवेतसे
‖ यथा श्रुताम् इति पाठान्तरम् ।

पुनः पुनर्महाश्वेतां* वैशम्पायनमेव च ।
पत्रलेखां च सा रात्रिर्गता प्रायेण जाग्रतः ॥ २४ ॥
इन्द्रायुधश्च बाहाभ्यो† महाश्वेतामुखे भृशं ।
सप्रत्यभिज्ञमश्वोऽपि दृष्टिं मानुषवद्ददौ ॥ २५ ॥
प्रयातायां तु शर्वर्यां कृतप्राभातिकक्रिये ।
समाधेरुत्थितां बुद्ध्वा महाश्वेतां तदन्तिकम् ॥ २६ ॥
चन्द्रापीडे प्रविष्टेऽथ नातिदूरं गते‡ रवौ ।
सगन्धर्वकुमारासौ ततस्तरलिकाऽऽययौ ॥ २७ ॥
सा प्रविष्टा§ महाश्वेतां प्रणिपत्योपविश्य च ।
सिद्धार्थासीति तत्पृष्टा चलितग्रीवमब्रवीत् ॥ २८ ॥
त्वत्संदेशं निशम्योक्तं यत् तया भर्तृदारिके ।
तच्च तच्छ्रावणाकारि‖ केयूरकमुखाच्छृणु ॥ २९ ॥
अथ केयूरकः प्राह नानभिज्ञासि चेतसः ।
स्वस्य स्वमेव चेतस्ते मन्मनः किं परीक्षसे ॥ ३० ॥
भूमिर्वै तादृशस्याहमुपालम्भस्य भूयसः ।
तथा ¶वननिवासिन्यां त्वय्यहं गृहवासिनी** ॥ ३१ ॥
आकर्ण्य तव संदेशवचस्तरलिकामुखात् ।
एष ते प्रतिसंदेशः प्रियसख्या निवेदितः ॥ ३२ ॥
इति श्रुत्वा महाश्वेता चिरं निश्चललोचना ।
चिन्तयित्वा किमप्यन्तश्चन्द्रापीडमवोचत ॥ ३३ ॥
राजपुत्र तवोदारः †† समाचारश्च पेशलः ।
तनोति सर्वभावेषु निस्पृहाणामपि स्पृहां ॥ ३४ ॥
कादम्बरीवचश्चेदं श्रुतं केयूरकात् त्वया ।
तत्र को वा प्रतीकारः स्वयं मद्गमनादृते ॥ ३५ ॥
इतो न दूरे गन्धर्वराजधानी तदद्य तां ।
पश्यास्मदनुरोधेन श्वो गन्तासि स्ववाहिनीम् ॥ ३६ ॥
उदात्तमधुरामेनां दर्शयन्त्या त्वदाकृतिं ।

* पुनश्चिन्तयतः सेनां इति पाठान्तरम् ।
† बाष्पार्द्रौ क्वचिदिति पाठान्तरम् ।
‡–दूरोद्गते इति पाठान्तरम् ।
§ प्रविश्य इति पाठान्तरम् ।
‖–ऽऽयात– इति पाठान्तरम् ।
¶ तपोवन– इति पाठान्तरम् ।
**–शायिनी इति पाठान्तरम् ।
††–व्याकारः इति पाठान्तरम् ।

Digitized by Google

बहु गन्धर्वलोकस्य मयाप्युपकृतं भवेत् ॥ ३७ ॥
चन्द्रापीडस्तु तामाह बहूक्त्वा भगवत्यलम् ।
अनतिक्रमणीयं ते मुनीनामपि शासनं ॥ ३८ ॥
प्रावर्तत ततो गन्तुं स महाश्वेतया सह ।
पद्भ्यामेव नियुज्याश्वं प्रति केयूरकं दृशा ॥ ३९ ॥
केयूरकोऽग्रतो गत्वा कादम्बर्यै न्यवेदयत् ।
तस्यागमनमाकारं गुणांश्चाहितविस्मयान् ॥ ४० ॥
गत्वा कथंचिदध्वानं चन्द्रापीडः समासदत् ।
गन्धर्वराजनगरीमपराममरावतीम् ॥ ४१ ॥
आसाद्य राजधानीं च तुङ्गस्फाटिकतोरणां* ।
सप्त कक्षा अतिक्रम्य कन्यान्तःपुरमभ्यगात् ॥ ४२ ॥
केयूरकोपदिष्टेन वर्त्मनाथ प्रविश्य सः ।
भास्वन्मरकतस्तम्भं श्रीमण्डपमलोकयत् ॥ ४३ ॥
तन्मध्ये मणिपर्यङ्कमध्यासीनां महीयसा ।
रत्नाभरणचित्रेण स्त्रैणेन परिवारितां ॥ ४४ ॥
देहप्रभावितानेन रत्नकान्त्यभिभाविना ।
उत्तप्तकनकद्योतधौता विदधतीं दिशः ॥ ४५ ॥
तटस्थमप्यार्द्रयतः स्वमाधारमसिञ्चतः ।
स्थितां नवस्य लावण्यसिन्धो रत्नतरङ्गिणीं ॥ ४६ ॥
सर्वोपमेयभावानामुपमानत्वमागतां ।
कादम्बरीं ददर्शासौ दूरविस्फारितेक्षणः ॥ ४७ ॥
परातिशयकोटिस्थां रूपलावण्यसंपदं ।
तस्या निरूपयन्नन्तश्चिन्तयामास स क्षणं ॥ ४८ ॥
सत्यं न कश्चिदाश्चर्यनिर्माणेष्ववधिर्विधेः ।
ईदृशान्यपि रत्नानि स्रष्टुं प्रभवति स्म यः ॥ ४९ ॥
मोघं याति हरेः कालो लक्ष्मीं वक्षसि बिभ्रतः ।
देहार्धेन दधद् गौरीं वञ्चितश्चन्द्रशेखरः ॥ ५० ॥
कृतमक्ष्णां सहस्रेण निर्निमेषेण वज्रिणः ।
अनन्यकर्मणा येन नित्यमेषा न दृश्यते ॥ ५१ ॥
इत्यादि चिन्तयत्यस्मिन्नथ चित्ररथात्मजा ।
प्रत्युद्ययौ महाश्वेतामभ्युत्थाय ससंभ्रमं ॥ ५२ ॥
महाश्वेता तु निःसङ्गमालिङ्ग्य स्नेहनिर्भरं ।
तां चन्द्रापीडनिर्देशपुरःसरमभाषत ॥ ५३ ॥

*—स्फटिक— इति पाठान्तरम् ।

अयं हि भारते वर्षे सार्वभौमस्य भूपतेः ।
तारापीडस्य तनयश्चन्द्रापीड इहागतः ॥ ५४ ॥
अनेनेह प्रविष्टेन दृष्टेर्विषयवर्तिना ।
भवत्वखिलगन्धर्वकुटुम्बकमहोत्सवः ॥ ५५ ॥
अथ कादम्बरी तस्मिन् पक्ष्मोत्क्षेपविकासिनी ।
आकर्णप्रसृतापाङ्गं चिरं दृष्टिमपातयत् ॥ ५६ ॥
द्वारेण विवृतेनाथ तेनैव निजमायया ।
मदनोऽन्तः प्रविश्यास्या बबन्ध हृदये पदं ॥ ५७ ॥
रत्नपीठोपविष्टे तु चन्द्रापीडे तदन्तिके ।
अध्यासिषातामेकत्र हंसचित्ररथात्मजे ॥ ५८ ॥
लज्जास्तिमितमासीनामथ कादम्बरीं बलात् ।
महाश्वेता गृहाचारं चन्द्रापीडे व्यधापयत् ॥ ५९ ॥
शरीरनिर्विशेषाथ कादम्बर्याः प्रिया सखी ।
मदलेखाभिधानास्य चरणक्षालनं व्यधात् ॥ ६० ॥
कादम्बरी तु सस्वेदप्रकम्पकरपल्लवा ।
ताम्बूलच्छद्मनात्मानं स्वयमस्मै न्यवेदयत् ॥ ६१ ॥
तदङ्गुलितलस्पर्शमाधुर्यहृतमानसा ।
नालक्षयत सा रत्नवलयं प्रच्युतं करात् ॥ ६२ ॥
चन्द्रापीडोऽपि तत्पाणितलसंस्पर्शमाचया ।
तया त्रिभुवनाधीशमिवात्मानममन्यत ॥ ६३ ॥
तूष्णीमथ तदासीने सर्वस्मिन् कन्यकाजने ।
शुकसारिकयोरासीत् कलहः केलिकारणं ॥ ६४ ॥
तत्प्रसङ्गेन सोत्प्रासं तयोः कलहवृद्धये ।
चन्द्रापीडोऽब्रवीद्येन सर्वास्तुतुषुरङ्गनाः ॥ ६५ ॥
ताश्च दन्तप्रभाधौतदिङ्मुखा मधुरस्वराः ।
चन्द्रापीडगिरो जह्रुस्तदा कादम्बरीमनः ॥ ६६ ॥
क्षणं प्रविश्य तत् स्थानं मधुरं प्राह *कञ्चुकी ।
राजपुत्र्यो युवां द्रष्टुं देवी निर्विघ्नमिच्छति ॥ ६७ ॥
क्रीडापर्वतके कृत्वा सुतारमणिमन्दिरे ।
चन्द्रापीडं सुखावासमयातां मातुरन्तिके ॥ ६८ ॥
तत्राध्यासितपर्यङ्कं केयूरकपुरःसराः ।
मुख्याः कादम्बरीसख्यश्चन्द्रापीडं सिषेविरे ॥ ६९ ॥
स्नानानुलेपनाहारक्रियाः स तदुपाहृतैः ।

* क्षणमात्रे व्यतीतेऽथ प्रविश्य प्राह इति पाठान्तरम् ।

चक्रे शक्रपुरं प्राप्य विभवैरुपपादिताः ॥ ७० ॥
अथ मन्दप्रभे भानौ भेजे कादम्बरी निजं ।
मदलेखाद्वितीयैव महाप्रासादमस्तकं ॥ ७१ ॥
चन्द्रापीडं च तत्रस्था क्रीडापर्वतवर्तिनं ।
निरवर्णयदाकर्णप्रसृतापाङ्गया दृशा ॥ ७२ ॥
चन्द्रापीडे तदा तस्याः कटाक्षास्तीक्ष्णकोटयः ।
समं निपेतुरस्यां च कुसुमायुधसायकाः ॥ ७३ ॥
कटाक्षैरुपनीतं च तीव्रं कृतसमागमैः ।
तल्लावण्यं पीबन्तीव मदलेखामुवाच सा ॥ ७४ ॥
न मया मदनो नाम कथास्वपि सखि श्रुतः ।
अद्य प्रत्यक्षतो दृष्टः स चन्द्रापीडविग्रहः ॥ ७५ ॥
न महाश्वेतया किंचिदुक्तं प्रकृतवस्तुनि ।
अथवेहानयन्त्यामुं सर्वमुक्तमनक्षरम् ॥ ७६ ॥
अपि नाम विकारो मे तदानीं लक्षितस्तया ।
किंवा न लक्षयत्येषाऽदृष्टमन्मथविभ्रमा ॥ ७७ ॥
अद्यापि निजसंकल्पविरुद्धां विक्रियामिमां ।
मनसः संहराम्येव स्थूलामपि यथा तथा ॥ ७८ ॥
किंत्वसौ शेषहारोऽस्यास्तुल्यं मण्डनमाकृतेः ।
उरस्यनिच्छतोऽप्यस्य तूर्णमामुच्यतां त्वया ॥ ७९ ॥
मदलेखा गृहीत्वा तं हारं गत्वा तदन्तिकं ।
तथोवाच यथानेन प्रत्युक्ता सा न किंचन ॥ ८० ॥
आमुच्यत ततः कण्ठे हारोऽस्य मदलेखया ।
शरदिन्दुकरोदारप्रभाप्लावितदिङ्मुखः ॥ ८१ ॥
चन्द्रापीडस्य हारेण रराज कृतमण्डनः ।
पूर्णेन्दुरिव नक्षत्रकलापपरिवारितः ॥ ८२ ॥
कादम्बरी चिरं त्वेनमवलोक्य निशागमे ।
प्रासादशिखरात् तस्मान्मन्दं मन्दमवातरत् ॥ ८३ ॥
iv. 25, 5. "Dear is the righteous man, dear to Indra is the man who reveres him, dear is the worshipper, dear to him is the offer of soma. 6. This impetuous and heroic Indra regards as peculiarly his own the cooked oblation of the devout soma-offerer; he is not the relation, or friend, or kinsman, of the man who offers no libations; he destroys the prostrate irreligious man. 7. Indra, the soma-drinker, approves not friendship with the wealthy niggard *(revatá paṇiná)* who offers no libations. He deprives him of his riches, and destroys him when stripped bare, whilst he is the exclusive favourer of the man who offers libations and cooks offerings."

iv. 51, 3. "The magnificent dawns, appearing, have to-day aroused the liberal to the bestowal of wealth. Let the niggards *(paṇayah)* sleep in gloom and the regardless in the midst of darkness." (Compare i. 124, 10.)

v. 34, 3 (=Nirukta vi. 19). "Whoever offers soma-libations to Indra, either in sunshine or darkness, becomes glorious. The mighty god drives away the ostentatious; the opulent god (drives away) the man who decks out his person, and is the friend of the degraded. (Yâska adds to these epithets of the objects of Indra's enmity that of *ayajvânam*, 'one who does not worship.') 5. Indra desires no support from five or from ten (allies); he consorts not with the man who offers no libation, however flourishing; but overwhelms, and at once destroys such a person, whilst he gives the godly man a herd of kine as his portion. 6. The enemy of him who makes no libations, the promoter of him who offers libations, Indra, the terrible subduer of all, the lord, brings the Dâsa into subjection. 7. He gathers together the goods of the niggard *(paṇeh)* to be spoiled; he allots to the sacrificer wealth beneficial for men. Every one who provokes his fury is deeply involved in difficulty."

v. 42, 7. "Praise the first depositary of gems, Brihaspati, the bestower of riches, who is most propitious to the man that hymns and lauds him, who comes with abundant wealth to the man that invokes him. 8. Those who are attended by thy succours, Brihaspati, are unharmed, affluent, rich in men. The possessions of those who bestow horses, cows, and raiment, are blest. 9. Make unblest the wealth of those who enjoy themselves while they do not gratify (thee) with our hymns.[1] Drive

[1] Or, according to Sâyaṇa, "who do not satisfy us who are possessed of laudatory hymns."

Digitized by Google

away from the sunlight those haters of devotion *(brahma-dvishah)* who are averse to religious rites, while they increase in progeny. 10. Hasten, O Maruts, without wheels[1] against the man who attends at the sacrifice of a Rakshas (or sinner).[2] He who reviles the man who celebrates your service secures but contemptible pleasures, however much he may sweat."

vi. 13, 3. "That lord of the virtuous by his power destroys Vrittra (or the enemy); O wise Agni, offspring of the ceremonial, that sage whom thou in concert with the son of the waters prosperest with wealth, divides the spoil of the niggard *(paṇeh)*."

vi. 44, 11. "Abandon us not, O vigorous god, to the destroyer; let us not suffer injury whilst we live in the friendship of thee who art opulent. Thy former bounties to men (are known); slay those who offer no libations; root out the illiberal *(apṛṇatah)*."

[1] *Achakrebhih*, easily, swiftly, noiselessly, suddenly. Campare the phrase *achakrayá svadhyá varttamánam* in x. 27, 19, and *nichakraya*, viii. 7, 29.

[2] This latter rendering of the words *ya ohate rakshaso devavitau*, is suggested by Professor Aufrecht. Campara the words *má no martáya ripave rakshasvine*, etc., viii, 49, 8, and *yo nah kaschid ririkshati rakshastvena marytyah*, etc., viii, 18, 13. Sáyaṇa renders the words under consideration by "who brings Rakshases to the sacrifice,—by irregular observances etc., makes it demoniacal *(ásura)*."

(To be continued.)

PROSPECTUS.

THE

SACRED HYMNS OF THE BRAHMANS

AS PRESERVED TO US IN THE

OLDEST COLLECTION OF RELIGIOUS POETRY,

THE RIG-VEDA-SANHITA,

TRANSLATED AND EXPLAINED

BY

MAX MÜLLER, M. A.,

TAYLORIAN PROFESSOR OF MODERN EUROPEAN LANGUAGES IN THE UNIVERSITY OF OXFORD; FELLOW OF ALL SOULS COLLEGE.

AFTER twenty years spent in collecting and publishing the text of the Rig-Veda with the voluminous Commentary of Sáyaṇa, I intend to lay before the public my translation of some of the hymns contained in that collection of primeval poetry. I cannot promise a translation of all the hymns, for the simple reason that, notwithstanding Sáyaṇa's traditional explanations of every word, and in spite of every effort to decipher the original text, either by an intercomparison of all passages in which the same word occurs, or by etymological analysis, or by consulting the vocabulary and grammar of cognate languages, there remain large portions of the Rig-Veda which, as yet, yield no intelligible sense. It is very easy, no doubt, to translate these obscurer portions according to Sáyaṇa's traditional interpretation, but the impossibility of adopting this alternative may be judged by the fact that even the late Professor Wilson, who undertook to give a literal rendering of Sáyaṇa's interpretation of the Rig-Veda, found himself obliged, by the rules of common sense and by the exigencies of the English language, to desert, not unfrequently, that venerable guide. I need hardly repeat what I have so often said,[1] that it would be reckless to translate a single line of the Rig-Veda without having carefully examined Sáyaṇa's invaluable commentary and other native authorities, such as the Bráhmaṇas, the Áraṇyakas, the Prátisákhyas, Yáska's Nirukta, Saunaka's Bṛihaddevatá, the Sútras, the Anukramaṇís, and many other works on grammar, metre, nay, even on law and philosophy, from which we may gather how the most learned among the Brahmans understood their own sacred writings. But it would be equally reckless not to look beyond.

A long controversy has been carried on, during the last twenty years, whether we, the scholars of Europe, have a right to criticise the traditional interpretation of the sacred writings of the Brahmans. I think we have not only the right to do so, but that it is the duty of every scholar never to allow himself to be guided by tradition, unless that tradition has first been submitted to the same critical tests which are applied to the suggestions of his own private judgment. A translator must before all things, be a "sceptic," a man who looks about, and who chooses that for which he is able to make himself honestly responsible, whether it be suggested to him, in the first instance, by the most authoritative tradition or by the merest random guess.

I offer my translation of such hymns as I can, to a certain extent, understand and explain, as a humble contribution towards a future translation of the whole of the Rig-Veda. There are many scholars in England, Germany, France, and India who now devote their energies to the deciphering of Vedic words and Vedic thoughts; in fact, there are few Sanskrit scholars at present who have not made the Veda the principal subject of their studies. With every year, with every month, new advances are made, and words and thoughts, which but lately seemed utterly unintelligible, receive an unexpected light from the ingenuity of European students. Fifty years hence I hope that my own translation may be an-

[1] This subject and the principles by which I shall be guided in my translation of the Rig-Veda have been discussed in an article lately published in the Journal of the Royal Asiatic Society, New Series, vol. ii., part 2, "*The Hymns of the Gaupáyanas and the Legend of King Asamáti.*" The same volume contains two valuable articles on the same subject by Mr. J. Muir, D.C.L.

Digitized by Google

antiquated and forgotten. No one can be more conscious of its shortcomings than I am. All I hope is that it may serve as a step leading upwards to a higher, clearer, truer point of view, from which those who come after us may gain a real insight into the thoughts, the fears, the hopes, the doubts, the faith of the true ancestors of our race;—of those whose language still lives in our own language, and whose earliest poetical compositions have been preserved to us for more than three thousand years, in the most surprising, and, to my mind, the most significant manner.

MAX MÜLLER.

OXFORD, *January*, 1867.

The present publication is intended to form eight volumes, of about twenty-five sheets each, containing an English translation, notes, and explanatory essays. A transliterated text (in the original Pada form) will be added in order to obviate the necessity of quoting a whole passage again and again in the various notes on the same verse. The first volume will be published as soon as a sufficient number of subscribers has been obtained. Not more than two volumes to be published in each year.

Terms of Subscription before publication, 10*s.* 6*d.* per volume—the price to Non-subscribers after publication will be 12*s.* 6*d.* per volume.

TRÜBNER & Co., 60, Paternoster Row, London.

[SPECIMEN.]

RIG-VEDA SANHITÁ.

Hymn to the Maruts (the Storm-gods), ascribed to Kanva, the son of Ghora.

1. Sing forth, O Kanvas, to the sportive host of your Maruts, brilliant on their chariots, and unscathed.

2. They who were born self-luminous, together with the spotted deer (the clouds), with the spears, the daggers, the glittering ornaments.

3. I hear their whips, almost close by, as they crack them in their hands; they gain splendour on their way.

MANDALA I, SÚKTA 37.

ASHTAKA I, ADHYÁYA 3, VARGA 12-14.

Krílám vaḥ śárdhaḥ márutam anarváṇam ratheśúbham | káṇváḥ abhí prá gáyata. 1.

Yé príshatíbhiḥ rishṭí-bhiḥ sákám vâśíbhi añjíbhiḥ | ájáyanta svá-bhánavaḥ. 2.

Ihá-iva śrinve éshám káśáḥ hásteshu yát vádán | ní yáman chitrám riñjate. 3.

NOTES.

VERSE 1. Wilson translated *anarvánam* by without horses, though the commentator distinctly explains the word by without an enemy. Wilson considers it doubtful whether *arvan* can ever mean enemy. The fact is that in the Rig-veda *anarván* never means without horses, but always without hurt or free from enemies; and the commentator is perfectly right, as far as the sense is concerned, in rendering the word by without an enemy, or unopposed (*apraty-rita*). *Anarván* is not formed from *árvat*, horse.

The Publishers of the *Pandit* will receive the names of Indian subscribers, and forward them to Messrs. Trübner & Co.

Just Published. A new Edition, corrected and enlarged, of the LAGHU KAUMUDÍ, a Sanskrit Grammar, with an English version, commentary and references by Dr. BALLANTYNE, late Principal of the Sanskrit College, Benares, re-edited by RALPH GRIFFITH M. A., Principal of the Sanskrit College, Benares.—*Price Rs.* 8.

"The Translation of the Laghu Kaumudí made by the late Dr. Ballantyne has enabled even beginners to find their way through the labyrinth of Native Grammar." *Prof. Max Müller.*

May be procured from Messrs. Trübner & Co., London, the English Publishers.

The SIDDHANTA ŚIROMANI a TREATISE ON ASTRONOMY. By Bháskaráchárya; with his own exposition the Vásanábháshya edited by Pandita Bápú Deva Sástri, Honorary member of the Royal Asiatic Society of Great Britain and Ireland, Professor of Mathematics and Astronomy in the Sanskrit College, Benares.—*Price Rs.* 4-4.

Now ready.

A TRILINGUAL DICTIONARY; being a comprehensive Lexicon in ENGLISH, URDÚ and HINDÍ, exhibiting the syllabication, pronounciation, and etymology of English words, with their explanation in English, and in Urdú and Hindí in the Roman character, by Mathurá Praśada Miśra, Second Master Queen's College, Benares.

May be procured direct from us, by Book post; from any bookseller in Calcutta, Madras, or Bombay; or from Trübner & Co., London.—*Price Rs.* 16.

Communications of a literary nature should be addressed to the EDITOR: *all letters on business, to the Proprietors,* MESSRS. E. J. LAZARUS & Co., *to whom Drafts should be made payable.* ADVERTISEMENTS *will be charged for according to the space occupied.*

The PANDIT may be ordered of the Publishers, or through MESSRS. TRÜBNER and Co., LONDON.

Annual subscription, in advance, including postage, Rs. 12.

PRINTED AND PUBLISHED BY E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 14. Benares July 1st, 1867. Vol. II.

॥ तत्त्वालोको नाम ॥

॥ प्रकरणपञ्चिकायामष्टमं प्रकरणम् ॥ ८ ॥

आत्मतत्त्वे च बहुधा विवादाः सन्ति वादिनाम् ।
वयं प्राभाकरास्तत्र निर्णयाय यतामहे ॥

केचिद्बुद्धिमेवात्मानमिच्छन्ति । अन्ये बहिरिन्द्रियाण्येव । देहमेवापरे । तथैके बुद्धीन्द्रियशरीरव्यतिरेकिणमनुमेयमाहुः । केचित् तु मानसप्रत्यक्षगम्यं । स्वयंप्रकाशं केचित् । चित् सकलप्रतिपत्तिसिद्धं त्वन्ये मन्यन्ते । क्षणिकं च केचिदाचक्षते । कूटस्थनित्यमपरे । परमाणुपरिमाणः शरीरपरिमाणः सर्वगत इत्यादि वादिनो विवदन्ते । सर्वक्षेत्रेष्वभिन्न इत्येके । प्रति क्षेत्रं च नानाभूत इत्यपरे । तत्र तत्त्वनिर्णयार्थमिदमारभ्यते ।

बुद्धीन्द्रियशरीरेभ्यो भिन्न आत्मा विभुर्ध्रुवः ।
नानाभूतः प्रति क्षेत्रमर्थवित्तिषु भासते ॥

ननु न बुद्धेर्बोद्धुश्च भेदमुपलभामहे । यतो घटमहमवबुध्य इति बुद्धेर्बोद्धारमभिन्नं प्रतिपद्यते । सत्यम् । द्विचन्द्रादिवद्बिम्बप्रतिबिम्बवच्चायं भ्रम इति प्रामाणिकाः । सहोपलम्भनियमेन बुद्धेर्बोद्धुश्च भेदो निराक्रियते । भेदस्यानियमव्याप्तत्वात् । व्यापकविरुद्धनियमोपलम्भेन बाध्यमानत्वात् । तदाहुः ।

अविभागो हि बुद्ध्यात्मा विपर्यासितदर्शनैः ।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥

इति । येऽपि बुद्धेरन्यं बोद्धारमिच्छन्ति तेऽपि सत्यामेव बुद्धौ बोद्धृतामाहुः । एवं च सैव परं बोद्ध्री भवतु कृतमन्येन बोद्ध्रा । बोद्धा चात्मा भवतीति बुद्धिरेवात्मा । सा च स्वयंप्रकाशा कार्यकारणभावेनानादिसंतानवाहिनी स्वापमदमूर्छादिष्वभिभूततया पुनरनुसंधानपथं न याति । वहति त्वसौ तास्वपि दशास्वन्यथा जागरादिषु बुद्ध्युदयासंभवापत्तेः । स चायमनादिबुद्धिसंतानोऽनादिवासनानिबन्धनसंतानदर्शनाध्यासितभेदः समुदायवशवर्ती संसरति मार्गः साक्षात्कारोन्मूलितनिखिलसत्त्वदृष्टिवासनानुबद्धस्तूच्छिन्नः समुदायः प्रतिमुच्यते तदा अहंतासंतानो भेदः । तदाहुः ।

प्रदीपस्येव निर्माणं विमोक्षस्तस्य जायते ।

इति । देशिकानामनेकजन्माभ्यासस्वात्मीभूतब्रह्मादिस्तम्बपर्यन्तजगद्व्यापिमहाकरुणानां विशुद्धचित्तसंतानोऽनन्त इति । तदिदमसारम् । प्रतीतिसिद्धस्य बुद्धेर्बोद्धुश्च भेदस्य निराकरणासंभवात् । सहोपलम्भनियमस्तु यथा विभेदेऽप्युपपद्यते तथात्रैव वक्ष्यामः । निराकृतश्चायं बाह्यार्थसद्भाववृत्तुविमलायां । बुद्धिरेव परमस्त्वलं बोद्धेति यदुक्तं तदपि काल्पनिके बोद्धरि युक्तं वक्तुं साक्षात्प्रतीतिसिद्धे तु नावकाशोऽस्यासत्प्रलापस्य । स्वापादिषु च बुद्धिरनुवर्तत इति यत् तदपि प्रमाणाभावादसारम् । जागरादिषु बुद्धेरत्रैव कारणं वक्ष्यामः ।

एवं तर्हि भवन्त्विन्द्रियाणि सचेतनानि बुद्धेर्बोद्धुश्च भेदावभासो न घटिष्यते । भवेदेतदेवं यदि दर्शनस्पर्शनाभ्यामेकार्थानुसंधानं न स्यात् । यदहमद्राक्षं तदहं स्पृशामीत्यनुसंधातैकः प्रतीयते । स्मरणं चेन्द्रियार्थानां तत्तदिन्द्रियापायेऽपि यदुपलभ्यते तदिन्द्रियचैतन्ये नोपपद्यते ।

अस्तु देह एवात्मा न तत्रेमौ दोषौ प्रसज्येते । मैवम् । ज्ञाता ह्यात्मा नच देहस्य ज्ञातृता संभवति । नेति ब्रूमः । भूतान्तरसहितस्य भूतान्तरस्य कार्यारम्भकतेति वदामः । न पुनर्मिथोऽपि भूतानि न संयुज्यन्त इत्याचक्ष्महे । अतः संयुक्तभूतानां गुणान्तरोपलम्भो नानुपपन्नः । कथं पुनरारम्भकत्वसंभवः । न तावत् पञ्चानां चतुर्णां वा संभूयारम्भकत्वं संभवति । चाक्षुषाचाक्षुषद्रव्यारब्धस्य तत्समवायिनोऽचाक्षुषत्वापत्तेः । यत् खलु चाक्षुषाचाक्षुषद्रव्यारब्धतत्समवेतं तच्च चाक्षुषं वायुवनस्पतिसंयोगवत् । चाक्षुषश्च देहः । अतो न पञ्चभिश्चतुर्भिः समारब्धः । आकाशानिलयोरचाक्षुषत्वात् । कथं पुनरचाक्षुषं नभः । अचाक्षुषस्य सत्तापि किंप्रमाणिकेत्येतदपि चिन्त्यम् । उच्यते । न चाक्षुषं व्योम द्रव्यत्वे सत्यरूपत्वात् । ननु नारूपं गगनं । तर्हि धवलमुत्पलपलाशश्यामलं चोपलभ्यते । उच्यते । धवलिमा हि प्रायेण तेजस एव नीहारे तौहिनोऽपि वा तदपगमे तदनुपलम्भात् । यः पुनर्निशि नीलिमेवावलोक्यते नासौ नभसः । कस्य तर्हि न कस्य चित् । कथं पुनर्गुणो न कस्य चित् । सत्यं । गुण एवायमप्रसिद्धः । ननु प्रतीतिबलेन सिद्ध एव । सिध्येद्यदि प्रसिद्धिरेव सिध्येत् । सा तु कारणाभावाच्च सिद्धा । ननु चक्षुरेव कारणं । न । आलोकोपकारानपेक्षस्य चक्षुषोऽप्रकाशकत्वात् । तेनाप्रतीतावेवायं प्रतीतिभ्रमो मन्दानाम् । अत एव दिवानुपलम्भः । अन्यथा सौरीभिर्भाभिरनुगृहीतं चक्षुः स्फुटतरं व्योम्नि नीलिमानं प्रकाशयेत् । रूपं च स्पर्शसहचरितमिति स्पर्शवत्त्वं नभसः स्यात् । ततश्च सर्वमूर्तद्रव्यप्रतिघातप्रसङ्गः ।

केचित् तु तमसो नीलिमा गगनस्येवोपलभ्यत इत्याहुः । तदसदित्येके । तमसो निष्पत्त्यनवक्लृप्तेः । रूपवत्त्वेन हि तमो द्रव्यं स्यात् तच्चानेकद्रव्यारब्धं सच्चाक्षुषं भवेत् । नच तानि द्रव्याणि सन्ति सन्ति चेद्दिवाप्यारभेरन् । अन्धानामिव नीलिमाभिमानो नभस एवेत्युक्तं ।

यच्चेदमुच्यते छायेव तमः सा चलत्वाचलत्वमहत्त्वामहत्त्वदूरत्वासन्नत्वादिगुणयोगिनी वस्तुभूतेति । तदिदमप्यसारम् । अनवक्लृप्तेरेव । यच्चलाचलत्वादिकमुपन्यस्तं तदपि स्थूलदर्शितया । तथाहि । आलोकेऽपवारिते छायाप्यपेयते । ततोऽपवारितालोकभूभागादिभावव्यतिरेकिणी न रूपान्तरवच्छाया दृश्यते । तेन मन्यामहे व्यपवारितालोकभूभागादिकमेव छायेति । एतेन महत्त्वामहत्त्वदूरत्वासन्नत्वादीनि समर्थितानि । यत्तु तेजःप्रतिरोधि द्रव्यं तद्यथा यथा संचरति तथा तथालोकः प्रतिमुच्यते प्रतिरुध्यते चेति चलतीव छाया प्रतिभाति । अन्यथा शरीरेऽपि चलति किमिति छायापि चलेत् । हेत्वभावात् । एतेन चलति शरीरे चलत्वं व्याख्यातं । संख्यापरिमाणप्रचययोनि हि महत्त्वं तदभावे कथमिव छायायामुपपत्स्यत इत्यलमनया स्थूलदर्शनकथया नवबहुया । ननु भूभागादेरेव छायात्वे कथं द्रव्यान्तरेणापदेशः । अस्येयं छायेति । अपवारितालोकभूभागादेरेव छायेत्युक्तं । तत्र येनापवारणं तदपेक्षत्वादुच्यते व्यपदेशः । एवं च स्मृतिकाराणामपि नाक्रामेत् क्रामतश्छायामित्येवमादिव्यवहार उपपन्नः । योऽपि च शास्त्रकाराणां व्यवहारश्चित्रग्रहादीनां तुल्यं छायालक्षणं कार्यमिति सोऽप्यालोकापवारणाभिप्रायेण वर्णनीयः । न त्वालोकापवारणे भूभागादेरेव दर्शनप्रसङ्गः । मैवम् । प्रचुरतरालोकावयवसंयोगस्तत्र वार्यतेऽल्पशस्तु तेजोऽवयवाः समन्ततः संचरन्तः संयुज्यन्त एव । यत्र तु सर्वथा तेषामसंयोगः स महानन्धकार इति निरवद्यं । यश्च विस्फारिताक्षे रूपादिषु विवरमध्यस्थमीक्षत इत्युच्यते तत्रापि तेजोऽवयवास्ते रूपनैर्मल्याभावच्छेदास्तथा प्रतीयन्त इत्युक्तम् । नचैवं सत्याकाशस्यासिद्धिरेव । शब्दलक्षणगुणानुमानसिद्धत्वात् । ननु गुणतैव शब्दस्यासिद्धा द्रव्यत्वेन वादिभिरभ्युपेतत्वात् । यदाहुः ।

वर्णात्मकाश्च ये नित्याः शब्दाः सर्वगतास्तथा ।
पृथग्द्रव्यतया ते न तु गुणाः कस्य चिन्मताः ॥

इति । तदिदमसारम् । एकेन्द्रियप्रत्यक्षतया रूपादिवद्गुणत्वसिद्धेः । नच वायुनाऽनैकान्तिकता । तस्य वायोरतीन्द्रियतयाभ्युपेतत्वात् । येऽपि चैन्द्रियकं वा वायुमिच्छन्ति तेषामपि स्पर्शविरहे सतीति विशेषणोपादानाददोषः । एवं सिद्धगुणभावः शब्दो गुणिनमनुमापयति तच्च भूजलादिभावावगमकारणाभावाद् द्रव्यान्तरमेव तदवतिष्ठते । अप्रतीतसामानाधिकरण्यगुणभेदेन भेदानवगमात् । ननु मुखादिगतः शब्द उपलभ्यते । नेत्युच्यते । प्राप्यकारि श्रोत्रं । बहिरिन्द्रियत्वात् । कायेन्द्रियवत् । तत्र न तावच्छ्रोत्रं मुखादिदेशं गच्छति प्रत्यक्षा हि कर्णशष्कुली स्वदेशस्था दृश्यते । नापि मुखं श्रोत्रदेशमुपसर्पति तस्यापि स्वदेश एवोपलम्भात् । अतः श्रोत्रगत एव शब्दो गृह्यते । भ्रान्तिस्त्वेषा मुखे शब्द इति । नच गुणभूतस्य शब्दस्य संयोगलक्षणप्राप्तिरुपपद्यत इति समवाय एव तस्य प्राप्तिः । एवं शब्दगुणत्वाच्छ्रोत्रस्य । यत्तु शब्दगुणकं द्रव्यमाकाशपदावेदनीयं तदेव श्रोत्रमिति सिद्धं । ननु पार्थिवी कर्णशष्कुली श्रोत्रमस्तु । संयुक्तसमवायेन चाकाशगतं शब्दमुपलभतां । नैतदेवं । न हि साक्षात् प्रतीतिसंभवे प्रणालीसंश्रयणमुपपन्नं । नापि द्रव्यात्मकशरीरं गुणान्तरप्रादुर्भावापत्तेः । भूजलतेजांसि हि यथाक्रममनुष्णाशीतशीतोष्णस्पर्शानि । तैरारब्धं द्रव्यमेतत्पर्यायविलक्षणस्पर्शमापद्येत चित्रपटवत् । यथा सितासितादितन्तुसमारब्धः पटस्तन्तुरूपविलक्षणरूपस्तथा शरीरमप्यारम्भकद्रव्यस्पर्शविलक्षणस्पर्शं भवेत् । अनुष्णाशीत-

Digitized by Google

स्पर्शं चैतदुपलभ्यते । एतेनाध्यात्मिकतापि निषिद्धा । किंच । गन्धस्य पार्थिवद्रव्यसमवेतस्यैकाकिनो गन्धान्तरारम्भकत्वानुपपत्तेरगन्धं शरीरं स्यात् । भूतेजसोरप्तेजसोरारम्भकत्वेऽरसत्वमगन्धत्वमेवं वेदितव्यम् । अतो रूपस्पर्शगन्धयोगि शरीरं पार्थिवमेव । ज्ञानं च विशेषगुणः कार्यद्रव्ये च विशेषगुणः कारणगुणपूर्वक एव रूपादिवत् । नच कारणभूतेषु पार्थिवेषु ज्ञानमस्ति । तदारब्धे द्रव्यान्तरे घटादावदर्शनात् । स्यादेतत् । मदशक्तिवच्चैतन्यमपीति । यथा मदशक्तिः पार्थिवेष्वणुष्वसत्यपि तदारब्धे द्रव्ये सुराख्ये निष्पद्यते तथा चैतन्यमपि निष्पत्स्यत इति । तन्न । शक्तेरविशेषगुणत्वात् । शक्त्याख्यो हि गुणः सर्वत्र द्रव्येषु तत्तत्कार्यविषयः कार्यसमधिगम्योऽभ्युपगम्यते । चैतन्यं तु न देहादन्यस्य विद्यत इति विशेषगुणोऽसौ । अपि च द्रव्यान्तरसंयोगादकार्यभूतेषु पार्थिवाणुष्वकारणपूर्वोऽपि मदशक्त्याख्यो गुणो नानुपपन्नः । तदारब्धे सुराख्ये कार्यद्रव्ये कारणगुणपूर्व एव । चैतन्यं तु न प्रत्येकं परमाणुष्वभ्युपगम्यते । तस्माच्छरीरादन्यस्य गुणो ज्ञानमिति देहव्यतिरिक्तपुरुषानुमानं । स्यान्मतं । गुणत्वमेव ज्ञानस्याप्रसिद्धमिति । तन्न । द्रव्याश्रयत्वेन द्रव्याश्रयसंयोगविभागौ प्रति निरपेक्षकारणत्वाभावेन च गुणत्वसिद्धेः । नच वाच्यं द्रव्याश्रयत्वमेवासिद्धमिति । कार्यत्वात् । न हि कार्यं किंचिद्द्रव्यानाश्रितमात्मानं लभते । एवं सुखादिभ्योऽपि देहातिरिक्तपुरुषानुमानं वेदितव्यं ।

नैतदेवम् । घटमहं जानामीत्यहंकारास्पदस्य दृष्टत्वादहं गच्छाम्यहं स्थूल इत्यादौ चाहंकारस्य शरीर एव प्रवृत्त्यविवादाच्छरीरमेव प्रत्यक्षं ज्ञातृ प्रतीयते । प्रत्यक्षविरोधे चानुमानमात्मानं न लभत इति वैशेषिको गुणो ज्ञानं न कारणगुणपूर्वकमिति पार्थिवपरमाणुष्वविद्यमानमपि शरीरे संभविष्यतीति न शरीरादन्यस्यानुमानं । ननु शरीरचैतन्ये मृतशरीरेऽपि तत्स्यात् । न । तस्य वायुगुणत्वात् । मरणेन शरीरं विगुणमित्यविवादं । ननु ममेदं शरीरमिति देहातिरिक्तमहंकारो निर्दिशति । न । अभेदेऽपि भेदावगमोऽयं शिलापुत्रशरीरवत् । अन्यथा ममात्मेत्यपि व्यपदेशादात्मान्तरमपरमाश्रीयेत । येऽपि च सुखादयस्ते चाहं सुखीत्यहंकारविषयसंविद्विषयतयावगम्यमानाः शरीरसमवायिन एव । अतो न तदतिरेकिणमात्मानमनुमापयितुमीशते । शरीरविकारहेतुत्वाच्च तेषां सुतरां शरीरगुणत्वं । न ह्यन्यगुणो गुणिनं विकर्तुमुत्सहते । विक्रियते हि शरीरं नयनविकारमुखप्रसादरोमहर्षादिभिः । सुखादिषूत्पन्नेषु शरीरे विकारं प्रति समवायिकारणभूते तत्प्रत्यासत्त्यैवैषामसमवायिकारणेनापि भवितुं युक्तं । नच शक्यते वक्तुं सुखादिमदात्मसंयोग एव शरीरसमवेतविकारेष्वसमवायिकारणमस्त्विति । प्रमाणाभावात् । सिद्धे ह्यात्मनि स्यादेषा कल्पना । साध्ये त्वव्यवहितानामेव कारणतोचितेति न देहातिरिक्तानुमाने सुखादीनां हेतुत्वम् ।

अत्रोच्यते । स्यादेतदेवं यदि देहातिरिक्तो नोपलभ्येत ज्ञाता । घटमहमुपलभ इति घटस्यानुभविता शरीरातिरिक्तः प्रतिभासते । शरीरं हि करचरणाद्यनेकावयवयोगि । नच घटाद्यनुभवसमये तस्यावभासोऽन्वयी । अवश्यं ज्ञातुरवभासो मेयानुभवेष्वनुवर्तेत इत्यास्थेयम् । अन्यथा स्वपरसंवेद्ययोरनतिशयः । अहं गच्छामीति प्रतिपत्तिसमयेऽपि प्रत्येता शरीरातिरिक्तः प्रयत्नमात्रस्वभावो गन्ता देहं प्रतिपद्यमानः प्रतीयत एव । लाक्षणिकोऽहंशब्दानुविद्धस्तु शरीरे प्रत्ययः । ममात्मेत्यत्रापि लाक्षणिकः शरीर एव ममकारः । यस्तु चेतनस्तत्रास्मच्छब्दो मुख्यः । नच शरीरं चेतनं । चेतनासमवायाभावात् । शरीरातिरिक्तवस्त्वन्तरसमवायिनी हि चेतना चकास्ति । नन्वात्मधर्मभूता चेच्चितिस्तर्हि विषयासंस्पर्शिनी कथं प्रति विषयं विभज्यते । उच्यते । प्रतिभाससिद्धा तावच्चेतनसमवायिनी चितिरनागतातीतसंवेदने व्यक्तमविषयाश्रितत्वं प्रतिकर्मप्रविभागस्तुल्यव्यवहारानुगुणत्वाच्चितेः । यद्व्यवहारानुगुणा या चितिस्तदीयासौ व्यपदिश्यत इति न किंचिद्धीनं । नन्वेवं प्रथमदर्शनेऽपि देहव्यतिरेके सिद्धेऽन्येद्युर्दृष्टे परेद्युरहमिदमदर्शमिति प्रत्यभिज्ञोपन्यासोऽनर्थक एव । उच्यते । व्यतिरेकसिद्धावपि स्थिरतया क्रियावत्त्वसिद्धये प्रत्यभिज्ञोपन्यस्ता । अस्थिरत्वे हि तत एव कादाचित्ककार्यसिद्धेस्तत्सिद्धये न क्रियानुमानं क्रमते । अक्रियस्य कर्तृत्वं भोक्तृत्वं चानुपपन्नं । कर्ता भोक्ता च यज्ञायुधवाक्येनैवाक्षिप्तः समर्थयितव्य इत्युपयुक्तः प्रत्यभिज्ञोपन्यासः । यदा चायमात्मा प्रत्यभिज्ञायते तदासौ चिदात्मा तस्य धर्मः । नासौ तन्मात्रप्रभवः कदाचिदुदियात् । सदा संनिहितकारणं हि कार्यमकादाचित्कं भवेत् । कारणासंनिधाननिबन्धो हि कार्योदयप्रतिक्षेपः । तस्मादयमात्मा समवायिकारणभूतः किंचिदसमवायिकारणभूतमपेक्षते । तच्च केचिन्मननलक्षणं व्यापारान्तरं तत्समवेतमेवासमवायिकारणमाहुः । तदनुपपन्नमिति मन्यामहे । यतस्तस्यापि किंचिदसमवायिकारणमनुसरणीयं । तच्च वरं चितेरेवास्तु । तच्चात्ममनःसंनिकर्षाख्यं । तस्य चासमवायिकारणं मानस एव परिस्पन्दः । तस्याप्यात्ममनःसंनिकर्षान्तरमात्मसमवेतं प्रयत्नमदृष्टं चापेक्षमाणमसमवायिकारणं । प्रयत्नादृष्टयोश्चात्ममनःसंनिकर्षान्तरमेवेत्यनादिरेषा कार्यकारणपरंपरा बीजाङ्कुरवदिति वेदितव्यं । मनसोऽभ्युपगमे च सकलात्मगुणोदय एव प्रमाणं । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नादृष्टसंस्काराणां नवानामपि वैशेषिकगुणानां मनःसंयोगेनैवोत्पत्तेः । तत्र बुद्धिः स्वसंवेदनसिद्धा प्रमितिस्मृतिरूपा । सुख-

Digitized by Google

दुःखेच्छाद्वेषप्रयत्नास्तु मानसप्रत्यक्षवेद्यानि। नच दुःखाभावमात्रं सुखं। दुःखाभावस्य दुःखानुपलम्भरूपत्वात्। तद्वियुक्तात्मन उपलब्धेरेव दुःखानुपलम्भरूपत्वात्। आत्मोपलम्भातिरिक्तसुखोपलम्भानुभवाच्च। संस्कारस्य तु स्मृतिलक्षणमेव कार्यमवगमकमनुभूतविषय एव स्मृतिर्भवतीत्यनुभवाधेयं कंचिदात्मनोऽतिशयमुपकल्पयति। अदृष्टं तु धर्माधर्मलक्षणमागमगम्यमेव। नच केवलादात्ममनःसंनिकर्षादेव रूपाद्यवगमः। अन्धादीनामभावादिति चक्षुरादिबहिरिन्द्रियाण्यङ्गीक्रियन्ते। पञ्चधा च बाह्यरूपाद्युपलम्भलक्षणकार्यव्यवस्थानात् पञ्च चक्षुरादीनि कल्प्यन्ते। एवंप्रभृतीनि षडिन्द्रियाणि यस्मिन्नायतन्ते तदिन्द्रियायतनं शरीरं जरायुजाण्डजसंस्वेदजभेदभिन्नं त्रिविधं। उद्भिज्जं शरीरं न भवत्येव। इन्द्रियायतनत्वे प्रमाणाभावात्। यदि श्मशाने जायते वृक्षः कङ्कगृध्रोपसेवित इति निषिद्धफलत्वस्मरणादुद्भिज्जं शरीरमवतिष्ठते तदप्यनुपपन्नम्। अस्मिन्नंशे प्रमाणाभावात्। स्मृतेर्वेदमूलतया मुख्यार्थत्वानुपपत्तेः। नच वेद एव मूलमवकल्पतेऽकार्यार्थत्वात्। नचात्र विधिनिषिध्यमानानुष्ठानात् प्रत्यवाय इत्यवगमकः। यद्यपि शंय्वधिकरणसिद्धान्तालोचनया निषिद्धादपि कुतश्चित् प्रत्यवायोदयस्तथापि वृक्षादिरूपशरीरफलतावसातुं न शक्यते। फलतयान्वयायोग्यत्वात्। यस्य ह्यन्वययोग्यत्वमवधारितं तस्य वाक्यार्थानुप्रवेशित्वं यस्य त्वन्वययोग्यत्वाभावस्तस्य वाक्यार्थानुप्रवेशित्वमपि नास्ति। वह्निना सिञ्चेदितिवत्। यो वेदे तथाभूतार्थप्रयोगः स गौणेनार्थेन लाक्षणिकेन वा वर्णनीय इत्यत्रापि गौण्या लाक्षणिकया वा वर्णनीयमिति त्रिविधमेव शरीरं। यत् पुनरपार्थिवमयोनिजं शरीरं केवलधर्माधिपत्यनिबन्धनं कैश्चिदभ्युपगम्यते तत् सर्वशरीराणां पार्थिवत्वाव्यभिचारान्नानुमातुं शक्यते। सर्वशरीरेषु मनस्त्वक्त्वाविशिष्टमिन्द्रियद्वयं। मनश्चान्तःशरीरं परमाणुपरिमाणं। तत् खलु द्रव्यभूतं संयोगगुणभागितयेष्यते। द्रव्यं च द्विविधम्। अनेकद्रव्यमद्रव्यद्रव्यं चेति। तत्र मनसोऽनेकद्रव्यत्वे कल्पनागौरवम्। आरभ्यारम्भकद्रव्याभ्युपगमप्रसक्तेः। अद्रव्यद्रव्यत्वाभ्युपगम आत्मना सह संयोगापह्नवः। न हि परममहतोरनवयवयोश्च संयोगोपपत्तिः। त्रिविध एव संयोगः। अन्यतरकर्मज उभयकर्मजः संयोगजश्चेति। तस्मात् परमाणुपरिमाणं मनः। तच्च सदकारणत्वान्नित्यमाशुतरसंचारि च तत्। आशुतरेन्द्रियाधिष्ठानदर्शनात्। न हि तदधिष्ठितमिन्द्रियं स्वविषयमवसाययितुमलम्। अन्यत्रासक्तचित्तस्य विषयान्तराप्रतीतेः। तस्य च मनसोऽनादिधर्माधर्मापेक्षः क्षेत्रज्ञेन सह संयोगः। देहान्तरसंयोगश्च तस्यादृष्टापेक्षादात्ममनःसंनिकर्षादुत्पन्नस्य कर्मणः प्रसादेन। सोऽयमात्मा भोक्ता भोगायतनं शरीरं भोगसाधनानीन्द्रियाणि भोग्याः सुखादय आन्तरा बाह्याश्च पृथिव्यादयश्च भुक्तिश्च वेदनेति पञ्चसु विधासु तत्त्वं परिसमाप्यते। केन पुनरस्य प्रमाणेनात्मनः प्रमितिः। अप्रमीयमाणस्य सत्तोपगमो निर्निबन्धनः। तत्र केचिदाहुः। मानसं प्रत्यक्षं सुखादिष्विवात्मनि प्रमाणमिति। तदयुक्तमिति प्राभाकरवराः। न ह्येकस्य कर्तृत्वं कर्मत्वं च स्वापेक्षमुपपद्यते। स्वात्मनि क्रियावृत्तिविरोधात्। नचाहंसंविद्वशेनाविरोधः। स्वयंप्रकाशत्वेन विषयप्रतीतिगोचरत्वेनापि तदुपपत्तेः। विषयैः सहोपलम्भनियमश्चैवं सत्युपपन्नः। अन्ये मन्यन्ते। प्रकाशाय हि प्रमाणमप्रकाशस्वभावेषु विषयेष्वपेक्ष्यते। प्रकाशस्वरसे त्वात्मनि प्रकाशापेक्षा मुधैव संवित्तिवत्। प्रमाणफलभूता संवित्तिरवश्यं स्वयंप्रकाशाभ्युपगमनीया। अन्यथोत्पन्नायामपि तस्यां विषयाणां विदितत्वावेदने विदितत्वव्यवहारो न स्यात्। नच वाच्यं व्यवहारयोग्यतैव विषयेषु पुरुषस्य संवित् सा व्यवहार उत्पन्ने फलेनानुमीयत इति। यतो व्यवहारप्रवृत्तेरपि पुरस्ताद्विदितत्वं विषयाणामनुसंधीयत इति सर्वजनसमवेक्षमेतत्। नापि मानसप्रत्यक्षसमधिगमनीया संवित्। स्वयंप्रकाशेनाप्युपपत्तौ सत्यां तत्कल्पनायां प्रमाणाभावात्। विषयेषु स्थायिषु स्वयंप्रकाशेष्वभ्युपगम्यमानेषु स्वापादिदशाः पुरुषाणामनुपपन्नाः स्युः। संविदि तु स्वयंप्रकाशायां नैष दोष आपद्यते। स्वापादिषु तस्या एवासत्त्वात्। विषयास्तु प्रत्यभिज्ञाबललब्धस्थेमानः पुरुषाणां स्वापादिदशास्वपि न सन्तीति न शक्यमभिधातुं। ततस्ते परायत्तप्रकाशाः। संवित्तिस्तु स्वप्रकाशेति सिद्धो दृष्टान्तः। प्रकाशायत्तोऽस्य सत्तोपगमो न प्रमाणायत्तः। एवं च तुरीयेऽपि प्रकाशो नोपरमते। अत एव च मोक्षस्य पुरुषार्थता। अन्यथा विच्छिन्नसकलोपलम्भनात् स्वापादविशिष्टः पुरुषैर्नेष्येत। एतदपि प्रामाणिका न साध्वित्याहुः। स्वरसप्रकाशत्वे पुरुषस्य जाग्रत्स्वप्नतुरीयेष्विव सुषुप्तेऽपि प्रकाशापत्तेः सुष्वापस्ताभ्यां न भिद्येत। न हि स्वारसिकस्योच्छेद आवरणं संभवति। यत् त्विदं केन चित् प्रलप्यते पार्थिवानामणूनां श्यामत्वं पाकपदवेदनीयेनाग्निसंयोगेन निवर्तत इति। तदसत्। अकृतकं सर्वमविनाशि दिगादिवत्। अकृतकश्च श्यामिमा पार्थिवानामित्यनुमानमस्तत्त्वानादरणीयम्। स्वारसिकता च पार्थिवानामणूनां श्यामतया न सिद्धा। लौहित्यस्येव तस्यापि पाकजत्वोपगमात्। सदकारणत्वमेव नित्यत्वम्। अकारणमपि चेदनित्यं न नित्यलक्षणं क्वचिदवशिष्यते। तत्त्वविदस्त्वाचक्षते। नात्मा विषयाननुविद्धोऽवभासते नच विषया बोद्धर्यनवभासमाने भासन्त इति तावत् सिद्धं। तत्र यदेतद्विषयेषु प्रमाणं तज्जनितैव या संवित् सा पुरुषं विषयांश्च विषयीकुर्वन्ती समुदीयते।

Digitized by Google

तत्संवित्तिफलभागित्वेऽपि पुरुषस्य न कर्मता किंतु कर्तृतैव गन्तृवत्। यथा गमनफलसंयोगिनो गन्तुर्न कर्मता किंतु कर्तृतैव तथा बोद्धुरपि वेदितव्यं। परसमवायिक्रियाफलयोगि कर्मेति कर्मज्ञाः। अत एव कर्मत्वकर्तृत्वे नात्मनः संभवतः। अत एव च सहोपलम्भनियमोऽपि विषयविषयवित्तीनामुपपन्नः। एवं च विषयवित्तिगोचरत्वादात्मनो विषयवेदनोपायोपरमे स्वापादिष्वप्रकाशो युक्त एव पुरुषस्य। तुरीयेऽपि संभूतसकलोपलम्भोपाय आत्मा सन्मात्रतयैवावतिष्ठते। नच मोक्षस्यापुरुषार्थता। सांसारिकविविधदुःखोपरमरूपत्वान्मोक्षस्य। दुःखोपरमो हि पुरुषैरर्थ्यते। न चेदं युक्तं। यथा निखिलदुःखोपरमरूपत्वात् पुरुषार्थत्वं तथा सकलसुखोच्छेदहेतुरूपत्वादपुरुषार्थतापीति। यतः सांसारिकं सुखं विवेकिनः साधनपारतन्त्र्यलक्षणया क्षयितालक्षणया च दुःखतया कवलितं दुःखमेवेति मन्यमाना नान्यं तमाद्रियन्ते विवेकिनः। एवं मोक्षायोत्तिष्ठते। एवं च परमानन्दताभ्युपगमोऽपि मन्दफल एव। नच प्रमाणमपि तत्रैवावकल्पते। श्रुतीनां सिद्धवस्तुबोधकत्वाभावात्। प्रत्यक्षविरोधश्च। नच संसरन्तस्तथाविधमानन्दमनुभवन्ति। नचाभिभूततयाननुभवः। स्वारसिकस्य स्वप्रकाशस्यानन्दस्याभिभवायोगात्। नच प्रेमास्पदतया आत्मन आनन्दतासिद्धिः। आत्मनि प्रेमासिद्धेः। शरीरोपघाते हि दुःखोदयात् तदुपघातपरिहारं सर्वे प्रार्थयन्त इत्यात्मनि प्रेमाभिमानः। किंच संसारिणां स्वारसिकः परमपरमानन्दो माननुभूतपूर्व इति कथं निर्बन्धनमात्मनि प्रेम। अतो विषयविशेषसंभोग एवानन्द इति सुन्दरं। मोक्षस्तु सांसारिकदुःखोपशमात् पुरुषार्थ इति पुष्कलं।

कः पुनरेष मोक्षः। अविद्यास्तमय इति केचित्। एवमेवाद्वितीयमसंसृष्टं सकलोपाधिपरिशुद्धं ब्रह्म तदनाद्यविद्यावशेन शरीरादिसद्वितीयमिवोपाधिकलुषितावभासमानं लब्धजीवव्यपदेशं सद्बद्धमिव कल्प्यते। अतोऽनाद्यविद्यैव संसारो निखिलविकल्पातीतपरिशुद्धविद्योदयात् तदस्तमय एव मोक्षः। तदिदं श्रद्धाविजृम्भितमिति प्रमाणपरतन्त्राः। न खल्वद्वैतं कस्य चित् प्रमाणस्य गोचरः। स्यान्मतं। प्रत्यक्षमेव विधिमात्रोपक्षीणव्यापारमपरिस्पृष्टान्योन्यभेदं तदेकमेव तत्त्वं साक्षात्करोतीति। तदसत्। सत्यं विधायकमेव प्रत्यक्षं। तत्तु विदधदपि स्वरूपं रूपतया रसं च रसतया विदधाति न पुनः सर्वमेकरूपमेव। यथा रूपे तद्द्वारावाहिनी बुद्धिस्तथाभूतैव यदि रसेऽपि स्यात् तदा भवेदेव प्रत्यक्षेण साक्षात्कृतमद्वैतं। न त्वेवमेतदिति सर्वप्रतिपत्तृस्वसंविदितं। यच्च प्रमेयविकल्पेन सामान्यमेव वस्त्विति स्थापयित्वा सत्तया महासामान्यरूपत्वात् तावन्मात्रमेव तत्त्वमिति साधितं तदपि गगनवासकल्पं। सत्यं न विशेषमात्रमेव वस्तु सत्यं च सामान्यविशेषात्मकं वस्तु नास्ति किंतु सामान्यविशेषावन्योन्यसंबद्धौ द्वे वस्तुनी। यथा च तत्राभावेष्विह प्रत्ययो नास्तीति तथा जातिप्रकरणे निर्णीतं। अथागमादेवाद्वैतं सिध्यति। तन्न। आगमस्य कार्यैकविषयतया सिद्धे तत्त्वे प्रामाण्यानुपपत्तेः। अपिच वाक्यार्थे आगमः प्रमाणमिष्यते। तच्चानेकपदार्थात्मनि वाक्यार्थे धियमुपजनयत् कथमद्वैतमवभासयेत्। अथेदमुच्यते स एष नेति नेतीति सकलोपाधिनिषेधेन नानाभूतवस्त्वन्तरापाकरणादद्वैतमागमेन साध्यत इति। तदप्यसारं। यः खल्वेष इति सद्रूपतया प्रत्यवमृष्टः पदार्थः सोऽसत्त्वापादकेन नञर्थेन सह संबद्धुमयोग्यः। अस्ति नास्तीतिवत्। अन्वयायोग्ययोश्च पदार्थयोरन्वयाभावाच्च वाक्यार्थीभवनम्। तर्हि निराकृतान्येव सर्वाणि निषेधवाक्यानि। मन्द मैवं परिभाषय। नहि निषेधवाक्येषु कस्य चिदात्यन्तिको निषेधः किंतु क्वचिन्निषिध्यते। अद्वैताभिमानी तु भवानात्यन्तिकमेव निषेधमभिलष्यति। सोऽयमात्मीय एव बाणो भवन्तं प्रहरति।

लभ्यरूपे क्वचित् किंचित् तादृगेव निषिध्यते।
विधानमन्तरेणातो न निषेधस्य संभवः॥

इति।

प्रत्यक्षादिविरुद्धार्थत्वादद्वैतावबोधक आम्नायो न यथावस्थितो वर्णयितुं न्याय्यः। यत् त्विदं प्रपञ्चेन साधितं प्रत्यक्षादिविरोधेऽप्याम्नायस्य बलीयस्त्वं तद्वशेन प्रत्यक्षादीनामेव भ्रान्तता कल्पनीयेति। तदपि मनोरथमात्रं। प्रत्यक्षादिविरोधे पदार्थानामन्वययोग्यताविरहादाम्नायस्यैव तद्विरोधेऽनुदयात्। अतः प्रत्यक्षादिविरोधादाम्नाये गौणी लाक्षणिकी वा वृत्तिराश्रयेया। तत्रानन्दश्रुतयः स्वाभाविकदुःखाभावपरतया वर्णनीयाः। लौकिकानन्दस्य चाल्पतया दुःखानुषक्ततया च व्याख्येयाः। एकत्वश्रुतयश्चैकस्मिन्नायतन एकस्यैव स्वामित्वमित्येवंपराः। इन्द्रो मायाभिः पुरुरूप ईयते इति देहात्माभिमानेन जन्मनि जन्मनि भिन्न इव भातीत्यर्थः। अनेकदेहपरिग्रहेऽप्येक एवात्मेति नानात्वनिषेधस्यार्थः। एष नेति च शरीरादीनामात्मत्वनिषेधस्तद्व्यतिरिक्तप्रतिपत्तिपरः। विज्ञानश्रुतयश्च चिच्छक्तियोगित्वाश्रयाद्ग्रामादिभ्यो विशेषापादनफलाः। सर्वात्मश्रुतयश्च सर्वस्यात्मार्थत्वात् तादर्थ्यनिमित्तोपचारात्। आत्मनि विज्ञाते सर्वमिदं विज्ञातमिदं विज्ञातमिति यदुच्यते तदात्मज्ञानस्य परमपुरुषार्थमोक्षफलत्वादस्मिन् विज्ञाते सर्वमेव ज्ञानं निष्फलमिति दर्शयितुमित्येषा दिक्। अथोच्येत। वित्तेर्भिन्नस्याप्रकाशात्मनः प्रकाश एवानुपपन्न इति यद्यत् प्रकाशते तत् तत् प्रकाशादभिन्नं। प्रकाशात्मकं हि ब्रह्म। अतो ब्रह्मात्मकं जगदिति सिद्धमद्वैतमिति। तदिदं स्वपक्षविरुद्धं। कथमेवं

बुद्धिमन्तोऽभिदधति । एवं हि नानाभूतानामाकाराणां प्रकाशाभेदे प्रकाशस्यापि नानाभावापत्तेरद्वैतं दूरापास्तम् । अथोच्येत । विविधोऽयमाकारप्रपञ्चोऽविद्याध्यासवशादवभासत इत्येतदपि स्ववचनविरुद्धं । सदात्मा प्रकाशस्तेन सह सदात्मान आकारास्तावदभिन्ना इति न घटते । तथाच सत्यप्रकाशात्मानस्ते कथमिव प्रकाशेरन् । अपिच । अप्रकाशात्मन एव प्रकाशः संभवतीति बाह्यार्थसिद्धावुक्तम् । अत एषोऽपि माहायानिकपक्षानुप्रवेशिनां ब्रह्मवादिनां मोह एव । अपिच । अत्यन्तमसन्तं प्रपञ्चं कथमिवाविद्या प्रकाशयितुमलं । न खल्वसत्ख्यातिरसिद्धा किं त्वग्रहणरूपैवेति नयवीथ्यां साधितम् । अतो नाविद्यास्तमयो मोक्षः । आत्यन्तिकस्तु देहोच्छेदो निःशेषधर्माधर्मपरिक्षयनिबन्धनो मोक्ष इति सिद्धं । धर्माधर्मवशीकृतो जीवस्तासु तासु योनिषु संसरति । तयोरैकान्तोच्छेदेऽप्यपगतदेहेन्द्रियसंबन्धः समुत्खातनिखिलसांसारिकदुःखबन्धनो मुक्त इत्युच्यते । कथं पुनरशेषधर्माधर्मपरिक्षयः । न तावदुपभोगेनैव । अनादिशरीरसंततिसंचितानां भोगसमये संचीयमानानां कर्माशयानामनन्तानां क्षेप्तुमशक्तेः । उच्यते । यः खलु सांसारिकेभ्यो दुःखेभ्य उद्विग्नस्तदनुषक्तखलेभ्यश्च सुखेभ्योऽपि गतस्पृहो मोक्षायोत्तिष्ठते स तावद्बन्धहेतुभूतेभ्यो निषिद्धेभ्यः प्रत्यवायहेतुभूतेभ्योऽभ्युदयसाधनेभ्यश्च निवर्तमानः समुत्पन्नपूर्वौ धर्माधर्मौ भोगेन कृतावपि क्षयं नयन् शमदमब्रह्मचर्यादिकाङ्गोपबृंहितेनात्मज्ञानेन नच पुनरावर्तत इत्यपुनरावृत्तये चोदितेन निःशेषकर्माशयं नाशयन् मुच्यते । नचापुनरावृत्तेरर्थवादतया दर्शनमात्मज्ञानस्यापरार्थत्वात् । परार्थत्वे हि पर्णमयीन्यायेन फलश्रुतिरर्थवादतया वर्ण्यते । अपारार्थ्ये तु सैवाधिकारिविशेषणं रात्रिसत्रवत् । नच कर्मविधिशेषभूतमात्मज्ञानं तस्यापरार्थत्वात् । परार्थत्वे प्रमाणाभावात् । उपकारलक्षणाशेषत्वानिराकरणादित्यलमतिविस्तरेण ।

ननु मुक्तस्यात्मनः सकलोपलम्भातीतस्य सन्मात्रावस्थितौ किं प्रमाणम् । उच्यते । सदकारणं च यत् तदविनाशि गगनवत् । सदकारणं चायमात्मेत्यविनाशित्वाभावः सिद्धः । परममहत्त्वं चात्मनः परिमाणं गगनवत् । यत्र यत्रात्मनो गुणा उपलभ्यन्ते तत्र तत्र तावदात्मा वर्तत इति प्रमाणसिद्धं । गुणिनमन्तरेण गुणस्यावृत्तेः । तत्र ह्येष संशयः किमयं गत्या संनिधीयते उत गतिनिरपेक्ष एवेति । तत्र गतिसव्यपेक्षत्वाश्रयणे गतेरेव तावत् कल्पना । तस्याश्चासमवायिकारणं कल्पनीयं । नच तत्र किंचन प्रमाणमस्ति । अगच्छतोऽपि संनिधानोपपत्तेः । गगनवत् । अथोच्येत यत्रापि देहो न वर्तते तत्रापि चेदात्मा संनिधीयते तदा शरीर इव तत्रापि तद्गुणानामुपलब्धिः स्यादिति । तच । यतः सर्वात्मगुणानामात्ममनःसंनिकर्षोऽसमवायिकारणं । स च संयोग आत्ममनोविश्लेषान्यत्र न वर्तते । मनश्च शरीरान्तरवतिष्ठत इत्युक्तं । यत्रैव चासमवायिकारणं तत्रैव कार्यमिति न बहिर्देहमात्मनो गुणोपलम्भः । नन्वेवं शरीरस्यापि गतिकल्पनमप्रमाणकमेव । न । तस्यैकत्र सतोऽन्यत्र दर्शनप्रसङ्गात् । आत्मनस्तु सतोऽपि सकलकरणपथातीतस्य दर्शनप्रसक्तिरापादयितुमशक्येत्यगत्या सर्वसंयोगिभिरात्मा संयुज्यते । तत्तु परममहत्त्वमन्तरेण न संभवतीति नाणुपरिमाणः शरीरपरिमाणो वात्मा । शरीरपरिमाणत्वं च विना सावयवत्वमनुपपन्नं । तादृशमपि महत्त्वमवयवबहुत्वमहत्त्वप्रचयविशेषाणामन्यतरस्मिन्नायत्तं । नचावयवकल्पना प्रमाणवती । ननु सर्वगत्वे पुरुषस्य शरीरान्तरेऽपि भोगप्रसङ्गः । नैवं । यस्य तच्छरीरं यस्य तद्भोगायतनं यानि च यस्येन्द्रियाणि तानि तस्य भोगसाधनानीति नायतनान्तरे भोगप्रसङ्गः । ननु शरीरेन्द्रियसंबन्धव्यवस्थापि किंनिबन्धना । उच्यते । धर्माधर्मसमवायनिबन्धनेति भवानवबुध्यतां । यदीयाभ्यां धर्माधर्माभ्यां यानि शरीरेन्द्रियाण्युपात्तानि तानि तस्यैव । धर्माधर्मव्यवस्थैव किमायत्तेति चेत् । तदुपायभूतकर्मसंबन्धाद्व्यवस्था तत्समवायिकारणभूतशरीरेन्द्रियसंबन्धनिबन्धनेत्यनादितया शरीरेन्द्रियधर्माधर्मसंततेः सर्वमुपपन्नम् । आह विभुत्वं चेदात्मनस्तदा सर्वशरीरेष्वेक एवास्तु गगनवत् । यथा गगनमेकमेव घटमणिकादितत्तदनेकसंबन्धि तद्वदात्मापि किं नाभ्युपेयते किं प्रत्यायतनं भेदाभ्युपगमेन । उच्यते । यस्तावत् प्रतिपत्ता परायतनस्वामिनं स्वप्रयत्नपूर्वकात्मीयशरीरसमवेतसमानचेष्टादर्शनादनुमानतः प्रत्येति प्रयत्नवत्तया नासौ तद्ग्राहकैकरसस्वात्मभूततया । किंतु ग्राह्यकोटिनिविष्टमनात्मभूतमेव । तेन प्रतीतिविरुद्धत्वाद्भेदस्य किं भेदाभ्युपगमेनेति वचनमकिंचित्करं । न हि परायतनं स्वमित्येवमनुमानमुदेतुमलं । यथा मम शरीरे मदीयप्रयत्नपूर्वा चेष्टा तथा परशरीरे मत्प्रयत्ननिबन्धनैवेति प्रत्यक्षविरोधात् । प्रत्यक्षेण हि स्वात्मनि समवयत्प्रयत्न उपलभ्यते । नच परशरीरचेष्टानुगुणः प्रयत्नः स्वात्मनि पुरुषाणां प्रत्यक्षीभवतीति पर एव प्रयतिता परशरीरेऽनुमीयते । नचैवमनुमानेन परात्मप्रतीतौ कथमिदमुच्यतेऽग्राह्यो न गृह्यत इति । परेण न गृह्यत इत्येतदभिप्रायमेतद्ब्रवतीति । उच्यते । ग्राहकैकरसतया परेण न गृह्यत इति तस्यार्थः । तस्माच्च विरोधः । किंच नानाव्यवस्थाना नानाभूताः प्रति क्षेत्रं पुरुषाः । धर्माधर्मसुखादिव्यवस्थादर्शनात् । अन्यथा ह्येकस्य धर्माधर्मादयः सर्वस्य भवेयुः । तत्र केचित् पण्डितमानिन आहुः । काल्पनिकी सुखादिव्यवस्था भविष्यति । यथैकस्मिन्नेव शरीरे पादादिवेदनाव्यवस्था न व्यतिकीर्यते तथा नानाशरीरेषु न

व्यतिकरिष्यत इति। न हि पादगता वेदना शिरसि शिरोगता वा पादे। नच वेदना पादादिष्वेव समवेतेति शक्यते वक्तुं। तेषामज्ञत्वात्। ज्ञाता हि वेदनाभिः सह संबध्यते दुःखविशेषरूपत्वात् तासामिति। तदिदं मन्दं बालजनमोहनमिति वृद्धाः। तथाहि पादे मे वेदना शिरसि मे वेदनेति सर्ववेदनास्वेको दुःखी प्रकाशते। पादादिषु तु संतापादिकं समवेति। तत्र संतापस्तेजसा सह संयोगः। शूलस्तु वायुना सहेति वातपित्तश्लेष्मणां क्षोभजेषु सर्वेषु वेदितव्यम्। अचेतनानामपि पादादीनां पित्तादिसंयोगो न विरुध्यते। तदर्थं दुःखमात्मन्येव समवैति। अथोच्येत। यथा प्रतिबिम्बभाव एकस्यैव मणिकृपाणदर्पणाद्युपाधिवशेन व्यवस्थितानि श्यामत्वादीनि तथैकस्याप्यात्मनो नानाशरीरोपाधिवशेन सुखादयो व्यवतिष्ठन्त इति। तदयुक्तं। श्यामत्वादीनामौपाधिकानामुपपत्तिमत्त्वाद्बिम्बसंबन्धाभावात्। तेनैषा संभवति व्यवस्था। सुखादयस्तु नौपाधिकाः। किं स्वात्मसमवायिन एवेत्येकात्मवर्तित्वे व्यवस्थानुपपत्तिः। किंच सिद्धे व्यक्तमेकत्वे स्यादप्येषा कल्पना।

नानाविवादसंभूततमःसंघातभेदिना।
एष शालिकनाथेन तत्त्वालोकः प्रवर्तितः॥

इति महामहोपाध्यायमिश्रशालिकनाथकृतौ प्रकरणपञ्चिकायां तत्त्वालोको नामाष्टमः परिच्छेदः॥ ८॥

॥ अथ कादम्बरीकथासारः॥

अथ प्रविश्य नगरीमुपास्य पितरौ चिरं।
शुकनासं च सोऽध्यास्त कुमारभवनं ततः॥ १॥
तत्र कादम्बरीध्याननिरतैकाग्रचेतसः।
बभूव रतये *किंचिन्नास्य स्थाणुु चरिष्णु च॥ २॥
नाकरोत् प्रियमाहारं नाबोधि मधुरं रसं †।
नचाद्रियत वासांसि न पस्पर्श विलेपनं॥ ३॥
सार्थच्युत इवाध्वन्यो यूथभ्रष्ट इव द्विपः।
वागुरापाशसंबद्ध इव सारङ्गशावकः॥ ४॥
दिवा विभावरीं ध्यायन् निशि वाञ्छन् दिवागमम्।
उदीचीमेव साम्राचो वीक्षमाणोऽनिशं दिशं॥ ५॥
केयूरकोदितं ‡ मां च ज्ञात्वा किं चिन्तयेदसौ।

* हृदये इति पाठान्तरम्।

† स्वरम् इति पाठान्तरम्।

‡—काद्वृतं पाठान्तरमेतत्।

किं वदेत् पत्रलेखां वा सा किमुच्येत वानया॥ ६॥
इति नक्तं दिवं ध्यायन्नलब्धधृतिबन्धनः।
कालं कथं *तमप्येव चन्द्रापीडोऽत्यवाहयत्॥ ७॥
आकारसंवृतिस्तादृगस्य † गूढात्मनोऽभवत्।
यथा तां शून्यतामस्य पितरौ नाधिजग्मतुः॥ ८॥
दिनेष्वथ व्यतीतेषु पत्रलेखा तदन्तिकं।
प्रापद्बलाहकाख्यीयनिर्वृत्तपथिसेोष्मुखा॥ ९॥
चन्द्रापीडोऽथ तां दृष्ट्वा समुल्लासितमानसः।
कादम्बरीमिवामंस्त पस्पर्श च मुहुर्मुहुः॥ १०॥
ततो विस्रब्धमप्राक्षीद्द्वद कादम्बरीकथां।
कियन्मम स्मरत्येषा हृषिता गमनात् कियत्॥ ११॥
साभ्यसूयमिवालोक्य चन्द्रापीडमुवाच सा।
किं तया चिन्तया ‡ देव गुरूनाराधय स्थिरम्॥ १२॥
असौ किं सुप्रसन्नेन स्वयं मकरकेतुना।
त्वय्यर्पितानुरूपेति श्रीपतौ श्रीरिवाब्धिना॥ १३॥
तां चाभिनवभावाढ्यां बालां तनुलतामिव।
तीव्रे विरहदावाग्नौ क्षिप्रवानसि किंकृते॥ १४॥
केयूरकमुखाद्बुद्ध्वा गमनं देव तावकं।
वज्रसंनिहता सालवल्लरीव व्यकम्पत॥ १५॥
लब्धस्थैर्याऽवदन्मां च पत्रलेखे किमीदृशं।
युक्तमेतस्य यन्मन्ये रक्षांस्यपि न कुर्वते॥ १६॥
ततःप्रभृति निःश्वासैर्वर्धमानैर्दिनैरिव।
क्रान्ता ग्रीष्मनिशेवासावक्षीयत शनैः शनैः॥ १७॥
अलब्धकुसुमामोदाः प्रागभ्यासक्रमागताः।
दूरात् परिहरन्त्यस्याः कबरीमद्य षट्पदाः॥ १८॥
रोदनारुणितापाङ्गे चिरविस्मृतकज्जले।
नेत्रे विसृष्टमाधुर्ये § गते तस्याः कषायतां॥ १९॥
चित्रपत्रलतालेख्यं विहाय क्रियते नवं।
मण्डनं गण्डयोरश्रुकणमुक्तावली तया॥ २०॥
मृदुः स्वभावरक्तश्च प्रवृद्धैरसमोष्मभिः।
म्लानिमानीयते तस्या निश्वासैरधरः खलेः॥ २१॥

* कियन्त— इति पाठान्तरम्।

†—स्वीवृग— इति पाठान्तरम्।

‡ किं ते मच्चिन्तया इति पाठान्तरम्।

§ विसृज्य माधुर्यं पाठान्तरमेतत्।

Digitized by Google

स्तनौ तु विरहेऽप्यस्याः शोकान्नहि बहिष्कृतौ ।
दाहप्रतिक्रियान्यस्तैर्हारकर्पूरचन्दनैः* ॥ २२ ॥

विरहज्वलनस्तस्या लावण्यजलनिर्झरैः ।
वाडवश्चाब्धिना नैति शममित्यद्भुतं द्वयं ॥ २३ ॥

मुहुः सरसि हंसीव मृगीवोपवने मुहुः ।
पुलिने चक्रवाकीव मुहुर्लुठति विह्वला ॥ २४ ॥

मुहुर्भवन्तमालिङ्ग्य संकल्पविहितं पुरः ।
शून्ये भुजलते वीक्ष्य विलक्षा पतति क्षितौ ॥ २५ ॥

मागादयमुपालब्धः संकल्पादपि दूरतः ।
इत्युपालभते न त्वां भीतेव मनसापि सा ॥ २६ ॥

त्वदाकारमयं चित्तं त्वन्नामस्मरणा गिरः ।
त्वन्मार्गकलिता दृष्टिस्तस्याः सम्प्रति वर्तते ॥२७॥

कियद्वा वर्ण्यते तस्याः परेण विरहव्यथा ।
स्वयंवेदनगम्या हि सा त्वयैवानुभूयते ॥ २८ ॥

किमप्याख्यातुकामा सा बहुशः स्फुरिताधरा ।
हृदयस्थेन केनापि गुरुणेव निषिध्यते ॥ २९ ॥

भूमौ विचेष्टमानाङ्गी भुजंगीवैकदा पुनः ।
दिशो वीक्ष्य मदुत्सङ्गे निधाय मुखमब्रवीत् ॥ ३० ॥

उत्तिष्ठ यदि जीवन्तीं मामिच्छसि तमानय ।
अहं नेतुमशक्या हि सुदूरमिदमन्तरं ॥ ३१ ॥

स्थितायां त्वयि जीवामि त्वत्स्पर्शेन यथा तथा ।
गतायां तु चिरं कालं चमन्ते मम नासवः ॥ ३२ ॥

इति श्रुत्वा च तद्दृष्ट्वा समायातास्म्यतः परम् ।
देवः प्रमाणमित्युक्त्वा रुदती विरराम सा ॥ ३३ ॥

चन्द्रापीडस्तदाकर्ण्य जातस्मृतिरिवाभवत् ।
लब्धस्थितिश्चिरं दध्यौ गमने हेतुमात्मनः ॥ ३४ ॥

दिनेष्वन्येषु जातेषु वक्तुं कादम्बरीदशाम् ।
आगात् केयूरकोऽप्याशु दीर्घाध्वश्रान्तवाहनः ॥ ३५ ॥

स चोज्जयिन्या विभवं प्रविशन् वीक्ष्य सस्मितः ।
स्थाने ननु मनो लग्नं स्वामिन्या इत्यमन्यत ॥ ३६ ॥

प्रविश्य ददृशे तेन चन्द्रापीडो यथाक्रमं ।
चक्रवाक इवैकाकी प्रियाविरहविह्वलः ॥ ३७ ॥

दधत्या पार्श्ववर्तिन्या चामरं पत्रलेखया ।
संवीज्यमानः पर्यङ्के निषण्णः क्षामविग्रहः ॥ ३८ ॥

*– स्तैः कर्पूरहरिचन्दनैः इति पाठान्तरम् ।

प्रणिपत्योपविष्टोऽसौ गाढं शिरसि पस्पृशे ।
कुर्वता कुशलप्रश्नं चन्द्रापीडेन सादरम् ॥ ३९ ॥

ततः कादम्बरीवार्तां पृष्टः केयूरकोऽमुना ।
पत्रलेखामुखं वीक्ष्य संक्षिप्तमिदमब्रवीत् ॥ ४० ॥

उक्तोऽसि नानया किंचिदुक्तश्चेत् किमिह स्थितः ।
उक्तश्चेह स्थितश्चासि कृतमागमनेन मे ॥ ४१ ॥

तथापि वद संदेशमिति तेन तु नोदितः ।
पुनः केयूरकोऽप्याह*न हि विश्वाप्यसे मृषा ॥ ४२ ॥

कथं जीवत्सु युष्मासु विरहो हन्ति मामिति ।
तस्याः साकूतया दृष्ट्या विसृष्टोऽस्मि न तद्गिरा ॥ ४३ ॥

किमत्र बहुनोक्तेन तथाऽस्या विरहव्यथा ।
अद्यापि जीवतीत्येवं†यथा दोलायते मनः ॥ ४४ ॥

तत्कथाभिस्तथा स्थित्वा तस्मिन्नथ दिने चिरं ।
चन्द्रापीडः सुखावासं केयूरकमकारयत् ॥ ४५ ॥

न राक्षसो न मातङ्गो न किरातश्च यद्यहम् ।
अच्छोदसरसस्तीरं प्राप्तं मां वेत्थ सर्वथा ॥ ४६ ॥

अन्येद्युरिति संदिश्य सहितं पत्रलेखया ।
केयूरकमसावग्रे‡प्राहिणोत् कृतमण्डनम् ॥ ४७ ॥

तयोस्तु गतयोरास्त सुतरां खिन्नमानसः ।
तांस्तानभिलषन् बुद्ध्या हेतून् गमनसाधकान् ॥ ४८ ॥

शुश्रावाथ नियुक्तेभ्यः स्कन्धावारमुपागतं ।
योजनद्वयमात्रेण पुरःकृतनिवेशनं ॥ ४९ ॥

वैशम्पायनतो लप्स्ये किंचित् कारणमित्यसौ ।
प्रत्युद्गन्तुमगादेनं कटकं पितुराज्ञया ॥ ५० ॥

तत्र राजकमालोक्य वलाहकनिवेदितं ।
क्व वैशम्पायनावास इति सेनान्यमभ्यधात् ॥ ५१ ॥

वलाहकस्त्वधोदृष्टिरुल्लिखन् मेदिनीं मुहुः ।
न वैशम्पायनोऽत्रेति सन्नकण्ठमभाषत ॥ ५२ ॥

ततोऽवतीर्य तुरगादुपविश्य तरोरधः ।
हा वयस्येति विलपन् प्रावर्तत स रोदितुम् ॥ ५३ ॥

वलाहको निपत्याथ चन्द्रापीडस्य पादयोः ।

*– कः प्राह इति पाठान्तरम् ।

†– त्यत्र इति पाठान्तरम् ।

‡– सौ रत्नैः इति पाठान्तरम् ।

देव मेवं तथा शोच्यं * जीवन्नस्तीत्यवोचत ॥ ५४ ॥

चन्द्रापीडस्तु तं प्राह नेदं श्रद्धीयते मया ।
स वैशम्पायनो जीवं त्यक्त्वालम्बत मामिति † ॥ ५५ ॥

इत्युपप्लुतचित्तं तं पुनराह बलाहकः ।
श्रूयतां देव यद्वृत्तं तत्र प्रचलिते त्वयि ॥ ५६ ॥

अस्मानेवं समादिश्य प्रस्थितं त्वामनुव्रजन् ।
ततः प्रतिनिवृत्तोऽसावास्त तत्र यथास्थिति ॥ ५७ ॥

अपरेद्युरथोत्थाय विधाय प्रकृताः क्रियाः ।
विनोदयितुमात्मानं व्यचरत् स वनस्थलीम् ॥ ५८ ॥

तत्र सप्रत्यभिज्ञः सन् स स्थानान्यनुरूपयन् ‡ ।
किंचिन्नष्टमिवान्वेष्टुमैच्छद्विचलल्लोचनः ॥ ५९ ॥

ततोऽस्ताभिमुखे भानावस्माभिः सोऽभ्यधीयत ।
स्थीयतामवशिष्टास्तु श्वो द्रष्टव्या वनस्थलीः ॥ ६० ॥

तदाऽसौ नाग्रहीद्वाक्यं विचरन्नेव सोऽब्रवीत् ।
यात यूयं न गन्तव्यं यावज्जीवमितो मया ॥ ६१ ॥

स बहूनि दिनान्यास्त तथैव विचरन् वने ।
न सोऽस्त्युपायो येनासौ शक्यश्चालयितुं ततः ॥ ६२ ॥

कृतप्रायोपवेशेन पादयोः पतताऽनिशम् ।
इयता राजचक्रेण नाबुद्ध प्रार्थितोऽपि सः ॥ ६३ ॥

ततस्तत्र चिरं स्थित्वा कार्यशेषमपेक्ष्यता ।
आयातमिह सैन्येन त्वं प्रमाणं ततः परम् ॥ ६४ ॥

इति श्रुत्वा निपतितः शोकविस्मयसंकटे ।
चन्द्रापीडस्तथैवास्त तरुमूले कृतासनः ॥ ६५ ॥

अथ वार्तां विदित्वैनां तमेवोद्देशमागमत् ।
अनपेक्षितविस्तारः सामात्यान्तःपुरो नृपः ॥ ६६ ॥

तत्र क्षणमिव स्थित्वा स्वयं पृष्ट्वा बलाहकम् ।
अधिक्षिपन्निव प्राह चन्द्रापीडं क्षितीश्वरः ॥ ६७ ॥

नूनमुत्पादितो मन्युस्त्वया कोऽप्यस्य तादृशः ।
येनान्तः स्फुरता सोऽद्य त्वां विहाय वनं गतः ॥ ६८ ॥

वियुक्तौ न पुरा दृष्टौ युवां क्षणमपि क्वचित् ।
किं जातमधुना येन त्वं गृहे स तपोवने ॥ ६९ ॥

विना नहि निमित्तेन शक्या सोढुं गरीयसी ।
मातापितृसुहृद्बन्धुदेशवित्तवियोगिता ॥ ७० ॥

* क्रुधाः शोकं पाठान्तरमेतत् ।

† जीवन् नास्ति मां न विमुञ्चति इति पाठान्तरम् ।

‡—ज्ञः स स्थानं स्थानं निरू— इति पाठान्तरम् ।

इत्युक्तवति भूपाले शुकनासस्त्वनन्तरं ।
अन्तःस्फुरितशोकोऽपि गृहीतक्षोभमभ्यधात् ॥ ७१ ॥

किमेतदविचार्यैव वस्तुतत्त्वं वितर्कयन् ।
शङ्कानुमानमात्रेण च्युतधीरिव भाषसे ॥ ७२ ॥

अलातवृष्टिरिन्दोर्वा चौराद्वा कण्टकोद्गमः ।
तस्य मन्युः कुमाराद्वा तव* संभावनास्पदं ॥ ७३ ॥

पापः स एव दुर्जातः सुचिरं पाठितः शुकः ।
यथा तरुः सुधासिक्तः फलितः कालकूटवत् ॥ ७४ ॥

स त्वं कुमार सर्वस्याः पृथिव्या एव जीवितं ।
दुरात्मनो न तस्यार्थे शोकमुद्वोढुमर्हसि ॥ ७५ ॥

तस्मिन् विरतवाक्ये तु पतितः पादयोः पितुः ।
साश्रुकण्ठमथोवाच चन्द्रापीडः कृताञ्जलिः ॥ ७६ ॥

दोषप्रायश्चित्तमिदं मम † साधनमेव तत् ।
गत्वा तमानयामीति तदनुज्ञातुमर्हसि ॥ ७७ ॥

तमागतमिहालोक्य पृष्ट्वा शिरसि चुम्बितं ।
ततो गुणं वा दोषं वा मम तातोऽवभोत्स्यते ॥ ७८ ॥

तत्रस्थं च तमानीय व्युपेत्य स्वं गृहं ‡ पुनः ।
संप्रवेष्टव्यमित्येष गृह्यतामिति § निश्चयः ॥ ७९ ॥

तथोक्तवति तस्मिंश्च राजा बाष्पाकुलेक्षणः ।
सोऽपश्यन्मन्त्रिणो वक्त्रं स च तत्र बहूक्तवान् ॥ ८० ॥

सर्वोपायप्रयोगेण पित्रा तेन च मन्त्रिणा ।
चन्द्रापीडो निरुद्धोऽपि नाचलन्निश्चयात् ततः ॥ ८१ ॥

सिञ्चन्ती बाष्पधाराभिर्मौलिमस्य मनोरमा ।
करुणं विलपन्तीव चिरमेनमबोधयत् ‖ ॥ ८२ ॥

त्वयि स्थिते निजोत्सङ्गे स्थितिं पश्यामि पुत्रक ।
नूनमन्धीभवाम्येव वत्स त्वयि गते पुनः ॥ ८३ ॥

इत्थं विलासवत्या च तया च करुणोक्तिभिः ।
चिरमार्द्रीकृतोऽप्येष न जहाति स्म निश्चयं ॥ ८४ ॥

ततोऽश्रुभरसंरुद्धदुर्ग्रहाक्षरया गिरा ।
यथा जानासि पुत्रेति कथमप्यब्रवीन्नृपः ॥ ८५ ॥

* कस्य इति पाठान्तरम् ।

† तात शङ्कितदोषस्य प्रायश्चित्तमिदं मम इति पाठान्तरम् ।

‡ तमनानीय मयैतत् स्वगृ— इति पाठान्तरम् ।

§ न प्रवेष्टव्यमित्येष गृह्यतां मम इति पाठान्तरम् ।

‖ वाचमेनमवोचत इति पाठान्तरम् ।

Digitized by Google

दत्तानुज्ञस्तथा पित्रा प्रणम्य सकलान् गुरून् ।
श्रुत्वा प्रयत्नसंरुद्धबाष्पधारास्तदाशिषः ॥ ८६ ॥
चन्द्रापीडः परिश्रान्तान् संस्थाप्य च यथातथं* ।
पार्थिवान् परिवारेण प्रातिष्ठत लघीयसा ॥ ८७ ॥
किं तन्मया व्यधायीति† दूयमानमनाः शुचा ।
शुष्यन् कृच्छ्रेण राजा तु विवेश नगरीं पुनः ॥ ८८ ॥
बलाहकस्तु सेनानीर्वार्यमाणोऽपि यत्नतः ।
स्वगृहानप्रविश्यैव स चन्द्रापीडमन्वगात् ॥ ८९ ॥
चन्द्रापीडस्ततो गच्छन् दयितालोकनोत्सुकः ।
अमन्यतोल्लङ्घितवन्मध्यं‡ कैलासविन्ध्ययोः ॥९०॥
नाजीगणद्द्रुमानद्रीन् न नदीर्न वनस्थलीः ।
न रात्रिं न दिनं वापि धावन्निन्द्रायुधेन सः ॥ ९१ ॥
ततः प्रावर्तत प्रावृट् पीनोन्नतपयोधरा ।
कान्ता नवरसार्द्रेव प्रत्युगन्तुमिवागता ॥ ९२ ॥
तामप्यगणयित्वासौ वहन् कतिपयैर्दिनैः ।
अच्छोदसरसस्तीरमापतद्दूषिताम्भसः ॥ ९३ ॥
अपनीतसमायोगः परिवर्त्य च वाससी ।
महाश्वेतामथ द्रष्टुं स जगाम तदाश्रमं ॥ ९४ ॥
तत्रापश्यन्महाश्वेतां तदालोकनलज्जितां ।
रुदन्तीं निजदौरात्म्यात् प्रलापकरुणस्वनं ॥ ९५ ॥
तत्कारणापरिज्ञानमोहनिस्पन्दपक्ष्मणा ।
निरीक्ष्य चक्षुषा पृष्टा चन्द्रापीडेन साब्रवीत् ॥ ९६ ॥
केयूरकमुखाद्बुद्ध्वा गतं त्वां पितुराज्ञया ।
दिनानि कतिचित् स्थित्वा कादम्बर्यनुरोधतः ॥९७॥
तत एत्य यथान्याय§मासीनास्मि तपोवने ।
विप्रं युवानमद्राक्षं विचिन्वन्तं वनस्थलीः ॥ ९८ ॥
सप्रत्यभिज्ञमालोक्य मामसौ मन्मथोन्मुखः ।
तीव्रमुद्वेजयामास नर्मवक्रोक्तिचापलैः ॥ ९९ ॥
ततो निर्भर्त्स्यमानोऽपि वार्यमाणोऽपि यत्नतः ।
स बहून् दिवसानास्त तथा मामुपपीडयन् ॥१००॥
एकदा तु शयानां मामागत्य निशि निस्त्रपः ।

* प्रस्थाप्य च यथा तथा इति पाठान्तरम् ।
†–भ्यधायीति इति पाठान्तरम् ।
‡–न तृणायैव मध्यं पाठान्तरमेतत् ।
§–भ्यास– इति पाठान्तरम् ।

कृताञ्जलिरनङ्गार्तो ययाचे रतिदक्षिणां ॥ १ ॥
ततो धिगिति सक्रोधमभिधाय कमण्डलोः ।
जलमुद्धृत्य शप्तोऽसौ मयानुध्याय देवताः ॥ २ ॥
शुकवन्मुखरागेण वक्तुमेवासि शिक्षितः ।
गच्छ दूरं दुराचार शुक एव भविष्यसि ॥ ३ ॥
शापेन तेन महता मदनाग्निना वा
जन्मान्तरोपचितदुष्कृतकर्मणा वा ।
चित्रेण वा भगवतश्चरितेन धातुः
प्राणानसावुदसृजन्निपपात चोर्व्याम् ॥ ४ ॥
आक्रन्दतः परिजनादथ सोऽपरेद्यु-
र्ज्ञातो मयायंशुकनाससुतः सखा ते ।
तत् पश्य मां प्रियवयस्यवियोगहेतु-
मस्तत्रपामकरुणां प्रखलामभव्याम् ॥ ५ ॥
इति श्रुत्वा भिन्नः प्रसभमिव शूलाग्रशिखया
कदा त्वां पश्येयं कमलमुखि कादम्बरि पुनः ।
क्वणन्नेवं शोकस्फुटितहृदयस्तत्क्षणमसून्
जहच्चन्द्रापीडस्तरुरिव पपात क्षितितले ॥ ६ ॥
ततो भुग्नग्रीवं मुकुलितसितापाङ्गनयनं
प्रभां तन्वीं दीनामिव निदधतं दिक्षु शनकैः ।
क्षितौ विन्यस्ताङ्गं पतितममुमालोक्य विवशा
महाश्वेता सद्यः कथमपि न याति स्म दलशः ॥७॥
द्रष्टुं दीनामिव वसुमतीमक्षमस्तेन शून्यां
कुर्वन्नुद्यद्विरहकरुणाक्रन्दिनश्चक्रवाकान् ।
अब्रह्मण्यध्वनिमिव करैरूर्ध्वशाखैर्विमुञ्च-
न्नस्तं तिग्मद्युतिरपि ततः क्षामधामा जगाम ॥१०८॥
॥ इति कादम्बरीकथासारे षष्ठः सर्गः ॥ ६ ॥

॥ श्रीः ॥

जयत्युष्णरश्मिः स्वयं द्योतमानो
दिवि ज्योतिषाधारभूतश्च यस्य ।
प्रसादाद्यथाबुद्धि सिद्धान्ततत्त्व-
विवेकस्य सम्यक् परीक्षां करोमि ॥

॥ अथ सिद्धान्ततत्त्वविवेकपरीक्षा ॥

तत्र श्रीमता सांवत्सराचार्येण कमलाकरेण प्रथमं तावत्
केचित् प्रत्यक्षसूर्याच्च भिन्नोऽयमिति यद्बलात् ।
वदन्ति मूढवादस्याप्रामाण्यात् तदसद्ध्रुवम् ॥

Digitized by Google

इत्यनेन भगवतः सूर्यस्यैव सूर्यसिद्धान्तकर्तृत्वं प्रदर्शितम्। तच्च समीचीनम् ।

दृष्टेऽह्नि मध्ये प्राक् पश्चाद्धृते बाहुत्रयान्तरे ।
मत्स्यद्वयान्तरयुतेस्त्रिस्पृक्सूत्रेण भाभ्रमः ॥

इत्यनेन तदीयश्लोकेन वृत्तरेखायां शङ्कुच्छायाभ्रमणं

योजनानि शतान्यष्टौ भूकर्णो द्विगुणानि तु ।
तद्वर्गतो दशगुणात् पदं भूपरिधिर्भवेत् ॥

इत्यनेन तदीयश्लोकेन व्यासात् परिध्यानयनं चेत्यादीनामनेकेषामसतां प्रकाराणां कथनस्य सर्वज्ञे भगवत्यसंभवित्वात् ।

"But Ignorance, they [the Vedantís] declare, is a somewhat that is not to be called positively either entity or nonentity—not [as the Naiyayikas allege] a mere negation [—the mere absence of knowledge—] but the opponent of knowledge—consisting of the three fetters [the triple cord of pleasure, pain, and dulness]."

Let us consider the way in which this conception—this mysterious "what you will"—*(yatkinchit)*—that neither is nor isn't—may have come to occupy the place it occupies in the system under examination. Sir G. C. Haughton, in his reply to Col. Vans Kennedy's strictures on Mr. Colebrooke's Essay, (As. Jour. vol. xviii. p. 217) after quoting from different writers to show in what diverse fashion different persons have attempted to convey their conception of this feature in the Vedántí system, remarks as follows : "It must be, indeed, clear from all that has been said, that such a system, if it be even perfectly comprehensible, connot be represented by language, but must be inferred by the mind from the principles already laid down." Very well :—let us attempt to present to the mind of the reader those principles, as much as possible divested of everything irrelevant, which seem to us to constitute the prerequisites for the inference.

Place yourself, then,—for the time being—in the position of the Vedántí, and try to view things as he does. Suppose—as the Vedántí does—that God, the essentially happy, omnipresent, omniscient, and omnipotent, exists. Suppose further—as the Vedántí does at all times, but as you need do for the time only—that nothing besides God exists. Suppose in the next place,—as held long in Europe and to this day in India—that "ex nihilo nihil fit" :—and suppose finally that God wills to make a world. Here you have the conditions of the problem ; and you must stick to them with something like the geometrical rigour of a Spinoza—for on no subject in heaven or on earth is vague declamation more easy and more idle. God, then, wills to make a world. Being omnipotent, He *can* make it. The dogma "ex nihilo nihil fit" being, by the hypothesis, an axiom, it follows that God, being able to make a world, can make it without making it out of *nothing*. The world so made must, then, consist of what previously existed—i. e. of God. Now, what *is* a world ? It is an aggregate of souls with limited capacity—(for, were their capacities unlimited, these would be Gods)—and of what these souls (—whether rightly or wrongly we are not at present concerned with enquiring)—regard as objects—the special or intermediate causes of various modes of intelligence. Taking this to be what is meant by a world, how is God to form it out of Himself ? God is omniscient—and, in virtue of his omnipresence, his omniscience is everywhere. Where then is the room for a *limited* intelligence ? Viewing the matter (were that strictly possible) *á priori*, one would incline to say "nowhere" :—but the Vedántí, before he had got this length, was too painfully impressed by the conviction, forced upon him as on the rest of us by a Consciousness which will take no denial that

Digitized by Google

there *are* limited intelligences ;*—and all that was left for him was to show how this mortifying but indisputable fact was reconcilable with the position already laid down. Holding—as a point beyond dispute—that the soul *is* God, and confronted with the inevitable fact that the soul does *not* spontaneously *recognise* itself as God—there was nothing for it but to make the fact itself do duty as its own cause—to say that the soul does not know itself to be God just because it does not know it—i. e. because it is ignorant—i. e. because it is obstructed by *ignorance (ajnána)*.

At this point in his speculation let us suppose that our speculator stopped ; but that a disciple, with a lively imagination—or taste for the concrete—took up the matter at the same point, and set himself to make something more satisfyingly palpable out of the abstraction—Ignorance. Were it not—he argues—for this Ignorance—this *ajnána* of which my teacher speaks—soul would know itself to be God—there would be nothing but God—there would be no world. It is this *ajnána*, then, that *makes* the world ; and, this being the case, it ought to have a name suggestive of the fact. Let it be called *prakriti*—the name by which the Sánkhyas speak of their unintelligent maker of worlds. Good—says another :—but recollect that this *prakriti* or "energy" can be nothing else than the power of the All-powerful—for we admit the substantial existence of God alone :—so that the *ajnána*, which you have shown to be entitled to the name of *prakriti*, will be even more significantly denoted by the name of *śakti*—God's "power"—only by supposing an exertion of which can the fact be accounted for that souls which are God *do not know* that they are so. The reasoning is accepted, and the term *śakti* is enrolled among the synonymes of *ajnána*. Lastly comes the mythologist. You declare—says he—that this world would not appear to be a reality were it not for ignorance. Its apparent reality is the result, then, of *illusion* ;—and, for the word *ajnána* you had better substitute the more expressive term *máyá*—"deceit, illusion, jugglery." The addition of this to the list of synonymes being acquiesced in, the mythologist furnishes his *Máyá* with all the requisites of a goddess, and she takes her seat in his Pantheon as the wife of Brahmá the creator. Such we hold to be the genesis of *Máyá*—that conception which, explicitly, may be, as Mr. Colebrooke (Essays, Vol. I. p. 377.) taxes it—"no tenet of the original *Vedantin* philosophy"—but which seems to us yet to be in such a way involved in the conception of *ajnána*—when once objectified—that it quite in due course became evolved therefrom in the later writings of the *Vedántís*.

Passing over, as irrelevant to our immediate purpose, the curious details of the scheme according to which the mysterious principle of *ajnána* is described as carrying on its operations* we are now met by the practical question—what does the Vedántí deduce from the doctrine the essentials of which have been now stated ;—and, holding him to be wrong, how are you to deal with him? Holding him to be wrong, you may question his theology, his metaphysics, or his logic :—that is to say, you may argue with him (1) on the supposition that his faith rests on what he holds to be a revelation—or (2) that his faith is what he would hold to, as a philosopher, even were there no revelation—the doctrine being, in his estimation, the most unexceptionable that the wit of man has yet propounded—or—(3)—waiving the merits of the doctrine—on the agreement that the question discussed shall be this—viz.—Hindú revelation apart, what follows from the doctrine? Under each of these aspects the question may be considered ; and as, under each of these aspects, the question will in practice have to be treated, we would deprecate the treatment of it under all these aspects simultaneously and confusedly. Why? Because your opponent is pretty sure to be a man who could not for the life of him refrain from taking what might be called a Jesuitical advantage of any hitch in your dialectic procedure,—and when he baffles your attack by shifting discussion from one aspect of the question to another, he gains his victory—his victory being quite satisfactory to him so long as, by baffling you for the time, he maintains the "status in quo."

Under which aspect, then, were it best to treat the questions first? For treating it under its theological aspect, people will be in a more advantageous position when the labours in which Dr. Müller and Professor Wilson are engaged shall have put the world in possession of the Vedas themselves. As regards the Metaphysical aspect of the question —if the theory necessarily led to the conclusion practically drawn from it, there would then be an urgent necessity that the theory itself should be first assailed, however arduous might be the nature of the required assault. But if the theory does not really necessitate the conclusion practically drawn from it, it might seem expedient in the first instance —waiving the discussion of the difficult ontological questions involved in the theory—to let our first step be the denial of the legitimacy of the conclusion practically drawn from the theory. This conclusion may be compendiously summed up in the allegation that man, being God, and being debarred from divine beatitude by Ignorance, can break his bars simply by the acquisition of Knowledge. In making this inference from his system—regarded as a philosophical theory (—and dogmatic assertions of the Veda are excluded under the present conditions of the debate—) we do not see how the Vedántí can rebut the charge of falling into what Whately calls the semilogical fallacy of Ambiguous Middle. His argument, stated syllogistically, runs (if we do him no injustice) thus :—

* Our author says that the fact of there being what he calls Ignorance may be deduced "from the judgment [forced upon the consciousness of every man] that 'I am ignorant' :—and from various texts of Scripture. We have heard a Hindú remark, in corroboration of this, that if the man is *wrong* in saying "I am ignorant," then, by that blunder, the fact of Ignorance is established just as well as if he had said rightly.

* In seeking to reproduce conjecturally the train of thought by which the Vedánta system arose, we have taken as the starting-point the conception of the Omnipotent, which the system contains, and not that logically antecedent conception of a fundamental unqualified unity supposed to lie still further back—a conception chronologically later, and furnishing a point, indeed,—but no starting-point. To this we shall have future occasion to revert.

Digitized by Google

"All obstacles in the shape of *ajnána* are to be got over by means of *jnána* :—

The obstacle to soul's identification with God is *ajnána* :—
Ergo—The obstacle to soul's identification with God is to be got over by means of *jnána*."

The argument is perfect if the term *ajnána* is employed in the same sense in both the premises. But *is* it ? Let us see. In the major premiss the term *ajnána* means simply "ignorance" which is the "negation of *jnána* knowledge"—for if it means either more or less, then the assertion, instead of being, as it is intended to be, self-evidently true, begs the question in dispute. If the reasoning is to be valid, then, *ajnána* in the major premiss must stand for neither more nor less than the negation of *jnána*. But does it stand for neither more nor less than this in the *minor* premiss ? Turn back to our text-book's definition of the *ajnána* which is alleged as the obstacle to man's beatitude, and you will find it expressly *denied* to be the "mere negation of knowledge :"—it is there spoken of as the "opponent of knowledge"—and it is there understood, and elsewhere declared, to be the Power of God—that power being regarded as manifesting itself in the production of that ignorance which consists in man's consciousness of a limited intelligence. The equivocation is palpable. It is the caricature of the Baconian equation "Knowledge = Power." A man bound is not released by having light thrown upon his fetters.* So long as the power of God—the power of the Being whom the theory speaks of as the Omnipotent and the Eternal—shall continue, so long—i. e. for ever if He wills it—must man continue to be, to all intents and purposes, a separately personal and limited intelligence—precisely as he is held to be on other theories than that of the Vedanta. Under the Vedánta theory, taken as a philosophical theory, man is precisely as dependent upon the power of the Almighty as he is under any other theory :—dependent, therefore, upon the Almighty for every ray of light upon his path.

Here we come round upon the question—through what channel, if through any, has the Almighty revealed His will—that will on which our mode of being, here and hereafter, depends ? This great question—the question under its theological aspect—we have already said, is a separate one from that which we seek to get disposed of at the outset. We have done all that we aimed at doing for the present if we have indicated the fallacy in the Vedánti deduction—viz. that, because one may choose to give to one *result* of God's power the name of Ignorance, and then transfer that name to the *power* itself, therefore man's knowledge can avail against God's power—that, on the theory of the Vedánti, as opposed to the belief of the Christian, man's soul is less entirely dependent on the Power of God which caused it to be what it is.

* He *would* be—if *darkness* were his fetter, as it was in the case of Don Quixotte when he hung in terror all night, with his toes within three inches of the ground, over what he believed to be a fathomless abyss—chained by a delusion which the morning light dispelled.

In our next paper we propose to address ourselves more especially to points connected with the question under its second aspect—the "Ontology of the Vedánta."

K.

PUBLICATIONS RECEIVED.

Die Entstehung der A—Declination, and die Zurückführung ihrer Elemente auf das ihr zu Grunde liegende Pronomen, zugleich mit der Darstellung des Verhältnisses der a—nomina zu den derivierten Verbalformen. Ein Beitrag zur Geschischte der Wortbildung im Indogermanischen von A. Ludwig.
Vienna 1867.

An ingenious, learned, and instructive essay on the part played by an assumed pronominal suffix *at* in the formation of words in many of the Aryan languages. Herr Ludwig recognizes this suffix in its ramifications—*ας— ετ— ητ— ωτ ος— ες— ερ— ορ— ωρ*; in its amplifications—*ατο— ατη— ετο— ετη*;—*αρ—ο— ερ—ο — αλε—ο— αλ—ο —ελ—ο*; in — *αν —ον —εν —ην —ων*; in the Greek, Gothic, and German infinitive, and in numerous other modifications in Sanskrit, Zend, Old Bactrian, Greek and other Indo-Germanic tongues. The work is a valuable contribution to comparative philology, and will be of special interest and use to the Greek scholar.

Vividhavijnanavistára. A Journal of Maráthí Literature for Ladies and Gentlemen. No. 1, *Bombay, July* 1867.

We welcome with pleasure the First No. of this literary Magazine. The Articles are well written, and evince signs of taste and scholarship. The journal is well printed, carefully edited and cheap.

The Veṇí-Saṅhára, Act I, with the Commentary of Pandit Chhoṭu Ráma, Assistant Professor of Sanskrit, Pátná College.
Benares: Light Press, 1867.

This Drama is one of the text-books for candidates of the Calcutta University B. A. Examinations of 1869 and 1870, and no good Commentary on it is perhaps extant. Pandit Chhoṭu Ráma (who, we are glad to say, was educated in the Sanskrit and Anglo-sanskrit Department of this College) is very usefully and creditably labouring to supply the desideratum. From an examination of several passages, we can remark that the new Commentary, so far as it goes, is lucid and exhaustive and bears testimony to the diligence and scholarship of the Author. Further remarks may be reserved till the work is completed.

Digitized by Google

Rádhákánta-Nṛipateś-Charitra-Śatakam Śri Tárá-charaṇa Śarmaṇá virachitam.

Calcutta: Giriśa-Vidyáratna's Press, 1867.

Lovers of Sanskrit will peruse with interest this Elegy on the death of the illustrious Rájá Rádhákánta Deva. Although many of its conceptions are borrowed, the poetry is not altogether devoid of originality. The language notwithstanding some grammatical inaccuracies, is *generally* chaste and idiomatic, excepting, of course, the couplet one half of which consists of this huge and hideous hybridism—

तस्या नाइट् कमेण्डर् इष्टार् आप् इण्डियोपाधिम्

TO THE EDITOR OF THE PANDIT.

SIR,

The God Yama seems as if he had, this year, directed all his attention towards the most eminent of the Pandits of India. The tears of sorrow which we shed at the death of Pandit Premachandra Tarkavágíśa had hardly dried up, when the knell tolled in another quarter and announced that Pandit Viṭṭhala Śástrí was no more. Pandit Híránand Chaube who, for more than half a century, held the first place in the eye of the Public, as an eminent Sanskrit Scholar and a zealous antiquarian, also shared the lot of humanity on Sunday last. The death of this learned Pandit suggests a short retrospect of his career.

He was born in a village in the district of Goruckpore. His father died when he was a boy, without bequeathing to him the advantages of wealth or rank. As a poor Bráhmana he came to Benares to prosecute the study of the Sanskrit language; which he did with assiduity and success. He had to struggle with the difficulties which merit generally meets with when involved in poverty. But he was not to suffer these long. Pandit Śálagráma Upádhyáya, on getting the post of Hindú Law Officer in the Sudder Court at Agra, recommended Pandit Híránanda to officiate for him in the College. He served in the Sanskrit College for more than twenty years as the Professor of Rhetoric. This connection with the College at once raised him from the recesses of obscurity. His uncommonly great talents, accompanied with his simplicity of manners and openness of heart, recommended him to the notice of the nobility of Benares. He cultivated their society (of course for gain's sake) with assiduity up to the time of his death.

There was yet a brighter prospect before the Pandit. He was chosen for the post of Hindú Law Officer at Agra. He discharged the responsible and onerous duties of this situation with integrity and honesty. The Officers in the Court were perfectly satisfied with him. He had all which could make a man happy in this world—wealth, knowledge, influence. But his happiness was not without alloy. His eldest and the most promising of his grandsons died. This was too severe a trial for his old age. Fortunately for him the post which he held was soon abolished and he was allowed to retire on a moderate pension. The rest of his life he passed at Benares in devotional exercises.

This eminent scholar, I am sorry to say, left no published works to perpetuate his memory. He amused himself at his leisure with poetical compositions which he would sometimes read to his friends. These poems breathe the spirit of originality and have been pronounced by learned Pandits to bear the type of a true genius. He also wrote a treatise on Sanskrit Grammar which has not yet been published. It is however hoped, as his sons are in good circumstances, that it will be soon published. The critical remarks on it till then may be reserved.

As this reverend personage for a long time bore an honorable connection with the Sanskrit College of which the Pandit is a Journal, I hope you will not deny me a space in your columns for the insertion of these lines.

I remain

BENARES COLLEGE, *The 9th July* 1867.

Yours truly,

AN ADMIRER.

ADVERTISEMENT.

"THE PURNAMÁSIKÍ PATRIKÁ." a monthly Sanskrit Journal to contain rare Sanskrit works will be published from the month of September.

RATE OF SUBSCRIPTION.

For one year,	Rs.	9	0	0
" 6 months,	"	5	0	0

All subscriptions to be paid in advance.

The Journal will be sold by Durga Sankara Mokerji, Ahia Buttola, Benares.

Communications of a literary nature should be addressed to the EDITOR: *all letters on business, to the Proprietors,* MESSRS. E. J. LAZARUS & CO., *to whom Drafts should be made payable.* ADVERTISEMENTS *will be charged for according to the space occupied.*

The PANDIT may be ordered of the Publishers, or through MESSRS. TRÜBNER and Co., LONDON.

Annual subscription, in advance, including postage, Rs. 12.

PRINTED AND PUBLISHED BY E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 16. Benares September 1st, 1867. Vol. II.

॥ मीमांसाजीवरक्षा नाम ॥

प्रकरणपञ्चिकायां दशमं प्रकरणम् ॥ १० ॥

प्रभाकरगुरोर्भावं परिभाव्याभिधीयते ।
मीमांसाजीवरक्षेयं क्षणिकत्वनिराक्रिया ॥

तत्र सुगतमतानुसारिणः क्षणिकानेव सर्वपदार्थानभिदधति । किं पुनरेषां प्रमाणं । न तावत् प्रत्यक्षं क्षणिकतामीक्षितुं क्षमते स्तम्भादिभावविषये निपुणमपि निरीक्षमाणस्य क्षणिकत्वाध्यवसायाभावात् । स्यादेषा मनीषा क्षणिकता नाम भावस्वभावाबहिर्भाविनी । तेन भावानुभावादेव प्रत्यक्षं क्षणिकतामपि साक्षात्करोतीति । तदिदं मनोरथमात्रं । तथाहि संविन्निष्ठा विषयव्यवस्थितय इति स्थितिरविसंवादा सकलवादिनां । तदियमपि क्षणिकता वस्तुस्वभावभूता सती संवित्संततिमधिरोहन्ती तदव्यतिरेकिणी व्यवतिष्ठेत नान्यथा । नच तथा संविदमनुदीयमानामुदीक्षामह इति कुतस्तस्याभास्वभावान्तर्भाविता । कुतस्तरां तदवबोधेनावबोधः । अथ मन्वीरन् क्षणिकता प्रत्यक्षमीक्षितापि न निश्चयपथमवतीर्णा तेनारूढेवावभातीति, तथापि तस्यां न प्रत्यक्षं प्रमाणं । तत्र हि प्रत्यक्षस्य स्वभावतो विकल्पविरहितस्य तत्पृष्ठभाविना प्रत्ययव्यापारोऽनुगम्यते तत्र प्रत्य— ॥ :: ॥ ::

॥ प्रकरणपञ्चिकोपसंहरणम् ॥

यथायं मीमांसाजीवरक्षानामको दशमप्रकरणोपक्रमग्रन्थः पूर्वाङ्क एवाङ्कनार्होऽपि भाव्यग्रिमभागोपलम्भसंभावनया नाङ्कितः । यदा च बहुलपरिश्रमपूर्वकगवेषणेनापि नासादितस्तदेदानीमवशतयेयानेवाङ्कनेन प्रकाशितः । परंत्वेतदन्वेषणपरिश्रमेण श्रान्तानप्यस्मानेतन्निबन्धराजशेषलिप्सा प्रकृतपत्रद्वारा प्रचिकाशयिषा च न मुञ्चति । तेन च महाशयान् काशीविद्यासुधानिधिचकोरान् प्रार्थये यद्ययमवशिष्टांशः समयान्तरेऽप्युपलभ्येत तदाप्यत्र प्रकाशयिष्याम्येव युष्माकं प्रदर्शनायेति ।

अस्य च ग्रन्थस्य मीमांसाजीवरक्षाभिधादस्मात् प्रकरणादवश्यं परैरपि प्रकरणैर्भाव्यम् । मीमांसाप्रकरणग्रन्थान्तरेषु दृश्यमानानां निरालम्बनवादशून्यवादनिरीश्वरवादादीनामुपपादनस्यैषु प्रकरणेष्वनुपलम्भात् । "कार्यान्वितस्वार्थे पदानां शक्तिरिति सकललोकप्रसिद्धगुरुमतस्य,, च ग्रन्थे निर्भरेणोपपादनस्यैतावत्पर्यन्तमनुपलम्भा "ज्जातिशक्तिव्यवस्थापनस्य,, व्यक्तिबोधोपपत्तिप्रतिपादनस्य,, "निषेधवाक्यानां प्रतियोगित्वेन धात्वर्थविशेषिताभावधर्मिकविध्यर्थकलकाराद्यर्थप्रकारकबोधतात्पर्यकत्वसिद्धान्तस्य,, "जात्यखण्डोपाधीतरधर्मप्रवृत्तिनिमित्तकानां व्यक्तिशक्तिव्यवस्थापनस्य,, "कुब्जशक्तिस्वरूपनिरूपणस्य,, चासत्त्वेन न्यूनताप्रसङ्गाच्चेत्यलमतिविस्तरेणेति शम् ॥

॥ सांख्यशास्त्राध्यापको वेचनरामशर्मा ॥

अथ वेदान्तादिनिबन्धेषु शैवमतस्य प्रायो निरूपणादिदं शैवमतमतिप्राचीन,मतिविरलप्रचारं च कालवशाज्जातं, तच्चेदमवश्यं प्रकाशयोग्यमित्यस्मिन् महानिबन्धेषु गवेष्यमाणेषु श्रीमद्विरङ्गलसंस्कृतविद्याप्रधानाध्यापकैः प्रमदादासमित्राभिधानैर्महाशयैर्महता प्रयत्नेन देशान्तरागताज्ज्योतिस्स्वरूपनामककोविदाच्चरेश्वरपरीक्षाख्यो निबन्धः सव्याख्योऽतिदुर्लभः काश्यामप्यनुपलभ्यमानः संपाद्यास्मिन् काशीविद्यासुधानिधौ प्रचिकाशयिषया संशोध्य समर्पितः ।

Digitized by Google

स चायमतिप्राचीनलेखशैलीसमनुगतो वेदान्तन्यायवैशेषिकसांख्ययोगमीमांसाबौद्धजैनशाक्यभिक्षुप्रभृतिवादनिराकरणपुरस्सरं शिव एव ज्ञानक्रियाश्रयः सर्वेश्वर इति महतीभिरतिविचित्रयुक्तिभिः साधयन्नदृष्टचरैतादृक्प्रबन्धो महानिबन्धशिरोमणिर्दर्शनमात्रेण विचारसहृदयानां परमाह्लादको भवेदिति संभाव्यते । एतन्निबन्धनिर्माता, माधवाचार्येण स्वकृतसर्वदर्शनसंग्रहे यदुक्तं सिद्धगुरुभिरित्यभिधाय ॥

"कर्तुः स्वातन्त्र्यमेतद्धि न कर्माद्यनपेक्षता,,

इत्येतत्प्रबन्धीयकारिकार्धस्योपन्यस्तत्वात्, तदपेक्षयाप्यतिप्राचीनः सिद्धगुरुपदव्यपदेश्योऽस्तीति निश्चीयते ।

टीका त्वस्य नारायणकण्ठसूरिसूनुभट्टभट्टरामकण्ठसूरिविरचिता प्रकाशाख्या । सापि संदर्भपरिपाटीनिरीक्षणादतिप्राचीनैवेति मन्यते चेतः ।

सोऽयं नरेश्वरपरीक्षानामधेयस्त्रिभिः काण्डैः संपूर्णीकृतोऽस्ति । तत्र प्रथमे काण्डे, ईश्वरपरीक्षाया जीवपरीक्षाधीनत्वाज्जीवपरीक्षाभिहिता, तथा च, नरेश्वरपरीक्षागतकारिका ।

ज्ञाता कर्ता च बोद्धा च बुध्वा बोध्यं प्रवर्तते ।
प्रवृत्तिफलभोक्ता च यः पुमानुच्यतेऽत्र सः ॥ १ ॥

इति । द्वितीये शंभुरेव भोगमोक्षविधाता सर्वेश्वर इति । तृतीये च पराभिमतेश्वरप्रतिक्षेपो मोक्षनिरूपणं चेति ।

तदिदमतिप्रौढं निबन्धरत्नं विपश्चितां विचाररसिकानां मनोरञ्जनायेह प्रकाश्यत इति कृतं बहुवर्णनेनेति शम् ।

॥ सांख्यशास्त्राध्यापको वेचनरामशर्मा ॥

॥ श्रीगणेशाय नमः ॥

॥ अथ नरेश्वरपरीक्षा ॥

तं शक्तिशक्तिमद्रूपं नत्वा नारीश्वरं परम् ।
नरेश्वरपरीक्षाया अक्षरार्थः प्रकाश्यते ॥

प्रकरणस्य तावदस्य प्रयोजनमाह ।

(१) अथ मेयाब्धिरत्नस्य शंकरस्यामितद्युतेः ।
परीक्षां लेशतो वच्मि पुंपरीक्षापुरःसरम् ॥

अथेतीश्वरपरीक्षा वक्तव्यतयाधिक्रियमाणाभिधेया, तस्याः प्रयोजनं तु परमेश्वरविषयज्ञानोत्पादः, परस्य श्रेयसः साधनमिति वक्ष्यति प्रकरणसमाप्तौ । अत्र तु समस्ततत्त्वभुवनादिप्रमेयसागरसारत्वेन, भगवतो रत्नरूपतया, शंकरपदेन तदेवाह, श्रेयस्करो हि सर्वश्चिन्तामणिरिव परीक्ष्यते । संबन्धश्चोपायोपेयलक्षणोऽर्थसिद्ध इति । एवं सर्वस्य प्रेक्षावतोऽत्र प्रवृत्तिसिद्धिः । अनेन दर्शनान्तरसिद्धानां हरिहरहिरण्यगर्भादीनामीश्वरत्वेऽप्यशंकरत्वाच्च प्रेक्षावन्तः परीक्षायां प्रवर्तन्त इति दर्शयति । अथ कथं तस्यैव तथाभूतत्वम् "यतोऽमितद्युतिः,, । यस्तु प्रकृतिः प्रकृतीश्वरवादिभि,र्ब्रह्म ब्रह्मविद्भि,र्नारायणो वा पाञ्चरात्रै,रीश्वरो, जगदुपादानकारणत्वेन, कल्पितः, स, तत एव, मृदादिवदचेतनत्वप्रसङ्गे सति, मितशक्तिरेव । गुणात्मापि सांख्यैः प्रकृतेः कर्तृत्वाभ्युपगमादीश्वरो इह कर्ताभ्युपगत एव, विकारेश्वरवादिभिरपि ब्रह्मणो हिरण्यगर्भाख्यो महाविभूतिश्चातुरात्म्यलक्षणश्चेश्वरो योऽभ्युपगत,स्तस्य सर्गप्रलययोगान्मितशक्तित्वमुपगतमेव१ । यैरपि पुरुषविशेषः, प्रकृष्टतरबुद्ध्यादियोगात् क्लेशादिभिरपरामर्शाच्चेश्वरो वर्ण्यते, तैरपि बुद्ध्यादीनां व्यक्तत्वेनावश्यं विनाशात्, तस्य मितशक्तित्वमेष्टव्यम् । यैस्तु मनःसंयोगादीश्वरो गीयते तैर्मनसोऽप्यचैतन्ये सत्यनेकत्वाद् घटादिवत् कार्यत्वेनानित्यत्वतोऽ,सावपि मितशक्तिरभ्युपगन्तव्यः । नित्यत्वेऽपि च मनसो, मुक्तात्मवत्, तत्संयोगस्यानित्यत्वात् तत्रैव प्रसङ्गोऽनिवार्य एव । "व्यापकत्वान्मुक्तात्मनामपि मनःसंयोगोऽस्ती,,ति चेत्, तर्हि तेऽपीश्वरा इति स्वागमविरोधः, "संयोगेऽपि मनसोऽदृष्टवशात्, करणत्व,,मिति चेत्, ईश्वरस्य तदभावादनीश्वरत्वप्रसङ्गः, "ईश्वरस्य स्वशक्त्यैव सर्वदा मनोयोग,, इति चेत्, मनोयोगाच्छक्तत्वं, शक्तेश्च मनोयोग, इतीतरेतराश्रयत्वाच्च किंचिदेतत् । अयं तु परमेश्वरो, वक्ष्यमाणनयेन, सर्वत्र सर्वदा चाप्रतिहतशक्ति,रित्यमितद्युतित्वेन, शंकर उक्तः । अत एव नात्र प्रकरणान्तरेष्विव नमस्कारपूर्वं प्रवृत्तिः, तत्परीक्षाभिधानेनैव सर्वविघ्ननिवृत्तेः, प्रकरणकरणसामर्थ्यव्यक्तेर्वोत्पादात्, तथा च श्रुतिः,

"यस्य तत् परमं तेजः शैवं हृदि विराजते ।
ब्रह्मादयोऽपि हि सुरा न तं हिंसन्ति साधकम्,, ॥

इति । इयं च परीक्षा पुरुषपरीक्षापूर्विकैवोपपद्यते, यतः केचित् "पुरुष एवेदं सर्वमतः किमीश्वरेण,,त्याहु,रन्ये तु प्रतिक्षणं स्वरसत एवार्थानामुत्पत्तिविनाशादधिष्ठातृशून्यत्वम्, परे तु "यावज्जीवं सुखं जीवे,,दिति, "कर्माद्यधिष्ठेयाभावो यतस्तत्, किमीश्वरेण,,त्याचक्षते, इति पुरुषपरीक्षया विना तत्परीक्षा नोपपद्यत एवे,ति प्रथमं सैवोपक्रम्यते ।

(२) ज्ञाता कर्ता च बोधेन बुद्ध्वा बोध्यं प्रवर्तते ।
प्रवृत्तिफलभोक्ता च यः पुमानुच्यतेऽत्र सः ॥

ज्ञाता ज्ञानशक्तियुक्तो, न तु सांख्यभेदानामिव, नैयायिकवैशेषिकाणामिव वा, नित्यानुमेयः, सर्वदार्थप्रकाशकत्वेनास्य स्वतोऽवभासनात् स्वत एव स्वानुमेयत्वानुपपत्तेश्चेति वक्ष्यामः । कर्ता क्रियाशक्तियुक्त,स्तच्छक्त्यैव शरीरादौ स्पन्दाद्यनु-

---

१ अभ्युगतमित्यर्थः, इति ।

Digitized by Google

भूतेः, न तु सांख्यानामिवाकर्ता, स्वानुभवविरोधात्, नच शक्तियोग एव परिणामितात्मन,श्चिच्छक्तेरप्यभावतो नैरात्म्यप्रसङ्गात्, अपितु स्पन्दो रूपान्तरापत्तिर्वा । सा चास्य सकलकर्तृत्वादेव न संभवतीति चिच्छक्त्येव क्रियाशक्त्यापि योगस्य न विरोध इति वक्ष्यामः । "चे,,ति समुच्चितमेतदात्मनो रूपं, न प्रत्येकम् । अपिच बोधेनाध्यवसायात्मना बुद्धिरूपेण प्रत्यक्षेणैव "बोध्यं बुद्ध्वा,, निश्चित्य, प्रवर्तते, न तु जैमिनीयादीनामिव, नित्यानुमेयेनैव, तथैवानुभवादिति वक्ष्यामः । "बोध्यं,, च व्यतिरिक्तं वस्त्वेव बुद्ध्वा, न तु शून्यवादिनामिव ज्ञानं, वेदान्तभेदानामिव, वाऽवस्त्वेव, तस्य नीरूपाख्यत्वेन सर्वशक्तिविरहलक्षणत्वाद्बोध्यस्वभावत्वायोगः । तद्योगे वा न तथात्वमिति । किंच "बोध्यं बुद्ध्वे,,ति न बोध्यधर्मस्तद्बोधो, जैमिनीयभेदानामिव, तस्य सर्वान् प्रत्यविशेषात् सर्वबोद्धृबोध्यताप्रसङ्गात्, अपितु बोद्धृस्वभाव एव स्वप्रकाशात्मेति दर्शयति । "प्रवर्तत,, इत्येवंविधामागमपूर्वां कार्यकरणादिक्रियां दृष्टफलामदृष्टफलां च कर्तुमारभते । तदकर्तृत्वपक्षे तु, प्रकृतेरेव कर्तृत्वाभ्युपगमात्, तत्प्रेरणया विना, विवशस्योन्मादादिनेव, कार्यकारणानि स्वत एवास्य यत्र तत्र प्रवर्तेरन्, इत्यनुभवसिद्धस्वात्मकर्तृकत्वविरोध इति सर्वमग्रे व्यक्तीभविष्यति । अपिच "प्रवृत्तिफलभोक्ता चे,,त्यक्षणिकः, क्षणिकत्वे ह्यन्य एव दानादिक्रियानुष्ठाता,न्यश्च तत्फलभोक्तेति, सर्वदैकरूपस्थिरग्राहकस्वसंवेदनात्मना सर्वव्यवहारहेतुभूतेनानुभवेन विरोध इति वक्ष्यामः । एवं विशेषणविशिष्टतया, प्रत्यात्मं, स्वसंवेदनसिद्धो यः पुरुषः सोऽत्रास्मिन् दर्शने सर्वान्यविप्रतिपत्तिनिराकरणेन प्रतिपाद्यत इति प्रतिज्ञार्थः ॥

तत्रास्य तावत् प्रत्यक्षाविरोधमाह ।

(३) कर्त्रादिना चतुष्केण व्यवहारः समाप्यते ।

सर्वेण हि वादिनानुभवसिद्धत्वेनानादिप्ररूढो लोकव्यवहारोऽनुसर्तव्यः । स च सर्वो लवनपचनाद्यात्मकः । "कर्त्रादिना चतुष्केणे,,त्युपलक्षणं,क्रियानिबन्धनेन कारकभेदेन यथासंभवं क्वचिदेकेन द्वाभ्यां त्रिभिर्वा षट्पर्यन्तैर्निष्पाद्यमानो दृश्यते । क्रियया हि विना,कर्तृकरणादयोऽर्था एव न तु कारकवैचित्र्यमासादयन्ति, सा च न तैर्विनेति ॥

"अथ किमनेन क्रियाकारकविशेषवादेन,सामग्रीलक्षणा हि बीजादयोऽर्थास्तत्तदवस्थायुक्ता एव विशिष्टमङ्कुरादिकार्यं, प्राग्भावमात्रेण कारणतया करिष्यन्ती,,ति कारणैकान्तवादिनो जैनाः । तदयुक्तं, यतः ।

(४) व्यवस्थापयितुं शक्यो नायमेकान्तवादिभिः ॥

एवं हि, हन्तृवध्ययोर्दातृयाचकयोर्वा, प्राग्भावमात्रेणैकस्मिन् वधलक्षणे, दानादिके वा कार्ये, कारणत्वमविशिष्टमिति समानफलत्वं भवतां प्रसज्येत । न, "स्वरूपभेदेन तस्या एव सामग्र्या, अन्तरविशेषकृतत्वा,,दिति चे,न्न किंचिदेतत्, उभयोरपि तुल्यकृतत्वात् कारणत्वाच्च । "हन्तुरिव वध्यस्याप्यसौ वधः पर एवं, स्वपरसंतानभेदापेक्षतयैतदुक्त,,मिति चेत् । अस्तु,उपयोगभेदस्तु नास्त्येव, "स्वपरसंतानभेदात्, सोऽपि कथंचिदस्ती,,ति चेत्, तर्ह्ययमेव कर्तृकर्मादिभेदात्मकः क्रियाकारकविशेषवादिभिर्न* व्यवस्थापयितुं शक्य इति तद्व्यवस्थापनाय, कारकवादोऽभ्युपगन्तव्य इत्यबाधः प्रतिज्ञार्थस्य । एतच्च दानादावप्यनुसंधेयम् ॥

ननु परमार्थतः सर्व एवायं भेदाश्रयो व्यवहारोऽसत्य एवै,कस्यानन्दात्मनो ब्रह्मणः सत्यत्वात्, तदुक्तं "नायं हन्ति न हन्यते,, इति । एतदप्ययुक्तम्, तथाहि,

(५) सर्वैकत्वप्रसिद्धौ तु प्रमाणं नास्ति किंचन ।

प्रत्यक्षानुमानयोरक्षलिङ्गाश्रयत्वेन, भेदविषयत्वतः प्रत्युत तद्बाधकत्वात् । "सत्तामात्रविषयत्वात् तयोरत्राबाधकत्व,,मिति चेत्, तर्हि प्रत्यक्षादिभेदासिद्धेः प्रमाणाभावः । "अस्तु परमार्थेनाद्वयस्यैव शक्यत्वा,,दिति चेन्न, प्रमाणाभावेन तस्यैवासिद्धेरिति वक्ष्यामः ॥

अथात्र प्रमाणम् ।

(६) आम्नायश्चेत् ।

तथा च श्रूयते ।

"एकं ब्रह्म परं सत्यं नेह नानास्ति किंचन ।
इदं फेनो न किंचिद्वा बुद्बुदो वा न किंचन,, ॥

इति । "कार्येऽर्थ इव च सिद्धेऽप्यर्थे वेदस्य प्रामाण्यं नोपनिषद्भागस्य कर्मकाण्डवाक्यैकवाक्यतयार्थवादत्व,मपितु प्रमाणत्वमेवात्रे,,ति चेत् ॥

(७) न, येनासौ वासनासंप्रकाशकः ॥

असावाम्नायस्तावन्न सत्यभूतब्रह्माद्वैतप्रतिपादकत्वेन प्रमाणं, तस्य सर्वपरिकल्पनातीतरूपत्वतस्तदविषयत्वाभ्युपगमात् । तद्विषयत्वे त्वागमस्यापि सत्यत्वाद,सतोऽसद्विषयत्वेनाप्रमाणत्वात् सत्याद्वैतसिद्धिः । द्वैतनिबन्धनत्वात् प्रमाणप्रमेयभावस्येति । यदि परमस्याः सकलभेदरूपप्रायाः प्रतिपत्तेरविद्यावासनात्मप्रकाशकत्वेन प्रमाण,मभ्युपगन्तव्यः, † पारम्पर्येण त्वद्वैतात्मनि, यदाहुः, "नेति नेत्यात्मगति,,रिति, ततश्चावस्तुविषयत्वादस्यैव, वन्ध्यासुतो यातीत्यादिवाक्यजातस्येव, प्रामाण्याभावात् पुनरप्यद्वैतासिद्धिरेव ॥

---

* क्रियाकारकविशेषवादो दृष्टादृष्टफलहेतुभूतो व्यवहारसिद्धकारणैकान्तवादिभिर्न इति पाठान्तरम् ।

†—मभ्युपगन्तव्यम् इति पाठान्तरम् ।

Digitized by Google

"यद्येवं भेदस्य सत्यत्वात् प्रतिशरीरमिव प्रत्यर्थं प्रतिक्षणं च बाह्यस्यार्थस्यानहंकारास्पदस्याहंकारास्पदं प्रतिक्षणं विज्ञानं भिन्नमेव ग्राहकमनुभवसिद्धमस्तु, नान्यः कश्चिदात्मा नामे,,ति वैभाषिकाः, तस्योपलब्धिलक्षणप्राप्तस्यानुपलब्धेः। अनुपलभ्यस्वरूपस्य च सत्ता दुःसाधैव, सत्यम्। अत एवे"न्द्रियादिरिव कार्यादात्मापीच्छात्मकादनुमीयत,, इति नैयायिकाः। तदयुक्तम्। कार्याद्धि कारणमात्रं सदृशमेवानुमीयते, अतश्च पूर्वं विज्ञानमेव पूर्वतरज्ञानजसंस्कारसहायमुभयत्रादिसिद्धं नीलपीतादिज्ञानानामिवास्याः कारणमस्तीति कुतो विसदृशतरादृष्टहेत्वन्तरसिद्धिः, तदुक्तं,

"यस्मिन् सति भवत्येव यत् ततोऽन्यस्य कल्पने।
तद्धेतुत्वेन सर्वत्र हेतूनामनवस्थितिः,, ॥

इति। न,नीलादिज्ञानानामिवास्याः कार्यत्वासिद्धेः। इच्छा हि पूर्वानुभूतसुखसाधनत्वाद्यनुसंधानसामर्थ्यसिद्धतत्समानकर्तृज्ञानसहभाविनीति ज्ञात्रन्तरेभ्य इव शरीरविज्ञानान्तरादिभ्योऽपि कार्यत्वेन व्यावर्तमाना विशिष्टं ज्ञातारं स्थिरमनुमापयतीत्यात्मसिद्धिः। "नहि य एवाहं द्रष्टा स एवेष्टेत्येतदन्यत्रोपपद्यते यतः,, न, असिद्धत्वात्,नहि तत्समानकर्तृज्ञानसहभावित्वमस्याः सिद्धं,तत्सिद्धत्वे हि ज्ञानविषयत्वात् प्रत्यक्ष एवात्मोक्तः स्यादिति नित्यानुमेयत्वाभ्युपगमविरोधः। "नन्वत एव तदपि सर्वात्मनां सुखसाधनत्वाद्यनुसंधानसामर्थ्यतः साध्यत,, इत्युक्तं। किमिदं सामर्थ्यं येन तस्य सिद्धिः। "अन्यथानुपपत्तिरेव,,सा कस्य,न तावदिच्छायाः, अनुसंधानज्ञानत एवास्याः समुत्पादात्। "अथ तस्यैवानुपपत्तिरिति,, न, तस्यापि पूर्वानुभवसंस्कारत एव भवद्भिरप्युत्पादाभ्युपगमात्,तर्हि "स एव संस्कारो नित्येन धर्मिणा विना नोपपद्यत इति ततस्तत्सिद्धिः,,न,अनित्यानामेवोत्पन्नबीजानां लाक्षादिसंस्कार,स्तत्पुष्पारुणिमादिना, सिद्ध इति विज्ञानसंततावेव क्रमवत्यां स सिध्यति नान्यत्रात्यन्तासिद्धे इति न विद्मः। प्रयोगाडम्बरव्यतिरेकेण कस्यासिद्धि,र्येन तदपि हेतुविशेषणभूतं ज्ञानं साध्यते। एतेन वैशेषिकोक्तमपि प्राणापाननिमेषोन्मेषजीवनमनोगतीन्द्रियान्तरविकारैः स्मृत्यादिभिरात्मानुमानं प्रत्युक्तं, तथाहि "तिर्यग्गतिस्वभावस्य वायोरूर्ध्वाधःप्रेरणं नोपपद्यते। भस्त्राध्मातेव कश्चित् कल्प्यः। एवं निमेषोन्मेषादीनां देहावयवाश्रितानामपि यन्त्रपुरुषवत् प्रयत्नयुक्तोऽधिष्ठाता जीवनस्यापि, धर्माधर्मकार्यतया, तद्गुणाश्रयभूतो मनसोऽप्यचैतन्याद्रथादेरिव, प्रयत्नवान् प्रेरको, दाडिमाद्यम्लतररसफलदर्शनेन, दन्तोदकात्मकरसनेन्द्रियविकारस्यानेकगवाक्षवत्, सर्वेन्द्रियार्थानुसंधाता कश्चित् कल्प्यः। तच्च विज्ञानमेव प्रवाहात्मकं संस्कारादिवशतः पूर्वोक्ताशेषार्थक्रियानिर्वर्तकमुभयवादसिद्धमस्तीति कुतोऽन्यः सिद्ध्यति,,। "यदपीच्छादीनामचाक्षुषप्रत्यक्षत्वाद्रसादिवद् गुणत्वे सत्ययावद्द्रव्यभावित्वाच्छरीरादिविशेषगुणत्वप्रतिषेधेन परिशेषादात्मनो गुणिनोऽनुमानं,, तदपि दृष्टान्तासिद्धेर्व्याप्त्यभावादनैकान्तिकम्। नहि रसादीनां गुणत्वमस्माकं सांख्यानामपि वा प्रसिद्धं, रूपरसादिसमुदायव्यतिरेकेणान्यस्य कस्य चिदाम्रफलादेर्धर्मिणोऽनुपलम्भात्, अत एवाम्रस्य रस इति भेदव्यपदेशः, समुदायैकदेशत्वख्यापनाय, वनस्य धवः शोभत इतिव,दुपपद्यत एव। "कस्य तर्हीयमिच्छा,, इष्यमाणस्य कर्मणो ग्रासादेरेव। अथ "हेतोः कस्येत्युच्यते,, यतोऽनन्तरं दृश्यते तस्य विशिष्टस्यैव ज्ञानस्य पूर्वतरज्ञानजसंस्कारपरिपाकात्मनः। "कथं तर्हि देवदत्तस्येच्छेत्यादिकोऽत्र कर्तृत्वव्यवहारः,,लौकिकः, कुतर्कदर्शनाभ्यासमूलोपहत एव, वितस्तायाः प्रवाह इतिवच्चाविशिष्टज्ञानप्रवाहसंबन्धिताप्रदर्शनार्थो युक्त एव। आत्मवादिनामपि वा देवदत्तस्य स्वात्मैवात्र प्रमाणमिति कथमसौ व्यवहारः प्रमाणेनानुपपद्यमानः, "कल्पित एवे,,ति चेत्, कृतं व्यवहारेण। प्रमाणमेव हि सत्येतरत्वव्यवस्थापनायानुसरणीयम्। तच्चेतरत्रापि समानमिति ज्ञानमेव विशिष्टमिच्छा। न तु गुणः कस्य चित्। यदपि सांख्यैः "संहतानां पारार्थ्यं शयनादीनामिव कार्यकारणानां परसिद्धावनुमान,, मुपन्यस्तं, तदपि, उभयवादिसिद्धं विज्ञानमेव साधयतीति सिद्धसाधनम्। "विज्ञानस्यानित्यत्वात् क्रमेण संहतत्वमिति ततोऽप्यन्योऽसंहतः परोऽनुमेयः,, सत्यम्, यदि तथाभूतेन व्याप्तिः सिद्धा भवेत्, संहतानां हि दृष्टान्ते संहतशरीरादिविषयमेव पारार्थ्यं सिद्ध,मिति ज्ञानमेव तथाभूतं सिध्यति,अन्तेऽप्यनवस्थापरिहारार्थं कस्यचित् तथा भूतस्यैवाभ्युपगमान्नान्योऽतथाभूतः। नहि यद् दृष्टान्तापरिदृष्टमसिद्धव्याप्तिकं वस्तु, तद्धेतुः स्वशक्त्यैव साधयितुं शक्नोति। ज्ञापकोऽयं न कारको यतः। नच "ज्ञानमस्माकमसिद्ध,,मिति वाच्यम्। अर्थप्रकाशो ह्ययं सकललोकप्रसिद्धोऽनुभूयत एव। "नचासावर्थधर्मो,,ऽर्थवैलक्षण्येनाध्यात्ममनुभवाद्,अर्थस्य सर्वान् प्रत्यविशेषात् सर्वप्रत्यक्षताप्रसङ्गाच्च,नापि पुंस्वभाव,स्तस्यासिद्धेः,सिद्धौ वाप्रकाशात्मनो व्यतिरेकाभावात्,तस्याप्यप्रकाशरूपत्वमित्यायातमान्ध्यमशेषस्य जगतः। तदुक्तम्

"अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यति,,।

इति। प्रदीपवत् स्वपरप्रकाशैकस्वभावत्वेन विशिष्टार्थप्रकाशकं विज्ञानमनुभवसिद्धं नापह्नोतुं शक्यमिति, तदिदमुक्तं,

"ज्ञानार्थौ सहभावरूपतुलया जातो विभाग मत,,।

इत्यात्मना भोक्त्रादिरूपेणान्येन शून्याः स्कन्धा,, इत्यात्मशून्यवादिनः। अत्राचार्य आह।

(८) नाभावः शक्यते वक्तुं प्रत्यये सर्वसाक्षिणि ।
शून्यता तेन सर्वेषां भावानां बोधबाधिता ॥

यद्येवं सर्वार्थसाक्षात्कारणप्रवृत्ते ज्ञानात्मनि ग्राहकस्वरूपे प्रत्यक्षसिद्धे सत्यभावो नात्मनः शक्यः प्रतिपादयितु,मनुभवसिद्धत्वात्, भोक्तृत्वं हि ज्ञातृत्वमुच्यते, तदेव च पारमार्थिकमात्मनो रूपं तच्च भवद्भिरप्यनुभवसिद्धमित्युक्तम् । अतः क्षिमन्यत् साध्यमिति । "ननु च प्रत्यर्थं प्रतिक्षणं च भिन्नमेवेदं ग्राहकरूपं विज्ञानमस्माभिः प्रतिपादितं, न त्वात्माभिधानः कश्चित् सर्वार्थसाक्षिभूतोऽर्थः, यदि च तदेवासावित्युच्यते, भवतु नाम भेदः, परं सर्वथा त्वात्मवादिना स्थिररूपोऽसौ दर्शनीय,,इति चेत्, उच्यते, नात्र भवदभ्युपगमोऽङ्गत्वेनास्माभिरुक्तो,नहि प्रतिदर्शनं व्यवस्थापकानां सर्वप्रमातॄणामनुभवभेदः संभवति,तस्य स्वभावसिद्धत्वात्, यदाहुः,

"ज्ञानं प्रत्यभिलापं च सदृशौ बालपण्डितौ,,

इति । तत् स एवायं सकललोकप्रसिद्धः स्वानुभवो निरूप्यतां, "किं प्रत्यर्थं प्रतिक्षणं चापूर्वोऽपूर्वः पूर्वोत्तराभ्यामनुभवाभ्यां भिन्नः क्षणमात्ररूपावभासो ग्राहकः प्रकाशते, उत सर्वदैवाभिन्न,, इति, तत्रायं स्थिररूपः प्रकाशः सर्वदैव ग्राह्योपाधिभेदेऽप्यनासादितस्वात्मभेदः कालत्रयेऽपि तिरस्कृतस्वगतप्रागभावप्रध्वंसाभावो नानाविधप्रमाणाद्यनेकचित्तवृत्त्युदयव्ययसंवेदनेऽप्यकम्पिततत्तद्ग्राहकस्थैर्यवेदनो वृत्त्यन्तरालेष्वप्यविलुप्तज्योतिः सुषुप्त्यादावप्यखण्डितस्वसंवित् सततमेव स्वप्रकाशत्वेन गम्यत्वादात्मपदप्रतिपाद्यः प्रतिपुरुषं स्वसंवेदनसिद्ध इति, किमन्यान्येन साधनेन, तामेव चाभिन्नामनपायिनीमात्मसंविदमाश्रित्य सर्वैः कालान्तरफलानि कर्माण्यारभ्यन्ते । क्षणिकत्वे तु तस्याः सर्वव्यवहारप्रत्यस्तमयः । सर्वानुभवानां क्षणमात्रवेदनोत्तरकालं ध्वंसतां क्षणान्तरे संभवाभावात् कः प्रवर्तेत, कुत्र किमर्थं वा, यतो नहि क्षणात्मवेदिनः क्षणान्तरेऽपि नाहं ममेति पश्यतः प्रवृत्तिर्घटत इति निरीहं स्वरूपमात्रप्रकाशनिष्ठं हेयोपादेयबुद्धिविकलममिथ्याज्ञानं विचारबोधाद्यनेकज्ञानशून्यं जगदेतद्भवेदिति सर्वानुभवविरोधः, स्थिरग्राहकप्रकाशपूर्वकत्वादेवमादेरिति ।

स्यादेतत् । अस्त्ययमेकरूपस्थिरग्राहकप्रकाशोऽनपह्नवनीय एव, स पुनर्न स्वसंवेद्योऽपितु ग्राहकक्षणप्रवाह एवानुभूयमाने तत्सादृश्यदर्शनभ्रान्तैर्विकल्पैरध्यारोपितोऽम्भःप्रवाहस्यैवैक्यमिति भ्रान्त एव, अत एवास्यात्मग्रहत्वात् सर्वानर्थमूलत्वेनोपशमाय भगवता सुगतेन नैरात्म्यविषयः प्रतिपक्षभावनाक्रमो विषयः प्रारब्धः, यदाहुः,

"मिथ्याध्यारोपहानार्थं यत्नोऽसत्यपि भोक्तरि,, ।

इति, तदयुक्तम्, विषयवैलक्षण्येन कर्मतयाध्यात्ममस्य संवेदनात् । यदि ह्ययमारोपितः स्याद्वारोपकाद्ग्राहकरूपाद्भेदेन विषयवद्भासेत, देवदत्तबोधः स्थिर इतिवत्, नचैवमयमनुभवोऽपितु विषयप्रकाशत्वेनान्तर्ग्राहकस्वभावस्तत्समारोपकाभिमतग्रहीतृरूपत्वेन तदापि स्थिर एव संवेद्यते, तस्यापि हि स्वतः क्षणमात्ररूपत्वेनाप्रतिभासनात् । तत्प्रतिभासित्वे ह्यारोपानुपपत्तेः, आरोपस्य पूर्वापरपरामर्शरूपत्वेन स्थिरबोधनिवर्त्यत्वात् । नच क्षणात्मनोऽपि युगपत् पूर्वापरकालयुक्तदीर्घविषयत्वतः समारोपकत्वं, अयोजनात्मकत्वेनाविकल्पकत्वादलातचक्रादिप्रतिभासवत्, अत एव युगपच्छब्दार्थविषयत्वेऽपि योगिज्ञानमविकल्पकमित्युक्तं, भवद्भिः । "योजितविषयं त,,दिति चेत्, सर्वेषां क्षणिकत्वेन योजनानुपपत्तेर्न किंचिदेतत्, अत एवानेकस्यापि क्रमभाविनो विकल्पक्षणस्यानारोपकत्व,मित्यारोपासंभवादसंगतस्तव, विकल्पः।नच ग्राहकात्मा ग्राह्यीकर्तुं शक्यते, येन स्वात्मन्यध्यारोपेण स्थैर्यमारोपितमित्युच्यते । स्वात्मन्यविकल्पको विकल्पो यतो,ऽत एवास्याहंप्रत्ययविषयतापि न संभवति, अपितु अहंप्रत्ययप्रकाशरूपतैव, तदापि तेन रूपेण स्थिरतयैव भासनात्, नहि कालत्रयेऽपि ग्राहकात्मनो ध्वंसः संवेद्यत इति युक्तं । यस्य हि प्रागभावः, स उत्पन्न उच्यते, यस्य तु प्रध्वंसः स नष्टः । यस्य पूर्वोत्तरयोः कोट्योर्नास्त्यभावसंवित्, प्रतिक्षणं स समुत्पन्नो निवृत्तो वे,ति न शक्यते वक्तुं । नचास्वसंवेद्यः संविद्धर्मो भवतीति वक्ष्यामः । तत् स्थूलसूक्ष्मयोरिव स्थिरक्षणिकयोः परस्पररूपत्वा,द्यथा विद्युदादौ क्षणिकत्वं प्रमाणसिद्धं सद,क्षणिकत्वं व्यावर्तयति, एवं ग्राहकात्मन्यप्यारोपासंभवात् स्थैर्यमवभासमानमसंशयं क्षणिकत्वं व्यावर्तयतीति युक्तं, नच स्वसंवेदनस्य तथात्वे बाधः संभवति,बाधकाभिमतस्यापि तेनैव स्थिरात्मना संवेदनात्, अन्यथा बाधकत्वायोगाद् भ्रान्त्यभावाच्च । भ्रान्तमपि हि विज्ञानं सर्वत्रालम्बने भ्रान्तं,न स्वात्मनीति दर्शयिष्यामः । नच प्रमाणसिद्धस्य बाधकमन्तरेणान्यथाभ्युपगमो मतिमावर्जयति विपश्चिताम् । "स्थिरस्यार्थक्रियानुपपत्तिरेव बाधक,,मिति चेत्,तच्चैव तस्याः समुत्पत्तेरिति वक्ष्यामः । तदेवं सर्वदैकरूपस्थिरग्राहकप्रकाशात्मानारोपित एव, सर्वार्थसाक्षितया, येन प्रतिपुरुषं स्वसंवेदनसिद्धः, तेन, कारकात्मशून्याः स्कन्धा इति पक्षः प्रत्यक्षनिराकृत एव । तदियता प्रतिज्ञासूत्रान्तं ज्ञातेति पदं व्याख्यातं । यद्येवं ग्राहकात्मनः सर्वान् प्रत्यविशेषान्नीलस्येयं संवि,न्न पीतस्ये,ति प्रत्यर्थं संविद्भेदासिद्धिः, नहि द्वावुपलम्भौ स्तः, एकोऽर्थस्यापरश्चात्मनः, आत्मोपलम्भात्मके च विषयोपलम्भे सत्यात्मनोऽविशेषाद् तस्याप्यविशेषः, ततस्तदर्थविशेषस्याप्रसिद्धेरनुभवविरोधः ।

“नन्वर्थवत् तत्प्रकाशाभिन्नैव संवित् संवेद्यते,, यद्येवमात्मान्तरासंवेदनान्नैरात्म्यमेव, यदुक्तं,

“नित्यं प्रमाणं नैवास्ति वस्तुभेदव्यवस्थितेः,, ।

इति । “नन्वात्मापि संवेद्यत एव,, तदयुक्तं, एकमेवेदं संविद्रूपं हर्षविषादाद्यनेकाकारविवर्तं पश्यामो यतः, तच्चेत् संवित्, कोऽन्य आत्मा, अथात्मैवासौ, कान्या संवित्तिः, नहि प्रतिदर्शनं संविद्रूपमन्यथेति युज्यते वक्तुं, येन जैमिनीयानामेतदुभयरूपमित्युच्यते, तस्य नीलपीताद्यिवद्वस्तुशक्त्यैव सिद्धेः, प्रतिपुरुषमन्यथात्वायोगात् । सत्यम्, एकमेवेदं संविद्रूपम्, अस्य तु नीलमहं वेद्मीति परामर्शप्रत्ययबलादर्थवदात्मापि संवेद्य इति ब्रूमः, अत एव “प्रत्ययान्तर्गतत्वेनाहमंशपरामर्शात् सप्रत्यभिज्ञं प्रत्यक्षमेवात्मसिद्धौ प्रमाणमिति,, प्राभाकराः । “यद्येवं पलाशानां वनं माषाणां राशिरित्यादिप्रत्ययबलात् पलाशमाषादिव्यतिरिक्तस्यापि वनराश्यादेरर्थान्तरस्याध्यक्षतः संवेद्यत्वतः सत्त्वप्रसङ्गः,, न, “तद्व्यतिरिक्तान्यस्य तेनासंवेदनान्मिथ्यैव परामर्श” इति चेत्, तर्ह्यत्रानैकान्तिकत्वात् कृतं परामर्शेन, संवेद्यतैव निरूप्यतां, किमर्थवदात्मनोऽसौ, अथ वनादिवत् कल्पितैवेति, नचार्थतद्ग्राहकसंविद्विशेषव्यतिरेकेणान्यः कश्चिदात्माभिधानः संवेद्यत इति कल्पितैव सा, संवेद्यत्वे च नात्मा, संविद्विषयत्वाद् घटादिवत् । “प्रमातृतयैव संवेदनाददोष” इति चेन्न, इतरेतरविरोधात् । प्रकाशकत्वं हि प्रमातृत्वं न प्रकाश्यता, प्रकाश्यत्वे च प्रकाशकतानुपपत्तिः, तत्प्रकाशकस्यैवात्मत्वात् । “अस्तु परमार्थतस्तस्य संविल्लक्षणात् फलादरूपान्तरत्वा” दिति चेत्, तर्हि प्रतिकर्म तस्य भेदान्नैरात्म्य, भेदे चार्थभेदासिद्धिरित्युक्तम् । एतेन “प्रत्यर्थमात्मनो विशेषाभावेऽपि तत्समवेतं ज्ञानं भिन्नमेव प्रकाशकमुत्पद्यते, ततो न विरोध” इति नैयायिकवैशेषिकपक्षः प्रतिक्षिप्तः । ज्ञानस्य तस्मादभेदे प्रत्यर्थं भेदान्नैरात्म्यमेव, भेदे तु प्रकाशकत्वाज्ज्ञानमेवास्तु, किमन्तर्गडुनान्येन, किं कुर्मः, तथाप्यनुमानात् सिध्यत्येव, न, उक्तत्वात् । “नन्वात्मा स्वयमपरोक्षतया गृहीतृत्वेनायं प्रत्यर्थमलब्धभेदः प्रस्फुरत्येव, तद्बलात् स्वर्थप्रकटताख्यो धर्मः प्रत्यर्थं भिन्न एवोत्पद्यते, ततोऽर्थभेदसिद्धेरदोष,, इति कौमारिलाः । तदप्ययुक्तम्, अर्थस्य सर्वान् प्रत्यविशेषात् सर्वात्मप्रकटता स्यादिति सर्वस्य सर्वज्ञताप्रसङ्गः । “न, विशिष्टात्मजन्यत्वात् प्राप्यकर्मवदस्ये,,ति चेत्, तदयुक्तं, तदप्रकाशे तस्याप्यसिद्धेः, प्रकाशे तु ग्रामप्राप्तिवदुभयनिष्ठतेति संवित्पक्ष एव, स च निराकृतः । नार्थधर्मत्वेऽपि स्वत्वतत्त्वादिवदुलूकादिपरिहारेणालोकजनितार्थप्रकटतादिवद्वा, विशिष्टात्मसंबन्ध्यसौ धर्मस्तत्र भविष्यति, ततो नातिप्रसङ्ग इत्युक्तमत्र । अपिच असावप्यर्थस्य प्रकाशात्मको वा स्यात्, प्रकाशविषयरूपो वा, पूर्वस्मिन् कल्पेऽर्थः स्वत एव तदा प्रकाशेतेत्यात्मनः प्राग्वदप्रकाशनादसिद्ध एव स्यात् । “नन्वधुना प्रकाशमानोऽर्थः कथमसिद्धः,, । सत्यम्, आत्मान्तरवत् स्वत इत्यात्मान्तरस्यासिद्ध एव, न तु तद्बलात् प्रकाशत इति, किमतः, तस्य तु न प्रकाशन इति सर्वदा परोक्ष एव । अथ द्वितीयः पक्षः । “तत्र त्वर्थस्य कः प्रकाश,, इति वाच्यं, “नन्वात्मप्रकाश एव,, सत्यं, तस्य त्वविशेषात्, अतो विशेषव्यवस्था नोपपद्यत इति । अत्रैव दोषः स्थित एव ।

“नन्वर्थाहिताकारविशेषसंवेदनादात्मनोऽर्थविशेषव्यवस्थापकत्वम्,, अतो नैव दोष इति पञ्चाङ्गाधिकरणाः, यदाहुः,

“तद्ग्राह्यप्रतिबिम्बस्य ग्रहणं भोग आत्मनः,, ।

इति । प्रोक्तं च सौत्रान्तिकैरपि,

“अर्थेन घटयत्येनां नहि मुक्त्वार्थरूपतां ।
तस्मात् प्रमेयाधिगतेः साधनं मेयरूपता,, ॥

इति । अत्रापि किमात्मप्रकाशादर्थप्रतिबिम्बप्रकाशोऽन्यस्तदात्मक एव वा, अन्यत्वेऽर्थवत् प्रोक्त एव दोषः, अनन्यत्वे तु ग्राह्यग्राहकभेदस्य परमार्थतोऽसंभवेन स्वप्नादिप्रत्ययवत् कल्पितत्वात्, ततोऽर्थस्याव्यवस्थितेः, कादाचित्कप्रत्ययानुपपत्तेः । स्वप्नादाविव वासनाद्युपपत्तेरर्थानुमितौ व्यभिचारादर्थशून्यत्वेनापि क्रमेणानेकाकारप्रकाशान्यथानुपपत्त्या नैरात्म्यमेव, यदुक्तम्,

“अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः* ।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते,, ॥

अत्राप्याचार्य आह ।

(६) अर्थस्यापि नचाभावो यतोऽयमनुभूयते ।

न केवलमात्मशून्यतापक्षः प्रत्यक्षनिराकृतो, यावदर्थशून्यतापक्षोऽपि, इत्यपिशब्दार्थः, तदाह, यतोऽयमर्थोऽनुभूयतेऽनुभवेन बहिर्देशसंबन्धितया प्रकाशत इति, ग्राह्यग्राहकद्वयप्रकाशोऽनुभवसिद्ध इत्यर्थः । नहि प्रकाश एव प्रकाशकात्मा । तस्य तत्प्रकाशकत्वेन प्रत्ययूपतया ततो भेदेनावभासनादित्युक्तम् । आत्मपरभावानुपपत्तेः सर्वव्यवहाराभावश्च । “सत्यम्, परमार्थतोऽसत्य एवायं ग्राह्यग्राहकव्यवहारो वैकल्पिक,, इति चेत्, कुत एतत्, “पूर्वोक्ताद्बाधकात् प्रमाणा,,दिति चेन्न, तस्याप्येवमसिद्धेः, द्वैतनिबन्धनत्वाद् बाध्यबाधकभावस्य । “तदपि परमार्थतः स्वात्मविषयमेव ततोऽर्थाद्भेदव्यवच्छेदक,,मिति चेत्, सत्यं, यदि तथानुभूयेत, भिन्नविषयमेव त्वनुभूयते । “अभेदे वा प्रामाण्याभावो, विकल्पादिज्ञानानामपि, बाह्यासंभवेन स्वात्मविषयत्वात्,, सत्यम्, नीलमहं वेद्मीति द्वयप्रतिभासात् तु तेषामप्रमाणता । “तर्हि प्रतिभाससमानत्वाद्

*—सनिदर्शनैः, इति पाठान्तरम्

Digitized by Google

द्वयमद्वयवत् सत्यमेव, असत्यत्वे हि प्रतिभासानुपपत्तिरसतो भासनायोगात्, नाज्ञानात्मनोऽवभासनमुपपद्यत, इति हि भवतां कृतान्तः,,। सत्यम्, स्वप्रतिभासेऽनर्थेऽर्थाध्यवसायेन प्रवृत्तेः। "तस्याप्रामाण्य,,मिति चेत्, असत्यत्वे एवैतत्, स्वप्रतिभासे स्वस्य ग्राह्यात्मनि ग्राहकात्मवत् प्रकाशरूपतया प्रमाणरूपतैवेत्यद्वैतानुपपत्तिः न, "तस्याप्यद्वयविषयत्वात् परमार्थत,, इति चेत्, तर्हि निर्विकल्पादविशेष इति विकल्पाभावात् संसाराभावः, सर्वो विकल्पः संसार इत्यभ्युपगमात्। न,"स्वात्मन्यप्यद्वये द्वयाध्यवसायेन प्रवृत्तेर्विकल्पते,,ति चेत्, स्वात्मन्यस्याविकल्पत्वाद्, विकल्पत्वेऽपि द्वयस्याध्यवसेयत्वाज्ज्ञानरूपतैवेति कथमसत्यता। "ततोऽर्थक्रियानवाप्ते,,रिति चेत्, दुःशिक्षितमेतद्बाह्यार्थवादिभ्यः, विज्ञप्तिमात्रसत्यत्वे त्ववबोधव्यतिरेकेण काऽन्यार्थक्रियेति स्वप्नद्विचन्द्रादीनामपि नासत्यता, नहि प्रतिभातमप्रतिभातं भवतीति न्यायात्, "अवबोधान्तरजनन,,मिति चेत्, तदपि तेषामस्तीति नासत्यता। "वासनास्थैर्यानुबन्धेन प्राबन्धिकी स्थिति,,रिति चेत्, तद्दर्शनादिवासनानुबन्धित्वाद्विकल्पज्ञानप्रतिभासात्मनः प्रबन्धप्रवृत्तस्य द्वयस्यैव सत्यता, न युष्मत्परिकल्पिताद्वयस्येति न विरुद्धत्वं, "ननु पूर्वापरपरामर्शात्मकत्वेनासंनिहितार्थभेदावभासाद् विकल्पानामसत्यार्थते,,ति चेत्, यद्यसंनिहितोऽसत्त्वात् कथं भासेत, भासते चेदद्वयवत् सत्य एव। बोधात्मकत्वमेव भवतां सत्त्वं, यतो न बाह्यार्थवादिनामिव, ततोऽन्यदर्थक्रियाक्षमत्वमित्येवंप्रकारमत्रोच्यमानमसाधनं, बाह्यार्थवादिनामेवास्य साधनत्वात्। "ग्राह्यग्राहकयोः परनिष्ठत्वात् स्वरूपानवस्थितेरसत्यत्व,,मिति चेत्, कार्यकारणयोर्वा कथं सत्यत्वं। "तयोरपि ने,,ति चेत्, तर्हि भावनाभ्यासाद्धिहेत्वभावादद्वयविज्ञप्तिसंततेरपि देशकालप्रकृतिनियमायोग इति सर्वमसमञ्जसम्। अथ "परापेक्षाव्यवहार्यस्य विशिष्टस्यैव रूपस्य तयोरवस्थानाददोष,, इति, तदितरत्रापि समानमिति नासत्यता। "बाह्यार्थवादिभिरसत्यार्थत्वेन विकल्पस्याभ्युपगमा,,दिति चेद्, व्यभिचारी हेतुः, तदभ्युपगमस्य भवद्भिर्बाधितत्वात्, अत्र बाधनेऽपि तत एवाद्वैतासिद्धिर्द्वयस्यैव तत्र प्रतिभासनात्। "द्वयस्याभिधानमात्रमेवं रूपत्वाद्विकल्पस्य, न तु प्रतिभासो,येन सत्यताप्रसङ्ग,, इत्यभिनवशाक्याः, तदयुक्तम्, मनोराज्याद्यवस्थासु ज्वलद्भास्वरादेर्विकल्पाकारस्याग्न्यादिविकल्पेष्वनुभवात्। नचानुभवमपहृत्य व्यवस्था, व्यवस्थात्वमासादयतीत्युक्तम्। "ग्राह्याकारोऽवभासोऽसा,,विति चेत्, न, तस्य विकल्पाकाराभेदात्, भेदे वा गच्छतस्तृणादिज्ञाताकाराणामिव विज्ञानाव्यतिरेकेण स्वसंवेद्यतया व्यवसायविषयत्वाभावात्, यदाहुः,

"यैर्यन्निश्चीयते रूपं तत् तेषां विषयः कथम्,,।

इति। "ननु विकल्पाकारस्यात्मत्वेनासत्यतया बाह्यत्वेन च व्यवस्थानुपपत्तेरसंभव,, इति चेत्,यद्येवं व्यवस्थानुपपत्तिरेवास्तु,नाऽसंभवोऽनुभूयमानत्वात्,भवेद्वा काचिद् व्यवस्थेति तद्रूपतयैव,यदुक्तं,जरत्सौगतैः,

"न विकल्पानुविद्धस्य स्पष्टार्थप्रतिभासिता,,।

इति।

"विकल्पो वस्तुनिर्भासाद्विसंवादादुपप्लवः।
प्रत्यक्षाभः,, इति च।

ततो विकल्पस्यापि प्रतिभासनात्,प्रतिभासमानतयैव सत्त्वाद् द्वयमेव सत्यमित्यद्वैतासिद्धिः,"तर्हि निर्विकल्पके तत् सेत्स्यति,,न,तस्यापि तथैवोपलम्भादित्युक्तम्,यदाहुः,शब्दकणिकादौ विततमतयः,।

"अन्तस्तत्त्वबहिस्तत्त्वरूपं युगलकं तु तत्।
प्रतिपत्ता भवेत् किंचित् किंचित् कश्चित् तु वस्तुतः,, ॥

इति। ततश्चा"विभागोऽपि बुद्ध्यात्मे,,त्येतदप्ययुक्तमेव, नन्वेवमपि ग्राह्यग्राहकात्मना द्वयरूपं विज्ञानमेव सिध्यति, न ग्राह्यस्यार्थता, यदाह,

"नान्योऽनुभाव्यो बुद्ध्यास्ति तस्या नानुभवोऽपरः।
ग्राह्यग्राहकवैधुर्यात् स्वयं सैव प्रकाशते,, ॥

इति। न,ज्ञानवैलक्षण्येनार्थतया विशिष्टार्थक्रियासाधनत्वेनार्थ्यमानतया च, तस्य प्रतिभासनात्,तत्प्राप्तावेव चार्थक्रियासिद्धेः,तदप्राप्तौ त्वयथार्थत्वं शुक्तिकारजतादिज्ञानानामिति कथमस्य नार्थता, तदनभ्युपगमे तु दानादेर्हिंसात्मनश्च धर्माधर्मात्मनः कर्मणोऽसिद्धेर्लोकायत एवोपास्यो भवताम्। "ज्ञानाकारविषयत्वादेवमादेरदोष,,इति चेत्, तर्हि मनोराज्यादौ बहुतरायर्थाहरणदानादीनि शुभानि शत्रुवधादीनि च हिंसात्मकानि कर्माणि सिद्धानि स्युरिति। को हि नाम बहुतरक्लेशसाध्येषु सेवाकृष्यादिषु गजतुरगशस्त्रादिषु साधनेषु प्रवर्तेतेत्यनुभवविरोधः, "तान्यपि विशिष्टज्ञानप्रतिभासात्मकान्येवे,,ति चेत्,न,अर्थाभावेन तद्वैशिष्ट्यासिद्धेर्न किंचिदेतत्। इतः परं परोपकारश्च धर्मो जिनस्याप्येवं न संभवति, परासंवेदनात्, "सर्वज्ञत्वादस्य नैष दोष,, इति चेत् स्वप्नादाविवास्यापि स्वाकारमात्रसंवेदनात् किंचिज्ज्ञतैवास्मिन् पक्षे न संभवति, कुतः सर्वज्ञता,"न, अधिपतिप्रत्ययत्वेन सर्वस्य वेदना,,दिति चेत्,कोऽयमधिपतिप्रत्ययो नाम, संनिहितमात्रतैव, संनिहितोऽत्रार्थो न वेति, जात्यन्धेनेव कथं तेन गम्यते, नचैतदस्माभिः शक्यमवस्थापयितुं, यदाहुः शाक्यप्रवराः, भगवतां तु सर्वार्थप्रतिपत्तिरचिन्त्येति, अत्यल्पमिदमुच्यते, सर्वमचिन्त्यं ह्यविदुषां, विदुष एवात्राधिकारात्, "आकारद्वारेण वेत्ती,,ति चेत्,

Digitized by Google

कोऽयं द्वारद्वारिभावः, तस्य स्वाकारमात्रवेदनतः स्वभावविप्रकृष्टेष्विवास्मदादीनामर्थेष्वनुत्पन्नप्रतिपत्तित्वात् । "वस्तुतोऽर्थजन्यत्वात् तत्प्रतिभासस्य, तस्य च यथार्थवेदनादस्ति द्वारद्वारिभाव,,इति चेत्, तर्ह्यस्त्यर्थानुभवः"। "न साक्षादपि त्वेवमर्थानुमानेने,,ति चेत्, न, तस्यापि ज्ञानत्वात् स्वाकारमात्रवेदनेन तद्विषयत्वानुपपत्तेः । "तर्हि निर्मलत्वात् स्वज्ञानशक्त्यैव सर्वं बाह्यं वस्त्वसौ जानाती,,ति चेत्, यद्येवमनिर्मलत्वादन्येषामसर्वार्थविषया तद्वदेव निराकारा सा भविष्यतीति नार्थाभावः, "अस्तु वैभाषिकमतस्यैव मुख्यत्वा,,दिति चेत्, ततश्च नान्योऽनुभाव्यो बुद्ध्यास्तीति, एतदयुक्तमिति शून्यवादनिरासः ।

"ननु भवतामप्यर्थवेदनस्यात्मवेदनादभेदात्, तस्य च प्रत्यर्थं भेदाभावादर्थानुभवो नोपपद्यत, इति प्रोक्तनये नैव प्रसङ्ग इत्युक्तं,,न, संनिहितार्थप्रकाशकत्वात्, संनिहितार्थप्रकाशकत्वं ह्यात्मनः स्वभावः, प्रदीपादेरिव तथानुभवात् सिद्धः, तथाहि,यो यः संनिहितोऽर्थस्तं तं स्वशक्त्यैव प्रकाशयन्नयमनुभूयत इति,, कुतोऽर्थविशेषासिद्धेरेव प्रसङ्ग इति । "ननु कथमेतदुपपद्यत,,इति, तदयुक्तं नहि दृष्टेऽनुपपन्नं नाम, नह्य"ग्निर्दहति नाकाश,,मित्यत्र तथा दर्शनादन्यदुपपत्तिकारणं शक्यं वक्तुम्, अथ कस्तस्य संनिहितेनार्थेनोपकारः कृतः,न कश्चित्, कथं तर्हि तमेव प्रकाशयति, तथा स्वभावत्वादित्युक्तम् । उपकारेऽपि तदस्वभावस्य प्रकाशकत्वादृष्टेः "ननु तदसंनिधौ तर्हि तदप्रकाशनात्मस्वभावोऽस्यास्ती,,ति,न,कुत,-स्तत्स्वरूपाभेदात्, स्वरूपं ह्यस्यार्थप्रकाशात्मकत्वेनाविभिन्नरूपं सर्वदा विकल्पातीतं प्रकाशत इत्युक्तम् । तर्हि कथं न प्रकाशयत्यर्थं, तस्यासंनिधानात्, संनिहितप्रकाशको हि कथमसंनिहितं प्रकाशयेत्, कस्तर्हि नीलप्रकाशात् पीतप्रकाशस्य भेदः, न कश्चिद्,युगपत् प्रकाश इव, तत्र हि तयोर्भेदविशेषाभावात्, तदवयवभेदेनापि भेद इति प्रतिपरमाणुभेदतश्चित्रपटादिप्रतिभासाभावप्रसङ्गः, नच विकल्पघटितं तदिति वाच्यम्, उद्घाटितनेत्रस्य झटित्येव युगपत् तदवभासनात्, तदानीं च विकल्पासंभवादसंवेदनाच्च, यदुक्तम्, "न चेमाः कल्पना अप्रतिसंविदिता एवोदयन्ते व्ययन्ते वा,येन सत्योऽप्यनुपलक्षिताः स्यु,,रिति। विकल्पज्ञानस्याप्येकत्वात् कथमनेकात्मकश्चित्रावभासः । तद्यथा तत्र नीलपीताद्यनेकप्रकाश्यभेदेऽप्यनुभूयमानस्यैकस्य ज्ञानात्मनो न भेदो, नच तदभेदात् तस्य नीलपीतादेरर्थभेदस्यासिद्धिरेकस्यानेकप्रकाशनशक्तिसिद्धेर्भवद्भिरपीष्टत्वात्,, तथा क्रमप्रकाशेऽप्यनुभवसिद्धस्यैकस्यैव प्रकाशात्मनोऽनेकप्रकाशनशक्तियोगात् क्रमव्यवस्थितानेकप्रकाशकत्वमनुभवसिद्धमेष्टव्यं । नच तदभेदादर्थभेदासिद्धिदोषः, नहि दिक्क्रमावभासात् कालक्रमावभासस्य प्रकाशात्मनि कश्चिद्भेदोऽनुभूयत इति । "ननु दिक्क्रमप्रकाशे प्रकाशात्मनो भेदासंवेदनात् प्रदीपादेर्वर्तिदाहतैलशोषप्रकाशस्वज्ञापनजननादिविवेककस्यानेककार्यकर्तृत्वेन विरोधाभावा,च्छक्तीनां समुच्चयो न विरोधः, कालक्रमे तु प्रकाशशक्तीनां परस्पराभावरूपत्वेन घटपटादिशक्तीनामिव भेदाद्वस्तुभेदकत्वं, यदाहुः, "शक्तिर्हि भावाभावाभ्यां भिद्यमाना वस्त्वपि भिनत्ति न पुनः कार्यभेदेने,,ति । तदयुक्त,मसिद्धत्वात्, नहि तत्रापि शक्तेर्भावाभावभेदोऽस्ति, सर्वदैकरूपस्यैव प्रकाशात्मनोऽनारोपितरूपस्य संवेदनादित्युक्तम् । नच "कार्याभावाच्छक्तेरभावो, नावश्यं कारणानि तद्वन्ति भवन्तीतिन्यायात्,, तदत्रापि वस्तुभेदासिद्धेस्तच्छक्तीनां समुच्चय एव युक्तो, न विरोधः। अपिच परोक्षस्य धर्मिणः कार्यभेदादिन्द्रियादेरिव शक्तिभेदतः स्वरूपभेदेन प्रत्यक्षसिद्धाभेदस्य तस्य हि प्रदीपादेरिवैकस्यानेककार्यकर्तृत्वेन भवद्भिरपीष्टत्वात् प्रत्यक्षसिद्धाभेदत्वादित्युक्तम् । अतो न तस्यापि शक्तिभेदाद्भेदः कल्पयितुं युक्त इति, युगपत् प्रकाश इव न क्रमप्रकाशेऽप्यर्थभेदासिद्धिः । "कथं तर्हि ।

"घटज्ञानमिति ज्ञानं पटज्ञानविलक्षणं ।
घट इत्यपि यज्ज्ञानं विषयोपनिपाति तत्,, ॥

इत्यादिलौकिकज्ञानभेदः,, । न,ग्राहकात्मभेदात्, तस्य सर्वदैकरूपभेदप्रकाशात्मतया संवेदनात्, अपित्वध्यवसायभेदात्, अध्यवसाय एव च ज्ञानं बुद्धिगुणत्वाज्ज्ञानस्य,यदुक्तम्,

"बुद्धिरष्टगुणा स्मृता
लक्ष्यतेऽध्यवसायेन,, ।

इति दर्शयिष्यामः । एवं बुद्धेत्यपि प्रतिज्ञापदं व्याख्यातमिति ॥

॥ परमेश्वरो जयति ॥

आसीत् खलु भोजराजमहीपालसमकालिकसूर्यनामधेयक्षत्रियकिशोरस्वकीर्तिकदम्बधवलितदिगन्तवृन्दविद्वद्गुणगणविवेकसहृदय,हरिहरपदाभिधेयभूभर्तृसभायामनेकविद्याकुशलः कविकुलावतंसो दाक्षिणात्यभूसुरो दिवाकरसूरिसूनुर्लोलिम्बराजो नाम । अनेन च प्राप्तयौवनदशेनापि निरपत्यस्वज्येष्ठभ्रातृकृतसुतनिर्विशेषलालनेन चिरकालं विद्यामनभ्यस्यता विषयासक्तमनस्कतया क्षिप्रचित्तेन भोजनसमय एव सदनमुपसर्पता धनार्जनार्थं देशान्तरेषु भ्राम्यतोऽग्रजस्य वियोगभरसंतप्यमानसतत्पत्नीकरापहृतभोजनपात्रेण याहि दुर्विनीत विकलमियत्कालं परिपोषितोऽसीति श्रुतहृदयभेदिदुर्वचसा तथा व्यथादि, यथा विहायाखिलविषयानतिचिरसमयमधिकदत्तचित्ततयातिकष्टेन विविधविद्यासंपत्त्यर्थं सप्तशृङ्गेति प्रसिद्धवविश्वदिग्भूधरोपरिविराजमानाष्टादशभुजमहिषासुरमर्दिनीसे-

वचमात्तबहलविश्वासमकारि । येन, निजजननिखिलमनीषितपूरणकरणवृढव्रतजगदम्बिकाकृता तथास्त्वितिवाक्यव्यञ्जिता प्रसन्नतानेन स्वल्पेनैवानेहसासादीति जनश्रुतिः । ततः प्रभृत्येकघटिकान्तरालमुत्तमकाव्यपरिगणनीयशतपद्यनिर्माणसामर्थ्यभागभूत् । तथा च तत्कृतवैद्यजीवनगतपद्यम्,

रत्नं वामदृशां दृशां सुखकरं श्रीसप्तशृङ्गास्पदं
स्पष्टाष्टादशबाहु तद्भगवतो भर्गस्य भाग्यं भजे ।
यद्भक्तेन मया घटस्तनि घटीमध्ये समुत्पाद्यते
पद्यानां शतमङ्गनाधरसुधास्पर्धाविधानोद्धुरम् ॥ १ ॥

इति । न केवलमेतावदेव किंतु नानाविद्यापारावारपारीणतापि तथा च तत्रैव,

आयुर्वेदवचोविचारसमये धन्वन्तरिः केवलं
सीमा गानविदां दिवाकरसुधाम्भोधिच्छियामापतिः ।
उत्तंसः कविताकृतां मतिमतां भूभृत्सभाभूषणं
कान्तोक्त्याऽकृत वैद्यजीवनमिदं लोलिम्बराजः कविः ॥ १ ॥

इति । भोजराजसंलापपद्येनास्य तत्समयजीवनमवसीयते, तत् पद्यं यथा,

भो लोलिम्बकवे कुरु प्रणमनं किं स्थाणुवत् स्थीयते
कस्मै भोजनृपाल बालशशिने नायं शशी वर्तते ।
किं तद् व्योम्नि विभाति चास्तसमये चण्डद्युतेर्वाजिनः
पादच्छायामिदं जवाद्विगलितं खे राजतं राजते ॥ १ ॥

इति च । अथ प्राप्तभगवतीप्रसादोऽयमतिचमत्कृतिकारिकाव्यामृतधाराप्रसारशक्तिमान् मनोहरान् काव्यवैद्यकनिबन्धान् प्रणिनायेति । तत्र वैद्यके सुप्रसिद्धं वैद्यजीवनं नामैकमपरश्चवैद्यावतंसो नाम । काव्येषु तु केवलमस्य महाविपश्चितो नन्दसद्मप्राप्तिमारभ्योद्धवसंदेशपर्यन्तं हरिलीलावर्णनपरं हरिविलासनामकमुपमोत्प्रेक्षारूपकादिरमणीयालंकारभूषितमेकमेव नातिप्रसिद्धं कोविदजनमनोविनोदक्षममुपलभ्यते । मया च महता प्रयासेन छिन्नं पुस्तकमस्य कथंचिदासादितम् । तच्चेदं काव्यं सुधीधीरञ्जनायातिचमत्कृतमितीह काशीविद्यासुधानिधौ प्रकाश्यत इत्यलमनल्पजल्पितेनेति शमिति ।

॥ सांख्यशास्त्राध्यापको वेचनरामशर्मा ॥

॥ श्रीगणेशाय नमः ॥

॥ अथ हरिविलासकाव्यम् ॥

रचयति सहसा यच्चित्रमेतत् प्रपञ्चम्
प्रशमयति च तद्वत् केनचित् कौतुकेन ।
अविदितमपरैस्तच्चण्डमुण्डादिनाना-
दनुजदलनदक्षं शर्वसर्वस्वमव्यात् ॥ १ ॥

यदपि मत्कविता गुणवर्जिता
तदपि साधुसुखाय भविष्यति ।
इह निमित्तमिदं यदुदीर्यते
हरिकथा कलिकल्मषनाशिनी ॥ २ ॥

रे रे खलाः शृणुत मद्वचनं समस्ताः
स्वर्गे सुधास्ति सुलभा ननु सा भवद्भिः ।
कुर्मस्तदत्र भवतामुपकारकारि
काव्यामृतं पिबत तत् परमादरेण ॥ ३ ॥

सुरासुरानुग्रहनिग्रहार्थम्
कृपावहं विग्रहमाददानः ।
श्रीकेशवः शैशवमेत्य नन्द-
गोपालगेहाभरणीबभूव ॥ ४ ॥

अङ्घ्रिपल्लवरुचानुरञ्जिता
रिङ्गतो भगवतो मुरद्विषः ।
अङ्गणेषु निहिताः सितोपलाः १
पद्मरागपदवीं प्रपेदिरे ॥ ५ ॥

परिस्फुरत्कैरवकोशकल्पः
कृष्णस्य पाणौ नवनीतगोलः ।
नीतां श्रियं याचितुमाननेन
समागतश्चन्द्र इवाबभासे ॥ ६ ॥

भगवति यदुनाथे नन्दसद्मावतीर्णे
फलदलमुकुलश्रीः शाखिनां सर्वदासीत् ।
प्रतिदिनमधिकाभूद्गोधनानां समृद्धिः
क्षणमपि न बबाधे व्याधिराधिश्च कंचित् ॥ ७ ॥

सुकृतं किमकारि नन्दपत्न्या
किमु नन्देन वयं न तत् प्रतीमः ।
विजहार जगद्गुरुर्यदङ्के
नवपङ्केरुहलोचनो मुकुन्दः ॥ ८ ॥

मुहुरिति विलपन्तौ क्व सुतः प्रयातो
द्रुतगति बहिरन्तः पर्यटन्तौ समन्तात् ।
मरकतमणिमह्यां नाविदन्नन्दपत्नी
स्फुटमपि घनकृष्णं बालकृष्णं कदाचित् ॥ ९ ॥

कस्याश्चिदालिङ्गितबालकायाः २

---

१ निचिताः सिताः शिलाः, इति पाठान्तरम् ।

२—माधवायाः, इति पाठान्तरम् ।

प्रतिप्रतीकं रसनिर्भरायाः १ ।
कस्तूरिकालिप्तमिव प्रकामम्
वक्षो मृगाक्ष्याः सुषमाचमासीत् ॥ १० ॥
मृगमदतिलकोऽस्य क्रीडतो घर्ममध्ये
व्यरुचदमलसान्द्रस्वेदबिन्दून्तरस्थः ।
उडुभिरिव निरुद्धो वक्त्रनक्षत्रभर्तुः
कलितगिलनशङ्कः सैंहिकेयः समन्तात् ॥ ११ ॥
नन्दश्चिदानन्दमयस्य तस्य
मायानुरूपस्य परावरस्य ।
आलिङ्गनाद्यत् सुखमापदन्त-
स्तज्ज्ञानभाजोऽनुभवन्ति नान्ये ॥ १२ ॥
कन्दुकद्वयमतीव सुन्दरं
राधिकोरसि निरीक्षितं मया ।
रन्तुमम्ब मम तत् प्रदीयताम्
स ब्रुवन्निति बहूनहासयत् ॥ १३ ॥
निर्गुणोऽपि गुणिनामगोचरैः २
स्वैर्गुणैर्जगदिदं चराचरम् ।
मोहयन् विजयते स्म गोकुले
गोपिकामसृणतस्करो ३ हरिः ॥ १४ ॥
गोकुलान्निकट एव देवकी-
बालको त्रिभुवनैकपालको ।
लीलयानुचरवर्गवत्सलो
वत्सलोल्यवशतो विचेरतुः ॥ १५ ॥
शयनाशनाध्वगमनाममीतम्
कुरुतः स्म नन्दतनुजो मनुजेन्द्रौ ।
सह सर्वकालमिह किं नु विचित्रम्
वपुरेव भिन्नमुभयोर्न तु चेतः ॥ १६ ॥
पूतना हरिवधार्थमाययौ
प्राप सैव वधमात्मनस्ततः ।
यः परस्य विषमं विचिन्तयेत्
प्राप्नुयात् स कुमतिः स्वयं हि तत् ॥ १७ ॥
धरस्य धरणात् करे वनहुताशनप्राशनात्
अरिष्टबकधेनुकप्रभृतिदानवध्वंसनात् ।
इहाद्भुतमनुक्षणं शिशुरसौ सरोजेक्षणः
क्षणक्षणविलक्षणो ललितलक्षणो व्यातनोत् ॥ १८ ॥
उज्झितस्वतनया व्रजस्त्रियः
कृष्णमेव रमयांबभूविरे ।
चित्रमत्र किमु कुर्वते सदा
तत्स्पृहामपि गतस्पृहा जनाः ॥ १९ ॥
द्वारदत्तदृष्टिरसकृन्मधुसूदनोऽसौ
सद्म प्रविश्य बुभुजे मसृणं समस्तम् १ ।
स्नानादिकर्मकरणाय कलिन्दकन्याम्
माद्यन्मतंगजगतासु गतासु तासु ॥ २० ॥
समीक्ष्य समुपागतां सपदि सद्मनः स्वामिनीं
पलायनपरायणः स नवनीतचोरोऽभवत् ।
रुषा तमनुयायिनी न भवति स्म धर्तुं क्षमा
घनस्तनपरिश्रमादलसगामिनी कामिनी ॥ २१ ॥
असकृत्प्रवर्तितकराम्बुरुह-
स्तदुपद्रुतो द्रुतमुपेत्य रुषा ।
इति नन्दगोपगृहिणीमवद-
द्व्रजवासिवामनयनानिकरः ॥ २२ ॥
अनुचितानि वचांसि वदत्ययं
क्षिपति वक्षसि चैष २ लघूपलान् ।
अपि च पश्यति कैतवचक्षुषा
अतनयस्तनयस्तव सर्वथा ॥ २३ ॥
अस्मासु यातासु बहिः प्रयत्नाद्
गृहान्तरं तस्करवत् प्रविष्टः ३ ।
सुतस्तवायं नवनीतदुग्ध-
दधीनि भुङ्क्ते व्रजपालपत्नि ॥ २४ ॥
दत्ते सखिभ्यश्च बहिःस्थितेभ्यः
पात्राणि सर्वाणि भिनत्ति पश्चात् ।
अन्यायमेतादृशमातनोति
सदा मदान्नैष बिभेति किंचित् ४ ॥ २५ ॥

---

१ प्रचुरोत्सवायाः, इति पाठान्तरम् ।
२—मतिभिर्मैः, इति पाठान्तरम् ।
३ [illegible], इति पाठान्तरम् ।

१ नवनीतजातम्, इति पाठान्तरम् ।
२ उरसिजेषु, इति पाठान्तरम् ।
३ प्रविश्य, इति पाठान्तरम् ।
४ कंचित्, इति पाठान्तरम् ।

Digitized by Google

एवं गोपीवाक्यमाकर्ण्य सम्यक्
ताः प्रत्याह प्रेमपूर्वं यशोदा ।
एतत् सर्वं मन्निमित्तं क्षमध्वम्१
यूयं यात स्वं गृहं भो सुवृत्ताः ॥ २६ ॥
इत्थं प्रसादं गमितासु सद्यो
गृहं गतासु व्रजवल्लभासु२ ।
सुतं समालिङ्ग्य भयावलीनम्
जगाद किंचिज्जननीजनाग्र्या३ ॥ २७ ॥
किमिति गच्छसि वत्स परालयम्
स्वगृह एव रमस्व निरन्तरम् ।
तव ददे मसृणानि दधीन्यहम्
गतवयांसि पयांसि बहून्यपि ॥ २८ ॥
इति तव चरितं निशम्य दुष्टम्
दुरितपथैकपराङ्मुखो व्रजेन्द्रः ।
अपि सुत यदि ताडनं विदध्या-
दहह तदा किमहं चरीकरीमि ॥ २९ ॥
अतिदुष्टकंसनृपसाध्वसयोगा-
दिति शिक्षितोऽपि बहुधा जनन्या ।
पुनरप्यचूचुरदसौ नवनीतं४
न परोदितं हि कलयन्ति कुमाराः ॥ ३० ॥
नानागुणैरवनिमण्डलमण्डनस्य
श्रीसूर्यसूनुहरिभूमिभुजो नियोगात् ।
त्रैलोक्यकौतुककरं क्रियते स्म काव्यम्
लोलिम्बराजकविना कविनायकेन ॥ ३१ ॥

इति श्रीमत्सूर्यपण्डितकुलालंकारश्रीहरिहरमहाराजाधिराजोद्द्योतितलोलिम्बराजकृते हरिविलासे महाकाव्ये कृष्णबालक्रीडावर्णनं नाम प्रथमः सर्गः ॥ १ ॥ ;: ॥

नन्दः स्वनन्दनमवेक्ष्य वयोविशेष-
शोभायमान*वपुषं बहुयुक्तियुक्तः ।
वृन्दावने बहुलबाललता१भिरामे
रामेण सार्धमव मास्तनयेत्यभाणीत् ॥ १ ॥
ततः पुरस्कृत्य समस्तगोधनम्
कलिन्दकन्यातटकाननस्थलीम् ।
प्रभातकाले सखिसंघसंवृतः
समाजगामागमदुर्गमो हरिः ॥ २ ॥
विदलिताखिलपान्थपरिश्रमम्
सुवयसां वयसां कलकूजितैः ।
प्रविशति स्म वनं पशुजीवनं
बहुबलेन बलेन समं हरिः ॥ ३ ॥
वेणीव भूमृगदृशः स्फुटफेनबिन्दु-
श्रेणीच्छलेन धृतजातिलताप्रसूना ।
आलोकिता सखिजनेन समं मुहूर्तम्
निःपक्ष्मपातममुना यमुना पुरस्तात् ॥ ४ ॥
तदवलोक्य विलासकलोचितम्
पवननर्तितवल्लि समन्ततः ।
स्तबकचारुविचित्रमहीरुहम्
प्रचुरमार*रमारमणः सुखम् ॥ ५ ॥
तडिदम्बरमम्बुदाभिरामम्
कृतकर्णाभरणं मयूरपिच्छैः ।
मधुराधरशालिवंशवाद्यम्
जगदाद्यं परमं मह२श्चकासे ॥ ६ ॥
उपरि मुरलिकायाः प्राप्तबिम्बाधरायाः
करकमलनखास्ते बालकृष्णस्य तस्य ।
निबिडमिव निखाता दन्तवस्त्रांशुमाला-
मिलनबहलरागाः पद्मरागा विरेजुः ॥ ७ ॥
अपि प्रचुरलालसा मधु मधुव्रता नापिबन्
मुखात्तमपि नूतनं तृणचरास्तृणं नाचरन् ।
मुरारिमुरलीस्वरामृतरसैकबद्धादरा
न हंसपिककेकिनः किमपि कूजितं चक्रिरे ॥ ८ ॥
त्रिभुवनजनसम्भ्रमणप्रवणो

१ क्षम्यतां प्रार्थयेऽहं, इति पाठान्तरम् ।
२—गामिनीषु, इति पाठान्तरम् ।
३ स्वानन्दपीनं जननी जगाद, इति पाठान्तरम् ।
४ मसृणान्यचूचुरदसौ भयहीनो, इति पाठान्तरम् ।
* [illegible], बोध्यः ।

१—तृणा—, इति पाठान्तरम् ।
* आप, इत्यर्थः ।
२ परमं गोपवपुर्मह— इति पाठान्तरम् ।

Digitized by Google

न भुजंगभुजो * बुभुजे भुजगान् ।
निकटेऽपि गतागतकेलिकरान्
मकरानपि नैव बकप्रकरः ॥ ९ ॥
तुङ्गपीनकुचकुम्भशोभिता-
द्वक्षसःस्खलितचेलपल्लवाः ।
वेणुनादहृतचित्तवृत्तय-
श्चिचचचलदृशोऽवतस्थिरे ॥ १० ॥
गोदोहनादिगृहकृत्यकृतादराणाम्
नन्दव्रजाम्बुजसहोदरलोचनानाम् ।
वेणुस्वनो यदुपतेः स्मृतमात्र एव
वृन्दावनाभिगमनोत्सुकतां व्यतानीत् ॥ ११ ॥
संभाव्य सौभाग्यमदं मनःस्थ-
मन्तर्गतः सर्वचराचरस्य ।
अनङ्गरूपः क्षणमङ्गनाना-
मगोचरो गोकुलपालकोऽभूत् ॥ १२ ॥
प्रेम नात्मतनयस्य न त्रपा
भ्रातृभर्तृपितृजापि न त्रपा ।
भीतिरप्यहह मार्गभोगिनाम्
नैव तद्गमनविघ्नमातनोत् ॥ १३ ॥
भगवति सहसैवान्तर्हिते संज्वरार्ता
च्युतमतिरति१रस्यान्वेषणार्थं समन्तात् ।
शिव शिव वनमध्ये गोचरन्वेषचार-
ध्वतचरणतला स्त्रीमण्डली हिण्डते स्म ॥ १४ ॥
पप्रच्छ काचन वधूरिति कृष्णसारं
कृष्णः सरोजनयनो भवता न दृष्टः ।
तस्या विलोचनविलासपराजितोऽसौ
दुःखीव किंचिदपि नोत्तरयांचकार ॥ १५ ॥
भो भो भूरुह ते दिशो दश गताः शाखाः शिरश्चाम्बरम्
गोपः कोऽपि तमालकोमलरुचिः कच्चिन्न दृष्टस्त्वया ।
एवं ताभिरुदाहृतो बत मुहुर्वक्तुं वचोऽनीश्वरो
मूर्ध्ना वायुचलेन चन्दनतरुः प्रत्युत्तरं दत्तवान् ॥ १६ ॥
अयि तुलसि नमस्ते मुञ्च मौनं कृपातः

* इगुपधलक्षणः कः ।

१ अथ हृदि विदधाना विस्मयस्यावतारं गत-
मतिधृति— इति पाठान्तरम् ।

कथय कथय कृष्णः क्वाधुना वर्त्ततीति१ ।
भवति परमदुःखं तद्वियोगाग्निना मे
करुणमिति मुहुस्तां गोपिका काप्यवादीत् ॥ १७ ॥
बर्हं ग्रहीतुमवतंसकृतेऽन्तिके ते
प्राप्तो भवेद्विभुरसौ विदितस्त्वयैव ।
तत् कथ्यतां सुभग केन पथा प्रयातः
काचिन्मयूरमिति गोपगृहिण्यपृच्छत् ॥ १८ ॥
तटभुवि तरलाक्ष्यो लक्ष्यते यः समन्ता-
दिह वसति स धूर्तः शीघ्रमायात यूयम् ।
असकृदिति वदन्ती कामिनी कापि बालम्
बत कमपि तमालं गाढमालिङ्गते स्म ॥ १९ ॥
यो वासो यमुनातटे विरचितो यच्च२ द्विजास्तोषिता-
श्छायापल्लवसंश्रयैर्हिममरुद्वर्षादि सोढं च यत् ।
अत्रैवास्य फलं बभूव सकलं किंचित्कुचानम्रया
तन्वङ्ग्या यदये स्वयं दृढतरं दोर्भ्यां समालिङ्गितः ॥२०॥
अनवेक्ष्य तमीश्वरं समन्ता-
द्वचनागोचरदुर्दशाः स्त्रियस्ताः ।
यमुनापुलिनं प्रति प्रयाता
मधुमत्ता इव मौग्ध्यमावहन्त्यः३ ॥ २१ ॥
अथ ता मदनानलेन दग्धा
दिनदीनेन्दुमुखीर्दयासमुद्रः ।
समजीवयदच्युतः समस्ताः
सुदतीः स्वीय४समागमामृतेन ॥ २२ ॥
ताभिर्युक्तः पद्मपत्रेक्षणाभी
राकाराचिस्वामिरम्याननाभिः ।
तत्र प्रीत्या पुष्पधन्वेव साक्षा-
द्रासारम्भं चक्रपाणिश्चकार ॥ २३ ॥
तद्रासमण्डलविलोकनकौतुकेन
देव्यो ययुस्त्रिदशवर्त्म सुवर्णवर्णाः ।
उद्वीक्ष्य ता दृढमिदं निरटङ्कि लोके-
रभ्रं विनापि तडितः क्वचिदुल्लसन्ति ॥ २४ ॥
सकलरागविचित्रविचारवित्

१ वावसीति, इति पाठान्तरम् ।
२ ये च, इति पाठान्तरम् ।
३ भूतले निपेतुः, इति पाठान्तरम् ।
४ सौख्य—, इति पाठान्तरम् ।

सहजगाननिबद्धमृगीगणः ।
नटवदुत्सवकृद्व्रजवल्लभा-
व्रजगतो जगतो विभुराबभौ ॥ २५ ॥
निरयस्य निदानमुक्तमाद्यैः
कुलटात्वं मनसापि सुन्दरीणाम् ।
अमृताय बभूव तत् तु साक्षाद्
व्रजसारङ्गदृशां१ विचित्रमेतत् ॥ २६ ॥
रूपविभ्रमगुणोदयेन का
मेनकामपि न गोपिकाजयत् ।
केवला तदपि जीविताधिका
राधिका भगवतो हरेरभूत् ॥ २७ ॥
अपि परयुवतीभ्यः पापसंस्पर्शशून्यो
दधदपि मनुजत्वं सर्वदेवैकनाथः ।
अपि तनुतरमूर्तिर्व्याप्तलोकत्रयोऽसौ
नवजलधरधामा नन्दधामाजगाम ॥ २८ ॥
नानागुणैरवनिमण्डलमण्डनस्य
श्रीसूर्यसूनुहरिभूमिभुजो नियोगात् ।
त्रैलोक्यकौतुककरं क्रियते स्म काव्यम्
लोलिम्बराजकविना कविनायकेन ॥ २९ ॥

इति श्रीमत्सूर्यपण्डितकुलालंकारश्रीहरिहरमहाराजाधिराजोद्द्योतितलोलिम्बराजकृते हरिविलासे महाकाव्ये रासक्रीडावर्णनं नाम द्वितीयः सर्गः ॥ २ ॥ :: ॥

इत्थं विधायातिरसेन रास-
क्रीडां स वृन्दावनमध्यदेशे ।
इच्छाविहारी सह गोपगोभि-
र्गोवर्धनं गोधनमारुरोह ॥ १ ॥
तदवेक्षणलोललोचनम्
जगदानन्दकरं जगद्गुरुम् ।
तमुवाच विचारचञ्चुर-
श्चतुरं वाक्यमिदं हलायुधः ॥ २ ॥
विरचयन्ति विहारमिहान्वहम्
प्रणयिनीजनरञ्जितमानसाः ।
रुचिरचित्रविहंगमवारिजा-
कृतवनेषु वनेषु वनेचराः ॥ ३ ॥
अनुभवति वियोगं नात्र कोकः कदाचित्
कलयति सह सख्यं चम्पकेश्चञ्चरीकः ।
न विरमति विकासो नीरजानां रजन्याम्
जनयति जनचित्रं चन्दनः पुष्पयोगात् ॥ ४ ॥
तुङ्गत्वं नितरां निरीक्ष्य सहजं सौभाग्यमप्यद्भुतम्
रम्यांश्चापि मणींस्तथा प्रतिभटान् दिग्दन्तिनां दन्तिनः ।
अस्यानन्यसमस्य हन्त गिरयो लज्जाभराद्दुस्तरा-
न्मैनाकप्रमुखा निपेतुरुदधौ ये निस्त्रपास्ते स्थिताः ॥ ५ ॥
मुञ्चन्मदं निर्झरकैतवेन
जेजीयतेऽसौ करिराजरूपः ।
हेमाद्रिमुख्या गिरयः समस्ताः
ग्रावत्वमेतस्य विडम्बयन्ति ॥ ६ ॥
इह प्रतिवनं मदान्मुदिरकालकालं विना
नटप्रतिभटः सदा शिखियुवा नरीनृत्यते ।
द्विपाधिपविदारणारुणनखाग्रसंचारकृ-
न्मृगाधिपभयंकरी न न दरी दरीदृश्यते ॥ ७ ॥
इतस्तत इहार्थिनां प्रियपरंपरापूरणा१
जयन्ति जगतीरुहः सुरतरुद्रुहस्तत्क्षणात् ।
हरन्ति च शुकाः स्फुरत्प्रथमपल्लवालीरुचः
सुधामधुरबन्धुरध्वनिमुचः शुचः सुव्रवत् ॥ ८ ॥
समग्रऋतुसंपदा सततसंवृते सर्वतः
सुरैः सह सुराङ्गनावलिरिहैव संतिष्ठते ।
नच स्मरति तन्महामणिगणप्रभाभास्वरम्
प्रसन्नतरकन्दरप्रकरमन्दिरं मन्दिरम्२ ॥ ९ ॥
ये ये नृपाः प्रतिनृपालमहाभयेन
नानासमृद्धिसुभगानि पुराण्यमुञ्चन् ।
ते ते तपस्विन इवात्र निषेव्यमूल-
कन्दोदकानि समयं गमयन्ति तावत् ॥ १० ॥
क्रीडागृहन्ति लवलीलतिकानिकुञ्जा-
स्तल्पन्ति बालमृदुलारुणपल्लवानि ।

१—सत्यङ्गदृशां, इति पाठान्तरम्

१—पूरणाज्— इति पाठान्तरम् ।

२ स्मरत्यपि न सर्वथा सुभगकन्दरं मन्दरं
हरेरपि नचास्फुरत्कनकमन्दिरं मन्दिरम्
इति पाठान्तरम् ।

भोगाः प्रसुप्तफणिनामुपबृंहयन्ति
मज्जन्ति चात्र दृषदः कुलटाङ्गनानाम् ॥ ११ ॥
तपतपनमहोभिस्तापिते कुम्भयुग्मे
युवतिकुचयुगश्रीधारिणि प्रेरयन्ति ।
इह कति न करीन्द्राः १ पुष्करालंकृतायां
सरिति किमपि पीत्वा पुष्करैः पुष्कराणि ॥ १२ ॥
अस्मिन् कदम्बकलिकाकलितावतंसा
गुञ्जावलीवलितपीनपयोधराया ।
दृष्ट्येव २ कस्य वशिनो विषयानुषक्तम्
चित्तं चिरं वनचरी न चरीकरीति ॥ १३ ॥
इत्थं शृण्वन्स्तस्य वाणीविलासान्
पश्यन् रम्यश्रीशोभाविशेषान् ।
प्रीतिं प्राप्तो गोदुहां चक्रवर्ती
मन्दं मन्दं शैलमध्यारुरोह ॥ १४ ॥
स ततो विचरन्नितस्ततो
बलभद्रेण समं शनैः शनैः ।
करकङ्कणवद्वसुंधरा-
तलमालोकयति स्म माधवः ॥ १५ ॥
अलंकृते पुण्यपयःप्रवाहै-
र्विश्रान्तिदानोद्यतवृक्षवर्गे ।
सिद्धाश्रिते श्रीपतिचित्तवृत्ति-
स्तत्र प्रसादोदयमाससाद ॥ १६ ॥
गिरिराजममुं मनोरमं
मधुमुख्या ऋतवः समाययुः ।
अथ तस्य विधातुमर्चनम्
रुचिराभिः सुमनःसमृद्धिभिः ॥ १७ ॥
पुष्पाणि प्रथमं ततः प्रकटिताः स्वान्तोत्सवाः पल्लवाः
पश्चादुन्मदकोकिलालिललनाकोलाहलः कोमलः ।
इत्थं प्रादुरभूदुपेत्य ३ परितः प्राज्यप्रमोदप्रदः
प्रोद्दामद्रुमराजिराजितवनश्रेणीमृतुक्ष्मापतिः ॥ १८ ॥
प्रसूनकलिकाकुलैः किसलयैः करस्पर्धिभिः

१ इह मदवदिभेन्द्राः' इति पाठान्तरम् ।

२ दृष्ट्वेव' इति पाठान्तरम् ।

३ –त् प्रविश्य, इति पाठान्तरम् ।

स्फुरन्मधुमदभ्रमद्भ्रमरकोकिलाकूजितैः ।
इति क्रमसमुद्गतैरुपवनावलीमण्डली-
ममण्डयदिव प्रियामृतुवसुंधरावल्लभः ॥ १९ ॥
आरूढो मलयानिलद्विपवरं युक्तो विलासानुगैः
पीतः पुष्पविलोचनैर्नवलतापौराङ्गनानां गणैः ।
अभ्राम्यद्वनपत्तने मधुमहीपालस्ततः कोकिला-
लीलालापमिलद्भ्रमद्भ्रमरिकाझाङ्कारभेरीरवैः ॥ २० ॥
सुहृदस्तरुणीनखक्षतानाम्
प्रतिपक्षाः पथिकाङ्गनाजनानाम् ।
दहनद्युतिदस्यवः समन्तात्
विपिने किंशुककुड्मला विरेजुः ॥ २१ ॥
किंशुकक्षितिरुहां विलसन्तः
कुड्मलाः कुटिलतां कलयन्तः ।
पान्थवारणविदारणताम्राः
कामकेसरिनखा इव रेजुः ॥ २२ ॥
वारस्त्रीव वनस्थली नवनवां शोभां बभारान्वहम्
पान्थान् पीडयति स्म तस्कर इव क्रूरैः शरैर्मन्मथः ।
शृङ्गारः सगुणः क्षमापतिरिव प्राप्तः प्रतिष्ठां पराम्
रात्रिः स्वीकुरुते स्म मुग्धललनालज्जेव कार्श्यं क्रमात् ॥ २३ ॥
उपवनतरुनृत्याध्यापने लब्धवर्णो
विरचितजलकेलिः पद्मिनीकामिनीभिः ।
प्रियसुहृदसमेषोराशयो योगियोग-
स्थितिविदलनदक्षो दक्षिणो गन्धवाहः ॥ २४ ॥
प्राप्तः प्राच्यमिव श्रमं जलजिनीसौरभ्यभारं वहन्
उद्दामस्तबकानमन्नवलतालक्ष्मीमिवालोकयन् ।
स्वीकुर्वन्मदमन्थराणिव गतेर्वामभ्रुवां विभ्रमान्
मन्दं मन्दमुपाजगाम पवनः पाटीरवाटीतटात् ॥ २५ ॥
अतिमन्दचन्दनमहीधरजातम्
स्तबकाभिरामलतिकातरुजातम् ।
अपि तापसानुपवनं मदनार्तान्
मदमञ्जुगुञ्जदलिपुञ्जमकार्षीत् ॥ २६ ॥
कुपितापि मनःपतिना * सह का
सहकारविलोकनजातरसा ।

* अतिप्रियेणेत्यर्थः ।

Digitized by Google

तरसा रमते स्म न हा रमणी
रमणीयतनुः सुतनुः सुरभौ ॥ २७ ॥

प्रस्फुरत्प्रचुरबालपल्लवा
वीरुधश्च तरवश्चकाशिरे ।
क्रीडिता इव कुसुम्भवारिभिः
काममित्रसमये समागते ॥ २८ ॥

रूपसौरभसमृद्धिसमेतम्
चम्पकं प्रति ययुर्न मिलिन्दाः ।
कामिनस्तु जगृहुस्तदशेषा
ग्राहका हि गुणिनां कति न स्युः ॥ २९ ॥

कति कति न वसन्ते वल्लयः शाखिनो वा
किसलयसुमनोभिः शोभमाना बभूवुः ।
तदपि युवजनानां प्रीतये केवलोऽभू-
दभिनवकलिकालीभारशाली रसालः ॥ ३० ॥

समवलोक्य विलासवनस्थलीम्
न पथिकैः पथि कैः पतितं भुवि ।
मलयजद्रुमसौरभमेदुरो-
दरसमीरसमीरितवल्लरीम् ॥ ३१ ॥

बकुलकुलमिलन्मिलिन्दमाला-
मदकलकोकिलकूजितोदयेन ।
अहह नियमिनोऽपि तत्त्वचिन्ता-
च्युतमतयो मतयोषितो बभूवुः ॥ ३२ ॥

विकसति सहकारे स्फारसौरभ्यसारे
वहति धुतपटीरे मन्दमन्दं समीरे ।
कलयति कलवाचं कोकिलोके च रुष्टः[1]
चणमपि न मृगाक्ष्या वल्लभो दुर्लभोऽभूत् ॥ ३३ ॥

कूजितानि कलयन् वनप्रियो
न प्रियो विरहिणामजायत ।
मन्मथाग्निरपि भस्मसा,दरम्
सादरं मुनिमनोऽम्बुजं व्यधात् ॥ ३४ ॥

विलासिभिरिवोन्मदै रचितरम्यगुञ्जारवैः
प्रसूनसुरभीकृतैर्विगलितव्यास्तापसाः ।
अशोककिञ्जरस्थितैः सुनयनान्वितैः षट्पदै-

1 कोकिले साभिमानः, इति पाठान्तरम् ।

र्निरन्तरनिषेवितामितमधौ मधौ रेमिरे ॥ ३५ ॥

दत्ते जनोऽसौ खलु विद्यमान-
मविद्यमानं तु न कोऽपि तावत् ।
वियोगिनां पुष्पमपत्रशोकः
शोकप्रदोऽभूदतिचित्रमेतत् ॥ ३६ ॥

जगौ विवाहावसरे वनस्थली-
वसन्तयोः कामहुताशसाक्षिणि ।
पिकद्विजः प्रीतमना मनोरमम्
मुहुर्मुहुर्मङ्गलमन्त्रमादरात्[1] ॥ ३७ ॥

आस्वादितं स्वादुमरन्दबिन्दु
स्वच्छन्दमिन्दीवरसुन्दरीभिः ।
माकन्दपुष्पं प्रमदाजनस्य
प्रमोदमामोदभरैरकार्षीत् ॥ ३८ ॥

पान्थानां प्रमदा इव प्रतिदिनं दैन्यं ह्रदिन्यो ययु-
र्दृश्यन्ते स्म दिगम्बरा इव वने पर्णोज्झिताः पादपाः ।
निःश्वासा इव दुःसहा विरहिणां वाता ववुः सर्वतः
पायं पायमिव प्रियाधररसं पाथः पपुः प्राणिनः ॥ ३९ ॥

रेजे पुष्पैर्ग्रीष्ममासाद्य मल्ली
मल्लीं सद्यः संश्रयन्ते स्म भृङ्गाः ।
भृङ्गैस्तत्रारम्भि हर्षेण गानं
गाने लौल्यं लेभिरे योगिनोऽपि ॥ ४० ॥

अथ नभसि निरीक्ष्य व्याप्तदिक्चक्रवालम्
सजलजलदजालं प्राप्तहर्षप्रकर्षः ।
विहितविपुलबर्हाडम्बरो नीलकण्ठो
मदमृदुकल[2]कण्ठो नाट्यमङ्गीचकार ॥ ४१ ॥

महीमण्डलीमण्डपीभूतपाथो-
धरारब्धहर्षासु वर्षासु सद्यः ।
कदम्बे प्रसूनं प्रसूने मरन्दो
मरन्दे मिलिन्दो मिलिन्दे मदोऽभूत् ॥ ४२ ॥

दृष्ट्वाडम्बरमम्बरे घनकृतं सौदामिनीनर्तकी-
नृत्यारम्भमृदङ्गमङ्गलरवं श्रुत्वा च तद्गर्जितम् ।
पुष्यत्पुष्पभरानताङ्गतरुस्कन्धावबद्धायस-

1—मुहुः, कूजितमन्त्रमादरात्, इति पाठान्तरम् ।
2 मदनमृदुल— इति पाठान्तरम् ।

क्वणाकर्णनसोत्सवप्रियतमं पान्था ययुर्मन्दिरम् ॥४३॥
अभिनववयवस्श्रीशालिनि क्ष्मातलेऽस्मि-
न्नतिशयपरभागं भेजिरे जिष्णुगोपाः ।
कुवलयशयनीये मुग्धमुग्धेक्षणाया
मणय इव विमुक्ताः कामकेलिप्रसङ्गात् ॥४४॥
एष्यन्त्यवश्यमधुना हृदयाधिनाथा
मुग्धा मुधा कुरुत मा विविधं विलापम् ।
इत्थं शशंसुरिव गर्जितकैतवेन
पाथोधराः पथिकपङ्कजलोचनाभ्यः ॥४५॥
आकर्णितानि रसितानि यया प्रसर्प-
त्प्रद्युम्नराजरथनिस्वनसोदराणि ।
उच्चै रणच्चरणनूपुरया पुरन्ध्या
क्षिप्रं प्रियं कुपितयापि तयाभिसस्रे ॥ ४६ ॥
अम्भोवाहमुरद्विषो निवसनं ध्वान्ताद्रिदिव्यौषधी
कन्दर्पस्य विलासचम्पकधनुर्वेषालतामञ्जरी ।
लेखा व्योमकषोपले विरचिता चामीकरस्य स्फुर-
द्दाम्नः पान्थविलासिनीजनमनःकम्पाय शम्पाभवत् ॥४७॥
प्रणतिभिरपि पत्युः प्रार्थनाभिश्च सख्याः
क्षणमपि न मनस्तो मानिनी मानमौज्झत् ।
तमसमशरशस्त्रीभूतगानप्रकारः
फणिनमिव शिखण्डी किं न खण्डीचकार ॥ ४८ ॥
घनसमयमहीभृत्पत्तनस्याम्बरस्य
त्रिभुवनपतिचापं गोपुरत्वं प्रपेदे ।
अपि विरसवचोभिः प्राप्तपङ्काभिषेकाः
कुकवय इव भेकाः खेदयन्ति स्म लोकान् ॥ ४९ ॥
सद्मन्येव निरन्तरं निवसतिर्मित्राद्यनालोकनम्
पन्थाः पङ्कसमाकुलः कलुषता वारां सदा दुर्दिनम् ।
एवं यद्यपि दूषणानि तदपि स्वर्भूजनोल्लासकृत्[1]
शस्योत्पत्तिनिमित्तकैकगुणतः प्रावृट् प्रपेदे यशः ॥५०॥
वृद्धाङ्गनेव विजहौ सरिदुद्धतत्वम्
वेदान्तिनामिव मतं शुचि नीरमासीत् ।
चन्द्रे प्रभा युवतिवक्त्र इवाद्भुताभू-
द्विद्वत्कवित्वमिव केकिरुतं न रेजे ॥ ५१ ॥

मधुमधुरिमभङ्गीं भेजिरे हंसनादा-
स्तुहिनपटललीलां लेभिरे वारिवाहाः ।
क्षितिरभवदपङ्का किंच रोलम्बबाला-
वलिललितनलिन्यः शैवलिन्यस्तदासन् ॥ ५२ ॥
स्फुटं स्फुटपलाशवत् सुभगभासि चञ्चूपुटे
विपाककपिशीकृताः कमलमञ्जरीर्बिभ्रती ।
बभौ दिवि शुकावलिः कुवलयच्छविर्जङ्गमा
स्वभावहृदयंगमा विबुधचापलक्ष्मीरिव ॥ ५३ ॥
चक्रे चण्डरुचा समं रणमसौ हेमन्तपृथ्वीपति-
र्ये ये तत्र जिता दिवाकरकरास्ते तेऽमुना तत्क्षणात् ।
कान्तानां कुचभूधरे निदधिरे मन्येऽहमेवं तदा
नो चेन्मन्दकरः कथं दिनकरस्तप्तश्च तन्वीस्तनः ॥५४॥
तपनस्तपति स्म मन्दमन्दम्
ज्वलनोऽपि ज्वलति स्म किंचिदेव ।
शरणं शिशिरेऽथ किंच यूनाम्
युवतीनां स्तनयुग्ममात्रमासीत् ॥ ५५ ॥
अथ सुखमनुभूय भूधरेऽस्मिन्
ऋतुनिकरेण विराजिते समन्तात् ।
निकटमुपगते सहस्ररश्मौ
चरमगिरेर्व्रजमच्युतः प्रतस्थे ॥ ५६ ॥
गोधनानि पुरतः समाययु-
र्गोदुहस्तदनु बर्हभूषणाः ।
रेजतुर्मुरलिकामनोहरौ
तौ तदन्तरगतौ नटाविव ॥ ५७ ॥
प्रापदस्तमयमुष्णदीधितिः
कामिनीभिरसकृन्निरीक्षितः ।
धूलिधूसरतनुश्च साग्रजः
प्राविशद्व्रजमसौ जगद्गुरुः ॥ ५८ ॥
नानागुणैरवनिमण्डलमण्डनस्य
श्रीसूर्यसूनुहरिभूमिभुजो नियोगात् ।
त्रैलोक्यकौतुककरं क्रियते स्म काव्यम्
लोलिम्बराजकविना कविनायकेन ॥ ५९ ॥

इति श्रीमत्सूर्यपण्डितकुलालंकारश्रीहरिहरमहाराजाधिराजोद्द्योतितलोलिम्बराजकृते हरिविलासे महाकाव्ये ऋतुवर्णनं नाम तृतीयः सर्गः ॥ ३ ॥ :: ॥ :: ॥

१—जनाह्लादकृत्, इति पाठान्तरम् ।

RÁMA AND SÍTÁ.

IX.

Mount Chitrakúta.

"Though reft of power and kingly sway,
Though friends and home are far away,
I cannot mourn my altered lot,
Enraptured with this lovely spot.
Look, darling, on this noble hill,
Which sweet birds with their music fill:
Tinged with a thousand metal dyes,
His lofty summits kiss the skies.
Here gleams a line of silvery sheen,
There, a broad streak of emerald green;
And, next, a belt of gold is spread,
Made glorious by a fringe of red;
While, higher as the peaks ascend,
Sun-light and flowers and crystal blend.
See, dear, the trees that clothe his side,
All lovely in their summer pride,
In richest wealth of leaves arrayed,
With flower and fruit and light and shade.
Look where the young rose-apple glows:
What loaded boughs the mango shows!
See, waving in the western wind,
The light leaves of the tamarind;
And mark that giant peepul through
Those feathery clumps of tall bamboo.
That depth of shade, that open lawn,
Allure the wood-nymph and the faun;
And, where those grassy glades extend,
The spirits of the air descend
To wile the summer night away
With dalliance and mirth and play.
Look, from the mountain's woody head
Hangs many a stream like silver thread,
Till, gathering strength, each rapid rill
Leaps, lightly laughing, down the hill,
Then, bounding o'er the rocky wall,
Flashes the foamy water-fall.
O, lives there one too cold to feel
Delicious languor o'er him steal
As the young morning breeze, that springs
From the cool cave on balmy wings,
Breathes round him, loaded with the scent
Of bud and blossom, dew-besprent!
See, round the hill, at random thrown,
Those masses of primeval stone,
Of every shape and many a hue,
Yellow and black and red and blue.
But all is fairer still by night:
Each rock reflects a softer light,
When the whole mount, from foot to crest,
In robes of lambent flame is dressed;
When, from a million herbs, a blaze
Of their own luminous glory plays,
And, clothed in fire, each deep ravine,
Each pinnacle and crag is seen.
Dear Sítá, Chitrakúta's height
Transports me with such pure delight,
With thee and Lakshman here to dwell
For many a year would please me well."

The Ganges.

"Home of the heron and the swan
    See, lovely Gangá glides,
With verdant isles to gem her breast,
    And flowers to deck her sides.
With every tree of sweetest fruit
    And fairest bloom that springs;
And glorious as the lucid stream
    Where bathes the King of kings.
How lovely are those shelving banks,
    Now dotted o'er with deer,
That sully, as they quench their thirst,
    The waves that were so clear.
Look, darling, to that point below,
    Those holy hermits mark,
I know them by their matted hair,
    And by their coats of bark.
See, on the river bank they stand,
    Their early bathing done;
Lifting their aged hands in prayer
    They reverence the Sun.
O look, the merry wind is up,
    And scatters leaves around:
The very mountain seems to dance,
    With bending forests crowned.
See Ganga's wavelets white with foam
    As round the isles they whirl;
Here troubled by the bathing Saints,
    And there like orient pearl.
Look, scattered by the morning breeze,
    What beds of blossoms lie,
And chaplets, cast upon the wave,
    Are dancing swiftly by.
Hark to the wild-duck's merry call,
    Amid the reeds at play:
Hark to the joyous mallard's note
    Responsive far away.
My life in fair Ayodhya's town
    Was not so sweet to me
As gazing on this lovely flood,
    That glorious hill, and thee.
Come, bathe in Gangá's wave, to her,
    With friendly love, repair,
And pluck her lilies in thy play,
    And twine them in thy hair.
This mount, with all its savage life,
    Ayodhya's city deem,
And on this beauteous river look

As our own Sarju's stream.
O Sítá, I am wild with joy,
So rare a lot is mine,
Cheered by a duteous brothers's care,
And loved with love like thine.
With hermit's food, and bathing here
At dawn and noon and eve,
I ne'er will mourn Ayodhya's towers,
Nor for my kingdom grieve."

Truth.

"Urge me no more: thy words are fair,
But virtue's garb they falsely wear.
With pleasing art thy tongue misleads,
And lures me to ignoble deeds.
For what is might or ancient race,
The pomp of wealth, the pride of place?
'Tis virtue marks the line between
The great and good, the low and mean:
And he from virtue's path who strays,
To wander in forbidden ways,
Whate'er his birth, must hope in vain
The praises of the good to gain.
Shall I the righteous path forsake,
The laws of duty foully break;
Be scorned by all the good and just,
And lay mine honour in the dust?
Shall Ráma stain his soul with sin,
And lose the heaven he lives to win?
Nor would the crime with Ráma end:
For countless lives on him depend.
The people in their prince behold
Their best example, guide, and mould,
And, by his vice or virtue led,
The path he walks they strive to tread.
That truth and mercy still must be
Beloved of kings, is Heaven's decree:
Upheld by truth the monarch reigns;
Nay, truth the very world sustains.
Truth evermore has been the love
Of Saints below and Gods above;
And endless bliss by truth is won
In Brahmá's world beyond the sun.
For holy truth is root and spring
Of virtue and each lovely thing:
A mighty Lord, supreme on earth,
Peerless for beauty, power, and worth:
A crown of glory, still more fair
Than sacrifice and praise and prayer.
Shall I this heavenly gem despise,
Attracted by an earthly prize?
Shall I, misled by lust of sway,
My father's order disobey;
And, folly's dupe or passion's slave,
Force him to break the oath he gave?
Shall I, to gain my royal right,
The clear command of duty slight:
With lying lips my glory stain,
And basely sin for paltry gain?
For not alone by hand and thought
The soul of man with crime is fraught:
Sin's meanest tool I count the third,
The tongue that speaks the lying word.
No, brother; urge this plea no more,
I still will keep the oath I swore:
Within the forest calmly dwell,
Contented with my hermit's cell,
Nor fail to give the Gods a share
Of offerings from my humble fare."

Rámáyana Book II. XCIV, XCV, CIX.

TO THE EDITOR OF THE PANDIT.

Queen's College,
Benares.

Sir,

A Hindu gentleman has recently delivered a lecture at the Benares Institute, consisting of remarks on Mr. Lingam Lakshmaji Pantlu Garu's lecture on the "Social Status of the Hindus," in which he has attempted to vindicate *idolatry* and the Hindu doctrine of *necessity*. The lecture is published, but the circulation is very limited. It is in fact a sealed pamphlet to the public, and hence its resemblance to that of the Freemasons. So, I think, it may not be improper to ask you to bestow a little space in your valuable journal entitled काशीविद्यासुधानिधिः* (one of the objects of which is "to offer a field for the discussion of controverted points in old Indian Philosophy, Philology, History and Literature") for a slight review of this sealed pamphlet, and consequently of the great questions of *idolatry* and the Hindu Doctrine of *necessity*.

The lecturer in the first place offers a criticism on Mr. Garu's notion of idolatry, who says that the very name of it is sufficient to "trumpet forth the grossness of our system of worship," and in another place "we regard every idol we worship as the Self-existent, Eternal, Supreme Being, who is the cause of everything and into whom everything is finally absorbed." To this latter sentence of Mr. Garu, the lecturer with great ingenuity attaches three distinct meanings which are as follows:—(1) "That all our notions of Godhead are limited to our idols; it is our idols that are our divinities, and beyond our idols we have no divinity."—(2) "That we do believe in a Supreme Being, Infinite and Eternal, who is distinct from the idols, yet at the same time we believe him to be mere idols, or masses of matter inert, unthinking and

---

* काशीविद्यासुधानिधिः कथंभूतः "प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः"

perishable."—(3) "That we believe that what is Real in the idols is the Supreme Being, that the stone or wood is a mere illusion, seeming to exist because of the sustaining presence of the Divine Spirit." Then, "if by idolatry," exclaims the lecturer, "is meant a system of worship which confines our ideas of the Divinity to a mere image of clay or stone, which prevents our hearts from being expanded and elevated with lofty notions of the attributes of God, we disclaim idolatry, we abhor idolatry and deplore the ignorance or uncharitableness of those that charge us with this grovelling system of worship." Whether idolatry, by confining our ideas of the Divinity to a mere image, prevents us from having lofty notions of the attributes of God or not may be best known by appealing to the consciousness of any true Hindu idolater. If this be actually the case with the generality of the Hindu idolaters, the lecturer's disclaiming and abhorring idolatry and deploring the "ignorance or uncharitableness of those that charge us with this grovelling system of worship," is of no avail. His abhorrence of the system must give way before facts. If millions of Hindu men and women be really found unable to raise their minds to God, is not Mr. Garu quite justified in remarking that the very name of idolatry is "sufficient to trumpet forth the grossness of our system of worship."? Be that as it may, the first meaning which the lecturer attaches to the sentence of Mr. Garu has no sense in it; for the Sanskrit word प्रतिमूर्त्तिः or प्रतिमा means a *likeness* or an *image*, and it is clear that there must be another thing besides the likeness or image, viz., the thing of which it is a likeness or an image. There must be at least two things for a *likeness*, or an *image*, and what is the second thing here must be a God. Thus the lecturer's fondness for shewing ingenuity by attaching different meanings to the sentence of Mr. Garu has made him blind as regards the Sanskrit word for an idol and led him to the utterance of nonsense.

Neither the second nor the third meaning attached to the sentence of Mr. Garu is the true one, although the lecturer expresses full assurance that Mr. Garu must have meant it in the second sense. Mr. Garu is a representative of the people and consequently cannot invent three distinct meanings out of his own mind as the lecturer has done; neither has he so much power of invention.

Moreover as regards the second meaning it should be observed that no man can form two different conceptions of the same thing at one and the same time. In order to form two distinct ideas of a thing we require two distinct portions of time. A little consideration would have shewn the lecturer that the second meaning attached to the sentence of Mr. Garu is also nonsense. For to believe a thing at one and the same time to be a "Supreme Being, Infinite and Eternal," distinct from the idol, and also a mere idol, or mass of "matter, inert unthinking and perishable," is impossible.

The fallacy of the lecturer is in supposing that there can be three and only three distinct meanings of the sentence of Mr. Garu, and he argued that as Mr. Garu cannot mean the first and the third which are respectively too foolish and too deep, he being an ordinary man must have meant the second. Little did the lecturer dream of the fact that a fourth and a true meaning can be attached to the sentence of Mr. Garu, which is as follows:—That we believe in a Self-existent, Eternal Supreme Being as distinct from the idol and that He is called into the idol at the time of worshipping by means of mantras. It should be borne in mind that Mr. Garu, here assuming the philosophic belief of the Hindus that the thirty-three crores of gods are all one and the same Being, shews the grossness of the system. This, I think, is the true sense of the sentence and that which Mr. Garu should, at least, he supposed to have meant, for we should, as justice requires, put the best construction upon it we can. Accordingly it has been said अभिरूप्यां च बिम्बानां देवः सांनिध्यमृच्छति when an idol is beautifully made there comes the god (*i. e.* the particular god whom the worshipper invokes). Such being the case प्रतिमायां शिलाबुद्धिं कुर्वाणो नरकं व्रजेत् any man who thinks of the image of a god as a piece of stone goes to hell. If this be acknowledged to be the true sense of the sentence of Mr. Garu the third meaning of the lecturer, though plausible, must be confessed to be a forced one. Neither can the lecturer claim any originality for it, for the same defence is generally heard in the mouth of idolatrous cavillers.

As regards this third meaning it should be observed that the lecturer, without a shadow of proof, takes for granted the Vedántic conclusion, (ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः the only truth is Brahma, the universe is a delusion, even the animals are not distinct from Brahma) as true.

Is the lecturer not aware of the fact that there is a rival system of the Sánkhya propounded by the great sage Kapila* who says ईश्वरासिद्धेः (aph. 93 book I.) "For there is no proof that there is a god"? The lecturer in order to establish his point should have at least refuted the Sánkhya Philosophy, for it does not at all inculcate the doctrine of the unreality of the external world (जगत्-

* Kapila is regarded by the Hindus as an incarnation of Vishṇu and represented to have obtained by birth the knowledge of the twenty-five principles "पञ्चविंशतितत्त्वेषु जन्मना ज्ञानमाप्तवान्" ॥ तथाच भागवते

"पञ्चमः कपिलो नाम सिद्धेशः कालविप्लुतं ।
प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयं" ॥

Digitized by Google

सत्यमदुष्टकारणजन्यत्वाद्बाधकाभावात् aph. 52 book VI. "The world is real for it is the effect of an unobjectionable cause and because there is no one to refute this"). I fear the lecturer has not understood the Vedántic tenet because he identifies it with Bishop Berkeley's idealism and Mr. Mill's 'Permanent Possibilities of Sensation.' True it is that Mr. Mill defines *matter* as a 'permanent possibility of sensation,' but the Vedánta goes further and positively affirms that the sensation itself is a delusion. As for Bishop Berkeley, he has never denied the existence of matter which we see and feel around us, but simply the noumenon or substance or substratum of it. "When Berkeley denied the existence of matter," says Mr. Lewes in his Biographical History of Philosophy, "he simply denied the existence of that unknown substratum the existence of which Locke had declared to be a necessary inference from our knowledge of qualities," But why resort to authorities when we have Berkeley's own words?—"I do not argue," says the Bishop, "against the existence of any one thing that we can apprehend either by sensation or reflection. That the things I see with my eyes and touch with my hand do exist, I make not the least question. The only thing whose existence I deny is that which philosophers call matter, corporeal substance;" so that the doctrine of the Vedánta can never be identified with the tenets of a Berkeley or a Mill. For the lecturer's consideration I give here the true view of the purport of the Vedánta in Sanskrit and in my own words.—यद्यपि हिन्दुजातयः सांख्यादिसर्वदर्शनानि ऋषिनिर्मितानि मन्यन्ते तथापीदानीं प्रायः सर्वे वेदान्तदर्शनसिद्धान्तान् विशेषरूपेणाद्रियन्ते अतः कारणात् तद्दर्शनसिद्धान्तान् संक्षेपेण यथाबुद्धि निरूपयिष्यामः॥ वेदस्यान्तो वेदान्तो ब्रह्मजिज्ञासेति वेदान्तदर्शनस्योद्देश्यः। ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा। ज्ञातुमिच्छा जिज्ञासा। इत्याशयेन भगवान् बादरायणः शारीरकसूत्रग्रन्थे प्रथमं सूत्रयामास॥ ते वेदान्तिनो ब्रह्मवादिनो न सांख्यवत् प्रकृतिमेव जगतो मूलकारणं मन्यन्त इत्यर्थः परंत्विमानि सर्वाणि दृश्यवस्तून्यकल्पितानि रज्जौ सर्पत्वभ्रमवच्छुक्तौ रजतत्वभ्रमवच्च। एवं प्रकारेण रज्जोर्वा शुक्त्याः स्थाने जगत्प्रपञ्चं स्थापयित्वा जगत्त्वस्याध्यासो बोद्धव्यः॥ ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापर इति वेदान्तदर्शनसिद्धान्तज्ञाने पुरुषः परमपुरुषार्थं प्राप्नोतीति शम्॥ काशीस्थसभायाः संपादकः श्रीऋषिकेशरमान्यासः॥

Now it should be remarked that the lecturer's forced assertion: "it is not the image that we worship as the Supreme Being, but the Omnipresent Spirit that pervades the image as he pervades the whole universe," and its anticipated objection—"why do not you worship the Omnipresent Deity in any other material object than an image or symbol consecrated?" and its answer: "simply because no association has been established in our minds between it and the presence of God," is an example of logical nicety. What is the use of forming *fictitious* associations with the presence of God at all, as if the existence of God depended upon the lecturer's forming arbitrary association? A whimsical theory indeed! A true association must be inherent in human nature and therefore must be suggested by its own law. Hence Dr. Brown calls *association* the law of *suggestion*. Let the lecturer associate God with his own body, if he likes, and compassionately call others atheists "being incapable of thinking for themselves."

Another ridiculous argument which has been brought forward by the lecturer is that because we cannot conceive God and His Infinite attributes in the abstract therefore in order to avoid "practical" atheism, we should practise idolatry. It is not a fact that we cannot form abstract notions. On the other hand, I think it is *abstraction* alone that puts a perfect distance between men and brutes. To the effect that we can form abstract notions, I quote the following from Mr. Locke:—"The use of words then being to stand as outward marks of our internal ideas, and those ideas being taken from particular things, if every particular idea that we take in should have a distinct name, names must be endless. To prevent this the mind takes the particular ideas, received from particular objects, to become general; which is done by considering them as they are in the mind, such appearances separate from all other existences, and the circumstances of real existence, as time, place, or any other concomitant ideas. This is called 'abstraction,' whereby ideas taken from particular beings, become general representatives of all the same kind; and their names, general names, applicable to whatever exists conformable to such abstract ideas." Besides the lecturer, in attestation of his assertion that we cannot conceive God in the abstract, quotes Sir. W. Hamilton who says: "True therefore are the declarations of a pious philosophy, 'A God understood would be no God at all; to think that God is as we can think him to be is blasphemy." It seems to me that even Sir W. Hamilton, whom the lecturer acknowledges to be an acute and deep thinker, has fallen here into an egregious blunder. A little consideration would have shewn him that we cannot conceive the nature of God more than our faculties allow us to conceive. Our faculties are given and limited by Him. Consequently there can be no blasphemy in the conception of God who is revealed in the conciousness, however imperfect it may be.

Now let us see the harmony of the argument of Sir W. Hamilton when applied to idolatry. "True therefore are the declarations of a pious philosophy." 'A God *represented by means of an image* would be no God at all; to think that God is as we can *represent Him* by *an image* is blasphemy.' Sir W. Hamilton is correct when he expresses a somewhat similar (but by no means

the same) idea more scientifically. "The Infinite and Absolute are the names of two counter imbecilities of the human mind, transmitted into the nature of things, of two subjective negations transformed into objective affirmations." Further I quote some of the following authorized Hindu texts for the lecturer's consideration, from which it is clear that the learned should not worship idols:—

मच्छिलाधातुदार्वादिमूर्तावीश्वरबुद्धयः ।
क्लिश्यन्ति तपसा मूढाः परां शान्तिं न यान्ति ते ॥

Those fools who think of God in an image of mud, metal, stone or wood only get bodily pain but no salvation.

यो मां सर्वेषु भूतेषु सन्तमात्मानमीश्वरं ।
हित्वार्च्चाम्भजते मौढ्याद्भस्मन्येव जुहोति सः ॥

The man who having left me, the *I* who pervades every being, foolishly adores an idol, he offers *ghee* to ashes.

Lastly it should be observed that the idea prevalent among the Hindus is that in India there has been no change of creed. But certainly there is no foundation for such an assertion. How much the Vedic sentiments were changed in ancient times is clear from the following words of the Manduka Upanishad,—"तत्राऽपरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षाकल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति । अथ परा यया तदक्षरमधिगम्यते" ॥ There must be some change in the progressive kingdom of God. When there began an enquiry into *one's self* and *God*, most men discredited the rites and ceremonies inculcated in the Karmakáṇḍa. Then they were dissatisfied with the worship of Indra, Varuṇa &c. There was a time when the Vedas were considered as all truth and nothing but the truth, and consequently oblations and sacrifices were worthy of being practised. But in the time of the Upanishads, literary men had no such faith in the mass of rites as they had before. From these considerations it is clear that the Vedas, not to say the Puráṇas, maintain contradictory doctrines and inculcate hero-worship. Therefore I cannot better conclude the first part of my review (viz., of the doctrine of idolatry) than by quoting the following memorable words of Francis W. Newman, for the lecturer's consideration. —"The glorifying of religious teachers" says the Professor "has hitherto never borne any fruit but canonizations and deifications, 'voluntary humility and worshipping of messengers,' vain competitions and rival sects, stagnation in the letter, quenching of the spirit."

By-the-bye it may be remarked that although the lecture signs himself a Hindu, still he, not being a Brahman, had the courage in a full meeting of the "Benares Institute" to utter Vedic texts, which is strictly forbidden in the Upanishads themselves, under the penalty of the tongue being cut out of the utterer and molden lead being poured into the ears of the audience.

Another time I hope to discuss the Hindu doctrine of *necessity.*

Yours truly,
SHASHISHEKHARA SANYALA,
Secretary Benares Association, and President of the Club Preparatory to the Benares Association.

ON THE ONTOLOGY OF THE VEDA'NTA.*

"Nothing seems of more importance, towards erecting a firm system of sound and real knowledge, which may be proof against the assaults of scepticism, than to lay the beginning in a distinct explication of what is meant by *thing, reality, existence:* for in vain shall we dispute concerning the real existence of things, or pretend to any knowledge thereof, so long as we have not fixed the meaning of those words."—*Berkeley:*—"Of the Principles of Human Knowledge," § 89.

AT the end of a paper on "The gist of the Vedánta as a Philosophy" (*Ben. Mag.* Vol. iv., p. 325), in which we confined ourselves to disproving the legitimacy of the conclusion practically drawn from the Vedántic theory, we intimated our intention to address ourselves, in a subsequent paper, "more especially to points connected with the question under its second aspect—the Ontology of the Vedánta." As regards this aspect of the question, we remarked,—"If the theory necessarily led to the conclusion practically drawn from it, there would then be an urgent necessity that the theory itself should be first assailed, however arduous might be the nature of the required assault." That the theory did *not* necessitate the conclusion practically drawn from it, we undertook to demonstrate; and a year has now passed without our having met with any attempt to shake the position that we then took up. What we hope *now* to show is this, that the evil is in the inference, and not in the theory,—and that the Indian Missionary will do well to reserve his strength for the combat with the deadly error, instead of wasting it upon a speculation which, whether philosophically just or not, is in no respect whatever incompatible with the reception of Christianity. In our attempt to show this, we claim an unprejudiced and an attentive hearing. We claim this on the ground that we have shown, by our previous papers, that we have at all events not spared pains to qualify ourselves for forming a judgment on the deeply important and generally very ill understood point which we are going to discuss.

To those who do not read Sanskrit, the sources generally available for acquiring a knowledge of the Vedánta are the Essay of Mr. Colebrooke, the criticism of Col. Vans Kennedy on that essay, the intended defence of Mr. Colebrooke by Sir G. C. Haughton, and the tracts of Rammohun Roy. We do not speak of Mr. Ward's work on the Hindoos, because the reader of that work, who imagines that he is therein reading the speculations of the Indian sages, is under a delusion. It appeared advisable, when we undertook to address

* By the late Dr. Ballantyne: reprinted from the Benares Magazine, Vol. VI. 1851.

Digitized by Google

those whose conception of the Vedánta is derived from the sources just mentioned, that we should first remove whatever of perplexity might result from the seemingly conflicting testimony of the parties, in regard to the question whether the Vedánta were a system of Materialism or of Spiritualism. We therefore, (in a first and Second Dialogue "On the Notions of the Hindús,"—*Ben. Mag.* Vols. v. and vi., pp. 422 and 863),—traced out the occasion of Col. Kennedy's misapprehension of Mr. Colebrooke, and showed that Mr. Colebrooke quite agreed with him and with the Hindú expositors in holding the system to be one of pure Spiritualism. We now propose to show, in accordance with this, that the *Ontology* of the Vedánta is the Ontology of Bishop Berkeley;—which being shown, it will follow that it must be something else than *this* against which our efforts require to be directed. It is labour worse than lost to argue against what does not stand in the way of your argument. In attempting to convince a European unbeliever in Christianity who held the doctrine of Berkeley, it would clearly be a waste of labour to argue against the doctrine of Berkeley, because we know, from Berkeley's own case, that the holding of that doctrine is compatible with the highest form of Christian piety. Let us show, then, that the doctrine of Berkeley is the Ontology of the Vedánta—*without the illicit inference deduced by the Vedántists*,—and it will then be seen how we had better waste no longer, in assailing the impregnable or the impalpable, the strength that was given us for labours less Quixotic.

But, methinks, a smile of compassionate surprise has come over the face of the reader; and he ejaculates "Berkeley!" Good reader, if you know Berkeley, you must love him;—if you do not know him, pray listen to what we shall tell you of him. If you have borrowed your conception of his philosophy from Byron's lines—

> "When Bishop Berkeley said there was no matter,
> It surely was no matter what he said;"—

then, pray, revise your conception as you go along with us. If, again, you enrol yourself among those of whom Pope speaks when he says—

> "And coxcombs vanquish Berkeley with a grin;"—

then lay aside our article;—it will profit you as little as you will profit the cause of evangelization in the educated division of Hindú society.

George Berkeley was born in 1684. In 1724, when holding the Deanery of Derry, worth £1,100 per annum, he drew up a Scheme for converting the savage Americans to Christianity, by a college to be erected in the isles of Bermuda. The scheme included his resignation of his rich benefice, and his dedicating the remainder of his life to instructing the youth of America, on the moderate allowance of one hundred pounds yearly. Subscriptions having been raised for promoting "so pious an undertaking," as it is styled in the king's answer to the Address of the Commons relative to a grant of land for the use of the mission, Dean Berkeley sailed for Rhode Island, with his lady, in 1728. It would appear that the minister of the day had never heartily embraced the project for which the dean had made such sacrifices;—obstacles were thrown in the way; and, the scheme on which Berkeley had expended much of his private fortune, and more than seven years of the prime of his life, having been thus rendered abortive, he returned to Europe. Before he left Rhode Island, he distributed what books he had brought with him among the clergy of that province; and immediately after his arrival in London, he returned all the private subscriptions that had been advanced for the support of his undertaking. At this time he preached, before the Society for the Propagation of the Gospel in Foreign Parts, a sermon, which was printed at the desire of the Society. In this sermon occurs the following passage, to which we request the particular attention of the reader:—

> "The metaphysical knowledge of God, considered in his absolute nature and essence, is one thing; and to know him as he stands related to us as Creator, Redeemer, and Sanctifier, is another. The former kind of knowledge (whatever it amounts to) hath been, and may be, in Gentiles as well as Christians, but not the latter, which is life eternal."

(To be continued.)

ADVERTISEMENT

The *Hindu Commentator*, a Monthly Sanskrit Journal, will be published from September 1867. It will contain Sáma Veda, Sáma Hymns, with a commentary in Sanskrit and translation in Bengali, the Mímánsá, and rare Sanskrit works. It will also contain articles bearing on the religion of the Hindus, and lives of eminent men of different countries.

Terms of subscription (in advance).

Per Annum	Rs 9	excluding Postage.
„ Half-year	„ 5	„ „
„ Single copy	„ 1	including „

Benares: 1st Sept. 1867. } Satya Brata Sámaśramí, *Editor.*

Communications of a literary nature should be addressed to the Editor: *all letters on business, to the Proprietors,* Messrs. E. J. Lazarus & Co., *to whom Drafts should be made payable.* Advertisements *will be inserted at four annas per line.*

The PANDIT may be ordered of the Publishers, or through Messrs. Trübner and Co., London.

Annual subscription, in advance, including postage, Rs. 12.

PRINTED AND PUBLISHED BY E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
मङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 17. Benares October 1st, 1867. Vol. II.

॥ नरेश्वरपरीक्षा ॥

"ननु यद्यत् संवेद्यते तत् तत् संविद्रूपमेव, यथा नीलादिसंवित्तिः, संवेद्यते च नीलादिः, तस्मात् तदपि संविद्रूपमेवेत्यसंविदात्मनो बाह्यार्थस्यासंवेदनादर्थशून्यं सर्वमेव विज्ञानमिति प्रयोगान्तरेण शून्यवादिनः,, यदाहुः,

"संवेदनं हि तादात्म्यात् तद्भ्रासनमेव तत् ।
एवमेव किमुक्तं स्यात् स बाह्योऽर्थोऽनुभूयते,, ॥

इति, अत आह ।

(१०) प्रत्यक्षा बुद्धिरेवेति निर्निबन्धनमुच्यते ।
बोधो बोधान्तरग्राह्यो नेष्यते भवतापि यत् ॥

एतदप्ययुक्तं साधनधर्मासिद्धत्वाद्दृष्टान्तस्य, "नहि तत्रापि नीलादिसंविदः संवेद्यत्वं सिद्धं,, क्षणिकत्वेन संविदन्तरोत्पत्तिकाले संभवाभावात् । नच दृष्टान्ते स्वसाध्यासिद्धसंबन्धो हेतुः साध्यं साधयितुं शक्नोत्यतिप्रसङ्गात् ॥

अथैतद्दोषभयात् संविदः संविदन्तरजननेन संवेद्यत्वमुच्यते, यदाहुः,

"भिन्नकालं कथं ग्राह्यमिति चेद् ग्राह्यतां विदुः ।
हेतुत्वमेव युक्तिज्ञा ज्ञानाकारार्पणक्षमम्,, ॥

इति, अत्राप्याह ।

(११) ग्राह्यत्वेऽपि न विज्ञानं सर्वमेव निरर्थकम् ।

यद्येवमनैकान्तिको हेतुः संविदः स्वतोऽसंविद्रूपाया अपि संवेद्यत्वात्, तद्वदर्थस्यापि संवेद्यत्वं भविष्यति यतः, "अथ संविद्रूपत्वेन संवेद्यत्वादिति हेतुः,, तत्रासिद्धो नीलस्य संविद्रूपत्वेन संवेद्यत्वासिद्धेरिति सर्वमेव विज्ञानमर्थशून्यमिति नैष प्रतिज्ञार्थो भवतः सिध्यतीति ॥

अत्र पराभिप्रायं दर्शयति ।

(१२) अथानुभवरूपत्वाद् बोधः प्रत्यक्ष इष्यते ।

नात्र संविदन्तरसंवेद्यत्वं हेतुरपितु स्वसंवेद्यत्वमेव, ततश्च न साधनधर्मासिद्धिरनैकान्तिकत्वं वा दोष इति ॥

एतदपि निराकरोति ।

(१३) नाभावः संमुखीनेऽर्थे ततोऽनुभवगोचरे ।

यद्येवमसिद्धो हेतुः, "नहि संवित्स्वभावत्वं नीलादेः संवेद्यस्य सिद्धम्,, अपितु संवेद्यतैवेति, ततोऽसिद्धाद्धेतोरर्थे नीलाद्यात्मके संवेद्यतयेदंतानिर्दिश्यमाने प्रत्यक्षसिद्धे धर्मिणि नाभावो न बाह्यत्वनिरासः सिध्यतीति ॥

एतदेव प्रत्यक्षसिद्धमित्याह ।

(१४) अयमेव विधिर्नयो भेदे बोधार्थयोः स्फुटं ।
पूर्वस्त्वनुभवाकार उत्तरश्चानुभूयते ॥

स्वपरप्रकाशरूपतया हि बोधात्मानुभवसिद्धः, तत्संवेद्यतयार्थोऽपीति, नातः शून्यवादसिद्धिः । "नन्वेवमात्मनोऽर्थस्य च द्वयोरनुभूयमानत्वे क आत्मेति न विद्मः,, पशवोऽपि हि यावदात्मपरभावं प्रत्यसंमूढाः, सोऽयं पशोरपि पशुः कुदर्शनापस्मारगृहीतः शोच्य एव । कथं वा ज्ञानज्ञेययोः प्रकाशमानत्वे ज्ञानमेव भावानां शुद्धोऽर्थः, नत्वर्थ एवाहमर्थज्ञानयोराकारभेदानुपलम्भात् साधुः समर्थितः सुगतनयो, यदमेध्याकारोऽप्येवं विनेयविनेतृतयाभ्युपगतः, "ननूक्तं,

"प्रभासुरमिदं चित्तं प्रकृत्याऽऽगन्तवो मलाः,, ।

इति, तद्वयमेवात्मपरभावः, इति नार्थज्ञानयोराकारभेदानुपलम्भः सिद्धोऽपितु भिन्न एवोपलम्भ इति, एतेन सत्त्वद्रव्यकारकत्वादिभ्योऽचेतनानुमानमात्मनि प्रतिक्षिप्तं प्रत्यक्षनिराकृतत्वात् ।

पुनः प्रयोगान्तरेण शून्यवादिनः ।

(१५) वस्तु विज्ञानतो भिन्नं नैव विज्ञानजन्मनः ।
पूर्वेणाग्राह्यमाणत्वात्,

यस्य येन सहोपलम्भो नियतः, तस्य ततो नार्थान्तरत्वं, यथा द्विचन्द्रज्ञानप्रतिभासमानादेकस्माच्चन्द्रमसो द्वितीयस्य, नीलज्ञानेन सहोपलम्भनियमश्च नीलादेः, तेन विना ततः पूर्वापरयोः संवेदनाभावात्,अतस्तस्यापि ततो नार्थान्तरत्वमिति नीलादेः संविद्रूपसिद्धितोऽर्थाद्ग्राह्यत्वनिरासः सिध्यति, यदाहुः,

"सहोपलम्भनियमाच्च भेदो नीलतद्धियोः" ।

इति ॥

आचार्यस्तु नीलाभावेऽपि नीलप्रकाशकसद्भावस्य प्रतिपादितत्वादसिद्धमेतत् साधनम् । "अथ बोधाध्यवसायापेक्षयोच्यते" तत्राप्यसत्यर्थे मनोराज्याद्यवस्थासु तस्य भावादसिद्धतैवेति मत्वा प्रमेयभेदेन तद्भेदमभ्युगम्याप्याह ।

(१६) इत्यनेकान्तमुच्यते ।

इत्येवमभ्युपगम्यैतत् साधनमनैकान्तिकमुच्यत इत्यर्थः ॥

कथमित्याह ।

(१७) चक्षुर्व्यापारतः पूर्वं प्रकाशाच्च न गृह्यते ।
रूपं लोकेन तत् ताभ्यामभिन्नं संप्रतीयते ॥

चक्षुःशब्देनात्रोपलम्भप्रस्तावाद् गोलकमेवैतदुच्यते, तस्य व्यापारो विस्फारावस्था, तेनालोकेन च सहोपलम्भनियमो रूपस्य । नच चक्षुर्व्यापाररूपत्वमालोकरूपत्वं वेत्यनैकान्तिकता, बाह्यनिराकरणाय च भवद्भिरेष प्रयोगः समुपरचित[1] इति, "न, आलोकादेरपि विज्ञानरूपत्वादनैकान्तिकपरिहारो युक्तः" तस्यात एव साध्यत्वेनासिद्धत्वात् ॥

"नन्वनालोकस्यापि रूपस्य प्राणयन्तरैरुलूकादिभिर्ग्रहणादालोकेन सहोपलम्भो नियतो नास्तीति नानैकान्तिकता" "कथं तर्हि तमसा वृतं पटेनेव तेऽपि रूपं पश्यन्ति" नचावस्तुत्वं तमसो भूच्छायात्मकत्वेन बाह्यार्थवादिभिरभ्युपगमादस्मदादेरपि ततो दर्शनप्रतीघातसंभवाच्च, वस्तुत्वे च रूपावरणस्वभावं यावत् तदनिवृत्तं तावत् कुतो रूपोपलब्धिः, "तच्चक्षुःशक्त्यैव तेषां रूपं प्रकाशत इति" चेत्, तर्हि सैवालोको रूपप्रकाशकत्वात्, "अथाप्रकाशात्मिका भविष्यतीति" चेत्, तर्हि कथं प्रकाशयति, नह्यप्रकाशात्मनः प्रकाशकत्वं तमस इवोपपद्यत इति प्रकाशात्मिकैव सा शक्तिरभ्युपगन्तव्या, ततः प्रकाशेन सहोपलम्भो नियतो रूपस्य, नच प्रकाशरूपतेत्यनैकान्तिकतैवास्य हेतोरिति, "ननु चक्षुर्व्यापारमालोकं च विना रूपं योगिभिरुपलभ्यत इत्यत्र सहोपलम्भनियमाभावादनैकान्तिकविषयता" न, लोक इत्यत्र विशेषणात्, ततोऽस्म-[1]दादिप्रत्यक्षत्वे सत्येषां सहोपलम्भनियमोऽस्त्येव, नचाभेद इत्यनैकान्तिक एव । किंच शून्यवादिनां चिरतरप्रकृष्टो विहारागमचैत्यादिभेदोऽनुभवसिद्धो नोपपद्यत इत्याह ।

(१८) नीलविज्ञानसंतानः पाण्डुरश्चेत्यनाकृतौ ।
आकारवति बोधेऽपि नियमो नाविशेषतः ॥

नीलशुक्लादिसंतानभेदोपलक्षितः सर्वोऽयं सरित्सागरपर्वतादिभेदो भिन्नार्थक्रियासाधनतया निश्चितो नाहेतुको देशकालप्रकृतिनियमायोगात्, यदाहुः,

"नित्यं सत्त्वमसत्त्वं वा हेतोरन्यानपेक्षणात् ।
अपेक्षातो हि भावानां कादाचित्कत्वसंभवः" ॥

इति, नापि विज्ञानहेतुकः, तस्याकारवत्त्वेनाद्ययावज्जगत्यस्मिन्नसिद्धेः, आकारवति तस्मिन्नप्यभ्युपगम्यमाने विज्ञानात्मनः सर्वत्र सर्वदा चाविशेषात् सर्वः सर्वाकारः सर्वत्र सर्वदा च स्यादिति प्रागुक्तस्य जगद्वैचित्र्यनियमस्यासिद्धिप्रसङ्गः ॥

तमेव प्रसङ्गार्थमाह ।

(१९) एकाकारैव विज्ञप्तिः प्राप्ता विज्ञानवादिनः ।

यदाहुः,

"तद्वतद्रूपिणो भावास्तद्वतद्रूपहेतुजाः" ।

इति ॥

ततो यद्येनाभिन्नहेतुकं तत् तेनाभिन्नस्वभावं, यथैकस्माद्बुद्ध्याज्ज्ञलवणाद् द्वितीयं तद्रूपं, यत्र तु भिन्नरूपत्वं नास्ति तत्राभिन्नहेतुकत्वमपि नास्ति, यथा सुगतनये ज्ञानयोरभिन्नहेतुकं च विज्ञानवादिनां पर्वताकाराद्विज्ञानात् सरित्समुद्रादिविज्ञाने, नचाभिन्नरूपमित्यनेकान्तः,अत्राह ।

(२०) नीलादिभेदो बोधस्य वस्तुभावे तु किंकृतः ।

नानैकान्तो, न हि बाह्यार्थवादिभिस्तेषां विज्ञानमात्रमेव हेतुरिष्यतेऽपितु संस्कारद्वारेण यथायथं बाह्यान्यपि वस्तूनि, भवतस्तु बाह्यानां वस्तूनामभावाद्विज्ञानमात्रस्यैव सर्वत्र हेतुत्वमित्येष प्रसङ्ग उक्तः, नास्माभिरपि, वासनाभ्युपगमात्, तत्कृतोऽयं भेदावभासो न ज्ञानमात्रहेतुक इत्यप्रसङ्गः, तदुक्तम्,

"ज्ञानजो ज्ञानहेतुश्च संस्कारो वासनोच्यते" ।

इति ॥

अत्राप्याह ।

---

१ संपरिचित इति पाठान्तरम् ।

१ ततश्चास्म-, इति पाठान्तरम् ।

(२१) वासनाकृत इत्येतत् पवनेरितभाषितम् ।

उन्मत्तप्रलपिततुल्यम् ॥

कुत इत्याह ।

(२२) तत्क्षणज्ञानतो नान्या वासना तव युज्यते ।

सापि हि वासना न तावद्विज्ञानादन्या विज्ञानव्यतिरेकेणान्यस्य कस्य चिदिन्द्रियादेरपि भवद्भिरनभ्युपगमात्, अपितु पूर्वस्माद्विज्ञानक्षणाज्जातं ज्ञानान्तरक्षणहेतुभूतं विशिष्टं ज्ञानमेव वासना, तच्चाविशिष्टत्वेनोक्तमेव, अतो न किंचिदेतत्, अस्माकं तु स्थिरत्वाद्बुद्धेर्वासनाधर्मान्तराण्यनेकान्यपि संभवन्तीति शरीरावस्थाविशेषं धातुसाम्यवैषम्यादि वा सुखदुःखफलं कर्म वा यथार्थप्रदर्शकं देवताप्रसादं वा विशिष्टवासनापरिपाकहेतुमन्तरा विशिष्टाकारमुपपद्यत एव । "ननु क्षणिकस्यापि ज्वालादेस्तृणपर्णादिहेतुजनिता पाण्डुत्वलोहित्यादिवासना दृश्यत एव,, न,तत्स्वरूपत्वात्, स्वरूपं हि तत् तृणजन्यं विशिष्टमेवास्याः, विशिष्टमेव च पर्णादिजन्यं, न त्वनवस्थितायाः काचिद्वासनेति, "यद्येवं नीलज्ञानक्षणस्यापि प्राक्तनस्य कस्यचित् तत्स्वरूपं विशिष्टमेवास्तु येन विसदृशं पर्वताकारं रसाद्याकारं वा ज्ञानमनन्तरं जनयिष्यतीत्यप्रसङ्गः,, न, तस्य सदृशक्षणजनकत्वेन धारावाहिकज्ञानेऽभ्युपगमात्, "ननु क्षणभेदादन्यदेव तन्नीलज्ञानमिति कार्यभेदः,, तर्हि क्षणभेदाविशेषान्न कश्चित् सदृशं कार्यं जनयेत्, इत्येकसंतानात्मनोऽस्य शरीराद्याकारस्यापि विज्ञानस्याभावप्रसङ्गात् सर्वव्यवहाराभावप्रसङ्गः, संतानमूलत्वाद्भवतां व्यवहारस्य, "ननु नीलादिज्ञानक्षणः सदृशहेतुरपि भविष्यति,, न, तर्हि क्षणभेदात् कार्यभेद इति पूर्वः प्रसङ्गः, न, नीलज्ञानक्षणात्मनापि भेदात्, अन्यदेव ज्ञानं सदृशस्य क्षणस्य हेतुरन्यदेव विसदृशस्य । "कीदृशं कस्येति वाच्यं,, "यादृशाद्यादृशं प्रतीयते तादृशं तस्येति प्रतीतिसमुत्पादवादिनः,, तदिमे भृगुपतनस्थानस्यश्वान इवोपस्थितोपस्थितस्य निमित्तं कल्पयन्तः कुतः किं भवतीति हेयोपादेयसाधनेष्वनुत्पन्नबुद्धयः प्रेक्षावद्भिर्दूरतः परिहार्याः, तेषां हिताहितप्राप्तित्यागार्थैव तत्साधनजिज्ञासायां प्रवृत्तेः, "ननु संतानविषया सा भविष्यति,, न, क्षणानां जननासंभवेन तस्यासंभवात्, क्षणप्रवाहात्मकत्वात् तस्येति सर्वानियमपरिहारायानुभूयमानो बाह्योऽर्थः सत्यप्रकाशात्मनो भिन्नः प्रकाश्यस्वभावोऽभ्युपगन्तव्यः, तत्र सहोपलम्भमात्रेणास्यास्मादभेद इति, "बोध्यम्,, इत्यपि प्रतिज्ञापदं व्याख्यातमिति ॥

किंच सहोपलम्भनियमादभेदेऽपि नात्माभाव इत्याह ।

(२३) आत्मन्यसत्वं नो युक्तमहंप्रत्ययगोचरे ।

अहंप्रत्ययस्य स्थिरग्राहकपरामर्शरूपत्वेनात्मविषयत्वादस्यैवाध्यवसेयेनात्मना सहोपलम्भनियम इति द्वयोरपि संविद्रूपत्वसिद्धेः सत्यत्वमिति नैरात्म्याभावः, "नन्वात्मनो विकल्पातीतत्वेनोक्तत्वान्मोक्षकारिकास्वाचार्येण बुद्धिबोध्यत्वनिरासाच्चाहंप्रत्ययगोचरत्वं वाऽसिद्धमेव,, सत्यम्, आत्मादिप्रत्ययवत् कथंचिददूरविप्रकर्षेण सोऽपि व्यवहारार्थं तद्विषयोऽभ्युपगम्यत इति नासिद्धिः । "ननु वाध्यवसायस्यावस्तुविषयत्वादस्माकमध्यवसायेन सह भावो न सिद्धः,, युक्तमेतत् कदाचिद्बाह्यार्थवादिनो वक्तुम् । भवतस्त्वबोधात्मनोऽसंवेद्यत्वादध्यवसेयस्यापि संवेद्यत्वेन बोधरूपतयाध्यवसायस्येव सत्त्वमिति नासिद्धिस्तेन सहभावस्येति, "तर्हि वाऽसिद्धोऽयमहंप्रत्ययाभावेऽपि स्वसंवेदनेनात्मोपलम्भाभ्युपगमात्,, सत्यम्, अहमिति त्वध्यवसायेन सहभावोऽध्यवसेयतात्र हेतुः,सा च तदानीं नास्तीति तेन सहोपलम्भनियमो नासिद्धः,अन्या ह्यध्यवसायपरामृश्यतान्या च संविद्रूपतेति बुद्धिसंवित्त्यविवेकप्रसङ्गेन प्रदर्शितं स्वायंभुवोद्योत एव,इह त्वनुपयोगान्नोच्यते । भवद्भिरप्युक्तम्,

"अशक्यसमये ह्यात्मा चेतनानामनन्यभाक् ।
तेषामतः स्वसंवित्तिर्नाभिजल्पानुषङ्गिणी,, ॥

इति, अत एवोपयोगभेदादस्य नात्र गृहीतग्राहित्वमपितु तावन्मात्रेण प्रमाणत्वमिति दर्शयिष्यामः ॥

"ननु गौरोऽहं कृशोऽहमित्यनात्मनि शरीर एवाहंप्रत्ययस्य दृष्टेर्विरुद्धो हेतुरित्यत आह ।

(२४) नचान्यस्मिन्नहंबुद्धिः क्वचिद्दृष्टा तु निर्गुणा ।

न, विशेषितत्वाद्, गौरादिभिः पदार्थान्तरैर्विशेषितो ह्यहंप्रत्ययो माणवकादौ सिंहादिप्रत्ययवद् गुणवृत्त्या शरीरे वर्तते, तैरविशेषितस्तु मुख्यतयात्मन्येव, स एव चात्र हेतुरुक्तो न सविशेषण इत्यविरुद्ध एव ॥

"यद्येवं प्रत्ययव्यतिरेकेणान्यस्य कस्यचिदात्मनः प्रत्ययस्यानुपलब्धेर्वनाद्येकत्वप्रत्ययवदहंप्रत्ययोऽपि निर्विषय एवेत्यसिद्धो हेतुः,, । अत्राप्याह ।

(२५) कर्तृकर्मावभासा च स्पष्टा दृष्टा क्वचिन्मतिः ।
अहमेतत् प्रपश्यामीत्यतः सिद्धं स्फुटं द्वयम् ॥

सत्यं, "आविर्विषयो यद्यात्मा सर्वार्थप्रकाशकतया स्वतो नावभासेत,, स तु स्वसंवेदनेन विकल्पातीत एव सर्वदा भासत इत्युक्तम्, तद्विषयश्चायं प्राक्तनयेवाहंप्रत्ययः क्वचित् "अहमेतत् प्रपश्यामि,, इत्याद्यौ परामर्शविशेषे स्फुटः, सुस्फुटानुभव एव दृष्टः, इति न वनाद्येकत्वादिप्रत्ययवन्निर्विषयः, तत्रासिद्धिः प्रागुक्तस्य सहोपलम्भस्येति, "यद्येवं सहोपलम्भनियमादात्माद्वैतसिद्धिरितीष्टविघातः,, न, त्वत्पक्षेऽप्यप्रतिषेध्यमेवात्मसं-

Digitized by Google

वेदनमित्येवंपरत्वादस्य,परमार्थतस्त्वत इति, “अहमेतत् प्रपश्यामि,, इति परामर्शबुद्धेरप्यस्याः सकाशादात्मा सर्वार्थप्रकाशकत्वेन सर्वदा परामर्शनीयः । अर्थस्तु तत्प्रकाश्यतया क्रमेण प्रतीयत इत्यत्यन्तभिन्नमध्यवसीयमानत्वात् स्फुटमेतद्द्वयं सिद्धमिति न भेदोऽप्ययुक्त इति नेष्टविघातः, तदुक्तम्,

“अयमेव हि विज्ञेयो भेदो बोधार्थयोः स्फुटम् ।
पूर्वस्त्वनुभवाकार उत्तरश्चानुभूयते,, ॥

इति ॥

“नन्वयं घट इत्यादेर्द्वयविषयस्यापि विमर्शस्य दर्शनादनैकान्तिकता,, तदयुक्तमित्याह ।

(२६) सर्वमेव हि विज्ञानं कर्तृकर्मावभासकम् ।

“अयं घट इत्याद्यपि विमर्शविज्ञानं न विमृश्यमात्रविषयमेव युक्तं,, स्वात्मनो विमर्शाभावेन परविमृष्यस्येव तद्रूपत्वासिद्धेः, “स्वात्मनाप्यस्य तदानीं संवेदनात्मासिद्धिरिति चेत्,, न, संवेदनस्याप्यविमृश्यस्य गच्छतां तृणादिविषयस्येव सिद्धेः, यदाहुः,

“संवित्तिरपरामर्शाद्विद्यमानापि वस्तुतः ।
तृणादिवित्तिवद्यातुः सिद्धैवाविद्यमानवत्,, ॥

इति’ तस्मादात्मकर्तृक एव तेनासौ विमर्शनीयः, आत्मकर्तृके च विषये विमृष्टे स्वात्मापि तदुपसर्जनीभूतो विमृष्ट एव सामर्थ्याद्भवति, इति सर्वमेव विमर्शज्ञानं कर्तृकर्मद्वयविषयमेवेति नानैकान्तिकता ॥

अनुमानेनाप्येतत् सिद्धमित्याह ।

(२७) अयं संस्मर्यते यस्मात् तदहं दृष्टवानिति ।

अयं घट इत्यादिविमर्शविषया स्मृतिर्भवन्ती कर्तृकर्मकरणविषया दृष्टेति कर्मकरणयोरिव पूर्वं कर्तुरप्यशब्दं विमर्शं गमयत्येवेति सर्वो विमर्शो द्वयविषय एवेति, अत एव नावस्तुविषयो विमर्शः प्रत्यक्षवद्वस्त्वन्वयव्यतिरेकानुविधानात्, अन्यैरप्युक्तम्,

“अस्ति ह्यालोचनं ज्ञानं प्रथमं निर्विकल्पकम् ।
बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम् ॥
ततः परं पुनर्वस्तुधर्मैर्जात्यादिभिर्यया ।
बुद्ध्यावसीयते सापि प्रत्यक्षत्वेन संमता,, ॥

इति, “नन्वसत्यपि वस्तुनि घटादिविमर्शो मनोराज्यादौ दृष्टः,, सत्यम्, अत एव तयोर्वस्त्ववस्तुविषयत्वात् प्रत्यक्षतदाभासयोरिव भेदः, “ननु वस्तुविषयत्वेनाभिमतस्यापि स एवायं घट इत्येवमादेः पूर्वदृष्टतया विमर्शस्य प्रवृत्तेरधुना च पूर्वदर्शनाभावेन तदसंभवादवस्तुविषयत्वं,, न, प्राग्दर्शनाभावासिद्धेः, आत्मप्रकाश एवार्थदर्शनं, तच्च सर्वदास्तीत्युक्तम्, अतः प्राग्दृष्टतापीदानीं तत्र वस्त्वेवेति नावस्तुविषयः, न, घटादौ क्षणिकत्वस्यासिद्धेरिति वक्ष्यामः, “एवं तर्हि संतमसे स्पृशतोऽप्ययं घट इत्यदृष्टानां रूपादीनामवमर्शादवस्तुविषयो मानस एव सान्तो विकल्प इति,, न, तेषामेकसामग्रीप्रतिबद्धत्वेन विशिष्टात् स्पर्शलक्षणाल्लिङ्गादप्रत्यक्षाणामपि तदानीमनुमानात्, यदुक्तं भवद्भिरपि,

“एकसामग्र्यधीनस्य रूपादेरसतो गतिः ।
हेतुधर्मानुमानेन धूमेन्धनविकारवत्,, ॥

इति, “नचानुमानविमर्शोऽप्यवस्तुविषयः,, वस्त्वन्वयव्यतिरेकानुविधानेन प्रमाणत्वात्, प्रत्यक्षतद्विमर्शवत्, तदुक्तं भवद्भिरपि,

“अर्थस्यासंभवे भावात् प्रत्यक्षेऽपि प्रमाणता ।
प्रतिबद्धस्वभावस्य तद्धेतुत्वे समं द्वयम्,, ॥

इति, नाप्यस्फुटावभासत्वेनास्यावस्तुविषयत्वं, प्रत्यक्षस्याप्यर्थस्य दूरवर्तिनस्तत्संभवतोऽनैकान्तिकत्वात्, आगमोत्थोऽपि विमर्शस्तदागमप्रमातृज्ञानद्वारेण वस्तुनि प्रतिबद्धत्वाद्वक्ष्यकपित्थादिवाक्यश्रुतिजनितविमर्शवद्यथार्थ एव, तदुक्तं भवद्भिरपि,

“दृष्टोऽयमर्थः शक्येत ज्ञातुं सोऽतिशयो यदि,, ।

इति, प्रत्यक्षानुमानागमबहिष्कृतस्तु विमर्शो मनोराज्यादिविमर्शवद्वस्तुप्रतिबन्धाभावादवस्तुविषयोऽस्तु, “अहमेतत् प्रपश्यामि,, इति तु विमर्शः संविदितात्मार्थविषयत्वान्नावस्तुविषयः किंतु प्रोक्तनयेन प्रत्यक्षविशेषत्वात् प्रमाणमेवेत्यतोऽप्यात्मसिद्धिः, ततश्च “बोधेन,, इत्येतदपि प्रतिज्ञापदं व्याख्यातमिति ॥

तदेवमात्मनि साधकबाधकप्रमाणसदसत्ताभ्यां सद्व्यवहाराभावे निरस्तेऽपि लौकायतिकाः प्राहुः, “अस्त्वेवं शरीरादिव्यतिरिक्तः सर्वार्थसाक्षितया स्वसंवेद्योऽहंप्रत्ययप्रत्येयत्वेन चाभिरूप एवात्मा, स तु प्रयाणकाले विनश्यत्युत्पत्तिमत्त्वाद् घटादिवदस्थिर एव,नचायमसिद्धो हेतुः शुक्रशोणितादिपरिणामविशेषभावे चैतन्यात्मनस्तस्योत्पत्तिदृष्टेः, तदभावे चादृष्टेर्वह्नाविव धूमस्य कार्यत्वं सिद्धं यतः, तदिदमुक्तम्, “चैतन्यपरिपूर्णो हि कायो जायत इति,, एतत् प्रतिक्षिपति ।

(२८) स्थिरत्वं चापि पुंसोऽत्र स्मरणादेव गम्यते ।

स्थिरत्वं जन्मनः प्रागपि सत्त्वाशुक्रशोणितादिपरिणामविशेषादुत्पत्त्यभावः पुंसो जन्मसमनन्तरं स्मरणाद्धेतोः प्रतीयते ॥

तत्र तावद्धेतोरस्य व्याप्तिं साधयति ।

(२९) यतोऽन्येनानुभूतेऽर्थे तदन्यस्य न जायते ।

स्मरणं हि विशिष्टैकाधिकरणानुभवपूर्वकं स्वात्मनि

Digitized by Google

बाल्यावस्थात उत्तरकालं निश्चितमेव यतः, पटीयसोऽनुभवाद् देवदत्तादौ स्मरणं न दृश्यत इति स्मरणस्य विशिष्टैकाधिकरणानुभवपूर्वकत्वेन व्याप्तिसिद्धिः ॥

पक्षधर्मत्वमप्याह ।

(३०) हर्षादि लक्ष्यते येन तज्जाते यौवनस्थवत् ।
अर्थानुभवसंस्कारतद्व्यक्तिस्मृतिपूर्वकम् ॥

जाते लब्धशरीरजन्मनि पुरुषे जन्मनोऽनन्तरं मुखविकासाद्यन्यथानुपपत्त्या येन कारणेन हर्षादि तावल्लक्ष्यते, आदिग्रहणात् स्थानकरणाभिघातादि, यदाहुः,

"आद्यः करणविन्यासः प्राणस्योर्ध्वं समीरणम् ।
स्थानानामभिघातश्च न विना पूर्वचेतनाम्,, ॥

इति, तच्चोन्मत्त इव न वातादिक्षोभजनितं, तत्र तदनावृत्तेऽपि तदानीं सर्वस्मिन्ननुभवाद्, अपितु यौवनादिस्थे पुरुष इव तदर्थस्यार्थ्यमानस्य सुखादेस्तत्साधनस्य वा यो योऽनुभवः, तेनाहितो यो बुद्धौ संस्कारः, तस्य प्रबोधाद्यत् स्मरणं तत् तत्कारणकं लोके लक्ष्यत इति, यत्र हर्षादि तत्रावश्यं तथाभूतंस्मरणमित्यतोऽनुमितानुमानेनास्य पक्षधर्मत्वसिद्धिरित्युक्तं भवति ॥

"ननु सुखाद्यनुभवपूर्वकमपि यौवनाद्यवस्थावति पुरुषे हर्षादि दृश्यते,, इति तत् स्मरणसिद्धावनैकान्तिकमित्याह ।

(३१) नचाप्यनुभवस्तस्य लक्ष्यतेऽनुभवे यतः ।

यस्मादनुभवविषये तस्य पुंसः सुखाद्यनुभवस्तदानीं सुखसाधनक्षीरपानाद्यभावद्वारेण न लक्ष्यते नास्तीति निश्चीयते, ततः सुखाद्यनुभवाभावे सतीति विशेषितं हर्षादिहेतुत्वेन प्रयुज्यमानमव्यभिचारविशिष्टं सुखादिस्मरणं गमयतीति नानैकान्तिम् ॥

ततः किमित्याह ।

(३२) भवान्तरमतिक्रान्तमतः पुंसोऽनुमीयते ।

अतो हर्षादिलिङ्गविशिष्टस्मरणाद्विशिष्टैकाधिकरणानुभवपूर्वकत्वेन सिद्धव्याप्तिकाज्जातस्य पुंसो भवान्तरमतिक्रान्तमनुमीयते, नतु शरीरेण सह जन्मेति, यावपि शुक्रशोणितकार्यत्वेऽस्य तद्भावभावतदभावाभावौ तावपि स्वतः प्रागभावप्रध्वंसाभावासंवेदनात् परचैतन्यस्य च परेण प्रत्यक्षीकर्तुमशक्यत्वाच्च संभवत इति, यथा च स्थानकरणादीनामप्यत्र गमकत्वं तथा दर्शितमाचार्येण रौरववृत्तौ परमोक्षनिरासकारिकाभिः,

"जन्मान्तरानुभूतेऽर्थे स्मृतिर्जातेऽपि दृश्यते ।
मथनाय भवेत् सा च स्तन्यं प्रत्यपसर्पणात्,, ॥

इति, तत एवावधार्यम् ॥

(३३) एवं चानादिका तस्य योक्तव्या जन्ममालिका ।

एवमनेन क्रमेणानादिजन्मप्रबन्धः पुंसः साध्यः, ततश्चानादिधर्मयोगित्वादविनाश्यादिसंभवः, उत्पत्तिमत्त्वाद्धि घटादिवदनित्यत्वमस्योक्तं भवद्भिः, तच्चानादिमत्त्वाच्च संभवतीत्यविनश्वरोऽप्यात्मेति सिद्धम् ॥

"ननु चानादेरप्यस्य मोक्षे परमात्मलयादेव प्रदीपनिर्वाणवादिनामिव जीवात्मवादिनां विनाशो भवति,, इत्याह ।

(३४) शुद्धे प्रमुक्तविज्ञाने सर्वापप्लवहानितः ।

नास्माकमात्मनाशो मोक्षोऽपितु सर्वबन्धनिवृत्तिः सर्वज्ञत्वाभिव्यक्तिश्चेति वक्ष्यामः,

तदेवं "प्रवृत्तिफलभोक्ता च,,इति प्रतिज्ञापदमामुत्रिकफलविषयतया व्याख्यातम् ॥

अधुना, ऐहिकफलविषयतया दर्शयितुं क्षणिको ग्राहकात्मेति शाक्यपक्षो न केवलं प्राक्प्रदर्शितबाधकप्रमाणसद्भावादयुक्तो यावत्साधकप्रमाणाभावादपीत्याह ।

(३५) क्षणिकत्वस्य नो मानं भेदादर्शनतोऽस्ति हि ।

तथाहि, अश्रावणः शब्द इतिवदयं पक्षः प्रत्यक्षनिराकृतः, भेदादर्शनात्, स्वसंवेदनप्रत्यक्षेणानारोपितस्य तदभेदस्य प्रोक्तनयेन प्रकाशनादित्यर्थः । किंच न सन्ति प्रमाणानि प्रमेयार्थानीतिवत् स्ववचननिराकृतः प्रमाणाभाव इवैतस्य क्षणिकत्वे प्रतिज्ञावचनस्यानुपपत्तः, पौर्वापर्यरहितो हि कालः क्षण इति भवतामभ्युपगमः, अनेकक्षणनिर्वर्त्यं चैतद्वचनं कथं क्षणो निर्वर्तयेदिति विरोधः, "सत्यम्, अस्माभिः पक्षप्रयोगो नेष्यते त्रिरूपादेव लिङ्गात् साध्यसिद्धेः,, तदपि तर्ह्यत्र लिङ्गमुच्यताम्, "ननु यत् सत् तत् सर्वं क्षणिकं, क्षणिकत्वाभावे सत्त्वाभावः, संश्च ग्राहकात्मेति सत्त्वाख्यमेव,, यद्येवं विरुद्धोऽयं हेतुः, सत्त्वस्याक्षणिकत्वेन सर्वत्र घटादौ दृष्टान्ते व्याप्तिसिद्धेः, "ननु विद्युज्ज्वालादिरत्र दृष्टान्तः,, न, तस्याप्यस्मदादिगोचरत्वेनानेकक्षणरूपत्वात्, असर्वदृशां क्षणविषयव्यवहारस्य भवद्भिरप्यनभ्युपगमात्, क्षणरूपत्वे वानैकान्तिक एव, "ननु शुद्धं सत्त्वमत्र हेतुः,, यद्येवमसिद्धः, नहि सत्त्वमात्रमक्षणिकत्वरहितं क्वचिद्धर्म्यन्तरेऽपि सिद्धम्, "ननु विजातीयवृत्तिद्वारेण प्रतिनियतभागाभिनिवेशित्वाद्विकल्पानां घटादावपि लोहितो मृण्मयः परिवर्तुल इत्यादिविकल्पान्तरविषयलौहित्यादिपरिहारेण सत्त्वविकल्पः प्रवर्तमानः सत्त्वं शुद्धमेव विषयीकरोतीति कथमसिद्धः, यदुक्तम्,

"यावन्तोंऽशसमारोपास्तन्निरासेन निश्चयाः ।
तावन्त एव शब्दाश्च तेन ते भिन्नगोचराः,, ॥

इति, युक्तमेतद्धर्मान्तरविषयम्, नत्वक्षणिकविषयं, तेन विना विकल्पत्वानुपपत्तेः, सर्वो हि विकल्पः प्राग्दृष्टतया स एवायमिति प्रवर्तमानो विकल्पतामासादयति, योजना कल्पनेत्ययोजकत्वेन निर्विकल्पत्वप्रसङ्गात्, योजनैव चार्थे स्वात्मन्यप्यक्षणिकतानिश्चयः, नह्यात्मन्यपि क्षणिकत्वे सति विशिष्टशब्दवाच्यतयायं घट इत्यपि योजनोपपद्यते, यदुक्तम्,

"तद्दृष्टावेव दृष्टेषु संवित् सामर्थ्यभाविनः ।
स्मरणादभिलाषेण व्यवहारः प्रवर्तते„ ॥

इति, तद्योजनात्मकत्वाद्योजितव्यार्थवदात्मापि योजकत्वेन तदुपसर्जनीभूतोऽक्षणिकतया निश्चित एव सर्वेण विकल्पेन भवति. इति न धर्मान्तरं लौहित्यादिकमिव सत्त्वविकल्पेनाक्षणिकत्वमपि परिहर्तुं शक्यमिति, शुद्धः सत्त्वाख्यो हेतुरसिद्ध एवेति, यदि शुद्धोऽयं हेतुः,ततो नित्यानित्ययोरेकेनान्वितत्वाद्वस्तुधर्मत्वेनोभयबहिर्भावायोगाच्च शब्दानित्यत्वादौ श्रावणत्वादिवदसाधारणानैकान्तिकः, यथादृष्टान्वितस्तु न शुद्धोऽतश्च विरुद्धः, इत्युक्तम्, सर्वस्य च सतः क्षणिकत्वेन व्याप्तिप्रदर्शनतोऽक्षणिकस्य परमार्थसतो वैधर्म्यदृष्टान्तस्यानुपपत्तेः, विपक्षव्यावृत्त्यसंभवेन केवलान्वय्ययं हेतुः स्यादगमकः, त्रिरूपस्य गमकत्वेन हेतोरुक्तत्वात्, न विपक्षाद्वा वृत्तिर्हेतोस्तृतीयं रूपं, येनैष दोषः स्यात्, अपितु साध्याभावे साधनाभावात्मव्यतिरेकः, अत एव ततोऽन्यस्तद्विरुद्धस्तदभावो विपक्षोऽस्माभिरुक्तः, स चास्यास्तीति न केवलान्वयित्वम्, तदुक्तं,

"तस्माद्वैधर्म्यदृष्टान्ते नेष्टोऽवश्यमिहाश्रयः ।
तदभावेऽपि तन्नेति वचनादपि तद्गतेः„ ॥

इति, यद्येवं संदिग्धव्यतिरेकोऽयं हेतुः, वचनगम्यस्यार्थस्य संदिग्धरूपत्वात्, निधिमानयं भूभाग इतिवन्निश्चितरूपत्वे हि प्रतिज्ञामात्रादेव साध्यसिद्धेः किमनेनासिद्धेरुपन्यासायासेन, "ननु वैधर्म्यदृष्टान्ताभावेऽप्यस्य विपक्षे बाधकप्रमाणबलाद् व्यतिरेकनिश्चयोऽस्तीति न संदिग्धव्यतिरेकता„, यद्येवं तदेव बाधकं प्रमाणं प्रथममुपन्यसनीयं, तेन विना हेत्वभिधानस्यास्यानभिधानसमानत्वात् । "अन्यक्षणिकस्य सतो विनाशहेत्वयोगादिति„, न, अस्य विरुद्धत्वात्, विनाशहेत्वयोगो ह्यविनाशं साधयति नतु क्षणिकत्वम्, "एवं तर्हि दृष्टत्वेन विशेष्यते, घटादीनां ह्यविनश्वरस्वभावत्वेन दृष्टस्य कृतकत्वादिनानुमितस्य वा विनाशस्य हेतुरसमर्थ एव, विनश्वरस्वभावस्य वा व्यर्थः, स्वभावादेव विनाशसिद्धेः, स्वभावस्य चाविशेषात् प्रतिक्षणं सतो विनाशः सिध्यतीति„, "यद्येवमसिद्धः, बाह्यकात्मनो विनाशहेत्वदर्शनस्य प्रतिपादितत्वात्„ दृष्टविनाशादेव च विपक्षादनेनास्य हेतोर्व्यतिरेकः सिध्यतीति नादृष्टविनाशात् परमाण्वादेः संभाव्यमानादिति पुनरपि संदिग्धविपक्षव्यावृत्तिरयमनैकान्तिक एव, नच विनाशहेतोरत्र सामर्थ्यमेव वैयर्थ्यं वेति वक्ष्यामः, "तर्हि नित्यस्य क्रमयौगपद्याभ्यामर्थक्रियाविरोधादित्येतद्विपक्षे सर्वत्रास्तु बाधकं प्रमाणं„, न, आश्रयासिद्धत्वादिदमप्यप्रमाणमेव, नहि नित्यः कश्चिदर्थो भवद्भिरभ्युपगम्यते, यत्रायं हेतुः सिद्धः स्यात् "प्रतिवादिनः सिद्धत्वाद्धेतुरेवेति„, चेत्, कथं तस्य सिद्धिः, "धर्मिणः सिद्धत्वादिति„, चेत्, स कुतोऽस्य सिद्धः, "प्रमाणेन यदि„, वादिनोऽपि सिद्ध एव, वस्त्वधिष्ठानात् प्रमाणस्येति, कथं नित्यप्रतिक्षेपः, "अप्रमाणादभ्युपगममात्रात् तस्य सिद्ध इत्युच्यते„, यद्येवमसदेवासौ कथं वस्तु साधयेत्, वस्तुनो हि वस्तुसिद्धिरित्युक्तं, "ननु यत्र क्रमयौगपद्याभ्यामर्थक्रियाभाव इति धर्मयोर्व्याप्तिमात्रप्रदर्शनेन धर्मिणः कस्यचिदनाश्रयणाच्चाश्रयासिद्धतात्र दोषः, यदाहालंकारकारः,

"प्रसङ्गसाधनमिदं नाश्रयासिद्धता ततः ।
यद्येवं स्यादिदमपि नचोभयमितीष्टता„ ॥

इति, यद्येवमपक्षधर्मत्वेन न्यूनत्वादयमहेतुरेव, "कथमस्य विपक्षव्यावृत्तिं साधयेत्„, नह्यन्वयव्यतिरेकावेव हेतोर्लक्षणं, त्रिरूपस्यैव हेतुत्वेनोक्तत्वात्, प्राग्वच्च व्याप्तिरप्यत्रासिद्धेति दर्शयिष्यामः,

धर्मोत्तरास्त्वाहुः, "सत्त्वं क्रमयौगपद्याभ्यां व्याप्तमतः क्रमयौगपद्याभावेन सत्त्वाभावोऽत्र व्यापकानुपलब्ध्या साध्यः, तत्राश्रयासिद्धत्वम्, अभावस्यासत्यपि शशविषाणादाविव नित्ये धर्मिणि सिद्धत्वात्, भावात्मनो हि हेतोस्तत्रैष दोष एव प्रसङ्गविपर्ययनिष्ठः प्रसङ्गहेतुरिति„,

एतदप्ययुक्तं, भवद्भिरपि स्वसाध्यप्रतिबद्ध एव हेतुरुच्यते, यदुक्तम्,

"कार्यकारणभावाद्वा स्वभावाद्वा नियामकात् ।
अविनाभावनियमः„,

इति, नचाभावहेतोरत्यन्तावस्तुनः क्वचित् प्रतिबन्धः संभवतीत्यहेतुता, यदाहालंकारकारोऽपि,

"अभावमात्रके हेतौ क्व किं केन प्रसाध्यताम्„ ।

इति, प्रतिबन्धे हि वाभावरूपतेत्यसिद्धत्वमुक्तं, शशविषाणादीनां तु विकल्पकल्पितत्वेनाभावव्यवहारादिमात्रविषयत्वं काल्पनिकमेव सिद्धं, नतु कस्यचित् साधनतयेत्यविरोधः, अत एवानुपलब्धेः प्रतिपत्त्यध्यवसायवशादभावसाधनत्वम्, परमार्थतस्तु वस्तुनो विशिष्टाद्विशिष्टस्य वस्तुनः सिद्धेः स्वभावहेतुत्वमेवेत्युक्तं भवद्भिरेव,

"प्रयोगः केवलं भिन्नः सर्वत्रार्थो न भिद्यते„ ।

इति, न किंचिदेतत् ।

अन्ये पुनराहुः, "यदेव सपक्षत्वेन घटादिनिष्ठं तदेव साध-

द्विपक्षत्वेनापि, तत्सिद्धं च बाधकं प्रमाणमिति कुतोऽस्याश्रयासिद्धता,, "यद्येवं पुरुषेच्छाकृतास्य सपक्षविपक्षव्यवस्था, न वस्तुत इति पक्षसपक्षान्यतरत्वादेरिवानुमानाभासता,, नच सपक्ष एव विपक्षः संभवति साध्यभावाभावयोरत्यन्तविरोधात्, न वस्तुतोऽस्य सपक्षत्वाद्, विपक्षत्वं तु घटादेरारोप्य बाधकेन प्रमाणेन निषिध्यते, यदि घटादेरक्षणिकत्वं स्यात्, ततोऽक्षणिकस्य क्रमयौगपद्याभ्यामर्थक्रियाविरोधः स्यात्, करोति चार्थक्रियाम्, अतः क्षणिक इति, यथा यद्यत्र वह्निर्न भवेद्धूमोऽपि न भवेत्, अस्ति च धूमः, तस्मादत्राग्निः, इत्यविरोधाच्चाश्रयासिद्धता,

तदप्ययुक्तं, विरोधासिद्धेः, अक्षणिकस्यैव घटादेः क्षीरघृतधारणाद्यर्थक्रिया क्रमेण प्रदीपादेश्च वर्तिदाहतैलक्षपणादिका युगपद् दृश्यत इति कुतस्तद्विरोधसिद्धिः। तस्यैव स्वभावत्वात् क्रमेणार्थक्रियाया अनुपपत्तेः सर्वाः कालान्तरिका अपि युगपत् कुर्यात्, नच ता युगपद् दृश्यन्ते, एवं च क्रमेणैवानेकार्थक्रियाजननैकस्वभावः सिद्धः, न युगपदित्यविरोधः, "अथ किमर्थं क्रमेण करोति,, तथास्वभावत्वाद्युगपदिवेति वक्ष्यामः, तदेवं विपक्षे बाधकस्य प्रमाणस्यासंभवादनैकान्तिकमेतच्च क्षणिकत्वस्य साधकं प्रमाणमिति ।

अभिनवशाक्यास्त्वाहुः, "नास्य विपक्षे बाधकप्रमाणवशादसत्तानिश्चयोऽपितु वस्तुप्रतिबन्धाधिष्ठानाद्विचारादेव, सत्त्वं हि विचार्यमाणं तेजोरूपं दाहकत्व इव स्वभावप्रतिबन्धादेवाक्षणिकाच्चिवर्त्यमानं क्षणिकत्वे विश्राम्यति, इति वस्तुस्वरूपपर्यालोचनासिद्धमेतत्, अतो नाश्रयासिद्धतादिपूर्वोक्तदोषप्रसङ्ग इति,, ।

यद्येवमर्थापत्त्यात्मकोऽयं विचारः प्रोक्तप्रतिभात्मको वा, यथाहुर्वैयाकरणवृद्धाः, "नापूर्वं किंचिदिति,, प्रमाणान्तरत्वादस्य प्रत्यक्षमनुमानं च प्रमाणमेवेत्यभ्युपगमविरोधः, अप्रमाणत्वे तु कथं ततो विपक्षाभावनिश्चयः, सदसन्निश्चयहेतोरेव प्रमाणत्वात्, "ननु वस्तुरूपपर्यालोचनयापि नयनिद्रामसंनिहितार्थविषय ऊहात्मको निश्चयो दृश्यत एव,, सत्यं, योग्यतानुमानादेवासौ नान्यतः, यदुक्तं भवद्भिरपि,

"हेतुना यः समग्रेण कार्योत्पादोऽनुमीयते ।
अर्थान्तरानपेक्षत्वात् स स्वभावोऽनुवर्णितः,, ॥

इति । अपिच प्रतिबन्धविचार इति कोऽर्थः, किं विचारात् प्रतिबन्धसिद्धिः, आहो स्वित् सिद्धे प्रतिबन्धे विचार इति, पूर्वस्मिन् कल्पेऽत्यन्तासंबद्धयोर्घटपटयोरपि विचारात् प्रतिबन्धः स्यादित्यनवस्था । अथ द्वितीयः पक्षः, तर्हि प्रत्यक्षसिद्धत्वात् प्रतिबन्धस्य तेजोदाहकत्वयोरिवोत्तरकालभाव्ययं विचारः स्मृतिपूर्वकव्यवहारप्रवोक्तः स्यादिति न ततोऽपूर्वार्थप्रतिपत्तिः, यदुक्तं,

"तद्दृष्टावेव दृष्टेषु संवित् सामर्थ्यभाविनः ।
स्मरणादभिलाषेण व्यवहारः प्रवर्तते,, ॥

इति, नच सत्त्वक्षणिकत्वयोः कथंचिदपि प्रतिबन्धः सिद्ध इति तद्विषयस्य विचारस्यानुपपत्तेः कथं ततोऽस्य हेतोर्विपक्षाद् व्यावृत्तिः, येन क्षणिकत्वसिद्धौ मानता स्यादिति ॥

अभ्युपगम्यापि क्षणिकपक्षमनिर्मोक्षप्रसङ्ग इत्याह ।

(३६) पुनर्भवप्रसङ्गः स्यान्निर्निमित्ते ह्युपप्लवे ।

ते हि दुःखात्मनोऽस्य संसारस्य समुदये निमित्तमविद्यातृष्णे गीयेते, यदुक्तं,

'दुःखे विपर्यासमतितृष्णाभावन्धकारणं१ ।
जन्मिनो यस्य ते न स्तो न स जन्मादि गच्छति,, ॥

नच तयोर्निमित्तत्वमुपपद्यते, प्रतिक्षणं पूर्वस्यैव नीलपीतादिज्ञानक्षणात्मनः समनन्तरप्रत्ययस्यात्र निमित्तताभ्युपगमतोऽन्यस्यासंभवात्, तदुक्तं,

"यस्मिन् सति भवत्येव यत् ततोऽन्यस्य कल्पते ।
तद्धेतुत्वेन सर्वत्र हेतूनामनवस्थितिः,, ॥

इति, ततो निमित्तान्तराभावेनैतावन्मात्रनिमित्तत्वादस्य संसारात्मनो विप्लवस्य प्राग्वत् पुनः प्रसङ्गान्मोक्षलक्षणस्य निरोधस्य तदुपायस्य च समुदयनिरोधमार्गाणां चतुर्णामप्यार्यसत्यानामसत्यतैवेति ॥

अस्तु वा पारंपर्येणाप्येतद्रागाविप्लवोऽस्यैव निमित्तं, नतु ग्राह्यग्राहकात्मन इत्याह ।

(३७) निमित्तं साधु वक्तव्यं मेयमानव्यवस्थितेः ।

नहि यत्र ग्राह्यग्राहकव्यवस्था तत्राविद्यातृष्णे भवतामपि सिद्धे वीतरागपुरुषाणां सर्वज्ञानां च तयोरसंभवात्, असाध्ययुक्तमत्र तयोर्निमित्तत्वं ॥

"ननु ग्राह्यग्राहकव्यवस्थानिमित्तत्वमेतयोः स्वप्ने सिद्धम्,, इत्याह ।

(३८) स्वप्नादिप्रत्यया येऽन्ये दृष्टान्तत्वेन ते मताः ।
वासनादिकृतास्तेऽपि सुस्थिराणोर्भवन्ति हि ॥

नहि तत्रापि तयोर्निमित्तत्वं केनापि प्रमाणेन सिद्धम्, अपितु कर्मोपसंस्कृताया अनुभववासनाया एव, यथानुभवं रूपाद्यालोकनेव दुःखादिवेदनाज्जात्यन्धानां स्वप्ने रूपाद्यनवभासाच्च, वासनाश्च स्थिरात्मवादिनामेवोपपद्यन्ते न क्षणिकपक्षे इत्युक्तं प्राक् । "कथं तर्हि भ्रान्तिप्रतिभासा विषया द्विचन्द्राद्याकाराः,, तस्या विकारात्, किंत्वध्यवसायवासनोपस्थापितबुद्ध्याकारविषया एवेत्युक्तम्, अत्यत्रावभासा असत्यविषयाः, असतो भासनायोगाच्च विपरीतार्थाः, तेन तेन रूपेण तस्यास-

१ विपर्यासमतितृष्णाभे बन्धकारणम्, इति पाठान्तरम्

त्यत्वतः, प्रोक्तदोषाच्चात्माकाराः, अन्तःकरणतत्त्वस्य भागा बहिरिव स्थिता इति तेषामपि विप्लवनिमित्तता ॥

एतदेव दर्शयति ।

(३९) समस्तमेयमानादिगीतं धीवादिनापि हि ।
अन्तर्भावग्रहात्मत्वान्मिथ्यात्वमपि तस्य न ॥

नहि ग्राह्यग्राहकग्रहणात्मनो भेदस्यास्य विज्ञानवादिभिरभावोऽभिधातुं शक्योऽनुभवसिद्धत्वात्, अपितु विज्ञानस्वभावत्वमेव, ततो भावग्रहात्, विज्ञानरूपत्वेनाप्यस्य सत्त्वान्मिथ्यात्वमुपप्लवरूपत्वं नोपपद्यते, अपितु बोधरूपतैवेत्यनिवर्त्यत्वाद्द्वयासिद्धेरनिर्मोक्ष एवेति ॥

"ननु ग्राह्यग्राहकप्रकाशस्य प्रमाणबाधितत्वादनात्मन्यात्मबुद्धेरिवोपप्लवरूपत्वमेव, न विज्ञानस्वभावता", तथाहि प्रत्यक्षं सर्वमिदं घटादिग्राह्यं ग्राहकाच्च भिद्यते ग्राह्यत्वात्, भेदे हि देवदत्तयज्ञदत्तज्ञानयोरिव परस्परमग्राह्यता स्यात्, अस्ति च सा, ततो द्वयाभाव एवेति, यदाहुः,

"परमार्थेन न ग्राह्यं ग्राहकं वा न किंचन ।
अविद्यानिर्मितः सर्गो विप्लवोऽयं जनस्य तु" ॥

इति, अत आह ।

(४०) प्रत्यक्षं ज्ञानमेवेति मिथ्यावाक्यं तदेव हि ।
सर्वं प्रतीयते यस्मान्नच बाधः कथंचन ॥

एतदपि परस्परविरुद्धत्वाच्च बाधकं, बाधकस्याप्यस्य ज्ञानस्य बाध्यमानार्थविषयत्वात्, तदविषयत्वे तन्निषेधानुपपत्तेर्बाधकत्वायोगः, इति ग्राह्यस्य सर्वस्याबाध्यत्वेन प्रतीयमानत्वाच्चानात्मन्यात्मबुद्धेरिवोपप्लवरूपतेति, अत एव "प्रत्यक्षा बुद्धिरेव", इत्यादिनाचापौनरुक्त्यं, साध्यभेदात् ॥

किंच धर्मस्वरूपविपरीतसाधनोऽयं हेतुर्भवतामित्याह ।

(४१) ग्राह्यत्वादर्थवद्बुद्धेरनवस्था प्रसज्यते ।

ग्राह्यत्वाद्धीसंवेद्यत्वेऽर्थस्य ज्ञानस्यापि ज्ञानान्तरग्राह्यत्वेनैव संवेद्यत्वादस्वसंवेद्यताप्रसङ्गः, तस्यापि चासंवेद्यत्वे तद्ग्राह्यत्वानुपपत्तेस्तस्य तस्यापीत्यनवस्था ॥

नन्वज्ञातमपि ज्ञानमिन्द्रियमर्थवज्ज्ञानान्तरं ग्रहीष्यति, ततो नानवस्थेति पूर्वानुवादेनाह ।

(४२) बुद्ध्यन्तरगृहीता धीर्यदर्थे संप्रवर्तते ।
स्यादसंस्था तयोर्यावन्नैवं दृष्टं कथंचन ॥

युक्तमेतच्चक्षुरादीनामर्थसाक्षात्कारं प्रति कारकत्वात्, ज्ञापकानां लिङ्गशब्दादीनां स्वप्रकाशं विना ग्राह्यप्रकाशकत्वं न कदाचिद्दृष्टमिति ज्ञानस्यापि ज्ञापकत्वात् स्वप्रकाशं विना ज्ञानान्तरग्राहकत्वव्यवस्था नोपपद्यत इति सर्वाप्रत्यक्षत्वप्रसङ्गः, तदुक्तम्,

"अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यति" ।

इति ॥

किंच वाद्यसिद्धोऽयं हेतुरित्याह ।

(४३) स्वांशं प्रत्यवसानं च विज्ञानं तेन कल्प्यते ।

विज्ञानवादिनाप्येकस्य विज्ञानस्य घटाद्यात्मनोऽनेकत्वं परिकल्प्यं, यदुक्तम्,

"एकं चेच्चित्रविज्ञानमिदं चित्रतरं ततः" ।

इति, विज्ञानांशपरमाणुपर्यन्तभेदः कल्पनीय इति घटादेरर्थाभिमतस्य प्रत्यक्षत्वासिद्धेरित्यनुभवविरोधश्च ॥

अपिच विज्ञानसंतानान्तरमपि न शक्यमेव कल्पयितुमिति किमर्थं शास्त्रप्रणयनं दानादिसर्वव्यवहारप्रलोपोऽस्येत्याह ।

(४४) नचाप्यालम्बनं भिन्नं संतानान्तरमस्ति हि ।
स्वाकारं चेत्यमित्यस्मात् सर्वाभावः प्रसज्यते ॥

कायवाग्व्यवहारो हि स्वशरीरे विशिष्टविज्ञानपूर्वको दृष्ट इति परशरीरेऽपि तद्दर्शनाद्विज्ञानमनुमीयते सर्वैरेव, विज्ञानवादिनां तु स्वाकारस्यैव सर्वस्य चेत्यत्वात्, स्वप्नवत् परशरीरासिद्धेर्मिथ्यैव प्रतिभास इति कुतस्ततो ज्ञानसंतानान्तरसिद्धिः, सिद्धावपि न भिन्नमालम्बनं सिध्यत्यर्थवत्, तस्यापि भिन्नस्य साकारेण निराकारेण वा ज्ञानेन विषयीकर्तुमशक्यत्वात्, इति तदपि स्वाकारात्मकमेव वेद्यं सिध्यतीति, यदुक्तं,

"बुद्धिपूर्वां क्रियां दृष्ट्वा स्वदेहेऽन्यत्र तद्ग्रहात् ।
ज्ञायते यदि धीश्चित्तमात्रेऽप्येष नयः समः" ॥

इति, तदप्ययुक्तमित्यतः कः कस्य किं कुर्यादिति सर्वव्यवहाराभावप्रसङ्गः, ततः सत्यभूत एव ग्राह्यग्राहकभेदोऽभ्युपगन्तव्य इत्यनिवर्त्यत्वाद्द्वयासिद्धेरनिर्मोक्ष एव भवताम् ।

अधुना यैर्बाह्यमभ्युपगम्य साकारमेव तस्य ग्राहकमिष्यते, अर्थज्ञानयोराकारभेदं नोपलभामह इति वदद्भिः, तान् प्रत्युच्यते ।

(४५) संगुप्तकारणस्येह योगिनो बुद्धिपद्धतिः ।
अपास्तविषयाकारा दृष्टा तस्मात् प्रतीयते ॥
शब्दादिविषयो योऽपि बोधः सोऽप्यतदाकृतिः ।
तत्परिच्छेदरूपोऽसौ तदाकार इति भ्रमः ॥

भवेदेतत्, यद्यर्थज्ञानयोराकारभेदो नोपलब्धो भवेत्, स तूपलभ्यत एव, तथाहि समुपहृतसमस्तकरणवृत्तेरत एव विनिवृत्ताखिलविषयाकारवेदनस्य संविन्मात्रयोगिनः शुद्धमेव विज्ञानात्मरूपं प्रबन्धेन प्रकाशत इति भवदागमेऽपि दृष्टम्, अद्वयस्यार्थानारूषितस्यान्यथा प्राप्त्यसंभवात्, प्रोक्तं चाध्यात्म-

Digitized by Google

कुशलेरपि, "तदा द्रष्टुः स्वरूपेऽवस्थानम्, इत्यर्थोकाराद्भिन्न एव ग्राहकः सिद्धः, ततो भेदादेव शब्दादिपरिच्छेदकाले तत्परिच्छेदकत्वमेव ग्राहकात्मनोऽनुभवसिद्धत्वात् प्रत्येतुं शक्यं, नतु शब्दाद्याकाररूपता,ऽनुभवविरोधात्, इति साकारपक्षोऽपि भ्रम एव ॥

एतदेव सूचयन्नाह ।

(४६) अर्थ एव हि साकारो यतस्तद्वान् स गृह्यते ।

अर्थो ह्यनेकनीलपीताद्याकारभेदभिन्नो ग्राहकात्मनः प्रत्यगूपेणाध्यात्ममनुभूयमानात् पुरो रूपत्वेन बहिर्देशसंबद्धः साकार एव वेद्यत इति, ततोऽनाकाराज्ज्ञानाद्भिन्न एव युक्तः ॥

॥ हरिविलासकाव्यम् ॥

आकारणार्थं वसुदेवसून्वो-
रक्रूरमक्रूरमुखं स्वभावात् ।
तथान्तरे प्रेषयति स्म कंसो
वीरावतंसो यमसद्म यास्यन् १ ॥ १ ॥

भावितद्वदनचन्द्रदर्शन-
प्रेमपूरपरिपूरितोदरः ।
रामकृष्णपदपांशुपावनम्
प्राप गोकुलमसौ कुलोज्ज्वलः ॥ २ ॥

असंख्यगोसंख्यविराजमाने
दीपक्रियासादरसुन्दरीके ।
संवीक्ष्य नन्दस्य गृहे रमन्तौ २
मनोरमौ तौ रथमुत्ससर्ज ॥ ३ ॥

निगदितनिजनामा वेष्यावायेसरस्तौ
रभसरभसयुक्तो विश्ववन्द्यो ववन्दे ।
प्रसृतभुजयुगाभ्यां गाढमालिङ्गितः सन्
शुक इव भवदुःखं नैव किंचिद्विवेद ॥ ४ ॥

आलिङ्गितोऽसौ परमेश्वरेण
रामेण विश्वैकमनोरमेण ३ ।
हर्षाश्रुसंयुक्तविलोचनोऽसौ
धन्यं वपुर्मानयति स्म सर्वम् ॥ ५ ॥

नन्देन पश्चात् परिपूजितोऽसौ
दिव्यासनस्थो गलिताध्वखेदः ।
गोपाङ्गनाक्लेशकरं चिराय
वक्ता स वाक्यं वदति स्म किंचित् ॥ ६ ॥

नन्द ते तनुजदर्शनोत्सुकः
कंसभूमिपतिरस्ति संततम् ।
तत् प्रगृह्य तनयावुभाविमौ
सद्य एव मथुरा विलोक्यताम् ॥ ७ ॥

तन्निशम्य वचनं तदीरितम्
तापमाप परमं व्रजाधिपः ।
माधवस्तु मुदमापदुद्धताम् १
दैत्यनिर्दलनसाधनोद्यतः ॥ ८ ॥

उषसि यास्यति यादवनन्दनो
मधुपुरीं प्रति कंसकृतादरः ।
इति निशम्य वचो विषदुःसहम्
निजगदुस्तमरातिमिव स्त्रियः ॥ ९ ॥

अक्रूर ते नामनि निश्चयेन
बली बहुव्रीहिसमास एव ।
अस्माकमात्मानममुं यतस्त्वम्
कृतान्तवन्नेतुमुपागतोऽसि ॥ १० ॥

ततः प्रभाते समुपस्थितेऽसौ
नन्दादिगोपैः सह शोभमानः ।
आरुह्य तत्स्यन्दनमादिदेवो
व्रजाद्बहिः किंचिदुपाजगाम ॥ ११ ॥

आगम्यतां कमललोचन शीघ्रमेव
स्नेहं न मुञ्च नच विस्मर दीनबन्धो ।
कृष्ण त्वदेकशरणा वयमत्र सर्वा
नार्यः सनीरनयना हरिमित्थमूचुः ॥ १२ ॥

अत्रागमिष्याम्यहमाशु तावत्
प्रयात यूयं गृहमिन्दुमुख्यः ।
इत्थं समादिश्य मधूसदना-
हृदयवीर्या हरिरुत्प्रचाल ॥ १३ ॥

आगताः कायमपि व्रजं प्रति

---

१ धूतदुर्विचारः, इति पाठान्तरम् ।
२ वसन्तौ, इति पाठान्तरम् ।
३ पश्चात् परमादरेण, इति पाठान्तरम् ।

१—हुत्कटम्, इति पाठान्तरम् ।
वसन्तौ, इति पाठान्तरम् ।

प्राणनाथविरहाकुलीकृता: ।
हन्त ता निजगृहेषु संस्थिता:
संस्थिता इव सरोजलोचना: ॥ १४ ॥

नापाठयन्मृदुगिर: शुकसारिकास्ता
नालालयंश्च नकुलान् पृथुकानिव स्वान् ।
किंचाम्बुदध्वनिमुचो मुरजस्य नादै-
र्नानर्तयन् किमपि केलिकलापियून: ॥ १५ ॥

एषा सा यमुना तटे च तदिदं वृन्दावनं पावनम्
क्रीडाकुञ्जगृहास्त एव सुमन:स्तोमाभिरामश्रिय: ।
तेनैकेन विना परंतु परमानन्देन गोष्ठौकसाम्
गाढोद्वेगगतोऽजसां किमपि हा प्रीते: पदं नाभवत् ॥ १६ ॥

विरहहुतवहाकुलीकृतानाम्
प्रतिदिवसं व्रजवामलोचनानाम् ।
दिवसगणनयाङ्गुलीदलानाम्
ननु ननु हन्त समयमयमासीत् ॥ १७ ॥

अपि रजनिषु निद्रादैन्यदूना दृगासी-
दहह दुरतिवाहो१ वर्षवद्वासरोऽभूत् ।
यदुतिलकवियोगव्याकुलानां वधूनाम्
परभृतकृतजल्प: कालकल्पश्च जज्ञे ॥ १८ ॥

हर हर विरहाग्नौ प्रौढिमानं प्रयाते
मलयजहरहाराहारसंसर्गसारात् ।
व्रजजनतरुणीनां तामधाम्नां ललाम्नाम्
स्रगपि कुचतटस्याङ्गारतां गाहते स्म ॥ १९ ॥

रतिनायकसायकप्रतप्र-
व्रजनारीनयनाम्बुसिन्धुदम्भात् ।
प्रतिसद्म जगाम भानुकन्या
किमु कृष्णस्य विलोकनोत्सुकत्वात् ॥ २० ॥

अमृतं गरलं वदन्ति य-
द्विषजस्तन्मतमुत्तमं सखि ।
वितनोत्यमृतद्युतिर्यत:
परितापानिति काचिदब्रवीत् ॥ २१ ॥

न शैवलं शैवलिनीषु किंचि-
न्न पुष्करं पुष्करिणीषु तद्वत् ।

१ दुरतिवाह्यो, इति पाठान्तरम् ।

न वा मृणालानि मृणालिनीषु
स्मरप्रतप्तप्रमदोपचारात् ॥ २२ ॥

प्रथमाचरवर्जितानि तासाम्
भवनानि व्रजसुभ्रुवामभूवन् ।
विषयप्रकरो यकारशून्यो
न कदाचिन्न रतिर्विना विनाऽभूत् ॥ २३ ॥

चक्षुश्च्युतप्रचुरपुष्करबिन्दुवृन्दै-
रार्द्रीभवत्पृथुपयोधरभूधराया: ।
मुक्ताफलैर्विदधिरे त्रिपुरारिपूजाम्
प्राप्तुं पुन: प्रियमिव व्रजवारिजाक्ष्य: ॥ २४ ॥

पुण्यान्यपुण्यान्यपि पुष्कलानि
व्रजप्रियाणामिति तर्कयाम: ।
सर्वेश्वरस्याद्भुतहर्षहेतो-
र्योगो वियोगोऽपि बभूव यस्मात् ॥ २५ ॥

आलिङ्गति स्तनयुगं हरिरादरेण
बिम्बाधरं पिबति वस्त्रमपाकरोति ।
वंशीरवेणैषनवेश्च मुदं ददाति
स्वप्ने कया न ददृशे सुदृशेति शश्वत् ॥ २६ ॥

वृन्दावनं पुष्पभराभिरामं१
गोवर्धन: कुञ्जकदम्बमाली । ।
कलिन्दकन्यापुलिनं२ च दृष्टुं
नवं नवं तद्विरहं चकार ॥ २७ ॥

इति तद्विरहानलाकुला३
ललना: क्लेशशतानि लेभिरे ।
भगवान् विविधद्विजद्रुमान्४
पथि पश्यन् स शनै: शनैरगात् ॥ २८ ॥

अनिमिषमसकृत् तद्वीक्ष्यमाणेन दूरा-५
द्रथचरणतुरंगोद्धूतधूलीभरेण ।

१ गोपकदम्बशालि, इति पाठान्तरम् ।
२ पतङ्गपुत्रीपुलिनं, इति पाठान्तरम् ।
३—कुलाकुला, इति पाठान्तरम् ।
४ भगवानपि वृक्षपंक्तिका:, इति पाठान्तरम् ।
५ वियतिविह्वतिभाजा वायुवेगेन क्षिप्त—, इति पाठान्तरम् ।

Digitized by Google

गगनमभिगतेना१लिङ्गितायां समन्तात्
सुरसरिति पयोधेः पङ्कजत्वं प्रपेदे ॥ २९ ॥
वीचिचञ्चलविहंगमावृताम्
पद्मपङ्क्तिसुरभीकृतोदकाम् ।
प्राप तां भगवतीं विवस्वतो
नन्दिनीं स किल नन्दनन्दनः ॥ ३० ॥
वल्लवैः सह दिगीन्द्रवन्दितौ
तौ स्थितौ पुलिन एव निर्मले ।
स्नातुमम्भसि ततः श्रमक्लम२-
ध्वंसकारिणि ममज्ज वैष्णवः ॥ ३१ ॥
तमेव साक्षात् पुरुषं पुराणम्
पुरारिमुख्यामरसेव्यमानम् ।
स तत्र दृष्ट्वा बहिरन्तरस्थम्
प्रेम्णा स्तवं तस्य ततान सम्यक् ॥ ३२ ॥
अजामिल इलातले मलिनमूर्तिरासीन्महान्
न तेन सदृशः श्रुतो नच विलोकितः कुत्रचित् ।
अहो अपि तवाभिधास्मरणतः स मुक्तोऽभवत्
तदाप्रभृति माधव३ त्वयि सुखं खलः खेलति ॥ ३३ ॥
अपहाय भवत्पदारविन्दम्
परमानन्दमरन्दशोभमानम् ।
अधमाः कतिचित् कृपापयोधे
विषकल्पान् विषयान् भजन्ति शश्वत् ॥ ३४ ॥
मम सूनुरसौ मम प्रियासौ
धनमेतन्मम मन्दिरं ममैतत् ।
इति केशव केऽपि संगिरन्ते
न पुनर्नाम तवाभिराममेतत् ॥ ३५ ॥
अनित्यसुखलब्धये क्रतुषु कर्मठाः केचन
श्रुतेर्वचनमात्रतः पशुवधं सुखं कुर्वते ।
परंतु परमार्थतस्तव पदारविन्दद्वयम्

१ अपिहितमिहिरेणा—, इति पाठान्तरम् ।
२ तदध्वज,— इति पाठान्तरम् ।
३ स तु त्वदभिधावशात् चिरमसुख्य,मुक्तः स तान् निरस्य महतोऽखिलान इति पाठान्तरम् ।

कृतान्तकमहाभयं हृदि न चिन्तयन्ति प्रभो१ ॥३६॥
निरन्तरनिरादराः सुतसुहृत्सुदृक्सद्मसु
प्रसन्नमृदुमानसा गिरिगुहागृहावासिनः ।
प्रतिक्षणभवत्कथाकलितकौतुकाः सार्थकम्
नयन्ति मनुजा जनुर्जनपदे गतं२ केचन ॥ ३७ ॥
जलजन्तुधृतो महागजेन्द्रः
पशुरप्येष भवत्स्मृतिं चकार ।
सदसद्भिदुरैरतस्त्वमेव
स्मरणीयोऽसि विपत्सु विश्वबन्धो ॥ ३८ ॥
गृहं सुरसमृद्धिमत् प्रियतमा रमास्पर्धिनी
मतिर्गुरुगुरुत्वहृद्वपुरहो सुखस्यास्पदम्३ ।
यशः शशिवदुज्ज्वलं ज्वलनवत् प्रतापः प्रभो
समग्रमिदमाप्यते तव पदप्रसादोदयात् ॥ ३९ ॥
भवज्वरनिवृत्तये पतितपावन त्वत्पद-
प्रवालमिदमौषधं हृदि सकृत् सुधीर्धारयेत् ।
अपथ्यमिह वर्जयेद्विषयवासनालक्षणम्४
वसेच्च विजने वने फलदलाम्बु संशीलयेत् ॥ ४० ॥
पदाम्भोरुहाम्भो दधाति त्वदीयम्
महेशोऽपि साक्षात् सदा मस्तकेन ।
विधिस्तावदासीद्भवन्नाभिपद्मा-
दतः कः समस्ते समस्तेश्वरः स्यात् ॥ ४१ ॥
यज्ञादिकर्मैककृतादराणाम्
गतागतप्राप्तिरवश्यमेव ।
त्वन्नाम नारायण ये स्मरन्ति
तरन्ति ते संसृतिसागरं द्राक् ॥ ४२ ॥
अक्रूर इत्थं स्तुतिमीश्वरस्य
श्लोकैरतिश्लोककरैरकार्षीत् ।

१ परंतु न शुकादिवत् समसमस्तभूताः प्रभो भवन्ति भवहेतवे भवति भक्तिमातन्वते, इति पाठान्तरम् ।
२ श्लाघ्यतां, नयन्ति मतिमज्जना जनपते जनुः, इति पाठान्तरम् ।
३—हृद्वपुरनङ्गभङ्गप्रदम्, इति पाठान्तरम् ।
४ अपि प्रियतमाजनाननिरीक्षणं वर्जयेत्, इति पाठान्तरम् ।

Digitized by Google

ततः प्रणामं शिरसाभिरामम्
पुनः पुनः प्रेमसमुद्रमग्नः १ ॥ ४३ ॥
भवविरक्तमना भगवत्प्रियो
रविसुतासलिलाद्बहिरागतः ।
विहितसर्वविधिर्हृदि विस्मितो
रथमथो विदितर्जुपथोऽभ्यगात् ॥ ४४ ॥
नानागुणैरवनिमण्डलमण्डनस्य
श्रीसूर्यसूनुहरिभूमिभुजो नियोगात् ।
त्रैलोक्यकौतुककरं क्रियते स्म काव्यम्
लोलिम्बराजकविना कविनायकेन ॥ ४५ ॥

इति श्रीमत्सूर्यपण्डितकुलालंकारश्रीहरिहरमहाराजोद्द्योतितलोलिम्बराजकृते हरिविलासे महाकाव्ये भगवद्दर्शनं नाम चतुर्थः सर्गः ॥ ४ ॥ :: ॥ :: ॥ :: ॥

संयुतं वाजिभिर्वायुवत् सत्वरै- २
श्चामरैश्चारुभिः शोभितैः सर्वतः ।
नोदयामास तं रामकृष्णान्वितम् ३
गान्दिनीनन्दनः स्यन्दनं सुन्दरम् ॥ १ ॥
अवलोकनलोलविलोचनयो-
र्यदुनन्दनयोर्नवयौवनयोः ।
पथि काचन काञ्चनचारुरुचिः
प्रमदा प्रमदातिशयं विदधे ॥ २ ॥
तन्मुखोद्गतकथाकदम्बका-
कर्णनाविदितवर्त्मवेदनः ।
माधवोऽथ सहसैव पेशलम् ४
पश्यति स्म मथुरां पुरीं पुरः ॥ ३ ॥
मुग्धाः प्रदीपपटलीं प्रथमं नयन्ति
यस्यां रतेरवसरे वसनाञ्चलेन ।
अङ्गस्थभूषणमणिप्रकराः परंतु
तासां वृथा विदधते बत चेष्टितं तत् ॥ ४ ॥
पश्यन्ति यत्र यमुनामसकृद्गवाक्ष-
मार्गैर्मृगाङ्कवदनाः परिपूर्णतीराम् ।
अम्भोविहारविहितादरवारिजाक्षी-
वक्षोजपीवरविनोदिविटावलीभिः ॥ ५ ॥
दिनकरकरजालैर्यत्र संशोषितेषु
प्रलयदहनकल्पैः केलिवापीजलेषु ।
अलिकुलपरिपीता अप्यमन्दा मरन्दा
जलजजठरजाताः पूर्ववत् पूरयन्ति ॥ ६ ॥
आरुह्य सौधशिखराणि नवातपानि
पीनस्तनद्वयपरिश्रमतः कथंचित् ।
प्रक्षालयन्ति वदनं वनिताः प्रभाते
यस्यां सदा सुरसरित्सलिलैः सलीलम् ॥ ७ ॥
अन्यत्र भिक्षुर्लभते सुशीलो
वपुर्वियोगे परमं पदं यत् ।
यस्यां सदा मद्यमदप्रसक्ता
वाराङ्गनास्तत् सुखमाप्नुवन्ति ॥ ८ ॥
सरभसमवगाह्यते कथंचित्
सुतनुजनेन विलासवापिकाम्भः ।
ज्वलदतुहिनभासि मासि यस्याम्
चलमकरं मकरन्दवत् सुजातम् ॥ ९ ॥
अनुपमरचनानां यत्र लीलागृहाणाम्
मरकतखचितानि प्राङ्गणक्ष्मातलानि ।
अविरलरसपानारब्धगानालिकान्ता-
कुलकुसुमसुजातैः पारिजातैर्जयन्ति १ ॥ १० ॥
रहसि विलिखितस्य प्राणनाथस्य चित्रे
दृढतरपरिरम्भारम्भरङ्केकभूमिः २ ।
चकितचपलचक्षुर्वीक्ष्य वक्त्रं सखीनाम्
स्मितसुभगमुखश्रीर्लज्जते यत्र योषा ॥ ११ ॥
अविरतभगवत्कथैकताना:
प्रमदजलार्द्रदृशश्च्युतप्रपञ्चाः ।
निमिषमिव दिनं नयन्ति यस्याम्
कति कति भागवतोत्तमा न शश्वत् ॥ १२ ॥
अथ पथि रजकं ददर्श कंचित्

१ ततः प्रणामं स करोति यावत् तावत्
त्रिलोकीतिलकस्तिरोऽभूत्, इति पाठान्तरम् ।
२—द्रुत्वरैः, इति पाठान्तरम् ।
३ श्रीपतेराज्ञया नोदयामास तं, इति पाठान्तरम् ।
४ माधवोऽपि सहसैवपेशलाम्, इति पाठान्तरम्

१ मदनकलिकलाविलासिनीमण्डनस्थं प्रचुरकुसुमजातैः पारिजातैर्नयन्ति, इति पाठान्तरम् ।
२—शङ्केकभीरुः, इति पाठान्तरम् ।

Digitized by Google

प्रभुं वरो वसनानि तं ययाचे ।
न स कुमतिरदात् ततः शिरोऽस्या-
पहरदुदग्रकराग्रमण्डलाग्रः ॥ १३ ॥

ततो वसित्वा वसनानि सम्यक्
पीताम्बरोऽसावसिताम्बरश्च ।
शेषाण्यदाद्गोपकदम्बकाय
तेषां तदा काचन कान्तिरासीत् ॥ १४ ॥

धरणिरमणमार्गे कंसदासी विवक्रा
मधुमथनमलिम्पद्बाहुरुचा चन्दनेन ।
स सपदि हृदि हृष्टस्तां मनोज्ञामकार्षी-
न्न भवति महतां हि क्वापि मोघः प्रसादः ॥ १५ ॥

आनन्दकन्द यदुराज यदि प्रसन्न-
स्तन्मां सुखीकुरु विचित्ररतिप्रकारैः ।
इत्थं स्मरज्वरवशाद्बहु भाषमाणां
तां साधु साध्विति हरिः प्रहसन्नुवाच ॥ १६ ॥

पीताम्बरो जलदनीलरुचिः स कृष्णः
श्यामांशुको जलजगौरतनुः स रामः ।
इत्थं यथार्थमयथार्थविदे जनाय
सूचीमुखेन सरलेन शशंस कश्चित् ॥ १७ ॥

निरीक्षितः सौधशिरःस्थिताभि-
स्तां राजधानीं पुरसुन्दरीभिः ।
समग्रगोपावलिमध्यवर्ती
विवेश कृष्णश्च सकृष्णवस्त्रः ॥ १८ ॥

तमागतं भृत्यमुखान्निशम्य
समस्तसैन्यैः सहितः समन्तात् ।
कंसः कृतान्तप्रतिमल्लमल्लै
रङ्गस्थले मञ्चमुरीचकार ॥ १९ ॥

यत्र स्थितः कंसमहीश्वरोऽसौ
भटैर्वृतो हस्तगृहीतशस्त्रैः १ ।
स्थलं तदेवाभिससार शौरि-
स्त्रासेन हीनः सह तैः सुहृद्भिः २ ॥ २० ॥

जिघांसया तस्य समागता ये
मल्ला मदान्धा धरणीध्रकल्पाः ।
सर्वेऽपि ते तेन बलोद्धतेन
नीताः पुरं प्रेतपतेः क्षणेन ॥ २१ ॥

अथ परमलघिम्ना मञ्चमारुह्य तुङ्गम्
मृगपतिरिव शृङ्गं भोगिभोगप्रमेश ।
अहह तदसिना द्राक् पातयामास मह्याम्
नलिनमिव मनोज्ञं कंसकं स प्रकोपात् ॥ २२ ॥

प्रकटितघृतसाराः कान्दिशीकत्वभाजाम्
तदनु तदनुगानां शस्त्रवस्त्राणि चक्रुः ।
अपि पशुपतिडिम्भाः सोत्सवा निर्भयत्वा-
न्मदकलकरिकल्पा रङ्गभङ्गं च चक्रुः ॥ २३ ॥

महामहसमुद्भवाद्व्रजसदामधीशोऽभवत् १
प्रफुल्लनलिनाननः सह समग्रगोधुग्गणैः ।
हतेषु परिपन्थिषु प्रथितपौरुषेषु क्षमा-
द्विपत्तितिमिरातुरोद्धरणसूनुना सूनुना ॥ २४ ॥

प्रभुमपि पशुपालने यदेनं
व्रजपतिरादिशति स्म तत् प्रमाणम् ।
सदुचितमधमाधमाय तस्मै
व्यतरदहो यदसौ स्वरूपयोगम् ॥ २५ ॥

एष यास्यति बतैकक: कथं
नाकनाथनगरीं स्वमातुलः ।
प्राहिणोदिति धियेव सत्वरम्
सीरभृत् तदनु तस्य सैनिकान् ॥ २६ ॥

कुसुमवृष्टिरकारि तदा सुरै-
र्ननृतुरप्सरसश्च पुनः पुनः ।
जगदिदं गतशल्यमभूत् सुखम्
विदधिरे च तपांसि तपस्विनः ॥ २७ ॥

अथ तत्र गतत्रपयेत्य गृहा-
दतिनिर्दयताडितमस्तकहृत् ।
परिगृह्य शिरः करयोः कुपते-
र्विललाप विलासवतीनिकरः ॥ २८ ॥

फुल्लदम्बुरुहरम्यलोचनं
कर्णलम्बिकमनीयकुण्डलम् ।
केन वज्रकठिनात्मना हृतं

१ वीरैर्वृतः शस्त्रसमेतहस्तैः, इति पाठान्तरम् ।
२ सिंहो यथा कुञ्जरकुञ्जकेलि, इति पाठान्तरम् ।

१ महामहसमन्वितः समभवद्यशोदापतिः, इति पाठान्तरम् ।

प्राणनाथ भवतः शिरः क्षतात् ॥ २९ ॥
कोटिशः करटिनस्त्वयाहवे
लक्षशश्च ललितास्तुरंगमाः ।
पत्तिरेव सुकुमार हा कथं
त्वं गतोऽसि भुवनान्तरं प्रति ॥ ३० ॥
वीर हीनवसुदेवसूनुना
त्वां निशम्य निहतं महोदयम् ।
अद्य गोष्ठगतो गृहोदरे
नैव मास्यति मुदातिमेदुरः ॥ ३१ ॥
रुचिरं वदनं दृशौ सुदीर्घे
बत निःशेषनिशेशकल्पु वक्त्रम् ।
तनुता च तनौ स्तनौ च पीनौ
प्रिय विश्वं न सुखं विना त्वयैतत् ॥ ३२ ॥
हा प्रफुल्लनवकुन्दसुन्दरा-
स्ते नवाप्रतिम भान्त्यमी रदाः ।
यैर्भवान् व्यरचयद्व्रणावलीः
कोमलेऽधरदले पुनः पुनः ॥ ३३ ॥
अयि सुभग विना त्वया पुरीयं
वयमिव राजति हन्त नैव किंचित् ।
अहह किमनया महासमृद्ध्या
तृणवदसूनपि साम्प्रतं प्रतीमः ॥ ३४ ॥
विश्वं विलोकयति विश्वगिदं समस्तं
किं त्वं सुखं स्वपिषि भूमितले कठोरे ।
उत्तिष्ठ वीरवर पाण्डुरधाम्नि धाम्नि
पुष्पालिशालिशयने शयनं कुरुष्व ॥ ३५ ॥
भोजनप्रसर एष भूपते-
रेति नाद्य बहिरेव किं स्थितः ।
सारिका यदि गृहे गदेत् तदा
त्वं विपन्न इति को नु तां वदेत् ॥ ३६ ॥
अयि चुम्बसि चेन्न वक्त्रबिम्बं
कुचयोश्चेत् परिरम्भणं न दत्से ।
त्रपयास्य जनस्य वार्यते हा
किमु कोपो वरिवर्ति चक्रवर्तिन् ॥ ३७ ॥
त्वं गमिष्यसि महेन्द्रमन्दिरं
भोक्ष्यसे नवनवाश्च सुन्दरीः ।

हन्त दुःखमधुना वये वये
सुन्दरेश्वर न इव केवलम् ॥ ३८ ॥
युक्तमेव दिवि गामिना त्वया
तद्व्यधायि तदुपेक्षिता वयम् ।
ईदृशीं तव दशां निरीक्ष्य नो
यन्न दग्धहृदयं विदीर्यते ॥ ३९ ॥
रुदितैरुदितैश्च तत्र तन्वी-
र्व्यथयन्तीरिति भूमिपालपत्नीः ।
तमसः प्रशमोचितैर्वचोभि-
र्दृढमाश्वासयति स्म वासुदेवः ॥ ४० ॥
ततो व्यधात् पार्थिवमुग्रसेनम्
बन्धं स्वपित्रोश्च निराचकार ।
तत्त्रासतश्चापगतान् दिगन्तान्
सुहृद्गणानानयति स्म देवः ॥ ४१ ॥
रुचिरकुचतटीनां नाट्यकाले नटीनाम्
प्रतिगृहमथ तत्र प्रत्यहं प्रादुरासीत् ।
धिमिकिति धिमिधिक्लां धिग्धिगिन्नां धिगिलाम्
तगततगततत्थ्येयिथेयीति शब्दः ॥ ४२ ॥
अथ वन्द्यचरणः सुरासुरै-
रन्तुमिच्छति मया समं हरिः ।
कंसदूतिरिति जातनिर्वृति-
र्देहगेहसुषमां व्यरीरचत् ॥ ४३ ॥
भूषांशुकाश्वगजराजविराजमानान्
प्रस्थाप्य नाथहरिपालपतीन् समस्तान् ।
कृष्णस्तया सह सहस्रदलायताक्षो
ज्योत्स्नाकृतस्मरजनिं रजनीं निनाय ॥ ४४ ॥
प्राहिणोत् स सदयो व्रजाङ्गना-
सान्त्वनाय मतिमन्तमुद्धवम् ।
सोऽपि तं प्रति ययौ रथस्थितो
विश्वविश्वधृतविश्वभावनः १ ॥ ४५ ॥
चरमाचलमौलिमण्डनत्वं
द्युमणौ प्राप्तवति प्रभोर्भुजिष्यः ।
अविशद्व्रजमुद्धवाभिधानो
युतमानो रजसा गवां समन्तात् ॥ ४६ ॥

१—कृतविश्वभावनः, इति पाठान्तरम् ।

अतिरतिपरितापात् पाण्डुगण्डस्थलीभिः
प्रतिगृहकृततल्पं पल्लवैर्वल्लवीभिः ।
विरतसुरतलीलालास्यहास्यप्रसङ्गम्
व्रजपुरमभवत् तन्नोद्धवस्योद्धवाय १ ॥ ४७ ॥

सहसाद्धवमागतं रमाया
रमणस्यानुचरं स नन्दगोपः ।
तरसा परिरभ्य सप्रहर्षम्
गततर्षं विषयेषु विज्वरोऽभूत् ॥ ४८ ॥

संपूज्य तं विधिवदुद्धवमासनाद्यैः
सम्यक् समयविधिविद् विविधोपचारैः ।
नन्दस्तमित्थमवदद् घननील २ मूर्ति-
रास्ते स तव कुशली मुशली च तद्वत् ॥ ४९ ॥

पप्रच्छ यद्यद्व्रजसार्वभौम-
स्तत् तत् स तस्मै कथयांबभूव ।
तस्मिन् क्षणे ताः स्मरदुःखदीना
मन्दाक्षहीना जगदुस्तमित्थम् ३ ॥ ५० ॥

कंसो हतः स्वसुहृदामपकारकारी
प्राप्तं च राज्यममरेन्द्रपदानुसारि ।
दास्यन्ति भूमिपतयः सततः स्वपुत्री-
स्तागमो बत भवेदधुनास्य कस्मात् ॥ ५१ ॥

ग्राम्या वयं क्व पशुपालजनैकभोग्याः
सर्वोत्तमः क्व कमलाकरलालिताङ्घ्रिः ।
सङ्गोऽस्य यः समभवत् स शुभाचरस्य
न्यायस्तदाप्तिरधुना शशशृङ्गतुल्या ॥ ५२ ॥

अकृत सुकृतपुञ्जैः स्वप्नमध्येऽप्यलभ्याः
परमपुरपुरन्ध्रीः प्रार्थयन्तीर्विहाय ।
विदितरतिविशेषः श्रीपतिः प्राप्तराज्यो
यदनुभवति दासीस्तन्न संजाघटीति ॥ ५३ ॥

आगमिष्यति कदाचिदच्युतः
कौतुकेन कृपयाथवा पुनः ।
उद्धव ध्रुवमनेन हेतुना
जीवति व्रजविलासिनीजनः ॥ ५४ ॥

अपि सुचरितदीनोद्धारकस्य त्रिलोक्याम्
स्तृणतु विरुदमेतन्मूलभूतं कृपायाः ।
वयमिह विरहाग्नौ दह्यमाना वियुक्ताः १
सह स हरिणदृष्ट्या तत्र केलिं करोति ॥ ५५ ॥

हन्त किं न वयमुद्धव दीना
दीनबन्धुरपि किं न मुरारिः ।
ह्रीरुदेति हृदि नास्मदुपेक्षां
कुर्वतोऽस्य परमद्भुतमेतत् ॥ ५६ ॥

अनृतमुद्धव मा वद सर्वथा
भगवतः शपथस्तव वर्तते ।
बत वयस्य सभासु कदापि नः
किमपि स स्मरति स्मरसुन्दरः ॥ ५७ ॥

यावदार्य बत जीवितमास्ते
तावदेहि दयया परमात्मन् ।
एवमेव वद तं बत २ गत्वा
ब्रूमहे किमु वयं पुनरन्यत् ॥ ५८ ॥

इतीरयित्वा विरराम रामा-
कदम्बकं दृक्चलिताम्बुधारम् ३ ।
ततः स वाक्यं स्वयमाबभाषे
तन्मानसस्वास्थ्यकरं स्वभावात् ४ ॥ ५९ ॥

उत्कर्षः क्रियते कथं कुमुदिनीबन्धोः प्रतिस्पर्धिनः
कृत्वास्यं मलिनं विलोचनजलैः स्फारीभवत्कज्जलैः ।
आयास्यत्यचिरात् करिष्यति सुखोद्रेकं स वः पूर्ववद्
राकावैरवबन्धुबन्धुरमुखः कृष्णाभिधानो हरिः ॥ ६० ॥

इति मधुरवचोभिर्घोषसीमन्तिनीनाम्
मनसि मनसिजार्तं स्वास्थ्यवार्तां वितन्वन् ।
कतिचिदयमनैषीत् तत्र रात्रीस्त्रिलोकी-

---

१ व्रजनगरमभूत् तवोद्धवस्योत्सवाय' इति-
पाठान्तरम् ।

२ पप्रच्छ गोपपतिरित्थमनङ्ग—, इति पाठान्तरम् ।

३ तस्मिन् क्षणे गोपविलासवत्यो
निरस्तलज्जा जगदुस्तमित्थम्,
इति पाठान्तरम् ।

१ विमुक्ताः, इति पाठान्तरम् ।

२ इति इति पाठान्तरम् ।

३ इति ब्रुवाणो विरराम रामा-
गणो गलद्बाष्पवशोऽसरोजः, इति पाठान्तरम् ।

४ दुःखद्रुमोन्मूलनकारि तासाम्, इति पाठान्तरम् ।

पतिगुणगणगानोद्भूतहर्षाश्रुविन्दुः ॥ ६१ ॥
उचितं न करोति कैटभारिः
क्षणमप्येकमिहेति यन्न विद्वान् ।
इति स स्वमनस्यमंस्त तत्त-
द्विरहक्लेशकृशत्वदर्शनेन ॥ ६२ ॥
तत्समागमागमकृते बहु लौल्यं
कार्श्यमप्यतिशयेन शरीरे ।
वीक्ष्य सोऽप्यहह दुःखसहस्रा-
दश्रुपूरपरिपूर्णदृगासीत् ॥ ६३ ॥
सुजनवरयशोदानन्दसंदर्शनार्थं
यदुपतिमिह गत्वा प्रेषयेवैकवारम् ।
मुहुरिति मिलिताभिस्ताभिरुक्तो रथस्थः
कथमपि हरिदासो गोकुलान्निर्जगाम ॥ ६४ ॥
यद्यद्बभाषे सुमुखीसमूहो
यद्यत् स तद्वृन्यमवेक्षते स्म ।
तत् सर्वमागत्य गुणाकराय
न्यवेदयद्भागवतावतंसः ॥ ६५ ॥
सरस्वदुदरे क्षणादलघु हेमहर्म्यस्फुर-
च्चकार पुटभेदनं विगतवेदनं स्वर्गवत् ।
इभाभ्रशशभृद्वसेन्दु (१६१०८) मितसुन्दरीभिः समम्
स तत्र सुखमन्वभूद्यदुकुलावतंसो हरिः ॥ ६६ ॥
ज्ञात्वापि गोपललनाः स्वसमागमोत्का
नो गोकुलं प्रति जगाम जगन्निवासः ।
नानानरेन्द्रतनयाहृतचित्तवृत्ति-
र्जीर्णं जलं नवजलैर्ह्रियते हि नद्याः ॥ ६७ ॥
अनन्तः समं तासु कान्तासु लेभे
खनागाभ्रचन्द्रर्तुभू (१६१०८०) संख्यसूनून् ।
गुणज्ञान् गुणानां गणे रञ्जयन्तं
जयन्तं जयन्तं क्रमाद्धुर्न तेषाम् ॥ ६८ ॥
जनकृतकृतधर्मे तस्य राज्ये समन्ता-
दगणितभुजशौर्यौदार्यरूढस्य शश्वत् ।
गहनगहनमध्ये दस्युनामापि नासीत्
चिदशतरुसमानो याचमानो जनोऽभूत् ॥ ६९ ॥
अपि सवनसहस्रसंयुतोऽसौ
स्वयमकरोद्व्यवहारमेकविद्वान् ।
क्षणमपि खलसंगतिं न चक्रे
सुकविसभासु सभासु नित्यमासीत् ॥ ७० ॥
झटितीन्द्रियार्थसंयोगे हि प्रथममध्यवसायरहितं शुद्धमेव वस्तु पश्चात् तु घटोऽयमित्याद्यध्यवसायोऽपि संवेद्यत इति तदभेदोऽप्ययुक्तः । "ननु बुद्ध्यध्यवसितमर्थं पुरुषश्चेतयत इति सर्वेषां बुद्धिपुरुषविवेकवादिनामभ्युपगमः, ततः पूर्वमध्यवसायः पश्चात् संवेदनमिति भवतां स्थितिर्युक्ता नत्वियं शाक्यदर्शनपरिदृष्टेति,, सत्यं, स्मृतिप्रतिभादाविवासौ न सर्वत्रानुभवविरोधात्, नहि प्रतिदर्शनमनुभवभेदो युक्तस्तस्य वस्तुसिद्धत्वात्, नहि नीलं शाक्यानामेव नीलमार्हतानां तु पीतमिति शक्यमतिनिपुणतरैरपि वक्तुम्, अनुभवो ह्ययं वस्तुसामर्थ्यसिद्धः प्रथममनध्यवसायात्मक एव संवेद्यमानः कथमन्यथा व्यवस्थापयितुं शक्यः, यदाहुः,

"अस्ति ह्यालोचनं ज्ञानं प्रथमं निर्विकल्पकम् ।
बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम् ॥
ततः परं पुनर्वस्तु धर्मैर्जात्यादिभिर्यया ।
बुद्ध्यावसीयते सापि प्रत्यक्षत्वेन संमता,, ॥
इति युक्तमुक्तमियमेव स्थितिरिति ॥

"ननु न कारणं विषयो ज्ञानस्यानवस्थाप्रसङ्गात्, कारणत्वे चेन्द्रियादेरपि प्रसङ्गात् तदाकारतैव युक्तेत्याह ।

(४८) वस्तुनो जनकत्वं हि बुद्धिं प्रत्युपकारिता ।
कर्मतेन्द्रियसंबन्धादादानं नाकृतेरतः ॥

बुद्धिं प्रति वस्तुनो जनकत्वमुपकारित्वं कर्मता ग्राह्यत्वमेवोच्यते यतः, ततो न तदाकारादानमुपपद्यते, नाप्यनवस्थेत्याह, "इन्द्रियसंबन्धात्,, ग्राह्यत्वाविशेषेऽपि यदेवेन्द्रियसंबद्धं वस्तु तदेव गृह्यते नान्यद्यतः, तदुक्तम्, "सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षम्,, इति, अतो निराकारपक्षस्यैवानुभवसिद्धत्वादबाधितत्वाच्च सत्यत्वमिति साकारपक्षो भ्रान्त एवेति, अतश्च मुक्तावद्धर्यसिद्धिरित्युपसंहारः ॥

"नन्वेवमपि क्षणिकत्व इवाक्षणिकत्वेऽपि ग्राह्यस्य प्रमाणस्याभावात् क्षणिकत्वाक्षणिकत्वसंदेहादप्युपप्लवरूपम्,, इत्यक्षणिकत्वे प्रमाणमाह ।

(४९) अतोऽपि प्रत्यभिज्ञानाद् व्यभिचारे तु सत्यपि ।
स्थैर्यं क्वचिद् गृहीतं यत् स्वभावत्वेन वस्तुनः ॥

न केवलं प्राक् प्रदर्शितनयेन ग्राहकात्मन्येव स्थैर्यं, यावत् तद्ग्राह्येऽप्यर्थे प्रत्यभिज्ञानादिति, अयं घट इति स्थिरत्वेनैवाध्यवसायात्, नहि भवद्भिरप्यध्यवसीयमानं स्थैर्यमर्थेष्वपह्नोतुं शक्यमिति दर्शितं प्रागेव, "ननु लूनपुनर्जातेष्विव केशनखादिषु सादृश्यनिबन्धना स्थैर्यप्रतिपत्तिर्भविष्यतीत्याह,, "क्वचित्,, बाधकबलाद् व्यभिचारे तु सत्यप्यन्यत्राबाधिते विषये सत्यरजते रजताध्यवसायस्येव बाधकाभावादव्यभिचारः, "अत्रापि बाधकं प्रामणं भविष्यतीति चेत्,, न, असंभवात्, इत्याह "गृहीतं यत्,, इति, यस्मादिदं स्थैर्यं वस्तुग्राहिणा प्रत्यक्षेण नीलादिवत् प्रागगृहीतमेव, अगृहीते हि वस्तुरूपेऽध्यवसिते शुक्तिकारजतादेरिव केशनखस्थैर्याध्यवसायस्य बाधो भवत्येव, नतु गृहीते, नीलाध्यवसायस्येवानवस्थाप्रसङ्गात्, "ननु स्थैर्य-

Digitized by Google

स्यानेककालव्यापारात्मकत्वाद्वर्तमानमात्रग्राहिणा प्रत्यक्षेण ग्रहणं न संभवति,, इत्याह, "स्वभावत्वेन वस्तुनः,, इति, स्थैर्यमपि वस्तुस्वभावात्मकमेव, तदस्वभावत्वेन वस्तुनस्तदनुपपत्तेः, प्रणालिकायनिर्यत्त्वरिततरजलप्रवाहवत् प्रतिक्षणविनश्यद्रूपमेव सर्वं वस्तु दृष्टं स्यादिति प्रत्यक्षविरोधः, स्थिरात्मतयैव वस्तुनो ग्रहणात्, तदुक्तम्,

"रजतं गृह्यमाणं हि चिरस्थायीति गृह्यते,, ।

इति, "नच सदृशापरापरोत्पत्तेः स्थैर्यप्रतिपत्तिर्भ्रान्तेति युज्यते वक्तुम्,, तस्याप्यसिद्धेः, सिद्धे हि क्षणिकत्वे कदाचिदेतदुपपद्यते, अतश्चाद्ययावत् क्रिमात्मकं केन केन प्रमाणेन सिद्धमिति न कस्यचित् सिद्धम्, "नच वस्तुस्वभावमपि वस्तुनि गृहीते न गृहीतमिति शक्यं वक्तुम्, अभेदात्, यदुक्तं भवद्भिरपि,

"एकस्यार्थस्वभावस्य प्रत्यक्षस्य स्वतः स्वयम् ।
कोऽन्यो न दृष्टो भागः स्याद्यः प्रमाणैः परीक्ष्यते,, ॥

इति, "नापि च प्रत्यक्षं वर्तमानमात्रग्राहि,, तस्यापि स्थिरात्मकत्वात्, "इन्द्रियार्थसंनिकर्षस्तु वर्तमानो न प्रत्यक्षोऽर्थः, तत्संविद्वा,, आत्मस्वभावत्वात् तस्याः, इति प्रतिपादितम् ॥

एतदेव दर्शयति ।

(५०) भूयो भूयो हि योऽर्थात्मा गृह्यते त्वेकया धिया ।
यदा तदा च तत्स्थैर्यं ब्रूत केन निवार्यते ॥

एवं हि बोधिसत्त्वानामपि पुनः पुनर्दृश्यमानेषु जायाजनन्यादिष्वर्थेषु गुरुदासादिषु चानुरूपो व्यवहार उपपद्यते, अन्यथा विपर्यय एव स्यात्, "ननु संतानस्य जननीत्वं जायारूपता वेति चेत्,, न, तस्यापि संतानिव्यतिरेकेण वस्तुतोऽसंभवात्, संतानिनः क्षणस्यैव जननीत्वं यतो जातस्तस्यैवाभ्युपगन्तव्यम्, ततः पञ्चमस्य तु क्षणस्य "पञ्चमीं मातृबन्धुभ्यः,, इति समाचाराज्जायात्वं भवदविरुद्धमेव स्यात्, इति, जितं पशुभिर्भवद्दर्शनचेष्टानिष्ठैरेव, कथं वा पर्वतादिषु सर्वदैकरूपावभासेषु न स्थैर्यम् ॥

"ननु पर्वतादिष्वपि हेमन्तग्रीष्मादिजनितशैत्योष्णतादिविरुद्धधर्मयोगादवश्यं तद्भेदेन भेदः, ततः स्थैर्यानुपपत्तिः,, इत्याह ।

(५१) शीतादिभेदतो भेदो नहि भेदधियं विना ।

"नहि ग्रीष्महेमन्ताद्यात्मकशीतातपादीनामिव तदभिव्यङ्ग्यस्य तज्जन्यस्य वा शैत्योष्णतादेः पर्वतात्मनः स्वभावस्य भेदः,, युगपत् साकारज्ञान इवैकसामग्रीप्रतिबद्धे रूपादाविवाक्रमेण विचित्रैकस्वभावयोगात्, साकारं हि घटादिविज्ञानमेकमनेकरूपमेकसामग्रीप्रतिबद्धं च रूपाद्यनेकोपकारस्वभावमभ्युपगतमेव भवद्भिः, अन्यथा प्रतिपरमाणुभेदकल्पनया स्थूलाकारावभासस्यानेकोपकारायोगाच्च सामर्थ्यसंभवेन विशिष्टकार्योत्पादस्याभावप्रसङ्ग इत्युक्तं, तथेहापि क्रमेणानेकरूपानेकोपकारस्वभावस्य चाभ्युपगमादविरोधः, "ननु यौगपद्येनानेकस्य रूपस्यानेकोपकारशक्तीनां च तत्र समुच्चयाद्युक्तमैक्यम्, क्रमे तु परस्परपरिहारस्यावश्यंभावादत्र भेद एवेति,, न, तत्रापि पृथुबुध्नोदराणामनेकोपकारशक्तीनां च परस्परपरिहारेणैवावस्थितेः, अन्यथा ह्यणुमात्रमेव पिण्डः प्रतिभासेत, रूपादिसामग्र्यप्येकमेव कार्यं कुर्यात्, इति सर्वमसमञ्जसम्, तद्यथा, तत्रैकमनेकरूपम्, अनेकोपकारशक्तियुक्तं चैकं युगपत् तथास्वभावत्वादुपपद्यते, तद्वदिह पर्वताद्यपि क्रमेणानेकरूपमनेकोपकारशक्तियुक्तं चैकमेव तथास्वभावं स्थिररूपमनुभवतः सिद्धम्, इति विरुद्धधर्मायोगाच्च शीतादिभेदतो भेदः, अपितु यत्र भिन्ना बुद्धिः, तत्रैव घटपटयोरिव भेदः, यत्र त्वभिन्ना, तत्र घटाकारे विज्ञान इवाभेदः, यदुक्तं भवद्भिरपि,

"अभिन्नवेदनस्यैकं यच्चकं तत् तु भेदवत् ।
सिध्येदसाधनत्वेऽस्य न सिद्धं भेदसाधनम्,, ॥

इति ॥

अभ्युपगम्यापि शीतादिभेदेन भेदमाह ।

(५२) तदभेदादभेदश्च यावत् तावत् प्रसिध्यति ।

शीतातपादिभेदवत् तज्जनितशैत्योष्णतादिधर्मभेदेन पर्वतादेर्भेदेऽपि यावत्कालमभेदः शीतस्य हेमन्तात्मनो ग्रीष्मरूपस्य चातपस्य तावत्कालमभेदः, पर्वतादावपि स्थैर्यं केन निवार्यते, विरुद्धधर्मयोगाद्धि भेदः प्रतिपादितो नच तावन्तं कालमसावस्तीति तावन्तं कालं स्थैर्यं सिद्धमेव ॥

"ननु परतः स्वभावादेव तेन नष्टव्यमित्यविशेषात् पूर्वमपि विनश्येदिति क्षणिकत्वसिद्धिः,, इत्याह ।

(५३) विलक्षणस्य तूत्पादे कारणात् तन्निवर्तते ।
चिदात्मनः समुच्छेदो जन्म तस्याचितोऽपि च ।

शैत्यस्वभावात् तस्मात् पर्वतादेरातपादिसहकारिणस्तस्यौष्ण्यधर्मकस्यान्यस्यैव पर्वतादेरुत्पादे सति तत एवातपादेः कारणात् तत् पूर्वं शैत्यस्वभावपर्वतादि निवर्तते, अन्वयव्यतिरेकाभ्यां तथावगतेः, नतु स्वभावमात्रात्, इति कुतः क्षणिकत्वप्रसङ्गः, यथा च विनाशहेतोरसामर्थ्यवैयर्थ्यादयो न दोषास्तथा वक्ष्यामः, तत एव च कारणात् तदानीं तत्र प्रत्यभिज्ञाप्रत्ययस्यापि निवृत्तिः, तस्याचेतनस्य विलक्षणस्यौष्ण्यधर्म-

Digitized by Google

कस्य पर्वतादेर्जन्म यतः, इदमेव च धर्मपरिणामस्थैर्यवादिनः समापद्यते ॥

अथ कथमेकोऽसौ विलक्षणमेतत्कार्यत्रयं करोतीत्याह ।

(५४) स्वभावेन च सर्वेष वैचित्र्यं न भवे भवेत् ।

यद्येवं नाभ्युपगम्येत तदा सर्वत्रास्मिन् संसारे स्वभावेन वैचित्र्यमनेककार्यकर्तृत्वं न कस्यचिदपि भवेत्, इति प्रदीपादिरपि वर्तिदाहतैलक्षपणादिकार्यमनेकं न कुर्यादिति प्रत्यक्षविरोधः, तत एतदवश्यमेष्टव्यम् ॥

किंच, क्षणिकपक्षे कार्यकारणभावो न ज्ञातुं शक्य इत्याह ।

(५५) पूर्वोत्तरक्षणाज्ञानात् कार्यकारणता कुतः ।

क्रियापलापनिबन्धनः क्षणिकवाद इति न क्रियाविशेषयोगात् कारणत्वं वह्न्यादेः, अपितु प्राग्भाव एव, पश्चाद्भावस्तु धूमादेः कार्यता, तौ च पूर्वापरादिवत् पूर्वापरभावौ परस्परसंबन्धिरूपत्वादेकैकक्षणग्रहणकाले ग्रहीतुं शक्यौ, नचोभयक्षणग्राहकं ज्ञानान्तरं भवतां संभवति, क्षणद्वयस्थितिविकलत्वेन भावानामभ्युपगमात्, ततः प्रत्यक्षानुपलम्भसाधनः कार्यकारणभाव इत्येतदप्ययुक्तमिति, "ननु धूमहेतुस्वभावत्वाद् वह्निक्षणस्य तद्ग्रहणे गृहीतमेव तत्,, "यद्येवं सर्वज्ञज्ञेयत्वमपि तस्यास्तीति तस्यापि तद्ग्रहणे ग्रहणप्रसङ्गः,, न, "ग्रहणेऽप्यनिश्चयादिति चेत्,, न,क्षणिकत्वे निश्चयस्याप्यसंभवात्, इति न किंचिदेतत् ॥

अक्षणिकपक्षे तु नैष दोष इत्याह ।

(५६) सामर्थ्यव्यञ्जिका सिद्धा सामग्री सुस्थिरात्मनः ।

वह्न्यादिकारणसामग्री सुस्थिरा सती स्वात्मनः संबन्धिनो धूमादिकार्यजननसामर्थ्यस्य निश्चायिका सिद्धा, स्थिरायां सत्यां कार्यकारणतापरिच्छित्तिरुपपद्यते, न क्षणिकायामित्यर्थः ॥

एतदेव दर्शयति ।

(५७) व्यक्तसामर्थ्यकं वस्तु योग्यं कृत्यमपेक्ष्य तु ।

योग्यमक्षणिकमेव कार्यमपेक्ष्य कारणवस्त्वभिव्यक्तकारणसामर्थ्यं भवति ॥

(५८) स्थैर्ये सन्मानसंसिद्धे युगपत् क्रमशो यथा ।

दृष्टिस्तथाभ्यनुज्ञानं सामग्रीवशतः क्रिया ॥

स्थिरतरेण प्रमाणेन स्थैर्ये सिद्धे सति क्वचिद्यथा नटमल्लप्रेक्षादौ युगपद्दर्शनं गच्छतो विचित्राध्वविषयं च क्रमेणोपपद्यते, तथा क्रमेणेदम्, इदं तु युगपत् कार्यमित्यभ्यनुज्ञानं, कारणसामग्रीविशेषबलाच्च क्वचिद्युगपदन्यत्र क्रमेणार्थक्रियाप्युपपद्यते, नतु क्षणिकस्य, क्षणिकत्वादेव क्रमाभावात्, युगपद्युत्पत्तेः प्रागसत्त्वादुत्पत्तिसमकालं चाभिन्नकालत्वेन कार्यासंभवादुत्पन्नस्य च नाशानन्तरितत्वादर्थक्रिया न संभवत्येव, "ननु द्वितीयस्मिन् क्षणे नाशवत् कार्यं ततो भविष्यतीति, यद्येवं नाशानन्तरित्वात् तदेव तदेव तदिति क्षणिकत्वासिद्धेः,तदन्तरितत्वे स्वभावादुत्पत्तिर्द्वितीयस्य घटादिक्षणस्येत्यहेतुकत्वान्नित्यसत्त्वमसत्त्वं स्यादित्युक्तम्, अतः क्षणिकस्य क्रमयौगपद्याभ्यामर्थक्रियाऽयोगादवस्तुत्वप्रसङ्गः ॥

किंच प्रमाणप्रमेयभावाभावश्चाचेत्याह ।

(५९) नच मानं परस्यास्ति स्वकृतार्थप्रसिद्धये ।

क्षणिकत्वे हि सर्वस्योत्पत्तिसमनन्तरमेव ध्वंसात् कस्य किं कुत्र प्रमाणमिति सर्वासिद्धिः, "ननु च तदुत्तरकालभाविविकल्पकल्पितानुमानिश्चयेनेयं प्रमाणादिव्यवस्था,,न,क्षणिकत्वेन तयोरप्ययोगादित्युक्तम् ॥

अभ्युपगम्याप्याह ।

(६०) विकल्पादिं विना नार्थं लिङ्गं नाविषयत्वतः ।

अर्थं विना निरर्थकत्वेन भवद्भिरभ्युपगमाच्च विकल्पादि, आदिग्रहणादात्माध्यारोपरूपं क्लिष्टमपि च मनः प्रमाणं, नाप्यनुमानम्, निर्विषयत्वेनैव तस्यापि परमार्थतोऽभ्युपगमात्, नचाविषयं मिथ्याज्ञानवद् व्यवस्थापकमुपपद्यते ॥

"ननु

"सामान्यविषयं प्रोक्तं लिङ्गं भेदाप्रतिष्ठितेः,, ।

इत्युक्तत्वाच्चास्माकं निर्विषयमनुमानम्,,इत्याह ।

(६१) सामान्यवति संबोधस्त्वदुक्तादक्षतोऽपि हि ।

स्मृतेर्निश्चयतश्चैतदन्यथा नोभयं तु तत् ॥

एवं तर्हि सामान्यस्य प्रमाणविषयत्वेन स्वलक्षणवत् सत्त्वप्रसङ्गात् त्वदुक्तादक्षतोऽपीन्द्रियधिज्ञानेनापि ग्रहणं स्यात्, तथैव तदर्थस्य स्मरणात्, अयं घट इति सामान्यविशेषात्मन एव च निश्चयात्, अन्यथा स्वलक्षणस्यापि सत्त्वासिद्धेस्तदुभयमपि सामान्यविशेषात्मकं वस्तु नेति सर्वासिद्धिः ॥

"ततः सामान्यमपि सदभ्युपगन्तव्यं किमतः,, इत्याह ।

(६२) व्यक्त्यन्तरे ग्रहात् तस्य व्यतिरेको विवक्षितः ।

तेन व्यक्तिविनाशेऽपि तत् तावदवतिष्ठते ॥

तेन सामान्यत्वादेव व्यक्तिविनाशेऽपि तस्य व्यक्त्यन्तरे सतो ग्रहणात् तावत् स्थैर्यं सिद्धं, न यावन्मूषकादिसामान्यस्येव सर्वव्यक्तिविनाशो जातः, इति क्षणिकाः सर्वसंस्कारा इत्येतद् बाधितमेव ॥

"ननु परमार्थतः कल्पितमेव सामान्यम्,, इत्याह ।

Digitized by Google

(६३) विरहय्य न सामान्यं व्यक्तिः पुंभोगसाधिका ।

द्विविधं सुखादिवैषयिकमाभिमानिकं च संवेद्यते, तत्र पूर्वं शीतादिस्पर्शजन्यं स्वलक्षणहेतुकमेव सिद्धम्, उत्तरं त्वभिमानस्याध्यवसायरूपत्वेन पूर्वापरपरामर्शयोग्यार्थराज्यादिविषयं सिद्धम्, नच स्वलक्षणं तथाभूतं भवद्भिरिष्यते, इति सामान्यहेतुकमेव, ततः सुखादिसाधकत्वात् स्वलक्षणवत् सामान्यस्यापि नावस्तुत्वम्, “ननु तज्ज्ञानस्य तत्र हेतुत्वं न तस्येति चेत्,, न, स्वलक्षणविषयस्येव सामान्यविषयस्यापि ज्ञानस्यैव सुखाद्यवभासात्मकत्वात् स्वात्मनि क्रियाविरोधाच्च विषयस्यैव हेतुत्वमिति ॥

अधुना यैर्विनाशहेत्वसामर्थ्यवैयर्थ्याभ्यां क्षणिकत्वं साध्यते तान् प्रत्याह ।

(६४) इतः कारणनाशादेर्भङ्गोऽर्थे न स्वभावतः ।

इतः पूर्वोक्तात् स्थैर्यात् प्रमाणसिद्धाद्धेतोः कारणस्य नाशेन नाशोऽर्थस्य, यथा श्लेष्मादेर्नाशेन श्लैष्मिकस्य व्याधेः, आदिग्रहणाद्वाशहेतोः, स क्वचिच्च कारणनाशः,तेन नाशहेतोः सद्भावाद्, यथा घटादेर्मुद्गरादिभ्यः, नतु स्वभावादेव, येन स्वभावस्याविशेषात् प्रागपि नाशसिद्धेः क्षणिकत्वं सिध्येत् ॥

“ननु नाशहेतवः किमव्यतिरिक्तं व्यतिरिक्तं वा तस्य नाशं कुर्वन्ति,, अव्यतिरेके भाव एव विनाशः, स च स्वहेतुनैव कृत इति वैयर्थ्यं तेषाम्, व्यतिरेकेऽपि अवस्तु वस्तु वा नाश इति वाच्यम्, तत्रावस्तुनोऽत्यन्तासत्त्वतः कर्तुमशक्यत्वादकिंचित्करत्वेनासामर्थ्यं तेषाम्, वस्तुत्वे तु घटस्यासौ पटादेरिवार्थान्तरत्वाच्च नाश इति प्राग्वदुपलम्भप्रसङ्गः, “ननु घटनाशात्मनस्तस्य कृतत्वाच्चैष प्रसङ्गः,, न, घटस्य न कृतो यतः, “ननु ततोऽस्य विनाशो भविष्यति,, न, तत्रापि स एव प्रसङ्ग इत्यनवस्था, तस्मादहेतुक एव विनाशोऽभ्युपगन्तव्यः, अहेतोश्च देशकालनियमायोगात् प्रतिक्षणं विनाशसिद्धिः, इत्यत आह ।

(६५) नचाप्यहेतुको नाशः कदाचिद्भावतोऽर्थवत् ।

न तावदहेतुको नाशो मुद्गरादिहेत्वन्वयव्यतिरेकानुविधानाज्जन्मवत्, अत एव नावस्त्वसौ, अपितु खर्पराद्यात्मको वस्त्वेव, घटादेर्हि खर्पराद्यात्मता नाशः प्रत्यक्षसिद्धो नान्यः, तस्यावस्तुत्वेन प्रमाणागोचरत्वात्, तदुक्तम्,

“यथाहेः कुण्डलीभावो व्ययाणां वासमयता ।
तथैव जन्मनाशौ तु सतामेके प्रचक्षते,, ॥

इति, यद्येवं कार्यमेव विनाश उक्तः स्यात्, न, विकारित्वात्, कार्यं हुन्दकधारणाद्यविकृतरूपस्यैव घटादेः सिद्धम्, नाशस्तु रूपान्तरापत्तिलक्षणो विकारः, इदमेव प्रकृतिविकृतिभावं महामतयो मन्यन्ते, लोकोऽपि नष्टं क्षीरमक्षोभूतमित्याह । “ननु दध्युत्पादे क्षीरस्य किं जातं, येन तन्नोपलभ्यते,, बालभाषितमेतत्,नाश एव नष्टस्यानोपलभ्यते, तन्नाशात्मकं हि दधीत्युक्तम्, “ननु भावनिवृत्त्यात्मक एवाभावः, नास्तीह घट इत्यादावपि तथा दर्शनात्,, सत्यं, नाशस्तु न तदात्मकोऽपितु वस्त्वन्तररूपः प्रत्यक्षसिद्ध इत्युक्तम्, भावनिवृत्तिमात्रं त्वभावोऽत्यन्तावस्तुत्वाच्च प्रमाणाविषयः, अपितु देशादिनियतपदार्थान्तरसंसर्गभ्रान्तिविवेकरूपो नास्तीह घट इत्यादौ व्यवहारमात्रफलो विकल्पकल्पित एव, यदुक्तं भवद्भिरेव,

“रूपाभावादभावस्य शब्दरूपाभिधायिनः ।
नाशङ्क्या एव सिद्धास्ते व्यवच्छेदस्य वाचकाः,, ॥

इति, न तस्य कार्यता, अपि त्वनर्थरूपस्यैवाभावस्य, इति न विनाशहेतोरसामर्थ्यं वैयर्थ्यं वा दोष इति ॥

ये तु विनाशः स्वभाव एव भावस्य, ततो विनाशस्वभावादेव भावो नश्यति, नतु हेत्वन्तरात्, तेनाप्यतत्स्वभावस्य नाशयितुमशक्यत्वात्, अत एव च कृतकत्वानित्यत्वयोस्तादात्म्यादव्यभिचारः सिध्यति, नान्यथा, यदुक्तम्,

“अहेतुत्वाद्विनाशस्य स्वभावादनुबन्धिता ।
सापेक्षाणां हि धर्माणां नावश्यंभावितेष्यते,, ॥

इत्याहुः, तान् प्रत्याह ।

(६६) नाप्यर्थादपृथग्यस्मादर्थवन्नोपलभ्यते ।

यो ह्यर्थस्वभावः स तस्मिन् निष्पन्ने निष्पन्न एव, शिंशपात्व इव वृक्षत्वम्, नचार्थनिष्पत्तौ तन्नाशो वस्त्ववस्तु वा तदात्मन्युपलभ्यते, अत्यन्तविरुद्धत्वेन परस्परपरिहारेणावस्थानतस्तादात्म्यासंभवात्, यदुक्तमाचार्येण परमोक्षनिरासकारिकासु,

“विरुद्धावेककालस्थौ धर्मावेकाश्रयं गतौ ।
इतरेतरनाशात् तौ कुरुतो लोपमात्मनः,, ॥

इति, तन्निष्पत्तावनिष्पत्तेर्नार्थस्वभावो नाशः, “ननु द्वितीयस्मिन् क्षणे स तस्य भवतीति कथमस्वभावः,, अत एव कार्यवत्, “ननु

“हेत्वन्तरानपेक्षित्वात् स स्वभावोऽनुवर्णितः,, ।

इति,, तर्हि सांशयिक एष स्वभाव इति न ततो वस्तुसिद्धिः, अन्यथापि संभवतोऽनवस्थाप्रसङ्गादिति, कृतकत्वेन नाशस्य तादात्म्यप्रतिबन्धाभावात्,अतादात्म्ये चावश्यंभावानभ्युपगमादननुमानम्, तर्हि नाशयोग्यता कृतकस्य वस्तुनः स्वभावो न नाशः, ततो नैष दोष इति ॥

यद्येवमस्मत्पक्ष एव, नच व्यभिचारोऽनुमानस्येत्याह ।

Digitized by Google

(६७) अभेदे कारकं यद्वदर्थसिद्धौ प्रवर्तते ।
तन्नाशाय तथैवेति नाशो जातस्य जायते ॥

यथैव सहकारि कारणं दण्डचक्रसूत्रादि घटादेरर्थस्य साधनाय प्रवर्तते, तथैव तस्य खर्पराद्यात्मकनाशकरणाय मुद्गरादिसहकारि कारणं प्रवर्तत इति, यत् कृतकं तत् सहकारिसंनिधावश्यं नश्यति, यस्तु न नश्यति नासौ कृतको यथात्मादिरित्यन्वयव्यतिरेकसद्भावात् कृतकत्वेनानित्यत्वं शब्दादावनुमातुं युक्तं न भवताम्, व्यतिरेकासंभवतः केवलान्वयिनोऽस्य गमकत्वासिद्धेः, "ननु नश्वरस्वभावस्य किं मुद्गराद्यपेक्षा," यदुक्तं तदयुक्तम्, मुद्गरादिसंनिधावेव तस्य रूपान्तरापत्तिस्वभावत्वात्, "नन्वनुपकारिणोऽपेक्षायोगात्, मुद्गराद्युपकारे तु स पूर्वः स्वभावत एव घटो नष्टोऽयमन्यस्तदुपकृतः समुत्पन्न इति क्षणिक एव," न, तथास्वभावत्वादित्युक्तम्, स्वहेतोर्हि स तथाभूतस्वभावो भावो भवति, यः सर्वदानुपकारकमुद्गरादिसंनिधौ विकारमुपयाति, नान्यथा, इत्यत्र तथा दर्शनमेव प्रमाणम्, नच स्वभावा भावानां पर्यनुयोगमर्हन्ति, एतेन तथाभूतसहकारिसंनिधावर्थक्रियाकरणस्वभावत्वात् स्थिरस्य क्रमेणार्थक्रियाविरोधः परिहार्यः, "ननु सहकार्यसंनिधौ जनकाद्भिन्नस्तस्य स्वभावो जननाभावादेव," न, तदापि सहकारिसंनिधौ कार्यकारणस्वभावत्वात्, तत्संनिधौ तु स एवेति न भेदः, नह्यस्मात् स्वभावात् कालत्रयेऽपि तस्यान्यथाभावः, सहकार्यसंनिधानात् तु न प्राक्कार्योद्भवः, इति तत्संनिध्यसंनिधी परं भिद्येते न वस्तुभेदः, "ननु संनिध्यसंनिधी तर्हि सहकारिणो भेदं विदधाते विदधतो विरुद्धस्वभावत्वात्," न तत्रापि विरोधः, तस्यापि संनिधायकस्वसहकारिसंनिधौ तत्संनिधिस्वभावत्वात्, तस्यापि स्वसहकारिसंनिधौ, तस्य तस्यापीति नानियमः, स्वभावनियमितत्वाद्भावानां वैश्वरूप्यस्येति, सहकारिणामपि क्षित्यादीनां बीजादिकारणसंनिधौ तत्कार्यकारणात् स्वसौ तत्सदृश एव स्वभावः, येन तत्संनिधान एव तदङ्कुरादि कार्यं कुर्वन्ति नान्यदेति सर्वेषां तत्कारकत्वं स्वभावः परस्परसंनिधानापेक्षस्तु इति सर्वे कारकाः सहकारिपदवाच्या निकेकाः, नच तेषां स्वभावभेदः, सर्वेषां च सामर्थ्येऽपि न कार्यानेकत्वप्रसङ्गः, परस्परसंनिधौ तदेककार्यनिर्वर्तकस्वभावत्वात्, एवं नानाभूतार्थक्रियाकरणे नानाभूततत्तत्सहकारिसंनिधौ नानाभूतानेककार्यकर्तृकस्वभावत्वात् क्रमेण नानाभूतार्थक्रियाकरणेऽपि न स्वभावभेदः, यथैकस्यैव चैत्रस्य लवनपचनभोजनाद्यनेककार्यकर्तुस्तत्तद्दात्रादिसहकारिसंनिधौ तत्तल्लवनपचनादिकार्यकर्तृस्वभावत्वात् क्रमेण लवनपचनादिभावेऽपि न स्वभावभेदः, तथाभूतस्वभावस्य तत्राक्रमेणैव भावात् प्रदीप इव, प्रदीपस्य हि वर्तिदाहतैलक्षयप्रकाशस्वज्ञानाद्यनेककार्यनिर्वर्तकः स्वभावोऽभ्युपगतो भवद्भिः, नतु कार्यभेदेन स्वभावभेद इति दर्शितं प्रागेव, तद्वदत्रापि सहकारिसंनिधौ तत्कार्यकर्तृस्वभावावियोगात् सर्वदैव, स्थिरस्वभावस्य सहकारिसंनिधानस्य तु क्रमिकत्वात् क्रमेणानेककार्यनिर्वर्तनेऽपि न भेदः, तत्स्वभावाभेदात्, स्वरूपस्य तु भेदसिद्धौ हि नञर्थानुप्रवेशपरमास्त्वा बौद्धाः, नच सर्वदैकस्वभावधर्माच्छादितानां संभवतीति न स्थिरस्य क्रमयौगपद्याभ्यामर्थक्रियानुपपत्तिरिति ॥

"नन्वकारण एव कारकान्तरादात्मादेरपि विनाशो भविष्यतीति व्यतिरेकासिद्धेर्युष्माकमप्यनैकान्तिकोऽयं हेतुः," इत्याह ।

(६८) व्यतिरेकेऽपि विषयो यस्तस्यासौ न जायते ।
विरोधित्वेन किं कुर्मो दृष्टे बाधा न विद्यते ॥

व्यतिरेकनिमित्तं यस्तस्य व्यतिरेकस्य विषय आत्मादिस्तस्य नाशो नोपपद्यते, विरोधित्वादिति, अयमर्थः, यस्यैव यथा नाशेन सह विरोधः प्रमाणेन सिद्धस्तस्यैवासौ विरुद्धत्वात् शीतस्येव कारणान्तरादभवदौष्ण्यमौष्ण्यस्य शीतं निवर्तकमनुमीयते, यदुक्तं भवद्भिरपि, "अविकलकारणस्य भवतोऽन्यभावे भावाद्विरोधगतिरिति," नाविरुद्धस्य करणाच्च घटादेरुत्पत्तिमतश्च हेतुमता नाशेन सह विरोधः प्रत्यक्षेण सिद्ध इति, तथाभूतस्यैवासावनुमानेन संभावयितुं युक्तो नानुत्पत्तिमतोऽहेतुक आत्मादेः, नहि प्रत्यक्षदृष्टस्य क्वचिदन्यथात्वं युक्तम्, धूमवतामपि देशान्तरेऽनग्नितोऽपि भावसंभावनया सर्वानुमानाभावप्रसङ्गात्, "अथ नातद्भाविनः सकृदपि ततो भावादिति वस्तुव्यवस्थित इत्युच्यते," तर्ह्यकृतकस्यात्मादेरहेतुकनाशकल्पना कल्पनामात्रमेव, अतो व्यतिरेकोऽस्य सिद्ध इति नानैकान्तिकता ॥

एतदेव दर्शयति ।

(६९) विनाशहेतुः सद्भावव्याप्ते सर्वत्र वस्तुनि ।
कृतकत्वमनित्यत्वं नातो व्यभिचरिष्यति ॥

सतो भाव उत्पादस्तेन व्याप्ते सर्वस्मिन्नुत्पत्तिमति वस्तुनि विनाशहेतुः शीतस्येवौष्ण्यं यतो वास्तवेन प्रतिबन्धेन सर्वत्र सर्वदा व्यापकत्वेन सिध्यति, ततः कृतकत्वाख्यो हेतुः शब्दादौ धर्मिण्यनित्यत्वं साधयत्येव, नत्वनैकान्तिकः, यथाहुः,

"अवश्यंभावनियमः कः परस्यान्यथा परैः ।
अर्थान्तरनिमित्ते वा धर्मे वाससि रागवत्," ॥

इति, यतो न वासस्यपि रागोऽनुमीयते, अपितु रागयोग्यता, इत्यव्यभिचार एव, यद्येवं कृतकः कश्चिच्च विनश्येदपि नात एव महाप्रलयसिद्धेः, अपिच, नाशयोग्यतास्य साध्या न नाश इत्युक्तम्, तस्याश्चाव्यभिचार एव, यथा हि बीजस्या-

Digitized by Google

कुरङ्गजननयोग्यतानुमानेऽपि कदाचित् काकादिभक्षणात् कुरङ्गजननाभावेऽप्यनुमानमदुष्टमेव, घटादिवदत्यन्तायोग्यत्वनिराकरणफलत्वात् तस्य, तथेहात्मादिवदत्यन्तनाशायोग्यत्वनिराकरणाय घटादेरर्थस्य नाशयोग्यतानुमीयते, अत एव चार्थरक्षादौ नीतिशास्त्राणां प्रवृत्तिः, नयविदश्च निपुणा दृश्यन्ते, नान्यथेत्यदोषः, तदेवं ग्राहकात्मनोऽपि क्षणिकत्वासिद्धेरैहिकामुष्मिकविषयतयापि “प्रवृत्तिफलभोक्तृत्वं,, प्रतिज्ञासूत्रपदोपात्तं व्याख्यातम् ॥

अधुना “यः पुमान्,, इति पदद्वयं व्याख्यातुं यैरिन्द्रियसंघ एव चेतनो नान्यः कश्चित् पुरुषो नाम तत्रैवाहंप्रत्ययस्य दृष्टेरित्युच्यते, तान् प्रत्याह ।

(७०) कान्तायामिव बोद्धव्यो बोधोऽहमिति वै तनौ ।
जानात्येव पुमान् यस्मादियं मे बोधसाधिका ॥

चैतन्यं तावत् स्वसाक्षिकमनुभवसिद्धमित्युक्तम्, यदि च सैवेन्द्रियसंहतिरूपा तनुः, इत्युच्यते, भवतु नामान्तरमेव तत्, ततो नार्थान्तरम्, नच नाम्नि विवादो विदुषाम्, “अथ रूपादिसंवित्त्यन्यथानुपपत्त्या चेतनेन स्वात्मनः करणतया यश्चक्षुरादिसमूहोऽनुमीयते सेन्द्रियसंहतिरित्युच्यते, तदा करणत्वेनैव तस्याः सिद्धेः,,न चेतनात्मककर्तृरूपत्वेन प्राक्प्रदर्शिताहंप्रत्ययविषयता युक्ता, अत्यन्तभेदात्, “ननु हन्त्यात्मानमात्मनेतिवदभिन्नेऽपि कल्पितोऽत्र कर्तृकरणादिभेदो भविष्यति,, सत्यम्,यद्यभेदश्चैतन्येनास्याः सिद्धो भवेत्, प्रोक्तानुमानेन तु भेद एव सिद्ध इत्युक्तमेतत्, “ननु

“अहं चक्षुरहं श्रोत्रं सर्वेन्द्रियतनुस्त्वहम्,, ।
इत्यादिश्रुतिसिद्धोऽत्राभेदो भविष्यतीति,
“नाहं जाया अहं पुत्रोऽहं गौरश्वधनान्यहम्,,

इतिवत् प्रत्यक्षादिविरोधात्, गौणत्वेनाप्यागमस्योपपत्तेरिन्द्रियचैतनिकपक्षेऽत्यन्तायुक्त एव ॥

भूतचैतनिकपक्षेऽप्याह ।

(७१) भिन्नलक्ष्मा तु चिद्भावः क्ष्मादेर्योऽप्यचितेर्नहि ।
यद्दृष्टेर्विमतिः क्ष्मादेः पूर्वव्यक्तेः स्वसंस्थितः ॥

चिदात्मको भावश्चिद्रूपोऽर्थो नाचेतनस्य पृथिव्यादेः स्वभावो युक्तः, ततो भिन्नलक्षणो यतः, एतदुक्तं भवति, चेतनाचेतनयोः परस्परपरिहारस्थितलक्षणत्वाद् घटतदभावयोरिव नैकत्वम्, किंच यद्यस्मात् पृथिव्यादेर्या संबन्धिनी दृष्टिः पृथिव्यादिविषयं प्रत्यक्षं ज्ञानं, तस्याः सकाशाच्चिद्भावस्य विमतिः सत्तासंशयो दृश्यते, ततस्तयोर्नैकत्वम्, यो हि यदात्मकः स तन्निश्चये निश्चित एव, यथा घटनिश्चये मृदादिः, यस्तु यन्निश्चये विमत्यधिकरणभावापन्नो नासौ तदात्मकः, यथा घटनिश्चये शिवादिः, शरीराकारपृथिव्यादिनिश्चये च संदिग्धश्चिद्रूपोऽर्थ इति न तदात्मकः, नचायमसिद्धो हेतुः, कायवाग्व्यवहारात्मकानुमानेन परचित्स्वभावः सिद्धो यतः, स्वचित्स्वभावोऽप्युक्तनयेन ग्राहकतया पूर्वा प्रत्यग्रूपा याऽसौ तस्य व्यक्तिः प्रकाशस्ततः स्वत आत्मनैव ग्राह्यस्वभावात् पुरोरूपात् स्वशरीरात्मनः पृथिव्यादेर्भेदेन संस्थितो धारणादिवृत्त्युपलक्षितात् स्वशरीराकारात् पृथिव्यादिभूतपञ्चकाद् ग्राह्यात्मनोऽत्यन्तविलक्षणस्तद्ग्राहकरूपोऽयमर्थः स्वतः सिद्धो यतः, न भूतस्वभाव इत्यर्थः, अत एव लोकायतप्रतिक्षेपेणास्य गतार्थता, तत्र हि भूतकार्यत्वेनानित्यत्वं प्रतिक्षिप्तम्, अत्र भूतधर्मित्वेऽपि तदात्मत्वमिति भेदः ॥

अन्तःकरणचैतनिकाः सांकर्षणपाञ्चरात्रास्त्वाहुः, “कल्पयित्वापि पुरुषं भवद्भिर्धर्मज्ञानादिधर्माष्टकयुक्तमन्तःकरणमभ्युपगतमेव, तदन्तःकरणमेवोभयवादिसिद्धं ज्ञानरूपमात्मत्वेनेष्यताम्, तद्व्यतिरिक्तस्याज्ञानरूपस्यात्मत्वात् सिद्धेः, ज्ञानात्मत्वे च ज्ञानद्वयानुभवप्रसङ्गतः प्रत्यक्षविरोध इति,,तान् प्रत्याह ।

(७२) अचेतन्यान्न विज्ञानं करणेऽन्तर्व्यवस्थिते ।

भवेदेतद्, यद्यन्तःकरणमपि चेतनमस्माभिरभ्युपगतं स्यात्, तत् तु कार्यत्वाद् घटादिवदचेतनमेव, नच कार्यत्वमसिद्धम्, भवद्भिरपि महाविभूतिकार्यत्वेन तस्याभ्युपगमात्, अथ तस्मादन्यदेव तन्नित्यमित्युच्यते, तर्ह्यात्मैवासौ सिद्ध इति नान्तःकरणचैतन्यवादः ॥

“कथं तर्ह्यन्तःकरणस्य ज्ञानं धर्मो भवद्भिरुक्तः,, इत्याह ।

(७३) चैतन्यव्यक्तिभूमित्वात् तद्वृत्तिर्ज्ञानमुच्यते ।

ज्ञायतेऽनया स्मृतिप्रभासादावसंनिहितोऽर्थः पुरुषेणेति कृत्वान्तःकरणवृत्तिरुपचाराज्ज्ञानमुच्यते, नतु मुख्यतः, बोधात्मनोऽपरिणामित्वेन संस्कारासंभवतस्तदानीमर्थासंभवाच्चानुभूयमानाकारानुपपत्तेरन्तःकरणमेव संस्काराकाररूपमभ्युपगन्तव्यं यतः, एवं धर्मादिरूपत्वमप्यन्तःकरणस्य तत्संस्काररूपतया नतु ज्योतिष्टोमादिक्रियात्मकधर्मादिरूपत्वेनेति विपञ्चितमस्माभिः स्वायंभुवोद्द्योते, तत एवावधार्यमिति, अन्तःकरणस्य धर्मादिमतो ज्ञानानभ्युपगमात् पुरुष एव ज्ञानात्मकः सिद्ध इति । “यः पुमान्,, इति पदद्वयं व्याख्यातम् ॥

प्रागभेदसिद्धौ पुंसः प्रमाणं नास्तीत्युक्तम्, अधुना तु भेदसिद्धौ प्रमाणमाह ।

(७४) एकस्मिन्नेव काले यत् प्रतिलिङ्गं सुखादयः ।
विभिन्ना उपलभ्यन्ते तेनाणुर्भिन्न इष्यते ॥

Digitized by Google

स्वसंवेदनेन हि प्रतिशरीरं स्वात्मा सुखाद्यनुभवितृत्वेन, परशरीरचेष्टादिभिश्च दुःखादियुक्तात्मान्तरानुमातृत्वेन युगपदेव संवेद्यते, नचानुमेयोऽनुमाता, अनुमाता वानुमेय एव युगपदेव संभवति, अत्यन्तभेदादित्युक्तम्, अतस्तयोर्भेद एव युक्तः, नच परमात्मानुमातृत्वं तदानीमसिद्धमसत्यं वा युज्यते वक्तुम्, स्वसंवेदनसिद्धत्वात्, सुखादिप्रकाशकत्ववत्, नापि तदात्मनोऽसावसत्यः, बाधकाभावात्, सुखादिवत्, इत्यात्मभेदः सत्य एव ।

अत्र वेदान्तविदः परस्याभिप्रायमाह ।

(७५) नानुभेदात् सुखादीनां किंतु साधनभेदतः ।
भेदश्चेत्,

प्रतिशरीरमेकत्वेऽप्यात्मनो यथा ग्रीष्मातपदह्यमानवपुषोऽकस्मात् संप्राप्तशीततरजलनिमग्नाधःकायस्य युगपदेवातपजलादिसाधनभेदादूर्ध्वाधोभाविनोः सुखदुःखयोः संवेदनम्, एवं शरीरभेदेऽपि तस्य भविष्यतीति ॥

अत्रोत्तरमाह ।

(७६) सर्वदुःखादावेका संविद्भवेत् ततः ।

यथा प्रतिशरीरमेकत्वादात्मनोऽनेकसुखदुःखादिविषयमेकमेव संवेदनं संवेद्यते, तथा यदि सर्वशरीरेष्वेक एवात्मा स्यात्, ततः सर्वदुःखसुखादिविषयमेकमेव संवेदनं स्यात्, तद्रूपत्वादेवात्मनः, इति सर्वस्य सर्वज्ञत्वप्रसङ्गः, परस्परं भेदाभावात्, सत्यम्, 'एकैव संविद् भ्रान्तिनिबन्धनस्तु भेद इति चेत्,, न, असिद्धत्वात्, "ननु स्वप्नादावस्याः सिद्ध एव तन्निबन्धनो भेदः, यदुक्तम्,

"न चेत् स्यात् स्वप्नपुरुषो भ्रमस्यास्य निदर्शनम् ।
सत्यं, तदन्यरूपेण प्रतिभातीति को वदेत्,, ॥

इति,, न, तत्रापि संविदः स्वात्मनि भ्रमाभावाज्जाग्रतीव प्रतिशरीरं सुखादिसंविदो भेदः सत्य एव, भ्रान्तं हि विज्ञानं सर्वमालम्बने भ्रान्तं न स्वात्मनि, आलम्बनं ह्यन्यथा बहिःस्थितमन्यथा प्रतीयमानं भ्रमविषयतामापद्यते, यत् पुनर्बाधेऽप्यभावं वस्तु, तद्यथैव चकास्ति, तथैव सत्, अतत्स्वभावस्यासंवेद्यत्वात्, स्वसंवेद्यत्वे च तत्स्वभावत्वम्, इति स्वशरीरवर्तिन एव सुखादिवेदनस्याभेदः, नतु परशरीरवर्तिनोऽनुमानसिद्धस्य, अनुमातृतयैव ततो भेदेन संवेदनात्, इत्यात्मभेदः सत्य एवेत्युक्तम्, "नन्वितरेतराभावसव्यपेक्षत्वाद् भेदस्याभावाविषयत्वाच्च प्रत्यक्षस्य न भेदः स्वसंवित्प्रत्यक्षगम्यः, तदुक्तम्,

"आहुर्विधातृ प्रत्यक्षं न निषेद्धृ विपश्चितः,,

इति,, नेतरेतराभावसव्यपेक्षो भेदः, किं तर्हि सिद्धे भेदे तदितरेतराभावसिद्धिः, सर्वथा हि न कस्यचित् कुतश्चिदभावः, इति घटार्थी पटदर्शनात् किमिति निवर्तते, प्रमाणाप्रमाणविभागश्च न स्यात्, सर्वस्य सत्तामात्राव्यभिचारात्, इति स्वसंवेदनेन परात्मानुमातृतया स्वात्मभेदेन प्रकाशमानः सत्य एव, बहिः स्वसंवित्सिद्धमवस्तु, अपरवेद्यत्वात्, प्रत्यक्षवत्, इति भिन्ना एवात्मान इति सिद्धम् ॥

परिणतवेदान्तविदः संहितापाञ्चरात्राश्चाहुः "सत्यं भिन्ना एव जीवात्मानः, ते तु परमकारणादनश्वराद् ब्रह्मपदवाच्याद् यदि वा नारायणाख्यादव्यापका एव, घटादिवत् स्वकारणलयस्वभावाश्चोत्पद्यन्ते, इति,, तानप्यनुमानेन प्रतिक्षिपन्नाह ।

(७७) चैतन्यादेव पुरुषो न विकारी नचाविभुः ।
नियमेनाविभुर्यस्माद्विकारी चाप्यचेतनः ॥

यश्चेतनो नासावव्यापको लयस्वभावो वा, तद् यथा परमकारणम्, यस्त्वव्यापको लयस्वभावश्च, नासौ चेतनः, यथा घटादिः, चेतनश्च जीवाख्यप्राणसंयुक्तोऽयमात्मा स्वसंवेदनसिद्धो भवद्भिरभ्युपगतः, इति नाव्यापको लयस्वभावश्च युक्तः, अपितु नित्यव्यापकस्वभाव एव, दिक्कालयोर्ग्रहीतृत्वेन तदवच्छिन्नतया सर्वदैवावभासनाच्च, नहि ग्राह्येण घटादिना ग्राहकोऽवच्छेत्तुं शक्य इत्युक्तम्, नच दिक्कालयोरपि ग्राह्यतां मुक्त्वान्यो ग्राहकैकस्वभावेनात्मना संबन्धः संभवति, तदिदमुक्तम्,

"अनवच्छिन्नसद्भावं वस्तु यद्देशकालतः ।
तन्नित्यं विभु चेच्छन्तीत्यात्मनो विभुनित्यते,, ॥

इति, "नन्वेवं व्यापकतयात्मनो दूरेऽयमर्थ इति प्रत्ययो न स्यात्, नच शरीरापेक्षयेति वाच्यम्, तस्याप्रमातृत्वात्, अत्यल्पमिदमुच्यते, सर्वसर्वज्ञताप्रसङ्ग एव वाच्यः, न, सूर्यातपादेर्मेघादिवद् बोधस्यावरणासंभवात्, यद्येवं कार्यकारणादिभिः स्वस्थान एव तद्व्युदासात् तस्याभिव्यक्तिः, इत्यभिव्यक्त्यपेक्षया दूरत्वादूरत्वप्रतिभासोऽप्युपपद्यत एवेत्यदोषः ॥

यदप्यव्यापको लयस्वभावश्चायमात्मा सर्वार्थदर्शनासत्त्वादसर्वज्ञत्वाद् घटवदित्यत्रानुमानं भवद्भिरुपन्यस्तं तदप्ययुक्तमित्याह ।

(७८) व्यतिरेकस्य सद्भावादन्वयव्यतिरेकिणि ।
सर्वार्थदर्शनासत्त्वात् संदिग्धमुभयं तव ॥

अन्वयव्यतिरेकवति सम्यग्धेतौ सर्वार्थदर्शनासत्त्वादित्यस्मिन्नभिमते भवतां परं प्रति धर्मसंदृष्टान्तपरकारणस्यासि-

द्धेरीश्वरमुक्तानां नित्यव्यापकस्वभावत्वेन स्वयमनभ्युपगमात् संदिग्धो व्यतिरेकः, तस्मिंश्च संदिग्धे संबन्धिरूपत्वात् पूर्वापरवदन्वयस्यापि संदेहाद् गोमानश्ववत्त्वादित्यादाविवानैकान्तिकतेत्यहेतुता, योऽपि कैश्चिज्जीवात्मनामव्यापकत्वे लयस्वभावत्वे च सत्यादिनान्वितत्वाद् घटादिवदिति हेतुरुक्तः, सोऽप्यसिद्ध एव, आत्मनामन्वयासिद्धेः, अन्वयो हि ग्राह्यस्य कर्मतामापन्नस्य ग्रहीतुं शक्यः, नचात्मा स्वात्मन एव ग्राही१ भवति, स्वात्मनि क्रियाविरोधात्, स हि ग्राहकत्वेनैव प्रत्यग्रूपतया सर्वदा भासते, इत्युक्तम्, "ननु तेनैव रूपेणास्यान्वयो भविष्यतीति,, न, तस्यानेकग्राहकप्रकाशविषयत्वात्, "नचैकैकात्मसंवेदने ग्राहकान्तरसंवेदनं संभवति,, तस्य ततोऽन्यत्वेन घटादिवत् परत्वात्, "न ह्यात्मनां परस्परं स्वसंवेदनमात्राः संकीर्यन्ते,, सर्वस्य सर्वज्ञत्वप्रसङ्गादित्युक्तम्, प्रत्येकं च स्वात्मवेदने कस्य कुत्रान्वयः, "यद्येवं सर्वज्ञः सर्वात्मनां ग्राह्यत्वादन्वयं ग्रहीष्यतीति,, तदप्ययुक्तम्, सर्वज्ञात्मनैव व्यभिचारात् सोऽपि स्वसंवेदनेन परात्मभ्यो भेदेनैव तद्गृहीततया भासते यतः, नच ग्रहीतर्यन्वयः संभवतीत्युक्तम्, नच तस्य सर्वज्ञत्वादेव विपरीतग्रहणं संभवति, तद्यथा, तेनात्मान्तरेभ्यः स्वात्मात्यन्तानन्वितरूपोऽसंभवन् भ्रमेण प्रत्यक्षेण गृहीतः, तथैव परमात्मानः परस्परभिन्नाः समन्वयविषयभावमतिक्रम्य वर्तमानास्तेन साक्षात्क्रियन्ते, इत्यदोषः, अत एवानुमेयोऽप्यात्मनामन्वयो न संभवति, तदानीमनुमेयादनुमातुरनुमातृरूपतया वैसदृश्येनैव भासनात्, स्वात्मवत् परात्मनामत्यन्तविसदृशतयैवानुमानात्, तर्ह्यसन्नात्मा सत्तयानन्वितत्वादश्वविषाणवन्नास्य सत्त्वान्वयात् सत्त्वम्, अपितु स्वरूपसत्त्वात् सत्तावत् परमकारणवद्वा, तस्यापि हि सत्त्वान्वयात् कार्यत्वेन परमकारणत्वाभावः, "कथं तर्ह्यन्वयाभावे सर्वात्मस्वात्मपदस्य प्रवृत्तिः सादृश्याद्ब्रह्मणीव परमात्मशब्दस्य, "ननु तदप्यग्राह्यस्वभावे स्वात्मनि नैव ग्रहीतुं शक्यम्,, सत्यम्, वैसदृश्यपरिहारेण तु कथंचिददूरविप्रकर्षेण व्यवहारार्थे तत् तत्रोच्यते, न परमार्थः, यत् श्रूयते "नेति नेत्यात्मगतिः,, इति वर्णितमस्माभिर्विस्तरेण रौरववृत्तिविवेकपरमोक्षनिरासकारिकासु, इति, तत एवावधार्यम्, तदेवमन्वयाख्यस्यास्य हेतोरसिद्धेर्नोऽव्यापकत्वं लयस्वभावत्वं चात्मनामनुमातुं युक्तम्, इत्युक्तयुक्त्या नित्यव्यापकस्वभावा एव तेऽभ्युपगन्तव्या इति, "यद्येवं सर्वशरीरेषु सर्वात्मनां संनिधानाद् भोगसंकरः,, न, कर्मभिर्नियमितत्वात्, "ननु तेषामपि स एव दोषः,, न, कर्तृभेदेन भेदात्, कर्तृत्वं हि चिकीर्षायोगात् प्रत्यात्मं भिद्यते, नान्यचिकीर्षया अन्यचिकीर्षा वोपपद्यते यतः, चिकीर्षयैव तेषां कर्तृत्वमिति वक्ष्यामः ॥

१ ग्राह्यो, इति पाठान्तरेण भाव्यम् ।

॥ श्रीः ॥

॥ अथ प्रसन्नराघवनाटकप्रस्तावना ॥

इह खलु भारते वर्षे संस्कृतभाषोपनिबद्धानां प्राचीनप्रौढकविप्रणीतनाटकानामद्यत्वे पठनपाठनयोर्विरलप्रचारतया तत्पुस्तकानां दुःसम्पादत्वेऽप्यहं सततं प्राचीनोत्तमग्रन्थगवेषणतत्परोऽत्रैव काश्यां विद्वन्मनोनन्दनस्यास्य प्रसन्नराघवनामकनाटकस्यैकं पुस्तकमुपालप्सि । तत्पुस्तकस्य चात्यन्ताशुद्धतयाऽस्पष्टाक्षरतया च शोधनेऽनुभूतमहापरिश्रमोऽनधिगततदीयानेकश्लोकार्थः सुचिरं पुस्तकान्तरान्वेषणपरो महता कालेनात्रैव प्राप्तपुस्तकान्तरद्वयः समग्रमिदं पुस्तकं सम्यक् परिशोध्येमं प्रथमाङ्कमुत्तमकाव्यरसास्वादोद्यतानां विदुषां मनोविनोदाय काशीविद्यासुधानिधिनामकपत्रद्वाराऽधुना प्रकाशयन् क्रमेणास्य सप्ताप्यङ्कान् प्रतिपत्रमेकैकाङ्कमुद्रणेन सप्तभिर्मासैः प्रकाशयिष्यामि । अस्य नाटकस्य रचयिता महाकविर्जयदेवोऽस्ति । यतोऽस्यैव प्रथमाङ्के नटं प्रति सूत्रधारोक्तिः ।

विलासो यद्वाचामसमरसनिस्यन्दमधुरः
कुरङ्गाक्षीबिम्बाधरमधुरभावं गमयति ।
कवीन्द्रः कौण्डिन्यः स तव जयदेवः श्रवणयो-
रयासीदातिथ्यं न किमिह महादेवतनयः ॥

स च कविः कालिदासादिमहाकविभ्योऽर्वाचीन इवेति तत्रस्थादेवाग्रिमात् सूत्रधारवचनरूपश्लोकात् स्फुटमवसीयते । तथाहि ।

यस्याश्चोरश्चिकुरनिकरः कर्णपूरो मयूरो
भासो हासः कविकुलगुरुः कालिदासो विलासः ।
हर्षो हर्षो हृदयवसतिः पञ्चबाणस्तु बाणः
केषां नैषा भवति कविताकामिनी कौतुकाय ॥

इत्थमस्य सप्ताङ्कघटितस्योत्तमनाटकस्य काशीविद्यासुधानिधिचन्द्रिकाचकोरायमाणानां सहृदयानामानन्ददायकतयेमं मदीयपरिश्रमं सकललोकानुकम्पी भगवानीश्वरः सफलीकरोत्वितीहमानोऽस्म्यहं

गोविन्ददेवशास्त्री ।

Digitized by Google

॥ श्रीगणेशायनमः ॥

॥ अथ प्रसन्नराघवं नाम नाटकम् ॥

॥ प्रथमाङ्कः ॥

चत्वारः प्रथयन्तु विद्रुमलतारक्ताङ्गुलिश्रेणयः
श्रेयः शोणसरोजकोरकरुचस्ते शार्ङ्गिणः पाणयः ।
भालेष्वब्जभुवो लिखन्ति युगपद् ये पुण्यवर्णावलीः
कस्तूरीमकरीः पयोधरयुगे गण्डद्वये च श्रियः ॥

अपिच ।

आकल्पं मुरजिन्मुखेन्दुमधुरोन्मीलन्मरुन्माधुरी-
धीरोदात्तमनोहरः सुखयतु त्वां पाञ्चजन्यध्वनिः ।
लीलालङ्घितमेघनादविभवो यः कुम्भकर्णव्यथा-
दायी दानवदन्तिनां दशमुखं दिक्चक्रमाक्रामति ॥

अन्यच्च ।

नाभीपद्मवसच्चतुर्मुखमुखोद्गीतस्तवाकर्णन-
प्रोन्मीलत्कमनीयलोचनकलाखेलन्मुखेन्दुद्युतिः ।
सक्रोधं मधुकैटभौ सकरुणस्नेहं सुतामम्बुधेः
सोत्प्रासप्रणयं सरोजवसतिं पश्यन् हरिः पातु वः ॥

नान्द्यन्ते सूत्रधारः परितो विलोक्य सहर्षम् । अये कथममी निजवदनशारदारविन्दनर्तितगिरिनन्दिनीनयनखञ्जनस्य निखिलमुनिजनहृदयनन्दनस्य विकटजटापटलोत्संगताण्डवितगङ्गातरङ्गनिकरस्य मन्दाकिनीचन्दनललाटिकायमानमुकुटोपनीतनूतनसुधाकरस्य त्रिभुवननलिननिर्माणनिर्मलबिसाङ्कुरस्य भगवतः शङ्करस्य यात्रायां परिमीलिता एव पार्षदाः । तदेतानुपगम्य निजकलाविलोकनप्रसादाय तावदभ्यर्थयामि । विमृश्य । अथवा किमभ्यर्थनया । यतः ।

आकारेणैव चतुरास्तर्कयन्ति परेङ्गितम् ।
गर्भस्थं केतकीपुष्पमामोदेनेव षट्पदाः ॥

विलोक्य सहर्षम् । नूनमेतदभिसन्धानादेव सामाजिकसमाज्ञापितोऽभिवर्तते सखा मे रङ्गतरङ्गः ।

प्रविश्य नटः । भाव । इदं मन्मुखेनैव भवन्तमुदीरयन्ति सामाजिकाः । यत् किल अये भरताधिराज इत्यर्धोक्ते ।

सूत्रधारः कर्णौ पिधाय । अहह असमञ्जसमसमञ्जसं भवतु कार्यं तावदाकर्णयामि ।

नटः । भाव । अधुना मयैव भवत्सकाशादाकर्णनीयं किमिदमसमञ्जसमिति ।

सूत्रधारः । नन्विदमेव यत् किल नन्दति ज्यायसि कनीयसि राजपदमुपन्यस्यते । अहं हि भरतमात्रक एव । मम पुनरग्रजन्मा गुणारामनामा राजपदभाजनम् ।

नटः । कीदृग्गुणस्ते गुणारामः ।

सूत्रधारः । ननु नाम्नैव दत्तोत्तरम् ।

नटः । विहस्य कथं नाम्नैव गुणावगमः ।

सूत्रधारः । अथ किम् ।

गुणग्रामाभिसंवादि नामापि हि महात्मनाम् ।
यथा सुवर्णश्रीखण्डरत्नाकरसुधाकराः ॥

अपिच । किमिदं गुणारामे कथं नाम्नैव गुणावगम इत्युच्यते । यः खलु रतिजनकस्य राज्ञः सदसि हरचापारोपणं नाम रूपकमभिनीय परितुष्टेन राज्ञा समर्पितां रङ्गविद्याधरख्यातिं प्रियामिव समासादितवान् ।

नटः । स पुनः संप्रति कं देशमभिनन्दयति ।

सूत्रधारः । केनापि दाक्षिणात्येन नटापसदेन ममैवेदं गुणारामेति नामेति वदता रङ्गविद्याधरख्यातिरपहृता तदाकर्ण्य गुणारामस्तामेव दिशं प्रचलितः । अधुना च श्रुतमस्माभिर्यत्सुकण्ठनाम्ना गायकेन सह मैत्रीं विधाय दाक्षिणात्यानां भूभुजां सदसि तेन सह रङ्गसङ्गरमुपक्रान्तवानिति ।

नटः । अहो महानुपक्रमः ।

सूत्रधारः । उचितमिदम् । यतः

कीर्तिं मृणालकमनीयभुजामनिद्र-
चन्द्राननां स्मितसरोरुहचारुनेत्राम् ।
ज्योत्स्नास्मितामपहृतां दयितामिव स्वां
लब्धुं न कः परमुपक्रममातनोति ॥

तत् कथय कार्यम् ।

मारिषः । इदमेव यत् किल त्वयाभिनीयमानमवलोकयाम इति ।

प्रत्यङ्गमङ्कुरितसर्वरसावतार-
नव्योल्लसत्कुसुमराजिविराजिबन्धम् ।
धर्मेतरांशुरिववक्रतयातिरम्यं
नाट्यप्रबन्धमतिमञ्जुलसंविधानम् ॥

सूत्रधारः । तत् कथं पुनरवधारणीयं किंनामधेयं नाटकमिति । विमृश्य सहर्षम् । अये कथमहं निजशिरःशेखरशयात्वपि नीलोत्पलं रत्नाकरचपलवीचिमालापरिसरे विचारयामि । नन्विहैव श्लोकेऽष्टपङ्क्तिक्रमाल्लिखिते स्फुटमस्ति प्रसन्नराघवं नामेति ।

मारिषः । तमेव श्लोकं पठित्वा सहर्षम् । अहो देव्याः कविकुलकुमुदविकाशचन्द्रिकायाः प्रसादमहिमा सरस्वत्याः । यत्प्रसादादेवंविधाः कवीनां विचित्रमधुराः सूक्तयः समुल्लसन्ति ।

सूत्रधारः । एवमेतत् । नन्वनेनैव कविनोक्तम् ।

Digitized by Google

वाणि त्वत्पदपद्मरेणुकणिका या स्वान्तभूमिं सतां
संप्राप्ता कवितालता परिणता सेयमुज्जृम्भते ।
त्वत्कर्णेऽपि चिराय यत्किसलयं सूक्तापदेशं शिरः-
कम्पर्धर्षितपारिजातकलिकागुच्छे विधत्ते पदम् ॥

पुनर्विभाव्य मम पुनः कविकमलसद्मनि मुनौ वल्मीकजन्मनि मनः कौतुकितं यस्यैकमपि वदनारविन्दमासाद्य चतुर्मुखकमलवनविहारविनोदमनुभवति भारती नाम राजहंसी ।

नटः । एवमेतत् । त्रिभुवनाभोगेऽपि हि ।

भास्वद्वंशवतंसकीर्तिरमणीरङ्गप्रसङ्गस्वन-
द्वादित्रप्रथमध्वनिर्विजयते वल्मीकजन्मा मुनिः ।
पीत्वा यद्वदनेन्दुमण्डलगलत्काव्यामृताब्धेः किम-
प्याकल्पं कविनूतनाम्बुदमयी कादम्बिनी वर्षति ॥

विमृश्य । मम तु रामचन्द्र एव निर्भरमानन्दितोऽयं चित्तचकोरः । यत्कीर्तिचन्द्रिकाचुम्बितोऽयं वाल्मीकेरपि सारस्वतसागरः समुल्ललास ।

सूत्रधारः । इत्थमिदम् ।

चन्द्रे च रामचन्द्रे च कान्तानां च दृगञ्चले ।
नीलोत्पलसुहृत्कान्तौ कस्य नामोदते मनः ॥

अपिच ।

झगिति जगतीमागच्छन्त्याः पितामहविष्टपान्-
महति पथि यो देव्या वाचः श्रमः समजायत ।
अपि कथमसौ मुञ्चेदेनं न चेदवगाहते
रघुपतिगुणग्रामश्लाघासुधामयदीर्घिकाम् ॥

नटः । कथं पुनरमी कवयः सर्वे रामचन्द्रमेव वर्णयन्ति ।

सूत्रधारः । नायं कवीनां दोषः । यतः

स्वसूक्तीनां पात्रं रघुतिलकमेकं कलयतां
कवीनां को दोषः स तु गुणगणानामवगुणः ।
यदेतैर्निःशेषैरपरगुणलुब्धैरिव जग-
त्यसावेकश्चक्रे सततसुखसंवासवसतिः ॥

अपिच भोः ।

बीजं यस्य चिरार्जितं सुचरितं प्रज्ञा नवीनोऽङ्कुरः
काण्डः पण्डितमण्डलीपरिचयः काव्यं नवः पल्लवः ।
कीर्तिः पुष्पपरम्परा परिणतः सोऽयं कविस्त्वद्द्रुमः
किं वन्ध्यः क्रियते विना रघुकुलोत्तंसप्रशंसाफलम् ॥

नटः । कः पुनरस्य कविः ।

सूत्रधारः । सप्रणयकोपम् ।

विलासो यद्वाचामसमरसनिष्यन्दमधुरः
कुरङ्गाक्षीबिम्बाधरमधुरभावं गमयति ।
कवीन्द्रः कौण्डिन्यः स तव जयदेवः श्रवणयो-
रयासीदातिथ्यं न किमिह महादेवतनयः ॥

अपिच ।

लक्ष्मणस्येव यस्यास्य सुमित्रागर्भजन्मनः ।
रामचन्द्रपदाम्भोजे भ्रमद् भृङ्गायते मनः ॥

नटः । कथमविदितचन्द्रमसश्चकोरकिशोरकस्य चरितमनुसृतोऽस्मि । तेन हि मम हस्ते निजनाटकमर्पयित्वेदमुक्तोऽस्मि रक्षणीयमिदं सूक्तिरत्नं चोरेभ्य इति । स च मया सविनयमिदमुक्तः ।

कर्णे निधाय च पिधाय च कण्ठपीठे
धृत्वा च मूर्द्धनि नते हृदये च कृत्वा ।
चोरापहारचकितेन चिरं मयैष
त्वत्सूक्तिमौक्तिकगणः परिरक्षणीयः ॥

सूत्रधारः । केयमलीकशङ्का तस्य कवेः ।

सुललितवदनामुदारवृत्तां
कृतिमथवा युवतिं परस्य हृत्वा ।
तटमपि परमर्णवस्य गत्वा वद
कतरः सुखभाजनं जनः स्यात् ॥

नटः । एवमेतत् । नन्वयं प्रमाणप्रवीणोऽपि श्रूयते । तदिह चन्द्रिकाचण्डातपयोरिव कवितातार्किकत्वयोरेकाधिकरणतामालोक्य विस्मितोऽस्मि ।

सूत्रधारः । क इह विस्मयः ।

येषां कोमलकाव्यकौशलकलालीलावती भारती
तेषां कर्कशतर्कवक्रवचनोद्गारेऽपि किं हीयते ।
यैः कान्ताकुचमण्डले कररुहाः सानन्दमारोपिता-
स्तैः किं मत्तकरीन्द्रकुम्भशिखरे नारोपणीयाः शराः ॥

नटः । अपि नाम स्वयमेव कविताकोविदाः पारिषदा अस्य सूक्तिभिर्विनोदिष्यन्ते ।

सूत्रधारः । नन्वनैवोक्तम् ।

अपि मुदमुपयान्तो वाग्विलासैः स्वकीयैः
परभणितिषु तोषं यान्ति सन्तः कियन्तः ।
निजघनमकरन्दस्यन्दपूर्णालवालः
कलशसलिलसेकं नेहते किं रसालः ॥

नटः । अहो अस्य कवेः सूक्तीनां सरलता कोमलता च ।

सूत्रधारः । क्वचिद्वक्रता कठिनता च

नटः । कथमेते अपि रमणीये

सूत्रधारः । कथ किम् ।

निन्दन्ते यदि नाम मन्दमतिभिर्वक्राः कवीनां गिरः
स्तूयन्ते नच नीरसैर्मृगदृशां वक्राः कटाक्षच्छटाः ।
तद्वैदग्ध्यवतां सतामपि मनः किं नेहते वक्रतां

धत्ते किं न हरः किरीटशिखरे वक्रां कलामैन्दवीम् ॥

अपिच

अमृतजलधेः पायंपायं पयांसि पयोधरः
किरति करकासाराकारा यदि स्फटिकावनौ ।
तदिह तुलनामानीयन्ते त्वयं कठिनाः पुनः
सततममृतस्यन्दोद्गारा गिरः प्रतिभावताम् ॥

नटः । नूनमस्य कवेः किमपि कौतुकप्रमोदमेदुरमन्तःकरणं यदेवंविधाः सरसशीतलाः सूक्तयः समुल्लसन्ति ।

सूत्रधारः । उचितमिदम् ।

यस्याश्चोरश्चिकुरनिकरः कर्णपूरो मयूरो-
भासो हासः कविकुलगुरुः कालिदासो विलासः ।
हर्षो हर्षो हृदयवसतिः पञ्चबाणस्तु बाणः
केषां नैषा कथय कविताकामिनी कौतुकाय ॥

अपिच

न ब्रह्मविद्या नच राजलक्ष्मीस्तथा यथेयं कविता कवीनाम्।
लोकोत्तरे पुंसि निवेश्यमाना पुत्रीव हर्षं हृदये करोति ॥

नेपथ्ये । साधु भोः कुशीलवकुलोत्तंस साधु

सूत्रधारः । कथमयं भगवतो याज्ञवल्क्यस्य प्रियोऽन्तेवासी दाल्भ्यायन इत एवाभिवर्तते । तदास्यानवलोकनीयचतुर्थवर्णस्य पुरतःस्थातुमनुचितमस्माकम् । तदेहि परतो गच्छाव इति निष्क्रान्तौ ।

॥ प्रस्तावना ॥

प्रविश्य दाल्भ्यायनः । तमेव श्लोकं पठित्वा साकूतम् । साधूक्तमनेन । तथाहि । भूपतिरयं जनकोऽपि सकललोकलोचनारविन्दमार्तण्डे क्वचिदपि पुरुषप्रकाण्डे निजां कन्यां समर्पयितुकामोऽस्मद्गुरूपदिष्टायां ब्रह्मविद्यायां कुलक्रमागतायां राज्यलक्ष्म्यां च शिथिलादरः संवृत्तः । पुनः कर्णं दत्वा कथमयमाकाशे वीणाध्वनिः श्रूयते । तन्नूनमस्मद्गुरुमभ्यागच्छता समीरसंघट्टनकलक्वणद्वल्लकीगुणेन देवर्षिणा नारदेन भवितव्यम् । विलोक्य कथं ध्वनिसादृश्येन प्रतारितोऽस्मि । नन्वयं गगनतलावलम्बिनोर्मधुकरयोरेव ध्वनिराकर्ण्यते । पुनः कर्णं दत्वा सहर्षविस्मयम् । अहो भगवतो योगीश्वरस्य प्रसादमहिमा येनाहमेवंविधानामपि वचनावबोधमधुरां सिद्धिमासादितवानस्मि । तदाकर्णयामि किमेतावालपतः । कर्णं दत्वा

एकः किमाह । सखे कलालाप कुत आगतोऽसि

अपरः किमाह । वयस्य मधुरप्रिय संततविकस्वराच्चन्द्रमौलिमन्दाकिनीकुमुदकाननात् । अहो अनयोश्चतुरालापपेशलता रुचिरनामधेयता च । पुनः कर्णं दत्वा

किमाह मधुरप्रियः । अस्ति नवीनः कोऽपि वृत्तान्तः ।

किमाह कलालापः । अस्ति । अचिरमेव कदापि खलु बलिनन्दनो बाणासुरः कमलमालया भगवन्तमिन्दुमौलिमभ्यर्च्य सविनयमिदमूचिवान् । यत् किल भगवन्

कैलासाधिकसारं किमस्ति वस्तु महीतले ।
यस्मिन् सफलतामेति मम दोर्दण्डमण्डलम् ॥

ततश्च विहस्येदमाह च भगवानिन्दुमौलिः ।

अस्ति मे कार्मुकं दिव्यं न्यस्तं जनकभूभुजि ।
यस्य बाणानले तिस्रः पुरः प्राप्ताः पतङ्गताम् ॥

तदाकर्ण्य च तत् कार्मुकं विलोकयितुं स तत्र गतः । अहमिहागतः । कुतः पुनस्त्वमिह कथय कीदृशो वा तत्र नवीनो वृत्तान्त इति

दाल्भ्यायनः । किमाह मधुरप्रियः । अहमागतोऽस्मि नन्दनवनात् । अथच तत्र मया लङ्केश्वरानुचरस्य गर्जितमाकर्णितम् । आः कथं रे नन्दनवनस्य रक्षिणोऽनर्चितचन्द्रचूड एव निशाचरचक्रवर्तिनि लूनसकलप्रसूनं नन्दनवनमिति । ततस्तैरिदमुक्तो निशाचरः । क्षन्तव्यमेतत् । अद्य हि जनकराजकन्यकावीरस्वयंवरविलोकनकुतुकितसकलसुरलोकविमानमण्डनाय महान् कुसुमोपयोगः । तदाकर्ण्य चेममेव वृत्तान्तमुपायनीकरोमि लङ्केश्वरस्येति प्रचलितो निशाचरः । अहमपि कौतुकादिहागतोऽस्मि ।

दाल्भ्यायनः । सविषादम् । अहो महाननर्थाङ्कुरोद्भेदो यदयं बाणरावणयोः कर्णान्तिकमपि विश्रान्तः सीतास्वयंवरवृत्तान्तः । अथवा अलमतिकातरतया । भ्रमारोपिता अपि भ्रमरोक्तयः सम्भवन्ति । विमृश्य कुतो वा भ्रमरसंभावना ।

मकरन्दरसस्यन्दसुन्दरोद्गारधारिणौ ।
श्रवणानन्दिनावेतौ बन्दिनाविव राजतः ॥

नेपथ्ये । साधु भगवन् विज्ञातं बन्दिनावेव खल्वावां नानादिगन्तसमागतनृपतिचक्रवर्णनाय जनकेन समादिष्टौ ।

दाल्भ्यायनः । अहो घुणाक्षरन्यायो यदिदं भ्रमरद्वयं प्रति मयोक्तं बन्दिद्वयं प्रति फलितं वचः । भवतु तदिमं भ्रमरवृत्तान्तमस्मद्गुरवे निवेदयामीति निष्क्रान्तः ।

॥ विष्कम्भकः ॥

ततः प्रविशति बन्दिद्वयम् ।

एकः । वअस्स मञ्जीरअ पेक्ख पेक्ख गइंददसणसिणिद्धसलाआसहस्सणिम्मिहेसु मंचएसु आसीणा इमे कुङ्कुमकअङ्गराआ राआणो अमलफडिअपासाअसिहरासङ्गिणो कणअसिंहा विअ रेहन्ति । समुद्ददुद्धसाअरलहरिसिहरावलम्बिणो अभिणवुग-

Digitized by Google

मन्तणिसाअरबिम्बपडिबिम्बा विअ सोहन्ति * ।

मञ्जीरकः । सखे नूपुरक पश्य पश्य ।

स्वां स्वां दिशं श्रितवतां निवहेन राज्ञां
मञ्चावलीवलयमाकलितं विभाति ।
सीतास्वयंवरविलोकनकौतुकेन
पुञ्जीकृताकृति दिशामिव चक्रवालम् ॥

अपिच ।

नटति नरकरायव्ययसूत्रायलग्न-
द्विपदशनशलाकामञ्चपाञ्चालिकेयम् ।
त्रिपुरमथनचापारोपणोत्कण्ठिताना-
मतिरभसवतीव क्ष्माभृतां चित्तवृत्तिः ॥

नूपुरकः । वअस्स मञ्जीरअ को इमो सीदाकरग्गहवास-नावसन्तलच्छीविलसन्तपुलअमुउलजालमण्डिदं णिअभुअसह-आरसाहिजुअलं पुलोअन्तो चिट्ठदि † ।

मञ्जीरकः । स एष निजयशःपरिमलप्रमोदितचारणचञ्च-रीकचयकोलाहलमुखरितदिक्चक्रवालक्ष्मापालकुन्तलालङ्कारो मल्लिकापीडो नाम ।

नूपुरकः । इमो उण कदमो जो किल दूरावसारिअकडअ-प्पअडिअधणुग्गुणकिणकिसणलेहामण्डले भुअदण्डे पुलोअन्तो चिट्ठदि ‡ ।

मञ्जीरकः । सोऽयं कुबेरदिगङ्गनाललाटतटविलासलंपटः काश्मीरतिलकः ।

नूपुरकः । इमो उण को निअपडावदिणअरुग्गमपुव्वगिरि-सिहरसहअरं दक्खिणभुअदण्डमुच्चमिअ वट्टदि § ।

मञ्जीरकः । स एष निजप्रतापप्रभापटलपिञ्जरितमलया-चलनितम्बतटः काञ्चीमण्डनो वीरमाणिक्यनामा नृपतिः ।

नूपुरकः । को इमो हरसुल्लसन्तपुलअविसंठुलकपोलत्थल-चलकुण्डलसारिसंनिवेसणावदेसेण पअडिअहरसरासणकण्ण-ऊरमनोरहो रेहदि * ।

मञ्जीरकः । सोऽयमसमरणमहार्णवैकमकरो मत्स्यराजः ।

नूपुरकः । इमो उण को अमलमलयजरसधवलिअभुअद-ण्डविडम्बिअभुअगरायसिरी सिरीसकुसुमसुउमारं माररिपुस-रासणं कलअन्तो विप्फुरदि † ।

मञ्जीरकः स एष विमलमुक्तावलीविराजमानवक्षस्तटतुङ्ग-भुजङ्गतरङ्गः सिन्धुराजः । तदलमनेन प्रकृतं तावदुपक्रमामहे । परिक्रम्य उच्चैः । अहो राजान आकर्णयत आकर्णयत ।

आकर्णान्तं त्रिपुरमथनोद्दण्डकोदण्डनद्धां
मौर्वीमुर्वीवलयतिलकः कोऽपि यः कर्षतीह ।
तस्यायान्ती परिसरभुवं राजपुत्री भवित्री
कूजत्काञ्चीमुखरजघना श्रोत्रनेत्रोत्सवाय ॥

पुनः सकौतुकम् । सखे पश्यताममी ।

कामारिकार्मुकविकर्षणकौतुकोर्मि-
रोमाञ्चितर्द्विगुणपीवरबाहुदण्डाः ।
सीताकरग्रहमिलत्कुतुकातिमात्र-
विस्तीर्यमाणहृदयाः परितो नरेन्द्राः ॥

पुनः सहर्षम् । अये कथमुच्चलितमेव समसमयसंचरण-मिलत्कपोलतलसंघट्टमसृणरणन्मणिकुण्डलेन राजमण्डलेन ।

नूपुरकः । पुलोएहि पुलोएहि इमाणं अवरोप्परसंघट्टन्त-केऊरसमुच्चलन्तकणअकणाणिसेण पआवाग्गिणो विप्फुलिङ्गा विअ दीसन्ति ‡ ।

मञ्जीरकः । विहस्य

पश्य पश्य सुभटैः स्फुटभावं ।
भक्तिरेव गमिता ननु शक्तिः ॥
अञ्जलिर्विरचितो ननु मुष्टिः-
र्मौलिरेव नमितो ननु चापः ।

नूपुरकः । कहं आरम्भरमणिज्जो जेव्व इमाणं संरम्भो § ।

मञ्जीरकः । सविषादम् ।

आद्वीपात् परतोऽप्यमी नृपतयः सर्वे समभ्यागताः
कन्येयं कलधौतकोमलरुचिः कीर्तिश्च लाभास्पदम् ।

---

* वयस्य मञ्जीरक पश्य पश्य गजेन्द्रदशनस्निग्धशलाकासहस्रनिर्मि-तेषु मञ्चेष्वासीना इमे कुङ्कुमकृताङ्गरागा राजानोऽमलस्फटिकप्रासादशि-खराधिरूढाः कनकसिंहा इव राजन्ते । अमुग्धदुग्धसागरलहरीशिखरावल-म्बिनोऽभिनवोद्गच्छन्निशाकरबिम्बप्रतिबिम्बा इव शोभन्ते ।

† वयस्य मञ्जीरक कोऽयं सीताकरग्रहवासनावसन्तलक्ष्मीविलसत्पु-लकमुकुलजालमण्डितं निजभुजसहकारशाखियुगलं विलोकयन् तिष्ठति ।

‡ अयं पुनः कतमो यः किल दूरावसारितकटकप्रकटितधनुर्गुणकिण-कषणलेखामण्डले भुजदण्डे विलोकयन् तिष्ठति ।

§ अयं पुनः को निजप्रतापदिनकरोद्गमपूर्वगिरिशिखरसहचरं दक्षिण-भुजदण्डमुच्चमय्य वर्तते ।

* कोऽयं हर्षोल्लसत्पुलकविसंष्ठुलकपोलस्थलचलितकुण्डलसद्वृशनिवेश-नापदेशेन प्रकटितहरशरासनकर्णपूरमनोरथो राजते ।

† अयं पुनः कोऽमलमलयजरसधवलितनिजभुजदण्डविडम्बितभुजङ्गरा-जश्रीः शिरीषकुसुमसुकुमारं माररिपुशरासनं कलयन् विस्फुरति ।

‡ विलोकय विलोकय एषामन्योन्यसंघट्टमानकेयूरसमुच्चलत्कनककण-मिषेण प्रतापाग्नेर्विस्फुलिङ्गा इव दृश्यन्ते ।

§ कथमारम्भरमणीय एवैतेषां संरम्भः ।

Digitized by Google

नाकृष्टं नच टात्कृतं न नमितं स्थानाच्च न त्याजितं
केनापीदमहो धनुः किमधुना निर्वीरमुर्वीतलम् ॥

नेपथ्ये । आः कोऽयमलीकवैतालिको धनुर्मात्रकेऽपि नमयितव्ये निर्वीरमुर्वीतलमुपदिशति ।

नूपुरकः । वअस्स कस्स इमो महीअलचलन्तराहुरहचक्ककक्कसो कण्ठधुणी सुणीअदि * ।

मञ्जीरकः । मयाप्ययमपरिचितः । तदेनं पृच्छामि तावत् । परिक्रम्य । अहो कः खलु भवान् यः सकलदेशदर्शिनो ममापि न विख्यातः

प्रविश्य पुरुषः । साटोपं परिक्रम्य सक्रोधम् । आः पाप वैतालिकापसद कतिपयग्रामटिकापर्यटनदुर्विदग्ध कथं मामपि दग्ध इत्यर्धोक्ते । स्वगतं कथं संवरणीयं विवरितुमुपक्रान्तोऽस्मि । भवतु इदमेव तावत् निर्वाहयामि । कथं मामपि दशदिग्विलासिनीकर्णपूरीकृतकीर्तिपल्लवं त्रिभुवनवीरनामधेयं कूपमण्डूक इव सागरमविख्यातमपदिशसि । तत्कथय क्व तावत् कर्णान्तनिशमयगुणां कन्यारत्नं कार्मुकं च ।

मञ्जीरकः । इदं तावत् कार्मुकं कन्या तु चरमं लोचनपथमवतरिष्यति ।

पुरुषः । ससंरम्भम् । धिङ् मूर्ख कथं रे राशिनक्षत्रपाठकानां गोष्ठीं न दृष्टवानसि । तेऽपि कन्यामेव प्रथमं प्रकटयन्ति चरमं धनुः ।

मञ्जीरकः । स्वगतं कथमयं वाचाटतां प्रकटयति । भवतु । अनयैव तावदेनं निवारयामि । प्रकाशम् । अये एतावति वीरमण्डले भवानेव नक्षत्रविद्याकुशलः ।

पुरुषः । सक्रोधम् । आः कथं रे अहमेव नक्षत्रविद्यायामकुशलः

मञ्जीरकः । तत् कथं कार्मुकमन्तरेणैव कन्याविलोकनायोत्कण्ठसे ।

पुरुषः । साटोपं । परिक्रम्य कथं ममापि चापारोपणे संशयः ।

मञ्जीरकः । अथ किम्

पुरुषः । तदेव ममाभिसंभाव्यते । यदि

विनैवाम्भोवाहं बहलरुचिलिप्ताम्बरतलात्
तडिल्लेखा हेमद्युतिविततिरम्या विलसति ।

यदिवा

विनैव स्वर्गङ्गां नभसि रभसोन्मुद्रशफरी-
परीवर्त्तैः साकं स्फुरति नवनीलोत्पलवनम् ॥

विलोक्य सविषादं कथमस्मत्प्रतिज्ञाभङ्गाय विपरीतं सृष्टिनैपुणं प्रणीतवान् विधिः । नन्विदं तथैव पश्यामि । विमृश्य । अथवा क एष विधिरपि मद्विरोधाय ।

* वयस्य कस्यायं महीतलचलद्राहुरथचक्रकर्कशः कण्ठध्वनिः श्रूयते ।

मयि क्षीरोदन्वत्प्रभृतमुरजिन्नाभिनलिनीं
निजक्रीडावापीजलकमलिनीं कर्तुमनसि ।
पदभ्रंशाशङ्की मधुरमधुरालापचतुरै-
श्चतुर्भिः स्वैर्वक्त्रैरनुनयपरोऽभूदयमपि ॥

पुनर्निपुणं निरूप्य । अये सादृश्येन प्रतारितोऽस्मि ।

तडिल्लेखा नेयं विलसति परं सौधशिखरे
वसन्त्याः कस्याश्चित् कनकरुचिरा गात्रलतिका ।
अपीदं नोन्मज्जत् कुवलयवनं मीनतरलं
परं तस्या एव स्फुरति नयनालोकललितम् ॥

विभाव्य नूनं तदेव सीताभिधानं कन्यारत्नम् । पुनः सहर्षम् ।

राजीव जीवसि मुधा न सुधाकरत्व-
मस्याः समः पदनखस्य कुतो मुखस्य ।
अये दृशोर्मृगदृशः कतमः कुरङ्ग-
स्तत् खञ्जन त्वमपि किं जनरञ्जनाय ॥

पुनः सरभसम् ।

कदली कदली करभः करभः करिराजकरः करिराजकरः ।
भुवनत्रितयेऽपि बिभर्ति तुलामिदमूरुयुगं न चमूरुदृशः ॥

मञ्जीरकः । सखे नूपुरक किमेतत् कस्याश्चिदपि हस्तादादायसानन्दमालोकयत्यान्तःपुरिको जनः ।

नूपुरकः । अहमेरिसं सम्भावेमि जं किर गुरुभवणादो आगदाए चन्दणिआए समप्पिदं चित्तपडं पुलोवेदित्ति * ।

मञ्जीरकः । स त्वया दृष्टश्चित्रपटः ।

नूपुरकः । भट्टदारिआ दाव अण्णच्च कोवि णीलुप्पलदामसामलङ्गो कुसुमसरसरिसरूओ कुण्डलीकिदहरचावो चक्कवट्टिकुमारो † ।

मञ्जीरकः । अहह मुग्धः खल्वबलाजनः । यदेवमपि कठोरप्रतिज्ञे राजनि किशोरवयसं जामातरमाशंसति । सखे जानासि केन लिखितं चित्रमिति ।

नूपुरकः । जाणामि । महेसिणो जणणवक्कस्य दुहिआए धम्मचारिणीए ‡ ।

मञ्जीरकः । सहर्षम् । इदानीमुद्भिन्नो मम मनोरथाङ्कुरः । देवी हि मैत्रेयी सिद्धयोगिनी कालत्रयदर्शिनी सा नालीकमालिखति ।

नूपुरकः । सव्वं सम्भावीअदि जइ इमो अरठङ्गो इदो ओसरदि § ।

* अहमीदृशं सम्भावयामि यत् किल गुरुभवनादागतया चन्दनिकया समर्पितं चित्रपटं विलोकयतीति ।

† भट्टदारिका तावत् अन्यश्च कोऽपि नीलोत्पलदामश्यामलः कुसुमशरसदृशरूपः कुण्डलीकृतहरचापश्चक्रवर्तिकुमारः ।

‡ जानामि महर्षेर्जनकस्य दुहित्रा धर्मचारिण्या ।

§ सर्वं सम्भाव्यते यद्ययं अरठाङ्ग इतोऽपसर्पति ।

मञ्जीरकः । आः कोऽयं किमिदमेनमपसारयामि । अये किमितस्ततो विलोकयसे । नन्विदं शाम्भवं धनुस्तदिहैव दीयतां दृष्टिः ।

पुरुषः । आः किमुच्यते दृष्टिरिति । नन्वियं मुष्टिरपि दीयते । परिक्रम्य शेखरभ्रंशमभिनीय सविषादं विलोकयति ।

मञ्जीरकः ।

अये लङ्केश विस्रस्तशेखरालोकनेन ते ।
समयो याति तत् तूर्णं गृहाण हरकार्मुकम् ॥

पुरुषः । स्वगतं । कथमनेन विदितोऽस्मि विमृश्य । अथवा घुणाक्षरन्यायगतं शब्दसादृश्यमेतत् । प्रकाशं ससंरम्भम् ।

सावलेपकमनीयमुदस्य
क्रीडयैव विनिबध्य च मौर्वीम् ।
कृष्टमेव हरकार्मुकमेतद्
दृश्यमत्र सुदृशो हृदयं च ॥

धनुषि हस्तमर्पयित्वा स्वगतं कथं न चलत्यपि । भवतु प्रकाशम् । अये धनुरिति वक्रः पन्थाः । तत् सरलेन करवालधारापथेन सीतामानयामि ।

मञ्जीरकः । कथमतिप्रगल्भसे । न विलोकयसि ।

रोषारुणीकृतविलोचनकान्तिभिन्न-
भ्रूभङ्गभीमघटितभ्रुकुटीविटङ्कम् ।
उत्खातलोलकरवाललताकराल-
दोर्दण्डचण्डचरितं नरवीरचक्रम् ॥

पुरुषः । कृपाणमुद्भ्रम्य परितो विलोक्य पश्यत पश्यत ।

निर्भिन्नवैरिकरिकुम्भतटीविमुक्त-
मुक्ताफलप्रकरतारकिताम्बरश्रीः ।
यः कालरात्रिरिव भाति रणे स एष
रे रे नृपा मम कृपाणकृपाणः कृपाणः ॥

आकाशे कर्णं दत्वा । किं ब्रूथ ।

एकः कथं बहुतरैः सुभटैः करोमि
संग्रामडम्बरमिति त्यज रे विषादम् ।
यं मन्यसे सुलभमत्र सहैव तेन
चेतो निधेहि समरे समरेखयैव ॥

अहो धृष्टता मनुष्यकीटानाम् । तदेतान् निजमूर्त्यैव तावद् भीषयामि । साटोपं निष्क्रान्तः । नेपथ्ये ।

मन्दाकिनीकनकपद्मबिसाङ्कुराणां
किञ्चोर्ध्वदिग्गजलसद्दशनाङ्कुराणाम् ।
उन्मूलनैरलमनीयत शैशवं यै-
स्तेऽमी निजा मम भुजाः प्रकटीभवन्तु ॥

ततः प्रविशति निजरूपेण दशकण्ठः ।

नूपुरकः । वअस्स पेक्ख पेक्ख कोदूहलं जं एकस्सवि माणुसस्स दस मत्थआइं * ।

मञ्जीरकः । नैष मानुषो राक्षसराजः खल्वसौ दशकण्ठः ।

नूपुरकः । ता परित्ताअदु मं वअस्सो णं रक्खसमत्तो जेव्व सम्मुहपडिदं माणुसं चव्वेदि किं उण रक्खसराओ † ।

मञ्जीरकः । अलं कातरतया । सकलवीरवृन्दवन्दनीया हि बन्दिजातिः । तत् कथमस्माद्विधेषु सकलभुवनैकवीरो विपरीतं वर्तिष्यते दशकण्ठः ।

नूपुरकः । सहर्षम् । जदि एरिसं ता किंपि इमं णीसङ्को पुच्छिस्सम् । उपसृत्य अये किंति एत्तिआइं मत्थआइं उव्वहोअन्ति किन्तिवा एक्कं रक्खिअ उण अवराइं जन्तकुत्तवि व णिक्खिप्पन्ति ‡ ।

रावणः । आः पाप कथमस्थाने शिरश्छेदवार्तयामङ्गलमावेदयसि तदेष वैतालिक इत्युपेक्ष्यः ।

मञ्जीरकः । विहस्य स्थाने शिरश्छेदवार्ताऽपि भवतो मङ्गलाय ।

रावणः । अथ किं ननु रे ।

विद्याधरप्रणयिनीकरपल्लवाग्र-
लीलाविमुक्तकुसुमप्रकरावकीर्णां ।
श्रीचन्द्रचूडचरणे च रणे च कामं
छिन्नोऽपि मस्तकगणो मम मङ्गलाय ॥

नूपुरकः । जदि एरिसो तुमं ता किन्ति णिअरूअं सङ्गोविअ चोराव्व पविट्ठोऽसि § ।

रावणः । धिङ् मूर्ख न जानासि रे ।

ये चन्द्रचूडाचलचालनैक-
चातुर्यचिन्तामणयो भुजा मे ।
तैरेव भूयिष्ठतरैः प्रवृत्त-
श्चापाधिरोपाय कथं न लज्जे ॥

तत् कथय कुत्र जानकीति ।

मञ्जीरकः । सविषादम् ।

यस्याः स्वयं कुलगुरुः किल याज्ञवल्क्य-
स्तातः स एष जनको जननी धरित्री ।
सापि त्वमद्य बत दुर्विधिवैशसेन
वत्से निशाचरकराङ्कगता भवित्री ॥

---

* वयस्य पश्य पश्य कौतूहलं यदेकस्याऽपि मानुषस्य दश मस्तकानि ।

† तत् परित्रायस्व मां वयस्य नूनं राक्षसमात्र एव सम्मुखपतितं मानुषं चर्वति किं पुना राक्षसराजः ।

‡ यदीदृशस्तर्हि किमप्येनं निःशङ्कः प्रक्ष्यामि । अये किमिति इयन्ति मस्तकानि ऊह्यन्ते किमिति वा एकं रक्षित्वाऽपराणि यन्त्रकुत्रचित्र निक्षिप्यन्ते ।

§ यदीदृशस्त्वं तर्हि किमिति निजरूपं संगोप्य चोर इव प्रविष्टोऽसि ।

नूपुरकः । अपवार्य । अलं तावेण कहं एत्तिअमेत्तम्मि वीरमण्डले कोवि णत्थि जो इमस्स हठपउत्तस्स पुरदो होदि * ।

मञ्जीरकः । कुपितस्य दशकण्ठस्य कः संमुखे भवति क्षत्रियक्षते सहस्रबाहोः कार्तवीर्यात्

नूपुरकः । सहर्षम् । जीविदह्म पेक्ख णं पत्तो सहस्सबाहू किदवीरपुत्तो † ।

मञ्जीरकः । धिङ् मुर्ख जामदग्न्यकुठारधाराजलनिमग्नः क्व संप्रति कार्तवीर्यः । तन्नूनमयं बाणासुरो भविष्यति । हन्त भोः तदिदमनर्थान्तरम् । विमृश्य । अथवा विषस्य विषमौषधं भविष्यति ।

ततः प्रविशति बाणासुरः । परिक्रम्य साटोपम् ।

कैलासशैलशिखरादपि भूरिसारं
निःसीमभारमधुना धनुरिन्दुमौलेः ।
आलम्ब्य पुष्पसदृशं करपल्लवेन
स्फीतं भुजद्रुमवनं सफलं करोमि ॥

रावणः । अनाकर्णितकेन । कथमद्यापि नानीयते जानकी ।

बाणः । विलोक्य स्वगतम् । कथमिह दशकण्ठोऽपि । प्रकाशम् । अहो एतावति वीरलोके न केनापि तावदारोपितमैश्वरं धनुः ।

नूपुरकः । नारोपणीयं च

रावणः । कथमद्यापि नानीयते सीता । तदयं चन्द्रहास एव मे बलादानयति ।

बाणः । विहस्य । यदीदृशं वीरडम्बरं तत् किमारोप्यैव हरकार्मुकं नानीयते सीता ।

रावणः । आः कोऽयमलीकपण्डितः ।

उद्दण्डचण्डिमलसद्भुजदण्डखण्ड-
हेलाचलाचलहराचलचारुकीर्तेः ।
कीदृग्यशस्तुलितबालमृणालकाण्ड-
कोदण्डकर्षणकदर्थनयानया मे ॥

बाणः । सोऽयमशक्तिप्रकारः ।

रावणः । आः कथं दशमुखस्याप्यशक्तिसंभावना ।

बाणः । विहस्य । अये बहुमुखता नाम बहुप्रलापितायाः कारणं विक्रमस्य बहुबाहुतेव ।

रावणः । आः कथं रे पलालभारनिःसारेण भुजभारेण वीरंमन्योऽसि ।

बाणः । सक्रोधम् । अये समरकलाकुण्ठ दशकण्ठ ममाऽपि भुजभारं निःसारं व्यपदिशसि । न जानासि किं यतोऽत्रैव

पितुः पादाम्भोजप्रणतिरभसोत्सिक्तहृदयः
प्रयातः पातालं न कतिकतिवारानकरवम् ।
सहस्रे बाहूनां क्षितिवलयमासज्य सकलं
जगद्धारोद्वेलां फणफलकमालां फणिपतेः ॥

रावणः । अरे चलितनयवृत्तिरसि यदलीकविक्रमवर्णनया सत्यविक्रमस्य मे पुरतः स्वात्मानं विडम्बयसि ।

बाणः । कथं त्वमेव सत्यविक्रमः ।

रावणः । अथ किम् ।

दोर्भ्यां न मे विदितवानसि वीरलक्ष्मी-
प्रासादविभ्रमवतीं पदवीं गरिष्ठाम् ।
ये चन्द्रशेखरगिरौ करपल्लवाङ्क-
पर्यङ्कशायिनि दधुः कलशप्रतिष्ठाम् ॥

बाणः । अलमलीकवाग्विग्रहेण तदिदं धनुरावयोस्तारतम्यं निरूपयिष्यति ।

मञ्जीरकः । अये बाणरावणौ किमिदं नरवीरैकसमर्पणीयसीतापरिणयमनोरथेन विफलमायास्यते चेतःपदवी ।

बाणः । किमेतावता

त्रिपुरमथनचापारोपणोत्कण्ठिताधी-
र्मम न जनकपुत्रीपाणिपद्मग्रहाय ।
अपितु बहुलबाहुव्यूहनिर्व्यूहमाला-
बलपरिमलहेलाताण्डवाडम्बराय ॥

रावणः

उन्मीलितेन शिखरेण हराचलस्य
प्रागेव मे भुजवनस्य कृता परीक्षा ।
एषा विदेहतनयाकुचकुम्भकेलि-
कौतूहलाद्गिरिशकार्मुककर्मदीक्षा ॥

नेपथ्ये

असुरसुरनिशाचरोरगाणा-
मपि नरकिंनरसिद्धचारणानाम् ।
नमयति यदि कोऽपि चापमेतन्-
मम दुहितुः स करग्रहं तनोतु ॥

रावणः

रे रे भुजाः कुरुत चन्द्रकलाकिरीट-
कोदण्डकर्षणयशोधवलां त्रिलोकीम् ।
अङ्गीकुरुध्वमचिराच्च विदेहपुत्री-
वक्षोजचन्दनरजःपरिधूसरत्वम् ॥

धनुरालोक्य स्वगतम् । अये दुर्विगाहमिदं तदलमनेन । प्रकाशम् । बाणत्वमेव तावदत्र धनुरारोपय । अस्माकमपि नूतनागतत्वेन मान्योऽसि ।

* अलं तापेन कथमेतावन्मात्रे वीरमण्डले कोऽपि नाऽस्ति योऽस्य हठप्रवृत्तस्य पुरतो भवति ।

† जीविताः स्मः । पश्य प्राप्तः सहस्रबाहुः कृतवीर्यपुत्रः ।

Digitized by Google

बाणः । तथास्त्विति परिक्रामति ।

रावणः । स्वगतम् । अरे हृदय । अलं कातरतया । अयं तावत् कतरः कुण्ठीकृतदशकण्ठे शितिकण्ठकार्मुके ।

अन्योऽपि कोऽपि यदि चापमिमं विकृष्य
सीताकरग्रहविधिं विदधीत धीरः ।
लङ्कां नयामि च गिरानुनयामि चैनां
द्रागानयामि च वशे जनकेन्द्रपुत्रीम् ॥

मञ्जीरकः । सखे पश्य

बाणस्य बाहुशिखरैः परिपीड्यमानं
नेदं धनुश्चलति किंचिदपीन्दुमौलेः ।
कामातुरस्य वचसामिव संविधाने-
रभ्यर्थितं प्रकृतिचारु मनः सतीनाम् ॥

रावणः । सविषादमात्मगतम् । कथमियं सीतानुनयप्रत्यूहपिशुनेव दुरुपश्रुतिः । प्रकाशम् । अये बाण अपि नाम ते पलालभारनिःसारो भुजभारः ।

बाणः । कथं भुजमण्डलमिदमालोकयन्नपि कटुभाषितां न मुञ्चसि ।

रावणः । तत् किमनेन करिष्यसि ।

बाणः । यत् कृतं हैहयराजेन ।

रावणः । इदमसौ ते भुजवनं निजप्रतापानले निर्दहामि ।

बाणः । इदमहं त्वत्प्रतापानलमनेकशरचापचुम्बितनिजबाहुबलाहकनिवहनिर्मुक्तनाराचधारासारैः शमयामि ।

रावणः

रे बाण मुञ्च मयि बाणशतानि पञ्च
नन्वस्ति मे करतले करवालवल्ली ।
रे पञ्चबाण विसृज त्वमपि स्वबाणान्
नन्वेति सा युवतिलोकललामवल्ली ॥

नूपुरकः । अये बाणरावणा सच्चं जेव्व अप्पाणं वण्णन्ता ण लज्जेध * ।

रावणः । धिङ् मूर्ख कथमात्मैकश्लाघ्यो दशकण्ठः । ननु रे ।

मन्दोदरीकुटिलकोमलकेशभार-
मन्दारदाममकरन्दरसं पिबन्तः ।
वीणानिनादमधुरध्वनिमुद्गिरन्तो
मद्विक्रमं मधुकरा अपि कीर्तयन्ति ॥

बाणः । कथमयं सुरतरुकुसुमदामकमनीयकामिनीजनोपभोगसौभाग्यं विडम्बयति । तदिदानीम् ।

* अये बाणरावणौ स्वयमेवात्मानं वर्णयन्तौ न लज्जेथे ।

अमी मे दोर्दण्डास्तुलितहरशैलैकशिखरा-
स्सुरामाहं साहंकृतिकरतलन्यस्तकुलिशम् ।
पराभूय स्वैरं त्रिदशवनमुन्मूल्य सकलं
मम क्रीडोद्यानं सुरतरुमनोज्ञं विदधतु ॥

इति निष्क्रान्तः ।

रावणः । कथमयं निर्गतः । अहं तु

अनादृत्य हठात् सीतां नान्यतो गन्तुमुत्सहे ।
न शृणोमि यदि क्रूरमाक्रन्दमनुजीविनः ॥

मञ्जीरकः । वत्से जानकि । अधुना दैवेनरक्षणीयासि ।

रावणः । कर्णं दत्वा । अये कस्यायमाक्रन्दः श्रूयते नभसि । निपुणं निरूप्य । नूनमनेन कस्यचित् नाराचपीडितेन कठोरमाक्रन्दता गगनपथचारिणा मारीचेन भवितव्यं तदेनमाश्वासयामि तावदिति निष्क्रान्तः ।

नूपुरकः । वअस्स दिट्ठिआ वअस्स विअ मुहादो कुरङ्गो विअ इमस्स हत्यादो उव्वरिदा जाणई * ।

मञ्जीरकः । सखे एवमेतत् तदेहि वृत्तान्तमिमं जनकराजस्य निवेदयावः ॥ इति निष्क्रान्ताः सर्वे ।

॥ प्रथमोऽङ्कः ॥

* वयस्य व्याघ्रस्येव मुखात् कुरङ्गीवास्य हस्तादुर्वरिता जानकी ।

RÁMA AND SÍTÁ.

X.

As, when the sun and moon their empire leave,
Black night descends upon the widowed eve;
So Rávan, watching for the lovely prize—
His form concealed in roaming Bráhman's guise—
Drew near to Sítá, in the cottage left,
Far from her guardians, of all aid bereft.
All life was hushed, and, as the Fiend came near,
No leaflet stirred, the wind was still through fear;
And his red eye held, powerless to flee,
The trembling waters of Godáverí.
Unholy guest in holy guise he came,
Close to the side of Ráma's mourning dame:
Like a dark well with treacherous weeds o'ergrown,
Like Saturn when his baleful rays are thrown
Upon the fairest star of all the sky.
Thus the Night-rover with his evil eye
Looked on the lonely lady as she wept
Within her leafy home. Awhile he kept
His gaze upon her beauty, for it fed
Upon the splendour of white teeth, the red
Of luscious lips, the light of eyes that through
Their long soft lashes, moistened with the dew
Of weeping, glorified a face, fair-browed,
Pure as the moon shining without a cloud.
  Then Rávan cried, pierced by Love's fiery dart:
"Speak, marvellous beauty, tell me who thou art:

Digitized by Google

All lonely here, in silken robes arrayed,
Wearing a lotus wreath thy brows to shade :
What heavenly being do mine eyes behold,
Fairer and brighter than the finest gold?
Fame? Beauty? Modesty?—No less I ween,
Or sweet Desire, young Love's voluptuous queen?
Red are thy lips, thy teeth are small and white ;
Thy tender eyes are large and soft and bright.
No child of earth could wear a smile so sweet,
And O, the wonder of thy perfect feet!
Robes cannot hide the glories of thy breast,
And fancy faintly pictures all the rest.
Sweet queen, these eyes have never seen till now
Sylph, Nymph, or Goddess half so fair as thou.
This savage wood befits thee, lady, ill,
Where wild Fiends roam, changing their form at will.
On some smooth terrace should thy couch be spread,
In gardens sweet with blooms thy feet should tread ;
A royal robe thy peerless form should deck,
And priceless gems sparkle upon thy neck ;
The choicest wreath should bind thy glorious hair,
A matchless lord thy bed of love should share.
Who art thou, Goddess? But no Heavenly Maid
Loves this wild wood: beneath this gloomy shade
No Nymph or gentle spirit seeks to roam ;
This is the Giant's haunt, the lion's home.
Dost thou not dread, so delicate and fair,
The tiger near thee and the wolf and bear?
Whose and who art thou? Tell me, whence and why
Thou comest hither, with no guardian nigh,
To the wild woods of DANDAKA, where stray
Demons, and lions roaring for their prey."

He ceased. The lady, by his garb beguiled,
With fearless innocence looked up and smiled;
She bade the seeming Bráhman to a seat,
And gave him water for his weary feet;
And, still intent on hospitable care,
Brought forth the choicest of her woodland fare.
She by the cottage door expecting stood
To see her lord returning through the wood;
But nought save boundless trees her gazes met,
RÁMA and LAKSHMAN, lingering, came not yet.
And then she told him what he sought to know,
Her name, her lineage, all her weal and woe :
The monarch's promise, and KAIKEYÍ's hate,
The fatal oath, and grief that came too late.
"And now," she said, "declare thy name and race,
And why thou roamest to this gloomy place."

She spoke. The stranger thundered in reply :
"Terror of men and Gods and worlds am I,
RÁVAN, whose will the Giant hosts obey.
Since I have seen thee, lovely one, to-day,
Clad in silk raiment, bright as polished gold,
My love for all my wives is dead and cold.
Though countless dames of perfect beauty, torn
From many a pillaged realm, my home adorn,
Come, fairest, come, my queen and darling be ;
Among a thousand I will love but thee.
My city, LANKÁ, like a glittering crown,
Looks from the high brow of a mountain down
On restless Ocean, who with flash and foam
Beats in wild rage against my island-home.
There pleasant gardens shall thy steps invite
With me to wander when the moon is bright;
There in new joys thy breast shall ne'er retain
One faint remembrance of this place of pain."

Then from her breast the noble fury broke;
With flashing eye and quivering lip she spoke :
"Me, me, the faithful wife of RÁMA, him
Before whose glory INDRA's fame is dim :
RÁMA, who quails not in the battle-shock,
Fierce as the Ocean, steadfast as the rock :
RÁMA, the lord of each auspicious sign;
RÁMA, the glory of his princely line.
Me, RÁMA's wife, the dear fond wife of him,
Him of the eagle eye, the lordly limb;
Me dost thou dare with words of love to press,
A jackal suing to a lioness?
As far above thine impious reach am I
As yonder sun that blazes in the sky.
Ha! thou hast seen those air-drawn trees of gold,
That sign of doom which dying eyes behold,
If thou hast ventured, weary of thy life,
To look with eyes of love on RÁMA's wife.
Fool! thou hadst better strive to rend away
The serpent's venomed fang, the lion's prey ;
To steal the blessed tree that blooms on high,
To drink fell poison and not fear to die.
Fool! with a needle's point thine eye to prick ;
Fool! with thy tongue a razor's edge to lick.
Thou, tempt the wife of RÁMA! Better leap,
A millstone round thy neck, from LANKÁ's steep
Into the raging sea and strive to swim
From shore to shore than tempt the wife of him.
Thou, win his wife! With lighter labour try
To pluck the sun and moon from yonder sky;
Safer to wrap within thy robe the flame,
Than woo to folly RÁMA's faithful dame.
As the vast ocean to a trickling rill,
As MERU's mountain to the meanest hill;
The feathered monarch to the skulking bat,
The lordly lion to the crawling cat :
As sandal perfume to the common mire,
As gold, found perfect by the testing fire,
To homely iron and dull lumps of lead :
As the gay peacock, with his plumes outspread,
To the shy moping solitary owl;
As the proud swan is to the meanest fowl
That dips his wings, unnoticed, in the sea—
So is my RÁMA to a thing like thee."

Digitized by Google

Out burst the Giant, with a furious frown:
"Hast thou not heard of RÁMA's vast renown?
Ne'er heard the glory and the might of me
Before whose face celestial armies flee?
Whom all the Gods, with INDRA at their head,
Fear like the ruthless monarch of the dead;
Before whose eye the sun and moon grow pale,
And silent horror checks the shuddering gale;
That every leaflet on the tree is still,
Hushed every ripple of the babbling rill.
Beyond the sea my glorious city stands,
LANKÁ the famous, raised by giant hands:
Like INDRA's city, beautiful and bright
With golden walls and gates of lazulite.
There every flower of rarest odour blows,
And luscious fruit on loaded branches glows;
There is the sound of cymbal and of drum:
Tarry not, SÍTÁ, but arise and come!
Come, and with me all earthly pleasures share,
Nay, heavenly joys, my love, shall bless thee there."
He ceased; and, changing all his gentle guise,
Stood before SÍTÁ in his native size,
A monstrous Giant, terrible in form,
Dark as a thunder-cloud that leads the storm.
Ten-faced and twenty-armed, in every head
Glared the wild eye-balls that his rage made red,
As with a scowl upon each haughty brow,
He cried: "Fair SÍTÁ, wilt thou scorn me now?
Lift thy sweet eyes, dear child of earth, and see
A husband worthy of a queen like thee."
One eager hand her glorious tresses grasped,
One mighty arm around her waist was clasped;
Aid her, ye Spirits! Ah, all wild with dread
Each Nymph and Faun before the Fiend had fled.
Where, where is RÁMA? RÁMA roams afar,
And RÁVAN bears her to his magic car.
With angry threats the Giant tried to still
Her cries for aid, but very long and shrill
Rang forth her lamentation through the air,
As of one raving in her great despair:
"Help, RÁMA, help! O LAKSHMAN, were art thou?
Why, faithful champion, art thou heedless now?
My hero, wont the Giants' pride to tame,
Tear from their impious hands thy brother's dame!
She who drove RÁMA from his promised throne
Will doubly triumph when this deed is known.
Ye happy bowers, ye bloomy groves, farewell!
My mournful fate to royal RÁMA tell!
And thou GODÁVERÍ, dear stream, upon
Whose bosom float the mallard and the swan,
Forget not her who loves thee, but relate
To royal RÁMA SÍTÁ's mournful fate.
Ye gentle Fauns to whom this wood is dear
Let RAMA from your airy voices hear
That RÁVAN tears me hence! On you, on all
The countless life within these shades I call:
Say that the Fiend has borne away his wife,
His own true SÍTÁ, dearer than his life;
He will regain the spouse he loves so well,
Yea, if they bore her to the depths of Hell."
Down to her feet her loosened tresses hung,
As, like a creeper, with twined arms she clung
To bough and branch, and, falling on her knees,
Shrieked out for succour to the mighty trees.
Then RÁVAN's giant hand, unused to spare,
Seized her again by her long flowing hair:
Vengeance on thee that cursed touch shall bring,
And stain with gore thy hair, thou impious king!
All nature trembled, faint and sick with dread,
And sudden darkness o'er the world was spread;
The wind was hushed, dimmed was the glorious sun;
An awful voice that cried, The deed is done,
Burst from the mighty Sire, whose sleepless eye
Saw the fell outrage from his throne on high;
And the pure saints, with mingled joy and awe,
Looked on the sinner and his doom foresaw.
In vain she struggled, as the Giant threw
His arm around her waist and upward flew.
With yellow robes, far floating uncontrolled,
And fair limbs glowing like the burnisht gold,
The royal lady like the lightning shone,
Too dazzling lovely to be looked upon.
Touched by the glorious light the Giant's frame
Showed like a mountain belted round with flame;
And from the lotus wreath that crowned her head
Light falling petals on his limbs were shed.
Widowed of RÁMA and of joy, her face
Peered in its lovely sadness from the embrace
Of her fell ravisher: So looks the Moon
With pure light cleaving a dark cloud in June.

Rámáyaṇa Book III., 46 *and ff.*

ON THE ONTOLOGY OF THE VEDA'NTA.

(Continued from page 92.)

We beg attention especially to the pregnant parenthesis. The metaphysical knowledge of God "*whatever it amounts to*,"—*this*, he says, "may be in Gentiles as well as Christians." It is not this, therefore, that is "life eternal;" but neither can any such metaphysical conception, compatible, in the case of a Christian preacher, with the more momentous knowledge of a Redeemer and Sanctifier, amount to an exclusion of its Gentile holder from the possibility of receiving also that more momentous knowledge. Observe, that we are not at this moment considering what the metaphysical knowledge in question *is*;—that inquiry will receive attention in due time:—but we seek to impress upon the reader the intelligent apprehension of our position, viz., that the metaphysical conception, of which we shall have to treat, does *not* amount to an obstacle in our way, unless we choose to run our heads against it.

Digitized by Google

In the same year that Berkeley preached his missionary sermon, he published his *Minute Philosopher*, in a series of dialogues on the model of Plato. Here he pursues the freethinker through the various characters of atheist, libertine, enthusiast, scorner, critic, metaphysician, fatalist, and sceptic,—with what success the reader who may chance not to have read the book may certify himself by a perusal, from which we promise him an enjoyment of no ordinary description. Southey, we observe from a passage in his "Life," was greatly delighted with this work, which he warmly recommended to his friends.

In 1734 Berkeley was made Bishop of Cloyne. He repaired immediately to his manse-house at Cloyne—being a determined opponent of non-residence,—and applied himself with vigour to the discharge of all episcopal and parochial duties. His zeal in the cause of revealed religion was not, however, confined to his diocese. Mr. Addison had given the bishop an account of their common friend Dr. Garth's behaviour in his last illness. It appears that when Mr. Addison went to see the Doctor, and began to discourse with him seriously about preparing for his approaching dissolution, the other made answer—"Surely, Addison, I have good reason not to believe those trifles, since my friend Dr. Halley, who has dealt so much in demonstration, has assured me that the doctrines of Christianity are incomprehensible, and the religion itself an imposture." The Bishop, therefore,—(in the words of the biographer from whom we cull these particulars)—"took arms against this redoubtable dealer in demonstration," and addressed *The Analyst* to Dr. Halley, with the view of showing, that mysteries of faith were unjustly objected to by mathematicians, who admitted much greater mysteries in science,—especially in the doctrine of Fluxions, now known as the Differential Calculus, &c. This led to a great commotion among the mathematicians, and to not a little controversy. Meanwhile the bishop employed his pen on "*Queries* proposed for the Good of Ireland," on his "Discourse addressed to Magistrates," which put a stop to an impious society calling themselves *Blasters*, on a "Letter to the Roman Catholics" of his diocese, and on another letter, to the clergy of that persuasion in Ireland, written with so much candour and moderation as well as good sense, that those gentlemen, to their own credit, in the Dublin Journal of Nov. 18, 1749, thought fit to return "their sincere and hearty thanks to the worthy author; assuring him, that they are determined to comply with every particular recommended in his address, to the utmost of their power." They add, that in "every page it contains a proof of the author's extensive charity; his views are only towards the public good; the means he prescribeth are easily complied with; and his manner of treating persons in their circumstances so very singular, that they plainly show the good man, the polite gentleman, and the true patriot." Lord Chesterfield—a judge of merit, whatever else he may have been,—had no sooner the disposal of patronage in Ireland than he wrote to inform Berkeley that the see of Clogher, then vacant, the value of which was double that of Cloyne, was at his service. But Berkeley, though grateful for the offer, had no ambition in this way. He loved the place where he had been actively useful; and now his health was failing. He had derived great relief, in a distressing complaint brought on by his sedentary course of living, from the use of *tar-water;* and, being anxious that the benefit of the remedy should not be confined to himself, he composed, in recommendation of it, a work which he has been heard to declare cost him more time and pains than any other he had ever been engaged in. The work is entitled "Siris, a Chain of Philosophical Reflections and Inquiries concerning the Virtues of Tar-water." As his biographer remarks—"It is indeed a chain, which, like that of the poet, reaches from earth to heaven, conducting the reader, by an almost imperceptible gradation from the phenomena of tar-water, through the depths of the ancient philosophy, to the sublimest mystery of the Christian religion."

In 1752, Berkeley, in bad health, removed with his wife and family to Oxford, in order to superintend the education of one of his sons. Strongly impressed with the impropriety of non-residence, he had previously endeavoured to exchange his high preferment for some canonry or headship at Oxford. Failing of success in this, he wrote over to the Secretary of State to request that he might have permission to resign his bishopric, worth at that time at least £1,400 per annum. So uncommon a petition excited his majesty's curiosity to know who was the extraordinary man that preferred it. Being told that it was his old acquaintance Dr. Berkeley, he declared that he should die a bishop in spite of himself, but that he had free liberty to reside where he pleased. The Bishop, before leaving, made a handsome provision for the respectable poor of his district.

At Oxford he expired suddenly, the year following, on a Sunday evening, as he was reclining on a couch, in the midst of his family, listening to a sermon of Sherlock's which his wife was reading aloud. He seemed to be asleep, and his body was quite cold and his joints stiff, before his daughter, on offering him a dish of tea, first perceived his insensibility.

It was of Berkeley, that the discerning, fastidious, and turbulent Atterbury said, after an interview with him, "So much learning, so much knowledge, so much innocence, and such humility, I did not think had been the portion of any but angels, till I saw this gentleman." The friends that survived him, of all factions and parties, concurred in the dictum of the satirist—melted for the time into the encomiast—which ascribed

"To Berkeley every virtue under heaven."

Such was the man and the Christian whose ontological creed, we propose to show, was that of the Vedánta without its illicit deductions. In the notice of his labours which we have tacked together from the biography prefixed to his collected works, we have not mentioned his treatise "Concerning the Principles of Human Knowledge," from which we have taken our motto, nor his Three Dialogues "In Opposi-

Digitized by Google

tion to Sceptics and Atheists." It is from these that we have to take his ontological doctrine for comparison with that of the Vedánta. Of the vulgar estimate of Berkeley's system Mr. G H. Lewes—though no sympathiser with Berkeley's highest aspirations—writes most justly,—"All the "world has heard of Berkeley's Idealism, and innumerable "'coxcombs' have vanquished it 'with a grin.' Ridicule "has not been sparing of it. Argument has not been want-"ing. It has been laughed at, written at, talked at, shrieked "at. That it has been *Understood* is not so apparent. Few "writers seem to have honestly read and appreciated his "works; and those few are certainly not among his anta-"gonists. In reading the criticisms upon his theory it is "quite ludicrous to notice the constant iteration of trivial "objections which, trivial as they are, Berkeley had often "anticipated. In fact the critics misunderstood him, and "then reproached him for his inconsistency,—inconsistency, "not with *his* principles, but with *theirs.* They force a "meaning upon his words which he had expressly rejected; "and then triumph over him because he did not pursue their "principles to the extravagances which would have resulted from them." Among those who spoke or wrote nonsense about Berkeley's Idealism, it is sad to find Dr. Johnson and Dr. Reid. However, Sir William Hamilton, by his annotations on Dr. Reid's collected works, has provided an antidote to the misrepresentations of the latter; and Dr. Johnson's kicking a stone, as a refutation of the theory, may continue to be preserved for the joke's sake.

But it is time that we proceed to show what Berkeley's theory of Being really is; to show what terms in it correspond, and how far, to what terms in the Vedánta philosophy; and to show how much of the Vedántic theory, inasmuch as it is that of the good Bishop, it would be useless to overthrow, even granting it were possible to overthrow it. Having done this, it will remain to be considered—how we are to deal with the residue;—in other words—(the words of the Bishop's missionary sermon)—it will remain to be considered how the knowledge of God "as he stands related to us as Creator, Redeemer, and Sanctifier," is, in the case of the Vedántis, to be superadded to "the metaphysical knowledge of God, considered in his absolute nature and essence," respecting which the Bishop and the Vedántis are consentient.

The ugly word Ontology means "the science of *being.*" It proposes the inquiry,—"What do you mean by saying that a thing *is,*—and what is a *thing,*—and can a thing in any way be at all without *really* being?" Thus it aims at that, than which, according to Berkeley as quoted in our motto, "nothing seems to be of more importance, towards erecting a firm system of sound and real knowledge, which may be proof against the assaults of scepticism,"—viz., the "distinct explication of what is meant by *thing, reality, existence:* for in vain shall we dispute concerning the real existence of things, or pretend to any knowledge thereof, so long as we have not fixed the meaning of those words."

According to the Vedánta,* "Existence or Being *(sattwa)* "is of three kinds—(1) Being, in its highest sense *(pára-"márthika),* (2) such as has to be dealt with *(vyávahárika),* "and (3) merely seeming *(prátibhásika).* Of these, Being, "in its highest sense, belongs to God [i. e. Soul or Spirit]; "Being, such as has to be dealt with, belongs to the Ether "[or Space], &c.; and merely seeming Being belongs to the "[merely seeming] silver which is [in fact] mother o'pearl "[mistaken for silver by a beholder]." The first of these is equivalent to substantial or independent existence, the second to phenomenal or dependent existence, and the third to deceptive appearance. Let us compare this with the views of Berkeley. in regard to the first kind of existence Berkeley declares—"From what has been said, it follows there is not any other substance than *spirit,* or that which perceives."† Here we have absolute existence. But such an existence as this, Berkeley concurs with the Vedántists in denying to the objects perceived. To these (whose 'esse' he holds to be 'percipi'), while he denies "an existence independent of a substance,"‡—contending that it is either a direct contradiction, or else nothing at all, to speak of "the absolute existence of sensible objects in themselves, or without the mind,"§—yet he by no means denies a *real* existence. He says, "I can as well doubt of my own being, as of those things which I actually perceive by sense: it being a manifest contradiction, that any sensible object should be immediately perceived by sight or touch, and at the same time have no existence in nature, since the very existence of an unthinking being consists in *being perceived.*"‖ The third degree of existence, inferior to this, he assigns to dreams and the creatures of the imagination; for, in comparison with these, he says, "The ideas of sense are allowed to have *more reality* in them, that is, to be more strong, orderly, and coherent;"¶—and these, being impressed upon the mind "according to certain rules or laws of nature, speak themselves the effects of a mind more powerful and wise than human spirits."⁂

While Berkeley and the Vedántists, then, agree in holding that existence differs in its degrees, and also in allowing the first degree—viz. that of independent or substantial existence—to Spirit alone; they differ—apparently at least—in their application of the term *real.* In examining this part of the question, therefore, we may expect to come upon some difference of opinion such as shall involve, on one side or the other, an error requiring to be combated. But, before proceeding to investigate this, let us take account of what has been ascertained. We have seen that the Vedántis, in allowing the rank of Substantial Existence to Spirit alone, hold the opinion which one of the most pious and thought-

* We quote from the *Vedánta-paribháshá,* Chapter 2.
† Principles of Human Knowledge, § vii.
‡ Ibid. § xci.
§ Ibid. § xxiv. It must be remembered that Mind and Spirit, in Berkeley's language, mean the same thing.
‖ Ibid. § lxxxviii.
¶ Ibid. § xxxiii.
⁂ Ibid. § xxxvi.

Digitized by Google

ful of Christian bishops advocated, not as merely harmless, but, as a grand bulwark of the truth against the assaults of a debasing Materialism. Verily there seems to be anything but an obligation upon us to insist that the Vedántí should give up this philosophical belief, and accept at our hands, as something indispensable to his further progress, a term denoting "an unknown quiddity, with an absolute existence,"—a term which, Berkeley adds, "should be never missed in common talk. And in philosophical discourses [he goes on to say] it seems the best way to leave it quite out: since there is not, perhaps, any one thing that hath more favoured and strengthened the depraved bent of the mind towards atheism, than the use of that general confused term."*

THE RÁJÁ OF BENARES AND THE DOVE.

Chased by a hawk, there came a dove
With worn and weary wing,
And took her stand upon the hand
Of Káśí's noble king.
The monarch smoothed her ruffled plumes,
And laid her on his breast;
And cried, "No fear shall vex thee here,
"Rest, pretty egg-born, rest!
"Fair Káśí's realm is rich and wide,
"With golden harvests gay,
"But all that's mine will I resign
"Ere I my guest betray."
But, panting for his half-won prey,
The hawk was close behind,
And with wild eye and eager cry
Came swooping down the wind:
"This bird," he cried, "my destined prize,
"'Tis not for thee to shield:
"'Tis mine by right and toilsome flight
"O'er hill and dale and field.
"Hunger and thirst oppress me sore,
"And I am faint with toil:
"Thou shouldst not stay a bird of prey
"Who claims his rightful spoil.
"They say thou art a glorious king,
"And justice is thy care;
"Then justly reign in thy domain,
"Nor rob the birds of air."
Then cried the King: "A cow or deer
"For thee shall straightway bleed,
"Or let a ram or tender lamb
"Be slain, for thee to feed.
"Mine oath forbids me to betray
"My little twice-born guest:
"See, how she clings, with trembling wings,
"To her protector's breast."
"No flesh of lambs," the hawk replied,
"No blood of deer for me;
"The falcon loves to feed on doves,
"And such is Heaven's decree.
But if affection for the dove
Thy pitying heart has stirred,
Let thine own flesh my maw refresh,
Weighed down against the bird."
He carved the flesh from off his side,
And threw it in the scale,
While women's cries smote on the skies
With loud lament and wail.
He hacked the flesh from side and arm,
From chest and back and thigh,
But still above the little dove
The monarch's scale stood high.
He heaped the scale with piles of flesh,
With sinews, blood, and skin,
And when alone was left him bone
He threw himself therein.
Then thundered voices through the air;
The sky grew black as night;
And fever took the earth that shook
To see that wondrous sight.
The blessed Gods, from every sphere,
By INDRA led, came nigh;
While drum and flute and shell and lute
Made music in the sky.
They rained immortal chaplets down,
Which hands celestial twine,
And softly shed upon his head
Pure Amrit, drink divine.
Then God and Seraph, Bard and Nymph
Their heavenly voices raised,
And a glad throng with dance and song
The glorious monarch praised.
They set him on a golden car
That blazed with many a gem;
Then swiftly through the air they flew,
And bore him home with them.
Thus Káśí's lord, by noble deed,
Won Heaven and deathless fame;
And when the weak protection seek
From thee, do thou the same.

Bhíshma's Speech, Mahabhárata, Anuśásana Parva. Sect: 32. *Calcutta Edition, Vol. IV., p.* 72.

FEED THE POOR.

If thou wouldst win the dear reward
Which only virtue earns,

* Third Dialogue, between Hylas and Philonous. We beg leave to remind the reader that we are not professing ourselves a follower of Berkeley, nor urging any one to adopt his views. We are simply concerned to show which of the Vedánta tenets by being Berkeleian, are not in any way anti-christian, and not therefore the points against which it were wise to direct our efforts. Hence we are at present under no engagement to satisfy the reader in regard to all the difficulties which Berkeley's theory may, at first sight, appear to give occasion for. More objections than were likely to have occurred to any single objector, Berkeley himself has anticipated and replied to. His treatises are open to all and are not voluminous.

Digitized by Google

Waste not thy wealth upon the lord
Who gift for gift returns.
Not with the rich thy treasures share;
Give aid to those who need;
And, with the gold thy wants can spare,
The poor and hungry feed.
Be sure that those who would receive
Deserve and crave thy care;
And ponder, ere thy hands relieve,
The how, and when, and where.

THE WISE SCHOLAR.

I hold that scholar truly wise
Who schools his heart and lips and eyes:
Who can as worthless clay behold
The treasures of another's gold:
Who looks upon his neighbour's wife
As upon her who gave him life:
Who feels as for himself for all
That live on earth both great and small.

Quoted in the Hitopadeśa.

TO THE EDITOR OF THE PANDIT,
Queen's College, *Benares.*

SIR,

From the strictures on Colebrooke and Wilson's translation of the Sánkhya-káriká and Bháshya, made by a correspondent in your October number, who lays so much stress on accuracy, one might fancy that he would at least make an accurate *beginning* of his own proposed translation of "the elementary works of all the Sanskrit philosophies." It is strange, however, to find that out of the twelve lines and a half he has translated of the Vedánta-Paribháshá, not less than six lines, either entirely or in part, are grossly mistranslated. The first line यदविद्याविलासेन भूतभौतिकसृष्टयः is rendered "Who (the Supreme Being) being *acted upon* by Ignorance, &c." Ignorance acting upon the All-wise Deity!—an insult to the Vedánta Philosophy. The line means 'By the disportment of the Ignorance (or Mysterious Power) of whom &c.' सच्चिदानन्दविग्रहं is rendered 'Whose body is the eternal source of wisdom and happiness.' Has the Brahma of the Vedántí a body? Say 'Whose body, or nature, is Eternal Joy and Thought (in their identity) or, in other words, 'Who is the Eternal Intelligence, all, Bliss.'

यदन्तेवासिपञ्चास्यैर्निरस्ता भेदिवारणाः (whose pupils, as lions, overthrew those elephants, the dualists) is nonsensically translated into 'Whose lion-like pupils (as it were) *shot* the *tearing* elephants.'

सर्व्वतन्त्रप्रवर्त्तकान् (the *promulgator* or *teacher* of all philosophical systems) the epithet of श्रीमद्वेङ्कटनाथाख्यान् is thoughtlessly rendered 'The *author* of all sciences.'

परिभाषा वितन्यते is incorrectly rendered 'I expand (this treatise, named) The Paribháshá,' since, though the verb तन् is literally represented by 'to expand' or 'to stretch,' the English verb 'to expand,' when employed in connection with a book, means to comment upon, or to clear the sense by explanations and illustrations.

The Vaidik text तद्यथेह कर्म्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते,* rendered absurdly thus: 'As those men who performed numerous religious acts here are destroyed, so also those who acquired virtue in another world are destroyed,'—means: 'As Life here (in this world) obtained by work (done in a former birth) is destroyed, even so is Life hereafter, attained by meritorious deeds (performed here) destroyed.'

I would pass over the blunders in English, but one, which is the least pardonable of all, deserves being exposed, *viz.*, the use of a noun without a verb or governing preposition, such as that of the noun 'knowledge' in the second line of the second paragraph of the translation.

I may be allowed to say, in passing, that it amused me not a little to remark the confidence and complacency with which your correspondent refers to the exposition, printed in your September number, of the Vedánta, "in Sanskrit and in (his) own words," so remarkable for its grammar and sense.

In conclusion, while giving due credit to your correspondent for the interest, so rare among Hindu youths evinced by him in the learning of his forefathers, I would at the same time advise him to acquire a more tolerable acquaintance with the elements of Sanskrit and a fairer knowledge of English before he ventures to enter upon the study of Hindu Philosophy, and to undertake the translation into English of all its elementary works. I cannot help also remarking that your correspondent ought not to have suffered his superficial knowledge of Indian Philosophy and inability to understand English phraseology to betray him into the gross and laughable presumption of condemning *every page of every translation* from Sanskrit philosophy made by any European Scholar.

Yours faithfully,
A. B.

---

* This may be also interpreted thus: "As, in this world, the whole set of things *such as a harvest and the like,* acquired by labour, is consumed, even so &c."

Communications of a literary nature should be addressed to the EDITOR: *all letters on business, to the Proprietors,* MESSRS. E. J. LAZARUS & Co., *to whom Drafts should be made payable.* ADVERTISEMENTS *will be inserted at four annas per line.*

The PANDIT may be ordered of the Publishers, or through MESSRS. TRÜBNER and Co., LONDON.

Annual subscription, in advance, including postage, Rs. 12.

PRINTED AND PUBLISHED BY E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

सद्रश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 19. Benares December 1st, 1867. Vol. II.

॥ नरेश्वरपरीक्षा ॥

अधुना सांख्यं प्रति कर्तृत्वमात्मनः साधयितुमाह ।

(७६) कृतं मया करोमीदं करिष्यामीति बोधतः ।
वेदप्रामाण्यतश्चास्य कर्तृशक्तिस्त्रिकालगा ॥

कर्तृत्वं तावदिदं सर्वान्यकारकप्रवृत्तिनिवृत्तिहेतुत्वेन स्वातन्त्र्यात्मकं शरीरेन्द्रियस्पन्दं प्राणादिप्रयत्नं च विदधत् सर्वमेव कृष्यग्निहोत्रादि दृष्टादृष्टफलं कर्म कुर्वदनुभूयमानमात्मनो न विद्यते, इति न शक्यते वक्तुम् शरीरादिकारकान्तरप्रेरकत्वेन प्रत्यक्षूपतयाध्यात्मं ज्ञातृत्ववदनुभवात्, नहि ज्ञातृत्वस्याध्यात्मस्वभावत्वेऽन्यदतः कारणमस्तीत्युक्तम्,"ज्योतिष्टोमेन स्वर्गकामो यजेत„ इति विशिष्टाधिकारिकर्तव्यतोपदेशकत्वेन श्रुतेर्भवद्भिरपि प्रमाणत्वेनाभ्युपगमात्, नचाकर्तुः पाषाणतुलस्य कार्यतोपदेशः प्रमाणतामासादयति, तत्प्रमाणान्यथानुपपत्त्यापि च नाविद्यमानं पुंसः कर्तृत्वमिति शक्यं वक्तुम्, विद्यमानं च तन्नित्यात्मस्वभावत्वात् कृतं मयेत्यादि सर्वकालगतत्वेन च परामर्शविषयत्वाज्ज्ञातृत्ववन्नित्यमभ्युपगन्तव्यम्,"ननु प्रकृतेरेव कर्तृत्वं तदविवेकात् त्वात्मनि तदध्यारोप इति सांख्यः„ यद्येवं ज्ञातृत्वमपि तस्या एवेति कृतं व्यतिरिक्तात्मवादेन, "ननु प्रकृतेरस्याः कार्यकारणादिरूपायाः सर्वदैव ज्ञेयत्वेन सिद्धेर्ज्ञातृत्वं नोपपद्यत एव„ यद्येवं कार्यत्वेनास्यास्तथैव सिद्धेः कर्तृत्वमपि नोपपद्यते,न,स्वकार्यविषयस्य प्रकृतेः कर्तृत्वस्याभ्युपगमात्,यदुक्तम्,

"प्रकृतेर्महांस्ततोऽहंकारः„,

इति, न जडत्वेनोपादानकारणत्वं तत्र तस्या न कर्तृत्वम्, अन्यद्धि उपादानकारणत्वं स्वरूपान्यथाभावरूपं, जडत्वं तु स्वभावतयैव परिणामित्वाद्यव्यभिचारि क्षीरदध्यादिष्वध्यक्षसिद्धम्,अन्यच्च कर्तृत्वं हिताहितप्राप्तित्यागफललिप्सया सर्वान्यकारकप्रवृत्तिनिवृत्तिकरणेन स्वातन्त्र्यात्मकं चित्त्वस्याव्यभिचारि स्वसंवेदनसिद्धम्, इति कर्तृत्वस्यापि तत्रासिद्धेर्ज्ञातृत्वस्येवात्मधर्मतैवेति, तदुक्तम्,

"प्रवृत्तौ च निवृत्तौ च कारकाणां य ईश्वरः ।
अप्रवृत्तः प्रवृत्तौ वा स कर्ता नाम कारकः„ ॥

इति, "ननु कर्तृत्वस्याबोधरूपत्वेन स्वसंवेद्यत्वासिद्धेर्घटादेरिव नात्मधर्मता„ यद्येवं नित्यत्वव्यापकत्वादेरपि तद्धर्मत्वेन सिद्धस्यैष प्रसङ्गः समान इति नैरात्म्यम्,"न, तस्य सवितृप्रकाशादिवत् तस्मादभेदेनैव सिद्धेरिति चेत्„ तर्हि दाहकत्वमिव सवितृप्रकाशाद्बोधात्मनः कर्तृत्वमविभिन्नमेव स्वसंवेदनसिद्धमिति नातत्स्वभावम्, तदुक्तं मोक्षकारिकासु,

"सर्वज्ञानक्रियारूपा शक्तिरेकैव शूलिनः ।
क्रिया त्रिधा तु वामाद्या गीता व्यापारभेदतः„ ॥

इति ॥

अपिच ।

(८०) स्यातां बोधैककर्तृत्वे कृतनाशाकृतागमौ ।

जगदुपादानकारणस्य प्रकृत्यात्मन एवैकस्य कर्तृत्वे पाकादिव्यापारखेदमोदनादि कृतं मयेत्यात्मगतत्वेन कर्तृत्वतत्स्वरूपयोरभावप्रसङ्गः स्यात्, प्रकृतस्यैव चोदनादेः कृतश्चिविन्द्रजालिकोपनीतस्येवागम इति सर्वस्य सर्वदा सर्वत्र

Digitized by Google

प्रतिपत्तिः स्यात्, ततो दृष्टेऽपि कर्मफले प्रत्यभिज्ञाभावप्रसङ्गतोऽनुभवविरोधः ॥

अत्र पराभिप्रायमाह ।

(८१) परिणामप्रसङ्गश्चेत्,

पुंसः कर्तृत्वे परिणमेत, स्पन्दात्मकत्वात् कर्तृत्वस्य ॥

एतत् प्रतिक्षिपति ।

(८२) न, मण्यादावदर्शनात्,

न स्पन्दात्मकं कर्तृत्वं, क्रियारूपत्वात् स्पन्दस्य, नच क्रिया रूपं कर्तुः, अपितु तत्र शक्तत्वम्, अयस्कान्तमणेरिवायःस्पन्दजनने, इत्युक्तमस्माभिरन्यत्र,

“जडस्पन्दक्रियायां या शक्तिः सा कर्तृतात्मनः ।
व्याप्तेरस्पन्दरूपेण सिद्धायस्कान्तवत् स्वतः„ ॥

इति, “ननु जडत्वान्मण्यादीनां कर्तृत्वमपरिणामित्वं च सिद्धमेव„ सत्यम्, शक्तत्वेनैव कारकत्वं न स्पन्दात्मकत्वेनेत्येतावन्मात्रत्वात्, अतोऽपक्षेपस्यादोषः । तदेवं “कर्ता च„ इत्येतदपि प्रतिज्ञापदं व्याख्यातमिति ॥

तदियता यथाप्रतिज्ञातस्यात्मनो दर्शनान्तरनिराकरणेन सम्यक् परीक्षां विधायाधुना मुक्तिमपि तथा परीक्षितुं येमुक्तौ शिवसमत्वमुक्त्यन्यथानुपपत्त्यास्यात्मनः सर्वज्ञत्वाद्युत्पद्यत इत्युच्यते तान् प्रतिक्षिपति ।

(८३) ज्ञातं मया विजानामि ज्ञास्यामीति प्रबोधतः ।
त्रिकालविषया पुंसो बोधशक्तिस्तदापि सा ॥

यद्यत्र नास्ति तत् तत्रोत्पद्यताम्, आमलकादाविव पश्चात् पीतत्वम्, अस्ति च पुंसस्त्रिकालविषयं ज्ञत्वादि प्रागपीति न तत् तदोत्पद्यते, तदेव तु सर्वज्ञत्वमिति, उत्पत्तिमत्त्वे च घटादेरिवानित्यत्वान्मुक्तेरनिर्मोक्षः ॥

“ननु सर्वविषयं ज्ञानमधुनानुपलभ्यमानत्वात् तदोत्पत्स्यते„ इत्याह ।

(८४) ज्ञानशक्तिस्तु चिच्छक्तिः सा व्यक्ता ज्ञानमुच्यते ।
व्यक्तिरावरणापाये पुंशक्तेरर्थसंगमः ॥

ज्ञानशक्तिरेव चिच्छक्तिः, सा च वक्ष्यमाणाविद्याद्यावरणापायेऽर्थप्रकाशनप्रवृत्ता ज्ञानमुच्यते, नच ते ज्ञानतच्छक्त्योर्भेदः, सर्ववेदकरूपेण ग्राहकात्मनः संवेदनाद्यर्थभेदेन भेद इत्युक्तम्, अतो न तस्योत्पादस्तदेति ॥

“कस्तर्हि बद्धाबद्धावस्थयोर्विशेषस्तस्याः„ इत्याह ।

(८५) भवे पाशोपरक्ता सा मुक्तौ पाशाभिभाविका ।
नियतार्था भवे मुक्तौ सर्वार्था व्यञ्जकाश्रयात् ॥

चक्षुषस्तमोलक्षणस्येवावरणस्य सद्भावासद्भावकृतो विशेषोऽस्याः, विषयाल्पत्वमहत्त्वात्मकोऽपीदानीं कलादेर्मुक्तावीश्वरात्मनश्च व्यञ्जकस्याल्पत्वमहत्त्वकृतो नतु स्वरूपभेदकृत इति मुक्तौ ज्ञानक्रिययोः सर्वविषयत्वस्याभिव्यक्तेरीश्वरसमत्वं नतूत्पत्तेरिति ॥

“अथ त्रिकालविषयमेव चैतन्यं पुंसः प्राङ्नेष्यत इति„ तत्राप्याह ।

(८६) त्रिकालविषयं पुंसश्चैतन्यं यदि नेष्यते ।
कालादेरिव भेदस्तु ततस्तस्य प्रसज्यते ॥

सर्वस्यास्य मेयराशेः कालत्रयेण व्याप्तत्वात्, तस्य च पूर्वापरादेरिव संबन्धिरूपत्वेनान्यतरग्रहणे ग्रहणासंभवात् तद्व्याप्यस्याप्यस्य मेयस्यासिद्धेः कालकलादेर्मायीयस्येवाज्ञत्वं पुंस इत्यवश्यं त्रिकालविषयं प्रागपि तस्य चैतन्यमभ्युपगन्तव्यम्, ततो मुक्तौ तस्याभिव्यक्तिरेव युक्ता नोत्पत्तिरिति ॥

“पाशुपतास्तु मुक्तस्येश्वरगुणसंक्रान्तेस्तत्समत्वमाहुः„ “अन्ये पुनरीश्वरगुणावेशाद्भूताविष्टपुरुषवदिति„ तान् प्रत्याह ।

(८७) विशेषः शक्तितश्चेति नान्योऽसौ पतिशक्तितः ।
क्रियाशक्तिर्यतोऽर्थानां दृष्टा या चिद्गतामपि ॥

प्रोक्तनयेन मुक्तस्यायं सर्वज्ञत्वादिलक्षणो विशेषः परमेश्वरशक्तिभ्य इत्ययमपि पक्षो न युक्तः, येनान्योऽसावात्मा ताभ्यः शक्तिभ्यो भिन्नचेतनत्वेन पूर्वसिद्धेः क्रियाशक्तिस्तस्यापीत्युक्तम् ॥

किमत इत्याह ।

(८८) संस्थानं भवतोऽप्यन्तस्तत्त्वसंक्रमनश्वरम् ।
संस्कृतेः प्रतिपन्नः स्यात् संविदश्चाप्यसंभवात् ॥

तथाप्येतदन्तःसंविज्ज्ञानात्मकं ज्ञत्वकर्तृत्वरूपमात्मतत्त्वाख्यमविनश्वरं तन्मुक्तौ संस्काराद्धेतोः प्रतिपन्नः स्यान्नश्वरं भवेत्, संसारभाविन्या अपि संविदोऽस्याः क्रियायाश्चाभावात्, एतदुक्तं भवति, यत् तत्संसारावस्थायां तस्यात्मीयं ज्ञत्वकर्तृत्वमभूत् तन्मुक्त्यवस्थायामपि यद्यस्ति, अमुक्त एव तदा, इति किमीश्वरगुणसंक्रान्त्यादिना कल्पितेन, अथ विनष्टमित्युच्यते, न तर्हि नित्यः पुरुषो ज्ञत्वकर्तृत्वयोर्विनाशात् तद्व्यतिरेकेणान्यस्य पुंसोऽसंवेदनाच्च, इति स्वागमविरोधः ॥

सर्वागमविरोधश्चात्रेत्याह ।

(८९) महाज्ञानेषु सर्वेषु नित्याणोर्भाषिता चितिः ।
सर्वागमविरोधित्वात् तदस्थैर्यं न युक्तिमत् ॥

नहि द्रष्टुर्दृष्टेर्मन्तुर्वा मतेः परिलोपो विद्यत इत्यागम-

Digitized by Google

निरस्तोऽयं पक्षः, यदुक्तम्,

"एकस्य प्रतिभानस्तु कृतकाच विशिष्यते,, ।

इति ॥

युष्मदागमसिद्धोऽयमर्थो भविष्यतीत्याह ।

(९०) सर्वज्ञानक्रियाव्यक्तिर्मुक्तेः शैवेऽपि भाषिता ।

साप्येवं युज्यते पुंसां नित्ये ज्ञानक्रिये यदि ॥

यदुक्तं श्रीमद्रौरवे,

"सर्वज्ञः सर्वकर्ता च शिवः शक्तिसमन्वितः,, ।

इत्यादि, विस्तरेण च संक्रान्तिपक्षनिरासः परमोक्षनिरासकारिकास्वाचार्येण दर्शित इति तत एवावधार्यः ॥

"योऽपि बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराणां नवानामात्मगुणानामत्यन्ताभावो मोक्ष इति नैयायिकवैशेषिकैरुच्यते,, "यश्च प्रकृतिवियोगो मोक्ष इति सांख्यैरुक्तः,, सोऽप्ययुक्त इत्याह ।

(९१) न ज्ञानरहिते मोक्षे तदुपाये प्रवर्तनम् ।

नहि कश्चित् पदार्थज्ञो मोहमिच्छन् प्रवर्तते ॥

सर्वो हि प्रेक्षापूर्वकारी हिताहितयोः स्वरूपं निरूप्य तत्प्राप्तित्यागाय साधनविशेषे प्रवर्तते, न व्यसनितया, नच स्वात्मनो ज्ञाननाशो मूर्छाद्यवस्था पाषाणादितुल्यत्वं कस्यचिदनुन्मत्तस्य हितत्वेनावभासते, इति न कस्यचिदपि तदुपायभूते शास्त्रादौ प्रवृत्तिरुपपद्यत इत्यनर्थकमेव तत्, "ननु निद्रायां प्रवृत्तिर्दृश्यत एव,, सत्यम्, स्वप्नप्रत्ययरूपत्वात् तस्या न दोषः, यदाहुः, "वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः,, "प्रमाणविपर्ययविकल्पनिद्रास्मृतयः,, इति, सुषुप्त्यात्मकत्वेऽपि धातुसाम्यादिजनितशरीरपुष्ट्यात्मकान्तरस्पर्शहेतुकसुखदुःखाद्युपलम्भात् सुखमहमस्वाप्समित्यादि परतः परामर्शात् प्राणप्रेरणादिप्रयत्नविशेषयोगाच्चास्याः प्रत्ययरूपतैव, यदाहुः,

"प्रेरणाकर्षणे वायोः प्रयत्नेन विना कुतः,, ।

इति ॥

"नन्वत्यन्तदुःखाभितप्तानां भृग्वग्न्यनशनाम्बुभिर्मरणं दृश्यते,, इत्याह ।

(९२) दुःखनाशाय नो युक्तं सुखं दुःखान्वितं वरम् ।

तेषामपि न दुःखनाशायैव तपसि तस्मिन् प्रवर्तनम्, अपितु तस्मात् तपसो विशिष्टमामुत्रिकं सुखात्मकमपि फलमनुभवितुम्, आगमतस्तथा प्रतीतेः, इति वरं संसारोऽस्मान्मोक्षात्, न त्वज्ञत्वम्, अपुरुषार्थत्वादप्रवृत्त्यङ्गं मोक्ष इत्यभ्युपगम्य चैतदुक्तम्, नत्वात्मस्वभावत्वात्, नित्यत्वव्यापकत्वयोरिव ज्ञानस्याभावो ब्रह्मणापि शक्यः कर्तुमित्युक्तं प्राक् ॥

"प्रदीपनिर्वाणवादिनस्तु शाक्याः सर्वैव विज्ञानवासना साक्षात् पारंपर्येण चाविद्यातृष्णानुबन्धित्वाद्दुःखात्मिकैव, नतु कदाचिदपि सुखरूपा, इति सर्वदुःखवासनाविच्छेदायैव प्रवर्तमानाः कारणनिवृत्तिद्वारेणार्थात् कार्यात्मनः स्वज्ञानसंतानस्य परनिर्वाणाय मुमुक्षवः पर्यवस्यन्ति, अतः शून्य एव मोक्ष इत्याहुः,, तान् प्रत्याह ।

(९३) वासना सर्वदुःखं स्यान्न भवद्दर्शनं विना ।

युष्मद्दर्शनव्यतिरेकेण कस्यान्यस्यैतत् सौभाग्यं यद्भवकाले सर्वदुःखं शून्यस्त्वत्यन्ताभावो मोक्ष इति प्रत्यक्षानुमानबाधितोऽयं पक्षः प्राक् प्रतिपादित इत्युपहासः, अनेकजन्मदुःखानुभवतत्परित्यागक्लेशैरपि लोकायतफलस्यैव भवतां प्राप्यत्वात्, तदुक्तमाचार्येण परमोक्षकारिकासु,

"मूढानां ज्येष्ठमल्लास्ते येषां स्वात्मा विनश्यति,, ।

इति, एष च प्रसङ्गो वेदान्तविदां पाञ्चरात्राणां च समानः, तैरपि ब्रह्मणि नारायणाख्यायां च परस्यां प्रकृतौ जीवात्मनां लयो मुक्तिरभ्युपगता यतः, तस्मात् प्रोक्तनयेन सर्वज्ञत्वमनु कर्तृत्वाभिव्यक्तिरेव परपुरुषार्थभूतो मोक्षोऽभ्युपगन्तव्यो नान्योऽसद्भावादिति ॥

"यदि मुक्तेः प्रागप्यस्ति पुंसः सर्वज्ञत्वादि ततः कथं कार्यं न करोति,, इत्याह ।

(९४) सर्वदा सर्वभावेषु पुंशक्त्योरप्रवृत्तितः ।

सिद्धमावरणं चान्यत् कर्माख्याद्भवबन्धनात् ॥

प्रमाणान्तरेण सिद्धसत्ताकस्य सूर्यमणीन्द्रियादेरर्थस्यावरणकृतः कार्यानुपयोगः सिद्ध इति प्रागपि सिद्धसत्ताकस्य सर्वज्ञत्वादेरावृततां कार्यानुपयोगोऽनुमापयतीत्यावरणसिद्धिः, तच्च न कर्म, अपितु कर्माख्याद्बन्धनादन्यत्, इत्युक्तं स्वायंभुववृत्तावाचार्येण,

"यद्यशुद्धिर्न पुंसोऽस्ति सक्तिर्भोगेषु किंकृता,, ।

इति, अत्रान्तरं तत एवावधार्यम् ॥

भवबन्धनादप्यन्यदविद्यात्मकं मलाभिधानमित्यप्युक्तं तत्रैव, "कर्मतश्च शरीराणि,, इत्यादिना, "किं तद्भवबन्धनम्,, इत्याह ।

(९५) बन्धनानि गुणान्तानि सांख्याद्यैर्भाषितान्यथ ।

प्रधानादीनि चान्यानि शैवैरेवोदितानि तु ॥

भूततन्मात्रेन्द्रियाहंकारबुद्धिगुणपर्यन्तानि तावत् सांख्यादिदर्शनान्तरप्रसिद्धान्यत्रास्माभिरप्युच्यन्ते, अथानन्तरं गुणकारणं प्रधानं तदादीनि रागविद्याकलान्तानि दर्शनान्तराप्रसिद्धानि शैव एवोच्यन्ते, यदुक्तं सृष्टिक्रमेण,

"ततोऽधिष्ठाय विक्षोभ्य मायां स परमेश्वरः ।

Digitized by Google

क्षोभयित्वा स्वशक्तिरेवासृजत् तैजसीं कलाम्,, ॥

"कलातस्त्वाद्रागविद्ये द्वे तत्त्वे संबभूवतुः ।

अव्यक्तं च ततस्तस्माद् गुणांश्चाप्यसृजत् प्रभुः,, ॥

इत्येतानि तत्त्वभूतभुवनात्मकानि भवबन्धनानि ॥

"अथ किमागमेनैवैतानि दर्शनान्तरेऽप्यसिद्धानि भवतां सिद्धानि नानुमानेनापि,, इत्याह ।

(९६) यः प्रोक्तः कापिलैर्न्यायो जगद्गौणत्वसिद्धये ।

आगमानुगृहीतत्वान्न्यायः साधु स एव हि ॥

येनैव सांख्यैरचैतन्ये सत्यनेकत्वाद् बुद्ध्यादीनां घटादीनामिव कारणपूर्वकत्वानुमानेन गुणाः कारणमवस्थापिताः, तेनैव गुणानामचैतन्ये सत्यनेकत्वादव्यक्ताख्यं कारणमव्यक्तरागविद्यानां कालकलानामपि प्रतिपुरुषं भिन्नानां मायास्माभिः साध्यते, इत्युक्तं भोगमोक्षे,

"गुणानां कार्यतासिद्धौ यो हेतुरभिधास्यते ।

स नित्यादिकलान्तानां योज्यः कारणसिद्धये,, ॥

इत्यभिधाय,

"अचैतन्ये त्वनेकत्वसंख्यासंबन्धहेतुतः ।

तेषां कारणपूर्वत्वं सिद्धं बुद्धिघटादिवत्,, ॥

इति, यथा चायं न्यायो न सांख्योपज्ञ एव, अपितु, अस्मदागमपरिदृष्टोऽपि, तथा दर्शितमाचार्येण रौरववृत्तौ,

"रागविद्याकलाव्यक्तगुणबुद्धिसमुद्भवम्,, ।

इत्येतत्सूत्रव्याख्यायाम्, तत एवावधार्यम् ॥

"ननु च परैः पुरुषाविद्यापरमाण्वाद्यन्यकारणजन्यत्वेऽस्य जगतो न्यायोऽन्यः प्रोक्त इति विरुद्धाव्यभिचारीव सत्प्रतिपक्षत्वादयं न्यायाभासः,, इत्याह ।

(९७) अन्यकारणजन्यत्वे न्यायो य उदितः परैः ।

सर्वागमविरुद्धत्वान्न्यायाभासः स उच्यते ॥

यथा हि पुरुषादीनां चेतनत्वेन परिणामासंभवादविद्यायाश्चावस्तुत्वात् परमाणूनां वा चेतन्ये सत्यनेकत्वतः कारणान्तरपूर्वकत्वेन नित्यत्वासंभवाच्च जगत्कारणत्वमित्यनेनानुमानेन,

"अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः ।

अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः,, ॥

इत्यादिवेदेतिहासपुराणादिभिश्चागमैर्बाधितत्वादयमेवान्यकारणजन्यत्वन्यायो न्यायाभासो न पूर्वप्रदर्शितः, यथोक्तं भोगमोक्षे, तत एवावधार्यम्, अतश्चाप्रतिपक्षत्वादस्य सांख्यन्यायस्य न विरुद्धाव्यभिचारित्व इव न्यायाभासता, अपितु सम्यग्घेतुतैवेति ॥

"ननु सुखादीनामात्मगुणत्वेन प्रकृतिधर्मत्वासंभवादन्यथा गुणकारणतासिद्धौ जगतोऽस्य सुखाद्यन्वयादिति सांख्योक्तो हेतुरसिद्धत्वान्न्यायाभासः, तथायमपि भविष्यतीत्याह ।

(९८) सुखाद्यन्वयभावो हि नासिद्धः कापिलोदितः ।

भोग्यत्वाद्रूपवद्यस्मात् पुंगुणा न सुखादयः ॥

यो यः कदाचित् प्रकाशते यथाज्ञत्वादि, कदाचिच्च सुखं कदाचिच्च दुःखं रागादयश्च कदाचित् प्रकाशन्ते, इति न तेऽप्यात्मगुणाः, किंतु प्रकृतिस्वभावा एवेति नासिद्धत्वादस्यापि हेतोर्न्यायाभासत्वमिति कुतोऽन्यस्याप्यस्य भवेत् ॥

"अथ सांख्यप्रवृत्तात् कारणान्तरकल्पनया विना दुःखमास्यते भवद्भिः,, तदास्त्वेवं तदित्याह ।

(९९) कारणान्तरक्लृप्तौ वा यावच्छैवे प्रभाषितम् ।

कलादि कार्यजातं तु संस्थाप्यं तावदेव हि ॥

तदापि सांख्याभ्युपगमेनास्माभिरधिकं मायाख्यं कारणं कलादिगुणान्तस्य कार्यजातस्योक्तमिति नान्यद् व्यवस्थाप्यं प्रमाणाभावादिति ॥

अतश्चैवमर्थसिद्धमित्याह ।

(१००) एवं कृते कृतं विद्धि सर्वागमसमर्थनम् ।

अन्यथा क्रियमाणे तु शुष्कतार्किकता भवेत् ॥

आत्मनि हि व्यवस्थापिते सर्व एव वेदादिरप्यागमः समर्थितो भवति, तस्य हि "आत्मा ज्ञातव्यः,, इत्यादेरध्यात्मरूपस्य "ज्योतिष्टोमेन यजेत स्वर्गकामः,,इत्यादेश्च कर्मकाण्डात्मनः सर्वस्यात्मार्थत्वात्,तदसमर्थने तु नास्तिकपक्षाश्रयतः सर्वस्यागमार्थस्योपेक्षितत्वाद्बौद्धलौकायतादेरिव शुष्कतार्किकतेव प्रमाणबाधिताभ्युपगतता भवेदिति ॥

नरपरीक्षोपसंहारायेश्वरपरीक्षोपक्रमाय च श्लोकः ।

(१०१) पुमानित्थं समाख्यातः शंकरं वच्मि साम्प्रतम् ।

यतः स भगवान् पुंसां विधाता भोगमोक्षयोः ॥

पुरुषसिद्धिपूर्विका हीश्वरसिद्धिरित्युक्तम्,अत्र हेत्वन्तरं,यतः स एव पुंसां भोगमोक्षयोः कर्ता, ततः पुरुषपरीक्षापूर्वं तस्य परीक्षेति,अत एव भोगमोक्षेऽपीश्वरपरीक्षा संक्षेपतो विहिता, अत्र तु विस्तरेणेत्यपौनरुक्त्यम् ॥

इति नारायणकण्ठसूनोर्भट्टरामकण्ठस्य कृतौ नरेश्वरपरीक्षाप्रकाशे नरपरीक्षा, प्रथमं काण्डं समाप्तम् ॥ १ ॥ :: ॥ :: ॥

॥ अथ नरेश्वरपरीक्षायाः,
द्वितीयं प्रकरणम् ॥.

अथ पुरुषपरीक्षानन्तरमीश्वरपरीक्षा, "ननु युक्तमेतत् तन्त्रान्तरीयाणां वक्तुम्, इह तु ज्ञत्वकर्तृत्वस्वभावे पुंस्यावरणाभावाभावाभ्यां सवितरीवाल्पमहाविषयत्वे स्वसंवेदनयोग्यतानुमानाभ्यां पूर्वोक्तरीत्या प्रतिपादिते स्वल्पमहतोरीश्वरयोः सिद्धिः स्थितैव, ज्ञत्वकर्तृत्वरूपत्वादीश्वरस्येति, किमन्यया तत्परीक्षया,, सत्यमेतत्, जगद्धेतुभूतानादीश्वरपरीक्षा त्वियमन्यैवेत्यविरोधः, तथाहि "न तावदसावस्मदादीनामात्मवत् स्वसंवेदनप्रत्यक्षसिद्धः,, भिन्नात्मरूपत्वेन तस्य ततोऽन्यत्वात्, न ह्यात्मनां स्वसंवेदनमात्राः संकीर्यन्त इत्युक्तम्, नापीन्द्रियप्रत्यक्षेण, परस्परस्वभावादेवेन्द्रियातीतत्वेन तेषां सिद्धेः, तच्छरीराणामिन्द्रियानतीतत्वसिद्धावपि विशिष्टज्ञानक्रियात्मनोरीश्वरेतरयोरसिद्धेः, यदाहुर्जैमिनीयाः,

"नच केश्चिदसौ ज्ञातुं कदाचिदपि शक्यते ।
स्वरूपेणोपलब्धेऽपि स्रष्टृत्वं नावगम्यते ॥
नच तद्वचनेनैषां प्रतिपत्तिः सुनिश्चिता ।
असृष्टापि ह्यसौ ब्रूयादात्मैश्वर्यप्रकाशनात्,, ॥

इति, किंतु कार्यव्यवहारादेः कुम्भकारादिरिव सोऽपि स्वकार्याज्जगल्लक्षणाद्धेतोरनुमेय इति दर्शयितुं येन कदाचिदनीदृशं जगदिति वदद्भिर्जैमिनीयलौकायतैर्जगन्नित्यत्वाभ्युपगमेनास्य हेतोरसिद्धत्वमुद्भाव्यते, तांस्तावत् प्रतिक्षेप्तुमाह ।

(१) क्ष्मादेः सावयवत्वेन कुम्भवत् कार्यता मता ।

यत्र यत्र सावयवत्वं तत्र तत्र कार्यता, यथा घटादौ, यत्र तु कार्यत्वं नास्ति, तत्र सावयवत्वं नास्ति, यथात्मादौ, सावयवत्वं च सर्वस्यैव पृथिवीपर्वतादेः सनभश्चक्रस्य दृष्टात्मनो जगतः, अतः कार्यत्वमेव न नित्यत्वमिति वक्ष्यमाणस्य हेतोर्नासिद्धता, अत्र चोपादानकारणवत्तैव जगतः साध्येति दर्शयति ॥

"यद्येवमिन्द्रियपरमाण्वादेर्जगद्भागस्य सावयवत्वासिद्धेर्भागासिद्धोऽयं हेतुः,, इत्याह ।

(२) अचेतन्ये त्वनेकत्वादज्ञातप्रोक्तधर्मणः ।

प्रोक्तः सावयवत्वाख्यो धर्मो यस्यासौ प्रोक्तधर्मा, अज्ञातश्चासौ प्रोक्तधर्मा चेति, अत्र च रक्तः पटो न भवतीति न्यायेन विशेषणांशसंचारित्वान्निषेधस्य प्रोक्तधर्मविषयमेवाज्ञानं न धर्मिविषयपीत्यर्थाद्गम्यते । तस्याज्ञातप्रोक्तधर्मणोऽसिद्धपूर्वोक्तसावयवत्वादिधर्मस्येन्द्रियपरमाण्वादेरपि जगद्भागस्याचैतन्ये सति प्रतिपुरुषं भेदेनानेकत्वाद् वृक्षघटादेरिव कार्यता मतेति संबन्धः, अचैतन्येऽपि सति चित्रपटादेरिव चित्रावयवयुक्तस्य क्ष्मादेर्जगतोऽस्य सौगतैरेकत्वेनाभ्युपगमादस्य हेतोरसिद्धत्वमिति पूर्वो हेतुरुक्तः, ततश्च हेतुद्वयेन सावयवनिरवयवात्मकं सर्वमेव जगदुपादानयुक्तं सिद्धम्, अतो न भागासिद्धता, इति न कदाचिदनीदृशं जगदिति पक्षोऽनुमाननिराकृत इत्यर्थः, "नच सामान्यादिभिर्व्यभिचारः,, तेषामपि पक्षीकृतत्वात्, "नाप्यस्य न कदाचिदनीदृशं जगदित्यभ्युपगमस्य प्रयोजनमस्ति,, एवमपि भगवतो भूतेश्वरस्य हेत्वन्तरेणाधिष्ठातृतया सिद्धेः, यदुक्तम्,

"इदं भूतमयं विश्वमभ्रश्यदुचितस्थिति ।
स्थितेर्व्यनक्ति चिद्रूपं हेतुं जीवच्छरीरवत्,, ॥

इति, किंच न प्रतिज्ञामात्रादर्थसिद्धिरित्यत्र हेतुर्वक्तव्यः, "ननु पृथिवीपर्वतादि जगत्र कदाचिदनीदृशम्, उत्पत्त्यभावयोरदर्शनात्, तथात्वे वा प्रमाणाभावात्, आत्मवत्, इत्यत्र हेतुरस्त्येव,, नासिद्धत्वात्, नहि कल्पाद्यन्तभाव्युत्पत्तिविनाशादर्शनमधुना सिद्धम्, अस्मदादेः प्रतिज्ञार्थैकदेशश्च तथाभूतैर्वृक्षादिभिरनैकान्तिकश्चेति, "एतेन स्थित्येकस्वभावत्वादक्षवदित्येवमादयोऽपि हेतवः प्रत्युक्ताः,, "योऽपि कर्तुरस्मरणाद् वेदवदिति हेतुरुच्यते,, सोऽप्यस्माकमसिद्धः, "द्यावापृथिवी जनयन् देव एकः,, इत्यागमविरुद्धश्च, दृष्टान्तश्चायं साधनधर्मासिद्धः, वेदस्य रचनापूर्वकत्वेनाभिनवकविविरचितवाक्यवदकर्तृकत्वासिद्धेः, इत्यलमसिद्धोपन्यासनिरासैरिति, "ननु संनिवेशवतः कस्यचिन्नित्यत्वाशङ्का केन वार्यते,, धूमादेर्वह्न्यादिभ्योऽन्यतो भावशङ्केव संबन्धग्राहकात् प्रमाणादेवेति वक्ष्यामः । प्रोक्तं च भवद्भिरपि,

"उत्प्रेक्षते हि यो मोहादज्ञातमपि बाधकम् ।
स सर्वव्यवहारेषु संशयात्मा क्षयं व्रजेत्,, ॥

इति ॥

"ननु वाद्यसिद्धोऽयं हेतुः, यतो मूलपृथक्त्ववादिभिः सांख्यभेदैः पृथिव्यादीनि तत्त्वानि नित्यानीष्यन्ते, तदन्तर्गताश्च भवन्तः, इत्याह ।

(३) तत्त्वादि भुवनान्तं तु कलादिक्ष्मान्तमीरितम् ।
शैवैः कार्यं हि तज्ज्ञातं कुम्भवन्न स्वभावतः ॥
उपादानादि तस्येष्टं विमतिः कर्तृकारके ।
अतः स साध्यतेऽस्माभिस्तत्कर्ता शंकरः स्फुटम् ॥

न केवलं परसिद्धं पृथिव्याद्येव यावत् सर्वमेव तत्त्वभावभूतभुवनात्मकं पृथिव्यादि कलाप्रान्तं जगदस्माभिर्वृक्षघटादि-

Digitized by Google

वदेव कार्यमिष्यते, "हि,,इति, यस्मात् तस्योपादानकारणं माया, आदिग्रहणात् सहकारिकारणं कर्म प्रोक्तम् । अतो न मूलपृथक्त्ववादिभिरिव तत् स्वभावतो नित्यत्वेनास्माभिरिष्यते, अपितु मूलैकत्ववादितया घटादिवत् कार्यमेवेति, न वाऽसिद्धता, ततश्चोभयवादिसिद्धादस्माद्धेतोर्वक्ष्यमाणनयेनेश्वर एव साध्यः ॥

कथमित्याह ।

(४) अदृष्टकर्तृकार्यादि कार्यं प्रज्ञावता कृतम् ।
कुम्भवत्,

यद्यत् कार्यं तत् तद्विशिष्टज्ञानक्रियायुक्तकर्तृपूर्वं दृष्टम्,यथा घटादि, कार्यं च तनुकरणभुवनाद्यदृष्टकर्तृकं सर्वमेव जगत् प्रतिपादितम्, तस्मात् तदपि विशिष्टज्ञानक्रियात्मककर्तृपूर्वकं सिद्धमिति, यस्तस्य कर्ता स परमेश्वरः सिद्धः, "अत्राहुः कार्यत्वस्य कर्तृपूर्वकत्वरूपत्वात् प्रतिज्ञार्थैकदेशोऽयं हेतुरिति,,तदयुक्तम्, सांख्यसौगतैः कार्यत्वाभ्युपगमेऽपि जगतः कर्तृपूर्वकत्वानिष्टेः, अत एवोपादानकारणवत्तैवात्र कार्यता विवक्षितेति दर्शितम्, "नाप्यनन्वयः,,दृष्टकर्तृकेषु कार्येष्वन्वयसिद्धेरदृष्टकर्तृकमेवात्र पक्षीकृतम्, "यस्त्वाह किमनेनानुमितानुमानेन, सावयवत्वादित्ययमेव हेतुः कर्तृपूर्वकत्वसिद्धौ कस्मान्नोपादीयत इति,,सत्यम्,उपादीयेत यदि तावन्मात्रस्यैव जगतस्तत्साधयितुमभिप्रेतं स्यात्, निरवयवस्याप्यभिप्रेतमिति नैवमुपात्तम् ॥

नचात्र गृहान्तः प्रविश्य सूर्यरश्मिषूपलभ्यमानैस्त्रसरेण्वादिभिरनैकान्तिको हेतुः, अदृष्टकर्तृपदेन धर्मिणो विशेषितत्वात्, इत्याह ।

(५) नाविपक्षत्वादनेकान्तस्त्रसादिभिः ।

विपक्षे हि हेतुर्वर्तमानो नैकान्तिकः प्रमेयत्वादिः, नचात्र त्रसादयः, आदिग्रहणात् सिकतोपलादयो विपक्षाः, तेषामप्यदृष्टकर्तृपदेन पक्षीकृतत्वात्, अपित्वात्मादय एव, संदिग्धो हि धर्मः साध्यो न सिद्धो बाधितो वा, यदुक्तं भवद्भिरपि,

"संदिग्धे हेतुवचनाद् व्याप्तो हेतुरनाश्रयः,, ।

इति, अदृष्टकर्तृकेषु च सर्वेष्वेव कार्येषु कर्तृपूर्वकत्वम्, तत् साधकबाधकप्रमाणाभावात् संदिग्धम्, परस्येति हेत्वभिधानविषयत्वात् त्रसादिष्वपि वास्तवपक्षत्वयोगात् साध्यमेव, इति ते विपक्षीकृता नतु व्यभिचारभयेनेति, नच पक्ष एव व्यभिचारविषयः, धूमादग्न्यनुमानादावपि तथा प्राप्तेः सर्वानुमानाभावप्रसङ्गः, निश्चितसाध्याभावश्च वास्तवो विपक्षः, नच त्रसादिषु केनचिदपि प्रमाणेनाकर्तृपूर्वकत्वं निश्चितमिति कुतो विपक्षता, कर्तुरदर्शनमात्रस्योत्सन्नमठकूपादिभिर्व्यभिचारात्, "कूपादाविव त्रसादिषु न कदाचिदस्माभिः कर्ता दृष्ट इति चेत्,, अत एवास्मदाद्यगोचरोऽसावावेशादौ पिशाचादिवत् तत्र संभाव्यमानः प्रमाणेन विना नास्तीति न शक्यते निश्चेतुमिति संदिग्ध एव, ततस्त्रसादिष्वविपक्षतां क्षपयितुं न निवारयितुं शक्यः, तर्हि तृणलतादीनां दृश्यमानेभ्य एव पृथिव्यादिभ्यो हेतुभ्यो जन्मदृष्टेरदृष्टकर्त्रन्तरकल्पनेऽनवस्थाप्रसङ्गादत्र विपक्षत्वमिति तैरनेकान्तः, यदाहुः,

"येषु सत्सु भवत्येव यत् तेभ्योऽन्यस्य कल्पने ।
तद्धेतुत्वेन सर्वत्र हेतूनामनवस्थितिः,, ॥
"शस्त्रौषधादिसंबन्धश्चैत्रस्य व्रणरोहणे ।
असंबद्धस्य किं स्थाणोः कारणत्वं न कल्प्यते,, ॥

इति, "कथं तर्हि तेऽपि कदाचिन्न भवन्ति,, सहकारिणो वर्षातपादेरभावात्, "तस्यापि कथमभावः,, "नन्वदृष्टवशात्,, तर्हि तृणादीनां दृष्टेष्वेव कारणेषु सत्सु भावो न सिद्ध इत्यदृष्टस्याप्यप्रतिक्षेपान्न विपक्षता, "नन्वदृष्टं कर्मैवास्माभिरिष्यत इति चेत्,, न, विशेषे प्रमाणाभावात्, अदृष्टस्य पिशाचादेः कर्तुरभ्युपगमाद् हेतुकर्तुश्च क्वचिद्दैवतात्मनः, यदुक्तम्,

"येऽपि तन्त्रविदः केचिन्मन्त्रान् कांश्चन कुर्वते ।
प्रभुप्रभावस्तेषां स तदुक्तं न्यायसिद्धितः,, ॥

इति, "तस्यात्रापि संभवान्नैव पिशाचादिरस्तीति जैमिनीयः, यदाहुः,

"प्रमाणपञ्चकं यत्र वस्तुरूपे न विद्यते ।
वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता,, ॥

इति,, तदयुक्तम्, प्रमाणनिवृत्तावप्यत एव भावासिद्धेः, भूनिहितद्रव्यवत्, नचात्रापि प्रमाणं नास्त्येव पुरुषमात्रासंभविनोऽतीन्द्रियार्थस्याविसंवादिनस्तदानीं तत्र ज्ञानस्य सिद्धेः, "तदपि कर्मवशात् तदानीं पुंस आविर्भवतीति चेत्,, युक्तम्, यदि तस्य तदाविर्भूतं भवेत्, सत्युपस्मृतेस्तदानीं मूढवेदन एव सिद्धः, नहीदं मम ज्ञानमिदं नेत्यत्र स्वानुभवव्यतिरेकेणान्यत् प्रमाणमस्ति, नापि गच्छतस्तृणादिज्ञानस्येव तस्य भवतोऽप्यनुपलक्षणं युक्तम्, निश्चयात्मकत्वात्, यदाहुः,

"नच निश्चयविज्ञानं स्वात्मनैव न विद्यते,, ।

इति, ततः पुरुषवेदनानुप्रवेशाद्देवदत्तादिज्ञानवत् ततोऽत्यन्तभिन्नं तत्संविन्मोहकर्तुस्तदानीं कस्यचित् सातिशयस्य पिशाचादेस्तज्ज्ञानमिति कार्यतोऽभ्युपगन्तव्यम्, न कर्मणां जडत्वादिति न पिशाचादेरस्मदाद्यगोचरस्यापि तत्र कर्तुरभावः, "ननु तथापि कर्मणस्तत्र हेतुत्वमस्त्येव,, किमतः, कर्तुरदृष-

Digitized by Google

स्यापि संभवात् तृणादावदृष्टकर्तृपूर्वकत्वसंशय इति न विपक्षता, अपितु प्रोक्तनयेन वास्तवं पक्षत्वमेवेति । नच कर्मणोऽपि कृष्यादेरिव चेतनानधिष्ठितस्य कार्यजनकत्वमिति वक्ष्यामः । तत् तृणादीनां दृष्टहेतुत्वेऽपि परैरदृष्टकार्यत्वेनोपगमात् प्रत्युताच सपक्षत्वमिति मत्वाच सादिभिरेव विपक्षत्वाशङ्कया नैकान्तिकत्वं परिहृतमाचार्येण नतु तैरपीति ॥

"नन्वसिद्ध एवायं हेतुः,, इति पराभिप्रायमाह ।

(६) धीमत्कृतं तु यत् कार्यं दृष्टं तस्यैव दर्शनात् ।
धीमतोऽनुमितिर्युक्ता देहादेर्न विपर्ययात् ॥

यदेव हि यस्य कार्यत्वेन सिद्धं तदेव तस्यानुमापकं न कार्यमात्रम्, धूमादीवाग्न्यादेः, न शकटादिविशिष्टमेव घटपटप्रासादनगरादि कार्यं कर्तृजन्यं सिद्धमिति, तत एव विशिष्टज्ञानादात्मकर्त्रनुमानं युक्तम्, नतु कार्यशब्दवाच्यत्वे तद्विजातीयात् तनुभुवनकरणादेः कार्यान्तरात् तत्र तत्कार्यत्वादिति, यदाहुः सौगताः,

"सिद्धं यादृगधिष्ठातृ भावाभावानुवृत्तिमत् ।
संनिवेशादि तद्युक्तं तस्माद्यदनुमीयते ॥
वस्तुभेदे प्रसिद्धस्य शब्दसाम्यादभेदिनः ।
न युक्तानुमितिः पाण्डुद्रव्यादिव हुताशने ॥
अन्यथा कुम्भकारेण मृद्विकारस्य कस्यचित् ।
घटादेः करणात् सिध्येद्वल्मीकस्यापि तत्कृतिः ॥
जात्यन्तरप्रसिद्धस्य शब्दसामान्यदर्शनात् ।
न युक्तं साधनं गोत्वाद्वागादीनां विषाणवत्,, ॥

इति ॥

एतत् प्रतिक्षिपति ।

(७) कार्यत्वादेव कुम्भादेर्देहादि न विलक्षणम् ।
कार्यं च न क्वचिद्दृष्टं प्रधानवत् कारणं विना ॥

न तावददृष्टकर्तृकेषु तनुकरणभुवनादिषु कार्यत्वमसिद्धं भवताम्, येन दृष्टकर्तृकेभ्यो विजातीयत्वाभ्युपगमो युक्तः स्यात्, जगतः सर्वस्यानित्यत्वेन समनन्तरप्रत्ययोपादानाभ्युपगमात्, "नन्वाश्रयाणां भेदात् तदपि भिन्नमेव,, न, तेन रूपेण तेषामव्यभिचत्वात्, शाबलेयबाहुलेयादीनामिव गोत्वेन शब्दघटादीनामिव वा कृतकत्वेन, नह्यन्यथा कृतकत्वेनानित्यत्वं घटादिवच्छब्दादावनेकवृत्त्यादिभिर्नानेकत्वं भूतकण्ठमालागुणवत् सामान्यादौ शक्यमुपपादयितुं भवद्भिः, तेन रूपेण तेषां समानतैव, यदुक्तम्, "साध्यधर्मसामान्येन समानोऽर्थः सपक्ष इति, न, "कार्यत्वेनेति चेत्,, जितं जिगीषुभिरभिनवैः प्रसिद्धन्यायनिह्नवेनासिद्धताव्यान्ध्यमुत्पादयद्भिः, कथं वा संनिवेशवतां सर्वेषां प्रमेयत्वसत्त्वकार्यत्वशून्यत्वानात्मत्वादिभिरिव न संनिवेशवत्त्वेनापि समानता, "ननु संनिवेशो नाम नान्यत् किंचित् संनिविष्टेभ्यः,, बालभाषितमेतत्, सतोऽपि किमन्यत् सत्वं कार्यत्वाकार्यत्वम्, सत्यम्, भिन्नानामपि तेषामेकविमर्शजनकत्वेन समानतेष्यते, यदुक्तम्,

"एकप्रत्यवमर्शाख्यज्ञानाद्येकार्थसाधने ।
भेदेऽपि नियताः केचित् स्वभावेनेन्द्रियादिवत् ॥
ज्वरादिशमने काश्चित् सह प्रत्येकमेव वा ।
दृष्टा यथा वौषधयो नानात्वेऽपि नचापराः,, ॥

इति, तर्हि संनिवेशवत्त्वेनापि सर्वसंनिवेशवतां समानत्वं प्रतीयमानं तद्वदेव भविष्यतीति केषांचिज्जात्यन्तराभिधानमयुक्तमेव, अकर्तृपूर्वत्वसिद्धौ तेषां जात्यन्तरत्वमेकशब्दवाच्यत्वेऽपि स्यात्, उपादानकारणभेदसिद्धाविव पाण्डुत्वादेरुपलभ्यमानाकारान्यत्वनिश्चये वा गोशब्दवाच्यानामिव वागादीनां नवानाम्, नतु तत्संशये संबन्धग्रहणकाल एव महानसदृष्टाद् धूमादतिदूरवर्तित्वेनादृष्टाग्निसंबन्धस्य धूमान्तरस्यैवाग्न्युपादानतायां संदेहमात्रादसिद्धेः, अदर्शनमात्रस्य च संदेहफलत्वादित्युक्तम्, "तर्ह्यसिद्धत्वादेव तेषां दृष्टकर्तृभ्यो जात्यन्तरता स्यात्,, न, अत एव तस्य साध्यत्वाद् धूमादेरिवाग्न्याद्युपादानता, न दूरवर्तिनि पर्वतादौ साधनस्य असिद्धता दूषणम्, साध्यस्य तु भूषणमेवेत्युक्तम् । "अथ व्याप्तिरसिद्धा कार्यमात्रस्य कर्तृमात्रेणेत्युच्यते,, घटादीनां विशिष्टकृतत्वेनैव दर्शनात्, क्व वा धूममात्रस्य वह्निमात्रेण व्याप्तिः सिद्धा भवताम्, धूमविशेषोऽपि हि कश्चिदेव महानसादावग्निविशेषजन्यः सिद्धः, "ननु तार्णपार्णादेर्विशेषव्यभिचारेऽपि ततो धूममात्रस्य दर्शनाच्च तदापि निर्विशेषस्य सामान्यस्य प्रत्यक्षेणासिद्धेः स एव तदवस्थो दोषः,, सत्यम्, अत एवार्थसामर्थ्यादनुमानतो वा सर्वत्राग्निजन्यो धूमो धूमत्वात्, महानसदृश्यधूमवत्, इत्यप्रतिष्ठितभेदस्याग्निमात्रस्य व्यापकस्याप्रतिष्ठितभेदं धूममात्रं व्याप्यं लिङ्गतया प्रतीयते, यदुक्तम्,

"सामान्यविषयं प्रोक्तं लिङ्गं भेदाप्रतिष्ठितेः,, ।

इति, "यद्येवमिहापि घटपटशकटादिकार्येषु कर्तृविशेषस्य कुम्भकारादेर्व्यभिचारादप्रतिष्ठितभेदमेव कार्यमात्रं कर्तृमात्रस्य व्याप्यं हेतुत्वेन सिद्धमिति न व्याप्तेरप्यसिद्धिः, प्रतिबन्धमूलैव हि व्याप्तिरिति व्याप्तिविदः,, सत्यम्, यदि प्रतिबन्धो भवेत्, दृष्टान्ताधीनैव तत्र व्याप्तिः, सा च तत्पुत्रादेः श्यामत्वानुमानवद्व्यभिचारिण्येवेत्यननुमानम्, इदमपि चिकित्सकोपदेशवत् श्रद्धेयमेव, प्रतिबन्धो हि धूमाग्न्यादेरिवात्रापि प्रत्यक्षसिद्ध

Digitized by Google

एव, धूमाग्न्योर्हि कार्यकारणभावो न दृष्टान्तसिद्धप्रत्यक्षानुपलम्भमन्तरेण कृतकत्वानित्यत्वयोर्वा तादात्म्यमनेकवृत्त्यनेकस्वयोर्वान्यतोऽवगम्यते, भवद्भिरपि संबन्धसाधकप्रमाणविषयतया च दृष्टान्तमात्रयोगेऽपि श्यामस्तत्पुत्रत्वादित्येवमादेरनुमानावस्कारस्य व्यभिचारिता, तदत्राप्युपादानकारणस्येव कर्तुरपि कार्येण सह कार्यकारणभावो दृष्टान्ते प्रत्यक्षानुपलम्भप्रमाणसिद्ध इति तद्बलादेव सर्वस्य कार्यस्योपादानेनेव कर्त्रापि व्याप्तिः सिद्धेत्यव्यभिचारः, "यद्येवं दृष्टकर्तृकेष्वेव प्रतिबन्धसिद्धेः सा सिध्यति, नादृष्टकर्तृकेष्वन्यत्वात्,,प्रलापमात्रमेतत्, अन्यत्वमात्रस्य दृष्टकर्तृकेषु दृष्टाग्निसंबन्धेषु च धूमादिषु दर्शनेनानैकान्तिकत्वात्, "अथादृष्टकर्तृकतैव दृष्टकर्तृकेभ्योऽन्यत्वमुच्यते,, तदपि तथाभूतैर्घटादिकैरनैकान्तिकमेव, अथ तत्र घटादिरूपतयानन्यत्वम्,इहापि कार्यरूपतयेति न विशेषः, "ननु यज्जातीयो यतः सिद्धस्तत एव तस्यानुमानं युक्तम्,न विजातीयाद् वल्मीकस्तूपादेरिव कुम्भकारस्य, भिन्नजातीयं च दृष्टकर्तृकाददृष्टकर्तृकं कार्यमिति न ततः कर्त्रनुमानं युक्तम्,,न,तेन रूपेण तेषां भेदासिद्धेः, इत्युक्तम्, कृतकत्वेनेव शब्दघटादीनाम्, सत्त्वेनेव वा सर्वपदार्थानाम्,नहि कृतकत्वस्यानेकविजातीयवस्तुभिन्नेनानित्यत्वेन तादात्म्यं सत्त्वेन वा क्षणिकत्वस्य भवतामुपपद्यते, "ननु तेन रूपेण तेषां समानतैव न विजातीयता,, "ननु विरुद्धमेतद् विजातीयमेव सजातीयमिति,, न, धर्मभेदाच्छावलेयबाहुलेयाविव, गोत्वे च सर्वं तदेव साधु, यस्य यथाभूतेन सह प्रतिबन्धः सिद्धः स तथाभूतमेव प्रतिबन्धबलाद् गमयति, किमत्र सजातीयत्वेनेति, यदुक्तं भवद्भिरपि,

"यदीदं स्वयमर्थानां रोचते तत्र के वयम्,, ।

इति, अतश्च वल्मीकस्तूपादेः कुम्भकारव्यभिचारेऽपि चेतनायुक्तकर्त्रव्यभिचारोऽस्त्येवेति तत्रापि स एव साध्यः । किंच, कात्र जातिरभिप्रेता, यदपेक्षया सजातीयत्वासजातीयत्वव्यवहारः, "ननु भवतामिव सदृशतैव,,यद्येवं सत्त्वेनेव सर्वभावानां कार्यत्वेन सर्वकार्याणां सदृशत्वमिति तदेवाविनाभावात् कर्तृसिद्धौ हेतुरुच्यत इति यज्जातीयो यतः सिद्धस्तज्जातीयादेवात्र कर्तानुमेय उक्तो न विजातीयाद्वा तच्छब्दमात्रवाच्यादिति वा सिद्धता, "कथं तर्हि पाण्डुत्वादेरपि नाग्निजन्यता,, तदभावेऽपि मक्कोलादिषु तस्य दर्शनात्,सत्त्वस्येवाकार्यभूतेष्वात्मादिषु, नचाकर्तृकं किंचित् कार्यं सिद्धं येन तत्र वर्तमानस्यास्य हेतोर्व्यभिचारः संभाव्यते, पर्वततृणादेरप्यदृष्टकर्तृकत्वेन सिद्धसत्त्वात्, इति न पाण्डुत्वादेर्वह्निजन्यत्वमिव कार्यत्वस्य कर्तृजन्यत्वमसिद्धमिति ॥

"अथ यथाभूतेनैव यस्य प्रतिबन्धः सिद्धस्तथाभूत एव तस्मादनुमीयत इत्ययमेव ग्रहः,, तत्राप्याह ।

(८) नच यद्व्यक्तिसंबन्धा व्यक्तिर्येवेह संमता ।
तस्या एवानुमानं स्यात् पुनस्तदुपलब्धितः ॥

यद्येवं सकलसजातीयविजातीयव्यावृत्तेन स्वलक्षणेनैवाग्न्यादिना महानसादौ धूमादेः स्वलक्षणस्यैव प्रतिबन्धः सिद्धः, तस्य चाननुयायित्वान्न धर्मान्तरेऽनुमानं संभवति, नापि तत्रैव प्रत्यक्षसिद्धेरनुमानायोगात्, इति निवृत्तेदानीमनुमानवार्ता, जितं प्रत्यक्षैकप्रमाणवादिना, सामान्यविषय एवानुमानं प्रमाणं कार्यमिहेत्यतोऽप्यस्य नासिद्धता ॥

"अन्ये तु शरीरयुक्तकर्तृपूर्वकत्वादिसाधनाद्धर्मविशेषविपरीतसाधनोऽयं विरुद्धः, शरीरयुक्तकर्तृपूर्वकत्वेनैव घटादौ दृष्टान्तेऽस्य हेतोर्व्याप्तिसिद्धेरित्याहुः,,

"यथासिद्धेन दृष्टान्ते भवेद्धेतोर्विरुद्धता ।
अनीश्वरविनाश्यादिकर्तृकत्वं प्रसज्यते ॥
शरीरादेर्विना चास्य कथमिच्छापि सर्जने ।
शरीराद्यथ तस्य स्यात् तस्योत्पत्तिर्न तत्कृता,, ॥

इति,एतदेव प्रतिक्षिपति ।

(९) सिसाधयिषतां न्यायः साध्यधर्मविपर्ययम् ।
परेषां हि शरीरादेर्दृष्टेनैव निवार्यते ॥

साध्यधर्मस्याशरीरकर्तृपूर्वकत्वस्य विपर्ययं कार्यत्वादेवास्माद्धेतोः साधयितुमिच्छतां परेषां तनुकरणादेर्धर्मिणः स विरुद्धसाधनन्यायः प्रत्यक्षेणैव निवार्यते, स्वकायकारणस्पन्दादेः कार्यस्य शरीरान्तरं विनैवेच्छायुक्तकर्तृपूर्वकत्वेनान्तरस्पर्शनेन्द्रियस्वसंवेदनप्रत्यक्षाभ्यां सिद्धेः कार्यत्वं सर्वत्राविनाभावात् तावन्मात्रमेवागमयति, नतु शरीरयुक्तकर्तृपूर्वकत्वमपि, व्यभिचारात्, तत्र धर्मविशेषविपरीतसाधनोऽयं हेतुरित्यर्थः, अन्यथा कृतकत्वादयोऽपि शब्दादौ घटादिवत् पृथुबुध्नोदराद्यविनाभावेनानित्यत्वं गमयेयुः, धूमादयश्च पर्वतादावपि महानसादाविवापर्वतवर्तिनं वह्निम्, इति सर्वस्य धर्मविशेषविपर्ययसाधनत्वाद्धेतुत्वाभावप्रसङ्गः, अथ तत्र य एवाव्यभिचारी धर्मः स एव साध्यो नान्यो व्यभिचारादित्युच्यते, तदिहापि समानमित्यविरुद्धता, "ननु क्षणिकत्वादर्थानामत्रापि पूर्वदेहसहकारिणो देहिनो देशान्तरे देहिक्षणोऽन्य एवोत्पद्यते, नतु कार्यं देहयुक्तकर्तृपूर्वकत्वं व्यभिचरतीति विशेषविरुद्ध एवायमिति कश्चित्, यदाह धर्मकीर्त्तिरपि,

"तस्मात् पृथगशक्तेषु येषु संभाव्यते गुणः ।
संहतौ हेतुता तेषां नेश्वरादेरभेदतः,, ॥

इति,, सत्यम्, यदि क्षणिकत्वमस्य स्यात्, तत् तु प्रतिक्षिप्तमात्मसिद्धौ, तत्प्रतिक्षेपमूलत्वात् तस्याः, अपिच शक्तताभिधानस्वभावस्यैव भवतः सर्वत्र तदभिधानं दौर्भाग्यमेव प्रकाशयति, क्षणिकत्वे क्रियायाः संभवाभावेन कर्तृत्वस्याप्यसिद्धेः, कोऽसौ धर्मो यस्य विशेषविपर्ययसाधनतानिराकृते हि क्षणिकत्वे सिद्धेऽभ्युपगते वात्मनि कर्तृत्वे वेश्वरपरीक्षाप्रस्तावो युक्तः, नान्यथा, तन्मध्ये तु क्षणिकाश्रयो विकल्पोऽभ्युपगमनिराकृत एव, "ननु स्थैर्येऽपि तद्विषयत्वात् स्पन्दक्रियायाः शरीरं तस्यापेक्षणीयमेव,, बालप्रलपितमेतत्, घटादिवद्धि कार्यतया तदपेक्षणीयं ननु शरीरतया, "नन्वचलद्वस्तु चलदवस्थानिवृत्त्यर्थं तदपेक्षणीयमेव,, "नन्वशरीरस्य ज्ञानक्रियायोरनुपपत्तिः, यदाह कुमारिलः,

"अशरीरो ह्यधिष्ठाता नात्मा मुक्तात्मवद्भवेत्,, ।

इति,, तदयुक्तम्, नहि दृष्टेऽनुपपन्नं नाम, तथा दृष्टान्तः साध्यधर्मासिद्धः, मुक्तात्मनां सर्वज्ञत्वयुक्तेश्वरसमत्वाभ्युपगमात्, तर्हि विज्ञानकैवल्यादिवद्भविष्यति, न तेषामशरीरत्वं तथात्वहेतुरपितु मल एवेत्युक्तमन्यत्र,

"योग्यशचायमदेहत्वादिन्द्रियाद्यप्रसिद्धितः,, ।

इति, एतदेव शब्दान्तरेणाह, तेनापि मीमांसकोपपस्युपजीवित्वप्रसिद्धिः केवलं बौद्धानां प्रकाशिता भवति, नाधिकं किंचित्, यदाहुः,

"पूर्वपक्षेषु तैरुक्ता या जघन्योपपत्तयः ।

ताभिर्दुर्लभलब्धाभिर्मत्ता वल्गन्ति भिक्षवः,, ॥

इति, कथं वा कार्यकारणाद्यभावे जिनस्य सर्वविषयं ज्ञानमिष्यते भवद्भिः, "ननु तस्यापि शरीरमस्त्येव,, तत् किं कर्मजमकर्मजं वा, कर्मजशरीरयोगेऽस्मदादीनामिवासर्वज्ञता, अकर्मजं तु शरीरमवह्न्यादिभ्यो धूमादीव नियतकारणजन्यत्वाच्च संभवत्येव, "ननु करुणया तस्य शरीरं भविष्यति,, सत्यम्, यदि तस्यास्तत्र हेतुत्वं प्रत्यक्षतोऽनुमानाद्वा सिद्धं भवेत्, "नन्वागमाद्भविष्यति,, यदुक्तम्,

"तृतीयस्थानसंक्रान्तौ न्याय्यः शास्त्रपरिग्रहः,, ।

इति, सत्यम्, यदि प्रत्यक्षानुमानविषयस्यानद्वयेऽस्य विशुद्धिः स्यात्, सा तु नास्तीत्युक्तमात्मसिद्धौ, "ननु दयानुबन्धात् तस्यास्तृष्णादेरिव शरीरहेतुत्वम्,, तर्ह्यविद्यान्वयात् पुद्गलस्येव कारुणिकस्याप्यसर्वज्ञता, "ननु निर्माणशक्त्यैव तस्य शरीरमिति बौद्धाः,, न तर्हीश्वरासिद्धिः, "ननु तथापि तस्य शरीरमस्त्येव यद्यर्थप्रतिपत्त्युपायतया,, तर्ह्यस्मदादिवत् सोऽपीन्द्रियादिपरतन्त्रबोधत्वादसर्वज्ञ एव, नहीन्द्रियाणां सर्वार्थता संभवति, प्रदीपादिवत् परिमितार्थप्रकाशकत्वसिद्धेः, "ननु भावनाबलतो विनिवृत्तसमस्तचित्तदोषस्येन्द्रियानपेक्षैव सर्वार्थदर्शिनोऽप्यधिष्ठानमात्रे न शरीरमुपयुज्यत एव,, यद्येवं कुड्यादेरविशिष्टं तत्र शरीरतामासादयति, यदाहुः,

"सांनिध्यमात्रतस्तस्य पुंसश्चिन्तामणेरिव ।

निःसरन्ति यथाकामं कुड्यादिभ्योऽपि देशनाः,, ॥

शरीरानपेक्षयैव तस्य सर्वविषयं ज्ञानम्, इच्छामात्रेण च निर्माणकायादौ कर्तृत्वम्, अन्यस्यापि च मञ्जुश्रीप्रभृतेः सातिशयस्याभ्युपगतमेव भवद्भिरिति, तद्वद्भगवतोऽपि विश्वाधिष्ठानाद्विश्वकार्यत्वसिद्धेर्न धर्मविशेषविपरीतसाधनता, नापि कुम्भकारात्मनोऽनीश्वरत्वम्, ज्ञत्वकर्तृत्वात्मकत्वादीश्वरत्वस्य कुम्भकारादावपि स्वकार्यविषयस्य भावात्, नहि तस्य तत्र ज्ञानाभावे कर्तृत्ववैकल्ये वा कुम्भकर्तृत्वं संभवत्यकुम्भकारस्येव, नापि विनाशित्वमात्मनः, प्राङ्नित्यत्वस्य साधितत्वात्, तच, दृष्टान्तेऽप्यनीश्वरविनाश्याद्यपि सिद्धम्, अतो नेत्थमपि विशेषविरुद्धता, एतेन,

"इच्छानन्तरवृत्तिस्तु दृष्टान्तेऽपि न विद्यते ।

अचेतनः कथं भावस्तदिच्छामनुवर्तते,, ॥

इत्येतदपि प्रत्युक्तम्, स्वदेहस्पन्दादौ कुम्भकारादेस्तथैव दृष्टत्वात्, "अथ शरीरादन्यो घटादिर्नेच्छानन्तरवृत्तिर्दृष्ट इत्युच्यते,, तदप्ययुक्तम्, इच्छया विना तस्याप्यसिद्धेः, नह्यनिच्छन्नेच्छुर्वा कुम्भकारो घटं वर्तयन् दृष्टः, "नन्विच्छामात्रस्य तत्राहेतुत्वम्,, शरीरादेरप्यपेक्षणात्, किमतः, नहि सहकार्यपेक्षा कारणस्य कार्यतां विहन्ति, कर्मणो धर्मादेः सुखादाविव शरीराद्यपेक्षेति सैव सर्वत्राव्यभिचारिणीति कार्यादनुमीयते, "नच शरीरादन्येष्विच्छया करणमसिद्धमेव,, सिद्धमन्त्राणामिच्छयैवाहिविषाम्यादिष्वन्यथाकरणदर्शनात्, इति वक्ष्यत्याचार्यः स्वयमेवोत्तरकाण्डे, प्रोक्तं च सौगतैः,

"मन्त्राद्युपप्लुताक्षाणां यथा मृच्छकलादयः ।

अन्यथैवावभासन्ते तद्रूपरहिता अपि,, ॥

यद्वा, ईश्वरः स्वशरीर एव स्वनिर्माणकायान्तराधिष्ठानेन पूर्वं स्वशरीरमुपसंहृत्य जगत्कृत्यं संपादयति, अनादिर्हि तस्य परपुरप्रवेशिन इव शरीरप्रबन्ध इत्यपि तत्रैवाचार्यो वक्ष्यति, अतश्च यदुक्तम्,

"अनेकान्तश्च हेतुस्ते तच्छरीरादिना भवेत् ।

उत्पत्तिमांश्च तद्देहो देहत्वादस्मदादिवत्,, ॥

इत्येतदप्यपहस्तितमेव, तच्छरीरस्य संनिवेशवत्त्वेऽपि नित्यत्वानभ्युपगमात्, इति मायागर्भेश्वराणां च शरीरयोगेऽप्यैश्वर्यमिष्यत एव, यदुक्तमाचार्येण मोक्षकारिकासु,

"कलायोगेऽपि चावश्यः कलानां पशुसङ्घवत् ।

वश्यास्ताः पशुभिः सार्धं तेषां ते तदुपर्यतः,, ॥

इत्यविरोधः ॥

Digitized by Google

॥ अथ प्रसन्नराघवनामकनाटकस्य ॥

॥ द्वितीयोऽङ्कः ॥

॥ ततः प्रविशति तापसः ॥

तापसः । समन्तादवलोक्य । अहो अयमनेकशुकशावकानुगमनिष्कामहरिल्लताविताननमनोरमारामरमणीयसंनिवेशप्रदेशः । नेपथ्याभिमुखमवलोक्य कथमयं भिक्षुः । भिक्षो इतइतः ।

प्रविश्य भिक्षुः । अपि कुशलं तापसस्य ।

तापसः । क्षेममस्माकं युष्माकं च कुशलम् ।

भिक्षुः । इदानीं विशेषतो भवद्दर्शनात् ।

तापसः । पुनः सप्रणयम् । ननु कीटवत् महीपर्यटनेन श्रान्तो भवान् । तदिह मिथिलायां पञ्चरात्रनिवासेन श्रमोऽपनेतव्यः । प्रसङ्गादयं च राजा जनको द्रष्टव्यः ।

भिक्षुः । किमस्माकं निरीहाणां राजदर्शनेन ।

तापसः । नूनमयं ब्रह्मविद्याविनोदकुशलः खलु सीरध्वजस्तेन द्रष्टुमुचित एव भवादृशाम् ।

भिक्षुः । अये राजापि ब्रह्मविद्यावानिति सत्यमेतत् ।

तापसः । भिक्षो सत्यमेतत् । देवस्य दश इत्यर्द्धोक्ते देवस्य शितिकण्ठस्याज्ञा ।

भिक्षुः । विहस्यालमपलापेन । विदितं मया राक्षसः खलु भवान् ।

तापसः । तत् कथय विस्रब्धं को भवानिति ।

भिक्षुः । अहमपि भवादृश एव कोऽपि राक्षसः ।

तापसः । तदाकर्ण्यताम् । अहं हि सकलमन्त्रिमुकुटमाल्येन माल्यवता प्रहितस्ताटकावनम् । आकर्णितं हि तेन यत् किल कोऽपि कौशिको नाम मुनी राजानमयोध्यापतिमेत्य स्वमखरक्षणाय तस्य रामनामानं तनयं सानुजं याचितवान् । तेन चावश्यं माननीयो मुनिरिति निजनयनाभ्यामपि प्रियतमौ निजतनयौ तस्य समर्पितौ ।

भिक्षुः । ततस्ततः ।

तापसः । ततस्तेन मुनिना पारितोषिकं ताटङ्कयुगमर्पितं तस्य राज्ञः । उक्तं च राजन् दिव्यमिदं ताटङ्कयुगम् ।

तदिदं वीरसूकर्णनिवेशोचितमित्यसौ ।
अन्तःस्फुरन्ती रत्नानां वर्णमालेव शंसति ॥

तेन च कौशल्याकर्णयोर्निवेशनीयमिति । अनुमतं च राज्ञा । राजकुमारद्वयानुगतेन निजाश्रमपदं प्रति गतं च मुनिना ।

भिक्षुः । ततस्ततः ।

तापसः । तदिदमाकर्ण्य तत् ताटङ्कयुगं लङ्केश्वरजनन्या निकषाया एव कर्णोचितमिति विचिन्त्य तदाहरणाय पूर्वमेव ताटकां प्रति निजानुचर एकः प्रस्थापितः । अधुना च नूनं ताटकया तत् ताटङ्कयुगमाहृतमिति विचार्य तदानयनाय ताटकां प्रत्यहं प्रहितः ।

भिक्षुः । कथं पुनरिदं वृत्तान्तजातमाकर्णितं माल्यवता ।

तापसः ।

वार्त्ता च कौतुकवती विमला च विद्या
लोकोत्तरः परिमलश्च कुरङ्गनाभेः ।
तैलस्य बिन्दुरिव वारिणि दुर्निवार-
मेतत् त्रयं प्रसरति स्वयमेव भूमौ ॥

विशेषतश्च बहुतरप्रणिधिप्रणिधायी माल्यवान् ।

भिक्षुः । तत् कथं मिथिलोपवने भवान् ।

तापसः । आकर्णितं हि मया मिथिलामागतो लङ्केश्वर इति । अतस्तद्विलोकनाय प्रथममिहागतोऽधुना च ताटकावनं यास्यामि । तत् कथय तावत् भवान् पुनः कतरः ।

भिक्षुः । अहमपि स एव यः प्रथमं ताटकां प्रति प्रहितो मिथिलोपवनागमनकारणं समानमावयोः ।

तापसः । सहर्षम् । तत् कथय तावत् तत् किं सताटङ्कमधुना ताटकावनम् ।

भिक्षुः । सताटकमिति तावत् पृच्छ ।

तापसः । क्व पुनः सम्प्रति ताटका ।

भिक्षुः । पुरीं प्रविष्टा ।

तापसः । तत् किं दशरथस्य ।

भिक्षुः । नहिनह्यन्तकस्य ।

तापसः । केन पुनः प्रतिहारायितमन्तकपुरीप्रवेशे तस्याः ।

भिक्षुः । रामबाणेनैव ।

तापसः । क एष रामः । विमृश्य नूनं स एव यः खलु दशरथकुमारयोरग्रजः । तत् कथय क्व पुनरधुना ताटकातनयौ ।

भिक्षुः । सुबाहुस्तावत् ताटकामेवानुगतः । मारीचोऽपि शिशुक्रीडोचितरामनाराचपीडितो जीवन्मुक्त इव दूरं क्षिप्तः ।

तापसः । तत् कथमिदानीं न कथितं केनापि लङ्केश्वरस्य ।

भिक्षुः । कथितमेव किलेदमाक्रन्दता मारीचेन ।

तापसः । तत् कथं कुपितो न लङ्केश्वरः ।

भिक्षुः । सीताभिलाषशीतले लङ्केश्वरचेतसि नारूढ एव कोपपरीतापः ।

तापसः । क्व पुनरधुना रामलक्ष्मणौ ।

भिक्षुः । श्रुतं मया कौशिकानुपदं तदाश्रमात् मिथिलां प्रति प्रचलिताविति । विलोक्य सत्रासम् । कथमिमौ तावित एवाभिवर्त्तते तदस्य निशाचरवैरिणो रामस्य पुरतः स्थातुम-

नुचितमावयोरिति निष्क्रान्तौ ॥

॥ विष्कम्भकः ॥

ततः प्रविशतो रामलक्ष्मणौ ।

रामः । वत्स लक्ष्मण पश्यपश्यारामरामणीयकम् ।

लक्ष्मणः । आर्य निसर्गरमणीयोऽयमारामः । अधुना तु मधुमासावतारेण नितान्तरमणीयः ।

रामः । सहर्षम् । कथमवतीर्णैव मधुमासलक्ष्मीः । विमृश्य । एवमेतत् । तथाहि ।

इह मधुपवधूनां पीतमल्लीमधूनां
विलसति कमनीयः काकलीसंप्रदायः ।
इह नटति सलीलं मञ्जरी वञ्जुलस्य
प्रतिपदमुपदिष्टा दक्षिणेनानिलेन ॥

अपिच

मलयशिखरादाकैलासं मनोभवशासनाद्
भुवनवलयं जेतुं वाञ्छन् वसन्तसमीरणः ।
विहितवसतिं कैलासाग्रे भुजङ्गधरं हरं
मनसि विमृशन् भीतः शङ्के प्रयाति शनैःशनैः ॥

लक्ष्मणः । आर्याहं त्वेवं तर्कयामि ।

पथिपथि लतालोलाक्षीभिः स्रवन्मधुसीकरं
कुसुमनिकरं वर्षन्तीभिः सहर्षमिवार्चितः ।
मधुकरवधूगीतासक्तं कुरङ्गकमास्थितः
प्रसरति वने मन्दंमन्दं वसन्तसमीरणः ॥

रामः । वत्सालमनेन । तद् यावदयं भगवान् विश्वामित्रस्तत्रभवतो याज्ञवल्क्यस्य समागमसुखमनुभवति तावत् तदीयसायन्तनदेवतार्चनोचितानि कुसुमान्यवचीयन्ताम् ।

लक्ष्मणः । बाढमिति लताविटपान्तरितः कुसुमावचयं नाटयति ।

रामः । विलोक्य कथमिदमितश्चण्डिकायतनं । अञ्जलिं बद्ध्वा मातः ।

करुणतरङ्गिणि विकसन्नयनामृतोर्मिसीकरिणि ।
तरुणतुहिनकरचूडामणिरमणि त्वां नमस्यामि ॥

पुनरन्यतो विलोक्य । अये इयमसौ मदकलकलहंसोत्तंसितसितसरोजराजिराजिता सरसी सरसीकरोति मे चेतः । पुनः सकौतुकम् । अये कथमयं नलिनीवनविहारिणीं सहचरीमपि विहाय कलहंसपोतश्चूतविटपान्तरालमनुसरति । कर्णं दत्वा । अये क एष मदकलकरिकनकशृङ्खलामणिरणितानुकारी मनोहारी कोऽपि कलकलः समुल्लसति । विमृश्य । नूनं राजहंसशिञ्जितहारि मञ्जीरगुञ्जितमेतत् । तदवश्यमिह सलीलचलच्चरणरणन्मणिनूपुरया पुराङ्गनया कयाचन चण्डिकायतनमागच्छन्त्या भवितव्यम् । तदलमस्माकमितोऽवलोकनेन । परस्त्रीति शङ्कापि सङ्कोचाय रघूणाम् ।

नेपथ्ये । भर्तृदारिके इतइतः ।

रामः । कथमियं राजकुमारिका । तदालोकयामि तावत् । विलोक्य सहर्षकौतुकम् ।

केयं श्यामोपलविरचितोल्लेखहेमैकरेखा-
लम्बैरङ्गैः कनककदलीकन्दलीगर्भगौरैः ।
हारिद्राम्बुद्रवसहचरं कान्तिपूरं वहद्भिः
कामक्रीडाभवनवलभीदीपिकेवाविरस्ति ॥

ततः प्रविशति सीता सखी च ।

सीता । हला पेक्खपेक्ख अज्ज इमम्मुज्जाणं वसन्तसहअरेण सअं जेव्व मम्महेणालङ्किदं विअ अतिमेत्तं रमणिज्जं पडिहादि * ।

सखी । अनवद्याङ्ग्येवमेतत् ।

रामः । अये सर्वानवद्याङ्गीति वक्तव्यम् । नन्वस्याः

बन्धूकबन्धुरधरः सितकेतकाभं
चक्षुर्मधूककलिकामधुरः कपोलः ।
दन्तावली विजितदाडिमबीजराजि-
रास्यं पुनर्विकचपङ्कजदत्तदास्यम् ॥

पुनर्निर्वर्ण्य । अहो मुग्धाया अप्यस्याः प्रकृतिकमनीयपदार्थपरिशीलनौचित्यचातुरी । तथाहि । इयं हि

पदाभ्यामुन्निद्रामधरयति शोणाम्बुजरुचिं
कराभ्यामादत्ते नवकिसलयानामरुणताम् ।
प्रवालस्य च्छायां दशनवसनाग्रेण पिबति
स्मितज्योत्स्नापूरैरुपहसति कान्तिं हिमरुचेः ॥

सखी । भर्तृदारिके इदं तत् चण्डिकायतनम् ।

सीता । अञ्जलिं बद्ध्वा । देवि ससहरमोलिदेहद्धधारिणि तिहुअणघरसुआसिणि णमो णमो दे † ।

सखी । समुचितैव प्रणामपरिपाटी ।

सीता । सप्रणयकोपम् । अलमलीअजम्पिदेण ‡ ।

सखी । अञ्जलिं बद्ध्वा ।

कान्तमिन्दुमणिदामकोमले
कोमलेन्दुमुकुटाङ्कशायिनि ।
इन्दुचारुमचिरेण विन्दता-
मिन्दुसुन्दरमुखी सखी मम ॥

* हला पश्यपश्याद्येतदुद्यानं वसन्तसहचरेण स्वयमेव मन्मथेनालङ्कृतमिवातिमात्रं रमणीयं प्रतिभाति ।

† देवि शशधरमौलिदेहार्द्धधारिणि त्रिभुवनगृहसुवासिनि नमो नमस्ते ।

‡ अलमलीकजल्पितेन ।

रामः । अये कथमस्याः परिणयमनोरथप्रणयी सखीजनः । विमृश्य । उचितमेतत् वयःसन्धौ खल्वियं वर्तते ।

तथाहि ।

अपक्रान्ते बाल्ये तरुणिमनि चागन्तुमनसि
प्रयाते मुग्धत्वे चतुरिमणि चाश्लेषरसिके ।
न केनापि स्पृष्टं यदिह वयसा मर्म परमं
तदेतत् पञ्चेषोर्जयति वपुरिन्दीवरदृशः ॥

सखी । अयि देवि सत्वरं मे पूरय मनोरथं यावदियं न दुर्मनायते सखी ।

सीता । सप्रणयकोपम् । किन्ति दुम्मणायिस्सम् * ।

लक्ष्मणः । अयि राजहंसकन्यके किमिति दुर्मनायसे । अयं ते चूतविटपान्तरितः कान्तः ।

सीता । हला कस्स इमो करिकलहकण्ठणिग्घोसमहुरो कण्ठसद्दो सुणिअदि । ता णिरूवेह्म † ।

रामः । सविषादम् । कथमियमन्तरितैव लतया । लतां प्रति ।

स्तनविजितस्तबकश्रीरधराधरितप्रवालनवलक्ष्मीः ।
अयि लतिके तिरयन्ती तरलदृशं नावलम्बसे लज्जाम् ॥

पुनः सहर्षम् ।

श्यामच्छवीनामियमन्तराले
प्रादुर्भवन्ती कदलीदलानाम् ।
कलेव चान्द्री नवनीरदानां
चकोरवन्मां मुदितं करोति ॥

पुनः कदलीं प्रति ।

हे बालहेमलतिके ध्रुवमीहसे त्व-
मूरुश्रियं कलयितुं तरलायताक्ष्याः ।
एनां विलम्बय विलासवतीं चिरं हि
स्त्रीणां कलाः परिचिताः स्थिरतां प्रयान्ति ॥

सीता । हला को इमो कणअवण्णो सिहण्डिपिच्छमण्डिदकण्णपूरो मुद्धत्तणविमुक्कलोअणविआरो कुमारो दीसदि । इमं पेक्खन्तीए मह णिअवच्छम्मि विअ वच्छलत्तणपक्खालिअं हिअअं वट्टदि ‡ ।

लक्ष्मणः । अये केयमस्यां सुमित्रायामिव मे सुचिरप्रवृत्ता चित्तवृत्तिः ।

सीता । हला इमं कुमारं पुलोअन्तीए मह वच्छा उम्मिला

* किमिति दुर्मनायिष्ये ।

† हला कस्यायं करिकलभकण्ठनिर्घोषमधुरः कण्ठशब्दः श्रूयते तन् निरूपयामः ।

‡ हला कोऽयं कनकवर्णः शिखण्डिपिच्छमण्डितकर्णपूरो मुग्धत्वविमुक्तलोचनविकारः कुमारो दृश्यते । इमं पश्यन्त्या मम निजवत्स इव वात्सल्यप्रक्षालितं हृदयं वर्तते ।

चित्तमारुहदि * ।

सखी । विहस्य । नूनमयं कस्य चिद् वत्सशब्दलालनीयो भविष्यति । यं विलोकयन्त्या मे त्वमपि चित्तवृत्तिमारोहयसि । तत् पृच्छामि तावद् एनमिति परिक्रम्य । अये राजकुमार कः खलु भवान् यस्त्वमेक एव मुग्धतयाऽपरिशिलितास्वपि वनभूमिषु विहरसि ।

लक्ष्मणः । धिङ् मूर्खे कथं मामग्रजेन परिसरवर्तिना रामचन्द्रेण नाथवन्तमप्येकाकिनमपदिशसि ।

सखी । सहर्षम् । कुसुमितस्तदधुना मे मनोरथद्रुमः ।

सीता । हला किमेत्त अम्हाणं ता एहि णिअघरं जेव्व वज्जह्म † । इति किञ्चित् परिक्रम्य पुनर्व्यावृत्य हला एव्वं विसुमरिदह्मि णं सो सहआरपादवो अवलोअणीओ जस्स वासन्दीलदाए सह सङ्गमं अहिलसन्ति मह अम्बाओ ‡ इत्युभे परिक्रामतः ।

रामः । सहर्षम् ।

मन्मनःकुमुदानन्दशरत्पार्वणशर्वरी ।
अहो इयमितो नूनं पुनरप्यभिवर्तते ॥

निर्वर्ण्य ।

वहत्यस्या दृष्टिर्विकचनवनीलोत्पलतुला-
मखण्डस्याभिख्यां वदनमिदमिन्दोः कलयति ।
कुचौ किञ्चिन्मीलत्कमलतुलनां कन्दलयत-
स्तमःशोभां चित्रां चिकुरनिकुरम्बं हि कुरुते ॥

सखी । एष सहकारपादप इयञ्च वासन्ती लतेति तदन्तिकमनुसरतः ।

रामः । कथमिमे मे परिसरमनुसरतः । तत् किञ्चिदपसरामि तावत् ।

सखी । सहकारशाखां करे धृत्वा सकौतुकम् । हला पेक्ख पेक्ख इमेहिं णहसिहाविलिहिदेहिं कोमलदलेहिं सम्भावीअदि जं किर इअं चूदलदा केणावि विदड्ढेण णिअहत्थेण सम्भाविदेत्ति । अहवा णिअचावलदासङ्किदेण सअं मम्महेणेवेत्ति § ।

रामः । इत्थं सम्भावयति भवती मम पुनरन्यथा वितर्कः ।

मत्वा चापं शशिमुखि निजं मुष्टिना पुष्पधन्वा

* इमं कुमारं विलोकयन्त्या मम वत्सोर्मिला चित्तमारोहति ।

† हला किमत्रास्माकं तदेहि निजगृहमेव व्रजामः ।

‡ हला एवं विस्मृतास्मि ननु स सहकारपादपोऽवलोकनीयो यस्य वासन्त्या लतया सह सङ्गममभिलषन्ति ममाम्बाः ।

§ हला पश्यपश्यैतैर्नखशिखाविलिखितैः कोमलदलैः सम्भाव्यते यत् किलेयं चूतलता केनापि विदग्धेन निजहस्तेन सम्भावितेति । अथवा निजचापलताशङ्कितेन स्वयं मन्मथेनैवेति ।

Digitized by Google

तन्वीमेनां तव तनुलतां मध्यदेशे बभार ।
यस्माद्यत्र त्रिभुवनवशीकारमुद्रानुकारा-
स्तिस्रो भान्ति त्रिवलिकपटादङ्गुलीसन्धिरेखाः ॥

सखी । भर्तृदारिके इयं वासन्ती लता । इदं च पश्य

वासन्तीरसबिन्दुं सुन्दरमिन्दिन्दिरा इह चरन्ति ।
चिरमन्दिरमरविन्दं मन्दंमन्दं परिहरन्ति ॥

सीता । तदेव पठति ।

रामः । किमिदानीं लतान्तरवर्णनया । नन्वियमेव

निर्मुक्तशैशवदशा शिशिरा नवीन-
सम्प्राप्तयौवनवसन्तमनोरमश्रीः ।
उन्मीलितस्तननवस्तबका निकाम-
मेणीदृशस्तनुलता तनुते मुदं नः ॥

सखी । भर्तृदारिके पश्य । इयमसौ वासन्ती लता स्वयमेव सहकारपोतमालिङ्गितुं पुरःसरति ।

सीता । सप्रणयकोपम् । अये अलीअजप्पिणि दाणीं तुह परिसरं परिहरिअ अण्णदो गमिस्सम् * ।

रामः ।

अमलमृणालकाण्डकमनीयकपोलरुचे-
स्तरलसलीलनीलनलिनप्रतिफुल्लदृशः ।
विकसदशोकशोणकरकान्तिभृतः सुतनो-
र्मदलुलितानि हन्त ललितानि हरन्ति मनः ॥

सीता । विलोक्य सकौतुकम् । अम्मो ।

विसट्टपेसलुप्पलप्पलासपुङ्खसामलो
महेससोम्मसेहरप्फुरन्तसोमकोमलो ।
लदाघरम्मि को इमो अणङ्गरूअखण्डणो
विलोअणाण देइ मे सुहं सिहण्डमण्डणो † ॥

सखी । भर्तृदारिके कथय कथं लतालोकनाद्विरतासि ।

सीता । अनाकर्णितकेन । तदेव पञ्चमस्वरं पठति ।

सखी । उपसृत्य । कथमियमन्यचित्तेव लक्ष्यते । क्व पुनश्चित्तमस्याः । रामं दृष्ट्वा साकूतम् । अये इदमस्याश्चित्तगजबन्धनालानम् । पुनः सीतां हस्ते धृत्वा भर्तृदारिके प्रणयमधुरोऽपि सखीजनः किमवधीर्यते । अथवोचितमिदम् । अधुना हि तवायं हृदयमधिवसति ।

सीता । स्वगतम् । कहं अवगदह्मि इमाए ‡ इति लज्जां नाटयति ।

* अये अलीकजल्पिनीदानीं तव परिसरं परिहृत्यान्यत्र गमिष्यामि ।

† अहो विकसितपेशलोत्पलाग्रपुङ्खश्यामलो महेशसौम्यशेखरस्फुरत्सोमकोमलो लतागृहे कोऽयमनङ्गरूपखण्डनो विलोचनयोर्ददाति मे सुखं शिखण्डमण्डनः ।

‡ कथमवगतास्म्यनया ।

सखी । स्वगतम् । कथमियं लज्जते । तद् अन्यतो नयामि । प्रकाशम् । कथमद्यापि हृदयं न मुञ्चति ते प्रणयकोपः ।

सीता । स्वगतम् । कोवमुद्दिसिअ इमाए भणिदं ण उण इमम् । प्रकाशम् । हला कहं तुह कुविस्सं केवलमण्णचित्तदाए ण सम्भाविदासि * ।

सखी । क्व तर्हि दत्तचित्तासि ।

सीता । आरामम्मि † ।

सखी । विहस्य । अहो ते चातुर्यं यत आकारप्रकटनेनैवाकारगुप्तिं कृतवत्यसि ।

सीता । सलज्जमधोमुखी तिष्ठति ।

रामः ।

उत्तरङ्गय कुरङ्गलोचने
लोचने कमलगर्वमोचने ।
अस्तु सुन्दरि कलिन्दनन्दिनी-
वीचिडम्बरगभीरमम्बरम् ॥

सखी । सप्रणयस्मितम् । भर्तृदारिकेऽलमालिजनेऽपि हृदयापलापेन । ननु विदितं मया ।

अत्र ते सखि शिखण्डमण्डने
पुण्डरीकमखीबलोचने ।
श्यामतामरसदामकोमले
रामनामनि मनो मनोभवे ॥

सीता । हला पेक्खपेक्ख

मअणवहूणेउररवरमणिज्जं किम्पिकिम्पि कूजन्तो ।
माअन्दमुउलमहुरसमहुरमुहो महुअरो भमइ ‡ ॥

पुनः स्वगतम् ।

अयि पिबह लोअणाइं
पिअजणवअणारविन्दमअरन्दम् ।
अयि तरलाइं विआरह
पुणकह तुम्हे कह इमो अ § ।

इति रामं नयनाञ्चलेन सलीलमालोकते ।

रामः । निर्वर्ण्य ।

सर्वस्वं नवयौवनस्य भवनं भोगस्य भाग्यं दृशां
सौभाग्यं मदविभ्रमस्य जगतः सारं फलं जन्मनः ।

* कोपमुद्दिश्यानया भणितं न पुनरिमम् । हला कथं तुभ्यं कुपिष्यामि केवलमन्यचित्ततया न सम्भावितासि ।

† आरामे

‡ हला पश्यपश्य । मदनवधूनूपुररवरमणीयं किमपिकिमपि कूजन् माकन्दमुकुलमधुरसमधुरमुखो मधुकरो भ्रमति ।

§ अयि पिबतं लोचने प्रियजनवदनारविन्दमकरन्दम् । अयि तरले विचारयतं पुनः क्व युवां क्वायञ्च ।

Digitized by Google

साकूतं कुसुमायुधस्य हृदयं रामस्य तत्त्वं रतेः
शृङ्गारस्य रहस्यमुत्पलदृशस्तत् किञ्चिदालोकितम् ॥

सीता । स्वगतम् । पुनस्तामेव गाथां पठति ।

सखी । अयि भर्तृदारिके पश्य ।

दलदमलकोमलोत्पलपलाशशङ्काकुलोऽयमलिपोतः ।
तव लोचनयोरनयोः परिसरमनुवेलमनुसरति ॥

सीता । सहर्षमात्मगतम् । अपि लोअणाईं बहुसप्पदाईं णं सुहोपसुदीयम् * ।

रामः । सप्रत्याशम् ।

अमृतमयपयोधिक्षीरकल्लोललोलैः
स्नपयति तरलाक्षी यत्र मां नेत्रपातैः ।
अपि भवतु सदायं सन्मुहूर्तः (विमृश्य सविषादम्)
कुतो वा मधुरविधुरमिश्राः सृष्टयो हा विधातुः ॥

प्रविश्य चेटी । भट्टदारिए भट्टिणीहिं आणत्तह्मि जं किर वत्सा जाणई झत्ति घरमाणीअ विचित्ताहरणेहिं मण्डी-अदु जेण तीए साणंदं वअणारविन्दं पुलोअम्ह † ।

सीता । हण्डे कहं सिणेहमुद्धाओ मह अम्बाओ ‡ ।

चेटिका । भट्टदारिए कहं ण मुद्धाओ तुह अम्बाओ § ।

सीता । कहं उण मुद्धाओ मह अम्बाओ ‖ ।

चेटिका । जा तुमं णिसग्गलावण्णचन्दलेहां णेवच्छलच्छी-लंछणेणालंकिदुमिच्छन्ति । तहा अ

अयि तुह मुहलेहा चन्दबिम्बे सणेहा
दसणकिरणलच्छी अच्छजोह्नासरिच्छी ।
कुवलयदलदोणीकन्दराए वहन्ती
तरलबहलमिट्ठी दुद्धधारव्व दिट्ठी ॥

ता आअच्छ गच्छम्ह णिअघरं जेव्व ¶ इति निष्क्रान्ताः स्त्रियः ।

रामः । सविषादम्, कथं नयनपथमतिक्रान्तैव कान्ता । पुनः सप्रत्याशम् ।

अप्याविरस्तु भूयोऽपि मम लोचनयोरियम् ।
दिवसेऽन्तर्हिता नक्तं चन्द्रिकेव चकोरयोः ॥

लक्ष्मणः । आर्येयमाविरस्ति ।

रामः । सहर्षं कथं पुनः प्राप्ता प्रेयसी । विलोक्य न तावत् नूनं किमप्यन्यदभिसन्धाय तदिदमुक्तं वत्सेन । उच्चैः वत्स केयमाविरस्ति ।

लक्ष्मणः ।

मुग्धस्य केलिविजितस्मरचापयष्टे-
रातन्वती रुचिमतीव सुधाकरस्य ।
रागोद्धुरा स्फुटमुदञ्चिततारकश्रीः
सन्ध्याविरस्ति ननु कापि पतिंवरेव ॥

रामः । वत्सैवमेतत् । तथाहि

कृत्वा प्रबुद्धकमलामखिलां त्रिलोकी-
मम्भोनिधेर्विशति गर्भमसाविदानीम् ।
अन्तःप्रसुप्तहरिनाभिसरोजबोध-
कौतूहलीव भगवानरविन्दबन्धुः ॥

लक्ष्मणः । आर्य दृश्यतामयमीषन्मुकुलितराग इव गगनाभोगः ।

रामः । एवमेतत् । इदानीं हि

प्राचीमालम्बमाने घनतिमिरचये
बान्धवे बन्धकीनां
सम्प्राप्ते च प्रतीचीं शशिकरनिकरे
वैरिणि स्वैरिणीनाम् ।
अर्धश्यामोपलार्धस्फटिकमिव दिशा-
मन्तरालं विधत्ते
कालिन्दीजह्नुकन्यामिलदमलजल-
स्यन्दसन्दोहमैत्रीम् ॥

पुनः सहर्षमङ्गुल्या दर्शयन् ।

एतत् कोककुटुम्बिनीजनमनःशल्यं चकोराङ्गना-
चञ्चूकोटिकपाटयोर्घटितयोरुद्घाटिनी कुञ्चिका ।
दग्धस्यापि नवाङ्कुरः स्मरतरोराद्रागसां प्रेयसी-
मानोद्दामगजाङ्कुशो विजयते मुग्धं सुधांशोर्वपुः ॥

लक्ष्मणः ।

कल्लोलक्षिप्तपङ्कत्रिपुरहरशिरःस्वःस्रवन्तीमृणालं
कर्पूरक्षोदजालं कुसुमशरवधूसीधुभृङ्गारनालम् ।
एतद् दुग्धाब्धिबन्धोर्गगनकमलिनीपत्रपानीयबिन्दो-
रन्तस्तोषं न केषां किसलयति जगन्मण्डनं मण्डमिन्दोः ॥

रामः । वत्सालमतिप्रसङ्गेन तदेहि सायन्तनचिदर्चनोचितकुसुमोपायनेन भगवन्तं गाधिनन्दनमुपास्महे ।

॥ इति निष्क्रान्ताः सर्वे ॥

॥ द्वितीयोऽङ्कः ॥

---

* अपि लोचने बहुसम्पदे ननु सुखोपसृतिरियम् ।

† भर्तृदारिके भट्टिनीभिराज्ञप्तास्मि यत् किल वत्सा जानकी झटिति गृहमानीय विचित्राभरणैर्मण्ड्यतां येन तस्याः सानन्दं वदनारविन्दं विलोकयामः ।

‡ हण्डे कथं स्नेहमुग्धा ममाम्बाः ।

§ भर्तृदारिके कथं न मुग्धास्तवाम्बाः ।

‖ कथं न मुग्धा ममाम्बाः ।

¶ यास्त्वां निसर्गलावण्यचन्द्रलेखां नेपथ्यलक्ष्मीलाञ्छनेनालङ्कर्तुमिच्छन्ति । तथा च अयि तव मुखलेखा चन्द्रबिम्बे सस्नेहा दशनकिरणलक्ष्मीरच्छज्योत्स्नासदृक्षा कुवलयदलद्रोणीकन्दरायां वहन्ती तरलबहलमृष्टा दुग्धधारेव दृष्टिः । तदागच्छ गच्छामो निजगृहमेव ।

॥ श्रीपरमेश्वराय नमः ॥

॥ न्यायस्वरूपनिरूपणम् ॥

॥ ३ ॥ स्थालीपुलाकन्यायः ॥

अधिश्रीयमाणस्थालीपर्याप्तौदनैकदेशभूतोपरितनैकसिक्थनिपीडनजनिततत्पक्वतानिश्चयेन सर्वेषां पुलाकानां तत्स्थालीगतानां पक्वतां यथा पाचका निश्चिन्वन्ति, एवमधीतग्रन्थविशेषस्य कतिपयतद्ग्रन्थीयविषयेषु परीक्षणं सकलतद्ग्रन्थीयविषयेषु परीक्ष्यस्य योग्यताया निश्चायकं भवति,एतदेव स्थालीपुलाकन्यायेन परीक्षणमिति व्यवह्रियते। ततश्च यत्किंचित्समुदायैकदेशवृत्तिधर्मविशेषनिश्चयेन स्वघटिततत्समुदायघटकेषु यावत्सु तद्धर्मप्रत्ययो न्यायार्थः।

ननु सकलपुलाकपाकाविनाभूतोपरितनसिक्थपक्वताऽनुमापयेत् कृत्स्नसिक्थपक्वभावम्। एवमाम्रैकदेशरसास्वादनमपि तदीययावदवयवसमवेतमधुराम्लप्रभृतिरसनिश्चायकं भवेत्। सकलावयवसमवेतमाधुर्याद्यविनाभावादेकदेशमाधुर्यादेः। परन्तु येन केनचित् प्रयुक्तस्य वाक्यकदम्बस्य प्रामाण्यपरीक्षणाय तद्घटककतिपयवाक्यानां प्रमाणान्तरेण प्रामाण्यं प्रमाय सर्वस्य कदम्बस्य प्रकृतन्यायेन प्रामाण्यावगमो न सङ्गच्छते लौकिकानाम्। एवं तान्त्रिकाणामपि। तथाहि। गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरित्यस्य प्रामाण्यं कुगतिप्रादयउपपदमतिङितिसूत्राभ्यां सुप्पदाननुवृत्त्याऽसुबन्तेनैव समासविधानेनाचार्यव्यवहारेण प्रकृतन्यायेनैव प्रमीयते वैयाकरणैः। नहीदृशस्थले सकलपुलाकपाकाविनाभूतोपरितनपुलाकपाक इव कतिपयवाक्यप्रामाण्यं तद्वाक्यघटितवाक्यकदम्बप्रामाण्याविनाभूतं येन तल्लिङ्गं स्यात्। लोहितो वह्निः,पटः पृथ्वी,घटः प्रमेयः,पवनः स्पर्शवानिति केनचित् प्रयुक्तस्य वाक्यकदम्बस्य वह्नौ लोहित्यस्य बाधेनाप्रामाण्येऽपि तद्घटकघटः प्रमेय इत्यादेः प्रामाण्यदर्शनेन स्वघटकप्रामाण्ये स्वप्रामाण्यव्यभिचरितत्वस्य स्पष्टत्वादिति चेत्।.

मैवम्। यत्र व्याप्तिनिश्चयादिघटितसामग्रीसम्भवस्तत्रैवैकदेशवृत्तिधर्मविशेषनिश्चयस्य समुदाये तादृशधर्मविशेषानुमापकत्वोपगमात्। अन्यत्र तु सम्भावकत्वमात्रेणैव न्यायोपन्यासस्याभियुक्तव्यवहारविषयतायाः स्वीकारात्। न्यायशरीरेऽपि समुदायवृत्तिधर्मविशेषनिष्ठोत्कटविषयतानिरूपकत्वेनैव प्रत्ययस्य प्रवेशेन सम्भावनाया अपि सङ्ग्रहस्य सुशकत्वात्। विषयतागतमौत्कट्यं च समानकोटिकसंशयीयविषयताव्यावृत्तः प्रवृत्तिनिवृत्त्यन्यतरप्रयोजकतावच्छेदकतावच्छेदको धर्मविशेषः। स च सम्भावनाया अपि प्रवृत्तिनिवृत्तिप्रयोजकत्वेन तदीयविषयतायामपि सुलभ इति दिक्।

अस्मान्न्यायाद्दण्डापूपन्याये यो विशेषः स तदुपपादनावसर एव स्फुटीकरिष्यते॥

॥ ४ ॥ देहलीदीपन्यायः ॥

शालाद्वयमध्यवर्त्तिदेहलीनिहितदीपः शालाद्वयं स्वकिरणमण्डितं करोतीति दृष्टान्तभूतो न्यायविषयः। दार्ष्टान्तिकभूते न्यायोदाहरणं च रामायणीयम्। तथाहि।

> अस्त्रेणापि हि बद्धस्य भयं मम न जायते।
> पितामहमहेन्द्राभ्यां रक्षितस्यानिलेन च॥

इति।

अत्र रक्षितस्येत्येतत् पूर्वोत्तरान्वयि। अन्यच्च। एकाच उपदेशेऽनुदात्तादितिसूत्रस्थोपदेशपदार्थस्यैकाच्पदार्थेऽनुदात्तपदार्थे चान्वय इति। एवमुदाहरणान्तराण्यपि स्वयमुच्चेयानि। अयं च न्यायोऽन्वयविषय एव प्राय उदाह्रियते वृद्धैरिति बोध्यम्॥

अनेन समानोदाहरणतया समानफलकोऽपि विषयान्तरमवलम्बमानः,

॥ ५ ॥ मध्यमणिन्यायः ॥

नासिकाभूषणमौक्तिकयोर्मध्ये संयोजितो लोहितको मणिर्मौक्तिके स्वप्रभया भूषयतीति प्रसिद्धम्। उदाहरणानि प्रदर्शितान्येव। इति॥

अनयोरपेक्षयाऽपर एष ईषद्विशेषशाली

॥ ६ ॥ काकाक्षिगोलकन्यायः ॥

काकस्यैकमेवाक्षिगोलकमुभाभ्यामप्यक्षिभ्यां चाक्षुषप्रत्यक्षोपजनने उपकारकं भवति। तत्र पूर्वापेक्षयायं विशेषो यत् तदुपकाराय तत्रतत्र गोलकस्य गमनमपेक्ष्यते। दीपादिस्तु निर्व्यापार एकत्र स्थित एवोभयोरुपकरोतीति। अत एवैकं नानेति रीत्या यत्र नानाधर्मावच्छिन्ननानाविशेष्यतानिरूपितैका प्रकारता यथा घटपटावित्यादौ नैयायिकमते द्वित्वस्य,यथा वैकत्र नानेति रीत्या नानाप्रकारतानिरूपितैका विशेष्यता घटोऽस्तीत्यादौ धात्वर्थनिष्ठप्रकारतया सङ्ख्यानिष्ठप्रकारतया च निरूपिता घटस्य,तथाविधस्थले'घटः सुन्दरः पटश्च, नीलो घटः सुन्दरश्च, इत्यादावेव देहलीदीपन्यायमध्यमणिन्याययोर्विषयः। नतु निरूपकविशेष्यतादिभेदेन नानाप्रकारतादिप्रयोजके चैत्रो गच्छति मैत्रश्चेत्यादौ। यथा वा।

> यथा शची महाभागा शक्रं समुपतिष्ठति।
> अरुन्धती वसिष्ठं च रोहिणी शशिनं यथा॥

इत्यादौ। ईदृशस्थले काकाक्ष्यनुसन्धानस्य गोलकस्येव

निरूपकविशेष्यतादिभेदानुरोधेन स्वप्रयोज्यविषयताभेदं प्रयोजयतः पदस्य काकाक्षिगोलकन्यायोदाहरणतया एवौचित्यात्। निरूपकविषयतादिभेदेन विषयताभेदप्रयोजकत्वस्यैव व्यापारस्थानीयत्वेन कल्पनात्। अस्य मूर्द्धाभिषिक्तमुदाहरणं तु

या भाति लक्ष्मीर्भुवि मन्दरस्था
यथा प्रदोषेषु च सागरस्था।
तथैव तोयेषु च पुष्करस्था
रराज सा चारु निशाकरस्था॥

इति।

अन्यच्च

कृताश्च वैदूर्यमया विहङ्गा
रूप्यप्रवालैश्च तथा विहङ्गाः।
चित्राश्च नानावसुभिर्भुजङ्गा
जात्यानुरूपास्तुरगाः शुभाङ्गाः॥

इति,

अत्रामध्यपतितस्यापि क्रियापदस्य सर्वत्र सम्बन्धः। अत्रायमपि विशेषः पूर्वन्यायापेक्षयाऽवगन्तव्यः॥ इति॥

॥ ७ ॥ वृद्धब्राह्मणवरन्यायः ॥

आसीत् कश्चन जात्यन्धोऽत्यन्तं दरिद्रोऽजातविवाहो वृद्धो ब्राह्मणः स च नानाविधैर्दुःखैर्बलवत् पीडितस्तीव्रतपश्चरणेन परमेश्वरमाराधयामास। तस्य च तपसा प्रीतः परमेश्वरः स्वाभीष्टमेकं वरं याचस्वेति तं प्रेरयामास। ततः स ब्राह्मणो यदि चक्षुष्मत्त्वं याच्यते तर्हि दारिद्र्यपीडा स्यादेव, तथा भार्यायां याचितायामपि दारिद्र्यान्धत्वसन्तत्यभावाः पुनर्दुःखं जनयेयुः, एवं धने याचितेऽप्यन्धत्वादीनीति, किं याचनीयमिति चिन्तासमाकुलो भूयो विचार्येदं प्रार्थयत्, स्वपौत्रं राजसिंहासनस्थितमीक्षितुमिच्छामीति। अथ च तस्य बुद्धिकौशलतः परमप्रीतेन परमेश्वरेण वरप्रदानेनानुगृहीतो धनं चक्षुषी मनोज्ञां भार्यां सन्ततिं च प्राप्यात्यन्तमाननन्देति भवतीतिहासः।

ततश्च यत्किंचित्पदार्थसिद्धिनान्तरीयकत्वं यस्य पदार्थस्य तेन तस्याऽऽक्षेपो न्यायार्थः पर्यवस्यति।

अस्योदाहरणं न मुन इति सूत्रस्थमहाभाष्ये नाभावे कृते मुभावो नासिद्ध इत्येवार्थं तस्य स्वीकृत्य नाभावप्रवृत्तिप्रतिबन्धकासिद्धत्वाभावकल्पनं विना कृतनाभावकलत्यस्यासम्भवेनासिद्धत्वाभावविधानानुपपत्त्या नाभावे कर्त्तव्येऽप्यसिद्धत्वाभाव आक्षिप्यत इत्यभिहितं,, तदेकम्।

अन्यच्च। प्राचीनवैयाकरणैर्भट्टोजिदीक्षितादिभिर्ठकि लोप इति सूत्रेण ठक्परकपितृष्वसृशब्दान्त्यलोपविधानान्यथाऽनुपपत्त्या पितृष्वसृशब्दाड्डगाक्षिप्यते इति।

यथा वा।

भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन् मृतेऽपि तत्।
सा यथाकाममश्नीयाद्दद्याद्वा स्थावरादृते॥

इति प्रीतिदत्तस्याविभाज्यतां बोधयता वचनेन पितुरसाधारणं स्वत्वमाक्षिप्य दायमात्रस्य सप्रतिबन्धत्वमुपपादितं पूर्वपक्षिणा। तदेतदपि प्रकृतन्यायोदाहरणं भवितुमर्हतीत्यलम्।

काशिकपाठशालायाम्
धर्मशा॰ राजारामशास्त्री
साङ्ख्यशा॰ बालशास्त्री

THE SÁHITYA-DARPAṆA,

OR

MIRROR OF COMPOSITION.

(*Continued from page* 115.)

TEXT.

No. 707. When from blame and praise expressed, are understood praise and blame respectively, it is termed Artful Praise (*vyája-stuti*).

COMMENTARY.

a. When praise is understood from *apparent* blame, the etymology of the term 'vyája-stuti' is to be explained thus 'vyájena stutih,' or praise BY an artifice; and when blame is understood from *an apparent* praise, it is to be interpreted 'vyája-rúpá stutih' or praise CONSISTING in an artifice or trick.

b. For examples in their order:—

"With pearl-necklaces on their breasts (but, under the pun,—with breasts divested of ornaments), with the hairs of their bodies erect *from joy* (with their bodies covered with thorns), the women of thy enemies, O king, have become as secure (widowed) at thy anger as ever."*

The stanza is mine.

c. "This, O Cloud, is but a false encomium I have bestowed upon thee—'thy waters are the life of the world.' But this indeed is a great praise to thee, that thou renderest assistance to the Lord of Justice (Yama—the god of death), by killing the way-farers *separated from their beloved*."

TEXT.

No. 708. Periphrasis is when the fact to be intimated is expressed by a turn of speech.

COMMENTARY.

a. For example:—

"—Whose troops in the Garden of Bliss (*nandana*) touched, with contempt, the flower-bunches of the *Párijáta* tree,—fondly cherished for the adornment of Śachí's tresses."

---

* Here, observes the commentator, the apparent blame of the king consists in representing him as causing pain to women, and the praise intimated is that he is victorious over his enemies.

Here, what is in question and to be intimated, *viz.* the fact, in the shape of a cause, of Indra's Heaven being conquered by Hayagríva, is expressed through the effect *viz.*, the troops scornfully touching the flower-bunches of the *Párijáta*,—for the purpose of giving particular strikingness to the description. Nor is it that variety of the Indirect Description in which a cause is understood from an effect (§706 *d.*), since in that the effect is not in question, whilst in the present figure the effect equally with the cause is in question, as indicating the greatness of the power of the subject of description.

b. Similarly:—

"He restored to the fair ladies of his foemen their necklaces without the binding thread, as he caused tears to trickle down their breasts in drops large like pearls."

Here the effect—the tears of the enemies, as indicating the great prowess of the king who is the subject of description, is as much connected with the question as the intimated cause—the killing of the enemies: so the figure is no other than the Periphrasis.

c. "'The princess, O king, does not teach me to speak; the queens too are silent; feed me hump-backed girl; are not the princes and ministers taking their food yet?' —thus, the royal parrot, of the enemy's palace, let loose from the cage by the passengers, speaks, one by one, to the pictured personages in the empty turret."

Here, the *cause of this state of things* is in question, what is meant to be said being—'The enemies have suddenly fled away, having heard your majesty was ready to march.' *With respect to the present example, cited in the Kávyaprakáśa in illustration of the Indirect Description,* some say that the effect too is in question, as being fit to be described *in connection with the subject-matter, the cause.* Others, however, declare that the figure is no other than the Indirect Description, inasmuch as the inexpressibly *great* prowess of *the monarch* in question is understood from the account of the royal parrot, *which is not connected with the subject.*

TEXT.

No. 709. When a general is strengthened by a particular or a particular by a general, and when an effect is justified by a cause, or *vice versâ,*—either under a correspondence or a contrast—, it is Transition *(arthántara-nyása),* and is thus eightfold.

COMMENTARY.

a. For examples in their order:—

"The meanest creature, assisted by one that is great, attains to the consummation of a deed. The rivulet of the mountain, united with a great river, reaches the *mighty* ocean."

Here, the generality, implied in the first half *of the stanza,* is confirmed by a particular *illustration,* implied in the second half.

b. "Thus having discoursed in words that did not exceed the sense, Mádhava (Krishṇa) ceased; for the great are, by nature, of measured speech."

c. "Be firm, O Earth!; O Serpent sustain her; thou, Royal Tortoise, uphold them both; ye Elephants of the Quarters, exert your energy to support the three —my venerable *brother* is about to string Mahádeva's *mighty* bow!"

Here, the cause, or occasion, *viz.*, the stringing of Mahádeva's bow is what justifies the effect or consequence, viz., earth exerting herself to be firm, &c.

d. In the stanza—"One ought not to perform an act rashly: indiscretion is the great resting-place of evils. And Prosperity, attracted by merit, chooses, of her own accord, the man who does prudently"—the effect, *viz.*, Prosperity's choosing *the prudent man*—justifies the cause, *viz.*, the opposite of heedless proceeding, or prudence. These are examples *of the cases resting* upon Correspondence (see text).

e. The cases of Contrast; as—

"Served, as he is, thus, *by us Deities,* he (the demon Táraka) still torments the triple world: It is evil requital, not beneficence, that pacifies the wicked soul."

Here a particular is strengthened by a general, under a contrast. Similarly of others.

TEXT.

No. 710. When a reason is implied in (1) a sentence or (2) a word, it is termed Poetical Reason.

COMMENTARY.

a. Of these, the case of *a reason* being implied in a sentence; as—

"The blue lotus, which was like thy eyes in loveliness, is *now* sunk under water; that moon, my love, which imitated the fairness of thy face, is mantled over by clouds; those royal swans too are gone (*to the mánasa lake*) whose pace resembled thine—alas! the gods would not suffer me to derive a consolation even from thy similitudes—*in this season of rains so tormenting to separated lovers.*"

Here, the sentences forming the *first* three lines *of the stanza* imply reasons for *what is affirmed in* the fourth line—'alas! the gods' &c.

b. The case of *a reason* implied in a word; e. g. *the following couplet of* mine:—

"Śiva, afraid of the immense weight, bears not the Ganges on his head, muddy as it is with the heaps of dust raised by the multitude of thy horses (त्वद्वाजिराजि-निर्धूतधूलीपटलपङ्किलां)."

Here, the one *compound* word, forming the first half, implies a reason for what is expressed by the second half.

c. *The reason expressed by more than one word;* as *in the following example of* mine:—

Digitized by Google

'O Sire, Gangá who flows through three way[illegible]*ly*, (or Heaven, Earth and Pátála), conceals herself, through shame, on Mahádeva's head, as she beholds the river *formed* of the waters *poured* in thy donations, streaming through innumerable passages (**पश्यन्त्यसंख्यपथगां त्वद्दानजलवाहिनीं**)."

d. Some writers, it is to be observed here, do not admit those cases of the Transition (§709. *c. and d.*) which rest upon the relation of causation, because, *they suppose*, they are superseded by the Poetical Reason residing in a Sentence. (§710 *a.*) This *opinion* is not right. For here *in the province of Poetry*, Reason is three-fold, as being Informative, Completive and Justificative (or Confirmative.) Of these *three sorts*, the Informative Reason is the subject of the figure of Inference, the Completive of the Poetical Reason, and the Justificative of the Transition: thus the Transition founded upon a causation is evidently distinct from the Poetical Reason. To illustrate: In the stanza beginning "The blue lotus—" (§710 *a*), the sentences forming the first three lines are *indispensably* wanted for the *completion of the sense*, inasmuch as, without them, the sentence constituting the fourth line would be incomplete in its signification and therefore absurd. Whilst in the stanza beginning "One ought not to perform an act rashly" (§709 *d.*) the prohibition of heedlessly acting is fully intelligible in itself as being complete in its signification, just in the manner of a counsel such as—"Never ought any one to associate, I tell your honour the truth, with the wicked, who are busy in working harm to their fellow creatures. The circumstance, *added in the stanza*, of Prosperity's choosing the discreet, only confirms or justifies *the prohibition, without being needed to be mentioned in order to the completion of its sense.* So the Transition resting upon a causation is clearly distinct from the Poetical Reason.

e. "Hara (Mahádeva), for fear of the immense weight, bears not the Ganges on his head: for it is muddy with the heaps of dust raised by the multitude of thy horses."

जगज्जन्मगमनादियुक्तं तत्त्वभावभूतभुवनात्मकं कलादिक्षित्यन्तं सर्वमेव व्यक्तिरूपतयोपसंहृत्य शक्त्यात्मना तत्प्रकृतिं च तदानीमुपसंहृत्य जगद्व्यापारान् धत्त इत्युक्तमाचार्येण, सत्कार्योपन्यासतो भोगमोक्षे कर्माणि च तदानीं मन्दवेगतया प्रकृतिसंस्कारीभूतानि पाचयति, पुरुषांश्च भवरमणखिन्नान् विश्रमयति, तदानीं परिणतमलांश्च किंचिदनुग्राहयति, विज्ञानकेवलप्रलयबलयोरप्यनुग्रहस्य श्रुतत्वात्, निरोध्यांश्चापरिणतमलान् निरुणद्धि, इत्यसिद्धत्वाद्धेतोरस्य नाकर्तृत्वसिद्धिरीश्वर इति, श्रीमन्मृगेन्द्रेऽप्युक्तम्,

स्वापेऽप्यास्ते बोधयन् बोधयोग्यान्
रोध्यान् रुन्धन् पाचयन् कार्मिकर्म ।
मायाशक्तिव्यक्तियोग्याः प्रकुर्वन्
पश्यन् सर्वं यद् यथा वस्तुजातम् ॥

इति श्रीनारायणकण्ठसूनोर्भट्टरामकण्ठस्य कृतौ नरेश्वरपरीक्षाप्रकाश ईश्वरपरीक्षा नाम द्वितीयं काण्डम् २ ॥ :: ॥

॥ अथ नरेश्वरपरीक्षागतम् ॥

॥ तृतीयं काण्डम् ॥

ओम् । तदियता स्वदर्शनसिद्धमीश्वरं प्रमाणतः प्रतिपाद्य परदर्शनप्रसिद्धेश्वरस्वरूपं यत् तत्प्रतिक्षेपायाह ।

(१) परात्मा सर्ववित् तस्माच्चिदचिन्ति भवन्ति च ।

"सर्वज्ञः सर्वकर्ता च भवद्भिरीश्वरः कथ्यते, स च परमात्मैव समस्तचेतनाचेतनोपादानकारणभूतोऽस्तु, किं व्यतिरिक्तेनेश्वरेण,, इति परिणतवेदान्तविदः, तथा च श्रुतिः, "पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्,, इति, "ननु चेतनानां नित्यत्वमुक्तमतः कथं ततो भावः,,सत्यम्,अभ्युपगम्य मयैतदुच्यत इत्यदोषः ॥

एतत् प्रतिक्षिपति ।

(२) तस्मिंश्च बीजमुख्ये तु सर्वमुक्तमनुक्तवत् ।

युक्तमेतद्, यदि बीजतयोपादानकारणत्वेनासावभ्युपगतो भवद्भिर्न भवेत्, तथाभूते तु तस्मिन्नभ्युपगते सर्वमेतन्नोपपद्यत एव ॥

तत्रैतावान् नोपपद्यते,इत्याह ।

(३) न निमित्तं विनैकत्वात् तद्बीजं कार्यकृन्मतम् ।

यद्बीजं तत् सहकार्यपेक्षया कार्यजननस्वभावम्, न केवलमेव, यथा शाल्यादिबीजम्, जगतो बीजं च परमात्मा भवद्भिरिष्यते, नच तस्यान्यः सहकारी संभवति, "पुरुष एवेदं सर्वम्,, इत्यभ्युपगमतो द्वैतपक्षस्य प्रतिक्षिप्तत्वात्, ततो जगल्लक्षणकार्यानुपपत्तिरेव, तदुक्तम्,

"नामिश्रं परिणामतः,,

इति ॥

नच कोशकारेणायमनैकान्तिको हेतुः, इत्याह ।

(४) यतो लालाकुविन्दोऽपि स्तम्भादिकमपेक्षते ।

सोऽपि हि लालामात्रेण कोशमभिरचयंस्तम्भाद्याधारमपेक्षत एव, यदुक्तं जैमिनीयैरपि,

"नच निस्साधनः कर्ता कश्चित् सृजति किंचन ।
नाधारेण विना सृष्टिरूर्णनाभेरपीष्यते ॥
प्राणिनां भक्षणाच्चापि तस्य लाला प्रवर्तते,, ।

इति ॥

किंच, विरुद्धयोरेकोपादानता नोपपद्यत इत्याह ।

(५) चिदचिज्जनकत्वाच्च चिदचिद्धर्मभाग्भवेत् ।

यथाभूतं हि कार्यं तथाभूतमेव तस्योपादानकारणम्, यथा हिममृदादिस्वभावस्य घटादेः, चेतनाचेतनं च कार्यं परमात्मोपादानं भवद्भिरिष्यते, इति तस्यापि चेतनाचेतनविरुद्धस्वभावताप्रसङ्गः, "न, अतथाभूतादपि सूर्यकान्तादेर्वह्न्याद्युत्पत्तिदर्शनतोऽनैकान्तिकत्वात्,, न, तत्र सूर्यकान्तसंपृक्तार्ककिरणानामेवोपादानतोपगमात्, एतेन चन्द्रकान्तादपां व्यजनादेश्च पवनादीनामुत्पादे चन्द्रप्रभापवनादीनामेव चन्द्रकान्तव्यजनादिसहकारिणामुपादानत्वमनुसंधेयम्, अम्बरकादिष्वपि तूलादिभ्रमणतः पवनसत्तासिद्धेः, गोमयादेर्वृश्चिकोत्पादेऽप्यस्माकं चेतनस्यानुत्पादात् तच्छरीरोपादानकारणसादृश्यमस्त्येव, इत्यनैकान्तिकत्वाभावाच्च चेतनाचेतनविरुद्धस्वभावताप्रसङ्गस्तवस्य एव ॥

किमत इत्याह ।

(६) एकस्मिन्नेव काले च तद्विरोधान्न तद्भवेत् ।

विरुद्धयोश्च तयोर्विरोधादेव भावाभावयोरिव नैकत्र युगपत् संभव एव, चेतनस्योपादानत्वाभ्युपगमेनैतदुक्तम् ॥

अधुना तु तदेव नोपपद्यत इत्याह ।

(७) उपादानत्वतस्तद्धि तन्त्वादिवदचेतनम्,
प्रयोजकमतः कार्यं प्रज्ञावन्तमपेक्षते ॥

उपादानकारणं ह्यचेतनस्वभावमेव, यथा मृदादि, उपादानकारणं च परमात्माभिधानं भवद्भिरिष्यते, इति तदप्यचेतनमेव, अचेतनं च चेतनाधिष्ठितं कार्यकरणस्वभावं मृदादि निश्चितम्, अतस्तस्यापि चेतनेनाधिष्ठात्रा भवितव्यम्, इतीश्वरसिद्धिः, कथं तर्हि "पुरुष एवेदं सर्वम्,, इति श्रुतिः, अत एव तादर्थ्याद्यायुर्घृतमितिवदुपचारेणेत्यविरोधः ॥

"अन्ये तु,

"महतः परमव्यक्तमव्यक्तात् पुरुषः परः ।
पुरुषान्न परं किंचित् सा काष्ठा सा परा गतिः,, ॥

इत्यादिश्रुतिसिद्धं पुरुषस्यैवात्रेश्वरत्वम्, अतः किमन्येनेत्याहुः,, तान् प्रतिक्षिपति ।

(८) आत्मानुत्पन्नदेहादिरभिन्नाव्यक्तदृक्क्रियः ।
बीजाद्यतो न जानाति नच किंचित् करोति च ॥

पुरुषोऽप्यनुत्पन्नकार्यकरणः स्वदेहादेर्हेतुर्वा स्यात्, उत्पन्नकार्यकरणो वा, तत्र बीजादव्यक्तादनुत्पन्नं देहादि यस्य, अभिन्ने अव्यतिरिक्ते अनभिव्यक्ते च दृक्क्रिये यस्य स यतः सुषुप्तावस्थ इवन किंचिज्जानाति, करोति वा, ततः कथं स्वदेहादेः कर्ता ॥

नापि द्वितीयः पक्षः, प्रत्यक्षविरोधात्, इत्याह ।

(९) नचापि लब्धदेहादिः स्वदेहादेः स कारकम् ।
संसिद्धमेव तत् तस्य कुतश्चिद् दृश्यते यतः ॥

नहि परप्रवेशिनो योगिन इवात्मनः सदेहस्य स्वदेहान्तरकर्तृत्वं दृष्टम्, तद्देहादि तस्य पित्रादेर्देहान्तरादेव दृश्यते यतः ॥

किंच ।

(१०) निमित्तफलजातीनां देहादेश्चाप्यबोधतः ।
बीजादीरणसामर्थ्यविरहान्न परस्य च ॥

यो हि कर्ता स कार्यस्य घटादेरिव मृल्यादिनिमित्तमुदकधारणादिफलं मृदाद्युपादानं शरीरचक्रादि तु सहकारिणं जानन् कर्तृस्वभावः सिद्धः, नच पुरुषः स्वशरीरस्य निमित्तं प्रागर्जितानि कर्माणि विचित्रभोगात्मकं फलं विशिष्टशुक्रशोणिताद्युपादानमाहारादिसहकारिणं च ज्ञातुं शक्तः, इति तदनवबोधाद्धेतोरस्य स्वशरीरनिमित्तबीजादिप्रेरणसामर्थ्याभावतः परस्यापि लब्धदेहस्य पुरुषस्याकर्तृत्वमिति स्वसिद्धेन भवतामनैकान्तिकत्वमिति परः ॥

(११) अदृष्टेव मनो यद्वन्नियुङ्क्ते पुरुषस्तथा ।
नियोक्ष्यते हि कर्मादीन्,

यथैवान्तःकरणं स्वरूपेणाज्ञात्वा पुरुषो नियुङ्क्ते, इति भवद्भिरिष्यते, तथैव बीजकर्मादीनपि स्वशरीरहेतूनज्ञात्वा प्रयोक्ष्यत इत्यज्ञातृत्वस्याकर्तृत्वसिद्धावनैकान्तिकता ॥

कारिकाभागेनैतत्परिहारः ।

(१२) असिद्धत्वान्न साधनम्,

भवेदनैकान्तिकः, यद्यन्तःकरणस्य दृश्यत्वमस्माकं सिद्धं स्यात्, तत्र तु वृत्त्यात्मना सर्वदा ज्ञानशक्तेर्ज्ञेयमेवेत्युक्तं तत्त्वसंग्रहे,

"रविवत् प्रकाशरूपो यदि नाम महांस्तथापि कर्मत्वात् ।
करणान्तरसापेक्षः शक्तो ग्राहयितुमात्मानम्,, ॥

इति, तस्यापि ज्ञातस्य प्रेर्यत्वाज्ज्ञानं विना कर्तृत्वानुपपत्तिरेव ॥

अभ्युपगम्यान्तःकरणस्यादर्शनमनैकान्तिकं परिहरति ।

(१३) तथापि प्रेरको ज्ञाता शर्वस्तस्यामिनो यतः ।

कार्यत्वात् तस्यापि घटादेरिव चेतनेन प्रेरकेण भवितव्यम्, इतीश्वरसिद्धिः, तथा च श्रुतिः, "धियो यो नः प्रचोदयात्," इति, "नैयायिका अणुमनसोराद्यं कर्मादृष्टकारितम्," इति, अत एवेश्वराधीनः पुमान् भोगेऽपि पठ्यते, तथा चाहुः,

"न देवा दण्डमादाय रक्षन्ति पशुपालवत् ।
यं तु रक्षितुमिच्छन्ति बुद्ध्या संयोजयन्ति तम्," ॥

इति ॥

अत्र चोदयति ।

(१४) पितरौ ननु पुत्रादेः कुरुतो भोगसाधनम् ।

माता च पिता च, तावेव यतः पुत्रस्य दुहितुर्वा शरीरमुत्पादयन्तौ दृष्टौ, अतः कथं नात्र पुंसः कर्तृत्वमिति ॥

एतत् प्रतिक्षिपति ।

(१५) न देहमात्रतः स्थूलाद् व्यतिरिक्तं कलादिकम् ।
तद्योगं वृत्तिलाभं वा नित्यव्यापकपक्षयोः ॥
अयोनिजौ च नाकार्यं कुर्यातां नो परस्य हि ।

स्थूलमेव देहं तावुत्पादयन्तौ सिद्धौ, नतु व्यतिरिक्तमिन्द्रियादि, नापि शरीरेन्द्रियाभ्यां पुंसो योगम्, नापि च नित्यत्वाद् व्यापकत्वाच्चात्मनः सर्वशरीरयोगेऽपि विशिष्टेनैव शरीरेण तज्ज्ञानक्रिययोर्वृत्तिलाभं कुरुतः, नाप्ययोनिजं मशकमत्कुणादिशरीरं तौ कर्तुं संभाव्येते, "हि," इति, यस्मात् तस्माच्च युष्मत्परिकल्पितस्यास्य पुत्रादेः परस्य पुत्रकर्तृत्वमित्यध्याहारः, ततः कर्त्रन्तरसिद्धिः ॥

एवं स्थूलशरीरकर्तृत्वमभ्युपगम्यैतदुक्तम्, तदेव तु नोपपद्यते, इति दर्शयितुं पराशङ्कामाह ।

(१६) पितरौ किं नु कुर्वाते शरीरोत्पत्तये बुधाः ।
बीजसंबन्धमात्रं चेत्,

यथा बीजसंबन्धमात्रेणैव तयोः शरीरकर्तृत्वम्, एवमिन्द्रियादावपि भविष्यतीति कुतः कर्त्रन्तरसिद्धिः ॥

कारिकाभागेनैतत् प्रतिक्षिपति ।

(१७) तावता नैव तत्कृतम् ।

कायादेः कार्यादन्यत्वात् तत्कारकबीजसंनिधानात्मनः कार्यस्य, तथाहि,

"मृच्चक्रमात्रयोगेन कलशो न कृतो भवेत्," ।
नह्यन्यस्मिन् कृतेऽन्यत् कृतं भवति ॥

तदेवानयोरन्यत्वमाह ।

(१८) रचना तत्र कर्तव्या नानार्थाराधनक्षमा ।
मृदोऽन्यदेवोदकधारणाद्यर्थकारिघटस्य स्वरूपं यतः ॥

दार्ष्टान्तिकेऽप्यन्यत्वं योजयति ।

(१९) तथा कायेऽपि रचना पुमर्थाराधनक्षमा ।
दृष्टा सातः परिज्ञेया कर्तृतः कुशलाद्बुधैः ॥

एवं बीजसंयोगरूपात् कार्यादन्यदेव नानाभोगसाधनं कार्यम्, इति तस्याप्यनेनैव सातिशयेन कर्त्रा भवितव्यम्, इति ॥

अत्र कारिकाभागेन पराभिप्रायः ।

(२०) बिम्बात् सा चेत्,

"शुक्रशोणितयोः कललावस्थात्यागेन घनावस्था बिम्बमुच्यते, तस्मादेवाहाराद्युपकृतात् सा रचना न कर्त्रन्तरादिति परः," ॥

एतत् प्रतिक्षिपति ।

(२१) न, तत्रैव ह्यन्यादृगपि दृश्यते,

न बिम्बमात्रात्,तस्याविशेषादेकरूपैव पुत्रादेः सर्वस्य रचना स्यात्, इति दृष्टविरोधः ॥

पुनः कारिकाभागेन परः ।

(२२) मरुतश्चेत्,

"पवनस्यैव सर्वत्र रचनाकर्तृत्वसिद्धेः," ॥

आचार्य आह ।

(२३) न, तस्यापि स्वातन्त्र्यं चितिहानितः ।
पूर्वमापादितं सम्यक् स्वातन्त्र्यं बीजकर्मणोः ॥

यथा बीजस्योपादानकारणस्य कर्मणश्चाचैतन्यात् कर्तृत्वं निषिद्धं द्वितीयस्मिन् काण्डे,तथा पवनस्यापि निषेद्धव्यमेव ॥

किंच ।

(२४) नचाप्येवंविधं कार्यं प्रकृष्टज्ञानवद्विना ।
तेषु तेषु प्रदेशेषु त्वगादेर्येन न स्थितिः ॥
येषु येषु स्थितं तत् स्यादशवर्थकृतये क्षमम् ।

नह्येवंविधलक्षणं शरीरादि कार्यं प्रकृष्टतरज्ञानादियुक्तकर्त्रा विना संभवति, येन तेषु तेष्वत्र शरीरे श्रोत्रनेत्रादिषु नवद्वारेषु त्वगादेरपि ग्रहणाक्षेत्रादेः पादतलादिषु स्थितिर्न दृश्यते, येष्ववस्थितं पुरुषार्थसाधनाय समर्थं भवेत्, इति न किंचिज्ज्ञयोः पित्रोरत्र कर्तृत्वम् ॥

अत्र पुनः परः ।

(२५) स्वर्गाद्युद्देशतः कर्म कुर्वतैव नरेण तत् ।
प्रयुक्तं तच्च देहाद्येन विना फलसाधकम् ॥
अतोऽभिसंधिमात्रेण पुंसां सर्वं कृतं त्विति ।

Digitized by Google

"न वयं साक्षात् पुरुषस्य शरीरादिसर्वकर्तृत्वं ब्रूमो येनैष दोषः स्यात्, अपितु "ज्योतिष्टोमेन यजेत,, इत्यादिश्रुतिसिद्धं स्वर्गादि कर्म कुर्वता तदपूर्वाख्यसंस्कारद्वारेण प्रयुक्तम्,,तत् तु हरीतक्यादिविशिष्टपरिणामाक्षेपेण विरेकादिफलमिव शरीराद्याक्षेपेण स्वफलं स्वर्गादि साधयति, इति फलाभिसंधानेन ज्योतिष्टोमादिमात्रमेव कुर्वता पुरुषेण तदाक्षिप्तं सर्वमेव तनुकरणादि कृतमुच्यते, न पुनः साक्षात् कर्मणीव तत्रास्य कर्तृत्वं प्रमाणाभावात्, इत्यदोषः ॥

न, उद्देशस्यानैकान्तित्वात्, इत्याह ।

(२६) न व्यापकमिदं यस्मान्निरयादौ न विद्यते ।

नहि नरकदुःखाद्युद्देशेन ब्रह्महत्यादि कर्म पुरुषैः क्रियते, अपितु दृष्टफलानुसंधानेन, कामादिरिव, इति नरकफलाद्यनुपपत्तिस्तेषाम् ॥

"अथाघवीचौ नरके कल्पं वसेयुर्ब्रह्मघातकाः,,इति श्रुत्यन्तरेण तत्कर्तुस्तद्भवतीत्युच्यते,, भवतूत्पादकस्तत्वस्य न पुरुषः,अभिसंधानेन विना कर्तृत्वासिद्धेः, इति ततोऽन्यश्चौरस्य निग्रहादौ नृपतिवदीश्वरोऽभ्युपगन्तव्यः, तथाहि,

(२७) व्याप्तं यच्चापि कुम्भादि दृष्टं यद्धीमता कृतम् ।
तत् तावतैव तद्वच्च निरयादि भविष्यति ॥

यत् कार्यत्वेन व्याप्तं घटादि तद्धीमता कृतं सिद्धम्,अतस्तदपि तस्य नरकादिकार्यत्वेनैव घटादिवद्धीमता कृतमिति गम्यते, ॥

"नच व्यवहितफलोद्देशेनानुष्ठितानामपि कर्मणां कर्तृव्यापारान्तरानपेक्षया फलजनकत्वेन व्याप्तिः सिद्धा,, इत्याह ।

(२८) नचाप्युद्देशमात्रेण तृप्तिः स्यात् कर्षणादितः ।
क्रियान्तरं विना तस्मात् सामग्र्यन्तरतो भवेत् ॥
तद्वद्धर्मादपि कृतात् स्वर्गादि स्यात् क्रियान्तरात् ।
तच्चेश्वरं विना नेति संसिद्धः परमेश्वरः ॥

आहारफलाद्यर्थत्वेन हि कृष्यादीनि लोकः करोति न व्यसनितया, नच कृष्टिमात्रादेव तत् तेषां फलम्,अपितु तद्धनरक्षणादेर्भोजनान्तात् कर्त्रन्तरव्यापारादपि, तद्वत् स्वर्गाद्युद्देशेनानुष्ठिताच्च ज्योतिष्टोमादेः कर्ममात्रात् स्वर्गः,अपितु तद्भोगयोग्यशरीरादिजननकर्मान्तरसापेक्षात्, इति तस्यापि कर्मान्तरकर्त्रा सातिशयेन भाव्यम्, इतीश्वरसिद्धिः ॥

"ननु सोऽपि पुरुष एव भविष्यति, यदाहुः, "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः,, इत्यत्राप्याह ।

(२९) पुंभिश्चापेक्ष्यमाणत्वात् स चानावृतदृक्क्रियः ।
ततश्चापास्तपुंभावस्तद्वैधर्म्याद्विनिश्चितः ॥

पुरुषाद्याविद्यावृतत्वात् किंचिज्ज्ञाः किंचित् कर्तारश्चोच्यन्ते, पुरुषाशक्यशरीरावरणादिकार्यान्यथानुपपत्त्या त्वीश्वरः कल्प्यमानस्तद्विलक्षणोऽनावृतदृक्क्रियः सिध्यति, न पुरुषविशेष एव, तस्यापि पुरुषत्वात् तत्रासामर्थ्यात्, सामर्थ्ये वा न पुरुषत्वं यतः ॥

पुरुषेश्वरवादी सिद्धान्तवादिनं प्रत्याह ।

(३०) पुंस्त्वाद् ये कल्पयन्तीशं सर्वज्ञानक्रियोज्झितात् ।
असिद्धहेतुतस्तेऽतः स्थिता ह्यात्मनि दर्शनात् ॥

पुंसः सर्वज्ञत्वादिविरहात् तनुकरणनिर्माणासामर्थ्यमित्यवश्यं तन्निर्माणसमर्थेन सर्वविदान्येन भवितव्यम्,इति यैः पुरुषविशेषवादिनामस्मदसिद्धादेव हेतोरीश्वरोऽन्यः साध्यते, तेऽपीश्वरबुद्ध्यात्मन्येव पुरुषविशेषे व्यवस्थिताः ॥

कथमित्याह ।

(३१) पुमानेव हि कस्मात् तेनेष्टोऽनावृतदृक्क्रियः ।
महतापि प्रयत्नेन यदीशः परिकल्प्यते ॥

तनुकरणादिकार्यान्यथानुपपत्त्या हि तैः सर्वज्ञत्वादियुक्तः कर्ता कश्चित् कल्पनीयः, स च पुरुषविशेष एव कल्प्यो नान्यः, एवं हि न धर्म्यन्तरमपि कल्पितं भवतीति ॥

सिद्धान्तवादीत्वाह ।

(३२) प्रमाणाभावतो नेष्टः सर्वसर्वज्ञदोषतः ।

भवेदसिद्धो हेतुर्यदि पुरुषविशेषस्येश्वरतायां प्रमाणं स्यात्, तत् तु नास्ति,अस्मदादिवत् तस्यापि बुद्ध्यादियुक्तत्वेन भवद्भिरभ्युपगमात्, तदयुक्तत्वे हि मुक्त एवेश्वरः स्यात्, तत् तु पुरुषविशेष एवेत्यस्मत्पक्ष एव, बुद्ध्यादियोगाच्च सर्वज्ञत्वम्, तत् पुरुषान्तरेऽपि स्यादिति सर्वस्य सर्वज्ञताप्रसङ्गः ॥

किमत इत्याह ।

(३३) न स्युस्ततश्च शास्त्राणि लोके चोत्साहकादयः ।
स्वात्मना पापकर्तृत्वं नहि सर्वार्थदर्शिनः ॥
युज्यते दृश्यते चास्य दुःखं नानाप्रकारजम् ।

ततः सर्वेषां सर्वज्ञत्वात् सर्वस्य शास्त्रपरोक्षाभिधानादेः स्वयमनर्थहेतूपसेवाया नानाप्रकारदुःखवेदनस्य चाभावप्रसङ्गः; तदप्रसङ्गे ह्यसर्वज्ञा एव पुमांसोऽभ्युपगन्तव्याः, ततो नासिद्धो हेतुः, इति पुरुषव्यतिरिक्तेश्वरसिद्धिः,"कथं तर्हि,, "पुरुषाच परं किंचित्,, इत्यादिश्रुतयः, तदुपकारायैव प्रवृत्तेरीश्वरादेरपि सर्वस्येत्यदोषः,

"शास्त्रमेवाकृतकं वेदाख्यं विधिनिषेधात्मकत्वाज्ज्ञाप्यति-

क्रमेण पुंसः प्रत्यवायफलं विदधदीश्वरो नान्यः,, इति जैमिनीयः,

(३४) शास्त्रतः कर्मनिष्पत्तिः कर्मतश्च कृतात् फलम्।
शास्त्रं चाकृतकं तेन किं हरेणेति, ॥

एतत् कारिकाभागेन प्रतिक्षिपति ।

(३५) नार्थवत्,

नैतद्युक्तम् ॥

कुत इत्याह ।

(३६) कर्मणाकल्पकरणमुक्तं शंभोः प्रयोजनम् ।
उपरिष्टात् प्रवक्ष्यामः पुंमुक्तिकरणं परम् ॥

उक्तमेव यतो व्यवहितफलं कर्म कृष्यादिवच्चिदनधिष्ठितं न कार्यं कर्तुं समर्थमिति, वक्ष्यामश्च ॥

"ननु दृष्टे सति नादृष्टकल्पना युक्ता", इत्यत्राप्याह ।

(३७) स्वर्गादिसिद्धये यद्वत् स्थैर्यं क्लृप्तं तु कर्मणः ।
महेशः कल्प्यतां तद्वत् तं विना नापि तद्यतः ॥

यद्येवं दृष्टदेवतोद्देशाद्द्रव्यत्यागात्मनो ज्योतिष्टोमादेः पुरुषकर्मणोऽपवृत्तत्वादामुष्मिकफलस्य स्वर्गादिफलस्यान्यथानुपपत्त्या तददृष्टेन संस्काररूपेणानपवृत्तमिति कल्प्यते, तर्ह्यदृष्टस्यापि कल्पनासंभवादीश्वरोऽपि कल्पनीयः, तेन विना तस्यापि फलजनकत्वासिद्धेरुक्तत्वात् ॥

अधुना रचनारूपत्वाच्छास्त्रस्याकृतकत्वं न संभवतीति तत्प्रामाण्यान्यथानुपपत्त्यावश्यं भवद्भिस्तत्प्रणेतेश्वरोऽभ्युपगन्तव्य इति दर्शयितुं शब्दनित्यत्वं तावत् प्रतिक्षेप्तुमाह ।

(३८) नित्यं चेद्वर्णजातं स्यात् सर्वदा किं न गृह्यते ।

उपलभ्यस्वभावस्य हि नित्यत्वे स्वभावाविनाशात् सर्वदैवोपलभ्यताप्रसङ्गः ॥

कारिकाभागेन परः ।

(३९) अव्यक्तत्वात् तु,

"न गृह्यते,, इत्यनुवर्तते, व्यक्तस्य हि तस्य सर्वदोपलभ्यस्वभावता, नाव्यक्तस्य, तेनाव्यक्तत्वाच्च गृह्यत इति ॥

आचार्य आह ।

(४०) तद्व्यक्तेर्नित्यत्वे दोषनित्यता,

शब्दस्य व्यक्तिरपि यदि नित्या, ततः "सर्वदा किं न गृह्यते,, इत्यस्य दोषस्य नित्यतानुपपत्तिरेव ॥

कारिकाभागेन पराभिप्रायः ।

(४१) अनित्या चेत्,

"अथैतद्दोषभयादनित्या व्यक्तिः शब्दस्येत्युच्यते,, ॥

आचार्य आह ।

(४२) कुतो हेतोः,

केन प्रमाणेन भवद्भिरनित्यत्वमवगतम् ॥

परः प्रमाणमाह ।

(४३) कदाचिद्भवतस्त्विति,

कादाचित्कत्वात् सा व्यक्तिरनित्या, विद्युदादिवत् ॥

अत्राप्याह ।

(४४) शब्देऽपि तत्समानत्वादनित्यत्वं न वार्यते ।

यद्येवं स्थानकरणाभिघातादेः स्वकारणस्य भावे शब्दः कदाचिदुपलभ्यते, तदभावे च नोपलभ्यते, इति विद्युदादिवदनित्योऽस्तु, किमन्यया तद्व्यक्त्या परिकल्पितयेति ॥

"ननु तदभावेऽनुपलम्भः स्तिमितवायूपरुद्धश्रोत्रत्वात् पुंसो वधिरस्येव शब्दविषयोऽन्यथा सिद्धस्तत्र वर्णानित्यत्वसाधनाय पर्याप्त इति,, ॥

तदयुक्तम्, यतः ।

(४५) मरुति स्तिमिते मानं न वर्णावरके क्वचित् ।

स्थानकरणाभिघाताभावकाले विद्यमाना अपि वर्णाः स्तिमितवायूपरुद्धत्वाच्छ्रोत्रेण न गृह्यन्ते, इत्यत्र प्रमाणं नास्त्येव, उद्रिक्ते हि वायौ तत्र शूलादयः स्युः, इति स्तिमितग्रहणम्, किंच, श्रोत्रोपरोधस्याविशेषात् स्थानकरणाभिघातकालेऽपि वर्णा न श्रूयेरन् ॥

"ननु तज्जेन मरुता तदानीमभिव्यक्तत्वात् श्रूयन्ते, इति,, न, असिद्धत्वादित्याह ।

(४६) पृष्ठस्थार्णोग्रहान्नापि वर्णानां व्यञ्जको मरुत् ।

प्रकाशको हि व्यञ्जको नावरको विरुद्धत्वात्, वायुश्च वर्णानामावरको दृष्टो यतः, तत्पृष्ठस्थानां वाय्वनुगतानामर्णानां ग्रहणं नास्ति, निवाते हि शब्दग्रहणात्, ततो न वायोर्व्यञ्जकत्वसिद्धिः ॥

"अथ स्थानकरणाभिघातजेन मरुता येनैष दोषः स्यात्, अपितु श्रोत्राभ्यासमागत्य श्रोत्रस्तैमित्यं निवर्तते, ततो वर्णोपलब्धिः,, इत्यत्राप्याह ।

(४७) कम्पाद्यभावतो नासावायात इति गम्यते ।

स्पर्शशब्दधृतिकम्पलिङ्गो हि वायुः, लिङ्गाभावे च वक्तृमुखात्कोतुः श्रोत्राभ्यासमागच्छतीति कुतोऽवगम्यताम् ॥

किंच ।

(४८) कर्णच्छिद्रे हि संपूर्णे सर्वार्णग्रहणं भवेत् ।

व्यञ्जकेन तेन श्रोत्ररन्ध्रे व्याप्ते सत्यावरणस्य निरस्तत्वात् सर्वशब्दग्रहणप्रसङ्गः ॥

Digitized by Google

अत्र परः ।

(४६) सामर्थ्यं व्यञ्जकस्येदृग्गम्यते कार्यतः किल ।
संश्लिष्टमपि नो वर्णान् व्यनक्त्येकस्य दर्शनात् ॥

नित्यत्वे हि शब्दस्य कदाचिद्ग्रहणान्यथानुपपत्त्या स्थानकरणाभिघातजस्य पवनस्य श्रोत्रोपकारद्वारेण व्यञ्जकत्वं यथा कल्प्यते तथैवैकैकवर्णोपलम्भात् प्रतिनियतश्रोत्रशक्त्युपकारेण प्रतिनियतस्थानकरणाभिघातजस्य वायोः प्रतिनियतवर्णव्यञ्जकशक्तिकल्पनाप्येव प्रसक्त इति ॥

एतत् प्रतिक्षिपति ।

(५०) संसिद्धे व्यक्तिकर्तृत्वे तस्येदं युक्तिमद्भवेत् ।

व्यक्तिकर्तृत्वे व्यञ्जकत्वे तस्य वायोः सिद्धे कदाचित् तस्य विशेषस्य वर्णविशेषव्यञ्जकत्वमुच्यमानं शोभते, तदेव त्वसिद्धमित्युक्तम् ॥

अभ्युपगम्याप्याह ।

(५१) नचायं व्यञ्जको धर्मः प्रदीपादौ प्रदृश्यते ।

युक्तश्चक्षुःश्रोत्रादीनां व्यञ्जकानां रूपशब्दादौ व्यङ्ग्ये शक्तिभेदो विषयभेदात्, अस्य तु प्रदीपादे रूपादिवदेक एव शब्दो विषय इति, तदवान्तरभेदेन शक्तिभेदकल्पनमयुक्तमेव ॥

किंच ।

(५२) सिद्धे स्थैर्ये तु वर्णानां व्यञ्जकं परिकल्प्यते ।
स्थैर्यं तेषां कुतो हेतोः,

संतमसे हि स्पर्शादिना घटादीनां सत्त्वे सिद्धे प्रदीपादिव्यञ्जकः सिध्यति, तदसिद्धौ हि मृच्चक्रदण्डादिः कारक एवोक्तः, तदिहापि स्थानकरणाभिघातादीनामभावेऽपि वर्णजातस्य सत्त्वसिद्धौ यदि प्रमाणं भवेद्,भवेदेव तेषां तद्व्यञ्जकत्वम्, तदभावे तु तत्कारकतैव युक्तेति ॥

परः कारिकाभागेनाच प्रमाणमाह ।

(५३) प्रत्यभिज्ञानतस्त्विति,

स एवायं वर्ण इति स्थिरवस्तुविषयात् प्रत्यभिज्ञानाख्यात् प्रत्ययादेव तेषां स्थैर्यमिति ॥

एतत् पराकरोति ।

संदिग्धं प्रत्यभिज्ञानं तदतद्भावदर्शनात् ।
शब्दे सम्यक्त्वमस्येति नैतद्धेत्वन्तरं विना ॥

तदिति स्थैर्यम्, अतदित्यस्थैर्यम्, तयोर्द्वयोरपि भावे तस्य प्रत्यभिज्ञानस्य दर्शनाच्च विरमः, किमत्र पर्वतादाविव स्थैर्यविषयमेव तत्, उत धाराज्वालादाविवा स्थैर्यविषयत्वाद्भ्रान्तम्, इति संदेहाच्च साधनम्, अतः स्थैर्यसिद्धये प्रमाणान्तरमेव वक्तव्यम्, ॥

अथ क्वचिद् भ्रान्तदर्शनेऽपि प्रत्यभिज्ञानस्य न सर्वत्र भ्रान्तता, अनुभूयमानार्थविषयत्वात्, आलोचनवत्, तदुक्तम्,

"स्वतः सर्वप्रमाणानां प्रामाण्यमिति गृह्यताम् ।
नहि स्वतोऽसती शक्तिः कर्तुमन्येन पार्यते,, ॥

इति, अपितु बाधकसद्भावादेव, इत्यत्रापि बाधकं प्रमाणमाह ।

(५४) अनेकत्वमवर्णस्य गम्यते कपगादिवत् ।
समकालमनेकैस्तु नरैरुच्चार्यते यतः ॥

प्रतिपुरुषमकारादयो वर्णा भिन्नाः, युगपद् बहुभिरुच्चार्यमाणत्वात्, कचटतपादिवर्णवत्, "ननु व्यञ्जकत्वादेषां कारकत्वमसिद्धमेव,, सत्यम्, यदि तेषामभावेऽपि वर्णसत्त्वे प्रमाणं स्यात्, तदभावे त्वभावसिद्धौ नैषां व्यञ्जकत्वम्, अपितु, कारकतैवेत्युक्तम्, तथासिद्धता ॥

॥ अथ प्रसन्नराघवनामकनाटकस्य ॥

॥ तृतीयोऽङ्कः ॥

॥ ततः प्रविशति वामनकः ॥

वामनकः । आत्मानं विलोक्य सविस्मयम् । अहो अङ्गाणं मे तुङ्गत्तणम् । अवि णाम ईरिसेहिं अङ्गेहिं एत्थ संचरन्तेण मए दुआरसिहरं भज्जीअदि ता खुज्जो भविअ संचरिस्सम् * ।
तथा करोति ।

प्रविश्य कुब्जकः । वअस्स वामणअ दाणिं सअलगुणसंजुत्तोसि तुमम् † ।

वामनकः । कहं विअ ‡ ।

कुब्जकः । पढमं जेव्व वामणो दाणिं उण खुज्जत्तणं पत्तो § ।

वामनकः । सक्रोधम् । अए मुक्ख कहं अत्तणो खुज्जत्तणं परस्मि आरोवेसि णं तुमं जेव्व खुज्जओ मए उण दुआरसिहरभङ्गसङ्किदेण अप्पस्मि खुज्जत्तणमारोविदम् ‖ ।

कुब्जकः । विहस्य । कहं विअत्थिमेत्तएण तुह अङ्गेण दुआरसिहरं भज्जिस्सदि । पुनः सक्रोधम् । अरे अलीअवाआल केण तुह कहिदं अहं खुज्जओत्ति ¶ ।

---

* अङ्गानां मे तुङ्गत्वम् । अपि नामेदृशैरङ्गैरत्र संचरता मया द्वारशिखरं भज्यते तत् कुब्जो भूत्वा संचरिष्यामि ।

† वयस्य वामनकेदानीं सकलगुणसंयुक्तोऽसि त्वम् ।

‡ कथमिव ।

§ प्रथममेव वामन इदानीं पुनः कुब्जत्वं प्राप्तः ।

‖ अये मूर्ख कथमात्मनः कुब्जत्वं परस्मिन् आरोपयसि ननु त्वमेव कुब्जको मया पुनर्द्वारशिखरभङ्गशङ्कितेनात्मनि कुब्जत्वमारोपितम् ।

¶ कथं वितस्तिमात्रेण तवाङ्गेन द्वारशिखरं भङ्क्ष्यते । अरे अलीकवाचाल केन तव कथितमहं कुब्ज इति ।

वामनकः । णं इमिणा जेव्व दरिअवुसहककुदसरिसेण पुट्ठट्ठिदेण मंसत्थवएण उव्वहिदेण * ।

कुब्जकः । विहस्य । अए मदिसुण्ण कहं इमो मंसत्थवओ अवि उण सोहग्गलच्छीए उवहाणगण्डुओ † ।

वामनकः । साशङ्कम् । अरे सणिअं जप्प । अम्हारिसाणं अन्तेउरचारिणं सोहग्गवुत्तन्तमाअण्णिअ भट्टा कुविस्सदि ‡ ।

कुब्जकः । अलं भीरुत्तणेण दाणिं धाणघरम्मि वट्टदि भट्टा § ।

वामनकः । णाहुणहु अज्ज किर कस्सावि पाहुणस्स महेसिणो आगमणं परिवालअन्तो बाहिरमण्डवे वट्टदि ‖ ।

कुब्जकः । हा हदम्ह ¶ ।

वामनकः । किंति ** ।

कुब्जकः । णं पढमं जेव्व एक्केण महेसिणा जण्णवक्केण उवदिट्ठो इमो राआ अच्छिमीलणेहिं रत्तिओ गमेदि । दाणिं उण इमिणा उवदिट्ठो अन्तेउरं जेव्व परिहरिस्सदि । तदो किं इमो अम्हेहिं खवणोव्व कप्पडपेडएहिं करिस्सदि †† ।

वामनकः । सच्चं एदं जइ इमो महेसी अम्हाणं रण्णो उवदेसत्थं आअदो भवे । इमो उण हरधणुद्दंसणत्थं ‡‡ ।

कुब्जकः । किं इमस्स महेसिणो होमग्गिधूमसामलिअलोअणस्स हरचावदंसणेण ता तक्केमि खत्तिअबह्मणो इमोत्ति §§ ।

वामनकः । विहस्य । कहं तणुव्व मदीवि तुह वङ्कुणी जं एव्वं तक्केसि सच्चं खत्तिअबह्मणो इमोत्ति ‖‖ ।

---

* नन्वनेनैव दृप्तवृषभककुदसदृशेन पृष्ठस्थितेन मांसस्तबकेनोद्वाहितेन ।

† अये मतिशून्य कथमयं मांसस्तबकोऽपि पुनः सौभाग्यलक्ष्म्या उपधानगेन्दुकः ।

‡ अरे शनैर्जल्पास्मादृशानामन्तःपुरचारिणां सौभाग्यवृत्तान्तमाकर्ण्य भट्टः कोपिष्यति ।

§ अलं भीरुत्वेनेदानीं ध्यानगृहे वर्तते भट्टः ।

‖ नहिनह्यद्य किल कस्याप्यतिथेर्महर्षेरागमनं परिपालयन् बाह्यमण्डपे वर्तते ।

¶ हा हताःस्मः ।

** किमिति ।

†† ननु प्रथममेवैकेन महर्षिणा याज्ञवल्क्येनोपदिष्टोऽयं राजा अक्षिमीलनै रात्रीर्गमयति । इदानीं पुनरनेनोपदिष्टोऽन्तःपुरमेव परिहरिष्यति । ततः किमयमस्माभिः क्षपणक इव कर्पटपेटकैः करिष्यति ।

‡‡ सत्यमेतत् । यद्ययं महर्षिरस्माकं राज्ञ उपदेशार्थमागतो भवेत् । अयं पुनर्हरधनुर्दर्शनार्थम् ।

§§ किमस्य होमाग्निधूमश्यामलितलोचनस्य हरचापदर्शनेन तत् तर्कयामि क्षत्रियब्राह्मणोऽयमिति ।

‖‖ कथं तनुरिव मतिरपि ते वक्रा यदेवं तर्कयसि सत्यं क्षत्रियब्राह्मणोऽयमिति ।

कुब्जकः । ता कोवि अणत्थो सम्भाविअदि जं किर चिरतवस्साकरिसिदो इमो तिव्वं पेक्खमाणो खत्तिअबह्मणो उज्जुमदिणो अह्माणं राएसिणो रज्जं गहीदुं आअदोत्ति * ।

वामनकः । सन्तं पावं । ईरिसं मा जप्प । अअं हि चिरतवस्सापरितोसिदस्स बह्मणो वाआए खत्तिअत्तणं परिहरिअ बह्मणत्तणं पत्तो † ।

कुब्जकः । कहं तणुव्व मदीवि तुह वामणी जं एरिसअलीअलोअवुत्तन्तेवि पत्तिआअदि । जइ कस्सवि वाआए खत्तिओ बह्मणो होइ ता मह वाआए तुमंवि बह्मणो होसि ‡ ।

वामनकः । अरे बालिस कहं तुह गोमुहस्स भअवदो चउम्मुहस्सवि णत्थि अन्तरम् § ।

कुब्जकः । जइ इमो सुध्धबह्मणो ता किं इमस्स चावचिन्ताए ‖ ।

वामनकः । अत्थि कारणं तस्स पासम्मि तदो जेव्व गहिअचावविज्जा दोणि खत्तिअकुमारा वट्टन्ति ताणं दंसइस्सदि चावन्ति ¶ ।

कुब्जकः । ता सुध्धासओ इमो ** ।

वामनकः । अह इम् †† ।

कुब्जकः । ता कहेहि दाव इमस्सिं अलीअदूसणारोवेण णं मह पावं उप्पण्णं ण वेत्ति ‡‡ ।

वामनकः । पावन्ति किं भणीअदि णं महापावं उप्पण्णम् §§ ।

कुब्जकः । अरे मुक्ख ण आणासि धम्मस्स तत्तम् । सम्बन्धिअणे परिहासवअणाइं ण हु पावकरणाइं ‖‖ ।

---

* तत् कोऽप्यनर्थः सम्भाव्यते यत् किल चिरतपस्याकर्षितोऽयं तीव्रं प्रेक्षमाणः क्षत्रियब्राह्मण ऋजुमतेरस्माकं राज्ञो राज्यं ग्रहीतुमायात इति ।

† शान्तं पापं । ईदृशं मा जल्प । अयं हि चिरतपस्यापरितोषितस्य ब्रह्मणो वाचा क्षत्रियत्वं परिहृत्य ब्राह्मणत्वं प्राप्तः ।

‡ कथं तनुरिव मतिरपि ते वामनी यद् ईदृशालीकलोकवृत्तान्तेऽपि प्रत्याय्यते । यदि कस्यापि वाचा क्षत्रियो ब्राह्मणो भवति तर्हि मम वाचा त्वमपि ब्राह्मणो भवसि ।

§ अरे बालिश कथं तव गोमुखस्य भगवतश्चतुर्मुखस्यापि नास्त्यन्तरम् ।

‖ यद्ययं शुद्धब्राह्मणस्तर्हि किमस्य चापचिन्तया ।

¶ अस्ति कारणं तस्य पार्श्वे तत एव गृहीतचापविद्यौ द्वौ क्षत्रियकुमारौ वर्तेते ताभ्यां दर्शयिष्यति चापमिति ।

** तत् शुद्धाशयोऽयम् ।

†† अथ किम् ।

‡‡ तत् कथय तावदस्मिन्नलीकदूषणारोपेण ननु मम पापमुत्पन्नं नवेति ।

§§ पापमिति किं भण्यते ननु महापापमुत्पन्नम् ।

‖‖ अरे मूर्ख न जानासि धर्मस्य तत्त्वम् । सम्बन्धिजने परिहासवचनानि न खलु पापकारणानि ।

वामनकः । कहं उण इमो तुह सम्बन्धिअणो * ।

कुब्जकः । अरे ण आणासि अस्सवि दोणि कुमारा अह्माणं विदोणि कुमारीओ ता तक्केमि सम्बन्धिअणो हविस्सदित्ति † ।

वामनकः । विहस्य कहं अह्माणं एरिसं पुण्णम् ‡ ।

नेपथ्ये ।

ताटङ्किना झटिति ताडितताटकेन
रामेण पद्मरमणीयविलोचनेन ।
क्रीडाशिखण्डकधरेण सलक्ष्मणेन
साकं मुनिः कुशिकसूनुरितोऽयमेति ॥

वामनकः । सहर्षविस्मयम् । अहो जा किर सअललोअ-भीसणा रक्खसी ताडएत्ति सुणीअदि सा इमिणा जइ ताडिदा ता इमस्सिं हरचावारोवणं वि सम्भावीअदि । ता एहि इमं कण्णसुहारहं भट्टिणीणं समप्पह्म § ॥ इति निष्क्रान्तौ ॥

॥ प्रवेशकः ॥

ततः प्रविशति रामलक्ष्मणानुगतो विश्वामित्रः । अङ्गुल्या दर्शयन् वत्स रामभद्र ।

एतत् तर्कय चक्रवाकहृदयाश्वासाय तारागण-
ग्रासाय स्फुरदिन्दुमण्डलपरीहासाय भासां निधिः ।
दिक्कान्ताकुचकुम्भकुङ्कुमरसन्यासाय पङ्केरुहो-
ल्लासाय स्फुटवैरिकैरववनत्रासाय विद्योतते ॥

रामः । अञ्जलिं बद्ध्वा ।

लालयन्तमरविन्दवनानि
चालयन्तमभितो भुवनानि ।
पालयन्तमथ कोककुलानि
ज्योतिषां पतिमहं महयामि ॥

विश्वामित्रः । स्वगतम् । अपि नाम मयोपनीयमानं वत्स-रामभद्रमचिरादेव जनकस्तनूजया सम्भावयिष्यति ।

लक्ष्मणः । आर्य पश्य ।

यावन् नीरनिधेः प्रभातसमयः प्रोद्धृत्य लोकत्रयी-
माणिक्यं रविबिम्बमम्बरवणिग्वीथीपथे न्यस्यति ।
तावत् कर्तुमिवास्य मूल्यमुचितं पद्माकरेण स्वयं
लक्ष्मीर्लब्धविकाशपङ्कजकरन्यस्ता पुरः स्थाप्यते ॥

विश्वामित्रः । सहर्षमात्मगतम् । अये वत्स लक्ष्मणेनैव दत्त-मुत्तरम् । देवताधिष्ठितानि हि मुग्धवचनानि भवन्ति ।

रामः । मुनिं प्रति भगवन् कथमियं बहुनरकरितुरङ्गमतर-ङ्गितापि राजधानी तपोवनभूमिरिव प्रशान्तपावनी विभाव्यते ।

विश्वामित्रः । क इह विस्मयः । नन्विह जनकः प्रतिव-सति यस्यायं भगवान् याज्ञवल्क्यो गुरुः ।

रामः । सोऽयं भगवानस्य गुरुर्यः किल योगीश्वर इति ख्यायते ।

विश्वामित्रः । वत्स स एवायम् ।

पादोपजीवनाद्भानोः प्रबोधमुपलभ्य यः ।
अभूद्योगीश्वरख्यातेः सद्म पद्ममिव श्रियः ॥

तदेहि राजभवनमुपसर्पाम इति निष्क्रान्तः । नेपथ्ये

पयोभिः सिच्यन्तां बहलविलसत्कुङ्कुमरसैः
प्रसूनैः कीर्यन्तां परिमलमिलल्लोलमधुपैः ।
चतुष्कैः पूर्यन्तामविरललसन्मौक्तिकगणै-
र्मुद्रा पौरस्त्रीभिर्नगरपथरथ्याङ्गणभुवः ॥

विश्वामित्रः । नूनमस्मदभ्यागमनसानन्दस्य शतानन्दस्य वाक्यपरिस्पन्दः । विलोक्य । अहो अस्य रभसातिशयो यदयं कृतमपि नगरपरिष्कारं पुनरादिशति ।

प्रविश्य शतानन्दः । भगवन् अभिवादये ।

विश्वामित्रः । सौम्यायुष्मान् भूयाः ।

शतानन्दः । भगवन् अयमसौ जनको राजा भगवन्तं प्रतीक्षते ।

विश्वामित्रः । विलोक्यायं स एष जनकः ।

अङ्गैरङ्गीकृता यत्र षड्भिः सप्तभिरष्टभिः ।
त्रयी च राज्यलक्ष्मीश्च योगविद्या च दीव्यति * ॥

ततः प्रविशति जनकः ।

जनकः । कृताञ्जलिर्भूत्वा

यः काञ्चनमिवात्मानं निक्षिप्याग्नौ तपोमये ।
वर्णोत्कर्षं गतः सोऽयं विश्वामित्रो मुनीश्वरः ॥

उपसृत्य । भगवन् अयं ते समीहितसम्पल्लतासमुद्गमा-रामः प्रणामः ।

विश्वामित्रः । राजर्षे वसुन्धरासुनासीर सीरध्वजाप्रतिह-तमनोरथो भूयाः । इति यथोचितमुपविशन्ति ।

जनकः । भगवन् अधुना सुनासीरसाधारणत्वमधःकरणं मे ।

---

* कथं पुनरयं तव सम्बन्धिजनः ।

† अरे न जानास्यस्यापि द्वौ कुमारावस्माकमपि द्वे कुमार्यौ तत् तर्कयामि सम्बन्धिजनो भविष्यतीति ।

‡ कथमस्माकमीदृशं पुण्यम् ।

§ या खलु सकललोकभीषणा राक्षसी ताटकेति श्रूयते सा अनेन यदि ताडिता तर्ह्यस्मिन् हरचापारोपणमपि सम्भाव्यते । तदेहीमं कर्णसुधारसं भट्टिनीभ्यः समर्पयामः ।

* शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषं तथा । छन्दश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः ॥ स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि चेति षड् राज्याङ्गानि । यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधयश्चेत्यष्टौ योगाङ्गानि ।

विश्वामित्रः । कथमिव ।

जनकः । सम्प्रति तदीयामपि पदवीमतीत्य वर्त्ते ।

गाधिनन्दन न नन्दनजन्मा
तादृशः स हरिचन्दनशाखी ।
यादृशो मम भवत्पदपद्म-
द्वन्द्ववन्दनविधिः सुखहेतुः ॥

विश्वामित्रः । अहो ते प्रणयातिशयो यः सहजप्रमोदसुधाम्बुधिनिमग्नोऽप्यस्मत्समागमजन्मनः सुखशीकरान् बहु मन्यसे ।

जनकः । भगवन् अस्मद्विधानां राज्यरागोपरक्तचेतश्चन्द्रमसां कुतस्त्योऽयं सहजानन्दचन्द्रिकोद्भवः ।

विश्वामित्रः । मैवं भोः ।

व्याघातः कार्मुकस्य श्रयति
करतलं कण्ठमोंकारनादः
स्तेजो भाति प्रतापाभिधमवनि-
तले ज्योतिरात्मीयमन्तः ।
राज्यं सिंहासनश्रीः शममपि
परमं वक्ति पद्मासनश्री-
र्येषां ते यूयमेते निमिकुल-
कुमुदानन्दचन्द्रा नरेन्द्राः ॥

शतानन्दः । सत्यमेतत् । एते हि

वाराङ्गनाकरतरङ्गितचामरोर्मि-
श्वेतातपत्रशतपत्रिणि राजहंसाः ।
क्रीडन्ति राज्यसरसि स्वरसं च धीरा
योगीन्द्रवृन्दसुगमे पथि संचरन्ति ॥

लक्ष्मणः । अपवार्य । आर्य राजानोऽप्यमी ब्रह्मविद्याचतुरा इति चित्रीयते मे चेतः ।

रामः । वत्स किमिह चित्रं ननु

छत्रच्छाया तिरयति न यद् यन् न च स्प्रष्टुमीष्टे
दृप्यद्गन्धद्विपमदमषीपङ्कनामा कलङ्कः ।
लीलालोलः शमयति न यच् चामराणां समीरः
स्फीतं ज्योतिः किमपि तदमी भूभुजः शीलयन्ति ॥

विश्वामित्रः । आङ्गिरसोचितमात्थ राजहंसा इति । सकलकुवलयोत्तंसा राजहंसा अमी ।

जनकः । भगवन् इदमस्मत्प्राचीनेषु शोभते ननु मयि कतिपयग्रामठिकास्वामिनि ।

विश्वामित्रः । मैवं भोः ।

अवनिमवनिपालाः सन्तु ये पालयन्ता-
मवनिपतियशस्तु त्वां विना नापरस्य ।

जनक कनकगौरीं यत् प्रसूता तनूजां
जगति दुहितृमन्तं भूभृवन्तं वितेने ॥

जनकः । भगवन् नूतनशतभुवननिर्माणनिपुणस्य भगवतः कियतीयमभिनववचनचातुरी नाम । स खलु भवान् यस्य

शलाकीकृत्य स्वां दृशमसमकोपाग्निरुचिं
सुरश्रेणीचित्रं गगनतलभित्तौ रचयतः ।
सुधांशोर्भानोश्च प्रथमरचितं बिम्बयुगलं
सुधालावासान्द्रद्रवभरितपात्रद्वयमभूत् ॥

शतानन्दः । राजर्षे सत्यमात्थ । किमुच्यतेऽसौ भगवान् ।

त्रिशङ्कोः स्वर्लोकादवनितलपातं रचयितुं
सुनासीरे कोपाद्विकसितपदाब्जे विकसितः ।
यदीयोऽसौ नव्यत्रिदशनगरारम्भरभसः
सुरस्तोमे भक्त्या मुकुलितकराब्जे मुकुलितः ॥

लक्ष्मणः । अपवार्य । आर्य कथमेवंविधं भगवतः प्रतापितभुवनत्रयं तपोभिधानं तेजः ।

रामः । अपि न विदितं ते राजर्षेरिदम् ।

रोषाभिभूतपुरुहूतपदाभिभूतं
दृष्ट्वा त्रिशङ्कुमथ कोपविपाटलश्रीः ।
आकुड्मलीकृतकराम्बुजराजिरम्या
सन्ध्येव दृष्टिरमरैरुपासितास्य ॥

विश्वामित्रः । राजर्षे । अपि तावद् रत्नगर्भागर्भसम्भवं कन्यारत्नमलङ्कुरुते त्वाम् ।

जनकः । भगवन् भवत्प्रसादादधुना जामातृरत्नमप्यलङ्करिष्यते । राममवलोक्य सकौतुकं भगवन्

सकलजनविलोकनोत्सवाना-
मयमयनं कतरः पुरः कुमारः ।
हरितमणिमयूखहारिणो यः
कलयति कल्पतरोः प्ररोहलीलाम् ॥

शतानन्दः । भगवन् अयं च कतरो यः खल्वस्यैव

नीलनीरजदलोज्ज्वलकान्ते-
रन्तिके स्फुरति काञ्चनगौरः ।
लोचनस्य सुदृशः श्रवणान्ते
सन्निविष्ट इव चम्पकगुच्छः ॥

विश्वामित्रः । नाम्ना तावद्रामलक्ष्मणावेतौ ।

जनकः । अहो कर्णामृतम् ।

शतानन्दः । निर्वर्ण्य भगवन्

एतयोरहमुदाररूपयो-
र्वल्लसत्सहजसौहृदश्रियोः ।

Digitized by Google

कामपि स्वजनतां विभावये
कौस्तुभामृतमयूखयोरिव ॥

जनकः ।

एतयोः प्रकृतिरम्यरूपयो-
रुल्लसत्सहजसौहृदश्रियोः ।
आन्तरः स्फुरति कोऽपि सन्निधिः
प्रत्यगात्मपरमात्मनोरिव ॥

विश्वामित्रः । अयि योगीश्वरशिष्येदृशेषु गभीरेष्वभिनवो-दन्तपीयूषवेशन्तेषु भवत एव मनो निमज्जति स्वजनभावे पुन-रनयोर्वयमपि साक्षिणः ।

जनकः । तत् किं भ्रातरावेतौ ।

विश्वामित्रः । अथ किम् ।

जनकः । सहर्षं निर्वर्ण्य

तनुश्रिया निर्जितचम्पकोत्पलौ
सुवर्णनीलोत्पलकोशकोमलौ ।
अहो दृशामुत्सवदानदक्षिणौ
सुलक्षणौ लक्ष्मणलक्ष्मणाग्रजौ ॥

पुना रामं विलोक्य । सकौतुकं भगवन् किमेतत् ।

यथाहं निःसीमोत्सवसुभगभोगे भवकथा-
पथातीते चेतःप्रणयिनि रमे पुंसि परमे ।
तथैवास्मिन् बाले दलदमलनीलोत्पलदलो-
दरश्यामे रामे नयनपदवीमागतवति ॥

विश्वामित्रः । स्वगतम् । उचितमेतत् । न खलु सकल-लोकलोचनानन्दकरः शीतकरः । शङ्करशिरःशयालोः कलानि-धेरपरं तत्त्वम् । प्रकाशं राजर्षे स एष सौन्दर्यातिशयस्य महिमा ।

जनकः । कः पुनराभ्यां पुत्रवतां मौलिमाणिक्यमारोपितः ।

विश्वामित्रः ।

किं शीतांशुमरीचयः किमु
सुरस्रोतस्विनीवीचयः
किंवा केतकसूचयः किमथवा
चन्द्रोपलानां चयः ।
इत्थं जातकुतूहलाभिरभितः
सानन्दमालोकिता-
कान्ताभिस्त्रिदिवौकसां दिशि-
दिशि क्रीडन्ति यत्कीर्तयः ॥

रामः । वत्स नूनमयं सकलगुणावदातस्तातः प्रस्तूयते ।

लक्ष्मणः । अपि नाम भूयोऽपि प्रस्तोष्यते ।

विश्वामित्रः । अपिच

यस्योद्यद्भुजदण्डचण्डिमचलत्कोदण्डलीलायिते-
र्निष्पीते दनुजेन्द्रचन्द्रवदनाभ्रूवल्लरीविभ्रमे ।
लक्ष्मीमत्खविपाटलक्षतमयीमालम्बते केवलं
पौलोमीकरजाङ्कुरव्यतिकरादाखण्डलीयं वपुः ॥

अपिच

तस्य पद्मवनबान्धववंशो-
त्तंसमांसलमहामणिमौलेः ।
कायकान्तिपरिभूतमनोज्ञौ
ताविमौ दशरथस्य कुमारौ ॥

जनकः । सहर्षम्

यद्बाहू वहतः पराक्रमभृतां प्रत्यर्थिसीमन्तिनी-
चक्षुःकज्जलकालिकामिव धनुर्मौर्वीकिणश्यामिकाम् ।
यद्दोर्दुर्मदकर्मकार्मुकगुणप्रोत्तालकोलाहलै-
र्वैरिस्त्रीकलमेखलाकलकलाः पीता इवास्तं गताः ॥

अपिच

यस्येन्द्रारिजयश्रिया सह झगित्याकृष्य मौर्वीलतां
साकं भ्रूवलयेन चापवलयं दोर्मण्डले बिभ्रति ।
पौलोमीकुचकुम्भसीमनि मुहुः पश्यन् नखाङ्कं नवं
धत्ते चेतसि केवलं ननु करे कोदण्डमाखण्डलः ॥

तपनकुलशिरःकिरीटकोटि-
स्फुरदरुणोत्पलकुड्मलस्य * तस्य ।
दशरथनृपतेरिमौ मृगाङ्क-
प्रतिमसुरेखमुखाम्बुजौ तनूजौ ॥

विश्वामित्रः । अथ किम् ।

जनकः । अहो धन्यता दशरथस्य यस्य द्वे अपि तनयाव-लोकनशीतले दृशौ ।

शतानन्दः । दिशौ च ।

विश्वामित्रः । ननु दिश इति वक्तव्यम् ।

शतानन्दः । तत् किमन्यावपि कुमारौ दशरथस्याङ्कं भूषयतः ।

विश्वामित्रः । अथ किम् । यौ खलु भरतशत्रुघ्नौ प्रतिबि-म्बाविव रामलक्ष्मणयोः ।

शतानन्दः । नूनममी चण्डशङ्करभागानां विलासाः ।

जनकः । दशरथभागधेयानां च ।

विश्वामित्रः । एवमेतत् । अवधिः खलु भाग्यवतां राजा दशरथः ।

जनकः । महात्मवतां च ।

---

* एतेन पूर्वं राजकिरीटकोटिष्विन्दुविकास्यरुणोत्पलनिवेशनस्य सं-प्रदाय आसीदिति स्फुटं प्रतीयते ।

विश्वामित्रः । तत् किमस्माभिरुच्यतां । भवतोर्महिम्नि भवन्तावेव साक्षिणौ ।

जनकः । कतरोऽहं दशरथस्य महिमाभोगमनुभवितुं कासार इव सागरस्य ।

विश्वामित्रः । शोभन्त एव विनयमधुराणामधरीकृतात्ममहिमानः कामं सत्यविधुरा अपि वाचः । अथवा समुचितमेवैतत् । यतः

अजनिवान् दशरथः स हि राजा
राममिन्दुमिव सुन्दरमूर्तिम् * ।
लोकलोचनविगाहनशीलां
त्वं पुनः कुमुदिनीमिव सीताम् † ॥

लक्ष्मणः । अपवार्य आर्येन्दुकुमुदिनीदृष्टान्तेन किमपि संविधानं सूचितं भगवता ।

रामः । सप्रणयकोपम् । अलमलीकालापितया ।

जनकः । स्वगतम् । कथमनया भङ्ग्या किमपि सूचितं मुनिना तत् किमनेन रभसवशंवदेन विस्मृतमेव शाम्भवं धनुः । प्रकाशम् । भगवद्वचनेन भगवतो वक्रकमनीयेन वाग्विलासेन द्वितीयेनेव हरकार्मुकेण किमपि कौतुकितोऽस्मि ।

विश्वामित्रः । स्वगतम् । कथमनया परिपाट्या हरचापारोपणमुद्भावयति । भवतु प्रकाशम् । राजर्षे साधु स्मारितोऽस्म्यतीव मे कौतुकं वृषभकेतुकार्मुकावलोकने । तेन तदानयनायादिश्यन्तां पुरुषाः । अथवा किमन्यै रामभद्र एवादिश्यताम् ।

जनकः । सविस्मयम् । भगवन् कथं मुग्ध इव दुग्धमुखमपि राममिन्दुकिरीटकार्मुकानयनार्थमादिशसि । न जानासि किम्

एतत् तद् दुर्विगाहं तुहिनगिरिमयं कार्मुकं यत्र जज्ञे
मौर्वी दर्वीकराणां पतिरुदधिसुतानायकः सायकश्च ।
दोर्दण्डैश्चन्द्रमौलेर्नतमपि यदभूद्व्रतं कार्मुकाणां
काष्ठाम्भोवृष्टये च त्रिपुरमृगदृशामैशमप्यैन्द्रमासीत् ॥

विश्वामित्रः । जानामि ।

सेवायातसमस्तखेचरकरक्रीडाचलच्चामर-
श्रेणीमारुतपानपीननिबिडज्यापन्नगाकर्षिणा ।
गाढाकुञ्चनजृम्भमाणतुहिनस्यन्दैर्यदीयैः श्रमः
संत्यक्तः पुरवैरिणाऽपि तदिदं शैलेन्द्रसारं धनुः ॥

* गात्रमिति पाठान्तरम् ।

† भगवान् त्रिकालदर्शी विश्वामित्रः श्रीरामचन्द्रसीतयोर्भाविविवाहं मनसि कृत्वैव समुचितमिदं दशरथमाहात्म्योत्कीर्तनं जनकस्येति दृढीकुर्वन् इमं श्लोकमभिजगौ । यतो वरवधूपक्षयोर्वरपक्ष एव श्रेष्ठ इतीदानीमपि लोके प्रसिद्धिः ।

जनकः । तत् कथमस्यानयनाय रामायादिशसि ।

विश्वामित्रः । न केवलमानयनाय किन्त्वानमनाय । रामं प्रति वत्स बध्यतां परिकरः इदं च

मारीचमारीचतुरं सुबाहोरपवारणम् ।
न्यस्यन्तां लक्ष्मणकरे ताटकाताडनं धनुः ॥

जनकः । कथमसम्भावनीयमेवोद्भावयसि ।

विश्वामित्रः । कथमिदं न विदितं ते । अनेन हि

प्राप्यचापनिगमानितः क्रमात्
संप्रताप्य विशिखैर्निशाचरान् ।
अस्मदीयमखरक्षणक्रिया-
दक्षतैव * गुरुदक्षिणीकृता ॥

जनकः । विमृश्य निश्वस्य च भगवन् अस्त्येतत् किन्तु

मारीचमुख्यरजनीचरचक्रचूडा-
चञ्चन्मरीचिचयचुम्बितपादपीठः ।
अत्राभवद्विफलबाहुबलावलेपो
वीरः कचाङ्कमुकुटाचलचालनोऽपि ॥

विश्वामित्रः । किमेतावता । नन्वतएव राममादिशामि । रामं प्रति वत्सोत्तिष्ठ कुमुदिनीकान्तकलाकिरीटकार्मुकारोपणप्रवीणतया संप्रीणयास्मान् ।

जनकः । स्वगतं ।

यस्य ख्याता जगति सकले निस्तमिस्रा तपश्री-
र्मिथ्योत्कण्ठः कथमिह भवेदेव गाधेस्तनूजः ।
बालो रामः किमपि गहनं कार्मुकं चन्द्रमौले-
र्दोलारोहं कलयति मुहुस्तेन मे चित्तवृत्तिः ॥

पुनः पृथिवीमालोक्य ।

रतिरिव जननेत्रानन्दिनी नन्दिनी ते
कुसुमशर इवायं रूपसारः कुमारः ।
यदि तु धनुरपीदं प्राप्तमेतस्य हस्तं
कुसुममयमिव स्यात्सम्भृतः सम्प्रदायः ॥

शतानन्दः । राजर्षे किमेतन् मूढ इव मुहुर्मुहुरालोकसे । अनुवर्तस्व महर्षेर्वचनम् ।

जनकः । प्रकाशम् । अनुवृत्तमेव । रामं प्रति वत्सानुष्ठीयतां गुरुवचनम् ।

रामः । उत्थाय परिकरं बध्नाति ।

प्रविश्य प्रतीहारी । जेदु जेदु देवो कोवि बम्हणो देवस्स दंसणत्थी दुआरदेसम्मि चिट्ठदि ता किं पवेसीअदु † ।

* दक्षिणेनेति पाठान्तरम् ।

† जयतु जयतु देवः कोऽपि ब्राह्मणो देवस्य दर्शनार्थी द्वारदेशे तिष्ठति तत् किं प्रवेश्यताम् ।

जनकः । आः इदमपि किं जनकः प्रष्टव्यः ।

प्रतीहारी । तथेति निर्गत्य तेन सह प्रविशति ।

जनकः । ब्रह्मन् प्रणम्यसे ।

मुनिः । राजन् सुमतिर्भूयाः ।

जनकः । स्वगतम् । अन्यादृशीयमाशीःपरिपाटी । भवतु प्रकाशं मुने इहास्यताम् ।

मुनिः । संदेशहरः खल्वस्मि ।

जनकः । कस्यायं कीदृशो वा संदेशः ।

मुनिः ।

पीत्वा कज्जलकालिमानमखिलं क्ष्मापालनारीदृशां
नीत्वा स्फीतयशोदृहासमहसा लोकत्रयं शुभ्रताम् ।
चण्डीशं चरितैरनेकविभवैरद्यापि यः सेवते
हे वैदेह स जामदग्न्यपरशुस्त्वामेतदाभाषते ॥

जनकः । स्वगतम् । अहो गर्वाङ्कुरस्य वक्रता । भवतु प्रकाशं किं तत् ।

मुनिः ।

कस्मैचिद् देहि कन्यां नर-
पतिशिशवे दीर्घमायुर्लभस्व
व्यावर्तस्वाप्रियाद्वः पुरमथन-
धनुःकर्षणालापपापात् ।
नोचेदन्योऽस्त्युपायस्तव-
कलुषमषीपङ्कसंक्षालनाया-
मस्मद्दुस्तारिधाराज्वलव-
हलपयःपूरदूरावगाहः ॥

जनकः । विहस्य । तन् मयापि प्रतिसंदेशः कथनीयस्तस्य ।

मुनिः । कीदृशोऽसौ ।

जनकः ।

त्वं मित्रं मम जामदग्न्यपरशो तेनैतदाभाष्यसे
सम्प्रत्येव यथाप्रतिश्रुतमियं कन्या मया दीयते ।
तेनेह स्वयमेत्य धूर्जटिधनुर्धारेयदोःसम्पदो
जामातुः पुरतश्चिराय भवता धाराजलं त्यज्यताम् ॥

मुनिः । तथास्त्विति निष्क्रान्तः ।

जनकः । आङ्गिरसोपचितप्रस्तावदयं जामदग्न्येन निजको-पानलस्फुलिङ्गः ।

शतानन्दः । किमेतावता । अतिगम्भीरभुजसारकासारकेरवारामः खलु रामः ।

विश्वामित्रः । राजर्षे के पुनरमी परितः स्फुरन्मणिमौलयः परःसहस्रा दृश्यन्ते ।

जनकः ।

श्रीकण्ठकार्मुकनिरस्तभुजावलेपा
नानादिगन्तजगतीपतयः किलामी ।
अभ्यर्थनां मम किमप्यभिवर्तमाना
गृह्णन्ति कानिचिदहानि नरेन्द्रपूजाम् ॥

विश्वामित्रः । वत्स रामभद्र तदेषामेव पश्यतां कौतुकमस्माकं पूरय ।

रामः । विश्वामित्रं प्रणम्य निष्क्रान्तः ।

जनकः । आङ्गिरसापरिशीलितसंनिवेशस्य वत्सरामस्य भवता प्रत्यनन्तरीभूयताम् । आदिश्यतां कञ्चुकी च करकलितकमलमालाया जानक्याः स्वयम्वराङ्गणावतरणाय ।

शतानन्दः । तथास्त्विति निष्क्रान्तः ।

प्रविश्य कञ्चुकी । जयतु देवोऽनुष्ठित एव देवादेशः ।

विश्वामित्रः । विलोक्य सहर्षम् । आः कथमुद्गतमेव रामचन्द्रयशःपताकाकेतुदण्डेन * हरकोदण्डेन । पुनः सविस्मयम् । अये

राघवेण शिशुनापि किलायं
लीलयैव नमितो हरचापः ।
दूरमुल्लसति यस्य समन्ता-
दम्बरेऽपि गमितो गुणघोषः ॥

लक्ष्मणः । भगवन् एवमेतत् । तथाहि

पूर्णा एव पुरारिचापकपटक्ष्माचलग्रामणी-
गूढानेकगुहागभीरकुहरस्फारप्रतिध्वानिभिः ।
मौर्वीभूतभुजङ्गराजवदनश्रेणीविसर्पद्वचः-
प्रारब्धार्ययशःप्रशस्तिसदृशैर्ज्याघातघोषैर्दिशः ॥

जनकः । आः किमुच्यते दिशः पूर्णा इति । ननु
एतैः श्रीकण्ठकोदण्डचञ्चन्मौर्वीभवै रवैः ।
चिरात् प्रतिज्ञया साकं पूर्णा मम मनोरथः ॥

प्रतीहारी । कञ्चुकिनं प्रति । अज्ज पेक्खपेक्ख कोदूहलं । सीदारामेहिं मिलिअ उण हरचावारोवणं समणी-करीअदि † ।

कञ्चुकी । सकौतुकं कथमिव । विमृश्य विहस्य च । आ ज्ञातम् ।

करकिसलयलीलाचारु चण्डीशचापे
दशरथतनयेन स्वैरमाकृष्यमाणे ।
रससरसविकासी सीतया पुङ्खितोऽसौ
कुवलयदलदामश्यामकान्तिः कटाक्षः ॥

---

* केतुमण्डलेनेति पाठान्तरम् ।

† आर्य पश्यपश्य कौतुकं सीतारामाभ्यां मिलित्वा हरचापारोपणं समणीक्रियते ।

लक्ष्मणः । भगवन् अत्यद्भुतं वर्तते । नन्वयम्

भिन्दन् निद्रां मुरारेः सकल-
भुजभृतां ग्लानयन् शौर्यदर्पं
छिन्दन् दिक्कुम्भिकर्णाञ्चलचल-
नकलां कम्पयन् कूर्मराजम् ।
आर्यश्लाघागभीरः प्रलय-
जलधरध्वानधिक्कारधीर-
ष्टाङ्कारः कृष्यमाणत्रिपुर-
हरधनुर्भङ्गभूराविरस्ति ॥

प्रतीहारी ।

तेल्लोक्कं लङ्घअन्तो गिरिगहिरगुहा*सुत्तजग्गन्तसीह-
प्फारुम्मिल्लन्तकण्ठत्थणिदपडिरवुग्गारपूरिज्जमाणे ।
बह्मण्डे भज्जमाणे कडुविडअकडक्कारपब्भारभीमो
अम्मो भज्जन्तचण्डीसरधणुहटणक्कारओ उग्गमेद् †

कञ्चुकी । पश्य कौतुकम् ।

क्रीडाभग्नमृगाङ्कमौलिधनुषं सीतार्पितां वचसा
बिभ्राणं कमलस्रजं निजगृहं शृङ्गारवीरश्रियोः ।
रामं व्रीडवशादवाञ्चितमुखं भूमीभुजां पश्यतां
चेतः क्रोधविषादविस्मयमुदामूर्मीः समालिङ्गति ॥

प्रविश्य शतानन्दः । राजर्षे विषीद वा प्रसीद वा इदं यथादृष्टमुपवर्ण्यते ।

ज्यावल्लीं ललिताङ्गुलीकिसलयैराकर्णमाकर्षतो
न भ्रूभङ्गुरतां गता रघुशिशोर्भग्नं धनुर्धूर्जटेः ।
नाहङ्कारतरङ्गितो ध्वनिरभूत् कण्ठेऽस्य दीर्घद्रुघ-
ष्टाङ्कारस्तु चकार तारतरलः शब्दाद्वितीयं जगत् ॥

जनकः । कथं पुनरेतावतीमतिभूमिमवगाहमानोऽपि वत्सो रामभद्रो भवता न निवारितः ।

शतानन्दः । कथंकारं वारयामः ।

यावत् कन्दुकलाञ्छनाञ्चितकरः शोणाब्जनालाकृतिः
कौशल्यार्पितमङ्गलप्रतिसरो वत्सस्य दोःकन्दलः ।
किञ्चिच् चञ्चति तावदेव हि दलच्चण्डीशचापोच्छल-
च्छब्दैकार्णवमग्नमेतदखिलं जातं त्रिलोकीतलम् ॥

जनकः । तदलं कालातिपातेन याच्यतामनुमतिर्भगवतो विश्वामित्रस्य जानकीरामभद्रयोः पाणिसंघट्टनाय ।

शतानन्दः ।

सद्यो * विघट्टमानेन धनुषैव पिनाकिनः ।
ननु संघट्टितौ पाणी जानकीरामभद्रयोः ॥

तद् ऊर्मिलालक्ष्मणयोरेव पाणिसंघट्टनाय भगवानभ्यर्थनीयः ।

विश्वामित्रः । विहस्य । अस्त्वेतत् परन्तु

पाणीन् जनककन्यानां पीडयद्भिः सहानुजैः ।
सीताया रामभद्रो मे पाणिपीडन † मिच्छति ॥

जनकः । सहर्षम् । कथं माण्डवीश्रुतकीर्तिभ्यां भरतशत्रुघ्नयोरपि परिणयमनुसंधत्ते भगवान् ।

विश्वामित्रः । अथ किम् ।

जनकः । तद् गृहीतमिदमधिशेखरमाज्ञाकुसुमं भगवतस्तदागच्छत ममीहितं निष्पादयामः ॥ इति निष्क्रान्ताः सर्वे ॥

॥ तृतीयोऽङ्कः ॥

* गुहासुत्तगज्जन्त इति पाठान्तरम्

† त्रैलोक्यं लङ्घयन् गिरिगभीरगुहासुप्तजाग्रत्सिंहस्फारोन्मीलत्कण्ठस्तनितप्रतिरवोद्गारपूर्यमाणे । ब्रह्माण्डे भज्यमाने बहुविकटकटत्कारप्राग्भारभीमः अहो भज्यच्चण्डीश्वरधनुष्टणत्कार उद्गच्छति ।

* सम्यक्संघट्टमानेनेत्यपि पाठान्तरम् ।

† पाणिग्रहणमित्यपि पाठान्तरम् ।

THE SA'HITYA-DARPAṆA,

OR

MIRROR OF COMPOSITION.

(*Continued from page 160.*)

TEXT.

No. 718. When there is an apparent incongruity between a genus and *any of* the four beginning with genus (i e. genus, quality, action and substance); between a quality and *any of* the three beginning with quality; between an action and another action or a substance; or between two substances—it is Contradiction, *occurring* in *these* ten forms.

COMMENTARY.

a. For examples in their order :—

"Separated from thee, the wind of the Malaya mountain is to her a conflagration; the beams of the moon are impregnated with heat; even the hum of the bee pierces her heart; even the lotus-leaf is to her the summer sun."

b. "O king, the hands of the wives of the Twice-born (Bráhmans) hardened by the constant rub of the pestle and by manifold household work are, whilst thou reignest, soft like the lake-born flower (lotus)."*

c. "Though Self-existent, yet Thou art born, though devoid of passion, Thou destroyest thy foes (the Demons), though in Thy *deepest* sleep, Thou art awake—is there the being who knows Thee in truth?"

* The Miltonic representation of the Deity "Dark with excessive light" should, perhaps, be ranked under this variety of the figure, i. e. the Contradiction of Qualities.

Digitized by Google

d. "To the deer-eyed lady, separated as she was from the lap of her beloved, the Lord of Night (moon), in his complete glory, was full of burning poison."

e. "O! this form, ecstatic to my eyes but hard to obtain even through imagination,—O! the one with drunken eyes gladdens my heart yet torments it."

f. "Śiva, afraid of the immense weight," &c.

g. In the stanza beginning "To the deer-eyed lady,' if, in the fourth line, *instead of 'full of burning poison,'* we read 'the mid-day sun,' we shall have the Contradiction of Substances.

h. In the example beginning 'Separated from thee,—' 'the wind' &c., which, as denoting many individuals, are generic terms, seem, at first sight, to contradict 'a conflagration,' 'heat,' 'piercing the heart' and 'the sun,' which, respectively, signify a genus, a quality, an action and a substance. The apparent contradiction is explained by the fact that the state of things was caused by separation.

i. In the example beginning 'Though Self-existent,—' the quality of self-existence &c. is opposed to the action of being born &c., *and the seeming contradiction* is explained by the greatness of the power of God, *who, though unborn, can manifest himself as a human being born.*

j. In the verses commencing "Śiva, afraid of the immense weight,' the contradiction may be expressed thus: Śiva himself, who ever bears the Ganges on his head, ceases to bear it &c.'; and the boldness with which poets are priviledged to speak is the explanation of it. The other *illustrations* are clear.

k. In the Peculiar Causation, an effect only, as represented without a cause, is seemingly nullified; in the Peculiar Allegation, a cause only, without an effect; and in the present figure, both the things *represented* are apparently nullified by eath other. Such is the difference.

TEXT.

No. 719. When a cause and the effect are represented as locally separated, it is Disconnection.

COMMENTARY.

a. For example :—

"She is a girl, but it is our minds that want manly boldness; she is a woman, but it is we that are timid; she bears a couple of plump and lofty breasts, but it is we that are oppressed; she is charged with the weight of fleshy thighs, but it is we that are unable to move—marvellous it is that the faults belonging to another have deprived us of power."

b. This figure being counted as an exception, the ornament of Contradiction (§718) is left to rest in the mutual inconsistency of two things residing in the same place.

TEXT.

No. 720. When the *respective* qualities or actions of a cause and its effect are opposed to each other; or when an endeavour becomes fruitless and brings an evil result; or when there is an association of two incongruous things—it is held Incongruity.

COMMENTARY.

a. For examples in their order :—

"His sword, wonderful to say, dark as it is like the Tamála tree, in every battle, having obtained contact with his hand, engenders, at the very moment, a fame white as the autumnal moon, glorifying the triple world!"

Here, we have white fame arising from the dark sword, figured as the cause,—in opposition to the rule or theory that the qualities of the effect conform to those of the cause.

b. "O thou with eyes like the blue lotus-leaf, how ecstatic is the joy thou givest, yet Separation which has its origin in thyself—how fiercely it burns my frame!"

Here we have burning Separation originating in a joy-existing cause, *viz.*, a woman.

c. "A store-house, as it is, of treasures, I resorted to this ocean, eager to obtain riches. But far from obtaining riches, I had my mouth filled with salt-water."

Here, not only is the desired wealth not obtained, but, on the contrary, the mouth is filled with salt-water.

d. "The woods with barks of trees for ornament, and the glory of royalty admired even by Indra—how vast the disparity. Ah! how hard it is to bear the dealings of Fate, evil-disposed as he ever is."*

We have, here, the association of the woods and royal glory. The stanza is mine.

e. Or for example :—

"He, the Sleeper on the Ocean (Vishnu), whose vast belly drank up the worlds at the consummation of the ages—that Deity was drunk in by one of the fair ones of the city, with a corner of one of her eyes, languid in love!"†

TEXT.

No. 721. The Equal is the commendation of an object fitly united *with another.*

COMMENTARY.

a. For example :—

"'The moon-light has been wedded to the deer-marked luminary (moon), freed from clouds; Jahnu's daughter (Gangá) has come down to meet worthy Ocean'—such

* The commentator does not admit this as a proper example of the fourth variety of the figure, contending that Ráma, the subject of the stanza, was not a king when he went to the woods. The author, however, perhaps means to intimate that majesty was the hero's by nature, though he was not, at the time, inaugurated a king.

† Mallinátha, in commenting on this stanza (Mágha, xiii, 40), characterizes the figure as the Exceeding (see §723), and in so doing differs with the author of the Kávya-prakáśa as well as with that of the present work.

Digitized by Google

were the words—harsh to the ear of the other monarchs—that the citizens, with one voice, spoke, glad at the union of that couple of equal worth."

TEXT.

No. 722. The Strange is, when, for the attainment of an object, one acts contrarily *to it.*

COMMENTARY.

a. For example:—

"For the purpose of being elevated, he bows down; for the sake of his life, he parts with it altogether; for the sake of happiness, he subjects himself to misery—who is there a greater fool than the servant?"

TEXT.

No. 723. When of the container and the contained, one is represented as vaster than the other, it is termed the Exceeding.

COMMENTARY.

a. The case when the Container is vaster; as:—

"How shall we better describe the vastness of the Ocean than by saying that Vishṇu sleeps upon him obscure, having thrown the worlds into his belly."

The case when the Contained is vaster; as:—

b. "The Foe of Kaiṭabha (Vishṇu) could not contain within himself the flood of joy caused by the advent of the holy saint—He in whose *divine* person the worlds did freely abide, when, at the consummation of a cosmic cycle, He had withdrawn within Himself all the created souls."

TEXT.

No. 724. The Reciprocal is when two things do the same act to each other.

COMMENTARY.

a. For example:—

"She of the slender frame is graced by thee and thou art graced by her: The night gives glory to the moon and the moon lends lustre to the night."

TEXT.

No. 725. When something that depends on another is represented as existing without it; or when one object is spoken of as being present in many places simultaneously; or when somebody, in doing an act, unexpectedly does another act, either unconnected with the subject, or otherwise; it is the Extraordinary, and is thus three-fold.

COMMENTARY.

a. For examples in their order:—

"Who would not glorify the poets, whose discourse—though they have gone to heaven—graced with infinite beauties—delights the world, generation after generation, until the end of creation?"

b. "In the forest, by the river's side, in the mountain cave,—*every where* do thy foemen see thee standing in front, terrible like Death!"

c. "Wife, minister, confident, beloved disciple in the charming arts,—say, what has not merciless Death deprived me of, in depriving me of thee?" *Raghuvanśa.*

TEXT.

No. 726. The Frustration is when by the same means that one employed in bringing a thing to a particular state, another brings it to an opposite state.

COMMENTARY.

a. For example, the stanza beginning 'Them, who with a look.'* (§ 636 *a.*)

TEXT.

No. 727. Or when the contrary of a certain act is justified *by the same reason,* with facility.

COMMENTARY.

a. *Supply* 'It is the same Frustration.'

b. *For example:*—

"'Stay here, my love; after but a few days I shall speed to be here again—*stay here,* for thou art tender and canst not bear toil.'—'Tenderness, fair youth, is rather a reason for my going with thee, for tender, as I am, I shall not endure the terrible pangs of separation'."

Here, the hero mentions the tenderness of the heroine as a reason against her accompanying him, and the heroine, on the other hand, makes it, with still more facility, a reason for the same.

TEXT.

No. 728. When something mentioned first is spoken of as the cause of what follows, and this again of what comes next, and so on, it is the Garland of Causes.

COMMENTARY.

a. For example:—

"Knowledge is acquired from association with the learned; meekness from knowledge; the affection of the people from meekness; and what *is it that is* not *obtainable* from the affection of the people?"

TEXT.

No. 729. The Serial Illuminator, again, is when a number of objects is, in succession, connected with the same attribute.

COMMENTARY.

a. For example:—

"When thou didst come to fight, the bow obtained the arrows; the arrows, the foeman's head; the foeman's head, the earth; she again, thee; and thou, *immortal* fame."

Here the action of obtaining is the attribute.

TEXT.

No. 730. When what is mentioned first is qualified, (1) affirmatively, or (2) negatively, by what follows and this again by what comes next, and so on, it is the Necklace, and is thus two-fold.

* "Them, who, with a look, recall to life the Mind-born God, who was burnt by a look—we glorify the fair-eyed *women,* the conquerors of the Fierce-eyed Divinity (Śiva)."

COMMENTARY.

a. For examples in their order:—

"—When (in Autumn) the lake *is adorned* with the expanded lotus, and the lotus *is* associated with the bee, the bee *is perpetually* humming and the humming is attended with the excitement of love."

b. "There was not a lake that was not graced with fair lotuses, there was not a lotus in which there reposed not a bee, there was not a bee which hummed not melodiously, there was not a hum that ravished not the heart."

c. Sometimes the qualified, too, is found successively to be affirmed or denied as qualification;* as—

"The lakes are pure, the lotuses bloom in the lakes, the bees fly to the lotuses, the musical hum is now uttered by the bees."

So also in the case of a denial.

TEXT.

No. 731. A succession of things, gradually rising in excellence, is termed the Climax (sára).

COMMENTARY.

a. For example:—

"The most important thing in the requisites of royalty is a kingdom; in a kingdom, a capital; in a capital, a palace"—&c.

TEXT.

No. 732. The Relative Order is when a reference is made respectively to what have been mentioned.

COMMENTARY.

a. For example:—

"'They bloom': 'Pluck them with thy nails.' 'It blows': 'Hedge it with the skirts of thy garment.' 'They enter the garden': 'Scare them away with the tinkling of thy bracelets.'—thus, fortunate youth, do the female friends of thy love separated from thee, talk to each other by hints, touching the *vanjula* flowers, the southern breeze and the *kokila*."

TEXT.

No. 733. When the same object (1) is, or (2) is made to be, in many places, in succession; or when many objects (3) are, or (4) are made to be, in the same place, in succession,—it is termed the Sequence *(paryáya)*.

COMMENTARY.

a. For examples in their order:—

"Reposing for a moment on the *thick* eye-lashes, striking the *delicate* lips, split by the fall upon the breasts, rolling down the dimples in the skin—thus gradually did the first rain-drops reach the navel of Umá."

b. "Wolves, crows and jackals run in thy foeman's city, where walked gay women once, languid with the weight of hips."

c. "That hand, the fingers of which were cut by the handling of the *sharp-edged* sprouts of the sacred grass (kuśa), she made a friend to the rosary—kept off from the under-lip which she had ceased to colour, *kept off* from the play-ball reddened by the unguent of her breasts."

d. "Thy foemen's wives now let fall thick drops of tears on those breasts where rolled the pure pearl-necklace."

e. In these varieties, the Place or Places is either one or are several, and so also the Placed. To illustrate. In the stanza beginning 'Reposing for a moment,' the rain-drops are gradually in the places—eye-lashes &c.—which are several. In the example commencing 'Wolves, crows and jackals,' the 'wolves' &c., the placed, were successively in the foeman's city, which is one place. So of the rest.

f. Since in the present figure one object is *represented to be* in many places only in consecution, it is distinct from the Extraordinary (§725); and it is different from the Return (§734), because of the absence of an exchange.

(To be continued.)

* The reader will observe that the term 'qualified' (विशेष्य) is here used in the sense of *subject* and 'qualification' to denote a member of the predicate.

THE MESSENGER CLOUD.

I

Dark are the shadows of the trees that wave
Their pendent branches upon Rama's Hill,
Veiling the stream where Sita loved to lave
Sweet limbs that hallowed as they touched the rill:
There a sad Spirit, whom his master's will,
Wroth for a service he had rendered ill,
An exile from his happy home had torn,
Was sternly doomed for twelve long months to mourn
Of all his glories reft, of his dear love forlorn.

II

Some weary days, intolerably slow,
The listless exile all alone had passed:
The bracelet clung not to the arm that woe
Had withered, and the weeping and the fast;
When on a day of June he upward cast
His aching eyes, lo! on the mountain lay
A glorious cloud embracing it, as vast
As some huge elephant that stoops in play
To trample down the bank that bars his onward way.

III

Once and again his wistful eyes he raised,
Checking the tear-drop in her secret springs,
And on the jasmine's sweet restorer gazed
The mournful servant of the King of Kings—
Mournful, for if the first seen rain-cloud brings
Trouble and doubt to him whose arms are pressed

Digitized by Google

Around his love, O, judge what torture wrings
His bosom far from her he loves the best,
A prey to longing love and fear and wild unrest.

IV

Then cheered by hope he culled each budding spray,
And the last blooms that lingered in the brake,
And hastened humbly to the Cloud to pray
With offerings, trusting for his darling's sake,
While, welcome, friendship's sweetest word he spake,
That he would waft his message, as a spell
Whence life and comfort the lone girl might take,
That he would calm her troubled heart and tell
That were she only present all with him were well.

V

Blame not the Spirit, if his wild despair
Urged his love-laden bosom to complain
To the dark Child of vapour, sun, and air :
Have ye ne'er learnt that hopeless love is fain
To shriek the lamentation, wrung by pain,
In nature's senseless ear ; to weep and moan
To valley and to mountain, and to rain
Tears on the flowers and call on stock and stone
To suffer with his woe and echo groan for groan ?

VI

"O thou of ever-changing form," he cried,
"I know thee, offspring of a glorious race,
The mighty counsellor : close by the side
Of royal Indra is thine honoured place.
By cruel fate torn from my love's embrace
I fly to thee for comfort in my woe :
Better to sue and be denied the grace
By one of gentle blood whose worth we know,
Than stoop to bear away rich guerdon from the low.

VII

Dear friend of all whom flames of anguish burn,
If thou hast power and pity, as of old,
On me, on me, thy tender glances turn,
Who mourn the anger of the God of Gold ;
To distant Alaká fly uncontrolled,
Where dwell my brethren in their stately halls,
There let my message to my love be told
Mid gilded palaces and marble walls
On which the silver light of Śiva's crescent falls.

VIII

Hence as thou mountest up, each lonely wife,
Tossing her tresses from her brow in glee
And drinking from the sight rapture and life,
Thy rapid course through realms of air shall see,
And whisper blessings as she looks on thee ;
For who at such a warning would not brave
Danger and death and to his darling flee,
Save the sad captive in his fetters, save
A prisoned wretch like me, a tyrant's helpless slave !

IX

As favouring gales thy airy course impel
The tuneful Rain-birds shall thy way attend,
A pomp of wreathing cranes thy state shall swell,
On silver pinions rustling round their friend ;
From many a stream shall lordly swans ascend,
When the glad thunder of thy voice they hear,
And wild with joy their eager course shall bend
To Mánas mountain lake, still following near
Till high Kailása's peaks, thy journey's end, appear.

X

Now with one brief adieu, one last embrace,
Turn from this steep, thine ancient friend, away,
Where Ráma's blessed feet once left their trace,
Though his hot tears will mourn thy shortened stay :
Yet, ere the message of my love I say,
Hear the long journey, mark each place of rest
Where thou wilt fain with weary wings delay
To gather strength upon some mountain crest,
Or drink exhausted from some gentle river's breast.

XI

Quick from this mountain, moist with verdure, rise,
And turn thee northward : in thy lofty flight
The Nymphs of air with eager upturned eyes
Shall look on thee in wonder and delight
And deem some hill rent from the mountain height
Rides on the furious blast. Then, sad with shame,
The warder elephants, whose peerless might
Upholds the skies, shall mourn their vanisht fame,
And, far surpassed by thee, renounce their ancient claim.

XII

Then steering east, yon glorious gems that blend
Their light and shade in Indra's heavenly bow
To thy dark ground a softened light shall lend,
And make thee glorious with a borrowed glow ;
As the gay splendours of the peacock throw
New beauty, round the youthful Krishna spread.
Then to the plains of fruitful Mála go
Whose bright-eyed maids, with fond looks upward sped,
Shall bless their bounteous friend slow sailing overhead.

XIII

Thence northward speeding, with a lighter course,
Turn to the west, and, floating downward, seek,
A pleasant shelter to recruit thy force,
The shady summits of the Mango Peak.
He will relieve thee travel-worn and weak ;
Thy timely aid that oft has quencht the flame
That burnt his trees will in thy favour speak.
Friendship's sweet debt not e'en the base disclaim,
And far from noble souls be such disgrace and shame.

XIV

When thy dark glory rests above the gold
Of fruit, and green of boughs that wave around,
The maids of Heaven with rapture shall behold

Digitized by Google

New beauty stealing o'er the summit crowned
As with the tresses of a woman bound
Upon her fair head as a diadem.
And the bright mountain, swelling from the ground,
Like the full breast of Earth, shall ravish them,
When thou, dark Cloud, art there, that bosom's bud and gem.

XV

If worn and weary with thy lengthening way,
The famous hill of Chitrakúta woos
Thy friendly presence for a while to stay;
There, as the grateful rest thy strength renews,
Do not, for pity, gentle Cloud, refuse
To soothe his burning heat with thy soft rain.
Sweet mercy, watered with the kindly dews
Of virtue, is a seed ne'er sown in vain:
Soon will the generous act its worthy fruit obtain.

XVI

Linger an hour, then, launching lightly forth,
Leave the dark glades which Wood-nymphs wander o'er;
Pursue thine airy journey to the north
With pinions swifter for thy minisht store.
Soon over Vindhya's mountains wilt thou soar,
And Reva's rippling stream whose waters glide
Beneath their feet, without their rush and roar,
In many a rock-barred channel, summer-dried,
Like lines of paint that deck an elephant's huge side.

XVII

Here, where the air is heavy with the scent
Of elephants that roam along the rill,
From the fair stream restore thy treasures spent
[illegible] ill,
Lest the rude wind drive thee about at will.
To cheer thy way, each bud shall lovelier grow,
And fragrant jasmine be more fragrant still,
The burning woods waft odours from below,
And clear-toned birds delight thy onward path to show.

XVIII

Each Sylph shall watch thee with observant eyes,
And mark the Rain-birds eager for the rain
Flocking to meet thee from the distant skies.
Then he will count, in ever lengthening chain,
Mounting from fen and field, crane after crane,
And, when thy voice of thunder, loud and clear,
Proclaims thee nigh, to his fond breast will strain
His darling, mingling with each kiss a tear
Drawn from his happy eyes by love's unreasoning fear.

XIX

Ah me! in vain, 'mid lovely scenes like those,
I bid my friendly herald to be fleet;
Will not each mountain woo thee to repose,
Where wild woods murmur and the flowers are sweet?
Will not the peacock, as he turns to greet
Thy coming with love-beaming eye, prevail?
Will not his tender looks my hopes defeat,
With too successful blandishment assail
Thy yielding heart, and cause thy promised truth to fail?

XX

On, on, my herald! as thou sailest nigh,
A green of richer glory will invest
DAŚÁRNA's groves where the pale leaf is dry.
There shall the swans awhile their pinions rest.
Then the Rose-apple, in full beauty dressed,
Shall show her fruit: then shall the crane prepare,
Warned of the coming rain, to build her nest,
And many a tender spray shall rudely tear
From the old village tree, the peasants' sacred care.

XXI

But rest not there; thy steady course pursue,
And a town foremost on the rolls of fame,
VIDIŚA, seat of kings, will charm thy view,
And bless thee far above thy fondest aim;
Where VETRAVATI, like an amorous dame
With arching brows, her rippling waves will show,
With every winning art thy love will claim,
Enslaving thee with the melodious flow
Of streams that kiss the bank, murmuring soft and low.

XXII

Thence to a lowlier hill direct thy flight,
And for a moment on its crest descend;
Thy touch its faint Kadambas shall delight,
And through each spray new life and rapture send
That bud and blossom shall with joy distend.
These are the groves where youthful lovers meet
Their gold-bought beauties, whose rich perfumes blend
With the wild flowers till every dark retreat
Is laden with the scent that fills the rocky seat.

XXIII

Rise with new vigour in thy wings, and look
Upon the fainting jasmine-buds that pine
Along the parched bank of the mountain brook:
To their mute prayer in pitying love incline,
And water them with those sweet drops of thine,
Shading awhile the heat-drop-beaded face
Of the young flower-girl as she hastes to twine
Her fragrant wreath, too languid to replace
The drooping lotus-bud she culled her ear to grace.

XXIV

Here bend a little from thy straight career,
And though thou speedest on to northern skies,
Turn and behold a wondrous sight, for near
Thy path Ougein's imperial domes arise.
Shouldst thou not see her women's glorious eyes,
That flash to love or kindle to disdain
In fire that with the lightning's splendour vies—
Those looks that bind the heart as with a chain—
Thy birth has been for nought, thy life is all in vain.

To be continued.

PRINTED AND PUBLISHED BY E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 21. Benares February 1st, 1868. Vol. II.

॥ नरेश्वरपरीक्षा ॥

एवमभ्युपगम्य प्रत्यभिज्ञानं बाधितत्वादसाधनमित्युक्तम्, अधुना तु तदेव नोपपद्यत इत्याह ।

(५५) प्रत्यक्षं प्रत्यभिज्ञानं नाक्षादुपरतादतः ।
वर्णेषु वासनाव्यक्तिः स्मरणादनुगम्यते ॥

नात्र प्रत्यभिज्ञानं प्रत्यक्षम्, अपितु तदाभास एव, यतो निर्विकल्पानन्तरत्वेन तद्विषयावसायतया तत् प्रमाणमिष्यते, यदुक्तम्,

"अस्ति ह्यालोचनं ज्ञानं प्रथमं निर्विकल्पकम् ।
बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम् ॥
ततः परं पुनर्वस्तु धर्मैर्जात्यादिभिर्यया ।
बुद्ध्यावसीयते सापि प्रत्यक्षत्वेन संमता" ॥

इति, उच्चरितप्रध्वंसित्वेन चोपलम्भात् सर्ववर्णानामिन्द्रियव्यापारोपरतौ प्रत्यभिज्ञानं भवदयमिति पुरोऽवस्थितार्थासंवेदनाच्च प्रत्यक्षार्थविषयम्, अपितु, अनुभवसंस्कारप्रबोधात्मनः स्मरणादेवोपजायमानं स एवेति परामर्शसारत्वात् प्रत्यक्षाभासमेव, यदुक्तम्,

"यदि त्वालोच्य संमील्य नेत्रे कश्चिद्विकल्पयेत् ।
न स्यात् प्रत्यक्षता तत्र संबन्धाननुसारतः" ॥

इति ॥

"स्यादेतत्, प्रत्यभिज्ञान्यथानुपपत्त्या कतिपयकालावस्थायित्वं शब्दस्य भविष्यति," इत्याह ।

(५६) कालं नचापि तावन्तं स्थैर्यं शब्दस्य संभवेत् ।
स्थैर्ये वा सर्वनित्यत्वं प्रत्यभिज्ञानदर्शनात् ॥

एवं धाराज्वालादेरपि सर्वस्य स्थैर्यकल्पनाप्रसङ्ग इति न कश्चिदनित्यः स्यात् ॥

उपसंहर्तुमाह ।

(५७) इत्थमक्षरजातस्य नित्यत्वं नोपपद्यते ।
पदतद्योगवाक्यानां दूरोत्सारितमेव तत् ॥

एवं प्रयोक्तुर्व्यञ्जकत्वासंभवनकारणत्वाद्वर्णानां तत्संयोगात्मनश्च वाक्यव्रातस्याप्यनित्यत्वं सिद्धम्, इति वेदस्य प्रामाण्यान्यथानुपपत्त्येश्वरः कर्ताभ्युपगन्तव्यः, यो बौद्धैः सर्वज्ञत्वदुःसाधतया भवद्भिर्न संमितः, ननु दोषदर्शनेनेति, यदुक्तम्,

"यदि त्वादौ जगत्स्रष्टा धर्माधर्मौ ससाधनौ ।
तथा शब्दार्थसंबन्धान् वेदान् कश्चित् प्रवर्तयेत् ॥
जगद्धिताय वेदस्य तथा किंचिच्च दुष्यति ।
सर्वज्ञवत् तु दुःसाधमिति तैस्तच्च संमितम्" ॥

इति ॥

अत्र परः ।

(५८) अस्थैर्ये पदयोगानां विज्ञातसमयं पदम् ।
नष्टमन्यदिदानीं स्यादर्थज्ञानं ततः कथम् ॥

पदानां तत्संयोगात्मनां च वाक्यानामस्थैर्ये सति विज्ञातः समयः संकेतो यस्मिन् पदे तत् पदं सुबन्तादि नष्टम्, अन्यदेवाभिनवकविविरचितमुत्पन्नम्, इति ततोऽकृतसंकेतात् तस्मादर्थज्ञानाभावप्रसङ्गः ॥

Digitized by Google

उत्तरमाह ।

(५९) सादृश्यान्ननु नान्यत्वं सारूप्येण निवार्यते ।
किं कुर्मः शब्दनित्यत्वे न यतो मानमस्ति हि ॥

शब्दानां ह्यनित्यत्वे प्रमाणसिद्धेऽर्थानामिव सामान्यनिबन्धनमर्थप्रत्यायनादि कार्यमुपपद्यत एव, सादृश्यं सामान्यमस्माकं सांख्यानामिवेत्यविरोधः ॥

अत्र पराभिप्रायः ।

(६०) अथास्मादेव नित्यत्वं शब्दानां परिकल्प्यते ।

अर्थप्रत्यायनान्यथानुपपत्त्या नित्यत्वं शब्दानामुच्यते ॥

तदयुक्तमित्याह ।

(६१) स्यात् ततोऽक्षिनिकोचादेस्तत्तुल्यत्वात् तु नित्यता ।

अनित्यानामप्यक्षिनिकोचकचाङ्कुशाभिघातादीनामर्थप्रत्यायनदृष्टेरस्यानैकान्तिकत्वात् ॥

एवमपि नेश्वरकर्तृकत्वसिद्धिरत्रेति परः ।

(६२) शास्त्रोज्झितो न कालोऽस्ति प्रलयो नोपपद्यते ।
प्रभातमपि नैवातस्तेन शास्त्रमकृत्रिमम् ॥

ब्राह्मणेन षडङ्गो वेदोऽध्येयः, गर्भाधानादिवैदिकसंस्कारसंस्कृतो ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणः, इत्यार्यागमवैलक्षण्येनाधिकारिसंबलनयैव वेदस्य व्यवस्थितेर्बीजाङ्कुरादिप्रवाहवदनित्यत्वेऽप्यनिदं प्रथमत्वमित्यत एव शास्त्रशास्याद्युज्झितस्य प्रलयाभिधानस्य कालस्य तद्धर्माणादेश्चार्हन्मुखस्यासंभवान्नेश्वरकर्तृको वेदः, तदुक्तम्,

"प्रलयेऽपि प्रमाणं वः सर्वोच्छेदात्मके न हि,,

इति,एतत् प्रतिविद्यते ।

"कोटिशो मरणं दृष्ट्वा जन्तूनामवसीयते ।
संभवत्येव कालोऽसौ यत्राशेषजनक्षयः,, ॥

मषकमक्षिकादीनामसंख्यानां जन्तूनां युगपत् सृष्टिसंहारौ च दृष्टाविति सर्वप्राणभृतां जन्तुत्वादेव कस्मिंश्चित् काले युगपत्सृष्ट्या संहारेण च भवितव्यमिति सर्वप्रलयसिद्धेरदोषः ॥

अत्र पराभिप्रायं कारिकाभागेनाह ।

(६३) कर्मातादृग्विधाने चेत्,

कर्मनिबन्धनो हि शरीरादेः संहारो नाहेतुकः, नच महाप्रलयनिमित्तं कर्म किंचित् श्रूयते, इति हेत्वभावादयुक्तः, तदुक्तम्,

"नचाप्यनुपभोगोऽसौ कस्यचित् कर्मणः फलम्,, ।

इति ॥

अत्रोत्तरं तद्भागेनैवाह ।

(६४) मरणं नैव कर्मणः । किंतु तत्क्षयतः,

शरीरोपसंहारोऽप्युपभोगाभावात्मकत्वान्न कर्मफलम्, अपितूपभोगप्रदकर्मक्षयाक्षिप्त एव, तद्वत् सर्वोपसंहारोऽपीत्यदोषः ॥

"कथं तर्हि, "आयुष्कामो हिरण्यदक्षिणेन यजेत,, "मरणकामः सर्वसारेण यजेत,, इत्यायुष्यानायुष्यकर्मश्रुतयो भोगप्रदकर्मान्तराक्षेपतदुपसंहारार्था एव, नहि भोगं विना केवलमेवायुरुपपद्यते, भोगप्रदकर्मसद्भावे वा मरणं यतः ॥

"ननु तथापि महाप्रलयानुपपत्तिः, कर्मान्तराणां भोगप्रदानां भावात्,, इत्याह ।

(६५) स्वापोऽप्यन्यस्यापरिपाकतः ।

कर्मान्तरस्यापरिपक्वत्वात् पूर्वस्य चोपभुक्तत्वात् कियत्कालपरिपाकापेक्षाक्षिप्तः स्वापः सुषुप्ताभिधानोऽयं सिद्धो ननु कर्मफलम्, इति महाप्रलयस्यापि स्वापात् कर्मपरिपाकाक्षिप्ततैव, न कर्मफलतेति, यदुक्तम्,

"नचाप्यनुपभोगोऽसौ कस्यचित् कर्मणः फलम्,, ।

इति,तत् सिद्धसाधनमेव ॥

"अथ तदानीं कथं कर्मणां विपाको विपाकहेत्वसामर्थ्यात्,, इत्याह ।

(६६) कोटिशो हि क्षयं दृष्ट्वा कर्मणामवसीयते ।
समकालं च सर्वेषां विपाकः संभवत्यपि ॥

असंख्यातानां हि मषकमक्षिकादीनां कादाचित्कः सर्गः प्रलयश्च दृश्यमानस्तत्प्रकृतीनामत्यन्तमल्पत्वेन तावन्मात्रोपभोगतोपचितशक्तित्वात् सुकुमारवनितादेरिव कर्मान्तराक्षिप्तभोगदानासामर्थ्यं विश्रामतश्च तद्दानसामर्थ्यं कर्मविपाकहेतुत्वेनानुमीयते, अन्यथा कालान्तरेऽपि मषकादीनां पक्षिणामिव भावः केन न स्यात् । "ननु कालविशेष एव तेषां हेतुः,, किमतः, सोऽपि कर्मविपाकाविर्भावनयैव, तद्वत् प्रकृत्यन्तराणां महत्त्वेऽप्यनवरतानन्तपुरुषभोगसाधनत्वेनापचिततरशक्तित्वात् कर्मानुरूपभोगदानासामर्थ्यतः कर्मविपाककारणत्वाभावो विश्रामतश्च तत्परिपाकसामर्थ्यमनुमीयत इति महाप्रलयसिद्धिः, यदुक्तम्,

"नच कर्मवतां युक्ता स्थितिस्तद्भोगवर्जिता ।
सर्वेषां तु फलोपेतं न स्थानमुपपद्यते ॥
कर्मणां चाप्यभिव्यक्तौ किं निमित्तं तदा भवेत्,, ।

इति, तत् प्रतिक्षिप्तमेवेति ॥

अत्र पराभिप्रायः ।

(६७) अशेषकर्मनाशे च पुनः सृष्टिः कुतः स्थितिः ।

Digitized by Google

एवमपि महाप्रलयः कर्मविनाश एव पर्यवस्यतीति पुनः संसाराभावप्रसङ्गः, तदुक्तम्,

"अशेषकर्मनाशे च पुनः सृष्टिर्न युज्यते,, ।

इति ॥

एतत् परिहरति ।

(६८) देहान्तरफलं कर्म क्षीयते नैव मृत्युना ।

"नाभुक्तं कर्म नश्यति,, इति नियमाच्च महाप्रलयो देहान्तरोपभोग्यानां कर्मणां क्षयहेतुः, अपितूक्तनयेन तत्परिपाकप्रयुक्तत्वात् तत्परिपाकहेतुरेव, इति नैष प्रसङ्गः ॥

इतश्च प्रलयसिद्धिरित्याह ।

(६९) क्ष्मादेः साकारता प्रोक्ता जन्मनस्तस्य पूर्वतः ।

गम्यते जगतः स्वापस्तस्मात् प्राक् च जगत्क्षयः ॥

यत् साकारं कार्यं तत् तदाकारादुपादानकारणादुद्भवस्वभावम्, यथा वटादि वटबीजादेः, साकारं च जगत् पृथिव्यादि कार्यम्, अतस्तस्य जन्मनः पूर्वं तदविभागात्मना भाव्यमित्यपि प्रलयसिद्धिः ॥

अपिच ।

(७०) भविष्यत्प्रलयश्चापि कार्यत्वादेव गम्यते ।

कृत्स्ननाशोऽपि कार्यस्य देहादेः संप्रदृश्यते ॥

कृतकत्वाद्भुवनादेः शरीरादिवत् सर्वात्मना नाशे भविष्यतोऽपि महाप्रलयस्य सिद्धेः शास्त्रोज्झितस्यापि कालस्य संभवादवश्यं तत्कर्त्रा भवितव्यम्, इतीश्वरसिद्धिः । "कथं तत्संधिकारिसंबलना,, अत एव बीजाङ्कुरप्रवाहवत् तत्पूर्विकैवेत्यदोषः ॥

शास्त्रस्येश्वरकर्तृत्वनिषेधाय परोक्तं हेत्वन्तरमाह ।

(७१) धर्मतः पत्युरैश्वर्यं धर्मधीः शास्त्रतस्ततः ।

शास्त्रं पूर्वेष सिद्धं चेत्,

यच्चैश्वर्यं तत्तच्छास्त्रार्थानुष्ठानात्मकाद्धर्मादेव, यथा योगिनाम्, ऐश्वर्यं च जगत्कर्तुरभ्युपगतं भवद्भिः, इति तदपि धर्मादेव, इति धर्मावगमहेतोः शास्त्रस्यापि पूर्वसिद्धेर्नेश्वरकर्तृकता ॥

अत्रोत्तरं कारिकाभागेनाह ।

(७२) कल्पेऽतीते तदिष्यते ।

यदपि च शास्त्रपूर्वत्वमात्रमेव साध्यते, तत् सिद्धसाधनमेव, प्रतिकल्पं सर्गवच्छास्त्रस्यापि सत्त्वात् ॥

अथेश्वरापूर्वत्वं साध्यते ततोऽसिद्धो हेतुरित्याह ।

(७३) किंत्वैश्वर्यं महेशस्य धर्मान्नेत्यभिधास्यते ।

यदि हि धर्मसाध्यत्वं तदैश्वर्यस्य सिद्धं स्यात्, स्यादेव शास्त्रस्येश्वरात् पूर्वमपि सिद्धिः, नतु तद्धर्मसाध्यम्, अपित्वनादीत्यग्रे वक्ष्यति ॥

अभ्युपगम्यापि प्रवाहनित्येश्वरवाद्यभिप्रायेणाह ।

(७४) अस्तु वा धर्मतस्तस्मादनित्यं नित्यतां व्रजेत् ।

अतोऽन्यदेव तच्छास्त्रं ज्ञाता तद्धर्मधीर्यतः ॥

जगद्धिताय तेनान्यदिदानीं रचितं मतम् ।

प्रवाहनित्येश्वरवादिनां हीश्वरः सर्गवच्छास्त्रं निर्माय तावदेव जगत्कृत्यं विधत्ते, यावत् तद्विहितशास्त्रादर्थानुष्ठानेनेश्वरो ह्यन्यः सिद्धः, तस्मिंस्त्वागते नियोगिवत् स्वव्यापारं सर्वं शास्त्रं चोपसंहृत्य स्वात्माराम एव भवति, ततः सिद्धेश्वरोऽसदास्ययैवानेन जगत्कृत्यमुपसंहृतमित्यवगम्य निशाकालं प्रतीक्ष्य सर्गवच्छास्त्रं निर्माय जगत्कृत्यं रचयति, यावत् पुनस्तद्विहितशास्त्रादनुष्ठानक्रमेणेश्वरोऽन्यः सिद्धः, इत्येवमन्योऽन्यश्च, इति सर्गसंहारवच्छास्त्रमनित्यमपि प्रवाहतो नित्यत्वादीश्वरकर्तृकमेव ॥

पुनरीश्वरकर्तृकत्वं शास्त्रस्यामृष्यमाणः परः ।

(७५) शास्त्रादर्थेषु विज्ञानमतो नो कृतकं हि तत् ।

कृतकाद्वचसो यस्माद्विवक्षा संप्रतीयते ॥

यदाह शाबरभाष्यकारः, "लौकिकाद्धि वाक्यादेवमयं पुरुषो वेदेति भवति प्रत्ययो वैदिकात् त्वेवमर्थः,, इत्यर्थतो विवक्षातिरस्कारेण यतः शास्त्रादर्थ एव प्रत्ययस्ततो लौकिकवचो कृतमिति, नो निषेधे ॥

एतदपि प्रतिक्षिपति ।

(७६) नैतस्मादकृतत्वं स्यात् प्रत्ययादेव संभवात् ।

अकृतत्वं हि पुरुषस्योक्तनयेन प्रत्यक्षनिराकृतम्, अतो नानेनानुमानेन साधयितुं शक्यम् ॥

यदप्युक्तम्, "लौकिकाद्वचसो विवक्षा प्रतीयते,, इति, तदप्यसिद्धमित्याह ।

(७७) वाक्याद्ध पूर्वतः पूर्वमर्थे धीरविशेषतः ।

वैदिकादिव लौकिकादपि वाक्यादुच्चरितमात्रादेव विदितपदपदार्थसंबन्धस्य प्रथममर्थ एव प्रतिपत्तिर्भवति, तत्रैवान्तिकेन सामयिकेन वा संबन्धेन तस्याभिधाशक्तिसिद्धेः, न ह्यभिधायकत्वे तयोर्विशेषः, यदुक्तं भवद्भिरपि, "य एव लौकिकाः शब्दास्त एव वैदिकास्त एव च तेषामर्था इति, पश्चात् तु मुख्यार्थासंभवेन गौणो लाक्षणिको वेति,, तदिदमुक्तं भवद्भिरपि,

"पौर्वापर्यपरामृष्टः शब्दोऽन्यां कुरुते मतिम्,, ।

इति ॥

यस्य तु गोपालादिवाक्ययोरपि व्यभिचारः स इदानीं वक्तृविशिष्टं ज्ञानं गमयतीत्याह ।

(७८) व्यभिचारो न यस्य स्यादन्यार्थं तत् कथं कृतम् ।

छतं लौकिकं वाक्यम्, "अङ्गुल्यग्रे हस्तिशतयूथमास्ते,, इत्यादिवाक्यवद्यदेव सर्वात्मना स्वार्थे प्रत्यक्षादिभिर्बाध्यते तदेव ततोऽन्यमर्थं वक्तृवचनाभिप्रायं भ्रान्तिज्ञानयोगं वा गमयति, यदुक्तं भवद्भिरपि, "प्रमाणान्तरममुना बाध्यते न पुनर्हस्तिशतयूथमिति,, यद्युन्मत्तादिनाभ्यासकामेनान्यार्थप्रतिपादनाभिप्रायेण वा न प्रयुक्तं भवेत्, तैः प्रयुक्ते तु न तमपि, अपितु विवक्षामात्रकमेवेत्युक्तम्, यस्य तु प्रत्यक्षादिभिर्व्यभिचारो नास्ति तद्वाक्यं न वक्तुरभिप्रायं नापि विवक्षामात्रमपित्वर्थमेव प्रतिपादयतीति ॥

अत्र कारिकाभागेन परः ।

(७९) ज्ञातत्वात् संशयस्तत्र,

यद्येवमुत्पन्नत्वेनार्थप्रतिपादकत्वेन चाविशेषाल्लौकिकवाक्य इव शास्त्रेऽप्यर्थविषयः संशयः स्यात्, नच भवति, तस्मादनुत्पन्नमेव तदिति ॥

भागान्तरेणैतत् प्रतिक्षिपति ।

(८०) अज्ञातं तर्हि किं भवेत् ।

यदि रचनात्मकमपि तन्न नानित्यम्, घटाद्यपि तथैव स्यात्, ततश्च सर्वस्य नित्यताप्रसङ्ग इत्युक्तम्, "कथं तर्हि न ततः संशयः, संशयहेतोः प्रतारकत्वस्याभावात्,, तदभावश्चाप्तप्रयुक्तत्वात् पित्रादिवाक्येष्विवेति वक्ष्यामः ॥

ये त्वाहुः, "नेह व्याकरणे वस्तुतोऽर्थः शब्दस्य,अपितु विवक्षित इति,, तान् प्रत्याह ।

(८१) पदार्थान्वयहीनश्च वाक्यार्थः स्यादलौकिकः ।
न पदं विद्यते यस्माद्विवक्षाप्रतिपादकम् ॥

नहि विवक्षा वाक्यार्थः, पदार्थस्य वाक्यार्थत्वानुपपत्तेः, पदान्येव संबद्धानि वाक्यं यतः, नच पदस्यार्थो विवक्षा,अपितु बाह्य एव, इति वाक्यस्यापि स एव युक्त इति, नातो वेदस्याकृतकत्वसिद्धिः ॥

पुनरीश्वरकर्तृकनिषेधे वेदस्य परो हेत्वन्तरमाह ।

(८२) परोक्षो ननु शास्त्रार्थो विशेषत्वादलैङ्गिकः ।
लिङ्गसामान्यगमकं तद्व्याप्तं लिङ्गमिष्यते ॥
अविदित्वा च तत् कश्चित् कथं शास्त्रं करिष्यति ।

"चोदनालक्षणोऽर्थो धर्मः,, स च कार्यात्मको न सिद्धस्वभाव इति न प्रत्यक्षनिमित्तः, यदाह सूत्रकारो जैमिनिः, "सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षमनिमित्तं विद्यमानोपनतत्वात्,, इति, प्रत्यक्षपूर्वकत्वाच्चानुमानादिवत् संप्रत्ययनिमित्तत्वमिति भाष्यकारश्च,, विशेषत्वाच्चानुमेयधर्मो हि ज्योतिष्टोमादिरेक एव सकलाध्यायिभिरध्येतो होत्रौद्गात्राध्वर्यवकर्मभेदेन प्रतीयते, नहि प्रत्यध्यायिनमनुष्ठातारं वा अध्यास्तवर्यस्य वा ज्योतिष्टोमादेर्भेदः, शाखाभेदेऽपि तत्स्वरूपाभेदात्, यदुक्तम्, "सर्वशाखाप्रत्ययमेकं कर्म,, इति, एकत्वेन विशेषत्वाच्च साध्यकर्मसामान्येन सपक्षे सिद्धा व्याप्तिः, अत एव साध्यधर्मसामान्यानुमातुर्लिङ्गस्याविषयः, इतीश्वराभ्युगमेऽपि तस्य चोदनाव्यतिरेकेण धर्मावेदकप्रमाणासंबन्धादविदितस्य चोपदेष्टुमशक्यत्वाच्च चोदनाकर्तृत्वसिद्धिः ॥

एतत् पराकरोति ।

(८३) प्रामाण्ये तस्य संसिद्धे वक्तुं युक्तमिदं बुधाः ।
सिद्धमेव यतः कुर्यादबाद्यविषये मतिम् ॥

हेयोपादेयतदुपायपरिच्छेदकत्वं हि प्रमाणत्वम्, यदाहुः,

"हेयोपादेयतत्त्वस्य साभ्युपायस्य वेदकः ।
यः प्रमाणसमाविष्टः,,

इति, तस्मिन्नीश्वरप्रामाण्ये सिद्धे नैतद्वक्तुं युक्तमिति कारिका दर्शयति । तच्च प्रामाण्यं तस्य वक्ष्यमाणसर्वज्ञत्वसिद्धौव सिद्धम्, इति चोदनावत् तज्ज्ञानमप्यनागतातीतं भूतं भविष्यत् सूक्ष्मं व्यवहितं विप्रकृष्टम्,एवंजातीयकं सर्वमर्थमवगमयितुं समर्थमिति कथं न धर्मविषयमपि स्यात्, "ननु कार्यत्वाद्धर्मस्य तद्विषयत्वं न संभवतीत्युक्तम्,,न,फलादिनानैकान्तिकत्वात्, फलकर्मव्यतिरेकेण च कार्यान्तरस्यासिद्धेः, "ननु नियोगात्मकमेव तत्,किमतः,तस्यापि प्रेषणाध्येषणादिरूपत्वेन स्वाम्याद्याशयविशेषात्मकत्वतः प्रमाणान्तरगोचरत्वात् ततोऽन्य एवासावपौरुषेयविषयः प्रमाणान्तरागोचर इति चेत्,, न, तथाभूते संबन्धग्रहणाभावेन शब्दादप्रतीतेः, नहि अलौकिकः शब्दार्थः संभवतीत्युक्तम्, "ननु प्रेषणाद्युपाधिद्वारेणास्येवाच व्युत्पत्तिरिति चेत्,,न, तर्ह्यलौकिकोऽसावुपाधिद्वारेण तेषां प्रमाणान्तरविषयत्वादिति,अत एव नियोगस्य नियोक्तृव्यापारात्मकत्वाल्लौकिकवाक्यवद्वेदेऽपि नियोक्ता भवितव्यमितीश्वरकर्तृत्वसिद्धिः ॥

एतदेवाह ।

(८४) नच बाधास्ति येनास्य तत्प्रामाण्यनिवारणम् ।

नच बाधकप्रमाणमस्ति, येनेश्वरस्य तस्मिन् धर्मे प्रामाण्यनिवारणमवेदकत्वं सिध्येत् ॥

"ननु साधकमपि प्रमाणं नास्ति,, इत्याह ।

Digitized by Google

(८५) इत्थंरूपं ततस्तर्हि साधुकारणजं हि तत् ।

तत एव तर्हि बाधकप्रमाणाभावात् सर्वज्ञस्येत्थंरूपं धर्माद्येकमपि तज्ज्ञानं सिध्यति, तस्माच्च साधुकारणजं तदिति ॥

तदेव साधुकारणजत्वं तज्ज्ञानस्याह ।

(८६) त्रिकालार्थाविसंवादि ज्ञानं चेशेऽभिधास्यते ।

नहि त्रिकालामलप्रवेदिनः कारणदोषो ज्ञानानुत्पादे संभवति, "तर्हि कालत्रयानवच्छेदप्रतीतेर्नियोगस्य तदज्ञेयत्वासिद्धिः,, सत्यम्, यदि प्रतीयते "स त्वग्निहोत्रं जुहुयात् स्वर्गकामः,, इत्यादिभिर्वाक्यैर्भूतवर्तमानतातिरस्कारेण भविष्यत्सामान्य एव प्रतीयते, यद्वाह शाबरभाष्यकारः, "भविष्यंश्चैषोऽर्थो न ज्ञानकालेऽस्तीति,, अविरोधः ॥

अत एवेदमपि सिध्यतीत्याह ।

(८७) नचापि सर्ववित् कश्चिदल्पायुश्च करोति तत् ।

परस्पराविरुद्धत्वमहदव्याहतत्वतः ॥

वेदस्य कर्तर्यनुमानतः सिद्धे परस्पराविरुद्धार्थत्वेन तस्य प्रतीतिः शिक्षानिरुक्तप्रातिशाख्याद्यङ्गप्रत्यङ्गभेदेनातिमहत्त्वाच्च सिद्धार्थप्रतिपादकानां तदेकदेशानां प्रत्यक्षादिविरोधसंभवेऽप्यर्थवादादिनाप्युपपत्तितः प्रमाणान्तरव्याघातासंभवाच्च तत्कर्तर्यपि तथाभूतज्ञानाद्यतिशयसिद्धेः सर्वज्ञत्वानादित्वादिसिद्धिः ॥

"ननु बहवः कथंचिदंशांशिकया तथाभूतमपि वेदं करिष्यन्ति,, इत्याह ।

(८८) बहूनां करणे न स्यात् प्रोक्तलक्षणसंगतिः ।

तदानीं हि प्रोक्तानां मन्त्रब्राह्मणानां सर्वासां च शाखानामङ्गप्रत्यङ्गादिलक्षणानां चान्वयो न भवेद्भिन्नकर्तृकत्वाद्बौद्धार्हतशास्त्राणामिव ॥

"अथ बहुभ्यः समुपजीव्यैक एव तत्र कर्ता भविष्यतीत्युच्यते,, तत्राप्याह ।

(८९) एकस्य शक्तिकृप्तौ स्यात् प्रद्वेषः केवलो हरे ।

एवं हि पूर्वोक्तविशेषणविशिष्टं वेदं विदधानः स एवेश्वरः सिद्ध इत्यविवादः ॥

एतदेव द्रढयितुमाह ।

(९०) महतो भूतपूर्वस्य लिङ्गमीश्वरनिर्मिते ।

चरितार्थं भवेत् तस्मादीश एवात्र युज्यते ॥

यदाहुः,

"कल्पितः कल्पनं हन्ति तत एवार्थसिद्धितः,, ।

इति ॥

इतश्च साधुकारणजं तज्ज्ञानमित्याह ।

(९१) नच प्रतारकः शर्वो यस्मात् सर्वजगत्पतिः ।

प्रतार्य प्राणिनस्तेभ्यः किमपूर्वमवाप्स्यति ॥

प्रतारका हि रथ्यापुरुषाः केनचित् स्वप्रयोजनेन प्रतारयन्ति, तस्य तु परार्थप्रवृत्तेः स्वप्रयोजनाभावात् कुतः प्रतारकता ॥

किंच ।

(९२) परार्थं मन्त्रवादाश्च येन सर्वविदा कृताः ।

सर्वश्रेयोयुताः सर्वे स कथं हि प्रतारयेत् ॥

परोपकारायैव येन मन्त्रवादा रसरसायनपातालगुडिकाः सर्वस्य काम्यमानस्य श्रेयसः साधका बहवो विरचितास्तस्य प्रतारकत्वं न संभवत्येव ॥

नचापि पुरुषाणामत्र कर्तृत्वमित्याह ।

(९३) परोक्षो मन्त्रवादार्थो विशेषत्वादलैङ्गिकः ।

सेतिकर्तव्यताकोऽपि ज्योतिष्टोमादिवन्नृणाम् ॥

पुरुषाणां हि प्रत्यक्षसिद्धे हरीतक्यादेर्विरेकादाविवानुमानसिद्धे वा चक्षुरादेः पाटलादिनिवृत्त्यादाविव शास्तृत्वं स्यात्, नत्विन्द्रियातीते प्रोक्तनयेन विशेषत्वाच्चाननुमेये ज्योतिष्टोमादेः स्वर्गादाविव, मन्त्रवादशास्त्रस्य चार्थोऽङ्गव्रातेनेति कर्तव्यतया ध्यानधारणादिकया युक्तः फलसाधनत्वेन न प्रत्यक्षसिद्धः, विशेषत्वाच्चाननुमेयः, इति न तत्र शास्तृत्वं पुरुषाणां संभवतीतीश्वरस्य युक्तम् ॥

नच वेदाङ्गानामिव वेदकर्तृसिद्ध्यैव कर्तृसिद्धिर्मन्त्रवादानामित्याह ।

(९४) प्रसिद्ध्या संभवाच्चापि न वेदे गरुडादयः ।

कर्तारः सर्ववित्त्वेषां गम्यतेऽनुग्रहैकधीः ॥

प्रसिद्ध्यानादिप्ररूढया त्रय्यामेव वेदता शाखाविशेषाणां च वेदविशेषशाखात्वं न प्रमाणान्तरेण,नच वेदविषया मन्त्रवादानां प्रसिद्धिः,इति भिन्नशास्त्रत्वेन पृथक् तेषां कर्तृविशेषसिद्धौ प्रयत्नः कृतः ॥

अत्र परोऽसाधुकारणजमीश्वरस्य ज्ञानं साधयितुमाह ।

(९५) सर्वज्ञानक्रियाहीनो वक्तृत्वात् तर्हि शंकरः ।

वक्तृत्वादस्मदादिवदीश्वरः सर्वज्ञानादिरहितः ॥

तदयुक्तमसिद्धत्वादित्याह ।

(९६) वक्तृत्वं शास्त्रकर्तृत्वं नेतस्मात् प्रोक्तदूषणम् ।

नास्मदादिवद्वचनमात्रकर्तृत्वं वक्तृत्वं तत्र सिद्धम्,अपित्वन्यदेव तच्छास्त्रकर्तृत्वम्, नच तस्यासर्वज्ञत्वेन व्याप्तिः सिद्धा ॥

विरुद्धश्चायं हेतुरित्याह ।

Digitized by Google

(९७) अस्माच्च प्रत्युतेशानः सर्वज्ञः संप्रतीयते ।
शास्त्रं हि कुर्वता तेन सर्वमेव कृतं भवेत् ॥
फलजातं यतः पुंसां सर्वं शास्त्रात् प्रसिध्यति ।

तदिदमुक्तम् ।

"नचाप्यसर्ववित् कश्चिदल्पायुश्च करोति तत्,, ।

इति ॥

अत एवाह ।

(९८) चोद्यं चेदृक् कथं कुर्यात् प्रागुक्ताखिलमानवित् ।

अज्ञस्यैवैतच्चोद्यं नतु पूर्वोक्तप्रमाणसंस्कृतस्येति, तदेवं साधुकारणजनितत्वादीश्वरज्ञानं धर्मादिविषयमपि संभवतीति शास्त्रस्य प्रमाणान्तरागोचरार्थत्वाचेश्वरकर्तृकत्वासिद्धिरिति ॥

अत्र स्वयूथ्याः ।

(९९) स्वमतस्यैव मानत्वे यत्नं सर्वः करोति हि ।
वेदस्यापि प्रमाणत्वे किं मुधैव कृतः श्रमः ॥

सर्वथा हि प्रेक्षावता स्वदर्शनस्यैवाप्रामाण्यशङ्काप्रतिक्षेपाय यत्नो विधेयः, न दर्शनान्तरस्य निष्प्रयोजनत्वात्, अविशेषतः सर्वागमप्रामाण्यसमर्थनेनानवस्थाप्रसङ्गाच्च, इतीश्वरकर्तृत्वेन वेदप्रामाण्यसमर्थनमेतद्ब्रुवतोऽनुपपन्नमेव ॥

तदयुक्तम्, तस्यैवेहापेक्षणीयत्वादागमान्तराणामित्याह ।

(१००) वेदं विना न कर्मास्ति कलादि च न तद्विना ।
छेत्तव्यं दीक्षया सर्वं कर्मादीति प्रभाषितम् ॥
अनुज्ञाताश्च वेदोक्ताः शैवे वर्णाश्रमादयः ।
वेदस्यापि प्रमाणत्वे यत्नोऽस्माभिरतः कृतः ॥

यतोऽनेकजन्मसंभृतं धर्माधर्मात्मकं कर्म सर्वस्य कलादिक्षित्यन्तस्य तत्त्वभावभूतभुवनात्मनः संसारस्य हेतुभूतं दीक्षया छेद्यमिहोक्तम्, नचाज्ञातस्य छेद्यत्वमुपपद्यते, नच वेदं विना तस्याविकलस्य ज्ञानं संभवति, बौद्धोक्तस्य चैत्यशयनादेरप्यार्हतोक्तस्य केशलुञ्चनादेर्धर्मस्य कथंचित् तदेकदेशत्वात्, यदुक्तम्,

"सर्वक्लेशो हि पापस्य क्षपणे पर्यवस्यति,, ।

इति, स्वेच्छकल्पितस्य तु परप्राणहरणात्मनो धर्मस्याप्यधर्मतया तेन व्याप्तत्वात्, यतश्चेह वेदोक्ता वर्णाश्रमस्थितिः पाल्यत्वेन श्रूयते,

"इति वर्णाश्रमाचारान् मनसापि न लङ्घयेत् ।
यो यस्मिन्नाश्रमे तिष्ठेद्दीक्षितः शिवशासने ।
स तस्मिन्नेव संतिष्ठेत् शिवधर्मं च पालयेत्,, ॥

इति, सर्वकर्मविच्छेदोपदेशान्यथानुपपत्त्या तद्वर्णाश्रमव्यवस्थापालनश्रुतेश्च वेदस्यास्माभिः प्रामाण्ये यत्नो विहितो नागमान्तराणामिति ॥

"ननु तस्य प्रमाणत्वेन सिद्धस्याप्यत्र यत्नो निष्फलः,, इत्याह ।

(१०१) वेदो मुमुक्षुभिश्चान्यैः प्रत्याख्यातो यतो भवेत् ।

यतो बौद्धार्हतादिभिर्वेदस्य प्रामाण्यं प्रत्याख्यातमेव, ततोऽयं यत्नः सफल एव ॥

नच तत् प्रत्याख्यातुं शक्यमित्याह ।

(१०२) वेदं विना न जन्तूनां कुतो मोक्षो भवं विना ।

नहि हेयं संसारं तत्साधनं चापरिज्ञाय मोक्ष उपपद्यते. नच वेदं विना तस्य सर्वरूपेण ज्ञानं संभवतीत्युक्तम्, अतो मोक्षोपदेशान्यथानुपपत्त्या तैरपि वेदः प्रमाणत्वेनाभ्युपगन्तव्य एवेति ॥

यद्येवं शान्तिं कुर्वतो वेतालोत्थापनमेतदिति परः ।

(१०३) वेदे मोक्षस्य सिद्धत्वात् किं शैवेन प्रयोजनम् ।

एवं हि वर्णाश्रमव्यवस्थादेरिव मोक्षस्यापि वेदादेवावगतेरनुवादकत्वेनाप्रामाण्यमेव शास्त्रस्येति ॥

अथ परस्परानपेक्षयैकार्थप्रतिपादकत्वेऽपि शास्त्रद्वयस्यैव विकल्पतः प्रामाण्यमनयोर्भविष्यतीत्याह ।

(१०४) तत्स्थस्येहाधिकारित्वाद्विकल्पोऽत्र न युज्यते ।

युक्तं शास्त्रद्वयस्य विकल्पतः प्रामाण्यं समशिष्टत्वात्, इह तूत्पत्तिशिष्टवेदसंविद्व्यवस्थितस्य ब्राह्मणादेरधिकाराद्वेदस्यैवावगतिः प्रथममवश्यं भाविनी तस्येति विषमशिष्टत्वाद्विकल्पानुपपत्तेरप्रामाण्यमेव ॥

अथ "ज्योतिष्टोमेन स्वर्गकामो यजेत,, "दर्शपौर्णमासाभ्यां स्वर्गकामो यजेत,, इति वाक्ययोरेकस्वर्गफलत्वेऽपि प्रयोगभूयस्त्वात् फलभूयस्त्वेनैवात्रैतयोरागमयोरेकफलत्वेऽपि प्रयोगभूयस्त्वात् फलभूयस्त्वेन प्रामाण्यं भविष्यतीत्याह ।

(१०५) मतद्वयोक्ताकरणं फलभूयस्त्वतो न तत् ।

नैतद्युक्तं स्वर्गादेः फलस्येव मोक्षस्यातिशयासंभवात् ॥

इतश्चास्याप्रामाण्यमित्याह ।

(१०६) निर्युक्तिकश्च गदितः क्रियया कर्मसंक्षयः ।

ज्ञानादेवाज्ञाननिवृत्तिद्वारेण मोक्षस्य सिद्धेर्दीक्षात्मनः कर्मणो मोक्षहेतुत्वप्रतिपादकमेतच्छास्त्रम् "अग्निना सिञ्चेत्,, इति श्रुतिवदप्रमाणमेव, तदुक्तम्,

"ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते,,

इति, मीमांसकस्य चात्र पूर्वपक्षवादित्वात् कर्मसंक्षय एव मोक्ष इत्युक्तम् ॥

इत्यपरवचनं प्रतिक्षेप्तुमाह ।

Digitized by Google

(१०७) सर्वमुत्पत्स्यमाना गोला शिवता शिवशासने ।
फलेभ्यश्चापि सर्वेभ्यो विज्ञेया साधिकाधिका ॥

तावदेव दोषो यदि पुरुषतत्त्वावधिरेवात्रापि मोक्षो भवेत्, अत्र तु शिवतत्त्वावाप्तिर्दर्शनान्तरानधिगतोऽपूर्व एव सर्वज्ञत्वसर्वकर्तृत्वात्मकः श्रूयते, इति बौद्धवैशेषिकार्हतसांख्यपाञ्चरात्रवेदान्ताद्युक्तेभ्यः क्रमेण सातिशयेभ्यो मोक्षेभ्योऽतिशयेन सातिशयो ज्ञेय इति कुतः पूर्वोक्तो दोषः, यच्छ्रूयते,

"बुद्धितत्त्वे स्थिता बौद्धा गुणेषु त्वार्हताः स्थिताः ।
गुणमूर्ध्नि स्थिताः सांख्या अव्यक्ते पाञ्चरात्रिकाः ॥
स्थिता वेदविदः पुंसि,,

इत्यादि ॥

एतदेवाह ।

(१०८) अनुष्ठानातिरेकाच्च फलाधिक्यं विपश्चितः ।
अनुक्तमपि कल्प्यं तन्नाप्रामाण्यमसंभवात् ॥

अनुष्ठानहेतुत्वादनुष्ठानं ज्ञानमुच्यते, तस्यास्य सर्वान्यागमप्राप्यस्थानान्तरप्रदर्शनेन प्रोक्तक्रमतः प्रवृत्तेः सर्वागमेभ्यः सर्वविपर्ययत्वेनातिशयासिद्धितो हे पण्डिताः सर्वोत्कृष्टमनुक्तमपि मोक्षात्मकं फलं कल्पनीयम्, किमुक्तं न संभाव्यते, इति नात्राप्रामाण्यदोषः पूर्वोक्तः ॥

नापि द्वितीय इत्याह ।

(१०९) दीक्षयैवाप्यते सर्वं नैष्ठिकेऽप्युदितं क्वचित् ।
वेदाद्युक्तमतस्तच्च नैष्फल्याद्विनिवर्तते ॥

युष्मदागमेऽपि वेदादिविहितस्य कर्मणः क्रियया क्षय उपनिषत्सु श्रूयते,

"यदोक्तमाधिकारेऽस्मिन् दीक्षितो वेदविद्भवेत् ।
क्षीयतेऽस्य तदा कर्म सर्वं सुकृतदुष्कृतम्,, ॥

इति ॥

न केवलं ज्ञानकाण्ड एव यावत् कर्मकाण्डेऽप्येतद्विहितमित्याह ।

(११०) शुभया क्रियया वेदे क्षयः पापस्य चोदितः ।

चान्द्रायणादिना प्रायश्चित्तकर्मणा दुष्कृतक्षयश्रुतेर्न निर्युक्तिकः क्रियया कर्मसंक्षयो भवतामिवागमसिद्धत्वात्, इत्यदोषः॥

"ननु युक्तिरत्रानुमानमभिमता चान्द्रायणादीनां दिव्येन प्रत्ययेन धटादिना शुद्धिहेतुत्वनिश्चयात्,, यदुक्तम्,

"अधर्मात् तमसो देहे गुरुत्वं यत् क्षयोऽस्य तु ।
धर्मतो लघुतोत्पादाद्धटतः संप्रतीयते,, ॥

इति ॥

(१११) दृष्टश्च तत्क्षयः शैवे क्रिययैव तुलादिना ।

इहापि धटदीक्षायामेवंविधा युक्तिरस्त्येवेति न निर्युक्तिकः क्रियया कर्मसंक्षयो गदित इति ॥

अपिच ।

(११२) दीक्षातो यदि नेष्येत कर्माभावः कुतोऽन्यतः ।

कर्मवादिभिर्हि कार्येऽर्थे वेदस्य प्रामाण्याभ्युपगमाज्ज्ञानादिप्रतिपादकस्योपनिषद्भागस्य सिद्धार्थत्वेनाप्रामाण्यप्रसङ्गतः स्तुत्यर्थत्वेनार्थवादतया कर्मकाण्डान्वयतः प्रामाण्यसमर्थनाज्ज्ञानयोगात्मनोऽन्यस्यासिद्धेः क्रियाविशेषाद्यदि कुतश्चित् कर्माभावो नेष्येत, तदा वेदस्य मोक्षशास्त्रत्वाभावप्रसङ्गो बौद्धादीनामत्र प्रामाण्यप्रसङ्गः, इति मोक्षशास्त्रत्वान्यथानुपपत्त्यावश्यं कुतश्चित् क्रियाविशेषात् कर्माभावोऽभ्युपगन्तव्यः, यतश्चाभ्युपगम्यते सैव दीक्षेति न निर्युक्तिकः क्रियया कर्मसंक्षयः ॥

अत्र परोऽन्यथा कर्माभावमाह ।

(११३) अकृतेरुत्तरेषां स्यात् पूर्वेषामुपभोगतः ।

तदिदमुक्तम्,

"नित्यनैमित्तिके कुर्यात् प्रत्यवायजिहासया ।
मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः,, ॥

इति ॥

एतत् प्रतिक्षिपति ।

(११४) अनेकजन्मसंभोग्यान्येकस्मिन्नेव जन्मनि ।
कर्माणि कुरुते तस्मादभसाद्भणितं त्विदम् ॥

भवेदेतद्, यदि प्रतिजन्मैकजन्मभोग्यान्येव पुरुषः कर्माणि कुर्यात्, अनेकभवभोग्यानि तु ज्योतिष्टोमादीनि नानाफलानि ब्रह्महत्यादीनि कुर्वन् दृश्यते, इति पूर्वेषामुपभोगतः क्षयोऽसिद्धः, नहि नरकस्वर्गादिफलयोरेकजन्मन्येवोपभोगः संभवति, इति प्रमाणस्वरूपापर्यालोचनेनैतत् कथितं भवद्भिः ।

(११५) ततश्च यदि नामेह न कृतं कर्म जन्मनि ।
जन्मान्तरं तथापि स्यात् पूर्वस्मादेव कर्मणः ॥

पूर्वेषामुपभोगतः सर्वेषां क्षयस्यासिद्धेरस्मिन् जन्मनि प्रत्यवायफलहेत्वोरकरणेऽपि पूर्वतरकर्मभ्यो जन्मान्तराणि सन्त्येवेति,

"नित्यनैमित्तिके कुर्यात्,,

इत्याद्युक्तो मोक्षसाधनन्यायोऽनैकान्तिकत्वादयुक्त एव स्यात् ॥

एतदनेकभवभोग्यकर्मसंभवे यदेव तीव्रवेगं तदेव मन्दवेगान्यकर्मोपभोगोपमर्देन स्वकार्यमभिनिर्वर्तयदेकस्यैव जन्मनो

हेतुः संपद्यते, इति कर्मान्तराणां तदुपमर्दादेव भावाभावसिद्धेर्नानैकान्तिकताऽस्य हेतोः, इत्याह ।

(११६) अनेकभवभोग्यानि कर्माणि कुरुते पुमान् ।
तथाप्येकस्य संभोगान्न नाशः सर्वकर्मणाम् ॥

तत्र तेष्वनेकभवभोग्येषु कर्मसु मध्यादेकस्य भोगाद्धेतोर्न सर्वेषां कर्मणां क्षयः, तद्धदेशाभुक्तत्वात्, यच्छ्रूयते,

"नाभुक्तं कर्म नश्यति,,

इति, अपितु तुहिनपाताद्युपरुद्धबीजवत् कालान्तरेण फलदातृतया वासनात्मतया नावतिष्ठते, इत्यतीव्रवेगानां कर्मणां नाशासिद्धेस्तेभ्यो जन्मान्तराणि सन्त्येवेति नैकस्मिन् जन्मनि प्रत्यवायफलहेत्वोरकरणमात्रेण मोक्ष इति, अथ प्रतिजन्मविषयमेतदित्युच्यते, तदयुक्तम्, म्लेच्छादिजन्मविषयत्वेनानधिकारतोऽसंभवात्, तन्नित्यानुष्ठानस्य च प्राणिवधादेर्निषेधत्वेन प्रत्युत जन्मान्तरहेतुत्वतो विरुद्धत्वात् ॥

"ननु यावच्च सर्वकर्मक्षयो न तावन्मनुष्यजन्म, यदुक्तम्,

"आद्यो हि देहः पुरुषार्थमूलस्ततोऽप्यन्ये कर्ममूलाः प्रपञ्चाः,, ।

इति, मनुष्यजन्मान्यथानुपपत्त्यानेकभवभोग्यानां सर्वेषां कर्मणां क्षयसिद्धेर्भवत्येवास्मिन् जन्मनि प्रत्यवायफलहेत्वोरकरणान्मोक्ष इति ॥

अत्राप्याह ।

(११७) अन्त्ये जन्मनि नो सर्वं कर्म संभुज्यते यतः ।
सुखदुःखादिभेदोऽयं जन्मन्यथापि दृश्यते ॥

यद्येवं मनुष्यजन्मनोऽकर्मफलत्वाद्वैचित्र्याभावप्रसङ्गः, कर्मनिबन्धनं हि सुखादिवैचित्र्यं पुंसामित्युक्तम्,

"इह ते कर्मणामेव विपाकश्चिन्तयिष्यति ।
अमुत्र भविता यत् ते तच्चिन्तय शुभाशुभम्,, ॥

इति, ततश्च,

"आद्यो हि देहः पुरुषार्थमूलः,,

इत्यस्य बाधितत्वात् "अग्निना सिञ्चेत्,, इतिवदप्रामाण्यतोऽप्युक्तमेतत् ॥

स्यादेतत्, जन्मप्रयाणमध्यकृतं सर्वमेव शुभाशुभं कर्म प्रधानोपसर्जनभावेन संमूर्च्छितं युगपदेकमेव जन्म करिष्यतीत्येवमनेकभवभोग्यानां कर्मणामसंभवकल्पनया न प्रोक्तदोषोऽत्र भविष्यतीत्याह ।

(११८) इन्द्रत्वादि फलं वेदे उच्यते तत् पृथक् पृथक् ।
आजन्म जनितेभ्योऽपि नैकं जन्म भवत्यतः ॥

"वाजपेयेन स्वाराज्यकामो यजेत,, इति स्वाराज्यमिन्द्रत्वमेव तत्फलं कर्म, आदिग्रहणात् स्वर्गादिकवज्ज्योतिष्टोमादि ब्रह्महत्यादि च नरकफलं गृह्यते, तत् पृथक् पृथग्जन्म करोति, इत्यध्याहारः, परस्परानपेक्षयैव श्रुतेर्विरुद्धफलत्वाच्च, ततो न सर्वेषां प्रधानोपसर्जनभावेनैकजन्मकरणकल्पनोपपद्यते, श्रुतिविरोधादिति ॥

उपसंहर्तुमाह ।

(११९) इष्टं च तदनेकेभ्यो येषां तत् कर्म ते भवे ।

अतोऽनेकभवहेतुकमनेकभवभोग्यं वा कर्मेष्टव्यम्, तच्चेषामस्ति, तेऽस्मिन् जन्मनि प्रत्यवायफलहेत्वोरकरणेऽपि संसारे वर्तन्ते, इति,

"नित्यनैमित्तिके कुर्यात्,,

इत्यनेनापि प्रकारेण वेदस्य मोक्षशास्त्रत्वानुपपत्तेस्तद्विवोढायावश्यं क्रियाविशेषः कश्चित् कर्मक्षपणाय भवद्भिरभ्युपगन्तव्य इति सूक्तम्,

"दीक्षातो यदि नेष्येत कर्माभावः कुतोऽन्यतः,, ।

इति ॥

केचित् तु,

"नाभुक्तं कर्म नश्यति,,

इति श्रुतेर्ज्ञानिनो योगबलात् सर्वकर्मभोगः, इत्येवं ज्ञानकर्मसमुच्चयान्मोक्षं प्रतिपन्ना न दीक्षयेति, तन्मतमुपन्यस्य दूषयति ।

(१२०) ज्ञानी योगबलाद्भुङ्क्ते सर्वं कर्मेति नार्थवत् ।

कुत इत्याह ।

(१२१) अज्ञानादेर्विना कोऽयं दृष्टो भोगः सुखादिषु ।

वैराग्याद् विषयवैतृष्ण्यात्मकं ज्ञानं रागानुबन्धाच्च भोगः कर्मतः, इति ज्ञानकर्मणोर्विरुद्धानुबन्धित्वात् सम्यग्मिथ्याज्ञानयोरिव समुच्चयासंभवादवश्य

"नाभुक्तं कर्म नश्यति,,

इति श्रुतिबलाज्ज्ञानिनोऽपि कर्म भोगेनैव क्षपणीयम्, तदन्यथानुपपत्तेर्दीक्षयैव क्षपणीयमिति,

"निर्युक्तिकश्च गदितः क्रियया कर्मसंक्षयः,, ।

इति, "ननु तत्रापि भोगस्य संभवात् स एव तदवस्थो दोषः,, न, चौर्यप्रयुक्तमन्त्रसामर्थ्यापहृतमोहादिनापि स्वप्नभोगवत् तदानीं ज्ञानिनोऽनुपपत्तेरदोषः ॥

एवं कर्मक्षयान्मुक्तिमभ्युपगम्योक्तम्, इदानीं तु सैव नोपपद्यत इत्याह ।

(१२२) क्षीणेऽपि कर्मजाते स्यान्मलादेर्नैव संक्षयः।
साधनं पाशविच्छित्त्यै शिवोक्तं परिगृह्यताम् ॥

अस्तु विज्ञानयोगसंन्यासैर्भोगाद्वा कर्मणः क्षयः, क्षीणेऽपि तस्मिन् मलस्यादियहणादीश्वरप्रेर्यत्वस्य च नैव क्षयः, इति विज्ञानकेवलित्वमेव तेषां न मोक्षः, यथा चाविद्यास्मृत्यादेः प्राकृताद् बन्धात् कर्मणश्च मलोऽन्योऽभ्युपगन्तव्यः, तथोक्तमाचार्येण स्वायंभुववृत्तौ,

"यदशुद्धिर्न पुंसोऽस्ति,,

इत्यत्रान्तरे, व्याख्यातं च तट्टिप्पणेऽस्मत्पित्रा तत्रभवता भट्टनारायणकण्ठेन इति तत एवावधार्यम्,तस्य च द्रव्यत्वाच्च ज्ञानादिवृत्तिः,अपितु चक्षुःपाटलादेरिव विशिष्टया क्रिययेति वक्ष्यामः, अतः,

"निर्यक्तिकश्च गदितः क्रियया कर्मसंक्षयः,, ।

इत्यस्याप्यदोषत्वाच्च प्रमाणान्तरेण बाधितत्वादप्रामाण्यमस्य शास्त्रस्येति वक्तुं युक्तमिति ॥

अधुना न केवलमनुमानतः स्वागमाच्चेश्वरसिद्धिर्यावदन्यदागमादपीत्याह ।

(१२३) नित्यादनित्यतो वापि शास्त्रतश्चाधिगम्यते।

ईश्वरकर्तृकत्वेन वेदस्य प्रामाण्यं प्रतिपादितमस्तु, यदि वा पराभ्युपगतेनाकृतकत्वेन सर्वथेश्वरसिद्धौ नाप्रामाण्यमित्यनवक्लृप्त्या दर्शयति, तथा च, "रौद्रं चरुं निर्वपेत् प्रजाकामः,, "सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः,, इत्यादौ रुद्रो देवतास्येति देवतातद्धितश्रुत्या रुद्रादिर्देवतात्वेन चोद्यते, "ननु कार्येऽर्थे वेदस्य प्रामाण्यम्, न सिद्धे देवतादौ,, "कथं तर्हि "दध्ना जुहोति,, "पयसा जुहोति,, इत्यादयो गुणविधयः,, तत्र हि, "अग्निहोत्रं जुहुयात् स्वर्गकामः,, इत्यतो भावार्थोप्राप्तत्वेनानुवादतो विधानासंभवात् पश्वादयोऽर्थाः सिद्धस्वभावा एव तत्साधनत्वेन विधेयाः, इति तद्विषयं प्रामाण्यं केन निवार्यते, "ननु वस्तुस्वाभाव्यात्रैव भावार्थविषयो विधिरिति तस्य सिद्धेनार्थेन संबन्धासंभवादत्रापि दध्यादिसाध्यभावार्थविधिरेव, न दध्यादिविधिः, ततो न सिद्धार्थविषयता,, "कुतस्तर्हि दध्यादीनां तत्साधनत्वावगतिः,, कार्यमिवात्रापि प्रमाणान्तरासंभवात् तदनुरक्तभावार्थविध्याक्षेपसामर्थ्यात् पश्वेकत्वादीनामिवोपादानशेषत्वेन तदेवमस्तु,अलं प्रक्रियादौरूप्येन, अत्रापि देवतोपरक्तभावार्थविधानसामर्थ्याद्दध्यादेरिवोपादानशेषत्वेन देवताया अपि तत्कारकभूतायाः सिद्धिरिति नेश्वरासिद्धिः, देवताविशेषरूपत्वात् तस्येति ॥

अत्र कारिकाभागेन परः ।

(१२४) देवताशब्दमात्रं चेत्,

युक्तं दध्यादिपदानामत्र प्रमाणान्तरसिद्धार्थविषयत्वेनोपादानशेषभावयोग्यमर्थं प्रतिपादयतां तच्चोदनात्वम्, देवतापदानां तु प्रमाणान्तरसिद्धार्थप्रतिपादकत्वेनासिद्धेर्न तथात्वम्, इत्यानर्थक्याद्यदि परं सामसु स्तोभादीनामिव स्वरूपेणैव कार्यान्वयो नार्थद्वारेणेति चोदनात्वासिद्धेर्न देवतासिद्धिरिति ॥

भागान्तरेणैतत्प्रतिक्षेपः ।

(१२५) नार्थे विज्ञानतो भवेत् ।

युक्तः स्तोभादीनामर्थप्रतिपादकत्वे प्रमाणाभावात् स्वरूपोच्चारणेनैव कार्यान्वयः, देवताश्रुतीनां तु "रौद्रः पशुरुपाकर्तव्यः,, "त्र्यम्बकं यजामहे,, ब्रह्मणे ब्राह्मणमालभेत,, "विष्णुरुपांशुर्यष्टव्यः,, इत्यादिना विविधविभक्त्यर्थान्वयदर्शनाद्दध्यादिश्रुतीनामिवार्थप्रतिपादकत्वसिद्धेरर्थे एव ज्ञानजननात् तद्द्वारेणैवान्वयसिद्धेर्भवत्येव देवतालक्षणार्थचोदनात्वमिति ॥

"ननूक्तं प्रमाणान्तरसिद्धार्थप्रतिपादकत्वाभावादेषामनर्थकत्वम्,, इत्यभ्युच्चययुक्तिमाह ।

(१२६) कारकत्वाच्च नो तस्मादपार्था कारकश्रुतिः ।

यागसंप्रदानकारकत्वेन तावद्देवतालक्षणोऽर्थः श्रूयमाणो दध्यादिवदुपादानशेषभावेन कार्यान्वयं भजत्येव, ततो यदीदंतया न प्रमाणान्तरसिद्धः, ततः "श्रुतिसिद्धार्थमश्रुतोपलब्धौ यत्नवता भवितव्यम्, न श्रुतिशैथिल्यमाचरणीयम्,, इति न्यायेनात्र कारकश्रुत्यन्यथानुपपत्त्या यूपाहवनीयादिशब्दवाच्यार्थवच्छास्त्रसिद्धोऽभ्युपगन्तव्यः, इति तत्प्रतिपादकतया देवताश्रुतीनामनर्थकत्वासिद्धेर्देवतार्थत्वमेवेति ॥

अपिच ।

(१२७) ध्यानश्रुतेश्च सा भिन्ना शब्दतो गम्यतेऽन्यथा।
प्रत्यक्षत्वेन शब्दस्य व्यर्था स्याद् ध्यानचोदना ॥

"यस्यै देवतायै हविर्निरुप्तं स्यात् तां मनसा ध्यायेत्,, इति श्रुतेः शब्दस्य प्रत्यक्षत्वेन ध्यानश्रुत्यानर्थक्याच्छब्दतोऽन्यार्थरूपा देवतेति गम्यते ॥

किंच ।

(१२८) स्तोत्रतश्चार्थरूपासौ देवतेह यतस्तुतिः ।
अर्थे विशिष्टमुद्दिश्य विशिष्टगुणकीर्तनम् ॥

"याज्यानुवाक्याभ्यामिष्टां देवतां स्तुवीत,, इति श्रुतेर्गुणिनो गुणाभिधानं च स्तुतिरित्यभ्युपगमादर्थ एव देवता न तदभिधानात्मकः शब्द इति ॥

नापि विग्रहोऽस्या निराकर्तुं शक्यः श्रुतिसिद्धत्वादित्याह ।

Digitized by Google

(१२६) रूपभेदवती सा च चोद्यते यत् पृथक् पृथक् ।
तां वै ध्यायेत् श्रुतेश्चेति मनसा स्वे हि विग्रहे ॥

यद्यस्माद्, "रूपेणाकृत्या तेजसा प्रभावेण देवतान्तरेभ्यो भिन्नां देवतामभिध्यायेत्,, इति श्रुत्यन्तरेण चोद्यते, अतः पूर्वस्या अपि श्रुतेः "तां मनसा ध्यायेत्,, स्वशरीर एवेत्यर्थः संपद्यते, इति देवतायाः शरीरसिद्धिः ॥

अतः कीदृशं तस्यास्तद्रूपमिति विशेषाकाङ्क्षायाम् ।

(१३०) रूपं तस्याश्च विज्ञेयमर्थवादैः समर्पितम् ।

यथाहि, "अक्ताः शर्करा उपदधाति,, इति श्रुतेः केनाक्ता इति विशेषाकाङ्क्षायाम्, "तेजो वै घृतम्,, इत्यर्थवादाद् द्रव्यविशेषप्रतिपत्तिः, एवमत्रापि रूपविशेषप्रतिपत्तिः ॥

अत एव ।

(१३१) तद्रूपकथनेनैषां स्तुत्यर्थत्वं न हीयते ।

अर्थवादा ह्येवमर्थं विशिष्टं स्तुवन्तोऽर्थवादा इत्युच्यन्ते, अन्यथा निरर्थकत्वेन स्तोभादीनामिवार्थवादत्वायोगात्, अतश्च विधिवाक्यैरपेक्षितत्वात्,

"अर्थवादकृतश्चैष जनानां मतिविभ्रमः,, ।

इत्यप्ययुक्तमुद्घोष्यते भवद्भिः ॥

येषामपि विधीनां नार्थवादतो विशेषस्तेषाम्,

(१३२) वेदप्रान्तेषु विज्ञेयं पुराणादिषु च स्फुटम् ।
देवतानां च सद्रूपमवैकल्याय कर्मणाम् ॥

एवं च वेदान्तेतिहासादीनां सिद्धार्थप्रतिपादकत्वेऽपि कर्मकाण्डापेक्षितदेवताविशेषाकारप्रतिपादकत्वेन तदेकवाक्यतया प्रामाण्यमित्यविरोधः, ततश्च यदुक्तम्,

"उपाख्यानादिरूपेण वृत्तिर्वेदवदेव हि ।
धर्मादौ भारतादीनाम्,,

इति, तद्युक्तमेव, तेभ्यो भ्रान्त्यसंभवात् ॥

एवं च वेदान्तान्तर्भावेनाप्यस्य शास्त्रस्य प्रामाण्यमित्याह ।

(१३३) तेष्वेव परमेशस्य रूपं विद्यात् परापरम् ।
यच्चापि परमं रूपं तच्छैवे तस्य कीर्तितम् ॥

यथा श्वेताश्वतरशाखादौ,

"ईश्वरो द्विविधः प्रोक्तः परश्चापर एव च ।
ताभ्यां परतरस्त्वन्यो यो निर्वक्तुं न पार्यते,, ॥

इति, ततश्च तदपेक्षितपरतरेश्वरस्वरूपप्रतिपादकत्वेनास्य तदेकवाक्यतया प्रमाण्यं भवद्भिरप्यभ्युपगन्तव्यमेव ॥

"ननु वेदान्तानामात्मविषयप्रतिपत्तिकर्तव्यतानिष्ठत्वेनावगतेरीश्वरविषयत्वासंभवात् कुतस्तदेकवाक्यतयास्य प्रामाण्यमित्याह ।

(१३४) आत्मा द्रष्टव्य इत्यादिविधिश्चेश्वर एव हि ।
सर्वं शास्तृस्वरूपं वै श्रूयते यदनन्तरम् ॥

"तत्रापि, "आत्मा द्रष्टव्यो निदिध्यासितव्यः,,इत्यादावात्मशब्देनेश्वर एव ज्ञातव्यतयोच्यते, यतस्तदनन्तरं सर्वेश्वरः सर्वानुग्राहक इत्यात्मसंभवदीश्वरविषयत्वेन सर्वमीश्वरशास्त्रप्रसिद्धं तस्य स्वरूपं श्रूयते ॥

किंच ।

(१३५) अधिकारिण्यणौ शास्त्रं प्रत्यक्षत्वादनर्थकम् ।

यदि तत्रात्मैव विवक्षितः स्यान्नेश्वरः, ततस्तस्मिन् वेदान्तज्ञानाधिकारिण्यात्मनि प्रोक्तक्रमतो ज्ञातृतया स्वसंवेदनसिद्धे "ज्ञातव्यः,, इति शास्त्रं कृतकत्वेनानर्थकमेव, यच्छ्रूयते, "यस्तन्न वेद किमृचा करिष्यति, य इत्तद्विदुस्त इमे समासते,, इति, ततोऽत्रात्मशब्देनेश्वर एव ज्ञातव्यतयोपदिश्यत इत्यभ्युपगन्तव्यम् ॥

अपिच ।

(१३६) नृरुद्रसंज्ञे चेकार्थे दृश्यते हि क्वचिन्मनौ ।

यथा भगवन्तरुद्रेष्वथर्वशिरसि "स एवात्मा स एवेश्वरः,, इत्यत्रात्मशब्दस्येश्वरे प्रयोगो दृश्यत एव ॥

"किमतः,, इत्याह ।

(१३७) क्रियार्थं साधनं दृष्टं तत्स्वरूपावभासकम् ।

अतश्च, "आत्मा ज्ञातव्यः,, इत्यादेरीश्वरप्रतिपत्तिकर्तव्यतानिष्ठत्वेन तत्प्रयुक्तेश्वरस्वरूपप्रतिपादनैकवाक्यतयास्य प्रामाण्यं भवद्भिरप्यभ्युपगन्तव्यमेव ॥

अत्र परः ।

(१३८) मूर्तिमत्त्वेन देवानां कृतत्वं ननु तद्भवेत् ।

यदाहुः,

"चर्मोपमश्चेत् सोऽनित्यः खतुल्यश्चेदसत्समः,, ।

इति, ततः पूर्वोक्तकारकत्वानुपपत्तिरस्येति ॥

आचार्यस्तु मूर्तिमत्त्वमभ्युपगम्याप्येतत् प्रतिक्षिपति ।

(१३९) न शालादिषु तद् दृष्टं स्वरूपं प्रतिपादयेत् ।

नैतदनैकान्तिकत्वाद्, यथाहि, शालखदिरादीनामनित्यानामप्यत्र खदिरे बध्नातीत्यादिश्रुतिभिः कारकत्वम्, एवं देवतानामपि प्रोक्तश्रुतिभिर्भविष्यतीति को विरोधः ॥

Digitized by Google

॥ अथ प्रसन्नराघवनामकनाटकस्य ॥

॥ चतुर्थोऽङ्कः ॥

नेपथ्ये ध्रुवा* गीयते ।

मणिमयमङ्गलदीवो जणअनरेन्दस्स मण्डवे जलइ ।
चण्डानिलोवि पत्तो यस्सिं विहलागमो होइ ॥

पुनर्नेपथ्ये । अरे क्षत्रिया अपसरत लोचनपथात् नन्वयम् ।

कुर्वन् कोपादुदञ्चद्रविकिरणसटापाटलैर्दृष्टिपातै-
रद्यापि क्षत्रकण्ठच्युतरुधिरसरित्सिक्तधारं कुठारम् ।
तीव्रैर्निश्वासपातैः पुनरपि भुवनोत्पातमासूचयद्भि-
र्गर्जन्मौर्वीकचापस्त्रिभुवनविजयी जामदग्न्यः समेति ॥

ततः प्रविशति जामदग्न्यः । साटोपं परिक्रम्य । अहो धृष्टता जनकस्य यदयं हरचापारोपणेन कन्यादानं प्रतिजानीते । परशुं विलोक्य ।

सकलनृपकठोरकण्ठपीठी-
बहलगलद्रुधिरौघधौतधारः ।
तदिदमजनकं जगद् विधत्ते
परशुरयं जमदग्निनन्दनस्य ॥

विमृश्य ।

उदितोऽर्जुनभुजविपिने ज्वलितस्तुङ्गेषु नृपतिवंशेषु ।
निमिकुलकमलकलापं कोपानल किं पुनः स्पृशसि ।

पुनर्विचिन्त्य । अलमस्मिन्नुपेक्षया मनोरथोपनीतजामातृभुजबलावलेपदुर्ललितः खल्वयम् । तथाहि संदिष्टमनेनास्मत्परशोः । त्वं मित्रमित्यादि पठति । अहो अस्य दुरवलेपः ।

यस्योद्यद्घोरधाराज्वलदलितगलद्बाहुशाखासहस्र-
प्रोद्गच्छद्रक्तधारानिवहजितनवोन्मीलदर्कांशुजालः ।
क्ष्मापालः कार्तवीर्यः सुरपुरसुदृशां पुष्पिताशोकशाखि-
भ्रान्तिं दत्त्वापि चित्ते निजपुरसुदृशां शोकशाखी बभूव ॥

अपिच ।

येनाबध्यत नर्मदाम्बुनिवहः सङ्ख्ये च लङ्केश्वर-
स्तस्मिन्नस्मिन् निरमज्जदर्जुनभुजक्षोणीरुहां मण्डलम् ।
क्षत्रस्त्रीनयनाम्बुपूरमिषतः खेलन्ति यत्कैलय-
स्तस्माद्रुक् परशुर्ममायमधुना धाराजलं मुञ्चति ॥

विलोक्य । कथमयं शतानन्दशिष्यस्ताण्ड्यायनः ।

प्रविश्य ताण्ड्यायनः भगवन् अभिवादये ।

जामदग्न्यः । आयुष्मान् भूयाः कथय तावद् अपि नाम भवदुपाध्याययजमानस्य निवृत्ता हरचापारोपणश्रद्धा ।

ताण्ड्यायनः । निवृत्ता ।

जामदग्न्यः । सहर्षं निवृत्ता ।

ताण्ड्यायनः । भगवन् निवृत्ता सहैव चापेन ।

जामदग्न्यः ससंभ्रमं किमात्थ सहैव चापेन निवृत्तेति ।

ताण्ड्यायनः । अथकिम् ।

जामदग्न्यः । स्फुटं कथय तावत् किं वृत्तमिति ।

ताण्ड्यायनः । कस्यचित् ।

अखण्डचण्डिमोद्दण्डभुजदण्डनिपीडितम् ।
भगवन् भृगुमार्तण्ड भग्नं भर्गशरासनम् ॥

जामदग्न्यः । सक्रोधं कस्य ।

ताण्ड्यायनः ।

सुबाहुमारीचपुरःसरा अमी
निशाचराः कौशिकयज्ञघातिनः ।
वशे स्थिता यस्य

जामदग्न्यः । अलमतः परं ज्ञातः खलु खलानामग्रणीर्निशाचरग्रामणीः ।

ताण्ड्यायनः । स्वगतं कथं दशकण्ठेन धनुर्भग्नमिति प्रतीतं भगवता भवतु तावत् ।

जामदग्न्यः । सक्रोधम् । अयमयमिदानीम् ।

नृपशत * सुकुमारकण्ठनाली-
कदनकलाकुशलः परश्वधो मे ।
दशवदनकठोरकण्ठपीठी-
कदनविनोदविदग्धतां दधातु ॥

विमृश्य अथवा ।

यः कर्तार्जुनभूरुहाद्भुतभुजाशाखासहस्रच्छिदां
दम्भोलेर्गिरिकूटपाटनपटोः शौण्डीर्यतो लज्जते ।
तस्यैतस्य परेतराजसदनद्वारः कुठारस्य मे
का श्लाघा दशकण्ठकण्ठकदलीकाण्डावलीखण्डने† ॥

पुनर्विचिन्त्य । तथाप्यनुचितमुदासितुमेतस्मिन् कृतागसि रक्षसि तदिदानीम् ।

दक्षिणस्याम्बुधेर्मध्ये कृत्वा कोङ्कणमष्टमम् ।
मद्बाणजन्मा दहनो लङ्कातङ्काय जायताम् ॥

इति साटोपं परिक्रामति ।

ताण्ड्यायनः । स्वगतम् । दिष्ट्या स्वस्ति क्षत्रियकुलाय ।

---

* ध्रुवा हि नाम नाट्यस्य मुख्याः प्राणाः । यथाह कविराजो राजशेखरः स्वप्रणीतबालरामायणाख्ये नाटके । "ध्रुवा हि नाम नाट्यस्य प्रथमे प्राणाः । तथाहि ।

प्रथयति पात्रविशेषान् सामाजिकजनमनांसि रञ्जयति ।
अनुसंदधाति च रसान् नाट्यविधाने ध्रुवा गीतिः" ॥

* नृपकुलसुकुमारेति वा पाठः ।

† छेदनइति वा पाठः ।

Digitized by Google

नेपथ्ये । अहो नियोगिनः कृतविवाहमङ्गलयोः सीतारामचन्द्रयोः स्वस्तिवाचनिका द्विजा आहूयन्ताम् ।

जामदग्न्यः । परिवृत्य सक्रोधम् । आः ब्रह्मबन्धो कथमलीकदशकण्ठकीर्तिदानेन प्रतारितोऽस्मि । नन्वयमन्यः कोऽपि जनकजामाता ।

ताण्ड्यायनः । भगवन् मम को वापराधः । अर्धोक्त एव भगवता भ्रान्तं मयापि संभ्रान्तम् ।

जामदग्न्यः । तन् निःशेषं तावत् कथय ।

ताण्ड्यायनः ।

शरायवर्तिनः प्रतापलेशस्य गताः पराभवम् ॥

तथैवाखण्डचण्डिमेत्यादि पठति ।

जामदग्न्यः । कः पुनरयं मारीचदमनः ।

ताण्ड्यायनः ।

ये चव्यचङ्गचरुभागभुवः कुमाराः
संजज्ञिरे दशरथस्य वधूजनेन ।
तेषामयं निरुपमः प्रथमः कुमारो
रामाभिधः कुशिकराजतनूजशिष्यः ॥

जामदग्न्यः । क्षणं विभाव्य सामर्षम् ।

दुर्द्धर्षाः सुरसिद्धकिन्नरनरैस्त्यक्तक्रमं वक्रतां
प्राप्ते यत्र विधातरीव तरसा तिस्रोऽपि दग्धाः पुरः ।
तद् भग्नं यदि राघवेण शिशुना चण्डीपतेः कार्मुकं

ताण्ड्यायनः । स्वगतम् । किमधुना वक्ष्यति जामदग्न्यः ।

तन् मग्नं कुलमेव तर्कय रघोर्मच्छस्त्रधाराम्भसि ॥

ताण्ड्यायनः । संरब्धोऽयं भगवान् तमिमं वृत्तान्तमुपाध्यायस्य कथयामीति निष्क्रान्तः ।

जामदग्न्यः । विलोक्य । अभिनवविवाहमङ्गलतया तर्कयामि स एष रामः सानुज इति । सहर्षं निर्वर्ण्य । अर्धमुग्धः खल्वयं जनो यदेनं काम इति वक्तव्ये राम इति जल्पति । पुनर्निर्वर्ण्य ।

सौन्दर्यं मदनादपि प्रथयति प्रौढिप्रकर्षं पुरां
भेत्तारं मदनारिमप्यधरयत्युद्दामदोःक्रीडितम् ।
मुग्धत्वं मदनारिमौलिशशिनोऽप्युत्कर्षमालम्बते
मूर्तस्तत् किमसौ रसैर्विरचितः शृङ्गारवीराद्भुतैः ॥

ततः प्रविशतो रामलक्ष्मणौ ।

लक्ष्मणः । सकौतुकम् ।

मौर्वीं धनुस्तनुरियं च बिभर्ति मौञ्जीं
बाणाः कुशाश्च विलसन्ति करे सितायाः ।
धारोज्ज्वलः परशुरेव कमण्डलुश्च
तद् वीरशान्तरसयोः किमयं विकारः ॥

आर्य किं पुनरिदं ब्रह्मक्षत्रवर्णात्मकं चित्रमिव स्फुरति ।

रामः । वत्स न विदितं ते । नन्वयं स भगवान् भार्गवः ।

वेध्यं क्रौञ्चमहीधरस्य शिखरं देयं धरित्रीतलं
प्रत्यर्थिक्षितिखण्डदण्डनविधिक्रीडाविधेयोऽम्बुधिः ।
जेयस्तारकसूदनो युधि करक्रीडाकुठारस्य च
च्छेद्यं यस्य बभूव हैहयपतेरुद्दामदोःकाननम् ॥

लक्ष्मणः । तर्हि विस्मयनीयशीलोऽयं भगवान् ।

रामः । विस्मयनीयशीलानां शिखामणिरिति वक्तव्यम् । अयं हि ।

एकः स्वर्णमहीधरां क्षितिमिमां स्वर्णैकशृङ्गीं यथा
गामेकां प्रतिपाद्य कश्यपमुनौ न स्वात्मने श्लाघते ।
किंच क्रौञ्चगिरिं गिरीशतनयस्याविद्धशक्तिव्रतं
विद्धा बाणगणैरुदारहृदयो वैलक्ष्यमालम्बते ॥

उभौ परिक्रामतः ।

रामः । अञ्जलिं बद्धा भगवन् भृगुकुलशिरःशेखरशिखण्डक एष सानुजस्य मे परमोदात्तरमणीयपरिणामः प्रणामः ।

जामदग्न्यः । समरविजयी भूयाः ।

रामः । भगवन् भृगुकुलमौलिमाणिक्य अनुगृहीतोऽस्मि ।

भार्गवः । स्वगतं सकरुणम् ।

रामे चन्द्राभिरामे विनयवति शिशौ किं प्रकुप्यातिमात्रं

विमृश्य सक्रोधम् ।

हुं चापं चन्द्रमौलेश्चपलमतिरसाविक्षुभञ्जं * बभञ्ज ।

पुनः सानुक्रोशम् ।

बाला वैधव्यदीना जनकनृपसुता नार्हतीयं मदस्त्रात्

पुनर्विचिन्त्य सामर्षम् ।

आः शान्तो मे कुठारः कथमयमधुना रेणुकाकण्ठशत्रुः ॥

प्रकाशं दाशरथे इयमसौ मे त्वयि समुदाचारानुसारिणी वाग्वृत्तिरेव ।

रामः । विहस्य मनोवृत्तिस्तु कीदृशी ।

भार्गवः ।

चण्डीशकार्मुकविमर्दविवर्धमान-
दर्पावलेपसविशेषविकाशभाजोः ।
बाह्वोस्तवाहमधुना मधुना समानै-
राराधयामि रुधिरैः कठिनं कुठारम् ॥

रामः । भगवन् निग्रहानुग्रहयोः स्वाधीनोऽयं जनः परं ते कोपबीजं ज्ञातुमिच्छामि ।

भार्गवः । अहो दर्पान्धता यदात्मना कृतमस्माभिरुक्तमपि नावधारयति निजदुर्विनयम् । ननु रे

* विक्षुदण्डमिति वा पाठः ।

येनोपदिष्टमद्यापि पुरस्त्रीविरहव्रतम् ।
न भुग्नं तत् त्वया भग्नं जगद्गुरुशरासनम् ॥

रामः । भगवन् अलीकलोकवार्तया निरपराधे मयि मुधा कोपकलङ्कितोऽसि ।

भार्गवः । तत् किं स्वस्ति हरकार्मुकाय ।

रामः । नहिनहि ।

भार्गवः । तत् कथं निरपराधोऽसि ।

रामः ।

मया स्पृष्टं नवा स्पृष्टं कार्मुकं पुरवैरिणः ।
भगवन्नात्मनैवेदमभज्यत करोमि किम् ॥

भार्गवः । आः कथं रे चन्दनदिग्धं नाराचं निधाय हृदयं मे शीतलयसि । तदलमनेन कुठारमुद्यम्य ।

हे राम कामरिपुकार्मुकमर्मघात-
संजातपातक तवैष कठोरधारः ।
सीताकरव्यतिकरप्रतिकूलबन्धुः
कण्ठं पुरा विशतु निष्करुणः कुठारः ॥

तत् प्रवीरो भव ।

रामः ।

हारः कण्ठं विशतु यदिवा तीक्ष्णधारः कुठारः
स्त्रीणां नेत्राण्यधिवसतु नः कज्जलं वा जलं वा ।
संपश्यामो ध्रुवमिह सुखं प्रेतभर्तुर्मुखं वा
यद्वा तद्वा भवतु न वयं ब्राह्मणेषु प्रवीराः ॥

जामदग्न्यः । आः कथं मामपि प्रणतिपात्रं ब्राह्मणमात्रमिव मन्यसे ।

पुनः सामर्षम् ।

जानीषे नहि जामदग्न्यमपि रे यद्दीर्घदोःकन्दल-
द्वन्द्वास्कन्दितबाहुना रणभुविस्कन्देन मन्दौजसा ।
नाद्याद्योद्गुजसंपदं मम कथं वक्रानुसारादिति
क्रुद्धेनोद्धृतमैचि शङ्करकरन्यस्तं विधातुः शिरः ॥

पुनः सामर्षम् । किमात्थ रे किमात्थ न वयं ब्राह्मणेषु प्रवीरा इति । कथं क्षत्रियजातिगर्वितो ब्राह्मणजातिं तृणाय मन्यसे । तदिदानीमावयोः का गरीयसीति संग्रामतुलेव निर्णेष्यते ।

रामः ।

भो ब्रह्मन् भवता समं न घटते संग्रामवार्तापि नः
सर्वे हीनबला वयं बलवतां यूयं स्थिता मूर्धनि ।

लक्ष्मणः । जामदग्न्य एवमेतत् ।

यस्मादेकगुणं शरासनमिदं सुव्यक्तमुर्वीभुजा-
मस्माकं भवतां पुनर्नवगुणं यज्ञोपवीतं बलम् ॥

रामः । वत्सालमिह माननीये मुनौ दुर्विनयवैदग्ध्येन ।

जामदग्न्यः । अस्य को दोषः ।

दारैर्मुक्तकुचाङ्कुशैः परिवृतं प्राचीनमेषां नृपं
नाहिंसीद्यदसौ कुठारहतकस्तस्यैतदुज्जृम्भितम् ।
यन्नारीकवचान्वयप्रणयिनां क्षत्राधमानामिमा
दुर्वाचः प्रविशन्ति मे श्रवणयोर्धिक् क्षत्रगोत्रे कृपाम् ॥

रामः । अलमिह वीरकण्ठे कठोरकोपतया । तत् क्षम्यताम् ।

जामदग्न्यः । आः किमुच्यते वीरकण्ठ इति । विषकण्ठः खल्वसौ ।

लक्ष्मणः । भगवन् शितिकण्ठशिष्येण विशेषतः क्षन्तव्यम् ।

जामदग्न्यः। आः कथं विषकण्ठनामसाम्येन त्वमपि मे गुरुः ।

लक्ष्मणः । विहस्य । भगवन्नन्याभिसंधानेन मयेदमुक्तं यत् किल ।

किरीटमधिरूढेऽपि बाले प्रालेयरोचिषि ।
शितिकण्ठस्य किं चित्ते धत्ते कोपाङ्कुरः पदम् ॥

तद्भवान् तदन्तेवासीति विशेषतः क्षन्तुमर्हति ।

जामदग्न्यः । स्वगतम् । अहो अस्य क्षत्रियबटोर्वाक्परिपाटीपाटवम् । भवतु प्रकाशम् । तदिदं क्षान्तमेव मयायं तु न क्षमते प्रकृतिकठोरः कुठारः । शीलं न वेत्सि कथमस्य ।

क्रीडाविनिर्मितसुदुर्मददोर्विलास-
निःशेषराजकवधस्य परश्वधस्य ।
कीलालकीकसकचैः परितो विचिन्त्य
येन त्रिधापि विदधे पृथिवी त्रिवर्णा ॥

पुनः सामर्षम् । कथमस्य हरप्रसादपरशोः शीलमपरिशीलितं ते ।

यत्र क्रामति सङ्गराङ्गणभुवं दुर्वारधाराज्वल-
त्तुण्णक्षत्रकिशोरकण्ठरुधिरैर्नीरेणुका भूरभूत् ।
तादृग्वीरवरस्वयंवरपरस्वर्लोककन्याकर-
क्रीडापुष्करदामरेणुभिरभूद् द्यौरेव रेणूत्कटा ॥

लक्ष्मणः । भगवन् एतत् सत्यं यत् किल भवत्कुठारधाराज्वलविलसितेन नीरेणुका भूरभूदिति ।

जामदग्न्यः । स्वगतम् । आः कथं रेणुकावृत्तान्तेन मर्म विध्यति । भवतु प्रकाशम् । अये क्षत्रियपोतालमिह निरपराधे भवति मुधा परश्वधपातेन । तदयं मे प्रकृतिकठोरभाषिणं भवत्कण्ठमेव शातयति कुठारः ।

नेपथ्ये । अये जामदग्न्य कथमतिप्रगल्भसे । तदिदमिदानीं भवच्छासनाय शरासनमानीयते ।

जामदग्न्यः । विहस्य । कथमयं जनकः । उच्चैः अये या-

ज्ञवल्क्यशिष्य किं भवतः शरासनेन पद्मासनमेवावलम्बस्व । पुनः सोत्प्रासम् ।

युष्माकं भोः सुघटितबहुन्यस्तपद्मासकण्ठा
मिथ्योत्कण्ठा किमिति समिति क्षत्रियश्रोत्रियाणाम् ।
तेऽन्ये चञ्चत्करतलचलच्चण्डनिस्त्रिंशधारा-
धौताराातिद्विपमदमषीपङ्कपूराः प्रवीराः ॥

तदलं भवता। एतावेव तावत् क्षत्रियस्फुलिङ्गौ निर्वापयामि।

पुनर्नेपथ्ये । अये जामग्न्य कथं तथा शमधनसमृद्धस्य जमदग्नेस्तनयोऽपि शमदुर्गतोऽसि संवृत्तः ।

जामदग्न्यः । कथमयमाङ्गिरसः । उच्चैः अये शतानन्द कथय तावदिदमेवंविधं शमाभिधानं कस्मादुपात्तं भगवतो गौतमाद्द्वा गोत्रभिदो वा ।

नेपथ्ये । आः क्षत्रियापुत्र निजजननीकण्ठताण्डवितकुठार कुलाङ्गार कथं तपस्तुङ्गमाङ्गिरसमपि कुलं कलङ्कयसि ।

जामदग्न्यः। आः पाप कुलपांसन पांसुलापुत्र कथं भृगूणामये तपस्ताण्डवं मण्डयसि ।

रामः । भगवन् सकललोकविख्यातमिदं भृगूणामाङ्गिरसां च कुलम् । तपोविशेषतस्तु भर्गशिष्यस्य । अत एव विज्ञापयामि

तपःशान्तं चेतः स्फटिकमणिमालापरिकरः
कुशाः कुण्डी दण्डः सततमुटजावासनिरतिः ।
मुनीनामेतद्वः समुचितमुदयं न वचनं
न वक्रभ्रूभङ्गो न शरधनुषी नापि परशुः ॥

पुनः सविस्मयम् । भवानेव तावत् विचारयतु ।

क्व परशुरशुभस्ते कुत्र गोत्रं पवित्रं
क्व नु धनुरिदमुग्रं निर्मलं कुत्र शीलम्
घनसमरकराला कुत्र नाराचहेला
कुशकिसलयलीला कुत्र वा पर्णशाला ॥

जामदग्न्यः । कथमन्यमिव मां प्रणतिपात्रं मुनिमात्रं मन्यसे । स एष जामदग्न्यः खल्वहम् ।

क्षुण्णक्षत्रकठोरकण्ठविगलत्कीलालधारासरिन्-
निर्वृत्ताभिषवस्य कृत्तशिरसां केशान् कुशान् कुर्वतः ।
गृह्णन् रक्तजलाञ्जलीन् पितृगणो यस्य क्षणं विस्मितः
सन्तोषेण जुगुप्सया करुणया त्रासेन हासेन च ॥

तदलमिदानीमपि ।

कृत्वा त्रिःसप्तकृत्वः समिति विशसनं पूर्वमुर्वीपतीनां
कृत्वान्यत् सप्तकृत्वः पुनरपि कदनं दुर्मदानां नृपाणाम् ।
निर्माय क्ष्मापतीनां प्रतिसमरहृतैरुत्तमैरुत्तमाङ्गैः
कापालीमक्षमालां झटिति* भगवतो भैरवस्यार्पयामि ॥

* झगितीति वा पाठः ।

रामः ।

प्रसीद त्वं रोषाद्विरम कुरु मे चेतसि गिरं
चिरं यच्चायासैर्बहुभिरिह वारैर्जितमभूत् ।
यशोवित्तं वृत्तं कितव इव विक्षोभतरलं
तदेतस्मिन् वारे भृगुतिलक मा हारय मुधा ॥

जामदग्न्यः । कथं रे हारयिष्यामि । विमृश्य । अथवा ।

किं नाम वाग्डम्बरपण्डितेषु
युष्मासु वाणीः प्रचुराः प्रयुञ्जे ।
बाणान् रिपुप्राणहरान् मदीयान्
सर्वेऽपि यूयं सहिताः सहध्वम् ॥

रामः । किमन्यैर्नन्वहमेव हरशरासनारोपणोपनीतजानकीकरकिसलयलीलानिहितकमलमालिकामिलदलिपटलकोलाहलसंगीतयशःपरिमलेन वक्षस्थलेन सहिष्ये ।

जामदग्न्यः ।

ईशत्यक्तपुराणचापदलनप्रोद्भूतगर्वोद्धुति-
व्यग्रस्त्वं कतरः स मे तव गुरुः सोढुं न शक्तः शरान् ।
तुष्टादिष्टवरप्रदाद्भगवतः पद्मासनात् सादरं
मन्नाराचभयादयाचत किल ब्राह्मीं तनूं कौशिकः ॥

रामः । स्वगतम् । कथं भगवन्तं विश्वामित्रमधिक्षिपति । तदतःपरं न सहिष्ये । प्रकाशम् ।

ईशत्यक्तपुराणचापदलनप्रोद्भूतगर्वोद्धुति-
व्यग्रोऽहं कतरः स ते मम गुरुः सोढुं न शक्तः शरान् ॥
तुष्टादिष्टवरप्रदाद्भगवतः पद्मासनात् सादरं
त्वन्नाराचभयादयाचत किल ब्राह्मीं तनूं कौशिकः ॥

इति पदव्यत्यासेन पुनः श्लोकं पठति । पुनः साटोपम् । अये जामदग्न्य ।

तत् कोदण्डं कुलिशकठिनं भग्नमेतेन भग्नं
मग्नं शल्यं तव हृदि महद्भग्नमेतावता किम् ।
त्रैयक्षं वा भवतु यदि वा नाम नारायणीयं
नैतत् किञ्चिद्गणयति स मे दुर्मदो दोर्विलासः ॥

जामदग्न्यः । सहर्षम् । साधु रे क्षत्रियपोत साधु । यत् किल जामदग्न्यनाम्नश्चण्डधाम्नः पुरतः खद्योत इव विद्योतसे । किमात्थ रे किमात्थ ।

रामः । तदेव पठति नन्विदं भूयोऽप्युच्यते । पुनस्तदेव पठति ।

जामदग्न्यः । साधु स्मारितोऽस्मि ।

रामः । किं तत् ।

जामदग्न्यः ।

कराघाताद्विष्णोस्तरलवनमालापरिमल-
भ्रमद्भृङ्गध्वानद्विगुणितविकाशः समजनि ।
स यस्य ज्याघोषः सुररिपुवधूवर्गरुदित-
ध्वनिस्वाध्यायानां प्रणव इव तत् कार्मुकमिदम् ॥

रामः ।

करपङ्करुहक्रोडे क्रीडितं येन शार्ङ्गिणः । तदेतत् ।

जामदग्न्यः ।

अथ किं यदि शक्तोऽसि गृहाण विगृहाण वा ॥

रामः । गृह्णामि ।

जामदग्न्यः । तदेहि आप्यायमानभवद्बन्धुजनबन्धुरां वसुन्धरामतिक्रम्य समरतमां समामवतराव इति निष्क्रान्तौ ।

लक्ष्मणः । विलोक्य सहर्षं सकौतुकं च ।

मा शाम्भवं धनुरिवेदमपि प्रयातु
भङ्गप्रसङ्गमिति मन्दचलद्भुजेन ।
आर्येण कार्मुकमपीदमहो सहेलं
चक्रीकृतं भगवतो गरुडध्वजस्य ॥

नेपथ्ये । अहो कौतुकम् ।

उद्विग्नश्चापचक्रादमरपरिहृतव्योमरन्ध्रावगाही
बाणोऽयं राघवस्य त्रिदशपुरगतिच्छेदकृद्भार्गवस्य ।
हंसीभूतः सुरस्त्रीकरकमलगलत्पुष्पसौरभ्यलुभ्य-
द्भृङ्गीसङ्गीतभङ्गीपरिचलितयशाः स्वर्गपर्यङ्कमेति ॥

ततः प्रविशतो रामजामदग्न्यौ ।

जामदग्न्यः । रामं विलोक्य निर्वर्ण्य च । स्वगतम् ।

त्रिलोकी कोकीयं मुदमुदयतानेन लभते
विकाशं वा धत्ते मुनिजनमनःपङ्कजवनम् ।
अये कोऽयं बालः कुवलयदलश्यामलतनु-
र्जगद्योनिर्ज्योतिः कथमिदमहो तत् परिणतम् ॥

पुनर्विमृश्य ।

आपूरणाय पुरवैरिशरासनस्य
बाणात्मना परिणतः* किल लीलया यः ।
आरोपणाय पुनरस्य स एव शङ्के
बालात्मना परिणतः पुरुषः पुराणः ॥

प्रकाशम् । वत्स इतः ।

रामः । सलज्जमधोमुखस्तिष्ठति ।

जामदग्न्यः । उपसृत्य रामस्य चिबुकमुन्नमय्य किमिति लज्जास्थानम् ।

कमल†बन्धुविलोचन यस्त्वया

* परिणतः पुरुषः पुराण इति वा पाठः ।

† अलजबन्धुरिति वा पाठः ।

स्वमहिमोन्नमनैरधरीकृतः ।
न किमसावधरीकुरुते नर-
स्त्रिदशकोटिकिरीटमणीनपि ॥

रामः । अञ्जलिं बद्ध्वा भगवच्चलमनेन । दुर्विनयपङ्कमलिनीकृतमात्मानं तावद्भवच्चरणनखकिरणतरङ्गिणीजलेन क्षालयामि ।

चण्डमेव किल तिग्मरोचिषः
सौम्यमेव किल शीतरोचिषः ।
चण्डसौम्यमिति कौतुकावहं
नौमि तावकमहं महन्महः ॥

इति पादयोः पतति ।

जामदग्न्यः । अयि कल्याणनिधे आशीरुक्तिरपि त्वयि पुनरुक्तिरेव । तथापीदमाशास्महे ।

यशःपूरं दूरं तनु सुतनुनेत्रोत्पलवनी-
तमस्तन्द्राचण्डातप तप सहस्राणि शरदाम् ।
इयं चास्तां युष्मच्छरशमितलङ्केश्वरशिरः-
श्रितोत्सङ्गा नन्दत्सुरनरभुजङ्गा त्रिजगती ॥

तदनुजानीहि मामिति निष्क्रान्तः ।

रामो लक्ष्मणं प्रति । ननु कथं नयनपथमतिक्रान्त एव भगवान् तदेहि भृगुकुलतिलकवियोगखिन्नमात्मानं बन्धुजनविलोकनेन विनोदयावः ।

॥ इति निष्क्रान्ताः सर्वे ॥

॥ चतुर्थोऽङ्कः ॥

॥ श्रीः ॥

॥ सिद्धान्ततत्त्वविवेकपरीक्षा ॥

यत् खलु

स्थिरं प्रत्यक् चलं भाति खस्थं प्राग्भूभ्रमान्नृणाम् ।
प्रवहो व्यर्थ इत्यार्यभटोक्तिः शणिवृहोत्तरम् ॥
यत् सर्वतो निराधारं स्वोर्ध्वदेशागतं गुरु ।
स्वस्थान एव तन्नूनं पततीत्यपि निर्णयः ॥
असद्भ्रमणं चेन्द्राम्नानार्षं स्वीकृतं तु यत् ।
भूमावपि ध्रुवायोगात् तत् तुच्छं प्रवहे गते ॥

इत्येवं धरणेः स्वाचं परितो भ्रमणस्य निरासाय कमलाकरोऽभिहितवांस्तदावहवायुसहितायाः सर्वसहाया आवर्तनमनवसायैव ।

एवं

अथाच गोलपरिधेर्ज्ञानं व्यासाद्बोधतः ।
परिधिज्ञानतश्चैवं व्यासज्ञानं फलं तथा ॥

गणितादुच्यमहं सूक्ष्मं सूर्यसिद्धान्तसंमतम् ।
यन्मानतः परिच्छिन्ने व्यासे ज्ञाते ततः किल ॥
न ज्ञायते तत्परिधिश्चैवं परिधिबोधतः ।
नैव विज्ञायते व्यासस्तन्मानेन कथंचन ॥
सुसूक्ष्मरीतितः प्राज्ञैरवर्गपदवद्ध्रुवम् ।
अतः कृपालुनात्र श्रीसूर्येणैवान्यथा कृतम् ॥
व्यासवर्गाद्दशगुणात् पदं भूपरिधिर्भवेत् ।
व्यासः स्यात् परिधेर्वर्गाद्दिग्भक्ताच्च पदं त्विह ॥
रुद्राहतव्यासदलोत्थवृत्ते
व्यासोत्क्रमज्या वशतः क्रमज्या ।
या तत्समोऽयं परिधिः सुसूक्ष्मो
व्यासैकमानाद्दशमूलरूपः ॥
दिक्संगुणा व्यासकृतिर्ययोः स्याद्-
घातस्तयोर्योगदलोत्थवृत्ते ।
तदल्पतुल्योत्क्रमशिञ्जिनीं च
दत्त्वा क्रमज्यामितरेखिका या ॥
स्यात् तत्समो वा परिधिस्त्वनेको-
त्क्रमज्ययाप्यत्र स एव बोध्यः ।
अनेकतद्वृत्तवशाद्विधेन्द्रै-
स्तदेकघातोत्थपदप्रसिद्ध्या ॥
समश्रुतेस्तुल्यचतुर्भुजस्य
क्षेत्रस्य यस्यास्ति फलं खचन्द्राः ।
तद्बाहुरेखासम एव रूप-
व्यासेऽतिसूक्ष्मः परिधिर्मदिष्टः ॥
रूपव्यासे खङ्गतुल्यान् विभागान्
कृत्वा वृत्तं भास्करीयैर्विलेख्यम् ।
तत्र त्रिघ्नव्याससूत्रप्रमाणं
वृत्तं त्यक्त्वा शेषकं यच्च तत्र ॥
किंचिन्न्यूनैः सार्धनागै ८ । २९ । ४५ । ३६ विभागै-
र्नातः सम्यग्भास्करोक्तः प्रकारः ।
व्यासाद्वृत्तस्योदितः सम्यगस्मा-
दार्षोक्तो दिग्रेखिकामूलरूपः ॥
चक्रलिप्तावृतौ केचिद्रसाग्न्यष्टाङ्क ९८ ७६ विस्तरम् ।
नियतं कल्पयित्वाज्ञाः सौरे स्थूलत्वदूषणम् ॥
वदन्ति शिल्पवित् प्रोक्तवृत्तसंमापनादिह ।
शुद्धसौरप्रतीत्यर्थं कुरु तन्मुखभञ्जनम् ॥
व्यासस्य वर्गवर्गाच्च पञ्चघ्नादष्टभाजितात् ।
पदं क्षेत्रफलं ज्ञेयं फलाद्व्यासो विलोमतः ॥
अथवा परिधेर्वर्गवर्गात् खाङ्गेन्दुभाजितात् ।
पदं क्षेत्रफलं चास्मात् परिधिस्तु विलोमतः ॥
पदं रेखात्मकं ग्राह्यं वास्तवं यदि चान्तरात् ।
पदस्यानयनं स्वेष्टं तर्हि तद्गणितात् कुरु ॥
रामा नवाब्ध्यब्धयोऽर्का ३।९।४४।१२ दशानां मूलमुच्यते ।
रूपव्यासे तु परिधिर्दशमूलमितः स तु ॥
इष्टव्यासेन गुणितः स्वेष्टव्यासे प्रजायते ।
शून्यं सप्ताब्धयस्तर्कदस्रा रामाः ०।४७।२६।३ फलं भवेत् ॥
रूपव्यासे निजव्यासवर्गघ्नं स्वस्य तद्भवेत् ।
शून्यं रामेषवः शून्ययमा वेदेषवो ० । ५३ । २० । ५४ हताः ॥
व्यासेन तत्कृतिर्वात्र फलमेव मनेकधा ।
कथंचिन्नियतव्यासे परिधिर्नियतो नहि ॥

इत्यनेन व्यासवर्गाद्दशगुणात् पदं परिधिर्भवतीत्यस्यैव प्रकारस्य सूक्ष्मत्वमुक्तं तदसत् । अस्य त्वतिस्थूलत्वात् । तथाहि ।

महदयुतादि व्यासार्धं प्रकल्प्य वृत्तशतांशादपि सूक्ष्मविभागस्य ज्योत्पत्तिविधिना ज्या साध्या । यत्संख्याकस्य विभागस्य ज्या तत्संख्यया सा गुणिता सती परिधिर्भवति । यतः शतांशादपि सूक्ष्मोंऽशो वृत्ते समः स्यादिति युक्तियुक्तोऽतिस्पष्टः श्रीभास्कराचार्योक्तः पन्था एव व्यासात् परिध्यवगमाय शरणम् । तथाच कमलाकरेणैव तत्त्वविवेके स्पष्टाधिकारे संसाधिता षष्टित्रिज्यायामेकांशज्येयं १ । २ । ४९ । ४३ । १५ यावदयुतेन निहत्य षष्ट्या ह्रियते तावदयुतव्यासार्धे एकांशज्या १७४ । ३१ । २६ । ४८ । २० एतावती लभ्यते । इयमुक्तयुक्त्या षष्ट्यधिकशतत्रयाहता ६२८२८ । ४० । ५० अयुतद्वयव्यासे सूक्ष्मं परिधिमानं भवेत् । तदपि वास्तवपरिधिमानात् किंचिदल्पं स्यात् । जीवायाश्चापतोऽल्पत्वात् । व्यासवर्गाद्दशगुणादित्यादिरीत्या तस्मिन् व्यासे परिधिमानं ६३२४५ । ३३ । ११ । ३२ एतावल्लभ्यते । तदसत् । पूर्वलब्धपरिधिमानादत्यधिकत्वात् ।

ननु पूर्वलब्धपरिधिमानतोऽभ्यधिकं ६३२४५ । ३३ । ११ । ३२ एतद्वास्तवं परिधिमानं भवितुमर्हति । परिधेः षष्ट्यधिकशतत्रयतमस्याप्यंशस्य तज्ज्यकातः किंचिदधिकत्वाद्वास्तवपरिधिमानस्य खाङ्गत्रिहततज्ज्यकातः सुतरामधिकत्वादिति चेन्न । ६३२४५ । ३३ । ११ । ३२ एतन्मानस्य वास्तवपरिधिमानतोऽप्यत्यधिकत्वात् । तथाहि ।

चापस्यैकप्रान्त एव परिधिं स्पृशतः सूत्रस्य तस्मात् स्पर्शस्थानात् केन्द्रचापापरप्रान्तयोर्लग्नं सूत्रं यावत् खण्डं तच्चापच्छायाख्यं स्वचापतश्चापं च स्वजीवातो महद्भवतीति प्रथमं तावत् प्रदर्श्यते । तत्र त्रीणि त्र्यस्राणि भवन्ति । तेष्वाद्ये चापपूर्णज्या व्यासार्धं च भुजौ व्यासार्धं भूमिर्जीवा लम्बो व्यासार्धजीवयोर्घातार्धं च फलम् । द्वितीये वक्रत्रिभुजे व्यासार्धे

भुजौ चापं भूमिर्व्यासार्धमेव लम्बो व्यासार्धचापयोर्घातार्धं फलम् । तृतीये च केन्द्राच्छायाग्रपर्यन्तं सूत्रं छाया च भुजौ व्यासार्धं भूश्छायैव लम्बो व्यासार्धच्छाययोर्घातार्धं फलम् । एतानि फलानि यथोत्तरं महान्ति । उक्तत्र्यस्राणामुत्तरोत्तरं महत्त्वात् । अतस्तेषु फलेषु क्रमेण व्यासार्धदलेनापवर्तितेषु जीवातश्चापं महत् ततश्च तच्छाया महतीति स्फुटमवसीयते । एवं कोटिज्यया भुजज्या लभ्यते तद्वा त्रिज्यया केत्यनुपातेनायुतव्यासार्धे लब्धैकांशच्छाया १७४ । ३३ । २ । २६ । ३ इयं यावत् खाङ्कत्रिभिर्हन्यते तावत् फलमिदम् ६२८३८ । १४ । ३६ । ८ वास्तवपरिधिमानादधिकमेव स्यात् । छायायाश्चापतोऽधिकत्वात् । अस्मादधिकमानादपि व्यासवर्गाद्दशगुणादित्यादिप्रकारेणानीतस्य फलस्य ६३२४५ । ३३ । ११ । ३२ अत्यधिकत्वात् स प्रकारोऽत्यन्तं स्थूल इति कमलाकरोक्तमत्यंशज्जीवाद्वारैव सिद्धम् ।

एवं वास्तवपरिधिमानात् किंचिदल्पस्यास्य ६२८२८ । ४० । ५० किंचिदधिकस्यास्य च ६२८३८ । १४ । ३६ । १८ योगार्धं ६२८३३ । २७ । ४३ । ९ अयुतद्वयव्यासे वास्तवपरिधिमानासन्नं भवितुमर्हति । वस्तुतस्त्वयुतमितत्रिज्यायां ज्योत्पत्तिविधिनैककलायाः सूक्ष्मां जीवां संसाध्य तस्मादानीतं परिधिमानं द्विकाग्न्यष्टयमर्तु ६२८३२ मितमेव वास्तवमानात्यासन्नं सिद्ध्यति । तस्मात्

> व्यासे भनन्दाग्निहते विभक्ते
> खबाणसूर्यैः परिधिस्तु सूक्ष्मः ।

इति श्रीमद्भास्कराचार्योक्तः प्रकार एव सूक्ष्मतर इति गाणितिकैः सम्यग् विभावनीयम् ।

एतेन रुद्राहतव्यासदलेत्यादिपद्येष्वभिहिताः प्रकारा अप्यत्यन्तस्थूलत्वाच्चितरां निरस्ताः ।

एवं

> सार्धानि षट्सहस्राणि ६५०० योजनानि विवस्वतः ।
> विष्कम्भो मण्डलस्येन्दोः सहाशीत्या चतुःशती ४८० ॥
> क्षितिजस्याब्धिबाणाद्रिप्रमितस्त्रिलवान्वितः ७५४ । २० ।
> दिगंशोनेषुवेदेन्दुप्रमितः १४४ । ५४ शशिजस्य च ॥
> व्यङ्घ्रीषुदन्तवसवो ८३२४ । ४५ गुरोरथ भृगोस्तथा ।
> विंशत्यंशोनसार्धाग्निनन्दाब्धि ४९३ । २७ प्रमितस्तथा ॥
> शनेः पञ्चगुणार्कांशरसाभ्रद्रीन्द्रसंयुतिः १४७७६ । २५ ।
> विष्कम्भो योजनैरित्थमर्काद्युक्तिप्रमाणतः ॥

इत्यत्र ग्रहेन्द्रस्य भगवतो विवस्वतो बिम्बगोलादपि गुरोर्बिम्बगोलो महान् ततोऽपि मन्दस्येति प्रदर्शितम् ।

ननु रविबिम्बगोलाज्जीवबिम्बगोलेन शनिबिम्बगोलेन चावश्यमल्पेन भवितव्यम् । आकर्षणेऽल्पबिम्बगोलस्यैव बहूपकृष्टत्वादाकृष्टैव ग्रहफलोत्पत्तेः सिद्धान्तसंमतत्वाज्जीवफलस्य शनिफलस्य च सूर्यफलतोऽतिमहत्त्वात् । सूर्यसिद्धान्ते च ।

> महत्त्वान्मण्डलस्यार्कः स्वल्पमेवापकृष्यते ।
> मण्डलाल्पतया चन्द्रस्ततो बहूपकृष्यते ॥
> भौमादयोऽल्पमूर्तित्वाच्छीघ्रमन्दोच्चसंज्ञकैः ।
> दैवतैरपकृष्यन्ते सुदूरमतिवेगिताः ॥

इति जीवशन्योरल्पमूर्तित्वस्य स्पष्टमुक्तत्वादिति चेन्न । उक्तश्लोकस्थमूर्तिशब्दस्य भारवाचकत्वादल्पभारवतः पिण्डस्यैव बहूपकृष्टत्वादाकर्षणे परिमाणमहत्त्वस्याप्रयोजकत्वात् । इति कमलाकरपद्धतीयाः समादध्युः ।

वस्तुतस्तु

> व्यासो भुवः खाद्रिहि ८७० योजनानि
> रवेः खखाभ्राद्रिनव ९७००० प्रमाणि ।
> सुधाकरस्याभ्रजिनैः २४० समानि
> खाताब्धिसंख्यानि ४५० महीसुतस्य ॥
> चान्द्रेः खबाणानल ३५० योजनानि
> व्यासो गुरोः खेष्विषुगो ९५५० मितानि ।
> भृगोः खबाणेभ ८५० मितानि सौरेः
> खखाश्वनागप्रमितानि ८७०० नूनम् ॥

इत्येतावन्त्यत्र व्यासयोजनानि सन्तीति सूक्ष्मयन्त्रैरसकृद्विद्वद्भिरर्वाचीनैर्निरणायीत्यवसेयम् ।

एवम् ।

अथ सूर्यादिमते शाकल्यादिमुनिमते च ग्रहाणां योजनात्मकौ नीचोच्चकर्णौ ।

चं. नी. ४६७०५ । २५ । ५५ ।	चं. उ. ५५७५२ । ३४ । ५ ।
बु. नी. १३४७०५ । ५ ।	बु. उ. १९५१८४ । १८ ।
शु. नी. २६६१७४ । ७ ।	शु. उ. ५७३४५७ । ५३ ।
र. नी. ६५८८५४ । २७ । ८ ।	र. उ. ७१०८८५ । ३२ । ५२ ।
भौ. नी. ८७३०७२ ।	भौ उ. १७०३२०६ ।
गु. नी. ७३१०८६८ । ५४ ।	गु. उ. ८६३५५४३ । ६ ।
शौ. न. १९०६४६७१ ४३ । ३० ।	श. उ. २१३०७५७४ । १६ । ३० ।

योजनात्मान्त्यफलज्या च । मं. ८३०१३४ । बु. ६०४७९ । ५० । गु. १६२४६४४ । १२ । शु. ३०४२८३ । ४६ श. २२४२९०२ । ३३ । भौमादीनाम् । रवेः २६०१५ । ३२ । ५२ विधोश्च ४५२३ । ३४ । ५ ।

इति सर्वेषां ग्रहाणां नीचोच्चकर्णा अभिहिताः । तत्र भौमादीनां पञ्चानां प्रत्येकं मध्ययोजनकर्णस्य योजनात्मकान्त्यफलज्यार्धस्य चान्तरेण तुल्यं नीचकर्णमानं योगेन तुल्यमुच्चकर्णमानं च यत् कथितं तदपि युक्तिशून्यमेव ।

एवम् ।

अथ सिद्धान्तशिरोमणौ सार्वभौमे च योजनाद्यैर्ग्रहाणां नीचोच्चकर्णाः

चं. नी. ४६७०५ । २५ । ५५	चं. उ. ५५७५२ । ३४ । ५
बु. नी. १०४४६५ । १०	बु. उ. २२५४२४ । ५०
शु. नी. ११७०३२ । १४	शु. उ. ७२५५९९ । ४६
र. नी. ६५८८५४ । २७ । ८ ।	र. उ. ७१०८८५ । ३२ । ५२
भौ. नी. ४५८००५ ।	भौ. उ. २११८२७३ ।
गु. नी. ६४९८५७६ । ४८ ।	गु. उ. ९७४७८६५ । १२
श. नी. १७९४३२२० ।	श. उ. २२४२९०२५ ।

इति जल्पितं तदसत् । शिरोमणौ गोले स्फुटगतिवासनाध्याये

ग्रहस्य कक्षा चलकर्णनिघ्नी
स्फुटा भवेद्व्यासदलेन भक्ता ।
तद्व्यासखण्डान्तरितः कुमध्यात्
स भ्राम्यते हि प्रवहानिलेन ॥

इत्यनेन सूचितानां ग्रहनीचोच्चकर्णमानानां पूर्वजल्पितमानेतरत्वात् । शिरोमणिमतेन ग्रहनीचोच्चकर्णास्त्विमे

चं. नी. ४७०३९ । ३९ । ४ ।	चं. उ. ५६०९२ । २० । ५६ ।
बु. नी. १०५१५३ । ३६ ।	बु. उ. २२६९१० । २४ ।
शु. नी. १२०१५८ । १६ ।	शु. उ. ७२८०१७ । ४४ ।
र. नी. ६६३२०६ । ५५ । १७ ।	र. उ. ७१५५४७ । ४ । ४३ ।
भौ. नी. ४१९००० । १ । ४४ ।	भौ. उ. २१७४२३७ । ५८ । १६ ।
गु. नी. ६६३२०८० । ४२ । १४ ।	गु. उ. ९७२०९९५ । १७ । ४६ ।
श. नी. २००९३३०३ । १९ । २० ।	श. उ. २०५४४८३८ । ४० । ४० ।

एतान्यपि कर्णमानानि युक्तिशून्यान्येव । इति वदति

बापूदेवशास्त्री ।

THE MESSENGER CLOUD:

PARAPHRASED FROM KÁLIDÁSA.

(Continued from page 186.)

XXV

Now from the level of thine airy road
Glide gently down and amorously sink
Upon Nirvindhya's breast, which long has glowed
With love of thee: there cling, and kiss, and drink.
She, with the wild swans clamorous on her brink,
And their white wings around her for a zone,
From thy soft pressure will not coyly shrink.
Her trembling wavelets will her rapture own,
And testify her love by every gesture shown.

XXVI

Sail on, refresht, my messenger, and look
With pity on the woes of Sindhu, pale
With the sere leaves shaken upon the brook
From her own trees by the hot summer gale.
For her sad shrunken waters well-nigh fail,
Thin as the length of hair which women braid
When their dear husbands' absence they bewail.
O, pity her, thou gentle Cloud, and aid
The longing of her love by each fond look betrayed.

XXVII

Near thee a bright imperial city stands,
The blest Avantí or Viśálá, pride
Of all the earth; famed for its minstrel band
Who with the magic of their verse have vied
To spread the tender story far and wide
Of King Udayana: a glorious town,
Brought, by the happy Saints unsatisfied
With all that Paradise can offer, down,
To be their best reward, their virtue's worthiest crown.

XXVIII

The sweet soft zephyr, laden with the scent
Which every lotus opening to the air
Of morning from its rifled stores has lent,
Plays wooingly around the loosened hair
And fevered cheek of every lady there;
Then as it blows o'er Sipra, fresh and strong,
Bids all the swans upon her banks prepare
To hail the sun-rise with their sweetest song,
And loves with its own voice the music to prolong.

XXIX

Rest on these flower-sweet terraces, and feel,
From open casements where the women braid
Their long, soft locks, delicious odour steal.
Look on the polisht marble where the maid
Her small foot, blushing with the dye, has laid;
There will the peacock with a joyous dance
Spring forth to greet thee from the mango's shade,
And hail his dear friend with a loving glance:
O, rest in this sweet spot, nor lose this blessed chance.

XXX

Hence to the temple of the mighty lord
Whom CHANḌÁ loves and all the worlds revere;
There for a moment shalt thou be adored
By those who serve him, when thy hues appear
Like Śiva's neck, as though their God were near.
Then through the garden pleasant gales shall stray
From Gandhavati's fountain, crystal-clear,
Bearing the scent of lotus-blooms away
Shaken by lovely girls who in the water play.

XXXI

Stay till the hour of evening worship comes;
Stay while the Day-God lingers in the sky;
Then with low thunderings, for the call of drums,
Win precious guerdon from the Lord Most High.
Each dancing-girl, with rapture-beaming eye,
Shall thank thee as thy soft drops cool the ground,
While her faint hands the jewelled chowries ply,
And, as she moves her languid feet, around
Her slender waist the chimes of tinkling silver sound.

Digitized by Google

XXXII

Bhaváni's self. Śiva's imperial Queen,
With grateful glance thy service shall behold;
For when her lord thy dusky form has seen,
Enamoured of the purple and the gold,
He will not, in the dance of twilight, fold
The elephant's hide around his limbs, for, lo!
A mantle waits him fairer than of old;
Thy skirts shall seem the skin, the trees below,
The monster's limbs, his gore thy tints of roseate glow.

XXXIII

When the thick shadows of dark midnight fall
Blinding the maidens in the royal street
Who fain would fly where love and rapture call,
O, let thy flashes guide their erring feet
And lead them safely till their loves they meet.
But check thy rain and still thy thunder, lest
Their terrors force the maidens to retreat.
Then with thy lightning bride, play-wearied, rest
Where sleeps, high up the tower, the white dove in her nest.

XXXIV

Thence, with the rising sun, thy course pursue,
For loving envoys ever shun delay;
But hide him not, when mounting, from the view,
For the false lover comes with coming day
To the poor weeping girl, to kiss away
The water from her eyes. So comes the Sun
To cheer the lilies with his amorous ray,
And kiss their drooping heads, till, one by one,
They dry the dewy drops that down their petals run.

XXXV

Then will thy shadow for a moment sleep
On the white bosom of Gambhírá's stream,
And thy dear image in her crystal deep
Blend with the fancies of her maiden dream.
Then will she wake to win thee with the gleam
Of finny darters for the lore of eyes.
Steel not thy heart against her love nor deem
Her lilies smile but to allure the prize:
O, yield thee to her prayer, O, yield thee and be wise.

XXXVI

Ah, yes! I see thee in her loving arms—
The feathery branches of the tall bamboo—
And spread beneath thee are her yielded charms,
And her smooth sides uncovered to the view.
How could such loveliness unheeded woo?
Who could resist her softly pleading smile,
With heart all cold and dead, if e'er he knew
What joy it is to kiss each breast-like isle?
O, who would turn away, nor linger there a while?

XXXVII

Charged with the odours of the wakened earth
Whom thy fresh rain has left so pure and gay,
The wind of early morning, wild with mirth,
Amid the branches of the grove shall stray
And woo each tendril to responsive play:
Then waft thee on to Devagiri's height,
Charming the ear with music on the way,
Where languid elephants shall stay his flight
And drink his balmy breath with wonder and delight.

XXXVIII

There gleams the temple, loved and honoured most
By Skanda, Lord of War; who, at the head
Of the bright legions of the heavenly host,
Embattled Gods to arms and conquest led—
A wondrous Child, in flames of glory bred—
O, crown the slayer of his demon foes!
Turn to a cloud of living flowers, and shed
O'er his young brows the lily and the rose
Bathed in the lucid stream through heavenly realms that flows.

XXXIX

Send forth thy thunder, till the glorious voice,
By rocky dell and cavern multiplied,
Bidding the peacock, in the shade, rejoice,
Calls him to dance along the mountain's side:
Majestic bird, whom Skanda loves to ride,
Whom Skanda's mother holds so wondrous dear
That when his moulted plumes, in all their pride
Of starry radiance, fall and glitter near,
She lifts them from the ground to grace her royal ear.

XL

Thy homage rendered to the Warrior-God
Whose infant steps amid the thickets strayed
Where the reeds wave over the holy sod,
Speed on, but let thy course a while be stayed
Till meet obeisance to that stream be made
That sprang in olden time from sacred gore
Of hecatombs by Rantideva paid,
And through the lands her author's glory bore
Enshrined within her waves, to spread for evermore.

XLI

In fear, each minstrel of the heavenly quire
Shall see thee stoop those watery stores to drain,
And fly thee trembling lest his darling lyre
Be robbed of music by thy threatened rain.
Then from his airy watch-tower will he strain
His eager eyes the wondrous sight to view,
As thy large lucid drops, in lustrous chain,
Hang their long pendants o'er thy borrowed blue,
A string of pearls that show the sapphire gleaming through.

XLII

That river past, to Dasapura fly,
And with the shadow of thy coming rouse
The beauties of the city till each eye
Glances its welcome: till each maid and spouse
Beneath the delicate bending of her brows
Shows her dark pupil flashing wild with glee
In her pure pearly eye-ball, and allows
Short glimpses of a sight as fair to see
As a white jasmine bud where sits the black wild bee.

Digitized by Google

XLIII

Then, speeding on to Brahmavartta's land,
Hover a while o'er Kuru's fatal field
Rich with the blood of many a slaughtered band;
Where the proud banner waved, the war-cry pealed,
Where the sword smote upon the helm and shield;
When godlike Arjuna, with arrowy hail,
Laid low the heads of kings who scorned to yield;
As when the arrows of thy sleet assail
The golden lilies' heads and strew them down the vale.

XLIV

Now to Sarasvati, whose waters roll
Beside thy path, with due respect draw near;
And let her cleansing wave refresh thy soul.
When Balarama, filled with noble fear
Of kindred slaughter, could no longer cheer
His sorrowing spirit with the sparkling wine
That mocked the eyes of his own wife most dear,
Revati, shining as they loved to shine,
He sought this limpid flood and made the spot divine.

XLV

On to the place where infant Ganga leaps
From the dark woods that belt the Mountains' King,
Hurling her torrent down the rugged steeps:
Those holy waters, as the sages sing,
To Sagar's children bliss and heaven could bring.
Fresh from her native sky, a sportive maid,
On Siva's awful head she dared to cling,
And with the laughter of her foam repaid
His consort's jealous frown as with his hair she played.

XLVI

Drink, for the flood is living crystal; drink,
For the warm gale thy weary wings has dried:
Come, gently bend thee o'er her rocky brink
And tint her waves with azure as they glide:
So when dark Jumna's tributary tide
With kissing waves to blend with Ganga flows,
The mightier waters beautifully dyed
With borrowed azure to the sun disclose,
Mixt with their pearly light, the sapphire's darker glows.

XLVII

See! the proud parent of this heavenly child
Wooes thee to rest upon his breezy height,
Where herds of musk deer, as they wander wild,
Enrich with odour every crag. Alight,
And couched upon the summit robed in white
Enhance his snowy beauty, as one speck
Of sable shows more gloriously bright
The skin of Siva's Bull, and serves to deck
The whiteness of his flank, the splendour of his neck.

XLVIII

Hark! the gales whistling through the woods of pine,
Urging to madness all the straining boughs
That twist and chafe and bend and intertwine,
The latent flame to wildest fury rouse,
Singeing the long hair of the mountain cows.
Quick! rain a thousand torrents on the crest
Of the kind hill and cool his burning brows:
With wealth of water thou art richly blest,
And fortune's sweetest fruit is aiding friends distrest.

XLIX

Should Gryphon hosts, by mad presumption led,
Vext by thy thunder, mount the realm of air
To ride thee down beneath their impious tread,
Laugh with thy rain to see them baffled there,
And with the dashing of thy hail-stones scare
Thy scattered foes. So let them learn how vain
Is the wild enterprise they fain would dare;
That the fond strivings of ambition gain
No guerdon but disgrace, no recompense but pain.

L

But stoop a little from thy pride of place:
With circling motion reverently slow
Around the rock where pilgrims still may trace
The foot of Mahádeva, softly go.
There saintly breasts with rapt devotion glow:
There holy hands the flames of worship feed.
There His good servants, saved from sin and woe,
From the sore weight of earthly life are freed,
Join his own heavenly band and gain a priceless meed.

LI

Hast thou no voice to laud Him? Be not dumb;
But let thy thunder round the caverned hill
Proclaim his glory like a mightier drum.
The gales with melody each reed shall fill:
The Maidens of the sky, whose bosoms thrill
With holy rapture, shall rejoice and sing;
And all shall swell the glorious concert till
Valley and mountain, earth and air shall ring
Hailing with jubilant hymns the great victorious king.

LII

Skirting the mansion of eternal snows
Compress thy form and winding round explore
Where Krauncha's parted rocks a pass disclose
Traversed by swans—those rocks that burst before
The might of Ráma and the axe he bore.
Then show like Vishnu's darksome foot, whose tread
Measured the sky and earth's broad bosom o'er,
When Bali with his proud heart filled with dread
Confessed the Saviour God and bowed his impious head.

LIII

Now soaring upward, on Kailasa's crest—
The crystal mirror of each Heavenly Maid—
Linger a little as an honoured guest,
And let thine airy pilgrimage be stayed.
Once that high mountain shook and was afraid,
Loosened by Ravan, Lord of Lanka's isle;
Now cleaving heaven, to all the lands displayed,
The white peaks of the lily-radiant pile
Flash on the world below, like Siva's glorious smile.

Digitized by Google

LIV

I see the summits of the hill, that shine
Like new-cut ivory so purely white,
Gleam with fresh lustre as that form of thine
Descends upon them, and thy tint of night
Tips with a sable pall the snowy height.
So Balarama's limbs of silvery hue
Show fairer in their purple livery dight;
So from his ches· and arms exposed to view
The heightened sheen beneath sets off the raiment too.

LV

High fate is thine should sportive Gauri list
In those sweet moments ere the close of day—
Untied the serpent-bracelet from her wrist—
Hand locked in hand, with Siva there to stray.
Come, aid with easy steps their upward way:
Thy stores of rain within thy breast confine,
And let the heavenly pair delighted lay
The blessing of their feet on stairs that shine
With gold caught from the sun, ruby and almandine.

LVI

Then will celestial maids with laugh and shout
Open their lovely arms thy form to seize,
And o'er their tresses force thy waters out
Which the light touch of kindred diamond frees.
But should too long restraint thy soul displease,
Send forth the thunder of thy voice, and they,
Fleeter through terror than the western breeze,
Will fly thee, e'en in their delicious play,
And seek their distant home in wonder and dismay.

LVII

Near is the goal, yet, ere thy course be run,
One sweet fresh draught of limpid water take
Where golden lilies opening to the sun
Stud the broad bosom of the Manas lake.
Deign for a while a friendly shade to make
For Indra's elephant, and, floating through,
With the soft fanning of thy pinions shake
The Heavenly Tree, and all her blooms renew
With the young morning's breath embalmed with silver dew.

(To be continued.)

THE PANDITS AND THEIR MANNER OF TEACHING.

BY DR. BALLANTYNE.

[From the Benares Magazine, March 1850.]

(Continued from p. 146 of Vol. I.)

We left the pandit and his pupil in the middle of the *Laghu Kaumudí*. Let us now suppose that they have finished it. If the pupil be an intelligent youth, his instructor will probably advise him to dispense with the perusal of the intermediate grammatical work—the *Madhya Kaumudí*,—and to enter at once upon the unabridged and sufficiently voluminous *Siddhánta Kaumudí*—the "Moonshine on Established Grammatical Doctrine;"—the title of *Kaumudí*,—moonlight—apparently implying that the work does not affect to shine by its own light, as an original authority, but only by the reflected beams of the prime luminary *Páṇini.*

The pupil—a young bráhman of course—will probably at this time, if not before, have made up his mind whether he is to range at large through the fields of Sanskrit lore; or to confine himself to certain paths, or even to one alone. We shall suppose that his studious ambition (at starting) will permit him to contemplate, contentedly, nothing short of the whole range; and we shall accompany him as far as we conveniently can:—not bargaining, by any means, to follow him everywhere through thick and thin—

"Through bog, through bush, through brake, through brier,"

but purposing to ride quietly round by the gate when we find him bent on taking a "rasper"—and so rejoin him if practicable on smoother ground.

Of all Pandits who confine their attention to a single branch of study, the most uninteresting, to our mind, is an Astrologer. Your mere astrologer makes a very perfunctory perusal of the grammar, if he looks into it at all before he devotes himself for life, and for a livelihood, to his own particular line of business. Dealing among the stars, he grows proud; and dealing among horoscopes and the old women who apply for them, he acquires a swaggering air of charlatanerie and bold forwardness, very different from the dignifiedly unpretending manner of the really learned. We speak of the mere astrologer—for there are pandits, versed in varied lore, with whom the mere astrologer can stand no comparison even in his own department. The mere astrologer we like not—even as the poet liked not "Dr. Fell"—though not perhaps quite so unreasonably.

Our desultory student is not, of course, deposed to undergo his eight or ten years of grammatical discipline—working his way through the long and thorny vista of treatises up to the "Great Commentary,"—without a glimpse of something more cheerful. With a view to understanding the poets, he will probably commit to memory large portions, if not the whole, of Páṇini's Catalogue of verbal Roots *(the Dhátu-páṭha)* with their significations, and of the *Amara-kosha*—the "Immortal Treasury" of synonymes, versified by *Amara-singha* in order to facilitate recollection. With or without these appliances he may commence upon the *Raghuvanśa* of *Kálidása*—skipping, as "unlucky," the first Canto, at the recommendation of his teacher, lest the description of king *Dilípa's* distress, from the want of a son, should too painfully affect his juvenile sensibilities. In the second Canto he will read how well that pious king played the part of lackey to a cow—a subject so edifying that we suspect it furnishes a more influential motive than that alleged by the pandit for advising the pupil to skip Canto first, and to commence where he may learn "to whom honour is due," and how to render it—a lesson which, if he be a youth of virtuous tendencies, should make him burn with ambition to go and do likewise.

Digitized by Google

No inconsiderable portion of the poetical and dramatic literature of the Sanskrit has been rendered accessible to the occidental reader by the Latin versions of the Germans, the metrical English versions of Mr. Milman, and the fine rifacimenti of Professor H. H. Wilson in his "Specimens of the Theatre of the Hindús." The native student has no translations to refer to; nor is he set down, like an English school boy to construe a passage with the aid of a dictionary—the native dictionaries being constructed, not with a view to consultation in this way, but with a view to being conveniently got by heart. In the case of any book that may be in hand, passage after passage is explained to the pupil by his teacher; and, in the interval between the lectures he cons over, again and again, the portion that formed the subject of the previous lecture. In the case of various books he has the aid of convenient commentaries, written in a very simple style of Sanskrit corresponding to what at school we used to call "dog-Latin." The texts of several poems, with commentaries of this kind, have been printed in Calcutta. These are much valued by Native students. We annex, as a sample of the simple style of commenting employed in these books, a verse from the *Raghu-vanśa* with its comment.

V. 6th, Canto II.

"Stopping whenever she stopped—rising to follow when she went on—consistent in seating himself when she sat down—experiencing a desire for water when she drank water—like her shadow did this lord of the earth attend her."

Commentary.

"'*Stopping*' &c.—'*lord of the earth*'—i. e. king:—'*her*'—i. e. the cow —'*attend*'—as a shadow attends a body. Again—accordingly as the cow stopped—stopping:—again—accordingly as she went on—rising to follow;—again—accordingly as the cow sat down—consistent in taking his seat:—again—accordingly as she became a taker of water—becoming desirous of water."

On the earlier verses the comment is still more full and explicit. As regards the wants of many readers, much of such a commentary must be superfluous:—but it is convenient to be able to refer to it for the recorded opinion of the republic of pandits as to the intended meaning of passages where the language chances to be ambiguous.

Among the poems generally read there is a curious one, by *Bhaṭṭi*, on the actions of *Ráma*, the design of which is to exercise the pupil in the rules of the grammar. With this view no part of the verb is employed throughout the first Canto except the 3rd preterite:—none in Canto second except the 2nd preterite—and so on. The work is accompanied by two commentaries, the one explaining the sense, and the other furnishing a synopsis of the grammatical rules employed in the formation of the words. It is noticeable that the tense to the exhibition of which the first Canto is devoted—the "praeteritum augmentatum multiforme" of Bopp—is, though far from the most useful, much the most troublesome of the tenses. Professor Monier Williams remarks on it (at p. 81 of his Grammar) as follows:—

"Fortunately for the study of Sanskrit the third preterite very rarely occurs in the earlier and better specimens of Hindu composition; and the student who contents himself with the Rámáyana, Mahábhárata, Hitopadesha, and Laws of Manu, and avoids the grammatical Poem of Bhaṭṭí, and the extravagant writings of more modern authors, will lose nothing by an almost total ignorance of this tense, or, at least, may satisfy himself with a very cursory survey of its character and functions."

The placing of something so impressively alarming in the very portal, is as characteristic of the more recent pandits as the preliminary hot-poker process is of the Freemasons—with whom after the first dread ceremony of initiation, it is all plane-sailing and whiskey-punch. The same arrangement in each case, would seem to have been contemplated, as that which Nature, in the cocoa-nut, offers to the monkey —who, when he has managed to gnaw through the shell—finds for his practised teeth, the kernel no very hard matter, and the milk mere child's play.

After having read some of the poets, the student may feel some curiosity to know the principles on which the critics hold one set of verses to be a poem, and another set of verses to be no poem:—but the professor of criticism (*Sáhitya*) will probably require that he shall come to this enquiry provided with some knowledge of the phraseology at least of the philosophical systems. He goes, therefore, through the *Tarka-Sangraha*, the text and a version of which were given some months ago in this Magazine; and then, finding that there is much which the meagreness of that compendium leaves without satisfactory explanation, he reads the memorial verses of the *Bháshá parichheda*—(the "discrimination of language" as employed by the *Naiyáyikas* in contradistinction to the followers of the *Mímánsa*, *&c.* with the esteemed and popular commentary the *Siddhánta-Muktávalí* (the "Pearl-string of established truths"). With some notice of this standard work we shall conclude for the present.

The memorial verses, and the commentary, are the work of the same author, *Viśwanátha Panchánana Bhaṭṭa* who opens the commentary with the following invocation and announcement:—

"May that *Śiva* be auspicious, who, skilled in the sportive dance. has made a crest-gem of the Moon and a bracelet of the Sovereign of the Snakes!

Prompted by regard for my pupil *Rájíva*, let me, as a relaxation, illustrate, by the aid of the very succinct expressions of the ancients, my own work—the String of memorial verses."

In the *Dinakarí*, a commentary on our commentary, the propriety of each separate term in this benedictory invocation is voluminously (if not luminously) demonstrated. The writer there explains how the Moon, though no crest-gem, may yet without impropriety be spoken of as such—and the same of the snake-bracelet; how the author whom he comments spoke of his work as a "relaxation" in order to soothe the apprehensions of the alarmed but yet possibly securable reader;—and how the mention of the "succinct" expressions of the ancients was designed to insinuate that the author, without compromising his character for modesty, might attempt to illustrate what the "succinctness" of his predecessors had left—to sight less keen than that of those predecessors—somewhat obscure. On the double meaning of the verses that follow, the *Dinakarí* expatiates satisfactorily but, our reader might think, tediously. We return to the *Muktávalí*, where the author makes not a few reflexions on the benedictory invocation with which he commences his own memorial verses. The benediction is as follows:—

Digitized by Google

"Salutation to *Krishna*—to him—lovely as a fresh cloud—the stealer of the raiment of the young milk-maids—the seed of the world-tree!"*

We should like to transcribe, as a curious specimen of Hindu reasoning, the author's reflexions on the importance of commencing with a Benediction (*mangala;*) but we are considerate enough to forbear.

On the expression "the seed of the world-tree," he remarks as follows :—

The world is here spoken of as a tree—what springs from the earth. By speaking of the *seed* of that tree, a proof of the existence of the Deity is exhibited. That is to say :—such productions as a water-jar are produced by a maker, and so also are such productions as the herbs of the field :—and, to make these is not possible for such as we are :—hence the existence of the Deity, as the Maker of these, is established."

After combating objections to this argument, he cites the *Veda* to the following effect :—

"There is One God—the Maker of Heaven and Earth—the Creator of all—the Preserver of all."

He then propounds the Categories,—intimating that the whole are primarily divisible into those of Existence and Non-existence. The latter will furnish abundant matter for consideration in the present paper. Like the foil of the *maitre d'armes*, it is far from being so small an affair as it may, at first sight, appear in the eyes of the inexperienced. One might as well engage to fence with the maitre d'armes without knowing the difference between quarte and tierce, as venture to chop logic with a pandit without some conversancy with the manipulation of Non-existence.

Non-existence is the darling of the Indian logician. Like Izaak Walton, impaling a frog upon his hook, "he handles it as though he loved it." Like an epicure with a beccafico,—instead of gulping it at a mouthful—he makes four bites of his cherry. He first divides it into two—Mutual and Universal. The Universal he cuts into three—Antecedent, Emergent, and Absolute. The last of the three is the Benjamin of the family—nor is his coat less curiously variegated than that of any of his brethren. He makes his appearance at every turn ;—and, even when he cannot altogether eject the others, it is ruled that he shall go shares—as we shall see when we come to the *vexata questio* of the baking of a water-jar in a brick-kiln.

But it may be necessary to satisfy the reader that there is such a thing as Absolute Non-existence ; and we shall take it for granted that he holds "Seeing is Believing." Place a jar, then, on the ground,—and you see† that there is a jar on the ground. Seeing "that there is a jar on the ground," is, in the language of our philosophy, seeing "the existence of a jar on the ground." Now, let the jar be removed—and what do you see then ? Why, you see, or ought to see, that there is not a jar on the ground—or—by substitution, as an algebraist would express himself—you see the Non-existence of the jar on the ground.

But now comes the question—where was the Non-existence whilst the jar was there? On this point there exists—or existed—a difference of opinion. The generally received opinion now is, that of our author—viz : that the Non-existence was there all the time. The argument in support of this view runs thus. The Absolute Non-existence of the jar is *one* non-existence, and not a number of non-existences. In whatever spot of ground this may be, then, it cannot be destroyed even by the placing of the jar itself upon the spot—for, if it were thus destroyed, it could be found no where else—or, in other words, we should find the jar itself everywhere. That a jar should thus usurp the universe, being what neither gods, men, nor columns, could submit to, the hypothesis which would lead to such a state of things must needs be given up. The Non-existence, therefore, is not destroyed, but only *hidden* :—and this view of the matter may be summed up in the proposition that the Absolute* non-existence of every thing is at all times present every where, and is only, for the time, there hidden where the thing itself happens to be. In proof of this, you have only to remove the jar, and you will find the Non-existence exactly as you left it. Moreover—our author contends—if you suppose another kind of non-existence, which is to be destroyed every time that the thing is brought, and re-produced every time that the thing is removed, your hypothesis is an un-philosophically cumbrous one—which can stand no comparison with the one here propounded.

In the case of the baking of a water-jar in a brick kiln, an attempt, as we intimated before, was made to secure the entire right of occupancy, as a Non-existence, for the Antecedent with the Emergent as his successor, to the exclusion of the Absolute. The attempt is generally admitted to have been a failure. The case stood thus. Before the earthen jar is baked in the kiln, it is a black jar ; but, by the process of baking, it become a red jar. Now, a black jar is not red ;—neither is a red jar black. Hence—argued the claimants—the case involves the Antecedent non existence of the redness whilst it has not come into being, and the Emergent non-existence of the blackness when it has ceased to be ;—and, the state of the case being thus completely accounted for, Absolute non-existence has no business here. To this it was replied, that there was no intention to eject the other parties, that there was room enough for all three, and that the respondent was entitled to be admitted as a joint occupant, seeing that all three ought to meet and shake hands fraternally at the turning point, the instant of change, when there is the Emergent non-existence (or Destruction) of the blackness, the Antecedent non-existence of the redness, and the Absolute non-existence of both—both colours being, at that instant, like a pair of Newtonian "prime and ultimate ratios," just equally predicable, and the simultaneous predication of both being absurd.

* Conf. the tree Igdrasil—Carlyle's "Heroes and Hero-worship" p. 31.

† Were we debating the point with an opposing pandit, we should take the precaution to specify the requisite conditions—viz; that the sun, or some sufficient substitute, is shining ;—that your spectacles are properly wiped ;—that your eye-sight is not particularly worse than usual ; —and that you, bona fide, look at the jar.

* Universal non-existence, it is to be observed, is, in its first sub-division, of two kinds—limited in some direction, and limited in no direction. The latter is our author's Absolute or Unlimited Non-existence (*atyantábháva*). The other may be limited by a definite beginning or by a definite ending. Thus the Antecedent non-existence of a jar, having had no beginning, ends when the jar is made. Its Emergent non-existence (as a jar) commences its endless course from the moment when the jar is shivered into potsherds.

Digitized by Google

One of the nicest points in regard to absolute non-existence, is that involved in the question whether the Absolute non-existence of Absolute non-existence is a Non-existence or an Existence. Those who favour the latter view adopt the argument that two negatives make an affirmative. The opponents of this view contend that—as the non-existence of x, no matter what x may be, is the non-existence thereof—the non-existence of non-existence can be nothing else than a Non-existence. Where there is such a "very pretty quarrel as it stands," it would be a pity to spoil sport by interfering with the settlement of it.

A pandit, desirous to make acquaintance, called upon us one day—eager to display his dialectical subtlety, and (like the Irishman of easy conscience who, to the remonstrance—"good gracious—you're not going to take such an oath as that?"—replied—"I'd like to see the oath I would'nt take") —prepared to take objection to any proposition however unimpeachable. Finding him no granter of propositions, we reverted, as a last resource, to Aristotle's fundamental position—that it is impossible for the same thing at once to be and not to be. Our visiter was disposed as little to grant this as anything else,—and he had made some way towards demonstrating the perfect compatibility of "being" and "non-being" under certain circumstances, when fortunately another pandit came in—and to him we resigned the conduct of the argument. Quotations from all the most profound authorities on the subject of Non-existence were soon flying about our ears—each disputant screaming at the highest pitch of his voice—and, some other pandits having come in and seated themselves as spectators and judges, the contest raged so "fast and furious" that our little boy slunk out of the room in a state of alarm in which we ourself began rather to participate. At length the arguments on the side of Aristotle were found to be in accordance with the dicta of the authorities—whereupon the stranger gracefully gave in and was complimented on the vigour with which he had fought a losing battle.

It is but fair to observe that the pandits, except when regularly contending for victory, appear to be quite as capable of appreciating the whimsical side of such scholastic disquisitions as any European is. They set store by them as furnishing occasion for admirable discipline in the rigidly correct employment of language. It is a mode of mental gymnastics—an intellectual bout at fence. One—that is to say one decidedly practical and venerable—one who makes money and invests it judiciously—may question whether exercise in this kind of fencing is of any use. If fencing, bodily or mental, be of any use at all, the latter will not (by any one that we care to exchange words with,) be held the less useful of the two. The usefulness of the former, and of gymnastics in general, does not require to be demonstrated at this time of day.

For the present we quit our friend the student—hoping to meet him next in the field of "criticism."

Just Published. A new Edition, corrected and enlarged, of the LAGHU KAUMUDÍ, a Sanskrit Grammar, with an English version, commentary and references by Dr. BALLANTYNE, late Principal of the Sanskrit College Benares, re-edited by RALPH GRIFFITH M. A., Principal of the Sanskrit College, Benares.—*Price Rs.* 8.

"The Translation of the Laghu Kaumudí made by the late Dr. Ballantyne has enabled even beginners to find their way through the labyrinth of Native Grammar." *Prof. Max Müller.*

May be procured from Messrs. Trübner & Co., London, the English Publishers.

The SIDDHÁNTA ŚIROMAṆI, A TREATISE ON ASTRONOMY, by Bháskaráchárya; with his own exposition the Vásanábháshya, edited by Paṇḍita Bápú Deva Sástri, Honorary member of the Royal Asiatic Society of Great Britain and Ireland, Professor of Mathematics and Astronomy in the Sanskrit College, Benares.—*Price Rs.* 4-4.

Now ready.

A TRILINGUAL DICTIONARY; being a comprehensive Lexicon in ENGLISH, URDÚ and HINDÍ, exhibiting the syllabication, pronounciation, and etymology of English words, with their explanation in English, and in Urdú and Hindí in the Roman character, by Mathurá Praśada Miśra, Second Master Queen's College, Benares.

"After a thorough examination of Mathurá Prasád's Dictionary, I consider it to be a remarkable advance on any work of the same kind that has preceded it. Covering as it does, and very adequately, the ground of two leading Indian languages, it may be regarded as one of the most valuable linguistic helps to the Indian official that has appeared for many years; and it is, of course, equally valuable to the Indian Student of English." *Dr. Hall.*

May be procured direct from us, by Book post; from any bookseller in Calcutta, Madras, or Bombay; or from Messrs. Trübner & Co., London.—*Price Rs.* 16.

Communications of a literary nature should be addressed to the EDITOR: *all letters on business, to the Proprietors,* MESSRS. E. J. LAZARUS & CO., *to whom Drafts should be made payable.* ADVERTISEMENTS *will be inserted at four annas per line.*

The PANDIT may be ordered of the Publishers, or through MESSRS. TRÜBNER and CO., LONDON.

Annual subscription, in advance, including postage, Rs. 12.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 22. Benares March 1st, 1868. Vol. II.

॥ नरेश्वरपरीक्षा ॥

॥ तृतीयं काण्डम् ॥

(१४०) अथ नैषां क्रियार्थत्वं देवतास्वपि तत् समम् ।

अथ जातेरेव नित्यायास्तत्राङ्गत्वमित्यभ्युपगमादनित्यानां खदिरादिविशेषाणां कारकत्वं नेष्यते, तर्हि देवतात्मनोऽनित्यस्यैवात्राङ्गत्वं ननु तच्छरीराणां परपुरप्रवेशन इवोपादेयपरित्याज्यत्वेनानित्यानामिति सर्वं समानम्,अत एव यागसाधनत्वान्यथानुपपत्त्या युगपद्विभिन्नदेशव्यवस्थितानेकाधिकार्यनुष्ठीयमानानेकक्रतुसाधनत्वं देवतायाः प्राकाम्यतोऽनेकनिर्माणकायरचनेन कल्प्यते, इत्यैश्वर्यसिद्धिः ॥

"नन्वत्र ब्रह्मेन्द्ररुद्रादीनां बहूनां देवतात्वेन श्रुतेर्मतिभेदसंभवादीश्वरासिद्धिः,, इत्याह ।

(१४१) ईश्वरे तु विशेषोऽसौ तज्ज्ञानादेव गम्यते ।

श्रुतित एवेश्वरविषयो विशेषोऽसौ प्रतीयते, यतः श्रूयते,

"इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ।
एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः,, ॥

इति, एक एवेश्वरोऽधिष्ठेयभेदादनेकत्वेन राजा नियोगिभेदेनेव व्यपदिश्यते, स च रुद्र एव, यच्छ्रूयते, "एक एव रुद्रोऽवतस्थे न द्वितीयः शतं शता सहस्राणि ये रुद्रा अधिभूम्याम्,, इति, तस्यैव भगवतो रुद्रेषु वैश्वरूप्यप्रतिपादनात्, नच गुणत्वेन देवतायाः श्रुतेर्दध्यादीनामिव नेश्वरता, न, संप्रदानकारकत्वेन तस्याः प्रधानत्वात्, कर्तुरीप्सिततमेन कर्मणा यमभिप्रैति स संप्रदानं यतः। "यद्येवं सर्वस्यैव कर्मणो दार्शपौर्णमासादेः, "ऐन्द्रं दध्यमावस्यायाम्,, इत्यादिश्रुतिसिद्धेन्द्रादिदेवतार्थत्वाद् गुणकर्मत्वेन न विधिविषयता,, तदुक्तम्, "यैस्तु द्रव्यं चिकीर्ष्यते गुणास्तत्र प्रतीयेत,, इति, न, आत्मन उपदेशवदातिथ्यवचचोपपत्तेः, यथाहि" आत्मा ज्ञातव्यः,, इत्यात्मकर्मकोऽपि भावार्थः, यथा च "अतिथये समभ्यागताय महोक्षं महाजं वाऽऽलभेत,, इत्यतिथ्यर्थमपि कर्म चोदितत्वेनानुष्ठेयत्वाद्विधिविषयमिष्यते भवद्भिः, तद्वदेतदपि भविष्यतीत्यविरोधः, "कुतस्तर्हि फलम्,, देवतात एव, भवतामिव वा नियोगतः, यथाहि "ग्रामकामो राजपुत्रसेवां कुर्यात्,, इत्यादौ राजपुत्रसेवाविषयाद्राजनियोगतः फलम्, एवमत्रापि देवताराधनविषयान्नियोगत एव फलमिति, "ननु राजपुत्रादावाराधनसंपत्तिः प्रमाणान्तरसिद्धा भवतु,, इह तु शास्त्रसिद्धा तद्विकलक्रियाद्यनुष्ठानतः श्रद्धाप्रामाण्येन वा प्रतीयत इत्युक्तं महामतिभिर्देवताकाण्डे, त्रिकाण्डो हि वेदार्थविचारः क्रियाकाण्डदेवताकाण्डोपनिषत्काण्डभेदेन जैमिनिमुनिप्रभृतिभिः सूत्रकारैरारब्धः, स तु कर्मकाण्डमात्रदर्शिभिर्मीमांसकैरज्ञानतः कर्ममात्रविषयत्वेन नीतः, अत एव त आहुः,

"न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम्,, ।

इति,,

आचार्यो देवताकाण्डसिद्धवाक्यार्थविरोधेन कर्मकाण्डस्यापि देवताप्रामाण्यं योजयितुमत्रोक्तवान्,

"ईश्वरे तु विशेषोऽसौ तज्ज्ञानादेव गम्यते,, ।

इति ॥

अत एवोपनिषत्काण्डदृष्ट्याप्याह ।

Digitized by Google

(१४२) धर्मशास्त्रे विशुद्धिर्या परमा पुरुषस्य हि ।
ईश्वरप्रणिधानात् तद् योगशास्त्रेऽपि पठ्यते ॥

वेदान्ते हीश्वराध्यासकृतप्राणविराड्भूतेन्द्रियेषु मध्यादीश्वरोपासनयैव मोक्षः श्रूयते, स्मृत्यादावप्यग्निहोत्रादीष्टापूर्तो धर्म ईश्वरसपर्यात्मकः ।

"पक्वेष्टकचितं सम्यग्यः करोति शिवालयम्" ।

इति च श्रूयते,

"पूर्ते मोक्षं विनिर्दिशेत्"

इति च, वायुपुराणादौ च,

"अनुपास्येश्वरं मोक्षो बद्धस्येव कुतो भवेत्" ।

इति, महाभारतादिष्वपीतिहासेषु कुण्डधारोपाख्यानादौ, गीतासु च,

"यो मामजमनादिं च वेत्ति लोकमहेश्वरम् ।
असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते" ॥

इति, ईश्वरोपासनयैव पातञ्जलेष्वपि मोक्ष इति न तदभावोऽभ्युपगन्तव्यः, सर्वागमविरोधात् ॥

"ननु योगशास्त्रेष्वीश्वरप्रणिधानात् समाधिलाभः फलं पठ्यते, न मुक्तिः" इत्याह ।

(१४३) क्लेशग्रामस्य तनुता समाधिस्तत्फलं फलम् ।

अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः, तत्समुदायस्यापचिततरत्वमुपशम एव, समाधिहेतुत्वात्, समाधिर्योगश्चित्तजयात्मक इतीश्वरस्य तत्, इति मोक्षफलमेव समाधिलक्षणं फलम्, न ततोऽन्यदित्यविरोधः ॥

"नन्वेवं सति सावयवात्मनां मूर्तिमत्त्वेन वेदवेदार्थयोरनित्यत्वादप्रामाण्यम्" इत्याह ।

(१४४) स्थिता संततिरूपेण देवता तच्च चाकृतिः ।
शब्दार्थयोरनित्यत्वं मूर्तिमत्त्वेन बाध्यते ॥

यतः परपुरप्रवेशिशरीरवदुपादेयपरित्याज्यशरीरसंततात्मना देवता वेदार्थभूता व्यवस्थितेत्युक्तम्, यतश्च तच्च शब्देऽर्थे च जातिः स्थिता, ततो मूर्तिमत्त्वेन यच्छब्दार्थयोरचानित्यत्वमप्रामाण्यसाधनायोक्तं तद्बाध्यते, जातेरिवाक्षस्थिरायाः प्रमाणप्रमेयत्वव्यवस्थापनात्, यदाहुः, "जातिरेवाकृतिमिति" मीमांसकाः ॥

उपसंहर्तुमाह ।

(१४५) एवं च कल्प्यमाने स्यात् को दोषो येन संश्रितम् ।
नास्तिक्यं देवताऽसत्त्वं गदद्भिः पण्डितैरपि ॥

एवं वेदस्य देवताप्रधानत्वेऽपि प्रामाण्यसिद्धेर्निष्प्रयोजनमेव देवताया अभावख्यापनेन मीमांसालोकैर्नास्तिकपक्षः संश्रित इत्याचार्यः प्रायेण मोक्ष्यान्मीमांसालोकैर्लोकायतीकृतांस्तानास्तिकपथे कर्तुमयं यत्नः कृतो मयेत्येतदपि दर्शयति, यद्येवमीश्वरप्रणीतत्वेन वेदः प्रमाणम्, वेदाच्चेश्वरसिद्धिः, इतीतरेतराश्रयदोषः, यदाहुः, "एवं वेदोऽपि तत्पूर्वः, तत्सद्भावादौ वचने साशङ्को न प्रमाणं स्यादिति" ॥

एतत् प्रतिविपति ।

(१४६) ईशोक्तत्वेन नैवेष्टा तत्कृतत्वेन मानता ।
अन्योन्याश्रयता तस्माद्दोषो मानित्यवादिनाम् ॥

नहीश्वरकृतत्वेन प्रमाणं वेदोऽस्माभिरिष्यते, तनुकरणादिभिरनैकान्तिकत्वात्, अपितु प्रमाणं सदीश्वरकृत इतीश्वरकृतत्वेऽपि शास्त्रस्य नान्योन्याश्रयदोषः ॥

"कथं तर्ह्यस्य प्रामाण्यम्" इत्याह ।

(१४७) शास्त्रस्य मानता सिद्धा न्यायतः प्राक् प्रभाषितात् ।

तनुकरणभुवनादिवैलक्षण्येन प्रमाणज्ञानजनकत्वादेव प्रत्यक्षादेरिवास्य प्रामाण्यमित्युक्तम्,

"वाक्याद्धि सर्वतः पूर्वमर्थं धीरविशेषतः" ।

इत्यादिना, प्रोक्तं च भर्तृभिरपि,

"स्वतः सर्वप्रमाणानां प्रामाण्यम्"

इति, नित्यत्वमनित्यत्वं च प्रामाण्येऽनुपकारकमेव ॥

किमेवमीश्वरप्रयुक्तत्वमपि शब्दस्याप्रामाणुपकारकमेव" नेत्याह ।

(१४८) ईशोक्तत्वादमानत्वं जातुचिन्नोपपद्यते ।

कृतकत्वाद्रथ्यापुरुषवाक्यवदप्रामाण्यशङ्कास्य केवलमीश्वरप्रणीतत्वेन निवर्त्यते, रथ्यापुरुषाणां हि कामक्रोधादियोगेन दृष्टं विपरीताभिधानम्, ईश्वरस्य तु तदभावात् पित्रादेः पुत्रादाविव सर्वत्रोपकारायैव प्रवृत्तेर्न तथात्वमिति ॥

"ननु निष्प्रयोजनमत्र वेदस्येश्वरकर्तृकत्वसाधनम्" इत्याह ।

(१४९) समानत्वे ततः कृत्ये परितुष्टः प्रवर्तते ।

यो हि मोहाद्वेदस्य नित्यत्वेन प्रामाण्यमबुद्ध्वा कृतकत्वेनाप्रामाण्यमध्यारोप्य न प्रवर्तते, प्रवर्तमानो वान्येन निषिध्यते, तं प्रति वेदस्यापि कृतकत्वं मतिशास्त्रसाम्यप्रतिपत्तये वदोदितानां प्रवृत्त्यर्थं प्रतिपाद्यते, इति न निष्प्रयोजनमेतदिति ॥

पुनः प्रयोगान्तरभ्रान्त्या कारिकाभागेन परः ।

(१५०) असर्ववित् कथं देवं जानाति,

यदाहुः,

"सर्वज्ञो दृश्यते तावन्नेदानीमस्मदादिभिः ।
नास्त्यतोऽनुपलभ्यत्वात् पुंसामश्वविषाणवत्" ॥

इति ॥

एतदयुक्तमित्याह ।

(१५१) इत्युक्तमानतः ।
साक्षाच्चोत्सवनीयो हि योगस्तेनादरात् ततः ॥
अन्यवादादिसिद्धेन संस्कृताक्षोऽञ्जनादिना ।
यथा पश्यति सूक्ष्माद्यपीतरेषामतीन्द्रियम् ॥
संस्कृतात्मा तु योगेन तथा योगी प्रपश्यति ।
माहेश्वरेण वस्तूनि सर्वाणि परमेण तु ॥

आगमसिद्धवस्तुकमाभ्यासजेन परमेण योगेन समभिव्यक्तज्ञानातिशयो योगी सर्वाण्येवातीन्द्रियाणीश्वरादीनि वस्तूनि पश्यति, यथा सिद्धाञ्जनादिना संस्कृतनेत्रः पुरुषः पुरुषमात्रागोचराण्यत्यन्तव्यवहितानि निधानादीनि, इति योगिप्रत्यक्षसिद्धेश्वरेऽस्मदाद्यग्रहणमसिद्धत्वाच्चाभावसाधनमिति ॥

"ननु योग एव तावन्न सिद्धः, कुतस्तेनेश्वरदर्शनाद्यासिद्धता,, नेत्याह ।

(१५२) दृष्टा च प्रातिभेनेह वाक्यार्थव्यापृतिं विना ।
मेये त्रिष्वपि कालेषु लिङ्गानि च विना मतिः ॥
प्रातिभस्य तथा योगी प्रकृष्टेन तु सर्वथा ।
मिनोति युगपत् सर्वं तत्सिद्धौ योगचोदना ॥

यथा श्वस्ते भ्राता गमिष्यतीत्यागमानुमानाभ्यां विना प्रातिभेनैव योगेन प्रातिभस्य पुंसस्त्रिकालात्रिसंवादिनी मतिर्दृष्टा, तथैव योगिनोऽपि योगेनैवेश्वरादिविषया भविष्यतीति संभावनानुमानसिद्धत्वाद्योगप्रतिक्षेपस्तावदयुक्तः, चोदनासिद्धत्वाच्च, वेदान्तेषु हि,

"आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम् ।
ध्याननिर्मथनाभ्यासाद्देवं पश्येन्निगूढवत्,, ॥

इत्यादयो योगचोदनाः स्मृतीतिहासपुराणादिषु च सन्ति, इति योगिज्ञानमप्रतिक्षेप्यमेव ॥

न च तेषां चोदनावाक्यानामप्रामाण्यमित्याह ।

(१५३) व्यभिचारो न यस्य स्यादप्रमाणं कथं हि तत् ।
तच्चोदितक्रियाकर्ता तत्फलाप्ता च नो कथम् ॥

"नद्युत्यये हस्तियूथशतमास्ते,, इत्यादौ व्यभिचारदर्शनाल्लौकिकं वाक्यमप्रमाणमित्युक्तम्, न च चोदनावाक्यस्य व्यभिचारः कस्यचिदस्ति, इत्येतदपि प्रमाणमेव, चोदनासिद्धेश्वरादिप्रमितिक्रियाकर्तरि मोक्षफले विशिष्टे योगात्मनि स्वाभिधेय इति ॥

अन्यथा ।

(१५४) वेदोऽपि तत्समानत्वान्न मानं नापि भोगकृत् ।

विशेषाभावात् कर्मकाण्डप्रतिपादकस्यापि "ज्योतिष्टोमेन यजेत,, इत्यादेर्वेदभागस्याप्रामाण्यं स्वर्गादिफलकर्तृत्वाभावश्च प्रसज्यते, इति ॥

अत्र पराभिप्रायः ।

(१५५) इष्यतेऽत्रोभयं तच्चेत् ।

"अथास्मिन् भागे प्रामाण्यं स्वर्गादिफलकर्तृत्वं चेत्युभयमिष्यते,, ॥

आचार्य आह ।

(१५६) योगेऽप्येतत् तथेष्यताम् ।

न्यायस्य समानत्वाद्योगप्रतिपादकेऽपि वेदान्तादौ प्रामाण्यं मोक्षफलकर्तृत्वं च सिद्धमिति योगिनः प्रमाणसिद्धत्वात् तज्ज्ञानस्येश्वरे प्रवृत्तिसिद्धेरस्मदाद्यदर्शनमसिद्धत्वान्न तदभावसाधनमिति ॥

उपसंहरति ।

(१५७) इत्थं सर्वप्रमाणानां गोचरो हर ईरितः ।

एवं चानुमानागमयोगिप्रत्यक्षैरीश्वरः सिद्ध इति तदभावाभिधानादज्ञतैव भवतामिति ॥

अधुनेश्वरस्वरूपं विप्रतिपत्तिनिराकरणेन प्रतिपादयति ।

(१५८) स च स्वभाववैमल्यात् कार्ममायीयवर्जितः ।

तत्कार्यस्य कार्ममायीयस्य प्रवाहतोऽनादित्वात् सोऽपि तत्कर्तृत्वादेवानादिसिद्धः स्वभावविमलत्वेनोक्तः, आदिसिद्धस्य हि मुक्तात्मनः प्राग्बन्धसद्भावतः स्वभाववैमल्यासंभवात्, ततश्च "ये कर्मविशेषानुष्ठानाच्छतक्रतुवदीश्वरं ये तु पातञ्जला बुद्ध्यादिसामर्थ्येन नैयायिकवैशेषिकाश्च मनोयोगादाहुः,, ते प्रतिक्षिप्ताः, तथाभूतस्य पुरुषवत् संसारित्वेनेश्वरत्वायोगात् ॥

"ननु मुक्तशिववत् तस्यापीश्वरान्तरादैश्वर्यमिति प्रवाहनित्येश्वरवादिनः,, तान् प्रतिक्षिपति ।

(१५९) परस्मात् तस्य वैमल्ये मुक्तात्मासौ ततश्च सः ।
कृत्यस्तु विमलो येन स्वभावविमलो ह्यसौ ॥

भवेदेतत्, यदीश्वरताया नाशः स्यात्, स तु नास्तीति वक्ष्यामः, ततश्चोत्पाद्योत्पादकयोर्द्वयोरपीश्वरयोः संनिधानात् पूर्वः पूर्वतरो वा स्वभावादमलोऽभ्युपगन्तव्य इति कुतः प्रवाहनित्येश्वरवादः ॥

अत एव ।

(१६०) वैमल्यात् तस्य नो कर्म निर्मलः कर्मकृन्नहि ।
मलकर्मविहीनत्वान्मायीयं नो कलादिकम् ॥

आणवस्य बन्धस्याभावात् कार्मस्याप्यभावः, तयोरभावान्मायीयस्यापि, इति सर्वबन्धविहीनो भगवान् सिद्धः, कार्म-

भावेऽपि संस्कारतश्चक्रभ्रमवद् धृतशरीरत्वात् केषांचित् समलानामेव मायीयो बन्धोऽस्तीति द्वयोरत्रोपादानम्, तदुक्तं स्वायंभुववृत्तौ,"मलमायाख्ययुक्तानामप्यनुग्रहः संभवति,, इति॥

अत एव च,

(१६१) निष्कलत्वात् कलायुक्ता रागद्वेषादयः कुतः।

मायीयबन्धाभावादेव तदात्मकानां तस्य रागद्वेषादीनामभावः सिद्ध इति पुरुषकृतकर्मानुसारेण सुखदुःखादिप्रदत्वं न रागद्वेषादिभिरित्युक्तम्,

"येन यादृग्विधं कर्म,,

इत्यादि॥

"कथं तर्हि,

"सकलं चैव यो वेत्ति सदाशिवम्,

इत्यादावीश्वरः सकलः प्रोक्तः,, इत्याह।

(१६२) स लोकेशो महेशानो गीतः शक्तिकलान्वितः।

सकलो हि सशरीरः कथ्यते, शक्तय एव तस्य शरीरमित्युक्तम्,

"ज्ञानक्रिये शिवः प्रोक्तः सर्वार्थे निर्मले परे,,।

इति॥

किंच।

(१६३) सकलोऽपि च शक्त्यैव सर्वं वेत्ति करोति च।

सकलस्यात्मनोऽपि शक्तिरेव शरीरं तयैव सर्वत्रोपयोगात् तदुपकारकत्वाच्चेदं बाह्यमुपचारेण शरीरमित्युच्यते॥

ततः किमित्याह।

(१६४) शक्तिस्तेन कलापिण्डः सकलश्च महेश्वरः।

तेन शक्तिरेवानेककार्योपयोगात् कलापिण्डः शरीरं परमार्थतः कथ्यते, इतीश्वरः सकलः प्रोक्तः॥

स एव तु।

(१६५) शक्तिपिण्डकलावत्त्वाच्छक्तिमान्निष्कलः स्मृतः।

शक्तिशरीरत्वादेव तस्य बाह्यकलाद्यात्मकं शरीरं नास्तीति निष्कलः, यदुक्तं मोक्षकारिकासु,

"न कलादिकलापिण्डसंबद्धोऽसौ यथा पशुः।

कदाचिदपि देवेशस्तस्माद्गीतस्तु निष्कलः,,॥

ततश्च सकलनिष्कलयोर्न परमार्थतो भेद इत्युक्तं भवति, यदुक्तं तत्त्वसंग्रहे,

"अत्र च तत्त्वद्वितयं बोधध्यानादिसिद्धये गदितम्,,।

"अमूर्तिश्च तद्वांश्चेति च,,लेशादुक्तिश्च शक्तिशक्तिमतोः,, इति॥

अत्रैव मतान्तरमाह।

(१६६) चेष्टावान् सकलः केश्चित् तद्वियुक्तस्तु निष्कलः।

यदा स्थित्यादीनि कर्माणि विधत्ते तदा सकलः, समुपहृतक्रियस्तु निष्कलः,इति केश्चित् सकलनिष्कलयोरवस्थाभेदेन भेदः स्मृतो न वस्तुतः, तदिदमुक्तम्,

"ईशः सदाशिवः शान्तः कृत्यभेदाद्विभिद्यते,,।

"यद्येवं पुरुषस्याप्येवं सकलनिष्कलात्मत्वसंभवात् ततः को भेदोऽस्य,, इत्याह।

(१६७) विमलत्वाच्च सर्वार्थसंबद्धे तस्य दृक्क्रिये।

दृक्क्रियावरकस्य मलस्याप्यभावादेव युगपत् सर्वार्थसंबद्धे तस्य ज्ञानक्रिये, पुरुषस्य मलावृतत्वात् क्रमेणेति भेदः॥

अपिच।

(१६८) सर्वकर्तृत्वतश्चापि सर्वज्ञः सोऽधिगम्यते।

न केवलं विमलत्वात्, यावत् प्राक् प्रदर्शितात् सर्वकर्तृत्वादपीश्वरः सर्वज्ञः सिध्यति॥

"कथम्,, इत्याह।

(१६९) कुम्भकारो यथा वेत्ति सर्वं सफलकारकम्।

सर्वकर्ता तथा वेत्ति सर्वं सफलकारकम्॥

यथा प्रागगृहीतमूल्यसंशुद्ध्ये मृदादिना तेन घटं करिष्यामीति कुम्भकारादिकर्ता स्वकार्ये सर्वज्ञः सन् कर्ता दृष्टस्तथैव भगवानपि सर्वकर्तृत्वात् सर्वस्मिन् स्वकार्ये ज्ञः सिध्यतीति सर्वज्ञः प्रोक्तः॥

"यद्येवं कर्तृत्वस्य क्रमेण दर्शनात् ततो विज्ञानमपि क्रमेण सिध्यतीति युगपत् सर्वज्ञत्वाभावस्तस्य,, इत्याह।

(१७०) मोच्योत्पाद्योपसंहार्यनिरोध्यप्रेर्यवस्तुषु।

एककालाभवेष्वेषु युगपत् कर्तृता मता॥

क्रिया हि क्रमिका न कारकत्वम्, कुम्भकारादावपि युगपदनेकभोजनगमनादिक्रियासु कर्तृत्वसिद्धेः, इत्येषु मोच्यादिषु कार्येषु निमित्तभूतेषु भवविषया भगवतो युगपत् कर्तृता यतः, अतश्च ज्ञानमपि युगपदेव सिध्यतीति न विरोधः॥

अत एव तस्य त्रिकालामलज्ञानसिद्धिरित्याह।

(१७१) तच्च त्रिकालकं तेन यदित्थं वेत्ति शंकरः।

अनेनेदं कृतं कर्म देयं चास्येदृशं फलम्॥

एवं हि सर्वकृत्येषु त्रिकालविषयं हि तत्।

बोद्धव्यं नान्यथा शंभोः स्याद्यतः कृतकृत्यता॥

तदिदमुक्तम्,

"कुम्भकारो यथा वेत्ति,,इत्यादिना॥

अत एव।

(१७२) प्रमाणं तच्च शैवाख्यं पशुमानविलक्षणम्।

द्वारद्वारिकया कृत्यं साक्षाच्चेष्टं तु तत्फलम् ॥

यथावस्थितं सर्वमेव वस्तु तेन प्रमीयते यतः, अतः पशुमानविलक्षणं तत् प्रमाणम्, प्रयोजनं तु तस्येश्वरज्ञानस्य विद्येश्वरादिद्वारेण पञ्चविधजगत्कृत्यसंपादनम्, साक्षाच्च विद्याविद्येश्वराद्यनुग्रह इति ॥

पशुप्रमाणस्यैतद्विलक्षणं स्वरूपमाह ।

(१७३) सदाक्षलिङ्गवाक्येश्च व्यक्तं ज्ञानं तु पौद्गलम् ।
प्रत्यक्षमनुमानं च शाब्दं चेत्युदितं क्रमात् ॥

इन्द्रियाद्युपायत्रयभेदात् प्रत्यक्षानुमानागमभेदेन त्रिविधं परिमितिविषयं चेति ।

"अथ कथं तदेवोपायापेक्षं न पारमेशम्,, इत्याह ।

(१७४) शैवं न व्यञ्जकापेक्षं ज्ञानमावृतिहानितः ।
गुरुभिः पशुमानेभ्यो गीतं तेन विधर्मकम् ॥

मलादिपाशैरनावृतत्वात् पारमेशं नेन्द्रियाद्युपायापेक्षमर्थेषु प्रवर्तते, इति पशुप्रमाणविलक्षणमुक्तम् ॥

अत एव ।

(१७५) न संदेहविपर्यासरूपं तदनपेक्षणात् ।
ज्ञानमेतत् पशौ यस्माद्दुष्टं व्यञ्जकदोषतः ॥

पशुज्ञानवदिन्द्रियाद्युपायानपेक्षणात् तत्तत्संश्लेषदोषैर्मिथ्यात्वात्तज्ज्ञानसंशयैर्युज्यते, इति तद्विलक्षणम् ॥

नापि गृहीतग्राहित्वे स्मृतिरूपं तदित्याह ।

(१७६) सर्वदैवोदितत्वाच्च स्मार्तं तदपि नो भवेत् ।

ग्राहकात्मनो ज्ञानस्य प्रथमकाण्ड एव नित्यत्वेनैकतया प्रतिपादितत्वाच्चाध्यवसायज्ञानस्यैव स्मृत्यादिभेदः संभवतीति ॥

अतोऽपि तद्विलक्षणं किमत आह ।

(१७७) इत्थं च मानरूपेण विहीनं मानमेव तत् ।

अतश्च संशयादिरहितत्वे सत्यर्थसाक्षात्कारात्मकत्वादिन्द्रियप्रत्यक्षवत् तदपीश्वरप्रत्यक्षं प्रमाणमेव ॥

अत्र परः ।

(१७८) नन्वदेहस्य विज्ञानं न कर्तृत्वं च युक्तिमत् ।
शंकरस्य यतः पुंसां देहादौ सति दृश्यते ॥

विज्ञानस्य देहाविनाभावो देहपारतन्त्र्यमस्मदादिषु सिद्धम्, इत्यर्थाद्देहाभावेन सह विरोधसिद्धेन देवसर्वज्ञत्वं प्रयोमान्तरेणाच निषिध्यत इत्यपौनरुक्त्यम्, यदाह मण्डनः, "विधिविवेके परतन्त्रं बहिर्मनः,, इति ॥

एतत् प्रतिक्षिपति ।

(१७९) न युक्तिमच्छरीरादिनिषेधे मानमीरितम् ।
सर्वज्ञत्वादिसिद्धौ च महेशस्य यतः स्फुटम् ॥

नैतद्युक्तम्, यतो मध्यमकाण्डे,

"कुलालसमतां पत्युः,,

इत्यादिना तस्य शरीरादि प्रतिषिद्धम्,अत्र च सर्वज्ञत्वं प्रसाधितम्, इत्यशरीरत्वसर्वज्ञतयोर्विरोधाभावाच्च सहावस्थानानुपपत्तिः, इति न विरुद्धोपलम्भोऽयं सर्वज्ञत्वाभावसाधनः ॥

"ननु पारतन्त्र्यं बहिर्मनोदृष्टान्तसिद्धम्,, इत्याह ।

(१८०) संरुद्धत्वाच्च तत् पुंसां व्यक्तौ देहाद्यपेक्षते ।

यद्यत्र मनोऽन्तःकरणमभिप्रेतम्, तद्व्यधिकरणासिद्धो हेतुः, तस्य पारतन्त्र्यात् सर्वज्ञस्य कानुपपत्तिः, नहि मनोयोगात् तत्र सर्वज्ञत्वं पुरुष इवोपपद्यते, इत्याद्युक्तम्, प्रातिभयोगिनां च पूर्वनयेनेन्द्रियानपेक्षया स्वातन्त्र्येणैव मनसो बाह्यार्थे प्रवृत्तिसिद्धेरनैकान्तिकश्च, अथ मनो ग्राहकात्मैव विवक्षितम्, तदिन्द्रियादिपारतन्त्र्यं भवतां परमात्मादावदर्शनादविद्याप-रुद्धत्वेन सिद्धम्, इतीश्वरे तदभावात् तस्याप्यभाव इत्यदोषः ॥

"ननु रूपादिग्रहणमिन्द्रियादिकरणकं पुरुषे सिद्धम्,, इतीश्वरे तदभावात् तस्याप्यभावः, इति कारणानुपलब्ध्या सर्वज्ञत्वनिषेधोऽयं भविष्यति,, इत्याह ।

(१८१) नचाप्येवंविधं कार्यं देहादौ सति दृश्यते ।

प्रतिपादितनयेन प्रातिभानां योगिनां चेन्द्रियं विना रूपादिग्रहणं मानसप्रत्यक्षेण चान्येषां दृष्टमिति न सर्वमेव रूपग्रहणमिन्द्रयादिकरणकं सिध्यति, अपितु विशिष्टमेव, यदाहुः,

"संबद्धं वर्तमानं च गृह्यते चक्षुरादिना,, ।

इति, ततश्चेन्द्रियाद्यभावात् तत्र तथाभूतस्यैव रूपादिग्रहणात्मनः कार्यस्याभावः सिध्यति, न तदकारणस्य त्रिकालामलानन्तविषयस्यापीत्यदोषः ॥

ये त्वाहुः ।

"नास्तीश्वरो बुद्धादिभिः सर्वज्ञैरदृष्टत्वाच्छशविषाणवदिति,, तान् प्रत्याह

(१८२) प्रसिद्धमानगम्यानि वस्तून्यप्यन्यथैव ये ।
कथयन्ति स्म बुद्धाद्यास्ते कथं सर्ववेदिनः ॥

भवेदेतत्, यदि सर्वज्ञत्वं तेषां सिद्धं स्यात्, तत्तु प्राक्प्रदर्शितप्रमाणसिद्धात्मादिवस्त्वदर्शनात् तेषामसिद्धमेवेत्यसाधनम् ॥

तथा ।

(१८३) महाज्ञानबलाद्योऽपि ध्रुवान्तं कथयन्ति हि ।
सर्वज्ञानक्रियायुक्तं पृष्टास्तेऽपि न शक्नुयुः ॥

Digitized by Google

निर्वक्तुं सर्वशब्दार्थमपवादविवर्जितम् ।
यावन्नः शैवसिद्धेशदृक्क्रियागोचरं बुधाः ॥

येऽपि महाव्रताः शैवाभिधानेन पृथिव्यादिध्रुवान्तानर्थान् सर्वमिति कथयन्ति, ते सर्वज्ञं पृष्टाः सन्तः सर्वशब्दार्थं निरपवादं वक्तुं नच शक्नुवन्त्येव, यतस्तैः प्रकृत्यादिकारणत्वेन कलैव ध्रुवपदेन प्रोक्ता, इति तदन्तस्यैव सर्वशब्दाभिधेयता, तावन्मात्रस्य ज्ञश्च सर्वज्ञो गीयते, न मायादेरपीति, ततो न यावदस्मद्दर्शनप्रसिद्धेश्वरगोचरं सर्वमेव शिवाद्यवनिप्रान्तं वस्तु पश्यतीत्युच्यते तावत् सर्वज्ञं प्रतिपादयितुं निरपवादं च सर्वशब्दार्थं व्यवस्थापयितुं न शक्यमेव, अतोऽस्मद्दर्शनप्रसिद्ध एव सर्वज्ञो न दर्शनान्तरप्रसिद्ध इत्यदोषः ॥

एवं सर्वकर्तापि स एवेत्याह ।

(१८४) मन्त्रमन्त्रेश्वरेभ्योऽपि महेशे महती क्रिया ।

मन्त्रमन्त्रेशानां सर्वज्ञत्वेऽपि मायाविषयसर्वकर्तृत्वयोगतः शुद्धेऽध्वनि कर्तृत्वासंभवाच्चेश्वरवत् सर्वकर्तृत्वमिति तेभ्योऽपि विशिष्ट एव ॥

किंच ।

(२८५) मुक्तेभ्योऽपि विशिष्टोऽसौ स्वभावविमलत्वतः ।

मुक्तशिवानां सर्वज्ञत्ववदीश्वरतुल्यसर्वकर्तृत्वयोगेऽप्यनादिसर्वज्ञत्वसर्वकर्तृत्वाभावाच्च तत्समत्वम् ॥

न केवलमनादिरेव ।

(१८६) विभुश्चासौ यतस्तस्य दृक्क्रियालक्षणो गुणः ।
सर्वार्थगो विना नो यद्गुणिनो गुणसंनिधिः ॥

सर्वत्र तच्छक्तिकार्यस्य स्थित्याद्यनुग्रहान्तस्य दर्शनाच्छक्तीनामिव तस्यापि व्यापकत्वम्, शक्तिमता विना शक्तेरसंभवो यतः ॥

किंच ।

(१८७) नित्यश्च तं विना कालः कश्चित् संभाव्यते न यत् ।

नहीश्वररहितः कश्चित् काललवोऽपि संभावयितुं शक्यः, तत्कार्यस्य स्थित्यादेरनुपपत्तितः संसारस्य सामञ्जस्यप्रसङ्गात्, इत्यविनश्वरेश्वरसिद्धिः ॥

"ननु तद्देवान्यो भविष्यतीति प्रवाहनित्येश्वरवादिनः,, तान् प्रतिक्षिपति ।

(१८८) दृक्क्रियागुणवत्त्वाच्च कारणाभावतश्च सः ।

नित्य इत्यनुवर्तते, यो दृक्क्रियागुणयुक्तः स नित्यो यथात्मा, दृक्क्रियागुणयुक्तश्चेश्वरः, तस्मादविनश्वरः, यश्चाकारणः स नित्यो यथात्मादि, अकारणश्चेश्वरः प्रोक्तः, ततोऽप्यविनश्वर इति न प्रवाहनित्येश्वरवादः ॥

यदप्याहुः,

"जगच्च सृजतस्तस्य किं प्रयोजनमुच्यताम् ।
प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते ॥
एवमेव प्रवृत्तिश्चेच्चैतन्येनास्य किं भवेत्,, ।

इति, तत्राप्याह ।

(१८९) मलाद्यभावतस्तस्य चेष्टा न स्वात्मभूतये ।
युक्ता नापि स्वभोगाय सर्वज्ञत्वादियोगतः ॥

निर्मलत्वेन प्राप्तप्राप्तव्यस्य न तावत् तस्य पुरुषस्येव स्वात्मनो मोक्षार्था, सर्वज्ञत्वाच्च नापि भोगार्था प्रवृत्तिरुपपद्यते, भोगस्याज्ञानानुबन्धित्वेन सर्वज्ञेऽनुपपत्तेरुक्तत्वात् ॥

नापि क्रीडार्थेत्याह ।

(१९०) क्रीडार्था युज्यते चेष्टा सा नोक्तव्यतिरेकतः ।
वर्तते तन्निषेधेन तस्यास्तेन निषेधतः ॥

क्रीडाद्यर्थमपि न तस्य चेष्टा युज्यते, तद्धेतुत्वेनोक्तस्य मलादेर्व्यतिरेकादभावतः, मलादिहेतुका हि पुरुषेषु क्रीडा दृष्टा, इति मलादेस्तत्र निषेधादेव तस्या अपि निषेधः, तदुक्तं भवद्भिरपि,

"क्रीडार्थायां प्रवृत्तौ तु विहन्येताकृतार्थता,, ।

इति ॥

इतश्च न तस्य स्वार्था क्रीडाद्यर्था वा चेष्टेत्याह ।

(१९१) किंचेशे व्यापृते पुंसां भुक्तिर्मुक्तिश्च दृश्यते ।
चेष्टातः पुंफलायेव स्वाभाव्यात् तस्य गम्यते ॥

प्रागुक्तक्रमेण च मोक्षस्येश्वरव्यापारं विनानुपपत्तेस्तस्य परार्थमेव चेष्टा परोपकारस्वाभाव्यादेव प्रतीयते, नान्यतः ॥

मुक्तेरीश्वरकर्तृत्वं प्रतिज्ञातं साधयितुं स्वरूपमाह ।

(१९२) मुक्तिः परेशतुल्यत्वं मन्त्रमन्त्रेशतापरा ।

सर्वज्ञत्वकर्तृत्वं स्वभावः पुरुषस्येत्युक्तम्, अतस्तत्स्वरूपावाप्तिः परमेशतुल्यत्वं परा मुक्तिः, अपरा तु वक्ष्यमाणमन्त्रमन्त्रेशतुल्यतेति ॥

सा चेश्वरेण क्रियते नतु ज्ञानमोक्षवादिनामिव पुरुषेणेत्याह ।

(१९३) स्वयं करोत्यणुर्नैतां पाशहृद्दुबलत्वतः ।

"ननु ज्योतिष्टोमाद्यनुष्ठानेन स्वर्गादिभोगवदात्मा ज्ञातव्य इत्याद्यनुष्ठानात् पुरुष एव मोक्षं करिष्यतीति पाशदुर्बलत्वस्य मोक्षकर्तृत्वेन सह विरोधासिद्धेरनैकान्तिकता,, "कः पुनरत्र पाशोऽभिमतो भवताम्,, "नन्वज्ञानमेव,, "तत् किं वस्त्ववस्तु वा,, अवस्तुत्वे तस्य शशविषाणादेरिव नित्यनिवृत्तत्वात् तन्निवर्तको ज्ञानानुष्ठानविधिरेवोऽनर्थक एव, वस्तुत्वे

Digitized by Google

यदि पुरुषस्वभाव एव, ततो नित्यत्वव्यापकत्ववदनिवर्त्यत्वादनिर्मोक्षः, व्यतिरेके त्वावरकस्वभावं चक्षुषः पाटलादिवदज्ञानहेतुत्वादज्ञानशब्दवाच्यं द्रव्यान्तरमेव तदभ्युपगन्तव्यम्, द्रव्यस्य चावरकस्य तमसः पटलादेरिव ज्ञाननिवर्त्यनिस्वभावसिद्धेः पाशदृढबलत्वस्य मोक्षकर्तृत्वेन सह विरोधः सिद्ध इति नाचानैकान्तिकतेति, "तर्हि कृतप्रयोजनत्वात् पाशाः स्वयमेव पुरुषं मुञ्चन्तीति सांख्याः,, यदाहुः,

"रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात् ।
पुरुषस्य तथात्मानं प्रकाश्य विनिवर्तते प्रकृतिः,, ॥

इति ॥

अत्राप्याह ।

(१९४) पाशा अपि न कुर्वन्ति यतस्ते तन्निरोधकाः ।
नचापि बन्धनं बन्ध्यं विमुञ्चद्दृश्यते यतः ॥

नह्यत्यन्तपरिपाकात् कृतप्रयोजनत्वेन निश्चितोऽपि पटलादिः स्वयमावरकत्वेन वा निवृत्तिस्वभावः सिद्धो येन मोक्षेऽप्येतत् कल्प्यमानमुपपद्यते ॥

यत एतत् तस्मात् ।

(१९५) बलीयान् पशुपाशेभ्यस्तन्मोचकतया हरः ।
स एव मोचकस्तस्मात् सर्वस्माद्भवबन्धनात् ॥

चक्षुरादेः पटलादिनिवृत्तावीश्वर एव हेतुः, नान्यः ॥

"ननु शुक्तिरजतादिभ्रमेषु ज्ञानस्याज्ञाननिवृत्तौ पुंसां सामर्थ्यं सिद्धम्,, अतो मोक्षेऽपि तथैव भविष्यतीत्याह ।

(१९६) पुंसां सापेक्षशक्तीनां स चानावृतशक्तिकः ।
युज्यते शक्त्यभिव्यक्तौ नेत्राणां भानुमानिव ॥

इह प्रथमकाण्डोक्तज्ञानवदज्ञानमपि द्विविधमध्यवसायात्मकमेव, विषयसादृश्याविवेकेन शुक्तिकारजतादिषु विपरीतज्ञानात्मकमुत्पद्यते, इति युक्तैव तस्य प्रतिपक्षभूतात् सम्यग्ज्ञानान्निवृत्तिः, यत् पुनरनध्यवसायात्मकं तद् द्रव्यान्तराविष्टकाकारादेर्वाऽऽदित्यादेर्नैवृत्तिस्वभावसिद्धम्, न प्रतिपक्षज्ञानात्, अनध्यवसायात्मकं च पौरुषमज्ञानं सुषुप्तावस्थास्विह पूर्वं प्रतिपादितम्, अध्यवसायात्मनो बोद्धृत्वात्, अतस्तदपि स्वहेतुविपक्षभूतादीश्वरादेव वस्त्वन्तरान्निवृत्तिस्वभावमनुमीयते, इति स एव मोक्षे हेतुः सिध्यति, नत्वात्मानः, तज्ज्ञानस्य तत्र सामर्थ्यासिद्धेः, इत्यदोषः ॥

"कथं तर्हि "आत्मा ज्ञातव्यः,, इत्याद्याः श्रुतयः,, इत्याह ।

(१९७) द्रष्टव्यं चेदृशं तत्त्वं नान्यथा मुक्तिसंभवः ।

ता अप्यत एवेश्वरप्रतिपत्तिकर्तव्यतानिष्ठा एवाभ्युपगन्तव्या इत्युक्तम्, अन्यथा मोक्षायोगात् ॥

"ननु वरममोक्षोऽस्तु नचेश्वरः,, इत्यनिर्मोक्षवादिनः, यदाहुः,

"अनादित्वाद्भवः पुंसां न कदाचिन्निवर्तते ।
ततः सुखासुखप्राप्तिनिवृत्ती शाश्वतः स्मृते,, ॥

इति,

अत्राप्याह ।

(१९८) भवितव्यं तया पुंसां सर्वो व्याप्त्यर्हतां ध्रुवम् ।

सर्वावरणनिवृत्तिस्वभावाः पुरुषा आवरणप्रकर्षापकर्षाभ्यां मूढाद्यवस्थास्वपकृष्टप्रकृष्टतत्स्वरूपोपलम्भान्मेघावृतसवितृवदिति नानिर्मोक्षोऽभ्युपगन्तु युक्तः, तच्चेश्वरासिद्धिः, नच भवस्यानादित्वं कर्महेतुत्वाद्ययुक्तम् ।

"कर्मतश्च शरीराणि विषयाकरणानि च,, ।

इति ॥

नचागमविरुद्धोऽयं पक्ष इत्याह ।

(१९९) ईशान्मोक्षोऽन्यथा नैव पुंसामेतन्निरूपितम् ।

तथा च श्रीपौष्करे,

"न मोक्षं याति पुरुषः स्वसामर्थ्यात् कदाचन,, ।

इति, श्रीमद्दीक्षोत्तरेऽपि,

"शिवादेवात्मनां मोक्षः,,

इति, ईश्वरव्यापारात्मकत्वाच्च दीक्षायाः श्रीमत्स्वायंभुवेऽपि निरूपितम्,

"दीक्षैव मोचयत्यूर्ध्वं शैवं धाम नयत्यसौ,, ।

इति ॥

"नन्वेवमपि केषांचिदनिर्मोक्षदर्शनादीश्वरे रागद्वेषसंभावना,, इत्याह ।

(२००) न रागो नापि च द्वेषस्तस्येत्येतच्च युक्तितः ।

ईश्वरस्य रागद्वेषाद्यभाव इति निरूपितं मध्यमकाण्ड एवेत्ययमपि न दोषः ॥

नचापुरुषार्थभूतत्वाद्वैशेषिकादीनामिवायमपि मोक्षो न केनचिदाश्रीयत इत्याह ।

(२०१) वाञ्छा चाणोः सदैवास्ति सर्वस्यैवोत्तमे पदे ।
अतस्तद्दीयमानं तु न कदाचिन्न मन्यते ॥

नहि सर्वबन्धनिवृत्त्या सर्वैश्वर्यप्राप्तौ कश्चिन्निरभिलाषः संभवतीति ॥

"यद्येवमीश्वरस्य निरपेक्षत्वात् कथं न युगपत् सर्वेषां मुक्तिः,, इत्याह ।

(२०२) अप्यनुग्रहसामर्थ्यं सर्वथा चास्ति शंकरे ।
तथापि युगपन्मुक्तिर्नाणूनां तेन दृश्यते ॥

कुत इत्याह ।

Digitized by Google

(२०३) सृष्टा योनेर्यथा कालं महेशानो व्यपेक्षते ।
प्रोत्सारणे तथा कालं मलस्यासावपेक्षते ॥

यथाहि मायातः सर्गनिमित्तं कर्मपरिपाककालापेक्षत्वेन भगवतो न युगपत् सर्वभोगप्रदत्वमित्युक्तं प्राक्, एवं मोक्षनिमित्तमलपरिपाकापेक्षित्वाच्च युगपत् सर्वेषां मोक्षप्रसङ्गो निरपेक्षत्वस्यैवासिद्धेः ॥

अत्र पराभिप्रायमाह ।

(२०४) अपरेऽपि स्वतन्त्रोऽसौ रोचते यो यथा यदा ।
तस्मै पुमांसो देवाय तेषां मुक्तिस्तदा तथा ॥

स्वतन्त्रो हि परमेश्वरः, शक्तत्वेनान्यानपेक्षणात् । अन्यापेक्षायां तु सापेक्षमसामर्थ्यं भवतीत्यसमर्थ एवेश्वरः स्यात्, अतो यो यथा परापरमुक्तिसंबन्धितया तस्मै रोचते तं तथैव योजयति, नतु मलपरिपाकाद्यपेक्षयेति ॥

एतत् प्रतिक्षिपति ।

(२०५) पुनर्भवप्रसङ्गः स्यात् स्वतन्त्वादिति नो यतः ।

नैतत्, यतो मोक्ष इव संसारेऽपि कर्तव्येऽसौ स्वतन्त्र एवेति मुक्तस्यापि पुनः संसारं कुर्यात्, दुष्कृतिनोऽपि स्वर्गं सुकृतिनश्च नरकमिति मोक्षशास्त्राणां सत्कर्मानुष्ठानानां चानर्थक्याल्लोकायत एवोपास्यो भवताम् ॥

"अथ तत्र कर्मविपाकापेक्षया नैव प्रसङ्ग इत्युच्यते,, यद्येवम् ।

(२०६) स्वभावस्तस्य नेतादृक् प्रमितः शंकरस्य हि ।

न तन्नानपेक्षस्वभावः सिद्धोऽसाविति भोगोऽपि कर्मविपाकमिव मोक्षे मलविपाकमपेक्षिष्यते, इति को विरोधः, नच कर्माद्यपेक्षितैवास्वातन्त्र्यमपित्वीश्वरान्तरायत्तता, सा च तस्य परमेश्वरत्वादेव नास्तीत्युक्तं मध्यमकाण्डे ॥

किंच, आगमविरुद्धोऽयं पक्ष इत्याह ।

(२०७) उक्तं च तेन मत्तुल्यः प्राप्नोति न भवान्तरम् ।
प्रतिपादयितुं शक्यं नापि मिथ्येति तद्वचः ॥

तथाहि श्रीमत्स्वायंभुवादौ,

"अनाद्यशुद्धिशून्यत्वात् प्राप्नोति न भवान्तरम्,, ।

इति यदुक्तं तत् स्वतन्त्रशक्तिपातपक्षे नोपपद्यते, पुनर्भवप्रसङ्गस्य तत्रावश्यंभावात्, इत्युक्तं यतः, नच पारमेश्वरं वचनमप्रमाणमित्युक्तं प्रागेव, ततः पुनर्भवप्रसङ्गासिद्धेर्न स्वतन्त्रः शक्तिपातोऽपितु मलपरिपाकापेक्ष एवेति न युगपत् सर्वेषां मोक्षप्रसङ्गः, यथा च मलपरिणतेरपि नैव प्रसङ्गस्तथोक्तमाचार्येण तत्त्वत्रयनिर्णय एवेति, तत एवावधार्यम् ॥

रूपान्तरेण स्वातन्त्र्यं शक्तिपातस्य समर्थयितुमाक्षिपति ।

(२०८) पत्या पुमर्थसिद्ध्यर्थं सृष्टा मन्त्राः सनायकाः ।
तेषामेकोऽपि तत् कर्तुं शक्नोति बहुभिस्तु किम् ॥

सप्तकोटिसंख्याता मन्त्रा अष्टावनन्तेशादयो मन्त्रेशा भगवता पुरुषार्थसिद्धये निर्मिता इत्यागमार्थे एकेनैव तत्सिद्धेरयुक्त इति ॥

एतत् प्रतिक्षिपति ।

(२०९) अनुग्रहोऽपि संभूतिस्तेषां चानुग्रहादरः ।
कृत्ये नियोगः शैवोक्तो नोत्पत्तिः कृत्यसिद्धये ॥

बहूनां हि तदानीं तुल्ययोग्यतयादरोऽनुग्राह्यमन्त्रमन्त्रेश्वरत्वेन युगपदनुग्रहो न त्वधिकारार्थमेवोत्पत्तिरित्युत्पत्तौ तावच्च दोषः, "नन्वधिकारो भविष्यति,, न, अत एवात्र शक्तिपातस्य स्वातन्त्र्यासिद्धेरदोषः ॥

अत्र परः ।

(२१०) नन्वनुग्रहतः शैवाज्जातास्तुल्यबलास्तु ते ।
प्रेर्यप्रेरकभावो हि तेषां तेन न युज्यते ॥

मन्त्रमन्त्रेश्वराणां परमेश्वरानुग्रहान्मुक्तात्मनामिव शिवसमानत्वमेव, इति

तेऽधिकारं प्रकुर्वन्ति शिवेच्छाविधिचोदिताः ।

इत्यादिश्रुतिविरोधः ॥

तं परिहरति

(२११) सर्वज्ञानोदयस्तुल्यस्त्वाधिपत्यं विशिष्यते ।
नाभिव्यक्तं हि तत् तादृक् तेषां यादृङ्महेश्वरः ॥

अत एव शिवेच्छाविधिचोदितत्वश्रुत्यन्यथानुपपत्त्या न तेषां मुक्तशिववत् क्रियाशक्त्यापि शिवसमत्वमभिव्यक्तमिति प्रतीयते, अपितु "सर्वज्ञज्ञानसंयुता,, इति श्रुतेर्ज्ञानशक्त्यैवेत्यविरोधः ॥

अपिच ।

(२१२) अधिकारो हि संस्कारस्तेषां शैवे विगीयते ।
यतः कृताधिकारास्ते व्रजन्ति शिवतुल्यताम् ॥

यतः परमेश्वरेणासावधिकारात्मकः संस्कारस्तेषां सावधिरेव विहितः, यत् श्रूयते,

"अनन्तोपरमे तेषां महतां चक्रवर्तिनाम् ।
विहितं सर्वकर्तृत्वं कारणं परमं पदम्,, ॥

इति, ततोऽपि न शिवसमानत्वम् ॥

अत्र मतान्तरमाह ।

(२१३) तुल्यत्वेऽप्यर्थनिष्पत्तिर्नान्यथेत्यपरे जगुः ।
शिष्या इव गुरोः शंभोस्ते तच्चित्तनियोगिनः ॥

Digitized by Google

"शिवतुल्येऽपि मन्त्रमन्त्रेश्वराणां तदीयाधिकारकारित्वमिव शिष्याणां भविष्यतीति," केचित्, तैस्तु दृष्टान्तेन साम्यमत्र चिन्त्यम्, शिष्याणां हि गुरुसाम्येऽपि तदीयनियोगाकरणात् प्रत्यवाययोग्यता, नतु तेषां शिवसमत्वं यतः ॥

प्राक् शरीरानभ्युपगमेनेश्वरस्य कारकत्वं प्रतिपादितम्, अधुना तत्प्रतिक्षेपेणाह ।

(२१४) इच्छामात्रेण देवेशः कृत्यकृन्न प्रयासतः ।
इच्छा च तस्य कृत्येषु न प्रतीघातमश्नुते ॥

मात्रग्रहणमवधारणार्थम्, इच्छयैवाव्याहतप्रसरया भगवतः कर्तृत्वं न शरीरकरणादिप्रयासेनेति तेषामभावोऽनुपयोगात् ॥

"ननु यः कर्ता नासौ शरीरादिप्रयासानपेक्षः, अव्याहतेच्छो वा, यथा देवदत्तादिः, कर्ता चेश्वरः, अतस्तथाभूत एव," इत्यत्राप्याह ।

(२१५) प्रयासकरणात् पुंसामिच्छा व्याघातधर्मिणी ।
पशुत्वात् तच्च देवस्य निषिद्धं न्यायवर्त्मना ॥

सर्वज्ञत्वसर्वकर्तृत्वसद्भावेऽपि पुंसां मलावृतत्वात् कार्ये शरीराद्यपेक्षित्वमनीश्वरत्वं चेत्युक्तम्, ईश्वरस्य तु तदभावात् तयोरप्यभावः ॥

"नन्विच्छामात्रेण पुंसां कर्तृत्वमदृष्टम्," इत्याह ।

(२१६) स्तोभादिकर्मसंसिद्धिरिच्छामात्रेण दृश्यते ।
पुंसां प्रकृष्टमन्त्रादिस्वभावाविद्धचेतसाम् ॥

सिद्धमन्त्राणां हि विषादिकार्यमिच्छामात्रेण पुरुषाणामपि दृश्यत एव ॥

एतदेव दर्शयति ।

(२१७) पशुर्बन्धनबन्धी स प्रभावातिशयाद्धि तत् ।
इच्छयैव करोतीशः कुर्यान्नेति किमद्भुतम् ॥

बन्धनानां विषादीनां बन्धः स्तोभादिः प्रागुक्तः, स यस्यास्ति स पशुः कार्यकारणयुक्तः प्रागुक्त एव, पुरुषो मन्त्रप्रभावातिशयादिच्छामात्रेण तं स्तोभादिकं करोतीतीष्यते, नत्वीश्वरस्तथाभूतप्रभावातिशय इत्याश्चर्यम् ॥

यदप्याहुः केचित्,

"नचानिमित्तया युक्तमुत्पत्तुं हीश्वरेच्छया ।
यद्वा तस्य निमित्तं वस्तद्भूतानां भविष्यति," ॥

इति, तत्राप्याह ।

(२१८) इच्छायाः कारकग्रामस्पृष्टाः केचित् प्रचक्षते ।
निमित्तं वस्तु मोच्यादि तज्ज्ञानं करणं त्विति ॥

मोच्योत्पाद्यादिवस्तुयोग्यतैवेच्छायाः समुत्पादे निमित्तम्, अस्मदादौ तथैव सिद्धेः, करणं तद्विषयं कर्तुर्ज्ञानम्, इतीश्वरेऽपि तथैवोपपत्तेर्न किंचिदेतत् ॥

एकानेकविभेदोऽपि तस्या नाहेतुक इत्याह ।

(२१९) एककालविनिष्पाद्येष्वेकरूपेषु वस्तुषु ।
एकैवेच्छा तथानेका कालरूपविभेदिषु ॥

स्थितिसंरक्षणादिविषयाकारभेदाभ्यां स्थित्यादावपि कालभेदाभ्यामस्या भेदाभेदाविति नाहेतुकौ ॥

सा च क्रियाशक्तेर्नान्येत्याह ।

(२२०) वामादिकः क्रियाशक्तेर्भेदो यः सोऽपि गम्यते ।
इच्छायाः सर्वकृत्यानि तयैवेशः करोति यत् ॥

यतः सर्वकार्येष्वस्मदादीनामपीच्छैवाविनाभाविनी कारकतया सिद्धेत्युक्तं मध्यकाण्डे, ततः सैव क्रियाशक्तिर्वामादिभेदैर्भिन्ना भगवतः शास्त्रे प्रतिपादितेत्यवगन्तव्यम्, न ततोऽन्येति, तस्या असिद्धेः ॥

सा च निरवयवत्वात्मस्वरूपाव्यतिरेकादात्मरूपाया ज्ञानशक्तेरप्यभिन्नेति दृष्टान्तेन दर्शयति ।

(२२१) गुरुभिः कमलाश्लिष्टा यथैवार्कस्य दीधितिः ।
तत्प्रकाशं विकासं च करोतीति द्विधोच्यते ॥
तथैव शक्तिरेकैव संश्लेषादेव वस्तुषु ।
विज्ञप्तिं तत्क्रियां चैव करोतीति द्विधोच्यते ॥

यथा हि सवितुर्दीधितिः कमलेष्वाश्लिष्टा प्रबोधप्रकाशौ विदधती द्विधोच्यते, तथैव भगवतः शक्तिर्वस्तुषु प्रकाशविकासौ विदधतीति द्विविधा, इति कार्यभेदाद्भेदेन व्यपदिश्यते, नतु परमार्थतो भेदोऽस्याः स्यादिति ॥

तथैव ।

(२२२) ज्ञेयाधिष्ठेयनिष्पाद्यभेदादेकापि भिद्यते ।
वामादिभिरनेकैस्तु भेदैः शक्तिर्न मुख्यतः ॥

ज्ञानशक्तेर्ज्ञेयभेदेनैव क्रियाशक्तेः कार्यभेदेन च भेद इत्युक्तं पुरुषपरीक्षायाम्, ततश्च वामादिभेदोऽपि तस्याः कार्यभेदोपाधिको न मुख्यत इति ॥

येनैवमिच्छैव क्रियाशक्तिः ।

(२२३) प्रयासेन विनेशानः कृत्यकृत् तेन गीयते ।

तेन कारणेन स्वदेहस्पन्दादौ कुम्भकारादिरिवेश्वरोऽपि शरीरान्तरप्रयासानपेक्षया जगति कर्ता प्रोक्तो नान्यथेति ॥

अत्र परः ।

(२२४) इच्छामात्रात् करोतीति नन्विच्छा नास्य विद्यते ।

युज्यत एतदुक्तं यदीच्छास्य संभवेत्, सा तु मनोवृत्तित्वादस्य च कार्यकारणानभ्युपगमेन मनसोऽसंभवान्न संभवतीति ॥

एतत् प्रतिक्षिपति ।

(२२५) शक्तेः प्रवृत्तिः कृत्येषु विशिष्टा प्रोक्तलक्षणा ।
व्यापारः कारणस्येच्छा तन्नियोगाय चोच्यते ॥

नेच्छा मनोवृत्तिः, अपितु कर्तुः क्रियाशक्तेः कार्याय प्रवृत्तिरिच्छा प्रोच्यते, सर्वव्यापारेषु पूर्वभावित्वेनास्याः सिद्धत्वादित्युक्तं यतः, शास्त्रेष्वपीश्वरस्य व्यापारतया व्यापारनियोगाय विद्येश्वरेषु चोच्यते, यदुक्तम्,

"तेऽधिकारं प्रकुर्वन्ति शिवेच्छाविधिचोदिताः" ।

इति ॥

"कथं तर्हीच्छा मनोवृत्तिः सांख्यादिभिर्गीयते" इत्याह ।

(२२६) तादृग्व्यापारसंगीता शक्तिरिच्छा क्वचिन्मता ।

यथाहि, अध्यवसायादिना बुद्धिव्यापारेणोपोद्बलितत्वाज्ज्ञानशक्तिरेव बुद्धिबोध इत्युच्यते, नतु बुद्धिर्जडतया वस्तुतो बोधः संभवत्येवं क्रियाशक्तिरेवेच्छात्मिका मनोव्यापारेण मनोराज्याद्यवस्थासु सिद्धेनापूर्वनिर्माणात्मनाभिव्यज्यमानत्वान्मनोवृत्तिरिति क्वचित् सांख्यादावुच्यते, नतु परमार्थतस्तस्यापूर्वनिर्माणशक्तिरुपपद्यते, निर्माणस्येश्वररूपत्वेन जडेऽनुपपत्तेरिति ॥

अस्मिंस्तु शास्त्रे ।

(२२७) अर्थान्तरं विना कृत्यं कुर्वती च प्रगीयते ।

मनोलक्षणार्थान्तरं विनेश्वरस्य कार्यं कुर्वतीच्छा गीयते, सकलस्य तु मनोलक्षणार्थान्तरानपेक्षयेति च शब्दार्थः ॥

उपसंहरति ।

(२२८) एका सर्वार्थगा शक्तिर्भिन्ना चेच्छा न जातुचित् ।

एवं च ज्ञानक्रियात्मिका शक्तिरेकैव, नैवेच्छा ततोऽन्येति सिद्धम् ॥

"ननु कार्यभेदादिच्छायास्ततः शक्त्यन्तरत्वमस्तु" "यद्वेष्यमाणानां प्रकाशरूपत्वेन सुखादिप्रकाशानामिव बोधात्मकत्वाज्ज्ञानरूपत्वमेव न क्रियाशक्तिरूपता" इत्याह ।

(२२९) शक्तावुक्तं यतोऽस्तीदं तेन नाधिककल्पना ।

क्रियाशक्तिसिद्धनिमित्तं यत् साधनमुक्तं तदेवेच्छायां यतोऽस्ति, तेन कारणेन न ततोऽधिका काचिदिच्छा, नापि ज्ञानरूपतेति, एतदुक्तं भवति, स्वदेहस्पन्दादिक्रियाहेतुत्वेन स्वसंवेदनात्मकसाधनसिद्धा क्रियाशक्तिरिच्छैव, वस्तुतश्च पुत्रादेर्ज्ञानशक्त्यवभासितस्य ममेदं स्यादित्यात्मसंबन्धितानिर्माणस्वभावत्वाच्च ज्ञानरूपा, अपितु क्रियाशक्तिरेवेति, तदिदमुक्तं मन्त्रवार्तिके, "शाक्तस्य हि तन्मनसस्त्विच्छा ह्येषा क्रियाशक्तिरिति" तदेवम्,

"इच्छामात्रेण देवेशः कृत्यकृच्च प्रयासतः" ।

इति सिद्धम् ॥

"ननु सिद्धसाधनमेतत्" इत्याह ।

(२३०) नचापि विमतिर्नास्ति सर्वस्येश प्रसिद्धितः ।

नहि मीमांसकबौद्धलोकायतिकानामेतत् सिद्धमिति न सिद्धसाधनम् ॥

तर्ह्यसिद्ध एवायं पक्ष इत्याह ।

(२३१) तथापि विगतक्षान्ति ग्राह्यः पक्षो यथागमम् ।

यद्यपि विषयतामयं पक्षो भवद्भिर्नीतः, तथापि विगतक्षान्ति, अक्षान्तिकं कृत्वा, अस्मदुपदर्शितस्याच्च हेतोरत्यन्तं परीक्षां विधाय ग्राह्यो नोपरोधेनेति, यदुक्तम्,

"परीक्ष्याक्षान्तितो ग्राह्यं मद्वचो नतु गौरवात्" ।

इति ॥

"ननु सिद्धसाधनमेतत्, इति सांख्याः" योगिनां सत्त्वात्मनः कर्मजैश्वर्यस्य तैरभ्युपगमात्, यदुक्तम्,

"धर्मेण गमनमूर्ध्वं गमनमधस्ताद्भवत्यधर्मेण" ।

"ऊर्ध्वं सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः ।
मध्येरजोविशालो ब्रह्मादिस्तम्बपर्यन्तः" ॥

इति ॥

अत्राप्याह ।

(२३२) सर्वाधिपत्यमैश्वर्यं कर्माभावान्न धर्मजम् ।
अपास्तातिशयाच्छंभोस्तेन स्वेच्छाविधाय्यसौ ॥

अन्यदेव तद्योगिनां परिमितमैश्वर्यम्, कर्मजत्वात् तत् क्षयातिशययुक्तं च तैरिष्यते, अन्यदेव त्विदं सर्वार्थविषयमाद्यन्तरहितत्वेन प्रतिपादितत्वादकर्मजमिच्छामात्रकारकत्वेन प्रतिपादितम्, इति न सिद्धसाधनता ॥

"ननु ततोऽपि प्रकृष्टैश्वर्ययुक्तोऽन्यो भविष्यति" इत्याह ।

(२३३) स्वात्मैश्वर्यप्रभावेण तद्येनास्यातिशय्यते ।
महेश्वरः स एव स्यादयं नैवेश्वरस्तदा ॥

तर्हि स एव परमेश्वरोऽस्माभिरिष्यत इत्यदोषः ॥

नच ततोऽप्यन्यो भविष्यतीत्यनवस्थेत्याह ।

(२३४) परिमाणवदैश्वर्यं सर्वत्रातिशयान्वितम् ।
क्वचिद्व्रातिशयापास्तं यत्र तत् स महेश्वरः ॥

योऽतिशयान्वितः स संभवन् क्वचित् प्रकर्षपर्यन्तावस्थितिः, नत्वनवस्थायुक्तः, यथा परमाणुतो महान् महत्त्वातिशयान्वितः क्वचिदेव स्थितः परममहत्त्वान्तपरिमाणः, अतिशयान्वितश्चायमैश्वर्यविशेष इति सोऽपि संभवन् क्वचित् प्रकर्षपर्यन्तावस्थितिः, यत्र तथाभूतः स एव परमेश्वरः, इति नानवस्था ॥

Digitized by Google

प्रकरणमुपसंहर्तुं प्रयोजनमस्यादावाह ।

(२३५) एवं सर्वोत्तमं शंभुं ज्ञात्वा सर्वफलप्रदम् ।
यदालोकयत: श्रेय: सद्य: सर्वं नचान्यथा ॥

एवमत्र प्रदर्शितसाधकबाधकप्रमाणसदसत्तानिश्चयपूर्वं प्रोक्तनयेन दर्शनान्तरप्रसिद्धेभ्य: प्रकृतिपुरुषादिभ्य ईश्वरेभ्य: सातिशयमीश्वरमत एव सर्वफलप्रदं ज्ञात्वा तमेव भावयतस्तत एव दीक्षाक्रमेणाविलम्बत: परं श्रेयो मुक्ति: सिद्धिश्च भवतीति प्रयोजनसिद्धिरित्युक्तमस्माभिरन्यत्र ॥

"प्रणमत शिवनाथं शाश्वतं शर्महेतो:
इतरविषयसेवादुर्ग्रहं प्रोज्झ्य यत्नात् ।
न स भवति भवेऽस्मिन् नापि भूतो न भावी
तदितरनुतितो य: शर्मयुक्त: पुमान् स्यात्,, ॥

इति ॥

अधुनोपसंहरति ।

(२३६) इत्थं शर्वपरीक्षां तु पुंपरीक्षापुर:सराम् ।
चकार मृदुबुद्धीनां हितायातिस्फुटामिमाम् ॥
सद्यो ज्योति:समानोऽयं शिवेन गुरुसत्तम: ।
कृपयैवानुजग्राह ह्युग्रज्योतिर्गुणाकर: ॥

एवं च पूर्वनयेनेश्वरपरीक्षाक्षिप्रैव नरपरीक्षेति तत्प्रयोजनेनैव सप्रयोजनेति सिद्धम् ॥

नरेश्वरपरीक्षणेऽतिगहनत्वतो नैव यद्
गतिर्जगति गम्यते विततबुद्धिवेगेष्वपि ।
इदं परहितेच्छया त्वनतु रामकण्ठस्तत:
कुतर्कतमसां नुदं विहितवान् प्रकाशात् स्फुटम् ॥ :: ॥

इति श्रीनारायणकण्ठसूनुभट्टभट्टरामकण्ठकृतौ नरेश्वरपरीक्षाप्रकाशे परदर्शनप्रसिद्धेश्वरप्रतिक्षेपाख्यं तृतीयं काण्डम् ॥ :: ॥

॥ समाप्तश्चायं ग्रन्थ: ॥ :: ॥ :: ॥ :: ॥

॥ अथ प्रसन्नराघवनामकनाटकस्य ॥

॥ पञ्चमोऽङ्क: ॥

तत: प्रविशतो गङ्गायमुने ।

गङ्गा । सखि कालिन्दि किमिति दुर्मनायसे ।

यमुना । भअवदि भाईरहि अत्थि कारणम् * ।

गङ्गा । कीदृशं तत् ।

यमुना । एक्कं दाव अत्थि मह भादा सुग्गीवोत्ति † ।

* भगवति भागीरथ्यस्ति कारणम् ।

† एकं तावत् । अस्ति मम भ्राता सुग्रीव इति ।

गङ्गा । सकौतुकमात्मगतम् । अये कथमस्या: कपिकुलोत्पन्नोऽपि भ्राता । विमृश्य । उपपन्नमिदमनयो: खल्वेक एवायं सविता प्रसविता । प्रकाशम् । अथ किं तस्य ।

यमुना । सोतिबलिट्ठेण दुट्ठवलीमुहेण वालिणामहेएण परिहूदो एक्कदुग्गमत्तसरणो कइपअपरिवारो चिट्ठदि * ।

गङ्गा । नन्विमावपि भ्रातरौ तत् किमनयोरीदृशं वैरायितमित्यर्थोक्त एव । अथवा

एकामिषाभिलाषो हि बीजं वैरमहातरो: † ।

इति ख्यातमेतत् तत् किमनेन । द्वितीयमपि कारणं कथय तावत् ।

यमुना । कस्सिंपि दिअहे गहीअतवस्सा विअ मम्महवसन्ता दोवि तरुणा जटाहरा एक्का चक्कवाअत्थणी चन्दवयणा मं उत्तरिअ दक्खिणं चलिदुं उवक्कन्ता ‡ ॥

गङ्गा । ततस्तत: ।

यमुना । तदो अ तीए खणं विलम्बिअ पणमिअ मउलिअकरकमलजुअलाए अहमेरिसं विण्णत्ता । अयि देवि दिणअरणन्दिणि पुणोवि णिअकुटुम्बस्स दंसणप्पसादं करेसुत्ति § ।

गङ्गा । तत् कथं सम्भावयसि ।

यमुना । गङ्गाया: कर्णे एवमेवम् ।

गङ्गा । असम्भावनीयमिदम् । तनूनमावर्तशतभ्रमितहृदया किमप्यलीकमनुभूतवती । विमृश्य । अथवा को जानाति विधे: संविधानवैदग्ध्यम् ।

यमुना । जइ संवुत्तो ता कहं भअवदीए ण गोअरो इमो वुत्तन्तो ‖ ।

गङ्गा । न किंचिदेतत् । मया हि ब्रह्मलोकादागताया: सरस्वत्या: समागमसुखव्यग्रचित्तया स्थितं तदेहीयमदूरे सरयूस्तेन हि तन्मुखादेव निरूपयाव इति परिक्रामत: ।

प्रविश्य सरयू: । देव्यौ नमो वाम् ।

उभे । आत्म्यवितथमङ्गला भव ।

* सोऽतिबलिष्ठेन दुष्टवलीमुखेन वालिनामधेयेन परिभूत एकदुर्गमात्रशरण: कतिपयपरिवारस्तिष्ठति ।

† तिलोत्तमाभिलाषो हि यथा सुन्दोपसुन्दयोरित्यथवैतदर्थबोधकं किमप्यन्यदेव श्लोकोत्तरार्धमत्रापेक्षितं पूर्णश्लोकलेखनस्यैव कविसंप्रदायस्य बहुत्र दर्शनात् । परं मदुपलब्धपुस्तकत्रयेऽपि केवलं श्लोकपूर्वार्धस्यैवोपलभ्यमानत्वात्तदेवाहं व्यलिखम् ।

‡ कस्मिन्नपि दिवसे गृहीततपस्याविव मन्मथवसन्तौ द्वावपि तरुणौ जटाधरौ एका चक्रवाकस्तनी चन्द्रवदना मामुत्तीर्य दक्षिणां चलितुमुपक्रान्ता: ।

§ ततश्च तया क्षणं विलम्ब्य प्रणम्य मुकुलितकरकमलयुगलयाहमीदृशं विज्ञप्ता । अयि देवि दिनकरनन्दिनि पुनरपि निजकुटुम्बस्य दर्शनप्रसादं कुरुष्वेति ।

‖ यदि संवृत्तस्तत् कथं भगवत्या न गोचरोऽयं वृत्तान्त: ।

Digitized by Google

गङ्गा । सरयूं हस्ते गृहीत्वा सखि कथं तापनिमग्नमङ्कं ते ।

सरयूः । भगवति प्रतीपमाभाषसे । ननु लज्जापङ्कनिमज्जनमनुभवन्त्या मेऽर्धावलम्बनोऽयमङ्गसंताप इति ।

गङ्गा । स्पष्टं तावदावेदय ।

सरयूः ।

बहलगलितैः संतापोष्णैस्तटान्तविहारिभि-
र्दशरथपुरीपौरस्त्रीणां विलोचनवारिभिः ।
उपचयवतीं संतापोष्णां निजां दधती तनू-
मिह मुहुरहं मातर्लज्जां वहामि जहामि च ॥

गङ्गा । सातङ्कम् । किं पुनरासामश्रुवृष्टेः कारणम् ।

सरयूः । गङ्गायाः कर्णे एवमेवम् ।

गङ्गा । हा इन्दुमतीनन्दन हा सकललोकहृदयानन्दनचन्दन हा महाकोदण्डपण्डित हा आखण्डलप्रियसख हा निजतनयनिर्विशेषप्रीतिपरिपालितसकललोक हा रामभद्रैकजीवितेति मूर्च्छति ।

सरयूः । स्वगतम् । अस्यैव विलसितमेतत् ।

गङ्गा । हा महाराज दशरथेति मूर्च्छिता पतति ।

यमुना । अंशुकाञ्चलेन वीजयन्ती भगवति समस्ससिहि समस्ससिहि णं इमेहिं जेव्व गुणेहिं असोअणिज्जो सो राआ * ।

गङ्गा । सरयूं प्रति सखि तवैव न केवलमयं तापः सर्वजनसाधारणः खल्वसौ । तदेनं रामभद्रच्छत्रच्छाययापनोदयामः ।

सरयूः । निश्वस्य । भगवति न खल्वप्रोषितसलिलसेकः कमलकेदारः परिशुष्यति ।

गङ्गा । स्पष्टं तावत् कथय ।

सरयूः । अधरस्फुरणं नाटयति ।

गङ्गा । अलमलं कथं दावानलशोषितायां तरुशाखायां कुठारमारोपयितुमिच्छसि । अथवा कथय तावत् ।

सरयूः । स्वगतम् । अहो ।

न ज्ञातुं नाप्यनुज्ञातुं नेक्षितुं नाप्युपेक्षितुम् ।
स्वजनः † स्वजने जातं विपत्पातं समीहते ॥

प्रकाशम् । रामभद्रमभिषेक्तुं कृतमनोरथं दशरथमेत्य कैकेयी प्रथमं तावदिदमुक्तवती ।

इदमेव नरेन्द्राणां स्वर्गद्वारमनर्गलम् ।
यदात्मनः प्रतिज्ञा च प्रजा च परिपाल्यते ॥

गङ्गा । स्वगतम् । अनेनैव तावदकल्याणसूची सूचिता दुराशया । प्रकाशम् । चरमं च किम् ।

सरयूः ।

* समाश्वसिहिसमाश्वसिहि नन्वेतैरेव गुणैरशोचनीयोऽसौ राजा ।

† सुजन इति वा पाठः ।

त्वया देयं यन् मे द्वयमभिहितं देहि तदिदं
वनं कौशल्येयो विशतु युवराजोऽस्तु भरतः ।

गङ्गा । सोद्वेगम् । ततः किं वृत्तम् ।

सरयूः ।

इतीदं कैकेय्या वचनमधिगम्याकुलमतेः
पितुः पादौ नत्वा मुदितहृदयोऽसौ वनमगात् ॥

गङ्गा । यमुने तदिदं यत् कथितवत्यसि । सविषादम् । हा रघुकुलकुटुम्बं निहतमिति ।

यमुना । भअवदि एक्कं किं रघुकुलकुटुम्बअं णं मिअमहेसिवणदेवदाओ परिहरिअ सअलो जेव्व जीअलोओ रामचन्दमुहचन्दविलोअणविहीणत्तणेण णिहदो * ।

सरयूः । एवमेतत् ।

प्रोषितवति रजनिकरे बन्धुतया न खलु कैरवाण्येव ।
म्लायन्ति किन्तु सहसा भुवनान्यपि तमसि मज्जन्ति ॥

गङ्गा । एवमेतत् परं सखि सरयु कथय तावत् कीदृशी वृत्तिः सीतालक्ष्मणयोर्वत्सरामभद्रे ।

सरयूः । तौ हि तस्य सदैव सन्निहितौ चन्द्रिकाप्रसादाविव चन्द्रमसः । अतो जानास्येव यादृशी चन्द्रिकाप्रसादयोरेव चन्द्रमसि ।

गङ्गा । स्वगतं सहर्षं कथं सहैव वनं गताविव्युक्तं भवति । प्रकाशम् । सखि जीवितास्मि तावदनेन वागमृतेन । क्षणमपि हि रामचन्द्रविरहमनुभवितुमसहा मे वत्सा जानकी ।

सरयूः । एवमेतत् । रामचन्द्रेण हीदमुक्ता जानकी ।

अम्बाः शुश्रूषमाणा मे शरदः कतिचिन् नय ।

इदमाकर्ण्य तथा मूर्च्छिता जानकी यथा स्वजनकरोपनीतशीतशीकरासारसिक्तापि न प्रबुद्धा ।

यमुना । ता उण कहं पबुद्धा † ।

सरयूः ।

वनं वनजपत्राक्षि समागच्छ सहैव वा ॥

इत्यनेन रामवचनामृतेनैव ।

गङ्गा । उचितमिदं जानकीस्नेहस्य ।

यमुना । अवि णाम रामलक्खणाणं वि कोवि संवादो संवुत्तो ‡

सरयूः । अथ किम् । इदमुक्तो हि रामचन्द्रेण लक्ष्मणः ।

* भगवत्येकं किं रघुकुलकुटुम्बकं ननु मृगमहर्षिवनदेवताः परिहृत्य सकल एव जीवलोको रामचन्द्रमुखचन्द्रविलोकनविहीनत्वेन निहतः ।

† तत् पुनः कथं प्रबुद्धा ।

‡ अपि नाम रामलक्ष्मणयोरपि कोऽपि संवादः संवृत्तः ।

गमय वत्स निमील्य विलोचने
कतिचिदत्र निमेषसमाः समाः ।
अपिच मामिव शीलसुशीतलं
शुभरतं भरतं परिशीलय ॥

इदमुक्तं च लक्ष्मणेन । अये रघुनाथ ।

त्वया समं मे चत्वारि यामा एव युगान्यपि ।
चतुर्दश समाः स्यातुं विना मन्वन्तराणि मे ॥

अपिच ।

त्वया मम समेतस्य कल्पा अपि समासमाः ।
भवता विप्रयुक्तस्य कल्पकल्पः क्षणोऽपि मे ॥

गङ्गा । अपि नाम कौशल्ययापि किञ्चित् शिक्षितो रामभद्रः ।

सरयूः । अथ किम् । सा हि अयि वत्स रामभद्र सीतामित्यर्धोक्त एव बाष्परुद्धकण्ठीदमुक्तवती । अथवा वत्स लक्ष्मणे रक्षितरि को भवान् सीतासमीक्षणस्य । तदिदं तावदभ्यर्थयामि ।

इह मुग्धमुखे वत्स लक्ष्मणे दक्षिणो भव ।
अपि राज्योपभोगेभ्यो यस्य त्वं सहजप्रियः ॥

इदमुक्तं च रामभद्रेण । अयि मातर्निजजीवितेऽपि दक्षिणेन भवितव्यमित्यपि शिक्षणीयमेव ।

गङ्गा । तन् नूनं ततःप्रभृति सहजसौन्दर्यमेवाभरणं वत्सरामस्य ।

सरयूः । अन्यदप्येकं विमुञ्चन् सकलमाभरणजातमित्यमभ्यर्थितः कौशल्यया रामभद्रः ।

हस्तावलम्बदानाय सीतामाङ्गल्यसंपदः ।
इदं विमुञ्च मा वत्स राम रत्नाङ्गुलीयकम् ॥

इदमन्यच्च ते कथयामि धीरा समाकर्णय ।

गङ्गा । कथमेतावदाकर्णितवतीमपि मामधीरामाशङ्कसे ।

सरयूः ।

निकामं रामस्य प्रमुदितमुखाम्भोरुहरुचे-
र्जटावल्लीर्मल्लीमुकुलसदृशैर्बाष्पपृषतैः ।
निषिञ्चन् सौमित्रिः कथमपि वितेने खलु यदा
तदा जातं मातः करुणामयमेतत् जगदपि ॥

यमुना । अवि णाम तस्सिं समये सीदावि किंवि सिक्खिदा बन्धुअणेण * ।

सरयूः अयि देवि विपरीतमालपसि ।

गहनविपिनवासोत्कण्ठया संप्रयातं
प्रियतममनुयान्त्या तत्क्षणं राजपुत्र्या ।

* अपि नाम तस्मिन् समये सीतापि किमपि शिक्षिता बन्धुजनेन ।

चरणकमलगुञ्जन्मञ्जुमञ्जीरशब्दैः
स्फुटतरमुपदिष्टा बान्धवाः साधु वृत्तम् ॥

इदं तु वृत्तम् ।

पुरः कान्तं यान्तं विपिनमनुयान्त्याः सरभसं
तदादौ सीतायाः किसलयनिभौ वीक्ष्य चरणौ ।
मुहुः शीतास्तप्ताः किमपि च मुहुर्बन्धुनयनैः
समं मुक्ता मुक्तासदृशरुचयो बाष्पकणिकाः ॥

गङ्गा । हर्षविषादयोर्विलसितमेतत् ।

सरयूः । इदं बन्धुजनेन शिक्षितो रामचन्द्रः ।

बाला विदेहतनया तरलौ भवन्तौ
दिग् दक्षिणा च रजनीचरचक्रदुष्टा ।
तद् वत्स वत्सलतयेदमुदाहरामो
मा राम गच्छ नयदक्षिण दक्षिणाशाम् ॥

गङ्गा । ततस्ततः ।

सरयूः । ततस्तामेव दिशं प्रति ।

सुरमुरजगभीरधीरनाद-
द्विगुणगुणध्वनिचापदत्तहस्तः ।
पुरजननयनैः क्षतं दधानः
कुवलयदाम जगाम रामभद्रः ॥

यमुना । को उण सो अवसरो सुरमुरअसद्दस्स * ।

गङ्गा । सखि न जानासि । गभीरं ध्वनद्भिः खलु सुरमुरजैः किमपि गभीरमेव ध्वनितम् । पुनः सविषादम् । हा दशरथ सकलगुणसंपदां भाजनं भूत्वापि कथमेकस्य भाजनं न जातोऽसि ।

यमुना । कहं उण सो राआ तुम्हेहिं पसंसीअदि जेण तारिसोऽवि तणओ तुणं विअ मुक्को † ।

सरयूः । शान्तं पापम् ।

नरेन्द्रः कैकेयीवचनपरिपाटीविगलितः
क्षणं मोहक्रोधप्रसरभरयोरन्तरचरः ।
सुतं चोरयस्तो मणिमिव करस्थं न कृपणा-
स्तृणानीव प्राणान् पुनरयममुञ्चद्दशरथः ॥

यमुना । अवि णाम भरदस्स णाणुमदमिदम् ‡ ।

सरयूः । अये भरतस्य मातुलगृहादागतस्य कैकेय्याश्च संवाद एवोत्तरं दास्यति ।

गङ्गा । कीदृशः पुनरसौ ।

सरयूः ।

* कः पुनः सोऽवसरः सुरमुरजशब्दस्य ।

† कथं पुनः स राजा युष्माभिः प्रशंस्यते येन तादृशोऽपि तनयस्तृणमिव मुक्तः ।

‡ अपि नाम भरतस्य नानुमतमिदम् ।

मातस्तातः क्व यातः सुरपतिभवनं हा कुतः पुत्रशोकात्
कोऽसौपुत्रश्चतुर्णां त्वमवरजतया यस्य जातः किमस्य ।
प्राप्तोऽसौ काननान्तं किमिति नृपगिरा किं तथासौ बभाषे
मद्वाग्बद्धः फलं ते किमिह तव धराधीशता हा हतोऽस्मि ॥

गङ्गा । सहर्षम् । वत्स भरत भवसि रामानुजन्मा ।

सरयूः ।

रामे प्राप्ते वनान्ते कथमपि भरतश्चेतनां प्राप्य तातं
नीत्वा देवेन्द्रलोकं मुनिजनवचनादूर्ध्वदेहक्रियाभिः ।
भ्रातुः शोकाभितप्तः स्वजनपरिवृतः पालयामास नन्दि-
ग्रामे तिष्ठन्नयोध्यां रघुपतिपुनरागामिभोगापवर्गः ॥

यमुना । तदोतदो * ।

सरयूः । अहमेतावदेव जानामि । ततः परं तद्वृत्तान्तनिरूपणाय निजजलकमलवनवासी कोऽपि कलहंसः प्रस्थापितो मया ।

प्रविश्य कलहंसः । देव्य इदं नमो वः ।

तिस्रः । अयि कमलावतंस कलहंस मङ्गलमन्दिरं भव ।

गङ्गा । अये कथय तावत् वत्सानां मे प्रथमतः प्रभृति पथि चरितानि ।

हंसः ।

विघ्नानिवानुसरतो विनिवार्य पौरा-
नये स्वयं नय इवैष जगाम रामः ।
एनं विभूतिरिव सानु जगाम सीता
तां लक्ष्मणस्तु सुखलाभ इवानुगच्छत् ॥

गङ्गा । ततस्ततः ।

हंसः । ततः कियत्यपि दूरे पथिकलोकेनेदमुक्तस्ते वत्सवर्गः ।

पन्थाः समः सिकतिलो मृदुशाद्वला भू-
र्वेतस्वती सरिदियं शिशिरा न दूरे ।
अग्रे चकास्ति सरसी च कुमुद्वतीयं
कादम्बकूजितकरम्बितहंसनादा ॥

अन्यच्च ।

तरुरयमितः शीतच्छायः स्रवन्मधुशीकरः
सरिदियमितः स्वल्पस्वच्छप्रवाहमनोरमा † ।
इदमिदमितः स्निग्धामोदं मुहुर्मधुरध्वनन्-
मधुकरवधूभुग्नाभोगं वनं सरसीरुहाम् ॥

गङ्गा । अहो अध्वश्रमशमनानि पथिकजनवचनानि ।

यमुना । तदोतदो ‡ ।

हंसः । ततः प्रियतममनुगच्छन्ती जानकी ।

भीतं विलोक्य हरिणं करुणार्द्रचित्ता
पत्युर्निजेन पिदधे धनुरंशुकेन ।
केदारसीम्नि सदयं च यवप्ररोह-
मादाय साधु विदधे श्रवणावतंसम् ॥

अन्यच्च ।

तटभुवि सरसीनां सैकते निम्नगानां
परिसरमपहातुं चक्रवाकी प्रियस्य ।
क्षणमपि न समर्था लोलमालोकयन्ती
पथि जनकतनूजा प्राप हर्षं शुचं च ॥

गङ्गा । एवमनुकम्पनीयवत्सला मे जानकी । पुनः सस्नेहम् । अपि तावत् पथिकनीतिशीतलानि मे वत्सानां शीलानि ।

हंसः । कीदृशी पुनः पथिकनीतिः ।

गङ्गा ।

यावत् कष्टं तपति तपनस्तावदेव प्रयाणं
इति श्रीमद्विद्यापतिना, । एतच्चागमकाण्डे निरूपयिष्यामः । तस्मान्निखिलोत्कर्षपरामर्शनमपि तत्र स्वीकार्यम् । "यत्रप्यायातदृढेश्वरशक्तिपातस्य स्वयमेवेयमियती परमशिवभूमिरभ्येति हृदयगोचरं, न त्वत्र स्वात्मीयः पुरुषकारः कोऽपि निर्वहति, सर्वस्य तस्य मायामयत्वेनान्धतमसप्रख्यस्यामायीयं शुद्धप्रकाशं स्वप्रतिद्वन्द्विनं प्रत्युपायताऽनुपपत्तेः तथापि तदेव तथाविधं रूपं ‡ प्रख्योपाख्याक्रमेण स्वात्मपरावभासविषयभावजिगमिषया निःशेषोत्कर्षविशेषाभिधायिजयत्यादिशब्दानुबन्धेन परामर्शनीयमिति नमस्कारे जयत्यर्थ आक्षेप्यः । जयपदोदीरणे ऽपि तादृशि समुत्कर्षातिशयशालिनि स्वात्मानमप्रह्वीकुर्वाणस्य तटस्थस्य परमनात्मोपकारित्वमिति समुत्कर्षविशेषाक्षिप्तएव नमस्कारोऽवश्यमभ्यन्तरीकार्यः इत्यनया युक्त्या जयनमस्कारैकतरप्रक्रमे ऽन्यतरस्याक्षिप्तता ऽवश्यमङ्गीकर्त्तव्या । वन्दननमनस्मरणप्रध्यानप्रभृतीनामपि नमस्कारजयत्यर्थमात्रपरमार्थत्वादियमेव वर्त्तनी । अत्र पुनर्ग्रन्थकृता तादृक्प्रक्रम आश्रितोयत्र द्वयमपीदं स्वशब्दपरामृष्टमेव । एतच्च पदार्थव्याख्यानावसरएव प्रकटीभविष्यति । स्वशब्दपरामर्शश्च सर्वजनहितत्वाद्युक्तियुक्तः ।

* पुरुषतत्त्वपर्यन्ते ।

† महत्तत्त्वाद्यात्मत्वेनाभिमन्यमानापेक्षया ।

‡ स्वात्मसमवेतार्थप्रतिपत्तिहेतुः शब्दप्रतीतिः प्रख्या । परबोधोपयोगिशब्दप्रयोग उपाख्या ।

Digitized by Google

सहि सर्वस्यैव झटिति हृदयंगमः। अर्थाक्षिप्तस्तु कति चिदेव प्रति। स्वप्रतिभोदितवाक्त्वावमर्शासम्भवाद्वाक्त्वावमर्शशून्यस्य च प्रकाशस्याप्रकाशकल्पत्वात्। एतच्चाग्रे स्फुटीभविष्यति। तदनेनाभिप्रायेण प्रसिद्धजयनमःप्रभृतिशब्द*शय्यानाश्लेषेणेमां सरणिमनुसरति स्म ग्रन्थकारः। इह यद्यत् किं चन स्फुरति तत्तदुद्यमाणेश्वररूपस्वात्मप्रथामात्रम्। तत्रतूपायोपेयभावप्रभृतिः कार्यकारणभावो ऽपि यथाप्रकाशं परमार्थभूतएव प्रकाशमानस्यानपह्नवनीयत्वात्। यदाह भट्टदिवाकरवत्सो विवेकाञ्जने।

प्रकाशश्चैव भावानाम्

इत्यादि

न शापोक्त्या विलीयते

इत्यन्तम्। तत्र तु कार्यकारणभावे ऽपि क्वचित् परिपूर्णस्वातन्त्र्यलक्षणमाहेश्वर्यनान्तरीयकताक्रोडीकृतानन्तशक्तिचक्रचुम्बितभावभावितप्रथान्तरव्यवधानं चकास्ति सतु मायीयत्वेन व्यवस्थापयिष्यते। जडचेतनात्मवान्तरभेदशतसम्भिन्नश्चासौ तत्कृतश्च सर्वो ऽयं निष्पाद्यनिष्पादकभावज्ञाप्यज्ञापकभावावभासिलौकिकव्यवहाररूपः। यत्र तु शुद्धस्वात्मप्रथात्मकानुत्तरशक्तिशाले निरर्गलस्वात्मप्रकाशएव मायीयप्रथान्तरव्यवधानबन्धानिबन्धनं तत्र तस्यैव भगवतः कारणत्वम्। एष चानुग्रहलक्षणो ऽन्त्यः पञ्चमः पारमेश्वरः† कृत्यविशेषः परमपुरुषार्थप्रापकस्तन्निबन्धनस्वात्मपरमार्थमोक्षस्य। अन्यत्र त्योक्त्यपवर्गः कुतश्चिन्मुक्तिर्न सर्वत इति निःश्रेयसाभास इति वक्ष्यामः। सचायं द्वितीयः कार्यकारणभावो लौकिकान्वयव्यतिरेकसिद्धप्रसिद्धकार्यकारणभावविलक्षणत्वात् स्फुटेन रूपेणासंचेत्यमानः कादाचित्कवस्तुसद्भावाऽवभासोचीयमानपरमार्थोऽतिदुर्घटकारित्वलक्षणैश्वर्यविजृम्भाभावितादुतभावः प्रथमकोटिसम्भावनाशून्यः‡ कालिकाकारस्वप्रकाशावरणनिराकरणमनोरथशतदुष्प्रापइत्येवंप्रकारस्यमा द्योतकनिपातसहितेन निरूपितः।

कथञ्चिदिति। केन चिच्च प्रकारेण परमेश्वराभिन्नगुरुचरणसमाराधनेन परमेश्वरघटितेनैव। यथोक्तम्।

सम्बन्धो ऽतीवदुर्घटः।

इति। आसाद्येति। आसमन्तात् परिपूर्णरूपतया सादयित्वा स्वात्मोपभोगयोग्यतां निरर्गलां गमयित्वा। इयता विदितवेद्यत्वेन परार्थे शास्त्रकरणे ऽधिकारो दर्शितः। अन्यथा

* शय्यातल्पे शब्दगुम्फे इति कोशः।

† सृष्टिस्थितिसंहारपिधानानुग्रहाख्यानि पञ्च कृत्यानि वक्ष्यन्ते।

‡ मेघजाले ऽपि कालिकेति कोशः।

तु प्रतारकतामात्रमेव स्यात्। पौर्वकाल्येन सामञ्जस्यमत्र विवक्षितम्। अन्यथा स्वासादनतारतम्यप्राप्तौ मायीयमलकलापसंस्कारप्रक्षये कथं परोपदेशः शक्यक्रियः। सम्भवन्ति हि मायागर्भाधिकारिणो विष्णुविरिञ्च्याद्या स्तदुत्तीर्णाश्चापि महामायाधिकृताः शुद्धाशुद्धामन्त्रतदीशतन्महेशात्मानः। शुद्धाश्चापि श्रीसदाशिवप्रभृतय,स्ते तु यदीयैश्वर्यविप्रुड्भिरीश्वरीभूताः स भगवाननवच्छिन्नप्रकाशानन्दस्वातन्त्र्यपरमार्थो महेश्वरः तस्य दास्यमित्यनेन तत्प्रत्यभिज्ञोपपादनस्य महाफलत्वमासूत्रयति। दीयते ऽस्मै स्वामिना सर्वं यथाभिलषितमिति दासः। तस्य भावइत्यनेन परमेश्वररूपस्वातन्त्र्यपात्रतोक्ता। जनस्येति, यः कश्चिज्जायमानस्तस्ये,त्यनेनाधिकारिविषयो नात्र कश्चिन्नियमइति दर्शयति। यस्ययस्य हीदं स्वरूपप्रथनं तस्यतस्य महाफलम्। प्रथनस्यैव परमार्थफलत्वात् तस्य च प्रतिबन्धकसम्मतैरप्रतिबन्धनीयत्वात्। नहि प्रथितमप्रथितमिति न्यायात्। तदुक्तम्।

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते।
स्वल्पमप्यस्य धर्मस्य त्रायते महतोभयात्॥

इति। परमगुरुपादैरपि शिवदृष्टौ।

एकवारं प्रमाणेन शास्त्राद्वा गुरुवाक्यतः।
ज्ञाते शिवत्वे तत्रस्थप्रतिपत्त्या दृढात्मना॥
करणेन नास्ति कृत्यं क्वापि भावनया ऽपि वा।
सकृज्ज्ञाते सुवर्णे किं भावनाकरणादिना॥
सर्वदा पितृमात्रादितुल्यदार्ढ्येन सत्यता।

इति। जनस्येत्यनवरतजननमरणपरिपीडितस्येत्यनेन कृपास्पदतयोपकरणीयत्वमाह। अपिशब्दः स्वात्मनस्तदभिन्नतामाविष्कुर्वन् पूर्णत्वेन स्वात्मनि परार्थसम्पत्त्यतिरिक्तप्रयोजनान्तराव्रकाशं पराकरोति। परार्थश्च प्रयोजनंभवत्येव, तल्लक्षणयोगात्। नह्ययं देवशापः स्वार्थएव प्रयोजनं न परार्थइति। तस्याप्यतल्लक्षणयोगित्वे सत्यप्रयोजनत्वात्। सम्पाद्यत्वेनाभिसंहितं यन्मुख्यतया ततएव क्रियासु प्रयोजकं तत्प्रयोजनम्। अतएव भेदवादे ऽपि ईश्वरस्य सृष्ट्यादिकरणे परार्थएव प्रयोजनम् इति दर्शयितुं *न्यायनिर्माणवेधसा निरूपितं "यमर्थमधिकृत्य पुरुषः प्रवर्तते तत्प्रयोजन,,मिति। इच्छयेति। इच्छाविषयीकृतस्य फलस्य प्रवृत्तौ हेतुत्वं शत्रा दर्शयति। इच्छाशक्तिश्चोत्तरोत्तरमुच्छूनस्वभावतया क्रियाशक्तिपर्यन्ती भवतीति दर्शयिष्यामः। उपशब्दः समीपार्थः। तेन जनस्य परमेश्वरधर्मसमीपताकरणमत्र फलं ततएवाह। समस्तेति। परमेश्वरतालाभेहि समस्तास्सम्पदस्तच्चिष्यन्दमय्यः सम्पदा-

* गौतमेन

एव, रोहणलाभे रत्नसम्पदइव । प्रमुषितस्वात्मपरमार्थस्य हि किमन्येन लब्धेन । लब्धतत्परमार्थस्यापि तदन्यच्चास्ति यद्वाञ्छनीयम् । यदुक्तं ग्रन्थकृतैव ।

भक्तिलक्ष्मीसमृद्धानां किमन्यदुपयाचितम् ।
एतया वा दरिद्राणां किमन्यदुपयाचितम् ॥

इति । एवं षष्ठीसमासेन प्रयोजनमुक्तम् । बहुव्रीहिणा तूपायः सूच्यते । समस्तस्य भावाभावरूपस्य बाह्याभ्यन्तरस्य नीलसुखादेर्या सम्पत् सम्पत्तिस्तात्सिद्धिस्तथात्वप्रकाशः तस्याः सम्यगवाप्तिः तथात्वप्रकाशविमर्शरूढिः सैव हेतुर्यस्यां तत्प्रत्यभिज्ञायां, तथाहि स्फुटतरभासमाननीलसुखादिप्रमान्वेषणद्वारेणैव पारमार्थिकप्रमातृलाभइहोपदिश्यते । यदाहान्यत्र ।

इदमित्यस्य विच्छिन्नविमर्शस्य कृतार्थता ।
या स्वस्वरूपे विश्रांतिर्विमर्शः सोहमित्ययम् ॥

इति । तथा

प्रकाशस्यात्मविश्रान्तिरहम्भावो हि कीर्तितः ।
उक्ता च सैव विश्रान्तिः सर्वापेक्षानिरोधतः ॥
स्वातन्त्र्यमथ कर्तृत्वं मुख्यमीश्वरता ऽपि च ।

इति । इयता चोपायेनातिदुर्घटत्वाशङ्का पराकृता यदन्ते निरूपयिष्यति ।

"सुघटएषमार्गोनवः,,

इति । तस्य महेश्वरस्य प्रत्यभिज्ञा प्रतीपमात्माभिमुख्येन ज्ञानं प्रकाशः प्रत्यभिज्ञा प्रतीपमिति स्वात्मावभासो हि नाभूतपूर्वो ऽविच्छिन्नप्रकाशत्वात्तस्य सतु तच्छक्त्यैव विच्छिन्नइव विकल्पितइव लक्ष्यतइति वक्ष्यते । प्रत्यभिज्ञा च भातभासमानरूपानुसंधानात्मिका, स एवायं चैत्रइति प्रतिसंधानेनाभिमुखीभूते वस्तुनि ज्ञानम् । लोके ऽपि एतत्पुत्र एवंगुण एवंरूपक इत्येवं वा अंततोपि सामान्यात्मना वा ज्ञातस्य पुनरभिमुखीभावावसरे प्रतिसंधिप्राणितमेव ज्ञानं प्रत्यभिज्ञेति व्यवह्रियते, "नृपतिं प्रति प्रत्यभिज्ञापितोय,, मित्यादौ । इहापि प्रसिद्धपुराणसिद्धान्तागमानुमानादिभिर्विदितपूर्णशक्तिकस्वभावईश्वरे सति स्वात्मन्यभिमुखीभूते तत्प्रतिसन्धानेन ज्ञानमुदेति "नूनं सएवेश्वरोह,,मिति तामेनामुपपादयामीति,उपपत्तिः सम्भवस्तां सम्भवन्तीं तत्समर्थाचरणेन प्रयोजकव्यापारेण संपादयामि । तथाहि संभवति तावदसावविच्छिन्नप्रकाशत्वात्, निरोधकाभिमतमायाशक्तिसमपसारणमात्रमेव तु तत्रोपपादनम् । प्रत्यभिज्ञोपपत्तौ स्वपरविभागाभावे तदपेक्षं कर्त्रभिप्रायाद्यसम्भाव्यमिति परस्मैपदप्रयोगः । इत्थं चात्र श्लोके योजना । महेश्वरस्य दास्यं समस्तसम्पल्लाभहेतुं कथंचिदासाद्य जनस्यापि कथं चित्तत्प्रत्यभिज्ञामासाद्य प्रापय्य उपकारं समस्तसम्पल्लाभहेतुभूतं महेश्वरदास्यात्मकमिच्छंस्तामेव समस्तसम्पत्समवाप्तिहेतुकां तत्प्रत्यभिज्ञामुपपादयामि । आसाद्येति । आवृत्तियोजने द्वौ णिचौ । इयति च व्याख्याने वृत्तिकृता भरोन कृत,स्तात्पर्यव्याख्यानात् । यदुक्तं "संवृतसौत्रनिर्देशविवृतिमात्रव्यापाराया,मिति । टीकाकारेणापि वृत्तिमात्रं व्याख्यातुमुद्यतेन नेदं स्पृष्टम् । अस्माकं तु सूत्रव्याख्याने एवोद्यम इति विभज्य व्याख्यातम् । एवं सर्वत्र । एवमनेन श्लोकेन अभिधेयं प्रयोजनं तत्प्रयोजनं तत्प्रयोजनमधिकारिनिरूपणं गुरुपर्वक्रमस्सम्बन्ध इति दर्शितम् । तथाहि । समस्तसम्पल्लक्षणो व्याख्यातो यो ऽर्थः पूर्वं पुण्यपापादौ संसारमूलकारणे हेतुः सएव प्रत्यभिज्ञायते ऽनयेति करणव्युत्पत्त्या उपाय इह लोकोत्तरमार्गं प्रति निर्णीत इत्यतिदुर्घटकारित्वलक्षणमैश्वर्यं "मार्गोनव,, इति शास्त्रांते निरूपयिष्यमाणं सूचयता उपायः प्रदर्शितः अभिधेयत्वेन, अतएव तथाहीत्युपक्रमपूर्वं श्लोकान्तरं भविष्यति । प्रयोजनं च प्रत्यभिज्ञोपायज्ञानं, तस्य प्रयोजनं प्रत्यभिज्ञानं, तस्यापि प्रयोजनं समस्तसम्पल्लक्षणपारमैश्वर्यैकरूपप्रथनं,। ततः परं तु नास्त्येव तस्य सर्वपर्यन्तफलत्वादंशांशिकया ऽपि यदुक्तम् मयैव स्तोत्रे ।

फलं क्रियाणामथवा विधीनां
पर्यन्ततस्त्वन्मयतैव देव ।
फलेप्सवोये पुनरत्र तेषां
मूढा स्थितिः स्यादनवस्थयैव ॥

इति । एतद्वक्ष्यति "तदत्र निदधत्पद,,मिति पादद्वयेन । जनस्येत्यनेनाधिकारी दर्शितः । यन्निगमयिष्यति । "अनिशमाविश,,त्विति । कथंचिदित्यनेन गुरुपर्वक्रमः । वक्ष्यति "महागुरुभिरुच्यते स्म शिवदृष्टिशास्त्रे यथा,, इति । एवं प्रतिज्ञातव्यसमस्तवस्तुसंग्रहेणेदं वाक्यमुद्देशरूपं प्रतिज्ञापिण्डात्मकं च, मध्यग्रन्थस्तु हेत्वादिनिरूपक,"इति प्रकटित,, इति चान्त्यश्लोको निगमनग्रन्थ, इत्येवं पञ्चावयवात्मकमिदं शास्त्रं परव्युत्पत्तिफलम् । नैयायिकक्रमस्यात्र मायापदे पारमार्थिकत्वमिति ग्रन्थकाराभिप्रायः क्रियासम्बन्धसामान्येत्यादिसूत्रेषु प्रकटीभविष्यतीति तावद्ग्रन्थस्य समस्तस्य तात्पर्यम् । सुजनश्च लौकिकेश्वरपरिचित ईश्वरविषये जनमनुजीविगुणोपपन्नं प्रकाशयति, जनविषये चाभिगामिकादिगुणगणसम्पन्नमीश्वरं प्रकाशयति, इतीयानर्थः सामान्येन शेषषष्ठीसमासेन दर्शितः तस्य प्रत्यभिज्ञेति । एतच्छ्लोकाकर्णनसमये च शिष्याणामेतदर्थसंक्रमणक्रमेण परमेश्वरतादात्म्यमेवोपजायते तावत् । तथा हि । जनस्येत्याकर्णनाद् वयं ते जननमरणपीडिता अपर्युदस्तवृत्तयश्च अस्माकमयमुपकारमिच्छन् महेश्वरस्य दास्यमासा-

ख्य समस्तसम्पत्समवाप्तिहेतुं तत्प्रत्यभिज्ञामुपपादयति ततश्चतत्प्रत्यभिज्ञामेवंभूतां वयं प्राप्ताएवेति । इत्थमेव ह्यधिकारिणि शास्त्रार्थस्य बिम्बप्रतिबिम्बवत्संक्रान्तिर्लोड्लिङादीनां विषयीभवतीति प्रथमपुरुषार्थेउत्तमपुरुषार्थे पर्यवस्यति, न तु ताटस्थ्येना,धिकार्यनधिकारिणोः प्रतिपत्तौ विशेषाभावप्रसंगात्। आरोग्यकामाः शिवां सेवन्तां सेवध्वमिति वा वाक्यार्थस्य सेवामहे इत्येवं रूपेणाधिका रिणि द्वितीयकक्ष्यासंक्रान्तौ तृतीयकक्ष्यायामेव भाविकोटिपतितामपि पुरुषार्थसम्पत्तिमकालकलितस्वरूपानुप्रवेशेन स्वात्मीकृतामभिमन्यमाने ततएव विततसंवित्सुन्दरपरामर्शे पूर्णता भिमानप्रतिलम्भादन्यस्य त्वनेवंरूपत्वेनैवाधिकारिता ताटस्थ्यप्राणेति तदास्तामवान्तरमेतदतिगहनं चेति स्थितमेतद् एतेन श्लोकेनेश्वरसाम्मुख्यं विनेयानां प्रयोजनादिप्रतिपादनं च क्रियतइति ।

अनन्तभावसम्भारभासने स्पन्दनं परम् ।
उपोद्घातायते यस्य तं स्तुमस्सर्वदा शिवम् ॥

नन्वीश्वरस्य सिद्धिरेव कर्तव्या । केयं सिद्धिः "न तावदुत्पत्तिः,, नित्यत्वात्, नाप्यीश्वरसिद्धिकारादयस्तस्योत्पत्तिं विदधते, "ज्ञप्तिसिद्धिरिति चेत्,, अनवच्छिन्नप्रकाशस्य प्रमाणव्यापारोपादेयप्रकाशात्मकसिद्ध्यनुपयोगएव, । नन्वनवच्छिन्नस्तदीयः प्रकाशइति * कथमेतत् घटसुखादिप्रकाशे हि नत्प्रकाशः । † कुतः । ‡ तदप्रकाशेपि सुप्तमूर्च्छादौ नतराम्, स्वप्रकाशेपि चेश्वरे प्रमातॄणां किं वृत्तं येन तेषां प्रमाणव्यापारानुपयोगइत्याशङ्क्याह ।

(२) कर्तरि ज्ञातरि स्वात्मन्यादिसिद्धे महेश्वरे ।
अजडात्मा निषेधं वा सिद्धिं वा विदधीत कः ॥

इह क ईश्वरे कीदृशे कीदृशेन प्रमाणेनास्तीति ज्ञानलक्षणां सिद्धिं नास्तीति ज्ञानलक्षणं वा निषेधं कुर्यात् । "प्रमातेति चेत्,, सएव कः, किं देहादिर्जडः उत तदन्योवा कश्चिद् आत्मादिशब्दवाच्यः, सोपि च स्वप्रकाशस्वभावोवा न वा, । "देहादिर्जड इति चेत्,, सएव स्वात्मन्यसिद्धः परत्र कां सिद्धिं कुर्यात्, आत्माप्यस्वप्रकाशो जड एव तत्तुल्ययोगक्षेमः, "स्वप्रकाशस्वभावइति चेत्,, कीदृशेन स्वेन रूपेण भाति, "यदि परिनिष्ठितसंविन्मात्ररूपेण,, तदा संविदां भेदनं भेदितानां चान्तरनुसन्धानेनाभेदनं न स्यात्, तेन स्वतन्त्रस्वप्रकाशात्मतया तावत्सभासते तथा भासमानश्च कीदृशमीश्वरं साधयेन्निषेधयेद्वा "कर्तृज्ञातृस्वभावमिति चेत्,, ननु स प्रमातैव तथाभूतइति कोन्यस्सः "ननु सर्वकर्तृत्वसर्वज्ञत्वे प्रमातुर्न स्तः,, । न खलु सर्वशब्दार्थो ज्ञातृत्वकर्तृत्वयोः स्वरूपं भिनत्ति, * भेददर्शने ऽपीश्वरज्ञानचिकीर्षायत्नादेर्नित्यस्य विषयेणाकारणभूतेना † नाधेयातिशयत्वात्, "प्रकाशमानतानयनमेव विषयत्वमिति चेत्,, अप्रकाशस्वभावस्य तथात्वमनुचितमिति वक्ष्यामः, प्रकाशमानस्वभावत्वे विषयोपि सर्वात्मनाप्रकाशएव निमग्न इति प्रकाशः प्रकाशते इत्येतावन्मात्रपरमार्थत्वे कः सर्वज्ञासर्वज्ञप्रविभागः, । ‡ प्रमाणमप्येवं सिद्धत्वासिद्धत्वाभ्यां पर्यनुयोज्यम् एवं सिद्धिरपि । तस्माद्विषयाभिमतं वस्तु शरीरतया गृहीत्वा तावच्चभासमान आत्मैव प्रकाशते विच्छेदशून्यः सुषुप्तमपि प्रति प्रकाशतएव, § अन्यथा स्मृत्ययोगात् प्रकाशस्य च नित्यत्वा,द्विच्छेदहेतोरभावेनान्यप्रमात्रपेक्षया च प्रकाशमानत्वात्, स्वपरप्रमातृविभागस्य तत्सृष्टस्य मायीयत्वेन वक्ष्यमाणत्वात् । सचायं स्वतन्त्रः । स्वातन्त्र्यं चास्याभेदे भेदनं भेदिते चाभेदनमिति बहुप्रकारं वक्ष्यामः । तदेवास्य पारमेश्वर्यं मुख्यमानन्दमयं रूपमिति पूर्वमुपात्तं कर्तरीति तदेव तु स्वातन्त्र्यं विभज्य वक्तुं ज्ञातरीति पश्चान्निर्दिष्टं, ज्ञानपल्लवस्वभावैव हि सर्वा क्रियेति वक्ष्यते । तेन सर्वक्रियास्वतन्त्रे सर्वशक्तिके इति यावदुक्तं भवेत्तावदेव कर्तरीति ज्ञातरीति । इयमेव चासौ संवित्स्वभावता संविदिति तूच्यमाना विकल्प्यत्वेन प्रमेयतां स्पृशन्ती स्पृष्टत्वाच्च परमार्थसंविदिति वक्ष्यामः । कर्ता ज्ञाता च महेश्वरइत्यभिधाने ऽपि सएव प्रकारश्चापतेदिति यथायथा प्रमेयभूमिकापादनन्यक्कार-

---

* अध्यवसायाद्यात्मनः प्रकाशस्य बाह्याभ्यन्तरान्यतरविषयैर्कनिरूप्यतया तस्य च यं कं चन घटप्रभृतिविषयमवगाहमानस्याशेषविषयावलम्बित्वलक्षणस्य विषयानवलम्बित्वलक्षणस्य वा ऽनवच्छिन्नत्वस्यासम्भवेन तादृशप्रकाशान्तरानुपलम्भेन च न युज्यते पारमेश्वरप्रकाशस्यानवच्छिन्नत्वमिति भावः ।

† एतत् प्रतिक्षेप्तुं सुप्तादिदशायां विषयानवगाहिप्रकाशस्य सम्भवमभिप्रयन् पृच्छति कुत इति ।

‡ समादधन् प्रमाणाभावात् तदवस्थायां प्रकाशमात्रं प्रत्याचष्टे नतरामित्यन्तेन ।

एवं प्रकारेण सरलव्याख्यानो भवत्ययं ग्रन्थ इति पुस्तकद्वये ऽप्युपलभ्यमानो नितरामिति पाठउपेक्षितः ।

* नैयायिकमते

† विषयोपप्लवे ऽपि कल्पान्ते विषयसत्तादशायामिव पारमेश्वरप्रमादेः स्वीकारेण विषयस्य मित्यादिस्वरूपभेदकत्वासम्भवात् ।

‡ प्रमाणस्य प्रकाशान्तर्गतत्वसिद्धौ केदानीं प्रमाणस्य सिद्धिः प्रकाशस्य कर्तव्यतया ऽवशिष्यते । अथ चेदसिद्धं तर्हि तदेवायातमप्रकाशस्वभावस्य तथात्वमनुचितमिति वक्ष्यमाणमिति ।

§ स्मरति हि सुप्तोत्थितः "सुखमहमस्वाप्सं,, "गाढं मूढोऽहमस्वाप्सं,,-मित्यादि । तच्च स्मरणमनुपपद्यमानं स्वापयिकीं सौषुप्तवृत्तिमाक्षिपति, ततश्च सिध्यति निद्रा नाम वृत्तिरिति स्पष्ट "मभावप्रत्ययालम्बना वृत्तिर्निद्रे,, तिपातञ्जलसूत्रस्यसांख्यप्रवचनभाष्ये ।

Digitized by Google

कलङ्कपरिहारः । अस्य त्वग्रतया यावद्गति यतितव्यमिति भूतविभक्त्या निर्देशः कृतः उपदेशावसरे हि सर्वात्मना तावत्स्वप्रमेयता ऽस्य परिहर्तुमशक्या । "स्वात्मनि,, स्वस्मिन्ननपायरूपे स्वभावे इत्यनेन वैशेषिकाद्यभिमतजडात्मशब्दनिरासः । "अादिसिद्धे,, इत्यविच्छिन्नप्रकाश इत्यर्थः । महेश्वरे इति । एतदेव माहेश्वर्यं यदनवच्छिन्नप्रकाशत्वेन ज्ञातृकर्तृत्वधारोपारोहः । अजडात्मनीति । यस्य तु वैशेषिकादेर्जड आत्मा ससिद्धिं करोत्वीश्वरविषयाम् । अन्यस्तु सांख्यादिर्निषेधम् । सांख्योऽपि विषयावभासनरूपं ज्ञानं बुद्धिधर्ममिच्छन्नात्मानं वस्तुतो जडमेवार्पयति । न च जडात्मा स्वात्मन्यपि दुर्लभप्रकाशस्वातन्त्र्यलेशः किंचित्साधयितुं निषेद्धुं वा प्रभविष्णुः पाषाणवत् । न चाजडात्मनोऽप्येतदुचितम् । तथाहि सस्वात्मनि सिद्धिमित्थं विदध्यात् । यद्यस्य सोऽभिनवत्वेन भासमानः पूर्वं न भासते अनाभासनं चेज्जडतैव, । निषेधं चेत्थं विदध्यात् । यदि सन प्रकाशते तथा च जडः न च जडस्यैतद्युक्तमित्युक्तं नाप्यजडस्य । तस्मात्संविन्प्रकाश एव घटादिप्रकाशः न त्वसौ स्वतन्त्रः कश्चिद्वास्तवः ।

> नीलं पीतं कुड्यमिति प्रकाशः केवलः शिवः ।
> अमुष्मिन् परमाद्वैते प्रकाशात्मनि कोपरः ॥

तत्रतत्र कारकव्यापारवत्प्रमाणव्यापारोऽपि । नित्यत्वव्रत्स्वप्रकाशत्वस्यापि तत्र भावात् ॥

ननु कारकव्यापारः प्रमाणव्यापारश्च यदीश्वरे न सम्भवति तर्हि प्रत्यभिज्ञापयामीति योव्यापार उक्तः सकतमो व्यापार इत्याशङ्क्याह ।

> (३) किं तु मोहवशादस्मिन्दृष्टेप्यनुपलक्षिते ।
> शक्त्याविष्करणेनेयं प्रत्यभिज्ञोपदर्श्यते ॥

सदेश्वरस्वभाव आत्मा प्रकाशते तावत्, तत्र चास्य स्वातन्त्र्यमिति न केन चिद्वपुषा न प्रकाशते । तत्राप्रकाशात्मनापि प्रकाशते प्रकाशात्मनापि । तत्रापि प्रकाशात्मनि सर्वथा प्रकाशात्मना प्रकाशो भागशो वा ऽभागशः, प्रकाशने सर्वस्य व्यतिरेकेणाव्यतिरेकेण वा, कतिपयस्य व्यतिरेकेणाव्यतिरेकेण वा, उक्तप्रकारपरिपूर्णतया वा । तदमी सप्तप्रकाराः । तत्र प्रथमः प्रकारो जडोल्लासः । अन्त्यः परमशिवात्मा । मध्यमाजीवावभासाः । सैव भगवतो माया विमोहनी नाम शक्तिः । तद्वशात्प्रकाशात्मतया सततमवभासमाने ऽप्यात्मनि भागेनाप्रकाशनवशादनुपलक्षिते सर्वथा हृदयंगमीभावमप्राप्ते ऽतएव पूर्णतावभासनसाध्यामर्थक्रियामकुर्वति तत्पूर्णतावभासनात्मकाभिमानविशेषसिद्धये प्रत्यभिज्ञा व्याख्यातपूर्वा प्रदर्श्यते । कथं शक्तेरीश्वरनिष्ठत्वेन प्रसिद्धाया दृक्क्रियात्मिकाया आविष्करणेन प्रदर्शनेन अभिमानसाध्यार्थक्रियाणां तदभिमानसिद्ध्या विना ऽसिद्धेस्तथा च दृष्टान्तं दर्शयिष्यति । "तैस्तैरप्युपयाचितै,,रिति । एतदुक्तं भवति । न कारकव्यापारो भगवति नापि ज्ञापकव्यापारोयम् । अपि तु मोहापसरणमात्रमेतत् । व्यवहारसाधनानां प्रमाणानां तावत्यैव विश्रान्तेः । घटोयमग्रगः प्रत्यक्षत्वादित्यनेन हि घटो न ज्ञाप्यते प्रत्यक्षेणैव प्रकाशमानत्वात् । अन्यथा पक्षे हेत्वसिद्धेः केवलं मोहमात्रमपसार्यते । यश्चायं मोहस्तदपसारणं च यत्तदुभयमपि भगवत एव विजृम्भामात्रं न त्वधिकं किंचिदित्युक्तं वक्ष्यते च ॥

ननु परिदृश्यमाने भावराशौ किमीया शक्तिराविष्क्रियते कं च प्रतीति । जडानां तावन्न ज्ञानात्मिका शक्तिरस्ति । क्रियात्मिकापि स्वातन्त्र्यप्राणा स्वातन्त्र्यव्यपगमादसम्भावनाभूमिरेव, तथा च रथो गच्छतीत्यादावुपचारं के चन प्रतिपन्नाः न च जडान्प्रति व्यवहारसाधनमुचितम् । अथाजडजीवज्ञानाधिकारेणोभयमपि तर्हि सर्वस्य स्वात्मा महेश्वर इति दूरतरं विप्रकर्षिता प्रत्याशा । तदेतदाशङ्क्य निरूपयति ।

> (४) तथा हि जडभूतानां प्रतिष्ठा जीवदाश्रया ।
> ज्ञानं क्रिया च भूतानां जीवतां जीवनं मतम् ॥

तथाहीति युक्त्युपक्रमं द्योतयति दृश्यतां क्रिलेत्यर्थः । तथेत्यनेन साध्यं सूच्यते हिना च हेतुरित्यन्ये, प्रकृतं साध्यं हेतुसिद्धायतमुपक्रम्यते इत्यर्थः । तेनेति बुद्धिवर्तिना ऽतएव स्मर्यमाणेन ग्रन्थेन वर्णयिष्यमाणेन प्रकारेण यस्मात्सर्वमेतद्युक्तमिति तथाहीति शब्दस्य वार्थः । इह तावद्भावराशिर्यथा विमृश्यते तथास्ति । अस्तित्वस्य प्रकाशं शरणीकुर्वतः प्रकाशप्राणितदेशीयं विमर्शमाश्रित्य समुन्मेषात् । अविमृष्टं हि यदि वस्तु तन्न नीलं न पीतं न सदासदिति कुत इति पर्यनुयोगे किमुत्तरं स्यात् । तेन यद्यथा यावदबाधितं विमृश्यते तत्तथा तावदस्ति, तत एव देशकालाकारविततात्मानोऽपि द्रव्यक्रियासम्बन्धादयः । एकत्वेनैव परमार्थसन्त इति वक्ष्यते "क्रियासम्बन्धेत्यादिना,, । ततश्च विततमपीदं विश्वं संक्षेपविमर्शदशाधिरोहे जडं जीवश्चेत्येतावता द्वयरूपेणास्ति । तत्र जडा अपि विमृश्यमाना न स्वतन्त्रा भवन्ति विमृश्यमानता हि तेषां न स्वशरीरविश्रान्तः कोऽपि धर्मः, जडत्वाभावप्रसङ्गात् । मम नीलं भाति मया नीलं ज्ञायत इति तेषां जडभूतानां चिन्मयत्वे ऽपि मायाख्ययेश्वरशक्त्या जाड्यं प्रापितानां जीवन्तं प्रमातारमाश्रित्य "प्रतिष्ठा,, तत्प्रमाताभिमुख्येनावस्थानं, ततोजडानाम न पृथक्सन्ति । यथोक्तं ग्रन्थकृतैव ।

> एवमात्मन्यसत्कल्पाः प्रकाशस्यैव सन्त्यमी ।
> जडाः

इति । स एव हि स्वात्मा नासन्वक्तव्यः । यस्यान्यानुपहितं रूपं चकास्ति, न च भारूपानुपाहितं जडं नाम किंचित् तेन जडानां हि शक्तिराविष्क्रियते जडान् प्रतीत्येतत् तावदिह स्थानमेव । ये त्वन्ये जडेभ्यो जीवन्तइति नाम प्रसिद्धास्तेषामपि शरीरप्राण*पुर्यष्टकशून्याकारास्तावज्जडाएवेति तेषामपि किमुच्यते । एवं घटशरीरप्राणसुखतदभावरूपं सद्य-ल्लग्नं भाति तदेव जीवरूपभूतं सत्यं तस्यचा†ऽपाते यद्यपि बहुत्वं भाति तथापि तज्जडात्मकवेद्यशरीराद्युपाधेः । ततस्तदपारमार्थिकमन्योन्याश्रयात् । जीवा हि जडभेदाद्भेदभागिनः जडाश्चजीवभेदाद् एतद्देहो ऽयमेतद्देह्योऽयमिति भेदमुपेयुः । नीलपीतादिभेदस्तु प्रमातृसंलग्नतया ऽभेदभूमिमेव परमारूढइति किं तेन । तदयं जीवानामभेद एव सम्पन्न इति जीवन् प्रमातेति ज्ञातम् । जीवनं च जीवनकर्तृत्वं तच्च ज्ञानक्रियात्मकं, योहि जानाति च करोति च सजीवतीत्युच्यते । तदयं प्रमाता ज्ञानक्रियाशक्तियोगादीश्वर इति व्यवहर्त्तव्यः । पुराणागमसिद्धेश्वरवत् तदप्रसिद्धावपि सर्वविषयज्ञानक्रियाशक्तिमत्त्वस्वभावमेवैश्वर्यं तन्मात्रानुबन्धित्वादेव सिद्धम् । तदपि च कल्पितेश्वरराजादौ तथा व्याप्तिग्रहणात् । यो यावति ज्ञाता कर्त्ता च सतावतीश्वरो राजेव । अनीश्वरस्य ज्ञातृत्वकर्तृत्वे स्वभावविरुद्धे यतः आत्मा च विश्वत्र ज्ञाता च कर्त्ता चेति सिद्धा प्रत्यभिज्ञा । ज्ञानक्रियाशक्ती एव हि स्वाभाविक्यौ अप्ररूढभेदामर्षे सदाशिवेश्वरौ, भेदस्य सामान्यतः प्ररोहे विद्याकले, विशेषतः प्ररोहे बुद्धिकर्मेन्द्रियगणः, इति भविष्यति जडाइति अजीवन्तः अन्ये च जीवन्त इत्यापाते तावद्भाति न तु संविदापाते भाति । जीवतामिति जङ्गमा एवामी इत्थं निर्दिष्टाः ॥

ननु ज्ञानक्रिये एव कथं सिद्धे यत ऐश्वर्यव्यवहारः प्रसाध्येतेति शङ्कां शमयितुमाह ।

(५) तत्र ज्ञानं स्वतः सिद्धं क्रिया कायाश्रिता सती ।
परैरप्युपलक्ष्येत तया ऽन्यज्ज्ञानमूह्यते ॥

अहं जानामि मया ज्ञातं ज्ञास्यते चेति एवं प्रकाशाहंपरामर्शनिष्ठितमेवेदं ज्ञानं नाम । किं तत्रान्यद्विचार्यते । तदप्रकाशे हि विश्वमन्धतमसमेव स्यात् । तदपि वा न स्यात् । बालोपि हि प्रकाशमेव संवेदयते । तदुक्तं "विज्ञातारमरे केन विजानीया,,दिति "तचिन्हवेकः प्रश्नः किमुत्तरं च स्यात्,, इति । तच्च जानामीत्यन्तःसंरम्भयोगोपि भाति येन शुक्लादेर्गुणादत्यन्तजडाज्जानामीति वपुश्चित्स्वभावतामभ्येति सच संरम्भो विमर्शः क्रियाशक्तिरुच्यते । यदुक्तमस्मत्परमेष्ठिश्रीसोमानन्दपादैः ।

घटादिग्रहकाले ऽपि घटं जानाति सा क्रिया ।

इति । तेनान्तरीयक्रियाशक्तिर्ज्ञानवदेव स्वतः सिद्धा स्वप्रकाशा सैव तु शक्त्या प्राणपुर्यष्टकक्रमेण शरीरमपि संचरमाणा स्पन्दनरूपा सती व्यापारव्याहारात्मिका मायापदे ऽपि प्रमाणस्य प्रत्यक्षादेर्विषयः । सा च परशरीरादिसाहित्येनावगता स्वं स्वभावं ज्ञानात्मकं गमयति । न च ज्ञानमिदंतया भाति इदंता ह्यज्ञानत्वं न चान्यदन्येन वपुषा भातं भातं भवेत् । तज्ज्ञानं भात्येव परं भाति च यत्तदेवाहमित्यस्य वपुरिति परज्ञानमपि स्वात्मैव परत्वं केवलमुपाधेर्देहादेः । स चापि विचारितोयावदन्यइति विश्वप्रमातृवर्गः परमार्थतएकः प्रमाता सएव चास्ति । यदुक्तम् ।

एकः प्रकाशएवास्ति स्वात्मनः स्वपरात्मभिः ।

इति । ततश्च भगवान् सदाशिवो जानातीत्यतः प्रभृति क्रिमिरपि जानातीत्यन्तमेकएव प्रमातेति फलतः सर्वज्ञत्वं प्रमातुः । एवं कर्तृत्वे ऽपि वाच्यम् । यदुक्तमस्मत्परमेष्ठिभिः शिवदृष्टौ ।

घटो मदात्मना वेत्ति वेद्म्यहं च घटात्मना ।
सदाशिवात्मना वेद्मि सवा वेत्ति मदात्मना ॥

इत्यादि । ऊह्यतइत्यनेन ज्ञानस्य प्रमेयत्वं निर्वहतीति दर्शयति । अन्यथा ह्यनुमीयतइति ब्रूयात् । तदेवं येषां तार्किकप्रवादपांसुपातधूसरीभावो न वृत्तोऽस्मिन्संवेदनपथे तदयतेवात्मानमीश्वरं विद्वांसो घटशरीरप्राणसुखतदभावांस्तत्रैव निमज्जयन्त ईश्वरसमाविष्टा एव भवन्ति ततोयमुपोद्घातः । उपइत्यात्मनः समीपे टङ्कवदीश्वराभिज्ञानलक्षणउत्कर्षो हन्यते विश्राम्यते येन एतावदेव चास्य ग्रन्थस्य तात्पर्यमिति ततोप्ययमुपोद्घातः । उपांशु अवितत कृत्वा उदिति शास्त्रस्योर्ध्वएव हन्यते ऽपसार्यते प्रमेयविषयो व्यामोहो येनेति । गत्यर्थत्वाद्वा हन्तेर्ज्ञानमर्थः ज्ञायते प्रमेयं येनेति । केचित्तु गतिं "स्त्रियं गच्छती,,त्येतद्विषयामेव हन्त्यर्थमाहुः । एवं श्लोकचतुष्टयार्थभावनादार्ढ्यादेव लभ्यते परमशिव इति शिवम् ॥

इतिश्रीमदाचार्योत्पलदेवशिष्यश्रीमल्लक्ष्मणगुप्ताचार्यदत्तोपदेशश्रीमदाचार्याभिनवगुप्तविरचितायां श्रीप्रत्यभिज्ञाविमर्शिन्यामुपोद्घातः ।

॥ इति प्रथममान्हिकम् ॥

* अन्तःकरणत्रयं पञ्च तन्मात्राणि चेति पुर्यष्टकम् ।

† अविमर्षदर्शने ।

Digitized by Google

॥ अथ प्रसन्नराघवनामकनाटकस्य ॥

॥ षष्ठोऽङ्कः ॥

ततः प्रविशतो रामलक्ष्मणौ ।

रामः ।

सौमित्रे ननु सेव्यतां तरुतलं चण्डांशुरुज्जृम्भते

लक्ष्मणः ।

चण्डांशोर्निशि का कथा रघुपते चन्द्रोऽयमुन्मीलति ।

रामः ।

वत्सैतद् विदितं कथन्नु भवता

लक्ष्मणः ।

धत्ते कुरङ्गं यतः

रामः ।

क्वासि प्रेयसि हा कुरङ्गनयने चन्द्रानने जानकि ॥

पुनर्विलोक्य हन्त संतापेन प्रतारितोऽस्मि । कथमयं गगनतलाधिरोही रोहिणीहृदयनन्दनश्चन्द्रः । चन्द्रं प्रति ।

रजनिकर करास्ते बान्धवाः कैरवाणां
सकलभुवनचेष्टाजागरूका जयन्ति ।
न कथयसि कथं तत् कुत्र सा जानकी मे
त्वमसि मृगसहायः किन्नु नक्तंचरोऽसि ॥

लक्ष्मणः । स्वगतं कथमयमभिषङ्गतरङ्गस्तरलीकरोत्यार्यमामसं तदन्यतो नयामि । प्रकाशम् । आर्यायमितो विलोक्यतां चपलचञ्चुपुटाचान्तशीतकरशीकरश्चकोरः ।

रामः । चकोरं प्रति ।

तत् मे विदेहतनयावदनं निवेद्य
भ्रातश्चकोर कुरु मां चरितार्थवृत्तिम् ।
पीता यदीयकमनीयकपोलकान्तिः
कान्तासखेन भवता शशिनं विहाय ॥

लक्ष्मणः । आर्येयमितो विलोक्यतां शरत्कृशा निशाकरकिरणानुकारितरङ्गा तरङ्गिणी ।

रामः । विलोक्य ।

कल्लोलिनि त्वमिव सापि कुरङ्गनेत्रा
नूनं किमप्यनुदिनं कृशिमानमेति ।
एतावदस्ति भवतीह निसर्गशीता
सीता पुनर्वहति कामपि तापमुद्राम् ॥

लक्ष्मणः । इतो विलोक्यतामनिद्रनीलनलिनीवनविलीनोऽयमलिनीनाथः ।

रामः । विलोक्य । अये कोऽयं विहङ्गः ।

उन्मीलन्नयनान्तकान्तिलहरीनिष्पीतयोः केवलादामोदादवधारणीयवपुषोः कान्तासखेन त्वया ।
यत्कर्णोत्पलयोः स्थितेन भवता किंचित् समुन्नुज्झितं
भ्रातस्तिष्ठति कुत्र तत् कथय मे कान्तं प्रियाया मुखम् ॥

लक्ष्मणः । सातङ्कम् । अपीमं न विलोकयेदार्यः ।

रामः । विलोक्य । अये कोऽयं विहङ्गः ।

योऽयं बहिः कलितकुङ्कुमरेणुराग-
मन्तस्तु संभृतदयं हृदयं दधानः ।
पारेतरङ्गिणि मुहुः करुणं रटन्ती-
मालोकते सहचरीं न तु संनिधत्ते ॥

विमृश्य नूनमयं वल्लभाविरहविदारितहृदयो वराकश्चक्रवाकः ।

लक्ष्मणः । अहो * प्रमादः ।

रामः । नूनमयमेकः समदुःखतया समानशीलो मे । अथवा कुतोऽस्य मम च समानशीलता ।

अयमुदयति चन्द्रे विप्रयोगं प्रियायाः
श्रयति तपति सूर्ये सङ्गमङ्गीकरोति ।
मम तु जनकपुत्रीविप्रयुक्तस्य यातं
शतमधिकमपीदं चन्द्रसूर्योदयानाम् ॥

लक्ष्मणः । आर्येह तावत् मुकुलितकमलिनीपरिसरानुसारिणि कलहंसे दीयतां दृष्टिः ।

रामः विलोक्य ।

निजनखशिखालेखालीढस्फुरत्कमलस्तनीं
विरल † मधुपश्रेणीमेतां चलन् कलहंसकः ।
अकरुणशशिप्रेङ्खत्पादप्रहारविमूर्छिता-
महह नलिनीं कान्तकान्तां मुहुर्मुहुरीक्षते ॥

विमृश्य । वरमेवंविधानामपि सहचरीजनानुकम्पया कोमलं चेतो न तु निसर्गकठिनस्य रामस्य ।

लक्ष्मणः । स्वगतम् । कथमिदानीमप्यस्य चेतसि जानकीयमिन्द्रजालमुन्मीलति ।

नेपथ्ये । सखे रत्नशेखर चिराद् दृश्यसे ।

लक्ष्मणः । आकर्ण्य किमेतत् ।

पुनर्नेपथ्ये । वयस्य चम्पकापीडैवमेतत् । मया हीयन्तं समयमखिलमायानिधेर्मयनाम्नो दानवस्य पुत्रीं निजसहोदरीं मन्दोदरीमनुवर्तितुं लङ्कायां कृतालयात् चित्ररूपनाम्नो दानवात् सकलमिन्द्रजालकलामाददानेन स्थितम् ।

लक्ष्मणः । नूनमयं कृतकर्णकौतुकामोदः कयोरपि विद्या-

* धिक् प्रमाद इति वा पाठः ।

† निरतमधुपेति वा पाठः ।

धरयोः * संवादः ।

पुनर्नेपथ्ये । सखे रत्नशेखर तन् मे धारयसि निजकलाद-र्शनमिति ।

पुनर्नेपथ्ये । वयस्य चम्पकापीड ।

असुरसुरनिशाचरोरगाणा-
मपि नरकिंनरसिद्धचारणानाम् ।
सकलजनविलोकनैकचित्रं
स्फुटमिह कस्य विजृम्भते चरित्रम् ॥

अथवा किमन्येन । लङ्कानुभूतमेव नूतनं किमपि सरस-रमणीयं चरितमुपदर्शयामि ते ।

लक्ष्मणः । आर्यैतोऽवधार्यतां नन्विदमयमेोपनीतं प्रेक्षणीयम् ।

रामः । अनाकर्णितकेन ।

देवि त्वदीयमणिनूपुरजृम्भमाण
कोलाहलोत्तरलहंसकुलाकुलासु ।
वैदेहि लक्ष्मणपदाम्बुजलाञ्छितासु
गोदावरीपुलिनभूमिषु देहि दृष्टिम् ॥

लक्ष्मणः । क्व पुनरिह वैदेही क्व वा गोदावरी ।

रामः । विमृश्य । कथं प्रतारितोऽस्मि मतिविभ्रमेण । विचिन्त्य । अथवा कृतार्थीकृतोऽस्मि । अनेन हि मे ।

गोदावरीतीरतपोवनेषु
सौमित्रिसीतापरिपूर्णपार्श्वः ।
मुदा निमेषानिव यान्यनैषं
दिनानि तान्येव पुनः स्मृतानि ॥

पुनः सप्रत्याशम् । अपि नाम ।

तान्येव पक्ष्मलदृशो वचनामृतानि
भूयोऽपि कर्णचुलुकैरहमापिबेयम् ।
यैर्मामदर्शयदसौ विकचप्रमोदा
गोदावरीकमलवीचिविचेष्टितानि ॥

नेपथ्ये ।

तुह सुहअ उक्खिवन्ती तरङ्गसिअचामरं रहुमिअङ्क ।
धवलकमलादपत्तं धारइ गोलाणई सहत्थेण † ॥

रामः । सहर्षम् । अये स एवायं प्रियतमायाः समालापः । तथाहि ।

परिमितकमनीयः कोमलो वाग्विलासः
सरसमधुरकाकुस्वीकृता कापि लेखा ।
ध्वनिरपि च विपञ्चीपञ्चमस्यानुवादी
श्रुतिरपि कलकण्ठीकण्ठसंवादभूमिः ॥

तत् कुत्र पुनः प्रेयसी । विलोक्य तत् कथमयमदृष्टचन्द्र-लेखश्चन्द्रालोकः । ततः प्रविशति यथा निरूपयिष्यमाणा जानकी ।

रामः । ससंभ्रमम् । प्रिये * प्राप्तासीति गन्तुमिच्छति ।

लक्ष्मणः । रामं हस्ते धृत्वालमिह संभ्रमेण । विद्याधरो-पनीतमिन्द्रजालकं खल्वेतत् ।

रामः । निर्वर्ण्य । अये क एष संनिवेशविशेषः । तथाहि ।

एकेनालम्बितेयं शिथिलभुजलताशोभिना शाखिशाखा-
हस्तेनान्येन चायं दिनकरकिरणाक्रान्तकान्तिः कपोलः ।
एष स्रस्तो नितम्बे लुलति कचभरस्त्यक्तकाञ्चीकलापे
नेत्रोत्सङ्गे च बाष्पस्तबकनवकणैः पक्ष्मला पक्ष्मलेखा ॥

नूनमियमशोकशाखिशाखां सखीमिवालम्ब्य निद्रामुपा-गता । तथाहि ।

आमीलन्नवनीलनीरजतुलामालम्बते लोचनं
शैथिल्यं नवमल्लिकासहचरैरङ्गैरपि स्वीकृतम् ।

पुनर्विमृश्य । नूनमनया हृदयप्रमोददायी कोऽपि स्वप्नो-दृष्टः । तथाहि ।

आलापादधरः स्फुरत् कलयति प्रेङ्खत्प्रवालोपमा-
मानन्दप्रभवाश्च बाष्पकणिका मुक्ताश्रियं बिभ्रति ॥

सीता । उन्मील्य लोचने । हद्धिहद्धि अण्णारिसो मे जी-अलोओ गोलाणई कहिं सा णीलुप्पलसामलो कहिं रामो लङ्का कहिं कहिं वा हद्धि रामेक्कजीविदा सीदेति मूर्छति † ।

रामः । अयि वसुधे ।

यां वै गर्भे त्रिजगदबलारत्नभूतां दधाना
लब्धार्थत्वात् जगति भवती रत्नगर्भा बभूव ।
तामुत्सङ्गे तव विलुलितां वीक्षमाणा च सीतां
द्राग् दीर्णासीन् न कथमथवा देवि सर्वंसहासि ॥

तदेनामभ्यर्थयामि तावदस्याः समुद्बोधनाय । अथवा किमभ्यर्थनया ।

निजामपि सुतां सीतां नेयमुद्बोधयिष्यति ।
निजेष्वपत्ये करुणा कठिनप्रकृतेः कुतः ॥

तदेनं तावदभ्यर्थयामि ।

---

* पथिकयोरिति पाठस्तु न साधीयान् । रामं हस्ते धृत्वालमिह संभ्रमेण विद्याधरोपनीतमिन्द्रजालकं खल्वेतत् इति लक्ष्मणस्य श्रीरामचन्द्रं प्रत्युक्तिरूपाग्रिमग्रन्थस्य संगत्यापत्तेः ।

† तव सुभग उत्क्षिपन्ती तरङ्गशीतचामरं रघुमृगाङ्क ।
धवलकमलातपत्रं धारयति गोदानदी स्वहस्तेन ॥

* प्राप्तेयं प्रेयसीति वा पाठः

† हा धिक् हा धिक् अन्यादृशो मे जीवलोको गोदानदी क्व सा नीलोत्पलश्यामलः क्व रामो लङ्का क्व क्व वा हा धिक् रामैकजीविता सीतेति ।

Digitized by Google

स्निग्धाशोकद्रुम निजसखीं तूर्णमुद्बोधयैनां
सिक्त्वासिक्त्वा किसलयकरस्रंसिना सीकरेण ।
एतस्याः किं नयनकमलस्यन्दिभिः सान्द्रसान्द्रै-
र्बाष्पोत्पीडैरनुदिनमपि त्वं न सिक्तालवालः ॥

कथमनाकर्णितकेन प्रत्याख्यातमनेन । अये कृतघ्नता पलाशिनः । विलोक्य कथं प्रकृतिप्रियंवदाया मे प्रियायाः सखीजनोऽपि न कश्चिदिह ।

प्रविश्य त्रिजटा । जानकि समाश्वसिहिसमाश्वसिहि ।

सीता समाश्वस्य । कहं पिअसही मे तिअडा * ।

त्रिजटा । सख्यनया ते मधुरया मुखरेखया तर्कयामि यत् किल प्रियं किमपि दृष्टवती भवती ।

सीता । अत्थि दाणिं हि मए सिविणअम्मि सअं गोलाणईए सहत्थकलिदतरङ्गचामरधवलकमलादवत्ताए परिचरिज्जन्तो अज्जउत्तो दिट्ठो † ।

त्रिजटा । तर्हि वर्धसे सुखस्वप्नः खल्वसौ ।

सीता । केरिसो मे रामेक्कचित्ताए सिविणअम्मि विस्सासो ‡ ।

त्रिजटा । तत् किं चिन्तास्वप्न इति संभावयसि । नहि । चिन्तास्वप्नोऽपि नैवमचुम्बितावगाही भवति ।

सीता । किं उण अचुम्बिदम् § ।

त्रिजटा । यन् न संभाव्यते ।

सीता ।

जं णहु संभावीअदि तंपि हला अत्थि अत्थ लोअम्मि ।
जं जीवइ जणअसुदा अपुलोअन्तीवि रामचन्दमुहम् ॥

ता किं इमिणा सिविणएण जीविदेण वा उवेक्खिदह्मि अज्जउत्तेण ‖ ।

रामः । शान्तं पापम् । अयि प्रिये हृदयस्थितापि मे कथमजानती वर्तसे हृदयवृत्तिम् ।

सीता । अथवा किंति हरमुउडमिअंके कलंङ्कमारोपयिस्सम् । जाणामि अज्जउत्तो अज्जवि अकलिदउत्तन्तो मे ¶ ।

रामः । प्रिये इदानीमुचितमनुसंदधासि ।

* कथं प्रियसखी मे त्रिजटा ।

† अस्तीदानीं हि मया स्वप्ने स्वयं गोदानद्या स्वहस्तकलिततरङ्गचामरधवलकमलातपत्रया परिचर्यमाण आर्यपुत्रो दृष्टः ।

‡ कीदृशो मे रामैकचित्तायाः स्वप्ने विश्वासः ।

§ किं पुनरचुम्बितम् ।

‖ यन् न खलु संभाव्यते तदपि हला अस्त्यत्र लोके ।
यत् जीवति जनकसुता अनालोकयन्त्यपि रामचन्द्रमुखम् ॥
तत् किमनेन स्वप्नेन जीवितेन वा उपेक्षितास्म्यार्यपुत्रेण ।

¶ अथवा किमिति हरमुकुटमृगाङ्के कलङ्कमारोपयिष्ये जानाम्यार्यपुत्रोऽद्याप्यकलितवृत्तान्तो मे ।

सीता । विमृश्य । कहं ।

वाआलेणवि कहिदा णाहं णाहस्स णेउररवेण ।
अहवा विहिविहुरबलात् तेणवि मूअत्तणं पत्तम् * ॥

नेपथ्ये । अये लङ्कानिवासिनः सावधानमवस्थीयतां नन्वितः ।

प्राकारमुच्चतमसीमबलो विलंघ्य
लङ्कामयं विशति कोऽपि कपिप्रवीरः † ।

उभे आकर्ण्य त्रासं नाटयतः ।

पुनर्नेपथ्ये ।

तत्सम्मुखं प्रचलति स्वयमक्षनामा
नन्वेष राक्षसपतेः कुपितः कुमारः ॥

सीता कहं उण सह महीअलेण वेवदि्व्व असोअवणम् ‡ ।

त्रिजटा । विमृश्य ।

तुहिनकरमयूखैर्दीप्तकन्दर्पदर्प-
स्तपनकुलवधूटीं त्वामयं मुक्तलज्जः ।
अयमयमनुनेतुं रामचन्द्रैकचित्ता-
मपि स विपिनवीथीमेति लङ्काधिनाथः ॥

सीता त्रासं नाटयति । ततः प्रविशति रावणः । सीता पराङ्मुखी तिष्ठति ।

रावणः । अयि जानकि ।

कन्दर्पज्वरवेदनापरिपतद्बाष्पस्रुतिक्षालितं
स्वर्गश्रीकुचकुम्भकुङ्कुमरजस्तेयापराधोज्ज्वलम् ।
एतत् त्वां सुरदन्तिदन्तशिखरोल्लेखाङ्कविख्यापित-
प्रस्फूर्जच्चतुरन्तविश्वविजयं वक्षस्थलं याचते ॥

सीता । अनाकर्णितकेन । अवि णाम पुणोवि रामचन्दमुहचन्दं पुलोवइस्सम् § ।

त्रिजटा । जानकि एवं प्रलापिनि लङ्केश्वरे कर्णावधानमपि तावत् देहि ।

रामः । साधु त्रिजटे प्रलाप इत्युक्तवत्यसि ।

रावणः ।

यन् संतुष्टवतः पुरा पुरभिदश्छन्दोत्सवच्छेदिनो
न क्रोधादममच्चवोद्धतशिरःश्रेणी नमन्त्यामपि ।
एतत् तद् दशमं शिरो मम नमस्त्वत्पादपाथोजयो-
र्व्याजं मिथिलेन्द्रपुत्रि भवतीं प्रेमातुरं याचते ॥

* कथम्
वाचालेनापि कथिता नाहं नाथस्य नेपुररवेण ।
अथवा विधिविधुरबलात्तेनापिमूकत्वं प्राप्तम् ॥

† प्राप्तो रुषारुणितदृक् कपिवीर उच्चैरिति वा पाठः ।

‡ कथं पुनः सह महीधरेण वेपत इवाशोकवनम् ।

§ अपि नाम पुनरपि रामचन्द्रमुखचन्द्रं विलोकयिष्ये ।

Digitized by Google

सीता । संस्कृतमाश्रित्य ।

निजे पाणी कृत्वा बकुललतिका † बालमुकुलं
ययोश्चक्रे गुञ्जन्मधुपमवतंसं रघुपतिः ।
अपीमौ कर्णौ मे वचनमिदमाकर्ण्य न कथं
विशीर्णौ युक्तं वा चरितमिदमन्तःकुटिलयोः ॥

रावणः । अयि जानक्यवलोकनमात्रेणापि तावन् मां संभावय ।

सीता । अपि निशाचरैतावत्प्रार्थनाभङ्गलाघवात् कथं राघवादपि न बिभेषि ।

रावणः । अये क एष राघवो नाम यं किल जनो राम इति जल्पति । विहस्य ।

कामः कियानसिलतानिहितैकबाहु-
क्रीडार्दितत्रिभुवनस्य दशाननस्य ।
रामस्तु केवलमयं सुमुखि त्वदर्थे
मां हन्ति हन्त न चिरान् निशितैः शरौघैः ॥

सीता । सत्यमेतत् ।

रावणः । स्वगतम् । कथमन्यदेव किमप्युक्तवानस्मि । तदेव विपरीतं पठित्वायि जानकि तावन् मां जीवय नयनामृतेन ।

सीता । तदा त्वामपि लङ्केश विलोकयिष्यति जानकी ।

रावणः । सप्रत्याशं तत् कथय समयं । अयं हि ।

मन्दोदरीमपि विमुञ्चति राज्यमेत-
दप्युन्मदं तव पदाब्जतले करोति ।
किं जल्पितेन बहुना सुमुखि त्वदर्थे
स्वान्युच्छिनत्त्यपि शिरांसि पुनर्दशास्यः ॥

सीता । अपि खद्योतभासापि समुन्मीलति पद्मिनी ।

रावणः । सक्रोधम् । आः पापे यावत् किल तपनखद्योतयोस्तावदेवान्तरं रामरावणयोः । तद् इयं हन्यस इति खड्गमुत्पाटयति ।

रामः ।

हा जानकि त्वमधुनासि कथं भवित्री

सविचिकित्सम् ।

धिग् दैवतं तव सुदारुण एष पाकः ।

सक्रोधम् ।

आः पाप राक्षसकुलाधम संवृतोऽसि

ससंभ्रमम् ।

हे वत्स लक्ष्मण धनुर्धनुरेष कालः ॥

लक्ष्मणः । आर्य किमिदमैन्द्रजालिकविलोकनादलीकमेव संभ्रम्यते ।

रावणः । अयि जानक्ययमसावुद्गीर्णकरालकरवालः कालभुजङ्गः । तदिदानीमपि दशकण्ठभुजाश्लेषभेषजमनुजानीहि ।

सीता ।

विरमविरम रक्षः किं मुधा जल्पितेन
स्पृशति नहि मदीयं कण्ठसीमानमन्यः ।
रघुपतिभुजदण्डादुत्पलश्यामकान्ते-
र्दशमुख भवदीयान् निष्कृपाद्वा कृपाणात् ॥

रावणः । किमतः परं कालक्षेपेण । तदहमिदानीमस्याः कण्ठरुधिरेण कालिकामर्चयामीति खड्गधारां परामृशति ।

रामः । अहह ।

विधिरकरुणः स्फीतंस्फीतं तमः परिजृम्भते
जलधिसलिले मग्नं विश्वं युगं परिवर्तते ।
कुवलयदलस्रक्संश्लेषोत्सवैकपदे पदं
यदयमदयः सीताकण्ठे करोति कृपाणकः ॥

पुनर्विभाव्य हन्त भोः ।

चान्द्रीं लेखां दशति दशनैर्दारुणः सैंहिकेयो
नव्यां वल्लीं दवदहनकश्चान्दनीं दन्दहीति ।
अप्युन्मत्तः कुवलयमयीं मालिकामालुनीते
मूलादुन्मूलयति नलिनीं दुष्टहस्ती करेण ॥

सीता ।

चन्द्रहास हर मे परितापं
रामचन्द्रविरहानलजातम् ।
त्वं हि कान्तिजितमौक्तिकचूर्णां
धारया वहसि शीतलमम्भः ॥

रावणः । कः कोऽत्र भोः । सत्वरं मम करे कपालपात्रमर्प्यतां येनास्याः कण्ठरुधिरं प्रतीच्छामीत्यशोकविटपान्तराले हस्तं प्रसार्य कथं न्यस्तमेव केनापि मम करतले कपालम् । विलोक्य सचमत्कारम् । अये न कपालमेतत् किन्त्वशस्त्रच्छिन्नं शिरएव कस्यापि । विमृश्य कस्य पुनरिदम् । नूनमक्षकुमारस्येति मूर्छितः पतति ।

त्रिजटा । अयि लङ्केश्वर समाश्वसिहिसमाश्वसिहि ।

रावणः । समाश्वस्य नूनमिदं तस्य दुष्टकपेर्विजृम्भितम् । तेन तमेव तावदग्रतः पातयामीति निष्क्रान्तः ।

रामलक्ष्मणौ । सहर्षमहो संविधानवैदग्ध्यो ।

त्रिजटा । सीतामालिङ्ग्य सखि पुण्येन जीवितासि ।

सीता । अपुण्णेणेति भणिज्ज * ।

त्रिजटा । कथमिव ।

सीता कहं उण तं अपुण्णं ण होइ जं किर रामचन्द-

---

† कमललतिकेति वा पाठः ।

* अपुण्येनेति भण ।

विरहतावणिव्वावणीए चन्दहासधाराए उवेक्खिदह्मि । ता किं इमिणा जीविदेण इह दारुसंचअम्मि अग्गिं पज्जालेहि जत्थ इमाइं अङ्गाइं सीअलअम्मि * ।

त्रिजटा । शान्तं पापं । नन्वचिरादेव निशाङ्कानाम् ।

हिमकरकिरणकरम्बितमरकतमयपीनपट्टकप्रतिमे ।
मलयजपरागरजसि रामोरसि तापमपहरसि ॥

सीता । हला किं इमिणा अलीअजप्पिदेण । सव्वं जेव्व अणलपवेसेण विवसिदह्मि ता उवणेहि मे अंगालखण्डअं † ।

रामः । हन्त भोः । कथमपि शार्दूलमुखान् मुक्तायाः पुनरपि शबरवागुरामवतीर्णायाः कुरङ्गवध्वा भङ्गीमङ्गीकृतवती जानकी ।

त्रिजटा । निर्गत्य प्रविश्य चासुलभानलोऽयं प्रदेशः ।

रामः । सहर्षम् । त्रिजटे दिष्ट्या रक्षितस्त्वया रामः ।

सीता । संस्कृतमाश्रित्याशोकं प्रति ।

अलमकरुणं चेतः ‡ श्रीमन्नशोकवनस्पते
दहनकणिकामेकां तावन् मम प्रकटीकुरु ।
ननु विरहिणां संतापाय स्फुटीकुरुते भवान्
नवकिसलयश्रेणीव्याजात् कृशानुशिखावलिम् ॥

विलोक्य सहर्षम् । हला पेक्खपेक्ख निवडिदं दाव इमस्स सिहरादो अङ्गालखण्डअं § । इत्युपसृत्य गृहीतुमिच्छति ।

रामः । अये कथमशोकोऽपि ममायं शोकतां गतः ।

लक्ष्मणः । आर्यानुपपन्नमिदं यत् किल तरुशिखरमङ्गारखण्डकमुद्गिरति ।

रामः । किं न संपादयेत् वत्स रामस्य विधिवैधुरी ।

सीता । अङ्गारखण्डं हस्तेनादत्ते ।

रामः ।

अनल नलिनकोमले करेऽस्याः
स्फुरदरुणोत्पलकुड्मलोपमः स्याः ।

विमृश्य ।

चरितमुचितमस्ति वा कुतस्ते
ननु भुवने विदितोऽसि कृष्णवर्त्मा ॥

सीता । हस्ते गृहीत्वा सविषादम् । कहं मह अपुण्णेण अग्गीवि सीअलो संवुत्तो । निपुणं निरूप्य सचमत्कारम् अये अङ्गालखण्डअं ण हु एदं अवि उण पम्मराअरअणखण्डअम् * ।

त्रिजटा । अये पुण्यवतामग्निरेव रत्नं भवतीति प्रवादः सत्य एव संवृत्तः ।

सीता । पुनर्विलोक्य । कहं सा इमा रअणमुद्दिआ † । पुनः संस्कृतमाश्रित्य मुद्रिकां प्रति ।

या शैशवावधि मनोरमरामचन्द्र-
हस्ताङ्गुलिप्रणयिनी सुभगा सुवृत्ता ।
अन्येव सा जनकराजसुता कथं नु
लङ्कामुपागतवती मणिमुद्रिकेयम् ॥

पुनः सादरं कराङ्गुलिकिसलयेन लालयन्ती । अये रअणङ्गुलीअ अवि दाव कुसलं सलक्खणाणं रामचंदचलणाणं ‡ ।

पटाक्षेपेण प्रविश्य हनूमान् कुशलं देवि कुशलम् ।

सीता । अमिअमुह कोसि तुमं § ।

हनूमान् ।

तारापतेरनुचरो रघुनन्दनस्य
दूतः सुतोऽस्मि मरुतः प्रथितो हनूमान् ।
त्वां हन्तुमुद्यतवतो दशकन्धरस्य
न्यस्तं करे निभृतमत्तशिरो मयैव ॥

रामः । अहो कथमिदं हनूमन्नामधेयस्य मद्बान्धवस्य विलसितमेतत् ।

लक्ष्मणः । अहो सचमत्कारता संविधानस्य ।

सीता । अयि भद्दमुह को उण इमो ताराबई ‖ ।

हनूमान् ।

यो वालिनः शौर्यनिधेरमित्रं
त्रैलोक्यबन्धोस्तपनस्य सूनुः ।
रामस्य पादाब्जतलाभिवर्ती
सुग्रीवनामा कपिचक्रवर्ती ॥

सीता । केण उण णरवाणराणं एरिसं सक्खित्तणं णिम्मिदम् ¶ ।

हनूमान् । रामबाणेनैव ।

वालिनि विसृजता धनुरङ्कं
नाकलोकललनाकुचकेलिः ।

---

* कथं पुनस्तत् अपुण्यं न भवति यत् किल रामचन्द्रविरहतापनिर्वापणया चन्द्रहासधारया उपेक्षितास्मि । तत् किमनेन जीवितेन इह दारुसंचयेऽग्निं प्रज्वालय यत्रेमान्यङ्गानि सीतलयामि ।

† हला किमनेनालीकजल्पितेन सर्वमेवानलप्रवेशेन व्यवसितास्मि । तदपनय मेऽङ्गारखण्डकम् ।

‡ कुरु सकरुणं चेत इति वा पाठः ।

§ हला पश्यपश्य निपतितं तावदस्य शिखरादङ्गारखण्डकम् ।

* कथं ममापुण्येनाग्निरपि शीतलः संवृत्तः । अयेऽङ्गारखण्डकं न खल्वेतत् अपि पुनः पद्मरागरत्नखण्डम् ।

† कथं सेयं रत्नमुद्रिका ।

‡ अये रत्नाङ्गुलीयक अपि तावत् कुशलं सलक्ष्मणयो रामचन्द्रचरणयोः ।

§ अमृतमुख कोऽसि त्वम् ।

‖ अयि भद्रमुख कः पुनरयं तारापतिः ।

¶ केन पुनर्नरवानराणामीदृशं सखित्वं निर्मितम् ।

Digitized by Google

तारया सममदीयत चास्मै
वानरेन्द्रपदवीमणिमौलिः ॥

सीता । कहेहि दाव अवि णाम मह मन्दभाइणीए किदे दुब्बलो दाणिं किंपि रहुणाहो * ।

हनूमान् । किमपीति किमुच्यते । इदानीं हि ।

बहुलपक्षशशीव दिनेदिने
रघुपतिः कृशतामुपयाति सः ।

सीता । हद्धिहद्धि † ।

हनूमान् ।

कुवलयप्रतिमद्युतिरस्य तु
प्रविकसत्यनुभाववशंवदा ॥

सीता । दाणीं किमपि उज्जीविदह्मि ‡ ।

हनूमान् । अयि देव्याकर्णय तावत् यत् संदिष्टं देवेन देव्याः ।

हिमांशुश्चण्डांशुर्नवजलधरो दावदहनः
सरिद्वीचीवातः कुपितफणिनिश्वासपवनः ।
नवा मल्ली भल्ली कुवलयवनं कुन्तगहनं
मम त्वद्विश्लेषात् सुमुखि विपरीतं जगदिदम् ॥

अपिच ।

कस्याख्याय व्यतिकरमिमं मुक्तदुःखो भवेयं
को जानीते निभृतमुभयोरावयोः स्नेहसारम् ।
जानात्येकं शशधरमुखि प्रेमतत्त्वं मनो मे
त्वामेवैतत् चिरमनुगतं तत् प्रिये किं करोमि ॥

सीता । लज्जते ।

त्रिजटा । सखि त्वमपि रघुपतेः किमपि सन्देशं प्रत्यभिज्ञानं च समर्पय ।

सीता । इमो मे पडिसन्देसो ।

बहलगलन्तणअणजलणिब्भरपज्जाउलावि मह दिट्ठी ।
तुह सुहअ वअणससहरलावण्णरसं पिपासेदि § ॥

चूडारत्नमाकृष्य हनूमतः करे समर्पयन्ती । अयि चूडारअण ।

विच्छालअ णिअमङ्कं रअणीअरदिट्ठिपंसुपंसुलिअम् ।
रहुवइपअणिम्मलणहरअणीअरजोह्णीरणिअरम्मि || ॥

* कथय तावत् अपि नाम मम मन्दभाग्यायाः कृते दुर्बल इदानीं किमपि रघुनाथः ।

† हा धिक् हा धिक् ।

‡ इदानीं किमपि उज्जीवितास्मि ।

§ अयं मे प्रतिसंदेशः ।

बहलगलन्नयनजलनिर्भरपर्याकुलापि मम दृष्टिः ।
तव सुभग वदनशशधरलावण्यरसं पिपासति ॥

|| अयि चूडारत्न ।

हनूमान् । देव्यनुजानीहि त्वरयति मां रामचन्द्रचरणदर्शनोत्कण्ठा ।

सीता । सबाष्पगद्गदम् । अय्यकारणसिणिद्ध पडिगदे तुह्मि पुणोवि को मह कहिस्सदि रहुणाहस्स पउत्तिम् * ।

हनूमान् । अयि देवि दिष्ट्या स्मारितोऽस्मि । नन्विदं ते संदिष्टं देवेन देव्याः ।

मा ताम्य तामरसपत्त्रविशालनेत्रे
विख्याप्यते पुनरपि त्वयि मत्प्रवृत्तिः ।
सौमित्त्रिकार्मुकगुणध्वनिभिर्गभीरै-
स्तैः किंच राक्षसवधूरुदितैरधीरैः ॥

नेपथ्ये ।

हत्वा कथं चिदपि राजकुमारमक्षं
रे वानरापसद कुत्र पलायितोऽसि ।
त्वां हन्तुमिच्छति दशाननशासनेन
दर्पोद्धतो धृतधनुर्ननु मेघनादः ॥

हनूमान् । देवि कृतकार्योऽस्मि तदलमतः परमात्मापलापेन । तदिदं प्रणम्यसे आपृच्छ्यसे च ।

सीता । अये पवणणंदण अणाआसेण इमं दुण्णिसाअरसाअरं अदिक्कमेहि † ।

हनूमान् । अयं मूर्ध्नि गृहीतो देव्याः प्रसाद इति निष्क्रान्तः ।

सीता । हला तिअडे खेअरी भविअ पेक्ख दाव इमस्स उत्तन्तम् ‡ ।

त्रिजटा । तथेति निष्क्रान्ता ।

नेपथ्ये ।

बाणौघानेकवीरः कलयति च रुषा मेघनादेन मुक्तान्

सर्वे हर्षं नाटयन्ति ।

नेपथ्ये ।

बद्धोऽयं राक्षसेन ज्वलदनलशिखादीप्तपुच्छः कृतश्च ।

सर्वे विषादं नाटयन्ति ।

पुनर्नेपथ्ये ।

क्रामन्नट्टालिकानामुपरि कृतपदो दन्दहीत्येष लङ्कां

सर्वे हर्षविषादौ नाटयन्ति ।

पुनर्नेपथ्ये ।

अपि क्षालय निजमङ्कं रजनिकरदृष्टिपांशुपांशुलितम् ।
रघुपतिपदनिर्मलनखरजनिकरज्योत्स्नोरनिकरे ॥

* अय्यकारणस्निग्ध प्रतिगते त्वयि पुनरपि को मम कथयिष्यति रघुनाथस्य प्रवृत्तिम् ।

† अये पवननन्दन अनायासेनेमं दुर्निशाचरसागरमतिक्रमस्व ।

‡ हला त्रिजटे खेचरी भूत्वा प्रेक्षस्व तावदस्य वृत्तान्तम् ।

आक्रान्तोऽयं पयोधेः पयसि शमयति स्वाङ्गलग्नं कृशानुम् ॥

सर्वे हर्षं नाटयन्ति ।

पुनर्नेपथ्ये । अहो आश्चर्यमाश्चर्यम् ।

वेलाद्रेरस्य हेलाक्रमणपरिणतस्तुङ्गमाक्रम्य शृङ्गं
मौलिं पूर्वाचलस्य द्युमणिरिव नभो लङ्घयत्यम्बुराशिम् ।
वेगप्रोद्भूतवातप्रतिहतसलिलोन्मुक्तगम्भीरगर्भ-
व्यक्तीभूतोरगेन्द्रस्तुतिशतविकसत्कीर्तिहारो हनूमान् ॥

सीता । नेपथ्याभिमुखमवलोक्य । हला तिअडे अवतिण्णासि महीअलं ता पिअंवदाए तुह आलिङ्गेमि अङ्गाइं * इति निष्क्रान्ता ।

रामः । प्रिये मामपि प्रतीक्षस्व ।

लक्ष्मणः । आर्य किमिदं लङ्कावृत्तान्तानुसारिणि विद्याधरप्रणीते महेन्द्रजाले पुनः संभ्रम्यते ।

रामः । तर्हि दिष्ट्यास्माभिर्निजविक्रमकथापराङ्मुखस्यापि हनूमतश्चरितरहस्यमाकलितम् ।

नेपथ्ये । अये रघुनाथ अयमसौ ।

दर्पोद्धुतं दधिमुखं तरसा निपीड्य
पीत्वा चिरं मधुवने स्वरसं मधूनि ।
द्रष्टुं समेति भवतः पदपद्मलीलां
नीलाङ्गदप्रभृतिभिः सहितो हनूमान् ॥

रामः । वत्साकर्णितं तदागच्छ कृतकार्यं हनूमन्तं प्रत्युद्गच्छाव-इति निष्क्रान्ताः सर्वे ॥

॥ षष्ठोऽङ्कः ॥

* हला त्रिजटे अवतीर्णासि महीतलं तत् प्रियंवदायास्तवालिङ्गयाम्यङ्गानि ।

॥ श्रीः ॥

॥ अथ नरेश्वरपरीक्षोपसंहारः ॥

तदेवं सकलश्रुतिप्रमेयपरिबृंहितशैवसिद्धान्तनिरूपणपरो निखिलविद्वज्जनमानसाह्लादैकजनको नरेश्वरपरीक्षाभिधो ग्रन्थः प्रयोजनानुकूलपरिमितार्थप्रकाशिकया प्रकाशाभिधानया सद्व्याख्यया संवलितः पुस्तकान्तरालाभादूरीकृतैतदादर्शवर्तिपाठेन मया परमकारुणिकपरमेश्वरप्रसादादेव मुद्रणविधया परिसमाप्तिं नीतः । मुद्रणावसर एव चाधिवङ्गदेशीयात्तरमेकमादर्शान्तरं वामनशास्त्रिप्रयत्नवशादुपलब्धम्, परंतु तदपि सर्वथा पूर्वोपलब्धादर्शमूलभूतादर्शत एवावतारितमवधारितमिति तदवाप्यापि न मदीया मनस्तुष्टिरासीदिति न प्रायस्तदनुरोधोऽकारि मयेति ।

अथैतत्पुस्तकपाठान् सातिशयमनुरुन्धता मया, कदाचित् पुस्तकान्तरं प्राप्यायमेव पाठः पुस्तकस्थोऽयं च बलात् प्रकल्पित इति कश्चिन्मा वादीत्, इति भिया यथापुस्तकपाठस्थित्यैव प्रायः पाठाः स्थापिता न पुनरुपकल्पिता इति ।

अत्र च काण्डत्रयात्मके शैवसंदर्भे, प्रथमे काण्डे मूलभूतकारिकाः सार्धचतुःसप्ततिमिताः, द्वितीये काण्डे सार्धकत्रिंशन्मिताः, तृतीये तु सार्धैकाशीतिशतं कारिकाणामिति, यद्यपि तृतीये काण्डे मूलभूतकारिकातः प्राक्स्थापितानामङ्कानां संकलनया संख्याद्वयन्यूनता भवति, तथापि कुतश्चित् कारणाद्विंशतितमे काशीविद्यासुधानिधेः पत्रपुञ्जे त्रिपञ्चाशत्तममूलकारिकातोऽनन्तरम्, "संदिग्धं प्रत्यभिज्ञानम्,, इत्याद्येका कारिका, तथैकविंशतितमे पत्रपुञ्जे द्विषष्टितममूलकारिकातः पश्चात् "एतत् प्रतिषिध्यते,, इत्यवतरणानन्तरम्, "कोटिशो मरणं दृष्ट्वा,, इत्याद्येका च निरङ्कैव जाता, तत्संकलनया चोक्तचरसंख्याका एव तृतीयेऽपि भवन्तीति ।

अथ चेदं कठिनमपि शैवदर्शनमनेककार्यव्यासक्तचेतस्कतया प्रचुरावसरमलभमानेन मया टिप्पण्यादिना न व्याख्यायि, समयसहस्ररश्मिनिपीतस्यैतस्य शैवसिद्धान्तसुधाकरस्य द्वित्रादर्शकलावशेषस्य प्रकाशयिष्यमाणाभिर्बह्वादर्शकलाभिः पूरयितव्यत्वस्यैवमत्तात्पर्यविषयत्वात्, मूले रचिते शाखादिकं सुरचितं भवतीत्यनन्तरमपि व्याख्यातुं शक्यत्वात् ।

अथातः परं सर्वजनमनोमोदनं चमत्कृतिसुधामयं संदर्भं लब्धावसरे काशीविद्यासुधानिधौ मुद्रयिष्य इति गुणैकपक्षपातिभिः सुधीभिराकलनीयमिति शिवम् ॥

॥ सांख्यशास्त्रप्रधानाध्यापको वेचनरामशर्मा ॥

THE SA'HITYA-DARPANA,

OR

MIRROR OF COMPOSITION.

(Continued from page 234.)

TEXT.

No. 757. The Commixture again is, when of two or more ornaments united, (1) one is principal and the others are subordinate to it, * or (2) when they reside in the same place, or (3) when there is a dubiousness about them,—being *thus* threefold.

COMMENTARY.

a The case of the Principal and Subordinate Ornaments; as—

* The *Kávya-prakáśa*, with much greater convenience, holds this variety to consist in the *mutual* subserving of ornaments. Our author's illustrations imply that one of the ornaments, in such cases, is ultimately the principal, the others being subordinate thereto.

"Under the form, methinks, of that mantling silk-white slough that had slipped, through the force of pulling, from the body of the royal Serpent (Vásuki, employed as the string), long did love-quick Mandákiní cling to his feet* (in kneading them), as if to remove the pain that Ocean had suffered in the churning."

Here, the nature of Mandákiní (the celestial Ganges) is superimposed upon the slough, the real nature whereof is denied: so we have the Concealment (§683). This is subordinate to Paronomasia or Coalescence (see § 643), inasmuch as it gives rise to, *or implies*, the verbal identification of the actual fact of Mandákiní's† clinging to a portion of the *personified* ocean, with clinging to its feet (by means of the pun in the word *páda* which means 'part' as well as 'foot'). The Paronomasia is subordinate to the Hyperbole (§693), consisting in the said identification. The Hyperbole is subordinate to the Poetical Fancy (§686), contained in the clause—'as if to remove the pain that Ocean had suffered in the churning.' The Poetical Fancy is subservient to the Modal Metaphor (§703), inasmuch as it implies Ocean and Mandákiní behaving *respectively* like a male and a female personage.

b. Or for example:—

"Fair Evening glows (with passion or redness—*anurága*) and Day is *ever* before her, still,—O wonderful is the decree of fate—they are never united."

Here the Modal Metaphor is subordinate to the Peculiar Allegation (see §717).

c. The Commixture of Dubiousness ; as—

"Lo!‡ the Lunar Orb shines in the air, dispersing the outspreading gloom, causing exquisite joy to the eyes."

Here, it is dubious whether there is a Hyperbole in the shape of the introsusception of a fair face into the moon ; or a Metaphor consisting in the superimposition of the nature of the moon *upon a face* intimated by *the pronoun* 'this ;' or an Equal Pairing (§695), a face (intimated by 'this') and the lunar orb being both subjects of discourse and associated with the same attribute of destroying (internal or external) gloom &c. ; or an Illuminator (696§), the moon not being in question ; or a Modal Metaphor (§703), the face being not in question and understood from a sameness of attribute ; or an Indirect Description (§706), the face being in question, and understood through the description of the moon which is not in question ; or a Periphrasis (§708), the time (night) that excites love being meant to be described through the description of the moon, *the rise of* which is the effect thereof. Thus there being a doubtful possibility of each of these several ornaments, we have here the Commixture of Dubiousness.

d. Or, to take another example (*—if our dubious fancies with respect to the former one seem too far-fetched—*) in the sentence "I see the moon-face," it is doubtful whether there is a Simile, it being meant that the face is LIKE the moon ; or a Metaphor, the meaning being that it IS the moon.

e. When however there is a reason for one of the ornaments, and another, against the others, or one only of such two reasons, there the doubt does not exist. For example, in *the sentence* "He kisses the moon-face," kissing being consistent with a face and inconsistent with the moon, it is a reason for our recognizing a Simile here, and against our admitting a Metaphor. In the example "The moon-face shines," the attribute of shiningness is a reason for the Metaphor, but being tropically possible in a face, it is not against the Simile. In the sentence "Lakshmí (Prosperity), O royal Náráyana, embraces thee firmly," a woman's embrace of one LIKE her lord being improper, the embrace of a king, *as such*, by Lakshmí is impossible and so thwarts a Simile, but the embrace of Náráyaṇa (her lord) being possible, there is a Metaphor: *that is to say, the king is not* LIKENED *to Náráyaṇa but* IDENTIFIED *with him.* Similarly in 'The lotus-face of the fawn-eyed lady shines with tremulous eyes,' the eye, which is possible (only) in a face, indicates a Simile and thwarts a Metaphor, being impossible in a lotus. So in such a phrase as सुन्दरं वदनाम्बुजं (the beautiful lotus-face) where the common attribute (*viz.* beauty) is mentioned, since the compound वदनाम्बुजं (lotus-face) cannot imply a similitude, according to the grammatical rule उपमितं व्याघ्रादिभिः सामान्याप्रयोगे, *Paṇini* II, 1, 56, S. K. p. 356, (A word denoting an object compared is compounded with *vyághra &c.*, when the common attribute is not mentioned), the Simile is debarred, and consequently the compound implies a Metaphor, as belonging to that class which begins with the word *mayúra-vyaṅsaka* (*Pán* II, 1, 72, S. K. p. 366).

f. The *case of the* Residence of Ornaments in the Same Place, or the Identical Position, is exemplified in the following stanza of mine:—

कटाक्षेणापीषत् क्षणमपि निरीक्षेत यदि सा
तदानन्दः सान्द्रः स्फुरति पिहिताशेषविषयः ।
सरोमाञ्चोदञ्चत्कुचकलशनिर्भिन्नवसनः
परीरम्भारम्भः क इव भविताम्भोरुहदृशः ॥

(If even for a moment she glances at me with the corner of her eye, ecstatic joy bursts forth in my heart and shuts out *the consciousness of* all external objects. What raptures then would flow from the embrace of her of the lotus-eyes, while the vesture falls off from those swelling breasts that quiver *with joy.*)

* Or—with reference to the actual fact—*to a part* of the ocean, which the word पादमूल also means, according to the Commentator.

† Or, rather, the slough's, feigned as such.

‡ *Literally* 'this' (idam.)

Digitized by Google

Here the Chhekánuprása contained in कटाक्षेणापीक्षणमपि, and the Vṛittyanuprása, consisting in the compound letters क्ष (k-sh) occurring twice in this phrase and once in निरीक्षेत, have an identical position. So also there is in this very example the identical position of Alliteration and Necessary Conclusion (§737). Or, for instance, in the phrase संसारध्वान्तविध्वंस &c. (§756.*a.*), there is the identical position of Metaphor and Alliteration. Or, for instance in कुरवका रवकारणतां ययुः, रवका रवका form one Rhyme (§640), and वकार वकार another; so there is the identical position of two Rhymes.

g. Or for example:—

"Festively do the peacocks with out-stretched necks dance in these days, noisy with the roar of fresh clouds, and gloomy like the traveller's heart (or with travellers for spectators—पहिअ-सामाइएसु)"

Here, in the same position, *viz.*, the word पहिअ-सामाइएसु, there are the Simile पथिक-श्यामायितेषु (gloomy like the traveller), and the Metaphor पथिक-सामाजिकेषु (with travellers for spectators).*

Here ends the tenth chapter
of the
MIRROR OF COMPOSITION.

TO THE EDITOR OF THE PANDIT.

SIR,

Max Müller in his "Chips" says the Western coast of India was inhabited by the *barbaras,* or the savage aborigines, with woolly hair. Barbar in Sanscrit means a blockhead and fool. I am not sure what is the origin of the Greek word *barbaros;* is it not derived from Barbary, and does it not prove that the coast as well as Greece had an intercourse with that part of Africa? Webster says "the Greeks used the iterated syllables *barbar* to denote that a man was unintelligible in his talk;" now in Hindí we still use the verb *barbaráná* for chattering nonsense; but is not even this meaning attached to the word on account of the unintelligible (to the Greeks) talk of the inhabitants of Barbary? There are good grounds to believe that the whole Indian Peninsula was, at one time, colonized by the Egyptians, and that the doctrines of Buddhism came from that country. The Áryans did not shave their faces as the Persians (Aryans of Persia) did not; but the Buddhists shaved as the Egyptians did. Belief in transmigration of the soul and respect for animal life were common to both. Moreover Barbary under the name of *Babbar* which is the Prákrit form of writing *Barbar* is mentioned in the Jain book, Śrípál Charitra quoted below: "भोभो जइ जल इंधण पमुहेहिं किंपि अत्थि तुम्हाणं। कज्जं ता कहह फुडं बब्बरकूलं समणुपत्तं ॥ ३० ॥" (meaning in sanscrit) भो भो लोका यदि युष्माकं जलेन्धनप्रमुखैः किमपि कार्यमस्ति तत् तर्हि स्फुटं प्रकटं यूयं कथयत यतो बब्बरकूलं समनुप्राप्तं बब्बरकूलाख्यं बिंदरम् सम्प्राप्तमस्तीत्यर्थः ॥ ३० ॥ Again in the 8th adhyáya of the 9th skandha of the Bhágavat *Barbar* is thus mentioned, with some other similar countries सगरश्चक्रवर्त्यासीत् सागरो यत्सुतैः कृतः। यस्तालजंघान् यवनान् शकान् हैहयबर्बरान् ॥ ५ ॥ अवधीद्गुरुवाक्येन चक्रे विकृतवेषिणः।

BENARES: 18*th March*, 1868. } ŚIVAPRASÁD.

---

* The Commentator rightly considers the above example as an instance of the Commixture of Dubiousness, not of the Commixture of the Identical Position, inasmuch as the Prákṛit expression पहिअ-सामाइएसु does not admit of the two interpretations simultaneously or positively, but alternatively or dubiously. He, evidently reading पओअरसितेषु instead of —सीतेषु, and महइ instead of सोहइ, renders the couplet into Sanskrit thus:—

अभिनवपयोदरसितेषु पथिकश्यामायितेषु (or पथिकसामाजिकेषु) दिवसेषु।
महति (उत्सवायते) प्रसारितग्रीवाणां नृत्यं मयूरवृन्दानाम् ॥

The term सामाजिक, applied to the travellers, implies a Metaphor, inasmuch as it properly means one of an audience at some *regular* festivity, such as a dramatic entertainment. The peacock's dance is no festivity in the proper sense of the word,—none, at all events, to the separated lover, to whom every merry sight is a source of pain.

It would not be uninteresting to illustrate some of these mixed ornaments by an English example.

"Ye ice-falls! ye that from the mountain's brow
Adown enormous ravines slope amain—
Torrents, methinks, that heard a mighty voice,
And stopped at once amidst their maddest plunge!
Motionless torrents! silent cataracts!"—*Coleridge.*

In the 3rd and 4th lines, there is a Modal Metaphor (§ 703), subserved by a Poetical Fancy (§ 686). In the last line, there is the Commixture, called Identical Position, of a Hyperbole (§ 697) and a Contradiction (§ 718). If we may look upon these five lines as forming one distinct piece of poetry, there is here a Conjuncton (§ 756) of these two Commixtures.

THE PANDITS AND THEIR MANNER OF TEACHING.

BY DR. BALLANTYNE.

[From the Benares Magazine, March 1850.]

(Continued from p. 210 of Vol. II.)

Let us now accompany, through some part of his course, our desultory student who is entering upon the study of the Hindú system of Poetical Criticism.

Among the Sanskrit texts printed at Calcutta under the authority of the General Committee of Public Instruction, there are two works the titles of which are given in English as follows:—

"*Kávya prakása;* a treatise on Poetry and Rhetoric by MAMMATA ÁCHÁRYA. (1829)."

Sáhitya Derpana; a treatise on Rhetorical Composition by VIŚWANÁTHA KAVIRÁJA. (1828)."

Before reading either of these our student will have gone through the *Kuvalayánanda*—fortunate if, instead of a half-decypherable manuscript, he shall have been able to get a copy of the nicely lithographed Poonah edition. The *Kávya prakáśa*—the "Illustration of Poetry"—consists of a number of metrical rules (*káriká*) interpersed with comments and

Digitized by Google

illustrative examples. The rules are founded on the Aphorisms of VÁMANA, who owed his knowledge of the subject to the divine sage BHARATA. The *Sáhitya Derpaṇa* also has memorial verses as its text; and the rules are frequently illustrated by the same examples as those employed in the earlier work. Both works are held in high esteem; but that of VIŚWANÁTHA—the more recent and the more copious of the two—is generally admitted as the standard of taste among the learned Hindús. We propose to consider its arrangement—to dip into it here and there—and to note the more salient points of agreement and of disagreement in opinion between the author and European writers on kindred topics.

The term Rhetoric, as employed to denote the subject of the treatise in question, is liable—according to our view of the division and denomination of the sciences—to an objection the converse of that to which we hold the term Logic liable when employed to denote the all-embracing sphere of the Nyáya philosophy. In the *Sáhitya* we have but a part, and the least important part of what, according to Aristotle,* belongs to Rhetoric. In order to attain its specific end of convincing or persuading—between which we agree with Mr. Smart in thinking that there is more of a distinction than a difference†—Rhetoric does not hesitate to avail itself of the graces of language which gratify the taste; but the *Sáhitya* confines itself to these exclusively;—"taste" (*rasa*) being here all in all. The difference between the political history of India and that of Greece or Rome so obviously suggests the reason why eloquence, in the two cases, proposed to itself ends thus different, that it would be idle to do more than allude to it in passing.

Of the etymology of the term *Sáhitya* two explanations are offered. According to the one, it is derived from *hita* 'benefit' and *saha* 'with,' because a knowledge of it is beneficial in all departments of literature. The other, with less appearance of reason, explains it as denoting the sum total of the various sections of which the system itself is made up.

The printed volume of the *Sáhitya Derpaṇa* the "Mirror of Composition"—is an octavo of between three and four hundred pages. The work is divided into ten sections—of lengths varying from eight or nine pages to eighty or ninety. The first section is introductory. The second treats of the various powers of a word. The third treats of taste. The fourth treats of the divisions of poetry. The fifth discusses more fully one of the powers of a word adverted to in section second. The sixth takes particular cognizance of the division of poetry into 'that which is to be seen,' and 'that which is to be heard.' The seventh treats of blemishes. The eighth treats of style. The ninth treats of the varieties of composition resulting from the blending of styles, and the predominance of one or other of them. The tenth and last treats of embellishment. To the subject of this tenth section the *Kuvalayánanda* of APYAYYA DÍKSHITA, with which the student usually commences, confines itself.

According to established custom the *Sáhitya Derpaṇa* commences with an invocation. "At the opening of his work (says the author—officiating as his own commentator)—desiring that he may complete without obstruction what he is about to commence, he thus propitiates the Goddess of Speech—seeing that everything that is made up of words lies within her jurisdiction."—

"May that Goddess of Language, whose light is fair as that of the autumnal moon, having removed the over-spreading darkness, render all things clear in my mind!"

He then proceeds to say that as his work is ancillary to poetry, its fruits can be no other than those which poetry bestows. These are declared to consist in the attainment of the four great objects of human desire—viz. Merit, Wealth, Enjoyment, and Salvation—which, "by means of poetry alone, can be obtained pleasantly even by persons of slender capacity." Salvation, it is to be remembered, or liberation from the liability to being born again, is the reward held out to its followers by each of the various systems of Hindú doctrine. Even the Grammarians claim for their own art (—more than was claimed for the kindred Grammarye of the Dark Ages)—the power of leading the soul to bliss*; and it is scarcely to be wondered at that the poets should contend that the goal might be gained, as surely as by any of the more rugged routes, and much more pleasantly, by the "primrose path" of Poesy. Poetry is to conduce to this by setting before its votary such examples for imitation as that of Ráma, and for avoidance as that of Rávaṇa, and so training him up to virtue. After showing how all the four great objects sought after by the wise have been at various times obtained through conversancy with poetry, our author gravely disposes of the objection that the study of the Vedas renders the study of poetry superfluous, by asking where is the wisdom of seeking to remove by means of bitter drugs an ailment that can be cured with sugar-candy.

Having established the importance of Poetry, he proceeds to determine what it is that poetry consists in; and here he demurs to the opinion of the author of the *Kávya Prakáśa* who says that the designation may be sometimes applied "where there is elegance of expression, even though ornament be awanting"—provided "the words and the sense are faultless." But, our author contends, if faultlessness in the words and in the sense be a necessary part of the definition, then the following verses from BHAVABHÚTI's drama, the *Víra-charitra*, would not be poetry:—

---

* The main consideration being that of Arguments—τὰ δ' ἄλλα προσθῆκαι—"but the rest mere out-work." *Rhet. B. I. c.* 1.

† "That common situation in life, *Video meliora proboque, deteriora sequor*, proves indeed that there are degrees of conviction which yield to persuasion, as there are other degrees which no persuasion can subdue: yet perhaps we shall hereafter be able to show that such junctures do but exhibit one set of motives outweighing another, and that the application of the term persuasion to the one set, and of conviction to the other, is in many cases arbitrary, rather than dictated by a correspondent difference in the things." *Sematalogy*—*p.* 175.

* According to the Grammarians—"A single word, perfectly understood, and properly employed, is, alike in heaven and on earth, the *Kámadhuk*"—the marvellous cow from which you may "milk out whatever you desire"—including, of course, final emancipation if you wish it.

Digitized by Google

(*Rávaṇa* loquitur)———— " Foul scorn to me
That any one should dare to be my foe—
And now forsooth this *anchoret* defies me—
This slaughterer of the race of Rakshasas !
Ha !—can it be—doth Rávaṇa yet live ?
Fie, fie, my son—thou conqueror of Indra—
What boots it now, that Kumbhakarna * wakes,
Or that these brawny arms of mine in vain
Have swoln with pride when they have borne away
The spoils of Swerga ?"

Now these verses are chargeable with the fault (—to be discussed in section seventh—) of obscuring the predicate by wrapping it up in a long compound epithet applied to the subject :—for the subject of which the speaker here intends to say something is his brawny arms—and what he intends to say of his arms is this, that, so far as regards gaining the day against Ráma, their previous feats of strength, in the war with Indra, have been in vain :—and all this is made up into an epithet applied to the arms. According to the definition, then, this is not a case of poetry :—and yet, on the other hand, it is a case of the highest kind of poetry, if you go by the determination of the same authority, that the highest kind of poetry is that where the mind of the utterer is revealed not by the literal sense of the terms but by their suggestiveness ;—for the speaker here, for example, does not really entertain any doubt of his being himself alive—whilst his making a question of it suggests in a lively manner his astonishment :—nor is he speaking of a literal anchoret when he contemptuously indicates by that term the hero Ráma who had been dwelling in banishment in the forest. Hence the definition that we have been testing is too exclusive—seeing it excludes what it is agreed on all hands ought not to be excluded.

Our author next rejects an offered compromise between the two definitions which he holds to be inconsistent.

"But, it may be said,—'There is only a portion faulty here, and not the whole.' If you say this, then the part in which there is a fault furnishes a reason why it is not a case of poetry ; and the part where there is suggestiveness furnishes a reason why it is a case of first-rate poetry :—and so, being pulled both ways by the two parts, it will be neither poetry nor not poetry." '

He adds :—

"Nor do such blemishes as unmelodiousness and the like mar only a part of a poem but the whole (if any part of it—) that is to say—when there is no damage to the flavour (*rasa*—which is the soul of poetry—or that in virtue of which alone poetry is poetry), then it is not conceded that these (viz. unmelodiousness and the other blemishes) are faults at all—as a great authority† declares,—when he says 'And the blemishes, such as unmelodiousness &c. which have been exhibited, are not always blemishes ;—they have been instanced as what must be invariably shunned in erotic poetry only.' Moreover if it were as you would seem to say, (that a blemish is always a blemish), then cases of poetry would be very rare, or rather none—for it is quite impossible that there should be faultlessness in every respect."

So determined is our author to allow of no compromise that he goes on to say :—

"If you contend that the word 'no' (is employed in the sense of 'little') then let us grant [for the sake of argument with the author of the *Kávya Prakáśa*, that poetry is there—not where we have *no* fault, but] that poetry is there where the faults, in sound or sense, are *slight*, —and it will follow that where there is no fault at all, there is no poetry."

And not only this—but—

"Granting that there may be poetry where the faults, in sound or sense, are slight,—this is not to be mentioned in the *definition* of poetry ; just as in the definition of such a thing as a jewel, we omit such a circumstance as its being perforated by insects—(that circumstance not being what constitutes anything a jewel, though it may not cause it to cease to be regarded as such—) for certainly the boring of insects, and such like accidents, cannot deprive the jewel of its nature as a jewel, but can only affect its degree of value. In like manner here also unmelodiousness &c. affect that of poetry.

The rest of this unlucky definition finds as little mercy at the hands of our author as that portion of it of which we have followed the dissection. Here, however, let us leave our native student to force his way through the argument unattended by ourselves—the conduct of the argument being, as regards the student, all the thornier in so far as it turns upon the application of a variety of terms the explanation of which he will not meet with for a long time afterwards—the first half of the work, like many others in Sanskrit, requiring to be read by the light of the second. But there are illustrative snatches of poetry interspersed throughout the argument—so let us try if we can gather some of these flowers without "snapping" them in bits like Cowper's rose. The following, according to the author of the *Kávya Prakáśa*, is a case of poetry without anything in the shape of embellishment—the lady simply stating how she comes to be melancholy.

" Tis true thou art beside me, dear*
Companion of my youth ;
The autumn moon shines mild and clear,
The gale smells sweet in sooth—
All is as once when you and I,
On Reva's bank so fair,
Made love beneath the trees:—I sigh—
Just—that we are not *there*."

The author of the *Sáhitya Derpaṇa* demurs to the assertion that this is unembellished,—and contends that as one of the embellishments of poetry, specially recognised in the tenth section, is the exhibition of "effects devoid of causes" —the mention of the melancholy of the lady, with her beloved beside her in the moonlight, is a glaringly poetical embellishment.

The next example is written in one of the rude dialects termed *Prákrita*. Our author cites it as an example of "suggestiveness"—where the suggestiveness might seem to have reference, not as in one class of instances, to the words, nor as in anther class to the sentiment, but only the matter, *(vastu—πράγμα)*—in which case, he contends, it would not be entitled to the designation of poetry. The

* Kumbhakarna, the gigantic brother of the titanic Rávana,—named from the size of his ears which could contain a *kumbha* or large water-jar—had such an appetite that he used to consume six months' provisions in a single day. Brahmá, to relieve the alarm of the world, which had begun to entertain serious apprehensions of being eaten up, decreed that the giant should sleep for six months at a time and wake for only one day, during which he might consume his six months' allowance without trespassing unduly on the reproductive capabilities of the earth. When Ráma invaded the capital of Rávaṇa, the titans, requiring all their forces, employed the most violent measures—and eventually with success —to awake the sleeping giant ; causing elephants to trample upon him, and assailing his ears with the noise of gongs—and even, according to a more recent authority, disturbing him with cannon.

† Always cited as the "author of the *Dhwani*."

* The same verses have been rendered, under an apparent misconception of their drift, as a

" *Lament of the Disconsolate.*

Ah—where is he who stole my virgin heart ?
Again the autumn moon shines on my bower,
And full-blown Málatís their sweets impart
To the bold breeze that shakes the Kadamb-flower.

I am the same to whom his troth he gave
When autumn's moon, as now, so sweetly shone
On our secluded bower by Reva's wave—
Yet not the same—I pine for pleasure gone."

Digitized by Google

verses (which we omit here) suggest an assignation whilst seeming to forbid intrusion. The example, our author holds, while it has, "suggestiveness" is entitled to be called poetry in virtue of the consideration that what it suggests is a *semblance* (*ábhása*) of the genuine sentiment (*rasa*) of love, which can be genuine only where it is legitimate—semblances and realities being all alike as regards the category of taste. If—he contends—it be, as you allege, that there is poetry here because—apart from any consideration of sentiment—more is implied than meets the ear; then the sentence, "Devadatta goes to the village" must be poetry—because Devadatta (being a gentleman) is understood of course to take his servants along with him, although the circumstance is not explicitly set forth. And he adds, determinedly,—"if you say *be it so* [that the sentence 'Devadatta goes to the village,' *is* poetry because it implies more than meets the ear]—then I say, *No*—for I can consent to give the name of poetry to that only which has some flavour (*rasa*) in it."

It is worth noticing here that the notion of reckoning *metre* among the circumstances that constitute poetry is not even hinted at by our critic. He denies that there is poetry in the assertion, "Devadatta goes to the village," simply because the assertion raises no emotion through anything that it is calculated to suggest. The fact that the learned of India are accustomed to put into verse almost all their driest treatises—on law, physic, divinity, &c.—affords a ready enough explanation why the accident of metre should not be mistaken by them for the essence of poetry. Their test of poetry, (under which title, as we shall see, they reckon "poetry in prose"—*gadya-kávya*), coincides pretty closely, we shall find, with that specified by Whately when he says (Rhet. p. 344,) —"The true test is easily applied: that which to competent judges affords the appropriate *pleasure* of poetry, is "*good* poetry, whether it answer any other purpose or not: "that which does *not* afford this pleasure, however instructive it may be, is not good *Poetry*, though it may be a valuable *work*." The Archbishop, indeed, goes on to say, "Notwithstanding all that has been advanced by some French "critics, to prove that a work, not in metre, may be a Poem, "(which doctrine was partly derived from a misinterpretation of a passage in Aristotle's Poetics), universal opinion "has always given a contrary decision. Any composition in "*verse*, (and none that is not,) is always called, whether good "or bad, a Poem, by all who have no favourite hypothesis to "maintain." Now for our own part, we should have little objection, at times, to a hypothesis which so conveniently enables us to escape debating the question whether such a work as Macpherson's "Ossian" is poetry;—but really, if you wish to *astonish* a pandit, you have only to ask him gravely whether, for example, that terse *metrical* composition, the Nyáya compendium entitled the *Bháshá-parichchheda*, is a *poem*. If, in holding it to be as far removed as anything well can be from poetry, he goes on a "favourite hypothesis," it is because the notion of an opposite hypothesis probably never occurred to him.

Our author, having demolished to his satisfaction the definitions of his predecessors, proceeds to give his own;—and he declares—with a brevity for which he atones by the copiousness of his subsequent explanations, that "A speech whereof the soul is flavour, is Poetry."* He adds—

"We shall discuss the nature of 'flavour' (*rasa*) afterwards—[in Section 3rd]. Flavour alone is the soul of it [Poetry]—being, in the most intimate way, the supporter of its very *life*—for without that [flavour] we do not allow that the case is one of poetry at all.
The words *rasa* 'flavour' is regularly formed from the passive voice of the verb *ras* 'to relish.' In it—[i. e. in the word *rasa*, on which the definition of poetry hinges]—are implied also 'veneration' (*bháva*), and the 'semblance' (*ábhása*) of flavour."

He next illustrates these three implied senses by examples—and first he examplifies flavour (or sentiment) by a case of the 'erotic'—(*śṛingára-rasa*)—which we omit "by particular desire."

As an example of poetry where the sentiment of love, being directed towards the Deity, takes the name of 'Veneration' (*bháva*), he gives the following synopsis of the ten incarnations of Vishnu—viz. (1) the fish (2) the tortoise, (3) the boar, (4) the man-lion, (5) the dwarf, (6) Paraśuráma, (7) Ráma, (8) Krishna, (9) Buddha, and (10) the deliverer yet expected by the Hindoos.

Lastly, as an example of the 'semblance' (*ábhása*) of sentiment—there being but the semblance of human sentiment in the feelings of the lower animals, he cites the following:—

"Within a single floweret's bell apart
The bee sipped honey with his loving spouse:—
Soothed by the fondling horn of her loved hart,
With eyes half-closed, the hind forgot to browse."

But it may be asked—if blemishes, as before asserted, do not annihilate poetry, have they no effect in regard to it at all? To this our author replies that "blemishes lower its character"—and what are to be reckoned blemishes he will state further on, as well as what are the beauties which elevate its character. Here ends the first section of the *Sáhitya Derpaṇa*—and here we may break off for the present.

THE MESSENGER CLOUD:

(Continued from page 207.)

LVIII

There, by the mountain clasped in loving arms,
Alaka, City of the Blessed, lies.
Her bright feet bathed by Ganga's flood, she charms
With marvellous beauty e'en immortal eyes.
Thou too, free rover, shalt her beauty prize,
And often wander to mine own dear town.
Nor shall sweet Alaka thy love despise,
But proudly wear upon her domes a crown
Of the pure drops of pearl thou pourest softly down.

* *Vákyam rasátmakaṅ kávyam.*

"He o'er whose scaly neck the ocean rolled;
Who bore upon his back the world of old;
Who raised upon his tusk the earth, and tore
With lion's claws the demon-chief of yore;
Who traversed, in three steps, heaven earth and hell:
Before whose wrath the Kshattra armies fell;
Whose arrow pierced the ten-faced Titan-king,
Fiend-slayer:—kind to every living thing;
He at whose advent the unjust shall quail—
Whate'er his name—to Him all hail!"

Digitized by Google

LIX

And she has charms which nought but thine excells :
High as thyself her airy turrets soar,
And from her gilded palaces there swells
The voice of drums, loud as thy thunder's roar:
Thy pearls are mocked by many a jewelled floor.
Come, with the glories of thy bow compare
The varied tints on arch and corridor—
And, for thy lightning in the midnight air,
Look in her maiden's eyes and own a rival there.

LX

Unmatched is she for lovely girls who learn
To choose the flowers that suit them best, and bring
The varied treasures of each month in turn
To aid those charms which need no heightening—
The Amaranth, bright glory of the spring ;
The Lotus, gathered from the summer flood ;
Acacias, taught around their brows to cling ;
The Jasmine's fragrant white, their locks to stud :
And, bursting at thy rain, the young Kadamba bud.

LXI

O beauties, worthy of that beauteous place,
That sweetest city which I know so well,
Where mine own brethren of etherial race
Blest with the love of those fair angels dwell
In homes too beautiful for tongue to tell.
Those homes by night a starry radiance fills
Shot from the jewelled floors where breathes the smell
Of roses, and while melting music thrills,
They quaff the precious wine the Heavenly Tree distils.

LXII

The tell-tale sunbeam of the morning, thrown
Upon the path each roving beauty chose,
Falls on some faded flower, some loosened zone,
A withered lotus or a dying rose,
Or bracelet which her haste forgot to close ;
Here a dropt diadem of orient pearl
The fond impatience of its mistress shows ;
And here the jasmine-bud that decked the curl,
Lying upon the grass, betrays the amorous girl.

LXIII

There the coy nymph, too eagerly embraced
By some young lover whom the night makes bold,
Slips from the arm that stealing round her waist
Has forced her, shrinking from its amorous hold,
Her ruffled robe over her breast to fold ;
Then armed with fragrant powder she will turn
Where on high pedestals of gems and gold
Bright torches with too clear a radiance burn,
And hide the triumph of the love she will not spurn.

LXIV

There, driven by the ever-moving gale,
The clouds, thy brethren, in an endless train
Around each palace of the city sail ;
Now easy access to the halls they gain,
And mar the painter's art with dewy stain.
But when the traces of their steps they see
They fear within those chambers to remain,
In wreathing clouds of incense seek to flee,
Glide through the lattice bars and once more wander free.

LXV

Dark is the sky behind thee ; but, whene'er
The light wind moves thy sombre veil away,
Again the moon, most excellently fair,
With nought the glory of the light to stay,
Shines on each chamber with a loving ray,
Where beauty, waking from her amorous dream,
Sees with delight the silver radiance play
On hanging crystals where thy dew-drops gleam,
And feels through all her frame returning vigour stream.

LXVI

Though Kama, Tyrant of the Soul, in awe
Of Siva foe to Love, Kuvera's friend,
Forbears in Alaka his bow to draw,
Still mightier arms her merry maidens lend:
What bow so lovely as the brows they bend ?
What archer's skill so perfect as the art
Of those bewitching eyes that love to send
The arrows of their glances forth, and dart
Those shafts that never fail, but pierce the lover's heart ?

(To be continued.)

Now ready.

A TRILINGUAL DICTIONARY; being a comprehensive Lexicon in ENGLISH, URDÚ and HINDÍ, exhibiting the syllabication, pronounciation, and etymology of English words, with their explanation in English, and in Urdú and Hindí in the Roman character, by Mathurá Praśada Miśra, Second Master Queen's College, Benares.

"After a thorough examination of Mathurá Prasád's Dictionary, I consider it to be a remarkable advance on any work of the same kind that has preceded it. Covering as it does, and very adequately, the ground of two leading Indian languages, it may be regarded as one of the most valuable linguistic helps to the Indian official that has appeared for many years ; and it is, of course, equally valuable to the Indian Student of English." *Dr. Hall.*

May be procured direct from us, by Book post; from any bookseller in Calcutta, Madras, or Bombay ; or from Messrs. Trübner & Co., London.—*Price Rs.* 16.

Communications of a literary nature should be addressed to the EDITOR : *all letters on business, to the Proprietors,* MESSRS. E. J. LAZARUS & CO., *to whom Drafts should be made payable.* ADVERTISEMENTS *will be inserted at four annas per line.*

The PANDIT may be ordered of the Publishers, or through MESSRS. TRÜBNER and CO., LONDON.

Annual subscription, in advance, including postage, Rs. 12.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 24. Benares May 1st, 1868. Vol. II.

॥ ईश्वरप्रत्यभिज्ञासूत्रविमर्शिन्याः ॥

॥ द्वितीयमाह्निकं तृतीयं च ॥

पूर्वपक्षतया येन विश्वमाभास्य भेदतः ।
अभेदोत्तरपक्षान्तर्नीयते तं स्तुमः शिवम् ॥

इह यत्परमार्थरूपं तदाशङ्क्यमानप्रतिपक्षप्रतिक्षेपेण निरूपयिष्यमाणं सुष्ठुतमां स्पष्टीकृतं भवति । यदाह भट्टनारायणः ।

नमस्ते भव सम्भ्रान्तभ्रान्तिमुद्भाव्य भिन्दते ।
ज्ञानानन्दं च निर्द्वन्द्वं देव वृत्त्वा विवृण्वते ॥

तत्रेहानात्मानीश्वरवादिनां भ्रान्तिभेदनपूर्वकं परमार्थं विवरीष्यंस्तदुद्भावनं तावदेकादशभिः श्लोकैः करोति । "ननु स्वलक्षणाभास,, मित्यादिभि "स्तेन कर्तापि कल्पित,, इत्यन्तैः । तत्र श्लोकद्वयेनात्मनो ध्रुवस्य दृश्यानुपलब्ध्याऽभाव उक्तः प्रत्यक्षवादिनः प्रति । तत्र श्लोकत्रयेण स्मृत्यनुसन्धानं संस्कारात्सिद्धमित्यन्यथासिद्धत्वादात्मानुमानाय न पर्याप्तमिति प्रोक्तमनुमेयात्मवादिनः प्रति । तत्र श्लोकेन ज्ञानादिगुणैर्गुणिनि प्रतिपत्तिरित्यनुमानं निरस्तम् । एवमात्मानं निराकृत्य ततो ज्ञानक्रियाशक्तिसम्बन्धरूपमैश्वर्यं निराकर्तुं ज्ञानस्य स्वरूपमेव व्यतिरिक्तं वाद्यंतरमते सांख्यमते चायुज्यमानमिति निरूपितं श्लोकद्वयेन । तत एकेन क्रिया नाम न काचित्काचिदस्तीति कथितं तत्र साधकं च प्रतिक्षिप्य बाधकं चोपन्यस्येति । ततः सम्बन्धस्य श्लोकेन नास्तित्वं प्रतिपादितं प्रमाणाभावं वदता श्लोकेनैव तत्र बाधकं प्रमाणमुक्त्वा, नात्मा स्थिरो, नापि ज्ञातृत्वलक्षणमस्यैश्वर्यं, मिति स्वपक्ष उपसंहृत इति पूर्वपक्षस्य पिण्डार्थः ॥

अथ ग्रन्थो व्याख्यायते ।

(१) ननु स्वलक्षणाभासं ज्ञानमेकं परं पुनः ।
साभिलापं विकल्पाख्यं बहुधा नापि तद् द्वयम् ॥
नित्यस्य कस्य चिद् द्रष्टुस्तस्यात्रानवभासतः ।
अहंप्रतीतिरप्येषा शरीराद्यवसायिनी ॥

न्वित्याक्षेपे । "इहात्मा संवित्स्वभावः स्थिरइति तावदयुक्तं,, स्थिरस्य स्वप्रकाशस्याप्रकाशनात्, । तथाहि । घटप्रकाशो घटविकल्पो घटप्रत्यभिज्ञा घटस्मृतिर्घटोत्प्रेक्षेत्यादिरूपेण ज्ञानान्येव प्रकाशन्ते भिन्नकालानि भिन्नविषयाणि भिन्नाकाराणि च, तत्र नीलप्रकाशः स्वलक्षणाभासं ज्ञानं, * "स्व,, † मन्याननुयायि स्वरूपसंकोचभागि "लक्षणं,, देशकालाकाररूपं यस्य तस्या "ऽऽभासः,, प्रकाशन ‡ मन्तर्मुखं यस्मिन् § बहिर्मुखीनस्वरूपधारिणि ज्ञाने तदविकल्पकम्, । "एकं,, विषयभेदेऽप्येकजातीयं स्वरूपे तद्वैचित्र्यकारणाभावात् । वि-

* स्वलक्षणाभासमिति सौत्रं निर्विकल्पकलक्षणनिर्देशं व्याख्यातुमुपक्रमते । स्वमित्यादिना ।

† अन्याननुयायीति । अन्यानुयानं ह्यन्यानुसरणम् । अन्यसंबन्धवैशिष्ट्यानुरोधेन ज्ञानविषयीभवनमिति यावत् । विशेष्यं हि विशेषणेन संकुचितं ज्ञानविषयीभवद् विशेषणमनुसरतीत्युच्यते । एवं विशेषणमपि । यथा नीलोघट इत्याकारके ज्ञाने नीलासम्बद्धः शुक्लादिर्घटो घटासंबद्धः पटादिर्वा नीलो न ज्ञानविषयतां स्पृशतः । इत्थं चानुयानं विशेष्यविशेषणभावरूपतायामेव पर्यवस्यति । एवं च तदभावरूपमननुयायित्वं विशेष्यविशेषणभावानिरूपकज्ञानविषयत्वमेवेति ।

‡ अन्तर्मुखं चाहमित्याकारको विमर्श आत्ममात्रविषयः ।

§ बहिर्मुखीनत्वं च विषयप्रवणता विषयोन्मुखतेति यावत् ।

इत्थं चान्यासंकुचितेन स्वतोव्यावृत्तेन विषयेणान्तर्मुखप्रकाशे स्वविषयीकरणोन्मुखीकृते सति यत् स्वविषयकतामात्रं ज्ञानमुदेति तदविकल्पकमिति पिण्डार्थः ।

Digitized by Google

कल्पे हि वैचित्र्यकारणमभिलापः। सचात्र नास्ति, नह्यभिलापो नीलस्य धर्मः, * न च चक्षुर्ग्राह्यः, † ततोऽसौ ग्राह्यः स्मर्तव्यः। अप्रबुद्धे च संस्कारे न स्मृतिः, तत्प्रबोधश्च वस्तुदर्शनोत्थितइति वस्तुदर्शनसमये ऽभिलापस्मृति ‡ र्नास्ति। ततः परं विकल्पकं ज्ञानं, सर्वस्य विकल्पस्य साक्षात्पारम्पर्येण वा निर्विकल्पकमूलत्वात्। परमिति चान्यरूपं सामान्यलक्षणं तस्य विषयः, स्वलक्षणे ऽतिसंकोचिनि विततविकल्पसाध्यस्य वृद्धव्यावहारिकस्योपदेशिकस्य वा संकेतस्य कर्तु § मशक्यत्वात्, || कृतस्यापि वैयर्थ्यात्,। तेन ह्यननुयायिना न पुनर्व्यवहारः। तच्च बहुभेदं, यतस्तदभिलापेन संजल्पात्मना शब्दनरूपेण सह वर्तते शब्दनं ¶ चे"दमिति,, तदिति, तदिदमिति, भवेदिदमिति, इदं वेदं वे,त्यादि बहुधा भिद्यते। तच्च ** न विषयपक्षे वर्तते अपि तु तस्य विकल्पस्य स्वरूपमेव विचित्रीकुर्वत् प्रतिभातीति विकल्पो बहुभेदः। एवमनुभवविकल्पपरम्परा तावत् स्वप्रकाशत्वेन भाति। स्यादेतत्। "यत्नग्रा ऽसौ परम्परा सोप्याभाती,,ति। तन्न,। यतो द्वयमप्येतद्विकल्पेतररूपं नान्यस्य कस्य चिदेतदतिरिक्तस्य द्रष्टुरनुभवितुः सम्बन्धि,। दृश्यस्य तु भवतु बाह्यार्थवादे। अत्र हेतुः।

* स्वप्रत्ययजनकेन्द्रियेण हि स्वस्य धर्मोजात्यादिर्गृह्यते। अयं चाभिलापः शब्दात्मा रूपग्राहकचक्षुःसन्निकर्षाग्राह्यः श्रोत्रैकग्राह्यः कथं नीलस्य धर्मः स्यादित्युपपादयति। न च चक्षुर्ग्राह्यइति। चो हेतौ।

† ततइत्यादि। निर्विकल्पकपूर्वकालिकानुभवविषय इत्यर्थः।

‡ नास्तीति। नन्वेवं सविकल्पके ऽपि वैचित्र्यकारणमभिलापो वक्तुमशक्यः। यतः सविकल्पकविषयस्यापि नीलादेर्नाभिलापो धर्मो भवितुमर्हति। अतः सविकल्पककाले ऽप्यभिलापस्मृतिर्नास्तीति तुल्यमिति चेत्। न। सविकल्पकप्राक्कालिकनिर्विकल्पेनैव संस्कारोद्बोधस्य संभवेन सविकल्पककाले स्मरणसंभवात्। यद्रूपपुरस्कारेण संबन्धिनो ऽनुभवविषयत्वं तद्रूपपुरस्कारेणैवैकसंबन्धिज्ञानस्य संबन्ध्यन्तरस्मरणौपयिकसंस्कारोद्बोधकत्वमितिनियमानभ्युपगमात्। अनुभवाप्रकाराप्रकारकज्ञानस्योद्बोधकत्वोपगमेनैव सकलातिप्रसङ्गभङ्गात्। नन्वेवं निर्विकल्पककाले ऽप्युद्बोधकान्तरवशादुद्बुद्धेन संस्कारेणाभिलापस्मरणस्य संभव इति चेत्। न। स्वविषयविषयकेण स्ववृत्त्यनुभवत्वव्याप्यजातिमता च ज्ञानेनोद्बुद्धो यः संस्कारस्तज्जनितेन स्मरणेन विषयीक्रियमाणो योऽभिलापस्तेनैव साभिलापत्वस्य विवक्षणीयत्वात्। निर्विकल्पकप्राक्कालिकार्थान्तरप्रमित्युद्बुद्धसंस्कारजनितस्मरणव्यवच्छेदाय स्वविषयविषयकेणेति। निर्विकल्पकविषयविषयकेणैव शाब्दादिनोद्बुद्धसंस्कारजनितस्मरणव्यावर्त्तनाय स्ववृत्तिजातिमत्त्वेन ज्ञानं विशेषितम्। अथ यादृशसविकल्पककाले प्रतिबन्धकवशात् कारणविरहाद् वा ऽभिलापो न स्मर्यते तत्र साभिलापत्वमव्याप्तमिति चेत्। न। साभिलापमित्यनेनाभिलापसमानाधिकरणजातिमतो विवक्षितत्वादिति दिक्।

§ अशक्यत्वादिति। परोक्षानुभवस्य सधर्मितावच्छेदककत्वनियमेन जात्यखण्डोपाधीतरस्य नीलादेः स्वरूपतो विशेषणतया भानासंभवेन च वृद्धव्यवहारजनितशक्त्यनुमितावुपदेशजनिते शाब्दबोधे वा न स्वरूपतो विशेष्यत्वस्य विशेषणत्वस्य वा नीलादेः संभवइति भावः।

|| मानसस्य निर्धर्मितावच्छेदककस्यापि कथं चित् सम्भवमभिप्रेत्याह। कृतस्यापीति।

¶ इदमिति विकल्पात्मकानुभवस्याभिलापः। तदिति स्मृतेः। तदिदमिति प्रत्यभिज्ञायाः। भवेदिदमित्युत्प्रेक्षायाः। इदं वेदं वेति संशयस्य।

** विषयस्य घटादेरेकत्वे ऽपीदमित्यादिनानाविधाभिलापस्य सत्त्वात्।

यतस्तस्य द्रष्टः अतएव संवित्स्वभावतोपगमात् स्वप्रकाशतायोग्यत्वादापन्नोपलब्धिलक्षणप्राप्तेः, अत्र, एतद्बोधद्वयमध्ये, नास्त्यवभासः। "नन्वस्त्येवात्रावभासइत्यसिद्धा * दृश्यानुपलब्धिः,। तथाह्यहं वेद्मि निश्चिनोमि स्मरामीदमिति विदादिप्रकृत्यर्थरूपाद् ज्ञानस्मृत्यादेः इदमिति कर्मरूपाद्विषयादतिरिक्तमेवाहमित्यनुयायिनि प्रकाशे ऽनुयायिरूपं भाति,,। † कएवमाह भातीति। भानं ह्यविकल्पनं, अहमिति शब्दानुविद्धो विकल्पप्रत्ययः। "ननु तथापि ‡ किमनेन विकल्प्यते,,। शरीरसन्तानो वा कृशोहमित्यादिप्रत्ययात्, ज्ञानसन्तानो वा सुख्यहमित्यादिप्रतीतेः, मत्वर्थीयश्च सन्तानमेव स्पृशति नातिरिक्तं, तदेतदुक्तमहंप्रतीतिरपीति। शरीरमादिग्रहणाद् ज्ञानमवस्यति सन्तानरूपतया विकल्पयत्यवश्यं सदृशपरापरभावभेदग्रहणसामर्थ्यवासनाविष्टत्वादिति। एषेति, नास्माभिर्निह्नुता, साभिलापं विकल्पाख्यमित्यनेन संगृहीतत्वात्। एतदुक्तं भवति। अहंप्रतीतिरेव तावदात्मा, तस्या अपि विकल्परूपत्वा,दस्थैर्याच्च, एतत्प्रतीतिप्रत्येयोपि नास्त्यन्यः शरीरादेः, भवन्नपि वा वेद्यपक्षपतितः स्यादिति तथापि संवित्संवेद्यव्यतिरिक्तस्यात्मनो न सिद्धिरित्येतदपिशब्देन द्योतितम्। एवं नास्त्यात्मा संवित्संवेद्यव्यतिरिक्तो दृश्यस्यानुपलब्धेरिति॥

अत्रात्मवाद्यनुमानमुत्थापयितुमाह।

(२) अथानुभवविध्वंसे स्मृतिस्तदनुरोधिनी।

कथं भवेन्न नित्यः स्यादात्मा यद्यनुभावकः॥

इह स्मृतिकाले सुस्मूर्षितो ऽर्थो भवतु ध्वंसतां वेति किमनेन, अनुभवस्तावद्ध्वस्त इत्यत्र सर्वस्याविवादः। तमेव चानुरुन्धाना स्मृतिर्जायते। तथाहि स्मृतौ नार्थस्य § प्रकाशः,

* अर्हं कृत्यः।

† कएवमाहेति। अयं भावः। ज्ञानस्य हि द्वौ संबन्धौ प्रकाशतइतिव्यवहारप्रयोजकौ। विषयत्वं भेयत्वं च। तत्र भेयत्वं च स्वस्मिन्नेव संबन्धः स्वप्रकाशमितिव्यवहारोपपादकः स्वोत्तरकालिकस्वसंशयनिराकरणाय कल्प्यमानः। विषयत्वं च बाह्यार्थवादे बाह्येन मतान्तरे ऽविद्यया परिकल्प्यमानेन नीलादिना ज्ञानस्य संबन्धः। तत्र यद् विषयतया ज्ञानसंबद्धं तदेवाभिलप्यते। नीलादिसविकल्पकभेयतायाज्ञाने सत्त्वे ऽपि नीलमित्यभिलापवद् ज्ञानमित्यभिलापाभावात्। विषयतायाः सत्त्वएव च वेद्मीत्याद्यभिलापात्। आत्मनि चाहमित्यभिलापस्य सत्त्वेन विषयतायाएव निश्चयेन न भेयत्वं सिद्ध्यति। विषयतायाश्च न पारमार्थिकसत्त्वसाधकत्वमपि तु भेयत्वस्यैव। असत्यपि स्वाप्नादिज्ञानविषयताया दर्शनात्। ततश्च न प्रदर्शितप्रत्ययस्य द्रष्टृसाधकत्वमिति।

‡ किमनेनेति। भेयत्वाभावाच्च न ज्ञानपक्षे वर्तते। ज्ञानकर्मत्वाख्यविषयत्वाभावाच्च न विषयपक्षे इत्यहमित्यभिलापस्य कोविषयइति प्रश्नः।

यद्वा "न किमपीत्यतआत्मा ऽपि भेयोवक्तव्यः" इति शेषः। अयं चार्थः। न कोऽपि कदा ऽप्यहमस्मि न वेति सन्दिहानो भवतीति सर्वेषां ज्ञानानां स्वस्मिन्निवात्मन्यपि भेयता वक्तव्येत्यायातमात्मनोऽपि भेयत्वमिति।

§ निर्विकल्पकम्।

Digitized by Google

ना* ध्यवसायः, नाप्यनुभवस्यार्थस्य चा † कुलिङ्गयवत्, नाप्यनुभवविशिष्टस्यार्थस्य ‡ दण्डिवत्,। सर्वत्रायमिति प्रत्ययप्रसङ्गात् §। किं || त्वनुभवप्रकाश एव स्मृतौ प्रधानम्। अनुभवस्य त्वर्थप्रकाशात्मकत्वादनुभवप्रकाशनान्तरीयकोऽर्थावभास इति, सर्वथा यद्यनुभवो ध्वस्तस्तदा तत्प्रकाशरूपा कथं स्मृतिस्तद्द्वारेणार्थविषया स्यात्, तया च सर्वो व्यवहारः क्रियमाणो दृष्ट, इत्यसौ स्वरूपेणानपह्नवनीया सत्यनुभवस्य नाशे किं चिद्विनष्टमावेदयति। तदेव चानुभवकर्तृ अनुभवितृरूपमात्मा ऽनुभावको नित्य इतीयदेव चात्मसिद्धेर्जीवितं, तत्तु नाधिकमिहैवोन्मीलितमाचार्येण वक्तव्यशेषविवक्षया पूर्वपक्षो मा तावत्समापीदित्याशयेन, "कथं भवे,,दिति। अर्थस्तावत् तस्या ¶ मकिंचित्करः अनुभवश्च ध्वस्त इति न केन चित्प्रकारेण स्मृतिः स्यात्। तदभावे संकेतशब्दस्मृत्यायत्ता अप्यस्तंगताः सर्वे विकल्पाः। निर्विकल्पं चान्धमूकबधिरप्रायमिति हन्त निराक्रन्दमवसीदेद्विश्वमिति ॥

इह कार्यव्यतिरेकेण तादृक्कल्पनीयं यत्कार्यसिद्धये पर्याप्नोति। न चैवमात्मा, अर्थो हि तावत्स्मर्यते ** सत्वानुभवप्रकाशमुखेन, अनुभवश्च ध्वस्त इत्युक्तं, यद्यात्मा कश्चिदस्ति किं तेन, एतदपि हि वक्तव्यमाकाशमप्यस्तीति। "अथोच्यते न केवलेनात्मनैतत्सिद्ध्यति अपि त्वनुभवसंस्कारो ऽप्यत्रोपयोगीति,, तर्हि स एवास्तु किमात्मना। एतद् दर्शयति।

(३) सत्यप्यात्मनि दृङ्नाशात् तद्द्वारा दृष्टवस्तुषु।
स्मृतिः केन

दृष्टेष्वनुभूतेषु वस्तुषु या स्मृतिस्तस्यामनुभवो दृगात्मा द्वारमर्थांशस्पर्शे। स च सत्यप्यात्मनि नष्टो ऽनुभवः तस्य ह्यनाशे इदमित्येव एवात्रुटितः प्रकाश इति का स्मृतिस्तदनुभविता किं स्मृतेः कुर्यादिति ॥

(४) अथ यत्रैवानुभवस्तत्पदेव सा ॥

यत्रैव विषये ऽनुभवो वृत्तस्तदेव तस्याः स्मृतेः पदं स्मर्यमाणम्। "तत्पदेति,, बहुव्रीहिः। "सेति,, स्मृतिः ॥

* विकल्पात्मा ऽनुभवः।

† समूहालम्बनो ऽनुभवः।

‡ अनुभवार्थयोर्विशेष्यविशेषणभावनिरूपको ऽध्यवसायः।

§ इष्यते तु स इति।

|| पातञ्जलभाष्ये ऽपि "किं प्रत्ययस्य चित्तं स्मरति आहोस्विद् विषयस्ये"ति विकल्प्यानुव्यवसायस्यैव स्मारकत्वाभिप्रायेणोभयविषयकत्वं सिद्धान्तितम्।

¶ अर्थनाशे ऽपि स्मृतिदर्शनात्।

** अयमेवानुव्यवसायात्मनो ऽनुभवात् स्मरणे विशेषो यदनुभवमुखत्वम्। अनुभवस्तु विषयमुखः। यतो ऽनुभूतो घट इति स्मरणस्याकारः घटमनुभवामीत्यनुव्यवसायस्य। स्पष्टं चैतत् पातञ्जलभाष्यवार्तिकयोः।

ननु ज्ञानान्तरस्य विषयेण कथं तस्या विषयवत्त्वाभिमान इत्याशङ्क्याह।

(५) यतो हि पूर्वानुभवसंस्कारात् स्मृतिसंभवः।

अनुभवेन हि संस्कारो जन्यते स्वोचितः संस्कारश्च प्राक्तनरूपां स्थितिं स्थापयति आकृष्टशाखादेः चिर * संवर्तितस्य † विवर्त्यमानस्य भूर्जादेः। तेनात्रापि संस्कारः तां स्मृतिं पूर्वानुभवानुकारिणीं करोतीति तद्विषय एव स्मृतेर्विषयः ॥

(६) यद्येवमन्तर्गडुना कोऽर्थः स्यात् स्थायिना ऽऽत्मना ॥

एवं तर्हि अन्तर्गडुर्यथा ऽऽयासाय परं तद्वदात्मा स्थिरः कल्पनायासमात्रफल इति किं तेन सर्वं हि संस्कारेण जगद्व्यवहारकुटुम्बकं कृतकरावलम्बमिति ॥

ननु तस्यैव संस्कारस्याश्रयो वक्तव्यः। स हि गुणत्वादाश्रयमपेक्षते, य आश्रयः स आत्मा स्यादित्याशङ्क्याह।

(७) ततो भिन्नेषु धर्मेषु तत्स्वरूपाविशेषतः।
संस्कारात्स्मृतिसिद्धौ स्यात्स्मर्ता द्रष्टेव कल्पितः ॥

इह संस्कारे जायमाने यद्यात्मनो विशेषः स तद्व्यतिरिक्त इति न नित्य आत्मा स्यात्। अथ न कश्चिदस्य विशेषस्तेन तर्हि किम्। "अथ संस्कार एवास्य विशेष,,स्तर्हि न व्यतिरिक्तो ऽसाविति पुनरप्यनित्ये ज्ञाने संस्कार इत्यायातम्। अनुभवाद्विशिष्टं विशिष्टस्मृत्याख्यकार्यकारि ज्ञानं परम्परया जायते इतीयानेव संस्कारार्थः। अथ संस्कारात्मा व्यतिरिक्तो विशेषस्तस्य, तर्हि किमसौ, सम्बन्धश्च व्यतिरिक्तो निराकरिष्यते। एवं ज्ञानसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मा अपि विकल्पनीयाः। एतदाह "तत इति,, आत्मनो भिन्नेषु धर्मेषु अङ्गीक्रियमाणेषु तेषु सत्स्वपि आत्मनः स्वरूपे विशेषाभावात्स तावदात्मा स्मृतौ न व्याप्रियते, अस्मर्तृरूपासंस्कृतरूपादिप्राच्यरूपानपायादिति संस्कारादेव स्मृतेः सिद्धिरिति अहं स्मरामीति यः स्मर्ता सोऽपि शरीरसंतानो ज्ञानसंतानश्चाध्यवसीयते यथा द्रष्टा। पूर्वं ह्युक्तम्।

अहंप्रतीतिरप्येषा शरीराद्यवसायिनी।

इति ॥

एवमात्मनि साधकं प्रमाणं प्रत्यक्षमनुमानं च पराकृतं बाधकं च सूचितम् धर्मयोगे नित्यताहानिरन्यथा किं तेन। तदुक्तम्

वर्षातपाभ्यां किं व्योम्नश्चर्मण्यस्ति तयोः फलम्।
चर्मोपमश्चेत्सोऽनित्यः खतुल्यश्चेदसत्समः ॥

* संकुचितस्य

† विकास्यमानस्य

इति । इत्थमात्मानं निराकृत्य तस्यैश्वर्यमपि निराकर्तुं ज्ञानशक्तिमेव परीक्षितुमाह ।

(८) ज्ञानं च चित्स्वरूपं चेत् तदनित्यं किमात्मवत् ।
अथापि जडमेतस्य कथमर्थप्रकाशता ॥

पराभ्युपगमेन प्रसङ्गापादनमेतत्पूर्वपक्षवादी करोति प्रसङ्गविपर्ययलाभो मे भविष्यतीति । तत्रात्मवादी नित्यत्वमात्मन इत्थं ब्रूते, "इह कालो नाम इदंभावविशिष्टस्य विशेषणतामवलम्बमानस्तं विशिष्टीकुर्वंस्तत्संकोचादनित्यं संपादयति, आत्मनश्च चित्स्वभावत्वादिदमितिप्रथनाभावेन विशेष्यत्वं नास्ति, विशेषणविशेष्यभावो हि योजकायत्तः न च स्वप्रकाशे योजकान्तरमस्ति,, यदित्थं बौद्धः पर्यनुयुज्यते, ज्ञानमपि तर्हि स्वप्रकाशमिति तत्राप्येषैव वार्तेति तदपि कस्माच्च नित्यम् । न च द्वयोर्नित्ययोः कश्चित्सम्बन्धः कार्यकारणभावएव ह्यसौ नान्यः । तत आत्मनो ज्ञानं शक्तिरित्यवसन्नमदः । "अथ न स्वप्रकाशं ज्ञानं,, तर्हि परस्याप्यदो न प्रकाशः । स्वप्रकाशरूपावेशनं ह्यसौ परस्य विदधद्बोधः प्रकाशो भवति परस्यापि, ततः स्वपरप्रकाशताशून्यो नासावर्थस्य प्रकाशः स्याद्भावान्तरवत् ॥

जडोऽप्यसावित्थमर्थस्य प्रकाशो भविष्यतीति सांख्यमतमाशङ्कते ।

(९) अथार्थस्य यथा रूपं धत्ते बुद्धिस्तथाऽऽत्मनः ।
चैतन्यम्

इह तावदर्थं जानामीत्यस्ति व्यवहारः तत्रार्थस्य प्रकाश इत्येतावान्परमार्थः । तत्रार्थस्य स्वं रूपं सर्वं प्रति तथात्वप्रसङ्गात् न कं चित्प्रति चेति सर्वज्ञमज्ञं वा जगत्स्यात् नाप्यर्थोऽन्यत एतद्रूपमुपनिपतितमेष एव हि दोषः स्यात् तन्नूनमन्यत्रैवायं धर्मस्तत्त्वान्तरे तत्रापि कथमर्थस्य प्रकाशः स्यादिति नूनं तत्र तत्त्वान्तरे सोऽर्थः प्रतिबिम्बेनोपसंक्रामति तत्तत्त्वान्तरं सत्त्वप्रधानत्वात्प्रतिबिम्बोपग्रहयोग्यं तमसाच्छादितत्वात्सकलप्रतिबिम्बनतो व्यावर्तितम् भागे रजसा तमसोऽपसारणात्कं चिदेव प्रतिबिम्बकं गृह्णाति तदेव बुद्धितत्त्वमुच्यते । अर्थप्रतिबिम्बोपग्रहश्च ज्ञानमस्य वृत्तिरूपं * पूर्वव्यपदेशतिरोधायकदध्यादिपरिणामविलक्षणपरिणतिविशेषात्मकम् । एव मर्थस्य तावद्रूपं बुद्धिर्धारयति । इयच्च सत्त्वादीनां सुखदुःखमोहतया भोग्यत्वाज्जडमिति दर्पणवदप्रकाशं, न च भोग्यस्याऽप्रकाशस्य तद्विरुद्धभोक्तृतारूपप्रकाशात्मकस्वभावसंभवो युक्त्यनुपातीति तद्विलक्षणेन भोक्त्रा भवितव्यम्, स च प्रकाश इत्येतावत्स्वभावः, स्वभावान्तरं ह्यप्रकाशरूपं भोग्यं कथं भोक्तुः स्वभावतया सम्भाव्येत, स च प्रकाशमात्रस्वभावत्वेनैव यदि विश्वस्य प्रकाशस्तर्हि विश्वं युगपदेव प्रकाशेत घटप्रकाशोऽपि पटप्रकाशः स्याद् इति विश्वं संकीर्येत । स चार्थादर्थप्रतिबिम्बात्तदाधाराच्च बुद्धितत्त्वादन्यः कथमर्थस्य प्रकाशः स्यात् असम्बन्धात् । तस्माद्बुद्धिरेव स्वच्छत्वात्प्रकाशप्रतिबिम्बमपि परिगृह्णाति । ततः प्रकाशप्रतिबिम्बपरिग्रहमहिमोपनतप्रकाशावेशबुद्धितत्त्वावेशितप्रतिबिम्बकनीलाद्यर्थपर्यन्तसंक्रान्तेः प्रकाशावेशस्यार्थः प्रकाशते इति सिद्धो व्यवहारः । तदेवं ज्ञानं जडबुद्धितत्त्वाव्यतिरेकाज्जडमपि चित्प्रतिबिम्बयोगाद्विषयस्य प्रकाश इति * ॥

एतदेव तावदनुचितम् यत्प्रकाशात्मा पुमान्बुद्धौ प्रतिबिम्बमर्पयति । समानगुणे बिम्बकापेक्षया † विमले प्रतिबिम्बसंक्रान्तिदर्शनात् । रूपवत्यादर्शे घटरूपप्रतिबिम्बवत् । आत्मबुद्ध्योश्चातिवैलक्षण्य,मात्मापेक्षया च न बुद्धिर्विमला, तद्वस्तु तावदेतदित्यथशब्देन सूचयति । किं तु प्रतिबिम्बवादेनापि न किं चित्प्रतिसमाहितं भवेदिति ।

(१०) अजडा सैवं जाड्ये नार्थप्रकाशता ॥

चैतन्यप्रतिबिम्बयोगे यदि तावत्तत्प्रतिबिम्बकमपि मुख्यप्रकाशरूपमेव न भवति तेनापि न किंचित्कृतं स्यात् । नहि प्रतिबिम्बितवह्निपुञ्ज आदर्शो दाह्यं दहेत् । "अथ मुख्यप्रकाशरूपमेव तत्प्रतिबिम्बकं त,,तर्हि बुद्धेरव्यतिरिक्तमिति मुख्यप्रकाशरूपैव बुद्धिर्जातेति यतो विरुद्धधर्माध्यासाद्भीरुभिरेतत्कल्पितं स एव पुनर्जाज्वल्यमानं निजमोजो जृम्भयति । ततश्च सा बुद्धिरेव चिन्मयी स्यात् किं पुरुषेण । एवमर्थप्रतिबिम्बकद्वारेणार्थमयीत्यप्यायातो विज्ञानवादः । कुत एवास्यास्तद्रूपमिति पूर्वकारणपरम्परात इत्युत्तरं वाच्यम् । एवं सैव चेच्चिद्रूपा प्राग्वन्नित्यताप्रसङ्गः न चेच्चिद्रूपस्यापि नित्यता तर्हि आत्मा न नित्यः कश्चिदस्ति यस्य ज्ञानं नाम

* परिणामो हि द्विविधः । पूर्वव्यपदेशतिरोधायकस्तदतिरोधायकश्च । तत्राद्यः पूर्वभावे विनष्टे सति तत्समवायिकारणेषूत्पद्यमानो यथा दधि क्षीरस्य । क्षीरे हि विनष्टे सत्येव तदारम्भका अवयवा दधिभावमापद्यन्तेऽतः क्षीरस्य नाशाच्च दध्यवस्थायां क्षीरव्यवहारः । द्वितीयस्तु यत्र पूर्वो भावोऽविनश्यन्नेव रूपान्तरं प्राप्नोति यथा तन्तवः पटभावं, तत्र तन्तूनां नाशाभावाच्च तद्व्यपदेशतिरोधानमिति भवत्येव तन्तुव्यपदेशइति ।

* सांख्यसिद्धान्तमनुसरन्तस्तु चेतनेऽपि वृत्त्याकारपरिणतबुद्धेः प्रतिबिम्बमुपगच्छन्ति । तमेव च पौरुषेयबोधपदेन व्यवहरन्ति च । अयं च प्रतिबिम्बः पूर्वोक्तात् परिणतिविशेषादन्यएवौपाधिकस्वव्यवहारं प्रति प्रयोजकः सम्बन्धविशेषः स्फटिकइव जवालौहित्यस्य । चेतनस्य कूटस्थनित्यत्वात् । तथा च स्मर्यते ।

तस्मिंश्चिद्दर्पणे स्फारे समस्ता वस्तुदृष्टयः ।
इमास्ताः प्रतिबिम्बन्ति सरसीव तटद्रुमाः ॥

इति ।

† इदं तु न युक्तमिति प्रत्येमि । बिम्बभूतरविमयूखापेक्षया ऽविमलेऽप्यादर्शे तत्प्रतिबिम्बदर्शनात् ।

Digitized by Google

शक्तिः स्यात् इति ज्ञानमात्रमेवास्ति यो ऽर्थप्रकाशरूपो बोधो यश्च विकल्पः स्मृत्यादिरूपस्तावता ऽर्थव्यवहारसिद्धिरिति प्रसङ्गविपर्ययलाभे ज्ञानं च चित्स्वरूपं चेत्यादेः श्लोकद्वयस्य तात्पर्यम् ॥

एवं ज्ञानं परीक्ष्य क्रियां परीक्षते ।

(११) क्रिया ऽप्यर्थस्य कायादेस्तत्तद्देशादिजातता ।

नान्या ऽदृष्टेः

इह परिस्पन्दरूपं तावद्गच्छति चलति पततीत्यादि यत्प्रतिभासगोचरः तत्र गृहदेशकदेवदत्तस्वरूपादनन्तरं बाह्यदेशकदेवदत्तस्वरूपमित्येतावदुपलभ्यते न तु तत्स्वरूपातिरिक्तां कां चिदन्यां क्रियां प्रतीमः । देवदत्तो दिनं तिष्ठति इत्यत्र तु प्रभातकालाविष्टदेवदत्तस्वरूपं ततः प्रहरकालालिङ्गितस्वरूपमित्यादि भाति, दुग्धं परिणमत इत्यत्र मधुरवस्तुरूपमम्लवस्तुरूपं द्रवरूपं कठिनरूपमित्यादि । एवं तद्देशतया तत्कालतया तदाकारतया भाव एव भाति । सादृश्याच्च तत्र प्रत्यभिज्ञा, भिन्ने ऽपि कायकेशनखादाविव, देशाकारान्यत्वे कालान्यत्वमवश्यं भावि, देशकालान्यत्वे ऽपि स्वरूपस्यैवदेशत्वात् कालभेदे च स्वरूपभेदाद्देशकालाकारा आकार एव यद्यपि पर्यवस्यन्ति, तथा ऽपि स्थूलदृष्ट्या ऽस्ति भेद इति ते हि भेदेन बोद्धव्यन्त इति तात्पर्यम् । एवं प्रत्यक्षेण न दृश्यते क्व चित्क्रिया, तदभावाच्च तत्पूर्वकेणानुमानेन, कार्यं च सामग्र्याप्युत्तरक्षणरूपं तद्देशवस्तुरूपादीति कार्यान्यथानुपपत्त्या ऽपि न सा कल्प्या । एवं प्रत्यक्षानुमानाभ्यां तस्या अदृष्टेरिति साधकप्रमाणाभाव उक्तः ॥

बाधकमप्याह ।

(१२) न सा ऽप्येका क्रमिकैकस्य चोचिता ॥

तत्र पूर्वापररूपता क्षणानां न तु स्वात्मनि किं चित्पूर्वमपरं वा वस्तुमात्रं हि तत् । अतो विकल्पप्राणितं पूर्वापरीभूतत्वं क्रमरूपता क्रिया वा लक्षणं न वस्तु किं चित्स्पृशति । ते हि क्षणा नान्यान्यस्वरूपाविष्टा इति कथमेका क्रिया क्रमो हि भेदेन व्याप्तः, अभिन्नं तदभावात् । भेदस्य विरुद्धमैक्यमिति कथं क्रमिका एका चेति स्यात् । "अथैकत्राश्रये ऽवस्थानात् एका,, तत्रापि तत्क्षणातिरिक्तो न कश्चिदाश्रयो ऽनुभूयते । क्षणा एव हि प्रबन्धवृत्तयो भान्ति । किं च तथाभूतैर्भिन्नदेशकालाकारैः क्रियाक्षणैराविष्ट आश्रयः कथमेकः स्यात् । अतएव देवदत्तो ऽयं स एव ग्रामं प्राप्त इति सादृश्याद्भवन्ती प्रत्यभिज्ञा नैक्यं वास्तवं गमयितुमलम् ॥

एवं ज्ञानं क्रियां च परीक्ष्य * यस्मिन्सति ते सम्बन्धे सर्वज्ञत्वसर्वकर्तृतारूपैश्वर्यप्रसाधनाय प्रभवतस्तं ध्वंसयितुमादिशयं प्रमाणाभावं तावदाह ।

* यस्मिन् सम्बन्धे सतीत्यन्वयः । "ते" ज्ञानक्रिये ।

(१३) तत्रतत्र स्थिते तत्तद्भवतीत्येव दृश्यते ।

नान्यन्नान्यो ऽस्ति सम्बन्धः कार्यकारणभावतः ॥

मृत्पिण्डे सति स्थूपकः तत्र सति शिविको यावद्घट इत्येवम् भावक्षणा एवोपलभ्यन्ते नाधिकं किं चिदत्यक्षेणावभासते नाप्यनुमानेनेति क्रियायामिव वाच्यम् । सर्वत्राधाराधेयभावादावयमेव पन्थाः पृथग्रूपकुण्डबदरक्षणानन्तरं निरन्तरात्मकविशिष्टकुण्डबदरोदय इति । अयमेव च भावो भावान्तरेण सह नियतपूर्वापरतया विकल्पेन व्यवह्रियमाणः कार्यकारणभाव इत्यभिधीयते । न च ज्ञानक्रियाभ्यां सहात्मनः कार्यकारणभावः । आत्मनस्तत्कार्यत्वाभावात्, ज्ञानस्य च स्वसामग्रीकार्यत्वात्, क्रियायाश्चाभावात्, इति न ज्ञानक्रियासम्बन्धः यतो ज्ञातृताकर्तृत्वे स्याताम् ॥

एवं प्रमाणं पराकृत्य सम्बन्धे बाधकं सामान्यविशेषमुखेन निरूपयति ।

(१४) द्विष्ठस्यानेकरूपत्वात्सिद्धस्यान्यानपेक्षणात् ।

पारतन्त्र्याद्ययोगाच्च तेन कर्ता ऽपि कल्पितः ॥

सम्बन्धस्तावत्परस्परप्राप्तिरूपः, द्वयोः प्राप्तिभाजोरेकत्र तिष्ठतीति सामान्यलक्षणं तच्च कथं नह्येकत्र विश्रमितापेक्षरीरसारो ऽन्यत्र विश्रमितुमलम् । रूपभेदप्रसङ्गात् । एतेन संयोगसमवायौ तन्मूलाश्चान्ये ऽपि सम्बन्धास्तावर्थविधुरं धुरमारोपिता मन्तव्याः । यो ऽपि चेतनेषु तत्कल्पनया चाचेतनेषु पारतन्त्र्यात्मा सम्बन्धो व्यवह्रियते, तत्र सिद्धस्य न पारतन्त्र्यमस्ति सिद्धत्वादेव असिद्धस्य खरविषाणस्वरूपस्य तादृग्धर्मायोगात् । एवमपेक्षायामपि वाच्यम् । द्वे च रूपे कथं श्लिष्यतः । द्वयोरेकत्वानुपपत्तेः । एकत्वे वा कः श्लेषः । तस्माज्ज्ञानसम्बन्धाज्ज्ञातेति यथा विकल्पकल्पितो ऽर्थो न वस्तु, तथा क्रियासम्बन्धात् कर्तेत्यपि कल्पनामात्रमिति पूर्वपक्षः ॥ ११ ॥

आदितः सूत्रश्लोकाः १६ व्याख्याताः

इति श्रीमदाचार्याभिनवगुप्तविरचितायामीश्वरप्रत्यभिज्ञासूत्रविमर्शिन्यां पूर्वपक्षविवृतिः ॥

॥ इति द्वितीयमाह्निकम् ॥

विना येन न किं चित्स्यात्समस्ता अपि दृष्टयः ।

अनस्तमितसम्बोधस्वरूपं तं स्तुमः शिवम् ॥

एतस्मिन्पूर्वपक्षे यदुक्तं स्मृतेः संस्कारमात्रादेव सिद्धिरिति तदेव दूषयितुं "सत्य,,मित्यादि "ज्ञानस्मृत्यपोहनशक्तिमा,,-नित्यन्तं श्लोकसप्तकम् । क्रियायां सम्बन्धे च दूषणोद्धरणं

Digitized by Google

द्वितीये क्रियाधिकारे भविष्यति । यत्तु परेण व्यतिरिक्तं ज्ञानं काणादसांख्यादिदृष्टौ निराकृतं, तदभिमतमेवान्यकृतदति तद्दूषणान्तमेव । तत्र श्लोकद्वयेन ज्ञानस्य स्वसंवेदनरूपतया ऽनुभवस्य स्मृतावप्रकाशत्वं दर्शितं संस्कारजत्वे ऽपि । ततः श्लोकद्वयेन स्मृतेर्भ्रान्तित्वमाशङ्कापूर्वकं पराकृतम् । ततस्तृतीयेन प्रसङ्गात्सर्वाध्यवसायानामपि भ्रान्तित्वाशङ्का शमिता । ततः सत्यपि संस्कारे स्मृत्यनुपपत्तौ व्यवहारोच्छेद इति श्लोकेनोक्त्वा स्वपक्षे तदुपपत्तिरिति श्लोकेनोक्तमिति तात्पर्यम् ॥

ग्रन्थार्थस्तु निरूप्यते ।

(१) सत्यं किं तु स्मृतिज्ञानं पूर्वानुभवसंस्कृतेः ।
जातमप्यात्मनिष्ठं तन्नाद्यानुभववेदकम् ॥

पूर्वपक्षमध्यान्मया तावदङ्गीकर्तव्यमिति सत्यमित्यनेन दर्शितम् । यत्तु नाङ्गीकर्तव्यं तद्दूष्यतइत्येतदुक्तं किं त्वित्यनेन विशेषाभिधायिना । इह स्मृतौ विषयमात्रस्य प्रकाशो न समर्थनीयो वर्तते, यः संस्कारादेव सिद्ध्येत् । किं त्वनुभवप्रकाशेन विना तदित्येवंरूपा कथं स्मृतिः स्यात् । कथं च तया विना ऽभिलाषेण व्यवहारः स्यात् । अनुभवेन ह्यस्य सुखसाधनता निश्चिता । तत उपादानं, तत्र पूर्वानुभवजनितात्संस्कारादेतावज्जातम् । यद्यपि तज्ज्ञानं त्रिषयेण न जनितं तथापि तद्विषयमिति न चैतावता किं चित् । आत्मनिष्ठे स्वप्रकाशज्ञाने विषयस्यैवानुभवस्य प्राच्यस्याप्रकाशनात् ॥

ननु संस्कारजत्वादेव प्राच्यमनुभवमपि विषयीकुरुतां स्मृतिरित्याशङ्क्याह ।

(२) दृक्स्वाभासैव नान्येन वेद्या रूपदृशेव दृक् ।
रसे संस्कारजत्वं तु तत्तुल्यत्वं न तद्गतिः ॥

दृग्ज्ञानं,तच्च जडादिभिद्यते स्वप्रकाशैकरूपतया, जडो हि प्रकाशात्पृथग्भूतो वक्तव्यः, तेन दृक्स्वाभासा,आभासः प्रकाशमानता सा स्वं रूपमव्यभिचारि यस्याः स्वस्य वाभासनं रूपं यस्याः सत्यपि बाह्ये तच्छरीरसङ्क्रान्तं न प्रकाशनं ज्ञानस्य रूपं भवितुमर्हति । * परप्रकाशनात्मकनिजरूपप्रकाशनमेव हि स्वपरप्रकाशत्वं ज्ञानस्य भण्यते । "ननु स्वाभासमेव सत्तदनुभवज्ञानं स्मरणे † भासिष्यते नेत्याह,, । "नान्येन वेद्यम्,, परत्र यदि दृग्भासेत तर्हि न सा स्वाभासा * इदमेव हि स्वप्रकाशस्य लक्षणम् । स्वयं हि यदि प्रकाशते । तदा परेण सहासम्बन्धात्सम्बन्धप्राणा † कथं परत्रेति सप्तमी सङ्गच्छताम् । तथा च रूपज्ञानेन रसे दृग्रसविषयं ज्ञानं न वेद्यते । एवं हि चक्षुषैव रसः फलतो गृहीत एव स्यात् । "ननु यदि नाभाति स्मरणे ऽनुभवः । किं तर्हि संस्कारेण कृतं स्यात् । रूपज्ञानं न रसज्ञानजात्संस्काराज्जातं तत्कथमयं प्रसङ्गः । तस्मात्संस्कारएव भवत्सम्भावितदोषभङ्गाय प्रभवेत्,, । नैतत् । यतो ह्यसौ तत्संस्कारसंस्कृतात्समनन्तरप्रत्ययादुत्थितः स्मृतिबोधः । तेन तत्सदृशो भवतु शाखासन्निवेश इव पूर्वसन्निवेशतुल्यः । न तु यो यत्संस्काराज्जातः स तस्य वेदनस्वभावो भवतीति युक्तं । सदृशत्वस्यापि गतिरवगमः कथम् । नह्यनुभवज्ञानं सादृश्यं गमयति नापि स्मृतिज्ञानं परस्परमसंवेदने द्वयनिष्ठसादृश्याध्यवसायायोगात् । अन्यस्य च तदुभयवेदनरूपस्याभावादिति संस्कारात्परं सविषयतामात्रं स्मृतेः सिद्धं, न त्वनुभवविषयत्वं नाप्यस्य विषयस्य पूर्वानुभवविषयीकृतत्वमिति निश्चय एषः ॥

ननु यदि स्मृतिज्ञाने ऽनुभवस्य सत्यतः प्रकाशः स्यात्तन्मुखेन च तद्विषयस्य तदा भवेद्भवदुक्तेरवकाशः । यावता स्मृतिर्विकल्परूपत्वात्केवलमप्रकाशमानमेवानुभवं तद्विषयं चाध्यवस्यति । तदियं भ्रान्तिस्वभावा तत्र को ऽयं निर्बन्धः । तदेतद्दर्शयति शङ्क्यमानत्वेन ।

(३) अथातद्विषयत्वे ऽपि स्मृतेस्तदवसायतः ।
दृष्टालम्बनताभ्रान्त्या

न तद्दर्शनं नापि तद्विषयः स्मृतेर्विषयस्तथापि तूभयमध्यवसीयते भ्रमरूपतया स्मृतेः ॥

एतन्निराकरोति ।

(४) तदेतदसमञ्जसम् ॥

अत्र कारिकयोपपत्तिमाह ।

(५) स्मृतितैव कथं तावद्भ्रान्तेस्स्वार्थस्थितिः कथम् ।
पूर्वानुभवसंस्कारापेक्षा च किमितीष्यते ॥

अनुभूतस्यानुभवप्रकाशितस्य विषयस्याप्रमोषो ऽनपहारस्तथैव प्रकाशनं यद्वैतत्स्मृतेरात्मीयं रूपं तथा प्रकाशनाभावे

* परप्रकाशनात्मकं यन्निजरूपं तत्प्रकाशनमित्यर्थः । तत्र परस्य प्रकाशने यः संसर्गः सविषयित्वव्यपदेशभाक् । यश्च तेन संसर्गेण विषयसंपृक्ते प्रकाशने स्वस्यैव संबन्धः स भेयितेत्युच्यते । ततश्च भेयित्वविषयित्वाभ्यां स्वेन विषयेण च संपृक्तत्वं प्रकाशनस्य स्वपरप्रकाशत्वमित्युक्तं भवति ।

† स्वप्रतियोगिकं स्वस्मिन् भेयत्वं ज्ञानान्तरभेयत्वेन न विरुद्धमिति, तेन स्वाभासस्याप्यनुभवस्य स्मरणभासत्वं संभाव्यतइति भावः ।

* ज्ञानान्तरभास्यत्वासमानाधिकरणस्वभास्यत्वमेव स्वाभासत्वमित्याशयः । "ननु घटं जानामीत्यनुव्यवसायभास्यत्वस्य घटइत्याकारकव्यवसाये स्वाभास्ये सत्त्वेनाव्याप्तिरिति चेत्,, मैवम् । व्यवसाये ऽनुव्यवसायविषयत्वस्यैव स्वीकारात्, अभिलापदर्शनेन तस्यैवौचित्याद्, भेयत्वस्य कल्पकाभावादिति निरूपितं पूर्वपक्षविवृतिटिप्पण्याम् ।

† भेयत्वं च तादात्म्यतुल्ययोगक्षेममतस्तस्य नाधाराधेयभावनियामकत्वं संभवतीति भावः ।

Digitized by Google

विघटेततमाम् । किं च भ्रान्तावसद्रूपाकारो वा प्रख्याति । न तु तथार्थः स्वीक्रियते, तस्याप्रकाशनात् इति तथा ऽर्थो न व्यवस्थापित एव प्रकाशनात्मा हि व्यवस्थापना । ततश्च स्मरणादभिलाषेण कथमर्थविषयो व्यवहारः । न च तदप्रकाशने संस्कारजत्वेन किं चित्कृत्यम् । तद्धि सादृश्यं लब्धुमवलम्ब्यते । न चानुभवेन विषयप्रकाशनात्मना स्मृत्यभिधानाया भ्रान्तेः किं चिदपि सादृश्यमस्ति सर्वथा विषयमस्पृशन्त्याः ॥

ननु यो ऽनुभवो यश्च तद्विषयः स यतस्तया ऽध्यवसीयते ततोंऽशात्सादृश्यमनुभवेन स्मृतेः तत्सिद्धये च संस्कारपरिग्रहः । अध्यवसीयत इति किमुच्यते, प्रकाश्यत इति चेत्, न भ्रान्तित्वं न प्रकाश्यत इति चेत्, पुनरपि विषयो न स्पृष्ट एवानयेति सादृश्यमपि शब्दगडुमात्रम् । तदेतद्दर्शयितुमाह ।

(६) भ्रान्तित्वे चावसायस्य न जडाद्विषयस्थितिः ।

इह स्मृतेरन्यस्य वा भ्रान्तिबोधस्य स्वसंवेदनांशे प्रकाशमाने न भ्रान्तिता । तत्र वैपरीत्याभावात् । यस्तु तत्राध्यवसीयते स्वाकारः स विपरीततया ऽस्वाकारत्वेनार्थतयेति तत्रांशे भ्रान्तिता । स चांशोऽर्थलक्षणो न स्मृत्या ऽन्यया वा भ्रान्त्या स्पृश्यते तत्रासौ तूष्णीकामिति बलादेव तत्रांशे जडत्वमस्या आयातम् । घटज्ञानस्येव पटे । न च जडेन विषयस्य किं चित्कृतम् । ततश्चार्थविषयो व्यवहारो विलुप्येत ॥

(७) ततोऽजाड्ये निजोल्लेखनिष्ठान्नार्थस्थितिस्ततः ॥

अथ तु तमवसायरूपं स्वसंवेदनांशं स्वाकारं वा ऽवलम्ब्याजडत्वमस्याः । एवमप्यजाड्ये निजं स्वसंवेदनमुल्लेखश्च स्वाकार इतीयत्येषा परिनिष्ठिता स्मृतिरिति विषयस्य नामापि ग्रहीतुमशक्नुवतः ततः स्मृत्यध्यवसायात्कथं विषयस्य व्यवस्थापनं व्यवहार्यत्वसम्पादनसामर्थ्यम् ॥

संस्कारे सत्यपि स्मृतिर्न कथं चन घटते, ततश्च परस्परसंगतिहीनानि सकलानि ज्ञानानीति यदुक्तं श्लोकपञ्चकेन तदिदानीं प्रकृते योजयति ।

(८) एवमन्योन्यभिन्नानामपरस्परवेदिनाम् ।
ज्ञानानामनुसन्धानजन्मा नश्येज्जनस्थितिः ॥

जनस्य लोकस्य या का चन व्यवहारस्थितिः सा सर्वज्ञानानां यदनुसंधानं एकविषयभावोपपन्नस्मृतितापत्तिरूपं तदायत्ता । तथाहि स्मरणनिबन्धनः सर्वो व्यवहारः । प्रथममपि हि प्रत्यक्षज्ञानमहमिति पूर्वापररूपानुसन्धानेन स्मरणानुप्राणितेन विना न घटते । प्रमातरि विश्रान्त्यभावादप्रत्यक्षत्वप्रसङ्गात् । एवं सुखादौ मन्तव्यम् । हानादानप्रेरणाभ्युपगमादयस्तु व्यवहाराः स्मरणमया एव । एवं ज्ञानानां यदनुसन्धानं ततो जायमाना जनस्थितिः । एवमिति पराभ्युपगमे सति नश्येत् नश्यतीति सम्भाव्यते । कुत इति चेद्विशेषणद्वारेण हेतुमाह । अन्योन्यं तावद्भिन्नानि ज्ञानानि । अन्यदनुभवज्ञानं अन्यदिदानीन्तनं ज्ञानं विकल्पाभिमतमन्यत्स्मरणसंमतं ज्ञानं तदेतानि स्वविषयप्रकाशमात्ररूपाणि परविषये जडान्धा * नेडमूककल्पानि । न चान्योन्यस्य प्रकाशरूपाणि । एवं न स्वरूपतो न वेद्यतो वैकीभावरूपमनुसन्धानमस्ति । अन्योन्यं च विषयविषयिभावो नास्ति, न च तुर्यं ज्ञातेयनिबन्धनमनुसन्धानाधायि सम्भाव्यते इति ध्वंसेरन्व्यवहाराः, न च ध्वंसन्तामिति भवदभीष्टशापमात्रात्ते ध्वंसन्ते । प्रकाशन्ते यतस्ततएतदापद्यते । एतदेव समर्थयितुमुव्यन्तव्यमिति ॥

एतच्चास्मदभिमतप्रकारेण विना विधेरप्यशक्यसमर्थनमिति दर्शयति ।

(९) न चेदन्तः कृतानन्तविश्वरूपो महेश्वरः ।
स्यादेकश्चिद्वपुर्ज्ञानस्मृत्यपोहनशक्तिमान् ॥

संवित्तावत्प्रकाशते इति तावन्न के चिदपह्नुवते । सा तु संविद्यदि स्वात्ममात्रविश्रान्ता । अर्थस्य सा कथं प्रकाशः । स ह्यर्थधर्म एव तथा स्यात् । ततश्चार्थप्रकाशस्तावत्येव पर्यवसित इति गलितो ग्राह्यग्राहकभावः । अतोऽर्थप्रकाशरूपां संविदमिच्छता बलादेवार्थोऽपि तद्रूपान्तर्गत एवाङ्गीकर्तव्यः । स चार्थप्रकाशो यद्यन्यश्चान्यश्च तच्च स्मरणमुपपन्नमिति । अत एक एवासावित्येकत्वात्सर्वो वेद्यराशिस्तेन क्रोडीकृत इत्येतदप्यनिच्छता ऽङ्गीकार्यम् । एवमपि सततमेवोन्मग्नेन निमग्नेन वा विश्वात्मना प्रकाशेत, तथा स्वभावत्वात् । न चैवम् । अतः स्वरूपान्त†र्भुडितमर्थराशिमपरमपि भिन्नाकारमात्मनि परिगृह्य कं चिदेवार्थं स्वरूपादुन्मग्नमाभासयतीत्यापतितम् । सैषा ज्ञानशक्तिः । उन्मग्नाभासंभिन्नं च चित्स्वरूपं बहिर्मुखत्वात्सच्छायानुरागाधायकं नवं ज्ञानमुक्तम् । एवमपि नवनवाभासाः प्रतिक्षणमुदयव्ययभाज इति सैव व्यवहारनिर्वहहानिः । तेन क्वचिदाभासे गृहीतपूर्वे यत्संवेदनं बहिर्मुखमभूत् तस्य यदन्तर्मुखं चित्स्वरूपत्वं तत्कालान्तरेऽप्यवस्थायु स्वात्मगतं तद्विषयविशेषो बहिर्मुखत्वं परामृशतीत्येषा स्मृतिशक्तिः । यच्च तथैवं भासयति स्मरति वा तद्वस्तुनः संविदा विश्वमय्या तादात्म्यवृत्तीति विश्वमयं पूर्णमेवेति नवं न किं चिदाभा-

* अनेडमूकस्तु वक्तुं श्रोतुमशिक्षित इत्यमरः ।

† भुडनिमज्जने तुदादिः । स्वरूपान्तर्निमग्नमित्यर्थः । बुडितमिति पाठे बुडसंवरणे इत्यस्य ।

Digitized by Google

सितं स्मृतं वा स्यादितीदमपि प्रवाहपतितमूरीकार्यम्। यत्किल तदाभास्यते तत्संविदो विच्छिद्यते, संविच्च ततः, संविच्च संविदन्तरात्, संवेद्यं च संवेद्यान्तरात्। न च विच्छेदनं वस्तुतः संभवतीति विच्छेदनस्यावभासमात्रमुच्यते। न च तदियताऽपारमार्थिकम्। निर्मीयमाणस्य सर्वस्यायमेव परमार्थो यतः। स एव परिच्छेदनात्परिच्छेद उच्यते। तदवभासनसामर्थ्यमपोहनशक्तिः। अनेन शक्तित्रयेण विश्वे व्यवहाराः। तत्र भगवत एव शक्तित्रयं यत्तथाभूतानुभवितृस्मर्तृविकल्पयितृस्वभावचैत्रमैत्राद्यवभासनम्। स एव हि तेनतेन वपुषा जानाति स्मरति विकल्पयति च। यथोक्तमाचार्यैरेव।

यद्यप्यर्थस्थितिः प्राणपुर्यष्टकनियन्त्रिते।
जीवे निरुद्धा तत्रापि परमात्मनि सा स्थिता॥

इत्यादि। एतासां ज्ञानादिशक्तीनामसङ्ख्यप्रकारो वैचित्र्यविकल्प इति तत्सामर्थ्यं स्वातन्त्र्यमपराधीनं पूर्णं महदैश्वर्यं तन्निर्मितब्रह्मविष्णुरुद्राद्यैश्वर्यापेक्षयोच्यते। तदेव चिद्वपुरित्येवं कृत्वा इयदायातम्। विश्वरूपतेति। तत एव च परिनिष्ठितैकरूपजडभाववैलक्षण्याज्ज्ञानादिशक्तियुक्ततामाहैश्वर्यमुपसंप्राप्तः। एतदनुपगमे न किं चिदिदं भासेतेति प्रसङ्गः। भासते तु। तस्मादेतदवश्यमङ्गीकर्तव्यमिति प्रसङ्गविपर्ययः। नश्येज्जगत्स्थितिः यद्येवं न स्यादिति प्राक्तनेन श्लोकेन सह प्रसङ्गः चेदित्यनेन तद्विपर्ययः सूचितः॥ ७॥

आदितः सूत्रश्लोकाः २३ व्याख्याताः

इति श्रीमदाचार्याभिनवगुप्तविरचितायामीश्वरप्रत्यभिज्ञासूत्रविमर्शिन्यां परदर्शनानुपपत्तिः॥

॥ इति तृतीयमाह्निकम्॥

॥ अथ प्रसन्नराघवनामकनाटकस्य ॥

॥ सप्तमोऽङ्कः ॥

ततः प्रविशति पुलस्त्यशिष्यः। परितो विलोक्यापरिशीलितसर्वविशेषोऽस्मि। तत् कथं पृच्छामि तस्य भवनं पुनर्विलोक्य कथमयं लङ्केश्वरमहामन्त्रिणो माल्यवतः परिचारकः करालकः। उच्चैः सखे करालक इतइतः।

प्रविश्य करालकः। मुने प्रणम्यसे।

मुनिः। समीहितं लभस्व। कथय तावन् मे विभीषणस्य भवनम्।

करालकः। किं तत्र।

मुनिः। आदिष्टोऽस्मि भगवता पुलस्त्येन कमपि संदेशमुपनेतुं पौत्रस्य।

करालकः। न तावदिदानीमिह विभीषणः।

मुनिः। कथय किमेतत्।

करालकः। एकदाभिप्रणमतो विभीषणस्य करात् सकौतुकं लिखिताक्षरपङ्क्तिपत्रमेकं गृहीतं लङ्केश्वरेण वाचितं च।

उदर्कभूतिमिच्छद्भिः सद्भिः खलु न दृश्यते।
चतुर्थीचन्द्रलेखेव परस्त्रीभालपट्टिका॥

मुनिः। अहो प्रभुविज्ञप्तिचातुरी विभीषणस्य।

करालकः। ततो विहस्यैकं लङ्केश्वरेणोक्तं नूनं केनापि भीरुणा भावितमेतत्। ख्यातं हि यत् किल।

परस्त्रीकुचकुम्भेषु कुम्भेषु परदन्तिनाम्।
निपतन्ति न भीरूणां दृष्टयः शरवृष्टयः॥

मुनिः। अहो निजचित्तवृत्तिभित्तिभूमिकानुसारीणि वाक्चित्राणि लोकस्य।

करालकः। ततः प्रणयकोपविषादमिदमाह लङ्केश्वरं विभीषणः।

यस्य त्र्यम्बकमौलिखेलदमलस्वर्लोककल्लोलिनी-
लीलालङ्घनलम्पटेन यशसा दिग्भित्तयः क्षालिताः।
सोऽपि त्वं जनकाधिराजतनयासङ्गाभिलाषः कथं
हा जातोऽसि पुलस्त्यसंततियशःशीतद्युतेर्लाञ्छनम्॥

मुनिः। सकौतुकम्। ततस्ततः।

करालकः। ततश्च।

कोपपाटलितलोलदृष्टिना
किंचिदुद्यमितखड्गयष्टिना।
रावणेन नयधर्मभूषण-
स्ताडितो हृदि पदा विभीषणः॥

मुनिः। हन्त नूनम्।

लङ्केश्वरेण दुष्टेन नयधर्मविभूषणः।
विभीषणस्य न परं विभवोऽपि पदा हतः॥

मुनिः। ततस्ततः।

करालकः। ततः कतिपयपरिवारेण विभीषणेन लङ्केश्वरं विहाय राम एव समाश्रितः।

मुनिः। स्वगतम्। अनुष्ठितं तर्हि पुलस्त्यसंदेशरहस्यं विभीषणेन। प्रकाशम्। भवान् पुनः किमधुना कर्तुकामः।

करालकः। अहमादिष्टोऽस्मि माल्यवता जानकीविरहविह्वलहृदयस्य लङ्केश्वरस्य मनोविनोदनाय केनापि चित्रकरेण विरचितं चित्रमिदं दृग्गोचरीकरणीयमिति।

मुनिः। विहस्य कथमित्थमासन्नमृत्यो लङ्केश्वरेण तादृशस्य महामन्त्रिणो माल्यवत एवमुपचरितुमुचितं तन्नूनं प्रस्तुतोचितमेव किमप्येतद्भविष्यति। नेपथ्ये।

Digitized by Google

रे रे चन्दनमिन्दुमण्डलशिलापट्टे समुद्घृष्यतां
रे रे चामरमुज्ज्वलैः शशिकरैः श्वेतं विनिर्मीयताम् ।
रे रे बालमृणालतन्तुलतिकासूत्रेण पाथोजिनी-
पत्त्रस्थैरुदबिन्दुभिर्मणिमयो हारः समासूत्र्यताम् ॥

मुनिः । सोपहासमात्मगतम् । यादृशोऽयं शीतोपचारस्तादृश एव सीतोपचारो लङ्केश्वरस्य भविष्यतीति । प्रकाशम् । कथमिदं विरहतप्तस्य दशकन्धरस्य शीतोपचारार्थमादिश्यन्ते निशाचराः ।

करालकः । खेचराश्च । इदानीं हि ।

अङ्गं लिम्पति चन्दनेन मृदुभिः शीतद्युतिः स्वैः करैः
किंचिच्चञ्चलतालवृन्तकलनव्यग्रो वसन्तानिलः ।
किंचायं नलिनीदलैर्वितनुते तल्पं प्रतीचीपति-
र्दैवैरित्थमनङ्गतप्तहृदयो लङ्केश्वरः सेव्यते ॥

मुनिः । स्वगतम् । अये अलीकवाग्डम्बरं निशाचरस्य ।

करालकः । नेपथ्याभिमुखमवलोक्य कथमयं प्रहस्तो राजद्वारमुपसर्पति तदस्य हस्ते चित्रपटमर्पयिष्ये । भवानपि समीहितं साधयतु । इति निष्क्रान्तौ ।

विष्कम्भकः ।

ततः प्रविशति रावणश्चित्रहस्तः प्रहस्तश्च ।

रावणः । स्वगतम् ।

राजल्ललाटफलका कमनीयकूजत्-
काञ्चीगुणप्रणयिनी धृतकेशपक्षा ।
हा किं करोमि मम सा हृदयं प्रविष्टा
नाराचयष्टिरिव पुष्पशिलीमुखस्य ॥

विमृश्य । अहो कथमद्यापि हठाहरणखिन्नां नितान्तकृशधूसराङ्गीमपि जानकीं जनस्थानस्थितामिवाहमखण्डमण्डनां पश्यामि । अथवोचितमिदम् ।

आचान्तकान्तिरुचिरैर्मयूखैरहिमत्विषः ।
धूसरापि कला चान्द्री किं न बध्नाति लोचनम् ॥

प्रहस्तः । अयि देव इदमालोक्यतां चित्तविनोदनं चित्रम् ।

रावणः । किं पुनरिहालिखितम् ।

प्रहस्तः । अयं तावत् तरलतिमिनिकरकरालकल्लोलकोलाहलोज्जागरः सागरः ।

रावणः । विलोक्य किमिदमुत्तरेण तरङ्गमालिनमनुतमालखण्डमाखण्डलधनुःसहस्रानुकारि कपिशयति गगनतलम् ।

प्रहस्तः । तदिदं सुग्रीवपालितं कपिकुलम् ।

रावणः । विहस्य । अयि वालिपालितमिति वक्तव्यम् । भवतु किं पुनरनेन । कौ पुनरिमौ कार्मुकधरौ ।

प्रहस्तकः । ताविमौ रामलक्ष्मणौ ययोरग्रजस्य बाणपातविलसितेन सुग्रीवपालितमधुना कपिकुलम् ।

रावणः । अनाकर्णितकेन । कः पुनरयं नितान्तकृशकमनीयतनुरमन्दमन्दराघातनिर्मन्थनोत्थिततरलतरङ्गदूरविक्षिप्तशंकरशिरःशेखराधिरोहणकुतूहली कलानिधिरिव तरङ्गमालिनस्तटभुवमधिशेते ।

प्रहस्तकः । स एव लङ्कागमनकुतूहली निजकुलगुरुं सागरमुपचरितुं कुशशयनविन्यस्तगात्रः प्रथमो दाशरथिः ।

रावणः । विहस्य कथमित्थमेव जानकीलाभकौतुकी सोऽयमस्मानप्युपचरिष्यति ।

प्रहस्तः । इतो विलोक्यतामयं रामनाराचनिर्मुक्त * बहलानलहेलातरलदीनमीननिकरपरिवारः पारावारः ।

रावणः । कौ पुनरिमौ ज्येष्ठतापसस्य सादरं वानरवीरैः पार्श्वपरिसरमानीयेते ।

प्रहस्तकः । अयं तावत् सागर एव । अयमपि देवस्यैवेत्यर्धोक्ते । अथवा किमस्य बन्धुविरोधिनो नामग्रहणेन ।

रावणः । कथमयं बिभीषणोऽस्मद्विरोधेन राममाश्रयति । भवतु ।

निशाचरशिरोरत्नरञ्जिताङ्घ्रिशिरोरुहः ।
प्रियोऽपि दशकण्ठस्य नैष दर्शनमेष्यति ॥

रावणः । सकौतुकम् । किं पुनरिदमक्षरपङ्क्तिद्वयम् ।

प्रहस्तः । नूनमिदं समुद्रबिभीषणौ प्रति लक्ष्मणस्य वचनद्वयं भविष्यति ।

रावणः । एकं तावद्वाचय ।

प्रहस्तः । वाचयति ।

त्रासं मुञ्च समुद्र कोपदहनो रामस्य पास्यत्ययं
बन्दीभूतसुरेन्द्रसुन्दरदृशामश्रूत्करमुद्रं पयः ।
कामं ते मकरीगणो विहरतामेतस्य लङ्केश्वर-
स्त्रीगण्डस्थलपत्त्रभङ्गमकरीविध्वंसिनः सायकाः ॥

रावणः । अन्यदपि वाचय ।

प्रहस्तः । वाचयति ।

अत्रैवास्य विभीषणस्य शरणापन्नस्य मूर्ध्ना नते-
रानृण्यं विदधात्ययं रघुपतिर्लङ्काधिपत्यश्रियम् ।
एतस्यैव भुजाविह प्रतिभुवौ सुग्रीवराज्यार्पण-
त्रैलोक्यप्रथमानसत्यचरितौ सर्वे वयं साक्षिणः ॥

रावणः । अहो वाग्डम्बरैकसारता कनिष्ठतापसस्य । भवतु किं पुनरिदं मध्येसमुद्रमालोक्यते ।

प्रहस्तः । स एष कपिकुलोन्मूलितशैलशिखरनिर्मितः का-

* रामनाराचनिवहबहलानलेति वा पाठः

कुत्स्थकुलकीर्तिप्रसक्तिप्रबन्धः सेतुबन्धः ।

रावणः । अहो चित्रकारस्य चातुरी यदलीकमपि सत्यमिव दर्शितवान् ।

प्रहस्तकः । कथमद्यापीदमलीकमिति संभावना देवस्य ।

नेपथ्ये कलकलः ।

रावणः । किमेतत् ।

प्रहस्तः ।

एषामयं रामचमूचराणां
दर्पोद्धतानां कपिकुञ्जराणाम् ।
नवोद्गतानामिव नीरदानां
कोलाहलः कोऽपि समुज्जिहीते ॥

प्रहस्तः । तदिदं शङ्कितव्यं प्रतिविधातव्यं वा ।

रावणः । आः किमिह शङ्कया प्रतिविधानेन वा । अनेन हि ।

कोलाहलेनोल्लसता कपीनां
मनो मदीयं मुदमेव धत्ते ।
मन्दोदरीभूषणनूपुराणां
महामणीनामिव शिञ्जितेन ॥

प्रविश्य मन्दोदरी । जेदुजेदु देवो * ।

रावणः । देवि इत आस्यताम् ।

मन्दोदरी । यथोचितमुपविश्याधोमुखी तिष्ठति ।

रावणः ।

भ्रूपालकं स्मितपराजितचन्द्रलेखं
दृग्लीलया कुवलयश्रियमादधानम् ।
एतन् मुखं दिविषदामिव दुर्निरीक्ष्यं
तन्वङ्गि मामिव मुधा किमधः करोषि ॥

प्रहस्तकः । देव कपिसेनाकोलाहलचिन्तयैव नूनमधरीकृतमुखी देवीति तर्कयामि ।

रावणः । आः क एष चिन्ताविषयः ।

इयं लीलालोलाङ्गदभुजलता नीलचिकुरा
समुन्मीलत्तारा कुमुदहसिता चारुनयना ।
प्लवङ्गानां सेना युवतिरिव तारापतिमुखी
ममाग्रे कन्दर्पं प्रकटयितुमद्य प्रभवति ॥

मन्दोदरी । देव अण्णंपि अत्थि कारणं अज्ज हि मए देवस्स सउणणिरूवणत्थं गिरिसिहरगहणगब्भट्ठिदं सबरपल्लिं पट्ठाविदा णिअपरिआरिआ ताए अ कीए वि सबरकुडुंबिणीए णिअघरपेरन्तवासिणं केसरिकिसोरअं उल्लावअन्तीए एरिसं वअणमाअण्णिदम् ।

मा होहि णाअवइणो परिहवमेत्तेण गव्वणिव्वूढो ।
वसुहमिमं गिरिसंकडं मइन्द सरहस्स णन्दणो पत्तो *॥

रावणः । किमिह विषादस्थानमस्मान् प्रत्युदासीनमेवैतत् तथाहि ।

मा भव नागपतेः परिभवमात्रेण गर्वनिर्व्यूढः ।
वसुधामिमां गिरिसंकटमयीं मृगेन्द्र शरभस्य नन्दनः प्राप्तः ॥

प्रहस्तकः । देवान्यथा घटमानमिदम्

मा भव नागपतेः परिभवमात्रेण गर्वनिर्व्यूढः ।
वसुधामिमां गिरिसंकटमयीं दशरथस्य नन्दनः प्राप्तः ॥

रावणः । आः केयं निसर्गनिःशङ्के लङ्केश्वरे मयि शकुनोपश्रुतिपरीक्षा ।

नेपथ्ये ।

हेलास्फालितरामलक्ष्मणधनुर्ज्यावल्लरीझल्लरी-
झाङ्कारप्रसरप्रकण्ठपुलकप्राग्भारनीरन्ध्रिताः ।
व्यावल्गत्कपिकण्ठकाण्डकदनक्रीडत्कृपाणाञ्चल-
स्फूर्जद्दुर्जयदोर्बलैकचपलाश्चञ्चन्ति रात्रिंचराः ॥

रावणः । सहर्षम् । अये निशाचरवीरविजयोत्तरः समरः ।

पुनर्नेपथ्ये ।

अग्रेसरी रघुपतेः परिणद्धपाक-
किम्पाकपाटलमुखी कपिवीरसेना ।
निःशेषमापिबति राक्षसवीरचक्रं
प्रातः प्रभेव तपनस्य तमिस्रजालम् ॥

रावणः । आः कथमुत्कण्ठायितं मर्कटैः । उच्चैः कः कोऽत्र भोः । मदाज्ञया ।

कृत्वा विनिद्रमपनिद्रभुजावलेपः
प्रोद्दामरामसमराय स कुम्भकर्णः ।
आदिश्यतां निजभुजार्दितवज्रपाणि-
रद्यैव लक्ष्मणरणाय च मेघनादः ॥

पुनर्नेपथ्ये । देव भवदाशयविदा महामन्त्रिणा माल्यवता पूर्वमेव संविहितमिदम् । इदानीं हि ।

रामेण सार्धमयमुद्धतबाहुदर्पः
संग्रामभूमिमधितिष्ठति कुम्भकर्णः ।
रक्षःशिखण्डिहृदयोत्सवमेघनादः
सौमित्रिणा सममसावपि मेघनादः ॥

* जयतुजयतु देवः ।

* देव अन्यदप्यस्ति कारणं अद्य हि मया देवस्य शकुननिरूपणार्थं गिरिशिखरगहनगर्भस्थितां शबरपल्लीं प्रस्थापिता निजपरिचारका तया च कस्या अपि शबरकुटुम्बिन्या निजगृहपर्यन्तवासिनं केसरिकिशोरकं लालयन्त्या ईदृशं वचनमाकर्णितम् ।

मा भव नागपतेः परिभवमात्रेण गर्वनिर्व्यूढः ।
वसुधामिमां गिरिसङ्कटां मगेन्द्र शरभस्य नन्दनः प्राप्तः ॥

Digitized by Google

पुनर्नेपथ्ये ।

यद्दंष्ट्रावज्रघातैः समिति विदलिताः शैलकल्पाः कपीन्द्राः ।
यद्धाराचाम्बुवर्षैर्दवदहनसमाः शामिता वानरेन्द्राः ।
वीरोऽसौ कुम्भकर्णः स च समरकलाकौतुकी मेघनादः
संजातौ

रावणः । किमतःपरं वदिष्यति ।

पुनर्नेपथ्ये ।

हा पतङ्गौ दशरथसुतयोर्दारुणौ बाणबन्धौ ॥

मन्दोदरीरावणौ मूर्च्छतः ।

प्रहस्तकः । देव समाश्वसिहिसमाश्वसिहि ।

रावणः । समाश्वस्य देवि समाश्वसिहिसमाश्वसिहि ।

मन्दोदरी । समाश्वस्य । परित्ताअदु मं अज्जउत्तो एसा णिमग्गम्हि सोअतिमिरे* ।

रावणः । अप्यलं कातरतयायं चन्द्रहासचन्द्र एव शोकतिमिरादुद्धरिष्यति भवतीम् । पुनरुत्थाय खड्गमुद्यम्य पश्यायमसौ मे ।

भिन्नप्रभिन्नसुरकुञ्जरकुम्भमुक्त-
मुक्ताफलप्रकरकैः† कलिताधिवासः ।
अद्यैव खेचरनिशाचरलोचनाना-
मुन्मीलयन् मुदमुदञ्चति चन्द्रहासः ॥

इति प्रहस्तेन सह निष्क्रान्तः ।

मन्दोदरी । अये अच्चरिअं समरसंरम्भविलोअणविम्हअत्थिमिदमिदं विज्जाहरमिहुणं किम्पि मन्तेदि तेण हि अज्जउत्तस्स विजअत्थं अहंपि णिअकुलदेवदाओ अच्चिदुं गच्छम्हि‡ ।

इति निष्क्रान्ता ।

ततः प्रविशति विद्याधरमिथुनम् ।

विद्याधरी । अज्जउत्त को इमो रणरहसविअसन्तपुलअभरकुडुमलिदभुअवणो कविचमूचक्कमहिवट्टदि§ ।

विद्याधरः । प्रिये स एष रामसमरकौतुकी दशकण्ठः ।

विद्याधरी । कोउण इमो अंजणपुंजच्छविसरीरो कविवीरो तस्स सम्मुहं परावट्टदि‖ ।

विद्याधरः । प्रिये स एष विचित्रसमरशीलो नीलः ।

विलोक्य सविस्मयमहो ।

वक्षस्थले झगिति* नीलकरोज्झितेन
नीलाचलस्य शिखरेण कृतप्रहारः ।
लङ्केश्वरः स्मरति नूनमसौ वसन्त-
नीलोत्पलप्रहरणं हरिणेक्षणानाम् ॥

पुनः सकौतुकं पश्यपश्य ।

नीलोऽयं दशमुखपाणिपङ्कजाना-
मङ्केषु भ्रमरतुलां भ्रमन् बिभर्ति ।
अप्येको दशसु किरीटपीठिकासु
द्राक् प्रेङ्खन्ननुभवतीन्द्रनीललीलाम् ॥

विद्याधरी । को उण इमो णिसाअरेन्द्रेण समं समरसाहसमङ्गीकरिअ चिट्ठदि† ।

विद्याधरः । स एष स्वामिपक्षपाती बिभीषणः ।

विद्याधरः । सविषादं हन्त भोः ।

येयं बिभीषणे शक्तिर्मुक्ता क्रूरेण रक्षसा ।

विद्याधरी । अह किं ताए‡ ।

विद्याधरः ।

लक्ष्मणेन गृहीतेयं प्रियेव निजवक्षसा ॥

विद्याधरी । हद्धिहद्धि§ ।

विद्याधरः ।

वर्षन् नैव समन्ततो दशमुखं चापच्युतैः सायकैः
सौमित्रिं च विसंज्ञमङ्कनिहितं नेत्रच्युतैरम्बुभिः ।
एतत् तर्कय हर्षशोकतरलाः कुर्वन् कपीनां दृशो
रामश्चामलकेलिवीरकरुणाभ्यामिश्रतां गाहते ॥

विलोक्य । कथमपगत एव रामबाणपीडितो दशकण्ठः ।

नेपथ्ये ।

हा वत्स लक्ष्मण विकासय नेत्रपद्मं
मागादिदं युगपदेव समस्तमस्तम् ।
भाग्यं दिवाकरकुलस्य च जीवितं च
रामस्य किंच नयनाञ्जनमूर्मिलायाः ॥

विद्याधरः । हन्त सोऽयमनुजवत्सलस्य रामस्य विलापः ।

नेपथ्ये । देव समाश्वसिहिसमाश्वसिहि ।

विद्याधरी । कहं सुग्गीवेण समासासीअदि रामचन्दो ता किं दाणीमालविस्सदि‖ ।

विद्याधरः । आकर्णयामस्तावत् सुग्रीवेण समाश्वास्यमानः किमाह रामः ।

---

* परित्रायस्व मामार्यपुत्र एषा निमग्नाऽस्मि शोकतिमिरे ।

† मुक्ताफलैर्विचलितैः कलिताधिवास इति वा पाठः ।

‡ अये आश्चर्यं समरसंरम्भविलोकनविस्मयस्तिमितमिदं विद्याधरमिथुनं किमपि मन्त्रयति । तेन हि आर्यपुत्रस्य विजयार्थमहमपि निजकुलदेवता अर्चितुं गच्छामि ।

§ आर्यपुत्र कोऽयं रणरभसविलसत्पुलकभरकुड्मलितभुजवनः कपिचमूचक्रमभिवर्तते ।

‖ कः पुनरयमञ्जनपुञ्जच्छविशरीरः कपिवीरस्तस्य संमुखं परापतति ।

* किमपीति वा पाठः ।

† कः पुनरयं निशाचरेन्द्रेण समं समरसाहसमङ्गीकृत्य तिष्ठति ।

‡ अथ किं तस्याः ।

§ हा धिक् हा धिक् ।

‖ कथं सुग्रीवेण समाश्वास्यते रामचन्द्रस्तत् किमिदानीमालपिष्यति

Digitized by Google

नेपथ्ये । सखे सुग्रीव कथमाश्वास्यते ।

अयि राघवाविति सुधामधुरं
विनिपीय पौरमुनिलोकवचः ।
अयि राघवेति गरलप्रतिमं
कथमद्य रामहतकः पिबतु ॥

अपिच ।

कनीयस्या मातुः कृतचरणपातः कथमहं
सहिष्ये मत्पार्श्वे विफलपरिवर्तं नयनयोः ।
अये शान्तं पापं कठिन इव चेज्जीवितुमना
विना वत्सं रामः पुनरयमयोध्यां प्रविशति ॥

विद्याधरः । अहह करुणैकार्णवो वर्तते । विमृश्य । कः पुनरिह प्रतीकारः । विचिन्त्य । अथवा का प्रतीकारकथा वक्रो हि विधिः ।

विद्याधरी । वक्कदरोत्ति भणिज्जं । इदं पेक्ख णं इमो वाणरो ज्जेव्व कोवि लङ्केसरकिदसंधाणो करकलिदसेलसिहरो रामसंमुहं ज्जेव्व परिवट्टदि * ।

विद्याधरः । कर्णौ पिधाय शान्तं पापम् । अयि मुग्धे मैवं वादीः । अयं हि ।

महौषधीनामाधारं भूधरं गन्धमादनम् ।
आदाय लक्ष्मणप्राणत्राणायाभ्येति मारुतिः ॥

पुनर्विलोक्य । सहर्षम् ।

आमोदमाघ्राय महौषधीनां
सौमित्रिरुन्मीलितपद्मनेत्रः ।
भूयोऽपि चक्रीकृतचारुचापः
करोति रामं परिपूर्णकामम् ॥

विद्याधरी । कहं पुणोवि रामरणकोदूहलफुल्लन्तभुअमण्डलो णिसाअराखण्डलो परावडिदो ज्जेव्व † ।

विद्याधरः । प्रिये तदिदानीं सावधानं विलोकय तुलाधिरोहः खल्वयं वीरलक्ष्म्याः । यत्राम रामरावणयोः समर इति ।

विद्याधरी । कहं उण सअललोअवीरस्स रामचन्दस्स अनेकवीरपरिहूदस्स रावणस्स तुलाधिरोहो वीरलच्छीए हविस्सदि ‡ ।

विद्याधरः । प्रिये न जानासि । कथं दशकण्ठं विना ।

विन्यासं नाकनारीकुचकलशलसत्कुङ्कुमन्यासकाना-
मस्पृष्ट्वा मार्ष्टुमासीदसिकलहकलाकोविदः को विदग्धः ।
भिन्नस्वर्गेभकुम्भस्थलबहलगलन्मौक्तिकव्यक्तहासः
कस्याक्रीडत् कराग्रे त्रिदशपतियशश्चन्द्रहासश्चन्द्रहासः ॥

अपिच ।

किं ब्रूमो दशकन्धरं निजचमूरक्षाकपाटीभव-
द्वक्षःपीठपतत्कठोरकुलिशाघातेषु जातस्मितम् ।
व्योमाभोगसरोविलासिनि वने यत्पाणिपङ्केरुहां
कैलासेन शिरःस्थितेन्दुकलिकोत्तंसेन हंसायितम् ॥

नेपथ्ये ।

हेलोन्मूलितचन्द्रचूडगिरयस्त्रैलोक्यदत्तापदो
लङ्कातङ्कहराः पुरन्दरपुरस्त्रीवृन्दबन्दीकृतः ।
वैदेहीकुचकुम्भकुङ्कुमरसव्यासङ्गबद्धस्पृहाः
सोत्कण्ठं दशकन्धरस्य जयिनः खेलन्ति दोःकेलयः ॥

पुनर्नेपथ्ये ।

हेलोन्मूलितचन्द्रचूडधनुषस्त्रैलोक्यदत्ताभया
लङ्कातङ्ककराः पुरन्दरपुरस्त्रीवृन्दबन्दीमुचः ।
वैदेहीकुचकुम्भकुङ्कुमरसव्यासङ्गलब्धोत्सवाः
सोत्कर्षं रघुनन्दनस्य जयिनः खेलन्ति दोःकेलयः ॥

विद्याधरः । नूनमयं राक्षसवानरयोर्निजस्वामिवर्णनानुसारी व्याहारः ।

विद्याधरी । कहं उण रहट्ठिदेण रावणेन समं भूमिट्ठिदस्स राहवस्स समरो हविस्सदि * ।

विद्याधरः । प्रिये पश्यानीत एव मातलिना पुरुहूतरथः । अधिष्ठितश्च विनयाभिरामेण रामेण ।

नेपथ्ये । अये कथं ।

पूर्वमेव प्रयातानां खरमारीचवालिनाम् ।
सौजन्यमुग्धः पन्थानमधिवर्तितुमीहसे ॥

विद्याधरः । आकर्णयामस्तावदनेन रामवचनेन पीडितः किमाह रावणः ।

नेपथ्ये ।

खरः कीदृक् वाली कपिरपि च मारीचहतकः
कुरङ्गस्तान् हत्वा कथमपि कथं तृप्यसि मनाक् ।
अयं पश्य प्राप्तो दशवदननामा सुरपुरी-
करीन्द्राणां हेलारचितकदनः पञ्चवदनः ॥

अथवा ।

---

* वक्कतर इति भणितव्यम् । इदं पश्य नूनमयं वानर एव कोऽपि लङ्केश्वरकृतसंधानः करकलितशैलशिखरो रामसंमुखमेव परिवर्तते ।

† कथं पुनरपि रामरणकौतूहलफुल्लद्भुजमण्डलो निशाचराखण्डलः परापतित एव

‡ कथं पुनः सकललोकवीरस्य रामचन्द्रस्यानेकवीरपरिभूतस्य रावणस्य तुलाधिरोहो वीरलक्ष्म्या भविष्यति ।

* कथं पुना रथस्थितेन रावणेन समं भूमिस्थितस्य राघवस्य समरो भविष्यति ।

Digitized by Google

कालीकेसरिकेसरोज्ज्वलसटासाटोपसंपादित-
क्रोडाधामरकोमलानिललवाचान्तश्रमाम्भःकणः ।
श्रीमानेष दशाननो विजयते तस्यास्य पञ्चानन-
व्यापारप्रतिपादनैरपि यशः कीदृक् समुन्मीलति ॥

विद्याधरः । अये दशवदनवचनकुपितः किमपि वक्तुकाम इव लक्ष्यते लक्ष्मणः ।

नेपथ्ये । किं ते पञ्चाननतया दशाननतया वा । त्वमिदानीम् ।

दूरोन्मुक्तमदो बिभीषण इव न्यञ्चच्छिरःशेखरः
स्वच्छन्दं चरणारविन्दयुगले रामस्य भृङ्गो भव ।
रे नक्तंचर कुम्भकर्ण इव वा कर्णान्तचक्रीभव-
च्चापोत्सङ्गविमुक्तबाणदहने सद्यः पतङ्गो भव ॥

विद्याधरी । पेक्खपेक्ख इदो सरन्धआरं वित्थारअन्तेण णिसामुहायिदं दसमुहेण * ।

विद्याधरः । नन्वितस्तदेव निजविशिखमयूखधारया विनिवारयता चन्द्रायितं रामचन्द्रेण । पुनः सकौतुकम् । अये नूनमयं दिव्यास्त्रलीलया प्रतिहतदिव्यास्त्रं निकृत्तचापं रावणं किमपि वक्तुकाम इव रामः ।

नेपथ्ये ।

निकृत्तचाप इति मा संक्षोभतरलो भव ।
शस्त्रमन्यदपि स्वैरं ननु रे समरे कुरु ॥

विद्याधरी । आकण्णेअदु दाव किं दाणीं भणादि रावणो † ।

नेपथ्ये ।

आकर्णितस्तव दशानन बाहुदण्ड-
श्रीखण्डकाननफणी नवचन्द्रहासः ।
येन स्वनामभवसाम्यरुषेव पीतः
स्वर्लोकलोलनयनामुखचन्द्रहासः ॥

विद्याधरः । लीलादलितचन्द्रहासः सोत्प्रासः किमधुना वदति रावणं रामचन्द्रः ।

नेपथ्ये । अपि तावदधुना लङ्केश्वरः खिद्यते ।

विद्याधरी । किंपि दाणीं जंप्पिस्सदि रावणो ‡ ।

नेपथ्ये । कथमद्यैव लङ्केश्वरः खिद्यते । ननु रे ।

विध्वस्ता दशभिर्भुजैर्दशदिशः प्रत्येकमेते पुन-
र्भारायैव दशापरे मम गिरिप्राग्भारभाजो भुजाः ।
आराध्यः शशिमौलिरम्बुधिजले निद्राति नारायणः
किंकर्तव्यतयानयानुदिवसं लङ्केश्वरः खिद्यते ॥

* पश्यपश्येतः शरान्धकारं विस्तारयता निशामुखायितं दशमुखेन ।

† आकर्णयतु तावत् किमिदानीं भणति रावणः ।

‡ किमपीदानीं जल्पिष्यति रावणः ।

विद्याधरी । वअणमेत्तं दाणीं * ।

विद्याधरः । नहिनहि । पश्यपश्य नन्वयमिदानीमपि ।

धनुर्निस्त्रिंशादिप्रहरणगणच्छेदकुपितो
दशास्यः स्वान् मूर्ध्नो रघुपतिशरश्रेणिदलितान् ।
करैरेकैकैर्नभसि भृशमादाय युगपत्
विपक्षन्यस्यन्त्यैः सफलयति दोर्विंशतिमपि ॥

पुनः सकौतुकम् ।

एतान्यस्य यथायथा सुविशिखैः कृत्तानि रक्षःपते-
रुद्गच्छन्ति शिरांसि भीतिपुलकैः साकं दिवौकःपतेः ।
उन्मीलन्ति तथातथा रघुपतेरन्तः प्रमोदोर्मयः
कण्ठच्छेदविनोदकौतुकभरव्यग्रीभवच्चेतसः ॥

विद्याधरी । कहं अज्जावि णिसाअरेन्दबन्दीकिदसुरसुन्दरीणं दंसणं दुल्लहं जं इमस्स सीसाइं पुणोपुणोवि उम्मीलन्ति † ।

विद्याधरः । अलं तापेन क्रीडति खलु रामः सह रावणेन न पुनरद्यापि कुप्यति पुनर्विलोक्य ।

विद्याधरः । सकौतुकं प्रिये पश्यपश्य ।

अन्तः सान्द्रवहन्महेश्वरशिरः शीतांशुलेखोल्लसत्-
पीयूषद्रवशीकरव्यतिकरप्राग्भारभाजामिव ।
छिन्नानामपि रामचन्द्रविशिखैर्भूयः समुद्गच्छतां
काप्यन्यैव निशाचरेन्द्रशिरसां कान्तिः समुज्जृम्भते ॥

पुनः सकौतुकं विहस्य । अहो अस्य चित्तवृत्तिः ।

अयं यावद्यावत् पृथुहृदयपीठो रघुपतिः
शिरश्छेदासक्तो न दशवदनस्य व्यथयति ।
अयं तावत्तावद्वहति मुदमुच्चैर्दशमुखः
किलैतस्मिन् देवी जनकपतिपुत्री निवसति ॥

नेपथ्ये । अयि प्रिय राम ।

किं क्रीडसि शरस्तोमैर्नन्वेकेनैव पत्रिणा ।
परिपूरय नः कामं यशसा च जगत्त्रयम् ॥

विद्याधरः । नूनममी दिवौकसस्त्वरयन्ति रामचन्द्रं तच्छृण्वन् किमधुना वक्ष्यति रावणः ।

नेपथ्ये । रेरे मम भुजाः ।

मुक्त्वैकां हरशेखरप्रणयिनीं पीयूषभानोः कलां
दिक्पालावलिमौलिमण्डनमणीन् गृह्णीत सर्वानपि ।
तैः काञ्चीं रचितां चिराय वहतु श्रोणीतटे जानकी
गायन्ती कमनीयशिञ्जितभरैर्मद्विक्रमाडम्बरम् ॥

* वचनमात्रमिदानीम् ।

† कथमद्यापि निशाचरेन्द्रबन्दीकृतसुरसुन्दरीणां दर्शनं दुर्लभं यदस्य शीर्षाणि पुनःपुनरपि उन्मीलन्ति ।

विद्याधरः । विहस्य लङ्केश्वर समयज्ञोऽसि यद् भुजानेव नियुक्तवानसि । अधुना हि भुजमण्डलमेव परिवारवर्गस्ते । विलोक्य साकूतम् । अये कथमनेन दशाननवचनेन किंचित् कुपित इव दृश्यते जानकीकान्तः । पुनः सहर्षविषादं हन्त भोः ।

विकचकुसुमस्तोमाकीर्णे परागविभूषितः
शशिमणिशिलातल्पेऽनल्पे सलीलमशेत यः ।
अयमयमसौ रोषाकृष्टे क्षणं रघुनन्दने
भुवि दशमुखः शेते धूलिच्छटापरिधूसरः ॥

विद्याधरी । सहर्षम् । ता दाणीं जेव्व जणअणंदिणी रामचन्देण समं संगमिस्सदि * ।

विद्याधरः । अथ किम् ।

उद्दामहेतिवलयैः परिदीपिताशं
पश्य प्रविश्य जनकेन्द्रसुता हुताशम् ।
प्रत्युद्गता समधिकां द्युतिमावहन्ती
प्रातर्मयूखकलिकेव दिवाकरस्य ॥

विद्याधरी । पेक्खपेक्ख इमो असमसमरकदत्थिदं पदेसं अवतरदि रामचन्दो † ।

विद्याधरः । तदेहि कर्णामृतं पुलोमजायै निवेदयाव इति निष्क्रान्तौ ।

ततः प्रविशति रामः । सीतालक्ष्मणौ सुग्रीवविभीषणौ च । अये कथमुपगत एव भगवानम्बरमणिश्चरमाचलचूडम् ।

लक्ष्मणः । पश्चिमपयोधिवेलां च । नन्विदानीम् ।

उद्दामदिग्द्विरदचञ्चलकर्णपूर-
गण्डस्थलोच्चलदलिस्तबकाकृतीनि ।
नीलाभ्रभांसि मृगनाभिसमानभांसि
दिक्कन्दरेषु विलसन्तितमां तमांसि ॥

रामः । अये कथमुज्जृम्भितमेव निशाचरचक्रानुकारिणा तिमिरनिकरेण ।

विभीषणः । नन्वितोऽपि समुन्मीलितमेव रामनाराचानुकारिणा तुहिनकरकिरणप्रकरेण ।

सुग्रीवः । एवमेतत् । अमी हि ।

क्षीराब्धेर्लहरीषु फेनधवलाश्चन्द्रोपलेषु स्रवत्-
पाथःसीकरिणो विकासिकुमुदक्रोडे रजःपिञ्जराः ।
उन्मीलन्ति चकोरचञ्चुगहने छिन्नप्रकाण्डाश्चमत्-
कुर्वन्तः प्रियविप्रयुक्तरमणीगात्रे सुधांशोः कराः ॥

विभीषणः । एवमेतत् । इदानीं हि ।

शंकरार्धतनुबद्धपार्वती-
कुङ्कुमाक्तकुचकोरकाकृतिः ।
सूच्यते कमलिनीभिरुद्भ्रमत्-
पद्मकोशकरलीलया शशी ॥

लक्ष्मणः । सकौतुकमेवमेतत् । अहो ।

ध्वान्तौघे शितिकण्ठकण्ठमहसि प्राप्ते प्रतीचीमुखं
प्राचीमञ्चति किंच दुग्धलहरीमुग्धे विधोर्धामनि ।
एतत् कोकचकोरशोकरभसम्लानप्रसन्नोल्लसत्-
दृक्पातोर्मिशबलप्रचुम्बितमिव त्रैलोक्यमाभासते ॥

रामः । वत्सैवमेतत् । इदानीं हि ।

शीतांशुस्फटिकालवालवलयद्राग्गुल्लसत्कौमुदी-
वल्लीनूतनपल्लवाञ्चितमिव प्राप्य क्षणं ताम्रताम् ।
चञ्चन्मत्तचकोरचञ्चुघटनाच्छिद्रायमाणस्रुत-
क्षीरस्यन्दनिरन्तराप्लुतमिव श्वेतं वियद्भासते ॥

पुनर्विलोक्य सकौतुकं वत्स लक्ष्मण

पश्योदेति वियोगिनां दिनमणिः शृङ्गारदीक्षामणिः
प्रौढानङ्गभुजङ्गमस्तकमणिश्चण्डीशचूडामणिः ।
तारामौक्तिकहारनायकमणिः कन्दर्पसीमन्तिनी-
काञ्चीमध्यमणिश्चकोरपरिषच्चिन्तामणिश्चन्द्रमाः ॥

लक्ष्मणः । एवमेतत् । अयमसौ ।

स्वैरं कैरवकोरकान् विदलयन् यूनां मनः खेदय-
न्नम्भोजानि निमीलयन् मृगदृशां मानं समुन्मीलयन् ।
ज्योत्स्नां कन्दलयन् दिशो धवलयन्नुद्वेलयन् वारिधीन्
कोकानाकुलयन् तमः कवलयन्निन्दुः समुज्जृम्भते ॥

विभीषणः । सखे सुग्रीव पश्य ।

मयूखनखरत्रुटत्तिमिरकुम्भिकुम्भस्थलो-
च्छलत्तरलतारकाकपटकीर्णमुक्तागणः ।
पुरन्दरहरिद्दरीकुहरगर्भसुप्तोत्थित-
स्तुषारकरकेसरी गगनकाननं गाहते ॥

सुग्रीवः । सखे विभीषण पश्य ।

यः श्रीखण्डतमालपत्रति दिशः प्राच्याः स्मरक्ष्मापतेः
पाण्डुच्छत्रति दन्तपत्रति वियल्लक्ष्मीकुरङ्गीदृशः ।
केलिश्वेतसहस्रपत्रति रतेः किंच त्रपायोषितः
क्रीडाराजतसौधपात्रति शशी सोऽयं जगच्छत्रति ॥

रामः । निर्वर्ण्य ।

सितकिरणकपोलीमालिमालोकयन्ती
तिमिरविरहतापव्याकुलां व्योमलक्ष्मीम् ।
रजनिरमलतारासीकरैः सिक्तमस्याः
परिमलयति गात्रं चन्द्रिकाचन्दनेन ॥

* तदिदानीमेव जनकनन्दिनी रामचन्द्रेण समं संगमिष्यति ।
† पश्यपश्यायमसमसमरकदर्थितं प्रदेशमवतरति रामचन्द्रः ।

Digitized by Google

पुनर्विमृश्य स्वगतम् ।

इन्दुरिन्दुरिति किं दुराशया
बिन्दुरेष पयसो विलोक्यते ।
नन्विदं विजयते मृगीदृशः
श्यामकोमलकपोलमाननम् ॥

पुनः । सीतां प्रत्यपवार्य ।

नन्वि त्वद्वदनस्य विभ्रमलवं लावण्यवारांनिधे-
रिन्दुः सुन्दरि दुग्धसिन्धुलहरीबिन्दुः कथं विन्दतु ।
उत्कल्लोलविलोचने क्षणमयं शीतांशुरालम्बता-
मुन्मीलन्नवनीलनीरजवनीखेलन्मरालश्रियम् ॥

सीता । लज्जां नाटयति । विलोक्य सहर्षम् । अहो क-
हमिमो उम्मीलिदो जेव्व * ।

मुउलीकिदारविन्दो माणवईमाणवारणमइन्दो ।
तिहुअणणअणारविन्दो रअणीमुहचन्दणो चन्दो ॥

रामः । सखे सुग्रीव पश्यपश्य ।

इन्दोरस्य त्रियामायुवतिकुचतटीचन्दनस्थासकस्य
व्योमश्रीचामरस्य त्रिपुरहरजटावल्लरीकोरकस्य ।
कन्दर्पैणीपालस्फटिकमणिगृहस्यैतदाखण्डलाशा-
नासामुक्ताफलस्य स्थगयति जगतीं कोऽपि भासां विलासः ॥

सुग्रीवः । अये रघुनाथ पुनरुक्तमिदमाचष्टे । चन्द्रमसः
किरणविलासः ।

रामः । कथमिव ।

सुग्रीवः । नन्वत एव ।

कर्पूरादपि कैरवादपि दलत्कुन्दादपि स्वर्णदी-
कल्लोलादपि केतकादपि चलत्कान्तादृगन्तादपि ।
दूरोन्मुक्तकलङ्कशंकरशिरःशीतांशुखण्डादपि
श्वेताभिस्तव कीर्तिभिर्धवलिता सप्तार्णवा मेदिनी ॥

रामः । अलं तुच्छप्रायजल्पितेन ।

बिभीषणः । देव तुच्छप्रायमेव जल्पितं सुग्रीवेण यदुक्तं
मेदिनीधवलितेति । ननु त्रिलोकीतलमेव धवलितमिति
वक्तव्यं संप्रति हि ।

समुन्नतघनस्तनस्तबकचुम्बितुम्बीफल-
क्वणन्मधुरवीणया विबुधलोकवामभ्रुवा ।
त्वदीयमुपगीयते हरकिरीटकोटिस्फुरत्-
तुषारकरकन्दलीकिरणपूरगौरं यशः ॥

* कथमयमुन्मीलित एव ।
मुकुलीकृतारविन्दो मानवतीमानवारणमृगेन्द्रः ।
त्रिभुवननयनारविन्दो रजनीमुखचन्दनश्चन्द्रः ॥

रामः । अयि लङ्केश्वर भवानपि किष्किन्धानाथमतमेवा-
नुगतः । पुनर्विलोक्य सहर्षं सुग्रीवं प्रति ।

संरम्भोद्रिक्तनक्तंसमयदशमुखोच्चण्डदोर्दण्डहेला-
कैलासः सप्तलोकीजयमुदितमनोजन्मवादित्रशङ्खः ।
लोलाक्षीगण्डपालीलवणिमजलधेरुद्गतः फेनपिण्डः
पश्य व्योमावकाशं विशति विरहिणां दत्तशङ्कः शशाङ्कः ॥

निर्वर्ण्य स्वगतम् ।

अयं नेत्रादत्रेरजनि रजनीवल्लभ इति
भ्रमः कोऽयं प्रज्ञापरिचयपराधीनमनसाम् ।
सुधानामाधारः स खलु रतिबिम्बाधरसुधा-
रसासेकस्निग्धादजनि नयनात् पुष्पधनुषः ॥

लक्ष्मणः । आर्ये जानकि पश्यपश्य ।

आनन्दं कुमुदादीनामिन्दुः कन्दलयन्नयम् ।
लङ्घयत्यम्बराभोगं हनूमानिव सागरम् ॥

सीता । अये सुलक्खण लक्खण सो उण दाणिं कहिं
रहुउलकुडुम्बसन्तावसमणचन्दणो पवणणन्दणो * ।

लक्ष्मणः । आर्ये स एष रामचन्द्रेण बन्धुमानिन्दितुमयो-
ध्यायां प्रहितः ।

सीता । ता अह्मेहिं किंति विलम्बीअदि † ।

रामः । बिभीषणमुखमालोकते ।

बिभीषणः । निर्गत्य प्रविश्य च । इदं तत् पुष्पकाभिधानं
विमानरत्नमारुह्यताम् । सर्वे विमानावरोहणं नाटयन्ति ।

रामः । सकौतुकम् । अये तदिदं विमानरत्नं यत् किल
त्रिभुवनैकवीरः कुबेरानुजः कुबेरादाजहार ।

लक्ष्मणः । सामर्षम् । कथमयं किष्किन्धामाहिष्मतीपति-
भ्यां समभागविभक्तलक्ष्मीकोऽपि त्रिभुवनैकवीर इति व्यप-
दिश्यते ।

रामः । विहस्य वत्सैवमेतत् ।

तादृक्कठोरभुजयन्त्रनिपीडनेन
निःशब्दतामुपगतैर्दशकण्ठकण्ठैः ।
यत्कीर्तिघोषणमकारि चतुःसमुद्र-
वेलासु किं स वचसां विषयः कपीन्द्रः ॥

अपिच ।

कोपप्रदीप्तनिजलोचनदीपवह्नि-
निर्भिन्नसान्द्रतिमिरे स दशाननोऽपि ।
काराकुटीरकुहरे वसतिस्म यस्य
सोऽप्येष हैहयपतिर्विषयो न वाचाम् ॥

* अये सुलक्षण लक्ष्मण स पुनरिदानीं क्व रघुकुलकुटुम्बसंतापशमन-
चन्दनः पवननन्दनः ।

† तदस्माभिः किमिति विलम्ब्यते ।

Digitized by Google

किंतु परिभावय वत्स ।

यस्य द्राक्करवालकृत्तशिरसः कण्ठालवालस्थितां
चूडाचन्द्रमसं निपीड्य निबिडं सिञ्चन् सुधानिर्झरैः ।
स्वां मेने दशखण्डमण्डन इति ख्यातिं कृतार्थां हरः
पन्थानं दशकन्धरः स च कथंकारं गिरां गाहते ॥

निर्वर्ण्य । अये किमुच्यतेऽस्य खलु त्रिकूटगिरिशिखरकण्ठीरवस्य दशकण्ठस्य लोकोत्तराणि चरितानि ।

यद्दोःशायिनि चन्द्रशेखरगिरौ भारावतारोद्यम-
नागाधीशफणावलीमणिरुचां पूरे समुन्मीलति ।
जातास्तुल्यमकालबालतपनातामाश्चतस्रो दिशो
देवस्यापि रुषा तुषारकिरणोत्तंसस्य तिस्रो दृशः ॥

लक्ष्मणः । आर्य ।

मम मे मनसि भासतेऽधुना
मूर्तिमानिव मनोरथो रथः ।
नास्ति नो यदधिरोहलीलया
दूरमागतवतामपि श्रमः ॥

रामः । एवमेतत् । तथाहि

उल्लङ्घ्य नीरधिमतीत्य च दण्डकानि
नद्यौ च मेकलकलिन्दसुते व्यतीत्य ।
प्राप्ताः शिखण्डिशतखण्डितशाखिखण्ड-
मेते वयं शिखरिणां ननु चित्रकूटम् ॥

सीता । तिर्यग्विलोक्य । अहह कलिन्दणन्दिणि सच्चप्पसादासि जं पुणोवि णिअकुडुम्बस्स दिण्णदंसणासि *

रामः । अयि तदिदं निर्मुक्तविरोधश्वापदं भगवतो भारद्वाजस्याश्रमपदम् ।

लक्ष्मणः । एवमेतत् । अत्र हि ।

व्याजृम्भमाणवदनस्य हरेः करेण
कर्षन्ति केसरसटाः कलभाः किलैके ।
अन्ये च केसरिकिशोरकपीतमुक्तं
दुग्धं मृगेन्द्रवनितास्तनजं पिबन्ति ॥

अपिच ।

क्रीडन्माणवकाङ्घ्रिताडनशतैरुज्जागरस्य त्वचां
शार्दूलस्य नखाङ्कुरेषु कुरुते कण्डूविनोदं मृगः ।
चञ्चच्चन्द्रशिखण्डितुण्डघटनानिर्मोकनिर्मोचितः
किंचायं पिबति प्रसुप्तनकुलश्वासानिलं पन्नगः ॥

रामः । अये कथमयं संप्राप्त एव चक्रवाकरमणीसंरम्भसमयः प्रभातसमयः । तथाहि ।

* अहह कलिन्दनन्दिनि सत्यप्रसादासि यत् पुनरपि निजकुटुम्बस्य दत्तदर्शनासि ।

एते केतकधूलिधूसररुचः शीतद्युतेरंशवः
प्राप्ताः संप्रति पश्चिमस्य जलधेस्तीरं जराजर्जराः ।
अप्येते विकसत्सरोरुहवनीदृक्पातसंभाविताः
प्राचीरागमुदीरयन्ति तरणेस्तारुण्यभाजः कराः ॥

लक्ष्मणः । सकौतुकम् ।

सद्यः संघटमानकोकमिथुनव्याजेन पीनस्तन-
द्वन्द्वव्यञ्जितयौवनोज्ज्वलरुचो निर्माय दिक्कन्यकाः ।
दुर्दैवात्तरमालिकामिव झगित्याकृष्य भृङ्गावलीं
लक्ष्मीमम्बुजिनीजनस्य तनुते देवस्त्विषामीश्वरः ॥

सुग्रीवः । विभीषण पश्यपश्य ।

उन्मीलन्ति निशानिशाचरवधूप्रोच्चाट * नामान्त्रिकाः
मायं सालससुप्तपङ्कजवनप्रोद्बोधवैतालिकाः ।
फुल्लत्पङ्कजकोशगर्भकुहरप्रोद्भूतभृङ्गावली-
झाङ्कारप्रणवोपदेशगुरवस्तीव्रद्युतेरंशवः ॥

विभीषणः । एवमेतत् । तथाहि ।

आयान्त्या द्दिवसश्रियः पदतलस्पर्शानुभावादिव
व्योमाशोकतरोर्नवीनकलिकागुच्छः समुज्जृम्भते ।
आसन्नच्यवतंसविभ्रममसावाशाकुरङ्गीदृशा-
मुन्मीलत्तरुणप्रभाकरकरस्तोमः समुद्भासते ॥

रामः । प्रिये ।

एतत् तर्कय चक्रवाकसुदृशामाश्वासनादायिनः
प्रौढध्वान्तपयोधिमग्नजगतीदत्तावलम्बोत्सवाः ।
दीप्तांशोर्विकसन्ति दिङ्मृगदृशां काश्मीरपङ्कोदक-
व्यात्युक्षीचतुराः सरोरुहवनप्रोकेलिकाराः कराः ॥

अपवार्य । पश्यपश्य ।

शिथिलयति सरागो यावदर्को नलिन्याः
कमलमुकुलनीवीग्रन्थिमुद्रां करेण ।
प्रविकसदलिमालागुञ्जितैर्मञ्जुशब्दा
जनयति मुदमुच्चैः कामिनां कामिनीव ॥

सीता । विहस्य विलोक्य च । कहं इमो उम्मीलिदो ज्जेव्व ।

पुव्वगिरिपोम्मराओ पअडीकिदणअणसीअलसहावो ।
कुङ्कुमकिअङ्गराओ नलिणीजणवल्लहो देवो † ॥

रामः । प्रकाशम् । अये जानकि पश्य ।

* निर्वासनामान्त्रिका इति वा पाठः ।

† कथमयमुन्मीलित एव ।

पूर्वगिरिपद्मरागः प्रकटीकृतनयनशीतलस्वभावः ।
कुङ्कुमकृताङ्गरागो नलिनीजनवल्लभो देवः ॥

तरलतरतरङ्गभङ्गखेला-
बहलविलासविलोलहंसमाला ।
अमरपुरतरङ्गिणीयमम्बा
सुरनरमङ्गलकारिणी न दूरे ॥

सीता । सहर्षं तदेव पठति संस्कृतं प्राकृतं च

रामः । सहर्षं वत्स लक्ष्मण । इयमदूरे रघुकुलमङ्गलाङ्कुरप्ररोहकेदारधरणीतरङ्गिणी सरयूः । इयं च सरयूतरङ्गशीकरशीतलीकृतपरिसरा नगरीसीमन्तमणिरयोध्या ।

लक्ष्मणः । सहर्षम् । अयमसौ भरतानुयातस्त्वदभिषेकक्रमप्रतिर्भगवानरुन्धतीपतिः ।

दिलीपकुलमाणिक्यं सकलाशाविकासकम् ।
आविर्भवन्तं भास्वन्तं भवन्तं संप्रतीक्षते ॥

तेन पुष्पकादवतरामः ।

रामः । वत्स प्रतीक्षस्वेहैव तावत् सुलभसकलमण्डलालोकमाखण्डलाशामण्डनं भगवन्तं चण्डमरीचिं नमस्यामः । अञ्जलिं बद्ध्वा ।

प्राचीकुङ्कुमतिलकं पूर्वाचलरोहणैकमाणिक्यम्* ।
त्रिभुवनगृहैकदीपं वन्दे लोकैकलोचनं देवम् ॥

नेपथ्ये । अये वत्स रामभद्र ।

रामः । अहो अद्भुतम् ।

विकासयन्ती नितरां पद्मानीव मनांसि नः ।
प्रभेव भारती कापि भानुबिम्बाद्विजृम्भते ॥

नेपथ्ये ।

यशःपूरं दूरं तनु सुतनुनेत्रोत्पलवनी-
तमस्तन्द्राचन्द्रातप तप सहस्राणि शरदाम् ।
इयं चास्तां युष्मद्गुणकथनपीयूषपटल-
स्मितोत्सङ्गानन्दत्सुरनरभुजङ्गा त्रिजगती ॥

रामः । अनुगृहीतोऽस्मि ।

पुनर्नेपथ्ये । अन्यच्च ते किमाशास्महे ।

सुग्रीवः । अये तात दिनकर परिपूर्णमनोरथ एव रामभद्रः । अनेन हि ।

प्राप्ता निर्भरमुवर्तिर्निजगुणैराज्ञा पितुः पालिता
सुग्रीवश्च बिभीषणश्च परमां राज्यश्रियं प्रापितौ ।
संग्रामे दशकन्धरः सुररिपुर्नीतो यशःशेषतां
दृष्टो बन्धुजनश्च हर्षविगलद्बाष्पोल्लसल्लोचनः ॥

तथापीदमस्तु ।

आबालाद्वदनाम्बुजे तनुभृतां सारस्वतं जृम्भतां
देवे कौस्तुभधाम्नि चन्द्रमुकुटेऽद्वैता मतिः खेलतु ।
वाग्देव्या सह मुक्तवैशसरसा देवी च दीव्यादियं
शेषस्येव फणाञ्चनेषु सततं लक्ष्मीः सतां सद्मसु ॥

रामः । तदागच्छत पुष्पकादवतीर्य गुरुं बन्धुजनं पौरांश्चानन्दयाम इति सर्वे पुष्पकादवतरन्ति ।

जायन्तामविरामरामचरितक्रीडाभिरामाः सता-
मुन्मीलन्नवमालिकाविरचितस्रग्दामरम्या गिरः ।
याः कण्ठेऽपि निवेश्य पेशलधियो रोमाञ्चलीलाञ्चिताः
कान्ताबाहुलताविलासमहिमाश्लेषान् मृषा मन्वते ॥

इति निष्क्रान्ताः सर्वे ।

॥ इति श्रीजयदेवविरचिते प्रसन्नराघवनाम्नि नाटके ॥

॥ सप्तमोऽङ्कः समाप्तः ॥

॥ समाप्तोऽयं ग्रन्थः ॥

इन्दुप्रकाशाख्यनेकवार्त्तापत्रमुद्रितशुभसमाचारं दृष्ट्वातिप्रसन्नेन चेतसा दयासागरं सर्वशक्तिमन्तं जगत्स्रष्टारं विश्वेशं धन्यवादपूर्वकं भूयोभूयः प्रणम्य तत्समाचारं स्वीयसर्वसुहृज्जनकर्णातिथिं कुर्मः । तथाहि । अद्यत्वे परमेश्वरो जगद्धिताय एकं भिषग्वरं मुम्बय्याख्यपत्तने पश्चिमाशायामपरं भास्करमिव उदाययत् । सच भिषग्वरो भाऊदाजीतिविख्यातनामा इङ्ग्लण्डीयचिकित्साशास्त्रेऽतिप्रवीणोऽपि महोत्साहतया भारतवर्षीयचिकित्साशास्त्रेऽतिपरिश्रम्याभिनवान् नानाविधानौषधपथ्यपरिहारादिप्रकारानकल्पयत् । यथा भगवान् याज्ञवल्क्यः सहस्ररश्मिमुपास्याश्रुतपूर्वं श्रुतिराशिं जगति प्रकाशयामास । तत्र महाघोरस्य वातरक्ताख्यस्य मृत्योरिव महारोगस्य समूलनिवर्तकमेकमौषधं बुद्धिसुधासिन्धुमन्थनादमृतमिव निर्माय देवादीननेकजनान् प्राशयत् । तेन चाद्ययावद्दुःशावराः प्राणिनोऽमरकल्पा बभूवुः । तन्मध्ये पाठशालाध्यापकः प्रसिद्धवैयाकरणष्टांकेकरबालशास्त्री देवः । सचैतन्महारोगमहादंष्ट्रापतितो यमदंष्ट्रापातमनिशमिच्छन्नप्यतिबीभत्सगलद्व्रणवक्रशरीरघृणयेव मृत्युनापि दूरादेव त्यक्तः । परन्तु प्रोक्तेन भिषङ्मुकुटमणिना कृपाकटाक्षपातवशात् स्वसमीपमाहूय स्वौषधैरेव पुनर्नवकायः शशीव प्रायः पक्षान्तराल एव रोगभयान्मोचितः । सच वैयाकरणस्तस्य महानुभावस्य सदृशानुकूलं प्रत्युपकारं केवलात् तद्यशोमानाद्भगवतः शुभाशीःप्रार्थनाच्चान्यं न कमपि कर्त्तुं शक्नोमीति पत्रे मुद्रयामास । इदं तु परमद्भुतं, यदीदृशासाध्यकल्पस्य महारोगराक्षसस्योच्छेदायौषधं सुस्वादु सुपानं पथ्यपरिहारौ चात्यल्पतया सुकरौ । कालोऽपि स्वस्थतायै ऋतुद्वयाच्चाधिकोऽपेक्ष्यत इति । नूनमस्मै वैद्यराजायाद्भुत्वामानित्वश्रमसहिष्णुत्वभूतदयादिसद्गुणकलङ्घर्ययेत मायायुर्वेदरहस्यमादिगुरुणोपदेष्टुमारब्धम् । गुरुविप्रतपस्विद्-

* पूर्वाचलशेखरैकमाणिक्यमित्यपि पाठान्तरम् ।

गतानां प्रतिकुर्वीत भिषक् स्वभेषजैरितिस्वधर्मनिरतस्य तस्य चिकित्सकवरस्य सर्वसमाचारपत्रेषु प्रशंसायोग्यस्य सद्गुणा एव दिगन्तान् प्राप्ता आतुरानाहूय रोगबन्धनान्मोचयिष्यन्ति। अधुनाऽस्माभिरियद्देव करणीयत्वेनाध्यवसीयते यदेतदीयेदृक्परोपकारपाटवरूपलिङ्गदर्शनेनानुमितानामप्यन्यसर्वसद्गुणानां सामान्यत एव ज्ञाततया विशेषतः स्तोतुमशक्यत्वेन तस्य सत्पुरुषस्य स्तुतेः प्रति तद्विमातुरीश्वरस्यैव पुनःपुनस्स्तुतिस्ततश्चैतत्प्रार्थनं यदसौ देवद्विजप्रसादाद्दीर्घायुर्भूयादितिशम्।

बापूदेवशास्त्री टोंकेकर
राजारामशास्त्री कार्लेकर
बालशास्त्री रानडे
गोविन्ददेवशास्त्री टोंकेकर
शिवरामगोविन्द रानडे

THE MESSENGER CLOUD:

(Continued from page 254.)

LXVIII.

Now close beneath thee thou wilt see my home,
Where, flashing forth, the jewelled archway's glow,
North of my lord Kubera's royal dome,
With hues of glory mocks the heavenly bow.
There my love's flowers in dazzling beauty blow:
There in the midst the tall Mandara see
Bending the burden of her branches low
To touch her lady's hand: no child might be
Nurtured with tenderer care than that her darling tree.

LXIX.

There girt with emerald steps a bright lake gleams,
Where the gold lotus fires the lily's white:
The swans that sail upon its silver streams
Shall hail thy coming with renewed delight,
And love the cool waves better for the sight
That bids them linger near the pleasant shore,
Without a wish to seek in distant flight
The mountain lake that seemed so dear before,
That lovely mountain lake now scarce remembered more.

LXX

Deckt with smooth sapphires, rising from the fount,
A spot beloved by my young bride of old,
Sacred to rest and pleasure, stands a mount,
Which a thick plantain grove belts round with gold.
E'en now, dark cloud, as these sad eyes behold
Thy sombre mass girt by thy lightning's sheen,
They see the spot of which my tongue has told:
Back to my soul comes fresh that glorious scene,
The plantains' circling gold, the hillock's velvet green.

LXXI

Sweet clustering trailers, and each fairest flower
That charms the sense or captivates the eye,
Give grace and odour to my lady's bower.
The bright Asoka and the Kesar vie
For her caresses as my love walks by:
That asks the pressure of her foot, and this,
Wild for the joy for which I vainly sigh,
With me aspiring seeks a higher bliss,
To touch those perfect lips with a long amorous kiss.

LXXII

See, on a pedestal of crystal placed,
A golden column, very tall and fair,
With richest gems, like budding cane-shoots, graced,
Towers o'er the waving trees; and gleaming there,
The blue-necked peacock drinks the evening air;
And when my darling wanders forth alone,
He tries each art to drive away her care,
Dispreads his plumes and dances to the tone
Of the melodious chime made by her tinkling zone.

LXXIII

Led by these tokens thou wilt surely know
The once bright dwelling of my love and me,
When our glad lives were strangers yet to woe:
But altered now that happy spot may be,
Since the stern vengeance of my lord's decree
Has torn me far from all I loved away:
The lotus glories in the sun, but he
Leaves his sad mistress at the close of day
To mourn with folded blooms the light that made her gay.

LXXIV

Gently descending, on that hillock fall,
Not in full glory lest that form of thine
In all its splendour, all its might, appal
My timid lady. Let thy lightning shine
Like sportive fire-flies in a flashing line,
And to thy friendly eyes my darling show.
She stands within her chamber, most divine
Of all the works of God, with rosy glow
Of lips, with teeth of pearl, eyes of the startled roe.

LXXV

O, see her silent there, my second life,
Like a poor love-bird mourning for her mate,
My lonely, weeping, miserable wife,
Weeping at early morn, at evening late,
With bitter tears her banisht husband's fate.
Where hast thou seen a nymph so soft of mould,
So tender, loving, and disconsolate?
Sure the sad lady's spirit dwelt of old
In some frail lotus flower that shrank from rain and cold.

LXXVI

See, on her hand her faded cheek reclines,
Long hanging tresses veil her drooping head;
Swollen with tears her eye no longer shines,
And the bright colour of her lip is fled,
For dewy sighs have washed away the red.
Like the cold moon is she, sad, feeble, pale,
When o'er its face thy pall, dark cloud, is spread,
And all the silver beams, imprisoned, fail
To penetrate the shroud, to pierce the sombre veil.

LXXVII

Now as the sight of thee renews her woe,
She turns to sacrifice: from her wild eyes,

Digitized by Google

That picture forth my form, new torrents flow,
To see my mournful wasted image rise.
Then to her favourite bird she sadly cries:
'Dost thou remember, pet, when thou wast free ?
And is the mate, with whom, from summer skies
Down sailing, in the well-known roosting tree
'Twas once thy lot to rest, still dearly loved by thee ?'

LXXVIII

Or she will touch her lute with careless grace,
And with her low soft voice prepare to sing
Some little ballad of mine ancient race :
But soon the tears that flow from memory's spring
Mar the sweet music of the silver string.
Her thoughts will wander from the cherisht lay,
The notes of triumph will no longer ring,
And her melodious voice will die away
In some wild wailing strain meet for the evil day.

LXXIX

Then bravely struggling with her dark despair,
She turns away, and fondly numbers o'er
The faded garlands which her pious care
Twines every month that comes, above the door,
Counts to the happy day that will restore
Her husband ; and the thought, so passing sweet,
Brings light and rapture to her eye once more :
Her bosom swells, her pulses wildly beat,
And fancy hears the step of my returning feet.

LXXX

These cares by day assuage the mourner's grief,
But, Oh ! the night brings only woe and pain :
Be this the season for my love's relief ;
Till then, dear Cloud, thy soothing voice restrain,
And give thine aid when other help is vain.
When all is dark and still float softly near,
And ready access by her lattice gain,
Breathe thy sweet message in her sleepless ear,
And in the weary night my widowed darling cheer.

LXXXI

Then on her lonely couch, thin, anguish-worn,
Watching and weeping still she sadly lies,
Pale as the waning moon that flies the morn
When first the sunbeams fire the eastern skies.
She slowly counts 'mid tears and deep-drawn sighs
The long long weary hours that used to be
Like moments, praying that the sun may rise
To chase the lingering night that wont to flee
Like a quick flash of joy when it was passed with me.

LXXXII

But should my love her weary eyelids close,
Lulled by sweet thoughts and many a hopeful sign,
Let not thy thunder break her soft repose,
Nor sudden bid her wreathing arms untwine
Lest in her dreams they should be clasping mine :
Still let such dreams her aching bosom bless:
Then, when the sunbeams on her lattice shine,
With thy deep-sounding words the dame address,
And thus my longing love and tender hope express:

LXXXIV.

'O lonely mourner, from thy lord I speed
And to his distant home fond greetings bear.
'Tis mine the exile's weary steps to lead
In safety back to soothe his bride's despair :
'Tis mine, with thunder rolling through the air,
To wake the sigh for all he left behind,
The well-loved cot and wife still weeping there,
And urge his trembling fingers to unbind
The mourner's braid of hair for his long absence twined.

LXXXV.

Thy faithful lord on Rama's wood-crowned hill
Mourns the sad lot that severs him from thee ;
And in fond fancy he is with thee still
Though far away by hostile fate's decree.
Wasted with woe, he seems thy form to see
Worn, like his own, with tears that ever roll
From orbs that with his weeping eyes agree :
He feels the longing of thy kindred soul,
And counts thy sighs in those his breast can ne'er control.

LXXXVI.

He bids me now his loving message speak,
For far is he from all he holds most dear,
But O, what joy, might he but touch thy cheek
And softly whisper thus into thine ear :
'O pearless creature in my prison here
Signs of thy beauty meet me every hour :
I see the graces of thy form appear
Faintly reflected in each fairest flower
That twines her tender shoots around my lonely bower.

LXXXII.

When from my path the startled roedeer run,
Their eyes, sweet love, thy gentle glance recall :
The peacock's glories, gleaming in the sun,
Show like thy tresses glittering as they fall :
I see thine arching eyebrow in the small
Ripple upon the brook: the moon, ah me !
Brings back thy pure pale cheek : in these, in all
The fairest sights that nature boasts, I see
Faint emblems of the charms that meet in none but thee.

LXXXVIII.

Oft my love-guided hand essays to paint
Thy portrait on the rock with mineral dyes ;
And soon as fancy fondly sees a faint
Resemblance of thy well-loved face arise,
I fall upon the ground with eager cries
Of transport : but e'en here an envious veil
Fate interposes, and the vision flies ;
Gone is the form I wildly thought to hail,
And dim with blinding tears my loving glances fail.

LXXXIX.

The spirits of the grove, believe me, weep
As I lie tossing on my lonely bed ;
Their pearly tears steal gently down, and steep
The green leaves that o'ercanopy my head,
As, in a dream of thee, they watch me spread

Digitized by Google

My arms, enlacing in their eager strain
Nought but the yielding air of night instead
Of that delicious form they would detain :
Then see me start and sigh and wake to woe again.

XC.

A welcome herald from my darling comes
The breeze that from the snowy mountain springs,
Loaded with fragrance from the oozing gums
Of pine-buds rifled by its balmy wings :
To me it whispers such delicious things,
For it may be its breath has fondly played
Over my lady's bosom, whence it brings
Diviner fragrance, tenderly has laid
A kiss upon her lips, and fanned her in the shade.

XCI.

But yield not, love, to dark despair, nor think
That changeless, never ending, is our doom,
Or in the strife thy gentle soul will sink :
Some friendly stars the moonless night illume,
Some flowers of hope amid the desert bloom :
Life has no perfect good, no endless ill,
No constant brightness, no perpetual gloom ;
But circling as a wheel, and never still,
Now down, and now above, all must their fate fulfil.

XCII.

Four months remain, and when that age is fled,
Then ends my banishment and all our pain :
When Vishnu rises from his serpent bed
Where lapped in sleep the Bow-armed God has lain,
Thy lover speeds to home and thee again :
The moon of autumn with serener glow
His silver influence on our nights shall rain,
And our rapt souls with joy shall overflow
More exquisitely sweet for all remembered woe.

XCIII

Once more I see thee, but no more alone,
Thy senses steeped in dews of slumber, lie
With thy fond arms around thy husband thrown.
Thou startest, weeping, and I ask thee why
Thy soul is troubled when thy lord is nigh.
'Traitor,' thou sayest, as a smile and tear
Plays on thy lip and glistens in thine eye,
'Faithless I saw thee in my dream appear,
Whispering tales of love into another's ear.

XCIV

But, dark-eyed beauty, rest thou ever sure
That, with a constancy that nought shall bend,
Through woe and absence shall my faith endure.
To slanderous tales forbear thine ear to lend :
Store in thy heart the message which I send,
And soothe thee with the trust that love like mine
Will live unchanging on till time shall end ;
Burn with a flame that ne'er shall know decline,
But, fed with hope, each day shall yet more brightly shine.'

XCV

"Wilt thou, dear Cloud, through regions far away,
This loving message to my darling bear?
Silent art thou, yet not in vain I pray ;
For when the Rain-birds, in the sultry air,
Crave the cool shower of thee, thou dost not care
To speak in answer, but sweet drops descend
And their faint strength and flagging wings repair :
So comes the aid the good delight to lend,
Deeming the granted wish best answer to a friend.

XCVI

Thus, faithful herald, having cheered her heart
Who mourns in joyless solitude her fate,
From the high forehead of that hill depart
Where the celestial Bull, who bears the weight
Of Siva, rends the rock with joy elate :
Return to me, and let my spirit know
Some comfort, hearing of my darling's state,
Ere my soul sink beneath its weight of woe,
Like a frail Jasmine-bud scorched by the summer's glow.

XCVII

So shall my thanks repay thy gentle deed,
And evermore my blessings follow thee :
So by the breezes wafted, shalt thou speed
To pleasant regions where thou fain wouldst be,
There rest delighted or there wander free ;
May the sweet rain ne'er fail thee ; and thy bride,
The splendid lightning, mayst thou ever see
Close to thyself in dazzling beauty ride,
Flashing upon thy breast or sporting at thy side."

XCVIII

The mourner ceased : the airy envoy heard ;
And the fond speech, by love made eloquent,
Kubera's breast with soft compassion stirred.
His ear in mercy to the tale he bent
That led his yielding spirit to relent,
And made him, ere the term was nigh, restore
The exile languishing in banishment,
And freely bade him, all his trials o'er,
Live with his love again with joy for evermore.

PUBLICATIONS RECEIVED.

Riju-vyákhyá, or a Commentary on the Sanskrit Riju-páṭha, part III, in Sanskrit by Rámagati Nyáyaratna. Second Edition.

We are glad to see this useful little school-book printed, this time, in the Devanágarí character, which has made it universally accessible to Sanskrit Students. We have already given credit to the author for the scholarlike manner in which he has executed the work.

A Madras correspondent asks where he can find an account of Vasishtha's seeking a wife in vain among the Twice-born Castes, and then espousing a Súdrání, Arundhati. We regret to be unable at present to give the reference required. Can any correspondent assist us?

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

INDEX TO VOL. II.

	Page.
Barbara, letter on the Sanskrit name	250
Hari-vilása	79,101
" preface to	78
Híránanda Chaube, Pandit, notice of	70
Hindu Philosophy, letter on the Translation of	116
Indirápati-paríkshá	37,110
Idolatry, letter on	88
Íśwara-pratyabhijñá-sútra-vimarśiní	236,255
Íśwara-pratyabhijñá-vimarśinyá bhúmiká	235
Jayadeva, A Lyric of	47
Kádambarí-kathá-sára	3,29,52
Leprosy, notice of Dr. Bháu Dájís cure for	271
My Duty towards my Neighbour (from the Church Chatechism and the Mahábhárata &c)	160
Marriage	162
Messenger Cloud	184,204,253,272
Nareśwara-paríkshá	72,93,119,141,145,165,169,187,211
" preface to	71
Nareśwara-paríkshopasañhárah	248
Nyáya-swarúpa-nirúpaṇam	109,155
Notice of Books &c.	116
Prakaraṇa-panchiká	1,23,49,71
Prakaraṇa-panchikopsaṇharaṇam	71
Priests, Relations of the, to the other classes of Indian Society, in the Vedic Age (from Journal R. A. S)	18,42
Publications received, notice of	69,70,274
Prasanna-rághava Nátaka	127,150,174,197,221,242,262
Prasanna-rághava-náṭaka-prastávaná	126
Pandits, and their manner of Teaching	207,250
Rámáyaṇa, translations from the	12,38,65,87,134,161
Rájá of Penares, and the Dove	139
Sánkhya system of philosophy, on the	11
Sáhitya-Darpaṇa, translation of the	14,61,111,156,181,228,248
" letter on the	118
Siddhánta-tattwa-viveka-paríkshá	32,201
True Glory	115
Vedánta, The Gist of the, as a Philosophy	47,67
" on the Ontology of the	91,136.162
Vedánta paribháshá, letter on the translation of the	140

Digitized by Google

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 25. Benares June 1st, 1868. Vol. III.

॥ ईश्वरप्रत्यभिज्ञासूत्रविमर्शिन्याः ॥

॥ चतुर्थमाह्निकं पञ्चमस्य चादिमो भागः ॥

पदार्थरत्ननिकरं निजहृद्गुञ्जपुञ्जितम् ।
यग्रन्तं स्मृतिसूत्रान्तः सन्तत्यैव स्तुमः शिवम् ॥

एवं ज्ञानपूर्विका स्मृतिस्तदुभयानुग्राहिण्यपोहनशक्तिरिति तावद्वस्तुसम्भवक्रमेण प्रदर्शितम् । उपक्रमानुसारेण स्मृतिरेव सूचितप्रसङ्गविपर्ययसमर्थनदृशा विवेच्या । "सत्यं किं तु स्मृतिज्ञान,,मिति ह्युपक्रान्तम्, तत्र संस्कारमात्रान्मा नामो * दपादि स्मृतिः । इदं तु वक्तव्यम् । तथाभूतभवदभ्युपगतभगवत्प्रभावेऽपि कथमेनां कुर्यादिति शङ्कां शमयितुं स्मृतितत्त्वनिरूपणाय "स हि पूर्वानुभूतार्थोपलब्धे,,त्याद्य "र्थो भातः प्रमातरो,,त्यन्तं श्लोकाष्टकम् । तत्र श्लोकेन स्वपक्षे स्मृतिरुपपन्नेति कथितम् । द्वितीयेन स्मृतेः पूर्वानुभवविषयीकृतस्वलक्षणप्रकाशनसामर्थ्यमुक्तम् । तृतीयेनानुभवेन तद्विषयेण चैकीभावपर्यन्त आवेशः स्मरणस्योक्तः । तुर्येणानुभवस्य न विषयतया स्मृत्या प्रकाशनमिति निरूपितम् । पञ्चमेन योगिज्ञानमप्यनुभवं पृथग्भावेन न विषयीकरोतीति वदता तुर्यश्लोकार्थ एवोपोद्बलितः । षष्ठेनाशङ्क्यमानमनुभवस्य स्मृत्या पृथग्विषयीकरणं काल्पनिकमित्यवास्तवीकृतम् । सप्तमेन स्मृतिप्रसङ्गाद्विकल्पेऽपि पूर्वानुभवेनैक्यात्मावेशो दर्शितः । अष्टमेन स्मर्तव्यस्य स्मृतेः स्मर्तुश्चैकचित्तत्त्वविश्रान्तिरुक्ता । प्रसङ्गाच्च दृश्यस्य दर्शनस्य द्रष्टुश्चेति तात्पर्यार्थः ॥

* उत्पादीति पाठोऽत्र युक्तः । माङ्योगे ऽटोऽप्राप्तेः । अडितो योगकल्पनायां तु लुङो ऽनुपपत्तेस्तस्याप्रामाणिकत्वाच्च । उपपादीति पुस्तकान्तरे बहिर्लिखितं पाठान्तरमपि साध्वेव ।

अथ क्रमेण श्लोकार्थ उच्यते ।

(१) स हि पूर्वानुभूतार्थोपलब्ध्या परतोऽपि सन् ।
विमृशन्स इति स्वैरी स्मरतीत्यपदिश्यते ॥

पूर्वमनुभूतस्यार्थस्य य उपलब्धा अन्तर्मुखो बोधः स तावदद्यापि परतः स्मृतिकालेऽप्यस्त्येव । संविन्मात्रस्वरूपस्य कालकृतसंकोचरूपविशेषात्मकविच्छेदायोगात् । अनुभवस्य चान्तरर्थोऽप्यपृथग्भावेनावस्थित इत्येतदप्यप्रसिद्धम् । इदं तु चिन्त्यम् । अकालकलिते संवेदने तदन्तर्वर्तिनि च विश्वत्र भावजाते यदि तावच्चिन्मयतापरामर्श,,स्तदहमित्येतावतैव पूर्णेन विमर्शेन भाव्यम् । अथेदंतया पृथग्भावावभासनेन, तथापि तत्र द्वयी गतिः, अहमित्यंशे यदि विश्राम्यतीदन्ता, तदा "ऽहमिद,,मिति सदाशिवादिदशया भाव्यम्, । अथ न रोहति, तदिदमित्येवावभासेन भवितव्यम्, । अपूर्वताभासनाच्च तदनुभवनमेव स्यात्र स्मरणमित्याशङ्क्याह । स्वैरीति । स्वमात्मीयमुपकरणमीरयति स्वकर्तव्येष्ववश्यन्तच्छीलश्च स्वं चात्मानमीरयति न पुनः स्वकर्तव्ये प्रेरकमपेक्षते इति स्वैरी स्वतन्त्रः । तेन स्वतन्त्रत्वात्स इत्येवं विमृशति । स इति विमर्शनस्य चेयद्रूपम् यत्सर्वथा कालकलितस्वरूपपरामर्शनमेव न, नाप्यत्यन्तभेदपरामर्शनमेवा,पि तु योभावः पूर्वमनुभवकाले तद्देशकालप्रमात्रन्तरसाचिव्येन पृथक्कृतो न चाहन्तायामेव विलीनीकृतः स तादृगेव तमसेवाच्छादकावस्थापितः संस्कारशब्दवाच्यस्तस्य तमाच्छादक * मपहस्तयति । तत्रापहस्तिते स पूर्ववत्पृथक्कृत इवावभाति । "ननु चेदंतया

* दूरीकरोति । अत्र स्वैरैव कर्ता बोद्धव्यः । करणं चैकसंबन्धिज्ञानादिकम् । एतदाच्छादकापहस्तनमेव संस्कारोद्बोधनं बोध्यम् ।

Digitized by Google

ऽवभासेत पूर्ववदेव,, । नैवम् । तदानींतनावभासनपृष्ठभूतशरीरादिसम्बन्ध * मनवधूयैव हि तत्प्रकाशः । ततश्चेदानींतनावभासनकालपरामर्शोऽपि न निमीलतीति । एतत्परामर्शभित्तिप्राधान्येन पूर्वकालपरामर्श इति विरुद्धपूर्वापरपरामर्शस्वभाव एव स इति परामर्श उच्यते । एवं च स एव परमेश्वरः स्मरति । एतदेव हि तस्य स्मरणं यदेवंप्रकारपरामर्शोचितकालकलादिस्पर्शसहिष्णुमायाप्रमातृभावपरिग्रह इति † मायाविद्याद्वयाद्वयमयं तत एव सकलसिद्धिवितरणचतुरचिन्तामणिप्रख्यमागमिकाः स्मरणमेव मन्त्रादिप्राणितं मन्यन्ते ।

ध्यानादिभावं स्मृतिरेव लब्ध्वा
चिन्तामणिस्त्वद्विभवं व्यनक्ति ।

इत्यलं तावदनेन । वृत्तसमासेन यतो ऽनुभवस्यान्तर्मुखेन कालस्पर्शमर्षणविश्रान्ततां द्वयोरपि प्रमातरि निरूढिं ‡ भेदाभेदाभ्यां दर्शयति । वृत्तावेकार्थीभावात्तस्य च भेदाभेदमयत्वमिति वक्ष्यामः ॥

एतदेव स्मृतितत्त्वमुपपादयितुं श्लोकान्तराणि ॥

तत्र "यदि कश्चिद्ब्रूयात् । इह स्मृति § विकल्पो न चानेनार्थः प्रकाश्यते । अर्थासंस्पर्शिनो हि विकल्पाः । अनुभवेन च येन सो ऽर्थः प्रकाशतां नीतः स इदानीं कीर्तिमात्रमूर्तिर्जातः । न च सो ऽपि स्मृत्या प्रकाश्यते । ज्ञानस्य ज्ञानान्तरेणाऽसंवेद्यत्वात्, असत्त्वाच्चेति । अर्थस्य प्रकाशनाभावादिदं स्मरामीति ज्ञानं भ्रान्तिमात्रमेवेति पुनरप्यापतितमिति,, तदा तं प्रत्युच्यते ।

(२) भासयेच्च स्वकाले ऽर्थात्पूर्वाभासितमामृशन् ।
स्वलक्षणं घटाभासमात्रेणाथाखिलात्मना ॥

* अनवधूयैवेति । अयं भावः । योऽयं विषयतानामकः प्रकाशस्य नीलसुखादौ संबन्धः सोऽन्तर्मुखस्य विमर्शस्य विषयप्रवणताकालात् तत्कालवृत्तिशरीरादिभवश्च नातिरिच्यते । ततश्चाच्छादकापहस्तनेनोत्तरकाले पुनरन्तर्मुखप्रकाशस्य पूर्वानुभूतविषयोन्मुखस्यानुभवकालशरीरादिरूपसंबन्धेनोपसर्जनेन प्रधानभावमापादितोऽपहस्तनाव्यवहितोत्तरकालशरीरादिरूपः संबन्धो नीलादौ विषये परामर्शस्य स इत्याकारतां प्रति प्रयोजयतीति । एतत् पर्यवस्यति । यदनुभवकालादिविशिष्टः संस्काराद्बोधाव्यवहितोत्तरकालशरीरादिर्विषये स्मरणस्य संबन्धस्तेनैव च विमर्शसंसृष्टो विषयः सइत्यभिलापस्य विषयइति । यस्तु विमर्शः कालदेशाद्यविशिष्टकालादिना विषयेण संबध्यते सएवेदमित्यभिलापेनानुभवपदेन स व्यवह्रियतइति बोध्यम् ।

† मायाविद्यारूपं यद् द्वयं पूर्वोत्तरान्तर्मुखविषयोन्मुखाख्यं तस्याद्वयमेकविमर्शापारोहस्तन्मयमित्यर्थः ।

‡ प्रमातर्येकस्मिन्नित्यन्तर्मुखे बोधे ऽनुभवस्याभेदो वास्तविको भेदस्तु काल्पनिक इति बोध्यम् ।

§ इदं विकल्पपदं प्रमाणेतरवृत्तिमात्रपरं न तु "शब्दज्ञानानुपाती वस्तुशून्यो विकल्प,, इति लक्षितपरम् । ततश्च गगनकुसुमनरविषाणादिविकल्पेन यथा ऽर्थो न स्पृश्यते तथा स्मृत्या ऽपि न स्पृश्येतेति भावः ।

इह * स्मृतिविकल्पे तावदर्थो ऽध्यवसीयते । अन्यथा सुप्तमूर्छितकल्पतापत्तेः । एवं च यावदध्यवसायो ऽर्थस्य तावदर्थादिति सामर्थ्यादियदध्यवसेयमनन्यं यत्सो ऽर्थः प्रकाशते, अप्रकाशमाने ऽध्यवसातव्ये ऽध्यवसायोऽन्धप्रायः स्यात् । प्रकाशनं च न तदानींतनकालस्य त्यागेन, नापि स्वीकारेण, इदानीन्त्येवावभासनप्रसङ्गात् । तस्मादतीतानुभवकालः पूर्वानुभूतभावस्वालक्षण्याक्षेपकत्वेनापेक्षणीयो वेद्यभागे प्रकाशात्मकावभासाभिनिवेशितया, स्मर्तृदेहप्राणाद्यवभासकालस्त्ववलम्बनीयो वेदकभागे विमर्शांशाभिनिवेशित्वेन, । आभासमात्रं हि भावस्य स्वरूपं प्रत्याभासं प्रमाणस्य व्यापारात् । तदेवाभासान्तरव्यामिश्रणया दीपसहस्रप्रभासंमूर्छनवदस्फुटीभवति आभासान्तरव्यामिश्रणाभावे ऽपि तु कालाभाससम्भेदेनैव स्वालक्षण्यं तस्याभासस्य करोति कालशक्तेरेव भेदकत्वादिति वक्ष्यते । एवं तावत्स्वलक्षणीभावः प्राक्तनदेहाभाससाचिव्याव्यवहितकालाभासयोजनया घटाभासस्येति तावत्येव वा स्मृतिराभासान्तरैरपि वा व्यामिश्रणातिस्फुटात्यन्तस्फुटीभावे ऽपि तदानींतनकालता न त्रुट्यति । अन्यसाधारण्येनानवभासनात् । "तथा ऽवभासे तु योगिनस्तन्निर्माणमेव ब्रह्मभावितादौ तु नवमेवावभासनमिति,, तत्र तु आगमादिमानान्तरानुभूततत्त्वादिस्वरूपस्मरणपरम्पराभ्युपायः । भासयेदिति विधिरूपेण नियोगेन नियमो लक्ष्यते, न चाभासयतीत्येतत्, अपि तु भासयत्येवेति, "स्वकालइति,, स्मरणकाले, आमृशन्निति वेदकभागनिवेशी वर्तमानकाल उक्तः । पूर्वावभासितं स्वलक्षणमिति वेद्यांशस्पर्शी भूतकालो घटाभासस्यापि केवलस्य स्वालक्षण्यापत्तिहेतुर्दर्शितः । इयदेव स्मृतेरव्यभिचारि वपुः । आधिक्यातिशयात्तु स्फुटत्वमित्यथशब्दो द्योतयति तदेवाह । अखिलात्मनेति सर्वाभासमिश्रणेन वपुषेत्यर्थः ॥

नन्वेवं स्वलक्षणस्य प्रकाशने भेदेन बहिस्तदवभासेत एतदेव हि बहिरवभासनं यत्स्वलक्षणप्रकाशनमिति शङ्काशमनाय निरूपयति ।

(३) न च युक्तं स्मृतेर्भेदे स्मर्यमाणस्य भासनम् ।
तेनैक्यं भिन्नकालानां संविदां वेदितैष सः ॥

स्मरणज्ञानाद्भिन्नत्वेन बहीरूपतया यदि सोऽर्थो भासेत स्मर्यमाणस्य च यद्भासनं तदेव न स्यात् । स्मर्यमाणमेव तन्न स्यात् । अनुभूयमानमेव तद्भवेदिति यावत् । "ननु चैवं कथं स्वलक्षणस्य प्रकाशनम्,, । उक्तमेतत् । नेदानीं प्रकाशनमपि तु पूर्वकालएव, तदा चासौ बहिरवभासतएव । "ननु चेदानीं तर्हि किं,, विमर्शनमिति ब्रूमः । "ननु प्रकाशनविमर्शनयो-

* "स्मृतिकाले,, इति पुस्तकान्तरे पाठः स च स्वकाल इति मूलानुगुणः ।

भिन्नकालत्वमापादितम् । ततः किम् । उभयमपि न किं विस्यात् । अन्योन्यजीवितत्वादस्य,, । नैवम्, । यस्य हि संवेदनान्येव भिन्नानि तस्य तस्येदमप्रतिसमाधेयमेव । अस्मद्दर्शने तु भिन्नकाला अपि संविदस्तत्कालात्यागेनैवैकताभासनेन स्वतन्त्रः प्रमाता यावदन्तर्मुखतया तावत्यंशे विमृशति तावत्प्रकाशस्य तात्कालिकबहिर्भावावभासः विमर्शस्येदानीन्तनान्तर्मुखा स्थितिरिति । एतदेव वेदनाधिकं वेदितृत्वं वेदनेषु संयोजनवियोजनयोर्यथाविधिकरणं स्वातन्त्र्यं कर्तृत्वं चैतदेवोच्यते । घटमहमन्वभूवमिति वा स घट इति वा ऐक्यमनुसंधानमनुसन्धातुरभिन्नमिति दर्शयितुं यदेवैक्यं स एव वेदितेति सामानाधिकरण्येन दर्शितम् । एष स इत्याच्छादितस्येव प्रमातृतत्त्वस्य स्फुटावभासनं कृतमिदमिति विस्मयगर्भयोक्त्या प्रत्यभिज्ञानमेव सूचितम् । यदाह ग्रन्थकार एव ।

इत्थं स्वसंविदि मपह्नुवाने-
र्यैस्तद्वदद्भिः कलुषीकृतं यत् ।
प्रमातृतत्त्वं स्फुटयुक्तिभिस्तान्
मूकान्विधाय प्रकटीकृतं तत् ॥

इति ॥

ननु च प्राच्य एवानुभवो यदि स्मर्यमाणस्य बहिरवभासनरूपः प्रकाशस्तर्हीयदुच्यताम् । सो ऽनुभव इदानीं स्मरणेन विषयीक्रियत इति ऐक्येन त्वलौकिकेन को ऽर्थ इति व्यामोहं विहन्तुमाह ।

(४) नैव ह्यनुभवो भाति स्मृतौ पूर्वार्थवत्पृथक् ।
प्रागन्वभूवमहमित्यात्मारोहेण भासनात् ॥

वैधर्म्यसाधर्म्याभ्यां दृष्टान्तः प्रागित्यनुभवकाले यथा स पूर्वो घटादिरर्थः पृथगितीदन्तया भाति स्म नैवं स्मरणकाले स्मृतिज्ञानात्पृथक्त्वेन इदं पूर्वमनुभवनमिति भाति यथा च स्मृतिज्ञानकाले तस्मात्स्मृतिज्ञानात्सो ऽर्थः प्रागिति पूर्वस्वभावो न भेदेनाभाति स्मृतिकाले बहिरवभासाभावात् । एवं तत एव हेतोः पूर्वो ऽप्यनुभवो न भेदेनाभाति "कथं तर्ह्युभयं भाति अन्वभूवमित्येवम् । एतत्किमुच्यते इति चेत्,, । अहमित्येवंस्वभावो य आत्मा पूर्वापरसंविदन्तर्मुखस्वभावस्तत्र यदारोहणं विश्रमस्तेन हेतुना पूर्वसंविद्रूपतायाः स्वप्रकाशाया भासना तल्लीनस्यापि घटस्य स्वप्रकाशदेशीयत्वेनावभासनम् । आत्मनि चारोहणं विश्रमणमनुभवस्यार्थस्य च प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत इति न्यायात्संख्याविप्रे तद्वृत्ति वा कर्तृभूते ऽस्मदर्थे प्रत्ययार्थे ऽनुभवो ब्रुडितः । तद्द्वारेणार्थो ऽपि च न तु स्वातन्त्र्येणैवासौ तदर्थमेव कर्म न निर्दिष्टम् । घटादिः पुनरनुभवकाले नास्मदर्थमारोहयति हि यस्माचैव भाति पूर्वो ऽनुभवः पृथगपरार्थोत्ताद्धेतोः तस्मात्संविदामैक्यमिति पूर्वेण सम्बन्धः । लुङा भूतकालस्य द्योतितत्वात्प्रागिति भिन्नक्रमः उत्तमपुरुषेणास्मदर्थस्याहमित्यपि आरोहणमिति हिरपि भिन्नक्रमो ऽपि ॥

ननु क एवमाह अनुभवः पृथङ्न भातीति, घटवन्नभातीति चेत् । किं ततः, घटो ऽपि हि नानुभवभङ्ग्या भातीति किं न भाति, स्वभावेन भातीति तूभयत्रापि समानम् । तथाहि । अतीतानागतसूक्ष्मादि यथा योगिज्ञाने विषयीभवतीत्यभ्युपगतं, तथा परचित्तमपि * "प्रत्ययस्य परचित्तज्ञान,,मित्यादौ, तत्र ज्ञानवृत्तिपरिणतमेव सत्त्वं चित्तशब्देनोक्तम् अन्यथा प्रत्ययस्य संयमविषयीकार्यत्वं किमुच्यते आलम्बनयोगश्च कथं शङ्क्येत न च सालम्बनमिति तस्मात्परकीयमनुभवनमिव निजमपि विषयीक्रियतामित्याशङ्क्य दृष्टान्त एवासिद्ध इति भान्तीत्यन्तेन, अभ्युपगमेन वा सिद्धत्वे ऽपि प्रकृते ऽर्थे विषम इति शेषेण दर्शयति ।

(५) योगिनामपि भासन्ते न दृशो दर्शनान्तरे ।
स्वसंविदेकमानास्ता भान्ति मेयपदे ऽपि वा ॥

योगिनां यदेतद्दर्शनान्तरं भावनाप्रबुद्धः परचित्तविषयो ज्ञानविशेषः तत्र दृश इत्युपलब्धयो न भान्ति । तथाहि । सौगतानां तावत्स्वप्रकाशैकरूपं ज्ञानं तच्चेज्ज्ञानान्तरेण वेद्यं तर्हि यदस्य निजं वपुरनन्यवेद्यतया प्रकाशनं नाम न तत्प्रकाशितं स्यात् । सांख्यानामपि पुरुषच्छायैवोपलब्धिः पुरुषश्चासंवेद्यपर्वेति कथं वेद्या स्यात् । वैशेषिकानामप्यात्मन्यभेदेन समवायि संवेदनं परगतं मनसा कथं गृह्येतान्तः शरीरवृत्तिना । तच्छरीरान्तरनुप्रवेशे तु तस्यैवाहमिति शरीरीकरणादहंतावभासितत्वादात्मनो भेदो विगलेत् । नित्यानुमेयत्वं तु नात्मन उपपद्यते । ज्ञानस्य च ज्ञानान्तरवेद्यत्वे ऽनवस्थाप्युक्तम् । तस्माद्योगिनः परचित्तवेदनावसर इयान्प्रकाशः, एतद्देहप्रकाशसहचारी घटसुखादिप्रकाश इति तत्र घटसुखादिरिदन्तया भाति । तद्गतस्तु प्रकाशो ऽहमित्येव स्वप्रकाशतया प्रकाशते । प्रमात्रीकृतपरदेहप्राणादिसमवभाससंस्कारात्तु तन्निष्ठामिदन्तां प्रकाशभागे ऽपि मन्यमान इदं परज्ञानमित्यभिमन्यते । अविगलितस्वपरविभागो योगी प्राप्तप्रकर्षस्तु सर्वमात्मत्वेन पश्यन् स्वसृष्टमेव स्वपरविभागं पश्यतीति ज्ञानस्य न योगिज्ञानेन प्रकाश्यता । भवतु वा । तथा पि प्रकृते

* प्रत्ययस्य रागादिमत्याः स्वकीयचित्तवृत्तेः संयमेनाभयादिरूपैरशेषविशेषैः साक्षात्करणात् ततस्तस्माच्छ्रितात् परस्य भिन्नस्य चित्तान्तरस्याप्यशेषविशेषतो ज्ञानं संकल्पमात्रेणैव भवतीत्यर्थ इति योगवार्त्तिककारैर्व्याख्यातमिदम् ।

Digitized by Google

नैतत्समम् । तथाहि । अयमनुभवतीति परनिष्ठ एवासावनुभवो योगिनः प्रकाशो न त्वहमनुभवामीत्यात्मारोहेण । इह त्वन्वभूवमित्यहम्भावविश्रान्तिरनालीढेदम्भावैवानुभवस्येति युक्तमुक्तम् । यस्मादनुभवः पृथक् भाति तस्मादैक्यं भिन्नकालानां संविदां केहितेति ॥

यत्त्वहम्भावविश्रान्तिवशादनुभवः स्मृतौ पृथक् भातीत्युच्यते तदा परामर्शान्तरं साक्षादेवेदंतया ऽनुभवं परामृशद् यदि वा इदंभावोचितघटादिविश्रान्ततामनुभवस्य प्रथयदुपलब्धमिति तदनुसारेणापि किं न व्यवह्रियत इति पराभिप्रायं प्रतिक्षिपति ।

(६) स्मर्यते यद्दृगासीन्मे सैवमित्यपि भेदतः ।
तद्व्याकरणमेवास्या मया दृष्टमिति स्मृतेः ॥

लोकस्य तावदेवं न संवेदनं, स हि न पृथग्भूतां दृशं कांचिन्मन्यते सा दृङ् मासीदित्येवम्, अपि तु यत्स्मर्यते एवंभूतमपि यत्स्मरणं कस्य चिद्विवेचकंमन्यस्य तत्स्मृतेर्व्याकरणं पदस्येव प्रकृतिप्रत्ययार्थनिरूपणं काल्पनिकं विभज्याकरणं परत्र प्रतिपादनमात्रम् । सो ऽपि यदि मूलप्रतीतिं विमृशति पूर्वोक्तक्रमेण तदानुभवं पृथग्भूतं न वेदयत एव तद्राहोः शिर इतिवत्कल्पितं भेदं मन्यते । अन्यथा स घट इतिवत्सा दृगित्यत्रापि प्राक्तनं दृगन्तरमपेक्षणीयं स्यात् । तदित्यनेन हि घटस्य वा दृशो वानुभवविषयतापत्तिरुच्यते । अन्यथा दृगित्येव स्यात् । ततश्च दृङ्या दृगन्तरेणानुभूतेत्यापतेत् तत्रापि तथात्वे ऽनवस्था । ननु स्मृतेर्मौलिकं किं रूपम्, । उच्यते, । मया दृष्टमिति, । नन्वत्र दयितावदननलिनादिविश्रान्तं दर्शनमुक्तं, न त्वात्मारूढं, कर्मणि निष्ठोत्पत्तेः, स एव स्वभावमेव न चेतयति । कर्तुः क्रियया व्याप्यं कर्मेति दृशिक्रियायाः कर्तृनिष्ठतैव तथा च कर्तृस्थामेव दृशिक्रियामाहुः दर्शयते भृत्यान्राजेत्यादौ जैमिनीयैरपि ज्ञानरूपा दृशिर्भावनात्मिका प्रमातृविश्रान्तैवोक्ता; केवलं प्रकटता विषयधर्मो दृष्टता नामान्या संविद्वा स्वतन्त्रेत्यन्यदेतत् प्रमातृविश्रान्तत्वमेव कथयितुं मयेत्युक्तम् तेनान्वभूवमहं मयानुभूतमिति शब्दवैचित्र्यमात्रमिदं, न त्वर्थभेदः, अन्ये तु भिन्नक्रमत्वेन योजयन्ति । दृगासीत्सा मे इत्येवं मया दृष्टमिति च यत् स्मरणं तद्व्याकरणमस्या इत्यनन्तरोक्तान्वभूवमित्युचितपरामर्शायाः स्मृतेरिति । अपिश्चार्थे ॥

ननु दृष्टमपि निर्विकल्पेन यावन्नपरामृष्टं विमर्शविशेषविश्रान्त्या तावन्न स्मर्यते । मार्गदृष्टमिव तृणपर्णादि विशेषरूपेण तद्विदमेव विचारणीयम् । समनन्तरभावि विकल्पकाले तद्दर्शनमिदन्तयावभातपूर्वं वा न वेति तदाशङ्क्याह ॥

(७) या च पश्याम्यहमिमं घटो ऽयमिति वाऽवसा ।
मन्यते समवेते साऽप्यवसातरि दर्शनम् ॥

इह दर्शनं यादृशं निजेन वपुषा तादृशेनैव तेन भातव्यं सर्वदा । तच्च स्वकाले ऽनन्यप्रकाशमहमित्येतावता रूपेणोचितप्रकाशं तद्विकल्पांशविचारस्तावच्च कुत्रचिदङ्गम् । भवतु वा । किं त्ववसायो ऽप्येवंभूत इत्यपि शब्देन सूचयति । तत्र समनन्तरभाविना विकल्पेन वस्तु परामृश्यमानमनुभवपरामर्शमुखेन वा परामृश्यते ऽहमिमं पश्यामीति वर्तमानतया इममित्यनेन च प्रत्यक्षव्यापारत्वं प्रत्यक्षायमाणत्वेन दर्शितम् । एवमेव वा परामृश्यते घटो ऽयमिति । अत्रायंशब्देन प्रत्यक्षायमाणत्वमुक्तम् । तत्रान्त्ये विकल्पे दर्शनस्य पृथक्परामर्श एव नास्तीति का तत्रेदंताशङ्का । ततश्च पारिशेष्यात् अहंतया तस्यात्रास्ति परामर्शः । तदभावे विकल्पस्य निमीलिताक्षेपिभावात्स्वयमर्थास्पर्शी स्फुटतमविषयपर्यवसितः कथमध्यवसायो भवेत् । आद्ये तु दर्शनं परामृष्टमप्यस्मदर्थान्तर्भूतमहम्भावास्पदमवसातरि विश्रान्तं स्वप्रकाशमेव परामृष्टमिति विकल्पो ऽपि न बोधान्तरबोध्यतां बोधयति बोधस्य । अवसायो ऽवसा, समवेतमित्यपृथग्भावमाह । अवसातरीति । स्वतन्त्रे ऽन्तर्मुखे बोधात्मन्यहंतास्पदे इत्यर्थः दर्शनमिति निर्विकल्पकमनुभवनम् । उपलक्षणं चैतत् । विकल्पस्मृत्यादेरपि ज्ञानस्य ज्ञानान्तरेण परामर्शे ह्ययमेव न्यायः विकल्पयाम्यहं विकल्पितं मया स्मृतं मयेत्यहंतारूढस्यैव विकल्पादेरवभासात् । अत एवात्मनो ऽमी विकल्पाद्याः शक्तिविशेषास्तद्विश्रान्तशरीरत्वादिति दर्शितं ज्ञानस्मृत्यपोहनशक्तिमानित्यत्र ॥

एवमियतः प्रमेयस्य यत्फलं तदुपसंहर्तुमाह ।

(८) तन्मया दृश्यते दृष्टो ऽयं स इत्यामृशत्यपि ।
ग्राह्यग्राहकता भिन्नावर्थौ भातः प्रमातरि ॥

तदिति तस्मादर्थे पूर्वोक्तस्य प्रमेयस्य हेतुभावेनोपजीवनमिह सूचयति । यत एवमुक्तम् । अनुभवस्यार्थस्येव स्मरणाच्च भेदेनावभासः । स्मृतिशक्तिश्च परमेश्वरस्यैव तत इदमत्र परिनिष्ठितं तत्त्वमिति । इह स्मृतिरनुभवं क्रोडीकरोतीत्युक्तम् । अनुभवश्च द्विधा परामर्शभेदात् कदा चित्स्वात्मपरामर्शपूर्वकमनुभाव्यमामृशति यत्रास्याभिसंधिप्रधानता मया दृश्यते इति । कदा चिदनुभवनीयमेव प्रधानतया परामृशति । यत्रा ऽनभिसंधेरेव सहसा वस्तूपनिपातो ऽर्थक्रियां प्रत्यावहविशेषो वा अयमिति । तत्रापि च प्रकाशपरामर्शो ऽस्त्येव । अन्यथा प्रकाशायोगात् । एवमुभयथा ऽनुभवे प्रत्येकं स्मृतिरपि द्वयपरामर्शमप्युदेति । चत्वारः स्मरणभेदाः द्वाव-

Digitized by Google

नुभवभेदौ अनुसंधानरूपं प्रत्यभिज्ञानमप्येतदुभयमेलनात्मकमत्रैवान्तर्भूतं तच्चैतद्द्वाददृष्टधा पूर्वापरविश्रान्तिकृतात्प्रत्येकं द्विधा भेदाच्च षोडशधा तदेते द्वाविंशतिः संवेदनभेदाः । तेषु च ग्राह्यं तावत्प्रकाशाद्बहिर्भूतमन्यथा प्रकाशनायोगात् बहिर्भूतं च तदन्यथार्थत्वासम्भवात् । न च तत एव तदैव तदेव पृथग्भूतं चा पृथग्भूतं च भवतीति नूनमन्यः कल्पितप्रकाशात्मा कश्चिदत्रार्थो ऽस्ति यतो ऽयमर्थराशिः पृथग्भवन्नन्योन्यमपि पृथक्तामधिगच्छेत्। अन्यथा प्रकाशाभिन्नानां परस्परमपि कथंकारं पृथग्भावो भवेत् । सो ऽयं वेद्यैकदेश एव विच्छिन्न एवानुज्झितवेद्यभाव एवाहमिति विच्छेदशून्योचितेन परामर्शेन परामृश्यमानो मायाप्रमातेति वक्ष्यते । देहबुद्धावित्यत्र स च ग्राहक इत्युच्यते । एवं सममेव स्वात्मनि विमलमुकुरस्थानीये यद्युगलकं स्वस्मात्प्रकाशरूपादव्यतिरिक्तमवभासयति परमेश्वरः । तदेवैतद्भगवतो ज्ञानकर्तृत्वं स्मरणकर्तृत्वं च ज्ञानशक्तिस्मृतिशक्तिरूपमुच्यते इति तात्पर्यार्थः । अक्षरार्थस्तु मया दृश्यत इति अयमिति च यदामृशति प्रमाता प्रकाशरूपो येनानुभवतीत्युच्यते । तत आमर्शनादेतल्लक्ष्यते । ग्राह्यरूपेण ग्राहकरूपेण योजितौ घटादिदेहादिस्वभावावर्थौ वेद्यौ प्रमातरि विशुद्धप्रकाशरूपे भातः प्रकाशेते । एवं दृष्ट इति स इति च यत्परामृशति प्रकाशरूपः प्रमाता यतो ऽसौ स्मरतीति व्यपदेश्यस्ततो ऽप्येतदेव लक्ष्यते । अनुभवरूपोपजीवितत्वं पूर्वोक्तं दृढयितुं प्रसङ्गादत्र ज्ञानशक्तेरप्युन्मीलनं कृतम् * लक्षणे शत्रादेशः अपि शब्दश्चार्थे अर्थशब्दो विच्छिन्नवेद्यवाची । ग्राहको मायीयः कल्पितः प्रमाता शुद्धप्रकाशस्वभावः ॥ ८ ॥

आदितः सूत्रश्लोकाः ३१ व्याख्याताः ॥

श्रीमदाचार्याभिनवगुप्तविरचितायामीश्वरप्रत्यभिज्ञासूत्रविमर्शिन्यां स्मृतिशक्तिनिरूपणम् ॥

॥ इति चतुर्थमाह्निकम् ॥

---

† यदनुत्तरसंबोधाद्दानन्दविकस्वरेच्छया पूर्णम् ।
ईश्वरमुन्मिषदमृतौघसुन्दरं तत्स्तुवे धाम ॥
स्वरूपगृहमध्यान्तर्भावभाण्डप्रकाशकम् ।
प्रज्वाल्य दीपं ज्ञानाख्यं स्वप्रकाशं शिवं स्तुमः ॥
महागुहान्तर्निर्मग्नभावजातप्रकाशकः ।
ज्ञानशक्तिप्रदीपेन यः सदा तं स्तुमः शिवम् ॥

---

* लक्षणहेत्वोः क्रियाया इत्यनुशासनात् ।

† इदं श्लोकद्वयं यदनुत्तरेत्यादि पुस्तकान्तरे ऽदर्शनात् पूर्वोत्तराह्निकेषु महाप्रकरणारम्भे विनैकैकश्लोकोपनिबन्धनस्यैव दर्शनात् प्रक्षिप्तमिति लक्ष्यते ।

एवं तावत्स्मृतिशक्तेः स्वरूपं प्रतिपादितम् । अधुना तदुपजीवनीयज्ञानशक्तिपरामर्शनिर्णयं वितत्य "वर्तमानावभासाना,,मित्याद्यया "सक्रमं प्रतिभासत,,इत्यन्तया श्लोकैर्विंशत्या निरूपयति । तत्राद्येन श्लोकेन वस्तुनि प्रतिज्ञां करोति । एवंभूता ज्ञानशक्तिरिति । ततः श्लोकद्वयेन प्रकाश एवार्थानां स्वरूपमित्याह । ततो द्वयेन प्रकाशबाह्यानामर्थानां सद्भावं विज्ञानवादोपगतवासनादूषणेन दृढीकृतमाशङ्क्य तृतीयेन तदनभ्युपगमे ऽपि तावन्न किं चिदुपरुध्यत इति दर्शयति । अथ श्लोकेन स्वदर्शने ऽर्थनत्वमुपदर्शयन्बाह्यार्थसद्भावे प्रत्यक्षं निराकरोति प्रमाणत्वेन । ततो द्वयेनानुमेयतामपि बाह्यस्य निरस्यति । अनन्तरं श्लोकेन चिदात्मन्यर्थानामवश्यं सद्भावः परामर्शात्मनेति प्रकटयति । ततो ऽपि प्रकाशस्य प्रमातृरूपस्य प्रत्यवमर्श एव जीवितमिति श्लोकचतुष्टयेनानुभवागमन्यायस्वरूपनिरूपणाभिरभिधत्ते । अनन्तरं ज्ञानपरामर्श एव ज्ञेयं शुद्धं प्रमातृरूपतानुज्झितं च प्रथयतीति तस्यैव प्रधानत्वे न्यायं श्लोकत्रयेणाह । प्रकाशैकरूपत्वे च ज्ञानज्ञात्रादिभिन्नमिति श्लोकेनाह । ततो ज्ञातरीव विशुद्धे ज्ञाने ऽप्यविकल्पकसविकल्पकरूपे विमर्श एव प्राणितमिति श्लोकद्वयेनाह । ततो ज्ञातुर्ज्ञानस्य च पूर्वपक्षे दूषितं यद्भिन्नत्वं तदुपसंहारदिशा श्लोकेन समर्थयत इति तात्पर्यमान्हिकस्य ॥

श्लोकार्थस्तु निरूप्यते ॥

ननु स्मरणविकल्पादीनामनुभव एव जीवितं तत्र यदि भेदेनाभासन्ते ऽर्थाः तत्तेष्वपि तथैवावभास उचितः । नो चेदन्यथा, तदनुभव एव तावज्ज्ञानशक्तिरूपो विचारणीय इत्याशयेनाह ।

(१) वर्तमानावभासानां भावानामवभासनम् ।
अन्तः स्थितवतामेव घटते बहिरात्मना ॥

वर्तमानत्वेन स्फुटतया ऽवभासनमिदमित्येवमाकारं येषां तेषां यदेतद्बहिरात्मना कल्पितमायीयशून्यादिशरीरान्तप्रमातृपृथग्भावेन हेतुना भिन्नानां । ततो मायाप्रमातुर्विच्छिन्नानामवभासनं तत्परमार्थप्रमातरि शुद्धचिन्मये ऽन्तः स्थितवतां तेन सहैकात्म्यम * नुज्झतामेव घटते प्रमाणेनोपपद्यते । तेनानुज्झितसंविदभेदस्य भावस्य † कल्पितप्रमात्रपेक्षया भेदेन प्रकाशनं भगवतो ज्ञानशक्तिरित्युक्तं भवति ॥

प्रमाणेनोपपद्यत इत्युक्तं तत्प्रमाणं दर्शयति ।

---

* उज्झ उत्सर्गे ।

† अनेन च विषयस्य ज्ञानात्मकता पारमार्थिकी कल्पितत्वादत्रान्तवस्तु भेद इत्युक्तं भवति ।

Digitized by Google

(२) प्रागिवार्थो ऽप्रकाशः स्यात्प्रकाशात्मतया विना ।
न च प्रकाशो भिन्नः स्यादात्मार्थस्य प्रकाशता ॥

अर्थो नीलादि,स्तस्य नीलादिरूपतैव यदि प्रकाशमानता, न पुनरपरा का चिदर्थशरीरोत्तीर्णा प्रकाशात्मता, तर्हि यथा सर्वान्प्रति नीलमेव तत्सम्भावनया भण्यते, । न कं चिद्वा प्रति, वस्तुतो वा स्वात्मन्येव तन्नीलं परस्य परनिष्ठत्वानुपपत्तेः, स्वात्मनि वा न नीलं प्रकाशानुग्रहेण विना व्यवस्थानायोगात् तथा प्रकाशमानता ऽप्यस्य सर्वान्प्रति न कं चिद्वा प्रति, अपि तु स्वात्मन्येव स्वात्मन्यपि वा न स्यादित्यन्धता जगतः । "अथेन्द्रियालोकादिलक्षणवर्गात्प्रकाशरूपो ऽसौ नीललक्षणो विशिष्ट एव जातः,, । एवमपि स एव प्रसङ्गः, । प्रकटतावादेऽप्ययमेव दोषः, सर्वथा ऽर्थशरीरविश्रान्तश्चेत्प्रकाशो ममावभासत इति प्रमातृलग्नतया प्रकाशस्थितिर्दुरुपपादा, प्रमाता हि तदानीमिन्द्रियादिमयो ऽर्थरूपस्य प्रकाशस्य कारणं भवेद्बीजमिवाङ्कुरस्य, न चाङ्कुरो बीजापेक्षोऽङ्कुरात्मा, ततो यदि न प्रकाशात्मा स भवेत्प्रागिव ज्ञानोदयात्पूर्वं यथा सो ऽप्रकाशस्तथा ज्ञानोदये ऽपि स्यात् । "ननु ज्ञानमर्थप्रकाशरूपमेव तत्कथं ज्ञानस्योदयानुदययोरर्थस्य तुल्यता स्यात्,, । स्यादेतदप्युपपद्येत, । यावता ऽर्थाद्भिन्नं यज्ज्ञानं प्रकाशरूपं तदर्थस्य सम्बन्धितया कथं स्यात् । यदि तावदर्थः प्रकाशत इत्येवंभूतं ज्ञानस्य स्वरूपं तदर्थज्ञानयोरभेद एवायातः * । अर्थस्वभावस्य ज्ञानत्वेनोक्तत्वात् । अर्थस्वभावत्वे च प्रकाशस्यार्थात्मतायामुक्तं दूषणम् । अथार्थं प्रकाशयतीति ज्ञानस्य स्वरूपं, तर्हि प्रकाशमानमर्थं करोति ज्ञानमित्यापतिते पुनरपि स एव दोषः, कृतप्रतानश्चायं प्रकृत्यर्थप्रत्ययार्थविवेको मयैव भेदवादविदारणे इति तत एवान्वेष्यः । तस्माद्भिन्नः प्रकाशो ऽर्थस्य संबन्धी भवतीति संभावनैव नास्ति । अतश्चेदमुपपत्त्या ऽऽयातमर्थस्य स्वरूपं प्रकाशमानत्वं प्रकाशाभिन्नत्वमिति । प्रकाशश्च यदि घटे ऽन्यः पटे ऽन्यस्तदानुसन्धानस्यायोगो, द्वयोः प्रकाशयोः स्वात्ममात्रविश्रान्तिपर्यवसानादिति वितत्योपपादितं नश्येज्जगत्स्थितिरित्यत्र तस्मादेक एव प्रकाशः । एतदेवावृत्त्या दर्शितं "न च प्रकाशोभिन्नः स्या,,दिति ॥

व्यतिरिक्तस्य ज्ञानस्यार्थप्रकाशरूपतामभ्युपगम्यापि बाधकान्तरमाह ।

(३) भिन्ने प्रकाशे चाभिन्ने सङ्करो विषयस्य तत् ।
प्रकाशात्मा प्रकाश्यो ऽर्थो नाप्रकाशश्च सिद्ध्यति ॥

* अर्थः प्रकाशत इत्यनेनार्थवृत्तिप्रकाशक्रियाया एव बोधनात् क्रियाक्रियावतोश्चाभेदादिति भावः ।

यद्यर्थोदन्य एव ज्ञानात्मा प्रकाशो ऽतएव भिन्नो ऽर्थत,स्तर्हि स्वात्मनि तस्य प्रकाशमात्ररूपत्वादभेद एव । तथाहि । नीलस्य प्रकाशः पीतस्य प्रकाश इति यो ऽयं नीलांशः पीतांशश्च स तावज्ज्ञानस्य न स्वरूपम् । भेदवादत्यागापत्तेः अथ विषय,-स्तद्वेदं विचार्यते । इह प्रकाशबलान्नीलपीतयोर्भेदो ऽभ्युपगन्तव्यः । येनैव च प्रकाशेन नीलो नील इत्युपगम्यते तेनैव च प्रकाशेन पीतः पीत इति कथं सङ्गच्छताम् । नीलेन जनितः पीतेन जनितस्तेन वा सहैकसामग्रीक इत्यादि यदुच्यते, तत्सिद्धे नीलपीतयोर्भेदे स्यात् । स एव विचार्यः । अथ नीलाकारो ऽसौ, * तद्यदि प्रतिबिम्बबला, तद् द्वितीयबिम्बानवभासादयुक्तम्, । अथाभेद,स्तर्हि त्यक्तो भेदवादः । तथा कारणतादिवादे शिखरस्थज्ञानं बहुतरनीलादिजन्यमेकत्र पट्वन्यत्र मन्दमिति कथं भेदः, प्रकाशशरीरस्याभेदात् । तथाभूते चान्यतरदर्शनोद्बोधिते ऽपि संस्कारे बलादेवाशेषस्मरणप्रसङ्ग इति भूयान्संकरः । स्यादेतत् । अर्थ एवास्तु किमनेन दोषापादकेन प्रकाशेनेति । अत्राह । अप्रकाशस्य सिद्धिरेव न का चित् । स्वात्मनि हि नीलं यदि पीतं न किं चिद्वा तत्किं दुष्येत् । अतएव ग्रन्थकृतैवान्यत्रोक्तम् ।

एवमात्मन्यसत्कल्पाः प्रकाशस्यैव सन्त्यमी ।
जडाः प्रकाश एवास्ति स्वात्मनः स्वपरात्मभिः ॥

इति । तद्यदि प्रकाशस्तदा भवत्यर्थः प्रकाशश्चासौ कथम् । यदि प्रकाशतैव घटस्य वपुः सैव पटस्येत्यादिविश्ववपुः प्रकाशः सिद्धः ॥

एकस्यैव प्रकाशस्यैवंभूतक्रमाक्रमकार्यकारणभावादिविचित्रवैश्वरूप्यप्रदर्शनसामर्थ्यरूपमैश्वर्यमित्येतावत्पर्यवसाययितव्यम् । तच्चैवं पर्यवस्यति । यदि प्रकाशस्य विचित्रभावे हेत्वन्तरमपाकृतम् । तत्र प्रकाशस्याविचित्रस्य क्रमेण विचित्रताकारणं प्रतिबिम्बात्मकं तत्प्रतिबिम्बसजातीयं यत्तदेव नीलादिरूपं बाह्यम् । तच्च यद्यप्यनुमेयं तथापीदं नीलमिति प्रत्यक्षेणाध्यवसायादध्यवसायप्राणितत्वाच्च प्रमाणस्थितेः प्रत्यक्षव्यपदेश्यं भविष्यति बाह्यार्थवादिकल्पितमिति हेत्वन्तरमनुमीयमानं बाह्यरूपमाशङ्क्यमानत्वेन दर्शयति ।

(४) तत्तदाकस्मिकाभासो बाह्यं चेदनुमापयेत् ।
नह्यभिन्नस्य बोधस्य विचित्राभासहेतुता ॥
न वासनाप्रबोधो ऽत्र विचित्रो हेतुतामियात् ।
तस्यापि तत्प्रबोधस्य वैचित्र्ये किं निबन्धनम् ॥

* तदाकारत्वं च तत्प्रतिबिम्बप्रयुक्तं यदि स्यात् तर्हि प्रतिबिम्बत्वे बिम्बप्रतिबिम्बयोर्द्वयोरुपलम्भान्नीलद्वयाभासप्रसङ्ग इति भावः ।

Digitized by Google

इह बोधस्तावदभिन्नः प्रकाशमात्रमेव ह्यस्य परमार्थः प्रकाशाधिकं यदि नीलस्य रूपं तर्हि तदप्रकाशरूपमिति न प्रकाशेत । अथ तथाप्रकाशरूपत्वमेवास्य रूपं पीतप्रकाशः कथं स्यात् । अथापि क्रमिकनीलपीतादिप्रकाशरूपमेव तस्य रूपं नीलाद्याभासशून्यो ऽहमिति प्रकाशः स्वापाद्यवस्थासु न स्यात् । तस्मात्प्रकाशः प्रकाश एव । अणुमात्रमपि न रूपान्तरमस्यास्तीति अभिन्नो बोधः । तस्य चाभिन्नस्य कदा चिन्नीलाभासता कदा चित्पीताभासतेति ये विचित्राभासास्तत्र कारणत्वं हि यस्मान्नोपपन्नं हेतावभिन्ने कार्यभेदस्यासम्भवात् । तस्मात्स स विचित्रनीलपीतादिरूप आकस्मिको ऽज्ञातप्रत्यक्षसिद्धहेतुकः सन्बाह्यं विज्ञानगतप्रतिबिम्बात्मकस्वस्वभावसम्पादकमौचित्यवशाच्चित्ररूपसदृशं क्रमोपनिपतद्रूपबहुतरभेदात्मकं ज्ञानात्सर्वथा पृथग्भूतमनुमापयतीति सम्भावयते बाह्यार्थवादी । न चास्येदं सम्भावनामात्रं अपि तु निश्चयपर्यवसाय्येव भवति । तथाहि । विज्ञानवादिना यो हेतुर्वैचित्र्ये वासनाप्रबोधलक्षण उक्तः स नोपपद्यते । स्मृतिजनकः संस्कारो वासनेति तावत्प्रसिद्धम् । इह त्वनुभववैचित्र्ये हेतुः पर्येषणीयो वर्तते । अस्तु वा नीलाद्याभाससंपादनसामर्थ्यरूपा ज्ञानस्य योग्यतात्मिका शक्तिर्वासना । तस्याश्च स्वकार्यसंपादनौन्मुख्यं प्रबोधः । ततो बोधेष्वाभासवैचित्र्यमिति । तत्रापि तु ब्रूमः । यद्यप्याभासानां ज्ञानान्तर्वर्तिनामपारमार्थिकं संवृतिसत्त्वमुच्यतापि । तथापि यदेषां कारणं तद्वस्तु सदेवाङ्गीकार्यम् । अवस्तुनः सर्वसामर्थ्यविरहितालक्षणस्य कार्यसंपादनप्राप्तितसामर्थ्यात्मकस्वभावानुपपत्तेः । एवं स्थिते या एता वासना आभासकारणत्वेनेष्यन्ते तासां बोधाद्यदि भिन्नं रूपं तच्च परमार्थसत्तदयं शब्दान्तरप्रच्छन्नो बाह्यार्थवादप्रकार एव । अथ संवृतिसत्तर्हि तेन रूपेण कारणतानुपपत्तिः । अथ येन रूपेण तासां पारमार्थिकता तेन कारणता । तर्हि ज्ञानमात्रं तत्त्वाभिन्नमिति नीलाद्याभासरूपस्य कार्यभेदस्यासिद्धिः । एवं वासनानामविचित्रत्वे तत्प्रबोधो विचित्र इति का प्रत्याशा । भवन्तु वा वासना भिन्नास्तथापि तु बोधमात्रातिरिक्तस्य देशकालभावादेः प्रबोधकाभिमतस्य विचित्रस्य कारणस्याभावात्प्रबोधो विचित्र इत्येक एव प्रबोध इति सममेव नीलादिवैचित्र्यं भासेत । "अथ स्वसंतानवर्तीनि बोधान्तराणि विचित्राणि प्रबोधकारणानीति," । तदसत् । सुखदुःखनीलपीतादिपूर्वापरादिदेशकालभेदस्य विज्ञानमात्ररूपत्वे विज्ञानस्य च प्रकाशमात्रपरमार्थतायां स्वरूपभेदासंभवे बोधवैलक्षण्यानुपपत्तेः । परप्रमातृरूपेषु बोधान्तरेषु संतानान्तरशब्दवाच्येष्वपि तुल्योऽयमवैलक्षण्यप्रकारः । तत्रापि परकीयाभिमतस्य कृशस्थूलादेः कायस्य श्वासप्रश्वासादेः प्राणस्य सुखदुःखादेर्वा गुणस्यानुमात्रभिमतसंविन्मात्ररूपाभेदे परत्वं कस्येति न विद्मः । बोधस्य तन्निष्ठस्येति चे,त्सो ऽपि प्रमाणेन यदि न सिद्धस्तदसन्नेव, सिद्धो ऽपि प्रमेयतया चे, त्तज्जड एव, । तथापि च कायादिवदेव ज्ञानमात्रस्वभावः स्वसंविन्मात्ररूपत्वे परं प्रत्यप्यस्यासिद्धेः । ननु व्याहारादिक्रियास्वात्मनीच्छया व्याहरेयमित्येवंरूपया हेतुभावेन व्याप्ता दृष्टा ऽतश्चैत्रकायेऽपि तया तद्धेतुकया भाव्यम् । न च मत्संततिपतिता समीहा ऽस्तीति स्वसंवेदनेन निश्चितम् । ततश्च परसमीहा सिद्ध्यति । तदेव संतानान्तरमिति । अत्रोच्यते । इहानुमातुर्व्यापाराभासो द्विधा भाति । व्याप्तिग्रहणकाले विच्छेदप्राणोऽहं व्याहरामीत्येवंरूपः । अनुमानावसरे च व्याहरत्ययमिति विच्छेदजीवित इत्यन्यस्य व्याप्तिर्गृहीता । अन्यश्चाभासः कथमिदानीं हेतुः स्यात् व्याहरतीत्याभासस्य च हेतुरविदित एवेति । कथं ततो हेतोः समीहा नुमीयते । किं च व्याहरत्ययमिति यः प्रमात्रन्तरेऽनुमातृसंमते विच्छिन्नतयावभासः सोऽनुमेयसंमतायाः परसमीहायाः कथं कार्यः स्यात् । तस्या हि व्याहरामीत्याभासः कार्यो योऽसावविच्छेदजीवितः । न चाविच्छेदमयस्य विच्छेदमयः कार्यमिति युक्तम् । तथाभूतकार्यकारणभावग्रहणोपायाभावात् । नहि स्वात्मनि योऽयमविच्छिन्नाभासः स परत्र विच्छिन्नं व्याहरत्ययमित्येवंरूपमाभासं जनयतीति केनचित्प्रमाणेन सिद्धम् । परसिद्धिपूर्वकत्वादस्यार्थस्य परप्रमातृसिद्धेश्च एवंभूतार्थसिद्ध्यधीनत्वेनेतरेतराश्रयात् । न चावश्यमविच्छिन्नाद्विच्छिन्नेन भाव्यमिति नियमोऽस्ति, व्यभिचारात् । न च विच्छिन्नोऽप्याभास उत्पद्यतामिति तदनुसन्धानात्तदुत्पत्तिर्नियता । तत्सद्भावेऽप्यनुत्पत्ते, स्तदभावे चोत्पत्ते,र्विच्छिन्न आभासः परत्रोत्पद्यतामिति या समीहा तया सह परत्रोत्पन्नस्य विच्छिन्नाभासस्य कार्यकारणभावग्रहणमेव परासिद्धौ न युक्तमिति व्याप्तेरेवासिद्धिः । प्रमात्रन्तराणि च यदि भिन्नानि तदा तन्निष्ठानामवभासानां भेद एव ज्ञानादव्यतिरिक्तं चेति न्यायात् । ततश्चैकाभासनिष्ठत्वाभावादेकाभासविश्रान्तः संभूय प्रमातॄणां व्यवहारो न स्यादित्यन्योन्यानुरक्तं भूतवस्तप्रकृतिप्रायं जगदापद्येत । अनुमीयमानमपि च बोधान्तरमनुमातृसंमताद्बोधाद्यदि भिन्नं तदस्ति तावत्सम्भवः । यत्प्रमेयं बोधाद्भिन्नमस्तीति । सहोपलम्भनियमादेरनैकान्तिकत्वान्नीलपीतादिनापि प्रमेयराशिना किमपकृतं येनास्य स्वरूपविश्रान्तिर्न सह्यते । तस्मात्प्रमात्रन्तराणामप्यसिद्धिरेव । सिद्धौ वा सर्वत्र प्रमात्रन्तर्गता आभासा एकैकत्र परत्राभासवैचित्र्यहेतुभूतं वासनोद्बोधवैचित्र्यं जनयेयुर्नियमे हेत्वन्तराभावादिति । तथापि न नीलादिवैचित्र्यसिद्धिः । एवं वासनानां तदुद्बोधहेतूनां च विचित्राणामनुपपत्तिरेव । ततश्च स्थितमेतदभिन्नो बोधस्तस्याकस्मिकाभासभेदहेतुत्वानुपपत्तेर्बाह्यो ऽर्थो नुमेयः संभाव्यत इति यदि

Digitized by Google

वादिनोच्यते इति श्लोकद्वयार्थः, चेच्छब्दः श्लोकद्वयवाक्यार्थशङ्काद्योतकः ॥ ५ ॥

॥ एतदाह्निकशेष उत्तराङ्के भविता ॥

॥ श्रीः ॥

॥ अथ प्रसन्नराघवनाटकस्योपसंहारः ॥

इत्थं विबुधजनमनोनन्दनः श्रीजयदेवकविप्रणीतः प्रसन्नराघवनामको ग्रन्थः सर्वत्र संस्कृतच्छायया प्राकृतभाषाया अर्थलेखनेन तत्तदुचितस्थलेषु टिप्पणीलेखनेन च पाठनाद्यनेकव्यापारव्यापृतत्वेनालब्धपूर्णावकाशेनापि मया सुसंस्कृत्य प्रतिमासमेकैकाङ्कमुद्रणेन श्रीजगदीशकृपया निर्विघ्नतया प्रकाशितः। अथ पूर्वकृतैतत्कविवर्णनोऽप्यहमन्योत्तमग्रन्थानामपि रचयिताऽयं कविः सुमित्रायाः पुत्रश्चेति बोधयितुमिच्छुस्तद्विषये प्रमाणं लिलेखिषुरेवं ब्रुवे। यश्चायमद्यत्वे निखिलालङ्कारलक्ष्यलक्षणाज्ञानतमोनिरसनाय चन्द्रस्यालोक इव चन्द्रालोक इति ग्रन्थः प्रसिध्यति तमिमं सहृदयहृदयाह्लादकं संक्षिप्तमपि विशदीकृतसकलालङ्कारतत्त्वमपूर्वं ग्रन्थमयमेव महाकविर्जयदेवः प्राणैषीदित्येतद्ग्रन्थसमाप्तिस्थान्तिमश्लोकद्वयतः स्फुटमवसीयते। तथाहि।

जयन्ति याज्ञिकश्रीमन्महादेवाङ्गजन्मनः।
सूक्तपीयूषवर्षस्य जयदेवकवेर्गिरः॥
महादेवः सत्रप्रमुखमखविद्यैकचतुरः
सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ॥
प्रणीतस्तेनासौ सुकविजयदेवेन दशभि-
श्चिरं चन्द्रालोकः सुखयतु मयूखैर्दश दिशः॥

एवमत्रास्य कवेर्मातापित्रोर्नामोल्लेखादयं कविर्गीतगोविन्दकारान्महाकवेर्जयदेवाद्भिद्यत इत्यप्यस्त्यतिरोहितं विदुषाम्। यतोऽयं भोजदेवात् रामादेव्यामजनीति गीतगोविन्दस्यान्तिमश्लोकात् स्फुटं प्रतीयते।

तथाच श्लोकः।

श्रीभोजदेवप्रभवस्य रामा-
देवीसुतश्रीजयदेवकस्य।
पराशरादिप्रियवर्गकण्ठे
श्रीगीतगोविन्दकवित्वमस्तु॥

एवं रामगीतादीनां बहूनां ग्रन्थानां रचयिताऽयं कविरस्मिन् प्रसन्नराघवनाटके जानकीपरिणयमारभ्य श्रीरामचन्द्रोऽतिप्रचण्डं दशकण्ठमाहवे शरौघैर्विनिपात्य कृतविभीषणलङ्काराज्याभिषेकः सीतया सह पुष्पकमारुह्य पुनरयोध्यामगादित्यन्तां कथां सुधातः स्वादीयैर्गद्यैः पद्यैश्च व्यतानीत्। अस्मिन्नाटके प्रायो वीररस एवोपलभ्यते क्वचित् शृङ्गारकरुणारसावपि।

एवमहमेतदुत्तमं काव्यं काशीविद्यासुधानिधिपत्रद्वारा तत्पत्रसुधाचकोरमनोविनोदनाय प्रकाश्यैतः परमेतत्पत्रद्वारैवान्यानपि प्राचीनोत्तमकाव्यग्रन्थान् यथावसरं प्रकाशयिष्य इत्यलं पल्लवितेनेति शम्।

गोविन्ददेवशास्त्री

॥ श्रीः ॥

॥ अथ बालरामायणाख्यनाटकस्य प्रस्तावना ॥

अथ प्राचीनोत्तमकाव्यसुधास्वादलोलुपानां गुणैकपक्षपातिनां रसिकजनानां प्रीत्यै सकलनाटकावतंसभूतं बालरामायणाख्यं नाटकमेतत्पत्रद्वारेदानीं प्रकाशयितुमिच्छुरादौ तावदेतद्रचयितुर्वर्णनं संक्षेपतः कुर्वे। अस्य महानाटकस्य रचयिता सूर्यवंशीययायावरकुलजन्मा सत्यवतीतनूजो रघुकुलचूडामणेर्महेन्द्रपालस्य गुरुः श्रीराजशेखरः कविरस्ति। सोऽयं संस्कृतेऽतिनिष्णातोऽपि सर्वविधप्राकृतभाषार्णवपारदृश्वा केवलया प्राकृतभाषयैव कर्पूरमञ्जर्याख्यं सट्टकाभिधं नाटकविशेषं प्राकृतबहुलातिप्रौढसंस्कृतभाषया विद्धम्नरोहरां विद्धशालभञ्जिकाख्यां नाटिकां च व्यतनोत्। अयं च कविरतिशूरः सकलशास्त्रार्थतत्त्ववेत्ता केरलक्षितिपतिः श्रीशङ्कराचार्यसमकालिको राजशेखराख्यो राजाऽऽसीत्। अयमतिमानुषचरित्रं श्रीशङ्कराचार्यं दिदृक्षुस्तत्र तदनुमतिं लब्धुकामस्तत्समीपे स्वसचिवं प्रेष्य तद्द्वारा कृताभिर्बहुविधाभिस्तुतिभिस्तोषितात् श्रीशङ्कराचार्यादासादिततत्समीपगमनानुज्ञस्तत्र गत्वा हाटकायुतसमर्पणपूर्वं स्वप्रणीतमपूर्वं नाटकत्रयमाचचक्षे। तन्नाटकत्रयश्रवणेनातिसंतुष्टवतस्तस्मात् भिक्षोर्लब्धस्वाभिमतवरःस्वीयां पुरीमाजगामेति शङ्करविजयीयपञ्चमसर्गस्थैवमेनमतिमर्त्यचरित्रमिति दशमश्लोकमारभ्यागमत् कृतकृत्यधीर्निजां नगरीं तस्य गुणानुदीरयन्नित्यन्तैरेकविंशत्या श्लोकैरिमां कथां तद्ग्रन्थकारः श्रीमाधवाचार्यो व्यलिखत्। उपलभ्यते चेषु दिवसेषु बालरामायणं कर्पूरमञ्जरी विद्धशालभञ्जिकेति नाटकत्रयमेवैतत्कविप्रणीतम्। एतेनास्य कवेरतिप्राचीनत्वं द्योत्यते। एवमयं राज्ञां कवीनां च शेखरभूतो राजशेखरनामा कविः स्ववंशमौक्तिकमणेः श्रीरामचन्द्रस्य बाल्यदशामारभ्य समग्रं चरितं विवक्षुरेतद्दशाङ्कघटितमपूर्वं बालरामायणाख्यं महानाटकमकरोत्। एतन्नाटकमपि प्रसन्नराघवमिव वीररसप्रधानं स्थल-

Digitized by Google

विशेषे शृङ्गारकरुणरसगर्भितं चास्ति । अतः समीचीनकाव्यपठनजनितफललाभ एतदुत्तमकाव्यस्य सुधास्यन्दिनीनां सूक्तीनां श्रवणेन भवेदयं च कविरनेकोत्तमगुणालङ्कृतश्चासीदित्येतत्प्रथमाङ्कस्थाभ्यां पारिपार्श्विकं प्रत्यन्योक्तिद्वारा सूत्रधारवचनरूपाभ्यामधिमश्लोकाभ्यां स्फुटमवगम्यते । तथाच सूत्रधारोक्तिः ।

किं न श्रुतं शङ्करवर्मणो वर्णनम् ।
पातुं श्रोत्ररसायनं रचयितुं वाचः सतां संमता
व्युत्पत्तिं परमामवाप्तुमवधिं लब्धुं रसस्रोतसः ।
भोक्तुं स्वादु फलं च जीविततरोर्यद्यस्ति ते कौतुकं
तद्भ्रातः शृणु राजशेखरकवेः सूक्तीः सुधास्यन्दिनीः ॥

अपिच ।

आपन्नार्तिहरः पराक्रमधनः सौजन्यवारांनिधि-
स्त्यागी सत्यसुधाप्रवाहशशभृत्कान्तः कवीनां गुरुः ।
वर्ण्यं वा गुणरत्नरोहणगिरेः किं तस्य साक्षादसौ
देवो यस्य महेन्द्रपालनृपतिः शिष्यो रघुग्रामणीः ॥

अथास्य नाटकस्यैकमेव पुस्तकमत्रैव काश्यां निवसतःपरमसुहृदो ढुण्ढिराजाचार्यशास्त्रिणः सकाशान्मयाऽऽसादितम् । ततःपरमस्यां नगर्यामन्यनगरीषु चैतत्पुस्तकान्तरलाभायातिमार्गणपरोऽप्यलब्धपुस्तकान्तर एतत्पुस्तकमेव महता परिश्रमेण सम्यक् परिशोध्येदानीं पाठशालाध्यक्षस्य श्रीमतो ग्रिफिथसाहिबस्याज्ञया काशीविद्यासुधानिधिपत्रमुद्रणद्वारेमं ग्रन्थं प्रकाशयितुमुद्युतोऽस्मि ।

अतः सर्वैश्वर्यवन्तं विनतजनमनःसंतोषदायिनं श्रीपरमेश्वरमिदमेव प्रार्थये यदेतत्पत्रदर्शनोत्सुकानां रसिकजनानां मनःस्वेतदुत्तमं काव्यं परमां मुदमादधात्वित्यलं बहुलेखनेनेति शम् ।

गोविन्ददेवशास्त्री

॥ श्रीगणेशाय नमः ॥

प्रसत्तेर्यः पात्रं तिलकयति यं सूक्तिरचना
य आढ्यः स्वादूनां श्रुतिचुलुकलेह्येन मधुना ।
यदात्मानो विद्याः परिणमति यश्चार्थवपुषा
स गुम्फो वाणीनां कविवृषनिषेव्यो विजयते ॥ १ ॥

नान्द्यन्ते सूत्रधारः ससंरम्भं परिक्रम्य पुरोऽवलोक्य सप्रश्रयमञ्जलिं बद्ध्वा भोभो भुजस्तम्भालानितलक्ष्मीकरेणुना रघुकुलैकतिलकेन महेन्द्रपालदेवेनाधिकृताः सभासदः सर्वानेव वो गुणनिधिर्विज्ञापयति विदितमेवैतद्भवताम् । यत्तु नाट्याचार्येण धूर्तिलेन प्रतिज्ञातम् ।

वीराद्भुतप्रायरसे प्रबन्धे
लोकोत्तरं कौशलमस्ति यस्य ।
नाट्ये च नृत्ये च परं प्रवीण-
मसौ सुतां मे परिणेष्यतीति ॥ २ ॥

तत्र दक्षिणापथादागतो रङ्गविद्याधरनामा भरतपुत्रो भवद्भिः परीक्षितो नच निर्व्यूढस्तन्मामपि परीक्षध्वम् । कर्णं दत्त्वाऽऽकाशे किं ब्रूथ विलक्षेण सता कर्णाटनटेन तेन निर्मर्यादमिदमुदितम् । यद्युताक्षपिञ्जतप्रसरा हि पुरुषकाराः कर्णाटानां तथाहि ।

अहमेव हरिष्यामि परिणेतुः पुरोऽपि ताम् ।
नारीपरिभवं सोढुं दाक्षिणात्या न शिक्षिताः ॥ ३ ॥

अञ्जलिं बद्ध्वा तदिदं मयापि निवेद्यते यदि हि परिणयामि ।

अपि द्वीपान्तरादेव हृतां प्रत्याहरामि ताम् ।
कलत्रहरणे पुंसां कियद्दर्पविलङ्घनमिति ॥ ४ ॥

विचिन्त्य । किं पुनस्तत् ।

प्रविश्य पारिपार्श्विकः । एदं तम् * ।

सूत्रधारः । मारिष किमिदम् ।

पारिपार्श्विकः । देवादेसपत्तं तं णिरूवेदु भावो † ।

सूत्रधारः । सखेदम् । कथमन्यदुपक्रान्तमन्यदापतितं सोयमातपार्थिनः पयोदाभ्युदयः । विचिन्त्य । सविघ्नविप्रुष एव काम्यक्रियारम्भाः । विभाव्य आमनिर्वेदः सिद्धेर्मूलम् । निश्चित्य भवत्वेवं तावत् प्रकाशम् । मारिष रसान्तरेण नावहितं मे चेतः । तद्भवानेव वाचयतु ।

पारिपार्श्विकः । गृहीत्वा वाचयति ।

कमवड्ढन्तविलासं रसाअले कं करेइ कन्दप्पो ‡ ।

सूत्रधारः । अये प्रश्नोत्तरम् । सेयमस्मत्प्रीतिरितिदेवादेशः । तत्स्वयमेव वाचयामि । गृहीत्वा वाचयति ।

निर्भयगुरु § र्व्यधत्त च वाल्मीकिकथां किमनुसृत्य ॥ ५ ॥

कथं भाषाचित्रकमेकालापकं चैतत् स्वगतं सूचनाक्रमोपि विचिन्त्य । बालरामायणम् ‖ । विमृश्य नाटयितव्यमित्यर्थतोऽभिहितं भवति ।

---

* एतत् तत् ।

† देवादेशपत्रं तत् निरूपयतु भावः ।

‡ क्रमवर्धमानविलासं रसातले कं करोति कन्दर्पः ।

§ निर्भयराजस्य महेन्द्रपालस्य गुरुरुपाध्यायो राजशेखरः । तथाच कर्पूरमञ्जर्याम् ।

वालकई कइराओ णिब्भअराअस्स तह उवज्झाओ ।
इय जस्स परम्पराए अप्पा माहप्पमारूढो ॥
बालकविः कविराजो निर्भयराजस्य तथा उपाध्यायः ।
इति यस्य परम्परया आत्मा माहात्म्यमारूढः ॥

‖ बालरामायणम् ।

पारिपार्श्विकः । अहो अच्चरिअमच्चरिअम् * । अण्णं लिहिदं अण्णं पढीअदि ।

सूत्रधारः । सहर्षम् । अनुकूलं हि दैवं सर्वस्मै स्वस्तिकरोति यत्प्रस्तुतसंवादी देवादेशः ।

पारिपार्श्विकः । दिट्ठिआ कालिंदीमन्दाइणीसलिलं विअ पढमं दुधा पहाविअ पच्छा तं कज्जं एक्कीभूदम् † ।

सूत्रधारः । सहर्षम् । संप्रति हि ।

सद्विज्ञान कुलतिलकतां याति दारिद्र्यदारैः
फुल्ला कीर्त्तिर्भ्रमति सुकवेर्दिक्षु यायावरस्य ।
धीरोदात्तं जयति चरितं रामनाम्नश्च विष्णोः
काव्यव्याजात्तदियमपरा काप्यहो कामधेनुः ॥ ६ ॥

पारिपार्श्विकः । वम्मीइणा मुणिवरिट्ठेण दिट्ठणिबन्धणस्स रामचन्दचरिदस्स को उण सो विसेसो जं एस कई दंसइस्सदि ‡ ।

सूत्रधारः । मारिष क्वचित्कश्चित्प्रगल्भते नहि सर्वः सर्वं जानाति ।

पारिपार्श्विकः । भाव णं भणामि पच्चक्खीकिदसअलसभासद्दत्थादो तत्थभवदो महेसिणो अदिक्कमिअ किं एस चम्मचक्खू पेक्खिस्सदि § ।

सूत्रधारः । मारिष मामैवम् ।

वदनेन्दुषु वामदृशामिन्दीवरपत्त्रसंघटितम् ।
रसनासु च सुकवीनां निवसति सारस्वतं चक्षुः ॥ ७ ॥

प्राज्ञश्चायम् । वस्त्वन्तरमतिशयानो हि प्रज्ञाप्रकर्षः । सूक्तमिदं तेनैव महामन्त्रिपुत्रेण ।

उदन्वच्छन्ना भूः स च निधिरपां योजनशतं
सदा पान्थः पूषा गगनपरिमाणं गणयति ।
इति प्रायो भावाः स्फुरदवधिमुद्रामुकुलिताः
सतां प्रज्ञोन्मेषः पुनरयमसीमा विजयते ॥ ८ ॥

पारिपार्श्विकः । ता णमक्कारो करीअदु ‖ ।

सूत्रधारः । ननु नमस्कृतं तेनैव ।

योगीन्द्रश्छन्दसां स्रष्टा रामायणमहाकविः ।
वल्मीकजन्मा जयति प्राच्यः प्राचेतसो मुनिः ॥ ९ ॥

प्रबन्धोपक्रमे च स किल कविरेवमुक्तवान् ।

ब्रह्मण्यः शिवमस्तु वस्तु विततं किंचिद्वयं ब्रूमहे
हे सन्तः शृणुतावधत्त विधृतो युष्मासु सेवाञ्जलिः
यद्वा किं विनयोक्तिभि र्मम गिरां यद्यस्ति सूक्तामृतं
माद्यन्ति स्वयमेव तत्सुमनसो याञ्चा परं दैन्यभूः ॥ १० ॥

सर्वभाषाविचक्षणश्च स एवमाह ।

गिरः श्रव्या दिव्याः प्रकृतिमधुराः प्राकृतधुराः
सुभव्योऽपभ्रंशः सरसरचनं भूतवचनम् ।
विभिन्नाः पन्थानः किमपि कमनीयाश्च त इमे
निबद्धा यस्त्वेषां स खलु निखिलेऽस्मिन्कविवृषा ॥ ११ ॥

एतत्प्रबन्धमहत्त्वं प्रति तेनेदमुक्तम् ।

ब्रूते यः कोपि दोषं महदिति सुमतिर्बालरामायणेऽस्मिन्
प्रष्टव्योऽसौ पटीयानिह भणितिगुणो विद्यते वा नवेति ।
यद्यस्ति स्वस्ति तुभ्यं भव पठनरुचिर्विद्धि नः षट् प्रबन्धा-
नैवं चेद्दीर्घमास्तां नटबटुवदने जर्जरा काव्यकन्या ॥ १२ ॥

पारिपार्श्विकः । विहस्य भाव अलङ्किदकदमगोत्तो पवित्तीकिदकदमणामहेओ एस कई जस्सिं णाम भावस्स देवस्स अ एव्वं पक्खवादो * ।

सूत्रधारः । अप्यनभिज्ञ गगनार्णवमाणिक्यं पूषणमपि तर्हि पृच्छ ।

स मूर्त्तो यत्रासीद्गुणगण इवाकालजलदः
सुरानन्दः सोपि श्रवणपुटपेयेन वचसा ।
नचान्ये गण्यन्ते तरलकविराजप्रभृतयो
महाभागस्तस्मिन्नयमजनि यायावरकुले ॥ १३ ॥

तदामुष्यायणस्य महाराष्ट्रचूडामणेरकालजलदस्य चतुर्थो दौर्दुकिः शीलवतीसूनुरुपाध्यायश्रीराजशेखर इत्यपर्याप्तं बहुमानेन । स्मृतिं नाटयित्वा अहो किमपि कमनीया कवेरात्मन्याशीः ।

आद्यः कन्दो वेदविद्यालतानां
जैह्वं चक्षुर्निर्निमेषं कवीनाम् ।
यो येनार्थी तस्य तत् प्रक्षरन्ती
वाङ्मूर्तिर्मे देवता सन्निधत्ताम् ॥ १४ ॥

इदं च सूक्तमुक्तवान् ।

जिह्वे देवि सरस्वतीं भगवतीमये समक्षां कुरु
त्वां बद्धाञ्जलि राजशेखरकविः सोऽयं स्वयं याचते ।

* आश्चर्यमाश्चर्यम् । अन्यत् लिखितमन्यत् पठ्यते ।

† दिष्ट्या कालिन्दीमन्दाकिनीसलिलमिव प्रथमं द्विधा प्रवाह्य पश्चात् तत् कार्यमेकीभूतम् ।

‡ वाल्मीकिना मुनिवरिष्ठेन दृष्टनिबन्धनस्य रामचन्द्रचरितस्य कः पुनः स विशेषो यमेव कविर्दर्शयिष्यति ।

§ भाव ननु भणामि प्रत्यक्षीकृतसकलसर्गशब्दार्थात् तत्रभवतो महर्षेरतिक्रम्य किमेष चर्मचक्षुः प्रेक्षिष्यते ।

‖ तन्नमस्कारः क्रियताम् ।

* अलङ्कृतकतमगोत्रः पवित्रीकृतकतमनामधेय एष कविर्यस्मिन् नाम भावस्य देवस्य चैवं पक्षपातः ।

Digitized by Google

स्तुत्येऽस्मिन्विजवंशमौक्तिकमणौ रामे विरामे द्विषां
कुण्ठा मे प्रतिभैव दैवतवशाद्वाचां प्रवृत्तिर्यदि ॥ १५ ॥

पारिपार्श्विकः । ता किं एण वण्णीअदि * ।

सूत्रधारः । ननु वर्णितमेव दैवज्ञेन ।

बभूव वल्मीकभवः कविः पुरा
ततः प्रपेदे भुवि भर्तृमेठुताम् ।
स्थितः पुनर्यो भवभूतिरेखया
स वर्त्तते संप्रति राजशेखरः ॥ १६ ॥

अपिच । किं न श्रुतं सभ्यस्य शङ्करवर्मणो वर्णनम् ।

पातुं श्रोत्ररसायनं रचयितुं वाचः सतां संमता
व्युत्पत्तिं परमामवाप्नुमवधिं लब्धुं रसस्रोतसः ।
भोक्तुं स्वादु फलं च जीविततरोर्यद्यस्ति ते कौतुकं
तद्भ्रातः शृणु राजशेखरकवेः सूक्तीः सुधास्यन्दिनीः ॥ १७ ॥

अपिच ।

अपवार्त्तिहरः पराक्रमधनः सौजन्यवारांनिधि-
स्त्यागी सत्यसुधाप्रवाहशशभृत्कान्तः कवीनां गुरुः ।
वर्ण्यं वा गुणरत्नरोहणगिरेः किं तस्य साक्षादसौ
देवो यस्य महेन्द्रपालनृपतिः शिष्यो रघुग्रामणीः ॥ १८ ॥

नेपथ्ये गीयते ।

मुक्कहरिणङ्कमण्डलपासप्पसरो बुधो विबुहवग्गो ।
ओत्थरिअ राहुविहुरं णलिणीणाहं समुल्लिहइ † ॥ १९ ॥

सूत्रधारः । आकर्ण्य कथमुपश्रुतदैवादेशैः कुशीलवैरुपक्रान्त-मेव यदियं शुनःशेपस्य प्रावेशिकी ध्रुवा । विमृश्य ध्रुवा हि नाम नाट्यस्य प्रथमे प्राणाः । तथाहि ।

प्रथयति पात्रविशेषान् सामाजिकमनांसि रञ्जयति ।
अनुसंदधाति च रसान् नाट्यविधाने ध्रुवा गीतिः ॥ २० ॥

तदेह्यावामप्यनन्तरकरणीयाय सज्जीभवाव इति निष्क्रान्तौ । आमुखम् ।

ततः प्रविशति शुनःशेपः ।

शुनःशेपः । प्रातःसवन एव यजमानं द्रष्टुमिच्छामि । तच कश्चित्सन्ध्यां वन्दमानस्य मे कालातिपातः संवृतः । ऊर्ध्वमवलोक्य कथमद्याप्यपरिष्टमाञ्जिष्ठं च मञ्जु मार्त्तण्डीयं तेजः । तथाहि ।

उषःप्रवालद्रुमबालपल्लवा-
स्त्रिलोकहर्म्याङ्गणहस्तदीपिकाः ।
दिनद्विपेन्द्रारुणकर्णचामरा
मरीचयोऽर्कस्य लुठन्ति कोमलाः ॥ २१ ॥

स्मृत्वा ।

यदेतदयेसरमम्बरस्थं
ज्योतिः स पूषा पुरुषः पुराणः ।
अथास्य शिष्यः किल याज्ञवल्क्य-
स्तस्यापि राजा जनकः स योगी ॥ २३ ॥

राक्षसरक्षौषधं रामभद्रमानेतुं सिद्धाश्रमादयोध्यां गच्छता तातविश्वामित्रेण यज्ञोपनिमन्त्रकस्य परमसुहृदः श्रोत्रियक्षत्रियस्य महाराजसीरध्वजस्य स्वप्रतिनिधिः प्रेषितोऽस्मि । आसन्नसत्रसमयस्य चागच्छतोऽध्वरविधिरवभृथावशेषो वर्त्तत इति मे तर्कः । तदेष राजर्षेः सौस्नातिकोऽपि भवन्न गुरोरपराधभूमिः स्यामिति परिक्रामति ।

प्रविश्य तापसच्छद्मना राक्षसः । स्वगतम् ।

संप्रेषितो माल्यवताहमद्य
ज्ञातुं प्रवृत्तिं कुशिकात्मजस्य ।
पुरं निमीनां मिथिलां च गन्तुं
तां चाप्ययोध्यां रघुराजधानीम् ॥ २३ ॥

कुलपुत्रक इति सप्रसादमादिष्टश्चास्मि । यथा सीतानाम्नीमयोनिजां जनककन्यां धूर्जटिधनुरारोपणपणपरिणेयां देवो दशाननः श्रुतवान् । तस्य मर्त्यमण्डलचाराधिकारनियुक्ता सहोदरी शूर्पणखा नित्यमेवंविधानां राजकार्याणां संपादयित्री उचितविधायिनी च मे वत्सा । प्रभुचित्तानुवर्त्तनं हि सेवकजनसिद्धविद्या । सीतार्थी च मिथिलां प्रस्थातुकामो महाराजरावणः । किं बहुनाऽयमपरो गण्डस्योपरि पिण्डकोद्भेदो यत्किल प्रस्थास्यमानेन निशाचरचक्रवर्तिना तत्रभवतो नीललोहितान्तेवासिनः पार्वतीधर्मपुत्रकस्य जामदग्न्यस्य सकाशं परशुमार्गणाय मायामयः प्रहितः । तदिदमसमञ्जसमिव पश्यामि । यतः ।

शमव्यायामाभ्यां प्रतिविहिततन्त्रस्य नृपतेः
परं प्रत्यावापः फलति कृतसेकस्तरुरिव ।
बहुव्याजं राज्यं न सुकरमराज्यप्रणिधिभि-
र्दुराराधा लक्ष्मीरनवहितचित्तं चलयति ॥ २४ ॥

विमृश्य । अहह । अनमात्यायत्तसिद्धेर्धिङ्नृन्त्वम् । कुतः ।

स्वेच्छया कुरुते स्वामी यत्किंचन यतस्ततः ।
तत्तत्प्रतिचिकीर्षन्तो दुःखं जीवन्ति मन्त्रिणः ॥ २५ ॥

विचिन्त्य । तद्भवद्भविष्यदनर्थयोर्भवदनर्थं प्रथमं प्रतिकुर्वीतेति नीतिविदः । तदेष सीतावृत्तान्त एव प्रथमं प्रतिविधातव्यः । भद्रमुख तत्त्वया मेनकाकामुकस्य त्रिशङ्कुयाजिनः क्षत्रियब्रा-

---

* तत् किं न वर्ण्यते ।

† मुक्तहरिणाङ्कमण्डलपार्श्वप्रसरो बुधो विबुधवर्गः ।
अवतीर्य राहुविधुरं नलिनीनाथं समुल्लिखति ॥

Digitized by Google

स्थणस्य तस्य प्रवृत्तिरस्मासु निवेदनीया स च सिद्धाश्रमादुच्चलित इति श्रुतिः । तस्य दशरथः सीरध्वजश्च परं मित्रे । तत्र यदि दशरथं प्रति यायात् तदहमन्यापदेशेन दशकन्धरस्य याचाभङ्गाय यतिष्ये । स हि नक्तंचराणां निसर्गामित्रो विश्वामित्रः । व्रतचर्यया वीरव्रतचर्यया च समर्थः । दशरथोऽपि तथाविध एव । जनकस्य योगी शान्तो दान्तश्च । अहं तु मिथिलां पुरीं प्रत्युच्चलितस्त्वरितमिमां विचित्य रघुराजधानीं यास्यामि । विसृश्य तादृश एव तादृशानामपसर्पः स्यादिति कृततापसवेषोऽपि महर्षिभ्यो बिभ्यत् संचरामि । पुरोऽवलोक्य कथं तापसः । प्रत्यभिज्ञाय तत्रापि विश्वामित्रधर्मपुत्रः शुनःशेपः । भवत्वस्मादेव तत्किंवदन्तीलाभः । उपसृत्य भगवन्नभिवादये ।

शुनःशेपः । अभिलषितेन युज्यस्व ।

इतिपरिक्रामतः ।

राक्षसः । विलोक्य भगवन्साप्रपदीनं सख्यं मां मुखरयति तत्प्रष्टुकामोऽस्मि ।

शुनःशेपः । ब्रह्मन्नभिधीयताम् ।

राक्षसः । विद्याव्रातक इव लक्ष्यसे तत् कथमयं स्वाध्यायप्रत्यूहः ।

शुनःशेपः । गुरोरादेशः ।

राक्षसः । कस्ते गुरुः ।

शुनःशेपः । भगवान्विश्वामित्रः ।

राक्षसः । स्वगतम् । भवतु कोपयाम्येनम् । सुप्तमत्तकुपितानां हि भावज्ञानं द्रष्टव्यम् । प्रकाशम् । अथ कोऽयं विश्वामित्रो नाम ।

शुनःशेपः । सकोपम् । अये द्वीपान्तरादिवागतोऽसि यद्भगवन्तं विश्वामित्रमपि न जानासि ।

न्यस्यान्यान् दक्षिणस्यां दिशि गगनमुनीन् सप्त कृत्स्नसंपत्
नव्यं हव्यं च कृत्वा त्रिदशजनहृते सर्वयागाङ्गवर्गं ।
वासिष्ठीं शापमुद्रां सपदि विदलयन् यो महासत्त्वबन्धे
मध्यव्योम त्रिशङ्कोः शतमखविमुखः स्वर्गसर्गं चकार ॥२५॥

अपिच ।

तत्त्वज्ञानमहानिधिः क्षितिभुजां जेता मुनीनां च यः
पाणी यस्य परं पवित्रिततलौ चापस्रुचोर्धारणात् ।
विश्वामित्र इति त्रिलोकतिलकं त्वं वेत्सि नास्मद्गुरुं
योऽस्मिंश्चित्रशिखण्डिनां भगवतां धात्रा कृतः सप्तमः ॥२७॥

संप्रत्येव राक्षसभयात् सत्रे दीक्षिष्यमाणः स भगवान् रक्षितारं रामभद्रं वरीतुमयोध्यां गतः ।

राक्षसः । सत्रासम् । भगवन् । मा कोपीः । बटुस्वभावसुलभं चापलमत्रापराध्यति न पुनरज्ञानम् । कःपुनस्त्रिभुवनमिमं भगवन्तं विश्वामित्रं न जानाति । स्वगतम् । कृतं यत् कर्तव्यम् । संप्रति चारसंचारस्यावसरः । प्रकाशम् । क्व पुनर्गुर्वादेशो गमयिता ।

शुनःशेपः । मिथिलापुरीम् ।

राक्षसः । किं तत्र ।

शुनःशेपः । गुरुसुहृदो राजर्षेः सीरध्वजस्य यज्ञोपस्थानम् । ब्रह्मंस्त्वमपि वैदेशिक इवासि तत्कुतः पुनरिदमागम्यते ।

राक्षसः । स्वगतम् भवत्वेवं तावत् । प्रकाशम् । रोहणाचलपरिसरोत्तंसादगस्त्याश्रमतः ।

शुनःशेपः । किंचित्सानुशयम् । कोऽयमगस्त्यो नाम ।

राक्षसः । विहस्य भगवन् कृतप्रतिकृतमेतत् । निजोदयनिर्विषीकृतभुवनाम्भस्कं कः पुनरगस्त्यं न जानाति ।

निषेद्धा विन्ध्यस्य प्रथमचुलुकाचान्तजलधिः
कृतापद्वातापेर्न स कलशभूः कस्य विदितः ।
गुरुर्लोपामुद्राहृदयदयितो यस्त्रिजगत-
स्त्रयीं माणिक्याद्रेरधिवसति वैखानसवृषा ॥२८॥

शुनःशेपः । परस्परं गुर्वधिक्षेपादुभावपि प्रायश्चित्तिनौ वर्तावहे ।

राक्षसः । तदनुजानीहि मामघमर्षणाय ।

शुनःशेपः । निर्वर्तितगुर्वाज्ञोऽहमपि प्रायश्चित्ते यतिष्ये । किन्तु किंचित्प्रष्टव्यमस्ति ।

राक्षसः । नियोजय ।

शुनःशेपः । लङ्कोपकण्ठवर्तिनि तत्राश्रमपदे कश्चिदस्ति दशकण्ठोदन्तः ।

राक्षसः । यत्किल स्थाणवीयधनुरारोपणपणेन राघवः सीतां परिणेष्यतीति तत्र कश्चिदेवंविधः ।

शुनःशेपः । विहस्य स्वगतम् । अये लघुवित्तवृत्तिनिर्भिन्नहृदयार्थो राक्षस इवैषः । युक्तियुक्तं चैतत् ।

अगर्भसंभवां कन्यां दशकण्ठो जगज्जयी ।
आरोप्य हरकोदण्डं कथं न परिणेष्यति ॥ २९ ॥

प्रकाशम् । ब्रह्मन्ननुमन्यस्व मां मिथिलाप्रवेशनाय ।

राक्षसः । मामपि कार्यवशादितो गत्वा प्रायश्चित्ताय ।

इतिनिष्क्रान्तौ । शुद्धविष्कम्भकः ।

ततः प्रविशति पुष्पकेण रावणः प्रहस्तश्च ।

रावणः ।

यस्यारोपणकर्मणापि बहवो वीरव्रतं त्याजिताः
कार्यं सज्जितबाणमीश्वरधनुस्तद्दोर्भिरेभिर्मया ।
स्वीरत्नं तदगर्भसंभवमितो लभ्यं च लीलायिता
तेनैषा मम फुल्लपङ्कजवनी जाता दृशां विंशतिः ॥३०॥

प्रहस्तकः । सर्वतोऽवलोक्य कथं दशाननदेवदर्शनाकाङ्क्षि वृन्दारकवृन्दमिदमयनः समयमपि गगनाभोगं बिभर्ति । साक्षेपम् ।

वक्त्रे निह्नोतुमर्चिः परिचिनु पुरतः सिञ्चतो वारिवाहान्
हेमन्तस्यान्तिके स्याः प्रथयति दवथुं येन ते ग्रीष्म नोष्मा ।
मार्तण्डाश्चण्डतापप्रशमनविधये धत्त नाडीं जलार्द्रां
देवो नान्यप्रतापं त्रिभुवनविजयी मृष्यते श्रीदशास्यः ॥ ३१ ॥

रावणः । सौत्सुक्यं हंहो नभस्तरुपुष्प पुष्पक किंचिदुच्यसे ।

सेवागतामरविमानसहस्रसेनाः
सीमन्तयन् मम मनोजयिना जवेन ।
तां मैथिलस्य नृपतेर्व्रज राजधानीं
यत्राद्भुतं हरधनुर्धरणीसुता च ॥ ३२ ॥

प्रहस्तकः । किमद्याप्युत्कण्ठते देवः । नन्ववतीर्णममुना गगनार्णवपोतपात्रेण विमानराजेन जनकमन्दिरे । तद्भवतु देवागमनं सीरध्वजाय निवेदयामि । उच्चैः ।

वामैराकृष्य वेगात् प्रगुणितशिरसः पाणिभिः केशबन्धान्
सव्यैरव्याजशस्त्रप्रणयनपटुभिश्छिन्दतः कण्ठपीठीः ।
मन्वानस्यानुरूपामुपकरणगतिं प्रीतये चन्द्रमौले-
र्यस्यान्तस्तोषपोषं व्यधित दशमुखी विंशतिर्बाहवश्च ॥ ३३ ॥

सोऽयं स्वयंग्रहणदुर्ललितो दशास्य-
स्त्वां याचते दुहितरं पणपूर्वमेव ।
संबन्धसन्धिमनुना च सहानुभूय
वंशो निमेर्जयतु यावदियं धरित्री ॥ ३४ ॥

कथं दत्त्वाऽऽकाशे किं ब्रूय सोऽयं पुराणब्रह्मवादी याज्ञवल्क्यशिष्यो राजर्षिर्जनक आङ्गिरसेन पुरोधसा सार्धमितोऽभिवर्तते । तदिदमास्थानमण्डपोपकण्ठमधिष्ठीयतामित्यवतरतः ।

ततः प्रविशति जनकः शतानन्दश्च ।

जनकः ।

यन्मीमांसयतः श्रुतीः शतपथाः साक्षात्कृतब्रह्मणो
विश्वामित्रमहामुनेरपि वयं वर्त्तामहे चेतसि ।
अभ्युलीढकषायपावनधियां सद्यः समाधिश्लथं
तत्सङ्गीतकमन्तरेण हृदयं हर्षाद्वरीनर्ति नः ॥ ३५ ॥

शतानन्दः । राजर्षे सूर्यप्रशिष्य सत्याशिषस्ते गुरवो यद्भगवान् विश्वामित्रोऽपि मैत्रीमनुरुध्यते । प्रहस्तस्तदेव पठति ।

जनकः । आकर्ण्य । अये तपस्यतामपि न निरत्ययः सुखप्रत्ययः । यत्सीतार्थी दशकण्ठोऽपि गृहानुपगच्छति ।

शतानन्दः । अहह । आश्चर्यमेकोऽपि गरीयान्दोषः समग्रमपि गुणग्रामं दूषयति । तथाहि ।

आज्ञा शक्रशिखामणिप्रणयिनी शास्त्राणि चक्षुर्नवं
भक्तिर्भूतपतौ पिनाकिनि पदं लङ्केति दिव्या पुरी ।
उत्पत्तिर्द्रुहिणान्वये च तदहो नेदृग्वरो लभ्यते
स्याच्चेदेष न रावणः क्व नु पुनः सर्वत्र सर्वे गुणाः ॥ ३६ ॥

जनकः । सखेदम् । भगवन्नातिथ्य गृहानुपगताय सीतार्थिने लङ्केश्वराय किमुत्तरम् ।

शतानन्दः । राजर्षे चिरं दत्तमेवोत्तरम् ।

जनकः । भगवन् केन ।

शतानन्दः । भगवता शिपिविष्टेन ।

जनकः । किमिव ।

शतानन्दः । स्वधनुः ।

जनकः । निःश्वस्य ।

गिरिशधनुरधिज्यं रावणः कर्त्तुमीष्टे
करतुलितहराद्रेर्दुष्करं किं हि तस्य ।
किमुत न स निमीनां यौनसंबन्धयोग्य-
स्तदिति हि मम चित्तं चिन्तया मूर्च्छतीव ॥ ३७ ॥

शतानन्दः । राजर्षे मा विषीदस्व । पाणिप्रणयिनं कोदण्डदण्डं प्रसादीकुर्वतः पार्वतीपतेर्विवोढा कः सीताया अभिमत इति न जानीमः । इदं तु प्रतिजानीमहे यदुत न प्रचण्डदोःखण्डोऽपि दशकण्ठः श्रीकण्ठमनीषितमपरथा प्रस्थापयिष्यति । तदेहि दुर्वृत्तमपि मुनिपुत्रमुचितेन संभावयाव इत्युत्थाय परिक्रामतः ।

जनकः । पुरोऽवलोक्य । दिष्ट्या दृष्टपुलस्त्यप्रसवाः प्रमोदामहे । लङ्केश्वर इतइतो भवानिदमासनमास्यताम् । सर्वे यथोचितमुपविशन्ति ।

शतानन्दः । ऋषिपुत्रको दिव्यश्चासि तत्कतमामातिथेयीं कुर्मः ।

महोक्षो वा महाजो वा श्रोत्रियाय विशस्यते ।
निवेद्यते तु दिव्याय स्रक्सुगन्धिनिधिर्विधिः ॥ ३८ ॥

रावणः । ब्रह्मर्षे इयमस्माकमातिथेयी ।

यत् पार्वतीहठकुचग्रहणप्रवीणे
पाणौ स्थितं पुरभिदः शरदां सहस्रम् ।
गीर्वाणसारकणनिर्मितगात्रमत्र
तन्मैथिलीक्रयधनं धनुराविरस्तु ॥ ३९ ॥

प्रहस्तकः । आविरस्तु सममगर्भसंभवया सीतया ।

रावणः । सप्रत्याशं स्वगतं च ।

निर्माल्यं नयनश्रियः कुवलयं वक्त्रस्य दासः शशी
कान्तिः प्रावरणं तनोर्मधुमुचो यस्याश्च वाचः किल ।
विंशत्या रचिताञ्जलिः करतलैस्त्वां याचते रावण-
स्तां द्रष्टुं जनकात्मजां हृदय हे नेत्राणि मित्रीकुरु ॥ ४० ॥

शतानन्दः । इदमाविर्भवति दशानन माहेश्वरं धनुः ।

रावणः । स्वात्मानं प्रतीदमाविर्भवति माहेश्वरं धनुर्न पुनरद्यापि मान्मथम् ।

शतानन्दः । सहेलमालोक्य ।

स्फूर्जद्वज्राहतसुरगिरिस्वर्णचूर्णच्छटाभि-
स्तुल्योल्लासैस्त्रिभुवनदृशां दत्तदोस्थित्यमुद्रः ।
आशारन्ध्राण्ययमविरतं रुद्रकोदण्डदण्डः
स्वेच्छाचण्डो रचयति रुचां पञ्जरैः पिञ्जराणि ॥ ४१ ॥

नेपथ्यं प्रति कः कोऽत्रभोः सौविदल्लेषु कन्यान्तःपुरादागच्छतु जनकराजकन्या । नेपथ्ये इयमियम् । ततः प्रविशति सीता सख्यौ च ।

सीता । ससाध्वसोल्लासम् । अम्महे रक्खसो त्ति सुणिअ सच्चं सज्झसकोदूहलाणं अन्तरे वट्टामि * ।

एका । भट्टिदारिए । रक्खसोत्ति मा णं परिहव रक्खसचक्कवट्टीक्खु एसो † ।

सीता । अहिअदरं उव्वेअणिज्जो ‡ ।

द्वितीया । अह किं मन्तेध किं कादुं इध आअदो § ।

प्रथमा । सङ्करसरासणं समारोवदुं ‖ ।

द्वितीया । णं एव्वं भण भट्टिदारिअं परिणेदुं ¶ ।

प्रथमा । अयि उद्दामरसीले कहं पुण असङ्करो अलद्धसङ्करप्पसादो वा इमं चावमारोवइस्सदि ** ।

सीता । स्वगतम् । अम्महे ऊससिदह्मि अणब्भवरिसेण पिअसहीवअणेण †† ।

सर्वाः परिक्रामन्ति ।

सीता । पुरोऽवलोक्य एक्कासणोववेसिणो कदि उण एदे जणा ‡‡ ।

सख्यौ । णं एक्को एव्व एसो दसमुहो विंसदिभुअदण्डो अ §§ ।

सीता । तादसदानन्दमिस्साणं अन्तरे उवविसिस्सम् ‖‖ ।

रावणः । सौत्सुक्यमवलोक्य स्वगतम् । अहो त्रिभुवनातिशायि मकरध्वजसञ्जीवनं रामणीयकमस्याः । तथाहि ।

* अहो राक्षस इति श्रुत्वा सत्यं साध्वसकौतूहलयोरन्तरे वर्ते ।

† भर्तृदारिके राक्षस इति मैनं परिभव राक्षसचक्रवर्ती खल्वेषः ।

‡ अधिकतरमुद्वेजनीयः ।

§ अथ किं मन्त्रयथः किं कर्तुमिहागतः ।

‖ शङ्करशरासनमारोपयितुम् ।

¶ नन्वेवं भण भर्तृदारिकां परिणेतुम् ।

** अयि उद्दारशीले कथं पुनरशङ्करो ऽलब्धशङ्करप्रसादो वेमं चापमारोपयिष्यति ।

†† अहो उच्छ्वसितास्मि अनभ्रवर्षेण प्रियसखीवचनेन ।

‡‡ एकासनोपवेशिनः कति पुनरेते जनाः ।

§§ नन्वेक एवैष दशमुखो विंशतिभुजदण्डश्च ।

‖‖ तातशतानन्दमिश्राणामन्तरे उपवेक्ष्यामि ।

इन्दुर्लिप्त इवाञ्जनेन जडिता दृष्टिर्मृगीणामिव
प्रम्लानारुणिमेव विद्रुमलता श्यामेव हेमप्रभा ।
पारुष्यं कलया च कोकिलवधूकण्ठेष्विव प्रस्तुतं
सीतायाः पुरतश्च हन्त शिखिनां बर्हाः सगर्हा इव ॥४२॥

किंच बहुष्वपि निजेषु कर्मसु विवेक्तुं किंचिदेव रोचते । यतः ।

एतां यथाहृदयवर्तनमायताक्षीं
संसारसारनिचयेन विधाय वेधाः ।
शङ्के दिदेश मदनं परिरक्षितार-
मारात् स मां किरति येन शरैः शिताग्रैः ॥ ४३ ॥

शतानन्दः । पुलस्त्यनन्दनेदं तद्धनुरियं सा सीता ।

रावणः । इदं तद्धनुरयं स रावणः । किं पुनरसंभावनागर्भमदशकण्ठोचितं व्याहरसि । पश्य ।

सार्द्धं हरेण हरवल्लभया च देव्या
हेरम्बषण्मुखवृषप्रमथावकीर्णम् ।
कैलासमुद्धृतवतो दशकन्धरस्य
कैषा जरद्धनुषि दुर्मददोःपरीक्षा ॥ ४४ ॥

प्रहस्तकः । स्वगतम् । इदं शिपिविष्टान्यस्मादवृष्टगुणारोपणकर्म कार्मुकम् । कथमेतत् । विचिन्त्य पराक्रमपरीक्षायां को वा महादेवोऽपि देवस्य किंच ।

कृतं सुराणां सारेण स्थाणवीयमिदं धनुः ।
किङ्करास्ते च देवस्य सुकरा रोपणक्रिया ॥ ४५ ॥

रावणः । सरोषं धनुरादाय ।

अस्मद्दोर्दण्डचण्डाञ्चननिबिडगुणग्रन्थिभुग्नाभयाग्र-
व्यग्रीभावोद्धृपृष्टत्रुटदणुरणत्कर्मणः कार्मुकस्य ।
कल्पान्तोद्भ्रान्तभर्गप्रहतडमरुकोड्डामरध्वानधीर-
ष्टाङ्कारस्तारतारस्त्रिदशनिशमितो व्योमरन्ध्रं रुणद्धु ॥ ४६ ॥

शतानन्दः । अपवार्य । अहो लङ्कापतेरपूर्वो गर्वगरिमा यन्ममापि शतानन्दस्य न निश्चिनुते चेतः किं भवितेति । दुरारोपमैन्दुशेखरं धनुर्दुर्निवारा रावणभुजदण्डाः ।

जनकः । स्वगतम् । भगवन् भर्ग सन्निधत्स्व निजे धनुषि यथा जनककुलालङ्करणं भवति मे वत्सा । जितत्रिजगतापि जामात्रा वयमपत्रपामहे ।

सीता । आत्मगतंसप्रणामम् । अम्ब वसुन्धरे पसीद सीदा विण्णवेदि पढमं मे अन्तरं देज्ज पच्छा रावणो धनुं आरोविज्जदु * ।

* अम्ब वसुन्धरे प्रसीद सीता विज्ञापयति प्रथमं मे अन्तरं देहि पश्चाद्रावणो धनुरारोपयतु ।

सख्यौ । आकाशे भगवं अणङ्ग णमो दे माक्खु रक्खसं उद्दिसिअ सुउमारजणजोग्गं पहरणं संधिहिसि * ।

प्रहस्तकः । सगर्वम् । हन्त न सर्वदा सर्वस्य सदृशो दशापाकः । यतः ।

वामो बाहुर्मृडान्याः करकलितरणत्कङ्कणालीकरालो
यस्मिन्सव्यश्च शम्भोर्भुजगवलयवान् सह्यमाकर्षणं तत् ।
कैलासोद्धारधीरं दशवदनभुजामण्डलीयन्त्रबन्धं
रेरे कोदण्डदण्ड प्रतिपत तदलं नासि सोढा दृढो ऽपि ॥४७॥

विचिन्त्य भवतु पातालचरानम्बरचरांश्च सावधानान्विधास्ये । अधो ऽवलोक्य ।

पृथ्वि स्थिरा भव भुजङ्गम धारयैनां
त्वं कूर्मराज तदिदं द्वितयं दधीथाः ।
दिक्कुञ्जराः कुरुत तत्त्रितये दिधीर्षां
देवः करोति हरकार्मुकमाततज्यम् ॥ ४८ ॥

ऊर्ध्वमवलोक्य ।

अश्वान् विश्वासयैतान् क्षणमरुण कुरु स्वर्गमातङ्गकण्ठं
गाढोत्कन्थिमाधोरण विबुधगणाः कर्णयोर्दत्त हस्तान् ।
लङ्केन्द्रादयपाणिप्रणयिभवधनुर्भङ्गजन्मा कठोर-
ष्टाङ्कारः स्वर्गरोदःकुहरवलयितस्त्रासकारी न कस्य ॥ ४९ ॥

रावणः । अहो मम दशाननस्याज्ञा यदमीषां स्वावयवानामपि जितगगनचाटुकारः सर्वत्र व्यापारः । तथाहि संप्रत्येव तावत् ।

निष्पर्यायनिवेशयेशलरसैरन्योन्यनिर्भर्त्सिभि-
र्हस्ताग्रैर्युगपन्निपत्य दशभिर्वामैर्धृतं कार्मुकम् ।
सव्यानां पुनरग्रणीयसि विधावस्मिन् गुणारोपणे
मत्सेवाविदुषामहंप्रथमिका काप्यम्बरे वर्त्तते ॥ ५० ॥

विचिन्त्य । सजुगुप्सानुतापम् । अविमृश्यकारिता हि पुंसः परं परिभवस्थानं यत्प्राकृतवदप्राकृतो ऽपि रावणः पणेन परिणेतुकामः । तत्सर्वथा किमनेन ।

रुद्राद्रेस्तुलनं स्वकण्ठविपिनच्छेदो हरेर्वासनं
कारावेश्मनि पुष्पकापहरणं यस्येदृशाः केलयः ।
सो ऽहं दुर्मदबाहुदण्डसचिवो लङ्केश्वरस्तस्य मे
का श्लाघा घुणजर्जरेण धनुषा कृष्टेन भग्नेन वा ॥ ५१ ॥

इति सावज्ञं क्षिपति ।

सख्यौ । भट्टिदारिए दिट्ठिआ वड्ढसे समं दे पाणिग्गहणमङ्गलेण मुक्कं रावणेण धणू † ।

सीता । साश्वासमात्मगतम् । हिअअ अणुऊलो विअ दे देवो वम्महो अ * ।

शतानन्दः । भो लङ्केश्वर परममाहेश्वरो ऽसि तत्किमिदमसंस्तुतं प्रस्तुतम् ।

जनकः । ससंरम्भमुत्थाय ।

न ब्रह्मोपनिषच्चिवेवरतिर्नो याज्ञवल्क्यो गुरुः
कोपावेशनविह्वसा च सहसा शक्नोति रोद्धुं मनः ।
दृष्ट्वा शम्भुमहाधनुःपरिभवं पाणिर्जराजर्जर-
स्तेनाभ्युत्सहते ममैष युगपच्चापाय शापाय च ॥ ५२ ॥

विमृश्य नेपथ्यं प्रति कः को ऽत्रभोः । धनुर्धनुः । प्रविश्य धनुरुपनीय निष्क्रान्तः पुरुषः ।

जनकः । परिकरं बद्ध्वा गृह्णाति ।

रावणः । सकोपहासम् ।

हस्तालम्बितमक्षसूत्रवलयं कर्णावतंसीकृतं
स्रस्तं भ्रूयुगमुन्नमय्य रचितं यज्ञोपवीतेन च ।
सन्नद्धा जघने च वल्कलपटी पाणिश्च धत्ते धनु-
र्दृष्टं भो जनकस्य योगिन इदं दान्तं विरक्तं मनः ॥ ५३ ॥

शतानन्दः । आश्चर्यम् । अहो महाप्रभावो मे याज्यः । अस्य हि ।

वाञ्छानुगो न जरसा जनकस्य पाणी
सत्यं स एष तपसस्तु परः प्रकर्षः ।
मौर्वी स्वयं यदधिरोहति चापकोटिं
संधानकर्मणि शराश्च यदुत्सहन्ते ॥ ५४ ॥

सीता । हद्धिहद्धि । तादोवि णाम उवसमेक्कधणो धणुव्वावारेदि स एव हुदवहं वरिसिदुकामो मिअङ्कमणी † ।

प्रहस्तकः । आः क्षत्रियबन्धो वृथावृद्ध दशाननमुद्दिश्य धनुरारोपयसि नन्वेष ते पौलस्त्यशस्त्रं चन्द्रहासः शिक्षयिता ।

रावणः । उच्चैर्विहस्य सोल्लुण्ठम् ।

घुणव्रणानभङ्गुरं पशुपतेः पुराणं धनु-
र्निरीक्ष्य भुजमण्डलीबलमदाद्विकीर्णं मया ।
स एष न तितिक्षते समरसीम्नि सीरध्वजः
समं हसत हे मुखान्यसममेतदुद्घट्टनम् ॥ ५५ ॥

जनकः । पुलस्त्यपुत्र संवृणु शस्त्रं एष ते परममाहेश्वरः सीरध्वजो न क्षमते ।

रावणः । अहो सीतास्नेहो मामार्द्रयति यदहमपि दशकण्ठ ईदृशानां वचसां सोढा । ससंरम्भम् ।

* भगवन्ननङ्ग नमस्ते मा खलु राक्षसमुद्दिश्य सुकुमारजनयोग्यं प्रहरणं संदधासि ।

† भर्तृदारिके दिष्ट्या वर्धसे समं ते पाणिग्रहणमङ्गलेन मुक्तं रावणेन धनुः ।

* हृदय अनुकूल इव ते देवो मन्मथश्च ।

† हा धिक् हा धिक् तातो ऽपि नामोपशमैकधनो धनुर्व्यापारयति स एव हुतवहं वर्षितुकामो मृगाङ्कमणिः ।

यज्वा जरापरिणतः श्वशुरो भविष्यन्
ब्रह्मैकतानहृदयो गुणवांस्तथेति ।
शान्तेर्निमित्तमिदमत्र ममैकमेकं
हे पाणयः किमिति वाञ्छथ चन्द्रहासम् ॥ ५६ ॥

जनकः । रावण इतो भव एष प्रहरायसे । नेपथ्ये ।

जनक विरम रोषात् त्वं हि संन्यस्तशस्त्रः
कथमयमुपरागस्त्वद्गुहृर्याज्ञवल्क्यः ।
परिणतिपरिहीणत्तुद्रराजन्यजन्यं
मविद्म शरनिवेशं संवृणु व्रीडिताः स्मः ॥ ५७ ॥

जनकः । बालर्षे शुनःशेप यदाहृत्थ इदमपास्तं शस्त्रम् । तथाकृत्वा तज्जगतामपरावसत्त्वायेदं शापोदकमुत्सृजामीति कमण्डलुमादत्ते ।

शतानन्दः । भगवतो वैकर्त्तनादागतस्य निरवधिसीम्नो ब्रह्मतत्त्वोपलम्भस्य तपोराशेश्च किमयं व्ययः क्रियत इति शापोदकमुपसंहरति ।

जनकः । भगवन् । विश्वामित्रधर्मपुत्र कुलगुरो गौतम ।

कृते राक्षसराजेन पिनाकस्य पराभवे ।
जानन्ति युक्तं गुरवो भवद्विः परवानहम् ॥ ५८ ॥

रावणः । मिथिलेश्वर किमिति संरम्भसे । ननु रभसनिर्जितैरावणो रावणः खल्वहम् ।

मयि कण्ठपरिच्छेदपरितोषितशङ्करे
कुण्ठीभवन्ति सर्वेषामस्त्राणि च तपांसि च ॥ ५९ ॥

त्वं किल संबन्धज्येष्ठो ब्रह्मविद्यावरिष्ठ इति च मया श्रूयते ।

सख्यौ । अपवार्य हद्दास दे वअणं जणअकुलदेवदाओ पडिहणन्तु * ।

शतानन्दः । निशाचरचक्रवर्त्तिन् मा वृथा कत्थस्व । वक्रीकृतचण्डीशचापदण्डस्य शोभत एव आहारो न पुनस्तव ।

रावणः : सक्रोधम् । किंकिमाह भवान् । निशाचरचक्रवर्तिन् मा वृथा विकत्थस्वेत्यादि पूर्वोक्तमनुवदति । विचिन्त्य तत्किमत्र साम्प्रतम् ।

परिषदियमृषीणामेष वृद्धो नरेन्द्रः
कथमथ सदमुष्मिन् मैथिलीलालसोऽपि ।
निजभुजबलदृप्यद्वीरवर्ये समाजे
हठहरणविनोदं राक्षसेन्द्रः करोतु ॥ ६० ॥

ससंरम्भम् । शृणुत भोः शृणुत निशाचरपतेः प्रतिज्ञाम् ।

कुर्वन् मौर्वीनिवेशक्रमनमदटनि स्पष्टटङ्कारटङ्कं
शम्भोः कोदण्डदण्डं बधिरितभुवनं भूर्भुवःस्वस्त्रयेऽपि ।
यस्तामेनां वरीता रसयति तदसृक् चन्द्रहासो ममासिः
कण्ठास्थिग्रन्थिशङ्कीकरणभवरणत्कारवाचालधारः ॥ ६१ ॥

* हताश ते वचनं जनककुलदेवताः प्रतिघ्नन्तु ।

नेपथ्ये कलकलः ।

रावणः । भोः प्रहस्त किमयमकाण्डचण्डो विस्तीर्णजलधरध्वानतानवक्रदेव निर्घोषः ।

प्रहस्तकः । देव देवमनुपततामस्मद्बलानामेव निर्भरभरितभुवनाभोगतलः कलकलः ।

नेपथ्ये वैतालिकः । जयजय त्रिजगत्पते पौलस्त्य सुखाय माध्यंदिनी संध्या भवतु देवस्य संप्रति हि ।

शीतं श्रीखण्डकाण्डं निबिडयति फणी भोगनालेन लीनश्छायावृक्षस्य मूले रचयति चमरी रम्यरोमन्थलीलाम्
सेर्ष्यान्तर्मानुषीयं वितरति कमितुर्घर्मितस्याङ्कपालीं ।
लीलाकस्तुरिकैणी सरति विचरितुं सारणिग्रन्थिपर्णाम् ॥ ६२ ॥

रावणः । तद्वयमपि निसर्गरमणीयेषु मिथिलापुरीपरीसराक्रीडेषु क्रीडाभिर्द्वित्राणि दिनान्यात्मानं विनोदयामस्तदादिश्यन्तां सेनापतयः ।

ताम्बूलीनद्धमुग्धक्रमुकतरुतलप्रस्तरे सानुगाभिः
पायंपायं कलावीकृतकदलदलं नारिकेलीफलाम्भः ।
सेव्यन्तां व्योमयात्राश्रमजलजयिनः सैन्यसीमन्तिनीभि
र्दात्यूह * व्यूहकेलीकलितकुहकुहारावकान्ता वनान्ताः ॥६३॥

इति निष्क्रान्ताः सर्वे ।

॥ प्रतिज्ञापौलस्त्यो नाम प्रथमोऽङ्कः ॥

* दात्यूहः कोकिलजातिः ।

॥ श्रीः ॥

॥ हे आर्यस्त्रीपुरुषाः काशिकविद्यालयच्छात्राश्च ॥

एतज्जनपदं प्रति मदागमनादुत्तरमद्यैव प्रथमत एतादृशे कार्येऽध्यक्षो भवामि । तदनल्पं कौतुकमावहति ममायमवसरः । पश्यंश्चेमां विशालां शालामङ्गलैरेतद्देशीयैस्सामाजिकैरेतद्विद्यालयच्छात्रवर्गैश्च संकुलां निपुणमहं स्मरामि पञ्चदशभ्यो वर्षेभ्यः पूर्वं संवृत्तस्यैतत्सदृशस्य प्रसङ्गस्य यत्रासौ श्रीमांस्तामसनोऽद्याऽपि युष्माभिस्सस्नेहं सादरं च स्मर्यमाण एतद्वास्तुप्रवेशं विदधौ । सन्ति च केचन तदानीं समागतवतां जनानां मध्येऽद्य मां परितः येष्वहं वाराणस्याः श्रीमन्महाराजमार्यञ्च देवनारायणसिंहमवलोकयामि यो ऽयं तत्काले नागरिकजनविज्ञाभे कृतैर्गुरूपकारैर्विशिष्टं राजप्रसादमवाप । नूनमेतच्छालादर्शनोद्बुद्धतत्संस्कारेण चेतसा ततोऽपि दूरतरं कालं स्मरामि यदा चतुर्विंशते र्वर्षेभ्यः पूर्वं मम भ्राता श्रीमान् जान्म्यूर नामासीदस्य विद्यामन्दिरस्याद्योऽध्यक्षः ॥

Digitized by Google

अथाऽद्य श्रीमते ग्रिफिथाख्यपाठशालाख्यानमस्माभिः श्रुतं तदभूत्प्रीतिकरम् । अवगम्यतेहि तेन यद्गतवर्षेआङ्गलशालायां विद्यार्थिनामभ्यासा अभूवन्प्रायेण सिद्धिसंयुतास्सन्ति चैतेषां फलान्यतिश्लाघनीयानि संतोषकराणिचेत्यवैमि ।

परन्त्वहमत्र पाठालये ऽवतिष्ठमानः पूर्ववृत्तान्यस्यानुस्मरन्युष्मासु निवेदयामि यद् आङ्गलशालायाः फलैरेव नास्य विद्यालयस्य फलवत्ता विज्ञेया किन्तु विशिष्टशालाभूतेयं काशिकपाठशालाऽऽङ्गलसंस्कृतविभागस्य फलैरेव सिद्धिमत्यसिद्धिमती वेति वेदनीया । एतैरेव चास्या अभ्युदयो हीनता वा परिचेया ॥

अथास्याः पूर्ववृत्तान्तान्संक्षेपतो वर्णयामि । एकनवत्युत्तरसप्तदशशततमे खिष्टीयवर्षे संस्कृतपाठशाला संस्थापिताऽभूत् । यदुक्तं श्रीमता तामसनेनैतद्वास्तुप्रवेशावसरे । त्रिंशदधिकाष्टादशशततमे वर्षे आङ्गलभाषाध्ययनाय पृथगालयस्संस्थापितः । चतुश्चत्वारिंशदधिकाष्टादशशततमेऽब्दे भवति श्रीमति जान्म्यूरेऽध्यक्षे द्वे इमे शाले एकीकृते । त्रिपञ्चाशदधिकाष्टादशशततमे संवत्सरे जानवरीमासस्य दशमे दिवस उदारमिदं वेश्म श्रीमता तामसनेन प्रतिष्ठापितम् । यदिदं हिन्दीभाषायां विलिखितं छात्रबोधनपत्रं धारयामि तत्तदानीमपाठि । यानीमानिच वाक्यानि तत उद्धृत्य पठामि तैः काशिकपाटशालायाः समुदीरितस्य महतः फलस्य प्रतीति र्भविष्यति । यथा । भिन्नास्वपि भाषासु तत्त्वं विज्ञानं च नैव भिद्येते इत्यवधार्य राजकीयपाठालये तत्त्वजिज्ञासवश्छात्राः स्वस्वभाषासु भिन्नास्वपि तांस्तान् ज्ञानोपार्ज्जनप्रयत्नान् विधातुमेकत्रैव समागच्छन्तु तुलयित्वा च परस्परं विविधांस्तत्त्वानुसंधानोपायानन्योन्यमुपकुर्वन्त्विति । तथाहि । संस्कृतशालायां गौतमसूत्रानुसारेण व्याप्तिग्रहोपायमभ्यस्यन्ति विद्यार्थिनः । आङ्गलशालायां चेममेव विषयं बेकनप्रकाशितया रीत्या शीलयन्ति । किंचेदं तावदभीष्टं यद् येष्वंशेषु गौतमबेकनयोरस्ति सर्वथैकमत्यं न तत्र मतभेदः कल्प्यतामथच यत्र वस्तुत एवास्ति मतभेदस्तत्रोभयोर्मतयोर्मिथस्तुलनया तत्त्वं निरूप्य परिग्राह्यम् । एवं चेतरास्वपि विद्यासूचितानुचितयोर्विवेकं कृत्वोचितस्यैव परिग्रहः कार्यः ।

या च तद्दिने श्रीमता तामसनेन समुदीरिता वचनावली तत्राप्ययमुत्कीर्तितोऽभीष्टार्थः । यथा । वेश्मन्यत्र सुशीलता समनुशील्यतां तत्त्वं च प्रकाशितमहिम महीयतामिति । अथचेत्थं विनयनेन भारतीयजनस्य समीचीनं बुद्धिविपरिणामं दशासमुचितं चाशासानः स उवाच यदस्मात्स्थलाद्रीतिरियं परितः प्रसरतु आशाचेयममोघा भवतु यदत्रात्रगृहे वयमद्य समागतास्स्मस्तत्रैवानुशील्यमाना विद्या महति लोकबुद्धिपरिणामे भूयादेकतमं कारणमिति ।

काशिकपाठशालाध्यक्षतापरित्यागात्किंचिदुत्तरं विद्यार्थिभ्यः श्रीमता जान्म्यूरेण प्रेषितं यत्पत्रं तस्याप्यंशं युष्मदनुमत्या वाचयामि । तथाहि । तत्त्वज्ञानमेव विद्यायाः फलमिति तत्त्वैकपक्षपतद्धिया न तावत्सांसारिकफललाभायैव विद्याभ्यासक्ता यूयं भवतेत्यभिलषामि । बुद्धिसंस्कारश्चित्तावर्त्तिविवेकादीनां धीशक्तीनामुपचितिर्भगवतोऽद्भुतानां सृष्टीनां विश्वनियमनाय तेनैव विहितानां नियमानां च ज्ञानमित्येतानि शिक्षायाः सन्ति परमोत्कृष्टानि फलान्येतेभ्योऽपि परतरं शीलसमुचितरूपं फलं साधुविनयनक्रियाया अस्तीति मनसा विचारयन्तो विद्यां शीलयथ चेत्तर्हीष्टं मे भवेदिति ।

अथासौ प्राचीनसंस्कृतग्रन्थनिबन्धॄणां समुज्ज्वलकीर्तीनां महतीं राजिं सूचयामास येन तद्वंशीया यूयं स्वकुलसमुचितं किंचिद्विधातुमुत्साहवन्तो भवेत । किंच यं गतशनिवारे पराह्णे काशिकसभायामौत्सुक्येन नैपुण्येन च विचार्यमाणं श्रुत्वा प्रीतिमलप्सि तस्मिन् देशभाषायां ग्रन्थराजिविरचनरूपे विषयेऽसौ काशिकपाठशालासकाशाद्यानि फलान्याशास्त तान्येव स उदीरयामास । यथा ।

विज्ञानवर्द्धनस्योत्तमोत्तमोपायत्वेन विशुद्धतमानामुदारतमानां पथ्यतमानां तत्त्वानामागारद्वारोद्घाटकत्वेन चाङ्गलभाषाया अध्ययनानुवृत्तये युष्माननुबन्धानोऽपि प्रायेण सर्वेषु व्यापारेषु सिद्धिलाभाय स्वकीयभाषाया अपि निपुणः परिचयोऽवश्यमपेक्षित इति द्रढीयांसं संस्कारं युष्माकं चेतस्युत्पादयितुमिच्छामि । किञ्च नजात्वाङ्गली भाषा भारतीयजनभाषा भवेत् । युष्मद्देशीयजनहितसंपृक्तानि सर्वाणि राजकार्याणि प्रायस्साकल्येन देशभाषयैव निर्वाह्यन्ते । अनयैव च भाषया लोकविज्ञानवृद्धिरपि साध्येत यदनुकूलतां येन केनापि प्रकारेण गन्तुं सर्वेपि यूयं समुत्सहध्व इतिमन्ये ऽतश्च सुललितवाणीनिबद्धैरुपादेयैरुदारैश्चार्थैर्विशिष्टं देशभाषावाङ्मयं क्रमेण प्रादुर्भवेदिति युष्माभिरुत्कण्ठयाऽभिलषणीयम् ।

अथेदानीं हे सुहृदोऽहं युष्मान्पृच्छामीमाः पूर्वोक्ता महत्य आशाः कथमपि सफलीभूता वा । वर्षे वर्षे बहवो विद्यार्थिनोऽङ्गलसंस्कृतवर्गेषु पठित्वा पाठालयमत्यजन् । येषां महापुरुषाणां यशांसि भारतवर्षस्य प्राचीनवाङ्मये समुल्लसन्ति तेषां स्मृत्या तद्वंशोचितग्रन्थादिविरचने जनिता वा युष्माकमुदारा स्पृहा यथा तर्कितं । आहोस्विदेतादृशी बुद्धिर्नैव विद्यते युष्माकम् । किंच देशभाषायां ग्रन्थावली यथा निर्मीयेत तथा किंचित्प्रयत्नोऽप्यनुष्ठितो वा युष्माभिः । हे युरोपीय विद्यारवोद्भासितमानसाश्छात्रा यैर्युष्माभिः स्वोपार्जितैर्विज्ञान

धनैः स्वदेशीयजना योजनीयाः सन्ति विद्यते वा किमपि तादृशं वस्तु यद्युष्मत्कृतित्वेन निर्दिशेम । देशभाषायां वाङ्मयमितिनामार्हा नैव सन्ति यन्या इत्यत्र को विवदेत । न चाङ्गलसंस्कृतविद्यार्थिभिरेतत् साधयिष्यत इति लक्ष्यते ।

अपरञ्च । प्राच्यप्रतीच्यदर्शनेषु निष्णाता जना उभयोस्तत्त्वानुसंधानरीतीः परस्परं तुलयिष्यन्ति प्रचारयिष्यन्ति च भारतीयजनबुद्ध्यनुकूलविधयोचितां रीतिमुचितं च तन्त्रमित्युत्प्रेक्षाऽकारि श्रीमता तामसनेन । ननु लोकप्रतिभानुगुण्यभाजा युरोपीयप्रतिपादनरीतिमपेक्ष्याधिकां प्रतीतिं प्रीतिं च जनयितुं समर्थया रीत्या पूर्णतरेणोदारतरेणच भावेन साक्षात्परतत्त्वमपि प्रकाशयिष्यत इत्येतदाशया विशालीभवन्त्योत्कटयोदारया लोकानुकम्पाबुद्ध्या भारतीयजनकल्याणपरायणहृदयः श्रीमांस्तामसनस्तादृशशुभतरकालस्यागमं तर्कयामास यत्रेयं शाला लोकोन्नमनाय बलवदुत्तोलनयन्त्रमिवोपयुक्ता भविष्यति तदभ्युदयसाधनेषु चैकतमं भविष्यतीत्येतदर्थकं तदीयवाक्यं पूर्वं मया पठितम् ।

लोकचित्तोद्बोधनायान्यच्चास्ति किंचिदनुष्ठीयमानं किमिति यूयमिह निरुद्यमास्तिष्ठथ । वङ्गदेशे विश्वविद्यालयउत्कर्षहेतुरस्ति सोऽस्माकमुपकाराय न भवति नच संस्कृतशास्त्रविज्ञानात् तद्दीयविद्वत्समाजात् लभ्यते कापि प्रतिष्ठेति वदथ चेत्तर्हि प्रतिवदामि भोःमित्राणि भवाम्यहं समदुःखो युष्माभिर्भवेयं च प्रीतो यदि विश्वविद्यालयस्योद्यमेन प्राच्यविद्यानुशीलनं वर्धमानं पश्येयम् । किन्तु युष्मदनुत्साहे बलवान्हेतुरयं किम् । किं नामोत्कर्षकारणं कावाधिका शक्तिः बिए संस्कृतविद्यापारीण इति वोपाधेर्लभ्यतां शक्तिस्तु विज्ञानात्सौशील्याच्चैवहि भवति । तथाच कविना यदुक्तं तत्स्मरथ मनुष्य एव काञ्चनं पदवीतु तत्र मुद्राक्षरमात्रमिति । किंचैवमेवाङ्गलसंस्कृतविद्यायामपि वाच्यम् । यदीयं हि श्रीमता तामसनेन मतां शक्तिं गुणं वाधारयति तर्हि पाठशालीयप्रतिष्ठोपाधिविरहादेव नासिद्धार्था भविष्यति । एवं च हे मित्राणि अङ्गलसंस्कृतविद्या परीक्ष्यमाणास्तीति गम्यते अस्यै च परीक्षाया उचितानुकूलावसरदानमस्ति युष्मत्कृत्यम् । ननु संस्कृतशास्त्राणि एतद्देशमनि चिरं पिहितानि धर्माभासस्य देहात्मैक्यस्य च प्रतिपादकत्वेनैव वा लोके ख्यातानि स्यास्यन्त्याहोस्वित् प्रतीच्यशास्त्रैः कृतसंबन्धानि लोकबुद्धिशुद्धिरूपं तन्महत्फलमुपादयिष्यन्ति यत् कृतोभयशास्त्रसंबन्धायाः शिक्षारीतेरुद्भावकैरौत्सुक्यपूर्वमुत्प्रेक्षितम् । महावातागमस्येव नीरचाञ्चल्यमिव लक्ष्यते वा किमपि पूर्वलक्षणमस्य चिरप्रतीक्षितस्य महतउदर्कस्य ।

हे अङ्गलसंस्कृतविद्यार्थिन इमे प्रश्ना युष्माभिरेव विचारणीयाः । येषाञ्च महापुरुषाणामाशया इमेऽभिहिता स्तेषामुदाराकाङ्क्षापूरणानुकूलतां स्वयमेवोपगन्तुमुत्कटोऽभिलाषो मद्युक्तिभिर्युष्मच्चेतसि समुज्जृम्भताम् ।

अस्मिन्प्रसङ्गे प्राचीनाया अस्या नगर्याः सामर्थ्यशालिनां जनानां महान्तमिमं समागमं दृष्ट्वा परमं प्रीतोस्मीति भूयोऽपि वदामि । अपिच काशिकसभायामत्रच लोकस्य शिक्षायां विज्ञानवृद्धौ च यद्वर्धमानमौत्सुक्यं युष्माकं पश्यामि तेन परमोत्कृष्टफलाशां कर्तुमुत्सह इति ॥

प्रतीच्योदीच्यजनपदोपनियामकेन
माननीयेन श्रीमदार्य्यविलियम्म्यूरेण
काशिकविद्यालये
विद्यार्थिभ्यः पारितोषिकवितरणावसरे
कृतमिदं प्रतिपादनं
समाप्तम् ।

यागेश्वरनामधेयस्मरहराधिष्ठानपूतपदासु चन्द्रप्रभातटिनीतीरवर्तिनीषु विन्ध्यगिरिकाननभूमिषु मृगयाविहारिणो राजाधिराजद्विजराजकाशीराजश्रीश्वरीप्रसादनारायणसिंहस्य समभिव्याहारविहारिणा लब्धतत्प्रधानकोविदपदेन वङ्गदेशाधिवासिना कविना श्री ताराचरणतर्करत्नेन काशीराजकाननशतकं नामयदभिनवकाव्यं व्यरचि तत्र तावत्

यागेश्वरस्मरहराश्रितपूतनारे, सद्गन्धशीकरगधीरसमीरतीरे । चन्द्रप्रभाविमलनिर्मलनीलनीरे, चेतश्चरस्वविरतं रतिपत्यगारे ॥ १ ॥

हित्वा चिरप्रणयिनीमनिमेषनेत्रामागत्य विन्ध्यगिरिकाननमद्य कश्चित् । स्पृष्ट्वा समीरमवलोक्य तदीयशोभामुद्भावयत्यखिलमात्मगतस्वभावम् ॥ २ ॥

धन्या मयूरमृगवानरसारसाद्या, यस्मादितः कुसुमशायकवासभूमौ । अङ्कं निधाय दयिताः शयिताः सुखेन, हाहा वयं तु पिशुना विफलं भ्रमामः ॥ ३ ॥

आशालते किमधुना फलमाप्तुकामा, संश्रित्यशीतलमनोहरवन्यभूमिम् । जानासि किन्नवतचेतनहीनचित्ते, बालावियोगदहनाः सततं ज्वलन्ति ॥ ४ ॥

रे पान्थकृन्तनकर त्वमितः प्रयाहि, कान्तारतिश्रमजधर्मविनाशहेतो । नोचेत्समीरमृगया चरणे चरन्तं, संघातयामि हरिणं धरणीशमुक्त्वा ॥ ५ ॥

पाषंडगात्रपरिलाञ्छितपङ्कशैत्यं, स्पृष्ट्वा शरीरमधरीकृतपङ्कजाक्ष्याः । दावानलेन सततं सह वर्द्धमानं, स्प्रष्टुं समीरमिह किंसुखवासना ते ॥ ६ ॥

किंचित्त संप्रति विहारसुखाभिलाषि, दृष्ट्वा स्वभावरमणी-

यमरण्यमेतत्। जानासि किं न बलवाननिवार्य्य एषः, दीनादृगम्बुजनिपातकजन्मवह्निः ॥ ७ ॥

रे दुर्विनीतनयने नयने हरिण्या, दृष्ट्वा विनोदमभिलब्धुमिहप्रयासः। हित्वा सुधासमसुनिर्मलशीतलापं, पान्थस्य यादृशरतिर्मृगतृष्णिकायाम् ॥ ८ ॥

अस्मात्कुरङ्गि न भयं नहि ते वधार्थी, तिष्ठ क्षणं भयवती किमितःप्रयाहि। दृष्ट्वा विलोलनयने कुटिले त्वदीये, शङ्कुं दृढं हृदयगं क्षणमुद्धरामि ॥ ९ ॥

रेरे कुरङ्गि किमु पश्यसि नेत्रभङ्ग्या, दूरंप्रयाहिनहितेस्मिसुदर्शनार्हः। बालां मदेकहृदयां मुहुरीक्षमाणां, दग्ध्वा वियोगदहनेन समागतोहम् ॥ १० ॥

नाहोकुरङ्गितवनेत्रमवेत्य मुग्धस्तस्या जगज्जयिदृशः प्रियदासएषः। यस्याः कटाक्षपरिनिर्ज्जितनेत्रशोभा, हित्वा जनालयमहो वनमाश्रिता त्वम् ॥ ११ ॥

चन्द्रप्रभे तटिनि चारुपयःप्रकाशे, रूपं प्रदर्शयसि किं जडदेहिनीह। नालोकिता बत जगत्प्रियपङ्कजाक्ष्या, लावण्यजीवननिधेर्हितरङ्गशोभा ॥ १२ ॥

चन्द्रप्रभे नहि पुनस्तव भाग्यवत्वं, लोकोत्तरं सलिलपूरमितासि चेत्त्वम्। तोहर्णनिदाघसमये नवयौवनाढ्या, संसर्गसौख्यरहितासि यतश्चिरेण ॥ १३ ॥

कर्कन्धुवृन्दमधुराम्लकलोहितानि, धृत्वा फलानि किमु दम्भभरं तनोषि। दूरेस्तुनत्फलमहोनवहेमवल्ल्या, नोदृष्टमोष्टयुगपत्रमनिन्दितायाः ॥ १४ ॥

रेवल्लिगर्वितमते कुसुमप्रकाशैः, रूपं प्रदर्शयसि मां किमु लोलयात्वम्। न ज्ञायते समवलोकि मया रतेषु, विश्रान्तकुन्दरदनास्मितवक्त्रशोभा ॥ १५ ॥

रेरे नवे कुसुमिते ऽद्य प्रसूनवल्लि, कण्ठावलम्बनकरीप्रियपादपस्य। भूमौ ददासि चरणं नहि गर्वयोगाज्जानासि किं ननवयौवनमल्पकालम् ॥ १६ ॥

सवादनङ्गरमणीमिवहेमवल्लीं, लावण्यसिन्धुसुधयापरिवर्द्धमानाम्। वन्यां लतां कठिनकंटककुट्टितांगीं, किंरेसमेथदूतर्दृक्षितुमक्षिणी मे ॥ १७ ॥

रेरे मयूर परिहृत्य वधूं मयूरीं दूरे चर प्रणयसागरमज्जदङ्गः। नोचेन्मदेकहृदयाविरहाधिजन्म, दुर्वार्य्य वह्निशिखया ज्वलितासि सद्यः ॥ १८ ॥

रेरे कलापिकुलचित्रकलापशाली, शोभां प्रदर्शयसि लोकचयं किमद्य। हाहा न वेत्सि नवनीरदनीलवेशाः, केशाः कुशेशयदृशां कुशलीभवन्ति ॥ १९ ॥

रे कुञ्जमञ्जुललता कृतचारुशोभ, सौभाग्यमेव गणयामि तदात्वदीयम्। संचाररञ्जितदिगन्तरमत्तदन्ति, यानास्थिराम्बुजदृशो यदि पादचारः ॥ २० ॥

॥ रामनगरराजधानी ॥

श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्येण मल्लिनाथटीकासहितं कुमारसम्भवकाव्यं १९२४ वत्सरे कलिकातानगरस्थसंवादज्ञानरत्नाकरयन्त्रे मुद्रितम्। तस्यैव विज्ञापनपत्रे "एतच्च काव्यं कविना शैवाभिधमहापुराणोत्तरखण्डीयद्वादशाद्यष्टादशाध्यायपर्य्यन्तप्रतिपाद्यतारकासुरवधकथामाश्रित्य प्रणीतम्,, इति स एव लिलेख। तदत्यन्तमसंगतम्। यतोऽस्मिन्नेव काव्ये विद्यमानानां शब्दार्थकथाकल्पनानां वक्ष्यमाणपुराणस्थाभिः ताभिः सह प्रायशोऽभेदो दृश्यते नतु शैवाभिधमहापुराणान्तर्गतकथयेति। एवं "किन्तु तत्र पार्वतीतपस्यानन्तरं पार्वतीं प्रति प्रसन्नेन महादेवेन स्वयं वरविधानकर्तव्यताया उपदेशः इह तु सप्तर्षिमण्डलस्य तत्प्रार्थनार्थं हिमवन्तं प्रति प्रेषणमित्येव कविकल्पितं नतु तत् पुराणकथामूलमित्येव विशेष,, इति यदुक्तं तदपि न मनोरमम्। यतः वक्ष्यमाणे पुराणे पार्वतीपरिणयेच्छया सप्तर्षिमण्डलस्य स्मरणं तेन च समागतेषु तेषु तत्परिणयार्थं हिमालये तन्मण्डलप्रेषणमित्यादिकथा यथा वर्तते तथैवास्मिन्नपि काव्येऽस्ति अनेनेदमेव पुराणं तत्काव्यमूलमिति निश्चीयते। यथा।

अस्ति तावत् पञ्चाशत्खण्डमण्डितं स्कान्दं पुराणम्। तदन्तर्गता चैका शाङ्करी संहिता त्रिंशत्सहस्रग्रन्थैस्तिरेण सुविस्तृता वर्तते। तत्रैकं शिवरहस्याख्यं खण्डम्। तच्च सम्भवासुरवीरमाहेन्द्रयुद्धदेवदक्षोपदेशकाण्डभेदात् सप्तविधम्। अत्र चावच्छेदकावच्छेदेन श्रीमतः कार्तिकेयस्यैव विक्रमवर्णनम्। अथ च शूरपद्मः सिंहवक्त्रस्तारकश्चेति त्रयो भ्रातरः तेषु च सर्वकनिष्ठस्तारक इत्यासुरकाण्डीया कथा ॥

कविवरः कालिदासस्तु कुमारसम्भवं काव्यं सम्भवकाण्डीयकथामात्राश्रयेण रचयामास नतु शैवाभिधमहापुराणस्य कथामाश्रित्य। तथाहि।

॥ द्वितीयेऽध्याये शङ्करसंहितायाः ॥

दिने दिने वर्धमाना रेखा चान्द्रमसीव सा।
अपुषद्वपुषो वृद्धिमानन्देन पितुः सह ॥ १ ॥

॥ कुमारसम्भवस्य प्रथमे सर्गे ॥

दिने दिने सा परिवर्धमाना लब्धोदया चान्द्रमसीव लेखा ॥
पुपोष लावण्यमयान् विशेषान् ज्योत्स्नान्तराणीव कलान्तराणि ॥ १ ॥

Digitized by Google

॥ तथा २ अध्याये ॥

पर्वतापत्यतां याता पार्वतीत्यभिधां दधे ।
मात्रोमेति निषिद्धा यदुमाख्या प्रणवात्मिका ॥ २ ॥

॥ १ सर्गे ॥

तां पार्वतीत्याभिजनेन नाम्ना बन्धुप्रियां बन्धुजनो जुहाव ॥
उमेति मात्रा तपसो निषिद्धा पश्चादुमाख्यां सुमुखी जगाम ॥ २ ॥

॥ ४ अध्याये ॥

इति स्तुतः सुरश्रेष्ठः सुरश्रेष्ठैर्निजाश्रितैः ।
प्रसादाभिमुखो भूत्वा प्राह स्म करुणानिधिः ॥ १ ॥

॥ द्वितीयसर्गे ॥

इति तेभ्यः स्तुतीः श्रुत्वा यथार्था हृदयङ्गमाः ।
प्रसादाभिमुखो वेधाः प्रत्युवाच दिवौकसः ॥ १ ॥

॥ ५ अध्याये ॥

किमिदं किमिदं वत्सा यूयं सम्भूय सादरम् ।
विषण्णवदना देवाः शरणं मां समागताः ॥ २ ॥

॥ २ सर्गे ॥

किमिदं द्युतिमात्मीयां न बिभ्रति यथा पुरा ।
हिमक्लिष्टप्रकाशानि ज्योतींषीव मुखानि वः ॥ २ ॥

॥ ५ अध्याये ॥

यदात्थ भगवन्नेवं सुरा विप्रकृतास्तराम् ।
सर्वात्मनां त्वमात्मासि कथं नैव नु बुध्यसे ॥ ३ ॥

॥ २ सर्गे ॥

एवं यदात्थ भगवन्नामृष्टं नः परैः पदम् ।
प्रत्येकं विनियुक्तात्मा कथं न ज्ञास्यसि प्रभो ॥ ३ ॥

॥ ५ अध्याये ॥

पद्मबन्धुः पद्महस्तः शूरपद्मस्य विद्विषः ।
विकासयति पद्मानि तावन्मात्रातपः सदा ॥ ४ ॥

॥ २ सर्गे ॥

पुरे तावन्तमेवास्य तनोति रविरातपम् ।
दीर्घिकाकमलोन्मेषो यावन्मात्रेण साध्यते ॥ ४ ॥

॥ १० अध्याये ॥

गतवत्सं नभस्तूष्णीं नन्दीशाज्ञावशेन वै ।
चकम्पिरे न वृक्षाश्च चक्रुर्भृङ्गा न हुङ्कृतिम् ॥
चुकूजिरेऽण्डजा नैव तदा चित्रार्पिता इव ।

॥ ३ सर्गे ॥

निष्कम्पवृक्षं निभृतद्विरेफं मूकाण्डजं शान्तमृगप्रचारम् ॥
तच्छासनात् काननमेव सर्वं चित्रार्पितारम्भमिवावतस्थे ॥ १ ॥

॥ १२ अध्याये ॥

हा नाथ जीवसीत्याशु ब्रुवन्त्योत्थितया तया ।
कणशः कणशो भस्म समालोकि नभःस्थले ॥ १ ॥

॥ ४ सर्गे ॥

अपि जीवितनाथ जीवसीत्यभिधायोत्थितया तया पुरः ॥
ददृशे पुरुषाकृति क्षितौ हरकोपानलभस्म केवलम् ॥ १ ॥

॥ १२ अध्याये ॥

ततः सा बहुशोकार्ता विलुठन्ती धरातले ।
विकीर्णमूर्धजा चाथ विललापाकुलेन्द्रिया ॥ २ ॥

॥ ४ सर्गे ॥

अथ सा पुनरेव विह्वला वसुधालिङ्गनधूसरस्तनी ॥
विललाप विकीर्णमूर्धजा समदुःखामिव कुर्वती स्थलीम् ॥ २ ॥

॥ १२ अध्याये ॥

अयि नाथ विशालाक्ष तवाङ्गमतिसुन्दरम् ।
जगत्सु सुकुमाराणामुपमानं क्व वा गतम् ॥

॥ ४ सर्गे ॥

उपमानमभूद्विलासिनां करणं यत् तव कान्तिमत्तया ॥
तदिदं गतमीदृशीं दशां न विदीर्ये कठिनाः खलु स्त्रियः ॥ ३ ॥

॥ १२ अध्याये ॥

अपि मां त्वत्पराधीनजीवितां त्यक्तसौहृदः ।
विहाय विद्रुतोऽसि त्वं निस्सेत्वम्बुजमम्बुवत् ॥ ४ ॥

॥ ४ सर्गे ॥

क्व नु मां त्वदधीनजीवितां विनिकीर्य क्षणभिन्नसौहृदः ॥
नलिनीं क्षतसेतुबन्धनो जलसङ्घात इवासि विद्रुतः ॥ ४ ॥

॥ १२ अध्याये ॥

अपराद्धं मया किं ते त्वया मह्यं न किञ्चन ॥
अकस्माद् दर्शनं मह्यं विलपन्त्यै न दीयते ॥ ५ ॥

॥ ४ सर्गे ॥

कृतवानसि विप्रियं न मे प्रतिकूलं च न ते मया कृतम् ॥
किमकारणमेव दर्शनं विलपन्त्यै रतये न दीयते ॥ ५ ॥

॥ १२ अध्याये ॥

बन्धनं मेखलादाम्ना त्वं गोत्रस्खलितेषु ते ।
क्षमस्व तच्च मे कान्त स्वकर्णोत्पलताडनम् ॥ ६ ॥

॥ ४ सर्गे ॥

स्मरसि स्मर मेखलागुणैरुत गोत्रस्खलितेषु बन्धनम् ॥
च्युतकेशरदूषितेक्षणान्यवतंसोत्पलताडनानि वा ॥ ६ ॥

Digitized by Google

॥ १२ अध्याये ॥

मम त्वं हृदये नित्यं वससीति मृषा वचः ।
न सत्यं यदि तत्सत्यं त्वयि दग्धे न मेऽक्षतिः ॥ ७ ॥

॥ ४ सर्ग ॥

हृदये वससीति मत्प्रियं यदवोचस्तदवैमि कैतवम् ॥
उपचारपदं न चेदिदं त्वमनङ्गः कथमक्षता रतिः ॥ ७ ॥

॥ १२ अध्याये ॥

त्वया कृतमिदं मेऽङ्गे मण्डनं पौष्पमार्तवम् ।
दृश्यते न त्वमद्येत्थं कथमीशेन नाशितः ॥ ८ ॥

॥ ४ सर्ग ॥

रचितं रतिपण्डित त्वया स्वयमङ्गेषु ममेदमार्तवम् ॥
ध्रियते कुसुमप्रसाधनं तव तच्चारु वपुर्न दृश्यते ॥ ८ ॥

॥ १२ अध्याये ॥

अस्मात् लोकादमुं लोकं प्रस्थितस्य तवाधुना ।
पदवीं प्रतिपत्स्येऽहं विधिना वञ्चितामुना ॥ ९ ॥

॥ ४ सर्ग ॥

परलोकनवप्रवासिनः प्रतिपत्स्ये पदवीमहं तव ॥
विधिना जन एष वञ्चितस्त्वदधीनं खलु देहिनां सुखम् ॥ ९ ॥

॥ १३ अध्याये ॥

तणं निद्रां गता बालाऽपररात्रौ प्रतिक्षपम् ।
स्वप्ने दृष्ट्वा पतिं भूयः प्रबुद्धा विललाप च ॥ १ ॥
हे कान्त व्रजसि क्व त्वमिति गृह्णाति बाहुना ॥

॥ ५ सर्ग ॥

त्रिभागशेषासु निशासु च क्षणं निमील्य नेत्रे सहसा व्यबुध्यत ॥
क्व नीलकण्ठ व्रजसीत्यलक्ष्यवागसत्यकण्ठार्पितबाहुबन्धना ॥१॥

॥ १३ अध्याये ॥

सर्वेऽपि च त्वां वेदान्ता रोदसी व्याप्य विष्ठितम् ।
विद्वांसोऽपि पुराणाद्याः परिपूर्णं वदन्ति हि ॥
कथं न वेत्सि भावस्थं जनं जगदधीश्वर ॥ २ ॥

॥ ५ सर्ग ॥

यदा बुधैः सर्वगतस्त्वमुच्यसे न वेत्सि भावस्थमिमं कथं जनम् ॥२॥

॥ १४ अध्याये ॥

मत्तवारणमारूढौ दम्पती द्विजपुङ्गवैः ।
स्वस्तिवाचनकैस्तूर्यैस्तुवन्ति किल वन्दिनः ॥
युवां वृद्धोक्षमारूढौ भूतवेतालसेवितौ ।
निरीक्ष्य जनता लोके स्मेरवक्त्रा भविष्यति ॥ ३ ॥

॥ ५ सर्ग ॥

इयञ्च तेऽन्या पुरतो विडम्बना यदूढया वारणराजहार्यया ॥
विलोक्य वृद्धोक्षमधिष्ठितं त्वया महाजनः स्मेरमुखो भविष्यति ॥ ३ ॥

॥ १५ अध्याये ॥

अरुन्धती च कल्याणी प्रागल्भ्यं तत्र यातु सा ।
पुरन्ध्री भूधरेन्द्रस्य यथा न विवदेत् तथा ॥
एवंविधेषु कार्य्येषु पुरन्ध्रीणां प्रगल्भता ॥ १ ॥

॥ ६ सर्ग ॥

आर्य्याप्यरुन्धती तत्र व्यापारं कर्तुमर्हति ।
प्रायेणैवंविधे कार्य्ये पुरन्ध्रीणां प्रगल्भता ॥ १ ॥

॥ १५ अध्याये ॥

इति वेदान्तविज्ञानविनिश्चितयतीश्वरे ।
परिग्रहोन्मुखे तेऽपि जहुर्व्रीडां तथाविधाम् ॥ २ ॥

॥ ६ सर्ग ॥

तस्मिन् संयमिनामाद्ये जाते परिणयोन्मुखे ।
जहुः परिग्रहव्रीडां प्राजापत्यास्तपस्विनः ॥ २ ॥

॥ १५ अध्याये ॥

प्रोचुरङ्गिरसं सर्वे कथयेति कथाविदम् ।
अथ तेषां पुरः श्रीमानङ्गिरा मुनिसत्तमः ॥
उवाच मधुरं वाक्यं सर्वभूधरनायकम् ॥ ३ ॥

॥ ६ सर्ग ॥

अथाङ्गिरसमग्रण्यमुदाहरणवस्तुषु ।
ऋषयश्चोदयामासुः प्रत्युवाच स भूधरम् ॥ ३ ॥

॥ २२ अध्याये ॥

खेलगामी स तं देवमुवाह वृषभेश्वरः ।
धुन्वन्मुहुः प्रोतघने विषाणे धृतचामरे ॥ १ ॥

॥ ७ सर्ग ॥

खे खेलगामी तमुवाह वाहः सशब्दचामीकरकिङ्किणीकः ।
तटाभिघातादिव लग्नपङ्के धुन्वन्मुहुः प्रोतघने विषाणे ॥ १ ॥

॥ २२ अध्याये ॥

उत्सृष्टनीवीवसनं सव्येनादाय चार्भकम् ।
अन्येन काचित् त्वरया पाणिना प्राप जालकम् ॥ २ ॥

॥ ७ सर्ग ॥

जालान्तरप्रेषितदृष्टिरन्या प्रस्थानभिन्नां न बबन्ध नीवीम् ।
नाभिप्रविष्टाभरणप्रभेण हस्तेन तस्थाववलम्ब्य वासः ॥ २ ॥

॥ २२ अध्याये ॥

अन्या सम्भाव्य नयनमञ्जनेन शलाकया ।
अन्यद् विस्मृत्य नयनमागवाक्षं जगाम सा ॥ ३ ॥

Digitized by Google

॥ ७ सर्गे ॥

विलोचनं दक्षिणमञ्जनेन सम्भाव्य तद्वञ्चितवामनेत्रा ।
तथैव वातायनसन्निकर्षं ययौ शलाकामपरा वहन्ती ॥ ३ ॥

॥ २२ अध्याये ॥

अलक्तकेन सम्भाव्य पादमेकमथापरा ।
निर्गत्य तावन्मात्रेण वर्त्म चक्रे तदङ्कितम् ॥ ४ ॥

॥ ७ सर्गे ॥

प्रसाधिकालम्बितमग्रपादमाक्षिप्य काचिद् द्रवरागमेव ।
उत्सृष्टलीलागतिरागवाक्षादलक्तकाङ्कां पदवीं ततान ॥ ४ ॥

॥ २२ अध्याये ॥

पुरे पुरन्ध्र्यः प्रासादजालानि स्वैर्मुखाम्बुजैः ।
अम्भोजावरणानीव चक्रुरिन्दीवरेक्षणाः ॥ ५ ॥

॥ ७ सर्गे ॥

तासां मुखैरासवगन्धगर्भैर्व्याप्तान्तराः सान्द्रकुतूहलानाम् ॥
विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्राभरणा इवासन् ॥ ५ ॥

॥ २२ अध्याये ॥

विलोक्य देवदेवेशमासामक्षाणि मानसैः ।
साकं सर्वात्मना चक्षुः प्राप तं सुतरामिव ॥ ६ ॥

॥ ७ सर्गे ॥

तमेकदृश्यं नयनैः पिबन्त्यो नार्य्यो न जग्मुर्विषयान्तराणि ॥
तथाहि शेषेन्द्रियवृत्तिरासां सर्वात्मना चक्षुरिव प्रविष्टा ॥ ७ ॥

॥ २२ अध्याये ॥

बालापि देवदेवेशं बालेन्दुकृतशेखरम् ।
चचारातो महद्गौरी तपोदुश्चरितं चिरम् ॥ ८ ॥

॥ ७ सर्गे ॥

स्थाने तपो दुश्चरमेतदर्थमपर्णयापेलवयापि तप्तम् ॥

TO THE EDITOR OF THE PANDIT.

SIR,

As it is the duty of every one, interested in the progress of literature, and consequently in that of your journal, to suggest any improvement worthy of notice, I write the following few lines and submit them to your perusal. In my opinion the plan of your journal is susceptible of improvement. The chief principle of my view is that every prakaraṇa (प्रकरण) should be complete in itself i. e. after the end of each year, the subscribers may be able to unloose the several pamphlets printed during the year and arrange the several prakaraṇas separately so that they may have so many useful books. I shall illustrate my plan by taking the Nos. for September and October 1867. After finishing the "प्रकरणपंचिकोपसंहरणं", on the 71st page, the page (71st) should be left blank. The preface and the essay on "नरेश्वरपरीक्षा" should be commenced on a new page i. e. at the top of the 73rd page (vol. 11) for example, and the pages should be marked 1, 2. 3, &c. Then according to my calculation the 78th becomes sixth; this page should be printed up to bottom and should not be encroached upon by the commencement of another topic, which has been the case. In the next number i. e. that for October 1867, the page 93rd where the "नरेश्वरपरीक्षा" begins should be marked 7th, the next 8th and so on. The same course must be followed for "हरिविलास" commenced on the 78th page i. e. it should be commenced on the 79th page and the pages should be numbered one, two, three and so on. In fact the pamphlet should be issued in such a form that every "प्रकरण" Sanskrit as well as English can be arranged separately without destroying the order of the pages. When a "प्रकरण" is finished a title page should be issued for that प्रकरण. In short I recommend the plan of "सर्वसंग्रह" a pamphlet containing the works of Marathi Poets, successfully conducted by the able and beneficent guidance of Mr. Mȧdhava Chandrobá who during the past 7 years received the merited praise of the educated public for the efforts exerted in the advancement of Marathi Literature. The plan proposed if adopted will be of much use to the public and will invite more subscribers.

POONA: 25*th May* 1868. — Yours truly A POONITE.

THE PANDITS AND THEIR MANNER OF TEACHING.

BY DR. BALLANTYNE.

From the Benares Magazine, December, 1850.

At page 447 of the Magazine we broke off, in our account of the Hindú "De Poetica," at the end of the first section of the *Sáhitya Darpana*—the "Mirror of Composition." The second section, as already mentioned, treats of "the various powers of a word." The subject is dry but curious, and, if we cannot be either very instructive or entertaining on it, we shall endeavour to be intelligible and brief.

Before treating of the "powers of a word" our author—like Mrs. Glasse before proceeding to make soup of her hare—thinks it necessary to "catch his word." Now, as regards the point yet attained, we only know [—see page 446–] that "A speech whereof the soul is flavour is Poetry." But what is a *speech?* To this our author, at the commencement of his second section, replies—"Let a Speech [or sentence] be a collection of words possessing Compatibility, Expectancy, and Proximity." These

Digitized by Google

requirements he illustrates severally. First—the collection of words "He irrigates with fire" is no sentence—for, fire being incompatible with irrigation, the collection of words is nonsensical. Secondly, the collection of words "cow horse man elephant" is no sentence—for, the words do not "look out for" one another, being nowise interdependent. Thirdly—the word "Devadatta," pronounced just now, makes no sentence with the word "goes" pronounced twenty-four hours afterwards—the want of "Proximity" being destructive of the apprehension. Of course this last rule refers more particularly to the south. In the "north countrie" a man might oppose, to the third requirement, the instance of the Laird of Balnamoon, who, on riding across a bridge, turned round and asked his man John—"John—do you like eggs?" "Yes" said John.—They proceeded; and, about a year afterwards, on passing the same spot, the Laird looked back and asked "How?"—"Poached" replied John—nothing at a loss.

But—as far as we have gone—a sentence—with or without "flavour"—is only a sentence—and is Poetry to be confined to a *sentence?* Moved, apparently, by this consideration, our author—who comes oddly close upon Aristotle every here and there—declares that "A collection of sentences is a great sentence"—adding that "Thus is a sentence held to be of two kinds," and citing, as examples of the "great sentence," the *Mahábhárata*, the *Rámáyaṇa*, and the *Raghuvanśa*. In like manner Aristotle says, in his "Poetics" "But a sentence is one in a twofold respect; for it is either that "which signifies one thing, or that which becomes many "from conjunction. Thus the *Iliad* indeed is one by "conjunction."

Well—a sentence being a "collection of words"—a word is next defined as meaning "letters [so combined "as to be] suited for use, not in logical connection, conveying a meaning, and only one." The investigation of this definition, we remit to another time, if not to another place. But a word, (whether the investigation of the definition be kept in abeyance or not,) may have a meaning, or rather three—for, according to our author, "The Meaning is held to be threefold—the Express "*(váchya,)* the Indicated (*lakshya,*) and the Suggested "*(vyangya).*" How this happens he next declares—saying "The express meaning is that conveyed to the "understanding by [the word's] Denotation *(abhidhá)*: "the indicated [meaning] is held [to be conveyed] by "[the word's] indication *(lakshaṇá)*; the suggested [is "held to be conveyed] by [the word's] Suggestion *(vyanjaná)*. Let these [viz., Denotation, Indication, and "Suggestion,] be the three *powers (śakti)* of a word." Among these three powers, the primary one, it is remarked, is Denotation—"it being this which conveys the "meaning which belongs to the word by convention *(sanketa).*" How one learns the conventional meaning of words the author illustrates thus. "On the old man's "saying, when giving directions to the middle-aged man, "—'Bring the cow'—the child, having observed him "[the man to whom the order was given by his senior] "employing himself in bringing the cow, determines, "first, that 'The meaning of this sentence was the fetching of a body possessing a dewlap &c." and afterwards, "through the insertion and omission [of the portions of "the sentence which he as yet understands only in the "lump] in such sentences as 'Fasten the cow'—'Bring the "horse'—he ascertains the convention that the word "'cow' shall mean the thing with a dewlap &c., and the "word 'bring' shall mean fetching." When the young philologist has thus acquired a certain stock of words, he is able to make additions to it sometimes by gathering the sense of unknown terms from the context, and sometimes by learning it from the mouth of persons worthy of his confidence.

As it would be impracticable to make a convention in regard to every individual case, a convention is made—according to our author, who on this point follows the grammarians—in respect of "Kinds, Qualities, Things, and Actions." These he defines as follows. "Kind "[or genus—*játi*] is the nature of a cow or the like [which "resides] in the [individual] body [called] cow or the like [—and in virtue whereof such and such *is* a cow or the "like]. Quality (*guṇa*) is a settled habit of a thing "which causes the making of a distinction—for [the "qualities] *white* &c. difference such a thing as a cow "from its congeners—such as a *black* cow. Names of "things (*dravya*) are those that denote a single individual—as Hari, Hara, (and other proper names). Actions (*kriyá*) are habits of a thing [not settled, as qualities are, but] in course of accomplishment—as "'cooking' [—which is the habit of the thing whilst in "progress towards being ready for eating—] for, what is "denoted by such a word as 'cooking' is the collection "of proceedings from first to last, as the putting on [the "pot with the rice to boil] and ultimately taking it off "again."

How the power called "Indication" comes into play is thus explained. "Where the primary meaning of a "word is incompatible (with the other matters in the "sentence) the power of Indication (*lakshaṇá*) is communicated (to the word) whereby another meaning (than "the express one—yet) in connection therewith, is thought "of—either through notoriety (of the employment of the "term in some particular secondary sense), or through a "Motive (—discernible—for using the word rather than

Digitized by Google

"some other word which would have conveyed the mean-"ing expressly."

This he further illustrates as follows. "The power by "which, in such (an expression) as 'The impetuous "Kalinga,' a word, such as 'Kalinga,' incompatible (with "'impetuosity'—if taken) in its own sense—as that of a "particular country (on the Coromandel coast), causes "one to think of (not the country, for instance, that the "word denotes, but) the men, for instance, connected "therewith; and (—to give a second example—the "power) by which, in such (an expression) as 'A herd-"station on the Ganges,' a word, such as 'the Ganges,' "incompatible with the matter in question (—here, viz., "the actual locus of the station of herdsmen—) inas-"much as the thing that it denotes is in the shape, for "instance, of a mass of water (on the surface of which "the herdsmen could not have built the huts of which "the herd-station consists—) causes one to think of "something connected with itself by the relation of prox-"imity or the like—such as the river's *bank—this* "power of a word—*communicated* to it—other than "the power which (—to use the language of some) be-"longs to it naturally, or (to use the language of others) "which is not that given to it by God—(this second "power it is that) is called *Indication*."

The distinction between the two examples just given requires attention. "In the former, "the reason (why "the word denoting the region of Kalinga has the pow-"er of indicating the inhabitants of that region) is "'Notoriety'—the fact, simply, of its being familiarly "known (that the name of the region is employed to "signify its inhabitants—as Shakespere uses the name "of 'France' to signify the king of France.) In the "latter of the examples the 'Motive' (for using the "word 'Ganges' when we really mean 'bank of the "Ganges') consists in this that it causes one to think of "the extreme of coolness and purity (pertaining to the "Ganges itself) which would not have been apprehend-"ed from the exposition of (the same matter in the shape "of the expression) 'A herd-station on *the Bank of the* "*Ganges*."

Our author now plunges into some profound and whimsical discussion on a point in regard to which he differs with the author of the *Kávya Prakáśa*, and on which he seems to have the best of the argument. The other (like a Hindú Horne Tooke) holds that words denote just what their etymology gives, and hence the word *kuśala* ("expert") means strictly "a getter of sacrificial grass"—the etymology being *kuśam láti* "he gets sacrificial grass." The word comes to *indicate* an "expert" man "through the relation of a homogeneousness of character in respect of the being a person of discrimination"—which the gatherer of sacrificial grass must be—else how could he tell one kind of grass from another? To this our author retorts, that "The "primary meaning of the word is simply that of 'ex-"pert'—notwithstanding that the sense of 'gatherer of "sacrificial grass' might be obtained from the etymolo-"gy:—for, the reason for the (technically recognized) "etymology of words is one thing (—viz. the conve-"nience of the grammarians, who are bound to furnish "an etymology for every word that is not a radical—) "and the reason for the employment (of a word) is an-"other (—viz., the fact of the word's having, by conven-"tion, such a denotation as the speaker happens to have "occasion for)." By way of a reductio ad absurdum he brings forward the word *go* "a cow"—which, according to *Páṇini*, is derived from the verb *gam*, "to move"—and he proposes for consideration the applicability of the term, on the opposite hypothesis, to the animal when fast asleep. The whole discussion, we incline to think, must constitute one of those parts of the book on which the young Bráhman student luxuriates.

Our author next proceeds to divide the power of Indication into four-score different species. Even the pandits are disposed to rebel against this, and to prefer for once the comparative simplicity of the *Kávya Prakáśa* which contents itself with eight. We shall not inflict the eighty upon the reader, but shall select the more noticeable. First, then,—the indicatory word either abandons its own meaning, with a view to indicating something else—when the case is one simply of "Indication indicative" (*lakshaṇa-lakshaṇá*); or it carries its own sense along with it, and then the case is one of "Indication inclusive" (*upádána-lakshaṇá.*) Of the former the expression "A herd-station on the Ganges" is an example —for there the word "Ganges," as already shown, stands for the bank alone and not for the body of water. Of the latter an example is "The lances enter." Here the "lances" of course mean men bearing lances—but when the men, indicated by the word, enter, then the lances, denoted by the word, enter also. "These (kinds of Indication), further," says our author, "are severally twofold, "through 'Superimposition (*áropa*) and 'Introsuscep-"tion,' (*adhyavasána*)." The explanation of these terms "is rather curious. "Let that (Indication) be 'Super-"imponent' which makes one think of the identity with "something else of an object *not swallowed* (by that "with which it is identified, but expressed along with it.) "That (Indication) is held to be 'Introsusceptive' (which "makes one think of the identity with something else) "of an object *swallowed* (—not expressed—but recog-"nised as it were within that with which it is identified)." For example—"The horse—the white—gallops":—

Digitized by Google

here the horse" and "the white" mean just one and the same thing, and both terms are exhibited; but the same sense would be equally well understood (by a jockey, for example, to whom the horse was notoriously "the white" —or "the dun"—or "the chestnut"—) if the sentence were briefly "The white gallops." Here the "white" has swallowed the "horse," and the case is one of "Indication inclusive introsusceptive founded on Notoriety" *(rúḍhávupádána-lakshaṇá sádhyavasáná.)* This classification of phraseology may serve to illustrate a passage in the "Poetics" of Aristotle, which Mr. Theodore Buckley (of Christ Church) concurs with Dr. Ritter in condemning as spurious. The passage occurs in the 21st chapter, where, in speaking of metaphors, Aristotle, as rendered by Mr. Buckley, says "And sometimes the proper term is added to the relative terms." We incline to regard the passage as genuine. Let us see. Aristotle goes on to remark "I say, for instance, a cup has a similar relation to Bacchus that a shield has to Mars. "Hence, a shield may be called the cup of Mars, and a "cup the shield of Bacchus." Now, it seems to us that if the following proportion—viz.

Cup : Bacchus : : shield : Mars,

were not present to the mind of the hearer, then (to use Mr. Buckley's words—on a kindred passage in the 11th chap. 3d Book of the Rhetoric—) "with a view to guard the metaphor from any incidental harshness or obscurity" the proper term may be advantageously added—making what our author calls a case of the "Superimponent" *(saropá.)* Thus, had Aristotle followed up his remark by a special example, we should have read "The cup—the shield of Bacchus"—"The shield—the cup of Mars." According to the Hindú phraseology, when we say "The cup of Mars", then, (through Indication introsusceptive) the cup has *swallowed* the shield—which latter, nevertheless, is discerned within the other by the eye of the intelligent. In the same way—wishing to avoid obscurity—one says, at full length, "That *cow*,—the man of the Panjáb," and then one can say (to take another example of our author's) "That *cow* talks." Here "cow" has swallowed "Panjábí." On the question as to the precise relation between the cow and the Panjábí, under the circumstances, there is an infinite quantity of subtlety expended—to the discomfiture of course of all that differ from our author —who is a perfect Baconian Aristotle in respect of "bearing no brother near the throne."

When certain kinds of Indication specified have come to be sixteen, there is a duplication of these in respect of the consideration that the thing "suggested" may belong to the thing "indicated" or not. Of the case where the thing suggested does *not* belong to the thing indicated, the standing example "A herd-station on the Ganges" serves as an illustration—for here the "purity &c." are properties *not* of the bank but only of the river. Of the other case the following example is given —from the *Víra Charitra* of Bhavabhúti—viz.—

Here are the clouds, in which the cranes disport,
And by whose smooth dark loveliness the sky
Is overspread. Here are the dewy winds,
And the melodious joy-screams of the peacocks—
Friends of the clouds. Be all these as they list.
I—very firmly stout of heart—am *Ráma*—
I endure all [—hard though it be to bear
Those vernal sights and sounds with patience which
Enhance the joy of lovers when united.]
But how will *she* be now—Videha's daughter?
Alas, my goddess—O do *thou* be patient.

Here—says our author—the property indicated (viz. patience) belongs to the thing indicated (viz., *the peculiar* Ráma italicised in the fifth line) which was not the case in respect of the *bank* of the Ganges. But we must get on—leaving, till some other occasion, the further elucidation of this point as regards those who may feel interested about it; and we proceed to the *third* power of a word—viz., "Suggestion," which is declared as follows:—

"When Denotation &c., surcease (—after having done "their duty,) that function, of a word or its sense &c., by "which something further is caused to be thought of, is "what we call *Suggestion.*"

As the power of "Suggestion" may originate in the powers of "Denotation" and "Indication," and either in the word or in the sense of the word, or in the drift of the whole discourse &c., there are abundant subdivisions of this power also. At one point in the discussion (—reminding us of Dr. Johnson, who met the exclamation of surprise on his once defending Garrick whom he himself had so often abused, with the intimation—"Garrick is my dog, Sir;—I allow no one else to kick him," —) our author turns round upon some assailants of the author of the *Kávya Prakáśa*—and, after bringing him off in triumph (for his own use,) he exclaims—"But "enough of this (idly censorious) glancing (on the part "of these objectors—) at the venerable man (—to whom "—though constrained to find fault with him occasion-"ally myself—I am indebted for so much of the mate-"rials of my work, that I may call him) the bestower of "my livelihood."

"Suggestion" is held to originate in the "Denotation" in such cases as that exemplified by our author in a set of verses by "the lotus-feet of his father" so crammed with dreary double-entendre that we hasten past it. When founded on "Indication"—it may be exemplified by the universally familiar "herd-station on the Ganges"—which some of our pandit friends cannot hear mentioned without grinning "like Cheshire cats"—the grinning of which cats (—according to Charles Lamb—though he professes himself unable to explain

Digitized by Google

why—, is said to be occasioned by the recollection that Cheshire was once a County Palatine, and the cats can't help laughing whenever they think of it. Verily the pandits who have heard all that they are likely, in a reasonable life-time, to have heard on the topic, ought not to be grudged their laugh—if they have heart for it.

But, apart from the Denotative or the Indicative powers of *words*, Suggestion may be based upon the *sense*—and this may have a reference to some "speci-"ality of the Speaker, or the Addressed, or the Sen-"tence, or the Proximity of some one else, or the "Drift, or the Occasion, or the Place, or the Time, or the "Emphasis, or Gesture &c." Of the case where Time, Place, the character of the Speaker, &c. combine to suggest somewhat more than is plainly expressed—we have the example following :—

Tis love's own season—jocund Spring,
The God of the flowery bow,
Now scatters his shafts, and the breezes bring
Fresh vigour as they blow.
Round the arbours the shading creepers curl,
And my husband is far away—
Do think of something—can't you, girl?
What *are* we to do to-day?

"Here"—says the commentator—"some one in virtue "of the known character of the Speaker suggests to her "confidante—'Let my un-avowed lover be speedily sum-"moned."

Where the speciality is in respect of the person adressed, we may have such an example as the following—viz.

From your bosom the sandal-wood unguent is rubbed,
And your lip has lost its red;
The collyrium is washed from your eyes, and a glow
O'er your face and form has spread.
You *lying* girl—you've been to bathe—
No concern about *me* could prevent you—
And you haven't gone with my message at all
To the *wretch* to whom I sent you.

"Here"—says the commentator—"by 'Indication of "the contrary' *(viparíta-lakshaná)*—'You *did* go to "him' is indicated, and 'To play with him' (instead of "delivering your message) is suggested"—and all this in virtue of the person addressed being a "lying girl."

Where the speciality is in respect of the proximity of some one else—to the speaker—we may have such an example as the following—viz.

That crane, on the floating lotus-leaf,
Stirs not:—you could not tell
But, on a slab of emerald,
It were a white conch-shell.

"Here"—says the commentator—"from the immobi-"lity of the crane its security (is inferred), and from that "the fact that the place is devoid of people (— who, had "they been there, would have frightened the crane)" whence—as the lines suggest to one Proximate to the speaker—what a pleasant place for a tête à tête.

With reference to "Emphasis" we have the following example—which might go to the Scotch tune of "He's low doon, he's in the broom, that's waiting for me."

His faither sends him—gang he maun—
And far awa' frae me;
But, when Spring comes back again,
Will he come back?—*not he.*

"Here"—according to to the commentator—she *says* "'He wont come back'—but by the (slily appropriate) "Emphasis it is suggested that 'He assuredly *will* come back.'"

Where the speciality consists in the gesture, we may have such an example as the following—viz.

His look entreated her to speak the hour
Of assignation;—which when she did spy,
The dame, quickwitted, closed the lotus-flower
Full fraught with meaning from her laughing eye.

"Here"—says the commentator—"by the gesture of "closing the lotus, &c., it is suggested by some woman, "that the twilight (—when the lotus-flowers close them-"selves—) is the time of assignation."

Here we come to the end of Chapter Second—and if all the examples of the cases considered in it turn upon the "tender passion," we verily believe that the reason is this, that that passion happens to stand at the top of the list of sentiments recognised by the Hindús, and the author would have met (—what he did not care to encounter—) a storm of obloquy had he taken his examples, immethodically, from any of the other topics without exhausting the first.

K.

A TRILINGUAL DICTIONARY; being a comprehensive Lexicon in English, Urdú and Hindí, exhibiting the syllabication, pronounciation, and etymology of English words, with their explanation in English, and in Urdú and Hindí in the Roman character, by Mathurá Prasada Misra, Head Master Queen's College, Benares.

"After a thorough examination of Mathurá Prasád's Dictionary, I consider it to be a remarkable advance on any work of the same kind that has preceded it. Covering as it does, and very adequately, the ground of two leading Indian languages, it may be regarded as one of the most valuable linguistic helps to the Indian official that has appeared for many years; and it is, of course, equally valuable to the Indian Student of English." *Dr. Hall.*

May be procured direct from us, by Book post; from any bookseller in Calcutta, Madras, or Bombay; or from Messrs. Trübner & Co., London.—*Price Rs.* 16.

Communications of a literary nature should be addressed to the Editor: *all letters on business, to the Proprietors,* Messrs. F. J. Lazarus & Co., *to whom Drafts should be made payable.* Advertisements *will be inserted at four annas per line.*

The PANDIT may be ordered of the Publishers, or through Messrs. Trübner and Co., London.

Annual subscription, in advance, including postage, Rs 12.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 26. Benares July 1st, 1868. Vol. III.

॥ ईश्वरप्रत्यभिज्ञासूत्रविमर्शिन्याः ॥

॥ पञ्चमाह्निकस्य पूर्वाङ्कप्रक्रान्तस्यावशिष्टभागः ॥

एवमाशङ्क्यमानत्वेन परसम्भावना दृढा दर्शिता । अधुना त्वेनां संभावनां शिथिलयितुं तावदाह ।

(५) स्यादेतदवभासेषु तेष्वेवावसिते सति ।
व्यवहारे किमन्येन बाह्येनानुपपत्तिना ॥

स्यादेतदिति पूर्वोक्तसम्भावनाभ्युपगमे यदा व्याख्यायते तदा किं त्विति वाक्यशेषेण तच्छैथिल्यविषयं सम्भावनान्तरं शेषश्लोकेन दर्श्यते इति व्याख्येयम् । यदि त्वध्याहारो न सह्यते तदा स्यादेतदिति इदमपि सम्भावनान्तरं स्यात् यदनेन श्लोकेनोच्यत इत्येकवाक्यतया योज्यम् । अनया ऽपि कष्टकल्पनया बाह्यानर्थान्प्रसाधयता भवता तैर्न किं चित्कर्तव्यम् । आभासैरेव तैर्भवता ऽभ्युपगतैर्व्यवहारसिद्धेः । नहि नित्यानुमेयेन कश्चिद्व्यवहार इति किं बाह्येन । यत्र साधकं च नास्ति प्रमाणं बाधकं च प्रकाशाद्भेदे ऽनुमेयतयापि प्रकाशनाभाव इति तावन्मुख्यम् । अभ्युच्चयबाधकास्तु अवयविनो वृत्त्यनुपपत्तिः, समवायासिद्धिः, कम्पाकम्पावरणानावरणरक्तारक्तदिग्भागभेदादिविरुद्धधर्मयोगः, । अणुसंचयबाह्यवादे ऽपि संचयस्यान्यस्याभावे ऽणव एव । ते च यदि संयुज्यन्ते निरन्तरतया तदवश्यं दिग्भागभेदः । देवनाच्च षट्सु दिक्षु संचीयमानेषु षट्स्वणुषु मध्यमस्य परमाणोर्यत्रैव धाम्न्येको लग्नस्तत्रैव यद्यपरस्तदेकपरमाणुमात्रता । अथान्यत्रैको ऽन्यत्रापरस्तदवश्यं भागभेदापत्तिरिति भाग एव परमार्थसंस्तस्याप्येषैव सरणिरिति न किं चिदवशिष्यते बाह्यं तत्त्वतः । "न चैतद्वाच्यं मूर्तानामेकदेशत्वायोगात्संयोगे भिन्नदेशत्वाव्यावृत्तेस्तन्निष्ठं द्व्यणुकं नाम कार्यद्रव्यमणुपरिमाणं तेभ्यस्त्रिभ्यो महत्कार्यमिति,, अवयविवादो ह्ययं, स च पूर्वमेवापबाधितः,। "यच्चाव्याप्यवृत्तित्वं संयोगस्योच्यते,, तन्निरंशे कथं संगच्छताम्, स्वाश्रये हि यद्यसौ समवैति किमन्यदस्यावशिष्टं यन्न व्याप्नुयादिति । अभ्युच्चयबाधकं चेदमिति नात्रास्माभिर्भरः कृतः। विस्तरेण च प्रज्ञालंकारे दर्शितमेतदाचार्यशंकरनन्दनेन ॥

ननु बाधकं नाम प्रमाणसिद्धे वस्तुनि न किं चित्कर्तुं समर्थं तेनैव दृढेन प्रमाणेन बाधकाभिमतस्य बाधितस्याप्रमाणत्वसंपादनात् दर्शितं चेह साधकं प्रमाणं "कार्यहेतुस्तत्तदाकस्मिकाभास,, इति कारिकयेत्याशङ्क्याह ।

(६) चिदात्मैव हि देवो ऽन्तःस्थितमिच्छावशाद्बहिः ।
योगीव निरुपादानमर्थजातं प्रकाशयेत् ॥

इह तावत्स्वप्नस्मरणमनोराज्यसंकल्पादिषु नीलाद्याभासवैचित्र्यं बाह्यसमर्पकहेतुव्यतिरेकेणैव निर्भासत इति यद्यप्यस्ति सम्भवः, तथापि तदाभासवैचित्र्यमस्थैर्यात्सर्वप्रमातृसाधारण्यात्पूर्वानुभवसंस्कारजत्वसम्भावनादवस्त्विति शङ्क्येत । यत्पुनरिदं योगिनामिच्छामात्रेण पुरसेनादिवैचित्र्यनिर्माणं दृष्टं, तत्रोपादानं प्रसिद्धमृत्काष्ठशुक्रशोणितादिवैचित्र्यमयं न सम्भवत्येव, "नह्येवं वक्तुं शक्यं सर्वगताः परमाणवो योगीच्छया झटिति संघटिताः कार्यमारप्स्यन्त इति,, यत एतल्लोकप्रसिद्धकारणभावानतिक्रमसिद्धये निरूप्यते, न चैतत्प्रसिद्धं परमाणुभ्य एव स्थूलं घटादि जायत इति, किं तु कपालादिव्यवधानेन, तत्रापि नियतसहकारिसमवलम्बनं करचरणादिव्यापारो विशिष्टदेशकालधर्माधिपत्ययोगः शिक्षाभ्यासप्रकर्ष

Digitized by Google

इतीयति चाश्रीयमाणे योगी कुम्भं निर्मिमाणः कुम्भकारप्रसिद्धसमस्तसामग्रीसमर्जनपुरःसरं घटं घटयन् कुम्भकार एव स्यात् । तस्मात्प्रसिद्धकारणोल्लङ्घने किमसंचेत्यमानपरमाणवाद्युपादानकारणान्तरचिन्तयेति तत्र योगिसंविद एव सा तादृशी शक्तिर्यदाभासवैचित्र्यरूपमर्थजातं प्रकाशयतीति । तदस्ति संभवो यत्संविदेवाभ्युपगतस्वातन्त्र्याप्रतीघातलक्षणादिच्छाविशेषवशात्संविदो ऽनधिकात्मतया अनपायादन्तःस्थितमेव सद्भावजातमिदमित्येवं प्राणबुद्धिदेहादिवितीर्णकियन्मात्रसंविद्रूपाद्बाह्यत्वेनाभासयतीति । तदिह विश्वरूपाभासवैचित्र्ये चिदात्मन एव स्वातन्त्र्यं किं नाभ्युपगम्यते स्वसंवेदनसिद्धं, किमिति हेत्वन्तरपर्येषणाप्रयासेन खिद्यते । एवकारेणेदमाह, सर्वथा तावद्वादिना विषयव्यवस्थापनं संविद्रूपमनपह्नवनीयम् । आदिसिद्धं हि तदित्युक्तं, तस्य च स्वातन्त्र्यमेव देवशब्दनिर्दिष्टं चिद्रूपत्वमिति किमपरकारणान्वेषणव्यसनितया, हि यस्मादेवं प्रकाशयति देव इति संभाव्यते, तस्मात्किं बाह्येनानुपपत्तिनेति पूर्वेण सम्बन्धः ॥

नन्वेवमुभयथापि संभावनानुमानमुन्मिषति तत्र किं मुकुरप्रतिबिम्बितघटादिदृष्टान्तेन ज्ञानप्रतिबिम्बिताभासवैचित्र्ये विज्ञानदर्पणातिरिक्तं तत एव बाह्याभिमतं हेतुं कल्पयेम, किं वा योगिदृष्टान्तेन संवित्स्वातन्त्र्यमेव हेतुभावेन ब्रूयाम, तदिदं सांशयिकं वर्तत इत्याशङ्क्य बाह्यार्थानुमानसम्भावनां सूत्रद्वयेनापाकर्तुमाह ।

(७) अनुमानमनाभातपूर्वे नैवेष्टमिन्द्रियम् ।
आभातमेव बीजादेराभासाद्धेतुवस्तुनः ॥
आभासः पुनराभासाद्बाह्यस्यासीत्कथं च न ।
अर्थस्य नैव तेनास्य सिद्धिर्नाप्यनुमानतः ॥

न केवलमनन्तरश्लोकनिर्दिष्टाभिर्युक्तिभिः प्रत्यक्षेण बाह्यो ऽर्थो नाभासते, इयदेव हि प्रत्यक्षं यन्नीलं भातीति स्वप्रकाशसंविन्मात्रं नाधिकं किं चिदिति, यावदनुमानेनापि नास्य बाह्यस्य सिद्धिरित्यपिशब्दः, । तत्रानुमानमत्र नैव प्रवर्तितुमुत्सहेत, प्रवृत्तमपि न प्रकृतसिद्धिमादध्यादित्यनेन दर्श्यते । तत्रानुमानं विकल्पः, सर्वश्चायं विकल्पो ऽनुभवमूल इति प्रसिद्धं, तेन यत्सर्वथा नाभातपूर्वमननुभूतचरं तत्रानुमानमनुमितिव्यापारो विकल्पात्मा नैव केन चिद्वादिनेष्यते । "ननु प्रत्यक्षतो भवतु दृष्टे ऽनुमाने संकथेयं, सामान्यतो दृष्टे तु किं वक्ष्यसि * यथार्थोपलब्ध्या इन्द्रियानुमाने,, । उच्यते, तत्रापि विकल्पेन यथा सो ऽर्थः स्पृश्यते तथानुमेय इति स्थितिः, विकल्पश्च नेन्द्रियादिकमर्थं केन चित्सन्निवेशविशेषादिना विशेषात्मना स्पृशति, अपि तु † किं चिदुपलब्धेः कारणमित्यमुना स्वभावेन, स च स्वभावः कारणतालक्षणः प्रत्यक्षगृहीत एव, तथा च बीजादङ्कुरस्तन्तुभ्यः पट इत्यादौ कार्यकारणभावः प्रत्यक्षानुपलम्भबलेन तावन्निश्चेयः, तत्र च प्रत्यक्षं प्रत्याभासं प्रामाण्यं भजते, विमर्शलक्षणस्य प्रमितिव्यापारस्य एकैकशब्दवाच्ये ऽर्थे विश्रान्तेस्तदनुसारित्वाच्च प्रमाणस्येति वक्ष्यते ।

एकाभिधानविषये मितिर्वस्तुन्यबाधिता ।

इति । आभासमात्रं च सामान्यमिति निर्णेष्यते । अनुपलम्भो ऽप्यन्योपलम्भरूप आभासमात्रविश्रान्त एवेति कारणाभासो विशेषशून्यः परिगृहीत एव बीजादङ्कुर इति प्रतीतौ, यद् यस्य ‡ नियममनुविधत्ते व्यतिरिक्तं तत्तस्य कार्यमिति प्रतिघटं मृत्तिकादिरूपस्य हेतुतद्धर्मात्रस्याभासात् । आभासाद्बाह्यः पुनरनाभासरूपः स चाभासत इति विप्रतिषिद्धम् । अनाभाते च नास्ति विकल्परूपस्यानुमानस्य व्यापारः ग्रामगृहादेस्तु यद्बाह्यं तदग्रामादिरूपं नोच्यते प्रत्येकं घाटानूपकुड्यतुलादेर्बाह्यत्वप्रसङ्गा,दपि तु तत्संनिकृष्टम् । तस्माद्ग्रामबाह्यमाभासबाह्यमिति च शब्दसाम्यमात्रमेतन्न वस्तुसाम्यम् । "एवं ये विकल्पे वस्तु नाभातीति मन्यन्ते,, तेषामपि तावदनुमानविकल्पो न बाह्ये उपपन्नः, अस्माभिस्तूपपादितमध्यवसायस्याप्याभासमानविषयत्वं "भ्रान्तित्वे चावसायस्ये,,ति सूत्रे । तेनानुमानविकल्पात्मनापि प्रकाशेन यद्यनाविष्टो नीलादिरर्थः, तन्नानुमित एव स्यात्, अथाविष्ट एव, तर्हि प्रागिवाप्रकाश इति न्यायेन प्रकाशमात्रस्वभाव एव न बाह्यः, । तेन बाह्ये साध्ये यल्लिङ्गं चित्प्रमाणमानीयते तद्बाह्यतामेव प्रत्युत प्रसाधयतीति विरुद्धमेव, अत एवाह कथं च नेति, केनापि

* असम्भवदन्वयदृष्टान्तानुमानभिन्नमनुमानं द्विविधम् । पूर्ववत् सामान्यतो दृष्टं च । तत्र यदीयसाध्यतावच्छेदकरूपाक्रान्तं प्रत्यक्षेण प्रमितं तत् प्रथमम् । यस्य च न प्रमितं तद् द्वितीयम् । तत्र पूर्ववत उदाहरणं द्रव्यत्ववान् घटत्वादिति । गृहीतं च प्रत्यक्षेण पक्षेतरघटे पटादौ च द्रव्यत्वमिति । द्वितीयस्य च क्रियात्वसकरणकत्वयोर्व्याप्यव्यापकभावावगमपूर्वकं ज्ञानादिक्रियायामिन्द्रियकरणकत्वस्यानुमानम् । तत्र च साध्यतावच्छेदकतावच्छेदकेन्द्रियत्वेन रूपेणेन्द्रियस्य प्रत्यक्षेणाग्रहणात् । ननु क्रियात्वेन्द्रियकरणकत्वयोर्न गृहीतो व्याप्यव्यापकभाव इति नेन्द्रियत्वे साध्यतावच्छेदकतावच्छेदकत्वस्य संभवः । यत्र तु करणत्वे व्यापकतावच्छेदकतावच्छेदकत्वं गृहीतं तदाक्रान्तश्च दृष्टः कुठारादिरिति क्व सामान्यतो दृष्टस्यानुमानस्यावकाश इति चेत् । उच्यते । सामान्यधर्मपुरस्कारेण व्याप्तिग्रहेणैवेन्द्रियेतरकुठारादौ ज्ञानादिक्रियाकरणत्वस्य बाधग्रहेण सहकारिविशेषेण व्यापकतावच्छेदकतावच्छेदकव्याप्येन्द्रियत्वपुरस्कारेणैव करणस्यानुमितिविषयत्वस्योपगमादिति ।

† यद्दर्शितसहकारिविशेषेण करणत्वेन रूपेणेन्द्रियमेवानुमितिविषयो भवतीत्यभिप्रेति समाधाता ।

‡ "नियमम्,, नियतपूर्ववृत्तिताम् । ततश्च यस्य यदन्वयव्यतिरेकानुविधायीति पर्यवसितम् ।

Digitized by Google

प्रकारेण प्रत्यक्षात्मना ऽनुमानात्मना वा आभासनमाभासबाह्यस्यानाभासस्य न कदा चिदभूदिति, तस्मात्सिद्धं चिदात्मैव हि देव इति ॥

नन्वन्तः स्थितं बहिः प्रकाशयेदित्युक्तं तदन्तः स्थितत्वमुपपादनीयमित्याशङ्क्याह ।

(८) स्वामिनश्चात्मसंस्थस्य भावजातस्य भासनम् ।
अस्त्येव न विना तस्मादिच्छामर्शः प्रवर्तते ॥

बहीरूपतयाप्याभासने अन्तारूपता न त्रुट्यति, प्रमात्रैकात्म्यमान्तर्यमिति हि वक्ष्यते, तच्च सदैव, प्रकाशस्य प्रमातृत्वा,त्तदात्मतया च विना प्रकाशमानस्यावस्तुत्वात् । किं तु तत्राहमित्युचितपरामर्शो यो ऽयमिदन्तापरामर्शः सैव बाह्यता, तैश्चेहान्तः स्थितत्वमहमित्येतावता चित्समुचितेनैव वपुषा परामर्शनम् । ततश्चेह नीलादीनामस्त्येव, न तु नास्तीति, यदि हि न स्यात्, कुम्भकृतो घटं करवाणीति य उत्तरक्रियापेक्षया इच्छाशब्दवाच्यः परामर्शः एषणीयात्मना स परामृश्येनानियन्त्रितश्चेत्ततः पटेच्छापि सा न कस्मादिति संकीर्येरन्व्यवहाराः, अथ तत्रापि चैषणीयस्तदानीमेव निर्मितः संस्तथा जातः, तर्हि तन्निर्माणं चिदात्मनि विनेच्छया नोपपन्नमिति "तिष्ठासोरेवमिच्छैव हेतुते,,त्यत्र वर्णयिष्यते । ततश्चेच्छान्तरमपि विषयनियन्त्रितं न वेति विकल्पे ऽनवस्था,विषयनियन्त्रितं चेत् स्वादात्मतैव जाता, न चेद्घटे पटेच्छा स्यात्, अथ तत्रापि तदानीमेवेति कृत्वा ऽनवस्था । तस्मात्सर्वो ऽयं भावराशिश्चिदात्मन्यहमित्येव वपुषा सततावभास्वररूपः, ऐश्वर्यरूपाच्च स्वातन्त्र्यलक्षणात्स्वामिभावाद्विचित्रेण वपुषा क्रमादिना संविदेनं बहिष्करोति प्रमातृभेदप्रथनपूर्वकं, तत्रापि क चिदाभासे प्रमातॄनेकीकरोति नितम्बिनीनृत्त इव प्रेक्षकान्, तावति हि तेषामाभासे ऐक्यम् । शरीरप्राणबुद्धिसुखाद्याभासांशेषु तु भेदस्याविगलनान्न सर्वथैक्यम् । अत एव प्रतिक्षणं प्रमातृसंयोजनावियोजनावैचित्र्येण परमेश्वरो विश्वं सृष्टिसंहारादिना प्रपञ्चयति । तदुक्तमाचार्येण ।

सदा सृष्टिविनोदाय सदा स्थितिसुखासिने ।
सदा त्रिभुवनाहारतृप्ताय भवते नमः ॥

इत्यादि । भट्टनारायणेनापि ।

मुहुर्मुहुरविश्रान्तस्त्रैलोक्यं कल्पनाशतैः ।
कल्पयन्नपि को ऽप्येको निर्विकल्पो जयत्यजः ॥

इति । तस्मात्स्थितमन्तः स्थितं भावजातं तेन विना तद्विषयस्य परामर्शस्यायोगादिति ॥

ननु परामर्शो नाम विकल्पः स चाविकल्पशुद्धसंविद्वपुषि भगवति कथं स्यादित्याशङ्क्याह ।

(९) स्वभावमवभासस्य विमर्शं विदुरन्यथा ।
प्रकाशो ऽर्थोपरक्तो ऽपि स्फटिकादिजडोपमः ॥

इहावभासस्य प्रकाशस्यानवभासस्य चाप्रकाशस्य घटादेः परस्परपरिहारेण द्वयोः स्वात्मनि चेद्व्यवस्थानं, तद्घटपटयोरिवेदमजडमिदंजडमिति दुरुपपादं वैलक्षण्यम्, । अथावभासो यतोऽर्थस्य सम्बन्धी ततो न जडः, तर्हि सम्बन्धमात्रेण मृदपि घटस्येत्यजडा स्यात् । अथ न स्वसम्बन्धमात्रमपि त्ववभासोऽर्थस्य प्रकाशः, तर्हि अर्थात्मना स प्रकाश इति समापतितम्,न चान्यात्मना ऽन्यस्य प्रकाश उपपन्नः । अथान्यस्वभावोपि घटो ऽवभासस्य कारणं, तर्ह्यवभासोपि घटस्य कारणमिति घटोप्यजडः स्यात् । अथान्येनापि सता घटेन यतो ऽवभासस्य प्रतिबिम्बरूपा छाया दत्ता तामसाववभासो बिभ्रद्घटस्येत्युच्यते ततश्चाजड, स्तर्हि स्फटिकसलिलमकुरादिरपि एवंभूत एवेत्यजड एव स्यात् । अथ तथाभूतमप्यात्मानं तं च घटादिकं स्फटिकादिर्न परामष्टुं समर्थ इति जडः, तथा परामर्शनमेव अजाड्यजीवितमन्तर्बहिष्करणस्वातन्त्र्यस्वरूपं स्वाभाविकमवभासस्य स्वात्मविश्रान्तिलक्षणमनन्यमुखप्रेक्षित्वं नाम "अहमेवं प्रकाशात्मा प्रकाशे,, इति हि विमर्शोदये स्वसंविदेव प्रमातृप्रमेयप्रमाणादिचरितार्थमभिमन्यते, नत्वतिरिक्तं काङ्क्षति । स्फटिकादि हि गृहीतप्रतिबिम्बमपि तथाभावेन सिद्धौ प्रमात्रन्तरमपेक्षते इति निर्विमर्शत्वाज्जडं,सर्वं तु वस्तुतो विमर्शात्मकप्रमातृस्वभावतादात्म्याहंपरामर्शविश्रान्तेरजडमेव पूर्वापरकोट्योः । यदुक्तम् ।

इदमित्यस्य विच्छिन्नविमर्शस्य कृतार्थता ।
या स्वस्वरूपे विश्रान्तिर्विमर्शः सोहमित्ययम् ॥

इति । मध्यावस्थैव त्विदन्ता ऽविमृश्यमानपूर्वापरकोटिः विमूढानां मायापदं संसार इति विमर्श एव प्रधानं भगवत इति स्थितम् ॥

न केवलं संवित्तत्त्वस्यास्माभिरेव विमर्शप्राधान्यमुक्तं यावदागमान्तरैरपि इति दर्शयति ।

(१०) आत्मा ऽत एव चैतन्यं चित्क्रियाचितिकर्तृता-
तात्पर्येणोदितस्तेन जडात्स हि विलक्षणः ॥

यतो विमर्श एव प्रधानमात्मनो रूपममुमेव हेतुं प्रयोजनरूपमुद्दिश्य आत्मा धर्मिस्वभावो द्रव्यभूतोपि चैतन्यमिति धर्मवाचिना शब्देन सामानाधिकरण्यमाश्रित्योदितः कथितः, भगवता शिवसूत्रेषु चैतन्यमात्मेतिपठितम्, चैतन्यमिति हि धर्मवाचकोपलक्षणम्, "चितिशक्तिरपरिणामिनी,, "तद्दृशः कैवल्यं,, "द्रष्टा दृशिमात्र,, इत्यादावपि हि धर्मशब्देन सामा-

नाधिकरणमात्मनो दर्शितं * गुरुणाऽनन्तेन, द्रव्यं हि तदुच्यते यद्विश्रान्तः पदार्थवर्गः सर्वो भाति चार्थ्यते चार्थक्रियायै, तद्यदि न कुप्यते तत्सकलोऽयं तत्त्वभूतभावभुवनसंसारः संविदि विश्रान्तस्तथा भवतीति स एव गुणकर्मादिधर्माश्रयभूतपदार्थान्तरस्वभावस्तामेव मुख्यद्रव्यरूपामाश्रयत इति सैव द्रव्यम्। तदनन्तधर्मराशिविश्रमभित्तिभूतायास्तस्याः स एव धर्मश्चैतन्यमिति कर्तृकृदन्ताद्वुत्पन्नेन भावप्रत्ययेन सम्बन्धाभिधायिनापि प्राधान्येन दर्शितः। तथाहि सम्बन्धस्य सम्बन्धिविश्रान्तस्य प्रतीतेः द्रव्यरूपस्य च सम्बन्धिनः प्रकृत्योक्तत्वाच्चितिक्रियारूपं धर्मसम्बन्धिनमवगमयता ष्यञा निष्कृष्ट एवांशः प्रत्यायितो भवति, चिति क्रिया च चितौ कर्तृता स्वातन्त्र्यं संयोजनवियोजनानुसंधानादिरूपमात्ममात्ररूपतायामेव जडवदविश्रान्तत्वमपरिच्छिन्नप्रकाशसारत्वमनन्यमुखप्रेक्षित्वमिति, तदेवानात्मरूपाज्जडात्संयोजनवियोजनादिस्वातन्त्र्यविकलाद्वैलक्षण्यदायीति तदेव परत्वेन प्रधानतया ऽभिसंधायात्मा चेतन इति वक्तव्ये धर्मान्तराधरीकरणाय विमर्शधर्मोद्धुरीकरणाय चात्मा चैतन्यमित्युक्तम्। चित्क्रियाचितिकर्तृतातात्पर्येणेति समासः अर्धयुक्पादविश्रान्तिरिति हि काव्ये समयो न शास्त्रे, यदि वा चित्क्रियात्मोदितः चितिकर्तृता चेति पृथगेव, एवं तु न क्वचित्पठितम्॥

ननु यथा प्रकाशो ऽप्रकाशश्चेत्युभयमपि स्वात्मनि ततश्च प्रकाश इत्युक्ते जडाद्वैलक्षण्यमुदितं स्यात् तद्वद्विमर्शोऽप्यविमर्शोऽपि च स्वात्मनीति तेनापि कथं वैलक्षण्यं जडाजडयोरित्याशङ्क्याह।

(११) चितिः प्रत्यवमर्शात्मा परा वाक्स्वरसोदिता।
स्वातन्त्र्यमेतन्मुख्यं तदैश्वर्यं परमात्मनः॥

चेतयतीत्यत्र या चितिश्चितिक्रिया तस्याः प्रत्यवमर्शः स्वात्मचमत्कारलक्षण आत्मा स्वभावः। तथाहि, घटेन स्वात्मनि न चमत्क्रियते स्वात्मा न परामृश्यते, न स्वात्मनि तेन प्रकाश्यते, नापरिच्छिन्नतया भास्यते, ततो न तेन चेत्यत इत्युच्यते। चैत्रेण तु स्वात्मन्यहमिति संरम्भोद्योगोल्लासविभूतियोगाच्चमत्क्रियते, स्वात्मा परामृश्यते, स्वात्मन्येव प्रकाश्यते, इदमिति यः परिच्छेद एतावद्रूपतया तद्विलक्षणीभावेन नीलपीतसुखदुःखतच्छून्यताद्यसंख्यावभासयोगेनावभास्यते, ततश्चैत्रेण चेत्यत इत्युच्यते। एवं च विमर्शः स्वात्मन्यविमर्शोऽपि स्वात्मनीत्यसिद्धमेतत्। विमर्शो हि सर्वसहः परमप्यात्मीकरोति आत्मानं च परीकरोति, उभयमेकीकुरुते, एकीकृतं द्वयमपि न्यग्भावयतीत्येवंस्वभावः, प्रत्यवमर्शश्चान्तरभिलापात्मकशब्दनस्वभावः, तच्च शब्दनं संकेतनिरपेक्षमेवाविच्छिन्नचमत्कारात्मकमन्तर्मुखशिरोनिर्देशप्रख्यमकारादिमायीयसांकेतिकशब्दजीवितभूतं नीलमिदं चैत्रोऽहमित्यादिप्रत्यवमर्शान्तरभित्तिभूतत्वात्पूर्णत्वात् † परा, वक्ति विश्वमभिलपति प्रत्यवमर्शनेनेति च वाक्, अत एव सा स्वरसेन चिद्रूपतया स्वात्मविश्रान्तिवपुषोदिता सततमनस्तमिता नित्या, अहमित्येव, एतदेव च परमात्मनो मुख्यं स्वातन्त्र्यमैश्वर्यमीशितृत्वमनन्यापेक्षित्वमुच्यते परापरं त्विदंभावरूपस्य प्रत्यवमर्शस्याख्यातिप्राणस्योद्बोधमात्रेऽपि अहंभाव एव विश्रान्तेः श्रीसदाशिवादिभूमौ पश्यन्तीदशायाम् अपरं त्विदंभावस्यैव निरूढौ मायागर्भाधिकृतानामेव विष्णुविरिञ्चेन्द्रादीनां तच्चैषां परमेश्वरप्रसादजमेवेति अन्यनिरपेक्षतैव परमार्थत आनन्द ऐश्वर्यं स्वातन्त्र्यं चैतन्यं च। तस्माद्युक्तमुक्तं तेन "जडात्स हि विलक्षण„इति॥

प्रधानागमेष्वप्येतत्प्रदर्शितमेवेति निरूपयति।

(१२) सा स्फुरत्ता महासत्ता देशकालाविशेषिणी।
सैषा सारतया प्रोक्ता हृदयं परमेष्ठिनः॥

इह घटः कस्मादस्ति खपुष्पं च कस्मान्नास्तीत्युक्ते वक्तारो भवन्ति, घटो हि स्फुरति मम न त्वितरदिति, तदेतद्घटत्वमेव यदि स्फुरत्त्वं ‡ स्फुरणसम्बन्धस्तत्सर्वस्य स्फुरेच्च कस्यचिद्वा, तस्मान्मम स्फुरतीति कोऽर्थः मदीयं स्फुरणं स्पन्दनमाविष्ट इति, स्पन्दनं च किंचिच्चलनम् एषैव च किंचिद्रूपता, यदचलमपि चलमाभासत इति, प्रकाशस्वरूपं हि § मनागपि नातिरिच्यते अतिरिच्यत इवेत्यचलमेवाभासभेदयुक्तमिव च भातीति। तत उक्तम्।

आत्मैव सर्वभावेषु स्फुरन्निर्वृतचिद्विभुः।
अनिरुद्धेच्छाप्रसरः प्रसरद्दृक्क्रियः शिवः॥

इति।

अतिक्रुद्धः प्रहृष्टो वा किं करोमीति वा मृशन्।
धावन्वा यत्पदं गच्छेत्तत्र स्पन्दः प्रतिष्ठितः॥

इति।

स्पन्दतत्त्वविविक्तये

इति।

गुणादिस्पन्दनिःष्यन्दः

---

* योगसूत्रकारेण भगवत्पतञ्जलिना। बादरायणेन तद्भाष्यकारेण च।

* चमुश्रदने। चमतो भुञ्जानस्य करणं व्यापार आत्मीयताप्रत्यवमर्शलक्षणः संरम्भोऽस्य नीलादेरहं भोक्तेति चमत्कारः।

† पृपालनपूरणयोः।

‡ कृत्तद्धितसमासेभ्यः संबन्धाभिधानं भावप्रत्ययेनेत्यनुशासनात्।

§ ईषत्।

Digitized by Google

इति च। लोकेऽपि विविधवैचित्र्ययोगेऽपि स्वरूपादचलज्जनो गम्भीरः स्पन्दवानित्युच्यते। सत्ता च भवनकर्तृता, सर्वक्रियासु स्वातन्त्र्यं, सा च खपुष्पादिकमपि व्याप्नोतीति महती, देशकालौ नीलादिवत्सैव सृजतीति ताभ्यां विशेषणीया न भवति। यत्किल येन तुल्यकक्ष्यतया भाति तत्तस्य विशेषणं * कटकइव चैत्रस्य, न च देशकालौ विमर्शेन तुल्यकक्ष्यौ भातः, तयोरिदंतया तस्य चाहंतया प्रकाशे तुल्यकक्ष्यत्वानुपपत्तेः। एवं देशकालास्पर्शाद्विभुत्वं नित्यत्वं च, सकलदेशकालस्पर्शोऽपि तन्निर्माणयोगादिति ततोऽपि व्यापकत्वनित्यत्वे। तदुक्तम्।

महासत्ता महादेवी विश्वजीवनमुच्यते।

इति। सारमिति यदतुच्छं रूपं तदियमेव विमर्शशक्तिः। ग्राह्यग्राहकानां हि यत्प्रकाशात्मकं रूपं तस्याप्यप्रकाशवैलक्षण्यापेक्षिका इयमेवेति श्रीसारशास्त्रेऽपि निरूपितम्।

यत्सारमस्य जगतः सा शक्तिर्मालिनी परा।

इति। सैवेति शक्तिप्रत्यभिज्ञानं दर्शितम्। हृदयं च नाम प्रतिष्ठास्थानमुच्यते,तच्चोक्तनीत्या जडानां चेतनं, तस्यापि प्रकाशात्मत्वं, तस्यापि विमर्शशक्ति,रिति विश्वस्य परमे पदे तिष्ठतोविश्रान्तस्येदमेव हृदयं विमर्शरूपं परमन्त्रात्मकं तत्र तत्राभिधीयते, सर्वस्य हि मन्त्र एव हृदयं, मन्त्रश्च विमर्शनात्मा, विमर्शनं च परवाक्छक्तिमयम्। तत एवोक्तम्।

न तैर्विना भवेच्छब्दो नार्थो नापि चितेर्गतिः।

इति।

तत्र तावत्समापन्ना मातृभावम्

इत्यादि चेत्यागमेषु। तथा तत्र भवद्भर्तृहरिणापि।

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन गम्यते॥
वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी॥

इति।

सैषा संसारिणां संज्ञा बहिरन्तश्च वर्तते।
यदुत्क्रान्तौ विसंज्ञोऽयं दृश्यते काष्ठकुड्यवत्॥

इत्यादि च। तदेते न विदुरित्येतन्निर्वाहितम्। बौद्धैरप्यध्यवसायापेक्षं प्रकाशस्य प्रामाण्यं वदद्भिरुपगतप्राय एवायमर्थोऽभिलापात्मकत्वादध्यवसायस्येति॥

नन्वसंख्यशक्तिश्रेणीशोभितवपुषि परमशिवे विमर्शशक्तिरेवेयमित्यंकारमभिषिच्यते कस्मादित्याशङ्क्याह।

(१३) आत्मानमत एवायं ज्ञेयीकुर्यात्पृथक्स्थितिः।
ज्ञेयं न तु तदौन्मुख्यात्खण्ड्येतास्य स्वतन्त्रता॥

स्वातन्त्र्यामुक्तमात्मानं स्वातन्त्र्यादद्वयात्मनः।
प्रभुरीशादिसंकल्पैर्निर्माय व्यवहारयेत्॥

सर्वाः शक्तीः कर्तृत्वशक्तिरैश्वर्यात्मा समाक्षिपति, सा च विमर्शरूपेति युक्तमस्या एव प्राधान्यमिति तात्पर्येणोत्तरमुक्तम्। शब्दार्थस्तु अयं प्रकाशात्मा परमेश्वरः स्वात्मानं ज्ञात्रेकरूपत्वादज्ञेयमपि ज्ञेयीकरोतीति यत्सम्भाव्यते कारणान्तरस्यानुपपत्तेर्दर्शितत्वाद्दृढेन संभावनानुमानेन तदत एव विमर्शशक्तिलक्षणात्कर्तृत्वाद्धेतोर्भवति, यतो ह्ययमात्मानं परामृशति ततो विश्वनिर्भरत्वात्तथा नीलादित्वेन चकास्ति। "नन्वेवैव कुतः संभावना आत्मानं ज्ञेयीकरोतीत्याह,,पृथक् प्रकाशाद्बहिर्भूता स्थितिर्यस्य तादृग्ज्ञेयं नैव भवति। तुरवधारणे, तत्र चोक्ता युक्तयः अभ्युच्चययुक्तिमप्याह। यदि व्यतिरिक्तं ज्ञेयं स्यात्, तज्ज्ञातृरूपस्यात्मनो यदेतज्ज्ञेयविषयमौन्मुख्यं स्वसंवेदनसिद्धं दृश्यते तच्चास्य स्यात्, तेन व्यतिरिक्तविषयौन्मुख्येनान्याधीनत्वं नाम पारतन्त्र्यमस्यानीयते, पारतन्त्र्यं च स्वातन्त्र्यस्य विरुद्धं, स्वातन्त्र्यमेव चानन्यमुखप्रेक्षित्वलक्षणमात्मनः स्वरूपमिति व्यतिरिक्तोन्मुख आत्मा ऽनात्मैव स्यात्, अनात्मा च जडो ज्ञेयं प्रति नोन्मुखीभवति इति प्रसङ्गः, ततः प्रसङ्गविपर्ययादिदमायातम्, अव्यतिरिक्तोन्मुखः स्वतन्त्रः सन्नात्मानमेव ज्ञेयीकरोति, न च केवलं नीलादिरूपमेव ज्ञेयं यावदत्यक्तकर्तृभावं स्वातन्त्र्येणापरित्यक्तमेव सन्तमात्मानं निर्माय व्यवहारेण ध्यानोपासनार्चनोपदेशादिना योजयतीति यत्सम्भाव्यते तदप्यत एवेति सम्बन्धः। "ननु स्वातन्त्र्ययुक्तं च निर्मीयते चेति विरुद्धमिदं,, तत्राहाद्वयात्मनः संविदेकरूपस्य स्वातन्त्र्याद्धेतोरिदं न युज्यते, यत्किल मायापदे ऽतिदुर्घटं प्रतिभाति तत्संपादने यदप्रतिहतं स्वातन्त्र्यं, तदेव पुनः स्वातन्त्र्यशब्देन दर्शितम्, अत एवेत्यनेन तु विमर्शशक्तिरूपमित्यपुनरुक्तम्। अथ वा ऽत एव स्वातन्त्र्यादिति सामानाधिकरण्येन श्लोकद्वयेन सम्बन्धनीयम्। उदाहरणमत्रार्थे दर्शयति, नीलादिनिर्माणवदस्य स्वतन्त्ररूपनिर्माणस्याप्रसिद्धत्वात्, ईश्वरो भगवानात्मा नित्यो विभुः स्वतन्त्र इत्येवमादौ हि प्रमातुः पूजयितुर्ध्यातुर्वा पृथग्भूतं तत्प्रमेयं ध्येयं पूज्यं च भातीति तत्तावच्चिर्मितम् न चानीश्वररूपम्। एवं हीश्वर इत्यनीश्वर इति संकल्पध्यानादेस्तुल्यत्वं स्यात् न चैवं, फलभेदस्योपलब्धेरिति। तस्मात्स्वातन्त्र्यशून्यताभासनेन स्वातन्त्र्ययुक्तताभासनेन च यदिदमुभयं ज्ञेयमात्मरूपमेव परमेश्वरो भासयति तद्विमर्शशक्तिबलादेवेति सैव प्रधानमिति॥

"ननु प्रकाशबलाद्भावव्यवस्था, स च प्रकाशो विमर्शसार इति। तद्विमर्शाभेदे तदेव तदिति वक्तुं युक्तम्, ईश्वर आत्मेत्या-

* कटकवांश्चैत्रइत्यत्र।

दिसंकल्पेषु च निर्मितस्येदंतया परामर्शः । स्वातन्त्र्यं त्वहंपरामर्शरूपमिति निर्मितस्य तद्रूपत्वाभावे कथं स्वातन्त्र्यामुक्तत्वमिति,, तत्परिहर्तुमाह ॥

(१४) नाहंतादिपरामर्शभेदादस्यान्यतात्मनः ।
अहंमृश्यतयैवास्य सृष्टेस्तिङ्वाच्यकर्मवत् ॥

स्वरूपे भावप्रत्ययः, आदिग्रहणादात्मेश्वरादिपरामर्शः, तिङ्ग्रहणं प्रत्ययोपलक्षणम्, । कर्मग्रहणं क्रियावाचिसदसत्त्वभूतशक्तिरूपोपलक्षणम् । तदयमर्थः । अहमित्येवं रूपो यः परामर्शो यश्चेश्वरः प्रमातात्मा शिव इत्यादिरनन्तप्रकारः परामर्शस्तस्य यद्यपि भेदो ऽन्यान्यरूपता, तथापि तद्भेदाद्धेतोरस्यात्मनो निर्मातृरूपस्याहंपरामर्शमयस्य निर्मेयरूपस्य चेश्वरादिपरामर्शास्पदस्य यो भेदः शङ्कितः, स न युक्तः, यत ईश्वर इत्यपि यः परामर्शः स ईशनशीले ज्ञातृत्वकर्तृत्वतत्त्वे विश्राम्यति, ज्ञातृत्वादि च ज्ञानादौ स्वातन्त्र्यमनन्यप्रेक्षित्वमविच्छिन्नज्ञानादिशक्तियोगः । अविच्छेदश्च जानामि करोमीत्यस्मदर्थविश्रान्त इति । अस्येश्वरस्यात्मनः सृष्टेः सृज्यमानस्याहंविमर्शनीयत्वमेव । सृष्टेरिति वा हेतौ पञ्चमी, अस्येश्वरस्य यत ईश्वरादिसंकल्पेष्वप्यहंपरामर्शनयोग्यस्यैव सृष्टिः । अर्हे कृत्यः, यथा क्रियाकारकसमुच्चयविकल्पादिशक्तयो यथास्वं तिङ्तृतीयादिचादिप्रयोगावसेयपरामर्शपरमार्थाः पाकः कर्ता समुच्चयो विकल्प इत्यादिशब्दैरभिधीयमानाः सत्त्वभावमासादिता अपि पचति, चैत्रेण च वेत्येवं भूते मूलपरामर्शे विश्राम्यन्ति, अन्यथा ताः प्रतीता नैव भवेयुः, तद्वदत्रापि, एतदुक्तं भवति, परामर्शो नाम विश्रान्तिस्थानं, तच्च पार्यन्तिकमेव पारमार्थिकं तच्चाहमित्येवं रूपमेव, मध्यविश्रान्तिपदं तु यद्वृक्षमूलस्थानीयं ग्रामगमने तदपेक्षया सृष्टत्वमुच्यते इति को विरोधः । अनेन नीलादेरपि इदं नीलमिति मध्यपरामर्शेपि मूलपरामर्शे अहमित्येव विश्रान्तेरात्ममयत्वमुपपादितमेव, नीलमिदं वेद्मीत्यहंप्रकाशे इति हीयत्तत्त्वं, यथोक्त* मिदमित्यस्येत्यादि । मूढस्तु नीलादिविमर्शादेवार्थक्रियादिपरितोषाभिमानीति नीलादेः स्वातन्त्र्यनिर्मुक्तत्वमुक्तम् । आत्मादौ तु तन्मूलपरामर्शविश्रान्तिमन्तरेण प्रतीतिपरिसमाप्तिमर्थक्रियां च मूढोपि नाभिमन्यत इति तस्य निर्मितावप्यनुज्झितस्वातन्त्र्यमुक्तम् ॥

नन्वेवं विश्वपरामर्शानामहमित्येव विशुद्धैकपरामर्शविश्रान्तिरेव तत्त्वं तत्कथमिदमुच्यते ज्ञानस्मृत्यादिका अस्य शक्तय इति ज्ञानस्य च निर्णयसंशयादिभेदाः नीलादीनां च वैचित्र्यमित्याशङ्कायां परिहारमाह ।

(१५) मायाशक्त्या विभोः सैव भिन्नसंवेद्यगोचरा ।
कथिता ज्ञानसंकल्पाध्यवसायादिनामभिः ॥

अनुपपन्नमवभासनं मायेत्युच्यते, ततश्च भिन्नं प्रकाशात्सर्वमवभासजातं माया, तत्र च चित्तत्त्वस्यैव स्वातन्त्र्यं, माया शक्तिः तया भिन्नं यत्संवेद्यं प्रमातुश्चान्योन्यतश्च मायाशक्त्या भिन्नेन प्रमातुरन्योन्यतो वेद्याश्च करणवर्गेण यत्संवेद्यं स एव गोचरो विश्रान्तिपदं यस्यास्तादृशी सती सैव प्रत्यवमर्शात्मा चितिः परवागूपा ज्ञानमिति संकल्प इत्यध्यवसाय इति चोच्यते । आदिग्रहणात्संशयः स्मृतिरित्यादि । तथाहि, यदिन्द्रियेण स्फुटग्राहिणा बाह्येन विषयेण स्फुटेन च नियन्त्रितं संवित्तत्त्वं तज्ज्ञानं मनसा विषयेण स्फुटेन संकल्पः, बुद्ध्या विषयेण च विषयत्वपर्यन्तभाजा ऽध्यवसायो निश्चयः, विषयस्य च यद्भिन्नत्वं बहिरन्तःकरणानां च तत्प्रकाशाभेदादनुपपन्नं चित्तत्त्वेनावभास्यत इति भेदे यतो विश्रान्तिर्न तु भेदस्याभेदे ईश्वरसदाशिवादिवत्ततो ज्ञानसंकल्पादयो भिन्नास्तस्याप्रध्वस्तस्वस्वभावाभेदस्य संवित्तत्त्वस्यानुसंधातुः शक्तय इत्युक्ताः, संशयादयश्च भिन्नाः नीलादिवैचित्र्यं चेति सर्वमखण्डितम् ॥

ननु प्रत्यवमर्शात्मत्वं चितिशक्तेः संकल्पस्मरणादिशक्तिषु सविकल्पात्मिकासु भवतु, या तु निर्विकल्परूपा साक्षात्कारलक्षणानुभवशक्तिस्तत्र कथं, प्रत्यवमर्शो हि अभिलापभेदयोजनामयः, अभिलापविशेषयोजना च संकेतस्मरणमपेक्षते, तच्च संस्कारप्रबोधं, सोपि तादृशदृशमित्येवं प्रथमसमये कथमभिलापयोग इति परस्य व्यामोहमपोहितुमाह ।

(१६) साक्षात्कारक्षणेप्यस्ति विमर्शः कथमन्यथा ।
धावनाद्युपपद्येत प्रतिसंधानवर्जितम् ॥

इह तावच्चैतन्यस्यात्मभूतोङ्गुलिनिर्देशादिप्रख्योभिलापयोगः, अन्यथा बालस्य प्रथमं व्यवहारे दृश्यमाने व्युत्पत्तिरेव न स्यात् । निर्विकल्पकविज्ञानपरम्परया हि तं शब्दं शृणोति तमर्थं पुरः पश्यति पुनस्तद्विविक्तं भूतलं पश्यतीति घटमानयेति व्यवहारात्कथमस्यायमर्थो हृदि परिस्फुरेत् । घट इति इदमानयेति इदं नयेतीदमिति योजनाप्राणो ह्ययमर्थः योजना च विकल्पव्यापारः अथ बालस्य प्राग्जन्मानुभूतसंकेतस्मृतेरेवं, तथापि संकेतकाले स शब्दो विषयत्वेनेदम्भावेनाप्रत्यवमृश्यमानत्वाद्भेदात्मच्युत्य निर्भासमानो विज्ञानशरीरविश्रान्तीकृतो वाचक इति भवति, तद्विज्ञानस्वरूपं चेद्भाति, तदभिलापमयमेवेति, यथा विषयस्य सुखरूपत्वाभावेपि ज्ञानं

* इदमित्यस्य विच्छिन्नविमर्शस्य कृतार्थता ।
या स्वस्वरूपे विश्रान्तिर्विमर्शः सोऽहमित्ययम् ॥

Digitized by Google

सुखात्मकं भाति, तथा मा भूदभिलापात्मा रूपादिर्विषयः, तथापि विज्ञानं तदात्मकमवभासिष्यते अत्र तु दर्शने विषयस्यापि विमर्शमयत्वादभिलापमयत्वमेव, । वस्तुतः स्तैमित्याव्यवस्थापि यदि न परामर्शमयी तर्ह्यस्यां विकल्पात्मकप्रमातृव्यापारानुल्लासात्सम्भव एव शपथपरमार्थः स्मरणं च न स्यात् । रूपविषयाध्यवसायी हि यदि विकल्प उदियात्किमन्यत्सर्वचिन्तासंहरणेन स्तैमित्यं नाम स्यादिति तत्राप्यस्त्यन्तः परामर्शः सकलेन च शब्दग्रामेण, शब्दनं हि सहन्ते वस्तूनि, तत्र च नियतशब्दयोजनं क्रियते, तथाहि, बालस्य पुरतः पिण्डे सहजो यः परामर्शोऽहमित्यविच्छेदेन इदमिति विच्छेदेन वा तत्पृष्ठे एव गौर इति गौरिति वा शब्द आरोप्यते सोऽप्यभ्यासात् प्रमातृमयो भवति, तत्पृष्ठे चान्यः शुक्ल इति बलीवर्द इति एवमन्यदिति संकेततत्त्वम् । तस्मादस्ति साक्षात्कारे प्रत्यवमर्शः । अपिशब्दस्यायमाशयः इह साक्षात्कारो वस्तुतः पश्यामीत्येवंभूतविकल्पनव्यापारपर्यन्त एव, विकल्पो हि प्रत्यक्षस्य व्यापार इति परोऽपि मन्यते । न च व्यापारस्तद्वतो भिन्नो युक्तः तत्स्वरूपभूतो हि सः, भवतु वा क्षणमात्रस्वभावात्मा साक्षात्कारः तत्राप्यस्ति विमर्शः, अवश्यं चैतत्, अन्यथेति यदि न स्यात्तदेकाभिसंधानेन जवाद्गच्छंस्त्वरितं च वर्णान्पठन्द्रुतं च पुस्तकं वाचयन्नाभिमतमेव गच्छेदुच्चारयेद्वाचयेद्वा । तथाहि, तस्मिन्देशे ज्ञान,माचिक्रमिषा, ऽऽक्रमण,माक्रान्तताज्ञानम्, प्रयोजनान्तरानुसंधानं, तित्यक्षा, देशान्तरानुसंधिः, तत्राप्याचिक्रमिषे,त्यादिना संयोजनवियोजनरूपेण परामर्शेन विना ऽभिमतदेशावाप्तिः कथं भवेत् । एवं त्वरितोद्ग्रहणवाचनादौ मन्तव्यम् । तत्र विशेषतः * स्थान † करणाक्रमणादियोगः । अत्र च यतः पश्चाद्भाविस्थूलविकल्पकल्पना न संवेद्यते, तत एव त्वरितत्वमिति सूक्ष्मेण प्रत्यवमर्शेन संवर्तितशब्दभावनामयेन भाव्यमेव, संवर्तिता हि शब्दभावना प्रसारणेन विवर्त्यमाना स्थूलो विकल्पः, यथा इदमित्यस्य प्रसारणा घटः शुक्ल इत्यादिस्तस्यापि पृथुबुध्नोदराकारः शुक्लत्वजातियुक्तगुणसमवायीत्यादिः । धावु गतिशुद्ध्योरिति पाठाद्भाविस्त्वरितगतौ स्वशक्तिवशाद्वर्तत इति ॥

भवत्वेवं सूक्ष्मो विमर्शः प्रकाशशरीरावेशी, यत्र तु स्थूलत्वेन विकल्परूपता स्फुटा तत्र शब्दो नीलादिवदेव पृथग्भासते नीलमिदमिति स कथं प्रकाशस्वरूपादपृथग्भूतः स्यात्, शब्दात्मा च विमर्शः, स चात्रमायात्मके भेदपदेऽपि प्रकाशापृथग्भूतो भवद्भिरिष्टस्तदेतत्कथं प्रति पत्तव्यमित्याशङ्क्याह ।

(१७) घटोऽयमित्यध्यवसा नामरूपातिरेकिणी ।
परेशशक्तिरात्मेव भासते न त्विदंतया ॥

केनैतदुक्तं घट इति यः स्थूलः शब्दः स प्रकाशजीवितस्वभावो विमर्श इति, सोऽपि हि स्थूलः शब्दोऽर्थवत्पृथग्भूत एव भाति, तौ नामरूपलक्षणौ शब्दार्थावेकरूपतया सोऽयमित्येवंरूपत्वेन परामृशन्ती अध्यवसायशक्तिर्या सा परमेश्वरशक्तिर्विमर्शरूपा आत्मवदेवाऽहमित्यविच्छिन्नत्वेन भाति, न तु कदाचिदिदंतया विच्छिन्नत्वेन भाति, विच्छिन्नत्वेनावभासे परप्रतिष्ठितत्वात्पुनर्विमर्शान्तरेण भाव्यम् । तत्राप्येवमित्यव्यवस्था, अतो नीलस्य प्रकाशनमेव न स्यात् प्रतिष्ठालाभाभावात् । तस्मात्सर्व एव विमर्शः प्रकाशादविच्छिन्न एवेति । अध्यवसेति आतश्चोपसर्ग इत्यङन्तः स्त्रियाम् ॥

नन्वेवं सर्वस्यैव ज्ञानकलापस्याहमित्येव प्रतिष्ठाने वेद्यभूमिस्पर्शो नास्ति, वेद्यभुवि च देशकालवियोगः न तु वेदकांशे, देशकालयोगाभावे च यदिदं ज्ञानानां स्वांशापेक्षया ज्ञानान्तरापेक्षया च सक्रमत्वं लक्ष्यते तत्कथं स्यात्, क्रमाभावे चैकत्वमेव वस्तुतो भवेत्, ततश्च ज्ञानस्मृत्यादिशक्तिभिस्तद्वान्परमेश्वर इति यदुक्तं तत्कथं निर्वहेदित्याशङ्कां शमयन्पूर्वोक्तमुपसंहरति ।

(१८) केवलं भिन्नसंवेद्यदेशकालानुरोधतः ।
ज्ञानस्मृत्यवसायादि सक्रमं प्रतिभासते ॥

सत्यमेव सक्रममेव संवित्तत्त्वं किं तु स्वशक्तिवशाद्भिन्नत्वेन भासितानि यानि वेद्यानि तेषां मूर्तिभेदकृतो यो दूरादूरवैतत्याвैतत्यादिर्देशः क्रियाभेदकृतश्च चिरशीघ्रक्रमादिरूपः कालस्तावनुरुध्यच्छायामात्रेणावलम्ब्य ज्ञानस्मरणाध्यवसायानां स्वांशा इव भान्ति, निरंशानामपि तद्भासमानांशकृतश्च सक्रमत्वावभासः, परस्परापेक्षया स्वांशापेक्षया च यद्यपि कालक्रम एव स्फुटो विज्ञानेषु भाति न देशक्रमः, तथापि विमूढस्य पर्वतसंवेदनं विततमिव बदरसंवेदनं च सूक्ष्ममिव भातीति देशक्रमोऽपि दर्शितः । तेन वेद्यगतक्रमस्वीकाराभासात्सक्रमत्वमाभासमानमपि नापारमार्थिकमाभासमानस्य परमार्थत्वात् । ततश्च युक्तमुक्तं ज्ञानादयोऽस्य भगवतः शक्तय इति । मायाशक्त्या विभोरिति श्लोकेन स्वरूपवैचित्र्यं ज्ञानानां दर्शितम् । अनेन तु देशकालवैचित्र्यमिति विशेष इति शिवम् ॥

॥ आदितः सूत्रश्लोकाः ५२ व्याख्याताः ॥

इति श्रीमदभिनवगुप्ताचार्यविरचितायामीश्वरप्रत्यभिज्ञासूत्रविमर्शिन्यां ज्ञानशक्तिनिरूपणम् ॥

॥ इति पञ्चममाह्निकम् ॥

---

* कण्ठताल्वादि ।

† प्रयत्नः ।

Digitized by Google

॥ अथ बालरामायणाख्यनाटकस्य ॥

॥ द्वितीयोऽङ्कः ॥

अतः परं परशुरामरावणीयो भविष्यति ।

ततः प्रविशति भृङ्गिरिटिः ।

भृङ्गिरिटिः । सपरिक्रममात्मानं निर्वर्ण्य । अये विकृतरूपतापि क्वचिन्महते ऽभ्युदयाय यतः ।

स्नायुप्रायनिबद्धकीकसतनुं नृत्यन्तमालोक्य मां
चामुण्डाकरतालकुट्टितलयं वृत्तेविवाहोत्सवे ।
ह्रीमुद्रामपनुद्य यद्विहसितं देव्या समं शम्भुना
तेनाद्यापि मयि प्रभुः स जगतामास्ते प्रसादोन्मुखः * ॥१॥

पुनर्निरूप्य सोपहासम् । अहो त्रिभुवनाधिपतेरनुचरस्य महार्हवेषता ।

कौपीनाच्छादनं वल्कमक्षसूत्रं † जटासटाः ।
रुद्राक्षुशस्त्रिपुंड्रं च वेषो भृङ्गिरिटेरयम् ॥ २ ॥

विचिन्त्य भृङ्गिरिटिस्वामिनो वा कीदृशो वेषविशेषः ।

दिगम्बरो वहति भुजङ्गभूषणं
कपालवान् कलयति दाम कौणपम् ।
वृषप्रियो रचयति भस्मगुण्ठना-
मुमापतेश्चरितमचिन्त्यकारणम् ॥ ३ ॥

यद्वा यस्य लैङ्गोद्भवं भैरवीयं तैम्बुरवमौमापतमार्द्धनारीश्वरमैन्दुशेखरमन्तकान्तकरं कालकूटीयं जम्भारिभुजस्तम्भनं दक्षमखोन्माथि मान्मथं त्रैपुरमन्धकासुरीयमित्यपरमप्यपरिमेयं चित्रं चरित्रजातमाचक्षते । तस्य भगवतश्चेष्टापरीक्षायां को नाम परमेष्ठिवैकुण्ठावपि । किं पुनर्भृङ्गिरिटिः । तथाहि ।

नग्नस्तिष्ठति तं नमन्ति विबुधाः संवीतदिव्यांशुकाः
प्रीतो याति वृषेण वारणगतस्तं वासवः सेवते ।
भूषा तस्य नृणां कपालशकलाः स्तोता धनेशः स्वयं
दौर्गत्यस्य परं पदं स भगवान् शम्भुर्विभुत्वस्य च ॥ ४ ॥

तत्किमनेन यथादिष्टमनुतिष्ठामि । परिक्रम्यावलोक्य च । अये नारदः कलहकुतूहली खल्वेष मुनिः यद्वा ।

लिङ्गोद्भवव्यतिकरे स्वमहत्वहेतो-
र्नारायणद्रुहिणयोरुदभूद्विवादः ।
यस्मादयं कलिमुखो मुनिराविरासीत्
तन्मा कथं नु भवतु प्रियसंप्रहारः * ॥ ५ ॥

विचिन्त्य । भवत्वस्मादेव तर्हि तयोरुदन्तमुपलप्स्य इति परिक्रामति । ततः प्रविशति यथा निर्दिष्टो नारदः ।

नारदः । विचिन्त्य सत्यंसत्यमिदं गीयते दुस्त्यजा प्रकृतिरिति । यतः ।

युयुधे युद्ध्यते को वा योत्स्यते वा मदोद्धतः ।
इति मे व्यग्रमनसः कालो ऽभ्येति च याति च ॥ ६ ॥

अपिच ।

स्रस्तान्त्रतन्त्रतुरगाणि कृपाणघात-
घूर्णत्करीण्यनणुपूतनफूत्कृतानि ।
धावत्कदम्बकटुताण्डवडामराणि
द्रष्टुं रणान्यहरहस्त्रिजगद्भ्रमामि † ॥ ७ ॥

विमृश्य यो यत्रानुरक्तः स तदन्यतिरस्कारेण तदेव बहु मन्यते । तथाहि ।

तन्मम ब्रह्म परमं तत्तपः सा क्रतुक्रिया ।
स स्वाध्यायः स च जपो यद्वीक्ष्ये युद्धमुद्धतम् ॥ ८ ॥

येन केन चिद्व्यसनिनो जनस्य तदसंनिधाने तत्प्रतिनिधिरपि विनोदाय । तथाचाहम् ।

अलाभे वीरयुद्धस्य नखवादनसंभृतम् ।
सापत्न्यककलिं स्त्रीणां पश्यामि च शृणोमि च ॥ ९ ॥

किंच ।

लावकतित्तिरिकुक्कुटमेषैर्महिषैश्च या रणक्रीडाः ।
द्रुहिणाच्युतकलियोनेस्ताः प्रीत्यै नारदस्य मुनेः ॥ १० ॥

अपिच ।

वीराणां शस्त्रसंस्फोटे करिणां दन्तघट्टने ।
व्याघ्राणां नखनिर्भेदे नारदः परितुष्यति ॥ ११ ॥

आत्मानं निर्दिशन् । अपिच ।

यच्चारीतनुरच्युतः स भगवान् कन्दर्पदर्पापहो
यच्चाभूद्गिरिशः पतिश्च मरुतां यत्फेनपुञ्जायुधः ।
सौम्यं यच्च विमुच्य रूपमभवच्चण्डी हिमाद्रेः सुता
तत्सर्वं मम नारदस्य ललितं युद्धैकलीलारुचेः ‡ ॥ १२ ॥

---

* स्नायुप्रायाणि स्नायुप्रचुराणि निबद्धानि कीकसान्यस्थीनि यस्यामेतादृशी तनुर्यस्य । एतेन भृङ्गिरिटेर्विकृतरूपता सूचिता । अतो विवाहोत्सवे प्रवृत्ते शम्भुना सह भगवती देवी लज्जामुद्रां विहाय विकृतरूपिणं नृत्यन्तं भृङ्गिरिटिं दृष्ट्वा यज्जहास तेन भगवान् शिवो न केवलं तदानीमेव तस्मिन् तुष्टः किन्तु सोऽद्यापि तस्मिन् तुष्ट एव । महात्मानो हि येन केनापि कारणेन यस्मिन्नेकवारं संतुष्टास्तस्मिन् सर्वदा प्रसादोन्मुखास्तिष्ठन्तीति भावः ।

† अक्षसूत्रं रुद्राक्षमाला ।

* यस्मादयं कलिमुखो मुनिराविर्भूतस्तस्मात् कथं नु प्रियसंप्रहारः प्रियविनाशो मा भवत्वपित्ववश्यं भवत्विति भावः ।

† स्रस्तानि गलितान्यन्त्रतन्त्राणि प्रधानान्त्राणि येषामेवंविधास्तुरगा येषु । कृपाणघातैर्घूर्णन्तो मूर्च्छापरवन्तः करिणो येषु । अनणून्युत्कटानि पूतनानां रणरुधिरपानोत्सुकदेवयोनिविशेषाणां फूत्कृतानि येषु । धावन्ति यानि कदम्बानि योद्धृसमूहास्तेषां कटुना त्रासजनकेन ताण्डवेन डामराणि भयानकान्येवंविधानि रणानि द्रष्टुमहं नित्यं त्रिलोकीं पर्यटामि । एतेन सततमतिघोररणाभिकाङ्क्षी भगवान् नारद इति सूच्यते ।

‡ एतास्तिस्रः कथाः श्रीमद्भागवतादौ प्रसिद्धाः ।

Digitized by Google

संप्रत्येवोपस्थितामिव मनोरथसिद्धिं पश्यामि यदावेदितमेतस्य * त्रयीविद्याशिष्येण माठरेण यथा याचितपरशुं दशग्रीवमाधूतधूर्जटिधनुषं चाभियोक्तुं मिथिलापुरीं प्रस्थितो राम इति । विचिन्त्य तदहमपि तत्र गत्वा तयो † रमर्षवृद्धिविधिना मनोरथानामप्यपथं समरसंभारमालोकयामि । इति परिक्रामति ।

भृङ्गिरिटिः । वेगात्कतिचित्पदानि गत्वा स्वागतं देवर्षेर्नारदस्य ।

नारदः । कथं महादेवानुचरो भृङ्गिरिटिः । उपसृत्य स्वस्ति भृङ्गिरिटये । क्व पुनः प्रस्थीयते ।

भृङ्गिरिटिः । यत्र वीरवर्गवरिष्ठौ जामदग्न्यदशकण्ठौ ।

नारदः । प्रमथप्रथम साधु स्मारितोऽस्मि । तत्कथय कः पुनर्जामदग्न्यदशग्रीवयोर्वीरव्रतचर्यासु प्रकृष्यते ।

भृङ्गिरिटिः । देवर्षे महदन्तरं रामरावणयोर्वीरव्रतचर्यां प्रति पश्य ।

त्रिःसप्तावधि बाधिता क्षितिभुजामाजन्मवैखानसः
कर्तामातृवधैनसः स सकलश्रुत्यर्थवीथीगुरुः ।
विश्वस्याश्च भुवः कृतौ वितरिता श्यामाकमुष्टिंपचो
रामः सोमसुदप्रमेयमहिमा कासां गिरां गोचरः ॥ १३ ॥

नारदः । चन्द्रशेखरसखे न रावणोऽपि वीरव्रतचर्यां प्रति केनाप्यतिसंधीयते । यतः ।

आसीदस्ति भविष्यति क्वचिदपि त्रैलोक्यमालोक्यतां
यद्येतस्य दशाननस्य सदृशो दिव्या हि युष्मदृशः ।
तुल्यं कृत्स्नशिरश्छिदः कृतनुतेः स्तोकत्रिलोकीप्रदो
यस्मात्सोऽपि वरप्रदानसमये देवः शिवो लज्जितः ‡ ॥ १४ ॥

भृङ्गिरिटिः । देवर्षे नारद यथा समर्थयसे । तथाहि ।

एकः कैलासमद्रिं करगतमकरोच्चिच्छिदे क्रौञ्चमन्यो
लङ्कामेकः कुबेरादहृत वसतये कोङ्कणानर्थितोऽन्यः ।
एकः शक्रस्य जेता समिति भगवतः कार्तिकेयस्य चान्य-
स्तत्कामं कर्मसाम्यात्किमपरमतयोर्मध्यगा वीरलक्ष्मीः ॥ १५ ॥

नारदः । सहर्षं हस्तमुद्यम्य ।

चित्रं नेत्ररसायनं त्रिदशतासिद्धेर्महामङ्गलं
मोक्षद्वारमपावृतं मम मनःप्रह्लादनाभेषजम् ।
साकं नाकपुरन्ध्रिभिर्नवपतिप्राप्त्युत्सुकाभिः सुराः
सर्वे पश्यत रामरावणरणं वत्स्येष वो नारदः ॥ १६ ॥

---

* एतस्य जामदग्न्यस्य ।

† तयोः जामदग्न्यदशग्रीवयोः ।

‡ एककालावच्छेदेन सकलमस्तकच्छेदकृत् स्तोता चायं दशग्रीव इति कथमहमभीष्टवरदो ऽपि तुच्छां त्रिलोकीं दास्यामीति वरप्रदानसमये भगवान् शिवो ऽपि ललज्जे । एवंविधो दशग्रीवो ऽपि कासां गिरां गोचरो न कासामित्यर्थः ।

भृङ्गिरिटिः । युद्धैकरुचे मा निर्भरं संरम्भस्व । त्वन्मनोरथपरिपन्थी हि देवादेशः । यदेषो ऽस्मि स्वचापतिरस्कारमप्यविगणय्य ऋचीकपुलस्त्यसहितस्तयोरन्योन्यमन्युग्रन्थिश्लथीकरणाय प्रेषितः ।

नारदः । सविषादमात्मगतम् । धिक्कष्टमुत्थितश्च कौतुकद्रुमाङ्कुरो झटिति त्रुटितश्च तदन्तरितं तावदिदं रामरावणीयं युद्धमयोध्यां गत्वा परं रामरावणीयं योजयिष्यामि संप्रत्येवोभयरामीयं वा । प्रकाशम् । भूर्भुवःस्वस्त्रितयवासिभिरप्यनुल्लङ्घनीयो देवादेशः । तदहं ब्रह्मणः सदनं प्रति तावद्गमिष्यामि ।

भृङ्गिरिटिः । अहमपि प्रस्तुतकार्यसिद्ध्य इति निष्क्रान्तौ ।

शुद्धविष्कम्भकः * ।

ततः प्रविशति रावणः प्रतीहारी च ।

रावणः । सीतामनुसंधाय ।

तद्वक्त्रं यदि मुद्रिता शशिकथा तच्चेत्स्मितं का सुधा
सा दृष्टिर्यदि हारितं कुवलयैस्ताश्चेद्गिरो धिङ्मधु ।
सा चेत्कान्तिरतन्त्र † मेव कनकं किं वा बहु ब्रूमहे
यत्सत्यं पुनरुक्तवस्तुविरसः सर्गक्रमो वेधसः ॥ १७ ॥

प्रतीहारी । स्वगतम् । कहं अज्जवि सच्चेअ चित्तभित्ती तंचेअ चित्तअम्म ता गाढमभिणिविट्ठो दसाणणे कामो ता मण्णे सदमण्णुपक्खवादो एत्थ वित्थरदि । आकाशे । हंहो विसमबाण जुत्तमिणं सरिसमिणं जं दाणिं एदहमेत्तेवि दसाणणपसादे ईदिसो दे पुरन्दरपक्खवादो जेण सअलजणणिन्दणिज्जेण इमिणा उभअवेदणत्तणेणावि ण लज्जीअदि । भोदु कज्जं कज्जन्तरमन्तरेदि ता एव्वं दाव । प्रकाशम् । देव मायामओ दुवारदेसे चिट्ठदि ‡ ।

रावणः । अनाकर्ण्य भोभो मदन अति हि नाम दुर्ललितो ऽसि यन्मय्यपि प्रहरसि यद्वा ।

---

* भूतभविष्यत्कालिककथांशानां निदर्शकः संक्षिप्तार्थो योऽङ्कस्य प्रारम्भे रचनाविशेषः स विष्कम्भक इत्युच्यते । स च द्विधा शुद्धः संकीर्णश्च तत्र मध्यमेन मध्यमाभ्यां वा पात्राभ्यां यः प्रयोजितः स शुद्धो यो हि नीचमध्यमपात्रकल्पितः स संकीर्णः । तथाच साहित्यदर्पणे ।

वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः ।
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः ॥
मध्येन मध्यमाभ्यां वा पात्राभ्यां संप्रयोजितः ।
शुद्धः स्यात् स तु संकीर्णो नीचमध्यमकल्पितः ॥

† अतन्त्रमप्रधानं तुच्छमित्यर्थः ।

‡ कथमद्यापि सैव चित्रभित्तिस्तदेव चित्रकर्म तद्गाढमभिनिविष्टो दशानने कामस्तन्मन्ये शतमन्युपक्षपातो ऽत्र विस्तार्यते । हंहो विषमबाण युक्तमिदं सदृशमिदं यदिदानीमेतावन्मात्रे ऽपि दशाननप्रसादे ईदृशस्ते पुरन्दरपक्षपातो येन सकलजननिन्दनीयेनानेनोभयवेदनत्वेनापि न लज्ज्यते । भवतु कार्यं कार्यान्तरमन्तरयति तदेवं तावत् देव मायामयो द्वारोद्देशे तिष्ठति ।

Digitized by Google

अपि प्रहर्त्ता मम वल्लभो ऽसि
मृगाङ्कबन्धो निखिलामरेषु ।
यैर्व्याप्तसत्त्वं मयि रावणे ऽपि
तैरेव बाणैर्यदि तां प्रति स्याः ॥ १८ ॥

प्रतीहारी । पूर्वोक्तमभिधत्ते ।

रावणः । हन्तहन्त नैकप्रकारो मदनव्यापारः । यतो मम वैदेहीदर्शनतः प्रभृति ।

न्यञ्चत्कुञ्चितमुन्मुखं हसितवत्साकूतमाकेकरं
व्यावृत्तं प्रसरत्प्रसादि मुकुलं सप्रेम कंपं स्थिरम् ।
उद्बु भ्रान्तमपाङ्गवर्त्ति विकचं मज्जत्तरङ्गाकुलं
चक्षुः साश्रु च वर्त्तते रसवशादेकैकमन्यक्रियम् * ॥ १९ ॥

प्रतीहारी । स्वगतम् । सव्वधा मन्दोदरीमन्दीकिदसिणेहगण्ठिणो से सीदामआ उल्लावा । विचिन्त्य । ता भोदु णिसग्गदूसहेण से परसुरामणामग्गहणेण सिठिलेमि सीदावेसं । प्रकाशम् । णं विण्णवेमि परसुरामपासपट्टिणिअत्तो † इत्यर्धोक्ते ।

रावणः । मायामयस्तच्छीघ्रं प्रविशतु ।

प्रविश्य मायामयः । देव मायामय इतो दृष्टिदानेनानुग्राह्यः ।

रावणः । अथ याचितपरशुना परशुरामेण किमभिहितमासीत् ।

मायामयः । त्रैलोक्यमाणिक्य रामोदन्तमाकर्णयतु स्वामी ।

पौलस्त्यः प्रणयेन याचत इति श्रुत्वा मनो मोदते
देयो नैष हरप्रसादपरशुस्तेनाधिकं ताम्यति ।
तद्वाच्यः स दशाननो मम गिरा दत्ता द्विजेभ्यो मही
तुभ्यं ब्रूहि रसातलत्रिदिवयोर्निर्जित्य किं दीयताम् ॥ २० ॥

रावणः । कदा नु खलु परशुरामो रसातलत्रिदिवयोर्जेता दाता च संवृत्तः । रावणः पुनः प्रतिग्रहीता । ततस्त्वया किमसौ प्रत्युक्तः ।

मायामयः । नक्तंचरचक्रवर्त्तिन् इदमिदं निवेद्यते ।

देवो यद्यपि ते गुरुः स भगवान् खण्डेन्दुचूडामणिः
क्षोणीमण्डलमेकविंशतिमिदं वारान् जितं यद्यपि ।
द्रष्टव्यो ऽस्यमुमेव भार्गववटो कण्ठे कुठारं वहन्
पौलस्त्यस्य पुरस्तथापि रचितप्रत्ययसेवाञ्जलिः ॥ २१ ॥

रावणः । सप्रसादम् । कथमीदृशमनीदृशो ऽभिदधीत तपस्वी ।

* मदनव्यापारेण रावणस्याक्षिविंशत्या एकैकमक्षि न्यञ्चत् कुञ्चदित्यादिविविधप्रकारकमभूदित्यर्थः ।

† सर्वथा मन्दोदरीमन्दीकृतस्नेहग्रन्थेरस्य सीतामया उल्लापास्तद्भवतु निसर्गदुःसहेन [illegible] परशुरामनामग्रहणेन शिथिलयामि सीतावेशम् । ननु विज्ञापयामि परशु[illegible]पार्श्वप्रति [illegible]वृत्तः ।

मायामयः । तूष्णीं तिष्ठति ।

रावणः । परामिहितं हि भाषसे तदविशङ्कं निवेदय ।

मायामयः । देव प्रकृतिमुखरा हि ब्राह्मणजातिर्देवादेश इति निवेद्यते ।

परशुमिममदेयं याचते युद्धहेतो-
र्गिरिशधनुरधिज्यं कर्तुमुत्कण्ठते च ।
तदिदमभिदधीथास्त्वं प्रवाचं पिशाचं
तव भुजतरुखण्डं मत्कुठारो न सोढा ॥ २२ ॥

रावणः । सक्रोधहासम् । सूक्तं भद्रेण प्रकृतिमुखरा ब्राह्मणजातिरिति तदनुभविष्यति दुर्वृत्तक्षत्रियविजयदुःशिक्षितो मुनिखेट * श्चापलस्य फलम् ।

मायामयः । अस्तमितान्यविक्रमगतीनि जगन्ति त्रीण्यपि मन्वानो नितरां दृप्यति ब्रह्मवीरः ।

रावणः । कतरदधिष्ठानमध्यास्ते स ते ब्रह्मवीरः ।

मायामयः । स्वगतम् । सकोपयन्निव स्मत्स्वामी भवतु न प्राणनिर्याणे ऽप्यनुचितवाचो भवन्ति भृत्याः प्रकाशम् ।

निःशेषं काश्यपाय क्रतुविधिगुरवे दक्षिणीकृत्य पृथ्वीं
काण्डैर्ज्योतिःशिखण्डैर्मधुरिपुशयने व्यस्तवान् वारि येभ्यः ।
तानेलानालिकेरीक्रमुकफणिलतातालजम्भावनान्ता-
नम्भोधेर्गर्भभागानधिवसति मुनिर्भार्गवो भर्गशिष्यः ॥ २३ ॥

रावणः । तर्हि मिथिलातः सिंहलानुत्तरेण लङ्कां साधयतः सविधीभविता ।

मायामयः । देव प्रकृतिरोषणो रेणुकापुत्रस्समागतमुत्प्रेक्षे ।

रावणः । तत्प्रियंप्रियं नः । नेपथ्ये ।

स एष भृगुपुङ्गवो गिरिशबालशिष्यो मुनिः
परश्वधशिखाशुशुक्षणिहुताखिलक्षत्रियः ।
उपैति धृतमत्सरो गुरुशरासनन्यक्कृतेः
क्व नाम दशकन्धरो वहतु चन्द्रहासं करे ॥ २४ ॥

रावणः । अनाकर्णनमभिनीय । अपि न नर्मगर्भमभिधत्से ।

मायामयः । सत्यमेतत् ।

रावणः । स विनोदयिता मे कन्दर्पकण्डूलभुजदण्डमण्डलम् । नेपथ्ये पुनस्तदेव ।

मायामयः । ननु प्राप्त एवायमसावितः समहस्तास्फाल्यमानमार्जनामञ्जुमुरजध्वननदनिष्यन्दसुन्दरेण रवेण निवेदितनिजागमनो जामदग्न्यः ।

ततः प्रविशति करेण शरमान्दोलयन्धृतधनुर्जामदग्न्यो माठरश्च ।

माठरः । स्वगतम् ।

* मुनिखेटो मुन्यपसदः ।

अयमेव महाभागो भृग्वपत्यं यदुस्य हि ।
यदेव ब्रह्म परमं स एव गिरिशो गुरुः ॥ २५ ॥

किंच अनाकलितसत्त्वसारसंभावभीषणमर्षायाकृतयो हि महात्मानः । तथा हि ।

वैखानसो मुनिवृषा प्रवरस्त्ववीर-
श्चित्रं चरित्रमिदमस्य मुदे भिये च ।
क्षीराम्बुधेरिव पयः सभुजङ्गराजं
मार्तण्डरूपमिव घर्मपरिप्लुतं च ॥ २६ ॥

विचिन्त्य । भवत्वेवं तावत् । प्रकाशम् । भगवन् भार्गव किमिदमपाकृतच्यवनादिवचःशृङ्खलाविसंष्ठुलमपक्रममुपक्रान्तम् ।

जामदग्न्यः । सस्मरणमनाकर्ण्य । अहो मयि महान् खलु महेश्वरवल्लभायाः प्रसादः । कुतः ।

गोदानमङ्गलविधेरनु रेणुका यान्
केशानवर्द्धयत तातनिवारिताऽपि ।
वेणीकृता मम जटापटलस्य हेतो-
स्ते कुन्तलाः स्वयमपास्य भवं भवान्या ॥ २७ ॥

माठरः । भगवन् भार्गवेत्यादि तदेवाभिधत्ते ।

जामदग्न्यः । महाब्राह्मण किमुच्यते यदनभिज्ञोऽसि वीरव्रतचर्याक्रमस्य न च विन्दानस्य योगमार्गमसुप्रतिपदः परब्रह्मानन्दः । पश्यतु भवान् ।

सेर्ष्यं पश्यति षण्मुखे भगवती कोदण्डशिक्षाश्लथं
धम्मिल्लं विरचय्य चुम्बितवती यं वत्सला मूर्द्धनि ।
सोढा सोऽपि हि भार्गवो गुरुधनुर्निर्भर्त्सनं रावणा-
दित्याकर्ण्य गणैर्वृतः स्मितमुखैरीशोऽपि लज्जिष्यते ॥ २८ ॥

माठरः । शिष्यस्नेह एव मां मुखरयति । तदाचार्याः प्रमाणम् ।

जामदग्न्यः । स एष भृगुपुङ्गव इत्यादि पठति ।

रावणः । साधु भोः साधु सत्यमिन्दुशेखरशिष्योऽसि ।

वीरप्रसूर्जगति भार्गव रेणुकैव
या त्वां त्रिलोकतिलकं सुतमभ्यसूत ।
शक्रेभकुम्भतटखण्डनचण्डधारो
येनैष मे न गणितो युधि चन्द्रहासः ॥ २९ ॥

जामदग्न्यः । पुलस्त्यापत्य अयमस्माकमाकस्मिकवीरव्रतदायी विफलीकृतकृतान्तक्रोधहासः स ते चन्द्रहासः । येन शिपिविष्टपरितुष्टये स्वकण्ठकाण्डमण्डली द्विधा कृतवानसि ।

रावणः । आं जामदग्न्य स एवैष निसर्गकरालः करवालः येन सा मम भूर्भुवःस्वस्त्रयी पादपीठे लोठिता ।

जामदग्न्यः । लङ्केश्वर ईदृश एवायं चन्द्रहासः ।

दृष्टे मुखानामेतस्मिन्कण्ठखण्डनशङ्कया ।
स्वेषां च न परेषां च जायन्ते कम्पसंपदः ॥ ३० ॥

रावणः । भार्गवभार्गव मामेवं किं करवाम यदतिक्रान्ते वस्तुनि सार्विप्रत्ययपरतन्त्रा व्यवहाराः । ततश्च ।

आस्कन्धावधि कण्ठकाण्डविपिने द्राक्चन्द्रहासासिना
छेत्तुं प्रक्रमिते मयैव टसिति त्रुट्यच्छिरासंततौ ।
अस्मेरं गलिताश्रु गद्गदपदं भुग्नभ्रु वा व्यग्रभू-
द्वक्त्रेष्वेकमपि स्वयं स भगवांस्तन्मे प्रसन्नः शिवः ॥ ३१ ॥

जामदग्न्यः । आत्मवधः प्रथमः पातकेषु । अनेनापि विकत्थस इत्यहो ते श्रुतिषु वैचक्षण्य यदित्थमध्यगीष्महि ।

असुर्या इति ते लोका अन्धेन तमसा वृताः ।
तांस्ते मृत्यभिगच्छन्ति ये के चात्महनो जनाः ॥ ३२ ॥

रावणः । आः क्षत्रियापुत्र ब्राह्मण इव मीमांसमानस्त्रिवेदीं विप्लावयसि । तदेष ते राजा रावणो दण्डधरः ।

जामदग्न्यः । विहस्य अहो वर्णाश्रमेषु वैशारद्यं राज्ञः । तदिदमध्याप्यसे ।

सकलस्यास्य लोकस्य जातिर्भवति मातृतः ।
ऋषीणां तु श्रुतिदृशां पितृतो धर्मनिर्णयः ॥ ३३ ॥

रावणः । यदात्थ एवमपि भवतु ।

जामदग्न्यः । किं पुनरैरम्मदे महसि न दारवीयं ज्योतिरस्तमयते । अतश्च ।

यः पाणिप्रणयात्पवित्रिततनुर्देवेन खट्वाङ्गिना
यः शस्त्रैकगुरुर्गजासुरवधूवैधव्यमुद्राप्रदः ।
तत्रास्मिन् परशौ शितायहुतभुग्ज्वालाच्छटाडामरे
श्लिष्यन्तः सहसा व्रजन्ति विलयं ते चन्द्रहासादयः ॥ ३४ ॥

रावणः । विहस्य । अयमसौ चन्द्रहासस्य विलापयिता कुठारो यः खण्डकभाग इत्यमाङ्गलिकत्वाद्भगवता भर्गेण भवते दत्तः । तदुपस्यतस्ते महदुपकरणमासीत्समित्काण्डखण्डनाय ।

जामदग्न्यः । आं रावण स एवायं भगवतो भवानीवल्लभस्य प्रसादचिन्तकः परशुर्महदुपकरणं च मे तपस्यतः समित्काण्डखण्डनाय क्रुद्धतस्तु प्रचण्डदुर्वृत्तदण्डनाय ।

रावणः । जामदग्न्येदृश एवायं खण्डपरशुपाणौ परशुरासीत् । आधारनिबन्धनो यदाधेयस्य गुणाध्यारोपः । मुक्ताशुक्तिसंपुटपातं हि पश्य पाथो मणीभवति ।

जामदग्न्यः । निशाचरचक्रवर्त्तिन् न सार्वत्रिकमिदं सलिलगर्भगतोऽपि गभस्तिमाली दुरालोक एव । जामदग्न्यपाणिप्रणयवानपि हरपरश्वधो दुर्निषेध एव ।

रावणः । ओमिति ब्रूमः । यदि न दुर्निषेधः कथमिव रेणुकाशिरश्छेदेऽपि स्वच्छन्दः । अपि च रे ब्रह्मबन्धो ।

देवीविलासमुकुरः परशुर्य आसीत्
स्तम्बेरमासुरशिरोमणिशातधारः ।

Digitized by Google

तं रेणुकारुधिरपङ्कलताङ्कमेनं
दृष्टुर्न कस्य हृदयं करुणा रुणद्धि ॥ ३५ ॥

विचिन्त्य । हंहो नीललोहितशिष्य नूतनः खल्वेष क्षत्रियधर्मो यत्र जननीजने ऽपि शौर्यपर्यवसायः । तथाप्याद्रियसे । अहो स्वतन्त्रा लोकयात्रा । यद्वा असतामपि महापुरुषशुश्रूषा किमपि कामदुघा । यतः ।

त्वं जामदग्न्य जननीवधपातकेन
न ब्रह्मवर्चसवतां सविधे ऽभविष्यः ।
गीर्वाणवृन्दचरणास्तव चन्द्रमौलि-
राचार्यकं स भगवान् यदि नाकरिष्यत् ॥ ३६ ॥

तथाप्येतदभिधीयसे ।

चापाचार्यस्त्रिपुरविजयी कार्त्तिकेयो विजेयः
शस्त्रव्यस्तः सदनमुदधिर्भूरियं हन्तकारः * ।
अस्त्येवैतत् किमु कृतवता रेणुकाकण्ठबाधां
बद्धस्पर्द्धस्तव परशुना लज्जते चन्द्रहासः ॥ ३७ ॥

जामदग्न्यः । कथं नाम न लज्जते यतो निसर्गनिरवग्रहं न जानाति जामदग्न्यम् ।

रेवाम्भोगर्भमज्जद्द्विविधवरवधूहस्तयन्त्रोज्झिताभिः
क्रीडन् वारां लताभिः स्मरसि यदकरोदर्जुनः कार्तवीर्यः ।
तद्दोर्भ्यां यस्तु रामो रणभुवि विदधे वेगवल्गत्कुठारः
प्रायः पौलस्त्य सा ते श्रवणपरिणतिं नो गता किंवदन्ती ॥ ३८ ॥

प्रतीहारी । स्वगतम् । एदं तं रक्खसाणं पि रक्खसो अत्थि त्ति† ।

रावणः । विहस्य मानुषेण रावणपराजय इत्यहो सुभाषितम् । तं प्रति आर्चीकिरपत्य शत्रुरिति योधनीयो भवति न पुनर्मृधादेः पैर्यालोचनीयः । विभाव्य । यद्वा आयुधनिषेध्या रिपवो न सामसाध्याः । हस्तमुद्यम्य भार्गवभार्गव मा निरर्गलं प्रगल्भस्व । न निरस्त्रेषु निशाचरपतिः प्रहरति यदि ते निर्विघ्नो वीरव्रतचरितोत्कर्षः । अतश्च ।

त्रैयम्बकः परशुरेष निसर्गचण्डः
सौपर्णकेतनमिदं धनुरुच्चतं च ।
अस्मिन् द्वये बिभृहि भार्गव हेतिमेकां
येनायमृच्छति करं मम चन्द्रहासः ॥ ३९ ॥

जामदग्न्यः । किं नाम रामो ऽप्येवमुच्यते । वाडवीयमपि ज्योतिरर्णवार्णःपानार्थमभ्यर्थ्यते । किंच ।

कैलासाद्रिविटङ्कतः सह सुरैर्द्रष्टुं प्रवृत्ते हरौ
मध्यस्थे शशिशेखरे रणविधौ सूनोश्च शिष्यस्य च ।

* हन्तकारो बलिः ।

† एतत्तत् राक्षसानामपि राक्षसो ऽस्तीति ।

सार्द्धं येन विनिर्जितो गणचमूचक्रेण हेरम्बिणा स्कन्दो
ऽसौ दशकण्ठ कुण्ठरभसास्तस्मिन् मयि त्वादृशाः ॥ ४० ॥

रावणः । विहस्य । सैषा गुरुप्रदेया गुरुपुत्रे दक्षिणा तदिदमनुष्ठितं गुरुवद्गुरुपुत्रे वर्त्तितव्यमिव ।

जामदग्न्यः । भवानिव न सर्वः श्रुत्यर्थवीथीविदग्धः । यतस्तवैव गुरुवद्गुरुपुत्रे प्रवृत्तिः ।

वयं पुनरशास्त्रचक्षुषस्तदिदं ब्रूमहे । यथा ।

वन्द्यः पितेव स भवान् नलकूबरस्य
रम्भा स्नुषा धनपतेरिव सा तवापि ।
यस्त्वन्यदत्र हृदयात् नतदेति कण्ठं
दोषस्तथापि यदि तत् स्मृत एव रुद्रः ॥ ४१ ॥

रावणः । आधेयविक्रमकर्माणो* येन केन चिदुपवदन्ते । किंच ।

हेरम्बडम्बरिणि नन्दिनिनन्दिहेता-
वुद्दामचन्द्रमसि संयति षण्मुखेन ।
मुक्तो ऽसि यत् पशुपतिप्रणयानुरोधात्
तेन त्वमेव विजयी विजितः कुमारः ॥ ४२ ॥

जामदग्न्यः । किमभेद्यमम्भसां किमदूष्यं दुर्जनवचसां यतो जामदग्न्यवचांस्यपि विचार्यन्ते । पश्यपश्य ।

ईशो गुरुर्गिरिसुता जननी किमाभ्यां
शश्वत् स एव समरेषु पराङ्मुखस्य ।
अद्यापि काण्डचयखण्डितचन्द्रकायः
साक्षी शिखण्डनिवहो गुहवाहनस्य ॥ ४३ ॥

रावणः । कस्य पुनः प्रत्यक्षपराङ्मुखस्य मतिमतः सतो ऽनुमाने बहुमानः । ततश्च तदेवाभिधीयसे त्रैयम्बकः परशुरित्यादि पुनः पठति ।

जामदग्न्यः । निशाचरचक्रवर्त्तिन् अपकुर्वतापि भवता परमुपकृतं यदेवं स्मारितो ऽस्मि ततश्च ।

येन न्यक्कृतमिन्दुशेखरधनुर्दर्पादुनावृत्य मां
स्वर्वन्दीभिरभूषितः स बलवान् पौलस्त्य कस्ते करः ।
छित्त्वा मणिबन्धनाद्गलयिनं रामः कुठारेण तं
देव्याः कोपविभिन्नमास्यशशिनि स्वं धाम संधास्यति† ॥ ४४ ॥

अथवा एकस्मिन्नपराधिनि सर्वे ऽपि सहधर्मचारिणो ऽपराद्धारः । ततश्च ।

* आधेयविक्रमकर्माण आरोपितविक्रमकर्माणः ।

† रामो देव्या आस्यशशिनि कोपविभिन्नं कोपनिर्गलितं स्वं धाम तेजः संधास्यतीत्यन्वयः । भर्तृशरासनन्यक्कारकपानुचितकर्मकारिणस्तस्य रावणकरस्य छेदनेन देवी हर्षोत्फुल्लवदना भवेदिति भावः ।

ये हैलोद्वृत्तचन्द्रचूडगिरयो ये चन्द्रहासार्थिनः
संग्रामे युगपद्भ्रमन्ति सभयं श्लिष्टाश्च ये रम्भया ।
दोर्दण्डास्त इमे तुरङ्गपतनच्छिन्नोज्ज्वलत्पार्श्वयो
मत्कोपाद्भुवि नालशेषकमलामासूत्रयन्त्वावनीम् ॥ ४५ ॥

रावणः । अथ सनाथः प्रमथगणो भवता परिवाहकेण । अथ भगवती भवानी च विमाननानतं शिरः समुन्नेष्यति । विचिन्त्य ।

बन्दीकृतामरपतेर्जितपुष्पकस्य
तस्याट्टहासमुखराणि मुखानि मेऽद्य ।
तूणीधनुःपरशुवल्कजटाक्षसूत्री
वैखानसो भृगुबटुर्यदयं विपक्षः ॥ ४६ ॥

जामदग्न्यः । विरोधनक्षपाजनपरीक्षितविक्रमस्य शोभत एव मादृशेषु बटुरित्यधिक्षेपः । सजुगुप्सम् ।

अपि दशमुख कच्चिद्गुप्तपातालयात्रः
स्मरसि लयविचित्रं वक्रवाक्यं विधाय ।
यदसि बलिवधूभिः स्मेरनेत्रोत्पलाभि-
र्निजकरतलरङ्गे नर्तितः कौतुकेन ॥ ४७ ॥

रावणः । सर्वमस्ति यतो न भार्गव इव रावणः करुणात्मनि परित्रातव्ये स्त्रीजने पुरुषः ।

जामदग्न्यः । भार्गवो न रावण इव पलायनपुरुषः । अपि च किंचित्पृच्छामि ।

त्वां संक्रन्दननन्दनः किल कपिः कक्षागुहागह्वरे
कृत्वा प्रत्युदधि व्यधत्त स यदा सन्ध्यासमाधिव्रतम् ।
शङ्के रावण बाहुयन्त्रघटनासंरोधमन्दीकृत-
श्वासश्रेणिविसंष्ठुलाननवनो दुःखं तदासीः स्थितः ॥ ४८ ॥

रावणः । सक्रोधहासम् । मुग्धबुद्धयो हि यथाश्रुतस्य वक्तारो न पुनर्विवेक्तारः । अतश्च पश्यपश्य ।

अहं नारी पुमानहमिति संचिन्त्य चेतसा ।
षण्ढीकृतस्यापि कोदण्डे यस्यावज्ञा न संभृता ॥ ४९ ॥
भूर्भुवःस्वस्त्रयीवीरः स एष दशकन्धरः ।
का नाम राम तस्यास्था बटौ वा मर्कटेऽपि वा ॥ ५० ॥

जामदग्न्यः । पुलस्त्यापत्य यद्वा तद्वा भवतु भार्गवस्तादृशानि तु वीररत्नानि न जात्या जुगुप्सते । पश्य ।

लोकोत्तरं चरितमर्पयति प्रतिष्ठां
पुंसां कुलं न हि निमित्तमुदात्ततायाः ।
वातापितापनमुनेः कलशात् प्रसूति-
र्लीलायितं पुनरमुद्रसमुद्रपानम् ॥ ५१ ॥

रावणः । अरे दुर्मुख बटो वैखानसकीट विडम्बितत्र्यम्बकाचार्य स्वहेतिधारातिथीकृतरेणुकामूर्द्धन् मूर्धाभिषिक्तरुधिरजलनिवापाञ्जलितर्पितपितृक क्षत्रियागर्भपातनमहापातकिन् एष प्रदर्श्यते दशाननदोर्दण्डमण्डलीसामर्थ्यसारः । ततश्च ।

लूत्वा बिसलतालावं कण्ठं ते रेणुकारिपोः ।
स एव चन्द्रहासासिः प्रायश्चित्तं करिष्यति ॥ ५२ ॥

यद्वा ।

क्वायं मे चन्द्रहासः प्रकृतिशतलिपिन्यस्तजैत्रप्रशस्तिः
स्वर्मातङ्गस्य कुम्भे क्व च कुहक भवान् ब्राह्मणः शस्त्रवाही ।
वामेभ्योऽस्मत्करेभ्यो बहिरयमिह यस्तत्कनिष्ठाङ्गुलीभूः
प्रारब्धब्रह्मघोषं हरतु नखशिखा त्वच्छिरः कन्धरातः ॥ ५३ ॥

जामदग्न्यः । अरे रे पुनरुक्ताकार दुराचार निशाचरचरम विरिञ्चिकुलकलङ्क लङ्कापपते पातकैकरसिक कुबेरवैरिन्नभिलषितरम्भापरीरम्भ दाक्षायणीप्रणामपरिहारिन्नन्वेष ते दृश्यते दोर्दण्डमण्डलीसामर्थ्यसारः ।

रावणः । विहस्य स्वसारानुसारेण भार्गवो दशकण्ठमप्यकलयति । नेपथ्यं प्रति पुष्पक इतस्ततः ।

प्रविश्य पुष्पकम् । अयमहम् ।

रावणः । एव समारुह्मस इत्यर्द्धारोहणावरोहणप्रमाणितकाभ्याम् । अहह मनाक्किल वीरव्रतसमयमुद्रामतिक्रान्तोऽस्मि ।

जामदग्न्यः ।

वीरव्रतात्त्व जहिहि रावण चन्द्रशालां
मा पुष्पकस्य मयि पादचरेऽपि रामे ।
पश्यन्त्विमाः समरमप्सरसोऽद्य तावन्
न्यक्पातिभिर्विहितमूर्ध्वचरैश्च बाणैः ॥ ५४ ॥

रावणः । अनभ्यस्तचरस्तवैव समरारम्भ इति ममानुकम्पा ।

जामदग्न्यः । सोल्लुण्ठम् । पशुपतिनाप्यननुकम्प्यमानमनुकम्पस इत्यहो सकरुणा ते धिषणा । किं पुनरिदमुच्यते ।

यथाभ्यासं प्रवर्तन्ते त्वादृशामथ पत्रिणः ।
इराक्षेपासिनस्त्वेते सर्वतोदिक्कुविक्रमाः ॥ ५५ ॥

रावणः । तद्यदि तथाधुना भगवांस्त्रिनेत्रस्त्राता इत्युभावपि चापारोपणं नाटयतः ।

ततः प्रविशतः सशिष्यावृषीकपुलस्त्यौ भृङ्गिरिटिश्च ।

शिष्यः पुरो निर्दिशन् । साश्चर्यम् । किं उण इदो एदाओ अक्खण्डपिण्डअसिहासंहदपण्डीकिअविक्कमाअक्केण तक्खणोवणद्धाहुत्तरणतारतरजवक्कंघणमअकेउदण्डमण्डलीओ अमन्दसद्धन्दसंपडिअअड्डिलज्जालालिपक्कालत्थासविसेससमुज्जलन्तअगिरासिअअसंठिअधअपडाडम्बरिल्लीओ विविहुद्दामभारपरिगमेवि अमुलायमाणसरसुप्पलाविच्छिण्णकणअकोअणअपरिअरेण अ विराअमाणाओ विमाणपन्तीओ गअणपेर-

Digitized by Google

न्ताहिं झत्ति ओसरन्ति * । चञ्चरीकः । वत्स दाशायण ।

नश्यन्नानाविमानाकुलममरगणबलभीरन्ध्रवातायनेभ्यो
वक्षोराकण्ठदृश्यपर्यदमरललना लोलमालोकयन्ति ।
यच्चेदं व्योम विद्युत्खचितमिव पुरस्तेन मन्ये किमन्य-
द्वृत्साध्यामाद्रियन्ते शिखिनिचयमुचो देवताः शस्त्रमय्यः ॥५६॥

पुलस्त्यः । सविशेषमालोक्य सखे तत्त्वानुगतस्ते तर्कः ।

एकश्चैकतमो परत्र दशधा कीर्णा यदाकर्ण्यते
टङ्कारस्तिरयन् जगन्ति धनुषामेकादशानामयम् ।
रामो ऽसौ स च रावणो रणधरां धर्तुं समभ्युद्यता-
वीषद्बालकुशाङ्कुरामरवधूकेशप्रियैः पाणिभिः ॥५७॥

शिष्यः । एकतो ऽवलोक्य । सचमत्कारम् । पेक्खह पेक्खह इदो एदाओ अमन्दसिन्दूरसुन्दरिअकुम्भपब्भारभासुराओ पअण्डमुण्डमण्डलीमण्डिअसुण्डादण्डडम्बरड्डामराओ पअट्टमअधाराधोरणीणीरन्धणिरुद्धरेणुरमणिज्जसरणीओ गलगुहाणिउञ्जपुञ्जिअगज्जिअणिज्जिदजलदजालत्थणिदवित्थराओ दीग्घवृघटाओ ओदरन्ति † भृङ्गिरिटिः । भद्र दाशायण साधु दृष्टं वारणास्त्रमिदमामन्त्रितं रावणेन यतः ।

उत्सर्पद्दर्पहेलागुलुगुलितगलाडिण्डिमोड्डामरिण्यः
सत्राहन्यासकर्मक्रमरुचिरत्वचः सादिभिः शोभमानाः ।
शस्तास्तीक्ष्णाङ्कुशाग्रप्रगुणितशिरसः श्रेणयो वारणानां
मेहद्भिः शीकराम्भःस्तबकितककुभः केतुभिः संपतन्ति ॥५८॥

शिष्यः । इदोवि एदे उत्तुङ्गलाङ्गूलग्गालिङ्गिअगअणङ्गणु-च्छङ्गा घणघोरघुरघुराघोसघग्घरिज्जन्तगलगुहाकुहरप्फारफुल्लगल्लविदुरिल्ला विज्जुप्पुञ्जपिञ्जरिदविट्ठिच्छडाकडक्ख-दुप्पेच्छा सहसत्ति सीहसंहा ओदरन्ति ‡ ।

पुलस्त्यः । इदमपि द्विरदास्त्रप्रतिद्वन्द्वि पञ्चाननास्त्रमामन्त्रितं जामदग्न्येन यतः ।

गुञ्जापुञ्जारुणाक्षैर्धुतविकटसटासंकटस्कन्धबन्धै-
र्विभ्रद्भिर्बभ्रु गात्रं खरनखरशिखाश्रेणिनिर्याणरौद्रैः ।
एतैः कण्ठप्रणालीप्रणयिघुरघुराघोरनिर्घोषनिघ्नै-
र्निर्विघ्नं सिंहसंघैरिदमतिरभसात्क्रान्तमेवान्तरिक्षम् ॥५९॥

सर्वे साकूतम् । एतदेतदेतयोरन्तरे भवामः । शिष्यस्तदन्तरे हस्तमुद्यम्य ।

विरम भार्गव संहर संगरं
त्यज धनूंषि दशापि दशानन ।
विवहते न परस्परवैशसं
स भवतोर्भगवान् वृषभध्वजः ॥ ६० ॥

रावणः । सविषादं सो ऽयं दिधक्षोर्दोषपावकस्य गरिमसारः सीकरासारः । विमृश्य ।

वीरः स भार्गवमुनिः स च राक्षसेन्द्रो
यो ऽयं द्विधा प्रवितितो यशसां प्ररोहः ।
कस्मान् न वाञ्छति मया स समष्टमूर्ति-
रेकायनं त्रिजगति क्रियमाणमीशः ॥ ६१ ॥

जामदग्न्यः । सावज्ञम् ।

न्यक्कारो गुरुकार्मुकस्य कुरुते मां वीरवर्गे पुनः
साक्षाद्भृङ्गिरिटिर्गिरा पशुपतेराज्ञापयत्येव च ।
हा तत्किं करवै किमन्यदथवा याचे महीमन्तरं
येन स्यां सशरासनः सपरशुः कालाग्निरुद्रातिथिः ॥६२॥

इतरे तदेव पठन्ति । रावणः । भार्गवभार्गव देवादेशान्निवर्तसि तदिदमापृच्छसे गमनाय ।

जामदग्न्यः । यथात्थ निवर्तसि तदेव प्रेक्ष्यसे । इतरे प्रियं नः प्रियं नः ।

नेपथ्ये । भगवन् भार्गव तत्रभवत्या परमे ब्रह्मणि वर्तमानया मैत्रेय्या लोकयात्रापरतन्त्रया च कात्यायन्या सम समुपरतकल्को याज्ञवल्क्यस्त्वामाह ।

अतिथिरसि किमन्यद्देवदेवो गुरुस्ते
वयमपि च सदाराः साग्नयो ऽस्मिन् वसामः ।
तदुपसर गृहानस्त्वं भृगोः पुत्रभाण्डं
बहुपरिचितभीष्टाः सन्त्वनध्यायचेष्टाः ॥ ६३ ॥

जामदग्न्यः । यथाह सूर्यशिष्यः ।

इति निष्क्रान्ताः सर्वे ।

॥ रामरावणीयो नाम द्वितीयो ऽङ्कः ॥

कान्तं नियोज्य प्रणयादभिसारिकायाः
सोत्कण्ठमेत्य रहसि प्रियमीक्षयन्त्याः ।
हासप्रभा घनतमो यदि नाशयेत् त्वं
प्राप्यस्तदेव सुषमैकपदं निकुञ्जे ॥ २१ ॥

---

* किं पुनरित एता अखर्वदर्पपिण्डितशिखासङ्कुलपटीकृतचित्रभानवस्तावणोपनतदाहोत्तरणतारतरजात्यकाञ्चनमयकेतुदण्डमण्डल्यो ऽमन्दस्वच्छन्दसंपतितजटिलज्वालाजालनार्यविशेषसमुज्ज्वलदग्निराशिवर्णसंस्थितध्वजपटाडम्बरिण्यो निबिडोष्मप्राग्भारपरिगमेष्यम्लायमानसरसोत्पलाविच्छिन्नकनककोकनदपरिकरेण च विराजमाना विमानपङ्क्त्यो गगनप्रान्तेभ्यो झटित्यपसरन्ति ।

† प्रेक्षध्वं प्रेक्षध्वम् । इत एता अमन्दसिन्दूरसुन्दरितकुम्भप्राग्भारभासुराः प्रचण्डमुण्डमण्डलीमण्डितशुण्डादण्डडम्बराड्डामराः प्रवृत्तमदधाराधोरणीनीरन्ध्रनिरुद्धरेणुरमणीयसरण्यो गलगुहानिकुञ्जपुञ्जितगर्जितनिर्जितजलदजालस्तनितविस्तरा दीर्घपट्टघटा अवतरन्ति ।

‡ इतो ऽप्येते उत्तुङ्गलाङ्गूलाग्रालिङ्गितगगनाङ्गणोत्सङ्गा घनघोरघुरघुराघोषघर्घरगलगुहाकुहरस्फारफुल्लगल्लव्यतिकरा विद्युत्पुञ्जपिञ्जरितदृष्टिच्छटाकटाक्षदुष्प्रेक्ष्या सहसैव सिंहसङ्घा अवतरन्ति ।

Digitized by Google

नैतद्विहङ्गरणितं तव कुञ्ज किञ्चित्
शोभाकरं भवति येन तमोऽधिवासः ।
कान्ता समेत्य यदि नाथमुपेत्य किञ्चित्
सम्भाषयेत् स्मितपुरस्तव सातिशोभा ॥ २२ ॥

गर्वं न तेन वह पादप चित्तमध्ये
छायाप्रदो यदि च तापचयापहन्ता ।
दूरावलोकनपराङ्गततापचीर्ण्या-
श्छायासु नो निवसतिर्नवहेमवल्ल्याः ॥ २३ ॥

किं रे नवद्रुमशलयम्परिदर्शनीयं
प्रेम्णा तनौ वहसि भूषणबुद्धितोऽग ।
जानीहि भूषणमिदं न पुनः स्वकीयं
कामस्य सर्वजयिनोऽग्निमयः शरोऽसौ ॥ २४ ॥

नूनम्मतिर्भ्रमति सम्प्रति मे नृपस्ते
रे पाप पादप पलाश सुरञ्जितोष्ठः ।
नोचेत् कथम्भवत नवीनपलाशशोभां
धृत्वा विराजसि पुनर्न भयं गतोऽसि ॥ २५ ॥

रेरे कुसुम्भ कुसुमोच्चयवर्षणेन
क्षेमं तनोषि कुसुमेषु समागमेषु ।
वेधं न ते यदिह दाहमुपेष्यसि त्वं
दाहज्ज्वलद्विरहिदेहवहाद्रुधाग्नेः ॥ २६ ॥

यस्यैव पुष्पनिचयः पथिकोत्तमाङ्गं
छित्वा तदीयरुधिरावलिलोहिताङ्गः ।
जाने न साम्प्रतमहो महतां समाजे
तस्य प्रसूननिचयः किमशोकनामा ॥ २७ ॥

किंवा वियोगदहनैः परिदग्धदेहान्
पान्थान् विनाश्य सविधागममाचकेण ।
यस्मात् त्वदीयनिखिलाधिविनाशहेतुः
किन्तेन पुष्प भवसि त्वमशोकनाम ॥ २८ ॥

रेरे विहङ्ग गणरागभराङ्कुरागं
गीतं करोषि जनमोहनकारणं किम् ।
मुग्धा वयं न रमणीयमवक्रभाव-
बालाप्रतीपवचनं श्रुतमेव यस्मात् ॥ २९ ॥

पुण्ये वने स्थितिकरः फलपत्रसेवी
शाखाऽवलम्बनकरो द्विज एव नाम्ना ।
नो सञ्चयी विहग तेन निजद्विजत्वं
सार्थङ्करोषि पथिकाङ्गविकर्तनैः किम् ॥ ३० ॥

उत्कूजयन् किमहो परिवर्द्धमानम्
सर्वाङ्गतस्समभिदर्शयसि स्वकीयम् ।
मा गर्वमुद्वह निजं त्वमरण्यवासि-
कान्ताकुचौ विलसतो जितहेमशृङ्गौ ॥ ३१ ॥

शान्त्यास्पदं वदति काननमेतदज्ञः
कालस्य सर्वजयिनो रणभूमिमेव ।
नो चेद्विलोक्य सहसा तरुणो बलीयान्
मूर्च्छामुपैति किमहो परिकम्पिताङ्गः ॥ ३२ ॥

यस्मिन् लता च भुजगी विटपी कृतान्तः
शीतानिलोऽनलमयः कुसुमं च तीक्ष्णम् ।
वज्रस्वनोपमविहंगरवः प्रशान्त्यै
केनाश्रितं मुनिभिरेतदहं न जाने ॥ ३३ ॥

नासौ सुहृन्मनसिजस्तव काननाग
प्रच्छन्नशत्रुरतितीक्ष्णतरोऽनिवार्य्यः ।
यस्यैव बाणदहनस्तवदाहहेतु-
र्दावानलो नहि पुनस्तरुघर्षणोत्थः ॥ ३४ ॥

रे तीक्ष्ण कानन परं तव सुन्दरत्वम्
श्रुत्वा विलोकयितुमत्र समागतोऽहम् ।
दूरेऽस्तु ते परमसुन्दरताविलोको
मा मां विनाशय कृतान्तरदप्रकाश ॥ ३५ ॥

पान्थस्य कण्टककलनाद्रुधिराक्तदन्त-
व्याकीर्णदन्तनिचयान् कुसुमच्छलेन ।
पान्थान् विकर्तयितुमुद्यतरान् प्रकाश्य
यद्राजसे विपिन किं तदहं न जाने ॥ ३६ ॥

यस्मिन् द्विजाः प्रचपला मधुपानमत्ता
यस्मिन् सदा मृगदृशां भवति प्रचारः ।
यस्मिन् पलाशनिकरः परितः प्रदीप्तः
किन्तद्वनं भवति शान्तिभृतां निवासः ॥ ३७ ॥

रे पञ्चबाण निशितान् निजपञ्चबाणान्
धृत्वा वसंतसचिवो विहगस्वनेन ।
मासं विधेहि जनतां जयशब्दमुच्चै-
र्योगेश्वरः स्मरहरः सविधे प्रदीप्तः ॥ ३८ ॥

दूरं प्रयाहि मदन त्वमितो गृहीत्वा
स्वीयं समस्तमभितापकरं हि वस्तु ।
नो चेत् समेत्य कथयाम्यधुनैव देवं
योगेश्वरं त्रिपुरनाशकरं स्मरारिम् ॥ ३९ ॥

एवं वदन् कृशतनुर्विरहाधिमग्नो
गत्वा पुरान्तकपदं पुनरेव दग्धः ।
तत्रस्थकामपरिवर्द्धनकल्पलताख्ये-
र्दोषाज्जुगुप्सति विशुष्कतरोष्ठभागः ॥ ४० ॥

॥ रामनगरराजधानी ॥

TO THE EDITOR OF THE PANDIT.

Sir,

In Mr. Chambers' account of the Ruins at Mavalivaram (The Seven Pagodas') published in the first volume of the Asiatic Researches and also in the notes by Mr. Gubbins, descriptive of the same locality, published in Vol. XXII of the Journal of the Asiatic Society of Bengal, the following couplet is quoted from the Mahabharata :—

मद्रायाः दक्षिणे भागे योजनानां शतद्वयं ।
पञ्चयोजनमात्रेण पूर्वाब्धेस्तीव पश्चिमे ।

Will any of your correspondents assist me in verifying this quotation, by informing me where the lines are to be found?

Yours faithfully,
M. W. C.

RAGHU.

(Raghuvansa, III., 38.)

Watched by young nobles, in the Prince's charge,
The sacred steeds have safely roamed at large;
None dared to check their course, where'er they sped,
And nine and ninety now have duly bled.
But INDRA, fearing for his shaken throne,
Jealous of rites he ever deemed his own,
Came down in fury from his home, the skies,
Veiling his glorious form from human eyes,
And from the keepers stole away the steed,
Loosed by the Priest, where'er he chose, to feed.
In sad surprise the baffled guardians stood,
But straight, approaching from the neighbouring wood,
The Cow, the holy Cow, to aid them came,
And cheered their bosoms, for they knew her fame.
Quick on his eyes young RAGHU, honoured lord,
Her holy milk that streamed to help them, poured;
And sights not given to the eyes of men
Lay all disclosed before his piercing ken.
He saw the God whose furious bolt of yore
From their rough sides the mountains' pinions tore,
Urging away, away in rapid course,
Tied to his car, the consecrated horse.
He saw 'twas INDRA by his coursers' hue,
His thousand eyes that never close, he knew;
Then, with a voice that made the welkin ring,
The fearless youth addressed the heavenly king:
"Lord of the Gods, men say thou holdest dear
The gifts and sacrifice we offer here.
Then why, O INDRA, doth thy soul delight
To check my father in this holy rite?
Lord of the Worlds, thy fury should oppose
Not kings the friends of worship, but its foes.
For if thou check the offerings of the just,
The holy Law is trampled in the dust.
Then listen, INDRA, and release the steed
My father destines in the rite to bleed:
For holy guides, who show the righteous way,
From virtue's path themselves will never stray."
His fearless words fill INDRA with surprise;
He turns his chariot back, and thus replies:—
"True are thy words, O royal youth, but know
That Glory's lovers guard it from the foe:
And by this rite thy father seeks to shine
In dazzling splendour that shall dim e'en mine.
As one Chief Spirit, VISHNU is adored,
And SIVA worshipt as the one Great Lord;
So in this honour none with me may vie:
Lord of the hundred Slaughtered Steeds am I.
Therefore this courser that should bleed to-day,
Like ancient KAPIL will I drive away.
Then cease thy labour, be not over-bold,
Nor share the fate of SAGAR's sons of old!"
Then cried the Prince, unconscious he of fear:
"Prepare for battle if thou wilt not hear!
Low on this plain must vanquished RAGHU bleed
Ere thou in triumph bear away the steeds."
He spoke: an arrow from his side he took,
While fair as SIVA's was the hero's look.
Straight to the mark the golden arrow sped,
And fixed in INDRA's heart its glittering head.
The wounded God his bow in anger bent,
Bright as that arch that spans the firmament.
Through RAGHU's bosom pierced the vengeful shaft
And drank of human blood its first sweet draught,
For in the furious battles waged before
Its thirst was quenched with hideous demons' gore.

(To be continued.)

A TRILINGUAL DICTIONARY; being a comprehensive Lexicon in ENGLISH, URDÚ and HINDÍ, exhibiting the syllabication, pronounciation, and etymology of English words, with their explanation in English, and in Urdú and Hindí in the Roman character, by Mathurá Prasáda Miśra, Head Master Queen's College, Benares.

"After a thorough examination of Mathurá Prasád's Dictionary, I consider it to be a remarkable advance on any work of the same kind that has preceded it. Covering as it does, and very adequately, the ground of two leading Indian languages, it may be regarded as one of the most valuable linguistic helps to the Indian official that has appeared for many years; and it is, of course, equally valuable to the Indian Student of English." *Dr. Hall.*

May be procured direct from us, by Book post; from any bookseller in Calcutta, Madras, or Bombay; or from Messrs. Trübner & Co., London.—*Price Rs.* 16.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 27. Benares August 1st, 1868. Vol. III.

॥ ईश्वरप्रत्यभिज्ञासूत्रविमर्शिन्याः ॥

॥ षष्ठसप्तमे आह्निके ॥

स्वात्मा भेदघनान्भावांस्तदपोहनटङ्कतः ।
छिन्दन्यस्स्वेच्छया चित्ररूपकृत्तं स्तुमः शिवम् ॥

एवं स्मृतिशक्तिर्ज्ञानशक्तिश्च निरूपिता । अथ तदुभयानुग्राहिण्यपोहनशक्तिर्वितत्य श्लोकैकादशकेना "हंप्रत्यवमर्शो यः प्रकाशात्मे" त्यादिना "सिद्धं सर्वस्य जीवत" इत्यन्तेन निर्णीयते । तत्र श्लोकेन प्रत्यवमर्शो न विकल्पो विशेष इति सूच्यते,ततः श्लोकेन शुद्धे ऽहंप्रत्यवमर्शे ऽपोहनव्यापारासम्भव उच्यते,ततः * स्वदृष्टावेव तदुपपत्तिरिति श्लोकेन,ततोपि द्वयेनाशुद्धस्याहमित्यवमर्शस्य विकल्परूपता,ततः श्लोकेनानुसन्धानस्यापि विकल्पता,एवंभूतानुसंधानादिरूपमेव परमेश्वरस्य स्रष्टृत्वमिति श्लोकेन,ततः प्रकृते चिदात्मन्यर्थावभासस्य सत्तोपसंह्रियते श्लोकेन, ततो द्वयेन तस्यैवार्थावभासस्यानुभवस्मरणादौ वैचित्र्यमुच्यते, तदुक्तिश्च प्रकृतायामपीश्वररूपस्वात्मप्रत्यभिज्ञायामुपयुज्यत इति श्लोकेने,त्याह्निकस्य तात्पर्यार्थः ॥

अथ ग्रन्थार्थो व्याख्यायते ।

उक्तमिदं स्वभावमवभासस्य विमर्श इति तत्र विमर्शो ऽभिलापात्मना शब्देन योजित एव, तद्योजना कृतं च विकल्परूपत्वं शुद्धेपि परमेश्वरे प्राप्तं,न चैतदिष्टं, तस्य संसारपदे मायात्मन्युपपत्तेरित्याशङ्क्याह ।

(१) अहंप्रत्यवमर्शो यः प्रकाशात्मापि वाग्वपुः ।
नासौ विकल्पः स ह्युक्तो द्वयाक्षेपी विनिश्चयः ॥

प्रकाशस्य विशुद्धसंविद्रूपस्य देहादिसंस्पर्शैरनाविलीभूतस्य य आत्मा जीवितभूतः सारस्वभावो विच्छेदशून्यो ऽन्तरभ्युपगमकल्पो ऽनन्यमुखप्रेक्षित्वस्वातन्त्र्यविश्रान्तिरूपः अहमिति प्रत्यवमर्शः असौ विकल्पो न भवति, विकल्पत्वाशङ्कायां बीजं दर्शयति।वाग्वपुरिति। विषयरूपाच्छ्रोत्रग्राह्याच्छब्दादन्य एवान्तरवभासमानः संविद्रूपावेशी शब्दनात्माभिलापो वागित्यनेनोक्तः, वक्त्यर्थं स्वाभ्यासेन सोयमित्यभिसम्बन्धेन, "यदि वाग्वपुः कस्मान्न विकल्पः" आह, * न ह्यस्य विकल्पलक्षणमस्ति । तथाहि । विविधा कल्पना विविधत्वेन च शङ्कितस्य कल्पो ऽन्यव्यवच्छेदनं विकल्पः, विविधत्वं च वह्न्यावनग्निसंभावनासमारोपनिरासे सति भवद्द्वयं वह्न्यवन्हिरूपमाक्षिपति, तेन विकल्पे ऽवश्यं तच्च निश्चेतव्यम्,अतच्च व्यपोहितव्यं भवति ॥

तथा च ।

(२) भिन्नयोरवभासो हि स्याद्घटाघटयोर्द्वयोः ।
प्रकाशस्यैव नान्यस्य भेदिनस्त्ववभासनम् ॥

घटे हि दृष्टे घटस्थानएवाघटोपि योग्यदेशाभिमतस्यानाक्रमणशीलो विज्ञानजनकः स्वकारणोपनीतः सम्भाव्यते घटादिस्वभावः, अतो घटाघटयोर्द्वयोरवभासस्य संभावनात्समारोपः सावकाशीभवति । अघटस्य सत्यारोपे निषेधलक्षणो ऽपोहनव्यापार इति तदनुप्राणिता विकल्परूपता घट इत्यस्य निश्चयस्य, लिङ् सम्भावनायाम् । यस्त्वयं प्रकाशो नाम तस्य

* स्वमते ।

* विकल्पलक्षणानाक्रान्तिश्च भिन्नयोरवभासो हीत्यनेनोपपाद्यते । तदुत्थापक एष संदर्भः ।

Digitized by Google

स्थाने यः सम्भाव्यते स तावदप्रकाशरूपो न भवति,तुल्यकक्ष्यस्य हि सम्भावनं भवति,न च यत्प्रकाशेन कर्तव्यं तदप्रकाशस्य कदाचिद्दृष्टं, सम्भावनारोपणादिबलादेव चास्याप्रकाशरूपत्वं विघटेत। अतः प्रकाशतुल्यस्यान्यस्याप्रकाशरूपस्य भेदिनस्तत्तुल्यकक्ष्यस्यापोहनात्मकभेदनव्यापारासहिष्णोरवभासनमेव नास्ति तदभावे कस्यापोहनम्, * अवभाससम्भवे ऽपि प्रकाशरूपत्वमेव, न च प्रकाशस्य स्वरूपदेशकालभेदो, येन द्वितीयः प्रकाश एकस्मात्प्रकाशादपोह्येत, इति। हीति, यस्माद् एवं, ततो द्वयाभावादपोहासम्भवे विकल्परूपत्वाभावाच्चिन्मात्रे परामर्शात्मनि अहमिति प्रत्यवमर्श एव न तु विकल्पः ॥

"ननु घटे परिनिष्ठितरूपे दृष्टे † तद्दर्शनमुपजीवता विकल्पेन कथमघटस्य निषेधनं क्रियते, नह्यघटस्य केन चिन्नामापि गृहीतम्, अघटवासनापि घटे दृष्टे कथंकारं प्रबुध्यताम्" सत्यमेवं शाक्यः पर्यनुयोज्यो, न तु वयम् । यतः ।

(३) तदतत्प्रतिभाभाजा मात्रैवातद्व्यपोहनात् ।
तन्निश्चयनमुक्तो हि विकल्पो घट इत्ययम् ॥

इह प्रमाता नाम प्रमाणादतिरिक्तः प्रमासु स्वतन्त्रः संयोजनवियोजनाद्याधारवशात्कर्ता दर्शितः । तस्य च प्रमातुरन्तः सर्वार्थावभासश्चिन्मात्रशरीरोपि तत्सामानाधिकरण्यवृत्तिरपि दर्पणनगरन्यायेनास्तीत्यप्युक्तम् । एवं च तत्प्रतिभां घटाभासमतत्प्रतिभां चाघटाभासं प्रमाता भजते सेवते तावत्। तदविकल्पदशायां चित्स्वभावोसौ घटश्चिद्वदेव विश्वशरीरः पूर्णः, न च तेन के चिद्व्यवहाराः,तन्मायाव्यापारमुल्लासयत्पूर्णमपि खण्डयति भावम् । तेनाघटस्यात्मनः पटादेश्चापोहनं क्रियते निषेधनरूपं, तदेव व्यपोहनमाश्रित्य तस्य घटस्य निश्चयनमुच्यते घट एवेति * । एवार्थस्य सम्भाव्यमानापरवस्तुनिषेधरूपत्वात् । एष एव परितश्छेदात्तत्तथाकल्पात्परिच्छेदः, "हीति" यत एवं तस्माद्युक्तं द्वयाक्षेपी विकल्प इति,पूर्वश्लोकोक्ते वस्तुद्वये श्लोकद्वयेन हेतू क्रमेणोक्तौ,यस्मादेवं विकल्पः ततोहमिति शुद्धो विमर्शः न विकल्प इति श्लोकत्रयेण महावाक्यार्थः । शाक्यैरपि प्रमातुरेवायं व्यापार उक्तः † एकप्रत्यवमर्शाख्य इत्यत्र प्रपत्तेति स्वयमिति च वदद्भिः, स त्वेतैः कथं समर्थ्य इत्यास्तामेतत् ॥

नन्वेवमहमित्यपि प्रत्यवमर्शेनाहंरूपस्य घटादेः प्रतियोगिनो ऽपोहनीयस्यापोहे विकल्परूपता कथं न स्यादित्याशयेनाह ।

(४) चित्तत्वं मायया हित्वा भिन्न एवावभाति यः ।
देहे बुद्धावथ प्राणे कल्पिते नभसीव वा ॥
प्रमातृत्वेनाहमिति विमर्शोन्यव्यपोहनात् ।
विकल्प एव स परप्रतियोग्यवभासजः ॥

अहमित्यवमर्शो द्विधा, शुद्धो मायीयश्च, तत्र शुद्धो यः संविन्मात्रे विश्वाभिन्ने विश्वच्छायाच्छुरितस्वच्छात्मनि वा, ऽशुद्धस्तु वेद्यरूपे शरीरादौ, तत्र शुद्धे ऽहंप्रत्यवमर्शे प्रतियोगी न कश्चिदपोहितव्यः सम्भवति, घटादेरपि प्रकाशसारत्वेनाप्रतियोगित्वेनानपोह्यत्वादित्यपोह्याभावे कथं तत्र विकल्परूपता, अशुद्धस्तु वेद्यरूपे शरीरादौ अन्यस्माद्देहादेर्घटादेश्च व्यवच्छेदेन भवन्विकल्प एवेति वाक्यार्थः । अक्षरार्थस्तु चित्तत्वं प्रकाशमात्ररूपं हित्वा सदप्यपहस्तनया ऽप्रधानीकृत्य भिन्ने देहादावहमेव देहादिनीलादौ प्रमेये प्रमाता इत्यभिमानेन योहं स्थूल इत्यादिविमर्शः स विकल्प एव, न तु शुद्धं प्रत्यवमर्शमात्रम् । अत्र हेतुः, परो द्वितीयो देहादिर्घटादिश्च प्रतियोगी तुल्यकक्ष्यो ऽन्योन्यपरिहाराच्च विरुद्धस्तस्य यो ऽवभासः समारोपणलक्षणः तस्माज्जातोसौ तन्निषेधानुप्राणितो ऽहमित्यवमर्शो जातः अहं स्थूलो न कृशो न घटादिरिति शुद्धप्रकाशरूपस्यापहस्तनमेव देहादेर्भेदे हेतुः, तदपहस्तने तु परमेश्वरस्य स्वात्मप्रच्छादनेच्छारूपाभेदाप्रकाशनं भ्रान्तिरूपं प्रति स्वातन्त्र्यरूपा मायाशक्तिर्हेतुः, चिद्रूपस्य

---

* अयमाशयः । यद्रूपपुरस्कारेण विकल्पो वस्तु विषयीकरोति तद्रूपाभाववद् विकल्प्यमानवस्तुसजातीयं चापोह्यते । यथा घट इत्याकारके विकल्पे घटत्वाभाववद् दृश्यत्वेन घटसजातीयं पटादिकम् । अहमित्याकारकविमर्शस्तु प्रकाशत्वेन स्वरूपतो वा परमशिवमवभासयन् नापोहव्यापारं स्वस्मिन् धारयितुं प्रभवति । परमशिवात्मकप्रकाशसजातीयस्य तदितरस्याभावेन व्यवच्छेद्यस्यैवासंभवादिति ।

नन्विदमिति द्वितीया शाखा भवत्यहमित्याकारकविमर्शस्य तुल्यकक्ष्येत्यस्ति संभवो व्यवच्छेद्यस्येत्याशङ्कामपाकरोति । अवभाससंभवे ऽपीति । सर्वो हि भावराशिः प्रकाशस्वरूपान्तर्निमग्न एवेतीदंविमर्शो ऽपि प्रकाशस्वरूपतया संग्राह्यकोटिप्रविष्ट एवेति नास्ति व्यवच्छेद्यस्य संभव इति भावः ।

अस्य चाहंविमर्शस्य न यत्किंचिद्वस्त्ववभासरूपत्वं, येन वस्त्वन्तरावभासो ऽस्य व्यवच्छेद्यः स्याद्, अपि तु कृत्स्नवस्त्ववभासात्मकत्वमेव, अन्यथा परमशिवात्मकत्वासंभवात्, परमशिवात्मकविमर्शे एवापोहनव्यापारासंभवस्य प्रतिपादनीयत्वात्, तदनात्मके घटइत्यादिविमर्शे ऽहंविमर्शैकदेशकल्पे ऽपोहनव्यापारस्येष्टत्वादिति प्रतिपादयति । नचेत्यादिना । स्पष्टीभविष्यति चैतच्चित्तत्त्वं मायया हित्वेति सूत्रव्याख्यायाम् ।

† निर्विकल्पकम् ।

* अहंविमर्शस्यान्तर्मुखस्य विषयप्रवणतावसरे सर्वस्यैव विश्वस्य तदन्तर्भुडितत्वे ऽपि सामग्रीविशेषबलेनाघटोन्मुख्यप्रतिबन्धपुरस्सरं यद् घटोन्मुख्यमेव भवति तदेव पटादेर्व्यपोहनम् ।

† एकप्रत्यवमर्शाख्य इति श्लोके प्रपत्तेति स्वयमिति च पदद्वयं वदद्भिरुक्त इत्यर्थः । तथा च श्लोकः ।

एकप्रत्यवमर्शाख्ये ज्ञानएकत्र हि स्थितः ।
प्रपत्ता तदतद्धेतून् भावान् विभजते स्वयम् ॥

इति ।

चापहस्तनं देहादेरेवात्यन्तवेद्यभावस्य भिन्नस्यैव उपपत्तिशून्यतयैव प्रमातृत्वाभिमानः । तथा च देहाभिमानभूमिकायां स्थिताश्चार्वाकाश्चैतन्यविशिष्टः कायः पुरुष इति कायमेव प्राधान्येनाहुः । स्त्रीबालमूर्खाणां तथाभिमानात् । ततो ऽपि विवेकवन्तः पाकजोत्पत्तिपरिणामादिबलादस्थिरं शरीरं मन्वानाः प्राणशक्तिसमधिष्ठानेन च विना विकारशतावेशं शरीरस्य पश्यन्तो बुभुक्षापिपासायोगयोग्यं प्राणमेवात्मानं के चन श्रुत्यन्तविदो मन्यन्ते । ततो ऽपि समधिकविवेकभाजः प्राणस्याप्यनित्यत्वादनुसंधानयोग्यतामपश्यन्तो ज्ञानसुखाद्याश्रयभूतां बुद्धिमेव काणादप्रभृतय आत्मानमाहुः । अपरे तु तस्या अपि योगिदशायां वेद्यभावादपरत्वं मन्यमानाः असंवेद्यपर्वरूपं यत्र किं चिद्रूपं सकलवेद्यराशिविनिर्मुक्तं शून्यत्वान्नभस्तुल्यं न तु महाभूताकाशस्वभावं प्रमातृतत्वं शून्यब्रह्मवादिसांख्यप्रभृतय आहुः । तस्मिन्नपि वेद्ये शून्यान्तरं तत्रापि शून्यान्तरमिति यावद्भेदस्तावत्कल्पना न त्रुट्यति, तदर्थमाह, कल्पित इति, न चानवस्था परमार्थप्रकाशबलेन सर्वस्य यतः प्रकाशो न तु देहादिवशात्तथात्वाभिमानमात्रं देहादिः प्रमातेति संकोचमात्ररूपं चित्तत्वं शून्यं भूतलं यथा घटाभावः संकोचोपरिवेद्यांशच्छायाच्छुरितं तु चित्तत्वमेव बुद्धिप्राणदेहादीति । अमी एव च भूमिकाविशेषा उत्तरोत्तरमारोहतां योगिनां जाग्रदादितया * पिण्डस्थादितया चागमेषु भण्यन्ते । अपहस्तनं च व्याख्यास्यते ।

कलोद्गलितमेतच्च चित्तत्वं कर्तृतामयम् ।
अचिद्रूपस्य शून्यादेर्मितं गुणतया स्थितम् ॥

इति । तत्स्थितमशुद्धो ऽहमित्यवमर्शो विकल्प एव ॥

† द्विविधो ऽपि चायमहंप्रत्ययो द्विधा, अनुभवमात्ररूपश्चानुसंधानात्मा च, ‡ शिवात्मन्यहमिति सदाशिवात्मन्यहमिदमिति शुद्धो द्विधा, अशुद्धो ऽप्यहं स्थूल इति योहं स्थूलो ऽभवं सोहं कृशो बालो युवा स्थविरः स एवाहमित्यशुद्धोपि द्विविधः, तत्र शुद्धे विकल्परूपत्वमप्रतिष्ठमेवेत्युक्तम्, अशुद्धे त्वनुभवरूपे विकल्पत्वमुपपादितम्, अशुद्धे ऽपि त्वनुसंधानात्मकतया ऽभेदस्य प्रस्फुरणात्काश्चिदविकल्पकत्वं शङ्केत, तस्य व्यामोहं व्यपोहयितुमाह ।

(५) कादाचित्कावभासेया पूर्वाभासादियोजना ।
संस्कारात्कल्पना प्रोक्ता सा ऽपि भिन्नावभासिनि ॥

देहे इत्यादि वर्तते कादाचित्कः कदाचिद्भवो नियतदेशकालाकारोवभासो यस्य देहादेः स्वलक्षणरूपस्य तत्र या पूर्वावभासेन बालादिशरीराभासेन योजना योहं बालः स एवाद्य युवेत्यनुसंधानमादियहणादुत्तरेण भाविना ऽऽभासेन सह योजना स्थविरो भविता ऽस्मीति सा योजना सर्वा कल्पना विकल्प एव, न तु शुद्धः प्रत्यवमर्शः । अत्र देहादेर्विशेषणं हेतुत्वाशयेन, यतो भिन्नावभासित्वमेव देहादेस्तदानीमप्यविच्छिन्नम् । यदि हि तस्य देहादेः सर्वतः पूर्णत्वमवच्छेदहीनत्वं पश्यन्ननुसंधानमहमिदमिति विदध्यात् तदियं सदाशिवभूः केन विकल्पास्पदत्वेन भण्येत, यावता विच्छिन्ने एव सोनुसंधिः । भिन्ने ऽपि कथमनुसंधानमिति चेदाह । संस्कारात् । प्राक्तनानुभवकृतवासनाप्रबोधजस्मृतिवशाद् इति यावत् । प्राणे बलाबलवशादनुसंधिः, बुद्धौ ज्ञानसुखादिमारतम्यात्, शून्ये वैतत्यावैतत्ययोगाद्, अयमपि विकल्प एव । एवं स एवायं घट इति घटानुसंधानेपि विकल्पत्वं मन्तव्यम् । किं त्वेतास्वनुसंधानभूमिष्ठाधिक्येन विद्याशक्तिरचिरद्युतिवद्दुद्दीप्यत इति तासां परपदपरिशीलनप्रथमकल्पाद्युपायत्वमभ्युपागमन्गुरवः ॥

न च देहादीनां पूर्वपूर्वप्रमातृवेद्यता, येन प्रमातुरप्रकाशे प्रमेयं न भाति, तत्प्रकाशश्च न पूर्वप्रकाशं विना सो ऽपि न प्रमात्रन्तरप्रकाशं विनेत्यनवस्था स्या,दपि तु विशुद्धप्रकाश एव विश्वस्य प्रकाश इति निरूपयन्नुक्तयुक्त्या सदैव सृष्ट्यादिशक्त्यवियोगो ऽपि भगवत उक्तो भवतीति दर्शयति ।

(६) तदेवं व्यवहारे ऽपि प्रभुर्देहादिमाविशन् ।
भान्तमेवान्तरर्थौघमिच्छया भासयेद्बहिः ॥

यत्पूर्वं दर्शितं देहे बुद्धावित्यादि तदेवमुपपद्यते, कथम्, यदि व्यवहारे मायापदे देहप्राणादिमपि प्रभुरेव प्रकाशपरमार्थ इच्छया मायाशक्तिरूपया ऽऽविशन्देहप्राणादिप्राधान्येन स्वरूपं प्रदर्शयन्नन्तः संविन्मात्रे भान्तमहमित्येवंरूपमर्थौघमिच्छयैव बहिरिदमिति भासयति, तत एतदुपपद्यते । अन्यथा त्वनवस्था स्यात् । हेतौ लिङ् । अपिशब्द एवशब्दश्च भिन्नक्रमौ । यदेतावदुक्तं, तदिति, तस्माद्धेतोरेवं जातं वक्ष्यमाणरूपं, किं तत्, यत्किल प्रभुः परस्परं व्यवहारकाले क्रयविक्रयप्रेक्षाव्याख्यादौ चैत्रमैत्रादिसम्बन्धिनो देहप्राणादीनेकतया तावत्याभासे आविशन्नन्तर्भान्तमेवानुज्झितान्तःप्रकाशमेव सन्तं बहिरेकाभासतया भासयतीति सम्भाव्यत इत्येतज्ज्ञातम् । तेनतेन प्रमात्रा सहैक्यं सृज्यते, अन्येन प्रमात्रैक्यं

* पिण्डं कुण्डलिनी शक्तिः पदं हंसः प्रकीर्तितः ।
रूपं बिन्दुरित्युक्तो रूपातीतः परः शिवः ॥
इति पिण्डादिस्वरूपप्रतिपादको मण्डनसंग्रहस्थः श्लोकः ।

† शुद्धाशुद्धभेदात् ।

‡ अहमिति शुद्धो ऽहं स्थूल इत्यशुद्धश्चानुभवमात्ररूपौ । अहमिदमिति शुद्धो योऽहं स्थूल इत्यादिरशुद्धश्चानुसंधानात्मानौ ।

Digitized by Google

संह्रियते, घटादिमात्ररूपे स्थितिः क्रियते, पूर्णस्वरूपनिमीलनात्तिरोभाव आधीयते, तावत्याभासे ऐक्यावभासनपूर्णत्ववितरणादनुग्रहः क्रियते, तेन न केवलं महासृष्टिषु महास्थितिषु महाप्रलयेषु प्रकोपतिरोधानेषु दीक्षाज्ञानाद्यनुग्रहेषु भगवतः कृत्यपञ्चकयोगो यावत्सततमेव व्यवहारे ऽपि । यदुक्तम् ।

सदा सृष्टिविनोदाय सदा स्थितिसुखासिने ।
सदा त्रिभुवनाहारतृप्ताय स्वामिने नमः ॥

इति ।

प्रतिक्षणमविश्रान्तः ।

इति ।

प्राकाम्यमात्मनि यदा प्रकटीकरोषि
व्यक्तीः

इति च ॥

इहान्तरर्थावभासः स्थित एव तत्किं तत्र कारणान्तरचिन्तयेति प्रकृतं प्रमेयं, तत्सिद्धये उपपत्तिरुक्ता, तेन विनेच्छारूपः प्रत्यवमर्शो न स्यादिति, तत्प्रसङ्गात्प्रत्यवमर्शविकल्पादिस्वरूपमुपपादितमिति शिष्याणां धियं समाधातुं प्रकृतं प्रमेयमुपपादयन्नुपसंहरति ॥

(७) एवं स्मृतौ विकल्पे वाप्यपोहनपरायणे ।
ज्ञाने वाप्यन्तराभासः स्थित एवेति निश्चितम् ॥

प्रकाशात्मा परमेश्वर एव यतो देहादिप्रमातृताभिमानदशायामपि वस्तुतः प्रमाता, एवमित्यतो हेतोरिदं सिद्धं भवति, स्मरणे ऽपोहजीविते च विकल्पे ऽनुभवज्ञाने चान्तराभासः प्रकाशविश्रान्तः स्थित एव, नात्र संशयः कश्चित्, यदि देहादिरेव परमार्थप्रमाता स्यात्तच्छरीरस्य प्राणस्य धियः शून्यस्य वान्तर्घटादीति न किं चिदेतत् । घटादिपरिहारे च देहादेस्स्थितत्वात् । परमार्थप्रकाशस्तु सर्वंसह इति तदन्तर्विश्वमित्यनायाससिद्धमेतत् ॥

नन्वन्तराभासवर्गस्य बहिराभासनं यदि सर्वत्रास्ति कस्तर्हि स्मरणादावाभासभेदः, न चासौ न संवेद्यते, स्फुटादिप्रस्फुरणस्यानपन्हवनीयत्वादित्याशङ्क्याह ।

(८) किं तु नैसर्गिको ज्ञाने बहिराभासनात्मनि ।
पूर्वानुभवरूपस्तु स्थितः संस्मरणादिषु ॥

अनुभवज्ञानस्येदं नीलमित्यन्तराभासं बहिराभासयतः सोऽन्तर्भावाभासो नैसर्गिको निसृष्टः स्वातन्त्र्यादागतो न तु स्मरणादेरिवान्यज्ञानकृतवासनादिबलात्, स्मरणे उत्प्रेक्षणे प्रत्यक्षपृष्ठभाविन्यध्यवसाये च योन्तर्नीलाद्यवभासो बाह्यतया ऽवभासयितव्यो, नासौ स्वात्मीयो, ऽपि तु पूर्वानुभवसंस्कारजोसौ, तत्र संस्कारो नामानुभवस्य कालान्तरे ऽप्यनुवर्तमानता, अतो ऽसौ वर्तमानानुभवो यतो नीलाद्याभाससंभिन्न,स्ततस्तत्तादात्म्यापन्नं स्मरणाद्यपि तथा निर्भासते, तत एव स्मरणकालासंभवी स आभासस्तदनुभवपूर्वकालकलित एवेति स्वयं स्मरणादेर्निर्विषयत्वं गृहीतग्राहित्वं चोद्घोष्यते, एतदेवास्फुटत्वमिति सिद्धो ऽनुभवस्मरणादौ आभासभेदः । अन्तराभासवर्गस्य बहिराभासनाव्यवधानेन स्फुटत्वाव्यवधानेन तु तात्कालिकत्वाभावादस्फुटतेति ॥

नन्वनुभवज्ञानादैन्द्रियिकादन्यत्सर्वं ज्ञानं व्यवधानेन बहिराभासनरूपं प्राप्तमित्याशङ्क्य प्रविभागमाह ।

(९) स नैसर्गिक एवास्ति विकल्पे स्वैरचारिणि ।
यथाभिमतसंस्थाना भासना बुद्धिगोचरे ॥

यः प्रत्यक्षव्यापारमनुपजीवन्व्याक्षेपसारतया मनोराज्यसंकल्पादिर्विकल्पः स स्वैरं कृत्वा स्वप्रेरणेन परप्रेरणानैरपेक्ष्येण स्वातन्त्र्येण चरत्युदेति व्ययते च । तत्र यो बहिरवभासो नीलादेरन्तराभासमयस्य स नैसर्गिक एव, तथा ह्यपरिदृष्टपूर्वमपि श्वेतं दशनशतकलितकरयुगलयुक्तं दन्तिनमन्तः प्रमातृभूमौ स्थितं बहिरन्तःकरणभूमौ स्वच्छधीदर्पणात्मिकायां सविकल्पस्तात्कालिकमेवावभासयति ॥

अस्माच्चान्तराभाससम्भवसमर्थनप्रसङ्गागतादाभासभेदविचाराच्छास्त्रे यत्प्रयोजनं मुख्यतया ऽभिसंहितं स्वात्मनीश्वरप्रत्यभिज्ञानरूपं तदधिकरणसिद्धान्तनीत्या ऽनायाससिद्धमिति दर्शयति ।

(१०) अत एव यथाभीष्टसमुल्लेखावभासनात् ।
ज्ञान क्रिये स्फुटे एव सिद्धे सर्वस्य जीवतः ॥

यदिदं यथाभीष्टस्य बहिरसत्त्वादननुभूतस्यापि सम्यगुल्लेखनमवभासनं च विकल्पस्य प्रसङ्गाद्दर्शितमस्मादेव हेतोरिदमपि सिद्ध्यति, यः कश्चित्कीटो वा ब्रह्मा वा जीवनक्रियाविष्टस्तस्यावभासनरूपा ज्ञानशक्तिरुल्लेखनरूपा च क्रिया शक्तिर्नैसर्गिकी, ततस्तस्यां भूमौ व्यतिरिक्तेश्वरोपकल्पितपूर्वसिद्धसृष्ट्युपजीवनसम्भावनापि नास्तीति स्वमेवैश्वर्यस्फुटं प्रत्यभिज्ञेयं च जानाति करोति चेति ज्ञानक्रियास्वातन्त्र्यलक्षणम् । एकवचनेन सर्वस्य जीवजातस्य वस्तुत एकेश्वररूपतां सूचयतीति शिवम् ॥ ११ ॥

आदितः सूत्रश्लोकाः ६३ व्याख्याताः ॥

श्रीमदाचार्याभिनवगुप्तविरचितायामीश्वरप्रत्यभिज्ञासूत्रविमर्शिन्यामपोहनशक्तिनिरूपणम् ॥

॥ इति षष्ठमाह्निकम् ॥

Digitized by Google

अनन्तशक्तिरश्मीनां यदेकाश्रयसंश्रयात् ।
विचित्रचन्द्रिकोल्लाससंसिद्धिस्तं स्तुमः शिवम् ॥

एवं स्मृत्यादिशक्तीनां वितत्य स्वरूपमियता दर्शितं, यस्त्वत्र प्रमातुरपि स्वरूपमुन्मीलितं तत्तासामेव शक्तित्वं समर्थयितुं, नहि स्वतन्त्रं शक्तिस्वरूपं भवितुमर्हतीति, अधुना तु तासां शक्तीनामेक आश्रयः, स च तच्छक्तिसंयोजनादिस्वाच्छन्द्ययोगान्महेश्वरो, न तु जडस्वरूपवज्ञादिवद्ग्राहकपाचकादिशक्त्याश्रयमात्रमिति यदुभयमुपक्षिप्तं, "न चेदन्तः कृतानन्तविश्वरूप" इत्यत्र सूत्रे, तद्वितत्य निर्णेतव्यं, तत्रैकमाश्रयं निर्णेतुं "या चैषा प्रतिभे"त्यादि "व्यवहारोनुभूयते" इत्यन्तं चतुर्दशभिः श्लोकैराह्निकं प्रस्तूयते । तत्र श्लोकेनैक आश्रयः स्वरूपत उपदिश्यते, ततोपि द्वयेन व्यवहारः सर्वः सत्येकस्मिन्नाश्रये युज्यते नासतीत्यन्वयव्यतिरेकात्मा युक्तिरुच्यते, ततो व्यवहारस्वरूपं कार्यकारणभावतः, स्मरणतः, सत्यासत्यप्रविभागत,श्चेति संक्षिप्य श्लोकेन श्लोकाष्टकेन च प्रतिपाद्यते, ततः श्लोकेन सर्वार्थो निगम्यते इत्याह्निकार्थसंक्षेपः ॥

अथ श्लोकार्थो व्याख्यायते ।

यदुक्तं, सर्वस्य सिद्धे ज्ञानक्रिये जीवत इति तत्कथं, यावता ज्ञानादिव्यतिरिक्तः कोसावन्यो यस्य ते स्याताम्,क्षणादिदिशा हि दूषितस्तदाश्रयः "ततो भिन्नेषु धर्मेषु" इत्यादिना तदेतदाशङ्क्य स्वदर्शनदिशा तमेकं स्वरूपत उपक्षिपति ।

(१) या चैषा प्रतिभा तत्तत्पदार्थक्रमरूषिता ।
अक्रमानन्तचिद्रूपः प्रमाता स महेश्वरः ॥

प्रतिभाति घट इति यद्यपि विषयोपश्लिष्टमेव प्रतिभानं भाति, तथापि न तद्विषयस्य स्वकं वपु,रपि तु संवेदनमेव तत्तथा चकास्ति मां प्रतिभातीति प्रमातृलग्नत्वात् । तथा च वेदः । "न तत्र रविर्भाति नेन्दुतारकं नेता विद्युतो भान्ति कुतो ऽयंवह्निः तमेव भान्तमनुभाति विश्वं तस्य भासा विश्वमिदं विभाति" इति । शश्वा ऽविरतस्फुरणात्वं, कर्मप्रवचनीयेन यदीयस्वातन्त्र्योपकल्पितनिर्माणक्रियाजनितो वेद्यवेदकभावरूपो लक्षणात्मा सम्बन्धो द्योतितः, केवलं विषयोल्लेखबलाद्बहिः क्रमावभासः समर्थितः, स सक्रमयौगपद्यादिविचित्ररूपो यः पदार्थानां वक्ष्यमाणेश्वरस्वातन्त्र्यरूपदेशकालशक्त्युपकल्पितः क्रमो देशकालपरिपाटी, तेन रूषिता, प्रतिबिम्बकल्पतयोपरक्ता या प्रतिभोक्ता, केवलं भिन्नसंवेद्येत्यादिना, एषेति च, सर्वस्य स्वप्रकाशरूपा, परमार्थतश्चान्तर्मुखत्वेन प्रकाशमात्रपरमार्थतया भेदाभावादक्रमा, सैव महेश्वरः । अविद्यमानोन्तः परिच्छेदो देशतः कालतः स्वरूपतश्च यस्याश्चितः संविदस्तदेव रूपं यस्येति । अत एव बहिर्मुखप्रकाशात्मकविज्ञानस्वभावस्य प्रमाणवर्गस्य योन्तः प्रत्याभासमिदमिदमित्यनन्तो विकल्पमयो विमर्शात्मा प्रमासमूहः, तत्र संयोजनवियोजनविश्रमणाद्यनेकप्रकारस्वातन्त्र्यपूर्णः शुद्धोहंप्रत्यवमर्शमयः प्रमाता स भण्यते, अतश्च बहिर्घटप्रकाशः, अयं घट इत्यन्तर्विकल्पः स्वीकृतपूर्वरूपः, अहमिति तदुभयविश्रान्तिस्थानमितीयत्पूर्णं प्रकाशस्य स्वरूपम् ॥

अत्रैवोपपत्तिं दर्शयितुमन्वयं तावदाह ।

(२) तत्तद्विभिन्नसंवित्तिमुखैरेकप्रमातरि ।
प्रतितिष्ठत्सु भावेषु ज्ञातेयमुपपद्यते ॥

संविन्निष्ठा हि विषयव्यवस्थितय इति यदुच्यते, न तद्विषरूपप्रमात्मकसंविन्मात्रविश्रान्त्या सिद्ध्यति, अपि तु तास्ता विभिन्नाः संविदो निश्चयरूपाः प्रमात्मानो यास्तान्येव मुखानि द्वाराणि उपाया मार्गास्तैर्मुखैर्नदीस्रोतःस्थानीयैर्येऽमी भावा नीलसुखादय उह्यमाना एकस्मिन्नहमिति प्रमातृरूपे महासंवित्समुद्रे प्रतितिष्ठन्ति आभिमुख्येन विश्रान्तिं भजन्ते, तत एषु परस्परं समन्वयरूपं यज्ज्ञातेयं तदुपपत्त्या घटते ज्ञातीनां भावस्तच्छब्दप्रवृत्तिनिमित्तं परस्परं जानीयुरिति कर्म चान्योन्ययोगक्षेमोद्वहनात्मकं ज्ञातेयं तच्च समन्वयाभिप्रायेणेह दर्शितं, न जडानां स्वतः समन्वयः कदाचिदपीति प्रतिपादयितुम् ॥

तथा च व्यतिरेकमुखेनैतदेवाह ।

(३) देशकालक्रमजुषामर्थानां स्वसमापिनाम् ।
सकृदाभाससाध्योसावन्यथा कः समन्वयः ॥

अर्थानां जडानां तज्ज्ञानानां तद्विकल्पानां तन्निश्चयानां च देशक्रमं कालक्रमं चात्यजतां स्वसमापिनां स्वरूपमात्रप्रतिष्ठानां कः समन्वयः न कश्चिदित्यर्थः । यतो ह्यसौ समन्वयः सकृदाभासेन देशकालाकारमिश्रीकरणात्मना योजनाभासेन साधयितुं शक्यो, नान्यथा, नहि पृथक्पृथक्परिक्षीणेषु स्रोतस्सु तदुह्यमानास्तृणोलपादयः समन्वयं कं चिदाप्नुवन्तीति, अनेकत्वेन देशादिभेद इत्याशयेन सकृच्छब्दस्तन्निषेधतात्पर्येण प्रयुक्तः ॥

तत्र कोसौ समन्वय इत्याशङ्क्य बहुतरव्यापकं कार्यकारणभावं तावद्दर्शयति ।

(४) प्रत्यक्षानुपलम्भानां तत्तद्भिन्नांशपातिनाम् ।
कार्यकारणतासिद्धिहेतुतैकप्रमातृजा ॥

इहाग्नौ प्रत्यक्षे धूमं नोपलभते, ततो धूमं प्रत्यक्षेण पश्यति, अग्निं तु यदि नोपलभते धूममपि नोपलभते, इति प्रत्य-

Digitized by Google

द्वाभ्यामनुपलम्भैश्चेति * पञ्चकात्कार्यकारणभावो धूमाग्न्योः सिद्ध्यतीति यदुक्तं, तत्कथम्, अग्निप्रत्यक्षेण हि धूमे न किं चि † दुद्धाठमग्निलक्षणे धूमाद्विवेशे तस्यावगमहेतुत्वा,त्स्वस्वभावरूपे भिन्नेंशेविश्रान्तत्वाच्च,परविषयानवगाहनाज्ज्ञानान्तरस्वरूपानावेशाच्चेति, । पातिज्ञापनवाची पतिश्च विश्रान्तिवाची प्रयुक्तस्तन्त्रेण, एवं धूमानुपलम्भादौ चतुष्टये वाच्यम्, ततश्चाग्निः, धूमाभावो, धूमो,ऽग्न्यभावो धूमाभाव, इत्येतानि वस्तूनि यथा पृथक्प्रमातृसंवेद्यानि धूमाग्न्योः कार्यकारणतां न गमयन्ति, तथा ‡ एकप्रमातृवेद्यान्यपि । विकल्पोप्यनुभवातिरिक्तं ज्ञापयत्त्वप्रमाणमेव । यदा तु प्रत्यक्षानुपलम्भस्रोतःपञ्चकेन तानि पञ्च वस्तूनि एकसंवित्समुद्रविश्रान्तानि कृतानि, तदैकीभूतानि प्रमात्रा स्वतन्त्रतया ऽन्योन्यसापेक्षाणि, न तु घटपटादिवद्भास्यन्ते, स एवैक आभासः कार्य्यकारणभावावभास इति, न किं चिदवद्यम् ॥

ननु प्रत्यक्षानुपलम्भैर्यत्कृतं तत्स्मरणबलादेकीकरिष्यति, उक्तं तावदत्र स्मृतिरप्यनुभूतातिरिक्तेर्थे न व्याप्रियते सापि च विज्ञानसमन्वयरूपा एकप्रमातृसद्भावं विना कथं स्यादिति दर्शयति ॥

(५) स्मृतौ येव स्वसंवित्तिः प्रमाणं स्वात्मसंभवे ।
पूर्वानुभवसद्भावे साधनं सैव नापरम् ॥

इहानुभूतो विषयः प्रकाशते स्मृतौ, तत्र विषयस्य सा स्मृतिर्न नूतनः प्रकाशः, § अपि त्वस्य स प्राच्य एवानुभवप्रकाशः, स चानुभवे ज्ञानरूपत्वेन ज्ञेयरूपत्वाभावाच्च ज्ञानान्तरसंवेद्यो,ऽपि तु स्वप्रकाशः, स च स्मृतिकाले यद्यसं,स्तत्कथं प्रकाशताम्, भवतु वासौ, तथापि स्मृतिप्रकाशो ऽनुभवप्रकाश इत्यन्योन्यर्भिन्नं युगलमिति न कदाचित्स्मृतिः स्यात् । तस्मादेतदेवमुपपद्यते, यदेव स्मृतिस्वसंवेदनं तदेवा ऽनुभवस्य स्वसंवेदनं न त्वपरं स्वसंवेदनव्यतिरिक्तं प्रत्यक्षमनुमानादिकं वा तत्र क्रमते । ततश्च तावत्कालव्याप्यविच्छिन्नमेकं यत्स्वसंवेदनं तदेव प्रमातृतत्त्वमिति सिद्धम् । अन्यत्रानुभवितरि स्मर्तान्यो नोपपद्यत इत्यनयाच्छायया स्मृत्या प्रमातृसिद्धिः पूर्वमुक्ता, इदानीं तु स्वसंवेदनैकीभावेन भङ्ग्यन्तरेणेति विशेषः ॥

नन्वनुभवातिरिक्तेप्यर्थे सन्तुविकल्पाः प्रमाणम्, अप्रामाण्यं हि बाधबलाद्भवति, बाधाभावे तत्कथं स्यादित्याशङ्क्य, सोप्ययं बाध्यबाधकभावः सत्यासत्यप्रविभाजनया विश्वेषां व्यवहाराणां जीवितभूतो नैकेन प्रमातृतत्त्वेन विना घटत इति वितत्य दर्शयति ।

(६) बाध्यबाधकभावोपि स्वात्मनिष्ठाविरोधिनाम् ।
ज्ञानानामुदियादेकप्रमातृपरिनिष्ठितेः ॥

बाधाभावे प्रामाण्यमित्येतदर्थमवश्यसमर्थ्यो यो बाधव्यवहारः सोपि कथमित्यपिशब्दस्यार्थः । इह शुक्त्या तावद्रजतस्य न का चिद्बाधा नाम क्रियमाणा दृश्यते, शुक्तिज्ञानेन रजतज्ञानं बाध्यत इत्यपि न युक्तं, स्वस्मिन्विषये आत्मनि च स्वरूपे द्वयोर्ज्ञानयोः परिनिष्ठितयोर्विश्रान्तयोरन्योन्यं विरोधस्याभावात् । अथायमेव विरोधः परस्परपरिहाररूपः, तर्हि सर्वेषां ज्ञानानां विरोधाद्बाध्यबाधकभावस्य परिनिष्ठैव न लभ्येति सुतरां विघटेत सत्येतरप्रविभागः । नञप्यत्र तन्त्रेण व्याख्येयः । एतदुक्तं भवति, यदि ज्ञानं स्वयं नश्यति, तदा किं ज्ञानान्तरेणास्य कृतं, नहि तेन तत्काले संभवता तस्य विषयापहारः कर्तुं शक्यः, न रजतमित्यपि ज्ञानं स्वं रजताभावं विषयीकुर्वन्न विषयमपहरेद्रजतज्ञानस्य । अथापि ज्ञानं ज्ञानान्तरेण नाश्यत इत्यपि पक्षः, तत्रापि सर्वेषां ज्ञानानामियमेव सरणिरिति किं चिदेव बाध्यमिति कथं स्यात् । यदा तु रजतज्ञानं शुक्तिज्ञानं चैकत्र स्वसंवेदने विश्राम्यतस्तदैतदुपपद्यते, तथा ह्येकत्रापि प्रमातृतत्त्वे विश्राम्यतां ज्ञानानां नैकप्रकारैव विश्रान्तिरपि तु विचित्रतयैव सा संवेद्यते । यथा हि, नीलमित्युत्पलमिति ज्ञाने प्रमातरि विश्राम्यन्ती परस्परोपरागाभासेन विश्राम्यतः, घट इति पट इति परस्परानाश्लेषेण, शुक्तिकेति न रजतमिति वा ज्ञानं रजतमिति ज्ञानस्योन्मूलनं तदीयविमर्शात्मकप्रमारूपव्यापारानुवर्तनाविध्वंसं कुर्वन्प्रमातरि प्रतिष्ठां भजते । एवं कार्यकारणादौ विश्रान्तिवैचित्र्यं प्रमेयासम्भवि प्रमात्रा स्वातन्त्र्येण निर्मितं तत एवास्य प्रमास्वतन्त्रतादायि वाच्यम् । एवमेकत्र प्रमातरि पूर्वज्ञानस्य परिवर्जनेन यतो निश्चिता स्थितिरतो बाध्यबाधकव्यवहार उपपन्नः, नीलादिवत्किल तानपि व्यवहारान्स एव परमेश्वरः स्वातन्त्र्यादाभासयति तत्तेपि सत्या एवेति ॥

अत्र परकीयं मतमाशङ्कते दूषयिष्यामीति ।

(७) विविक्तभूतलज्ञानं घटाभावमितिर्यथा ।
तथा चेच्छुक्तिकाज्ञानं रूप्यज्ञानाप्रमात्ववित् ॥

---

* आर्द्रेन्धनसंयुक्ते वह्नौ धूमोत्पत्तेः पूर्वं प्रत्यक्षत उपलभ्यमाने ऽपि धूमस्तदानीं नोपलभ्यते, अथ च तेन वह्निना दह्यमानआर्द्रेन्धने धूम उपलभ्यतइति प्रतीतं, तत्र याविमौ वह्नेर्धूमस्य चोपलम्भौ तौ प्रत्यक्षे, यश्चैष धूमोत्पत्तेः प्राक्कालिको धूमोपलम्भाभावो यो चैतावत्तिनं त्वित्यादिव्यतिरेकप्रदर्शकवाक्येनोपदर्शितावुपलम्भाभावौ ते त्रयो ऽनुपलम्भा इत्येतत् पञ्चकमन्वयव्यतिरेकरूपं कार्यकारणभावसाधकम् ।

† उपक्रतम् ।

‡ एकाश्रयानभ्युपगमे प्रमातुरेकत्वस्यैवासंभवेन समानसन्तानादेरैवोपचारिकैकत्वव्यवहारं प्रति विषयताया आवश्यकत्वेन चैत्रमैत्रादिनानाप्रमातृप्रमितस्येव सजातीयानेकसन्तानप्रमितस्यापि कार्यकारणभावग्राहकत्वं न संभवतीति भावः ।

§ गृहीतग्रहणस्वभावत्वात् तस्याः, ।

Digitized by Google

इह शुक्तिकाज्ञानं स्वात्मानं संविदत्स्वात्माभिन्नं प्रमाणत्वं बुध्यते, तत्परिच्छिनत्तीति न्यायात् तत्परिच्छेदनान्तरीयकश्चान्यव्यवच्छेद इत्यशुक्तिज्ञानरूपस्य रजतज्ञानस्याऽप्रमाणत्ववेदनं तदेवोच्यते, यदेतच्छुक्तिकासंवेदनाभिन्नप्रमाणत्ववेदनं, न चैतदपूर्वं यद्वस्त्वन्तरज्ञानमेव वस्त्वन्तराभावज्ञानमिति, शुद्धभूभागग्रहणमेव हि घटाभावज्ञानमिति प्रसिद्धमेतत्, एवमप्रमाणत्वसंवेदनमेव रजतज्ञानस्य बाध्यत्वमुच्यते । अतश्च बाध्यबाधकत्वमेवं सिद्धमिति चेदस्माभिरुच्यते तत्किं प्रमाणैक्येनेति ॥

अत्र प्रसङ्गादभावव्यवहारस्य सिद्धौ तत्त्वमुपपादयिष्यन्दृष्टान्तमेव तावत्परदर्शने दूषयति ।

(८) नैवं शुद्धस्थलज्ञानात्सिद्ध्येत्तस्याघटात्मता ।
न तूपलब्धियोग्यस्याप्यषाभावो घटात्मनः ॥

यो दृष्टान्त उक्तः स एव न, कुत इति चेदुच्यते, इह भूतलं न घट इति तादात्म्येनाभावो व्यवहर्तव्यः कदा चित्, कदा चिद्व्यतिरेकेण इह भूतले घटो नेति, तत्र शुद्धभूतलज्ञानादाद्योयं व्यवहारः सिध्यति । यत्र दृश्यत्वं नोपयोगि, उपलब्धिलक्षणप्राप्तिरपि हि यस्य नास्ति पिशाचादेः स्वभावबलाद्यस्य वा शब्दादेस्तद्ग्राहकश्रोत्रादिसामग्रीसाकल्यस्य तत्रैव ज्ञानसंसर्गिवस्त्वन्तरप्रतिपत्त्यभावेनापि निश्चयात्तस्यापि तादात्म्येनाभावो व्यवहार्यः, भूतले न पिशाचो न शब्द इति । यत्र तु दृश्यत्वं विशेषणमवश्यमुपयोगि तत्र व्यतिरेकेणाभावे व्यवहर्तव्ये नैषोभ्युपायः ॥

कुत इति चेद्,अतिप्रसङ्गादिति ब्रूमः, तमेव दर्शयति ।

(९) विविक्तं भूतलं शश्वद्भावानां स्वात्मनिष्ठितेः ।
तत्कथं जातु तज्ज्ञानं भिन्नस्याभावसाधनम् ॥

विद्यमानेऽपि घटे भूतलं शुद्धमेव, नहि भावा मिश्रीभवन्ति, ततश्च तदापि शुद्धभूतलज्ञानमस्तीति सत्यपि घटे कथमभावो व्यतिरेकेण न व्यवह्रियते अत्र भूतले घटो नास्तीति, "तज्ज्ञानमिति" विविक्तभूतलभागज्ञानं "जात्विति" कस्यां चिदेव दशायां घटासन्निधानरूपायां भिन्नस्य घटस्याभावं साधयति न तु सर्वदेति केन प्रकारेण भवेत् । एतेनात्र भूतले पिशाचो नास्तीत्यपि स्याद् इत्यापतितं मन्तव्यम् ॥

नन्वेवं व्यतिरेकाभावनिष्ठो व्यवहारो लोके तावदविगीतः कस्यां चिदेव दशायां दृष्टस्तत्र का गतिरित्याशङ्क्य चिरंतनैरपरिदृष्टं तत्सिद्धिप्रकारं दर्शयति ।

(१०) किं त्वालोकचयोन्धस्य स्पर्शो वोष्णादिको मृदुः ।
तत्रास्ति साधयेत्तस्य स्वज्ञानमघटात्मताम् ॥

इह भाव एव भावान्तरस्याभाव इति व्यवहर्तव्यः इत्ययं तावदपरित्याज्यः प्रातीतिकः पन्थाः, तत्र भावस्य भावान्तरेण य आधार्याधारभावः स एव भावतदभावयोः, ततश्च भूतले घटव्यतिरिक्तं वस्त्वन्तरं शिलादिकमालोकपुञ्जादिकं वा यच्चाक्षुषे ज्ञाने भाति तदेव व्यवह्रियते भूतले घटाभावो भूतले घटो नास्तीति वा, यत्रापि नास्ति चक्षुर्व्यापारो नेत्रनिमीलनसन्तमसादौ,तत्रापि भूतले घटोचितकठिनस्पर्शविविक्तं मृदुमुष्णं शीतमनुष्णाशीतं वा गृह्णंस्तमेवात्र घटाभाव इति व्यवहरति, वायुस्पर्शस्य सर्वगस्यावश्यं भावादिति वाक्यार्थः । पदार्थस्तु "किं त्विति" स्वमतोपक्षेपाय प्रतिभाप्रश्नपरामर्शः, किं पुनरत्रन्याय्यमिति तत्राह । तत्र भूतले आलोकचयस्तावदस्ति ज्ञेयः, अन्धस्य चोष्णादिकः स्पर्शोस्ति, तस्यालोकचयस्य स्पर्शस्य वा यत्स्वं ज्ञानमन्यघटादिविविक्तेन स्वेन रूपेण ज्ञानं तत्कर्तृ तस्यालोकादेरघटरूपतां घटाभावरूपतां तत्र भूतले साधयतीति शक्योयमर्थः शकिलिङ्चेति लिङ् । आन्तरप्राणस्पन्दनजनितसूक्ष्मशब्दाकर्णनाच्च श्रोत्रादिसाकल्यं संभावयमानस्तमेव शब्दमेकज्ञानसंसर्गिणं शृण्वञ्छब्दान्तरं निषेधयति, नेहान्यः शब्द इति, तत्सूक्ष्मशब्दाभावमपि सूक्ष्मतमान्तर्नादावहितश्रोत्रो वेदयते, रसगन्धस्पर्शाभावोपि दन्तोदकरसं,त्रिपुटिकागन्धं,कायीयं च स्पर्शं, संवेदयमानेनैव संवेद्यः । नह्येकज्ञानसंसर्गयोग्यवस्त्वन्तरोपलम्भेन विनोपलब्धिकारणसाकल्यनिश्चयोस्तीत्येकान्त एषः । अचिरप्रवृत्ततत्तद्विषयानुभवकल्पितस्य तदैव ध्वंसनाशङ्कनात्कारणस्य कारणसाकल्यनिश्चयः किमेकज्ञानसंसर्गितयेति चेन्न, तत्तदभावोपलिप्सुर्हि प्रयत्नेन तत्तदिन्द्रियाधिष्ठानं व्यापारयन्नेव लक्ष्यते ॥

नन्वेवमदृश्यस्यापि पिशाचादेर्निषेधव्यवहारो व्यतिरेकेणापि प्राप्नोति, स ह्यालोकपुञ्जो यथा घटादन्यस्तद्वत्पिशाचादेरपि तदेतदाशङ्क्याह ॥

(११) पिशाचः स्यादनालोकोऽप्यालोकाभ्यन्तरे यथा ।
अदृश्यो भूतलस्यान्तर्न निषेध्यः स सर्वथा ॥

आलोकपुञ्जो यद्यपि पिशाचाद्व्यतिरिक्तो, यद्यपि चालोकोस्त्यपिशाचात्मा, इत्येतावत्सिध्यति, तथाप्यत्र पिशाचो नास्तीत्येतदशक्यमध्यवसातुं, घटो ह्यालोकपूरमध्येप्यसम्भाव्यो घटसन्निधौ तत्रालोकपूराऽपसर्पणात्, अतश्च सिद्ध्यतीदमत्र घटो नास्तीति, पिशाचस्तु तादृक्स्वभावो यो भूतलमध्येप्यालोकमध्येपि वा भवन्भूतलस्यालोकस्य वा तां निबिडतां न प्रतिहन्ति, अतश्चालोकमध्ये तस्य संभावनात्कथं व्यतिरेकेण निषेधव्यवहारः । एवं रूपमध्ये रसादेः संभावनात् तस्यापि

निषेधः, यद्यप्यनालोक आलोकादन्यः पिशाचस्तथाप्यसौ भूतलस्यान्तर्मध्ये ऽदृश्यो भवतीति सम्भाव्यते यथा, तद्वदेवालोकस्याभ्यन्तरे सोस्ति इति सम्भाव्यत एव, ततश्च यद्यप्यालोकस्ततो ऽन्य इत्यनेन यथा निषिद्धः पिशाचस्तथापि सर्वप्रकारेण न निषिद्ध इति तदभावनिबन्धनाः कथं तत्र व्यवहाराः प्रवर्तन्तामिति श्लोकार्थः ॥

एवं प्रसङ्गादभावव्यवहारस्य तत्त्वमुपदर्श्य प्रकृते योजयति ।

(१२) एवं रूप्यविदाभावरूपा शुक्तिमतिर्भवेत् ।
नत्वाद्यरजतज्ञप्तेः स्यादप्रामाण्यवेदिका ॥

यथा ऽलोको घटाभाव इत्यालोके गृहीते प्रागगृहीतस्य घटस्य न किं चिदायातं, तथैव शुक्तिज्ञानं रूप्यज्ञानाभाव इती यत्सम्भाव्यते, यथा घटज्ञानं घटज्ञानप्रामाण्यसंवित्, पटज्ञानाभावः पटज्ञानाभावप्रामाण्यसंवित्, इयता च न पूर्वप्रवृत्तं पटज्ञानमप्रमाणीभवति, एषा हि तस्य घटज्ञानस्य स्वरूपचिन्ता सर्वा, न ज्ञानान्तरस्याद्यस्य किमप्यतो जातम्, एवं शुक्तिरियमिति न रजतमिदमिति च ज्ञानमेव स्वात्मना प्रकाशताम्, अहं शुक्तौ रजताभावे च प्रमाणं न तु रजते इति, तावता तु प्राक्तनस्य रजतज्ञानस्य न किं चिद्वृत्तमिति तद्विषयीकृतं रजतं कथमसत्यं स्यात् ॥

नन्विदमित्यनेन तदेव परामृश्यते यत्र रजतज्ञानमभूत्तत्रेदानीं न रजतमिति शुक्तिरिति च ज्ञानं प्रमाणभूतं जातं तदतो ऽनुमीयते यत्प्राच्यं रजतज्ञानमप्रमाणमिति, नह्येतत्संभवति विरुद्धविषयावगाहिज्ञानद्वयं प्रमाणमेकत्रविषयीभवतीति, तदयमानुमानिको बाधव्यवहारो भविष्यतीत्याशङ्क्याह ।

(१३) धर्म्यसिद्धेरपि भवेद्बाधा नैवानुमानतः ।
स्वसंवेदनसिद्धा तु युक्ता सैकप्रमातृता ॥

न केवलं स्वसंवेदनाच सिद्ध्यति बाधा, यावदनुमानतोपि न सिद्ध्यति, धर्मिणोसिद्धेरपि शब्दाद्धेतोरव्याप्तेश्च, अपिरुभयत्र नेयः, इह धर्मिणि सिद्धे सिद्धेन हेतुना स्मर्यमाणव्याप्तिकेन साध्यधर्मो ऽयोगव्यवच्छेदो ऽनुमानव्यापारः । इह च प्राच्ये रूपज्ञाने धर्मिण्यप्रामाण्यं साध्यो धर्मः, तत्र शुक्तिकाज्ञानं वा न रजतमिति ज्ञानं वा तज्ज्ञानविषयीकार्यत्वं वा विषयगतं हेतूक्रियते, न चैतद्युक्तं, तत्काले प्राच्यरूप्यबोधस्य बाध्यस्य धर्मिणो भावात्, न चापि तस्य शुक्तिज्ञानादयो धर्मा, न चापक्षधर्मात्साध्यसिद्धिः, अतः स्मर्यमाणं तद्धर्मिस्यात्, इत्यप्यसत्, अथ शुक्तिर्न रजतज्ञानस्य विषय इति साध्यते शुक्तिका ज्ञानविषयत्वादिति, तद्यदीदानीं, तत्सिद्धसाधनम्, अथ पूर्वं, तदा तत्पूर्वस्वसंवेदनेन बाध्यविषयता, केन चैवं व्याप्तिर्गृहीता, यत्रेदानीमन्यज्ज्ञानं तत्र पूर्वमन्यत्र भवतीति, अनुमानान्तरेणेति चेदनवस्था, । एतेनैतत् प्रत्युक्तम्, एकस्मिन्विषये कथं ज्ञानद्वयं स्यादिति । को ह्येकविषयतां द्वयोर्ज्ञानयोर्जानीयात् । ते हि तावत्स्वात्मनि स्वविषये च विश्राम्यत इत्युक्तमित्यनुमानतोपि न बाधा, न च तथाभूतमपि व्यवधानमत्र प्रतीतौ संवेद्यते, स्वसंवेदनसिद्धतया झटिति भासनात्, अत एवैतदप्यशक्यं वक्तुं मा भूद्बाधा नामेति । एवं परपक्षे ऽनुपपत्तिं प्रदर्श्य स्वपक्षे एकप्रमातृपरिनिष्ठितेरुदियाद्बाध्यबाधकभाव इति वाक्येन प्रतिज्ञातं निगमयति । युक्ता सैकस्मात्प्रमातुर्यदि आयेतेति, स एव हि तथा निर्मातेति व्याख्यातमेव, स्थिते चैवं यदि व्यवहारसिद्धये ऽन्यथानुपपत्तिरप्युच्यते तदुच्यतां काममधुना सर्वं सिद्ध्यतीति ॥

न केवलमेते कार्यकारणभावस्मरणबाधाव्यवहाराः सकललोकयात्रासामान्यव्यवहारभूता एकप्रमातृप्रतिष्ठा, यावदवान्तरव्यवहारा अपि ये क्रयविक्रयादयः समला, उपदेश्योपदेशभावादयश्च निर्मला, स्तेपि एकप्रमातृनिष्ठा एव भवन्ति, व्यवहारो हि सर्वस्समन्वयप्राण इत्युपसंहारक्रमेण दर्शयति ।

(१४) इत्थमत्यर्थभिन्नार्थावभासखचिते विभौ ।
समलो विमलो वापि व्यवहारोनुभूयते ॥

तत्तद्विभिवेति श्लोकद्वयोक्तेनानेनोपपत्तिप्रकारेणान्वयव्यतिरेकात्मना यद्विभौ देशकालानवच्छिन्ने ऽत एवात्यर्थभिन्नैर्मायाबलाद्भेदैकप्राणितैर्नीलसुखाद्याभासैः * प्रतिबिम्बकल्पैरनतिरिक्ततया वर्तमानैः खचिते स्वरूपानन्यथाभावेनोपरक्ते विश्रान्तः सर्वो व्यवहारो ऽनुभूयते, अनुभव एवात्र दृढतमं प्रमाणमिति यावत्, अनुभूयते च सोपदेशैरवधानधनैः, येनैषां यैव संसारसंमता व्यवहारदशा सैव प्रमातृतत्त्वप्रख्यात्मिका शिवभूमिः । यदुक्तम् ।

ग्राह्य ग्राहकसंवित्तिस्सामान्या सर्वदेहिनाम् ।
योगिनां तु विशेषो ऽयं संबन्धे सावधानता ॥

इति । अप्रत्यभिज्ञातात्मपरमार्थानां समलो व्यवहारः अन्येषां स एव निर्मल इति शिवम् ॥ १४ ॥

आदितः सूत्रश्लोकाः ७७ व्याख्याताः ॥

श्रीमदाचार्याभिनवगुप्तविरचितायामीश्वरप्रत्यभिज्ञासूत्रविमर्शिन्यामेकाश्रयनिरूपणम् ॥

॥ इति सप्तममाह्निकम् ॥

---

* प्रतिबिम्बाधारेतरबिम्बस्य वास्तविकस्याभावात् प्रतिबिम्बकल्पैरित्युक्तम् ।

॥ अथ बालरामायणाख्यनाटकस्य ॥

॥ तृतीयोऽङ्कः ॥

अतः परं विलक्षलङ्केश्वरो भविष्यति ।

ततः प्रविशति गृध्रमिथुनम् ॥

पक्षी । प्रिये सुवेगे भगवतो लक्ष्मीपतिलाञ्छनस्य निसर्गनागशत्रोरमृताहरणविश्रुतविक्रमस्य शकुन्तचक्रवर्तिनो वैनतेयस्यास्मत्कुलप्रथमपुंसः सकलगोत्रधुरन्धरेण भविष्यतापत्येन नूनमन्तर्वर्त्न्यसि यत् ते निशाचरमांसास्वादनेन तत्कीलालकवलेन च दोहदविधेरयमुपस्थितः समयः ।

सुवेगा । अयि चित्तसिहण्ड तेल्लोक्केक्कमल्ले रक्खसरक्खाकरे पुलत्थकुमारे णन्दमाणे दुल्लहं दोहलकम्मिमं मण्णे * ।

चित्रशिखण्डः । भवति यथात्थ किमुच्यते रावणः खल्वसौ पश्य ।

साक्षादस्मपितामहः कमलभूर्मानः स कोप्युन्नतो
न स्तौति प्रणनाम यश्च वरदां देवीं भवानीमपि ।
यच्छौर्योदयसाक्षिणी च सकला सा भूर्भुवःस्वस्त्रयी
तं व्यावर्त्य दशास्यमन्यचरितस्तोत्रेण लज्जामहे ॥ १ ॥

किंतु ।

गतः स कालो यत्रासीन् मुक्तानां जन्म वल्लिषु ।
वर्त्तते सांप्रतं तासां हेतवः शुक्तिसंपुटाः ॥ २ ॥

यतः श्रुतताडकाताडनो ऽपि न निशाचरपतिरद्यापि निजदोर्दण्डचण्डिमोचितमाचरति ।

सुवेगा । हंहो गरुत्मद्गोत्तालङ्करण कधेसु कीदिसी उण सुन्दसुन्दरीए वहविडम्बणा संवुत्ता † ।

चित्रशिखण्डः । प्रिये श्रूयताम् । एकदा स भगवान् विश्वस्य मित्रं विश्वामित्रः सप्ततन्तुत्राणाय दाशरथिमयोध्यातः सिद्धाश्रमं सलक्ष्मणं राममानिनाय । वैतानिकं च विततान । तत्र यथोचितसामोद्गारिण्युद्गातरि शस्तमन्त्रसंस्कृताहुतौ होतरि प्रचरणकर्मधुर्ये ऽध्वर्यौ दिव्यां गिरमनुवर्तमाने यजमाने सम्यगवेक्षिताखिलकर्मणि ब्रह्मणि सरभसमनैरम्मदमदाम्भोलमनैन्द्रवममार्तण्डीयमचैत्रभानवं च ज्योतिरुदजृम्भत ।

सुवेगा । अच्चरिअमच्चरिअम् । तदोतदो ‡ ।

चित्रशिखण्डः । ततश्च सपुत्रदारेषु दिगन्तरादागतेषु किमिदमिति कान्दिशीकेषु मुनिषु तत्रोदघोषि जनैः ।

रक्ताभ्यक्तोरुसृक्का गुरुकवलबलज्जाङ्गलव्यग्रतालुः
फेत्कारैः फुल्लगल्लव्यतिकरगुरुभिः कम्पयन्ती जगन्ति ।
अन्योन्येनाग्रपाणिप्रणयि शवयुगं ताडका ताडयन्ती
सेयं द्राग्दृष्टदंष्ट्राङ्कुरकषणरणत्कारभीमा ऽभ्युपैति ॥ ३ ॥

सुवेगा । अहह भीसणाणं वि भीसणा हदासा । तदोतदो * ।

चित्रशिखण्डः । अथ स भगवान् कुशिकनन्दनस्तत्प्रमथनार्थं राममेव नियुयुजे ।

Watching the crop the while, and loved to praise
His manly virtues e'en from childhood's days.
Calm grew the Ocean when AGASTYA rose;
The name of RAGHU awed his trembling foes;
For maddened bulls, that rend the river's side,
With his most gentle might but feebly vied.
His elephants that smelt the tainted breeze,
And rival odours of the Seven-leaf trees,

Digitized by Google

Provoked to fury by the daring flowers
Poured their own nectar forth in seven-fold showers.
Scarce was he ready for the sword and shield
When Autumn called him to the battle-field,—
War's proper season, when the Rains are o'er,
When roads are dry, and torrents foam no more.
Soon as the day to bless the chargers came,
The warrior's holy festival, the flame
Turned to the right, and with a ruddy hand
Gave him full triumph o'er each distant land.
Then when his kingdom was secured, and all
His city fortified with tower and wall,
His hosts he marshalled, his broad flag outspread,
And to subdue the world his army led.

Forth as he rode, the city matrons poured
The sacred grain upon their mighty lord,
Thick as the drops on VISHNU'S brow that fell
When MANDAR made the milky Ocean swell.
First to the East the hero takes his way,
His foemen trembling as his banners play.
Thick clouds of dust beneath his chariots rise,
Till dark as earth appear the changing skies;
While elephants, like autumn clouds in girth,
Make like to rainy skies the labouring earth.

Parted in four that mighty host appears:
In front, the gleaming of ten thousand spears;
Next come the tumult and the din, and then
The cars and horse, the elephants and men.
He marked his progress with a mighty hand;
The fountain gushed amid the thirsty sand;
The tangled forest harboured beasts no more,
And foaming floods the freighted vessel bore.
He led his army toward the Eastern Sea,
An endless stream of men, and seemed to be
A new BHAGÍRATH, ancient Sage, who led
The wandering GANGÁ down from SIVA'S head.
As strews some elephant, in headlong wrath,
With many a tree uptorn, his forest path,
He marked with plundered wealth his onward way,
And humbled princes owned the conqueror's sway.
Through all the East he passed, from land to land,
And reached, triumphant, Ocean's palmy strand.
Like an unsparing torrent on he went,
And low, like reeds, the lords of SUHMA bent.
Then fell the islets washed by GANGÁ'S wave,
Nor could their ships the hosts of BANGA save;
Like rice they bowed them, and, again restored,
Before his feet rich fruit for tribute poured.
Nor could thy waters, KAPISA, delay
The King who bridged with elephants his way.
Thence to KALINGA'S realm the victor rode;
His onward path the chiefs of UTKAL showed.
As fierce wild elephants are forced to kneel
Bending obedient to the driver's steel,
MAHENDRA'S towering brow and haughty crest
The mighty victor's awful strength confessed.
KALINGA'S chieftain with his warlike train
Stood like an ancient hill prepared to rain
Thick stones on INDRA pressing on to smite
From his rough sides the wings that helped his flight.
Undaunted RAGHU bore the arrowy shower
Like holy water in auspicious hour,
And, when proud victory his arms had crowned,
His men with betel leaves adorned the ground,
And lay at ease triumphant, drinking up
Their foemen's glory in the brimmng cup.
The Chief was captive of his sword and bow,
But RAGHU'S mercy bade him freely go;
No wealth he sought, but warred in honour's name,
So spared his land but spoiled his warlike fame.
Careless of conquest, o'er the palmy strand
He led his army to AGASTYA'S land.
His soldiers resting by KAVERI'S wave
The night to love and mirth and feasting gave,
While the fair river sought the jealous sea
Stained like a partner of their revelry.

(To be continued.)

ADVERTISEMENT.

Just Published.

SCENES FROM THE RAMAYAN, &c.
BY
RALPH T. H. GRIFFITH, M. A.
8vo. Crown, Cloth; price 2 Rs. cash: by Book Post 2 Rs. 4 as.

CONTENTS.

PREFACE. AYODHYA. RAVAN DOOMED. THE BIRTH OF RAMA. THE HEIR APPARENT. MANTHARA'S GUILE. DASARATHA'S OATH. THE STEP-MOTHER. MOTHER AND SON. THE TRIUMPH OF LOVE. FAREWELL! THE HERMIT'S SON. THE TRIAL OF TRUTH. THE FOREST. THE RAPE OF SITA. RAMA'S DESPAIR. THE MESSENGER CLOUD. KUMBHAKARNA. THE SUPPLIANT DOVE. TRUE GLORY. FEED THE POOR. THE WISE SCHOLAR.

Benares: E. J. LAZARUS & Co. Calcutta: W. NEWMAN & Co. London: TRÜBNER & Co., PATERNOSTER ROW.

Communications of a literary nature should be addressed to the EDITOR: *all letters on business, to the Proprietors,* MESSRS. E. J. LAZARUS & Co., *to whom Drafts should be made payable.* ADVERTISEMENTS *will be inserted at four annas per line.*
The PANDIT may be ordered of the Publishers, or through MESSRS. TRÜBNER and Co., LONDON.
Annual subscription, in advance, including postage, Rs. 12.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 28. Benares September 1st, 1868. Vol. III.

॥ ईश्वरप्रत्यभिज्ञासूत्रविमर्शिन्याः ॥

ज्ञानाधिकारस्याष्टमं चरममाह्निकं, क्रियाधिकारस्य चाद्यमाह्निकद्वयम्

स्वसंवेदनसंसिद्धव्यवहारवशेन यः ।
नित्यं महेश्वरः सिद्धः सिद्धानां तं स्तुमः शिवम् ॥

एवं ज्ञानस्मरणापोहनानि व्युत्पाद्य तेषामेकमाश्रयं विना व्यवहारो न युक्त इति निरूपितम्, एतावता न चेदन्तः कृतेत्यत्र यदुक्तमेक इति तत्परिघटितम्, अन्तराभाससमर्थनेनान्तःकृतानन्तविश्वरूप इत्यपि निरूपितम्, यत्तत्रैव महेश्वर इत्युक्तं तन्माहेश्वर्यं स्वातन्त्र्यरूपमुपपादयितव्यम्, तच्च ज्ञानविषयं क्रियाविषयं चेत्युभयप्रकारं, ततो भगवान् ज्ञाता कर्ता च, यद्यपि च प्रकाशविमर्शात्मकं चिदेकघनमेकमेव संविद्रूपं तथापि व्युत्पादनाय तत्परिघटित एवायं विभागः, तेन ज्ञानात्मकक्रियाविषयं स्वातन्त्र्यं यद्यपि क्रियाशक्तिरूपं तथापि ज्ञानाधिकार एव निर्णेतव्यं तद्विषयत्वात् । एवं च ज्ञानशब्दार्थः प्रक्रान्तः प्रत्ययतश्च संपूर्णतया निर्णीतो भवति । तत्र ज्ञानं नाम स्वयं भेदिताभासभेदोपाश्रयनियन्त्रणासंकुचितमहमिति संवेदनं, तत्राभासेषु यत्स्वातन्त्र्यं तदेव ज्ञानशक्तिविषयं स्वातन्त्र्यं संपद्यत इति "तात्कालिकाक्षसामक्ष्ये" त्यादिना "शुद्धे ज्ञानक्रिये यत" इत्यन्तेन श्लोकैकादशकेन तन्निरूप्यते । तत्राभासान्तरापेक्षो वाभासोऽन्यथा वेति श्लोकेनोक्त्वा स एवाभास एक इति श्लोकान्तरेणोच्यते, अर्थक्रियाभासोपि तथैवाभासनियत इति श्लोकद्वयेनोक्त्वा कुत एकस्मिन्नाभासे सार्थक्रियेति पुनः श्लोकद्वयेन, आभासान्तरविचित्रस्य भित्तिस्थानीयमान्तरत्वमिति श्लोकेन, ततो बाह्यत्वं स्वरूपतो विभागतश्च श्लोकयुग्मेन, ततः श्लोकेन ज्ञानादिशक्त्याश्रयस्यैकस्योपसंहारः, श्लोकान्तरेण महेश्वरत्वमुपसंहरता भाविनः क्रियाधिकारस्योपक्षेप इति संक्षेपार्थ आह्निकस्य ॥

अथ श्लोकार्थो निरूप्यते ।

ननु यदि परमेश्वरनिष्ठतयैव समस्तोयं व्यवहारः तदस्य स्फुटत्वास्फुटत्वप्रायप्रसिद्धवैचित्र्यानुपपत्तिः, येन किलायमनुप्राणितः स एक एव भगवान्, न च तद्व्यतिरेकेण व्यवहारस्य निजं किं चन तत्त्वमुत्पश्याम इत्याशङ्क्याह ।

(१) तात्कालिकाक्षसामक्ष्यसापेक्षाः केवलं क्वचित् ।
आभासा अन्यथाऽन्यत्र त्वन्धान्धतमसादिषु ॥
विशेषोऽर्थावभासस्य सत्तायां न पुनः क्वचित् ।
विकल्पेषु भवेद्भाविभवद्भूतार्थगामिषु ॥

केवलमेतावता आभासानां भेदो, न पुनरर्थावभासस्य स्वात्मगतः क्वचिदपि भेद इति श्लोकद्वयस्य संमीलितस्य संबन्धः, यस्मिन्नेव काले स आभास आभाति तत्काल एव भवति यदक्षसामक्ष्यं बाह्येन्द्रियप्रत्यक्षत्वं नाम आभासान्तरं पश्यामीत्येवंरूपं तत्सापेक्षाः तद्व्यामिश्राः क्वचिदाभासा भवन्ति, यत्र स्फुटताव्यवहारः अन्धविषयोऽन्धकारस्थप्रमातृविषयः पुनर्योऽन्यो व्यवहारोऽस्फुटतामयस्तत्र त आभासा अन्यथा । तथाहि, जात्यन्धस्य बाह्येन्द्रियप्रत्यक्षत्वलक्षणमाभासान्तरं नैवास्ति, दृष्टवतस्त्वन्धीभूतस्य संतमसस्थितस्य च तात्कालिकं तन्नास्ति, अपि तु प्राक्तनमेव बाह्येन्द्रियप्रत्यक्षत्वमनुसंधत्ते । तस्मादर्थावभासस्य केषु चिदपि विकल्पेषु सत्तायां स्वरूपे विशेषोस्तीति संभावना न कर्तव्या, ते हि विकल्पा भाविवस्तुगामिनो भविष्यन्निष्ठा वा भवन्तु वर्तमाननिष्ठा वा अ-

Digitized by Google

तीतवस्तुविश्रान्ता वा । एतदुक्तं भवति । नालमिदं पश्यामि, संकल्पयामि, उत्प्रेक्षे,स्मरामि, करोमि, वेद्मी,त्यादौ नीलाभासो ऽसौ स्वरूपतो ऽनूनाधिकः, एवं पश्यामीति, एवं यः पीतादिषु, ते पुनराभासाः स्वातन्त्र्येण यदा भगवता संयोज्यन्ते वियोज्यन्ते च तदा ऽयं स्फुटत्वास्फुटत्वादिव्यवहारः नीलमित्याभासस्योत्प्रेक्ष इत्याद्याभासान्तरव्यवच्छेदेन पश्यामीत्याभासव्यामिश्रणायां स्फुटताव्यवहारः, एवं त्रैकालिकव्यवहारवैचित्र्योपपत्तिः, परमेश्वरस्वरूपान्तर्भूतत्वे पुनराभासानां न कुतश्चिद्व्यवच्छेदो न केन चिद्व्यामिश्रणेति ॥

नन्वेतन्नीलादिषूपपद्यतां यत्र बाह्येन्द्रियव्यापारोस्ति, सुखादौ तु तदभावात्कथं वैचित्र्यमित्याशङ्क्याह ।

(२) सुखादिषु च सौख्यादिहेतुष्वपि च वस्तुषु ।
अवभासस्य सद्भावे ऽप्यतीतत्वात्तथा स्थितिः ॥
गाढमुल्लिख्यमाने तु विकल्पेन सुखादिके ।
तथा स्थितिस्तथैव स्यात्स्फुटमस्योपलक्षणात् ॥

सुखे, स्रक्चन्दनादिके च तत्कारणे, दुःखे,अहिकण्टकादौ च तद्धेतौ, अतीते ऽनागते वा यद्यप्याभासः स एव, तथाप्यतीतमिदमनागतमिदमित्याभासान्तरेण यतो व्यामिश्रणा, अनुभवामीत्याभासाच्च यतो व्यवच्छेदस्तेन विद्यमानेष्वपि तेषु तस्य प्रमातुस्तेन प्रकारेण स्थितिर्न भवति, यथा पूर्वमभूदहमधुना सुखी दुःखीति समर्जनतन्निमित्तसामग्रीको वेति। यदा तु विकल्पेन तानि वस्तूनि गाढमुल्लिखति तदा पौनःपुन्यविशिष्टसुखतद्धेतूल्लेखनाभिधानकरणाभासानुप्रवेशादाभासान्तरव्यामिश्रणात्मना तेनैवास्मदुक्तेन प्रकारेण न पुनरन्येन, तथेति सुख्यहमित्यादिकेन, स्थितिर्भवतीति संभाव्यम्, उचितमेतत्, यतस्तदानीं स्फुटत्वाभासमिश्रं सुखाभासमुपलक्षयत्यसौ, अतीतग्रहणं भाविनोप्युपलक्षणम् ॥

नन्वियता किमुक्तं भवति, "बाह्यरूपाः स्रगादयः सुखादिहेतवो, बाह्यजनिताश्च सुखादयः सुख्यहमित्यभिमानहेतव" इति, ततश्च बाह्यत्वाभावे तज्जन्यत्वाभावे च न तथेत्युक्तं स्यात् । तत्र च त एव च न के चित् । ततश्च कथमुक्तम्, अर्थावभासस्य सत्तायां न क्वापि विशेष इति, सत्ताया एवाभावा,दित्याशङ्क्याह ।

(३) भावाभावावभासानां बाह्यतोपाधिरिष्यते ।
नात्मा सत्ता ततस्तेषामान्तराणां सतां सदा ॥

इह सुखमस्ति मम, दुःखं नास्ति ममे,ति ये भावाभासा अभावाभासाश्च तेषां बाह्यत्वं नामात्मा स्वरूपं न भवति। नहि सुखमित्यस्य स्वरूपं बाह्यमिति वपुषा भाति, सुखस्य हि सुखमेव स्वरूपं, केवलं बाह्यत्वं नामाभासान्तरमीश्वरेच्छास्वातन्त्र्यबलादेव यदा तत्र सुखाभासे मिश्रतया भास्यते तदा तत्तस्योपाधिरूपतामुपरञ्जकतां गच्छति । ततश्च यथा नीलाभासाभावे उत्पलाभासस्य न किं चिद्वृत्तं, स्वरूपतो राजाभासाभावे वा पुरुषाभासस्य, तथा बाह्यत्वाभासाभावेपि सुखाभासस्य दुःखाभावाभासस्य कान्ताभासस्य च न स्वरूपतः का चन हानतेति आन्तराणां सदैव स्थितिरेषाम् ॥

इहान्तःकरणे बुद्धिदर्पणात्मनि नीलादीनामवभासानामान्तरत्वमप्यस्ति, अन्तःकरणमध्ये भवत्वात्, बाह्यत्वमपि ग्राह्यतारूपं, प्रमातुर्विच्छेदेनावभासात्, बाह्यत्वं च केवलं बाह्यप्रत्यक्षता, अत्र चावस्थाद्वये ऽप्यर्थक्रियाममी कुर्वन्त्येव, अन्ततो ज्ञानं स्वविषयं, यत् पुनः प्रमातृतादात्म्यलक्षणमान्तरत्वं तत्रामी कस्माच्च कां चिदर्थक्रियां विदधीरन्नित्याशङ्क्याह ।

(४) अन्तरत्वात्प्रमात्रैक्ये नैषां भेदनिबन्धना ।
अर्थक्रियापि बाह्यत्वे सा भिन्ना ऽऽभासभेदतः ॥

प्रमात्रैक्य इति, तन्निमित्तकं यदान्तरत्वं तस्माद्धेतोरेषामाभासानामर्थक्रिया न का चिदस्ति, सा ह्यर्थक्रिया भेदे सति भवति, स हि नीलाभासः पीताभासाद्यतो भिद्यते, यतश्च प्रमातुर्भिद्यते ततः स्वसाध्यां नियतां भिन्नामर्थक्रियां तस्य प्रमातुः कुर्यात्, न चैष तदा भेदो ऽस्ति, प्रमात्रैक्यात्, सा ह्यर्थक्रिया ऽऽभासभेदनियता, तथा च कान्ताभासस्य बाह्यत्वेपि सत्याभासान्तरस्यालिङ्गनलक्षणस्य व्यपगमे दूरीभवति। इयमिति चाभासान्तरस्योपगमे ऽन्यैव प्राक्तनाह्लादविपरीता दृश्यतेर्थक्रिया, अतं आभासभेदाभावः, यतः प्रमात्रैक्यकृते आन्तरत्वे तस्मान्नार्थक्रियेति, अर्थक्रियाभासोपि चाभासान्तरमेवेत्यर्थक्रियाकारित्वमपि न भावानां सत्वम्, येन तदभावे स्वरूपत एवाभावः स्यात् ॥

ननु बाह्याभासव्यतिभेदनकाले आन्तराभासो विरोधाद्विच्छिन्न इति कथमिदमुक्तम्, आन्तराणां य आभासः स सदेत्येतत्परिहरति ।

(५) चिन्मयत्वे ऽवभासानामन्तरेवस्थितिः सदा।
मायया भासमानानां बाह्यत्वाद्बहिरप्यसौ ॥

इहावभासानां सदैव बाह्यताभासतदभावयोरप्यन्तरेव प्रमातृप्रकाश एव स्थितिः, यत एते चिन्मयाः, अन्यथा नैव प्रकाशेरन्नित्युक्तं यतः, यदा तु मायाशक्त्या विच्छेदनावभासनस्वातन्त्र्यरूपया बाह्यत्वमेषामाभास्यते तदा तदवलम्ब्यावभासमानानामसौ स्थितिर्बहिरप्यन्तरपि नायमन्तराभासो

बाह्यत्वस्य विरोधी, प्रत्युत सर्वाभासभित्तिभूतोसौ, तत्कथं विरोध इति युक्तमुक्तम्, "सदैवान्तराणां सत्त्वे"ति ॥

ननु बाह्यत्वे सत्यर्थक्रिया, तच्च बाह्येन्द्रियगम्यत्वं, न च विकल्पोल्लिखितानां तत् संभवति, तत्कथममीषामर्थक्रिया स्यात्, दृश्यते हि विकल्पोल्लिखितः पिशाचादिस्त्रासादिविधायीत्याशङ्क्याह ।

(६) विकल्पे योयमुल्लेखः सोपि बाह्यः पृथक्प्रथः ।
प्रमात्रैकात्म्यमान्तर्यं ततो भेदो हि बाह्यता ॥

विमर्शविशेषरूपे विकल्पज्ञाने य उल्लिख्यमानः कान्ताचौरादिरर्थः सोपि बाह्यः, न केवलं बहिरवलोक्यमानः, यस्मात्सोपि प्रमातुः सकाशात्पृथगेव प्रथतेयमिति, यश्च प्रमातयं हमित्येव विश्रान्तस्त्वं तदान्तरत्वम्, अन्तरिति निकटं, तच्च किं चिदपेक्ष्य, अपेक्षणीयश्च सर्वत्र प्रमातैवापेक्षणीयान्तराभावे, ततश्च प्रमातरि निकटं तादात्म्यं प्राप्तमेवेति ततो यद्भिन्नं तद्बाह्यमेवेति युक्ता * उल्लेखस्याप्यर्थक्रिया ॥

ननु कुम्भकारादिव्यापारेण घटादेरस्तु बाह्यत्वमन्तःकरणगोचरस्य तु किं कृतं तदित्याशङ्क्याह ।

(७) उल्लेखस्य सुखादेश्च प्रकाशो बहिरात्मना ।
इच्छातो भर्तुरध्यक्षरूपो ऽक्ष्यादिभुवां यथा ॥

अन्तर्विकल्पप्रतिबिम्बितस्य नीलादेर्यो बहिरात्मना प्रमातृविच्छिन्नेन स्वभावेन प्रकाशः स भर्तुरन्तराभासान्बिभ्रतो बहिः सृष्टिं च पुष्णत ईश्वरस्यैवेच्छया, यथैव चक्षुरादिविषयभूतानां प्रत्यक्षज्ञानशब्दवाच्यो बाह्यात्मना प्रकाशो नीलादीनाम् । एतदुक्तं भवति । कुम्भकारव्यापारो नाम परमार्थत ईश्वरेच्छैव तदवभासितकायस्पन्दपर्यन्ता, न पुनरन्यः कश्चन सः, ततश्च यथा ईश्वरेच्छया प्रकाशादबहिर्भूता अपि नीलाद्या बाह्यकरणगोचरीभूताः कल्पितात्मप्रमातृविच्छिन्नरूपेण बाह्यत्वेन भासन्ते, तथान्तःकरणगोचरीभूता अपीति को विशेषः, सुखदुःखप्रायास्तु भरताद्युक्तरूपाः † स्थायिव्यभिचाररूपा रतिनिर्वेदादयो ऽन्तःकरणैकगोचरा बहिरात्मना भान्ति संकल्पेषु यद्यपि क्षेत्रज्ञस्यैव स्वातन्त्र्यं तथापि चित्परमार्थताया न्यग्भावयितुमशक्यत्वादीश्वरस्यैव वस्तुतः । यथोक्तं ग्रन्थकृतैव ।

यद्यप्यर्थस्थितिः प्राणपुर्यष्टकनियन्त्रिते ।
जीवे निरुद्धा तत्रापि परमात्मनि सा स्थिता ॥
तदात्मनैव तस्य स्यात्कथं प्राणेन यन्त्रणा ।

इति । यत्र त्वनिच्छोरेव क्षेत्रज्ञस्य स्वरसवाहिव्याक्षेपसारा सांकल्पिकी सृष्टिः, तत्र स्फुट ईश्वरस्यैव व्यापारः । तस्मात्सांकल्पिकानामपि बहिर्भावे परमेश्वरेच्छैव हेतुरिति सिद्धान्तः ॥

अधुना पूर्वोक्तमैक्यं माहेश्वर्यं च निगमयति ।

(८) तदैक्येन विना न स्यात्संविदां लोकपद्धतिः ।
प्रकाशैक्यात्तदेकत्वं मातैकः स इति स्थितम् ॥
स एव विमृशत्त्वेन नियतेन महेश्वरः ।
विमर्श एव देवस्य शुद्धे ज्ञानक्रिये यतः ॥

यदेतत् पूर्वोक्तेन ग्रन्थेनोपपादितं तदिति तस्माद्धेतोः संविदां ज्ञानानामैक्येन विना लोकपद्धतिर्लोकमार्गः सर्वो व्यवहारो न संभवेत् । संभवति चायं तस्मादैक्यमासां, न चैतद् दुर्घटं, यतो विषयप्रकाश एव संविदुच्यते, केवलं विषयोपरागमहिम्ना बहिर्मुखतया नीलप्रकाशोन्यः पीतप्रकाशश्चान्यः, परमार्थतस्तु प्रकाशस्य देशकालाकारसंकोचवैकल्यादेकत्वमेवेत्येक एव प्रकाशोन्तर्विश्रान्तः स एव च प्रमातोच्यत इति स्थितमिदानीमुपपादितः । न चास्यासौ प्रकाशलक्षणः स्वात्मा नीलाद्युपरागश्च परामर्शनशून्य एवास्ते स्फटिकमणेरिव, अपि तु सदैव विमृश्यमानरूप इति विमृशद्रूपत्वमनवच्छिन्नविमर्शिता अनन्योन्मुखत्वमानन्दैकघनत्वमेवास्य माहेश्वर्यम्, स एव अहंभावात्मा विमर्शो देवस्य क्रीडादिमयस्य शुद्धे पारमार्थिक्यौ ज्ञानक्रिये, प्रकाशरूपता ज्ञानं तत्रैव स्वातन्त्र्यात्मा विमर्शः क्रिया, विमर्शश्चान्तः कृतप्रकाशः इति विमर्श एव परावस्थायां ज्ञानक्रिये, परापरावस्थायां तु भगवत्सदाशिवभुवि इदंतासामानाधिकरण्यापन्नाहंताविमर्शस्वभावे अपरावस्थायां च मायापदे इदंभावप्राधान्येन वर्तमाने इति विशेषः । सर्वथा तु विमर्श एव ज्ञानं तेन विना हि जडभावोस्य स्यादित्युक्तं स एव च क्रियेति भाविनः क्रियाधिकारस्योपक्षेपं करोतीति शिवम् ॥

॥ आदितः सूत्रश्लोकाः ८९ व्याख्याताः ॥

श्रीमदाचार्याभिनवगुप्तविरचितायामीश्वरप्रत्यभिज्ञासूत्रविमर्शिन्यां माहेश्वर्यनिरूपणम् ॥

॥ इत्यष्टममान्हिकम् ॥

॥ ज्ञानाधिकारःसमाप्तः ॥

॥ श्रीः ॥

॥ अथ क्रियाधिकारः ॥

वितत्तविशदस्वात्मादर्शे स्वशक्तिरसोज्वलां
प्रकटयति यो मातृस्वांशप्रमेयतटद्वये ।

---

* कर्मणि घञ् ।

† रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्त्तिताः ॥

बहुतरभवद्भङ्गीभूमिं क्रिया सरितं परां
प्रकटयतु नः श्रीमान्गौरीपतिः सततं परम् ॥
यत्र विश्रान्तिमासाद्य चित्रं क्रीडाविजृम्भितम् ।
क्रियाशक्तिः प्रियात्यन्तं दर्शयेत्तं स्तुमः शिवम् ॥

अथ क्रियाशक्तिस्वरूपं वितत्य निर्णेतुमधिकारान्तरमारभ्यते । तत्र श्लोकाष्टकेना"त एवे"त्यादिना "यद्वभास्यत" इत्यन्तेन परमेश्वरे परमार्थतोऽक्रमा क्रिया परिमितसांसारिकप्रमातृगतक्रमावभासनयोगात्सक्रमा चेत्युपपाद्यते । तथाहि, श्लोकेनोक्तपूर्वपक्षप्रतिक्षेपः, ततः श्लोकेन सक्रमत्वाक्रमत्वविवेकः, ततः श्लोकत्रयेण क्रमस्वरूपनिरूपणं, ततः श्लोकद्वयेन सक्रमत्वाक्रमत्वयोर्विषयविभागः, विषयविभागे च सति वस्तुत एकत्रैव तयोर्विश्रान्तिरिति श्लोकेन निरूप्यत इति तात्पर्यमान्हिकस्य ॥

श्लोकार्थस्तु विभज्यते ।

तत्र पूर्वोक्तज्ञानशक्तिसमर्थनोपयोगिनि प्रमेये सिद्धे प्रमेयान्तरमप्ययत्नतः सिद्धमित्यधिकरणसिद्धान्तदिशा दर्शयति ।

(१) अत एव यदप्युक्तं क्रिया नैकस्य सक्रमा ।
एकेत्यादि प्रतिक्षिप्तं तदेकस्य समर्थनात् ॥

"यत्तावदुक्तं ज्ञानान्येवानुभवविकल्परूपादिभिन्नानि, न तेषामाश्रयोऽस्ति कश्चित्, संस्काराच्च स्मृतिः सिद्धा, ज्ञानं च जडं चेदार्थस्य प्रकाशः, अजडं चेद्देशकालसंकोचवैकल्यादात्मतत्त्वादभिन्नमिति" तत्तावत्प्रतिक्षिप्तं, भिन्नानामनुभवादीनामनुपपत्तेर्वितत्य दर्शितत्वात्, न च संस्कारमात्रात् स्मृतिरित्येतदप्युक्तम्, अजडमेव चासंकुचितरूपं ज्ञानं तत्स्वातन्त्र्यावभासितज्ञेयोपरागवशात्त्वस्य संकोचावभास इत्यपि दर्शितं यतः, न केवलमतो हेतुकलापाद्या ज्ञानशक्तिचोद्यानि निवारितानि, यावत्क्रियाशक्तिविषयाण्यपि दूषणान्यत एव हेतुजातादपसारितानीत्यपिशब्दार्थः । एका क्रिया क्रमिका कथमाश्रयस्यैकस्वभावत्वे सति घटत इति यदुक्तं, तथा तत्रतत्र स्थिते इति द्विष्ठस्यानेकरूपत्वादिति च यदुक्तं, तदपि प्रतिक्षिप्तमेव । यदियति पूर्वपक्षे इयदेव जीवितमेकमनेकस्वभावं कथं स्यादिति, तत्र चोक्तं, चित्स्वभावस्य दर्पणस्येव एकताऽनपबाधनेनाभासभेदसंभवे क इव विरोध इति । तस्मात् प्रत्यभिज्ञानबलादेकोऽप्यसौ पदार्थात्मा स्वभावभेदान्विरुद्धान्यावदङ्गीकुरुते, तावत्ते विरोधादेव क्रमरूपतया निर्भासमानास्तमेकं क्रियाश्रयं संपादयन्तीति, ततश्च संबन्धादीनामप्युपपत्तिरिति * ॥

ननु च क्रमिकत्वमेव क्रियायाः स्वरूपं क्रमश्च कालकलनाहीने चिन्मये भगवति नास्ति, इति कथमस्य सा भवेदित्याशङ्क्याह ।

(२) सक्रमत्वं च लौकिक्याः क्रियायाः कालशक्तितः ।
घटते न तु शाश्वत्याः प्राभव्याः स्यात्प्रभोरिव ॥

उत्क्षिपत्यपक्षिपति हस्तमिति ये पूर्वोत्तरे क्षणास्ते क्रमवन्तः, तत्र येषां त एव क्रिया काणादानामिव, तेषां सा सक्रमा प्रत्यक्षेणैव भाति । ये तु मन्यन्ते तथाभूतपरिदृश्यमानभेदसंपादिका यासौ का चिदतीन्द्रिया हस्तगता शक्तिर्व्यापारोद्बोधरूपा नित्यानुमेया तस्याः केवलं पूर्वापरीभूतत्वमनुमीयते इति लौकिक्याः क्रियायाः सक्रमत्वं कालशक्तेराभासविच्छेदनप्रदर्शनसामर्थ्यरूपात् पारमेश्वराच्छक्तिविशेषाद्घटते उपपद्यते । या तु प्रभोः संबन्धिनी तदव्यतिरिक्ता क्रिया शक्तिः शाश्वती कालेनास्पृष्टा तस्याः सक्रमत्वमस्तीति संभावनापि नास्ति, यथा प्रभोः सक्रमत्वमसंभाव्यं तथा तस्या अपि । उक्तं हि ।

"हस्तस्य सक्रमत्वे तद्गतापि क्रिया तथा स्यात्,, ।
इति ॥

ननु कालो विशेषणभावमुपगच्छन् भावं स्वेन रूपेणावच्छिनत्ति तत्र कोऽसौ कालो नामेत्याशङ्क्याह ।

(३) कालः सूर्यादिसंचारस्तत्तत्पुष्पादिजन्म वा ।
शीतोष्णे वाथ तल्लक्ष्यः क्रम एव स तत्त्वतः ॥

ये इयत्तया परिनिष्ठिता आभासाः सिद्धा, स्तद्यथा चन्द्रसूर्यादीनां सहकारमल्लिकाकुटजादीनां शीतोष्णादेः परभृतमदविलासादेः, त एव कालः, यतोऽपरिनिष्ठितं गमनपवनादि तैरियत्तया परिनिष्ठीयते परिवर्तकैरिव कनकं, स एव च सूर्यादीनां स्वभावविशेषस्तत्त्वतः परमार्थतः क्रमो नान्यः कश्चित्क्रमो नाम, क्रम एव च कालो नान्योऽसौ कश्चिदिति । एवकारो भिन्नाभिन्नक्रमो योज्यः, यौगपद्यमप्याभासयोरपराभासापेक्षया क्रम एव, चिरक्षिप्रादिधीरपि विततान्यस्ववशादाभासभेदे क्रमरूप एव, परत्वापरत्वबुद्धिरपि स्फुटत्वादिना तत्रैवेति, तेनतेन प्रतिमानवर्तकतुल्येन सूर्यसंचारादिना सहमीयमानो हेमस्थानीयो देवदत्ताभासस्य वैचित्र्यभेद इत्युच्यते दिवसं गच्छतीति ॥

नन्वेवं कालो भावस्वभावभूत एवास्तु कासौ कालशक्तिरित्याशङ्क्याह ।

(४) क्रमो भेदाश्रयो भेदोप्याभाससदसत्त्वतः ।
आभाससदसत्त्वे तु चित्राभासकृतः प्रभोः ॥

* इदमत्र बोध्यम् । लौकिकज्ञानव्यवहारमूलज्ञातृज्ञेयप्रकाशनसामर्थ्यं ज्ञानशक्तिर्देवस्य, तत्रैव संयोजनादिस्वातन्त्र्यात्मा विमर्शशक्तिरेव क्रियाशक्तिरिति, सा चेच्छास्वरूपैव पर्यवस्यतीति निरूपयिष्यते ।

Digitized by Google

इह स्वभावभेदमात्रं यदि क्रमात्मा कालः, तदङ्गुलीयमुष्टयं भिन्नस्वभावमिति भिन्नकालं भवेत् । तस्मादस्याभासस्य सद्भावः स्फुटप्रभापुञ्जस्य चासद्भावः इत्येवंभूतो यो भेद आभाससद्भावासद्भावाभ्यामनुप्राणितस्तत्कृतः क्रमः कालात्मा, तौ चाभासानां भावाभावौ न बाह्यहेतुकृताविति विस्तार्योपपादितमिति, य एवं संवित्स्वभाव आत्मा स्वप्नसंकल्पादौ आभासवैचित्र्यनिर्माणे प्रभुः प्रभविष्णुरिति स्वसंविदितस्तत एव तौ भवतः, स ह्यात्मनि नीलादीनां भासानाभासयंश्चित्रतया परिमेयमाभासयति । तथाहि लोहिताभासं उन्नताभासं वृत्ताभासं च सामानाधिकरण्येन, घटाभासं पटाभासं च पृथगवभासेन, अन्योन्यत्राभासाभावेन, स्वात्मनि स्वैकरसेनाभासेन, इयति च न क्रमस्योदयः । यदा तु शरदाभासं हेमन्ताभासेन च सर्वथैव शून्यमाभासयति, हेमन्ताभासं च शरदाभासेन, तदा कालात्मा क्रम उत्तिष्ठतीति, सेयमित्थंभूताभासवैचित्र्यग्रथनशक्तिर्भगवतः कालशक्तिरित्युच्यते ॥

चित्राभासकृत्त्वमेव स्फुटयति ।

(५) मूर्तिवैचित्र्यतो देशक्रममाभासयत्यसौ ।
क्रियावैचित्र्यनिर्भासात्कालक्रममपीश्वरः ॥

पदार्थस्य स्वं रूपं मूर्तिः, तस्या यद्वैचित्र्यं विभेदः तद्यथा, गृहमित्यन्यत्स्वरूपं, प्राङ्गनमित्यन्यद्, विपणिरित्यन्यद्, देवकुलमित्यपरम्, उद्यानमित्यन्यद्, अरण्यमिति तदितरत्, तस्माद्वैचित्र्यादाभास्यमानाद्देशरूपो दूरादूरविततत्वाविततत्वादिः क्रमो भगवता ऽवभास्यते, यदा तु गाढप्रत्यभिज्ञाप्रकाशबलात्तदेवेदं हस्तस्वरूपमिति प्रतिपत्तौ मूर्तेर्भेदो ऽथ चान्यान्यरूपत्वं भाति, तदा एकस्मिन्स्वरूपे यदन्यदन्यद्रूपं तद्विरोधवशादसहभवत्क्रियेत्युच्यते, तस्या यद्वैचित्र्यं परिमितापरिमितरूपतात्मकं तदैकानुसंधानेन फलसिद्ध्यादिनिबन्धनवशाद्ग्रथ्नारुचि चर्चितेन निर्भासयत्कालरूपं क्रममेव भासयति । "न चैतद्युक्तमेकस्वरूपस्य कथमन्यदन्यद्रूपमिति" यतो नासौ कश्चिद्भावो य एवं विकल्प्यते, संविदेव हि तथा भाति, तथाभासनमेव चास्या ऐश्वर्यम्, नहि भासने विरोधः कश्चित्प्रभवति, स हि सुखदुःखादेर्भासनकृत एव, तथाभासनाभाव एव हि विरोधतत्त्वम्, एतदपिशब्देन ईश्वरशब्देन च दर्शितम् ॥

नन्वेवमाभासविषयाभ्यामेव देशकालक्रमाभ्यां भवितव्यम्, अनाभासश्च प्रमाता, स नहि कस्य चिदाभासते, तस्य सर्वमाभाति यत,स्ततश्च तौ प्रमातरि कथं, दृश्येते च अभवमहं भवामि भवितास्मीति, गृहे तिष्ठाम्यरण्ये देवगृहे इति च । किं च स्वयं देशकालक्रमशून्यस्य किं दूरं किमन्तिकं किं वर्तमानं किमतीतं किं भावीति प्रमात्राश्रयो भावेष्वपि क्रमो न युक्तः । न च प्रमातृनिरपेक्षेष्वपि तेषु स्वात्मनि दूरत्वादि भूतत्वादि वा, तदेतत्समर्थयितुमाह ।

(६) सर्वथाभासभेदो ऽपि भवेत्कालक्रमाकरः ।
विच्छिन्नभासः शून्यादेर्मातुर्भातस्य नो सकृत् ॥
देशक्रमो ऽपि भावेषु भाति मातुर्मितात्मनः ।
स्वात्मेव स्वात्मना पूर्णा भावा भान्त्यमितस्य तु ॥

सर्वेषु वस्तुष्वेकानेकरूपेषु यः कालात्मा क्रमः तस्य य आकार उत्पत्तिनिबन्धनमिति व्याख्यात आभासस्य भावाभावकृतो भेदः स शून्यप्राणबुद्धिदेहादेर्भवतीति संभाव्यते, यतः स शून्यादिर्विच्छिन्नभाः, नहि तस्य भासनं स्वरूपं नीलादिवज्जडत्वात्, अपि तु संवित्स्फुरणमस्य भासनं, तच्च सदास्य नास्ति यथा सुप्ते देहस्य संसारयात्रापतितत्वे शून्यस्य प्राणादेस्तदास्य भासनं विच्छिद्यत इत्याभाससद्भावासद्भावकृतः कालक्रमो ऽस्ति, "अतीतो ऽहं बालदेहाभासरूपो भवामि" "युवदेहाभासरूप इति" स च यतः प्रमाता ऽहंभावसमावेशनादपरिपूर्णाद् अत उद्रिक्तकालक्रमत्वाद् भावेष्वपि कालक्रममाभासयति, "यो ऽहं बालो ऽभवं तत्सहभावो घटाभासो ऽप्यभवदिति," न तु यः सकृद्विभात इत्यनया वाचोयुक्त्या ऽविच्छिन्नभासनः प्रमाता संविद्रूपस्तस्य स्वात्मनि कालक्रमः, नापि तदपेक्षया वेद्ये भावजाते, तद्धि तत्राभेदेन भातीति । एवं देशक्रमो ऽपि मितात्मनः परिच्छिन्नस्वरूपस्य शून्यादेर्देहान्तस्य स्वात्मनि भाति, इह तिष्ठामीति । स्वापेक्षया च भावेष्वपि यन्मम संयोगपारिमित्येन वर्तते तदन्तिकमितरद्दूरमिति । अमितस्य स्वरूपेयत्ताशून्यस्य तु संवित्तत्त्वस्य भावाः स्वात्मना ऽहंभावेन यतो भान्ति ततः पूर्णा अपरिच्छिन्नस्वरूपेयत्ताकाः, यतः स्वात्मा तस्य तथाभूत एवेति समुच्चयोपमा । तदुक्तम् । "अपूर्वा परं हीदं मूर्तितः क्रियातश्च सर्वं सर्वतः पूर्णमिति" क्रियाप्रसङ्गादिह कालक्रमः प्राकरणिको दृष्टान्तत्वेन एतत्प्रसङ्गाद्देशक्रमो निरूपितः, दृष्टान्तश्च पूर्वं वाच्य इति वैचित्र्यनिरूपणावसरे देशक्रमस्यादावभिधानं न्याय्यम्, उपसंहारे तु प्राकरणिकस्य कालक्रमस्यादौ निर्देशः, पश्चात्तु प्रासङ्गिकस्य देशक्रमस्येति ॥

नन्वेवं सति प्रमातरि भगवति नास्त्येव क्रियेत्यायातं, कालक्रमाभावात्, क्रमाश्रयेण च तस्या अवस्थानादित्याशङ्क्याह ।

(७) किं तु निर्माणशक्तिः साप्येवं विदुष ईशितुः ।
तथा विज्ञातृविज्ञेयभेदो यदवभास्यते ॥

Digitized by Google

इह तत्त्वतः परमेश्वरस्यास्याप्रतिहतस्वातन्त्र्यरूपाविच्छिन्नस्वात्मविमर्शमय्यनन्योन्मुखतारूपेच्छैव क्रियेत्युपसंहरिष्यते ऽधिकारान्ते "एवमिच्छैव हेतुता कर्तृताक्रियेति,, चैत्रमैत्रादेरपि पचामीति यैवान्तरिच्छा सैव क्रिया, तथा चाधिश्रयणादिबहुतरस्पन्दनसंबन्धे ऽपि पचामीति न विच्छिद्यते । यत्तु पचामीति इच्छारूपं तदेव तथा स्पन्दनात्मतया भाति, तत्र तु न कश्चित्क्रमस्तत्त्वतः । एवमीश्वरस्यापि ईशे भासे स्फुरामि घूर्णे प्रत्यवमृशामीत्येवंरूपं यदिच्छात्मकं विमर्शनमहमित्येतावन्मात्रं तत्त्वं, न तत्र कश्चित्क्रमः । एतदेव चोच्यते प्रमातृप्रमेयवैचित्र्यक्रममुल्लसत्त्वमुना वाक्येन, तत्रापि न कश्चित्क्रमः। यदा त्विच्छारूपं पचामीति स्पन्दनात्मतां कार्यपर्यन्तां गतं क्रमारूषितमाभाति तदा भगवदिच्छा प्रमातृप्रमेयभेदपर्यवसिता तत्क्रमोपश्लिष्टा भाति दर्पणतलमिव विततप्रवहन्नदीप्रवाहक्रमसमाश्लिष्टं । अत्र च केवलं दर्पणस्य तथेच्छा नास्ति, परमेश्वरस्य तु सास्ति, इत्युभयथा ऽस्य क्रियाशक्तिक्रमरूपक्रियानिर्माणसामर्थ्यं क्रमरूपक्रियोपरागयोगश्चेति । एवं देशक्रमे ऽपि वाच्यम्, तत्र त्वस्य विच्छित्तिरुच्यते ऽन्यैः, इह तु क्रियाशक्तिरेव स्वीकृतेति पिण्डार्थः । अक्षरार्थस्तु तथेति स्वरूपभेदेन देशक्रमकारिणा क्रियाभेदेन च कालक्रमसंपादकेनोपलक्षितो यो विज्ञातुः शून्यादेः प्रमातुर्भेदो ऽन्योन्यं ज्ञेयाच्च, एवं घटादेः परस्परं ज्ञातुश्च स भगवता ऽवभास्यते, यत्तदवभासनं सा ईशितुरपि निर्माणशक्तिः क्रियाशक्तिर्न केवलं शून्यादेरेव क्रिया, यतश्च तन्निर्मितं ज्ञातृज्ञेयक्रियावैचित्र्यमसौ विद्वांश्चेत्यनवरतं, तथैव हि तत्स्फुरति, ततो ऽपि तस्य सा क्रियाशक्तिः, अतो भासनविच्छेदाभावात् क्रमाभावे स्थूलदृष्ट्या यद्यप्यस्य भवेत्क्रियानुपपत्तिशङ्का, किं त्वेवमस्य क्रियाशक्तिरुपपन्नेति संगतिरिति शिवम् ॥ ८ ॥

॥ आदितः सूत्रश्लोकाः ९७ व्याख्याताः ॥

इति श्रीमदाचार्याभिनवगुप्तविरचितायामीश्वरप्रत्यभिज्ञासूत्रविमर्शिन्यां क्रियाधिकारे क्रियाशक्तिनिरूपणं प्रथममान्हिकम् ॥

॥ इति नवममान्हिकम् ॥

॥ श्रीः ॥

विरोधमविरोधं च स्वेच्छयैवोपपादयन् ।
भेदाभेदौ च यो मन्त्रतत्त्ववित्तं स्तुमः शिवम् ॥

यदुक्तमप्रतिहतसामर्थ्याद्भगवतो निर्माणशक्तिरिति तदेव बाह्यवाददर्शनानुपपद्यमानक्रियासंबन्धसामान्यादिपदार्थराशिसमर्थनमुखेन निर्वाहयितुं "क्रियासंबन्धसामान्य"त्यादि "तेन न भ्रान्तिरीदृशी" त्यन्तश्लोकसप्तकेनान्हिकं प्रस्तूयते । तत्र प्रथमश्लोकेन सूत्रकल्पेन एकानेकरूपस्य क्रियादेर्बाह्यवादे विरुद्धधर्माध्यासदूषणेनानुपपद्यमानस्यावश्यसमर्थनीयं वपुरिति दर्श्यते, द्वितीयेन तत्रोपपत्तिस्सूच्यते, तृतीयेन निर्विकल्पकसंवेदनसंवेद्यत्वेपि विकल्पकाले एव स्फुटमेषां रूपमित्युच्यते, चतुर्थपञ्चमाभ्यामेकानेकस्वरूपताया विषयविभागश्चिन्त्यते, षष्ठेन षड्गणकसूत्रसूचितसंबन्धस्वीकृतानां क्रियाकारकभावादीनां स्वरूपमुच्यते, सप्तमेनार्थक्रियोपयोग इति संक्षेपः ॥

नन्वेवं तया निर्माणशक्त्या ऽवभासनारूपया यन्निर्मीयते तस्यावभासनैव निर्माणं नान्यत् । सा च द्विचन्द्रादेरप्यस्ति नीलादेरपि नीलादिनिष्ठस्य कर्मसामान्यसंबन्धादेरपि, ततश्चासत्यं सत्यं संवृत्यसत्यमिति य एवंप्रायेषु व्यवहारः स कथं संगच्छेत, निर्मेयत्वाविशेषादित्याशङ्क्य क्रियादीनामसत्यत्वं तावन्नोपपन्नमिति वदन् द्विचन्द्रादीनां त्वित्थमप्यसत्यत्वमिति सूचयन्नाह ।

(१) क्रियासंबन्धसामान्यद्रव्यदिक्कालबुद्धयः ।
सत्याः स्थैर्योपयोगाभ्यामेकानेकाश्रया मताः ॥

चित्तत्वादन्यत्र या क्रियाबुद्धिः कर्तृकर्मकरणादिषु चैत्रो व्रजति तण्डुला विक्लिद्यन्ते एधा ज्वलन्तीति तस्या एकानेकरूपश्चैत्राद्यर्थ आश्रय आलम्बनं, तथाहि, तत्तद्देशकालाकारभिन्नस्तत्र चैत्रदेहो नैकस्वभावोपि स एवायमित्येकरूपतामपरित्यजंश्चैव निर्भासते, स एव चैकानेकरूपोर्थः क्रिया, तथैव प्रतिभासनाच्च पारमार्थिकी, द्विचन्द्रादि तु तथाभासमानमप्युत्तरकालं प्रमाव्यापारानुवृत्तिरूपस्य स्थैर्यस्योन्मूलनेन द्विचन्द्रो नास्तीत्येवंरूपेणासत्यम्, इह पुनश्चलति चैत्र इत्येवंभूतो विमर्शानुवर्तमानो न केन चिदुन्मूल्यमानः संवेद्यते, द्विचन्द्रादि च यद्यपि ह्लादोद्वेगयोरुपयुज्यते, तथापि द्विचन्द्रमानी न तावतीं तत्रार्थक्रियामभिमन्यते, अपि तु यादृशी एकेन शशिना कर्तव्या तिमिरापसारणादिरूपा तादृश्येवा परेणेति न तद्द्विगुणामर्थक्रियां तत्राध्यवस्यति, तस्यां चासौ नोपयुज्यते,व्रज्यायां तु यामेव ग्रामप्राप्तिमध्यवस्यति तस्यामविकलायामुपयोगोस्या इति स्थैर्योपयोगाच्चैकानेकरूपक्रियातत्त्वालम्बना बुद्धिः सत्यैव, एवं संबन्धादिषु कालपर्यन्तेषु वाच्यम् । उत्तरकारिकासु स्फुटीभविष्यति ॥

नन्वेकत्वमनेकत्वं चेति परस्परं विरुद्धे कथमेकत्र वस्तुनि स्याताम्, ततोयं च बाधकप्रमाणकृतः स्थैर्योन्मूलनप्रकार इत्याशङ्क्याह ।

(२) तथैकमान्तरं तत्त्वं तदेवेन्द्रियवेद्यताम् ।
संप्राप्यानेकतां याति देशकालस्वभावतः ॥

इह तावच्चैत्रे चलति दृष्टे न जातु चैत्र चलत्ययमिति बुद्धिर्जायते, न रजतमितिवद्, द्विचन्द्रेपि नायं द्विचन्द्रस्तिमिरवशादहमुपप्लुतनयनः परमेवं वेद्मीति भवत्युन्मूलना बुद्धिः। "यत्तूक्तमेकमेव कथमनेकं भवतीति" तत्रोच्यते, इह कारणमेव कथमकारणं भवति, "अथोच्यते विषयभेदात्तथेति" तद्विषयभेदे एतच्च विरुध्यते इति केनायं वितीर्णो वरः, संवेदनेनेति चे,ज्ज्वलतीत्यादौ संवेदनमेवास्माभिः प्रमाणीकृतं किमिति न सह्यते। विषयभेदोपि चात्र वक्तुं न शक्यते। तथाह्याभासान्तरेणासंभेदने तदेकाभासमात्रमत एवान्यापेक्षावियोगादन्तरङ्गत्वादान्तरमनुवर्तमानं तथाभूताभासमात्रग्रहणोचितान्तःकरणसंवेद्यतया चान्तरं तथा स्वरूपापरिच्युतेस्तत्त्वमाभासान्तरयोगेन तननसहिष्णुत्वाच्च तत्त्वमेकमिति प्रतीयते तदेव देशाभासेनेहामुत्रेति कालाभासेनाधुना तदानीमिति स्वभावाभासेन कृशः स्थूल इत्यादिना मिश्रतया ऽनेकमिति बाह्येन्द्रियवेद्यतायां प्रतीयते। तथा स्वामिनश्चात्मसंस्थस्येत्युक्तनीत्या विश्वमेवान्तरं सदेकं तदेव "सान्तर्बहिःपरिवर्तिनः उभयेन्द्रियवेद्यत्व"मिति वक्ष्यमाणकार्यकारणभावदृष्ट्या इन्द्रियवेद्यतायाम् अनेकं देशाद्याभासमिश्रणादिति। एकत्वमाभासान्तरामिश्रतायामन्तःकरणैकवेद्यत्वे चिन्मात्रायामनेकत्वं पुनराभासान्तरमिश्रतायामुभयकरणवेद्यत्वे चिदतिरिक्तभासने चेति स्फुटो विषयभेदः। तस्यैव च तथात्वमिति परामर्शबलादेव कारणाकरणवदुपादानसहकारिवत्। अथ व्यपदेशमात्रमेतत्कारणमकारणं चेत्यादि, तदिहाप्येकमनेकमिति व्यवहारमात्रम् नीलं पीतमविकल्पकं सविकल्पकमित्यपि सर्वं मायापदे व्यवहारमात्रमिति सर्वं समानम्। तस्मादेकानेकत्वविरोधो न बाधकस्तदेतदेवकारेणोक्तं, तत्रेति, तेषु क्रियादिषु यदान्तरं तत्त्वं तदेकं तदेवेन्द्रियवेदनीयतां प्राप्य देशादिभेदादनेकतां यातीति संबन्धः। तत्रेति सत्यत्वे स्थिते तयोर्वा एकत्वानेकत्वयोर्मध्ये एकत्वमेवमनेकत्वमेवमिति योजना॥

नन्वेवं विषयभेदे ऽभ्युपगम्यमाने यदेकं प्रतिभातं भवति तदा नानेकमनेकप्रतिभासे च नैकं प्रतिभातमिति कथमेकानेकरूपं वस्तु स्यात्, तथाहि बाह्येनेन्द्रियेण चैत्रे विचित्रदेशकः परमनुभूयते न त्वनेकाभाससंमिश्रीकारे बाह्येन्द्रियजस्याविकल्पस्य व्यापारः सन्निहितविषयबलोत्पत्तेरविचारकत्वादित्याहुः। विकल्पेनापि मानसेन तथाभूतं वस्तु नैव स्पृश्यते इति कया धिया वस्त्वेकानेकरूपं गृह्येत इतिपरव्यामोहनिबर्हणायाह।

(३) तद्द्वयालम्बना एता मनोनुव्यवसायि सत्।

करोति मातृव्यापारमयीः कर्मादिकल्पनाः॥

इह ज्ञानमालाया अन्तःसूत्रकल्पः स्वसंवेदनात्मा प्रमाता जीवितभूत इत्युपपादितं प्राक्, स च स्वतन्त्र इत्यपि निर्णीतम्। स च विशुद्धस्वभावः शिवात्मा, मायापदे तु संकुचितस्वभावः पशु,स्तदस्य मनःसमुल्लासावसरे विकल्पभूमिकायां स्फुट उल्लासः, ऐन्द्रियके निर्विकल्पके सदाशिवेश्वरदशाभ्युदयात्,अविकल्पकबोधाबहिर्भूतविमर्शव्यापारस्य पश्चाद्भाविनं व्यवसायं निश्चयात्मकं विकल्पकमनुव्यवसायशब्दवाच्यं विदधदन्तःकरणमेतान्क्रियासंबन्धादिविकल्पान्संपादयति, ते च विकल्पास्तद्द्वयमेकत्वानेकत्वरूपमवलम्बन्ते। नहि विकल्पेषु प्रतिभासमानमवस्तु तदिति ह्युक्तम्। प्रकाशतैव वस्तुत्वमिति, न च विकल्पस्य प्रकाशरूपतां मुक्त्वारोपणाध्यवसायाभिमानादिनामधेयं व्यापारान्तरमुक्तम्। ततोऽबाह्यं बाह्यमारोपयन्तीत्यादि वचो वस्तुशून्यं, तच्चैतदुक्तं "भ्रान्तित्वे चावसायस्ये" त्यत्र। "अथ ब्रूयात्परो यदिन्द्रियज्ञानेन प्रकाशनीयं स्वलक्षणं तत्कथं विकल्पः स्पृशेदिति"। भवेदेवं यदि विकल्पो नाम स्वतन्त्रो भवेत्। यावता प्रमातुरसौ व्यापारः, प्रमाता च पूर्वानुभवान्तःस्वसंवेदनरूपः, तदस्य चायमेव पूर्वानुभवसंस्कारो यद्विकल्पनव्यापारकालेपि पूर्वानुभवात्मत्वमनुज्झन्नेवास्ते, ततः पूर्वानुभवो यावत्स्वलक्षणप्रकाशनात्मा तावत्पूर्वानुभवतादात्म्यापन्नप्रमातृतत्त्वव्यापारोपि विकल्पस्तद्विषय एव। अत एवमुक्तमाचार्येण।

पूर्वानुभवसंस्कारः प्रमातुरयमेव सः।
यदपोहनकालेपि स पूर्वानुभवः स्थितः॥

इति। तस्मात्प्रमातुर्यो व्यापार एकत्वानेकत्वसंयोजनात्मा स एव प्रकृतो यत्र तादृशीः क्रियादिकल्पना एकानेकवस्तुविषया एता इति ग्रहणकवाक्यसूचिता मन एव करोतीति स्थितम्। यद्यप्यविकल्पेपि सामान्याद्यवभासो घटमात्रावभासादौ, तथापि न तदा सामान्यादि स्फुटं समानोपरञ्जकत्वे संबन्धिद्वयोद्भवे क्रमिकक्षणसंतानात्यागेवयवकदम्बकस्वीकारे ऽवध्यवधिमत्परिग्रहादौ सामान्यसंबन्धक्रियाद्रव्यदिगादिपदार्थस्य परमार्थतः स्फुरणादिति मानसविकल्पग्राह्या एकानेकरूपाः सामान्यादय इति स्थितम्। इयं च संवृतिर्विकल्पबुद्धिः, तद्वशादुच्यतां संवृतिसत्यत्वं सत्यत्वस्यैव तु प्रकारस्तदिति द्विचन्द्रादिवदसत्यता॥

तत्र चायं संविदवतरणक्रमो यत्क्रियाशक्तेरेवायं सर्वो विस्फारः, तत्रापि संबन्ध एव मूलभूतः, तथाहि, समानानां यदेकं भाति तत्सामान्यं, देवदत्तस्य यद्वैतत्यं सा क्रिया,अवयवानां यदैक्यं वैतत्यं च देशतः सोवयवी, इममवधिं कृत्वा

Digitized by Google

ऽयमित्थं ततो ऽस्यायं पुरस्तादित्यादिर्दिक्, अस्यायं क्रियाप्रतानः सहभावेनास्ते विनाभावेन वेति वर्तमानादिः कालः, यावद्धि प्रातिपदिकार्थस्य पृष्ठपाति वपुर्भाति तदतिरिक्तं सर्वं संबन्ध एवेति कारकाणामपि संबन्धरूपतैव, केवलं क्वचिदसौ संबन्धो व्यपदेशान्तरर्वर्णियं सहते, तथा सास्नादिमतां संबन्धो गाव इत्येकव्यपदेशसहिष्णुस्तत्र सामान्यादिव्यवहारः व्यपदेशान्तरपर्यनुयोगभङ्गे तु संबन्धवाचोयुक्तिरेव । अत एव मुष्टिप्रस्थपलादिप्रमाणपरिमाणोन्मानरूपं तत्रान्तर्गतं वाणुमहदादिसंख्यापृथक्त्वादि च यत्तत्सर्वं संबन्धस्यैव विजृम्भितम् । येपि सामान्यादि वस्त्वन्तरममंसत, तेपि तत्र समवायमभ्युपजग्मुर्जीवितत्वेन, समवायश्च संबन्धात्मा तदनुग्राह्यो वा केषांचित् । यत आहुः । "तां शक्तिं समवायाख्यामनुगृह्णाति संबन्ध इति । यदपि च कारकं, तदपि क्रियामुखप्रेक्षि, सापि कालं प्राणेश्वरमाश्रयति, सोपि क्रियाद्वारेण सर्वभावान्, सापि संबन्धमुद्धरयतीति संबन्धाधीनैवेयं चित्रा लोकयात्रा । तदाहाचार्य एव ।

भेदाभेदात्मसंबन्धसहसर्वार्थसाधिता ।
लोकयात्राकृतिर्यस्य स्वेच्छया

इति । अतः संबन्धमेव प्रथमं निरूपयितुमाह ।

(४) स्वात्मनिष्ठा विविक्ताभा भावा एकप्रमातरि ।
अन्योन्यान्वयरूपैक्ययुजः संबन्धधीपदम् ॥

राजा पुरुषश्च बहिस्तटस्थौ स्वात्मैकपरिसमाप्तौ प्रमातृभूमौ यदैक्यं गच्छतः, न चैक्यमात्रं तयोर्विगलनापत्तेः, अपि तु परस्पररूपश्लेषात्मकं युगपदेव निमज्जदुन्मज्जद्वृदाभेदकोटिद्वयदोलारोहणलक्षणमन्वयरूपं तावन्तावेव संबन्धधिय आलम्बनं भवतो राज्ञः पुरुष इति । तथाहि, राजा यदा पूर्वं धिया गृहीतोपि न स्वात्मविश्रान्त्या तुष्यति तदा रूपान्तरेण पुंसा श्लेषं भजन्कृतार्थीभवति, पुरुषोप्येवं, स चैष रूपश्लेष एक एवोभयोश्चिदात्मनि तथावस्थानरूपः पूर्वप्रतिलब्धसंवित्प्रतिष्ठे तत एवाधिकसंविचिमज्जनादनाभासमानपृथग्भवनलक्षणस्वातन्त्र्ये विश्राम्यतीति तत्रैव निर्भासते समास्कन्दितपुरुषपरमार्थोपि, एवं बहिरनेकता, अन्तस्तु परस्पररूपश्लेषेणैक्यमिति संबन्धस्य रूपम् ॥

(५) जातिद्रव्यावभासानां बहिरप्येकरूपताम् ।
व्यक्त्येकदेशभेदं चाप्यालम्बन्ते विकल्पनाः ॥

जात्यवभासस्यावभासमानरूपाया जातेर्याहिका याः कल्पनास्ता न केवलं संबन्धवदन्तरेकरूपतां बहिश्चानेकरूपतामालम्बन्ते, यावद्बहिरपि व्यक्तिभेदलक्षणमनैक्यं बहिरेव तदनुस्यूततारूपामेकतामवलम्बनत्वं नयन्ति । गाव इति हि प्रतिभासे पृथक्त्वता बहिर्व्यक्तयो भान्ति, येन च बहुवचनमन्वयायि चासां भाति वपुर्येत एकप्रातिपदिकार्थपरामर्शानुगमः, उभयं च तद्बहिरेव, इमा इत्यङ्गुल्या निर्देशात्, केवलं बाह्यत्वमपि स्थिते परमार्थप्रकाशान्तर्भावे इति न तत्र भेदाभेदौ दूषणं, चित्रसंवेदन इव, अनेन द्रव्येपि एकानेकादिविरोधः कृतप्रतिविधानः । आन्तरं त्वैक्यं संबन्धद्वारेण तद्वदेव सर्वत्रैवमवभासमानस्य घट इत्यवयविद्रव्यस्य ग्राहिका याः कल्पनास्ता न केवलं संबन्धवदन्तर्बहीरूपतया एकानेकविषया यावद्बहिरप्येकं निःसंधिबन्धरूपत्वेन भिन्नं च अवयवलक्षणैकदेशद्वारेण स्वीकुर्वते, घट इति हि निःसंधिबन्धनैकघनात्मा विततरूपश्च भातीति ॥

(६) क्रियाविमर्शविषयः कारकाणां समन्वयः ।
अवध्यवधिमद्भावान्वयालम्बा दिगादिधीः ॥

कारकाणां कर्त्रादिशक्त्याधाराणां द्रव्याणां योन्योन्यं समन्वयो दृश्यते, यथा मातृमेयमानानां मिथः, सोन्तर्लीनप्रमात्मकक्रियाविशेषपरामर्शैकनिमित्तकः । नहि प्रमापरामर्शमन्तर्वर्तिनं विहाय वस्तुनः साक्षादन्वयोत्र संवेद्यते । अनन्यत्र भावरूपतानिमित्तताच्च विषयार्थः, कारकशक्तीनामपि यः स्वाश्रयैः संबन्धः सोपि क्रियापरामर्शनिमित्तकः, द्रव्याणां च शक्तीनां च क्रियया साकं साक्षात्संबन्ध इतीयं क्रियैव भगवती एतावद्विजृम्भितं संबन्धमाविर्भावयति । अस्मादिदं पूर्वं परं दूरे इत्येवं बहिर्भिन्नतया परामृश्यमानयोर्भावयोरन्तरभेदपूर्वकं भेदावमर्शमध्यमभेदविश्रान्तं च यद्रूपमामृश्यते तद्दिगित्युच्यते, अत्र हि तयोर्मुखाद्यवयवविशेषपरामर्शादस्मत्सम्मुखत्वपराङ्मुखत्वादिनिश्चयः संयोगसंयुक्तसंयोगाल्पतादिपरिग्रहश्चोपयोगी, कालपरामर्शस्य पूर्वापरादिरूपत्वे जन्मस्थित्यल्पतादिविमर्शश्चिरक्षिप्रत्वादिरूपत्वे च पक्ष्यति पक्ष्यत्यपाक्षीदित्यादौ तु संभावितस्फुटस्य स्फुटभूतपूर्वस्यात्मीयसंवेदनस्पन्दितप्राणादित्यादिक्रियान्तरस्य फलविशेषस्य चोदनादेः परामर्श उपयुज्यते । एवं संख्यापरिमाणपृथक्त्वसंयोगविभागप्रभृतिषु संबन्धरूपतैव वाच्या । सर्वथायं संक्षेपः, यत्र पदार्थाभासस्यात्मविश्रान्त्या संतोषमपुष्यत आभासान्तरपरामर्शविश्रान्तिसाकाङ्क्षतया स्वरूपनिष्ठा, तत्र संबन्धरूपतैव क्रियाशक्तिविजृम्भामयी, तत्रापि भावान्तरापेक्षया संबन्धान्तरमप्यस्तु, यथा संख्यादौ समवायं मन्यन्ते, न चानवस्था भवन्त्यपि दोषाय, पूर्वापरकल्पसृष्टनवस्थेव, नह्युत्तरसंबन्धसृष्टा विना पूर्वसंबन्धावभासे हानिः का चित्तेन मूले क्षतिः शङ्क्येत ॥

एवं सकललोकयात्रानुप्राणितकल्पानल्पसंबन्धबन्धुरीभावभावं क्रियाशक्तिविजृम्भात्मकमभिधाय तस्य स्थैर्योपयोगी पूर्वसूचितौ निरूपयितुमाह ।

(७) एवमेवार्थसिद्धिः स्यान्मातुरर्थक्रियार्थिनः ।
भेदाभेदवतार्थेन तेन न भ्रान्तिरीदृशी ॥

इह भावानां न सत्तासंबन्धः सत्त्वमव्यापकत्वादनवस्थावैयर्थ्यादिदोषात्, नार्थक्रिया वस्त्वन्तरत्वात्, न तत्कारित्वं सर्वदा तदावेशादर्शनात् । उक्तं हि । "अर्थक्रियापि सहजा नार्थाना"मिति । तत्कारित्वस्य च प्रत्यक्षानुपलम्भात्मकान्वयव्यतिरेकगम्यस्याप्रत्यक्षत्वे सतोऽप्यप्रत्यक्षत्वप्राप्तेर्नार्थक्रियाकरणयोग्यत्वं तस्य सत्यासत्यके निश्चयकाले दुरवधारित्वात् । सर्वस्य चास्याप्रकाशमानत्वे नरशृङ्गप्रायत्वम्, अर्थक्रियाकारितान्तरपर्येषणे चानवस्थेति, प्रकाशमानतैवानुन्मूल्यमानतथोचितविमर्शपरिस्पन्दाभावस्य सत्त्वम् । सा च भेदाभेदवपुषां संबन्धादीनामस्तीति निराशङ्कमेव सत्त्वमेषाम् । तथापि यदि परोऽनुबध्नीयादिह लोकः प्राचुर्येणार्थक्रियार्थी तत्कारिणि सत्यत्वं व्यवहरति तत्किं संबन्धादीनामस्तीति, तदस्य हृदयमाश्वस्यते, यदि न कुप्यसि तत् सर्वत्रैव व्यवहारे यत्रापि स्फुटा संबन्धादिधीर्नोदेति तत्राप्येवमेवेति । संबन्धादिरूपतया भेदाभेदवान्योऽर्थः तेनैवार्थक्रिया, न तु स्वात्ममात्रविश्रान्तेन का चिदपि कदा चिदप्यर्थक्रिया, तथाहि, सुखेन स्मर्यमाणेनाभिलाष इत्यादिक्रमेण सर्वो व्यवहारः सुखाभासश्च योऽनुभूतः स एवाभिलष्यते न त्वन्योऽननुभूतः स एव च यदि प्राप्यते तदभिलषितं प्राप्तमिति तुष्यते । यदि च तत्तदेव, तर्हि किमभिलष्यते प्राप्तत्वात् । अथातदेव, तथापि कथमर्थ्यते ऽज्ञातत्वात् । तस्मादेतदेवं भवति, यदि तदेव चातदेव च तदपि चातदपि चेति । एवं सुखसाधनेषु वाच्यम् । तदुक्तमाचार्येणैव ।

दृष्टार्थितायामिष्टं वा विमृष्येतेष्टकारि वा ।
न चाप्यदृष्टमिष्टं स्यादपीष्टा दृष्टभोगभूः ॥
दृष्टं च सह दृष्ट्यैव विनष्टमिति कार्थिता ।
दृष्ट्यैक्येन विमृष्टं तद्

इत्यादि । एवं चाभासात्मन्यस्मिन्संवेदनेऽपि आभासान्तरं सामान्यसंबन्धरूपतया ऽनुप्रविष्टमन्यथा न कश्चिद्व्यवहार इति सकलदेशकालदशापुरुषोपभोगी यत्रैष व्यवहारो न सत्यस्तर्हि नान्यस्य सत्यत्वं विद्म इति नात्र भ्रान्तिरिति भ्रमितव्यमिति शिवम् ॥ ७ ॥

॥ आदितः सूत्रश्लोकाः १०४ व्याख्याताः ॥

इति श्रीमदाचार्याभिनवगुप्तविरचितायामीश्वरप्रत्यभिज्ञासूत्रविमर्शिन्यां क्रियाधिकारे भेदाभेदविमर्शनं द्वितीयमाह्निकम् ॥

॥ इति दशममाह्निकम् ॥

॥ अथ बालरामायणाख्यनाटकस्य ॥

॥ चतुर्थोऽङ्कः ॥

अतः परं भार्गवभङ्गो भविष्यति ।

ततः प्रविशत्युपाध्यायो बटुश्च ।

बटुः । भोभो उवज्झाअ अब्भुवगदसिस्सभावो अहमेव भवभूदी सपादोपग्गहमभिवादेमि * ।

उपाध्यायः । विद्यावान्भूयाः । शिरसि स्पृशन् वत्स भवभूते कुतः पुनरुपनयनादिकाः संस्काराः कुतश्च मामुपाध्यायीकर्तुमागतोऽसि ।

बटुः । भअवदो भग्गवादो † ।

उपाध्यायः । भगवान् भार्गवो भगवतो भवानीवल्लभात् प्रतिपन्नकार्मुकोपनिषत् संविदितचतुर्दशविद्यास्थानरहस्यश्च तदनुपपन्नमिवेदं पश्यामि यदुताध्ययननिमित्तमाचार्यान्तरसमाश्रयणम् ।

बटुः । भो उवज्झाअ ण हु दिट्ठे अणुववण्णं णाम ‡ ।

उपाध्यायः । कथम् ।

बटुः । सो क्खु महेसी भविअ समरसमारम्भमहग्गहग्गहिओ § ।

उपाध्यायः । तस्य खल्वियं मात्रंशत्रुभावसुलभा यावज्जीवमायुधपिशाची न हृदयादपक्रामति ।

बटुः । तेण क्खु अहं एदे विविहदप्पडिअक्खदोघट्टघटाकडपासवासत्तसल्ला भल्ला विद्दाविअमहारहहरिउद्दण्डा खुरप्पा असमसमरारम्भपवट्टिदवेरिवीरवहिरराआ णाराआ खडिअविपक्खधाणुक्कवाणासणदण्डा कण्डा घुट्टुमुच्छिअचतुरङ्गबलवेवण्णसहस्सरिसहस्सहंसणासण्वंगुञ्जीरिदाओ भेरिआओ सअलखत्तिअगोत्तणिट्ठुलणाट्ठुक्किडिल्ला णाराअलित्ति पभूदकण्डसंभारचं वहन्तेण कुदो दाव शिज्जाहिगमो शिअसरीरदोवि पडिअंसिदोम्हि अदो गआणागअणकुम्भारोवि भविअ भिङ्गिरिटिपडिरूवो वट्टामि । सस्मरणम् । अविक्कन्तदिअसप्पओसे उअ

---

* भोभो उपाध्याय अभ्युपगतशिष्यभावोऽहमेव भवभूतिः सपादोपग्रहमभिवादये ।

† भगवतो भार्गवात् ।

‡ भो उपाध्याय न खलु दृष्टेऽनुपपन्नं नाम ।

§ स खलु महर्षिर्भूत्वा समरसमारम्भमहाग्रहगृहीतः ।

णिद्दलिदणीलकण्ठसरासणं दासरहिराममभिजुज्जिदुं णिच्छिदमणेण सञ्चं चिन्तिअ बहवो बहुप्पआरफलसारा कण्डकरण्डआ संजमिदा । जाणं दुव्वहत्तणं अणुसंधिअ अड्ढरत्तसमए णिहुदपदसंचारमवक्कमिअ उवज्झाअत्तणेण भअवन्तमब्भुववण्णोह्मि * ।

उपाध्यायः । एतदेव स्वर्गगमनप्रभावभाजां मुन्यतिथीनां मुखेभ्यः श्रुतमस्माभिः । यदुत श्रुतभार्गवसमरसंरम्भेण पुरन्दरेणापि दशरथः सत्कृत्य प्रहितइति । विचिन्त्य । अहो महदन्तरमन्योन्यं रामयोः । यत् परिणतवयाः प्रगल्भविक्रमो वैखानससूनुर्यत् कौमारकमुग्धमधुराननो राजन्यपोतः । विमृश्य । अहह सकृद्दृष्टमपि नयनावलम्बिनमिव तमहमिमं पुरतः पश्यामि । अहो नु खलु भोः ।

ज्यायान् धन्वी नवधृतधनुस्ताम्रहस्तोदरेण
तत्रत्योदव्यतिकरपटुस्ताडकाताडकेन ।
कर्णाभ्यर्णस्फुलितपलितः नीरकण्ठेन सार्द्धं
योद्धुं वाञ्छत्र कथममुना लज्जते जामदग्न्यः ॥ १ ॥

बटुः । भो उवज्झाअ जदि क्खु एवंविधपरक्कमो परसुरामो ता की उण ण तिणअणबाणासणे पअट्टो आसि † ।

उपाध्यायः । स खलु शरासनशिक्षाविचक्षणः सब्रह्मचारिभिरनुयुक्तोऽपि पुनःपुनरित्थमभिधाय स्थितः ।

आचार्यो मे स खलु भगवानस्मदग्राह्यनामा
तस्मादेषा धनुरुपनिषत् तत्प्रसादात् क्षमोऽपि ।
अध्यासीनः कथमहमहो वर्त्म वैखानसानां
सोतापाणिग्रहणपणितं चापमारोपयामि ॥ २ ॥

बटुः । कीरिसं मन्तेध भग्गवराहवाणं समरसंरम्भे कस्सिं जअवड्डाआ पडिवज्जिस्सइ ‡ ।

उपाध्यायः । भद्र भवभूते किं कथयामि यदुभयपराक्रमावलोकि सन्देहदोलाधिरूढमिव चेतः । पश्य ।

एकः सह्योऽभिमुखमजयत् सूनुमर्द्धेन्दुमौले-
स्तस्यैवान्यो धनुरनुपमं पुष्पमाथं ममाथ ।
द्वावप्येतावति हि बलिनौ किन्तु सद्वा जयश्री-
र्यस्य प्रीतः स खलु भगवान् पार्वतीप्राणनाथः ॥ ३ ॥

नेपथ्ये ।

अत्रे पुलस्त्य पुलह प्रतिथे सुगीथ
शाण्डिल्य कुण्डिन विभाण्डक याज्ञवल्क्य ।
काण्वे वसिष्ठ यम दक्ष पदं रणाय
शापेन निर्दहति नारद एष नो चेत् ॥ ४ ॥

भो नाकनायक विनायक चित्रभानो
भानो विशाख वरुण क्षणदेशदम्भो ।
कीनाश किन्नरपते पवमान रुद्र
द्राक्सङ्गरं भजत भार्गवराघवीयम् ॥ ५ ॥

रत्नप्रभे रजनि चित्रलते लवङ्गि
सौदामिनि भ्रमरि सुन्दरि देवसेने ।
रम्भे घृताचि कलकण्ठि सुकण्ठि सर्वाः
स्वर्योषितो व्रजत पश्यत रामभद्रम् ॥ ६ ॥

मायावने विहगवेग कृपाणकेतो
जीमूतवाहन कपिञ्जल हंसनाद ।
विद्यावतंस तिलकोत्तर केलिसार
विद्याधरास्त्वरितमेत रणाय यामः ॥ ७ ॥

हे हेमवर्ण मणिशेखर चित्रबाहो
वीणाविनोद मदवल्लभ रक्तकण्ठ ।
क्रीडाकुमार कनकाङ्गद रुद्रहास
द्राक् सारणाः सरत मां युधि चेद्दिदृक्षा ॥ ८ ॥

उपाध्यायः । वत्स भवभूते कलहकुतूहली नारदमुनिर्महर्षीन् देवानप्सरसो विद्याधरान् सिद्धांश्च हठप्रसादाभ्यामभिधत्ते तदेह्यावामपि तत्समरोपस्थानेन कमलसंभवसंभवं मुनिमनुवर्तामहे ।

इति निष्क्रान्तौ । मिश्रविष्कम्भकः ।

ततः प्रविशति मातलिसारथिना रथेन चामरधारिण्या वीज्यमानो दशरथः । समन्तादवलोक्य कथमुच्चित्रपारिभद्रद्रुमस्तबकरमणीयारुणसन्ध्यानुबन्धिनि गगनाङ्गणपृष्ठे प्रतिष्ठामहे । विचिन्त्य । अहो काऽपि वैचित्री वर्तते अन्तरिक्षे प्रभातसमयस्य तथाहि ।

व्योमोत्सङ्गविभूषणस्य सवितुर्द्यावापृथिव्योः समं
ध्वान्तध्वस्तिकृदङ्कुरैश्च किरणैः प्रारम्भि चावाङ्कुरैः ।

---

* तेन खलु अहं एते विनिहतप्रतिपक्षगजघटाकटपार्श्वव्यासक्तशल्या भल्लाः विद्रावितमहारथरिपुदर्पाः क्षुरप्राः असमसमरारम्भप्रवर्तितवैरिवीररुधिरराग नाराचाः खण्डितविपक्षधानुष्कबाणासनदण्डाः काण्डाः सुष्ठुमूर्च्छितचतुरङ्गबलसैन्यसहर्षसिंहनादगर्वाङ्कुरोत्कीरिता भेरिकाः सकलक्षत्रियगोत्रनिर्दलनदुर्ललिता बाणावलिरिति प्रभूतकाण्डसम्भारं वहता कुतस्तावत् विद्याधिगमो निजशरीरादपि परिभ्रंशितोऽस्मि । यतो गजाननगुर्वङ्कभारोऽपि भूत्वा भङ्गिरिटिप्रतिरूपो वर्ते । अतिक्रान्तदिवसप्रदोषे पुनर्निर्दलितनीलकण्ठशरासनं दाशरथिराममभियोक्तु निश्चितमनसा स्वयं चिन्तयित्वा बहवो बहुप्रकारफलसाराः काण्डकरण्डकाः संयमिताः येषां दुर्वहत्वमनुसंधायार्द्धरात्रसमये निभृतपदसंचारमवक्रम्योपाध्यायत्वेन भवन्तमभ्युपपन्नोऽस्मि ।

† भो उपाध्याय यदि खल्वेवंविधपराक्रमः परशुरामस्तत् किं पुनर्न त्रिनयनबाणासने प्रवृत्त आसीत् ।

‡ कीदृशं मन्त्रयथ भार्गवराघवयोः समरसंरम्भे कस्मिन् जयपताका प्रतिवर्त्स्यते ।

Digitized by Google

प्रत्यासन्नविरोधितस्य गगने मन्दाकिनीसद्मनां
पद्मानां प्रकरः प्रगेऽपि विकसत्यावृत्तकोशच्छदः ॥ ९ ॥

अपिच ।

निर्याति प्रथमप्रचारसमये स्फारध्वनद्दिण्डिम-
व्यस्ताधोरणदूरनामितगजेनाऽयं नभोवर्त्मना ।
अभ्रं वा जघनान्तदोलितकरः स्वर्वाहिनीं गाहितुं
रोधस्ताडनकेलिलम्पटदशनयावाश्रिरैरावणः ॥ १० ॥

स्मरणमभिनीय । आर्य मातले सकलसुरसुन्दरीकरतलान्दोलितचामरचिकुरचुम्ब्यमानमांसलांसस्थलीसंदानितसन्तानकुसुममालाप्रालम्बेन समदवानबद्धिरदनिकुरम्बडम्बरडामरैकहारिणा हरिणा समादिष्टोऽस्मि यथा सखे दशरथ गच्छ त्वं मिथिलां पुरीं यदावेदितं मे मर्त्यमण्डलचाराधिकारचतुरेण चारणचक्रेण यदुत शङ्करशरासनसमारोपणपणप्रवर्तितसीतास्वयंवरयात्रापरतन्त्रायां मिथिलायां शिथिलाभिमानयन्त्रियमन्थरस्थितिषु सकलपृथ्वीपालेषु ।

गात्रं गोत्राचलेन्द्रस्त्रिनयनवलयं यस्य सिञ्जा भुजङ्गो
विष्णुर्बाणः पुराणां त्रयमभयममूद् दुःखलभ्यं शरव्यम् ।
धन्वी येनेन्दुमौलिः स च भुवनगुरुस्तद्धनुर्धाम धाम्नां
क्रूरक्रेङ्कारमारात्स्वभुजवलयितं रामभद्रेण भग्नम् ॥ ११ ॥

गुरुधनुर्ध्वंसजनितामर्षविषमेण वीतत्रासरेणुना रैणुकेयेन सह रामभद्रस्य समरसंरम्भो भवितेति तत्र च तत्प्रतिकृत्य वधूवरमयोध्यामध्यारोप्य सुरकार्यशेषसंपत्तये पुनरनाहूतेनोपस्थातव्यमिति । तन्नमुचिसूदनसारथे कथय स भगवान् पौलोमीवल्लभो भृगुपतिचरितानि बहु मन्यते न वा ।

मातलिः । किं नाम बहु मन्यते न वेति शृणु श्रावयामि ।

आस्थानसद्मनि विलासगृहे विमाने
जैत्रे रथे च सततं सुरचक्रवर्ती ।
रामस्य चित्रलिखितानि कुतूहलेन
वीरो विलोकयति पूर्वविचेष्टितानि ॥ १२ ॥

यदस्यैव पुरन्दरस्यन्दनस्य चतुर्दिशं मत्तवारणीयफलकेषु रामचित्रं लिखितम् । अङ्गुल्या निर्दिशन् तत्तावदितो दीयतां दृष्टिः । इयं च प्ररोचना भृगुपतिपराक्रममहानाटकस्य यदुत भगवतस्त्र्यम्बकात् कार्मुकोपनिषल्लाभः ।

दशरथः । कथमयं विशालशिलः शिलोच्चयः । तत्रापि हिमालय इति प्रालेयपाण्डुराभिः शिखरश्रेणीभिर्लक्ष्यते ।

मातलिः ।

शैलेन्द्रो हिमवानयं गुरुगुहागर्भस्थविद्याधरी-
गीतत्र्यम्बचरितः कृताश्रमपदो रुद्रेण पत्न्या सह ।
एतस्मिंश्चिरजीविभिः परिगतं दिव्यौषधीसेवनात्
कन्दर्पस्य वपुष्मतश्च चरितं राजवनङ्कस्य च ॥ १३ ॥

अन्यतो दर्शयन् इह धनुर्वेदविद्योपदेशः ।

देवस्त्र्यम्बक एष वन्द्यचरणो वृन्दैः सुधाभोजिना-
मत्रास्ते स शरासनोपनिषदं दातुं धृताचार्यकः ।
दूरावर्जितमौलयः सरभसाः सद्यः प्रतीच्छन्त्यमी
हेरम्बेण च षण्मुखेन च समं रामादयः सुव्रताः ॥ १४ ॥

दशरथः । अहो मनुष्यमुनिमहाभागधेयो भगवान् भार्गवो यस्य स्वयमर्द्धेन्दुमौलिर्धनुर्वेदविद्याचार्यः ।

सौदामिनी । कधं अधिगदोवदेसरहस्सा खुरलीखेलिणो इदो एदे वट्टन्ति किं उण दूरदेसप्पसरो लक्खविक्खेवो णिविडप्पहारित्तणं च रामबाणाणं सविसेसमालिहिदं एत्थ * ।

मातलिः । अहो महदन्तरं प्रज्ञाप्रकर्षस्य तथाहि ।

उपदिशति समानं कर्म कृत्स्नं पिनाकी
सममपि च यतन्ते कर्तुमभ्यासमेते ।
तदपि भृगुकुलेन्दुः काममुत्कृष्यतेऽसौ
ननु भवति निषीतं द्रव्यमेव क्रियाभिः ॥ १५ ॥

पुरोऽवलोक्य । अति हि नाम स्वच्छन्दचरितस्याऽपि देवस्य माध्यस्थ्यं तथाहि ।

बर्हिध्वजेऽपि सति सत्यपि दन्तिवक्त्रे
प्रेमोपधानमवधूय पिनाकपाणिः ।
हस्तेन नित्यधृतवासुकिकङ्कणेन
प्राज्ञप्रियः स्पृशति भार्गवमेव पृष्ठे ॥ १६ ॥

पुरतोऽवलोक्य कथं खुरलीखेलनप्रसरत्पृषत्कपङ्क्तीनां त्रिनयनान्तेवासिनां चेतसि विरचितं पदं परस्परस्पर्द्धया । पुनरवलोक्य कोदण्डपाण्डित्यनिबन्धनः प्रवृत्त एव कलहः ।

दशरथः । एवमेवैतत् ।

द्वन्द्वारम्भविजृम्भितभ्रुकुटिना भालेन रामे मुनौ
कोदण्डं निबिडाङ्गुलीपरिगमाद्वास्फालयत्यग्रतः ।
ज्यानिर्घोषकषायितोदरजुषां गीर्वाणसेनापतेः
षड्भक्तीश्रवसां करोति न करद्वन्द्वं पिधानक्रियाम् ॥ १७ ॥

सौदामिनी । एस समरङ्गणसमासण्णकेलाससिहरणिवेसी भअवं वुसहलञ्छणो समं विसाहजणणीए देवीए पेक्खदि णंदिप्पमुहसेणावदिपरिव्वुदाणं कुमारहेरम्बाणं रामेण सह

* कथमधिगतोपदेशरहस्याः खुरलीखेलिन इत एते वर्तन्ते । किं पुनर्दूरदेशप्रसरो लक्ष्यविक्षेपो निबिडप्रहारित्वं च रामबाणानां सविशेषमालिखितमत्र ।

झत्ति समरसंरम्भविवसिदं * ।

मातलिः । न केवलं पश्यति स्वमनीषिकोत्कर्षिणि शिष्ये किमपि प्रीयते यतः ।

सम्यक्कोदण्डविद्या विनयचतुरता कुत्र सोल्लेखरेखा
पुत्रान्तेवासिनोर्मे सपदि परिणतेत्येष वेत्तुं विशेषम् ।
देवः श्रीचन्द्रचूडामणिरचलसुतापाणिपद्मावलम्बी
स्थित्वोद्ग्रीवं विटङ्कात् स्फटिकशिखरिणो वीक्षते निश्चलाक्षः ॥ १८ ॥

दशरथः । अति हि प्रीयते यतः ।

नम्रवन्दिनि चण्डचण्डचरिते हेलाचलच्चन्द्रम-
स्युद्दामद्विरदास्यहास्यरसवत्याविष्टघण्टामुखे ।
भ्राम्यद्भृङ्गिरिटौ च भङ्गुरगणग्रामे सहैवोमया
संग्रामे प्रहरत्ययं दिशिदिशि प्रेम्णा हरेणेक्ष्यते ॥ १९ ॥

मातलिः । इतइतः पश्य हास्याद्भुतयोरधिष्ठानम् ।

दोर्दण्डच्छिन्नयाञ्चिततोच्चतधनुर्यन्त्रप्रसूतेषवः
शुण्डोद्दण्डपरश्वधाः परिणमद्दन्तार्गलाकोटयः ।
एताः कर्णविकीर्णवक्त्रकवचाः संरम्भिणः सङ्गरे
हेरम्बस्य हरन्ति हन्त हृदयं द्राक्कोपविक्रान्तयः ॥ २० ॥
नरनागक्रियामिश्रा हृतसङ्ग्रामकक्रियाः ।
दुर्धरा हन्त हेरम्बरणव्यापारकेलयः ॥ २१ ॥

सौदामिनी । कुञ्जराणणरणकम्मणिम्माणपडिकोविदेण जमदग्गिसूणुणा उवक्कन्तं किंपि जेण णासन्तगणग्गामं समज्जिदं विअ समरङ्गणं पडिहाअदि † ।

दशरथः । साधु सौदामिनि साधु यथा समर्थयसे ।

नश्यन्ते प्रमथाः सरन्ति सभियः कैलासशैलान्तरं
नन्दी भृङ्गिरिटिश्च लूनधनुषावन्तेषुधी मुञ्चतः ।
हेरम्बस्य च मुक्तमत्र मधुपैस्त्रासादमात्यन्मुखं
क्रौञ्चारिः परमेष तिष्ठ त हसन् सद्यो शरैः पुङ्खितैः ॥ २२ ॥

पुरोऽवलोक्य । कथं जामदग्न्यस्य पुरतोऽक्षरावली । वाचयति ।

त्वं पुत्रस्त्रिपुरद्रुहः पुनरहं शिष्यस्तदेतावता
तुल्योऽप्यस्तु कथं तवायमधिकः कोदण्डशिक्षाविधिः ।
तत्राधारनिबन्धनो यदि भवत्याधेयधर्मोदय-
स्तद्वाः स्कन्द गृहाण कार्मुकमिदं निर्णीयतामन्तरम् ॥ २३ ॥

* एष समराङ्गणसमासन्नकैलासशिखरनिवेशी भगवान् वृषभलाञ्छनः समं विश्वाम्बजनन्या देव्या प्रेक्षते नन्दिप्रमुखसेनापतिपरिवृतयोः कुमारहेरम्बयो रामेण सह झटिति समरसंरम्भव्यवसितम् ।

† कुञ्जराननरणकर्मनिर्माणपरिकोपितेन जमदग्निसूनुनोपक्रान्तं किमपि येन नश्यद्गणग्रामं संमार्जितमिव समराङ्गणं प्रतिभाति ।

मातलिः । भूकाश्यप पुरतः पश्य सहसा षण्मुखं संमुखीभूय स्थितवन्तं गजाननं च भृगुपतिः पाशुपतास्त्रेण ज्योतिश्छटाच्छादितरोदःकन्दरकुहरडामरेण हर्षादुपतिष्ठते ।

दशरथः । कथमक्षरावली वाचयति ।

क्रोधोद्बोधव्यतिकरसदृग्भिर्भराभ्यासयोग्यो
मद्दोर्दण्डोपगमसदृशस्त्वत्तशिष्योचितश्च ।
वृत्तातङ्को विबुधमनसां कर्तुमद्धा कबन्धं
चापादस्मात् प्रसरतु शरः सम्मुखः षण्मुखेऽपि ॥ २४ ॥

मातलिः । अथान्तरं किञ्चिज्जातम् ।

किञ्चित्कोपकषायितेन मनसा यावत् सतीसूनवे
चैयतं भृगुनन्दनो निजधनुर्यन्त्रे निधत्ते शरम् ।
हेलाघ्रस्तदुकूलसंवृतिमती विध्वंसिकाञ्चीलता
तावद्व्याकुलनूपुरं भगवती मध्ये मृडानी स्थिता ॥ २५ ॥

दशरथः । पुरतोऽवलोक्य । अयं तु प्रकृत्युद्धतो रामः कथमित्थमतिप्रश्रयते । तदस्य त्रिभुवनातिशायि चरिताद्भुतं तथाहि ।

दृष्ट्वा रामः किसलयसमं पाणिमुद्यम्य सभ्य-
द्रुध्ये भूतां गिरिदुहितरं षण्मुखस्यात्मनश्च ।
संहृत्यास्त्रं विधृतशरधिर्मुक्तकोदण्डदण्डः
पादौ मार्जन्नमति ममता प्राञ्जठामण्डलेन ॥ २६ ॥

सौदामिनी । अहो पसादादिसओ रामम्मि चन्दसेहरस्स तत्थभवं मच्चमण्डलाखण्डल ता इदो पेक्ख * ।

दशरथः । दृष्ट्वा ।

येनाद्य खण्डपरशुः परशूत्तमेन
शम्भुः सुमेरुतटताडनखण्डितेन ।
रामाय निर्जितवते नमसो कुठार-
मस्मै समर्पयति साञ्जलिसंपुटाय ॥ २७ ॥
दत्ते च विद्यास्थानानि देवस्तस्मै चतुर्दश ।
शतभङ्गीभवद्ध्वा महतां हि प्रसत्तयः ॥ २८ ॥

सौदामिनी । संके तदोपहुदि रामो परसुरामोत्ति उच्चदि † ।

मातलिः । इदमपरतः पश्य ।

यः षड्क्रायैः स्वरचितमकथत् क्रौञ्चशैलः सहेलं
मातुः शम्भोर्द्रुतनुरूपनिषत्प्राप्तये पादमूलम् ।
सोऽयं कोपाद्वहति विहितं मार्गणैर्भार्गवस्य
छिद्रद्वारं त्रिदिवसरसीहंसयात्रापवित्रम् ॥ २९ ॥

* अहो प्रसादातिशयो रामे चन्द्रशेखरस्य तत्रभवन् मर्त्यमण्डलाखण्डल तदितः प्रेक्षस्व ।

† शङ्के ततः प्रभृति रामः परशुराम इत्युच्यते ।

Digitized by Google

अथेदमयतः पश्य अयं हि पितृभक्त्यतिशयः परशुरामस्य यदुत रेणुकाशिरश्छेदः ।

दशरथः । अहह शान्तं पापं कथं जमदग्न्यपत्यमपि प्रमाद्यति हुंहो पुरुहूतसूत ।

सहस्रं हि पितुर्माता गौरवेणातिरिच्यते ।
तत्किं पितृगिरा रामो विधत्ते रेणुकावधम् ॥ ३० ॥

यद्वा निरपराधवधादेव जमदग्निरपि प्रमाद्यतिस्म । विचिन्त्य कः पुनरयं मार्गो भार्गवस्य यदिदमपि प्रस्मर्यते ।

गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथप्रतिपन्नस्य परित्यागो विधीयते ॥ ३१ ॥

With fragrant dust and honey falling down
From the fair blossoms in each soldier's crown.

Raghuvansa. IV.

Digitized by Google

SITA IN PRISON.

(Ramayana III 61.)

As some poor solitary deer,
When eager dogs are pressing near,
Lies sobbing in an alien wood
Far from her soft-eyed sisterhood;
So in King Ravan's hall, a prey
To fear and anguish, Sita lay,
With none to aid her in distress,
Girt round by many a giantess.

Pierced by the shaft of Love, the King
Strode to the centre of the ring.
He bade the captive lady rise,
And, lifting up her streaming eyes,
View all the glorious house that vied
With heavenly homes in pomp and pride:
Hall, bower, and chamber, bright with throngs
Of gay-robed dames, and cheered with songs
Of countless birds whose swelling throats
Blent sweetly their delicious notes
From gold and crystal pillars bright
With studs of pearl and lazulite.
Near lay a royal garden, fair
With terrace, lawn, and gay parterre,
Where roses glowed and peacocks played,
Delighted, in the Mango's shade.
Like cloudy pile, in skies of June,
That hides the path of sun and moon;
Or soaring up like Meru's head
All flaming with the morning's red,
So vast, so high that palace raised
Sky-cleaving pinnacles, and blazed
In the sun's path, from floor to spire
A shape of beauty clothed in fire.

He led her up the stair whereon,
Inlaid in gold, large diamonds shone.
And to her eyes that marked not showed
The glory of his rich abode:
The lattice with its ivory frame,
Where softened light through silver came;
And curtains, bound with golden braid,
Cast on the floor a rosy shade:
The car, obedient to his will,
That bore him over flood and hill:
Long galleries and stately halls
Where pictures lived upon the walls:
The mazy rill that murmured round
The grotto and the pleasure-mound:
Pools where the lily flushed, the lake
Where played the cygnet and the drake.
Thus with delight, from view to view,
The undelighted dame he drew,
And, as she trembled by his side,
'Look, Sita!' at each step he cried.
'Now, fair one, learn my power and might:
Ten million Rovers of the Night,
And lesser Fiends, a countless band,
Millions of millions, round me stand,
Who joy in fight and scorn to fly;
Of all this host sole lord am I.
Whose legions are so vast and bold?
What King so rich in gems and gold?
What earthly city can compare
With Lanka, fairest of the fair?
To thy sweet hand I yield the whole,
O dearer than my life and soul.
Thousands of women wait my sign:
O large-eyed, be their queen and mine.
My earnest prayer no longer spurn,
For Love's hot fires within me burn.
Sea-girt, three hundred leagues in length,
My Lanka lies, and if the strength
Of heavenly hosts her walls assail,
Though Indra lead, their might would fail.
No spirit of the earth or air,
No God can with my strength compare.
No longer let thy fancy dwell
On Rama in his hermit cell;
Leave the poor mortal to his fate,
And wed thee with a worthier mate.
Thy youth will not for ever stay,
Come, use it ere it glide away.
Let no vain hopes thy breast beguile
Of rescue from the Giants' isle.
Less vain the toil that sought to tame
The glory of the quenchless flame:
Less vain the toil that strove to bind
The gale that wanders swift as mind.
Man, Fiend, or God would find it hard
To rescue thee whom I would guard.
Spurn not, fair queen, a realm like this,
But dwell with me and reign in bliss.
Thy hermit life has washed away
What stain upon thy bright soul lay;
Now come, with me enjoy the meed
Of each high thought and noble deed.

(To be continued.)

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

SUPPLEMENT
TO THE PANDIT.

No. 28. A. Benares September 1st, 1868. Vol. III.

MEMO:

The late Professor Wilson bitterly complained of the havoc and confusion created by the want of system, or I may say, of desire to follow any system of Transliteration of Oriental words and phrases into the Roman Characters. He says: "The extreme and contradictory variety which prevails in the spelling of Oriental words has been often made the subject of remark and not unfrequently of censure. The latter may not be always undeserved; yet those who condemn are not always qualified to judge, and they often exhibit in themselves a most perverse determination not to be set right. Above a century ago the most unexceptionable authorities established by their example how Mohammed should be spelled, or nearly so, but to so little purpose that it still is most common to write it Mahommed, and even Mahomet is still far from unfrequent. As long as this disregard of exactitude is so universal it little imports what animadversion may be passed upon the want of it by incompetent judges; but those who should know better, those who are acquainted with the original languages, are inexcusable when they write the native words without reference to their proper form, and without any consistent or systematic mode of expressing them, each individual writing it as he hears, or thinks he hears it articulated, and without paying any attention to its original alphabetical structure. It is undoubtedly true that many of those who are in the habit of hearing and uttering native words in the course of official duty are unfamiliar with their written forms, and will not take the trouble to acquire a knowledge of their Alphabet. Even, however, when acquainted with the characters they will not be at the pains of acquiring a systematic plan of representing them, but write them according to the fancy of the moment, and with a total indifference to consistency, which produces the most needless and incompatible misrepresentations of one and the same word, to an extent that would scarcely be thought possible if it were not substantiated by daily experience, even in the most ordinary and simple words. It would, for instance, be thought impossible to represent *Lakhiraj* (from *la*, "without" and *khiraj*, "tax") by any other letters and the disciples of the two chief propounders of schemes of Oriental Orthography, Sir William Jones and Dr. Gilchrist, would unhesitatingly concur in the representation; yet notwithstanding the concurrence of the two systems, and the simplicity of the original word, we meet with *Lakhiraj* under the monstrous disguises, of *Lakerage*, *Lackeradge*, *Lackiraz*, *Lackerage*, *Laqueerauz* and *Leeakeerazee*. It is high time that such monstrosities should no longer be perpetrated or tolerated, and that the only remedy of which it admits should be applied; the authoritative enforcement of a uniform system for the representation of the original letters by those of the English Alphabet."

One would think that as far as the system was concerned the matter was set at rest for ever, but no, the doctors disagree. Not being content with the improvements of Professor Wilson on Sir William Jones's system, many of the savans of Europe have taken into their learned heads to have their own systems; some write one letter in one way some the same in another. See what a Correspondent of the Pioneer of the 27th July 1868 says on the subject:

Digitized by Google

"TO THE EDITOR OF THE PIONEER.

SIR,—Can you tell me whether any new Canons have been adopted as to the transliteration of the Sanskrit Character into English? I see that Max Müller adopts two forms which are quite new to me. He uses *(in his Chips from a German Workshop)* the Italic *k* for *ch*, writing *Kaitra* for the month of *Chaitra;* and also the Italic *g* for *j;* writing *gyotishi* for *jyotishi*, astrologer. Max Müller is a strict purist in such matters, but these forms are not, I think, adopted in Sir W. Jones's system. So too, the Bengal Asiatic Society have taken to using the French letter *ç in* lieu of the Italic accented *ś* which Max Müller still uses, and which Jones inculcates. If our learned Pandits alter their system they might as well agree about it, and let the public know. By the bye, Max Müller says queerly enough, " Pandits, or, as they used to be called, Pundits" [I, 118]. Does he suppose the pronounciation has altered?

Yours faithfully,
IGNORAMUS."

There is something in European elements to make the spelling as bad as possible. But surely we ought not to introduce the same evil into Oriental words and phrases, written in Roman Character, which we have to deplore in the spelling of English. Bháú Śástrí, being told by Sir William MacNaghten one day about the superiority and civilization of the English, could not refrain from saying that he still found "four great absurdities" committed by the people of England, one of which he said was to write s, h, o, u, l and d, and read shud (शुद) or to write t, h, o, u, g and h, and read tho (थो); just as if one were to write stick, brick, horse and cow and read ant. To plead the convenience of a few European printers for the sake of their types or to bring forward other such lame excuses, would be no justice to the twenty millions of India, whose taste and convenience must be, or at least ought also to be, now consulted. What I urge and ask for is the unanimity of all European Scholars in following some one system of transliteration and the enforcement of it throughout India by the Government. Often have men like Sir Charles Trevelyan and others tried to put a stop to this evil but to no purpose. I hail with joy the 22nd of July 1868, on which the Supplementary Government Gazette N. W. P. was published containing the Roman Alphabets adapted for Indian languages; thus a stir has been made to introduce a system and thus to remove, though gradually, a long standing grievance. I say gradually because the system has not been made universal; but unfortunately a few letters have crept in with such carelessness that I am afraid they, instead of making our work easy, may complicate it still further.

For instance in representing (ع) they have written (A'A å a') which they seem to have meant to write (Â A' å a') but which correctly would be written ('Â' å) because (') only represents (ع) otherwise واقعی, would be transliterated Váḳia'í instead of Váḳi'í, and the foot note* of the third list of " Persian with its Equivalents" will become meaningless. When however (å) is taken as the representative of (ع), it will of course be written and written more correctly, Váḳiåí.

Again I do not know why for (غ) instead of a dotted (g) they have given dotted (g) with (h); (g) according to the established and acknowledged system is the substitute of (ग), and (gh) is that of (घ), and as in Hindi they put a dot below (ग़) to make it pronounced like (غ) it cannot fail to create confusion, if we use in the Roman Characters the substitute of (घ), instead of that of (ग) with a dot; and besides when one letter can sufficiently answer our purpose, what's the use of writing two?

For (ه) and (ह) they have given (Ḥ H hh) and for (ح) (H Ḥ hḥ). This I cannot understand. It was simple enough to have given (H h) for (ه) and (Ḥ ḥ) for (ح), but they have left no distinction, and thus made the dot superfluous.

In Hindi when (H) (ह) is not followed by any vowel, it is written (:) as (R) (र) under a similar circumstance is written (ˆ) if followed by a Consonant, or (˓) if preceded by a consonant and followed by a vowel. (:) and (ˆ) do not require different letters in the Roman Alphabet, however they have given (Ḥ̤h) for (:), I cannot say why (H) with two dots and (h) with no dot.

Leaving out the unsatisfactory arrangement of all the dotted (Nn) and (Ss) I now conclude my remarks with (Sh) and (v) and (w), but before

* "To be indicated by the vowel with which it may be associated, with an apostrophe placed before it."

Digitized by Google

taking them up, I may be allowed to point out for the sake of uniformity and the completeness of the system the desirableness of having (Ṛr) for (ऋ) as Wilson had, instead of (R̲ r̲) as given in the Gazette, and (R̲I̲ r̲i̲) for (ॠ) instead of (RI ri). If we adhere to the Gazette (RI) will read for (ॠ) and (रि) both at the same time, if we follow through and through Wilson's system, his (ṚI) will read for (ॠ) and (ऋि) both.

The most urgent change for which I press is to have the same representative for (ष) and (ش) which have an exactly similar pronunciation. It won't do to give for (ش) the same letter which represents (ष), as they have done in the Gazette; (ष) has a peculiar pronunciation. It is a cerebral.

What I ask is simply this, if you give (sh) for one of these two letters, namely (ष) and (ش), give the same to the other; if you give (Ś or ṣ) for one, give the same to the other also.

(W) is never to be used in transliteration. Hindi and Persian has no equivalent for it; (व) and (و) have nothing to do with it. It can be partially represented in Hindi and Persian only by (उ अ) and (ا أ) respectively. As the Bengalees cannot pronounce (अ) (a) they cannot pronounce (व) and (و), though in writing they write both as they are; for (a) (अ) they write (a) (अ) but pronounce (o), (ओ) so for (v) (व and و) they write (v) (व &و) but pronounce (w) (उ अ). Thus Navvâb (نواب) becomes with them Nauwâb, Nowâb or Nobâb and Ïśvar (ईश्वर) becomes Ïśwar &c. The English finding the Bengalee pronunciation of (व) and (و) so closely coming up to their (w) at once began to use (w) promiscuously with (v) for (व) and (و). Just the other day I found a gentleman, an acknowledged Oriental Scholar, having great faith in Shakespear's Dictionary, taking the utmost trouble, at the time of romanizing a vernacular book, to look in the Dictionary for each word with (व) and (و) whether it was spelt with (v) or (w). I told him (v) and (w) both were meant for (v), he did not believe me, but when I showed him several words in the same Dictionary spelt in several places with (v), and in others with (w) he seemed to be quite bewildered.

When (c) (x) and (ê) are admitted in the Gazette which have no equivalents, I do not know why they have excluded (q) from it; (q) would answer better for (ق) than (ḳ).

I am sorry I have no room here to prove my assertions with exhaustive illustrations. The Memo. has already swelled beyond my anticipation.

The two lists in the end of the Gazette namely "the Hindi Alphabet, with its Roman Equivalents" and "Persian, with its Roman Equivalents" are very carelessly printed. For instance in the first list (Roman Alphabet) (ri) and (rí) are given for (ऋ) and (ॠ) and in the second list (Hindi Alphabet) (ṛi) and (ṛí) are given for the same; (lṛi) and (lṛí) have been added, (अं) has been left out, (·) occupies the place of (अं) and (:) has taken the place of (·). The place of (:) has been left vacant; moreover a new letter (ñ) has been introduced for (·). In the third list (Persian Alphabet) no dot or any diacritical mark has been used throughout except for (آ) and (ص).

Benares: 1st *August* 1868. } ŚIVAPRASÁD.

ADVERTISEMENT.

Just Published.

SCENES FROM THE RAMAYAN, &c.

BY

RALPH T. H. GRIFFITH, M. A.

8vo. Crown, Cloth; price 2 Rs. cash: by Book Post 2 Rs. 4 ans.

CONTENTS.

PREFACE. THE HERMIT'S SON.
AYODHYA. THE TRIAL OF TRUTH.
RAVAN DOOMED. THE FOREST.
THE BIRTH OF RAMA. THE RAPE OF SITA.
THE HEIR APPARENT. RAMA'S DESPAIR.
MANTHARA'S GUILE. THE MESSENGER CLOUD.
DASARATHA'S OATH. KUMBHAKARNA.
THE STEP-MOTHER. THE SUPPLIANT DOVE.
MOTHER AND SON. TRUE GLORY.
THE TRIUMPH OF LOVE. FEED THE POOR.
FAREWELL! THE WISE SCHOLAR.

Benares: E. J. Lazarus & Co. Calcutta: W. Newman & Co. London: Trübner & Co., Paternoster Row.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
शुक्लरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 29. Benares October 1st, 1868. Vol. III.

॥ ईश्वरप्रत्यभिज्ञाव्याख्याविमर्शिन्याः ॥

॥ क्रियाधिकारस्य तृतीयमाह्निकम् ॥

प्रमाणानि प्रमावेशे स्वबलाक्रमणक्रमात् ।
यस्य वक्त्रावलोकीनि प्रमेयं तं स्तुमः शिवम् ॥

एवं क्रियाशक्तिविस्फारनिरूपणप्रसङ्गेन संबन्धपुरःसरं सामान्यादीनां तत्त्वमुपपादितमधुना तु संबन्धतत्त्वमेवैकघनतया व्युत्पादनीयम् । तच्च द्विविधमेव परमार्थतो, ज्ञाप्यज्ञापकता कार्यकारणता च, तत्र पूर्वस्यां मानमेयभावादिचिन्तास्यन्तर्भूतायां सर्वमुत्तरं च वक्ष्यमाणं चायत्तं, प्रमाणाधीना वस्तुसिद्धिरिति तत्रतत्र प्रसिद्धेः, एवं च प्रकृतसमर्थनीयवस्तूपयोगितया स्वयं च संबन्धरूपतया ऽवश्यं विचार्यां वर्तमानादिस्थितिं निरूपयितु"मिदमेतादृगि"त्यादी"शादिव्यवहारः प्रवर्तत" इत्यन्तं श्लोकसप्तदशकमाह्निकान्तरमारभ्यते । तत्र श्लोकद्वयेन प्रमाणतत्फलस्वरूपं, ततः प्रमेयस्य स्वरूपं निरूपयितुं प्रत्याभासं प्रमाणस्य व्यापारो न तु स्वलक्षणात्मकवस्त्वेकनिष्ठता नियमेनेति दर्शयितुं प्रत्यवमर्शबलेन आभासव्यवस्थेति दशभिः श्लोकैरुच्यते, तत्प्रसङ्गाद् मिथ्याज्ञानस्वरूपं श्लोकेन, प्रमेयस्वरूपसिद्धिश्च प्रकृतमपीश्वरवादमवलम्ब्य घटत इति श्लोकेनोपदर्श्यते, स चैष सर्वः प्रमाणतत्फलप्रमेयादिविभागः सति प्रदर्शितरूपे प्रमातरि ततो न तस्य प्रमेयता येनात्रापि प्रमाणव्यापारसंभवः केवलं व्यवहारमात्रसिद्धिफलं प्रमाणमत्रेति श्लोकत्रयेणेति तात्पर्यार्थः ॥

यदुक्तं "क्रियासंबन्धादिबुद्धयो न भ्रान्तिस्वभावा" इति तच्च निर्णेतुं प्रमाणतत्फलस्वरूपं तावत्प्रसिद्धमनुवदति ।

(१) इदमेतादृगित्येवं यद्वशाद्व्यवतिष्ठते ।
वस्तु प्रमाणं तत्सो ऽपि स्वाभासो ऽभिनवोदयः ॥
सो ऽन्तस्तथा विमर्शात्मा देशकालाद्यभेदिनि ।
एकाभिधानविषये मितिर्वस्तुन्यबाधिता ॥

यस्य वशात्सामर्थ्याद्वस्तु नीलसुखादिकं व्यवतिष्ठते नियतां प्रकाशमर्यादां नातिवर्तते इदमिति स्वरूपेण एतादृगिति च विशेषणभूतनित्यानित्यत्वादिधर्मान्तरयोगेन तल्लोके प्रमाणमिति स्थितम् । तच्च विवेचकेन विचार्यम्, इह वस्तुनः स्वरूपं स्वात्मवशेनैव न तावद्व्यवतिष्ठते, जडत्वात्, मम नीलं प्रकाशते चैत्रस्य वेति च तदा कथमवभासः । तस्मादन्यवशेन व्यवतिष्ठते । अन्यो ऽपि चेज्जडस्तदन्धेनान्धस्य हस्तादानम् । तस्मादन्यो ऽसौ संविदात्मा । सो ऽपि यदि शुद्धो निर्विशेषो न तर्हि नीलस्यैव व्यवस्थाहेतुर्भवेत्, पीतादावपि तस्य तथात्वात् । तदसौ नीलोपरक्तो नीलोन्मुखो नीलप्रकाशस्वभाव इत्याभासः स नीलव्यवस्थापकः, तत्प्रकाशस्वभावत्वेव हि तद्व्यवस्थापकता । स च नीलस्य प्रकाशो यद्यतिरिक्तस्य तत्पीतस्यापि स्यात्, प्रकाशात्मकचित्तस्वतादात्म्याविशेषात् । तेन व्यतिरिक्तीकृतस्य नीलस्य स प्रकाशः । नीलं चेत्थं ततो व्यतिरेकाभासयोग्यं, यदि सो ऽप्याभासो महतः प्रकाशाद्व्यतिरिच्येत, महाप्रकाशाव्यतिरेके तस्य ततो नीलादेर्व्यतिरेकाभावप्रसङ्गात्, महाप्रकाशश्च न व्यतिरेकं किंचिदपि सहते इति नूनं महाप्रकाशेन संकोच्य आत्मनि निर्भासनीयः संविदो वस्तूनां चान्योन्यसंकोचप्राणो नञर्थरूपो ऽसौ शून्य इत्युच्यते । संकोचावभास एव च मायीयप्रमातृत्थानम् । अत एकया सृष्टिशक्त्या प्रमातृप्रमाणप्रमेयोल्लासः परमार्थतः, तेन शून्य-

Digitized by Google

धीप्राणदेहाद्युपाध्याश्रयस्वीकारात्मकसंकोचपरिग्रहसंकुचितान्मायाप्रमातुरनन्तकालान्तर्मुखसंवेदनरूपात्स प्रमाणाभिमत आभासो यावत्प्रमेयोन्मुखतास्वभावस्तावत्प्रमेयस्य देशकालाकाराभाससंभेदवत्त्वात् सो ऽपि तथैव क्षणेक्षणे ऽन्यान्याभासरूपः स्रष्टव्यः । तदुक्त"मभिनवोदय" इति । अभिनवः क्षणावासपरिम्लान्यापि न कलङ्कितस्तेन नवनवोदय इत्युक्तं भवति । सोपि यदि तथाभूतो मायाप्रमातृलग्नो न भवेत्, ततो मम नीलावभासो यस्य तस्यैव पीताभासो ममेति न स्यात्, अस्ति चेदं स्वसंवेदनं यत्सर्वत्राबाध्यमानमित्येव स्वत्वेनावभासमानो य आभासो नवनवप्रमेयौन्मुख्यान्नवनवोदयः स प्रमाणं यतः प्रमां विधत्ते । कासौ प्रमा, फलस्वभावेति चेद्, आह, स एव बोधरूप आभासो मितिः प्रमाणफलमिति संबन्धः । नन्वेवं पर्यायत्वमुक्तं भवेन्न तु फलस्वरूपम्, आह, बाह्योन्मुखतया, प्रकाशरूपया तत्र तत्प्रमाणं, या तु तस्यैवान्तर्मुखात्मा विमर्शरूपता प्रागुपपादिता तत्स्वभावेन केवलं विषयदशासंकुचितेन स एव बोधः फलं, यथा हि यः शूरोहं स एव विजयीत्येकनिष्ठे शूरत्वविजयित्वे विवेकवता हेतुफलभावेन व्यवस्थाप्येते यतो ह्यहं शूरस्ततो विजयीत्येवं यतो नीलप्रकाशस्ततो नीलमिदमिति परामर्श इत्येकरूपत्वेपि हेतुफलभावो, यथोक्तं तद्वशात्तद्व्यवस्थानादिति । किं चेह व्यापाररूपमेव फलं, व्यापारश्च व्याप्रियमाणाद्व्यापार्यमाणाद्वा ऽनन्याकार एव सिद्ध इत्यभेदः प्रमाणफलयोः, विमर्शबलेन च यतः प्रमाणं, विमर्शश्च शब्दजीवितः, शब्दश्च आभासान्तरैर्देशकालादिरूपैरनामृष्ट एकत्रैवाभासमात्रे प्रवर्तते, घट इति, लोहित इति, ततो देशकालाभासयोः स्वलक्षणत्वार्पणप्रवणयोरनामिश्रणात्सामान्यायमाने आभासे प्रमाणं प्रवर्तते । अयमित्यपि ह्यवभास आभासान्तरानामिश्रे पुरोवस्थिताभासमात्रे इत्युक्तं श्रीमदाचार्यपादैरेव ।

नियतेप्ययमित्येव परामर्शः पुरः स्थिते ।
सर्वभावगतेदंतासामान्येनैव जायते ॥

इति । तत एवाभासमात्रं वस्तुस्वलक्षणं तु तदाभाससामानाधिकरण्याभासरूपमाभासान्तरमेकमन्यदेव, अत्र च पृथगेव च प्रमाणं तत्परं मिश्रीकारेषु तेष्वाभासेषु गृहीतग्राहि न प्रमाणमित्यपि भविष्यति, अध्यवसायस्यास्मदुक्तनयेन शब्दप्राणितस्य प्रत्याभासविश्रान्तौ तदपेक्षमपि प्रामाण्यं वदता प्रत्याभासनिष्ठमेव प्रामाण्यमुपेत्यमित्यास्ताम्, किमवान्तरेण । ननु यदि विमर्शः प्रमाणव्यापारः स तर्हि द्विचन्द्रेप्यस्ति, मैवम् । स हि संस्कारयोगादात्मानमभिमतप्रसिद्ध्यर्थक्रियाप्राप्तिपर्यन्तमनुवर्तयन्ननुन्मूलितवृत्तिः स्थिरः संस्तथा भवति, मध्ये पुनरुन्मूलनं चेत्सहते न तद्वदसौ तथा विमर्शः, नायं विमर्शः पूर्वमप्येकेनान्तर्मुखेण वपुषा पूर्वमेव तस्य निर्मूलनात्, स्वसंविदत्र च साक्षिणी तदेवेदं नेदं रजतमिति वृत्तपूर्वस्यैव विमर्शस्याविमर्शीकरणं संवेद्यते । उक्तं चैतद्बाधविचारे । वक्ष्यते च "रजतैकविमर्श" इत्यत्र । एवं स्थिते द्विचन्द्रेपि यावत्परकुतूहलसंपादनमर्थक्रियासंमतमपूर्ववस्तुदर्शनया चिकीर्षति तावदवज्ञोपहासशोकादिविवशपरजनवचनाकर्णनेन समुन्मूल्यमानं प्राच्यं द्विचन्द्रोयमिति परामर्शं स्वसंवेदनादेवाभिमन्यते । नन्वेवं यत्रार्थक्रियां नान्विच्छति तत्र कथं बाधाबाधव्यवहारः, मा भूत्, किं नस्त्रुटितं, प्रवृत्तिर्हि न सर्वत्र प्रमाणात एव, किं तर्हि क्व चन संशयत एवा * र्थपक्षाधिक्याद् † अर्थित्वतारतम्यादपि वा कृष्यादौ, सविषान्नभोजने, निश्चितसंभावितदृष्टप्रत्यवाये च चौर्यादौ प्रवृत्तिदर्शनात्तदर्थित्वातिशयः प्रवृत्तौ तावन्निबन्धनम्, लोकश्च प्रवृत्तः क्व चनानुन्मूलितप्रमितिकः प्रमाणतां प्रतिपद्यते क्व चिदन्यथा भवन्विपर्ययमिति । एवमाजन्म यतो ऽनेनाभ्यस्त आ पूर्वजन्मशतेभ्योपि वा प्रमाणाप्रमाणविभागस्ततो मणिरूप्यादिवत्तत्स्वरूपमायातमात्र एव विलक्षणमीक्षते । अस्ति हि तस्य परमार्थतो वैलक्षण्यं कारणभेदादिकृतं, ततश्च यदार्तिं परिमितां सह्यामभिमन्यते तत एवार्थितामहापयहेण यत्र तत्र न प्रेर्यते तदा विसंवादभीरुर्निश्चितप्रामाण्याद्बाधाददृष्टे दृष्टे ऽपि वा प्रवर्तमानो न विसंवाद्यते इति स प्रेक्षापूर्वकारी भण्यते, तेन लौकिकं प्रमाणस्वरूपमनूदितं सामान्यसंबन्धादिज्ञानेपि मोहादप्रामाण्यशङ्कां शमयितुम् । अत एव विभागविशेषलक्षणपरी-

---

* प्रवृत्तिं प्रति हीष्टसाधनत्वोत्कटविषयताकज्ञानत्वेन कारणत्वम्, न त्विष्टसाधनत्वप्रमात्वेन । इष्टसाधनत्वभ्रमेणापि विषसंपृक्तान्नभोजनादौ प्रवृत्तिदर्शनात् । विषयतागतमौत्कट्यं च समानकोटिकसंशयीयविषयताव्यावृत्तः प्रवृत्तिनिवृत्त्यन्यतरप्रयोजकतावच्छेदकतावच्छेदको धर्मविशेषः । तादृशधर्मवद्विषयतानिरूपक एव संशयः संभावनेत्युच्यते । स एव चार्थपक्षाधिकः संशयो ज्ञेयः । प्रदर्शितमौत्कट्यं चाहार्यस्य विषयतायां न स्वीक्रियते । तस्य प्रवृत्तिनिवृत्त्योरप्रयोजकत्वेन तद्विषयतायास्तदनवच्छेदकतया कल्पकाभावात् ।

† अर्थाच्चासंनिहित इत्यनुशासनादर्थस्यासांनिध्यमिना प्रत्याय्यम् । तच्चेन्घटितवाक्यप्रयोगकालिकमेव प्रत्यासत्त्या विवक्षणीयम् । सांनिध्यं च यस्मादर्थशब्दादिन् प्रत्ययार्थत्वकोर्षितस्तेन बुबोधयिषितो यो ऽर्थस्तस्य मत्वर्थीयेन प्रतिपिपादयिषितो यः संबन्धस्तद्वत्त्वम् । तदभावश्चासांनिध्यम् । स च संबन्धः प्रायेण स्वस्वामिभाव एव, यथा धान्येनार्थो हिरण्येनार्थीत्यादौ । क्व चिच्च तदतिरिक्तो ऽपि ज्ञातृज्ञेयभावादिः, यथा विद्यार्थीत्यादौ । असंनिहितपदेन चेच्छाविषयत्वमुपलक्ष्यते । संनिहितस्य सिद्धतया सिद्धेश्चेच्छां प्रति प्रतिबन्धकत्वेनासंनिहितस्यैवेच्छाविषयत्वस्य संभवात् । तेनानिच्छत्यर्थीति न प्रयोगः । यद्वा असंनिहित इत्यस्यार्थशब्दविशेषणतया ऽर्थशब्दस्यैव विशेषणतयेच्छाबोधकत्वमिन्प्रकृतिभूतस्य । ततश्चार्थीत्यस्य यत्किंचिदुद्देश्यकेच्छावानिति पर्यवसितो ऽर्थः । एवं चार्थित्वमिच्छारूपमेव पर्यवसितं, तस्य च तारतम्यमतिशयः, औत्कट्यमिति यावत् । तच्च प्रत्यवायजनकत्वदर्शननिष्ठप्रवृत्तिसामग्रीविघटकत्वोन्मूलकतावच्छेदकत्वरूपोत्तेजकतावच्छेदकत्वं, तद्विशिष्टविषयतानिरूपकेच्छायाश्च फलबलात्प्रवर्तकत्वमुपेयते इति भावः ।

Digitized by Google

तादिभिरिह नायासितो लोकः । यत्पुनरबाधितस्थैर्यमत एवाप्रतिहतानुवृत्तिकं विमर्शफलं विधत्ते तत्तद्बोधरूपं बोध्यनिष्ठं प्रमातृस्वरूपविश्रान्तं प्रमाणमिति । तच्चैन्द्रियके बोधे सुखादिसंवेदने योगिज्ञाने चाविवादमेव । मुख्यतयैव प्रमेयरूपे आभासे साक्षाद्विश्रान्तेः । अनुमानजातप्रतीतिराभासान्तरात्* कार्यरूपात्स्वभावभूताद्वा आभासान्तरे प्रतिपत्तिः, वस्त्वन्तरस्य च तेन साकं कार्यकारणभावनियमः सामानाधिकरण्यनियमश्चेश्वरनियतिशक्त्युपजीवन एवावधार्यो भवति नान्यथा, तेन यावति नियतिर्ज्ञाता तावति देशे काले वा ऽनुमानं प्रमाणम् । आगमस्तु नामान्तरः शब्दनरूपो दृढीयस्समविमर्शनात्मा चित्स्वभावस्येश्वरस्यान्तरङ्ग एव व्यापारः प्रत्यक्षादेरपि जीवितकल्पस्तेन यत्पुनरामृष्टं तत्तथैव, यथा नैतद्विषं मां मारयति गरुड एवाहमिति, तत्र तु तथाविधशब्दनात्मनि विमर्शे आनुकूल्यं यो भजते शब्दराशिः सो ऽपि प्रमाणं, यथा वेदसिद्धान्तादिः, अन्यो ऽपि वा बौद्धार्हतागमादिः,तेन हि यच्छब्दनमुत्पादितं ज्योतिष्टोमकार्यहं स्वर्गं गन्तेति, दीक्षितो ऽहमपुनरावृत्तिभागीति, कारुणिको ऽहं बुद्धपदं गन्तेति, गाढक्लेशसहिष्णुरहमर्हत्पदं प्रतिपत्स्य इति, तत्र न विपर्यय उदेति, तदाशयस्यैव तत्रानुष्ठानयोग्यत्वात्, अन्यस्य तु दृढप्रतिपत्तिरूपत्वाभावादप्रमाणमेव तथा विमर्शनात्मकं शब्दनं । नन्वेवं तदेवशास्त्रं कं चित्प्रति प्रमाणं कं चित्प्रति नेति स्यात् न चैतद्युक्तमपक्षपातित्वात्प्रमाणस्येति, । अतत्त्वज्ञो ऽसि प्रतीतिवृत्तस्य, । तथापि नोपेक्ष्यसे, । अपक्षपाति प्रमाणमिति को ऽस्य वचनस्यार्थः, किं यदेकस्य नीलज्ञानं प्रत्यक्षरूपं तत्किं सर्वस्य नीलं भासयति, धूमज्ञानं वाह्निं, त्वं प्रातर्निधिमनेन विधिना लब्धासे इति च यस्सिद्धादेशरूप आगमः, स किं सर्वान्प्रति प्रमाणम् अथ कस्यापि कदा चित्किं चित्, तथा इहापि दृढविमर्शरूपं शब्दनमासमन्तादर्थं गमयतीत्यागमसंज्ञकं प्रमाणं सर्वस्य तावद्भवति, तत्र यथा मिथ्याज्ञाने सहायतां भजमानमालोकेन्द्रियादिकमप्रमाणतासचिवमप्रमाणं, न चैतावता सम्यग्ज्ञानस्वरूपस्य प्रत्यक्षस्य का चित्पक्षपातिता, तथा स एव ज्योतिष्टोमादिशब्दः शूद्रादेरदृढविमर्शात्मनि अत एवाप्रमाणे आगमाभासे साचिव्यं विदधदपि दृढविमर्शात्मकसत्यागमरूपशब्दनलक्षणप्रमाणोपयोगितायां प्रामाण्यं भजन पक्षपातापक्षपातदोषप्रतिक्षेपयोग्यः, सर्व एव ह्यागमो नियताधिकारिदेशकालसहकार्यादिनियन्त्रितमेव विमर्शं विधत्ते विधिरूपो निषेधात्मा वा, अत एव ।

प्रसिद्धिरविगीता हि सत्या वागेश्वरी मता ।
तयेति यत्र हि यदा यत्तद्ग्राह्यमशङ्कितैः ॥

इति श्लोके यत्र यदेत्युक्तं तेन प्रत्यक्षागमौ बाधकावनुमानस्येति तत्रभवद्भर्तृहरिन्यायभाष्यकृत्प्रभृतय,स्तस्मात्प्रमाणलक्षणे ज्ञाते सर्वं प्रमाणस्वरूपं ज्ञातं भवति, किं विशेषलक्षणैः "यस्त्वविसंवादकत्वं तस्य लक्षणमाह" तेनापि प्रापकत्वं प्रवर्तकत्वं प्रवृत्तियोग्यशक्यप्राप्तिकवस्तूपदर्शकत्वं प्रमाणलक्षणं ब्रुवता न किं चित्प्रमाणाभिमतबोधविश्रान्तं स्वरूपमुक्तं, तच्चेदनेन लक्षणेन निर्वाह्यते तच्चिर्व्यूढं भवत्यन्यथा मुखभङ्गमूर्धकम्पाङ्गुलीमोटनादिमात्रतत्त्वं तदित्यलं विस्तरेण ॥

ननु चैकाभिधानविषये मितिरिति यदुक्तं तत्रैकमभिधानं बाह्यस्वलक्षण एव प्रवर्तते यदि, तत्कथमुक्तं प्रत्याभासं प्रमाणाभासमिश्रीकरणाभासस्तु स्वलक्षणमित्याशङ्कां शमयन्प्रमाणस्य यत्प्रमेयं तत्परमार्थतो निरूपयितुमाह ।

(२) यथारुचि यथार्थित्वं यथाव्युत्पत्ति भिद्यते ।
आभासोप्यर्थ एकस्मिन्ननुसंधानसाधिते ॥

यद्यपि घट इति बहिः परिदृष्ट एकोर्थस्तथापि तावानेवासौ न, अपि तु पृथग् निर्भज्यमानतामपि सहते, तथाहि स्वतन्त्रं वा विवेचन,मर्थित्वानुसारेण वा, पूर्वप्रसिद्ध्युपजीवनेन वा, तत्र त्रिधापि विवेचने क्रियमाणे पृथगेव भान्त्याभासाः । नन्वेवं चेत्कथमेकं स्वलक्षण,मुच्यते, तेषां पृथग्भासमानानामप्याभासानां यो विमर्शानुप्राणितभूतः स कदा चित्प्रत्याभासमेव विश्राम्यति तदा परापरसामान्यव्यवहारः, कदा चित्पुनर्गुणप्रधानतापादनेनात्रेदमित्यमिति व्यामिश्रणाप्राणो विमर्श,स्तदा तदेकं स्वलक्षणम्, अपिभिन्नक्रमः । अनुसंधानेन मिश्रताविमर्शनेन साधितो य एकोर्थः स्वलक्षणात्मा तत्रैकस्मिन्नपि सति रुचिं स्वातन्त्र्यमर्थित्वमर्थक्रियाभिलाषपरवशतां व्युत्पत्तिं वृद्धव्यवहारशरणतां चानतिक्रम्य भिद्यत एवाभासः ॥

क्र यथेति निदर्शयितुमाह ।

---

* कार्येण स्वभावेन वा कारणं स्वभावि वा ऽनुमीयते । तत्र कार्येण यथा । नदीपूरेण वृष्टिः, धूमेन वह्निः । अत्र च नदीपूरधूमाभ्यां कार्याभ्यां स्वकारणीभूतौ वृष्टिवह्नी अनुमीयेते । स्वभावाद्यथा । औष्ण्येन तेजः । भवति चौष्ण्यं तेजसः स्वभावः । यस्य सत्ता यत्सत्तेतरसत्तां नापेक्षते यत्सत्तां चापेक्षते स तस्य स्वभावः । औष्ण्यस्य हि सत्ता तेजः सत्तेतरसत्तानधीना भवतीति भवत्यौष्ण्यं तेजसः स्वभाव इति तेन तेजो ऽनुमीयते । तथा च श्लोकः ।

कार्यकारणभावाद्वा स्वभावाद्वा नियामकात् ।
अविनाभावनियमो दर्शनान्तरदर्शनात् ॥

इति । इदमुदाहरणमात्रम् । घटत्वस्य द्रव्यत्वानुमापकत्वदर्शनात् । तस्य च द्रव्यत्वकार्यत्वस्वभावत्वयोरभावात् । अत्र च श्लोके स्वभावपदेन तादात्म्यं विवक्षणीयमिति सर्वदर्शनसंग्रहस्वरसतः प्रतीयते । तद्रीत्या तु घटत्वद्रव्यत्वयोरपि तादात्म्यप्रयुक्तमेव सुग्रहत्वमविनाभावस्य शक्यते वक्तुम् । जातेः सकलव्यक्त्यनतिरिक्तत्वनये घटत्वद्रव्यत्वयोरपितादात्म्यस्य संभवाद् इति ॥

Digitized by Google

(३) दीर्घवृत्तोर्ध्वपुरुषधूमचान्दनतादिभिः ।
यथाऽऽभासा विभिद्यन्ते देशकालाविभेदिनः ॥
तथैव सङ्कटद्रव्यकाञ्चनोज्ज्वलतादयः ।
आभासभेदा भिन्नार्थकारिणस्ते पदं ध्वनेः ॥

इह तावदेकस्मिन्नपि चेतनतया प्रसिद्धे पुरुषस्वलक्षणे विततदेशव्यापितां दीर्घतामेव कदाचिद्विमृशति, या तरूणामप्यस्ति, निःसंधिबन्धरूपतां वा वृत्ततां, या शिलानामपि संभविनी, ऊर्ध्वदिगाक्रमणरूपां वा ऊर्ध्वतां, या स्थाणोरपि सम्बन्धिनी, गमनागमनादिस्वतन्त्रताभावयोग्यतारूपं वा पुरुषत्वं, यदन्यपुरुषसाधारणं, तथाहि स्वतन्त्रया वा इच्छया रुचिरूपया एवं कुर्यात् । यथोक्तम् ।

या तु व्याक्षेपसारत्वाच्चेतसः स्वरसोद्गता ।

इति, विततदेशव्यापिन एव वार्थात्तिरोधिलक्षणामर्थक्रियामर्थयमानो विभजेदेवं व्यवहारे वृद्धैः कीदृग्दीर्घं गीयते इति व्युत्पित्समानो व्युत्पादयितुमिच्छुर्वा विभागं कुर्यादित्येवं तत्राभासानां भेदः, एकस्वलक्षणं तु एकस्मिन् देशाभासे कालाभासे च विश्रान्तेः, देशकालाभासावेव हि सामान्यरूपताप्रयोजकव्यापित्वनित्यत्वलक्षणाविधानसविधवृत्ती विशेषरूपतां वितरतः, एवं पुरुषत्ववदन्येषि ब्राह्मणाद्याभासा अपि निरूप्याः । एवमत्र तावत्प्रसिद्धतर आभासभेदो जडाजडसाधारणबहुतरधर्मास्पदत्वात् । अनेन निदर्शनेन धूमेपि धूमत्वचन्दनत्वश्रीखण्डचन्दनोत्थितत्वादयः प्रसिद्धा आभासभेदा विभजनीयाः । अनेन तु प्रसिद्धेन दृष्टान्तेनाप्रसिद्धभागोपि यो घटस्तत्राप्याभासभागभेदो भवति । तथाहि, किं चिदप्यत्र नास्तीति हृद्रोगमिवापद्यमानो घटं पश्यन्नस्तीदमिति सत्त्वाभासमेव पश्यति, अपरानाभासान्वापि तु नाद्रियते, तथा उदकाहरणार्थी घटाभासं, स्वतन्त्रनयनानयनयोग्यवस्त्वर्थी द्रव्याभासं, मूल्यार्थी काञ्चनाभासं, हृद्यतार्थी उज्ज्वलत्वाभासम्, आदिग्रहणात्कृततरभावार्थी दार्ढ्याभासमिति द्रष्टव्यम् । एवं रुचिव्युत्पत्त्योरपि योजनीयम् । एवमेते आभासभेदा एव वस्तु, आभासमानतासारत्वाद्वस्तुतायाः, योप्याभासस्य प्राणभूतो विमर्शः सोपि प्रत्याभासमेव शब्दस्यापि जल्पात्मनो बोधजीवितप्रायस्य प्रत्याभासमेव विश्रान्तेः, सङ्कटो लोहित इत्याद्यर्थक्रियाकारित्वमप्यन्वयव्यतिरेकाभ्यां प्रत्याभासमेव नियतं, सदाभासेन हृद्रोगपरिहारमात्रस्य संपादनात् । तत्राभासान्तरस्य याऽपेक्षा साऽन्याभासेनार्थक्रियायां साध्यायां यात्राभासस्यैव तदाभासनान्तरीयकत्वेनाभासान्तरस्यानियतस्याप्रेक्षणात् । एवं येनयेन मुखेनार्थो विचार्यते तेनतेनाभासमात्रात्मैव तथैव प्रतिभासनाद्विमर्शनादर्थक्रियाकारणाच्चेति सिद्धम् । एवं प्रसिद्धतरप्रसिद्धाप्रसिद्धस्वातिशयेनैकोप्यर्थो ग्रन्थकारेण चैवं निरूपितो दीर्घवृत्तेति धूमेति सङ्कटेति ॥

नन्वेवं प्रत्याभासमेव वस्तुत्वे एको घटात्मा न वस्तु स्यादित्याशङ्क्याह ।

(४) आभासभेदाद्वस्तूनां नियतार्थक्रिया पुनः ।
सामानाधिकरण्येन प्रतिभासादभेदिनाम् ॥

आभासानां मिश्रं यद्रूपं तत्रावश्यं कश्चिदाभासः प्रधानत्वेनान्याभासानां विश्रान्तिपदीकर्तव्यः, स तेषां समानमधिकरणं तेन सह यस्तेषां संबन्धस्तत्सामानाधिकरण्यं तेनोपलक्षितो यः प्रतिभासोऽर्थोन्मुखः प्रकाशस्तदनुप्राणकश्च कश्चन यदात्मा परामर्शस्तस्य सर्वस्यैकाभासविश्रान्ततानियमात्, तस्मात्तं सामानाधिकरण्याभासं समनुप्राणयति वाक्यात्मा वाक्यार्थपरामर्शरूपो विमर्शः, इहेदानीमेव घटोऽस्तीत्येवंरूपः, ततो हेतोरयं अभेदिन एकस्वलक्षणतामाप्ताः, न तु स्वरूपभेदमुज्झन्तः तेषामन्याविशिष्टा समुदितरूपा अर्थक्रिया आभासविमर्शभेदे पुनरन्या नियता एकैकमात्ररूपा आभासप्रतिभासशब्दाभ्यां सूत्रे विमर्शोऽप्याक्षिप्तो मन्तव्यः, पुनःशब्दो विशेषद्योतकः काकाक्षिवदुभयत्र योज्यः, बहुवचनेनैक्येपि स्वरूपभेदापरित्याग उक्तः, तत्र चैक्याद्याभासे परतन्त्रं सत् पृथक्त्वं यदाऽऽभासानां तदा समानरूपव्यक्त्युपरञ्जकत्वेन पारमार्थिकं सामान्यरूपत्वं, घटाभासस्य तु शुद्धस्य स्वतन्त्रपरामर्शे योग्यतामात्रेण सामान्यरूपता, न वस्तुतो, द्रव्यादन्यो हि सर्वः पदार्थः परतन्त्रतासारः । इयमेको घटात्मेत्यपि सत्यमेव आभासविमर्शार्थक्रियाबलेन तथावस्थापनादिति ॥

नन्वेकेनैवार्थक्रिया न तत्र, अपि त्वाभाससमुदायादर्थक्रियासमुदायः, आभासाश्च भिन्ना अपि यदैकामर्थक्रियां कर्तुं मिश्रीभवन्ति तदा कस्तेषामियत्तावधिरिति चोद्यमपवदति ।

(५) पृथग्दीपप्रभासानां स्रोतसां सङ्गरे यथा ।
अविरुद्धाद्यभासानामेककार्या तथैक्यधीः ॥

पृथग्वर्तिन्यो या दीपस्य प्रभाः सूक्ष्मतमावलोकनसामर्थ्याधानलक्षणां यामर्थक्रियां न कृतवत्यस्तामेवैकभवनाभ्यन्तरं संमूर्छितात्मानो विदधते, न तत्रार्थक्रियाणां समुदायोस्ति, सागरपतितानि च स्रोतांसि बहुतरङ्गारम्भार्थक्रियाकारीणि तद्वद्घटः काञ्चनो लोहितस्ततोऽयं शिवलिङ्गशिरःसंमार्जनोचितसलिलाहरणार्थक्रियोचितो दृष्टमात्र एव तीव्रप्रीतिलवणार्थक्रियाकारीति सिद्धमेकार्थक्रियाकारित्वं, "यत्पुनराभासानां मिश्रणे का सीमेति" तत्रोच्यते, येषामविरोधस्त एवाभासा मिश्रीभवन्ति, नहि रूपाभासो मारुताभासेन मिश्री-

Digitized by Google

भवति, विरोधात्। सो ऽपि नियतिशक्त्युत्थापितः पृथग्ये दीपप्रकाशास्तेषां सम्बन्धि यदेकं सागरे स्रोतसां च यदेकं वस्तु तेन कार्या यथा ऐक्यधीस्तथा विरुद्धा ये ऽवभासा घटलोहितकाञ्चनादयस्तेषां सम्बन्धि यदेकं स्वलक्षणं तत्कार्या ऐक्यधीरिति संबन्धः। ऐक्यधिया प्रतिभासो विमर्शोर्थक्रिया चेति स्वीकृतम् ॥

नन्वेवं प्रत्याभासं प्रमाणस्य विश्रान्तत्वादग्न्याभासेऽग्निज्ञानं प्रमाणं धूमज्ञानं च धूमाभासमात्रे कार्यकारणभावाभासोपि तावन्मात्रे ततश्च धूमाभासोप्यग्न्याभासं व्यभिचरेदित्यादि बहुतरोपप्लवप्रसङ्ग इति शङ्कां व्यपोहितुमाह ।

(६) तथाविशिष्टे वन्ह्यादौ कार्यकारणतोष्णता-
तत्तच्छब्दार्थताद्यात्मा प्रमाणादेकतो मतः ॥

तत्रेति प्रत्याभासं प्रमाणं विश्राम्यतीति अमुष्मिन्नपि पक्षे न कश्चिद्दोषः। तथाहि । अविशिष्टो यद्यपि वह्न्याभासो देशकालाभासप्रमुखैराभासैरसङ्कीर्णत्वेन सामान्यमात्ररूपत्वा,- तथापि स एवाभासो यावद्भिराभासैरविनाभूतो भगवत्या नियतिशक्त्या नियमितस्तावतोवभासान्स्वीकृत्यैव प्रमाणकृतां निश्चयपदवीमवतरति, तथा च वह्न्याभास इन्धनकार्यत्वाभासेन धूमकारणताभासेन उष्णस्वभावत्वाभासेन च स्वाभाविकाव्यभिचरितसाहचर्यः प्रतीयमानो विश्वत्रैव सर्वदैव च तथा प्रतीतो भवत्येकस्मात्तस्यास्वाभाविकोपि यः स्वभावः पुरुषकृतसमयादिमुखप्रेक्षी, यथा अग्निशब्दवाच्यत्वं घटप्रतिपत्तिकारित्वमित्येवमादिः सोपि एकप्रत्यक्षादेव निश्चीयते, तस्य हि प्रमातुः कृत्रिमेणेतरेण वा रूपेणाभासान्तरनान्तरीयकतया, ऽसौ वह्न्याभासः संविदितः सर्वदेशकालगतस्तथैव संविदित इति तत्र किं प्रमाणान्तरेण, तस्यतस्य यथेच्छं पुरुषसमयेन नियुज्यमानस्य शब्दस्यार्थोयं ज्वलद्भास्वराकार आभास इत्यनेन नियतिशक्तिरेव सर्वत्र शरणमिति पिशुनयति। एतदुक्तं भवति, यत्किं चित्कृत्रिममितरद्वा भावाभासस्याभासान्तरेण नान्तरीयकत्वं प्रतिभाति, तत्र नियतिशक्तिमात्रमेव परं विजृम्भते, तत्तु नियतिरूपं पूर्वापरविततकालम् इन्धनकार्यत्वे धूमकारणत्वे उष्णस्वभावत्वे चाभासमाने,अनतिचिरकालं तु वह्न्यादिशब्दवाच्यत्वाभासादाविति विशेषः। ततश्च नियतिशक्त्युपजीवनेन धूमाभासोप्यग्न्याभासाव्यभिचारीति कश्चन विप्लवः। कार्यता कारणता उष्णता च तस्यतस्यार्थता तत्तच्छब्दाभिधेयता, आदिग्रहणाद्गन्धरसशून्यता ऊर्ध्वदिक्संयोगिता जलविरोधिता च इत्येवंभूतो य आत्मा स्वभावो वह्न्यादौ स एकस्मादेव प्रमाणान्मतः संविदित इति यावत् । अर्धच्छेद इति काव्ये ऽयं समयो न ग्रन्थे इति द्वितीयतृतीयपादयोः सामस्त्येप्यदोषः, पृथग्भावप्रत्ययप्रयोगो वस्त्वन्तरापेक्षानपेक्षातः कृतकत्वाकृतकत्वाभ्यां वर्गभेदं सूचयितुम् ॥

एवंभावस्वभावव्यवस्थापनं प्रत्याभासं विश्रान्तेनैकेनैव प्रमाणेन क्रियते, तेषामप्याभासानां यथोचितं यदन्योन्यनान्तरीयकत्वं तदेकेन संवेदनरूपेण, तदनेकप्रमिताभासविषयपूर्वप्रवृत्तसंवेदनकलापानुप्राणकान्तर्मुखस्वरूपेण निश्चीयते, तच्चैक्याभासमात्रे ऽनुसंधानरूपं प्रमाण,मनुसंधीयमानेषु त्वाभासेषु गृहीतग्राहित्वादप्रमाणं, तत्र तु प्रत्येकं प्राच्यमेव प्रमाणं भावस्वभावव्यवस्थापनात्मकं, मानसप्रवृत्त्यतिरिक्तकायप्रवृत्त्युपयोगस्तु यथा प्रमाणविषयस्तं प्रकारं दर्शयितुमाह ।

(७) सा तु देशान्तराद्यध्यक्षान्तरभिन्ने स्वलक्षणे ।
तात्कालिके प्रवृत्तिः स्यादर्थिनः

बाह्या तावदर्थक्रिया स्वलक्षणतः, स्वालक्षण्ये च देशकालाभासयोजनस्यैवान्तरङ्गत्वं, तत्रापि च विशेषरूपतापि परामर्शं विना न किं चित्, परामर्शद्वारेण तु प्रमातरि विश्राम्यन्ती प्रमातुः संवेदनैकरूपस्य देशकालयोगेनैक्यादभ्युङ्क्त्यैव विशेषरूपतामिति सर्वत्राद्वयं परमार्थतः, तथापि तु या विशेषरूपता भाति तस्याः परमेश्वरस्वातन्त्र्यमेव निमित्तं, यत् तन्मायाशक्तिरित्युच्यते, तत्र विशेषसाध्यार्थक्रियाविशेषेण यो ऽर्थी तस्य या स्वलक्षणे तस्मिन्विशेषरूपे ऽर्थे तत्कालभाविनी वाङ्मनःकायप्रवृत्तिः, सा देशे, आदिग्रहणात्काले, स्वरूपान्तरे, स्वरूपानुसन्धानादौ, च यान्यध्यक्षान्तराणि बहूनि प्रत्यक्षाणि तेषां भिन्ने भेदे निमित्ते सति भवति नान्यथा, नैकैकतः प्रमाणात् सा प्रवृत्ति,रपि तु प्रमाणसमूहादेव, समूहता च परस्य नोपपन्ना, अस्माकं तु एकस्वसंवेदनविश्रान्तिमयी सा युज्यते इत्युक्तं प्राक् "न चेदन्तःकृत" इत्यत्र । इयमेव च सा प्रमाणानां योजना योजिका च युक्तिरित्युच्यते, गन्धद्रव्यादियुक्तिवत् । एवं प्रत्यक्षसमूहादेव प्रवृत्तिरिति तात्पर्यम् । देशादिकेष्वप्यध्यक्षेषु सत्सु देशाभासयोजनायामप्यन्तः प्रमातरि अभिन्नं यत्स्वलक्षणं तत्रेति वा सङ्गतिः । देशादिकैरध्यक्षान्तरैः प्रत्यक्षीभूतैराभासान्तरैर्भिन्ने स्वलक्षणे निमित्ते सति प्रवृत्तिरिति वा योजना । अत्रापि प्रमेयबहुत्वनिरूपणदिशा तदनुयायित्वेनाभिधीयमानः प्रमाणसमूहो निमित्तत्वेनोक्तो भवति ॥

ननु किं प्रात्यक्ष्यामेव प्रवृत्तौ प्रमाणसमूह उपयोगी, नेत्याह ।

(८) अप्यनुमानतः ॥

न केवलं प्रत्यक्षतः प्रवृत्तिर्देशाधिकाध्यक्षान्तरभेदरूपप्रमाणसमूहनिमित्ता, यावदनुमानतो ऽपि तथैव धूमाभासमात्रे

अग्न्याभासमात्रे धूमाग्न्याभासाव्यभिचारित्वे पर्वताभासे च यानि प्रत्यक्षान्तराणि यच्च तद्गृहीतातिरिक्ते ऽयोगव्यवच्छेदे अग्निरत्रेत्येवंभूते पृथगनुमानं प्रमाणं तत्समूहादेवार्थिनस्तात्कालिकी प्रवृत्तिरिति संबन्धः ॥

एवं विमर्शबलादेव भेदाभेदव्यवस्था, तदेव हि परमेश्वरस्य संवेदनात्मनः शिवनाथस्य स्वातन्त्र्यशक्तिविजृम्भितं, ततश्च परैर्यदुच्यते "दूरान्तिकादावर्थस्याभेद" इति तदप्युपपद्यते, न त्वन्यथा कथं चिदिति निरूप्यते ।

(९) दूरान्तिकतया ऽर्थानां परोक्षाध्यक्षतात्मना ।
बाह्यान्तरतया दोषैर्व्यञ्जकस्यान्यथापि सा ॥
भिन्नावभासच्छायानामपि मुख्यावभासतः ।
एकप्रत्यवमर्शाख्यादेकत्वमनिवारितम् ॥

प्रतिभासमात्रेण व्यवस्थां कुर्वतः कथं दूरादूरयोर्वस्तुनोरभेदः, प्रतिभासस्य सकलासकलावृत्तानावृत्तादितया यथा कथं चिदपि भेदात्, "ननु विमर्शे ऽपि प्रत्याभासं तथैव भिन्नता" सत्यं, तथापि तु परो यो विमर्शः स एवायं पदार्थ इत्येकप्रत्यवमर्शरूपः तेन प्राणितकल्पेन आ समन्तात् ख्यानं प्रथनं यस्य मुख्यावभासस्य एकरूपभावाभासस्यैकप्रत्यवमर्शे तदुचितो ऽपि ह्यस्त्येवैकावभास आभासविमर्शयोरन्योन्यमवियोगात्, तस्मान्मुख्यावभासादेकत्वमप्रतिहतमास्ते, यदेवानुमितं तदेव दृष्टमित्यत्र प्रत्यक्षपरोक्षतारूपेणात्मना स्वभावेन भिन्ना अवभासच्छाया अमुख्यो ऽवभासो येषां तेषामेकत्वं मुख्यावभासत एकप्रत्यवमर्शानुप्राणितादिति संगतिः । बाह्यान्तरतया भिन्नावभासानामैक्यं यथा, यदेव दृष्टं तदेवान्तरहमुल्लिखामीति, व्यञ्जकानां दीपालोकादीनां दोषैर्भिन्नावभासानामैक्यं यदेव रक्तोत्पलं दीपेन नीलं दृष्टं तदेव सूर्यांशुभिर्लोहितं पश्यामीति । अन्येन वापि प्रकारेणेन्द्रियापाटवादिना एकपार्श्वसंमुखत्वादिना वा येषामवभासच्छाया भिन्ना तेषामपि मुख्यप्रत्यवमर्शानुवर्त्यवभासस्वरूपबलादैक्यमेवेति स्थितम् ॥

ननु दूरादूरादावस्तु स एवार्थः, प्रमात्रध्यवसितार्थक्रियांशे तथैवोपयोगात्' बाह्यान्तरत्वादौ कथमान्तरस्यार्थक्रियायां प्रमात्रध्यवसितायामनुपयोगादिति भ्रान्तिं भङ्क्तुमाह ।

(१०) अर्थक्रियापि सहजा नार्थानामीश्वरेच्छया ।
नियता सा हि तेनास्या नाक्रियातोन्यता भवेत् ॥

इह कार्यकारणतोक्तेत्यत्र स्वरूपमिवार्थक्रियापि या मध्ये गणिता सा सहजार्थस्वरूपभूता न भवति, तत्कारित्वं हि यस्मादीश्वरेच्छया नियतं भवने चाभवने च यतो नैषां स्वरूपं तेन तस्या अकरणाद्धेतोर्भावस्यान्यत्वं नाशङ्कनीयं, स्वरूपभेदाद्धि संभाव्येतान्यत्वं, न च स्वरूपमर्थक्रियाकारित्वमित्युक्तं वक्ष्यते च बहुशः, स्वरूपं च प्रत्यवमर्शबलादेकमेव बाह्यान्तरादावपीति ॥

ननु विमर्शबलादेव यदि वस्तूनां भेदाभेदव्यवस्था तर्हीदानीं त्रिजगति निवृत्ता भ्रान्तिसंकथाः, शुक्तिकायामपि सत्यरजततैवापतति, इदं रजतमिति विमृश्यमानत्वात्, ततश्च भ्रान्त्यभावे बाधानुपपत्तेः किमर्थमुक्तं "मितिर्वस्तुन्यबाधितेति" व्यभिचाराभावे ह्यबाधितेत्यस्य विशेषणस्य व्यवच्छेद्यं न लभ्यत इत्याशङ्कां निरस्यति ।

(११) रजतैकविमर्शे ऽपि शुक्तौ न रजतस्थितिः ।
उपाधिदेशासंवादाद्द्विचन्द्रे ऽपि नभो ऽन्यथा ॥

इदं रजतं स्थिरं सर्वप्रमातृसाधारणमर्थक्रियायोग्यमिति इदमंशे रजताद्यंशेषु त*त्संमेलनांशे चाभासविमर्शबलाच्च तावत्किं चिन्मिथ्यात्वम्, किं तूत्तरकालं यो भविष्यति विमर्शो नेदं रजतं वस्तु स्थिरं प्रमात्रन्तरगम्यमभिमतकार्यकारीति तद्विमर्शविमर्शनीयं यत् तत्पूर्वविमर्शकालसमुचितमेव रूपं तत्तस्मिन्पूर्वविमर्शकाले नैवामृश्यते भाव्यं च तेनामर्शनीयेन, तत्रैव काले नेदं रजतं ह्यभूदिति ह्युत्तरः परामर्शः, न तूदितप्रत्यस्तमितायां शतह्रदायामिवेदानीमेवेदं नेति विमर्शः, ततो यावता पूर्णेन रूपेण प्रख्यातव्यं विमर्शपर्यन्तं तावन्न प्रख्यातीति अपूर्णख्यातिरूपा ख्यातिरेव भ्रान्तितत्त्वं, तद्वशेनासद्विपरीतानिर्वाच्यादिख्यातयोऽप्युच्यन्ताम् । "ननु सत्यरूप्यज्ञानमप्यपूर्णख्यातिः" ततस्तर्हि किम्, इदमतः सर्वं भ्रान्तिरित्यागच्छेत् । दिष्ट्या दृष्टिरुन्मिमीलिषत्यायुष्मतः । मायापदं हि सर्वं भ्रान्तिः, तत्रापि तु स्वाप्ने स्वप्न इव गण्डे स्फोट इवापरेयं भ्रान्तिरुच्यते, अनुवृत्त्युचितस्यापि विमर्शस्यास्थैर्यात्, अतश्च पृथगिदंताद्याभासेषु न का चन भ्रान्तिः, †मेलनांशे तु विमर्शानुवृत्तिनिर्मूलनं विमर्शोदयकालादेवारभ्य बाधकेन क्रियत इति तत्रैव भ्रान्तिभाव इति सिद्धम् । रजतस्य शुक्तिकया सह यद्यप्येको विमर्शस्तथापि शुक्तौ रजतस्य तेन ज्ञानेन या दृष्टा स्थितिरिदं रजतमिति सा न, यत उपाधिरूपो यो देशो ऽत्र रजतमिति रजतच्छायामात्मना उपरञ्जयञ्छुक्तिदेशस्तस्यासंवादात्सम्यग्विमर्शनाच्च वृत्त्याभासने संवेदनं, बहिरत्राभासनविषयः, तस्याभावात्कारणात् । नन्वेवं भवतु शुक्ति-

* संबन्धांशे ।

† मेलनं संबन्धः । इदमंशस्य शुक्त्यादेस्तत्राभेदेन प्रतीयमानस्यापणादिस्थरजतादेरवस्तुत्वस्य संभावयितुमशक्यत्वात् । ननु तादात्म्यस्यापि नीलोत्पलादेर्वास्तविकस्यात्रावभासनसंभवेन कथं तदंशे ऽपि विमर्शानुवृत्तिनिर्मूलनं क्रियतामिति चेत् । रजतप्रतियोगिकत्वावच्छिन्नशुक्त्यनुयोगिकत्ववत्तादात्म्यस्यावस्तुत्वादिति बुध्यताम् ।

Digitized by Google

का रजते, द्विचन्द्रज्ञाने तु द्वौ चन्द्रावित्याभासे शुक्तिकयेव मेलनं न केन चित्साकमाभासते यत्र बाधः स्यात्, एकाभासांशे च न बाध इत्युक्तं भवतैव, क एतदाह, मेलनं न केन चित्सहेति, एवं हि सति स्वालक्षण्येन नियतदेशकालतया कथमाभास,स्तद्देशकालाभ्यां सह तत्राप्यस्ति मेलनाभासः, यद्विमर्शानुवृत्तस्तुर्निरूप्यते, द्वित्वाभासचन्द्राभासयोरपि मेलनाभासे विमर्शानुवृत्तिव्यावर्तनं वाच्यम्, तदेतदाह। द्विरूपे चन्द्रे ऽपि न केवलं रजत एव, नभ इति देशविशेषः कश्चित्, अन्यथेति द्विचन्द्रावलब्धौ यो ऽनवमृष्टस्स न तथेति बाधकेनोन्मूलितप्राच्यविमर्शानुवृत्तिकः क्रियत इति। एवमाभासास्तन्मेलनं च नियमानुप्राणितमित्येतावदेव प्रमेयम्,। एतान्येवा * गमे तत्त्वानि वक्ष्यन्ते। वस्तु तत्त्वं प्रमेयमिति पर्यायः। तथा च काठिन्याभास इति पृथिवी, लोहिताभास इति रूपं तेजश्च, मेलनाभासो रजः, सन्निवेशस्तु नियतिरूपः, नियतिर्हि नियमः, स चाभावप्राणो ऽभावस्फुरणमेव च पृथिव्याभासस्य विचित्रतया चकासत्पृथुबुध्नोदराकारता, भेदाभासश्च माया, तत्पृष्ठे सत्यप्रकाशाभासश्च शिवतत्त्वमित्यास्तांतावदग्रे भविष्यत्येतत् †। सर्वथा तावदत्र प्रमेये भगवत एव भेदने चाभेदने च स्वातन्त्र्यं, घटगताभासभेदाभेददृष्टिरेव च परमार्थाद्वयदृष्टिप्रवेशे उपायः समवलम्बनीयः, न तु व्यवहारोऽप्ययं परमेश्वरस्वरूपानुप्रवेशविरोधीति प्रतिपादितम्॥

एतदेव स्फुटयन्सकलप्रमेयसिद्धिः परमेश्वर एवायत्तेति निरूपयति।

(१२) गुणैः शब्दादिभिर्भेदो जात्यादिभिरभिन्नता।
भावानामित्थमेकत्र प्रमातर्युपपद्यते॥

इहानुवृत्तं व्यावृत्तं च चकासद्वस्तु कतरेण वपुषा न सत्यमुच्यता,मुभयत्रापि बाधकाभावात्,। सत्यतो हि यदि बाधक एव एकतरस्य स्यात्तदुदये स एव भागः पुनरुन्मज्जनसहिष्णुतारहितो विद्युद्विलायं विलीयेत, न चैव,मतएव भेदाभेदयोर्विरोधं दुःसमर्थमभिमन्यमानैरेकैरविद्यात्वेनानिर्वाच्यत्वमपरैश्चाभासलग्नतया सांवृतत्वमभिदधद्भिरात्मा परश्च वञ्चितः, संवेदनविश्रान्तं तु द्वयमपि भाति, संवेदनस्य स्वातन्त्र्यात्, सर्वस्य तिरश्चोप्येतत्स्वसंवेदनसिद्धं यत्संविदन्तर्विश्रान्तमेकतामापाद्यमानं जलज्ज्वलनमप्यविरुद्धं, तत एवोक्तम्। "अत एव यथाभीष्टसमुल्लेखेति" अतश्च गुणैरुपाधिरूपैर्विशेषाधायितया विवक्षितैः शब्दादिभिर्वा दण्डादिभिरपि वा यो भेदो जातिवशात्सादृश्याद्वैराग्यहणाद्वा यश्चाभेदो भावानामित्थमित्युक्तनीत्या क्रियासम्बन्धेत्यतः प्रभृतिनिरूपितः, स एकत्र प्रमातरि सकलप्रमाप्रमाणसंयोजनवियोजनादिविविचित्रासंकल्पमप्रपञ्चोचितस्वातन्त्र्ये भगवत्यस्मदीयहृदयैकान्तशायिनि शिवशब्दव्यपदेश्ये सत्युपपद्यते,नान्यथा,। विशेषणान्येव च भेदकानीति किमन्यैर्विशेषैः,। अयं स परमाणुर्य एतद्देशादिविशिष्टघटारम्भकाले पश्चात्तनसंघटिततद्व्यणुकारम्भकाले पूर्वं मिलितः। अयं स आत्मा यः पुरा स्वर्गसदने सुरयोषितमिमामित्थं परिरब्धवानितीयतैव योगिसर्वज्ञादीनां सिद्धः परमाण्वात्मादिषु भेदावभास इत्यलमवान्तरेण। सिद्धं तावद् भेदाभेदरूपं प्रमेयतत्त्वमेकप्रमातृविश्रान्त्या निःशङ्कतां श्रयतीति॥ १४॥

॥ शेषं श्लोकत्रयमुत्तराङ्के॥

॥ अथ बालरामायणाख्यनाटकस्य॥

॥ पञ्चमोऽङ्कः॥

अतः परमुन्मत्तदशाननो भविष्यति।

प्रविश्य मायामयः परिक्रम्य च साक्षेपम्। हंहो निसर्गनिरर्गलचरितैकनिबन्धन विधे इदमुपालभ्यसे कः पुनः प्रकारस्तव यद्रत्नाकरेऽपि क्षारभावः सुधादीधितावपि लाञ्छनच्छाया पुलस्त्यापत्येऽपि मतिविपर्यासो यदादिष्टोऽस्मि राक्षसराजेन यदुत गच्छ त्वं रघुराजधानीमयोध्यां तत्र च चण्डीशकोदण्डनिर्दलनलब्धजानकीजनितगर्वगरिमा प्रथमदाशरथिर्वाच्यः।

मैथिली यदि धनुर्लहो भवे-
त्तद्गुणात् प्रथमतस्तदीशिनः।
राम विद्धि तव मोहमित्यमुं
विष्टपत्रयपतेर्ममास्तु सा॥ १॥

किञ्च रे राजन्यपोत न श्रवणगोचरं गता राक्षसराजप्रतिज्ञेयम्। कुर्वन्मौर्वीत्यादि पठति। भद्र मायामय स इत्यभिहितस्तामर्पयिष्यति सा तु तदर्पिता।

अस्मद्विक्रमचेष्टितानि निखिलत्रैलोक्यहेलाजय-
प्रह्वीभूतसुरासुराणि भवतो भूमेः सुता श्रृण्वती।
पत्यौ द्वेषकषायितेन मनसा स्निग्धा मयि स्थास्यति
स्त्रीणां प्रेम यदुत्तरोत्तरगुणग्रामस्पृहाचञ्चलम्॥ २॥

विचिन्त्य। तत्कथमसौ निसर्गनिशाचरशत्रुर्वसिष्ठविश्वामित्रसनाथ इत्थमभिधातव्यो भवति सोऽयं कालकूटकवलनयहस्तविदं यमदंष्ट्राङ्कुरशलाकाकर्षणं विभाव्य भवतु तदिदमसमञ्जसं चेष्टितं देवस्य नयज्ञानवते माल्यवते निवेदयामि स खल्वस्माकं मतिनौविप्लवे कर्णधारः। सपरिक्रममवलोक्य

---

* आगमाधिकारे।

† स्पष्टमागमाधिकारे।

कथमयममात्यो माल्यवान् किमपि चिन्तयन् लेखहस्त आस्ते। विभाव्य तन्महाराजरावणदुर्नीतिपरम्परायत्तचित्तेनानेन भवितव्यं न हि तदर्थक्रियाचणस्य यावदन्यो व्याधिरिन्दीवरवनस्य। सुखिनः परसौख्येन परदुःखेन दुःखिता जायन्ते कवयः काव्ये नयतन्त्रे च मन्त्रिणः।

ततः प्रविशति यथानिर्दिष्टो माल्यवान्।

माल्यवान्। मिथिलापुरीनिवासिना स्पशेन लेखः प्रहितस्तदमुं निरूपयामि। उन्मुच्य वाचयति। स्वस्ति लङ्कायां मतिमन्तं माल्यवन्तं विदेहनगरीतः कश्चित् सविनयमवबोधयति श्रेयोऽन्यत्।

सीतास्वयंवरविधौ धनुरीश्वरस्य
चक्रीकृतं भुजबलेन बभञ्ज रामः।
श्रुत्वा च तन्मुनिवृषा वृषकेतुशिष्यो
रोषाज्ज्वलन्निव पुरीं मिथिलामवाप ॥ ३ ॥

तदेतद्वो विदितमेव। इदमिदं निवेद्यते तत्र च शरनिकरवर्षणे क्षितितलनिघर्षणे सुभटचर्षणे कातरमनोधर्षणे परस्परप्रतिहतिमर्षणे कीलालपकर्षणे लोमहर्षणे च महारम्भे समरसंरम्भे।

शम्भोः शिष्यं कुशिकमुनितः प्राप्तविद्योपविद्यः
तुण्णक्षत्रं दशरथभुवामग्रणीः क्षत्रियाणाम्।
वृद्धं बालश्च्यवनकुलजं भास्वतो वंशजन्मा
रामं रामो व्यजयत गतिच्छेदिना सायकेन ॥ ४ ॥

विचिन्त्य। महती वार्ता। विभाव्य। तस्यापि कलत्रे राक्षसराजोऽनुरज्यत इति न सुखोदर्कं तर्कयामि।

मायामयः। विलोक्य कथमधीतलेखस्तद्यावदुपसर्पामि। परिक्रम्य कनिष्ठमातामह मायामयोऽभिवादयते।

माल्यवान्। अपि सुखं भद्रस्य महाराजरावणः किं कुरुते।

मायामयः। यदपङ्कजासनसंभवान्वयः कुरुते।

माल्यवान्। किमिव।

मायामयः। यदादिष्टोऽस्मीति पठति।

माल्यवान्। हसित्वा वृद्धबुद्धिर्हि प्रथमं पश्यति चरमं कार्यदुर्योगोऽवतरति यन्मया धूर्जटिधनुर्धिक्षेपणातः प्रभृति मतिचक्षुषा दृष्टमेव यदुत दशकन्धरोऽनुधास्यति सीताहरणम्।

मायामयः। ततस्ततः।

माल्यवान्। ततश्च मया मन्दोदरीपितुर्मायागुरोर्मयस्य प्रथमशिष्यो विशारदनामा यन्त्रकारः सबहुमानं नियुक्तः सीताप्रतिकृतिकरणाय विरचिता च सा तेन रावणोपच्छन्दनार्थमभिहितं च।

सूत्रधारचलद्वाग्गाचेयं यन्त्रजानकी।
चक्रस्यसारिकालापा लङ्केन्द्रं वञ्चयिष्यति ॥ ५ ॥

मायामयः। सकौतुकम्। दृष्टा मातामहेनासौ कीदृशी यन्त्रजानकी।

माल्यवान्। मायामय मया दृष्टा यादृशी सत्यजानकी तस्मात्रैव च सीताधात्रेयिकाऽपि कारिता सिन्दूरिका नाम। प्रतिशिरसि परामृश्य तद्रवस्य मिथिलागमनं वीतविघ्नोपशमनं तद्वचनादुचितं तदुपवर्णनं तेन च कृतकसंविधानेन निरन्तरप्रेमोपार्जनं च सत्यापयितुमिदानीं निशाचरपतिर्बोध्यः। देव परपरिणीताऽपि सा।

तव त्रिलोकीविजयैकजन्मभि-
र्गुणैरुदारैरनुरञ्जितापि सा।
अनभ्यनुज्ञाजनितं करग्रहं
निषेधते हन्त नतेन मौलिना ॥ ६ ॥

मायामयः। अप्येवं प्रतिपत्स्यते दशाननः।

माल्यवान्। प्रतिपत्स्यते वचसा न मनसा। उभौ हसतः।

माल्यवान्। तदितिर्प्रतिपद्यते दर्शनीया।

मायामयः। एवं कृते किं कृतं भवति।

माल्यवान्। शृणु यत्कृतं भवति सीताप्रतिकृतिदर्शनेन दशाननः प्रलोभितो भवति प्रलोभनेन च काललाभः काललाभो हि नयविदां प्रयोगयामं कन्दलयति प्रयोगपरतन्त्रा च कार्यसिद्धिः।

मायामयः। यथादिष्टमार्येण।

माल्यवान्। प्रयोगसमयश्च कालो विलम्बनीयः सत्यापनाय।

मायामयः। यदादिशत्यार्यः।

माल्यवान्। तद्गच्छ त्वं यथाभिमतसिद्धये। अहमपि मन्त्रिमण्डपिकामध्यासिष्य इति निष्क्रान्तौ। विष्कम्भकः।

ततः प्रविशति रावणः प्रहस्तश्चामरधारिणी च।

रावणः।

न प्रीते परमेश्वरेऽपि शिरसां छेदेन होमेन वा
व्यावल्लीनहनेन चामरपतौ द्वारार्गलासङ्गिनि।
संयत्यैलबिलात्तथा न च हृते विश्वातिथौ पुष्पके
द्रष्टव्या जनकात्मजेत्यथ यथा लङ्केश्वरो मोदते ॥ ७ ॥

विचिन्त्य हंहो हृदय न प्रस्मर्तव्यं यदावेदितमद्भुतमयाचरं मायामयेन यथा किल।

सौधादुद्विजते त्यजत्युपवनं द्वेष्टि प्रभामैन्दवीं
द्वाराचस्यति चित्रकेलिसदसो वेषं विषं मन्यते।
आस्ते केवलमब्जिनीकिसलयप्रस्तारशय्यातले
संकल्पोपनतत्वदाकृतिरसायत्तेन चित्तेन सा ॥ ८ ॥

Digitized by Google

तत्प्रहस्त शीघ्रं प्रवेशय जानकीं न कालहरणक्षमाः प्रियजनसमागममहोत्सवाः ।

प्रहस्तः । निष्क्रम्य सीतासिन्दूरिकामायामयैः सह प्रविष्टः ।

मायामयः । इयं सा ।

रावणः । इयं सा विभाव्य ।

चक्षुः स्मेरमवारिजं कुवलयं वक्त्रस्य मित्रं विधु-
र्भूलेखा स्मरतोरणं स्मितलवो लीलालतापल्लवः ।
उच्छिष्टं कलकण्ठवाक् च वचसां शङ्के तदेणीदृशः
सर्वाङ्गीणमहो विधेः परिणतं विज्ञानचित्रं चिरात् ॥९॥

सिन्दूरिका । देव दसाणण चावारोहणदिअहम्मि ईसि दिट्ठाइं जाणई तुज्झ वअणाइं कुणइ एह्निं दंसणपुणरुत्तएआइं * ।

रावणः । भद्रे जानासि मदनपराधीनं जनमवस्थापयितुम् ।

सिन्दूरिका । अण्णधा वा रक्खसचक्कवत्तिणो विण्णवीअदि † ।

रावणः । सोल्लासम् । तत्कथय येन युगपदनुभवामि विंशतिधा श्रोत्रामृतम् ।

सिन्दूरिका । इदं विण्णवीअदि ‡ । संस्कृतमाश्रित्य ।

यन्मुग्धामपि चन्द्रिकां गमयति प्रावृत्य चीनांशुकं
स्वस्मै कुप्यति पञ्चमं रचयते यत्कण्ठनालाय च ।
यच्चान्यत्परिहृत्य पत्मलदृशस्त्वत्संकथास्वादरो
लोकस्तत्र निरर्गलं प्रलपति त्वं ब्रूहि किं मन्यसे १० ॥

रावणः । सहर्षम् । ततस्ततः ।

सिन्दूरिका । भूयः संस्कृतमाश्रित्य ।

एतस्याः स्मरसंज्वरः करतलस्पर्शैः परीक्ष्यो न यः
स्निग्धेनाऽपि जनेन दाहभयतः प्रोषप्रदः पाथसाम् ।
निर्वीर्यीकृतचन्दनौषधिविधौ तस्मिंस्तडत्कारिणो
लाजस्फोटममी स्फुटन्ति मणयो विश्वेऽपि हारस्रजाम् ॥ ११ ॥

रावणः । अयि सीताधात्रेयिके तत्किमिति मैथिली मां प्रति साचीकृतवक्त्रमास्ते ।

धात्रेयी । णवाणुराओ एत्थ अवरज्झइ ण उण पिअसही जदो ।

---

* देव दशानन चापारोपणदिवसे ईषद्दृष्टानि जानकी तव वदनानि करोति इदानीं दर्शनपुनरुक्तयेयानि ।

† अन्यथा वा राक्षसचक्रवर्तिनो विज्ञाप्यते ।

‡ इदं विज्ञाप्यते ।

वक्कं च वत्तितंसं णिमेन्ति देहेण झत्ति वलिएण ।
पढमुवणअवल्लहसङ्कमेण णडिआओ मुद्धमहिलाओ* ॥१२॥

रावणः । किमुच्यते सीतायाः प्रियसखी खल्वसि केतकसम्पर्क्किसिचयमपि किमप्यामोदाय । सीतां प्रति अयि स्वागतं जनकराजजन्मनो जनस्य ।

सीता । सख्याः कर्णे एवमेवम् ।

सिन्दूरिका । लङ्केसर सहीसञ्चारिदक्खरा जाणई विण्णवेदि अज्ज साअदं मन्दोदरीदइददंसणेण † ।

रावणः । स्वगतम् । बाढं स्निह्यति मयि वैदेही ईर्ष्यायितं हि स्त्रीणां प्रकाशकं प्रेमभरस्य । विहस्य प्रकाशम् । ननु जानकीदयितदर्शनेनेति संप्रति वक्तव्यं भवति सहर्षम् । हंहो हृदय मनोरथानामुपरि वर्तसे यतः ।

प्रेमरम्यमुभयोः समं दिशोः
कामिनां यदिह चाषपिच्छवत् ।
एकतस्तु न चकास्ति साध्वपि
श्यामपृष्ठमिव बर्हिणश्छदम् ॥ १३ ॥

सीता । सख्याः कर्णे एवमेवं भण ।

सिन्दूरिका । विसज्जिअलज्जाकण्ठबन्धं अप्पणा भण जदो सअं दूदी दूदीणं वरिट्ठा ‡ ।

सीता । सवाक्स्तंभम् । जधा समत्थिदं लङ्केसरेण ता एत्थ वत्थुणि मए विरइदाइं कदिवि वअणाणि सुणीअदु ।

एक्कदिसारम्मेणवि अलं सिणेहेण सिहिदलच्छविणा ।
As to the sign which would be the most convenient, the circumflex accent recommended by Professor Wilson and accepted by Bábu Śivaprasád is now extensively used in Europe for the Sanskrit (आ,) and cannot be made to do duty for (ع) without causing confusion. The grave and the acute accents are equally objectionable, as they have their own special uses, and the only sign ready at hand and available in every printing office, is the apostrophe which has, besides, the special recommendation of being a fit symbol for (ع) when it loses its individuality by association with the vowels e, i o, &c., to which it imparts its guttural character. But whether we adopt the apostrophe or the circumflex accent, certain it is that the use of the two together on one letter for the indication of a single peculiarity would, to ordinary common sense, appear preposterous; but Bábu Śivaprasád says that (ع) "would be correctly written" (with both the marks thus) "'â." This opinion appears to me to be th-

more inconsistent as I find that he himself says with reference to (غ) that "when one letter can sufficiently answer our purpose what's the use of writing two?"

For (غ) Bábu Śivaprasád would have a dotted g. Professor Max Müller recommends an h with two apostrophes before it, thus" h. But Sir William Jones, Professor Wilson, Sir Charles Trevelyan, Mr. Shakespear, Dr. Forbes, Dr. Ewald, Dr. Eli Smith and a host of other oriental scholars prefer gh, and, with every deference to the opinion of Bábu Śivaprasád, I feel disposed to side with them. G alone, whether dotted or not, cannot convey to ordinary Englishmen the true idea of the sound of (غ) whereas gh does, and I cannot but take that as a conclusive argument in the case.

"For (ه) and (ह)" says Bábu Śivaprasád, "they have given (Ḥ H h ḥ) and for (ح) H. Ḥ h ḥ. This I cannot understand. It was simple enough to have given (H h) for (ه) and (Ḥ ḥ) for (ح), but they have left no distinction, and thus made the dot superfluous." The difficulty of understanding in this case is due to the Bábu's want of care in reading the tables on which he undertook to comment, for had he not been wanting in that respect he would have seen that there was a note attached to the first Table which says, "the alternative forms are not Wilson's. They are recommended as the diacritical marks attached to them can be produced with greater ease and saving of time; or are more convenient than those proposed by him:" and reading with the light of that note, he would have found that the compiler of the tables recommended a dotted ḥ for (ح) for which Wilson has an undotted h, and an undotted one for (ه) which Wilson represents by a dotted letter. The object was to economize the use of dots. (ح) occurs but rarely, whereas (ه) is an element in at least 25 per cent. of Urdu words, and the change suggested therefore is, in my humble opinion, a most desirable one. At any rate Bábu Śivaprasád is mistaken in supposing as shewn above, that the compiler of the tables had "left no distinction between (ح) and (ه) and given a dot superfluous."

Having all along cherished a high respect for Bábu Śivaprasád's knowledge of the Hindui language, it was not with ordinary surprise that I read the passage in his paper which says that "in Hindi when (H) (ह) is not followed by any vowel it is written (:)." Such a remark from such an author I was not at all prepared to meet. The merest tyro in Hindui can prove that it is utterly incorrect, and that by innumerable quotations even from the published writings of the Bábu himself. In a paper of questions on the subject of going to England lately published by him, and a copy of which he has kindly sent to me, I find such words as निगाह (nigáh) वह (vah) यह (yah) उहदा (uhdá) मुहताज (muhtáj) महसूल (mahsúl) पहचान (pahchán) &c., in all which h (ह) occurs without a following vowel, but no where has it been converted into a *visarga*. In the Bábu's *Bhúgol Hastámalak* there are many more instances of the same kind, but none in which that letter has been converted into a *visarga*. Indeed in the course of my reading of Hindui (which I must admit is limited) I doubt if I have ever met with a single instance of an h final having been so converted. In Sanskrit there is a rule which requires that s and r final should change into *visarga*, and it obtains also to a great extent in Hindui and Bengali; and in Urdu and English the *visarga* is changed into an h; but there is no rule that I am aware of in the Sanskrit or the Hindui grammar which enjoins the conversion of an H into a *visarga*.

I think the Bábu is also wrong in supposing that the *visarga* and the *repha* "do not require different letters in the Roman Alphabet." The latter is a lingual semi-vowel, and is identical with the English r in "ornament" or "permanent," and the former, a sharp flatus (spiritus asper) equal to h, and it would be as reasonable to represent the two by the same symbol, as to represent B. and D. with the same letter. As to the difficulty about "h with two dots and h with no dot" which seems to trouble the Bábu much, the remedy lies in the foot-note which says "the alternative forms are not Wilson's," but which he has so sadly overlooked.

Professor Wilson uses a dotted ṛ for both (ऋ) and (ड़): for the sake of distinction, I recommended a dotted ṛ for the first letter, and an ṛ with a line under it for the second. Bábu Śivaprasád would reverse the order, and have a dotted ṛ for (ड़) and lined one for ऋ.) I fail to see the superior advantages of this arrangement for I can reckon them only at six on the one side and half a dozen on the other, but if it will please the learned Bábu I shall gladly accept the proposed alteration.

"The most urgent change," says Bábu Śivaprasád, "for "which I press is to have the same representative for (श) "and (ش) which have exactly a similar pronunciation. "It won't do to give for (ش) the same letter which re-"presents (ष) as they have done in the Gazette; (ष) has "a peculiar pronunciation. It is a cerebral." This short sentence involves three assumptions every one of which is wrong. The first is that (श) and (ش) have exactly similar pronunciation; this is not true. The Sanskrit (श) is a flatus that comes from the throat, and has a sharp hissing sound quite different from that of the Persian (ش) according to Professor Wilson, "the palatal S of the Nágari alphabet has no exact equivalent in English." The second assumption is that the Sanskrit (ष) "has a peculiar pronunciation" very different from that of the Persian (ش.) I shall not deny that (ष) has a peculiar sound, for every letter has its own characteristic peculiarity and ष cannot be without it;

Digitized by Google

but I cannot admit that peculiarity to be the way in which the letter is pronounced by some of my friends at Benares who take it for kh. "The sh of the Nagari alphabet," says Professor Wilson, "finds its exact representation in the English sh;" and "the main objection to the representation" of the (ष) by sh, he adds, "is its being confounded with the more genuine representation of sh in the Sanskrit cerebral, and in our "shore" "shun." The third assumption is that the Persian (ش) is not a cerebral, and therefore cannot be represented by the same symbol which stands for a Sanskrit cerebral. The fact, however, is that the Sanskrit (ष,) the Persian (ش,) and the English sh are all cerebrals, and exactly alike in sound, and therefore they are the best representatives of each other. Nor is this opinion peculiar to myself. If Bábu Śivaprasád will refer to European orientalists he will find that Wilkins, Jones, Wilson, Schlegel, Humboldt, Burnouf, Lassen, Pott, Brockhaus, Weber, Roth, Böhtlingk, Rawlinson, Trevelyan, Shakespear, Forbes, Max Müller, Ewald, Eli Smith, and a host of others use the sh for both (ष) and (ش). Halhed and Gilchrist are the only two men who have used sh for (श,) but they have used the same letters for (ष,) and therefore their opinion, not of much value at any time, can be of little avail in this instance. Bábu Śivaprasád may feel the change proposed by him "urgently" wanted, but in demanding it he has placed himself in opposition to the scholars named above, who think it neither proper nor expedient.

Bábu Śivaprasád accounts for the use of w for (و) by Bengali inability to pronounce the letter (व) (v). He says "as the Bengalies cannot pronounce (अ) (a) they cannot pronounce (व) and (و) *** and the English finding the Bengali pronunciation of (व) and (و) so closely coming up to their (w) at once began to use (w) promiscuously with (v) for (व) and (و)." This as a theory is ingenious enough, but it has, I am sorry to say, no substratum of truth to support it. The Sanskrit (व) (v) began, on the one hand, to harden into (ब) (B) and, on the other, to soften into u and o, and sometimes melted away altogether, leaving occasionally only a trace on its nearest neighbour, at a very early period in Indian history, and in places far away from Bengal. Nineteen hundred years ago a grammarian laid down a rule that in the vernacular of Benares, Magadha &c. the letter V optionally changed to B (बो वा), and at his time, we find the Sanskrit words *dvara* (द्वार) changed to *duára* दुआर) *dvitíya* (द्वितीय) to *duia* (दुइअ) *dvidhákrita* (द्विधाकृत) to *doháia* (दोहाइअ) *Íśvara* (ईश्वर to Issara (इस्सर) and dhvaja (ध्वज) to dhao (धओ) in the same vernacular. These shew most clearly that the mutability of the letter V is due to some inherent peculiarity of its own, and not to any awkwardness of Bengali pronunciation. As a matter of fact, the Bengali organs of speech are more delicately formed, and are capable of producing a greater variety of nice shades of sounds, than any other in India, and, though as a Kanaujite by descent, I am sorry to admit it, it cannot be denied that the Hindus of Benares, Oudh, Agra and Delhi, have much more extensively corrupted the Sanskrit elements of the Indian vernaculars than the Bengalies. Least of all are they chargeable with the corruption of v or (و) into w.

Even in Sanskrit v when following a consonant has a very soft sound, considerably nearer that of w than of v, and in Hindui under the same circumstance it is sounded exactly like that letter. I am willing to submit to the dictum of Bábu Śivaprasád that (व) and (و) "have nothing to do with" w, but I cannot divest myself of the idea that were he to pronounce Íśvar or Dvárká with the full sound of v he would not be intelligible even to his own left rib. In the same way were he to pronounce the (نوروزه) of Akbar as if written *navrozah* few Muhammadans would understand what he meant. The tendency of the Muhammadans throughout India is to soften their (و) into w, and not to harden it into a perfect v (و) and hence it is that Captain Holroyd at Lahore has adopted w for (و) in his scheme of romanizing. It is remarkable, however, that in the Tables published in the North West *Gazette* the v alone occurs for (و) and not w, and Bábu Śivaprasád has therefore created his giant to destroy it.

As regards the inability of the Bengalies to pronounce the letter (अ) I can only say that Bábu Śivaprasád is labouring under a huge mistake. No nation in India pronounce that letter more correctly than they do.

I have myself no objection to the use, suggested by Bábu Śivaprasád, of q instead of k for (ق,) as it obviates the necessity of using a diacritical mark, which I dislike ; but I cannot help reminding him that since he accepts k to be the symbol of (क,) and does not deny (ق) to be only a guttural form of that letter, analogy would suggest that a modified k would be the most appropriate symbol for it.

In his concluding paragraph Bábu Śivaprasád comments on certain misprints in the Tables published in the *Gazette*, with which I have nothing to do, but I am surprised to find him say that "in the third list (Persian alphabet,) no dot or any diacritical mark has been used throughout except for (آ) and (ص)." In the copy of the *Gazette* now before me there are thirteen letters with diacritical marks.

I remain Sir

Yours faithfully

MANIKTOLLAH,
Calcutta 20*th Sept.* 1868.

RAJENDRALALA MITRA.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 30. Benares November 2nd, 1868. Vol. III.

॥ ईश्वरप्रत्यभिज्ञासूत्रविमर्शिन्याः ॥

क्रियाधिकारे तृतीयाह्निकस्य पूर्वाङ्कप्रक्रान्तस्य शेषांशो
ऽवशिष्टान्तिमांशं चतुर्थमाह्निकं च ।

नन्वेवंभूतो यद्ययं प्रमाता तत्रैव तर्हि प्रमाणोपन्यासे प्रयतनीयं, न प्रमेये, यदाह "प्रधाने हि यत्नः फलवानिति" तदेतदाशङ्क्य प्रथमोपक्षिप्तमेव प्रमेयं स्मारयत्याचार्यः । तथाहि ।

"अजडात्मा निषेधं वा सिद्धिं वा विदधीत कः"

इति । यद् वस्तु, तदेवेदानीं ज्ञाते प्रमाणस्वरूपे परमेश्वरस्वरूपे च निर्वाहयाहं,मेवंभूतं हि प्रमाणं, तदेवंभूते हि भगवति कथं क्रमतामिति, तदेतत् स्फुटयितुमाह ।

(१३) विश्ववैचित्र्यचित्रस्य समभित्तितलोपमे ।
विरुद्धाभावसंस्पर्शे परमार्थसतीश्वरे ॥
प्रमातरि पुराणे तु सर्वदा भातविग्रहे ।
किं प्रमाणं नवाभासः सर्वप्रमितिभागिनि ॥

परिमितप्रमातृलग्नो नवनव आभासः प्रमेयोन्मुखः प्रमाणमित्युक्तं, तच्च प्रकाशवपुषि† प्रकाशमात्रस्वभावे पूर्वसिद्धे ऽः प्रमाणस्योपयोगः सम्भावना वा,तथा च पूर्वसिद्धे प्रमातरि सति तल्लग्नप्रकाशान्तर्भूतविमर्शमयीमभूतपूर्वां‡ प्रमेयस्य सिद्धिं वितरति प्रमाणं, प्रमातुश्चादिसिद्धस्य किं लग्ना सिद्धिरस्तु, विश्ववैचित्र्यं हि तत्र परमेश्वरे प्रकाशैकात्मनि सति भाति, यथा चित्रं भित्तौ, यदि हि नीलपीतादिकं पृथगेव परामृश्यते, तदा स्वात्मविश्रान्तेषु तेषु तथैवान्योन्यविषये जडान्धबधिरकल्पानि ज्ञानानि स्वविषयमात्रनिष्ठितानि विकल्पाश्च तदनुसारेण भवन्तस्तथैवेति चित्रमिदमिति कथंकारं प्रतिपत्तिः । एकत्र तु निम्नोन्नतादिरहिते भित्तितले रेखाविभक्तनिम्नोन्नतादिविभागजुषि गम्भीरनाभिरुन्नतस्तनीयमिति चित्रावभासो युक्त,स्तद्वदेकप्रकाशभित्तिलग्नत्वेन वैचित्र्यात्मकभेदोपपत्तिरिति भावभेदग्रहणप्रकाशभित्तेरनपायिनीं स्वप्रकाशतामाह । तत्र स्वप्रकाशे किं प्रमाणेन, "अथोच्यते । पूर्वमस्य प्रकाशो न भवति," तर्हि स एव नास्तीति स्या,त्प्रकाशमात्ररूपत्वात्तस्य, न चास्य नास्तीत्यभावेन स्पर्श उपपन्नो, यतो ह्यसावेव परमार्थतः सन्, प्रकाशस्यैव सत्त्वात्, सतश्चासद्रूपत्वायोगात्, "अथोच्यते ईश्वरता तस्य अप्रमिता प्रमास्यते" तदपि न, यतो ह्यसौ प्रमातृत्वेन चेन्न चकास्यात्कस्यायमुद्यमः, चकास्ति चे,त्तर्हि प्रमातृतैवेश्वरता, तदाह"श्वरे प्रमातरि सर्वदा भातविग्रह इति" विशेषेण गृह्यत इति विग्रहो ऽसाधारणं स्वरूप,मत एव स्वतन्त्रप्रकाशरूपत्वाद-

* परिच्छिन्नेत्यर्थः ।

† प्रकाशवपुषीत्यस्यैव विवृतिः प्रकाशमात्रस्वभाव इति ।

‡ अत एवानधिगताबाधितार्थविषयकं ज्ञानं प्रमा, तज्जनकं प्रमाणम्. इत्युदयनाचार्याः । यत्र ज्ञाने सजातीयज्ञानोत्तरत्वनियमस्तद्भिन्नत्वमनधिगतार्थविषयकत्वम् । नेतदीश्वरज्ञाने संभवति ।

* ननु यथा भगवतः पूर्वसिद्धत्वात् प्रमाणं न क्रमतेत्युच्यते, एवं विश्वस्मिन्नपि तत् कथं क्रमताम्, सर्वोऽपि भावराशिः प्रकाशान्तर्निमग्न इति पूर्वप्रदर्शितदिशा भगवत इव विश्वस्यापि पूर्वसिद्धत्वात् । मैवम् । यतः प्रकाशान्तर्निमग्नत्वे ऽपि विश्वजातस्य वह्नेर्विस्फुलिङ्ग इव ततो महाप्रकाशादहंविमर्शाख्यात् पृथक् कृतो नीलसुखादिः प्रकाशो वस्तुतस्तस्मादभिन्नोऽपि प्रमाणव्यापारेण मायामयेन विषयविषयिभावेन भेदसंबन्धेन यत् संबन्धी क्रियते, एषैव प्रमा नाम । तदेतद् भगवति न संभवितुमर्हतीति ।

Digitized by Google

भावस्पर्शायोग्ये अभावानुप्रवेशेन यः कालव्यवहारः सोऽत्र नास्तीति पुराणे इत्युक्तं, तत्र किं प्रमाणं, कुतः प्रयोजनात्प्रमाणं, कस्तत्र प्रमाणस्योपयोग इति, तत्र च किं प्रमाणं न किं चिदुपपत्त्या घटत इत्यर्थः । यतः प्रमाणं नामाभिनवाभासरूपं प्रमातरि प्रमितिलक्षणां विश्रान्तिं विदधत्प्रमाणं भवति, प्रमाता चाविच्छिन्नाभासः, सर्वाश्च प्रमितीः स्वात्मन्यन्तर्मुखरूपे भजते, तत्तस्मिन्कथमभिनव आभास,स्तत्प्रमितिश्च कुत्र विश्राम्यतु । तस्माद्देहप्राणपुर्यष्टकशून्यप्राय एव प्रमातरि प्रमाणमुच्यताम्, तत्रापि च वेद्यांशे यदि नाम, न तु कथं चित्संविदंशे, तत्रापि विषयोन्मुखे, तत एव संकुचितत्वादभिनवाभासे संकोचविहीनसत्यप्रमातृलग्नतापेक्षया कथ्यतां, स्वसंवेदनं प्रमाणम् । सौगतेनापि ममेदं ज्ञानमिति कल्पितप्रमातृलग्नमेव तदुपेत्यम्, न तु परमार्थप्रमातरि प्रमाणेन किं चित् । उक्तं च मयैव ।

यत्प्रमेयीकृतोस्मीति सर्वोप्यात्मनि लज्जते ।
कथं प्रमेयीकरणं सहतां तन्महेश्वरः ॥

"नन्वेवं यदि भगवति प्रमाणमनुपयोग्यनुपपत्ति च किमर्थं तद्विषयं शास्त्रं, तद्धि प्रमाणमेव, परार्थानुमानात्मकं हि शास्त्रम् । तत्र च प्रमाणादिषोडशपदार्थतत्त्वमयत्वमेव परमार्थः । "यत्तु सौगतैः पञ्चावयवत्वादि दूष्यते" तदाग्रहमात्रं, षोडशसु हि पदार्थेषु निरूप्यमाणेषु सम्यक्प्रतिपाद्यं परः प्रतिपद्यते, हिताहितप्राप्तिपरिहारयोरित्यादिना च ग्रन्थेन परस्य किं प्रयोजनं तद्धि परस्य प्रतिपत्त्यै, सा च परार्थानुमाना,त्तत्र च प्रतिज्ञादेरुपयोग इति तत्परिपूर्णपरप्रतिपत्तिकारि परमार्थतः सकलमेव शास्त्रं परार्थानुमानमागमव्यतिरिक्तं न्यायनिर्माणवेधसा ऽक्षपादेन * निरूपितमिति" । अत्रापि पूर्वोक्तमेव † "किं तु मोहवशा"दिति स्मारयितुमाह ।

(१४) अप्रवर्त्तितपूर्वो ऽत्र केवलं मूढतावशात् ।
शक्तिप्रकाशेनेशादिव्यवहारः प्रवर्त्त्यते ॥

इह परमेश्वरस्येदमेव परं स्वातन्त्र्यं यदस्मादृशप्रख्यपशुदशाविशेषासम्भाव्यमानातिदुष्करवस्तुसंपादनं नाम, इतश्च किमतिदुष्करं भविष्यति, यत्प्रकाशात्मन्यखण्डितताद्रूप्ये एव प्रकाशमाने प्रकाशननिषेधावभासः प्रकाशमानः । तस्मात्परमेश्वरस्येदं तत्परं स्वातन्त्र्यं यत्तथावभासनं पशुरूपतावभासनं नाम ग्राहकांशसमुत्थानं तद्द्वारेण च ग्राह्योल्लासनमपि । सैषा भगवतो मायाशक्तिरुच्यते । यथोक्तं "मायाविमोहिनीनामेति" । तदेवंभूतान्मायाशक्तिरूपात्स्वातन्त्र्याद्या मूढता विनष्टपूर्णचेतनता स्वात्मवर्त्तिन इच्छास्पन्दोदयस्फुटस्फुरितविश्वभावनिर्भरतात्मनः पूर्णत्वस्य स्मृत्यादिशक्त्यात्मनः स्वातन्त्र्यस्य देशकालसंकोचवैकल्यादयत्नसिद्धवैभवनित्यताधर्मस्य च प्रकाशमानस्यापि यदप्रकाशमानतया ऽभिमननं तस्या वशात्सामर्थ्यात् । पूर्वं यो न प्रवर्तितः समनन्तरश्लोकद्वयोक्तस्वरूपे प्रमातरि भगवति ईश्वरत्वादिना उक्तेनैव पूर्णत्वादिना व्यवहारो यः खल्वहमिति भाति स पूर्णः विभुः स्वतन्त्रो नित्य इत्येवमादिरूपः तं प्रवर्तयन्तु व्यवहारं लोका इत्येतेन शक्तीनामिच्छाज्ञानक्रियाणां प्रकाशकेन प्रत्यभिज्ञारूपेण व्यवहारसाधनपरार्थानुमानात्मना शास्त्रेण तं व्यवहारं प्रवर्त्तयतां तत्समर्थाचरणं क्रियते । प्रवर्त्स्यते इति द्वौ णिचौ, केवलमिति, न तु किं चिदपूर्वं क्रियते, नापि तत्त्वतो ऽप्रकाशमानं प्रकाश्यते, प्रकाशमान एव यत्र प्रकाशत इत्यभिमननं तदपसार्यते, * तदपसरणमेव हि परमेश्वरतालाभो मुक्ति,स्तदनपसरणमेव संसारः, अभिमननमात्रसारं ह्येतद् द्वयम्, † उभयमपि चेदं भगवद्विजृम्भितमेव । एतदुक्तं भवति । यथा ‡ भीतस्य भासमाने एवात्मन्यपहारितोहमिति मोहान्मन्यमानस्य मोहोपसार्यते, कः खलु त्वं यस्येदृशं हस्तं मुखमादृशमिति चेत्यस्य तदस्ति भवत इति पुनःपुनरभिदधता न चास्यापूर्वं किं चन रचितं, तथा पशुलोकस्य भासमान एवात्मनि नाहमीश्वर इत्यादिमोहादभिमन्वतो मोहो ऽपोह्यते, यो हि ज्ञानक्रियास्वातन्त्र्ययुक्तः स ईश्वरो, यथा सिद्धान्तपुराणादिषु प्रसिद्धः, तथा च त्वमिति, यदि वा यस्मिन्यदायत्तं स तत्रेश्वरो, राजेव स्वमण्डले, तथा च त्वयि विश्वमितीश्वरताव्यवहारो नान्यनिमित्तक इति व्याप्तिः, यत्खलु यल्लग्नं भाति तत्तेन पूर्णं, निधानमिव मणिभिः, त्वल्लग्नं च विश्वमिति, यस्य यदन्तर्वर्ति भाति स तावति व्यापकः, समुद्र इव मणिषु, त्वयि च संविद्रूपे धरादिसदाशिवान्तं शास्त्रप्रक्रियोक्तं विश्वमिति, यस्मिन्स्थिते यदुदेति लीयते च तत्पूर्वापरभागव्यापि, यथा भूमावङ्कुरः, तथा च त्वयि प्रकाशे विश्वमिति । एवमन्येपि धर्माः सहस्रशोप्यागमादिसिद्धा योज्याः । तदेवं व्यपोहिते व्यामोहे स्थितेपि तत्संस्कारमात्रविधृते § शरीरादावनात्म-

* गौतमेन

† किं तु मोहवशादस्मिन् दृष्टे ऽप्यनुपलक्षिते ।
शक्त्याविष्करणेनेयं प्रत्यभिज्ञोपदर्श्यते ॥

* निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवदिति पातञ्जलसूत्रेण तद्भाष्यवार्त्तिकाभ्यां च स्फुटमेतदेव प्रतिपाद्यते । ज्ञानप्रक्रियावैलक्षण्यादृते न ततो ऽत्र किमपि वैलक्षण्यं लक्ष्यताम् ।

† मुक्तिसंसाररूपम् ।

‡ भूतग्रस्तस्य ।

§ आह चेश्वरकृष्णः ।
सम्यग् ज्ञानाधिगमाद् धर्मादीनामकारणप्राप्तौ ।
तिष्ठति संस्कारवशाच्चक्रभ्रमिवद्धृतशरीरः ॥
इति ।

ताभिमानपुरःसरे एवात्मताभिमाने घटादौ च प्रकाशमान एवानात्मताभिमाने ज्ञातेन्द्रजालतत्त्वस्य पश्यतोपीन्द्रजालं यथा न तत्त्वतो व्यामोहः, तथा प्रत्यभिज्ञातात्मस्वरूपस्य ततो निवृत्ते प्रयाणप्रापितपर्यन्ते देहे परमेश्वरतैव, अभ्यासभावनाबलेन तु शिवशासनोपदिष्टेन देहघटादावेव परमेश्वरतासमावेशमभिनिविश्य पश्यत इहैव शरीरे पारमेश्वर्यांशधर्मोद्गमः, न तु वस्तुतः पूर्णता, देहत्वस्यैव संकोचप्राणस्य गलने यथास्थितविश्वात्मकता * पत्तेः। यस्य तु व्यवहारसाधने हेतुकलापेप्यसिद्धताभिमानस्तस्य तत्रापि व्यवहारसाधनैरेव व्यामोहोपसार्यः†। यस्य तु सर्वथा नापसरति तत्रेश्वरशक्तिबलान्मूढतैव। तस्यापि कर्णपथगमनात्संस्कारपाकेनावश्यं कदाचिद्भविष्यत्येव लाभः‡। तदेवं कर्तरीत्यादिश्लोकद्वयेन यदुक्तं तदेव विश्ववैचित्र्येत्यादिश्लोकत्रयेणोपस्कृत्य पुनर्निरूपितम्। एवंभूतं तावत्प्रमाणं तदेवंभूते भगवति कथमुपपद्यतां, ततश्च युक्तमुक्तं शास्त्रादाविति भङ्ग्यन्तरेणेदानीं तदेव निर्वाहितमिति शिवम् ॥ १७ ॥

॥ आदितः सूत्रश्लोकाः १२० व्याख्याताः ॥

इति श्रीमदाचार्याभिनवगुप्तविरचितायामीश्वरप्रत्यभिज्ञासूत्रविमर्शिन्यां क्रियाधिकारे मानतत्फलमेयनिरूपणं तृतीयमान्हिकम् ॥ ३ ॥

॥ इत्येकादशमाह्निकम् ॥

॥ श्रीः ॥

भावानाभासयन्कर्ता निर्मले स्वात्मदर्पणे ।
कार्यकारणभावं च यश्चित्रं तं स्तुमः शिवम् ॥

क्रियाशक्तिस्फारप्रायसंबन्धाभिधानप्रसङ्गाज्ज्ञाप्यज्ञापकभावस्य तत्त्वं प्रसाध्य कार्यकारणभावस्य तत्त्वं प्रसाधयितुं श्लोकैकविंशत्या ऽऽन्हिकान्तरमारभ्यते। "एष चे"त्यादि "एवमिच्छैव हेतुता कर्तृता क्रिये"त्यन्तं, तत्र श्लोकेन स्वमते कर्तृकर्मभाव एव कार्यकारणभाव इत्युपक्षिप्यते, ततः श्लोकत्रयेण जडस्य कारणत्वं पराक्रियते, ततः श्लोकषट्केन चेतनस्यैव कर्तृतारूपा कारणता प्रसाध्यते, ततः प्रसङ्गादनुमाने नियतिशक्तिरवश्योपजीव्येति श्लोकत्रयेणोच्यते, सौगतोक्तकार्यकारणभावपरमार्थो ऽप्यस्मत्पक्षमेवावलम्बते नोचेच्च किं चि-

* प्राप्तेः

† भवति चागमः।

निष्कम्प आत्मसंवित्तौ जीवन्मुक्तो ऽभिधीयते ।
तत्त्वे विकल्पमानस्तु पिण्डपाताच्छिवं व्रजेत् ॥

इति।

‡ स्वरूपस्य।

दिति त्रिभिः श्लोकैः, सांख्योपदर्शितो ऽपि कार्यकारणभावो नोपपद्यते यद्यस्मदुक्तं चेतनस्य कर्तृत्वं नाङ्गीक्रियत इति त्रिभिः, चेतनस्याप्यनीश्वरतायां नैतद्घटत इति द्वाभ्यामिति संक्षेपार्थः।

ग्रन्थार्थस्तु व्याख्यायते ॥

एवं क्रियाशक्तिमुखेन प्रमात्रेकरूपतां भगवति व्यवहर्तव्यां प्रसाध्य कर्तृरूपतापि तत एवायत्नसिद्धेति दर्शयितुमाह।

(१) एष चानन्तशक्तित्वादेवमाभासयत्यमून् ।
भावानिच्छावशादेषा क्रिया निर्मातृता ऽस्य सा ॥

चोवधारणे, एष एव पुराणः प्रमाता ऽमून् भावानाभासितपूर्वान् आभासमानान् आभासयति अविच्छिन्नेन प्रबन्धेन कथमिच्छाया ईशितुरभिन्नाया अविकल्परूपाया अक्रमाया वशेन सामर्थ्येन, कुत्रास्य ते भावाः स्थिता, आह, अनन्तशक्तित्वादिति, विश्वे हि भावास्तस्यैव शक्तिरूपेण स्वरूपात्मत्वेन स्थिता इत्युक्तं "स्वामिनश्चात्मसंस्थस्ये"त्यत्र। यदेतदाभासनं या ऽसाविच्छा सा क्रिया ऽस्य भगवतो निर्मातृत्वम् ॥

ननु बीजादङ्कुर उद्भवन्दृश्यते, न चात्र कश्चिच्चेतनो ऽनुप्रविशन्दृष्टस्तत्कथमेतदुक्तमित्याशङ्क्याह।

(२) जडस्य तु न सा शक्तिस्सत्ता यदसतस्सतः ।
कर्तृकर्मत्वतत्त्वेव कार्यकारणता ततः ॥

जडस्य बीजस्यैवंभूतं सामर्थ्यं नास्ति, यदसद्रूपं सद्रूपं वा ऽङ्कुरं परिदृश्यमानसत्तावन्तं करोति। बीजादङ्कुरो जायत इति नाङ्कुरस्य महिमा, असत्वात्, अङ्कुरो जायत इति च महिमा कथं बीजस्य, ततो ऽङ्कुरादन्यत्वात्, यत एवं तस्मात्कार्यं क्रियाशक्त्या ऽवभास्यमानं कर्मैवेति * कृत्येनैवाविष्कृतम्। कार्यते ऽनेन कर्त्ता तत्समर्थाचरणेनेति कारणमपि कर्तरि चेतने विश्राम्यति। असतः सत इत्यसद्रूपस्य सत इत्यर्थः। वार्थो वात्र गर्भीकृतः, असतो ऽङ्कुरस्य सतो वा बीजस्येति, अङ्कुरस्य सतो ऽसतो वेत्येवं वा ॥

---

* कृत्यप्रत्ययेन ण्यता।

"नन्वेतच्चेतने ऽपि तुल्यम्, तथाहि, यदि सन्नेवाङ्कुरस्तर्हि कृतं चेतनेन, अथासंस्तर्हि जायत इत्येवं महिमा तस्यासत्त्वादेव न संभवितुमर्हति, चेतनस्येति चेत्, तस्यापि बीजवदङ्कुरादन्यत्वादेव नेति चेत्" न, सकलविश्वस्य चेतनान्तर्भुडितत्वनिरूपणेन दत्तोत्तरत्वात्। तथा च सूत्राणि।

चिदात्मैव हि देवो ऽन्तः स्थितमिच्छावशाद् बहिः ।
योगीव निरुपादानमर्थजातं प्रकाशयेत् ॥

इत्यादीनि।

Digitized by Google

* ननु जडस्य कथमेषा शक्तिर्न भवतीत्याह ।

(३) यदसत्तदसद्युक्ता नासतः सत्स्वरूपता ।
सतो ऽपि न पुनः सत्ता लाभेनार्थः ।

सद्वा कार्यमसद्वा सम्भाव्यते उभयात्मकमनुभयात्मकमनिर्वाच्यमिति तु स्ववाचैव विरुध्यते, तत्किमनेन, यद्यसन् घटस्तर्हि तस्यासद्रूपतैव परमार्थ इति कथं स्वरूपविरुद्धं सत्त्वमभ्युपगच्छेत्, नहि पादपतनशतैरपि नीलमात्मनि पीतिमानं मृष्यते, अथ सन्नेव घटस्तर्हि किमन्यदुपपाद्यते दण्डचक्रसूत्रात्, अभिव्यक्तिविषयत्वस्फुटत्वादयो ऽपि सदसद्रूपतया चिन्त्याः † ॥

नन्वेवं तूष्णीमास्यतां नैतदपि युक्तमित्याह ।

(४) अथ चोच्यते ॥
कार्यकारणतालोके ‡

तदवश्यसमर्थ्या ऽयमर्थ इति यावत् ॥

ततश्चेत्थमुपपद्यत इति दर्शयति ।

(५) सान्तर्विपरिवर्तिनः ।
उभयेन्द्रियवेद्यत्वं तस्य कस्यापि शक्तितः ॥

कुम्भकारहृदये ऽन्तर्मनोगोचरत्वात्पूर्वमपि स्वसंविदैकात्म्यतया विचित्रत्वेन विश्वस्य भेदाभेदात्मना परिवर्तमानस्य स्पन्दनेन स्फुरतो यदन्तःकरणबहिष्करणद्वयवेद्यत्वमाभास्यते एषैव सा कार्यकारणता, उभयग्रहणमुपलक्षणम् । यस्य यावति पूर्णार्थक्रियासमाप्तिरिति यावत् । सुखादीनामन्तःकरणैकवेद्यतापादानमेव निर्माणम् । न च कुम्भकारे प्राणपुर्यष्टकबुद्धिशून्यदेहप्राये तदेतत्स्थितं, तस्यापि जडत्वात् । ततः संविदेव विश्वमात्मनि भासयति, शक्तिवैचित्र्यात्, तस्य कस्यापीति पूर्वमुक्तस्याचिन्त्यापर्यनुयोज्यमहिम्न इत्यर्थः । न च वाच्यमुभयेन्द्रियवेद्यत्वमपि सदसद्वेति, यतो ऽयमत्र परमार्थः, यथा दर्पणान्तः कुम्भकारनिर्वर्त्यमानघटादिप्रतिबिम्बे दर्पणस्यैव तथावभासनमहिमा, तथा स्वप्नदर्शने संविदस्तथापि तन्महिम्नैव एतेनेदं बहिः स्फुटरूपं क्रियत इत्यभिमान उल्लसति' एवं संविन्महिम्ना कुम्भकृति दण्डचक्रादौ घटे ऽवस्थिते तन्महिम्नैवाभिमानो जायते, यथा मयेदं कृतमनेनेदं कृतं मम हृदये स्फुरितमस्य हृदये स्फुरितमिति । तत्र जडस्य मृदादेर्दूरापेतो ऽभिमान इति संवित्स्वभावे कर्तृत्वं व्यवस्थाप्यते । "ननु भावरूपमेवेत्थं भास्यतां किं द्वयेन्द्रियवेद्यत्वेन" उक्तमत्र स्फुटमर्थक्रियाक्षमं रूपमनेनोक्तमिति को विरोधः ॥

अनेन च विचारेण प्रकृतमपि क्रियास्वरूपं सिद्धं भवतीति दर्शयति ।

(६) एवमेका क्रिया सैषा सक्रमान्तर्बहिः स्थितिः ।
एकस्यैवोभयाकारसहिष्णोरुपपादिता ॥

सैषेति, यस्याः स्वरूपत आश्रयतश्च नोपपद्यत इत्युपालम्भः कृतः, सा उपपत्त्या स्थापिता । यतः संविद्रूपादान्तरात्प्रभृति इन्द्रियगोचरतया बहिष्पर्यन्ततया स्थितिराभासरूपा तत एव वेद्यात्मकक्रमालिङ्गनेन सक्रमता तावदुपपन्ना कर्तृकर्मैकाश्रयतादात्म्याच्चैका सचैक आश्रयः संविद्रूपत्वेन स्वच्छस्वस्वतन्त्राभ्यामुभयमप्यन्तर्बहीरूपं सहत इति ॥

ननु भवतु घटादावेवं यत्र तु बीजाङ्कुरादौ चेतनानुप्रवेशो न दृश्यते तत्र कथं * बीजस्यैवाङ्कुरः कार्यो न भवतीत्याशङ्क्याह ।

(७) बहिस्तस्यैव तत्कार्यं यदन्तर्यदपेक्षया ।
प्रमात्रपेक्षया चोक्ता द्वयी बाह्यान्तरस्थितिः ॥
मातैव कारणं तेन स चाभासद्वयस्थितौ ।
कार्यस्य स्थित एवैकस्तदेकस्य क्रियोचिता ॥

अन्तराभासमानस्य तथारूपापरित्यागेनैव बहिराभासनं निर्माणं, ततश्च यद्वस्तु यमपेक्ष्यान्तरित्युक्तं तद्वस्तु तस्यैवान्तरवस्तुरूपविपरिवृत्तिमात्रस्य बहिष्करणार्हं भवति. संविद्रूपं च प्रमातारमपेक्ष्य अन्तराभासिनो भावास्तदपेक्षयैव बाह्याभासा इति तेनैव तेषां बहिष्करणावभासनं युक्तं, ततश्च प्रमातैव कारणं भवति, न जडः । द्वयर्थं चः । यस्मात्स प्रमाता कार्यस्यान्तर्बहिराभासनद्वयनिमित्ततया स्थित,स्तेन विना तदपेक्षस्याभासद्वयस्यानुपपत्तेः, तस्मादेकस्य प्रमातुरेव न तु कथं चिज्जडस्य उचिता प्रसाधितरूपा क्रिया निर्मातृता भवतीति ॥

(८) अत एवाङ्कुरे ऽपीष्टो निमित्तं परमेश्वरः ।
तदन्यस्यापि बीजादेर्हेतुता नोपपद्यते ॥

---

* जडैव प्रकृतिः कर्त्री, चेतनस्य कर्तृत्वे परिणामितापत्तेः, तथा च स्मर्यते ।

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहंकारविमूढात्मा कर्ता ऽहमिति मन्यते ॥

इति । इति कापिलास्तदनुसारी प्रत्यवतिष्ठते । नन्विति ।

† अभिव्यक्त्यादिकमपि घटादेः सदसद्वा । आद्ये पुनः कारणव्यापारवैयर्थ्यमेव । अन्त्ये च कथमसती घटादेरभिव्यक्तिः सती भवेत् । असतः सत्त्वानुपपत्तेः । तथात्वे किमपराद्धमसत एव घटादेः सत्त्वेन कणभक्षाद्युपगतेन, किमिति घटादेः सत्त्वमुपगम्यावास्यत इति भावः ।

‡ लोके हीदं कार्यमिदं कारणमिति प्रचुरं व्यवह्रियते, तत् प्रदर्शितदिशा कार्यस्य सदसद्भावविकल्पासहत्वे कथमुपपद्यत इत्यर्थः ।

* बीजमत्रोपलक्षणं कतिपयबीजावयवानां सन्निहितभूमिजलादेश्च, बीजस्य समवायिकारणत्वस्यासंभवात्, तस्यैव च वक्तव्यत्वेनाभिप्रेतत्वात्

यत एवं चेतन एव निर्माता, अत एव नैयायिकादिभिरङ्कुरादौ बुद्धिमानेव परमेश्वरो हेतुत्वेनेष्टः । "ननु तैर्निमित्तकारणता ऽस्याङ्गीकृता, क्रियाविभागादिक्रमायातपरमाण्वादिद्वारकतया समवायिकारणनिजावयवारम्भपरम्परया तु तत ईश्वरादन्यस्यापि बीजभूमिजलादेर्हेतुता कथिता" । सत्यं कथिता, सा तु नोपपद्यते, उक्तयुक्त्या जडस्य हेतुत्वायोगात् । ततश्चेश्वर एव बीजभूमिजलाभाससाहित्येनाङ्कुरात्मना भासत इतीयानत्र परमार्थः ॥

ननु परिदृष्टबीजादिव्यतिरिक्तबुद्धिमत्कारणकल्पनेन विना किमुपरुद्ध्यत इति परस्य भ्रान्तिं भिन्दन्नाह ।

(९) तथाहि कुम्भकारो ऽसावैश्वर्यैव व्यवस्थया ।
तत्तन्मृदादिसंस्कारक्रमेण जनयेद्घटम् ॥

तथाहीति निदर्शनोपक्रमेण व्याप्तिरेवंभूतैव दृष्टेति द्रढयति, जडा हेतवश्चेतनप्रेरिताः कार्यं कुर्वन्ति, मृदादयो यदि सन्निधिमात्रेण विदध्युः कुम्भकारेण किमत्र कृतम्, शिबिकस्तूपकादिपरम्परया ते जनयन्ति सा च कुम्भकारायत्तेति चेत्सिद्धं नः साध्यं, शिबिकसंपादने ऽपि ते चेतनप्रेरणामपेक्षन्त इति तज्जडकारणानां चेतनप्रेरणामन्तरेण न क्व चित्कार्यकारित्वम् । यदि हि स्यान्मृदादीनामपि स्यादित्येकान्त एषः । ततश्च यदचेतनं कार्यकारि तच्चेतनापेक्षं, मृदादय इव, तथा च बीजादीति स्वभावः । अचेतनकार्यकारित्वं हि कादाचित्कत्वात्सनिमित्तं, न चान्यदस्य निमित्तमुपपद्यते ऽनुपलम्भादिति, चेतनप्रेरणं यदि न निमित्तीकुर्याद्व्यापकविरुद्धमन्यनिमित्तकत्वं प्रसज्येत, न च युक्तं तन्मृदादावपि तस्य प्रसङ्गादिति सिद्धा व्याप्तिः, अतश्च कुम्भकृदेव तत्रेश्वरः । तदेतदाह, ईश्वररूपा या व्यवस्था तया यः सस मृद्दण्डचक्रादीनां संस्कारः मृदो मर्दनं दण्डस्य प्रगुणत्वं चक्रस्य परिवर्तनमित्यादिस्तदारम्भो यः क्रमः शिबिकस्तूपकादिरूपः तेन घटं नियोगतो जनयति नान्यथेति, नियोगे लिङ् ।

किं च यदि न क्रुध्यते, वस्तुतः कुम्भकारो ऽपि ऐश्वर्यैव स्वतन्त्रविश्वात्मतारूपया व्यवस्थया मृदादिसंस्कारापेक्षया प्रदर्शितनियत्यभिधाननिजशक्तिविजृम्भातो घटं जनयेत् अन्यथा ऽचेतना मृदादयः कथं कुम्भकारेच्छामनुरुध्येरन्, तन्तवो ऽपि वा घटसंपादनेच्छां किं नाश्रयेरन् । तदेतदप्युक्तमनेनैव सूत्रेण । तथाहीति ।

"नन्वेवं कुम्भकृतो नास्ति कर्तृत्वमिति समुत्सीदेद् * धर्माधर्मव्यवस्था" यदि प्रत्येषि युक्त्यागमयोस्तदेवमेव, तथापि समस्तेतरनिर्माणमध्य एवेदमपि परमेश्वरेणैव निर्मितं, यदविचलस्तस्य कुम्भकारपशोर्मिथ्याकर्तृत्वाभिमानः, प्रतिभुव इवाधमर्णताभिमानः, जडा हेतवो बीजभूमयश्चेतनप्रेरिता भवितुमर्हन्ति, कार्यारम्भकत्वात्, योयो जडः कार्यारम्भकस्सस चेतनप्रेरितः, यथा मृदादिः, तथा चैते मृदादयः कार्यारम्भकत्वाभिमानाः, यदि पुनरीश्वरस्येच्छैवेयमीदृशी मा ऽस्याभिमानो ऽयमुद्गमदिति तदा नासौ कर्ता कश्चित्, तदिदमप्युक्तं सूत्रेणैव, तथाहीति । कुम्भकारस्यापि मृदादिसंस्कारक्रमेण किं घटं जनयाम्युत न जनयामीति य एकपक्षनिश्चयाय संप्रश्नात्मा विचारः, स ईश्वरसम्बन्धिन एव विविधात्स्वरूपाच्छादनतत्त्वप्रकाशनरूपादवस्थानादिति, संप्रश्ने लिङ् । तस्माद्वस्तुत ईश्वर एव सर्वत्र कर्ता अहं च स एवेति न परिमिते कर्तापि तु सर्वत्र कर्तेत्येतावति सर्वथा हृदयेनावधातव्यमिति स्थितम् ॥

दृश्यते चास्य चेतनस्य स्वातन्त्र्यमेव सर्वत्र जृम्भमाणं, जडानपि यत्स्वात्मतामापादयति, न तु जडानां वस्त्वन्तराविष्करणे सामर्थ्यमिति यदुक्तं तत्सर्ववादिप्रसिद्धनिदर्शनेन द्रढयति ।

(१०) योगिनामपि मृद्बीजे विनैवेच्छावशेन तत् ।
घटादि जायते तत्तत्स्थिरस्वार्थक्रियाकरम् ॥

यदिह चेतनप्रेरितं कारणमिति प्रसिद्धं मृदादि, यच्च तदनपेक्षं बीजादि, घटादेरङ्कुरादेश्च जनकं, तदेव यदि परमार्थतः कारणं स्यात्तद्व्यतिरेकेण घटाङ्कुरादेः कथं योगीच्छामात्रेण जन्म स्यात्, अकारणत्वप्रसङ्गस्तेषां वा ऽकारणत्वापत्तेः । अथोच्यते "अन्ये एव ते घटाङ्कुरादयो मृद्बीजादिजन्याः, अन्ये एव च योगीच्छादिजन्याः, इति," तत्रापि प्रबोध्यसे, विमर्शाभेदात्तावदभेद इति पूर्वमेवोक्तं, तत्रापि योगी खल्वप्रतिहतेच्छस्तस्य चेच्छा तादृगेव घटो भवतु यो मृदादिकृतकुम्भसंभवभूयर्थक्रियाकरणचतुरवृत्तिरिति, तदेतदाह, तस्यतस्य स्थिरस्यार्थक्रियान्तरानुबन्धिनः कालान्तरानुबन्धिनश्च स्वस्यात्मीयस्यार्थक्रियाविशेषस्य करणे हेतुतच्छीलानुकूलरूपं घटादि जायते इति । "ये त्वाहुः, नोपादानं विना घटाद्युत्पत्तिर्योगी त्विच्छया परमाणून्व्यस्यन्संघट्टयतीति" । ते वाच्याः । यदि खल्वन्वयव्यतिरेकागमादिपरिदृष्टः कार्यकारणभावो योगिषु न विपर्येतीति हृदयमावर्जयति वः, तत्किं परमाणुग्रहणेन, नो चेद्घटस्य कपालादिशरीरस्य स्वावयवाः तेषां निजंनिजं प्रसिद्धं तृणशस्तिलशो ऽप्यन्यथा भवनमसहमानं लौकिकमेव कारणमिति घटे मृद्दण्डचक्रादि देहे स्त्रीपुरुषसं-

* सुकृतो स्वर्गं प्राप्नोति दुष्कृती च नरकमिति च व्यवस्था परमेश्वरस्य कर्तृत्वे न घटेत, यदि न किं चित् कुम्भकारादिना क्रियते तर्हि ज्योतिष्टोमब्रह्महत्यादिकर्मापि न केन चित् क्रियते, ऽपि तु परमेश्वरेणैव, तस्य च नित्यशुद्धबुद्धमुक्तस्वभावत्वेन स्वर्गनरकयोरसंभवाद् विधिप्रतिषेधात्मकशास्त्रस्यानर्थक्यापत्तिरिति भावः ।

एतदभ्युपगममुखेन प्रतिक्षिपति । यदीत्यादिना ।

Digitized by Google

योगाद्धि सर्वमपेक्ष्यं परिवृष्टदीर्घतरकालपरिवासमिति योगीच्छया तु समनन्तरोदितघटदेहादिसम्भवो दुस्समर्थ एव * । चेतन एव तथातथा भवति भगवान्भूरिभर्गो महादेवो नियत्यनुवर्तनोल्लङ्घनघनतरस्वातन्त्र्य इत्यत्र पक्षे नियत्यनुवर्तिनि लौकिके प्रसिद्धे कार्यकारणभावे स्वातन्त्र्यं तदुल्लङ्घनमाद्रियमाणस्य तु योगिप्रायप्रसिद्धे लोकोत्तरे इति न कश्चिद्विरोधः, इयांश्च लोक एव, परमार्थतस्तु सक्रमाक्रमरूपविश्वसृष्ट्यादिकृत्यपञ्चकप्रपञ्चस्वभावः प्रकाशते, चेतनो हि स्वात्मदर्पणे भावान्प्रतिबिम्बवदाभासयतीति सिद्धान्तः यदाह पूर्वगुरुः ।

निरुपादानसंभारमभित्तावेव तन्वते ।
जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने ॥ इति ॥

ननु यदि प्रसिद्धकारणोल्लङ्घनेनापि तत्कारणजन्यकार्यविशेषतुल्यवृत्तान्येव कार्याणि जायन्ते, भग्नास्तर्ह्यनुमानकथाः,। तथाहि, कथमन्यदन्यत्र नियमवद्भवेदित्याशङ्क्य प्रामाणिकतरंमन्यैस्तादात्म्यतदुत्पत्ती नियमनिदानमुपगते, नहि निःस्वभावं वस्तु भवति, नापि भिन्नस्वभावं, स्वभावभेदेन भेदात्पर्यायशस्तत्स्वभावद्वयाभावे च निःस्वभावताप्रसङ्गात्, एवं निर्हेतुके भिन्नहेतुके च कार्ये वाच्यम्, उभयत्रापि च हेतुकृतैव व्यवस्था स्वहेतुत एव हि शिंशपा वृक्षस्वभावाव्यभिचारिणी जाता स्वहेतुतश्च हुतभुग्धूमजननस्वभावः, तदिदानीं नियत्प्रलम्बिनि कार्यकारणभावे सर्वमिदं विघटेत, योगीच्छया हि शिंशपाप्यवृक्षस्वभावा भवेत्, धूमे तु द्विगुणं चोद्यम्, † अग्न्यादिसामग्री योगीच्छोद्भूता धूमं न जनयेद्योगीच्छा वा ऽनग्निकं धूममिति न स्यादनुमाने, अस्ति च तल्लोक इत्याशङ्क्याह ।

(११) योगिनिर्माणताभावे प्रमाणान्तरनिश्चिते ।
कार्यं हेतुः स्वभावो वा ऽत एवोत्पत्तिमूलजः ॥

योगीच्छापि सर्वथा तादृशमेव न तु वृश्चिकगोमयादिसम्भूतवृश्चिकादिन्यायेन कथं चिद्रसवीर्यादिना भिन्नं कार्यं जनयतीति यत्कथित,मत एवास्मादेव हेतोः कार्यं वा धूमाद्यग्न्यनुमाने शिंशपात्वादिस्वभावो वा वृक्षत्वाद्यनुमाने एवं हेतुर्भवति, यदि प्रमाणान्तरेण लोकप्रसिद्ध्या योगिनिर्माणत्वस्याभावो निश्चितो भवति, नान्यथा । अत एवानुमाने जन्मान्तराभ्यासलोकप्रसिद्ध्यादिकमवश्योपजीव्यं, "सा च श्रुतानुमानप्रज्ञयोर्बीजमिति च * ऋतम्भराविषयमुवाच पतञ्जलिः"। "अन्ये च यौक्तिकाः योगिप्रत्यक्षकल्पसद्भावं समस्तसङ्ग्रहणाय कल्पितवन्तः," सांव्यवहारिके च प्रमाणे नास्माकं भरः, प्रकृतं ह्यस्माकमीश्वरस्वरूपं तच्च स्वप्रकाशमेवा न्यप्रमेयोपरोधेऽपि नोपरुध्यत इत्युक्तमसकृत् । ननु स्वभावहेतौ किमनया चिन्तया, आह, वृक्षत्वाव्यभिचारिण्याः शिंशपाया उत्पत्तेर्यन्मूलं कारणं तत एव स तन्मात्रानुबन्धी स्वभावो जायत इति । ततश्च ।

एकसामग्र्यधीनस्य रूपादेरसतो गतिः ।
हेतुधर्मानुमानेन धूमेन्धनविकारवद् ॥

इति स्वभावहेतुर्न्यायः । "ननु च वृश्चिकादीनां कीटगोमयाद्यनेककारणकत्वं तावद्दृष्टं रसवीर्यादिभेदस्तु तत्रेत्यन्यदेतत्, तद्योगिजन्यत्वमवह्निकस्यापि धूमस्य सह्यं नाम, स्वभावस्य तु कथं विपर्याससम्भावना, नहि नीलं सदेवानीलं योगीच्छया भवति इति कश्चित्प्रामाणिकः प्रतीयात्" उच्यते । इह द्विविधो हि स्वभावहेतुरन्तर्लीनकार्यकारणभावस्तद्विपरीतश्च, वह्निमानयं पर्वतो धूमवत्त्वादिति, अनित्यो ऽयं कृतकत्वादिति। तत्राद्यस्य तावत्कार्यकारणभाव एव मूलमिति किं तत्रोच्यते । अपरस्तु विचार्यते। यदि तावत्कृतकत्वस्य कारणायत्तत्वं नाम स्वभावः कथमभवनपरिच्छिन्नभवनस्वभावता नामानित्यत्वं स्वभावः स्यात्, आभासभेदात्, अभेदे त्वाभासस्य हेतुसिद्धावेव साध्यस्य सिद्धत्वात् । यदि परं व्यवहारः साध्यते तदयं वृक्षत्वादिति न्यायेन, व्यवहारश्च ज्ञानाभिधानात्मा कार्यं एव, तत्रैव नियति शक्तिरङ्गीकृता भवता ऽपि । तस्मात्सर्वेषु स्वभावहेतुष्वाभासभेदं विना व्यवहारमात्रसाधनमेव, हेत्वाभासमयत्वादेवानधिको हि तत्र साध्याभासो, † व्यावृत्तीनामेषैव वार्ता । सामान्यानामियमेव सरणिः । तस्माच्चियति शक्त्या यतः शिंशपाभासवृक्षाभासयोः पूर्वनीत्या सामानाधिकरण्याभासो हेतुबलात्ततः स्वभावोयं हेतुहेतुमद्भावमूल

* स्पष्टमुपपादितं चैतद्योगीव निरुपादानमित्यस्य व्याख्यानावसरे तथा च योगी कुम्भं निर्मिमाणः कुम्भकार एव स्यादित्यादिना ग्रन्थसन्दर्भेण ।

† सामग्र्याः कार्योत्पत्तिव्याप्यत्वं धूमस्य वह्निव्याप्यत्वं च न घटेतेत्यर्थः । योगी यदि प्रसिद्धकारणोल्लङ्घनेन कार्यमुत्पादयेत् तर्हि विना ऽपि वह्निमुत्पादिते योगिना धूमे वर्त्तमाने ऽपि वह्नेरसत्त्वस्य संभावनाद् धूमे वह्निव्यभिचारित्वसंभावनया न तेन पामरपर्यन्तं प्रसिद्धं वह्न्यनुमानं घटेतेति भावः ।

एतच्च व्याप्यतावच्छेदकदले योगिनिर्मितेतरत्वविशेषणदानेन निराकरिष्यति ।

* निर्विचारवैशारद्ये जायमानाया योगिप्रज्ञाया ऋतंभरेति तान्त्रिकी परिभाषा । सा च शब्देनानुमानेन च जायमानं यज्ज्ञानम् (अर्थाच्छ्रवणमननदशायां यज्ज्ञानं) तद्व्यावृत्ता, शाब्दबोधस्यानुमितेश्च सामान्यविषयत्वाद् अस्याश्च निदिध्यासनजन्याया अशेषविशेषसाक्षात्काररूपत्वादिति प्रतिपादितम् ।

"ऋतंभरा तत्र प्रज्ञा ४८
सा पुनः श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात् ४९"

इति सूत्राभ्यां पतञ्जलिना । तद्भाष्ये च श्लोकः ।

आगमेनानुमानेन तथा ऽभ्यासरसेन च ।
त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमम् ॥

इति । अत्र च पूर्वार्द्धे क्रमेण श्रवणमनननिदिध्यासनान्युक्तानि ।

† विशेषाणाम् ।

Digitized by Google

एव, तत एव सामान्येनेदमुक्तं द्रष्टव्यम् । सर्वः स्वभावहेतुरुत्पत्तिमूलज इति । आभासा एव च वस्त्विति च समर्थितं प्राक् । ततश्च शिंशपायामेकस्यामेव सृज्यमानायां शाखादिपदार्थान्तराणामसृष्टेर्वृक्षाभासस्य सामान्यात्मनः साध्यस्य नामापि नास्तीति संभाव्यत एव । यत्तु तदेकरूपं विशिष्टं वृक्षत्वं तत्खलु शिंशपात्वमेव' तच्च सिद्धमिति न साध्यं, कारणायत्तमिदमित्याभासेपि न स्यादनित्यताभासः । एवमर्थक्रियाकारित्वाभावेपि क्षणिकत्वाभासाभाव इति नियत्यपेक्षयैव सर्वे स्वभावहेतवो नान्यथेत्येकान्त एषः ॥

नन्वाभासवस्तुत्ववादेरनाभातस्याग्नेरवस्तुत्वमिति अनाभातेन कथं धूमो जन्यते, ततश्च धूमादग्नेः कारणस्य कथमनुमानमित्याशङ्क्य समर्थयितुमाह ।

(१२) भूयस्ततत्प्रमात्रेकवह्न्याभासादितो भवेत् ।
परोक्षादप्यधिपतेर्धूमाभासादि नूतनम् ॥
कार्यमव्यभिचार्यस्य लिङ्गम्

एकवारं तावन्महानसे प्रत्यक्षानुपलम्भबलेनाग्न्याभासधूमाभासयोः कार्यकारणभावो गृहीतः, तत्र विज्ञानवादिनो दर्शने प्रतिसंतानमन्यश्चान्यश्चाभासः इति स्वाभासयोरेव कार्यकारणता गृहीता, न तु संतानान्तरगतयो,स्तदीयवृत्तान्तस्यासंवेदनात् । ततश्चेदानीमनुमानं न भवेत् स्वसंतानगताद्धूमाभासात्किमिसर्वज्ञादिप्रमातृसंतानान्तरनिष्ठस्याग्न्याभासस्येति निश्चयः । इह तु दर्शने व्याप्तिग्रहणावस्थायां यावन्तस्तद्देशसम्भाव्यमानसद्भावाः प्रमातारस्तावतामेको ऽसौ धूमाभासश्च वह्न्याभासश्च * बाह्यनये इव, तावति तेषां परमेश्वरेणैक्यं निर्मितमिति ह्युक्तं, ततः स्वपरसन्तानविशेषत्यागेन धूमाभासमात्रं वह्न्याभासमात्रस्य कार्यमिति व्याप्तौ गृहीतायां भूयो ऽपि पर्वते यो धूमाभासः सो ऽपि वह्न्याभासादेवेति व्याप्तिं स्मृत्वा अनुमिमीते अत्र पर्वते ऽग्न्याभास इति, तावति धूमाभासविशेषे प्रमात्रन्तरैः सहैकीभूय वह्न्याभाससामान्यांशे परोक्षरूपांशसहिते विशेषाभासान्तरविविक्ते प्रमात्रन्तरैस्साकमेकीभवतीति यावत् । भूय इति व्याप्तिं गृहीत्वा पुनरपि यो धूमाभास आदिग्रहणादङ्कुराभासादिर्गृह्यते सो ऽप्याभासो नूतनो ऽपूर्वो, न तु धूमजधूमवदप्रत्ययः, स चाधिपतेरसंचेत्यमानाद्वह्न्याभासाद्बीजाभासादेव वा भवेत्, तत एव जनितुं शक्नोति, नान्यतः, शकि लिङ् । स चाभासस्तेषु तेषु प्रमातृष्वेक एव, अनेकत्वे न तु युज्यत एवैतदित्याशयः । यतश्च स एको ऽधिपतिश्च वह्न्याभासो धूमकारणं, ततो धूमाभासो ऽस्यैवाग्न्याभासस्याव्यभिचरितं कार्यं लिङ्गं, योगिज्ञातत्वाभावे निश्चिते सतीति, तस्मात्कार्यात्सो ऽनुमीयते यतः परोक्षो ऽसावधिपतित्वादेव ॥

* नैयायिकमते ।

नन्वेवं गोपालघटिकान्तरालचिरोषितनिर्गतादपि धूमाभासाद्वह्न्याभासानुमानमित्याशङ्क्याह ।

(१३) अन्यप्रमातृगात् ।
तदाभासस्तदाभासादेव त्वधिपतेः परः ॥

परो नूतनादन्यो यो धूमाभासस्स धूमाभासादेव प्रमात्रन्तरवर्तिनो ऽधिपतिरूपात्परोक्षादिति तथाभूताद्धूमाभासात्कथमकारणभूतो वह्न्याभासो ऽनुमीयतामित्यभिप्रायशेषः । कुशलाश्च लक्षयन्त्येव विवेकम् । अस्यार्थस्यानुमानिकबहुतरव्यवहारोपयोगिनो यत्नेन व्युत्पत्तिः कार्येत्याशयेन नूतनमिति यदेवसूचितं तदेव व्यवच्छेद्यद्वारेण स्फुटीकृतम् ॥

ननु चैवं धूमाभासो वह्न्याभासादित्यङ्गीकृतं चेत्तर्हि चेतनस्यैव कर्तृत्वमिति यदुक्तं तत्कथं, तथाहि, बीजे सत्यङ्कुरो भवतीति यदेतद्दृष्टं धूमाग्निवदेव तत्कथमनादरास्पदमित्याशङ्क्याह ।

(१४) अस्मिन्सतीदमस्तीति कार्यकारणतापि या ।
साप्यपेक्षाविहीनानां जडानां नोपपद्यते ॥

एक एव भावस्तावन्न कार्यकारणभावः, भावद्वयमपि च न युगपद्भावि कार्यकारणरूपं घटपटवत्, क्रमभाव्यपि नाऽनियतक्रमं नीलपीतादिज्ञानवत्, नियतक्रमिकत्वेपि न पूर्वभावि कार्यमुत्तरकालभावि च कारणमित्येवं, नियतपूर्वभावं कारणं नियतपरभावं च कार्यमिति परस्य तावन्मतम् । तत्र स्वरूपादनधिका चेत्पूर्वता परता च तद्भावद्वयमात्रं स च स चेति, चार्थोपि वा न कश्चित्तस्याप्यपेक्षारूपत्वात्, सम इत्येव हि स्यात्, अथ पूर्वता नाम प्रयोजकसत्ताकत्वं, परता च प्रयोज्यसत्ताकत्वं, तर्हि बीजस्याङ्कुरप्रयोक्त्री सत्ता ऽङ्कुरविश्रान्ता अङ्कुरान्तर्भावमात्मन्यानयति, अङ्कुराभावे प्रयोक्तृत्वमात्रं स्यात्तदपि न किंचिदन्यापेक्षत्वात्तस्य, एवं प्रयोज्यसत्ताकेपि वक्तव्यम् । केवलं भावमात्रमेव कार्यकारणतेत्यादयः पक्षा नोपपन्नाः । यावदस्मिन्सतीति भूतविभक्त्या सप्तम्या प्रयोजकसत्ताकत्वमिदमस्तीति भाव्यमानविभक्त्या प्रयोज्यसत्ताकत्वमित्येवंरूपापि या कार्यकारणता सापि नोपपद्यते, प्रमाणेन न संभवति जडानाम् अन्योन्यापेक्षा ह्यत्र जीवितं, सा च जडानां न संभवति ॥

कथमिति चेदुच्यते ।

(१५) नहि स्वात्मैकनिष्ठानामनुसंधानवर्जिनाम् ।
सदसत्तापदेप्येष सप्तम्यर्थः प्रकल्प्यते ॥

जडा: किलान्योन्यरूपमनुसंधातुमप्रभविष्णव:, अन्योन्यानुसंधानरूपत्वं जडविरुद्धेन व्याप्तं चैतन्येन, अनुसंधानं चापेक्षा चैतन्यस्वरूपमेव, अन्यत्र तु सोपचरिता, ऽतोऽनुसंधानविहीनत्वाज्जडो भावः स्वात्ममात्रविश्रान्तिसंतोषसंकुचितशरीरः कथं परत्र प्रसरेत्। ततश्च यदि बीजं सदङ्कुरोऽसत्, तथापि विपर्ययः, उभयमपि वा सद्यदि वाऽसत्, तथापि एकं सोपाख्यमन्यन्निरुपाख्यं, द्वयमपि वा * सोपाख्यं निरुपाख्यं वा, तथापि प्रातिपदिकार्थमात्रे धर्मान्तरेण समुच्चयादिनाप्यनालिङ्गितमवतिष्ठते, तस्य समस्तस्यापेक्षारूपत्वेन चैतन्यविश्रान्तत्वात्॥

यस्मादचेतनेषु नापेक्षोपपद्यते।

(१६) अत एव विभक्त्यर्थः प्रमात्रेकसमाश्रयः।
क्रियाकारकभावाख्यो युक्तो भावसमन्वयः॥

सप्तमीरूपाया विभक्तेरन्यस्या अपि वा योऽर्थः क्रियाकारकभावलक्षणः स एव तावद्भावानां समन्वयः, नान्यः शुष्कः कश्चित्, स च यदि स्वतन्त्रे चिद्रूपे भावद्वयं विश्राम्यति, तदोपपद्यते, अन्यथा तु न कथं चित् तथाहि, विकल्पेनाप्यसौ व्यवह्रियमाणो न वस्तुनिष्ठतयोपपद्यते, वस्त्वनुसरणप्राणो हि विकल्पोऽनुभवानुसारितयैव भवति, सा चेह नास्ति, वस्तुप्रभवत्वेन वस्त्वनुसारी ह्यनुभवो, वस्तु च स्वात्मनिष्ठमित्युक्तम्। तस्माद्बीजे सत्यङ्कुरो वह्नौ सति धूम इति च स्वतन्त्रचिद्रूपप्रमातृविश्रान्तत्वे सर्वमेतद्युज्यते नान्यथेति॥

शेष उत्तराङ्के

॥ अथ बालरामायणाख्यनाटकस्य ॥

॥ षष्ठोऽङ्कः ॥

अतः परं निर्दोषदशरथो भविष्यति।

ततः प्रविशतः शूर्पणखामायामयौ।

शूर्पणखा। अज्ज अहिण्णादं तए मादामहस्स तक्कालमन्तिदं जधा किल रामे सुबद्धवेरा सुप्पणहा कुलउत्तओ माआमओ ता दुवेवि एदे कज्जसिद्धीए कारणेत्ति णिउत्ता †।

मायामयः। बुद्धिप्रकर्षं प्रति किमुपवर्ण्यते तत्रभवतो माल्यवतः। किमभीष्टं चन्द्रमसः कुमुद्वतीवल्लभस्येति।

नीतितन्त्रे द्वयं दृष्टं सिद्धये कृत्यवस्तुनः।
समानः कार्ययोगश्च प्रभुशक्तिश्च निश्चला॥ १॥

तदेहि दशाननमातामहमेवोपतिष्ठावहे।

शूर्पणखा। एवं करेम्ह *। परिक्रम्यावलोकितकेन।

मायामयः।

नैर्ऋताधिपकार्याणामुपायोपायकर्मणि।
आर्यो यन्माल्यवानास्तेऽव्यस्तलक्षेण चक्षुषा॥ २॥

ततः प्रविशति माल्यवान्।

माल्यवान्। स्मृतिमभिनीय शूर्पणखानिकारदर्शनसमुत्तेजितोऽपि दशकण्ठो रघुराजधानीयात्रातो निवर्तितस्तावदिदमुपदिश्य चारकैर्यद्दुत देवस्य वैदेह्या संदिष्टं यथा।

स्वयं मया प्रेमपरीक्षणाय
प्रवर्तितः स्वाकृतियन्त्रयोगः।
यथाहमेवागणितैरहोभि-
र्दशाननान्तं नियतं प्रवत्स्ये॥ ३॥

विचिन्त्य।

इत्थं मिथ्या विप्रलब्धोऽपि देव-
स्त्यक्त्वाशङ्कां सोदरीवैकृतेऽपि।
जातः सीतासङ्गमायत्तचित्तो
न्यक्कृत्यान्यज्जृम्भते मन्मथाज्ञा॥ ४॥

स्मृतिनाटितकेन। न जाने किं वृत्तं वा कैकेयीदशरथयोः। उपसर्पितकेन।

मायामयः। जयतिजयत्यार्यः।

शूर्पणखा। जअदुजअदु कणिट्ठमादामहो †।

माल्यवान्। अथ तत्र किं वृत्तम्।

मायामयः। यथादिष्टमार्येण।

माल्यवान्। सहर्षं तद्विस्तारतः कथ्यताम्।

मायामयः। अथैकदा दयितस्नेहमय्या तया सममसुरानीकविजयाय पूरितसुहृन्मनोरथे दशरथे त्रिविष्टपतिलकभूतं पुरुहूतं प्रभाववति समुपस्थितवति तद्रूपधारिणौ कुवलयदलाभिरामं रामं सपदि छलयितुमयोध्यां शूर्पणखाऽहं च प्राप्तवन्तौ। विहितजनरञ्जनेन वृन्दारकवन्दिव्यञ्जनेन गीतसंस्मृतसहचरेण निशाचरेण।

दैत्यग्रामं रणपरिगमे कुर्वता नामशेषं
येन न्यस्ता दिशिदिशि यशःकन्दलीनां प्ररोहाः।
हासज्योत्स्नां सुरपतिवधूवक्त्रचन्द्राय दत्त्वा
सार्द्धं दारैर्दशरथनृपः स्वां पुरीं सोऽयमेति॥ ५॥

माल्यवान्। ततस्ततः।

---

* उपाख्या ऽभिधानसंबन्धः तया सहवर्तमानं सोपाख्यं, नामरूपयुतम्, अर्थक्रियाकारित्वलक्षणवर्तमानावस्था ऽवस्थितमिति यावत्। तद्भिन्नं निरुपाख्यम्।

† आर्य अभिज्ञातं त्वया मातामहस्य तत्कालमन्त्रितं यथा किल रामे सुबद्धवैरा शूर्पणखा कुलपुत्रको मायामयस्तौ द्वावप्येतौ कार्यसिद्धेः कारणे इति नियुक्तौ।

* एवं कुर्मः।

† जयतुजयतु कनिष्ठमातामहः।

शूर्पणखा । तदो तस्स वअणप्पसरस्स अणन्तरं सव्वदो वज्जन्ततूरं गाअन्तगन्धव्वजणचुम्बिअणच्चन्तणटीसत्थं उब्भिज्जन्तविअडद्धअवडाआजुगं तोरणणिबज्झन्तचित्तवन्दणमालअं सच्छरत्थाचत्तरचउप्पहपइण्णपिट्ठातअचुण्णं तं पुरं चउद्दिसं आसि * ।

माल्यवान् । ततस्ततः ।

मायामयः । ततश्च यावत् मायाकैकेयी शूर्पणखा मायादशरथो मायामयश्च यथास्थानमुपविष्टौ तावत्कैकेय्याः प्रियसखी मन्थरा नाम तद्रूपधारिणी शूर्पणखापरिचारिकेव तदा मामुपेत्योक्तवती ।

माल्यवान् । किम् ।

मायामयः । इदम् ।

यस्त्वयाऽस्या महाराज प्रतिपन्नं वरद्वयम् ।
व्योमयात्रासहचरी कैकेयी याचतेऽद्य तत् ॥ ६ ॥

यथाभिहितं किं तत् । उक्तं च मन्थरया ।

वरेणैकेन लभतां रघुराज्यं सुतो मम ।
चतुर्दश समा रामो वने वन्येन तिष्ठतु ॥ ७ ॥

माल्यवान् । सहर्षम् । ततस्ततः ।

शूर्पणखा । विहस्य सुदसच्चदसरहेण वि मायामएण तथा करुणं विरोइदुं पउत्तं जधा जदि णाम तरुणो परं ण रोविदा गावगण्ठीणं परं जदि ण दलइ हिअअम् † ॥

माल्यवान् । विहस्य भद्र मायामय त्वमेव शेषं कथय कविमुखादेव शृणुमः ।

मायामयः । विहस्य ।

तथा मया प्रस्तुतमार्य रोदितुं
निबद्धधाराप्रसरेण चक्षुषा ।
स्थिता यथा स्वर्गनदीव दक्षिणे
यथा च वामे यमुनेव चक्षुषि ॥ ८ ॥

माल्यवान् । किं हि दुष्करं स्वामिभक्तेः किमसाध्यं वैदग्ध्यस्य ततस्ततः ।

मायामयः । तदिति प्रतिपन्नवता मया निर्वासितो राजपुत्रः प्रवृत्तश्च गन्तुं वनाय ।

शूर्पणखा । लक्खणजाणईमेत्तपरिवारस्स से किदा जत्ता ‡ ।

* ततस्तस्य वचनप्रसरस्यानन्तरं सर्वतो वाद्यमानतूर्यं गायद्गन्धर्वजनचुम्बितनृत्यनटीसार्थं उद्भिद्यमानविकटध्वजपताकायुगं तोरणविबध्यमानचित्रवन्दनमालकं स्वच्छरथ्याचत्वरचतुष्पथप्रकीर्णपिष्टातकचूर्णं तत् पुरं चतुर्दिशमासीत् ।

† श्रुतसत्यदशरथेनापि मायामयेन तथा करुणं प्ररोदितुं प्रवृत्तं यथा यदि नाम तरवः परं न रोदिताः । ग्रावग्रन्थीनां परं यदि न दलति हृदयम् ।

‡ लक्ष्मणजानकीमात्रपरिवारस्यास्य कृता यात्रा ।

मायामयः । आर्य किमपि द्विगुणतामुदात्तजनचरितमाकर्णय पश्य ।

क्रूरक्रमं किमपि राक्षसजातिरेका
तत्रापि कार्यपरतेति मयि प्रकर्षः ।
रामेण तु प्रवसता पितुराज्ञयैव
बाष्पाम्भसामहमपीह कृतो रसज्ञः ॥ ९ ॥

अपि च । दशकण्ठमातामह ।

अभ्युज्झतो निजगृहान् सुखसारबन्धून्
कान्तारवासमनसः पितृशासनेन ।
रामस्य सा स्थितवती मुखमेत्य लक्ष्मीः
पद्मस्य या शरदि या च निशाकरस्य ॥ १० ॥

शूर्पणखा । तदो अम्हे तं पविसाविअ सच्चदसरहागमणासङ्किणो झडिदि जडरूआ भविअ किं हविस्सदित्ति जाणिदुं तक्खणं तहिं जेव्व ठिआ अह तत्थ पउत्ता पोरलोअस्स हलहबुल्लावा जधा केहिं वि किदकेकईदसरहरूवधारीहिं छलिदो रामभद्दोत्ति * ।

माल्यवान् ततस्ततः ।

मायामयः । ततश्च वामदेवप्रभृतिभिर्यथावृत्तमभिधाय सपादोपग्रहं वारितोऽपि तदिदमभिधाय स्थितः ।

मया मूर्ध्नि न्यस्तं पितुरिति धृतं शासनमिदं
स यक्षो रक्षो वा भवतु भगवान् वा रघुपतिः ।
निवर्तिष्ये सोऽहं भरतकृतरक्षां निजपुरीं
समाः सम्यग्नीत्वा वनभुवि चतस्रश्च दश च ॥ ११ ॥

कार्यशेषनिष्पत्तये यथोचितं मातामह एव जानातीति निष्क्रान्ताः । विष्कम्भकः ।

ततः प्रविशति मातलिसारथिना रथेन कैकेय्या सह दशरथः ।

दशरथः । आर्य मातले कियद्दूरमद्यापि रघुराजधानी ।

मातलिः । य एष दृश्यते सरयूसरितः स्रोतसा परिक्षिप्तप्राकारो धरणितलैकदेशः सा त्वियमयोध्या । रथवेगनाटितकेन ।

कैकेयी । पणमामि भअवदिं सरऊं जा पुव्वं दीसमाणा णअणपेऊसगण्डूसकवलं करेन्ती आसि सा संपदं हलाहलकवलपडिरूआ पडिहादि । किं पुण मे अओज्झादंसणे वि चमक्कारअपज्जाउलं हिअअं ता जदि वच्छाणं रामभद्दभरदलक्खण-

* ततो वयं तं प्रवास्य सत्यदशरथागमनशङ्किनो झटिति जडरूपा भूत्वा किं भविष्यतीति ज्ञातुं तत्क्षणं तत्रैव स्थिताः । अथ तत्र प्रवृत्ताः पौरजनस्य मन्द्रोल्लापा यत् काभ्यामपि कृतकैकेयीदशरथरूपधारिभ्यां छलितो रामभद्र इति ।

सलक्खणाणं बहूणं च सीदामण्डवीउम्मिलासुदकित्तीणं दंसणेण णिव्वासइस्सदि * ।

दशरथः । अयि कैकेयि ।

एतत्क्रान्तर्षिविघ्नचत्वरपथं विश्रान्तवैतालिक-
श्लाघाश्लोकमशुञ्जितमञ्जुमुरजं विध्वस्तगीतध्वनि ।
व्यावृत्ताध्ययनं निवृत्तसुकविक्रीडासमस्यं नम-
द्विद्वद्वारकथं कथं पुनरिदं मौनव्रते वर्तते ॥ १२ ॥

अवतरणनाटितकेन ।

मातलिः । मर्त्यमहाराज सम्भावयस्व सदनमहमपि निविडोत्कण्ठं विडौजसमुपतिष्ठामीति निष्क्रान्तः ।

परिक्रामितकेन दशरथः । कः कोऽत्र भोः ।

नेपथ्ये अयमहं काम्पिल्लः सौविदल्लः ।

दशरथः । आहूय सुमन्त्रवामदेवौ ।

प्रविश्य वामदेवः । स्वस्ति महाराजदशरथाय देव सन्निहितोऽत्र सुमन्त्रः ।

दशरथः । अनाकर्णितकेन एतत्क्रान्तमित्यादि पठति ।

वामदेवः । साशं स्वगतं च ।

हे महाराज निशां विमुञ्च वसतिं द्रागेहि यात्रां बहिः राज्ञानं प्रति ।

इव स्तम्भय चेतनावचनयोरप्येति शुक्राशनिः ।

दम्पती आकुलं नाटयतः ।

वामदेवः ।

त्वद्रूपाद्विपिनाय चीवरधरो धन्वी जटी शासनं
रामः प्राप्य गतः कुतश्चन वनं सौमित्रिसीतासखः ॥ १३ ॥

उभौ मूर्च्छितः ।

वामदेवः । देव समाश्वसिहि समाश्वसिहि । देवि कैकेयि समाश्वसिहि समाश्वसिहि ।

दशरथः । केन पुनः कारणेन ।

वामदेवः । येन कैकयकुलस्योपरि दुर्यशःपांशुपातः ।

कैकेयी । ण हु जादभरदस्स दुच्चरिदं किंपि अथवा दसरहणरिन्दो से पिदा † ।

वामदेवः । शान्तं क्व पुनः सुधादीधितिरातपस्यन्दी ।

दशरथः । स्फुटं कथय पर्याकुलोऽस्मि ।

वामदेवः ।

कैकयस्य सुतया वरयुग्मं
याचितोऽसि भवता च वितीर्णम् ।

दशरथः । किं तत् ।

वामदेवः ।

यत्किलास्तु भरतो युवराजः

कैकेयी । हा हदम्हि मन्दभाइणी * ।

दशरथः । किम् ।

वामदेवः ।

स प्रयातु वनमन्त्र च रामः ॥ १४ ॥

दशरथः । हा हा धिक् कष्टम् ।

नरेन्द्रो वृद्धः स्त्रीवश इति मयि न्यस्तमयशो
निकामं दौरात्म्यं स्रवति मलिनिता केकयसुता ।
मतं तस्याप्यस्मिन्निति च भरते लक्ष्म लिखितं
न जाने वा कोऽस्मिन् रघुकुलकलङ्कः कविरभूत् ॥ १५ ॥

क्व पुनस्तौ कैकेयीदशरथौ ।

वामदेवः । रामभद्रं प्रवास्यापसृतौ ।

कैकेयी । ता किंति ण वारिदो वच्छो मे रामभद्दो † ।

वामदेवः । निवेदितवृत्तान्तः सपादोपग्रहं वारितोऽपि तदिदमभिधाय स्थितः ।

मया मूर्ध्नि ग्राह्यं पितुरिति धृतं शासनमिदं
स यद्वा रक्तो वा भवतु भगवान् वा रघुपतिः ।
निवर्तिष्ये सोऽहं भरतकृतरक्षां निजपुरीं
समाः सम्यङ्नीत्वा वनभुवि चतस्रश्च दश च ॥ १६ ॥

दशरथः । हाहा वत्स रामभद्र अति हि नामासाम्प्रतिकता यत्त्वयापि गुरुजनाज्ञातिक्रमः । कैकेयि हा हतासि तोए दुज्जसदाई सुट्ठु चउत्थी चन्दो दिट्ठोसि ‡ ।

कैकेयी । सअलदुक्खं भअवदि रामभद्दसासुए सीदाजणणि वसुन्धरे रन्धं देहि अअं पवइज्जणो माआदि रहुउलवहूसमागमे पडिक्खिददा ण जीविदुं पारिस्सं । हा जाद भरद अलिअदुज्जसकलङ्किदा कधं दे मुहं दंसइस्सं हा ताद संभाविदोऽसि दुक्खेण हा अम्ब विडम्बिदाऽसि हा कोसल्ले सल्लिदाऽसि हा सुमित्ते सरीरमेत्तीकदाऽसि § इति रोदिति ।

---

* प्रणमामि भवतीं सरयूं या पूर्वं दृश्यमाना नयनपीयूषगण्डूषप्रावर्तं कुर्वती आसीत् सा साम्प्रतं हालाहलकवलप्रतिरूपा प्रतिभाति । किं पुनर्मेऽयोध्यादर्शनेऽप्यकारणपर्याकुलं हृदयं तत् यदि वत्सानां रामभद्रभरतलक्ष्मणशत्रुघ्नानां वधूनां च सीतामाण्डवीऊर्मिलाश्रुतकीर्तीनां दर्शनेन निर्वापयिष्यति ।

† न खलु जातभरतस्य दुश्चरितं किमपि । अथवा दशरथनरेन्द्रोऽस्य पिता ।

* हा हतास्मि मन्दभागिनी ।

† तत् किमिति न वारितो वत्सो मे रामभद्रः ।

‡ त्वया दुर्यशोदायी सुष्ठु चतुर्थी चन्द्रो दृष्ट इति ।

§ भगवति रामभद्रश्वश्रूः सीताजननि वसुन्धरे रन्ध्रं देहि अयं प्रव्रजितजनो याचते । रघुकुलवधूसमागमे प्रतिक्षिप्ता न जीवितुं पारयिष्ये । हा जात भरत अलोकदुर्यशःकलङ्किता कथं ते मुखं दर्शयिष्यामि । हा तात संभावितोऽसि दुःखेन । हा अम्ब विडम्बितासि । हा कौशल्ये शल्यितासि । हा सुमित्रे शरीरमात्रीकृतासि ।

Digitized by Google

ततः प्रविशतः कौशल्यासुमित्रे ।

कोशल्या । सहि सुमित्ते अलं संतप्पिदेण संपदं सो आद-रामभद्दो दिणणाहस्स उले उप्पण्णो जेण मायागुरुजणस्स वि सासणणिव्वाहणेण बालराहवेण भविअ जरापरिणदराहवाणं पच्छाकदं चरिदम् * ।

सुमित्रा । अइ अलिकावट्ठम्हसुत्थिदे किदं वाआवित्थरेण एहि पढमपलत्तदूसहमहादुक्खं महाराअं संभाविम्ह † इति परिक्रामतः ।

दशरथः । अवस्थोचितं परिक्रम्य अयि हृदय सान्त्वविलायं विलीयस्व कौशल्यासुमित्रे दृश्येते ।

The expression काशिपुरीं वाराणसीं, in the *Daśa-kumára-charita*, means "Váráṇasí, a city of the Káśis." In the subjoined verse, from the *Rámáyaṇa*, *Uttara-káṇḍa*, XXXVIII., VI., 17, Váráṇasí is qualified by an expression meaning, the commentator says, "a city in the country of the Káśis:"

सत्ववानद्य काशेयपुरीं वाराणसीं व्रज ।

Finally, in the *Mahábhárata*, *Ádi-parvan*, *śl.* 4093, 4094, we read of the king of the Káśis as dwelling in the city of Váráṇasí.

[2] The oldest among them, probably, is Páṇini, IV., II., 116; with which compare IV., II., 113. Then come the *Śatapatha-bráhmaṇa*, the *Bṛihad-áraṇyaka* and *Kaushítaki-bráhmaṇa Upanishads*, etc., etc. In some of these works, the substantive is involved in the adjective Káśya. This word, like Káśika,—for which see the *Mahábhárata*, *Udyoga-parvan*, *śl.* 5907,—means, etymologically, Káśian. But scholiasts on old writings explain it, and rightly, to signify "king of the Káśis." Káśirája and Káśya are used of the same person in the *Bhagavad-gítá*, I., 5, 17.

The *Ṛigveda* affords no warrant for connecting with the Káśis any person whom it mentions. It speaks of Divodása, and it speaks of Pratardana; but only in later literature are they called father and son, and rulers of the Káśis; and, where Kátyáyana, in his *Ṛigvedánukramaṇiká*, characterizes the latter as *Káśirája*, he may have expresssed himself metachronically, under the influence of a modern tradition which he and his contemporaries accepted. As to the former, we find, indeed, in post-vaidik books, two Divodásas; into whom a single personage seems to have been parted. One of them is son of Badhryaśwa, as in the *Ṛigveda*; but it is the other, the son of Bhímaratha, and father of Pratardana, that is called king of the Káśis. It may be added, that there is no ground for considering Badhryaśwa and Bhímaratha to be two names of one and the same person. See the English *Vishṇu-puráṇa*, Vol., IV., pp. 33, and 145, 146. Badhryaśwa, not Bahwaśwa, is the reading of the *Vishṇu-puráṇa*. Correct accordingly Professor Wilson's translation of the *Ṛigveda*, Vol. III., p. 504, note 1. See, further, the *Mahábhárata*, *Anuśásana-parvan*, Chapter XXX.

[1] A Káśa is named in the *gaṇa* on Páṇini, IV., I., 110.

According to my five wretched copies of the *Váyu-puráṇa*, Káśa was followed by Káśayya (???), Ráshṭra (??), Dírghatapas, Dharma, Dhanwantari, Ketumat, Bhímaratha, Divodása,

The *Brahmáṇḍa-puráṇa* has, in one place, Káśa and Káśiya, as sire and son, and, a little further on, in lieu thereof, Káśika and Káśeya. Káśika, as evolving Káśeya, must be considered as an optional elongation of Káśi.

[2] See the English *Vishṇu-puráṇa*, Vol. IV., pp. 30-40.

We read, in the *Váyu-puráṇa*:

दिवोदास इति ख्यातो वाराणस्यधिपोऽभवत् ।
एतस्मिन्नेव काले तु पुरीं वाराणसीं पुरा ।
शून्यां निवेशयामास क्षेमको नाम राक्षसः ॥

Then follows an account of the expulsion of Divodása from Váráṇasí. To all appearance, he was the only king of the Káśi family that had to do with that city.

[3] See the *Vishṇu-puráṇa*, Book V., Chapter XXXIV.

[4] Its site was near Allahabad. Púru's capital was Pratishṭhána, in the kingdom of the Káśis, according to the *Rámáyaṇa*, *Uttarakáṇḍa*, LIX., 18, 19:

त्रिदिवं स गतो राजा ययातिर्नहुषात्मजः ॥
पूरुश्चकार तद्राज्यं धर्मेण महतावृतः ।
प्रतिष्ठाने पुरवरे काशिराज्ये महायशाः ॥

Before Púru, his father, Yayáti, "lord of all the Káśis," reigned at Pratishṭhána. *Mahábhárata*, *Udyoga-parvan*, *śl.* 3905 and 3918.

Purúravas received Pratishṭhána in gift from his father Sudyumna. English *Vishṇu-puráṇa*, Vol. III., p. 237. Also see Burnouf's *Bhágavata-puráṇa*, Vol. III., Preface, pp. XCVII.-XCIX.

Pratishṭhána appears as a district of the kingdom of which Kanauj was the metropolis, in comparatively recent times *Vide supra*, col. 1, note 1.

Digitized by Google

the Muhammadan conquest, Benares and the surrounding country appertained to the throne of Kanauj.[1]

Flagrant as is the exaggeration of the Hindus, it is surpassed by that of the Buddhists. The Brahmadatta who figures so largely, in their sacred writtings, as king of Benares[2] very likely was not a myth;[3] but there is no ground for crediting that Gautama ever governed that city at all, notwithstanding that they represent him to have reigned there during nineteen several states of existence.[4] In a similar spirit, they assert, that, at the same capital ruled, in turn, eighty-four thousand monarchs descended from Aśoka.[5] From these specimens it is manifest that the Buddhist scriptures are little to be trusted for throwing light on the history of Benares. That Buddhism, or any Buddhism, or any Buddhist king, ever dominated there is altogether problematical.

Pratishthána is the name of a kingdom, or of part of one, in the *Kathá-sarit-ságara*, VI., 8.

[1] *Vide supra*, p. 139, col. 1, note 1. Several Sanskrit land-grants have been published,—two, among them, by myself,—from which it appears that the kings of the latest dynasty of Kanauj, from Madanapála to the unfortunate Jayachandra, were masters of Benares, like their predecessors; and that they were so is, further, to be inferred from the Muhammadan historians.

In the fifth volume of the *Asiatic Researches* is a professed transcript of a short inscription from a stone, now long disappeared from sight, which was exhumed near Benares, in 1794. We read, therein, of a king of Gauda, Mahípála, father of Sthirapála and Vasantapála; and, at the end, the date 1083. An easy credulity may accept these statements no longer possible of verification; but there still remains the question as to the era of the year 1083, whether Vikramáditya's, or Śáliváhana's—better Sátaváhana's,—or Harsha's, or whose. Not only are the blunders in this inscription, as printed, so many and so gross that we are forbidden to suppose they were in the original; but they provoke the surmise that the interspersed patches of the record which read as if correct may be, to a large extent, equally products of ignorant mistake and misrepresentation. A good deal of weight has been allowed to this inscription; and it has been, from time to time, honoured as a piece of genuine historic evidence. Uncritically enough, I once followed the herd, myself, in this respect: see the *Journal of the Asiatic Society of Bengal*, for 1862, p. 8, first foot-note. It now appears to me rash to see, in it, proof that Benares was subordinate to Gauda, or anything else whatever claiming reliance.

[2] Burnouf's *Introduction à l' Histoire du Buddhisme Indien*, Vol. I., p. 140; and Mr. R. S. Hardy's *Manual of Buddhism*, p. 101.

[3] Two other kings of Benares, unknown to the Hindu chronicles, are spoken of by the Buddhists. Their names are Bhímaśukla and Brihaumanas (??). See *Der Buddhismus*, translated from the Russian of Professor Wassiljew, Part I., p. 54; and the *Foĕ Kouĕ Ki*, p. 230.

[4] Mr. R. S. Hardy's *Manual of Budhism*, p. 134.

[5] So states the *Dípavamśa*. See the *Journal of the Asiatic Society of Bengal*, for 1838, p. 927.

Some relevant details, scant, but interesting as far as they go, are derivable from the itinerary of Hiouen Tsang,[1] a Buddhist pilgrim from China, who visited India in the first half of the seventh century. At that date, as he informs us the kingdom of Váráṇasí had a circuit of eight hundred miles,[2] while its capital measured nearly four miles by somewhat more than one. The inhabitants of the kingdom were, for the most part, Hindus. These were, mainly, worshippers of Śiva; and, among them were two classes of ascetics.[3] Their temples amounted to a hundred, which gave lodgement to about ten thousand devotees.[4] The Buddhists, who are stated to have been much in the minority, kept up thirty religious houses, tenanted by three thousand inmates, all of the Sammatíya sect. In the capital[5] were twenty Hindu temples, and a latten statue of Śiva, a hundred feet in height. We are not apprised whether

[1] *Mémoires sur les Contrées Occidentales*, Vol. I., pp. 353, *et seq.*

[2] "About four thousand *lis*." On the length of the *li*, consult Father Vivien de Saint-Martin, in *Mémoires*, etc., Vol. II., pp. 356-259.

[3] On M. Julien's own showing, both in the *Mémoires* and in the *Méthode*, one of these classes, that of naked mendicants, has the name, in Chinese transliterating, of *ni-kien-t'o*, *i.e.*, *nigjantha*, or even *nigánth*,—a Prakrit word softened from the Sanskrit *nirgrantha*, which the French translation exhibits. Nowhere in his works does M. Julien acknowledge, what he must have known full well, that he constantly puts into the mouth of Hiouen Tsang Sanskrit vocables, where he really used Prakrit. But there was a theory to support; and facts must be fitted to it.

[4] In the first instance, M. Julien wrote: "On compte une centaine de temples des dieux *(Déválayas)* où habitent environ dix mille hérétiques, qui, la plupart, adorent le dieu *Ta-tseu-t'sái-t'ien (Mahéçbara déva)*." And there should seem to be no improvement in his subsequent rendering: "On voit une centaine de temples des Dieux. Il y a environ dix mille hérétiques qui, la plupart, révèrent le dieu *Tatseu-thsaï* (Mahéçvara Déva)."

The Chinese does not, to be sure, as the translator at first expressed it, literally quarter the aforesaid heretics in the temples, or, rather, monasteries; and yet its indefiniteness easily endures this interpretation. So I am informed by Professor Summers, my obligations to whom I shall presently acknowledge in connexion with a matter of graver import. And this construction alone quadrates with the previous context. For Hiouen Tsang makes Benares a large kingdom, and one in which the Hindus much outnumbered the Buddhists; and there must, then, have been many times ten thousand of the former.

One need do no more than collate M. Julien's two versions of Hiouen Tsang's short account of Benares, to be satisfied that the translator's notion of the sense of his original is, sometimes, of the vaguest.

[5] Its name is not specified. Fă Hian—of the beginning of the fifth century, and so an earlier traveller than Hiouen Tsang,—is translated as speaking of "la ville de *Pho lo naï*, dans le royaume de *Kia chi*." *Foĕ Kouĕ Ki*, p. 304.

Digitized by Google

there were any sacred edifices of the pilgrim's fellow-religionists in the capital itself; and the obvious inference is, that there were none, or none worth commemorating. On the monasteries, towers, and reservoirs of the immediate vicinity,[1] hallowed by Buddhist associations, Hiouen Tsang dwells at great length, and with that lingering and minutiose reminiscence which marks a credulous and fervid piety.

That, in very early days, Benares came short of prominent fame is a conclusion apparently indicated by all extant evidence. And so it was during the period of the Buddhists. So far as we know, these sectaries, unlike the Muhammadans, never assumed an attitude of vehement hostility as against the Hindus. Not only was the character of their religion pacific, but at no time during their presence in India[1] were they, however in the ascendant, beyond doubt a majority of the people. It was but natural for their founder, in the course of his mission, to take thought of the centres of population;

[1] Two of these remembrancers of the Buddhist faith, towers at Sárnáth, beyond the Varaná or Burna, are still conspicuous landmarks. The larger of them is called, by the natives, Dhamekh,—a corruption, in all likelihood, of an old word involving *dharma* as its first factor.

On the word of M. Stanislas Julien, Hiouen Tsang locates a monument "au nord-est de la capitale, et à l'occident du fleuve de *Po-lo-ni-sse* (Varáṇaçí)," and tells of a certain monastery at the distance of "environ dix li au nord-est du fleuve de *Po-lo-ni-sse* (Váráṇaçi)." In a foot note, the phrase "à l'occident du fleuve de *Po-lo-ni-sse* (Váráṇaçí)" is explained to signify "à l'occident du Gange."

As the Chinese pilgrim again and again names the Ganges, it seemed to me unlikely that he should anywhere speak of it by a periphrasis like that of "the river of London." I had observed, too, that, instead of "environ," etc., M. Klaproth had written: "Au nord [*sic*] de la ville coule la rivière *Pho lo nă* (Varaná); sur son bord, à dix *li* de la ville," etc.; *Pho lo nă sse* being, as he says just before, Hiouen Tsang's name for Benares. Moreover, in M. Julien's "Liste des Mots Abrégés ou Corrompus," I noticed the entry "*Po-lo-naï*, faute pour *Po-lo-ni-sse* (Váráṇaçi);" and I was thereby, unavoidably misled to the conclusion that *Po-lo-naï*, the so-called shortened or depraved form of *Po-lo-ni-sse*, must be employed in the original, the passage or passages containing it being left undesignated by the translator.

No one can give much thought to the labours of M. Julien without detecting that they were never executed in contemplation of circumspect perusal. Warned by my past experience, and weighing the premisses just recited, I at once suspected management, issuing in the obliteration, in two places, of the river Varaná. I had recourse to Professor James Summers, a distinguished Sinologist; and my suspicion was changed into certitude.

Especially ought M. Julien to have abstained from mending his text here by guess,—above all unconfessedly,—inasmuch as, where the name *Po-lo-ni-sse* is first introduced there is, in the Chinese, a gloss,—delusively appropriated by the translator, as we have seen,—notifying that the kingdom so named had aforetime been called, by mistake, *Po-lo-naï*; the spelling, in passing, of the *Foĕ Kouĕ Ki*. It was not surely, to be expected, that, close to this notification, we should find—and not once only, but twice,—*Po-lo-nie* (Varaṅá), of *Po-lo-ni-sse* (Váráṇasi), had been intended. M. Julien, however, deemed otherwise; and he unavowedly took for granted, besides, that, in both these instances, *Po-lo-nie* was a corruption of the already corrupt *Po-lo-naï*.

Father Vivien de Saint-Martin, in his geographical commentary on M. Julien's translation, is pleased to substitute, or "fleuve de *Po-lo-ni-see* (Váráṇaçi)," "rivière *Po-lo-ni-ssé* Váráṇasi);" and he proceeds to suggest,—as I have shown above, in note 1 to p. 137, col. 2,—that the city of Benares borrowed its appellation from that of this imaginary stream, held, by him, to be identical with the Ἐρέννεσις of Arrian.

More than this, M. Julien, in one of his Indexes, writes "Váráṇaçí, rivière, aujourd'hui Bana, l'Erinésès des Grecs;" and the violence which Father Vivien de Saint-Martin does to his text has, thus, his implied acquiescence. So important an alteration of opinion as that herein involved certainly called for specific acknowledgment in his "Errata Alphabétique," a list which extends to seven pages.

In fine, M. Julien has no Sanskrit authority whatever for his "Váráṇaçí," *i.e.*, Váráṇasí. *Po-lo-ni-sse* may, indeed, stand for Váráṇasí, but—so indeterminate is the Chinese alphabet,—may just as well disguise Váráṇasí, Varáṇasí, Varaṇasí, Báráṇasí and scores more of quadrisyllables. M. Julien allows us an option between *Po-la-na-sse*, *Po-lo-ni-sse* *Po-lo-ni-se* and *P'o-lo-ni-sse*, and between "Váráṇaçí" and "Váráṇaçí." It cannot be proved that Hiouen Tsang did not hear, and do his best to spell, as the names of the river and city, Barṇá—the very word now used,—and Báráṇas. Indeed, the balance of probability is overwhelmingly in favour of the position, that the Indian proper names translettered by Hiouen Tsang were Prakrit, not Sanskrit. Perhaps it is not strange that M. Julien, in drawing up his suicidal *Méthode*, and even earlier, chose to shut his eyes to this presumption. *Vide supra*, p. 140, col. 2, note 3.

"With M. Julien's method, mathematical certainty seems to have taken the place of learned conjectures." So we read, in the *Saturday Review*, Vol. XI., p. 247 (1861), in an article lately republished as Professor Max Müller's. Finding M. Julien's method to be much more precarious than it appears at first sight, I took occasion, some years ago, with ample exhibition of reasons, to reclaim against this heedless hyperbole of panegyric. Continued examination has multiplied my arguments of protest; and I am convinced that one will do well to use M Julien's volumes, valuable and instructive as they are, with constant caution.

That M. Julien, for all the self-complacent air of his *Méthode*, has truck out a single idea, save of detail that was unknown to M. Rémusat and the editors of the *Foĕ Kouĕ ki*, I have not succeeded in discovering.

Memoires sur les Contrées Occidentales, ect., Vol. I., p. 354; Vol. II., pp. 345, 360, 361, 479, 562: *Foĕ Kauĕ Ki*, p. 307: *Histoire de la Vie de Hiouen-Thsang*, ect., pp. 83, 132, 429, 464: *Chips from a German Workshop*, Vol. I., p. 296: *Journal of the Asiatic Society of Bengal*, for 1861, pp. 334-336.

[1] How the Buddhists came to leave India has not yet been shown satisfactorily. The *Sankara-digvijaya* of Mádhava—which professes to abridge an older work, but which, perhaps, has no better basis, for the most part, than oral tradition, eked out by romance,—bears witness, it is true, to a ferocious spirit of opposition to those religionists; and such a spirit, if entertained after they had become strangers to the country, may have been entertained while they were still face to face with Hindus. Nevertheless, we have no historical proof that India was ever the theatre of a Buddhist persecution. Few Sanskrit manuscripts exist that were copied more than four or five centuries ago, at which time Indian

Digitized by Google

and the spots which he and his disciples signalized by their teachings were reverently regarded, in after ages, as consecrated ground. These spots were, however, in the neighbourhood of cities,—as Gayá, Mathurá, Ayodhyá, and Benares, [1]—rather than in the cities themselves; and it was not till after Buddhism had passed its prime on Indian soil, that these towns acquired the special repute which now attaches to them. As for Benares, the attribution to it of peculiar sanctity seems to date from the period of the Puráṇas; [2] and some of these compositions may, unquestionably, claim a very respectable antiquity.

A diligent perusal of the copious inanity of the *Káśí-khaṇḍa* might lead to the discovery of its era,[3] and to other chronological determinations. In so recent a composition, and one having to do with real localities, there must, almost of necessity, be many facts interwoven with the fictions: the attempt to discriminate them would, perhaps, be remunerated. The Benares of the present day offers numerous and varied objects of interest[1] to the contemplation of the devout Hindu; and yet, a very few of them excepted, to speculate touching their age, in reliance on the data hitherto made available, would be much too perilous for prudence.

Buddhists must have been very rare, if there were any at all. Neither among the Hindus nor among the Jainas has one ever observed anything like that liberality of literary curiosity which would be at much pains to perpetuate, by transcription, the holy writ of an antagonist creed; and the fact of a persecution of the Buddhists cannot, accordingly, be deduced from the fact that their books are now but very rarely met with in the possession of natives of India.

Considering the character of their respective beliefs, the Buddhists and the Hindus were under no obligation to be truculently inimical to each other. There is even reason to believe that there were medieval Indian kings who, from motives of policy, adiaphorized between the two great classes of the faithful into which their subjects were divided. For instance, a position of practical indifference in respect of the prevailing superstitions seems to be ascertained with reference to Harsha, king of Kanauj in the seventh century. Hiouen Tsang speaks of him much as if he were a Buddhist; and Báṇa, in the *Harsha-charita*, writes of him as if of a Hindu. Further, we find that monarch figuring as dedicatee of the *Nágánanda*, and also of the *Ratnávalí*, two dramas, severally Buddhist and Brahmanical.

For the *Harsha-charita*, and the *Nágánanda*,—of which I discovered copies, after these works had slumbered neglected for many generations,—see my *Vásavadattá*, Preface, pp. 12-18 and 50-54; and the *Journal of the Asiatic Society of Bengal*, for 1862, pp. 12, 13. See further, on the Buddhists in Southern India, Professor Wilson's *Mackenzie Collection*, Vol. I., Introduction, pp. lxiii.-lxvi.

[1] It is very true, that, all the way between Benares and the towers at Sárnáth, the fields are thickly strewed with bricks and other remains of former buildings. But I am not aware that Colonel Wilford has any authority for speaking of "the old city of Benares, north of the river Burna," which old city, he says, is sometimes called Śoṇitapura. *Asiatic Researches*, Vol. IX., p. 199.

[2] Professor Wilson asserts, characteristically, that Benares "has been, from all time, as it is at present, the high place of the Śaiva worship." Translation of the *Vishṇu-purána*, Book V., Chapter XXXIV., last note.

In the twelfth century, as we learn from the *Haima-kośa*, Benares was already distinguished as Śivapurí, "the city of Śiva;" and we may thence gather that the worship of Śiva especially predominated there at that time.

[3] "There is every reason to believe the greater part of the contents of the *Káśí-khaṇḍa* anterior to the first attack upon Benares by Mahmúd of Ghazní." Thus pronounces Professor Wilson, in his translation of the *Vishṇu-puráṇa*, Vol. I., Preface, pp. LXXII., LXXIII. It would be interesting to be put in possession of even a single reason out of those to which the Professor alludes.

[1] Unless we are deceived by identity of names, scores of these are enumerated in the *Káśí-khaṇḍa*.

In the last chapter of that work, cycles of pilgrimages are prescribed, as means to particular ends, precisely as at this hour. Thus: there is one round to warrant the practitioner from liability to further metempsychosis; another, to secure the attainment of Rudrahood; a third, to ensure emancipation before death. These for samples.

Saints whose aspirations are less ambitious are promised store of good things in future for repeating the *Panchatírthiká* daily. This consists in: (1) ablution, without disrobing, in the pool of Chakrapushkariṇí, with a propitiation-service addressed to the gods, manes, Brahmans, and beggars; (2) reverential salutation to Áditya, Draupadí, Vishṇu, Daṇḍapáṇi, and Maheśwara; (3) visual contemplation of Ḍhuṇḍhivináyaka; (4) a dip of the fingers in the Jnánavápí well with adoration of Nandikeśa, Tárakeśa, and Mahákáleśwara and, finally, (5) a second visit to Daṇḍapáṇi.

Of seven pre-eminently holy places Káśí is named first; the others being Kántí, Máyá, Ayodhyá, Dwáravatí, Mathurá, and Avantiká:

काशी कान्ती च मायाख्या त्वयोध्या द्वारवत्यपि ।
मथुरावन्तिका चैताः सप्त पुर्यो ऽत्र मोक्षदाः ॥

VI., 62.

Máyá is Hurdwar. I am not sure whether or not Kánti is the same as Kánchí. The rest are well known. These places are, all, named in the *Ayeen Akbery*, in Mr. Gladwin's translation of which,—Vol. III., pp. 255, 256,—Mathurá and Avantiká are disguised as Mehtra and Ownitka.

At least thirty or forty epithetical designations of Benares are scattered through the *Káśí-khaṇḍa*. Half of that number, or thereabouts, from this or some other work or works have been noted by native lexicographers. One of them, Panchanadatírtha, "the quinquamnian resort," refers to five rivers, the Kiraṇá, Dhútapápá, Saraswatí, Gangá, and Yamuná:

किरणा धूतपापा च पुण्यतोया सरस्वती ।
गंगा च यमुना चैव पञ्च नद्यो ऽत्र कीर्त्तिताः ॥
अतः पञ्चनदं नाम तीर्थं त्रैलोक्यविश्रुतम् ।

LIX., 114, 115.

Four of these streams, in small quantities, are believed to emerge into the Ganges, through subterraneous channels just in front of the Panchagangá landing.

(To be continued.)

ADVERTISEMENT.

NOW READY.

PRASANNARAGHAVA a Sanskrit Drama, in 7 Acts, by JAYADEVA, carefully edited with Sanskrit renderings of the Prakrit passages, by PUNDIT GOVINDA DEVA SASTRI, Professor of Hindú Astronomy in the Benares Sanskrit College.

Price Rs. 1-12 excluding postage. To be had direct from the Editor of the book.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 31. Benares December 1st, 1868. Vol. III.

॥ ईश्वरप्रत्यभिज्ञासूत्रविमर्शिन्याः ॥

क्रियाधिकारस्यावशिष्टोंशः । आगमाधिकारस्या-
वशिष्टान्तिमांशमाह्निकद्वयं च ।

ननु प्रयोज्यप्रयोजकसत्ताकत्वलक्षणापेक्षा यदि स्वात्मैकनिष्ठत्वे नोपपद्यते, तर्हि कार्यकारणयोस्तादात्म्यवादिनां सांख्यानां मते सा संभवत्येव, तत्किं चैतन्यविजृम्भात्मककर्तृवादसमर्थनेनेत्याशङ्क्याह ।

(१७) परस्परस्वभावत्वे कार्यकारणयोरपि ।
एकत्वमेव भेदे हि नैवान्योन्यस्वरूपता ॥

यदि बीजस्याङ्कुरः स्वभावस्तर्ह्यङ्कुर एव न बीजं स्यात्किंचिद्विपर्ययो वा स्यादिति किं कारणं किं वा कार्यम्, अथान्यद्बीजमङ्कुरोऽन्यस्तर्हि न परस्परात्मकत्वं, भेदाभेदौ ह्येकदैकविषयौ विरुद्धावेव ॥

नन्वेकमपि बीजमङ्कुरादिविचित्रमवभातं दीर्घदीर्घपरामर्शशालिभिः स्रोतोवदविच्छिन्नस्वरूपमेव निर्बाधं प्रत्यवमृश्यते, तथा च क्व गतं बीजमिति प्रश्ने वक्तारो भवन्ति, न क्वचिद्गत,मङ्कुरात्मना वर्तते ऽङ्कुरीभूतमयमङ्कुरस्तदि,त्येवं प्रधानं महदादिधरान्तीभूतं यावद्वितततीभूतमनन्तसर्गप्रलयपरम्परात्मतां प्राप्तमिति विततयाहिणी प्रतीतिर्भोगाभिनिवेशवशात्तु कार्यकारणतापरिकल्पनं तस्यैव भावस्य विशसनप्रायमित्याशङ्क्याह ।

(१८) एकात्मनो विभेदश्च क्रियाकालक्रमानुगा ।
तथा स्यात्कर्तृतैवैवं तथा परिणमत्तया ॥

इह दीर्घदर्शिनां प्रत्यक्षानुमानागमान्यतमप्रमाणमूलां प्रत्यभिज्ञामाश्रित्य तदेवेदं सुखदुःखमोहसाम्यमनन्तप्रकारवैषम्यावलम्बनेन विश्वीभूतमिति समर्थ्यते, तच्च प्रत्यभिज्ञाबलेन यदेकात्मकमेकस्वभावं तस्य यो भेदोऽन्यान्यरूपता इयमेव सा क्रियोच्यते, यतः काललक्षणेन क्रमेणानुगता, ते ह्यन्यान्यस्वभावा न युगपद्भान्ति, पूर्वापरीभूतरूपतैव च क्रियोच्यते, यत एवं क्रिया तथेति तेन प्रकारेण प्रधानादेः क्रियाविशेषलक्षणेन कर्तृतैव स्यात्, न तु शुष्कं कारणतामात्रम्, यतो हेतोस्तथेति तेनतेन महदादिप्रकारेण सततमेव क्रमिकां तथाभासनरूपां परिणामलक्षणां क्रियामाविशतः परिणमता किंचिद्रूपं परिवर्ज्यं त्यक्त्वा व्यावर्त्यमनुवर्तयितव्यं च व्यवस्थाप्य निर्वर्त्यमानतृतीयरूपं प्रहृता प्रधानादेस्तया हेतुभूतया ॥

ननु प्रधानं परिणामक्रियायां कर्तृरूपमियता समर्थितमिति को दोषः नहि पुरुषवदस्याः कर्तृत्वमिष्यते इत्याशङ्क्याह ।

(१९) न च युक्तं जडस्यैवं भेदाभेदविरोधतः ।
आभासभेदादेकत्र चिदात्मनि तु युज्यते ॥

एवमित्यभिन्नरूपस्य धर्मिणः सततप्रवहद्द्रुततरधर्मभेदसद्भेदस्वातन्त्र्यलक्षणं परिणमनक्रियाकर्तृकत्वं यदुक्तं, तत्प्रधानादेर्न युक्तं, जडत्वात् । जडो हि नाम परिनिष्ठितस्वभावः प्रमेयपदपतितः, स च रूपभेदाद्भिन्नो व्यवस्थापनीयो नीलपीतादिव,देकस्वभावत्वाच्चाभिन्नो नीलवत्, न तु स एव स्वभावो भिन्नश्चाभिन्नश्च भवितुमर्हति, विधिनिषेधयोरेकत्रैकदा विरोधात् । कश्चित्स्वभावो भिन्नः कश्चित्त्वभिन्न इति चेत्, द्वौ तर्हीमौ स्वभावावेकस्य स्वभावस्य भवेताम्, न चैवं युक्तं, ।

Digitized by Google

भेदाभेदव्यवस्थैवमुक्किया सर्ववस्तुषु ।

इति न्यायात् । एवं जडस्येदमिति परिनिष्ठिताभासतया सर्वतः परिच्छिन्नरूपत्वेन प्रमेयपदपतितस्य नायं स्वभावभेद एकत्वे सत्युपपद्यते । यत्तु प्रमेयदशापतितं न भवति, किं तु चिद्रूपतया प्रकाशपरमार्थरूपं चिदेकस्वभावं स्वच्छं तत्र भेदाभेदरूपतोपलभ्यते, अनुभवादेव हि स्वच्छस्यादर्शादेरखण्डितस्वस्वभावस्यैव पर्वतमतङ्गजादिरूपसहस्रसंभिन्नं वपुरुपपद्यते, न च रजतद्विचन्द्रादि यथा शुक्तिकैकचन्द्रस्वरूपतिरोधानेन वर्तते तथा दर्पणे पर्वतादि, दर्पणस्य हि तथावभासे दर्पणतैव सुतरामुन्मीलति निर्मलोऽयमुत्कृष्टो ऽयं दर्पण इत्यभिमानात्, नहि पर्वतो बाह्यस्तत्र संक्रामति, स्वदेशत्यागप्रसङ्गादस्य, न चास्य पृष्ठे ऽसौ भाति, दर्पणानवभासप्रसङ्गात्, न च मध्ये, निबिडकठिनसप्रतिघस्वभावस्य तत्रानुप्रवेशसंभावनाभावात्, न पश्चात्तत्रादर्शनात्, दूरतयैव भासनात्, न च तन्निपतनोत्फलितप्रत्यावृत्ताश्चाक्षुषा मयूखाः पर्वतमेव गृह्णन्ति, प्रतिबिम्बबिम्बयोरुभयोरपि पर्वतपार्श्वगतदर्पणावभासे ऽवलोकनात् । तस्मान्निर्मलतामाहात्म्यमेतद्, यदनन्तावभाससम्भेदश्चैकताननता च । गिरिशिखरोपरिवर्तिनश्च एकत्रैव बोधे नगरगतपदार्थसहस्राभास इति चिद्रूपस्यैव कर्तृत्वमुपपन्नमभिन्नस्य भेदावेशसहिष्णुत्वेन क्रियाशक्त्यावेशसम्भवात् ॥

नन्वेतावता विज्ञानमेव ब्रह्मरूपमिमां विश्वरूपतावैचित्र्यीं परिगृह्णातु, किमीश्वरतापरिकल्पनयेत्याशङ्क्याह ।

(२०) वास्तवेपि चिदेकत्वे न स्यादाभासभिन्नयोः ।
चिकीर्षालक्षणैकत्वपरामर्शं विना क्रिया ॥

चिद्रूपस्यैकत्वं यदि वास्तवं, भेदः पुनरयमविद्योपप्लवादित्युच्यते, कस्यायमविद्योपप्लव इति न संगच्छेत । ब्रह्मणो हि विद्यैकरूपस्य कथमविद्यारूपता, न चान्यः कश्चिदस्ति वस्तुतो जीवादिर्यस्याविद्या भवेत्, अनिर्वाच्येयमविद्येति चेत्कस्यानिर्वाच्येति न विद्मः, स्वरूपेण भाति च न च निर्वाच्येति किमेतत्, युक्त्या नोपपद्यत इति चेत्, संवेदनतिरस्कारिणी का खलु युक्तिर्नाम । अनुपपत्तिश्च भासमानस्य कान्या भविष्यति, सद्रूपमेव ब्रह्माभिन्नं चकास्त्यविकल्पेन, विकल्पबलात्तु भेदोऽयमिति चेत्कस्यायं विकल्पनव्यापारो नाम, ब्रह्मणश्चेदविद्यायोगः, न चान्योऽस्ति, अविकल्पकं च सत्यं विकल्पकमसत्यमिति कुतो विभागः, भासमानत्वस्याविशेषात्, भासमानोऽपि भेदो बाधित इति चेदभेदोऽप्येवं, भेदभासनेन तस्य बाधात्, विपरीतसंवेदनोदय एव बाधो नान्यः कश्चित्, बाधो ऽपि च भासमानत्वादेव सचान्यत इति भेदोपि भासमानः कथमविद्या,- भासनमवधीर्यागमैकप्रमाणकोयमभेद इति चेदागमोपि भेदात्मक एव वस्तुभूतः प्रमातृप्रमाणप्रमेयविभागश्चेति न किं चिदेतत् । तस्माद्वास्तवं चिदेकत्वमभ्युपगम्यापि तस्य कर्तृत्वलक्षणा भिन्नरूपसमावेशात्मिका क्रिया नोपपद्यते । परामर्शलक्षणं तु स्वातन्त्र्यं यदि भवति तदा उपपद्यते सर्वं, परामर्शो हि चिकीर्षारूपा इच्छा, तस्यां च सर्वमन्तर्भूतं निर्मातव्यमभेदकल्पेनास्तीत्युक्तं "स्वामिनश्चात्मसंस्थस्य"इत्यत्र, तेन स्वात्मरूपमेव विश्वं सत्यरूपं प्रकाशात्मतापरमार्थमत्रुटितप्रकाशाभेदमेव सत्प्रकाशपरमार्थेनैव भेदेन प्रकाशयति महेश्वर इति तदेवास्यातिदुर्घटकारित्वलक्षणं स्वातन्त्र्यमैश्वर्यमुच्यते । आभासभिन्नयोरिति क्रियापेक्षा सम्बन्धसामान्ये षष्ठी, पश्चाद्यथोचितं विभज्यते, आभासेन भिन्नो जडाभासो जडो घटादिः कर्मरूपः, चिदाभासः कर्तृरूप, इति तयोः क्रिया एकस्य क्रियमाणत्वमपरस्य कर्तृत्वं न भवेत् चिकीर्षारूपेण निर्मातव्यभाववर्गाभेदपरामर्शात्मना विना, एका चासौ क्रिया कथं भिन्नयोस्स्वभावभूता भवेत्, कार्यकारणताप्रस्तावात् । कर्तृकर्मणी उक्ते, कारकान्तराण्यपि तु एककर्तृत्वानुप्रवेशीनि परमार्थतो ऽन्यथा करणादौ भिन्ने कारकजाते कथमभिन्ना सा, यदि वा आभासेन यौ भिन्नौ जडचेतनौ तयोर्या चिकीर्षा एकास्यैष्यमाणता परस्यैषितृता तत्स्वभावत्वमेकपरामर्शं विनेति, यद्वा आभासभिन्नयोरहमिदमिति यः परामर्श एकविश्रान्तिरूपश्चिकीर्षात्मा तं विनेति, आभासभिन्नयोरैक्यपरामर्शं विना चिकीर्षालक्षणा कथं क्रियेति वा । एवं क्रियां वा चिकीर्षां वा परामर्शं वा ऽपेक्ष्य षष्ठी, नित्यसापेक्षत्वात्समासः ॥

एतदुपसंहरति ।

(२१) इत्थं तथा घटपटाद्याभासजगदात्मना ।
तिष्ठासोरेवमिच्छैव हेतुता कर्तृता क्रिया ॥

यतो न जडस्य कारणता न कर्तृता, तथा ऽनीश्वरस्याचेतनस्यापि इत्यनेनैव प्रकारेणेदं जातं, य एव तथा चिकीर्षुस्तस्यैव सा चिकीर्षा बहिष्पर्यन्ततां प्राप्ता क्रियेत्यभिधीयते, सैव च कर्तृता तदेव हेतुत्वं, नान्यत्किं चित् । तेन घटस्तिष्ठतीत्ययमर्थः, घटात्मना तिष्ठासुः स्वातन्त्र्यात्स्वात्मभ्युपगच्छंस्तद्रूपमसहमानो यो महेश्वरः प्रकाशः स तिष्ठतीति, घटपटाद्याभासरूपजगत्तदात्मना यस्तथेति तेनतेन तज्जन्मद्रतजन्मस्थित्यादिभावविकारतद्भेदक्रियासहस्रेण यः स्थातुमिच्छुः स्वतन्त्रस्तस्य या एवमिति विचित्ररूपा इच्छा सैव क्रियेति संबन्धः । तेन महेश्वर एव भगवान्विश्वकर्तेति शिवम् ॥ २१ ॥

॥ आदितः सूत्रश्लोकाः १४१ व्याख्याताः ॥

Digitized by Google

इति श्रीमदाचार्याभिनवगुप्तविरचितायामीश्वरप्रत्यभिज्ञा-सूत्रविमर्शिन्यां क्रियाधिकारे कार्यकारणतत्त्वनिरूपणं चतुर्थमाह्निकम् ॥ ४ ॥

॥ इति द्वादशमाह्निकम् ॥

॥ संपूर्णश्चायं क्रियाधिकारो द्वितीयो विमर्शः ॥

॥ श्रीः ॥

॥ अथागमाधिकारः ॥

यं प्राप्य सर्वागमसिन्धुसंघः
पूर्णत्वमभ्येति कृतार्थतां च ।
तं नौम्यहं शाम्भवतत्त्वचिन्ता-
रत्नौघसारं परमागमाब्धिम् ॥
शिवाच्चिन्मात्राख्यादतिसिततनोरागतमथो
शिवायास्तन्मूर्तेरनुवदनमामर्शवपुषः ।
मतं सद्भिः सर्वैर्विमलमिह गाङ्गेयजलवद्
बहुस्रोतोयुक्तं परममिह शास्त्रं हृदि भजे ॥
श्रीमत्सदाशिवोदारप्रारम्भं वसुधान्तकम् ।
यदन्तर्भाति तत्त्वानां चक्रं तं संस्तुमः शिवम् ॥

एवमधिकारद्वयेन ज्ञानक्रियास्वरूपं वितत्य निर्णीतम्, अथेदं वक्तव्यं, क्रिया नाम विश्वपदार्थावभासनलक्षणेत्युक्तं समनन्तरमेव, के च ते विश्वे पदार्था इति, तत्राभासरूपा एव जडचेतनलक्षणाः पदार्थास्ते च कियता रूपेण संगृह्यन्ते, नहि प्रत्यक्षं मायाप्रमातुः सर्वत्र क्रमते, अनुमानमप्येवं, नहि यद्यदस्ति तत्तत्र लिङ्गव्याप्त्यादिग्रहणसंभवः, आगमस्त्वपरिच्छिन्नप्रकाशात्मकमाहेश्वरविमर्शपरमार्थः किं न पश्येदिति तदनुसारेण पदार्थनिर्णयं विश्वप्रमेयीकरणप्रतिलब्धरविश्वोत्तीर्णप्रमातृपदहृदयङ्गमीकरणाभिप्रायेण निरूपयितुमाचार्य आगमाधिकारं तृतीयमारभते । तत्र श्लोकैकादशकेन "एवमन्तर्बहिर्वृत्ति"रित्यादिना "स्थूलसूक्ष्मत्वभेदत" इत्यन्तेनागमसिद्धं शिवादिधरणीप्रान्तमेकैकाभासरूपतात्मकं दर्शनान्तरे सामान्यमिति यद्व्यवहृतं यस्य सामानाधिकरण्ययोगादनन्तस्वलक्षणावभासनव्यूहविशेषपूर्वकः समस्तोऽयं शरीरभुवनादिविभवस्तं परमेश्वरागमसिद्धं युक्त्याऽप्यनुगतं प्रतीकतस्तत्त्वग्रामं दर्शयतीत्याह्निकतात्पर्यम् ॥

तत्राधिकारसंगतिं योजयन्पूर्वपक्षप्रतिक्षेपं चोपसंहरञ्शिवतत्त्वस्वरूपमेव दर्शयितुमाह ।

(१) एवमन्तर्बहिर्वृत्तिः क्रिया कालक्रमानुगा ।
मातुरेव तदन्योन्यावियुक्ते ज्ञानकर्मणी ॥

एवमिति, यतः परदर्शनोक्तः कार्यकारणभावो जडरूपप्रतिष्ठो न कथं चिदुपपन्नः, किं तु चिद्रूप एवान्तर्बहिरात्मना प्रकाशपरमार्थेनापि वपुषा तथा भासनरूपेण वर्तमानः कालक्रममाक्षिपन्क्रियाभिधीयते, तस्य प्रमातुरेव ज्ञानशक्तिवपुषो धर्मस्तदिति, तस्मादवियुक्तं ज्ञानं क्रिया च, ज्ञानं विमर्शानुप्राणितं विमर्श एव च क्रियेति, न च ज्ञानशक्तिविहीनस्य क्रियायोग इति, तदेतदवियुक्तज्ञानक्रियारूपं क्रियाद्वारेण सकलतत्त्वराशिगतसृष्टिसंहारशतसहस्रप्रतिबिम्बनसहिष्णु यत्तदुपदेशभावनादिषु तथा भासमानमनाभासरूपमपि वस्तुतः शिवतत्त्वमित्युक्तं भवति ॥

नन्वेवंभूतं शिवतत्त्वं चेत्तर्हि ततोऽनतिरिच्यमानमिदं विश्वमिति किमन्यत्तत्त्वं स्यात्, एकचित्तत्त्वविश्रान्तौ च तत्त्वानां कथं क्रमो भवेद्देशकालाभेदादेवमेवैतत् ।

(२) किं त्वान्तरदशोद्रेकात्सादाख्यं तत्त्वमादितः ।
बहिर्भावपरत्वे तु परतः पारमेश्वरम् ॥

यद्यप्येकमेव शिवतत्त्वं, तथापि तदीयमेव स्वातन्त्र्यं स्वात्मनि स्वरूपभेदं तावत्प्रतिबिम्बकल्पनतया दर्शयति, स्वरूपवैचित्र्यमेव देशकालक्रमः, मूर्तिक्रियावैचित्र्यमयो ह्यसौ, ततश्चान्तरी ज्ञानरूपा या दशा तस्या उद्रेकावभासने सादाख्यं सदाख्यायां भवं, यतः प्रभृति सदिति प्रख्या, सदाख्यायाश्च सदाशिवशब्दरूपाया इदं वाच्यं तत्त्वं सृष्टिक्रमोपदेशादौ प्रथममुचितं तत्सादाख्यं तत्त्वं, बहिर्भावस्य क्रियाशक्तिमयस्य परत्वे उद्रेकाभासे सति पारमेश्वरं परमेश्वरशब्दवाच्यमीश्वरतत्त्वं नाम, ततश्च सादाख्यस्य पश्चादुचितावभासनम् । एतदुक्तं भवति, इह तस्य भावस्तत्त्वमिति भिन्नानां वर्गाणां वर्गीकरणनिमित्तं यदेकमविभक्तं भाति तत्त्वं, यथा गिरिवृक्षपुरप्रभृतीनां नदीसरःसागरादीनां च पृथिवीरूपत्वम् अब्रूपत्वं चेति, ततश्च शुद्धचैतन्यवर्गो यो मन्त्रमहेश्वराख्यस्तस्य प्रथमसृष्टावस्माकमन्तःकरणैकवेद्यमिव व्यामलप्रायमुन्मीलितमात्रचित्रकल्पं यद्भावचक्रं संहारे च ध्वंसोन्मुखतया तथाभूतमेव चकास्ति प्रतिबिम्बप्रायतया तस्य चैतन्यवर्गस्य तादृशि भावराशौ तथा प्रथनं नाम यच्चिद्विशेषत्वं तत्सदाशिवतत्त्वम् । मन्त्रेश्वरादिरूपस्य तु चैतन्यराशेः स्फुटीभूतमस्मद्बहिष्करणसरणिसम्प्राप्तभाववर्गप्रतिबिम्बतया भाति तस्य तु तत्तथाप्रथनमीश्वरतत्त्वम् । यस्तु सदाशिवभट्टारक ईश्वरभट्टारकश्च ध्येयोपास्यादिरूपतया स ब्रह्मविष्णुरुद्रतुल्यः पृथगेव मन्तव्यो न तु नामसारूप्याद्भ्रमितव्यम् । यथाहुरेके, "ब्रह्मविष्णुरुद्रा अपि तत्त्वमध्ये किं न गणिता" इति ॥

नामधेयान्तरमप्यत्र तत्त्वद्वये दर्शयति ।

Digitized by Google

(३) ईश्वरो बहिरुन्मेषो निमेषान्तः सदाशिवः ।

यस्योन्मेषादुदयो जगत इत्यत्र ईश्वरतत्त्वमेवोन्मेषशब्देनोक्तं, विश्वस्य हि स्फुटत्वं बाह्यत्वमुन्मेषणं, निमेषणं त्वस्फुटत्वापादनम् अन्ताद्रूपतोद्रेचनमिति निमेषः सदाशिवतत्त्वं, यतो जगतः प्रलय इति, शुद्धोयं स्पन्दः परमेश्वरस्याचलस्यापि अप्ररूढरूपान्तरापत्तिलक्षणः किंचिच्चलनात्मतया स्फुरद्रूपत्वात् । परमेश्वरस्य हि परमार्थत एताः शक्तयो यस्तत्त्वग्रामः का चित्तु शक्तिरन्यबहुतरशक्तिक्रोडीकारं कुर्वती निकटत्वादुपास्या घटस्येव घटत्वात्मिका, का चिदन्यापेक्षिणी स्वरूपमात्रनिष्ठा दूरा घटस्येव सत्तात्मिका । एवं निमेषोन्मेषशक्ती एव सदाशिवेश्वरौ, तयोस्त्वधिष्ठातृदेवते अपि तथा नाम ॥

अथ तदधिष्ठातृदेवताद्वयगतं करणं विद्यातत्त्वमाह ।

(४) सामानाधिकरण्यं च सद्विद्याहमिदंधियोः ।

प्रकाशस्य यदात्ममात्रविश्रमणमनन्योन्मुखस्वात्मप्रकाशताविश्रान्तिलक्षणो विमर्शः, सोहमित्युच्यते । यस्त्वन्योन्मुखः स इदमिति, स च स्वप्रकाशमात्रे पुनरप्यनन्योन्मुखरूपे विश्राम्यति परमार्थतः । तत्राद्ये विमर्शेपि शिवतत्त्वम्, द्वितीये विद्येशता, मध्यमे तु रूपे अहमिदमिति समधृततुलापुटन्यायेन यो विमर्शः स सदाशिवनाथे ईश्वरभट्टारके च, इदम्भावस्य ध्यामलाध्यामलताकृतो विशेषः । ये एते अहमिदमिति धियौ तयोर्मायाप्रमातरि पृथगधिकरणत्वमहमिति ग्राहके इदमिति च ग्राह्ये, तन्निरासेन एकस्मिन्नेवाधिकरणे यत्संगमनं सम्बन्धस्वरूपप्रथनं तत्सती शुद्धा विद्या ऽतो ऽशुद्धविद्यातो माया प्रमातृगता या अन्यैव तत्र यदाहमित्यस्य यदधिकरणं चिन्मात्ररूपं तत्रैवेदमंशमुल्लासयति तदा तस्यास्फुटत्वात्सदाशिवता अहमिदमिति इदमहमिति तु इदमित्यंशे स्फुटीभूते ऽधिकरणे यदाहमंशविमर्शं निक्षिप्यति तदेश्वरता इति विभागः ॥

ननु कस्मादियं शुद्धा विद्येत्याह ।

(५) इदम्भावोपपन्नानां वेद्यभूमिमुपेयुषाम् ।
भावानां बोधसारत्वाद्यथावस्त्ववलोकनात् ॥

अवलोकनं प्रथनं, वेदनं विद्या, यथावस्तुत्वं वस्त्वनुसारित्वं च तस्याः शुद्धिः अविपरीतता, वेद्यदशां चोपगतवतामङ्गीकृतवतामत एव इदमित्येवंभूतेनोचितेन परामर्शेनोपपन्नानां परामृश्यमानानां भावानां बोध एव प्रकाशात्मा साररूपं वस्तु, प्रकाशश्चानन्योन्मुखविमर्शात्मा अहमिति । तदेषां यदेव पारमार्थिकं रूपं तत्रैव प्ररूढत्वादहमित्यस्य शुद्धवेदनरूपत्वम् ॥

अधिष्ठातृरूपाद्देवताद्वयात्तत्त्वद्वयं विभक्तमित्येतद्ब्रह्मा प्रतिपादयत्यागमव्यवहारेण ।

(६) अथापरत्वं भावानामनात्मत्वेन भासनात् ।
परताहंतयाच्छादात्परापरदशा हि सा ॥

परत्वं पूर्णत्वमनन्यापेक्षाहमिति, अपरत्वमपूर्णता ऽन्यापेक्षा इदमिति, अत्र च तत्त्वद्वये भावानां ध्यामलाध्यामलरूपाणामुभयांशस्पर्शात्परात्परत्वमिति, वेद्यभावनिष्ठा दशा तत्त्वस्वरूपा तदवभासयितृमन्त्रेश्वरादिशुद्धप्रमातृसंवेद्यवस्तुसारा, या तु तन्निष्ठसंवेदनदशा सा शुद्धा विद्या, तत्प्रमातृवर्गाधिष्ठातृत्वं श्रीसदाशिवेश्वरभट्टारकरूपतेति संक्षेपः ॥

एवमेकेषां मते अहमित्याच्छादको यो भागस्तत्प्रधाना शुद्धविद्या, अन्ये तु मन्यन्ते, योसाविदम्भाग आच्छादनीयस्तस्य यदवभासनं तत्प्रधाना शुद्धविद्या, अन्यथा हि स इदमंशः केन भास्यतां, मायायास्तत्राभावात्, द्वावे वा प्ररोहप्रसङ्गात्, अत एवेयं प्ररोहासहिष्णुं यत इदन्तां भासयति ततः शुद्धा, भासनाच्च विद्येति, तत एवाप्ररूढमायाकल्पत्वान्महामायेयं श्रीरौरवादिगुरुभिरुपदिष्टा, तदेतदाह ।

(७) भेदधीरेव भावेषु कर्तुर्बोधात्मनो ऽपि या ।
मायाशक्त्येव सा विद्येत्यन्ये विद्येश्वरा यथा ॥

मायाप्रमातरि शून्यादिरूपेप्यनुल्लसिते चिन्मात्र एव प्रमातरि कर्तरि च सति चिदेकरूपेष्वपि भावेषु यदचिद्रूपतया तदप्रकाशनलक्षणं स्वातन्त्र्यं सा शुद्धविद्या, मायाशक्त्या तुल्या, वेद्यभागे भेदप्रकाशनात् । न च मायैव, ग्राहकस्य चिन्मात्रभागे तावदविपर्यासनात्, येन प्रकारेण विद्येश्वरा भगवन्तोनन्ताद्या वर्तन्ते, ते हि शुद्धचिन्मात्रगृहीताहम्भावाः, स्वतस्तु भिन्नं वेद्यं पश्यन्ति, यथा द्वैतवादिनामीश्वरः, एवं ग्राहकेंऽशतश्चैतन्यरूपात्परमार्थरूपे ग्राह्यविपर्यासनशक्तिः शुद्धविद्या विद्येश्वराणाम् ॥

परे प्राहुर्भगवतः परमशिवस्याप्ररूढभेदावभासनं सदाशिवेश्वरता, तत्रास्फुटत्वे इच्छाशक्तिरीश्वरस्य व्याप्रियते, स्फुटत्वे ज्ञानशक्तिः, प्ररूढे तु भेदे ग्राह्यविपर्यासेपि ग्राहकचिन्मात्रतायां विद्येश्वरेषु क्रियाशक्तिः, ग्राहकग्राह्यविपर्यासद्वयप्ररूढे तु मायाशक्तिः, सा च पशुप्रमातृषु ग्राहकग्राह्योभयविपर्याससंस्कारेष्वनिवृत्तेपि यदेतद्वस्तुपरमार्थप्रथनं तत्र विद्याशक्तिव्यापारो योगिज्ञानिप्रभृतिष्वपशुप्रमातृषु । तदेतद्दर्शयति ।

(८) तस्यैश्वर्यस्वभावस्य पशुभावे प्रकाशिका ।
विद्याशक्तिः

पशुभावे विपर्यासैकरसत्वलक्षणे पाशनीयत्वे अस्वतन्त्रत्वे दृश्यद्रष्टृदर्शनभेदे सत्यपि ज्ञाते पूर्वोक्तयुक्तिबलेन यदेतदैश्वर्यमुक्तं तस्य या प्रकाशिका परमेश्वरशक्तिर्यद्वशात्के चिदेव ता युक्तीराहृत्य तदाश्वस्तहृदयाः कृतिनो भवन्ति सा विद्याशक्तिः, अयमेव च षडर्धसारादिदृष्टोऽप्यस्याचार्यस्य हृदयमावर्जयति पक्षः, अन्ये इत्यनुक्तेः, एतदानन्तर्यौचित्येन च मायातत्त्वनिरूपणात् ॥

तदाह ।

(९) तिरोधानकरी मायाभिधा पुनः ॥

मायाशक्तिः पुनरचिद्रूपे शून्यादौ प्रमातृताभिमानं प्ररूढं दधती भावानपि चिन्मयाद्भेदेनाभिमानयन्ती सर्वथैव स्वरूपं तिरोधत्ते आवृणुते विमोहिनी सा तिरोधानमत्र न विलयरूपं मन्तव्यं यत्कृत्यपञ्चकमध्ये आगमेषु गण्यते । दीक्षितस्यापि गुरुमन्त्रादिनिन्दनप्रायमपि त्वावरणमेव ॥

तिरोधानमावरणरूपं स्फुटयति ।

(१०) भेदे त्वेकरसे भाते ऽहंतया ऽनात्मनीक्षिते ।
शून्ये बुद्धौ शरीरे वा मायाशक्तिर्विजृम्भते ॥

सुषुप्ते प्रलये नेत्यभावसमाधौ च तावच्छून्यमाकाशकल्पमनात्मरूपं वेद्यभावोचितमहमित्यात्मत्वेन वीक्ष्यते, उच्छ्वसननिःश्वसनादौ वा ऽहमुच्छ्वसामीति प्राणो वायुकल्पः, स्थावरजङ्गमजिघत्सामन्युप्रज्वलनादौ वा प्राण एव तेजःसमुपबृंहितः, स्वच्छोदकाशयकल्पा वेद्यप्रतिबिम्बनवती वा बुद्धिरभिनिविश्यते अन्तरहं वेद्मि दुःख्यहमिति चिन्ताद्यवस्थासु, शरीरमेव पृथिवीप्रायं कृशोऽहमित्यादिदशास्वहमित्यात्मतया भाति, सर्वं चैवेदं शून्यादि वस्तुतश्चिन्मात्रसारमेव माययैव तावदचिद्रूपतया भासितं तथाविधमेव तु सदहमिति संविद्रूपताभिनिवेशस्थानं संपादितमप्रशान्तजडभावमेवेति दुष्करतमवस्तुसम्पादनाऽप्रतीघातरूपा परमेश्वरस्य मायाशक्तिरित्येतद्विजृम्भते इत्यनेन दर्शितं, वाग्रहणेन वेद्यरूपाणां सुतधनदारादीनामप्यहन्ताभिनिवेशविषयत्वमसंख्यातं सूचयति ॥

नन्वचिद्रूपत्वादनात्मा यदि शून्यादिस्तदात्मतया ऽसावभिनिविश्यमानश्चिद्रूप एवेति सर्वज्ञत्वसर्वकर्तृत्वादिविशुद्धैश्वर्यधर्मवस्यादित्याशङ्क्याह ।

(११) यश्च प्रमाता शून्यादिः प्रमेये व्यतिरेकिणि ।
माता स मेयः सन्कालादिकपञ्चकवेष्टितः ॥

स्यादैश्वर्यधर्मयोगः शून्यादेर्यद्यहमित्यभिनिविश्यमानोऽपि मेयतां जह्यात् । तथाहि सति प्रमेयमप्यस्य नीलादि व्यतिरिक्ततया नैव भासेत, यावता यः शून्यादिः प्रमाता कथितः स यावदेव स्वरूपाद्व्यतिरेकाभिमते नीलादौ प्रमेये माता तावदेव स्वयमपि मेयभूत एव सन्माता, मेयं हि मीयमानत्वादेव परिमितमिति तादृशादेव मेयान्तरादुपपन्नव्यतिरेकम् । नन्वेवं चिद्रूपमपरिमितत्वात् परिमितत्वं च शून्यादेरहम्भावस्य यत्तदेव कालादिपञ्चकम्, तथाहि कालः क्रममासूत्रयन् प्रमातरि विजृम्भमाणस्तदनुसारेण प्रमेयेऽपि प्रसरति, योऽहं कृशो ऽभवं स स्थूलो वर्ते भविष्यामि स्थूलतर इत्येवमात्मानं देहरूपं क्रमवन्तमिव परामृशन् तत्सहचारिणि प्रमेये ऽपि प्रसरति भूतादिरूपं क्रमं प्रकाशयति, अस्य शून्यादेर्जडस्य विद्या किंचिज्ज्ञत्वोन्मीलनरूपा बुद्धिदर्पणसंक्रान्तं भावराशिं नीलसुखादिं विविनक्ति, कला किंचित्कर्तृत्वोपोद्बलनमयी कार्यमुद्भावयति किं चिज्जानामि किं चित्करोमीति, अत्र चांशे तुल्ये किंचित्त्वे ऽकस्मादिदमेव किंचिदित्यत्रार्थेऽभिष्वङ्गरूपः प्रमातरि देहादौ प्रमेये च गुणारोपणमय इव रागो व्याप्रियते, न च तद्बुद्धिगतमवैराग्यमेव, तद्धि स्थूलं वृद्धस्य हि प्रमदायां न भवेत्, अपि रागस्तु भवत्येव, बुद्धिधर्माष्टकेऽपि च दृष्टोऽभिष्वङ्गः, अत्रैव कस्मादभिष्वङ्ग इत्ययमर्थो नियत्या नियम्यते, इत्येवं कालविद्याकलारागनियतिभिरोतप्रोतो माययापहृतैश्वर्यसर्वस्वः सन्पुनरपि प्रतिवितीर्णतत्सर्वस्वराशिमध्यगतभागमात्र एवंभूतोऽयं मितः प्रमाता भाति । इदानीमिदं किंचिज्जानान इदं कुर्वाणोऽत्र रक्तोऽत्रैव च यः सोऽहमिति । एषां च भिन्नविषयत्वमपि भवति कदाचित् । यथा अन्यत्र रक्तोऽपि नियत्यान्यत्कार्यते इति । एते च प्रमातृलग्नतयैव भान्तीति तस्यैव शक्तिरूपाः प्रतिप्रमातृभिन्ना एव, कदाचित्तु नटमल्लप्रेक्षादावीश्वरेच्छया एकीभवेयुरपि, नह्येषामीश्वरेच्छातिरिक्तं निजं किमपि जीवितमस्तीत्यसकृदुक्तं वक्ष्यते च ॥

यदुक्तमिदमित्यत्र प्रमेये व्यतिरेकिणि मातेति तत्र तत्प्रमेयं दर्शयति ।

(१२) त्रयोविंशतिधा मेयं यत्कार्यकरणात्मकम् ।
तस्याविभागरूप्येकं प्रधानं मूलकारणम् ॥

यत्कार्यकरणरूपं त्रयोविंशतिप्रकारं यच्च तस्य मूलभूतं कारणं सर्वकार्यकरणाविभागरूपं प्रधानं नाम तत्सर्वं मेयमिति संबन्धः, योगिमन्त्रतदीश्वरप्रभृतीनां हि भूततन्मात्रकरणप्रधानवशीकारयोगित्वात्सर्वमेव प्रमेयम् । संसारिणामपि अनुमानागमादिदिशा प्रमेयमेवेति इयत्प्रमेयम् । कालादयस्तु प्रमेया अपि प्रमातर्येव लग्ना इति प्रमातृशक्तिस्वभावत्वाच्च प्रमेयत्वेनेहावसरे मायाप्रमातृव्यतिरिक्तप्रमेयप्रस्तावात्मनि गणिताः ।

Digitized by Google

वस्तुतो ह्यत्र योयं प्रमातापि प्रमेय एव स तु प्रमात्रीक्रियमाणा आच्छादितप्रमेयताक इहोच्यते ॥

नन्वत्र त्रयोविंशतौ किं कार्यं किं करणमित्याशङ्क्याह ।

(१३) त्रयोदशविधा चात्र बाह्यान्तःकरणावली ।
कार्यवर्गश्च दशधा स्थूलसूक्ष्मत्वभेदतः ॥

प्रमातुः पूर्वं करणोपयोग इत्यत्रादौ त्रयोदश करणानि, तत्र बुद्धिरध्यवसायसामान्यमात्ररूपा, ग्राह्यग्राहकाभिमानरूपोहंकारः, संकल्पादिकरणं मन, इत्यन्तःकरणं त्रिधा । बुद्धौ शब्दाद्यध्यवसायरूपायामुपयोगीनि बुद्धीन्द्रियाणि पञ्च, श्रोत्रं त्वक्चक्षुर्जिह्वा घ्राणमिति । कर्मण्युपयोगीनि पञ्च कर्मेन्द्रियाणि, तथाहि, त्यागो ग्रहणं द्वयमिति बहिर्विषयं यत्तत्र तु पाणिः पायुः पाद इति करणानि, एतदेवान्तःप्राणे येन क्रियते तद्वागिन्द्रियम्, तत्प्रक्षोभप्रशान्त्या विश्रान्तिक्रियोपयोग्युपस्थः, सर्वदेहव्यापकानि च कर्मेन्द्रियाण्यहंकारविशेषात्मकानि, तेन च्छिन्नहस्तो बाहुभ्यामाददानः पाणिनैवादत्ते, एवमन्यत्, केवलं तत्तत्स्फुटपूर्णवृत्तिलाभस्थानत्वात्पञ्चाङ्गुलिरूपमधिष्ठानमस्योच्यते, इत्येवं करणानि त्रयोदश । एषां च कार्यत्वेपि असाधारणेन करणत्वेन व्यपदेशः, स्थूलं कार्यं पृथिवी आपस्तेजो वायुर्नभ इति भूतानि पञ्च, सूक्ष्ममेषामेव रूपं गन्धो रसो रूपं स्पर्शः शब्द इति, तत्रैकैकगुणमाकाशादि एकैकवृद्धगुणं वेति दर्शनभेद इह न विवेचितो ऽनुपयोगात् । तत्र स्थूलं विभक्तमविभागस्यानुमापकमिति स्थूलोपक्रममुक्तम् । तत्र पृथिव्याद्याभासा एव मिश्रीभूय घटादिस्वलक्षणीभूताः कर्मेन्द्रियैरुपलक्षिताः बुद्धीन्द्रियैरालोचिताः अन्तःकरणेन संकल्पिताभिमतनिश्चितरूपा विद्यया विवेचिताः कालादिभिरनुरञ्जिताः प्रमातरि विश्राम्यन्तीति तात्पर्यम् । एतच्च विस्तरतः तत्प्रधानेषु तन्त्रालोकसारादिषु मया निर्णीतमितीहानुपयोगाच्च वितानितमिति शिवम् ॥ ११ ॥

॥ आदितः सूत्रश्लोकाः १५२ व्याख्याताः ॥

इति श्रीमदाचार्याभिनवगुप्तविरचितायामीश्वरप्रत्यभिज्ञासूत्रविमर्शिन्यामागमाधिकारे तत्त्वनिरूपणं नाम प्रथममाह्निकम् ॥ १ ॥

॥ इति त्रयोदश माह्निकम् ॥

॥ श्रीः ॥

अखण्डितस्वभावोपि विचित्रां मातृकल्पनाम् ।
स्वहृन्मण्डलचक्रे यः प्रथयेत्तं स्तुमः शिवम् ॥

एवं तत्त्वराशौ निर्णीते एतदन्तर्भावेनोक्तमपि मुख्यतया निर्णेतव्यं प्रमातृतत्त्वं वितत्य निर्णेतुं "तत्रैतन्मातृतामात्र"त्यादि "व्यानो विश्वात्मकः पर" इत्यन्तैर्विंशतिश्लोकैराह्निकान्तरं प्रस्तूयते । तथाहि प्रमातुरत्र स्वरूपप्रत्यभिज्ञानमुपदिश्यते शास्त्रे, स हि हेयमुपादेयं स्वं स्वभावं विद्वान्परमोपादेयरूपं शिवस्वभावं स्वात्मानमभेदेनाविशञ्जीवन्नेव मुक्तो भवतीति, तत्र श्लोकेन ब्रह्मादित्रयस्वरूपं ततोपि द्वयेन हेयोपादेयप्रमातृतत्त्वम्, ततस्तदुपयोगिमलस्वरूपं तत्कृतं च प्रमातृभेदं श्लोकसप्तकेन, द्वयेन समावेशस्वरूपं, श्लोकपञ्चकेन प्रमातुरेव सुषुप्ताद्यवस्थाः, त्रयेण तासां हेयोपादेयविभागं निरूपयतीत्याह्निकस्य तात्पर्यम् ॥

ग्रन्थार्थस्तु निरूप्यते ।

(१) तत्रैतन्मातृतामात्रस्थितौ रुद्रोधिदैवतम् ।
भिन्नप्रमेयप्रसरे ब्रह्मविष्णू व्यवस्थितौ ॥

तत्रेति, एवंभूते ऽस्मिन्नागमसिद्धे युक्त्यनुगते च तत्त्वस्वरूपे सति यदेतत्कालादिपञ्चकवेष्टितं प्रमातृतारूपं तदेव यस्यां शुद्धमुपसंहृतप्रमेयजातं भवति दशायां संहाराख्यायां तस्यामधिष्ठातृदेवतात्वं तद्दशासंपादनेन स्वोपासकलोकस्य तद्दशादानेन तद्दशाध्यानावेशसमापन्नस्य स्वाभिमुख्यसंपादनेन च भजमानो भट्टारक ईश्वर एव रुद्रो भगवान्यो मायापदेपि प्राणापानात्मकधर्माधर्मसूर्येन्दुदिननिशादित्रिमुक्तमध्यमज्योतीरूपप्रमातृस्वरूपस्पर्शादुन्मीलिततृतीयनेत्रो भिन्नस्य तु प्रमेयस्य प्रसरे सति सम्पादनेधिष्ठातृदेवतात्वं भजन् ब्रह्मा प्रसूते भिन्ने प्रमेये तत्सन्तानप्रग्रहणलक्षणे प्रसरेधिष्ठातृदेवता विष्णुः । अत एव तयोः प्रमेयप्रसररूपस्येदं नीलमित्येव प्रकाशात्मनः प्राधान्यादहमिति प्रमातृदशावेशशून्यत्वाच्च तृतीयनेत्रोन्मीलनम् । देवतैव च दैवतम् । प्रसर उत्पत्तिस्सन्तानश्च ॥

यदेतन्मातृतामात्रमुक्तं तस्य विभागमागमिकं च संज्ञाभेदं निरूपयति ।

(२) एष प्रमाता मायान्धः संसारी कर्मबन्धनः ।
विद्याभिज्ञापितैश्वर्यश्चिद्घनो मुक्त उच्यते ॥
स्वाङ्गरूपेषु भावेषु प्रमाता कथ्यते पतिः ।
मायातो भेदिषु क्लेशकर्मादिकलुषः पशुः ॥

मायया ऽन्धो विमोहितः, अत एव कर्माणि स्वात्मनो बन्धकान्यभिमन्यमानः, एष इति, कालादिवेष्टितः शून्यादिप्रमाता, संसरतीत्यतः संसारी' देहोपि हि स्वरूपसादृश्यं बाल्ययौवनादिष्वनुवर्तयन्संसरतीव, बुद्ध्यादेस्तु जन्मान्तरेपि संसरणं, विद्यया तु स्वरूपप्रकाशनशक्त्या प्रत्यभिज्ञापदं प्रापितमैश्वर्यं यस्यात एव शरीराद्यपि विश्वमपि संवेदनमेवाभिमन्यमानो ऽत एव चिदेकघनान्याचिद्रूपख्यातिमिश्रणशून्या यस्य

Digitized by Google

रूपं, स पुनर्जन्मबन्धविरहाद्देहेऽपि स्थिते मुक्त इति व्यपदेशयोग्यः, पतिते तु शिव एकघन इति कः कुतो मुक्तः, भूतपूर्वगत्या तु प्रमात्रन्तरापेक्षया मुक्तः शिव इति व्यवहारः, यश्चासौ मुक्तस्स भावान्स्वाङ्गवदभिमन्यमानः प्रमिमीत इति स तेषां स्वामी, स्वरूपपरमार्थसमर्पणाच्च पालक इति पतिरुपदिष्टः शास्त्रे, मायाशक्तिकृतभेदान्व्यतिरिक्तानेव सतो यदा मिमीते तदा तैरेव मेयैः पाशरूपैः पाशित इति पशुरुक्तः, तथा वेद्यराशिवशादेवास्याविद्यास्मितारागद्वेषाभिनिवेशादयः क्लेशा, धर्माधर्मादिरूपाणि कर्माणि, आदिपदादाशयरूपा वासना, फलभोगरूपो विपाक इति कालुष्यमनन्तप्रकारं यतः पाशितत्वात्पशुरित्युक्तः ॥

यद्वैतत्पशुरूपं तदेवागमेषु त्रिविधं मलमित्याह ।

(३) स्वातन्त्र्यहानिर्बोधस्य स्वातन्त्र्यस्याप्यबोधता ।
द्विधाणवं मलमिदं स्वस्वरूपापहानितः ॥
भिन्नवेद्यप्रथात्रैव मायाख्यं जन्मभोगदम् ।
कर्तर्यबोधे कार्मं तु मायाशक्त्यैव तत् त्रयम् ॥

इह ज्ञातृकर्तृरूपं तावच्चित्तत्वस्य स्वरूपं, तस्यापहारो नामाणवं मलं, येनासावणुः संकुचितो जातः, तत्र स्वरूपस्य निमीलनं संकोचः, तत्स्थिते बोधरूपे कर्तृत्वलक्षणस्य स्वातन्त्र्यात्मनः स्वरूपान्तरस्य निमीलनं विपर्ययो वेत्युभयथापि आणवं मलं स्वरूपापहानिरूपमेकमेवात्रैवेति हि सत्याणवे मले द्विप्रकारे स्वरूपसंकोचे वृत्ते भिन्नस्य यत्प्रथनं तस्य मायीयमिति संज्ञामात्रं, मायाकृतत्वेन हि मायीयता मलत्रयस्यापि, तत्र कर्तुरबोधरूपस्य देहादेर्भिन्नवेद्यप्रथने सति धर्माधर्मरूपं कार्मं मलं, यतो जन्म भोगश्च, स च नियतावधिक इति जात्यायुर्भोगफलं कर्मेत्युक्तं भवति ॥

अथैषां मलानां त्रिविक्तविषयनिरूपणात्स्वरूपं स्फुटीकर्तुं स्वातन्त्र्यहानिर्बोधस्येत्यस्य भागस्य तावद्विषयमाह ।

(४) शुद्धबोधात्मकत्वेऽपि येषां नोत्तमकर्तृता ।
निर्मिताः स्वात्मनो भिन्ना भर्त्रा ते कर्तृतात्ययात् ॥

एषां चिन्मात्रमेव परमार्थतो न त्वहमिति स्वात्मविश्रान्त्यानन्दरूपं परमं स्वातन्त्र्यं, ते परमेश्वरेण तथा निर्मिताः स्वात्मनः सकाशाद्व्यतिरिक्ताः। अत्र हेतुः कर्तृताया उत्तमस्वातन्त्र्यलक्षणाया अत्ययादभावात्। परमेश्वरस्येतूत्तमस्वातन्त्र्यावियुक्तबोधरूपत्वमित्यभिप्रायशेषः ॥

नन्वस्माद्धेतोर्भवतु परमेश्वरात्तेषां भिन्नत्वम्, अन्योन्यतस्तु कथं भेदः, बोधरूपस्य व्यापित्वनित्यत्वकृतस्य च देशकालाभेदस्य समानत्वादन्योन्यभेदाभावेऽपि च निर्मितास्ते इति कथं बहुवचनमित्याशङ्कां व्यपोहति ।

(५) बोधादिलक्षणैक्येऽपि तेषामन्योन्यभिन्नता ।
तथेश्वरेच्छाभेदेन ते च विज्ञानकेवलाः ॥

इह हि सर्वत्राप्रतिहतशक्तिः परमेश्वर एव हि तथा बुभूषुस्तथातथा भवति न त्वन्यः कश्चित्परमार्थतोऽस्तीति असकृदुक्तं,ततश्च व्यापकनित्यबोधस्वभावोऽप्यहंभेदेन निर्भासे इत्येवंभूतेनेश्वरेच्छाविशेषेण तेषां शरीरादिशून्यान्तप्रमातृपदोत्तीर्णानां बोधत्वनित्यत्वविभुत्वादिधर्मजातस्यैक्येऽप्यन्योन्यं भेदः, ते च शास्त्रे विज्ञानकेवला उक्तास्तत्र विज्ञानकेवलो मलैकयुक्त इत्यादौ विज्ञानं बोधात्मकं रूपं केवलं स्वातन्त्र्यविरहितमेषामिति ॥

एवं "स्वातन्त्र्यहानिर्बोधस्ये"त्यस्य भागस्य विज्ञानाकलविषयतामुक्त्वा "स्वातन्त्र्यस्याप्यबोधता" इत्यमुमंशं विषयप्रदर्शनेन स्पष्टयति ।

(६) शून्याद्यबोधरूपास्तु कर्तारः प्रलयाकलाः ।
तेषां कार्मो मलोऽप्यस्ति मायीयस्तु विकल्पितः ॥

शून्ये जडत्वादबोधरूपे एव यदि वा प्राणे बुद्धौ वा येषामहमिति चमत्कारयोगात् कर्तृत्वं, ते प्रलयेन कृताः अकलाः, कलातत्त्वोपलक्षितकरणकार्यरहिताः अबोधरूपाः कर्तारश्च, प्रलयावधि हि ते तथाभूता, उत्तरकालं तु कार्यकारणसम्बद्धा एव भवन्ति.यतस्तेषां न केवलमुक्तरूप आणव एव मलो यावत्कार्मोऽपि वासनासंस्काररूपो धर्माधर्मादिरूपोऽस्त्येव "यद्येवं भिन्नवेद्यप्रथाप्येषां स्यात्"सत्यं, संवेद्यरूपे सुषुप्तपदे, अपवेद्ये तु न भवति, तेन मायीयो मल एषां विकल्पितो व्यवस्थितविषयत्वेन, तथाहि, केऽपि शून्यादिभागविश्रान्ता गाढनिद्राजडीकृताः अपवेद्यसुषुप्तपदभाजः अन्ये तु बुद्ध्यादिनिष्ठाः सुखदुःखावशेषसामान्यात्मकभिन्नवेद्यसंवेदनयोगिनः संवेद्यसौषुप्तपदलीनाः,स्थूलदेहेन्द्रियात्मककार्यकारणवियोगरूपत्वं प्रलयाकललक्षणं सर्वेषां तुल्यम् ॥

एवं "स्वातन्त्र्यस्याप्यबोधते"त्ययमंशः स्फुटीकृतः, प्रसंगाच्च कार्ममलस्य विषयो दर्शितः, मायामलस्य च पाक्षिकत्वमुक्तम्, अधुना पुनराणवकार्ममलद्वयाभावेऽपि शुद्धोऽस्ति मायाख्यस्य मलस्य विषय इति दर्शयति ।

(७) बोधानामपि कर्तृत्वजुषां कार्ममलक्षतौ ।
भिन्नवेद्यजुषां मायामलो विद्येश्वराश्चते ॥

ये चिन्मात्रमेवात्मतया पश्यन्ति अहमिति चमत्कारोल्लासात्कर्तारस्तत एव सर्वज्ञाः सर्वकर्तारश्च ते विद्येश्वराः, किं

तु तनुकरणभुवनादि यदेषां वेद्यतया कार्यतया च भाति तत्कुविन्दपटदृष्ट्या भिन्नमेव सदित्यस्ति विद्येश्वराणां मायाख्यमलयोगः ॥

अथ मलत्रयस्यापि यौगपद्येन यो विषयस्तं दर्शयितुमाह ।

(८) देवादीनां च सर्वेषां भविनां त्रिविधं मलम् ।
तथापि कार्ममेवैकं मुख्यं संसारकारणम् ॥

इह विद्येश्वरविज्ञानाकलास्तावन्न भविनः मायान्ताध्वातिक्रमणात्, प्रलयाकला अपि कंचित्कालमविद्यमानभवाः, ये त्वेते मायातत्त्वान्तरालपरिवर्तिनो देवादयः स्थावरान्ताश्चतुर्दशधा शास्त्रेषु परिगणितास्ते सर्वे भविनः संसारिणः तेषां च त्रयोपि युगपन्मलाः । "ननु मलत्रयमध्ये कतमो मलः संसरणमेषां संपादयेत्" आह, तत्रापि तेषु त्रिष्वपि सत्सु कार्मं मलं मुख्यतया सन्निपत्य संसरणे कारणम् । यथोक्तम् ।

कर्मतस्तु शरीराणि विषयाः करणानि च ।

इति । तनुकरणविषयसंबन्ध एव वर्तमानो भविष्यंश्चेत्यनवरतं प्रबन्धतो वर्तमानः संसरणमुच्यते, आणवमायामलौ तु यद्यपि नन कारणं संसारे, तथापि कार्मेण विना तौ देहादिविचित्रभावाभिनिर्वर्तनशक्तिशून्यौ विज्ञानाकलादिष्विति मुख्यं कार्ममेव मलं संसारकारणं तत्रतत्र शास्त्रे गण्यते, अत एव तदुपक्षये वृत्ते दत्तस्तावदसंसरणसोपानपदबन्ध इत्याशयेन कर्मबन्धाभिमानपरिहाणिरेव यत्नतः सांख्यपुराणभारतादिशास्त्रेषूपदिश्यते । एवं मलत्रयस्यैकैकभेदैस्त्रिभिर्द्विभेदैस्त्रिभिस्त्रिभेदेनैकेनेति सप्त प्रमातार उत्तिष्ठन्ति । तथा च शास्त्रे "शिवादिसकलान्ताश्च शक्तिमन्तः सप्त" त्युक्तं तत्राप्यावान्तरभेदेन गुणमुख्यताभेदेन विकल्पसमुच्चयतादिभेदेन चानन्तप्रकारत्वमिति ॥

अस्य च मलत्रयस्योद्भवतिरोभावभेदात्संसारिणां प्रकारद्वयमिति दर्शयति ।

(९) कलोद्बलितमेतच्च चित्तत्वं कर्तृतामयम् ।
अचिद्रूपस्य शून्यादेर्मितं गुणतया स्थितम् ॥
मुख्यत्वं कर्तृतायास्तु बोधस्य च चिदात्मनः ।
शून्यादौ तद्गुणे ज्ञानं तत्समावेशलक्षणम् ॥

एतच्चेति यच्चिद्दशादीनां भविनां चैतन्यं कर्तृतांशस्य प्राधान्यान्मलेन संविद्भागस्य निमज्जितत्वात्कर्तृतामयं चिद्रूपस्य तत्त्वं स्वातन्त्र्यं, कलाख्येन परमेश्वरशक्त्यात्मना तत्त्वेनोपोद्बलितमनुप्राणितं, मलेन न्यक्कृतं सदुद्बोधितं, शून्यादेर्देहपर्यन्तस्य मायाप्रमातुः सम्बन्धि, तद्गुणत्वेनाप्रधानत्वेन स्थितं, यतो मितमिदंतापन्नदेहादिशून्यान्तमप्रमेयभागनिमग्नत्वात् प्रमेयं, यो गौरो यः सुखी यस्तृषितो यः सर्वरूपरहितः सो ऽहमिति हीदंतैवान्तर्लीना ऽहम्भावासंसारिणां परिस्फुरति सेयं जाग्रत्स्वप्नसुषुप्तरूपा संसारावस्था । यदा तूक्तगुरूपदेशाभिमतेनैवाहम्भावेन स्वातन्त्र्यात्मना व्यापकत्वनित्यत्वादिधर्मपरामर्शमात्मनि विदधता ततः शून्यादेः प्रमेयादुन्मज्ज्यैवास्यते तदा तुर्यातीतावस्था । यदापि परामृष्टतथाभूतवैभवनित्यैश्वर्यादिधर्मसम्भेदेनैवाहम्भावेन शून्यादिदेहधात्वन्तं सिद्धरसयोगेन विद्ध्यते तदास्यां तुर्यदशायां तदपि प्रमेयतामुज्झतीव सेयं द्व्यपि जीवन्मुक्तावस्था समावेश इत्युक्ता शास्त्रे, सम्यगावेशनमेव हि तत्रतत्र प्रधानं, तत्सिद्धये तूपदेशान्तराणि । यथा गीतं, "मय्यावेश्य मनो ये मा"मिति "अथावेशयितुं चित्तं न शक्नोमि" इत्यादि च, समावेशपल्लवा एव च प्रसिद्धदेहादिप्रमातृभागप्रह्वीभावनानुप्राणिताः परमेश्वरस्तुतिप्रणामपूजाध्यानसमाधिप्रभृतयः कर्मप्रपञ्चाः । यद्गीतमपि ।

"अभ्यासेप्यसमर्थः सन्मत्कर्मपरमो भव"

इति । देहपाते तु परमेश्वर एवैकरस इति कः कुत्र कथं समाविशेत् । तदेतदाह, यत्पुनः कर्तृताया मुख्यत्वं तन्नान्तरीयकश्च शून्यादेर्गुणभावस्तस्मिंश्चाचिद्रूपे गुणीभूते स्वातन्त्र्यस्याप्यवबोधतेति मलव्यापारस्यापहस्तनाच्चितो यो ऽपरो ऽप्यात्मभागो बोधलक्षणो मलेन न्यक्कृतो ऽभूत्तस्याप्यधुनोन्मग्नत्वेन मुख्यत्वं, यच्च कर्तृताया मुख्यत्वमुन्मग्नता इदमेव ज्ञानमज्ञानात्मकमलप्रतिपक्षत्वात्, तदेतन्मुख्यत्वं समावेशस्य लक्षणं, येन देहस्थितो ऽपि पतिरिति मुक्त इति शास्त्रेषूक्तः ॥ १२ ॥

॥ शेष उत्तराङ्के ॥

॥ अथ बालरामायणाख्यनाटकस्य ॥

॥ सप्तमोऽङ्कः ॥

अतः परमसमपराक्रमो भविष्यति ।

ततः प्रविश्य वैतालिकः समन्तादवलोक्य नेपथ्यं प्रति भद्र चन्दनचण्ड परित्यज्ञ निद्रां मुद्रां विमुञ्च निजोटजाभ्यन्तरं प्रभातप्राया रजनी तथाहि ।

तारणां नगरस्त्रियां परिकरः संख्येयशेषः स्थितः
स्पर्धन्तेऽस्तरुचः प्रदीपकशिखाः सार्धं हरिद्राङ्कुरैः ।
मन्त्रस्तम्भितपारदद्रवजडो जातः प्रगे चन्द्रमाः
पौरस्त्यं च पुराणशीधुमधुरच्छायं नभो वर्तते ॥ १ ॥

नेपथ्ये । अज्ज कप्पूरचण्ड एसा मिट्ठा पभादनिद्दा ता सुविस्सं दाव * ।

* आर्य कर्पूरचण्ड एषा मिष्टा प्रभातनिद्रा तत् स्वप्स्यामि तावत् ।

कर्पूरचण्डः । अहो उत्साहशक्तिर्भवतोऽमन्दशीलो महीपतिरनपरप्रबन्धवर्षी कविरपाठच्चिरश्च बन्दी न चिरं मन्दति ।

नेपथ्ये ता एत्थ सत्थरत्थिदो निमीलिदनयणो जेव्व सुप्पभादं पठिस्सं * ।

कर्पूरचण्डः । एतदपि भवतो भूरि ।

नेपथ्ये । सच्चं पच्चक्खीकदसरस्सईपरिमलो बम्हो मुहुत्तो वट्टदि तधा अ ।

जा गब्भे वि घरस्स दीवअसिहा सा वि च्छविच्छुड्डिआ
जं दण्डाहिं वि खण्डिदं कुवलयं संमीलिदं तं वि अ ।
जं गोट्ठीचरिदं वि तं वि सहसा भासाए सव्वङ्गिदं
ता मण्णे ण चिरा भविस्सदि रई पुव्वादिसो मण्डणम् † ॥ २ ॥

कर्पूरचण्डः । तावदुपश्लोकयामो रामभद्रं परपरितोषोपपाद्यफलं हि वैतालिकव्रतं किञ्चिदुच्चैः ।

मार्तण्डैककुलप्रकाण्डतिलकस्त्रैलोक्यरत्नामणि-
र्विश्वामित्रमहामुनेर्निरुपधिः शिष्यो रघुग्रामणीः ।
रामस्ताडितताडकः किमपरं प्रत्यक्षनारायणः
कौशल्यानयनोत्सवो विजयतां भूकश्यपस्यात्मजः ॥ ३ ॥

नेपथ्ये ।

कन्दप्पुद्दामदप्पप्पसमणगुरुणो बम्हणो कालदण्डे
पाणिं देन्तस्स गङ्गातरलिदससिणो पव्वदीवल्लभस्स ।
चावं चण्डाहिसिञ्जारवभरिअणहं कड्ढणाकुड्डुमज्झं
जं भग्गं तस्स सद्दो णिसुणि तिहुअणे वित्थरन्तो न माइ ‡ ॥ ४ ॥

कर्पूरचण्डः ।

यो जम्भं जितवान् स येन विजितो देवः सुरग्रामणी-
र्ज्याबद्धं विदधे निशाचरपतिं तं कार्तवीर्यार्जुनः ।
तद्दोःखण्डदवानलो भृगुपतिर्निर्जित्य तं च त्वया
मालेयं जयसंपदो विरचिता स्वस्मादनर्घसरी ॥ ५ ॥

नेपथ्ये ।

हेलासिञ्जिदसिञ्जिणीझणझणारावेण वीणाइदं
कोदण्डं तुह पाणिपीडनणदं जुज्झे णिच्चं ताक्खणम् ।
ते सव्वे खरदूसणप्पभुदिणो जीवेहिं मुक्का पुरो
पच्छा भल्लपवेल्लिदेहिं सहसा देहेहिं भूमिं गदा * ॥ ६ ॥

कर्पूरचण्डः ।

जात्यन्धत्वमधिष्ठितं सपदि तैर्दत्तं जलं तैर्दृशे
दृष्टिं सृष्टवतो विधेर्भगवतः क्लेशश्च तैर्भावितः ।
येषां ताडयितुं स्थिते त्वधिज्यवान्मारीचमायामृगं
प्राग्देवादनुपेयुषां द्विविषदां जाते वृथा चक्षुषी ॥ ७ ॥

अपिच ।

नाद्याप्यस्ति तदीययोर्नयनयोः संकोचदुःस्थं वपु-
स्तेषां गण्डतटे स्फुटत्पुलकता नाद्यापि विश्राम्यति ।
ते नाद्यापि वहन्ति हर्षणतया रिक्तं च चेतो निजं
दृष्टं देव कबन्धदैत्यनिधनं यैस्त्वत्कृतं कौतुकात् ॥ ८ ॥

नेपथ्ये ।

पुञ्जीभूदहरट्टहासजइणा रूपेण रुद्धं वरं
क्खीणं वालिजसं व दुन्दुभिमहाकङ्कालसेसं जहा
पेल्लन्ता चलणेण विञ्झगिरिणो हेलाइदं तं तुए
अम्हे एव्व दुवे परं ण हु गदा वेरी वि बन्दित्तणम् † ॥ ९ ॥

अविअ ।

लीलामुक्केक्कबाणव्वणविवरगुहामज्झमुच्छन्तवाआ
जाआ जे सत्त ताला तिहुअणजइणो चावचारेण तुज्झ ।
णिच्चं गाअन्ति हेलाभरिदणहअलब्भन्तरं तारराआ
सत्तेहिं तेण तेहिं तुह जसपसरं सत्तलोअट्ठिदव्व ‡ ॥ १० ॥

कर्पूरचण्डः ।

पौलस्त्यस्यावमन्ता त्रिदशपतिसुतश्चक्रवर्ती कपीनां
कर्ता संध्यासमाधेर्जलनिधिषु चतुर्दिक्कुञ्जाश्रितेषु ।
किष्किन्धां राजधानीं भुजपरिघबलात्त्रायमाणस्त्वयाऽसौ
वाली हेमाब्जमाली गुणनिधिरिषुणा निर्मितो दक्षिणोर्मा ॥ ११ ॥

नेपथ्ये ।

---

* तदत्र संस्तरस्थितो निमीलितनयन एव सुप्रभातं पठिष्यामि ।

† सत्यं प्रत्यक्षीकृतसरस्वतीपरिमलो ब्राह्मो मुहूर्तो वर्तते तथा च ।
या गर्भेऽपि गृहस्य दीपकशिखा साऽपि छविमुक्ता
यद् दण्डादपि खण्डितं कुवलयं संमीलितं तदपि च ।
यद् गोष्ठीचरितमपि तदपि सहसा भाषया सर्वाङ्कितं
तन्मन्ये न चिराद् भविष्यति रविः पूर्वदिशो मण्डनम् ॥

‡ कन्दर्पोद्दामदर्पप्रशमनगुरोर्ब्रह्मणः कालदण्डे
पाणिं दातुर्गङ्गातरलितशशिनः पार्वतीवल्लभस्य ।
चापं चण्डाहिसिञ्जारवभरितनभः कर्षणाकृष्टमध्यं
यद् भग्नं तस्य शब्दो निशृणुते त्रिभुवने विस्तरन् न माति ॥

* हेलासिञ्जितसिञ्जिनीझणझणारावेण वीणायितं
कोदण्डं तव पाणिपीडननतं युद्धे नित्यं तत्क्षणम् ।
ते सर्वे खरदूषणप्रभृतयो जीवैर्विमुक्ताः पुरः
पश्चात् भल्लप्रवेल्लितैः सहसा देहैर्भूमिं गताः ॥

† पुञ्जीभूतहराट्टहासजयिना रूपेण रुद्धं परं
क्षीणं वालियशश्च दुन्दुभिमहाकङ्कालशेषं यथा ।
प्रक्षिपता चरणेन विन्ध्यगिरेर्हेलायितं तत् त्वया
आवामेव द्वौ परं न खलु गतौ वैरिणाविव बन्दित्वम् ॥

‡ अपिच
लीलामुक्तैकबाणव्रणविवरगुहामध्यमूर्च्छद्वाता
जातास्ते सप्त तालास्त्रिभुवनजयिनश्चापचारेण तव ।
नित्यं गायन्ति हेलाभरितनभस्तलाभ्यन्तरं तारराधाः
सप्तभिस्तेन तैस्तव यशः प्रसरं सप्तलोकस्थितमिव ॥

Digitized by Google

जे केलासे कलिन्दे मलयमहिहरे मन्दरे मेरुसेले-
सज्झे विंझे महेन्दे तह अ हिमवन्ते पव्वदे वाणरेन्दा ।
सव्वे सुग्गीवपादप्पणदिपणइणो ते वि जं स प्पसादो
सेवातुट्ठस्स सच्चं तुह जसजलहिमूलदावेल्लिदाणम् * ॥१२॥

कर्पूरचण्डः ।

भीमं बद्ध्वाब्धिं जवेन हनुमानुल्लङ्घ्य लङ्कां गतो
भङ्क्त्वाशोकमहावनं ज्वलितवानेतां च यस्तुष्टवान् ।
सीतावर्णनमौलिरत्नसहितः प्राप्तश्च यत् त्वामसौ
तन्माप्येव भवत्प्रभावमहिमा निर्यन्त्रणः कारणम् ॥ १३ ॥

नेपथ्ये ।

किं अण्णेहिं विराधप्पहुदिबिदरणावंबरणघट्टणेहिं
एदं ते वण्णआमो जलणिहिसविधावासिदे जं तुमम्मि ।
वट्टन्ते रक्खसीणं तरलकरदलप्फारतुट्टन्तहारा
हाराक्कन्तकण्ठा णअणजलुप्पीलिणो विप्पलावा † ॥१४॥

कर्पूरचण्डः ।

नानानिर्व्यजवीर्यस्तुतिशतसदृशं कुम्भकर्णानुजोऽय-
द्राग्देवेनाभिषिक्तो रजनिचरमहाराज्यलाभाय तेन ।
लङ्केन्द्रस्यापि जातान्यतिनिभृतसुतश्वासबन्धावधूत-
श्मश्रुश्रेणीनि चिन्तामुकुलितनयनाब्जि सर्वाननानि ॥१५॥

प्रविश्य । पटीक्षेपेण प्रतीहारः । रेरे अलीकवैतालिक कोऽयं कलकलः ।

कर्पूरचण्डः । आर्य रामदेवस्य शौर्यगुणभोगावली गीयते ।

प्रतीहारः । ननु रामदेवेन निषिद्धमात्मोपवर्णनमादशरथ-स्वर्गारोहणाच्छ्रुतेरादशकण्ठबन्धम् ।

कर्पूरचण्डः । विभीषणवैतालिको वैदेशिकोऽस्मि । तदेकवारं मर्षय एष त्यक्तो भोगावलीपाठः । सप्रश्रयम् । कथं पुनरधिपतर्पितृमरणशोकशङ्कुस्तत्रभवान् रामदेव एवंविधे समुद्योगकर्मणि प्रवर्तते

प्रतीहारः । विहस्य अप्यनभिज्ञोऽसि सच्चरितानाम् ।

वहन्ति शोकशङ्कुं च कुर्वन्ति च यथोचितम् ।
कोप्येव महतां हन्त गाम्भीर्यानुगुणो गुणः ॥ १६ ॥

बन्दी । आर्य कोपेनान्तर्भरितोऽसि । कथय किं पुनः कुरुते रामभद्रः ।

प्रतीहारः । पुलिनोपरि रचितकुशप्रस्तरोपविष्ट उपोषित-श्च भगवन्तं भागीरथीवल्लभमुपास्ते । तत्र च ।

सुग्रीवे प्रणयोल्लसाः शशधरे बद्धाभ्यसूयाश्चिरं
साश्चर्याः पवनात्मजे धृतरुषः पौलस्त्यजन्मां दिशि ।
सोत्साहाश्च शरासने जलनिधौ तृष्णाश्च हत्वा निशां
रामस्याद्य नियन्तुमेव न गता नानारसा दृष्टयः ॥ १७ ॥

बन्दी । आर्य एवमपि समुद्रो न किञ्चित्प्रतिपद्यते ।

प्रतीहारी । जडराशिरसौ ।

बन्दी । तथाविधे उदन्वति किमाह रामदेवः ।

प्रतीहारः । इदं कथ्यते ।

रामे तटान्तवसतौ कुशतल्पशायि-
न्येवं तु नाम भवतो भगवन्ननास्था ।
स्मृत्वा तदेहि सगरं च भगीरथं च
दृष्ट्वाऽथ वा मम धनुश्च शिलीमुखांश्च ॥ १८ ॥

बन्दी । तर्हि लङ्घितो गोष्पदवत्समुद्रः ।

प्रतीहारः । समंतादवलोक्य भोभोः सकलप्लवङ्गमयूथपतयः समस्तगोलाङ्गूलसेना निःशेषाच्छभल्लचमूपरिवृढाश्च किमिदमवीरजनोचितमाचरितं यद्दूरात् परिहृतवेलावनालीनिवासकेलिभिः पराङ्मुखं पदात्पदमपक्रम्यते ।

कर्पूरचण्डः । विलोक्य कथमगणितनिजकुलक्रमाचारास्त्वद्वचनमप्यवधीरयन्तो मकराकरं दुस्तरमवलोक्य यथागतं प्रस्थिता एव ।

प्रतीहारः । भवतु संस्थापयामि ।

पीतोऽयं कलशोद्भवेन चुलुकं कृत्वैकमम्भोनिधि-
र्नो वेलामपि लङ्घते नियमितयासादयं वाडवात् ।
अन्यान्तेषु वहत्ययं च विपुलं श्वभ्रावशेषं वपु-
स्तत्पूर्वाकलितेप्यमुत्र भवतां कोऽयं विषादोदयः ॥१९॥

किञ्च ।

अप्येकैके पिबत चुलुकं यद्यपां सेधनीनां
यद्वैकैकं क्षिपत जलधौ गण्डशैलोपलं वा ।
तेन श्वभ्रं भवति सकलोऽप्यम्बुराशिः स्थलं वा
तत्किं मिथ्या भजत विधुरं व्यस्ततन्द्राः कपीन्द्राः ॥२०॥

बन्दी । हंहो सुग्रीवप्रतिहार भवद्वचनमाकर्णयन्तः सर्वेऽप्येते यूथपतयो जलनिधिवेलावनालीषु विहितोत्साहं व्यवस्थिताः ।

प्रतीहारः । समन्तादवलोक्य ।

नीलेन सैन्यपतिना भुजताडनान्ते
मुक्तस्तथा किलकिलाध्वनिरेष रौद्रः ।

---

* ये कैलासे कलिन्दे मलयमहीधरे मन्दरे मेरुशैले
सह्ये विन्ध्ये महेन्द्रे तथा च हिमवति पर्वते वानरेन्द्राः ।
सर्वे सुग्रीवपादप्रणतिप्रणयिनस्तेऽपि यत् स प्रसादः
सेवातुष्टस्य सत्यं तव यशोजलधेर्मूलतावेल्लितानाम् ॥

† किमन्यैर्विराधप्रभृतिबिदरणाडम्बरघट्टनै-
रेतत्ते वर्णयामो जलनिधिसविधावासिते यत् त्वयि ।
वर्तन्ते राक्षसीनां तरलकरतलस्फारत्रुट्यद्धारा
हाराक्रान्तकण्ठा नयनजलोत्पीडिनो विप्रलापाः ॥

अष्टापि वाञ्छति विरिञ्चिरसौ श्रवांसि
शङ्के यथा करयुगेन मुधा पिधातुम् ॥ २१ ॥

धूम्रो विजृम्भणविदारितसृक्कदृष्ट-
दंष्ट्राङ्कुरक्रकचसंपुटवक्त्रयन्त्रम् ।
लाङ्गूलवेष्टितमयं मलयं महाद्रि-
मुत्पाट्य वाञ्छति निधौ पयसां निधातुम् ॥ २२ ॥

यावन्निविक्रमतनुं न हरिर्जहाति
तावत्प्रदक्षिणपरिभ्रमणस्य कर्ता ।
आकर्ण्य संक्रमविधिक्रममम्बुराशा-
वृक्षाधिपः किमपि कुप्यति वार्धकाय ॥ २३ ॥

अप्यङ्गदः स्वनखदारितपाकपाण्डु-
कर्पूरगर्भरजसां पटलेन सद्यः ।
उद्धूलनं निजयशःपरिपाण्डुरेण
प्रस्वेदवारिशमनं कुरुते कुमारः ॥ २४ ॥

आमोदभाजि वनशालिनि केसराढ्ये
तारापतिस्फुरणतः प्रविजृम्भमाणे ।
लाङ्गूललम्बतरनालविशेषहृद्ये
दृष्टं न केन कुमुदे कुमुदस्य रूपम् ॥ २५ ॥

मैन्दः समुद्रपुलिनाद्दयमश्विसूनु-
र्दृष्टो मनाङ्मुकुलया द्विविदेन दृष्ट्या ।
आदाय दन्तिमकरद्वितयं कराभ्यां
युद्धाय योजयति सान्द्रमदार्द्रगण्डम् ॥ २६ ॥

वल्लीव वानरबलानि हसन् हनूमान्
मद्रोमवल्लिषु दृढं कुरुतावलम्बम् ।
येनैव सागरमहं लघु लङ्घयामि
श्यामाचरैश्च समरं सह योजयामि ॥ २७ ॥

तारास्तनत्रुटितचन्दनपङ्कलेप-
माबद्धकाञ्चनसरोजसहस्रमालम् ।
वक्षः प्लवङ्गपतिना विपुलं विलोक्य
संभावितश्चुलुकपेयपयाः पयोधिः ॥ २८ ॥

कर्पूरचण्डः । एवमेवैतत् । सचमत्कारं पुरोऽवलोक्य पश्य शबलीयमानजलमानुषमिथुनमत्यर्थकदर्थ्यमानशङ्खिनीयूथमितस्ततः पुनरुक्तायमानवाडवदहनडम्बरमम्बरोन्मुखतरङ्गलाञ्छ्यमानमार्तण्डमण्डलमुच्चण्डतापविवशमुक्ताशुक्तिसंपुटप्रकटमुक्तमौक्तिकप्रकरमुच्छलदनच्छकच्छपमत्स्यं लोठमानपाठीनपृष्ठममन्दाक्रन्दितमकरमपसृतनक्रचक्रमुह्यमानसफलशिलोच्चयसंचयं तटावटप्रविष्टचण्डफणं क्वणत्कारविमुच्यमानमदप्रवाहावगाहसम्भ्रमत्समर्थविषमहामुनिविधीयमानपावकप्रशमं विबुधसाध्यसिद्धविद्याधरजनविमुक्तोपरिगमनं नभसि समारुह्यावलोकितं तीरतरुकुलायललितैः शकुनिभिरपसृत्य दृष्टं कपिकुटुम्बकैर्निर्गत्य निरीक्षितं गर्भवासदुर्ललिताभिरसुरसुन्दरीभिरुत्थाय निभालितं मघवनोद्गतशेषाभिरप्सरोभिः स्तुतचिरपरित्यागं मृगलाञ्छनैरावतपारिजातकौस्तुभप्रभृतिभिरुदन्वन्तं तत्क्षणमयमेवंविधः । किञ्च ।

गूढस्फारस्फुलिङ्गोऽवयवमणिषु घनं लब्धधूमप्रबन्धो
नीलास्वश्मस्थलीषु स्फुटपिहितरुचिर्विद्रुमेषु द्रुमेषु ।
यत्सत्यं छन्नभस्मा गिरिपतिदलिते मण्डले मौक्तिकानां
दुःखेनोन्नीयतेऽग्निः सलिलवसतिभिः प्रज्वलत्यम्बुराशौ ॥ २९ ॥

प्रतीहारः । सवितर्कम् ।

चैयद्यात्किंस्विदग्निः क्षयसमयशिखी निर्गतश्चण्डदर्चिः
किंस्विद्विस्वार्णवार्णांस्युपरि परिगतः सर्वतोऽप्यौर्ववह्निः ।
किंस्वित्कालाग्निरुद्रः स्थगयति जगतीमेष पातालमूला-
दाज्ञातं धाम्नि वारां रघुपतिविशिखाः प्रज्वलन्तः पतन्ति ॥ ३० ॥

तदेहुपस्थितमहासंरम्भं सुग्रीवविभीषणसहितं रामदेवमनुवर्तावहे इति परिक्रम्य निष्क्रान्तौ । विष्कम्भकः ।

ततः प्रविशतो रामलक्ष्मणौ सुग्रीवविभीषणौ हनूमांश्च ।

रामः । सशरसंधान एवाकाशे शिरसा प्रणम्य ।

यत्खातः सगरेण मर्त्यसरितं मन्दाकिनीं कुर्वता
पूर्णो यच्च भगीरथेन तदयं नः कीर्तनं सागरः ।
अप्यस्मिन् प्रतिकूलवर्तिनि मया क्षीणाः शरश्रेणयो
हे वृद्धाः प्रणतोऽस्मि मुञ्चत रुषं रामस्य कान्या गतिः ॥ ३१ ॥

विभीषणः । सखे सुग्रीव अतिशशाङ्कशेखरमिदं चेष्टितं रामदेवस्य यदनेन ।

निर्वाणं जलपानपीडितजलैर्यस्मिन् युगान्तानले-
र्यस्याभाति कुकूलमुर्मुरमृदुः क्रोडे शिखी वाडवः ।
तस्याप्यस्य कृशानुसंक्रमकृतज्योतिःशिखण्डैः शरै-
र्दत्तश्चण्डदवाग्निडम्बरविधिर्देवस्य वारांनिधेः ॥ ३२ ॥

सुग्रीवः । सखे विभीषण अदृष्टपूर्वमश्रुतचरं च रामभद्रचरितं कं न विस्मापयति । यज्जलान्यपि ज्वलन्ति ततश्च ।

अन्योन्याश्लेषरक्षाविधिवलितवपुर्यष्टितुष्टं भुजङ्ग-
द्वन्द्वैरुद्दामदाहस्रुतसलिलमहागर्भमध्यैर्ज्वलायि ।
सर्वत्रावर्तमुद्रां विदधति जलधौ सायकैः पावकीयै-
रुत्क्वाथाद्वादसां च त्रिजगदभिभवच्चिः सृतो विस्रगन्धः ॥ ३३ ॥

हनुमान् । साश्चर्यं पुरोऽवलोक्य प्रणम्य च ।

सेयं देव भ्रुकुटिरचना मुञ्चतु त्वल्ललाटं
ज्योतिश[illegible]कं च वाचः ।

Digitized by Google

वारां मध्याद्वयमुदयते पन्नगीगीतकीर्तिः
साधं दारैर्नदपरिवृतः साञ्जलिर्यत्समुद्रः ॥ ३४ ॥

सर्वे सकौतुकमवलोकयन्ति ।

रामः । तर्हि संवृतं चैत्रभानवमिदमस्त्रम् ।

लक्ष्मणः । आर्य एव संधानसंहाररहस्यवेदी ।

ततः प्रविशति सौषधिनिवेको बद्धाञ्जलिपट्टश्च समुद्रो गङ्गायमुने च ।

गङ्गा । सखि सावित्रि न स्वैरं संचरणविधिपरिक्रमणाय- मस्तरङ्गिणीनाथः । पश्य ।

न सुश्रुतानि मुरारिभूकरखुरैर्यानि क्षमाकर्षणे
मन्थानाद्रिविघट्टनैरपि चिरं भग्ना न येषां त्वचः ।
शान्तं यत्र च वासुकेर्विषशिखाज्योतिर्भिरस्याम्बुधे-
स्तान्यङ्गानि रघूद्वहस्य विशिखैर्विद्धानि दग्धानि च ॥३५॥

सर्वे यथोचितं परिक्रामन्ति ।

समुद्रः । सखेदम् । देवि हैमवति प्रिये कालिन्दि कथ- मपराधी रामभद्रं द्रक्ष्यामि ।

गङ्गा । रत्नाकर स एव रामभद्रोऽपराधी येन सगरभगी- रथयशोराशौ त्वय्यपकृतम् ।

यमुना । भागीरथीनाथ किं नाम अपराधित्वं यदि तच्चरण- मनुवर्तताम्* ।

समुद्रः । तर्हि बालनारायणं रामदेवमुपसर्पामः । न हि राकामृगाङ्कमण्डलमन्तरेण चन्द्रमणेरानन्दजलस्यन्द इति सर्वे परिक्रामन्ति ।

यमुना । उपसृत्य दशरथनन्दन रामचन्द्र सगरभगीरथ- सदृशगौरवो दे समुद्रो संमुखो एष† ।

समुद्रः । साभ्यर्हणम् ।

इन्दुर्लक्ष्मीरमृतमदिरे कौस्तुभः पारिजातः
स्वर्मातङ्गः सुरयुवतयो देव धन्वन्तरिश्च ।
मन्थाग्रैः स्मरसि तदिदं पूर्वमेव त्वयात्तं
संप्रत्यब्धिः शृणु जलधनस्त्वां प्रपन्नः प्रशाधि ॥ ३६ ॥

रामः । सगौरवं भगवन् रत्नाकर नमस्ते नन्वहं प्रशास्यो भगवतः सागरस्य तदेकवारमविनयो नयो वा क्षम्यतां रामस्य ।

बिभीषणः । किमुच्यते । ननु निसर्गनिरर्गलः पक्षपातो भवति भागीरथीनाथस्य ।

पीयूषाकर एव नित्यममुना धन्वन्तरिः सान्वयो
गङ्गावल्लभमस्य चेष्टितमयं शोभासुधादीधितिः ।
इत्यस्त्येव सतां मनःसु लिखिता सिन्धोः प्रशंसावलि-
र्जामाता भवतैव किं पुनरसौ लक्ष्मीगुरुः श्लाघ्यते ॥३७॥

रामसमुद्रौ सलज्जमासाते ।

बिभीषणः । देव का पुनरसौ वर्णनावर्णिका यया रत्नाक- रचरित्रमावेद्यते । पश्य ।

धत्ते यत्किलकिञ्चितैकमुकुनामेणीदृशां वारुणी
वैधुर्यं विदधाति दम्पतिदृशां यच्चन्द्रिकाद्रं नमः ।
यत्पीयूषभुजां च मन्मथसुहृन्नित्यं वयः सम्पदां
यल्लक्ष्मीरधिदैवतं च जलधेस्तच्चित्रमाचेष्टितम् ॥३८॥

सुग्रीवः । ईदृश एव महिमा भगवतः सागरस्य । यतः ।

या स्त्रीणामधिदैवतं गिरिसुता तत्सोदरः सानुमान्
मैनाको रजताकरः सुतनयः शैलेश्वरो येन सः ।
पक्षच्छेदसमुद्यतेन्द्रकुलिशत्रासाद्विलीय स्थितः
सोऽप्येतस्य करालकुक्षिकुहरे पातालजम्बालिनि ॥ ३९ ॥

अपि च ।

वहति भुवनश्रेणीं शेषः फणाफलकस्थितां
कमठपतिना मध्येपृष्ठं सदा स च धार्यते ।
तमपि कुरुते क्रोडाधीनं पयोधिरनादरा-
दहह महतां निःसीमानश्चरित्रविभूतयः ॥ ४० ॥

समुद्रः । सप्रणयासूयम् ।

मुञ्चन्निषयमनलं विशिखप्रकाण्डै-
र्मद्ग्राहडम्बरसमर्पणकेलिकाले ।
देव स्मृतं न कथमित्यपि यत्किलाहं
लक्ष्मीसखः क्व नु युगान्तशयः शयिष्ये ॥ ४१ ॥

रामः । अञ्जलिं बद्ध्वा मा पुनरविनयोद्घट्टनेन मां लज्जयतु नदीनाथः ।

समुद्रः । गङ्गायमुने प्रति ।

कमण्डलोर्ब्रह्मकराग्रभूषणा-
दियं प्रसूता भवमौलिभूषणम् ।
इयं च देव द्युमणेस्तरङ्गिणी
त्वदन्वयस्य प्रथमा सुवासिनी ॥ ४२ ॥

रामः । देवि अम्बिकापतिधृते मन्दाकिनि मातर्मार्तण्ड- नन्दिनि यमुने एष रामोऽभिवादयते ।

उभे । रविकुलालङ्करण राम अविरलं समरसंभारं वह ।

समुद्रः । रामं प्रति नियुज्यतामयं जनः ।

रामः । नन्वहं नियोज्यो भगवतः किं पुनः प्रकृते कर्मणि सहायमिच्छति रामः ।

समुद्रः । विशेषं श्रोतुमिच्छामि ।

गङ्गा । कृतं वाग्विस्तरेण ।

रक्षार्णवमहार्णस्सु पोतपात्रमिव स्थिरम् ।
द्रुतमारभ्यतां सेतुरखर्वैः पर्वतोत्तमैः ॥ ४३ ॥

* भागीरथीनाथ किं नामापराधित्वं यदि तच्चरणमनुवर्तनम् ।

† दशरथनन्दन रामचन्द्र सगरभगीरथसदृशगौरवस्ते समुद्रः संमुख एषः ।

सर्वे विस्मयन्ते ।

समुद्रः । यथाऽऽवेदितं त्रिस्रोतसा मणिमच्चक्रवालाचलमध्यमध्यासीनं वाडवदहनमुत्तरेणानन्तनागाङ्कपर्य्यङ्कशायिनं भगवन्तं दक्षिणेन योऽयं द्रुतेन्द्रनीलश्यामलः सलिलस्कन्धः स प्रदेशो निर्विबन्धः सेतुबन्धस्येति ।

रामः । विहस्य भगवन् किल ग्रावाणः कथं प्लवन्ते ।

समुद्रः । महामुनिवितीर्णवरस्य विश्वकर्मसूनोररातिवनदावानलस्य नलस्य करतलस्पर्शप्रभावेन ।

सर्वे महदाश्चर्यम् ।

नेपथ्ये । महान् कलकलः ।

समाकर्णितकेन हनुमान् । तदिदमत्रभगवतो मकरालयस्य वचनमुपश्रुत्य हृष्यतां कपिबलानामेष हराट्टहासमांसलः कलकलः ।

समुद्रः । रामभद्र किमपि वाञ्छन्तु वानरवीराः सकलकपिकुलानुग्राही पुनरयं मार्गो न सर्वे हनूमन्तस्तदमुं मलयतटीविटङ्कमधिरुह्य पश्यतु सेतुबन्धप्रदेशं रामः ।

रामः । यथाह धन्वन्तरेः प्रसविता । सप्रश्रयम् । अपार भगवन्नकूपार रामदुर्विनयसव्रणान्यङ्गानि तत्साधयतु निजं पातालनिलयं परमनुगृहीतोऽस्मि ।

समुद्रः । यथाह सप्तमो वैकुण्ठावतार इदं गम्यते गङ्गायमुनाभ्यां सह निष्क्रान्तः । सर्वे समारोहणं नाटयन्त्युपविशन्ति च ।

नेपथ्ये ।

भो नागनाथ हरिकच्छप दिव्यमत्स्य
स्वस्त्यस्तु वः क्षणमितः कुरुतापसर्पम् ।
अब्धावयं ननु रघूद्वहकीर्तिहेतुः
सेतुः प्रसर्पति दशाननधूमकेतुः ॥ ४४ ॥

अपिच ।

यादांसि हे चरत सङ्गतगोत्रतन्त्रं
वामेन चन्दनगिरेरुत दक्षिणेन ।
नोचेन्निरन्तरधराधरसेतुसूति-
राकल्पमेव न विरंस्यति वो वियोगः ॥ ४५ ॥

सुग्रीवः । हनूमन् आदिश्यन्तां सेनापतयः पर्वतानयनाय ।

हनूमान् । यदादिशति स्वामी । सर्वतो निरूप्य ।

दृप्यद्विक्रमकेलयः कपिभटाः शृण्वन्तु सुग्रीवजा-
माज्ञां मौलिनिवेशिताञ्जलिपुटाः सेतोरिह व्यूहने ।
दोर्द्दण्डद्वयताडनश्लथधराबन्धोद्धृतान्भूधरा-
नानेतुं सकलाः प्रयात ककुभः किं नाम वो दुष्करम् ॥ ४६ ॥

सुग्रीवः ।

आनयन्तु कपयो महागिरी-
नङ्गदस्तु सपदि प्रतीच्छतु ।
त्वं नलः प्रबलबाहुविक्रमः
सेतुबन्धविधये नियोजय ॥ ४७ ॥

सर्वे समाकर्णितकेन ।

हनूमान् । विहस्य । आपह्नुनीतः किमपि वर्तते वारिराशिः । यत्सेतुबन्धविहितये निजप्रतीहारशोणमुखेन शिक्षति जलचरमहासत्त्वानि ।

सुग्रीवः । सखे हनूमन् गच्छ आहूय वानरद्वयं यन्निवेदयति सेतुबन्धविधिं रामदेवाय ।

हनूमान् । निःसृत्य वानराभ्यां सह प्रविश्यैतौ कपित्थदधित्थौ निवेदयतः ।

कपित्थः । देव पेक्ख एसा वेलावणुम्मूलिदसए णिवेसिदपव्वदपब्भाराणं वाणराणं णिरन्तरा रिञ्छोली चदुद्दिसं गयणङ्गणे सेउबन्धविधिमासुत्तयन्ती विअरदि ।*

रामः । अहो पराक्रमातिशयः शाखामृगाणामहो महिमा महार्णवस्य यदेतेऽपि वसुन्धराधरा उद्ध्रियन्ते यच्चानेनाप्येवंविधे भूयसि भारे दत्तः स्वहस्तः ।

दधित्थः । एष सेतुकन्दलैककन्दो भवत्पराक्रममहीरुहमहाकुसुमं सीताविरहविच्छेदसमारम्भस्वस्त्ययनं रत्नाकरलाञ्छनप्रथमावतारो निवेशितः शिलोच्चयोच्चयो नलेन ।

कपित्थः । णिव्वाविददावदहणडम्बरा णिद्धोदधुद्धोत्तमदप्पहा पअट्टिदपञ्चवण्णधातुद्दवा खणपडिच्चिअसअलकविकुला णिट्ठाविददुट्ठमइन्दविन्दा गयणङ्गणागदपवङ्गमपुङ्गवाणं पक्खेवणारएण णिव्वुदबुब्बुडा णलकरयलग्गतुलणतारिदा सञ्चरन्ति सेउसीमन्तम्मि धरणीधरा † ।

दधित्थः । एवमेवैतत् । यथा निवेदितं कपित्थेन ।

और्वस्यात्यशनं विधाय शिखिनः क्षत्वा च वारां निधे-
र्मर्यादास्खलनं नलप्रणिहिताः प्राप्तास्तलं रंहसा ।
उन्मज्जन्ति महावराहमलिनात् पातालजम्बालतो
वेदोद्धारितिमिङ्गिलैकवसतेर्द्राक्सर्वतः पर्वताः ॥ ४८ ॥

विमृश्य ।

---

* देव प्रेक्षस्व एषा वेलावनोन्मूलितशरा निवेशितपर्वतप्राग्भाराणां वानराणां निरन्तरा पङ्क्तिश्चतुर्दिशं गगनाङ्गणे सेतुबन्धविधिमासूत्रयन्ती विचरति ।

† निर्वापितदावदहनडम्बरा निर्धौतधुन्धोत्तमदर्पाः प्रकटितपञ्चवर्णधातुद्रवाः क्षणपरिचितसकलकपिकुला निस्तापितदुष्टमृगेन्द्रवृन्दा गगनाङ्गणागतप्लवङ्गमपुङ्गवानां प्रक्षेपणारयेण निर्वृत्तबुद्बुदा नलकरतलाग्रतुलनतारिताः संचरन्ति सेतुसीमन्ते धरणीधराः ।

उत्खातः कपिभिर्गिरिर्नभसि यः संभाव्यते विस्तरा-
देकोप्येष करोति सेतुघटनं नीरन्ध्रमब्धाविति ।
सोऽपि व्यञ्जितयोगनिद्रकपिलव्यापारपूतात्मसु
प्रक्षिप्तोऽप्सु सहस्रभागभरणोऽप्यस्य क्व नाम क्षमः॥ ४९॥

कपित्थः । गुरुगुहाकुहरपइट्ठदुट्ठमअरा तरुक्खन्धणिसण्णसंखिणिलक्खका विसमसिलाअलप्फुडिदसिप्पिसंपुटमुक्कमोत्तियकरम्बिदणिअम्बा तलप्परूढसेवालजडिलबन्धा जलणिविडपक्खपालिमन्दसंचरणा चिरवीसम्भपसविअकमलणाहमच्छकुलतिमिङ्गिलरुद्धकन्दरद्धन्ता उवरि णिवडन्तमहिहरपब्भारल्लिडणभएण किंकिं ण कुणन्ति सिलुच्चयसंचया * ।

दधित्थः । सखे साधु निवेदितं राम देवाय। रामं प्रति।

यस्मिन्नयं किलिकिलामुखरो विमर्द-
स्तत्र ध्रुवं धृतमहीधरपातशङ्काः ।
दम्भोलिपातभयतः खमनुत्पतन्तः
सर्पन्त्यधो निभृतमद्रिमहाशकुन्ताः ॥ ५० ॥

हनूमान् ।

यं यं गिरिं क्षिपति वानरवर्ग एष
वारां निधौ निपतता ननु तेनतेन ।
द्राङ्मन्दराहतसुधाकवलामराणां
संस्थाप्यते मथनधीर्जलमानुषाणाम् ॥ ५१ ॥

लक्ष्मणः । साश्चर्यम् । आर्य कथापरम्परोपश्रुतानि प्रत्यक्षय समुद्रयादांसि ।

क्षिप्तो गिरिः कच्छपपृष्ठपीठात्
संघट्टवेगोच्छलितोऽनुपाती ।
ग्रासीकृतोऽयं तिमिना किमन्यत्
सचापि लोलेन तिमिङ्गिलेन ॥ ५२ ॥

रामः । वत्स लक्ष्मण अत्यल्पमिदमुच्यते ।

अस्ति मत्स्यस्तिमिर्नाम तथा चास्ति तिमिङ्गिलः ।
तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति राघवः॥ ५३॥

अपिच ।

क्षिप्तो गिरिर्जलधिबन्धविधौ नलेन
यात्येकतः शकुलशावविवर्तनाभिः ।
अप्यन्यतः कमठडिम्भनिशुम्भनेन
सेतुः कथञ्चिदिति सर्पति मध्यमब्धेः ॥ ५४ ॥

दधित्थः ।

* गुरुगुहाकुहरप्रविष्टदुष्टमकरास्तरुस्कन्धनिषण्णशङ्खिनीलक्षका विषमशिलातलोज्झितस्फुटितशुक्तिसंपुटमुक्तमौक्तिककरम्बितनितम्बास्तलप्ररूढशैवालजटिलबन्धा जलनिबिडपक्षपालिमन्दसंचरणाश्चिरविस्रम्भप्रसूतकमलनाभमत्स्यकुलतिमिङ्गिलारुद्धकन्दरध्वान्ता उपरिनिपतन्महीधरप्राग्भारोल्लोडनभयेन किंकिं न कुर्वन्ति शिलोच्चयसंचयाः ।

यद्ग्रावाणः प्लवन्ते यदपि च जलधिर्बध्यते लोष्टलीलां
बिभ्राणा यत्कपीन्द्रैः करतलतुलनादाह्रियन्ते महीन्द्राः।
यच्चष्टं दिव्ययोर्द्राक्कमठशकुलयोः पुत्रपौत्रप्रपौत्रै-
र्मार्गात्तद्वैव सिन्धौ रजनिचरपतेर्नाशहेतुः स सेतुः ॥ ५५॥

सुग्रीवः । इदमपरमुपस्थितं सेतुबन्धे विघ्नान्तरम ।

तावत्क नाम गिरयः श्रितसेतुबन्धा
रुन्धन्ति पाथसि समुत्थितपाञ्चजन्ये ।
यावत्तदुच्छलितदिव्यनदीसहस्रै-
रापूर्य दुस्तरतरः क्रियते समुद्रः ॥ ५६ ॥

बिभीषणः । इदं चाद्भुततरम् ।

यावन्निपातरयकीर्णमशेषमर्णो
व्यावृत्य संलगति नो ककुभां मुखेभ्यः ।
तावत्स्वमुक्तमपि चित्रमपां निधाना-
दाकृष्य शैलमयमुत्पतितः प्लवङ्गः ॥ ५७ ॥

अपिच ।

और्वः शिखी वसति यत्र हरिश्च यत्र
यत्रासुराः शिखरिणश्च पतत्रभाजः ।
आमूलतोऽम्बुधिरयं प्रकटीकरोति
तत्तन्महाकपिविमुक्तमहीध्रकर्णः ॥ ५८ ॥

सुग्रीवः ।

ये गोत्रे सुरवारणस्य करिणो यः कौस्तुभीये कुले
कान्तो रत्नचयः श्रियश्च निभृता ये केचन ज्ञातयः ।
ये चन्द्रस्य च बान्धवाः किमपरं तानप्ययं दर्शये-
त्यभ्युद्धृत्य हनूमताऽमरगिरिर्वेगादिहाऽऽक्षिप्यते ॥५९॥

रामः । सखे सुग्रीव मामेवं त्रयस्त्रिंशतो देवकोटीनां वासः स खल्वसौ ।

कपित्थः । एदे विन्दारअविन्दविलासआसा कुङ्कुमपङ्कल्लविअहूणतरुणीगणहपासच्छविणो मेरुमहीहरस्स एदे अट्ठुणारीसरविसमसंणिवेसचरणपडिबिम्बचुम्बिअसिलाअलट्ठन्ता णीहारणिवहणिविडणिवडणवित्तपण्डुरत्तणा गोरीगुरुणो गिरिचक्कवट्टिस्स एदे सुराहूदसुधारसोक्कारिसणिच्चतरुणतरुकोत्थुहमिअङ्कमदूरासुरद्दुमसिरिसमुप्पत्तिसक्खिणो मन्दरगिरिन्दस्स एदे कुवेरमित्तत्तणकिअणिवासकित्तिवासणिच्छिण्णघमहग्घिअगुणा णित्थलिअजरठमियङ्कमण्डलच्छाआ केलासशेल्लस्स एदे कंचणकमलघट्टचक्काङ्किअमाणसा गन्धहरिणणाहिसुगन्धिणो गन्धमादणस्स एते हणुमन्तबालभावचावलविलुत्तलवलीकन्दलकडप्पा तक्कालपक्खालिअकेरलीकवोलकालकन्तिणो अञ्जणाधारत्तीहरस्स एदे मत्तण्डमण्डलमग्गभङ्गक्कदायिणो णम्मदाणईसोत्तसित्तसिहरसिहण्डमण्डणा विंझधराह-

रस्स एदे विविहवण्णमणोहरमणिप्पभाप्पसरविरइआखण्डलकोअण्डदण्डमण्डला अगत्थिमुणिसीमन्तिणीमज्जणपवित्तिअतित्थवित्थारा रोहणाचलस्स एव्वमण्णस्स वि भुवणगब्भसंभवस्स गिरिणो साणुसंघाआ पवङ्गमपुङ्गवेहिं समोद्धरिआ सेउबन्धं विरअयन्ति * ।

दधित्थः । सहसा विलोक्य ।

पादोनवर्तिनि महोदधिसेतुबन्धे
पारे परे कपिबलैरवलोक्य लङ्काम् ।
अत्युल्लसत्किलिकिलारवमुत्प्लुतं च
यातं च सौधशिखरेषु निशाचरीभिः ॥ ६० ॥

नेपथ्ये महान् कलकलः । सर्वे समाकर्णितकेन ।

रामः । किं पुनरयं प्रलयकालोत्तालवैकुण्ठकालकण्ठकोलाहलकालः कलकलः ।

कपित्थः । पुरतो ऽवलोक्य । देव सेउबन्धपडिबन्धणिमित्तं कीरन्तअणारोहणमाणिक्कपारक्कस्स वित्थरन्तवाहिणीतरङ्गतुरङ्गमसंघट्टस्स ओत्थरन्तजङ्गमदुग्गमहामयंगअस्स पसरन्तजलहिजलवत्तरहवरस्स दोलन्तगअणकेलिकाणणधअवडायाडम्बरस्स कढ्ढिज्जन्तजिम्भायमाणकयन्तवयणत्राणासणस्स पडन्तसेणाविलासिणीकडक्खलक्खस्स समुज्जन्तरणलच्छिकङ्कणचक्कचक्कचक्कवालस्स उब्भिज्जन्तजयसिरिवेणिदण्डचण्डासिणो ठवहिदस्स चउरङ्गस्स वि पढमक्खणप्पहाविदस्स रक्खसलोअस्स सुग्गीवसासणसमासादिदविचित्तहुंकारेहिं णिसग्गसंगअगिरिसिहरतरुप्पहरणपाणिजुअलेहिं वाणरेहिं पडिक्खलिज्जन्तस्स रक्खसाणीअस्स एस हलबोलो † ।

* एते वृन्दारकवृन्दविलासवासाः कुङ्कुमपङ्कचर्चिततरुणतरुणीगण्डपार्श्वचक्षयो मेरुमहीध्रस्य । एतेऽर्द्धनारीश्वरविषमनिवेशचरणप्रतिबिम्बचुम्बितशिलातलार्द्धान्ता नीहारनिवहनिबिडनिपतनवित्तपाण्डुरत्वा गौरीगुरोर्गिरिचक्रवर्तिनः । एते सुरानुभूतसुधारसोत्कर्षनित्यतरुणतराः कौस्तुभमणाङ्कमदिरासुरद्रुमश्रीसमुत्पत्तिसाक्षिणो मन्दरगिरीन्द्रस्य । एते कुबेरमित्रत्वकृतनिवासकृत्तिवासनिर्विघ्नमहर्घितगुणा निर्जितजरठमृगाङ्कमण्डलच्छायाः कैलासशैलस्य । एते काञ्चनकमलपत्रशोभितमानसा गन्धहरिणनाभिसुगन्धिनो गन्धमादनस्य । एते हनूमद्बालभावचापलविलुप्तलवलीकन्दलसमूहास्तत्कालप्रक्षालितकेरलीकपोलकालकान्तेरञ्जनधरित्रीधरस्य । एते मार्तण्डमण्डलमार्गैकभङ्गदायिनो नर्मदानदीस्रोतःसिक्तशिखरशिखण्डिमण्डना विन्ध्यधराध्रस्य । एते विविधवर्णमनोहरमणिप्रभाप्रसरविरचिताखण्डलकोदण्डदण्डमण्डला अगस्त्यमुनिसीमन्तिनीमज्जनपवित्रिततीर्थविस्तारा रोहणाचलस्य । एवमन्यस्यापि भुवनगर्भसंभवस्य गिरेः सानुसंघाताः प्लवङ्गमपुङ्गवैः समुद्धृताः सेतुबन्धं विरचयन्ति ।

† सेतुबन्धप्रतिबन्धनिमित्तं क्रियमाणारोहणमाणिक्यपदातिकस्य विस्तीर्यद्वाहिनीतरङ्गतुरङ्गमसंघस्योद्ग्रमानजङ्गमदुर्गमहामतङ्गजस्य प्रसरज्जलधिजलवद्रथवरस्य दोलायमानगगनकेलिकाननध्वजपताकाडम्बरस्य कृष्यमाणजृम्भायमाणकृतान्तवदनबाणासनस्य पतत्सेनाविलासिनीकटाक्षलक्षस्य समुद्यद्रणलक्ष्मीकङ्कणचक्रचक्रचक्रवालस्योद्भिद्यमानजयश्रीवेणिदण्डचण्डासेरुपस्थितस्य चतुरङ्गस्यापि प्रथमक्षणप्रधावितस्य राक्षसलोकस्य सुग्रीवशासनसमासादितविचित्रहुंकारैर्निसर्गसंगतगिरिशिखरतरुप्रहरणपाणियुगलैर्वानरैः प्रतिक्रियमाणस्य राक्षसानीकस्यैष कलकलः ।

लक्ष्मणः । साधु लङ्केश्वर साधु षाड्गुण्योचितमुपक्रान्तं न पुनर्निरूपमाननिजसाहसोचितम् ।

सुग्रीवविभीषणौ । तदयतः किंचिदुपसृत्योपविशतु देवः ।

रामः । तथा करोति ।

कपित्थः । परिमिलिअवलीमुहपडिक्खलिज्जन्ते णिसायरसेणे सुण्णीकइअ दिअन्तराइं समकालपधाविएहिं पवङ्गमेहिं पडिक्खदसिलुच्चआणं दससहस्सेहिं पूरिआ सा सेउखण्डी उत्तीणं अ संपुण्णं वाणराणीअं दिण्णो लङ्काउरीए सण्णाहपडहो वज्जिआइं पुरन्दरजआणीदाइं समरतूराइं पढिआ रावणरणभोगावली वन्दिविन्देहिं गीअं च केलासुद्धरणपमुहं चरिदुच्चयं चारणगणेहिं वाणरपडिपक्खभावेण अ सुणिज्जन्ति पयट्टहासाइं रक्खसीणं वअणाइं ता कुणह जहजह कादव्वम् * ।

लक्ष्मणः । भद्र विश्रब्धो भव नाद्याप्यायुधग्रहणकालो निर्दशाननानि निर्मेघनादानि च निःसृतानि बलानि ।

दधित्थः । सुभटसमाकृष्टकोदण्डदण्डं निहतवानराच्छभल्लभल्लं रभसनिक्षिप्तनिरन्तरभिन्दिपालमालं वेगप्रवर्तितचक्रचक्रं खण्डितविपक्षशक्ति शक्तिनिर्दारितपरशुकपरशुकं कुवलयवनभ्रमनिपातिसितशकुन्तकुन्तं परहृदयप्रकम्पनं दुधाहृतकरीन्द्रकरालकरवालं समरप्रचारचतुराङ्गचतुरङ्गं निर्मर्यादप्रसृतमातङ्गमातङ्गं योधजयैकस्पन्दनस्यन्दनं समासादितविपत्तिनिर्भरं प्रवृत्तमेव क्वणितसकलानीकसमनीकम् । विभाव्य अये परस्परं संवलनादति तुमुलं वर्तते । विहस्यैकतो निरूप्य ।

अमी कबन्धैः प्लवगा रणाङ्गणे
शिरस्सु कण्ठात्पतितेषु रक्षसाम् ।
मिथो विरोधात् जनहासदायिनीं
सृजन्ति सृष्टिं कपिराक्षसात्मिकाम् ॥ ६१ ॥

अन्यतोऽवलोक्य ।

निशाचरोऽयं गमितः कबन्धतां
करीन्द्रवक्त्रे पतितेऽधिकन्धरम् ।
प्रवृत्तनृत्तक्रमभीमदर्शनैः
करोति हेरम्बवपुर्विडम्बनाम् ॥ ६२ ॥

अपरतोऽवलोक्य ।

अच्छभल्लकपयः स्वकबन्धै-
र्व्यत्ययादधिनिविष्टशिरस्कैः ।

* परिमिलितवलीमुखप्रतिकवलोयमाने निशाचरसैन्ये शून्यीकृत्य दिगन्तराणि समकालप्रधावितैः प्लवङ्गमैः प्रतिक्षिप्तशिलोच्चयानां दशसहस्रैः पूरिता सा सेतुखण्डी । उत्तीर्णं च संपूर्णं वानरानीकम् । दत्तो लङ्कापुर्यां सन्नाहपटहः । वादितानि पुरन्दरजयानीतानि समरतूर्याणि । पठिता रावणरणभोगावली बन्दिवृन्दैः । गीतश्च कैलासोद्धरणप्रमुखश्चरितोच्चयश्चारणैः । वानरप्रतिपक्षभावेन च श्रूयन्ते प्रकटहासानि राक्षसीनां वचनानि तत् कुरुत यथायथा कर्तव्यम् ।

Digitized by Google

मायया रचितचित्रशरीरा
राक्षसा इव विभान्ति मुहूर्तम् ॥ ६३ ॥

अन्यतोऽवलोक्य ।

गतं परप्रणतिपरायणं शिर-
स्समित्सुहृत्करयुगलं च तिष्ठति ।
इतीव ह्री विकसितसंमदोत्सवं
प्रवर्तते किमपि कबन्धताण्डवम् ॥ ६४ ॥

कपित्थः । देव पेक्खदु अणवरअविप्पइण्णघुसिणचुण्णं विअ अम्बरं विरअअन्तं भुवणगब्भप्पसरिदं रअसमुद्दमट्ठमं विअ वित्थारअन्तं तिदिवदंसणदिण्णप्पआणं विअ धरणिमण्डलं दंसअन्तं विहिअवसुन्धराफंसभअं रवितुरङ्गाणं उच्छलियधूलिवलयतलिणीकअभूमिभारत्तणेण किअमहाणुग्गहं भुअङ्गवइणो सेसस्स वीरजणदंसणणिवेसिअवेसविसेसपंसुलत्तणेण असूइयवित्थारं विज्जाहरीहिं पओसविसट्टणअणकन्दोट्टभरणणिवारणदिण्णपाणिपिहिदवअणत्तणेण जुउच्छिअं अच्छराहिं घण्टाटङ्कारसुणिज्जन्तकरिन्दं कणअकिङ्किणीझणक्कारजाणिज्जन्तसन्दणं हेसारवसूइज्जन्ततुरङ्गं कट्ठिअगुणणिविडणमन्ताटणिमुक्कडक्कारकलिज्जन्तधाणुक्कं अङ्गपरिफंसपडिज्जाणिज्जन्तरिक्खरक्खसवाणरं चउरङ्गवलचडुलचरणक्खोहसमुत्तम्भिअरेणुविरइअणीरन्धान्धआरं समरङ्गणं वट्टइ * ।

दधित्थः । देव यथाऽऽवेदितं कपित्थेन अति हि निर्भरो भूपरागप्रसरः । तथाहि ।

हेलाचण्डचलच्चमूपरिकरक्षुण्णक्षमाजन्मभिः
पक्केलाफलगर्भचूर्णरुचिभिः कीर्णेऽम्बरे रेणुभिः ।
एतस्मिन् समराङ्गणे गुणनिधिर्विश्वप्रदीपोऽप्ययं
तूर्णोत्तानितकांस्यतालकरणिर्जातो दिनानां पतिः ॥ ६५ ॥

अपिच ।

युद्धोत्थे रजसामुदञ्चति चये द्वाभ्यां दवीयोऽन्तरान्
पाणिभ्यां युगपच्च लोचनपुटानष्टौ पिधातुं क्षमः ।
एकैकं दलमुच्चमय्य गमयन् वासाम्बुजं कोशतां
धाताप्यावरणाकुलः स्थित इतः स्वाध्यायवन्ध्याननः ॥ ६६ ॥

कपित्थः । विहस्य णिरन्तरपसरन्तसरलक्खपुङ्खविकिरणेण विअडधअपडाआवेल्लिरपल्लवपेल्लणेण दंसणागअसुरसुन्दरीचक्कविमुक्कगरिल्लमल्लवेल्लणेण पढमं तणुईकदं रणरेणुचक्कवालं णिट्ठुरप्पहारकयकबन्धकन्धरारन्धणीसरन्तरुहिरधाराधोरणीहिं करिकरखेलावेल्लिअसीअरासारप्पसरेण अ णिल्लूणमेव मूलदो धूलिमण्डलम् * ।

दधित्थः । प्रशान्तरेणुनि रणाङ्गणे पुनः संसक्तमेव यशोधनमायोधनं शूराणाम् । विभाव्य । अये महाप्रभावः समराङ्गणप्राणपरित्यागो वीरवर्गस्य यदप्सरसोऽपि स्वयंवरेणोपतिष्ठन्ते । यदुत ।

चण्डासिच्छेदलीलायितहृतशिरसो दिव्यतां संदधाना
न्यञ्चद्भिः कण्ठकाण्डैः समरवशदृशः पूर्वसंस्कारशक्त्या ।
द्राग्दृष्ट्वा नाथमाद्यं सपदि विदधतः फालदानं विमाना-
द्वीराः स्वःसुन्दरीभिः किमिदमिति धृता बन्धुरैर्बाहुबन्धैः ॥ ६७ ॥

सुग्रीवः । यथैव निवेदितमति हि नामाश्चर्यवितरणैकमुष्टियोगः समरसंरम्भो वर्तते । तथाहि ।

वीराश्चण्डासिदण्डप्रहरणसुहृदः संमुखं संपतन्तो
ये जाताः पात्रमाजिष्वनिमिषसुमनोदामदानोत्सवस्य ।
पश्य प्रेङ्खत्क्षुरप्रप्रहृतिभिरमरीभूय तैरेव भूयः
शेषाणां मूर्ध्नि मुक्ताः सुरकुसुममहावृष्टयः पुष्पभृङ्गाः ॥ ६८ ॥

बिभीषणः । देव इतोऽपि दृश्यतां द्रष्टव्यम् ।

वीरैर्वैमानिकत्वं समरमरणतो लम्भितैः सङ्गराग्रं
दृष्ट्वा स्वस्वामिबाधाप्रहरणविरहात्सर्वतः सूचितोऽयम् ।
दारैः पाशप्रकाशैः सपदि वलयकैश्चक्रवत्संपतद्भिः
स्वर्णापीडैः स्वमुक्तद्रुघणकरणिभिर्नूतनो युद्धमार्गः ॥ ६९ ॥

कपित्थः । णिविडपडन्तकरिकरङ्कसंकटं फारफेक्कारफुल्लिअगल्लसिवासेविआसवं रुहिरपाणपीडणुड्डुमरडाइणीमुक्कडक्काडामरं रत्तमत्तवेआलविलासिणीकेलिकलिअकिलिकिलाकोलाहलकोहलं समरसंभारसंभाविअपवलवलीमुहवलक्कन्तं रक्खससेण्णं लङ्काभिमुहं पअट्टइ † ।

हनूमान् । विहस्य देव विजितमस्माभिर्यत्प्रमुख एव विमुखं राक्षसबलम् ।

* देव प्रेक्षतामनवरतविप्रकीर्णघुसृणचूर्णं वियदन्तरं विरचयन्तं भुवनगर्भप्रसृतं रजःसमुद्रमष्टममिव विस्तारयन्तं त्रिदिवदर्शनदत्तपर्याणमिव धरणिमण्डलं दर्शयन्तं विहितवसुन्धरास्पर्शभयं रवितुरङ्गाणां उच्छलितधूलिवलयतलिनीकृतभूमिभारत्वेन कृतमहानुग्रहं भुजङ्गपतेः शेषस्य वीरजननिवेशितवेशविशेषपांसुलत्वेनासूयितविस्तारं विद्याधरीभिः प्रदोषविकसितनयनकमलभरणनिवारणदत्तपाणिपिहितवदनत्वेन जुगुप्सितमप्सरोभिः घण्टाटङ्कारश्रूयमाणकरीन्द्रं कनककिङ्किणीझणत्कारज्ञायमानस्यन्दनं हेषारवसूच्यमानतुरङ्गं कृष्टगुणनिबिडनमदटनिमुक्तकटत्कारकल्यमानधानुष्कं अङ्गपरिस्पर्शप्रत्यभिज्ञायमानर्क्षराक्षसवानरं चतुरङ्गबलचटुलचरणक्षोभसमुत्तम्भितरेणुविरचितनीरन्ध्रान्धकारं समराङ्गणं वर्तते ।

* निरन्तरप्रसरत्सरलक्षपुङ्खविकिरणेन विकटध्वजपताकाचञ्चलपल्लवप्रेरणेन दर्शनागतसुरसुन्दरीचक्रविमुक्तश्रेष्ठमाल्यप्रेरणेन प्रथमं तनूकृतं रणरेणुचक्रवालं निष्ठुरप्रहारकृतकबन्धकन्धरारन्ध्रनिःसरद्रुधिरधाराधोरणीभिः करिकरखेलाप्रेरितसीकरासारप्रसरेण च निर्लूनमेव मूलतो धूलिमण्डलम् ।

† निबिडपतत्करिकरङ्कसंकुलं स्फारफेत्कारफुल्लगल्लशिवासेविताश्रवं रुधिरपानपीडनोड्डामरडाकिनीमुक्तडात्कारडामरं रक्तमत्तवेतालविलासिनीकेलिकलितकिलिकिलाकोलाहलसंकुलं समरसंभारसंभावितप्रबलबलीमुखबलाक्रान्तं राक्षससैन्यं लङ्काभिमुखं वर्तते ।

रामः । प्रवृत्ते रणकर्मणि सेनयोः सारणापसरणानि गणशो भवन्ति कस्तत्र जयः पराजयो वा ।

हनूमान् । देव नैवं यत्किल प्रमुखविमुखं बलं द्वादशवर्षाणि न संमुखीभवतीति प्रायोवादः ।

रामः । विहस्य भद्र हनूमन् किमनेन विमुखेन संमुखेन वा यदिह न धूर्जटिधराधरोद्धारैण्यकुण्ठो दशकण्ठो नापि त्रिनिर्जितमघवा मेघनादः । पुरोऽवलोक्य कथं लङ्काप्रतोलीमतिक्रम्य राक्षसबलं वर्तते । ऊर्ध्वमवलोक्य सकौतुकम् ।

कोऽयं दिव्ये विमाने ।

हनूमान् ।

रजनिचरपतिः ।

लक्ष्मणः ।

साधु पौलस्त्य साधु ।

द्राक् चण्डं चन्द्रहासं कलय सविधगे नास्त्यरातौ तितिक्षा ।

रामः ।

सीताप्यत्रैव तस्याश्चटुषु कृतरतिः सैष भोः कार्मुकं मे

सुग्रीवः ।

शान्तं बाणाः सरन्तो न खलु जनकजां रावणं वा विदन्ति ॥७०॥

नेपथ्ये ।

भोः पश्य राम मम पार्श्वगतां च सीतां
तच्च प्रदर्शय निजं जितवालि वीर्यम् ।
अस्याः स एव ननु मूर्धनि चन्द्रहासो
रम्भाप्रकाण्डदलनीव्रममातनोति ॥ ७१ ॥

रामः । विहस्य हंहो रावण संवृणु जनितजनहासं चन्द्रहासं कः शक्तिमानपि मृगाङ्कमूर्तिं शिलापट्टके पिनष्टि ।

लक्ष्मणः । सविषादम् ।

यावत्करोति न धनुः सशरं ममार्यो
यावच्च सूचयति विक्रमणं हनूमान् ।
आर्याशिरो दशमुखेन विलूय तावत्
क्षिप्तं च कल्पितमदर्शनमम्बरे च ॥ ७२ ॥

रामः । ससंभ्रमं कथमिदं दशकण्ठेन विलूय क्षिप्तं सीताशिरः शर्करायां भुवि पतति तत्सत्वरमुपसृत्य स्तनतटपरिपीडनपरिचितस्पर्शे प्रसारितकरयुगजनितेऽञ्जलौ प्रतीच्छामि । तथा कृत्वाऽवलोक्य च हा वैदेहि शिरःशेषा वर्तसे सकरुणं विभाव्य ।

तरुणभुजगलीला सैव वेणी तदेव
श्रवणयुगमनङ्गन्यस्तदोलाद्वयाभम् ।
स्मरकुवलयबाणावीक्षणे ते च तस्या-
स्तदयमलकलक्ष्मा वक्त्रचन्द्रः स एव ॥ ७३ ॥

हा प्रिये वैदेहि ।

इन्दोः संप्रति कान्तिरस्तु विमला दीर्घा मृगीणां दृशः
स्वादिष्ठा कलकण्ठवाक्किसलयान्येकान्तरक्तानि च ।
यातायां त्वयि तस्य राक्षसपतेर्दुस्संचरं गोचरं
यद्वा तस्य गभीरमास्यकुहरं दुर्मेधसो वेधसः ॥ ७४ ॥

सविशेषकरुणम् ।

देव्याः शिरो मम पुरो यदिदं विलूनं
दृष्टं छलाद्दशमुखो यदसौ प्रणष्टः ।
धिग्निष्फलं हनुमतः प्लवनं तदब्धौ
धिग्निष्फलः स च ममाचलसेतुबन्धः ॥ ७५ ॥

सर्वे विषादं नाटयन्ति ।

लक्ष्मणः । सक्रोधम् । अरे रे समरकुण्ठ दशकण्ठ ।

छद्मात्मना जनकजानिधनेन्धनेन
यो दीपितः सपदि मे हृदि शोकवह्निः ।
निर्वापयिष्यति पतिस्समसौ रघूणां
त्वत्कामिनीजनविलोचनवारिपूरैः ॥ ७६ ॥

रामः । अवस्थोचितं स्मित्वा सखे सुग्रीव वयस्य विभीषण रावणवधे विहितप्रतिज्ञाः कृता वयं वत्सेन ।

लक्ष्मणः । आश्चर्यमाश्चर्यम् । निर्लूनमप्यार्याशिरः समुल्लपति तत्सन्निधवर्तिनो भूत्वा शृणुमः । सर्वे समुपसर्पन्ति ।

लक्ष्मणः । कथं स्फुटाक्षरमिदमभिधत्ते ।

सूत्रधारचलद्दारुगात्रेयं यन्त्रजानकी ।
कण्ठस्थशारिकालापा कृता लङ्केशकेलये ॥ ७७ ॥

तच्छिरस्येव निर्याता साऽद्याऽहं राम शारिका ।
त्वच्चरित्ररसप्रीत्या त्वां बोधयितुमास्थिता ॥ ७८ ॥

तेन तेऽग्रेऽभिनीताऽस्याः शिरःखण्डननाटिका ।
मृता सीतेति येन त्वं एजान् प्रति निवर्तसे ॥ ७९ ॥

सर्वे हर्षं नाटयन्ति ।

रामः । स्वस्ति वभत्यै प्रियकारिण्यै तत्समीहितसिद्धये साधय विहस्य अहो शौर्य इव छलप्रपञ्चेऽपि चातुर्यं रावणस्य ।

लक्ष्मणः । आर्य सुवेलाचलमेखलासु तावदावसन्तु कपियूथपतयः प्रातर्लङ्कादुर्गमभियोक्ष्यते ।

रामः । यदि न प्रकृत्यमर्षणो रावणः संप्रत्येव प्रत्यभियुङ्क्ते ।

नेपथ्ये । महान् कलकलः ।

लक्ष्मणः । किं पुनरयं भैरवाकारशङ्कुरकृतफेत्कारविकरालः कलकलः ।

विभीषणः । पुरोऽवलोक्य ।

Digitized by Google

किञ्चिन्मृगाधिपमुखाय करीन्द्रवक्त्रं
कुप्यल्लुलायवदनाय च वाजितुण्डम् ।
आसेधयन् सपदि रात्रिचराननेन
पर्येत्ययं दशभुजो ननु सिंहनादः ॥ ८० ॥

कथय कोऽयं सिंहनादो नाम ।

बिभीषणः । देव मान्दोदरेयो मेघनादावरजस्य समरसीमानमवतरति तेनायमन्ति मांसलः कलकलः ।

रामः । विहस्य तद्वयमध्यं रावणस्य ।

बिभीषणः । अश्वयश्वसंख्यानेन पराक्रमेण पुनर्द्विगुणो यतः ।

दोर्दण्डोड्डीयमानाचलचलितभवस्तम्भनारम्भमज्ज-
द्भुध्रप्राग्भारभाराचितभुजविपिनं कुर्वतो न्यञ्चदुच्चैः ।
लङ्कानाथस्य नन्दिप्रभृतिषु दलयत्स्वङ्गमङ्गं महास्त्रे-
रेकं वेगादनेकेष्वपि रचितरणं सिंहनादं स्मरामि ॥८१॥

ततः प्रविशति यथानिर्दिष्टः सिंहनादः ।

सिंहनादः । पुरोऽवलोक्य कथमन्तरिततापसं वानरसेनापतिभिरभिमुखीभूतम् ।

रामः । किं पुनरयं पुरतोऽन्धकार इव ।

कपित्थः । देव देवादेसमन्तरेणवि जम्बवन्तमुक्कबुक्कारवाइं हणुमन्तमन्तपरिसरिआइं विप्फुरिअभीमभुअदण्डाइं वित्थरन्ततारतारगलगज्जिदाइं छाआणिज्जिअपरिपिक्कफणसफलपणसपिसङ्किअगअणङ्गणाइं सुसेणाहिट्ठिअसेणाणिवेसाइं णीलप्पहाणीलिअदसदिसन्तराइं वलीमुहकिलिकिलारअभरिददरीमुहाइं णलप्पहावाणलदुज्जायाइं समुल्लसियकुमुदकन्तिकुमुअकित्तिसन्ताणाइं सिंहणादसंमुहमोत्थरिआइं णीसेसाइं वि वाणरवलाइं * ।

दधित्थः । अथ युगपत् क्षुभितानि दशार्धसंख्यान्यपि सिंहनादमुखानि ततश्च ।

धूत्कारध्वनितं मृगेन्द्रवदनाद्वन्त्याननाद् बृंहितं
बंहिष्ठं च लुलायतुण्डकुहरक्रोडाज्जरद्वात्कृतम् ।
जातं चार्वणवक्त्रकन्दरदरादेतस्य हेषारुतं
संख्ये कस्य भयोदयाय न वचो निर्यच्च रक्तोमुखात्॥८२॥

कपित्थः । तदो देव णिविडभुअदण्डपीडणाविसदटङ्कारं कदुअ कोदण्डं तह वरिसिदुं पउत्तो वाणविट्ठिं वाणरविन्दे जह ण सुरसुन्दरीविमुक्को कुसुमुक्केरो सुभटेसु णिवडइ ण समरङ्गणगअं रेणुचक्कमक्कमइ दिअन्तरालाइं ण दिणअरकिरणवावारपअट्टोवि गयणमाणिक्कस्स पसरइ रहो * ।

सिंहनादः । पुरोऽवलोक्य साट्टहासम् ।

रेरे क्षुल्लकाः प्लवगपशवः किं भवद्भिर्भवद्भिः
संग्रामाग्रे मम रणरसो लम्भितः सर्वभावम् ।
यस्मिन् कस्मिंश्च खलु समरे रोचकी सिंहनाद-
स्तन्मे रामं कथयत स हि श्रूयते वीरसिंहः ॥ ८३ ॥

कपित्थः । वाणवरिसपीडिअं विअ वाणरवलं पज्जाउलं जंबुद्दीवाहिमुहं वट्टइ † ।

सिंहनादः । भूयो विलोक्य किमेताभिर्विजिताभिरपि वानरकीटकोटिभिः । हस्तानुद्दिश्य ।

हे पाणयो बिभृत पञ्च महाधनूंषि
पञ्चापि येन युगपत्प्रतियोधयामि ।
सुग्रीवमत्तदमनं च सहाङ्गदेन
रामं च रामजयिनं सह लक्ष्मणेन ॥ ८४ ॥

भूयः पुरो विलोक्य साट्टहासं कथं तेऽपि महावीरवानरसेनापतयोऽपि नश्यन्ति किञ्चिदुच्चैः ।

सुग्रीवाङ्गदमैन्दनीलकुमुदप्रह्लादतारादयः
किं मुग्धाः स्थ निजान्गृहान्प्रति यथा दृष्टेन याताध्वना ।
पातालार्पितशैलजालरचनारम्यक्रमोत्तम्भितो
नन्वास्ते विपुलः स वो जलनिधावद्यापि सेतुः स्थिरः॥ ८५॥

रामः । वत्स लक्ष्मण किमेतत् ।

लक्ष्मणः । सगर्वमग्रतो भूत्वा रेरे विकृताकार दुराचार नृमांसकवलनदक्ष राक्षसापसद किमिदमतिप्रगल्भमाभाषसे नन्वदृष्टवीरप्रकाण्डचरितचण्डिमाऽसि ।

सिंहनादः । अनाकर्णितकेन वानरताडनं नाटयित्वा रेरे क्षुल्लकाः प्लवगपशव इत्यादि पठति ।

रामः । साधु सिंहनाद साधु न क्षेपितस्त्वया वीरवंशरिष्ठो दशकण्ठः ।

सिंहनादः ।

रामराम मयि मुञ्च सायकान्
प्राक्प्रहाररुचिरेष रावणिः ।
येन ते चरममाशुदर्शये-
च्छस्त्रतन्त्रमयमेतदम्बरे ॥ ८६ ॥

रामः । सधैर्यमवलोक्य विहस्य च ।

---

* देवादेशमन्तरेणापि जाम्बवन्मुक्तबुक्काररवाणि हनूमन्मन्त्रप्रसृतानि विस्फुरितभीमभुजदण्डानि निस्तीर्यमाणतारतारगलगर्जितानि छायानिर्जितपरिपक्वपनसफलपनसपिशङ्कितगगनाङ्गणानि सुषेणाधिष्ठितसेनानिवेशानि नीलप्रभानीलितदशदिगन्तराणि वलीमुखकिलिकिलारवभरितदरीमुखानि नलप्रभावानलदुर्जयानि समुल्लसितकुमुदकान्तिकुमुदकीर्तिसंतानानि सिंहनादसंमुखमवतीर्णानि निःशेषाण्येव वानरबलानि ।

* ततो देव निबिडभुजदण्डपीडनाविशदटङ्कारं कृत्वा कोदण्डं तथा वर्षितुं प्रवृत्तो बाणवर्षं वानरवृन्दे यथा न सुरसुन्दरीविमुक्तः कुसुमोत्करः सुभटेषु निपतति । न समराङ्गणगतं रेणुचक्रमाक्रामति दिगन्तराणि । न दिनकरकिरणव्यापारप्रकटोऽपि गगनमाणिक्यस्य प्रसरति रथः ।

† बाणवर्षपीडितमिव वानरबलं पर्याकुलं जम्बुद्वीपाभिमुखं वर्तते ।

धिग्धिङ्निशाचरपतिं शुकसारणौ धि-
ग्धिङ्मेघनादमथ धिग्दश राजपुत्रान् ।
यैस्त्वं विचित्रवपुषा चिरमीक्षणीयः
क्रूराशयैरुपहृतो रणदेवतायै ॥ ८७ ॥

सिंहनादः । राघव अति हि नाम तृप्यसि किं पुनर्दर्प्प-
कारणं किञ्च न ते चरितेषु व्रीडिताः स्मः ।

स्त्रीमात्रं ननु ताटका भृगुभवो रामश्च विप्रः शुचि-
र्मारीचो मृग एष भीतिभवनं वाली पुनर्वानरः ।
भोः काकुत्स्थ विकत्थसे कथय किं वीरो जितः कस्त्वया
दोर्दर्प्पस्तु तथापि ते यदि ततः कोदण्डमारोपय ॥ ८८ ॥

लक्ष्मणः । विहस्य ।

स्त्री ताटकास्तु परं गुर्वाज्ञा गुरुकारणम् ।
मारीचोऽप्यस्तु स मृगः क्षात्रं हि मृगयारसम् ॥ ८९ ॥

परशुरामब्राह्मणदमने शृणु सूक्तं वैतालिकस्य योऽजम्भं
जितवानित्यादि पठति वालिविजये पुनरुपालभ्यसे ।

रामः ।

वाली वलीमुख इति ब्रुवता त्वयैव
लङ्कापतेर्मलिनितो यशसां प्ररोहः ।
न्यूनाज्जयो यदिह

लक्ष्मणः ।

स चापि तेन
दोर्मूलपञ्जरशुको विहितः पिता ते ॥ ९० ॥

सिंहनादः । सक्रोधम् । रेरे क्षत्रिय तातमधिक्षिपसि
तदेष शितमुखैः शिलीमुखैरवकीर्यसे ।

रामः । धनुरुद्यम्य रेरे राक्षसपोत त्वमपि प्रत्यवकीर्यसे
किन्तु लङ्कापुरीगोपुरपरिसरवसुन्धरासु शरविक्षेपाद्विवृत्तपौर-
जना उद्विजिता भवन्ति तत् किञ्चिदुपसृत्य समरसंरम्भमा-
रभामहे ।

इति निष्क्रान्ताः सर्वे ॥

॥ असमपराक्रमो नाम सप्तमोऽङ्कः ॥

गोविन्ददेवशास्त्री ।

THE APHORISMS
OF THE
YOGA PHILOSOPHY,
OF
PATAÑJALI.

(*Continued from page* 134.)

a (He) declares (now) another Siddhi*

The superhuman faculty which consists in a knowledge of the speech of all living beings.

शब्दार्थप्रत्ययानामितरेतराध्यासात्संकर-
स्तत्प्रविभागसंयमात्सर्वभूतरुतज्ञानम् ॥१७॥

Aph. 17.—A confusedness of Śabda (an uttered sound or a word) Artha i.e. (class, quality, action &c.) and Pratyaya (knowledge) arises from comprehending these three indiscriminately. (But when an ascetic views these separately by performing Sañyama—restraint—with regard to them, a knowledge (is produced in him) of the speech of all living beings (i.e. he has a power of understanding their speech.)

b. "Śabda" is that (uttered sound) which is cognizable by the organ of hearing; it consists of letters whose order is fixed and it is productive of knowledge of a fixed object. [This definition of Śabda is given here according to the technicality of the Nyáya Philosophy, and according to that of the gramarians it is as follows] Śabda is (that sound in the utterance of which) no order of its constituent letters is to be conceivable and (hence) which is Sphotátmá (i.e. from which, class, quality, action &c. become plain at once) and which can (only) be understood by a mind cultivated by science. According to both of these technicalities, it (Śabda) consists of term and sentence, because these two can indicate their own fixed objects.

"Artha" (means literally sense, but here it means) class, quality, action &c., "Pratyaya, (means) knowledge i.e. a modification of the internal organ, in the form of an object. A confusedness (arises) by forming the same notion of them or supposing the Śabda, Artha and Pratyaya (just expounded) to be indentical though they are different from each other, in their use. An illustration of this is as follows. (Suppose) when a person is asked to bring a cow, he then comprehends indiscriminately these three, i.e. the material substance indicated by the term cow, possessed of the dewlap &c., and possessing the characteristic implied by the term cow; its indicatory term cow and the knowledge by which the material substance is conceived: but he does not perceive them so discriminately that the term cow, is indicatory of this (material substance); that this is to be declared by the term cow, and that this is the knowledge by which the two former are conceived. Thus, when he is asked what is this substance, what is this term and what is this knowledge, he then, gives the same answer "cow" to all these questions. If he does not conceive the identity of these three, how does he give the same answer to all these questions? In this state, he who, having made this distinction that indicativeness is the essential nature of Śabda (term), that the state of having to be declared is the essential nature of Artha (before defined), and that luminousness is the essential nature of Jñána (knowledge), performs Sañyama—restraint—; acquires the knowledge of

---

* सिद्ध्यन्तरमाह ।

Digitized by Google

or understands the speech or language of all living beings i.e. of animals wild and domestic, birds, reptiles &c., that is whatever cry or whatever word (is uttered) he knows it all, viz., that the sound was uttered with such and such a motive.*

a (He) mentions another Siddhi †

The superhuman faculty which consists in a knowledge of the class &c. experienced in the former birth.

संस्कारसाक्षात्करणात् पूर्वजातिज्ञानम् ॥१८॥

Aph. 18.—A knowledge of the class (&c., experienced) in a former birth (arises) from presenting to our mind (Sákshátkaraṇa)—the trains of self-reproductive thought—Sanskáras (of the internal organ.)

b. Sanskáras—the trains of self-reproductive thought which consist of the present consciousness of past perceptions of the internal organ are twofold. Some of these produce only a memory (of the events formerly experienced) and others are the causes of the modifications in the shape of class, age, and experience of pleasure and distress as they are called virtue and vice. When (an ascetic) performs Sanyama—restraint—with regard to the Sanskáras (just illustrated); that is, when he remembers only through an abstract meditation and without any exciting cause, all that is past, reflecting that he has experienced such and such thing—this is the result of the former set of the Sanskáras—and that he has performed such and such action, then he clearly sees the class &c., experienced in the former birth when the trains of self-reproductive thought are thus gradually awakened. ‡

a. (He) explains (now) another Siddhi.*

The superhuman faculty which consists in the penetration of the mind of other persons.

प्रत्ययस्य परचित्तज्ञानम् ॥ १९ ॥

Aph. 19.—The mind of other persons becomes known to (an ascetic when he performs Sanyama—restraint) with regard to the Pratyaya—knowledge—(contained in it i. e. in the mind of other persons.)

b. When (an ascetic) performs Sanyama with regard to the Pratyaya—knowledge—obtained by any characteristic such as complexion of the face; then he knows the mind of another person that is, (he) knows even the qualities which have entered into the mind of others, whether their mind is impassioned (Sarága) or dispassionate (Virága.)†

a. (He now) declares a peculiarity of this same knowledge of the mind of other persons.‡

The mind of other persons is comprehended without its object.

न तत्सालम्बनं तस्याविषयीभूतत्वात् ॥ २० ॥

Aph. 20.—It i.e. (the mind of other persons) is not comprehended with its Álambana—support i. e. object (to an ascetic) because it was not the object (of Sanyama which he, the ascetic, made use of in comprehending the mind.)

b. The mind of other persons cannot be understood together with its Álambana—support—i.e. object, because it is not recognized by any characteristic. For by the characteristic the mind only of others is understood, but it is not known what is its object and whether it be blue or yellow. It cannot be known what that object is because Sanyama cannot be performed with regard to it since it is not recognized. Hence the mind of others is not comprehended together with its Álambana, object—as it is not recognized. But the properties of the internal organ—chitta i.e. mind—are comprehended. When an ascetic performs Praṇidhána, i.e. Sanyama with a view of discovering what mind has for its object, then a knowledge of that object also arises in him by that Sanyama (restraint.) §

---

* शब्दः श्रोत्रेन्द्रियग्राह्यो नियतक्रमवर्णात्मा नियतैकार्थप्रतिपत्त्यवच्छिन्नः । यदि वा क्रमरहितः स्फोटात्मा शास्त्रसंस्कृतबुद्धिग्राह्यः । उभयथापि पदरूपो वाक्यरूपश्च तयोरेकार्थप्रतिपत्तौ सामर्थ्यात् । अर्थो जातिगुणक्रियादिः प्रत्ययो ज्ञानं विषयाकारा बुद्धिवृत्तिः । एषां शब्दार्थज्ञानानां व्यवहारे इतरेतराध्यासादभिन्नानामपि बुद्ध्येकरूपतासंपादनात्संकीर्णत्वम् । तथाहि गामानयेत्युक्ते कश्चिद्गोलक्षणमर्थं गोत्वजात्यवच्छिन्नं सास्नादिमत्पिण्डरूपं शब्दं च तद्वाचकं ज्ञानं च तद्ग्राहकमभेदेनैवाध्यवस्यति न त्वस्य गोशब्दो वाचकोऽयं गोशब्दस्य वाच्यस्तयोरिदं ग्राहकं ज्ञानमिति भेदेन व्यवहरति । तथाहि कोऽयमर्थः कोऽयं शब्दः किमिदं ज्ञानमिति पृष्टः सर्वत्रैकरूपमेवोत्तरं ददाति गौरिति स यद्येकरूपतां न प्रतिपद्यते कथमेकमेवोत्तरं प्रयच्छति । एतस्मिन् स्थिते योऽयं प्रविभाग इदं शब्दस्य तत्त्वं यद्वाचकत्वं नाम । इदमर्थस्य यद्वाच्यत्वम् । इदं ज्ञानस्य यत्प्रकाशकत्वमिति प्रविभागं विधाय तस्मिन् प्रविभागे यः संयमं करोति तस्य सर्वेषां भूतानां मृगपशुपक्षिसरीसृपादीनां यद्रुतं यः शब्दस्तत्र ज्ञानमुत्पद्यतेऽनेनाभिप्रायेणैतेनायं शब्दः समुच्चारित इति सर्वं जानाति ।

† सिद्ध्यन्तरमाह ।

‡ द्विविधाश्चित्तस्य वासनारूपाः संस्काराः केचित् स्मृतिमात्रोत्पादनफलाः केचिज्जात्यायुर्भोगलक्षणविपाकहेतवो यथा धर्माधर्माख्याः । तेषु संस्कारेषु यदा संयमं करोति एवं मया सोऽर्थोऽनुभूत एवं मया सा क्रिया निष्पादितेति पूर्ववृत्तं सर्वमनुसंदधानो भावनयैवावबोधकमन्तरेणोद्बुद्धसंस्कारः सर्वमतीतं स्मरति क्रमेण साक्षात्कृतेषु बुद्धेषु संस्कारेषु पूर्वजन्मानुभूतानपि जात्यादीन् प्रत्यक्षेण पश्यति ।

* सिद्ध्यन्तरमाह ।

† प्रत्ययस्य केनचिन्मुखरागादिना लिङ्गेन गृहीतस्य यदा संयमं करोति तदा परकीयस्य चित्तस्य ज्ञानमुत्पद्यते । सरागमस्य चित्तं विरागं वेति परचित्तगतानपि धर्मान् जानातीत्यर्थः ।

‡ अस्यैव परचित्तस्य विशेषमाह ।

§ तस्य परस्य यच्चित्तं तत्सालम्बनं स्वकीयेनालम्बनेन सहितं न शक्यते ज्ञातुमालम्बनस्य केनचिल्लिङ्गेनाविषयीकृतत्वात् । लिङ्गाच्चित्तमात्रं परस्यावगतं न तु नीलविषयमस्य चित्तं पीतविषयमिति वा । यच्च न गृहीतं तत्र संयमस्य कर्तुमशक्यत्वात् न भवति परचित्तस्य यो विषयस्तत्र ज्ञानं तस्मात् परकीयं चित्तं नालम्बनसहितं गृह्यते तस्यालम्बनस्यागृहीतत्वात् । चित्तधर्माः पुनर्गृह्यन्त एव यदा किमनेनालम्बितमिति प्रणिधानं करोति तदा तत्संयमात् तद्विषयमपि ज्ञानमुत्पद्यत एव ।

Digitized by Google

a. (He now) states another Siddhi.*

The superhuman faculty which consists in the disappearing of an ascetic. कायरूपसंयमात् तद्ग्राह्यशक्तिस्तम्भे चक्षुःप्रकाशासंयोगेऽन्तर्धानम् ॥ २१ ॥

Aph. 21.—By performing Sanyama—restraint—about form (the property) of body (defined in Aph. 11. See the Nyáya Philosophy p. 16). Its power of being apprehended (by the organ of sight) being checked, and luminousness, the property of the organ of sight having no connection (with its object i. e. the form, the result) is the disappearance of the ascetic.

b. The form (Rúpa) of the body (Káya) is a property to be apprehended by the organ of sight. By performing Sanyama with the reflection "Form consists in this body" (and no-where else) the power belonging to that form of being apprehended by the organ of sight is arrested through being subjected to that notion. On the cessation of the connection of the organ of sight with luminousness, luminousness being a property of *Sattva*, [that is to say] when there is no function of apprehending that [form], the disappearance of the ascetic takes place i. e. he is not seen by any body.†

Govinda Deva Śastri.

(To be continued.)

NOTICES OF BOOKS.

KÁVYAPRAKÁŚIKÁ.*

We have pleasure in acknowledging the receipt of the 4th fasciculus of an intended collection of Sanskrit poems and dramas, accompanied with notes and Bengali versions, entitled Kávya-Prakáśiká. If we may allow ourselves to judge from the specimens before us, we think the undertaking deserves every encouragement, as it promises not only to supply us with neat and handy editions of standard poetical works in Sanskrit, but, by chaste and idiomatic translations to contribute to the progress of Bengali literature.

SANSKRITA-PRATHAMAŚIKSHÁPUSTAKAM *

We can say nothing in favour of this little Reading Book. The lessons it contains are inaccurate, inelegant, and to a Hindu unintelligible translations of extracts from the Pentateuch, the Book of Job, the Psalms, the Sermon on the Mount &c. Better Sanskrit and equally good morality might have been offered to the beginner from the Hitopadeśa or the Mahábhárata. For instance, in what we suppose is meant for a translation of the Tenth Commandment the reader is forbidden to covet the house, wife, ox, or ass *of the man who lives near him* (samípavásimánushasya. The laws of Sandhi and all grammar are ignored and the book concludes appropriately with this monstrous blunder "Samápto'-*yam* Prathamaśikshápustakam."

* सिद्ध्यन्तरमाह ।

† कायः शरीरं तस्य रूपं चक्षुर्ग्राह्यो गुणस्तस्मिंश्चास्मिन् काये रूपमिति संयमात् तस्य रूपस्य चक्षुर्ग्राह्यत्वरूपा या शक्तिस्तस्याः स्तम्भे भावनावशात्प्रतिबन्धे चक्षुःप्रकाशासंयोगे चक्षुषः प्रकाशः सत्त्वधर्मस्तस्यासंयोगे तद्ग्रहणस्य व्यापाराभावे योगिनोऽन्तर्धानं भवति । न केन चिदसौ दृश्यत इत्यर्थः ।

* Moozumdár's Series. Kávyaprakáśiká Part IV. Sakuntalá and Kumára-Sambhava with notes and Bengali translations. By Varadáprasád Moozumdár. Calcutta.

* The first Reading Book in Sanskrit, Compleid by the Rev. B. C. Chuckerbutty, Calcutta.

BENARES, ANCIENT AND MEDIEVAL: A MONOGRAPH.

BY FITZEDWARD HALL, M.A., D.C.L., OXON.

Reprinted by Permission.

(Concluded from page 142.)

To the early Arab and Persian travellers Gangetic India was an unexplored tract.[1] Albirúní, who wrote about A.D. 1000, had, however, heard of the holy fame of Benares, which he compares, not inaptly, to Mecca.[2] Mahmúd of Ghazní is said, by a late writer, to have advanced as far as Benares, and to have made a few converts there, during his ninth incursion.[3] In 1194, Shihábuddín, after defeating the Kanaujan monarch, Jayachandra, marched on that city, where he is reported to have demolished near a thousand Hindu temples.[4] The subsequent history of the place, for many centuries, is well-nigh a blank. Its religious character was not, in the eyes of its Islamite masters, a thing to recommend it; and commercial or political importance it had none.[5] Even Akbar, with all his toleration of Hinduism, and occasional partiality to it, did nothing to prop the sinking fortunes of Benares. Its decline was uninterrupted; and, under Aurangzeb, who

[1] "La partie de l' Inde avec laquelle les Arabes avaient le moins de rapports était l' Hindostan proprement dit, c'est-à-dire la contrée baignée par la Djomna et le Gange, depuis le Pendjab jusqu'au fond du golfe du Bengale. Le grand rôle joué jadis par les rois de Canoge, près du confluent du Gange et de la Djomna, avait retenti jusqu'à eux ; mais ils n'avaient qu'une idée confuse de ces belles et riches contrées, et il paraît que telle était la politique ombrageuse des radjas et des brahmanes que, jusqu'au commencement du XIe siècle de notre ére, lors des conquétes de Mahmoud le Gaznévide, aucun Arabe n'avait pu pénétrer dans ces régions."—*Relation des Voyages*, etc., by M. Langlès and Father Reinaud, Vol. I., Preliminary Dissertation, pp. XLVIII., XLIX.

[2] "Benarès était aussi, suivant Albyrouny, un lieu réputé pour sa sainteté, et où les personnes pieuses venaient des provinces les plus lointaines pour se livrer à des exercices de religion, à peu prés comme les musulmans étaient dans l'usage de se rendre à la Mekke, auprès de la Kaaba. La plus grande ambition des Indiens était de pouvoir mourir dans cette ville. En effet, dit Albyrouny, tout criminal qui parvenait à mettre les pieds dans cette enceinte, était à l'abri de toute poursuite ; à plus forte raison, les personnes qui y mouraient n'avaient plus de crainte à concevoir, de la part de Dieu, pour leurs fautes passées."—Father Reinaud's *Mémoire Géographique, Historique et Scientifique sur l'Inde*, etc., p. 288.

[3] English *Ayeen Akbery*, Vol. II., p. 35.

[4] Major Stewart's *History of Bengal*, p. 36. Elsewhere we read, that, "having broken the idols in above a thousand temples, he purified and consecrated the latter to the worship of the true God." Colonel Briggs's translation from Farishta, Vol. I., p. 179.

[5] Fiscally, too, it had come, in the days of Akbar, to be of very secondary note. See the *Ayeen Akbery*, Vol. II., Appendix, p. 28.

Digitized by Google

changed its name to Muhammadábád,[1] it reached, at last, the depth of its abasement. At the command of that harsh bigot, its principal temples were laid in ruins,[2] and mosques, constructed from their materials, were reared on their half-destroyed foundations. The Observatory, built by Mánasimha[3] about A. D. 1600, is, probably, the only noteworthy Hindu edifice of the city, still entire, of so great antiquity. For almost all that is striking in its architectural embellishment, Benares is beholden to the Marathas; and the recent resuscitation of its former celebrity, in the decadence of Hinduism is due, in large measure, to the zeal and enterprise of the same energetic race. As to the rest, there is no ground whatever for believing that Benares, in comparison of what we now find it, with its thousand temples,[4] and their thronging concomitants of holy harpies and willing victims, can ever have boasted a larger population, a more potent prestige, or more affluent prosperity.

India Office, London,
July, 1868.

[1] I have met with this substitute for Benares in an Urdú book written within the last hundred years. It was originally meant, of course, as a poignant insult. Deservedly, it never obtained, it is believed, any currency.

The Muhammadan names of Dehli, Agra, and Patna are of every-day use. Less familiar are Jahángírábád, Mustafa'ábád, Islámábád, and Múminábád, for Dacca, Rampoor, Chittagong, and Brindabun.

[2] Captain Orlich, in the tenth letter of his *Reise in Ostindien*, says that Akbar entertained the project of establishing a mosque over the Jnánavápí well. No one at all acquainted with Akbar's character could give this silly legend the least credence. The story looks like an appendix to the tale, that, when Aurangzeb threw down the old temple of Viśweśwara, its phallus cast itself, unassisted, into the Jnánavápí.

[3] Raja of Ambherí. One of his descendants, Jayasimha II., who flourished rather more than a century after him, provided the Observatory with astronomical instruments. From Raja Mánasimha the building was called, from the first, Mánamandira, now corrupted into Mánmandil.

Bishop Heber uninquiringly states that the Observatory was "founded before the Musalmán conquest." Captain Orlich says it was founded by Jayasimha: he does not distinguish which Jayasimha. But it would be endless to point out the unweighed assertions of incautious travellers.

Even Mr. James Prinsep,—*Benares Illustrated*, Second Series,—from consulting Tavernier with insufficient attention refers the conversion of the Mánmandil into an Observatory to Jayasimha I.

An excellent account of the Benares Observatory, by the learned Pandit Bápú Deva Śástrin, is given in the *Transactions of the Benares Institute for the Session* 1864-65, pp. 191-196.

[4] Such was Mr. James Prinsep's estimate in 1828-1829. As to the extent of the city, "the measured length along the banks of the river, by survey, is barely three miles; and the average depth does not exceed one mile." *Benares Illustrated*, p. 12. Hiouen Tsang found Benares, in the seventh century, of not far from the same dimensions. *Vide supra*, p. 140.

Paris, le 3rd November 1868.

Sir,

My brother-in-law, Mr. Goubaux, Professor of Anatomy in the Veterinary School at Alfort, is very desirous to get precise informations concerning a question now discussed about among the Anatomists, and I esteem I cannot direct him better than to you, Sir, who are surrounded with so many men possessing of so various kinds of knowledge.

The question is the following one:—

Many Naturalists, likely desirous to ground upon a sample their theory about the plurality of human races, say, that there are also many races, two at least, among the *horses*, distinguished between each other by the number of the vertebræ belonging to the loins: the first, originating from Africa, and introduced in the various countries of the West of Europe by the Arabs, has seven of those vertebræ; the second, indigenous in Asia, and imported into Europe by the Aryas themselves, possesses only six or five vertebries in the loins. Mr. Goubaux, who slaughtered in his life many hundred horses, has found those numbers of vertebræ in the loins varying from one individual to another without any variation of origin, and thinks consequently that the character invoked by the naturalists is not fit to establish a distinction of race.

But, the horses in Europe, according to the theory quoted above, being produced by mingling the African race with the Asiatic one, it might be that the indifference with which the numbers observed by my brother-in-law were obtained, be occasioned by that mingling. Therefore, in order to get rid of the matter, Mr. Goubaux wishes to know if horses living in the original countries of the supposed races show the character in question constantly, or, as the horses in Europe do, accidentally. For that purpose, he would be very satisfied to get the following informations, which you are able, I imagine, to procure him by the learned men meeting at Benares; viz:

1st—If there is in India, perhaps in the mountains of Himálaya or Ghondwana or even of Malaya (the Ghâts) *a peculiar race of horses, differing by any charactersoever* from the races known *in Europe*.

2nd—*How many vertebræ* that peculiar race of horses possesses *in the loins*; whether *seven* or *six*; whether *constantly* or *accidentally* the first or the second of those numbers.

Questions of that description being of a general interest, you would most conveniently, without trouble for you, give the answer in your most valuable Journal, "The Pandit," of which I am an assiduous reader.

It is useless to add that my brother-in-law fixes no time to have those informations: the sooner, the better; but within the limits of secure observation.

I take the liberty to say that, for my particular, I would be very glad to possess, for the imperial Library at Paris, a copy, printed or in hand writing, of the treatise in Sanskrit concerning the Veterinary, like the Aśwaáyurveda, the treaty about the diseases of the elephant existing at Berlin, something concerning the humped Ox, or Śiva-Ox, and generally every kind of beasts, in order to procure to my brother-in-law the indigenous observations about those animals.

Give me leave, Sir, to tell me your most devoted servant and admirator of your most learned journal.

LÉON RODET,
Ingénieur des Manufactures de l'Etat,
Service des Tabacs à Paris.

PRINTED AND PUBLISHED BY E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

शुद्धरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 32. Benares January 1st, 1869. Vol. III.

॥ ईश्वरप्रत्यभिज्ञासूत्रविमर्शिन्याः ॥

आगमाधिकारे पूर्वप्रक्रान्तद्वितीयाह्निकस्यान्तिमो भागः, तृतीयं च चरमम् ।

नन्वेवं पत्युः समावेशात्मिका तुर्यतदतीतरूपा भवतु दशा, पशोस्तु कथं सुषुप्तस्वप्नजाग्रद्दशाभेद आगमेषूक्त इत्याशङ्क्य सुषुप्तस्वरूपमेव तावदाचष्टे श्लोकत्रयेण ।

(१०) शून्ये बुद्ध्याद्यभावात्मन्यहन्ताकर्तृतापदे ।
अस्फुटारूपसंस्कारमात्रिणि ज्ञेयशून्यता ॥
सा ऽत्राणामान्तरी वृत्तिः प्राणादिप्रेरिका मता ।
जीवनाख्या ऽथ वा प्राणे ऽहंता पुर्यष्टकात्मिका ॥
तावन्मात्रस्थितौ प्रोक्तं सौषुप्तं प्रलयोपमम् ।
सवेद्यमपवेद्यं च मायामलयुतायुतम् ॥

इह चित्तत्वं स्वस्वरूपमाच्छादयज्ज्ञेयरूपेण बुद्ध्यादिना देहान्तेन घटादिना वा भासते, एकमेव चेदं स्वातन्त्र्यविजृम्भितं, न तत्र वास्तवः क्रमो वा भेदो वा, तत्रापि तु स्वातन्त्र्यात् क्रमभेदश्चाभासते, तदेवं स्थिते यश्चित्तत्त्वस्य स्वरूपाच्छादनभागः स एवोत्तरभागान्तरासंकीर्णो यदा विश्राम्यति तदनुदयाद्वा तत्प्रध्वंसाद्वा प्रलये इव तदनादरणाद्वा निद्रासमाधिमूर्छादाविव तत्रैव चाहंतारूपं कर्तृतायाः पदं परामर्शो ऽस्फुटत्वादरूपात्मना संस्कारेण शुद्धेन वेद्यपदवीमप्राप्तेन युक्तो भवति तदा सैवावस्था नेत्येव परामर्शशेषा ऽनपेक्षितनिषेध्यबुद्ध्यादिविषयसुस्पष्टपरामर्शसम्भेदापि अवश्यंभाविनिषेध्ययोगादकिंचनोऽहमित्येवंभूतपरामर्शवत्स्वीकृतसामान्याकारनिषेध्या ऽत एव संस्कारशेषीकृतज्ञेयरूपा शून्य इत्युच्यते, तथाविधे बुद्ध्यादीनां देहादिनीलान्तानामभावरूपे शून्यत्वमुच्यते, यतस्तत्र ज्ञेयानां शून्यता ऽभावरूपता संस्कारशेषता, इयमेव हि सर्वत्राभावो न तु सतां सर्वात्मना विनाशः, तत्रैव शून्ये प्रमातरि समवेता प्राणापानसमानोदानव्यानात्मके वायुचक्रे प्रेरणात्मिका शक्तिः,सा च विद्याकलयोः प्रपञ्चभूतौ यौ क्रमेण बुद्धीन्द्रियकर्मेन्द्रियवर्गौ तयोरान्तरी वृत्तिर्बाह्या हि तयोः शब्दाद्यालोचनशब्दाभिव्यक्तिस्थानाभिहननादिका वृत्तिः । तदुक्तम् ।

सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च ।

इति । एवं शून्ये एवाहंता ऽत्रचक्रोपोद्बलिता जीवनमिति स शून्य एव जीवः संसरति, यदि वा इन्द्रियशक्तीनामेव या आन्तरी साधारणप्राणनात्मिका प्राणशब्दवाच्या प्राणादिमारुतविशेषप्रेरणामयी सैवाहमित्यधिशयाना जीवनं, तदा प्राण एव जीवः संसारी स एव शून्यः, प्राणश्च पुर्यष्टकशब्दवाच्यः, यतो ऽत्रेति शेषः, प्राणादिपञ्चकं बुद्धीन्द्रियवर्गः कर्मेन्द्रियगणो निश्चयात्मिका च यतो धीर्व्यज्यते तन्मात्रपञ्चकं मनोऽहंबुद्धय इत्यन्ये तन्मात्रोदयरूपेण मनोऽहंबुद्धीति भूमिराप इति च वदन्तः, एवं यदुभयात्मकं पुर्यष्टकं तावत्येव शुद्धे या विश्रान्तिस्तस्यां सत्यां यदहंतायाः सुषुप्ताया बोधलक्षणं भावरूपं कर्म च क्रियास्वभावं तत्सौषुप्तं, मलेन हि प्रमाता सुप्तः कलया त्वसुप्त इवात्र तन्निमज्जनेन सुष्ठु सुप्तस्तस्य भावः कर्म वेति । तत्र शून्यसुषुप्ते न किंचिद्व्यतिरिक्तं वेद्यमिति मायीयमलाभावादपवेद्यं तत् । प्राणसुषुप्ते तु स्पर्शकृतस्य सुखदुःखादेर्भावाद् मायाख्यमस्ति मलमिति स-

Digitized by Google

वेद्यं तद् । एवं गाढागाढसुषुप्तद्वितयवत्प्रलयोपि मन्तव्यः । स परं देहादिप्रध्वंसानुदयकृतः, चिरतरकालश्च, सुषुप्तं तु देहाद्यनादरकृतमचिरकालं चेति विशेषः । तत्रापि श्रमकृतं निद्रा, धातुदोषकृतं मूर्छा, द्रव्यकृतं मदोन्मादादि,स्वातन्त्र्यकृतं समाधि,रित्याद्यवान्तरभेदाः । के चित्तु समाधिरूपं संवेद्यमन्यदपवेद्यमिति प्रपन्नाः ॥

नन्वेवं स्फुटवेद्यपदविनिर्मुक्ता सुषुप्तावस्था ऽस्तु स्वप्नजाग्रद्द्वयोस्तु स्फुटवेद्यावभासयोगिन्योः को भेद इत्याशङ्क्य श्लोकद्वयेन भेदमाह ।

(११) मनोमात्रपथेप्यक्षिविषयत्वेन विभ्रमात् ।
स्पष्टावभासा भावानां सृष्टिः स्वप्नपदं मतम् ॥
सर्वाक्षगोचरत्वेन या तु बाह्यतया स्थिरा ।
सृष्टिः साधारणी सर्वप्रमातॄणां स जागरः ॥

बाह्येन्द्रियाधिष्ठानानि चक्षुर्गोलकादीनि निमीलितानि निद्रायमाणस्य लक्ष्यन्ते, न च तेषु निमीलितेषु बाह्येन्द्रियग्रहणव्यापारो दृष्टः, तेन शुद्ध एव मनोमार्गे रूपस्पर्शादयो भावा अक्षग्रहणसमुचितेन स्पष्टेन वपुषा भासनयोग्याः परमेश्वरेण सृज्यन्ते' न स्वगुणा, ऽनिष्टस्यैव दर्शनादिष्टस्यापि देशकालान्तरादियोगेन, अत एव मनोमात्रस्थितत्वादेव न प्रमात्रन्तरसाधारणीयं सृष्टिः । यत्तु तत्र बाह्येन्द्रियविषयत्वं प्रमात्रन्तरसाधारण्यं चकास्ति, तद्यद्यपि यावद्भाति तावत्तथैव, तथाप्युत्तरकालं प्रबुद्धस्य न तथेति परामर्शेन तद्रूपं निर्मूलत्वेनावभातीति भ्रान्तम् । यानि हि प्रमात्रन्तराणि स्वप्ने स्वेन्द्रियाणि च भान्ति, एतानि प्रबोधकालभाविभिरेव च तैरभिन्नानीति निश्चयः । प्रबोधकाले च न तथेति निश्चयानुवृत्तिरपहृतैव । तेनोभयमपि भ्रान्तमुच्यते भ्रान्तत्वमेव चास्थैर्यम् । एवमिन्द्रियाविषयत्वेनैवासाधारणत्वमाक्षिप्तं विभ्रमेणैव चास्थैर्यमिति स्वकण्ठेन तज्जाग्रत्प्रतियोगिधर्मनिरूपणावसरेपि न दर्शितम् । एवंभूता या सृष्टिः सा पशोः स्वप्नसमये भावास्वप्नपदं स्वप्नकाले विषय इति तथाभूतविषयं प्रमातृत्वं पशोः स्वप्नावस्थेति यावत् । अक्षिग्रहणं बाह्येन्द्रियदशकस्योपलक्षणम् । यत्र त्वबाह्याक्षविषयं सर्वप्रमातृसाधारणत्वं च निश्चयानुवृत्त्या बाधारहितया परमार्थत्वेन चकास्ति तत एव स्थैर्यं विषयस्य सा सृष्टिः पशोर्जागरः, तद्विषयप्रमातृत्वं जागरावस्थेति यावत् । यावच्चानुवृत्तिस्थैर्यं निश्चयस्य चकास्ति तावज्जागरः, तन्मध्य एव निश्चयानुवृत्तिनिर्मूलनात्स्वप्न इत्यवभाससारत्वाद्वस्तूनां स्वप्नेपि दीर्घे यत्र स्वप्नान्तरं सतदपेक्षया जाग्रदेव, जाग्रदभिमतमपि वा दीर्घे कालान्तरे निश्चयानुवृत्तिनिरोधाज्जाग्रदन्तरापेक्षया स्वप्न एवेति मन्तव्यम् ॥

आसां तिसृणां हेयत्वप्रदर्शनेन तुर्यावस्थातः प्रभृति उपादेयत्वं सूचयति ।

(१२) हेया त्रयीयं प्राणादेः प्राधान्यात्कर्तृता गुणे ।
तद्धानोपचयप्रायसुखदुःखादियोगतः ॥

यत्रायं प्रमाता त्यागोपादानतदिच्छाप्रयत्नादिकं परिक्लेशं पश्यति तदेवास्य हेयतया भाति, स चास्य सुखदुःखयोगवैचित्र्येणैव कृतः, तच्चैतदवस्थात्रये संभवति, यतः कर्तृतारूपं स्वात्मविश्रान्त्यनन्योन्मुख्यलक्षणमानन्दैकघनं यच्चिन्मयं वपुस्तद्यदा प्राणादिवृत्तिशून्यपुर्यष्टकदेहादिभूमिषु गुणतामभ्येति तदा तस्मिन्गुणीभूते प्राणादेः प्राधान्यं स्फुरति, तथा च तस्य चिद्रूपस्य यथायथा हानिः तथातथा दुःखोपचयः, यथायथा किं चिदुन्मज्जनं तथातथा सुखोपचयः, तथाहि बुभुक्षाकाले प्राणस्यैवोद्रेकाद्दुःखं, तृप्तौ तस्य न्यग्भावादहंतोद्रेके सुखम्, एवं श्रान्तस्य मर्दने देहप्राधान्याप्राधान्ये मन्तव्ये, यस्तु समावेशतत्त्वज्ञस्तस्य तत्काले दुःखानुदय एव । यदाह ।

दुर्बलोपि तदाक्रम्य यतः कार्ये प्रवर्तते ।
आच्छादयेद्बुभुक्षां च तथा योतिबुभुक्षितः ॥

इति । एवं प्राणादेः प्राधान्ये कर्तृताया गुणभावे सुखदुःखवैचित्र्यशतयोगः प्रयासभूमिरिति जाग्रत्स्वप्नसुषुप्ते प्राणादिप्राधान्यं कर्तृता न्यग्भावश्चास्तीति तत्त्रयमेव हेयं, कर्तृताप्राधान्योन्मेषात्तु तुर्यरूपात्प्रभृति तस्यैवात्मकतुर्यातीतदशान्तमुपादेयमेकरसानन्दघनस्वभावलाभे उपादित्सा जिहासा वैवश्यपरिश्रमप्रशमादिति तात्पर्यम् ॥

ननु प्राणादिप्राधान्यं हेयतायां कारणमुक्तं, तच्चेज्जाग्रदादित्रये एव तर्हि तुर्यादौ तदभावात्तत्समावेशे व्युत्थानानुपपत्तिरिति श्लोकद्वयेन शङ्कां परिहरति ।

(१३) प्राणापानमयः प्राणः प्रत्येकं सुप्तजाग्रतोः ।
तच्छेदात्मा समानाख्यः सौषुप्ते विषुवत्स्विव ॥
मध्योर्ध्वगाम्युदानाख्यस्तुर्यगो हुतभुङ्मयः ।
विश्रान्ताकलमन्त्रेशो व्यानो विश्वात्मकः परः ॥

प्राण इति प्राणनरूपा जीवनस्वभावा येयं चिद्रूपस्य स्थितिः सा तावत्सामान्यपरिस्पन्दरूपा देहप्राणादेरचेतनस्य चेतनायमानतासंपादनात्मिका ऽहमिति स्वातन्त्र्यारोपसारा सती विकल्परूपपरामर्शमयी सैव प्राणादिविशेषात्मना पञ्चरूपतां भजते । तत्र किं चिज्जहती क्व चित्स्पृशन्ती च प्रश्वासनिःश्वासरूपा क्रमेण प्राणत्वमपानत्वं च विशेषं दर्शयति,

Digitized by Google

तदिदं विशेषद्वयं जाग्रति तावत्स्फुटमेव, देहात्मसत्य विषये विश्रान्तेः ततो ऽपि देहे स्मृत्यादौ आभ्यन्तरे बाह्ये विश्रान्तेः प्राणापानयोः सुस्पष्टत्वात्। स्वप्ने ऽपि तद्द्वयमस्त्येव स्वपतो ऽपि हि प्राणापानौ निर्गमप्रवेशात्मानौ स्फुटमेवापरेण लक्ष्येते। स्वयमेव च वेद्यसंवेदनात्यागोपादानरूपा स्थितिः संवेद्यते एव, तेन प्राणना प्राणापानविशेषद्वयमयी जाग्रति तथा स्वप्ने. सुप्ते स्वप्नः, तदेव तु यदा सुतरां पुष्टं भवति तदा सुषुप्तः प्रमाता तस्येदं सौषुप्तं पदं तद्द्विविधमपि समानरूपं विशेषं प्राणीयं स्वीकरोति, सवेद्ये तावत्सुषुप्ते यद्यपि प्राणापानस्पन्दो लक्ष्यते तथापि तयोर्मध्ये या विश्रान्तिर्हृदयसदने निरिन्द्रियप्रदेशे तदेव मुख्यतः सौषुप्तमिति तत्र प्राणापानयोर्यश्छेदो विश्रान्तिः कं चित्कालं तदात्मा सकलरसादिवर्गस्योर्ध्वाधरतिर्यक्षु समानीकरणव्यापारात्मा तत एव हृत्पद्मविकासदानाद्भुक्तपीतजरणकारी समानो दिनरात्रिरूपयोः प्राणापानयोः कं चित्कालं साम्याद्विच्छेदनाच्च विषुवत्कालतुल्यः, विश्वं व्याप्तं समानीकरणमर्हतीति तदर्हमिति वतिः, उपमाने वतेरेव चाव्ययत्वमुद्गतो निवत इति प्रयोगात्, तद्धि न्यायसिद्धं न वाचनिकं, विशेषं वा दिनरात्रितदूनाधिकत्वलक्षणं सुवति प्रेरयत्यविरतमिति शतरि विषुवत् तत्र च विषुवति विच्छिद्यमानस्य प्राणापानस्य संस्काररूपतया सद्भावः सैव हि विच्छेदो न तु सर्वात्मना नाशो ऽस्ति इत्युक्तमसकृत्। ततश्च हानादानयोर्बीजरूपता सुषुप्ते इयति च सर्वः प्रलयाकलान्तः पशुवर्गः। यदा तु सा प्राणनावृत्तिर्वामदक्षिणमार्गौ विलीभावयन्ती मध्यरूपेणोर्ध्वेन प्रवहति तदा तत्प्रवहणं सकलस्य भेदस्याभेदसारतादानलक्षणं विलापनमाश्यानस्येव सर्पिषो विदधती उदानवृत्तिर्विज्ञानकलादारभ्य सदाशिवान्तं सा च तुर्यात्मिका दशा, मायोर्ध्वे हि विज्ञानाकला इति। ततः प्रभृति भेदगलनं प्रवर्तते। विलीने तु भेदे सर्ववेद्यराशिरूपतस्वभूतभुवनवर्गात्मकदेहव्यापाररूपणप्राणवृत्तिर्व्यानरूपा विश्वात्मकपरशिवोचिता तुर्यातीतरूपा, प्राण एव प्रमाता प्राणापानरूपः समानरूप उदानरूपो व्यानरूपश्चेति सामानाधिकरण्यात्, विज्ञानाकलश्चासौ मन्त्रश्चासौ वर्गापेक्षया ईशश्च सदाशिवेश्वररूपो यो ऽसाविति उदानः। एतदुक्तं भवति। यद्यपि तुर्यतदतीतयोरप्यस्ति प्राणना ऽन्यथा जीवत्वस्य व्युत्थानस्य चानुपपत्तेस्तथापि भेदोपसंहारेणाभेदविश्रान्तिप्राधान्यादनयोर्दशयोः सुखदुःखादिवैचित्र्यायोगादेकघनस्वात्मविश्रान्त्यात्मकपरमानन्दमयत्वे नोपादेयतैव, सुषुप्तादौ तु संस्काररूपत्वात्स्फुटवेद्योल्लासस्फुटवेद्यावभासरूपस्य भेदस्य विद्यमानत्वादस्ति सुखदुःखादिवैचित्र्यमिति हेयतैवेति युक्तमुक्तं हेया त्रयीयमित्यादि, भगवतश्च विश्वशरीरस्य प्राणापानसमानोदानव्यानरूपतयैव सकलजगतोल्लासप्रवेशप्रलयाकलविज्ञानाकलादिवर्गसदाशिवरूपता इत्यप्यनेन दर्शितम्। यथोक्तम्।

षट्त्रिंशदात्मकं विश्वं शम्भोः प्राणादिशक्तयः।

इति ॥ २० ॥

॥ आदितः सूत्रश्लोकाः १८३ व्याख्याताः ॥

इति श्रीमदाचार्याभिनवगुप्तविरचितायामीश्वरप्रत्यभिज्ञासूत्रविमर्शिन्यामागमाधिकारे तत्त्वनिरूपणं द्वितीयमान्हिकम् ॥ २ ॥

॥ इति चतुर्दशमाह्निकम् ॥

श्रीः

अनन्तमानमेयादिवैचित्र्याभेदशालिनम्।
आत्मानं यः प्रथयते भक्तानां तं स्तुमः शिवम् ॥

एवं स्वसंवेदनोपपत्त्यागमसिद्धं महेश्वररूपमात्मस्वरूपं यदधिकारत्रयेण वितत्य निर्णीतं तदेव संक्षेपेण शिष्यबुद्धिषु निवेशयितुमागमार्थसंग्रहं श्लोकाष्टादशकेन दर्शयति, "स्वात्मैव सर्वजन्तूना" मित्यादिना "त्फलेनोपपादिते" त्यन्तेनैकेनान्हिकेन, तत्र श्लोकेन पारमार्थिकं स्वरूपमुक्त्वा श्लोकनवकेन बन्धस्वरूपं प्रमातृप्रमेयतत्त्वदर्शनदिशा, सप्तकेन प्रत्यभिज्ञानात्मकं मोक्षतत्त्वं श्लोकेनोपसंहारं दर्शयतीति तात्पर्यम् ॥

ग्रन्थार्थस्तु निरूप्यते।

(१) स्वात्मैव सर्वजन्तूनामेक एव महेश्वरः।
विश्वरूपो ऽहमिदमित्यखण्डामर्शबृंहितः ॥

इह जडास्तावच्चेतननिमग्ना एव भान्ति, इदमिति हि जडपरामर्शो ऽहमिति संवित्परामर्श एव विश्राम्यति, ततश्च जडा निरात्मान इति जन्तव एव जीवाः सात्मानस्तेषां च महेश्वर एव स्वात्मा, स एव महेश्वरो न त्वन्यः कश्चिद्यतः संवित्स्वभावो ऽसौ, संविदश्च न देशेन न कालेन न स्वरूपेण को ऽपि भेदः, कामं देहप्राणादयो भिद्यन्तां, ते तु जडपक्षाश्चेतननिमग्ना एवेत्येक एव चिदात्मा स्वातन्त्र्येण स्वात्मनियतो वैश्वरूप्यं भासयति, ततो महेश्वरो ऽन्तर्नीतामिदंतां कृत्वा परानुन्मुखस्वात्मविश्रान्तिरूपाहंविमर्शपरिपूर्णः, अत एव सर्वज्ञत्वसर्वकर्तृत्वे नास्य यत्नोपपाद्ये, विचित्रबुद्धिकर्मेन्द्रियविषये हि यथा ज्ञातृत्वकर्तृत्वे एकस्यैवात्मनस्तथा इन्द्रियस्थानीयरुद्रक्षेत्रज्ञसहस्रविषयस्य भावराशेर्यज्ज्ञानं करणं च तदेकत्र चिदात्मनीति ॥

ननु यद्येक एवायं महेश्वररूप आत्मा कस्तर्हि बन्धो यदवमोचनायायमुद्यम इत्याशङ्क्याह।

(२) तच स्वसृष्टेदंभागे बुद्ध्यादिग्राहकात्मना ।
अहंकारपरामर्शपदं नीतमनेन तत् ॥

तत्रैवं स्वात्मनि महेश्वरे स्थिते तस्मिन्नेव प्रकाशरूपे स्वात्मदर्पणे तेनैव परमेश्वरेण स्वातन्त्र्यात्तावत्सृष्टः संकोचपुरस्सर इदंभागस्तन्मध्ये यदेतद्बुद्धिप्राणदेहरूपमिदंतया वेद्यं तद्विचस्य वेद्यस्य ग्राहकतया समुचितमिदं भवाभिभवाप्रभविष्णुत्वात्कृतकेनापूर्णेनाहंभावेन परामर्शेन भासमानं चकास्ति, अहं देवदत्तो ऽहं चैत्र इति ॥

नन्वेवमप्यस्तु तथापि कस्य बन्धः, ईश्वरव्यतिरिक्तो हि को ऽन्यो ऽस्ति, तदेतत्परिहर्तुमाह ।

(३) स्वस्वरूपापरिज्ञानमयो ऽनेकः पुमान्मतः ।
तच सृष्टौ क्रियानन्दौ भोगो दुःखसुखात्मकः ॥

सत्यं, परमार्थतो न कश्चिद्बन्धः, केवलं स्वस्मादनुत्तरात्स्वातन्त्र्याद्यदा स्वात्मानं संकुचितमवभासयति स एव तदा स्वस्य पूर्णस्य रूपस्य यदपरिज्ञानं भासमानत्वे ऽप्यपरामर्शरूपं तदेव कारणत्वेन प्रकृतं यस्य स पूर्णत्वाख्यातिमात्रतत्त्वः पुरुष इत्युच्यते, अत एवानेकः, तत्तद्देहप्राणबुद्धिविशेषेण संकोचग्रहणात्, स च पुमान्भोक्ता संबन्धं भोगलक्षणमनुभवति, भोगश्च नाम तस्य यौ कल्पितौ क्रियानन्दौ, कल्पिता क्रिया दुःखं, रजो हि प्रकाशाप्रकाशचाञ्चल्यरूपं दुःखमुच्यते, प्रकाशरूपं च सत्त्वं सुखं, तमस्त्वप्रकाशरूपो मध्ये विश्रमः प्रलयस्थानीयः ॥

ननु सृष्टावित्यनेन किं व्यवच्छेद्यं किं च संग्राह्यमित्याह ।

(४) स्वाङ्गरूपेषु भावेषु पत्युर्ज्ञानं क्रिया च या ।
मायातृतीये ते एव पशोः सत्त्वं रजस्तमः ॥

विश्वरूपस्य भगवतः स्वरूपभूत एव विश्वत्र यः प्रकाशो यश्च विमर्शस्ते तावज्ज्ञानक्रिये स्वरूपपरामर्शापरित्यागेनैव तु यद्विचतयापि विमर्शनं स्वरूपपरामर्श एव विश्रान्तमहमिदमिति सदाशिवेश्वरपरमार्थं सा भगवतो मायाशक्तिः, ता एतास्तिस्रः शक्तयो भगवति नैसर्गिक्यो दृष्टाः, स्वरूपापरिज्ञाने तु भिन्नेषु भावेषु ज्ञानं क्रिया,शुद्धमेव भिन्नत्वं प्रकाशविमर्शशून्यमिति पशोः प्रकाशः, प्रकाशाप्रकाशौ, अप्रकाश, श्चेति क्रमेण सुखदुःखमोहलक्षणानि प्रकाशक्रियानियमनशीलानि सत्त्वरजस्तमांसि ॥

ननु चैवं सति यथा परमेश्वरस्य ज्ञानक्रियामाया अव्यतिरेकिण्यः शक्तय इत्युच्यन्ते तद्वत्पशोः सत्त्वरजस्तमांसि प्रसज्यन्ते, व्यतिरिक्तानि च तानि पुंस्तत्त्वाद्गण्यन्ते तदेतत्कथमिति संशयं शमयति ।

(५) भेदस्थितेः शक्तिमतः शक्तित्वं नापदिश्यते ।
एषां गुणानां करणकार्यत्वपरिणामिनाम् ॥

सत्यमेवं स्याद्यदि भेदग्रहो न भवेत्, भेदव्यवहारस्त्वयं विचार्यते, तत्र संकुचितचिन्मात्रस्वभावः पुरुषो, नास्य नैसर्गिकं भावविषयप्रकाशनादिरूपं, सर्वदा तत्प्रसङ्गाद्, अपि त्वन्यसंबन्धकृतम्, ततश्च तस्मात्पशोः शक्तिमत्त्वेन शङ्क्यमानाद्भेदेन यत एतानि सत्त्वादीनि ततः शक्तयो व्यतिरेकमुक्ता इति नोच्यन्ते किं तूपकरणत्वाद्गुणा इत्युच्यन्ते ।

ननु पुरुषात्स्किमिति ते भेदेनोच्यन्ते, उच्यते, सुखदुःखमोहपरिणामरूपमेतत्करणत्रयोदशकं कार्यदशकं च सुखादिस्वभावत्वेनानुभूयत इति सुखदुःखमोहाः करणकार्यवर्गतादात्म्यवृत्तयो यदि पुरुषस्यापि तादात्म्यं भजेरंस्तर्हि पुरुषः कार्यकारणपर्यन्तसृष्टिमयः संपन्नः परिणामश्च दूषित इति स्वातन्त्र्यशक्त्या पुरुषो विश्वरूप इत्यायातं, तथा च न कश्चित्पुरुष ईश्वर एव तस्मादप्रत्यभिज्ञानमयपुरुषस्वरूपविचारे सत्त्वादयो भिन्ना एवेति स्थितम् ॥

ननु ज्ञानादीनि कथं सत्त्वादिरूपाणि पशुं प्रतीत्याह ।

(६) सत्तानन्दः क्रिया पत्युस्तदभावोपि सा पशोः ।
द्वयात्मा तद्रजो दुःखं श्लेषसत्त्वतमोमयम् ॥

इह तावत्पतिर्विश्वस्यावभासमानवैचित्र्यलक्षणेन सृष्ट्यादिना पालयिता स्वप्रकाशस्वभावस्तस्य विश्वपतेर्या सत्ता भवनकर्तृता स्फुरत्तारूपा पूर्वं व्याख्याता, सा स्फुरत्ता महासत्तेत्यत्र सैव प्रकाशस्य विमर्शाव्यतिरेकाद्विमर्शात्मकचमत्काररूपा सती क्रियाशक्तिरुच्यते । परोन्मुख्यत्यागेन स्वात्मविश्रान्तिरूपत्वाच्च सैवानन्दः । तदेवं भगवतश्चिदात्मतयैवेयद्रूपता, पशोस्तु सत्ता तदभावश्चानन्दश्च, तदभावश्च संकुचितचिद्रूपत्वात्, तेन यो ऽसौ सत्तानन्दभागस्तत्प्रकाशसुखवृत्तिसत्त्वम्, यस्तदभावस्तदावरणमोहरूपं तमः, एते च ते सत्त्वतमसी नीलानीलवत्परस्परपरिहारेण यद्यपि वर्तेते कार्यत्वकारणत्ववत्तथाप्येकपरामर्शगोचरीकार्यधर्म्यपेक्षया चित्रपतङ्गसङ्गतनीलानीलात्मकरूपन्यायेनान्यो मिश्रतयापि भातः । अतो यो ऽयं द्वयात्मा मिश्रस्वभावस्तद्रजोगुणः, अत एव प्रकाशाप्रकाशस्वरूपयोः सत्त्वतमसोरत्र श्लेषेणावस्थानमिति दुःखत्वम्, प्रियपुत्रादेरेकघन एव हि प्रकाशः सुखम्, एकघन एवाप्रकाशो मोहः, यस्तु कथं चित् प्रकाशो यथा सव्याधिकदेहरूपतया ऽनभिमतया कथं चिच्चाप्रकाशो यथागतगदकल्याणधर्मयोगितयाभिमतया तदेव दुःखतत्त्वम् । अयमेव च पूर्वापरीभावसारः क्रियापरमार्थः । अत्रानुभयरूपं तु नास्ति प्रतीतौ कस्यां चित्कल्पिताकल्पितरूपायामननुप्रवेशात्तस्य, तथा-

Digitized by Google

हि, नीलं तावदकल्पितायां धियि भाति, नीलाभावस्तुच्छोपि कल्पनाकल्पितो ऽभासमानत्वात्तावद् व्यवहारपरमार्थः, तदुभयव्यामिश्रणात्तु नीलानीलं भातु नाम, यत्तु अनुभयरूपं तन्नीलप्रतीत्या तावदकल्पितया न विषयीकृतं चेत्तत्कल्पितामनीलधियमनुधावेत्, अथ तां कल्पितां धियं नाविशत्यकल्पितया विषयीकृतं नीलमेव स्यादिति न पशोश्चतुर्थो ऽस्ति गुणः । अपिश्चार्थे, पशोः सा सत्ता सत्त्वं तदभावस्तमो द्वयात्म रजश्चेति संबन्धः ॥

एवं तावत्पतिपशुरूपप्रमातृतत्त्वं संक्षेपेण निर्णीतमथ प्रमेयतत्त्वं निर्णेतुं पत्यौ तावदित्थमिदं प्रमेयतत्त्वमिति निर्णेतुमाह ।

(७) ये ऽप्यसामयिकेदंतापरामर्शभुवः प्रभोः ।
ते विमिश्रा विभिन्नाश्च यथा चित्रावभासिनः ॥

इहाभासा एव तावदर्था इत्युक्तम्, ते च परामर्शैक्येन कदाचिन्मिश्रीक्रियन्ते, यदा विशेषरूपता, कदाचिदमिश्रा एव परामृश्यन्ते, यदा सामान्यरूपता, त एते उभयात्मानो ऽपि असामयिकेनाकल्पितेन इदंभावेन सहजभेदपरामर्शरूपेणाङ्गुलिनिर्देशादिप्रख्येन गोचरीकार्याः, प्रभोरपि, न केवलं सद्योजातबालादेर्यावदीश्वरस्यापि तथा तेन सामान्यविशेषप्रकारेण चित्रतयावभासन्ते, चित्रत्वं हि तयोर्यन्मिश्रत्वममिश्रत्वं च युगपदेकाहंताविश्रान्तं भातीति ईश्वरदशायां भावोल्लासनान्तरीयकत्वेन संवित्संकोचरूपं निषेध्यानुपरक्तनञर्थमात्ररूपं शून्यं संवित्प्रकाशेनैव प्रकाशमानमहंतानिषेधरूपामसामयिकीमिदंतामुल्लासयति ॥

एवं तावदीश्वररूपस्य पत्युरित्थं प्रमेयतत्त्वं परमशिवे तु भगवति प्रमेयकथैव कथमुत्तिष्ठति, प्रमेयकथोत्थापकत्वमेव भगवतः सदाशिवेश्वरत्वमतो ऽधुना पशुं प्रति कीदृक्प्रमेयवृत्तान्त इति संदेहमपोहति श्लोकत्रयेण ।

(८) ते तु भिन्नावभासार्थाः प्रकल्प्याः प्रत्यगात्मनः ।
तत्तद्विभिन्नसंज्ञाभिः स्मृत्युत्प्रेक्षादिगोचरे ॥
तस्यासाधारणी सृष्टिरीशसृष्ट्युपजीविनी ।
सैषाप्यज्ञतया सत्येवेशशक्त्या तदात्मनः ॥
स्वविश्रान्त्युपरोधाय चलया प्राणरूपया ।
विकल्पक्रियया तत्तद्वर्णवैचित्र्यरूपया ॥

तुर्विशेषं द्योतयति, प्रत्यगात्मनस्तु इत्थं प्रमेयरूपा अर्था न त्वीश्वरवदुक्तनयेनेति, भिन्न इति, मिश्रामिश्रतया भिद्यमान आभासो येषामर्थानां ते विशेषसामान्यात्मानो ऽर्थाः प्रत्यगात्मनः प्रतिपुरुषमव्यामिश्रस्वसंवेदनावगमरूपस्यासंकीर्णाहंप्रकाशात्मनः प्रकल्प्या विकल्पनीयाः प्रतिप्राणि स्ववासनानुसारेण विभिन्नाभिः संज्ञाभिः प्रियो ऽयं शत्रुरयमित्यादिकाभिर्भावनाविशेषानुसारेण तत्तद्विचित्रसुखदुःखाद्युपयुक्ताभिः स्मरणे उत्प्रेक्षणे संकल्पने अन्यत्रान्यत्र च विकल्पयोगे । एतदुक्तं भवति । ईश्वरस्य विकल्पात्मकतामन्तरेण शुद्धविमर्शविषयीभाव्या अर्थाः, पशोस्त्वन्योन्यापोहन * हेवाकिनि विकल्पे समारूढास्ते अर्थाः भवन्ति सांसारिकहानादानादिव्यवहारोपयोगादिति । नन्वविकल्प्यत्वे यावानेवार्थस्तावानेव यदि विकल्प्यत्वे तत्को विशेषः प्रमेयस्य पतिपशुरूपतायाम् । उच्यते, तस्येति पशुकर्तृका सृष्टिस्तेषामर्थानामीश्वरसृष्टानामुपरि वर्तिनी अत एव तामीश्वरसृष्टिमुपजीवन्ती असाधारणी प्रतिप्रमातृनियता, तद्यथा, इदं हृद्यमिति येन सृष्टं तत्तस्यैव तदा नान्यस्य । ननु यदि पशोरपि सृष्टिशक्तिरस्ति तर्हीश्वर एव, सत्यमीश्वर एवासौ, नन्वेवं साधारणत्वं कस्मात्सृष्टेर्न भवति, भवेद्यदि स्वशक्तिं परिजानीयाद्, यावता सा तस्यापरिज्ञाता परवशस्येव सतो विकल्पक्रिया विकल्पनशक्तिरुदेति, ननु केन सा तस्योत्थाप्यते, आह, ईश्वरस्य परामर्शरूपतया शब्दराशिलक्षणस्य या शक्तिः स्वरूपविश्रान्तिलक्षणपारमैश्वर्योपरोधप्रयोजना ब्राह्म्यादिदेवताचक्रमयी तैस्तैः ककारादिवर्णवैचित्र्यैर्विचित्रा, तया यासौ विकल्पक्रिया तस्य पशोरेकत्र निरूढ्यभावाच्चञ्चला, तेन मित्रमयं शत्रुरयमित्यादिवर्णवैचित्र्यानुविद्धतया विकल्पनक्रियया तदात्मन ईश्वरस्वभावस्यैव पशोरसाधारणी सृष्टिः, ।

पञ्चवक्त्रश्चतुर्दन्तो हस्ती नभसि धावति ।

इत्यपि विमिश्रतया विकल्पसृष्टिस्तानाभासानीश्वरसृष्टानेवोपजीवयतीति सर्वा पाशवी प्रत्ययसृष्टिरीश्वरसृष्ट्युपजीविनीत्युक्तम् ॥

नन्वेवं यदि पाशवी सृष्टिः संसाररूपा तर्हि पारमेश्वरी सृष्टिः पशोः किं कुर्यादिति निर्णीयते ।

(९) साधारणो ऽन्यथा चेशः सर्गः स्पष्टावभासनात् ।
विकल्पहानेनैकाग्र्यात्क्रमेणेश्वरतापदम् ॥

ऐश्वरः सर्गो द्विधा, साधारणश्च घटादिरसाधारणश्चान्यथेति निर्दिष्टो द्विचन्द्रादिः, तस्य च सामान्यलक्षणं स्पष्टावभासनं नाम, सो ऽयं सर्गो यदा विकल्पहानक्रमेण तस्मिन्निर्विकल्पकपरिगृहीत एव स्पष्टाभे ऽर्थे एकाग्रत्वमवलम्ब्याहमिदमित्यैश्वर्यपरामर्शपदं भवति, तदान्तर्लक्ष्यबहिर्दृष्टिर्निमेषोन्मेषपरिहारोपदेशदिशा क्रमेणाभ्यासतारतम्येन पशोः पशुत्वं प्रतिहन्तीश्वरत्वं च दर्शयति, किं च यो ऽयं विकल्पसर्गः पाशव उक्तस्सो ऽपि यद्यन्यथेति पूर्वोक्तरूपवैपरीत्येन

* हेवाको हठः ।

परिज्ञातपेशयस्या परिज्ञाततादात्म्यस्य भवति तदा सो ऽपि साधारण एव आप्यायनाभिचरणशान्त्यादिविकल्प इव न्यस्तमन्त्रस्य भावितान्तःकरणस्य ॥

एवं विकल्पनिर्ह्रासेन निर्विकल्परूपमात्मीभावे विश्वात्मसाक्षात्कारलक्षणः स्वप्रत्यक्ष एव मोक्षो दर्शितः, अधुना विकल्पनिर्ह्रासाभावे ऽपि तं दर्शयति ।

(१०) सर्वो ममायं विभव इत्येवं परिजानतः ।
विश्वात्मनो विकल्पानां प्रसरे ऽपि महेशता ॥

नहि शक्यं प्रत्यगात्मा नाम पशुः कश्चिदन्यो ऽहं,मपि तु परिगृहीतग्राह्यग्राहकप्रकाशैकघनः परो यः स एवाहं स चाहमेव न त्वन्यः कश्चिद्, अतो विकल्पसृष्टिरपि मम स्वातन्त्र्यलक्षणो विभव इति, एवं विमर्शे दृढीभूते सत्यपरिक्षीणविकल्पो ऽपि जीवन्नेव मुक्तः । यथोक्तम् ।

शङ्का ऽपि न विशङ्केत निःशङ्कत्वमिदं स्फुटम् ।

इति ॥

नन्वेवं बद्धमुक्तयोः प्रमेयं प्रति को भेदः, उच्यते ।

(११) मेयं साधारणं मुक्तः स्वात्मा भेदेन मन्यते ।
महेश्वरो यथा बद्धः पुनरत्यन्तभेदवत् ॥

श्रीमत्सदाशिवेश्वरपदादारभ्य क्रिमिपर्यन्तप्रमातृवर्गाधिष्ठातृ यदहमिति रूपं तदेवात्मतयाभिनिविशते मुक्तः, ततश्च विश्वस्यापि प्रमेयं ममापि, मम प्रमेयं विश्वस्यापि, प्रमेयं चेदं ममैवाङ्गभूतं प्रमेयान्तरमपि तथेत्यनेन क्रमेण प्रमेयं परस्परतश्च प्रमातृवर्गाच्चाव्यावृत्तमिति एकरसाभेदविश्रान्तितत्त्वमस्य सर्वं परामर्शपदमुपैति, बद्धस्य तु सर्वमेतद्विपरीतमित्येकरसभेदविश्रान्त एवासौ ॥

ननु सदाशिवेश्वरभुवि जीवन्मुक्तिपदे बद्धरूपपशुप्रमातृविषये प्रमेयवृत्तान्तः परीक्षितः, परमशिवे तु कथमसावित्याशङ्क्याह ।

(१२) सर्वथा त्वन्तरालीनानन्ततत्त्वौघनिर्भरः ।
शिवश्चिदानन्दघनः परमाक्षरविग्रहः ॥

न खलु भगवति श्रीपरमशिवे प्रमेयकथा काचिदस्ति, तत्त्वौघस्य सर्वथा तत्र चिद्रूपतामात्रविश्रान्तत्वेन लीनत्वात्, ततश्च सावस्या संवित्स्वभावेन स्वात्मविश्रान्त्यानन्देनाक्लिष्टनैसर्गिकपरामर्शात्मकस्वात्मचमत्कारलक्षणेन एकघना अविच्छिन्नतद्रूपा परमाक्षरेण विग्रहवती भगवतो विश्वमयस्यानवच्छिन्नानुत्तरधाम्नो गलितप्रमेयकथा सर्वोत्तीर्णा व्यपदिश्यते ॥

एवमधिकारचतुष्टयोक्तं यद्वस्तु तत्फलमाह ।

(१३) एवमात्मानमेतस्य सम्यग् ज्ञानक्रिये तथा ।
जानन्यथेप्सितान्पश्यन् जानाति च करोति च ॥

एवमितीश्वररूपमात्मानं, तस्य च स्वाव्यतिरिक्ते स्वातन्त्र्यमात्ररूपे ज्ञानक्रिये जान,न्नेवंभूतो ऽयमात्मा, न तु काणादादिदर्शितः, इत्थं च ज्ञानक्रिये न तु तस्य व्यतिरिक्ते केचनेति परामृशन् यद्यदिच्छति तत्तज्जानाति करोति च समावेशाभ्यासपरो ऽनेनैव शरीरेण, अतत्परस्तु सति देहे जीवन्मुक्तस्तत्पाते परमेश्वर एवेति ॥

अस्यार्थस्य स्वप्रत्ययसिद्धस्यापि गुरुपरम्परोपदेश उपोद्बलको वक्तव्यः, शास्त्रदृष्टिर्हि दर्शिता आगमाधिकारेण, एवं गुरुतः शास्त्रतः स्वत एतद्दृढीकृतं भवतीत्यभिप्रायेण गुरुपारंपर्यं दर्शयति ।

(१४) इति प्रकटितो मया सुघट एष मार्गो नवो
महागुरुभिरुच्यते स्म शिवदृष्टिशास्त्रे यथा ।
तदत्र निदधत्पदं भुवनकर्तृतामात्मनो
विभाव्य शिवतामयीमनिशमाविशन्सिद्ध्यति ॥

अस्मत्परमेष्ठिभट्टारकश्रीसोमानन्दपादैः शिवदृष्टिशास्त्रे ऽयमभिनवः सर्वरहस्यशास्त्रान्तर्गतः सन्निगूढत्वादप्रसिद्धो बाह्यान्तरचर्याप्राणायामादिक्लेशप्रयासकलाविरहात्सुघटस्तात्रोक्तः, स एवात्र प्रकटतां परवादकलङ्काशङ्कापसारेण नीतः, यत एवं शास्त्रगुरुस्वप्रत्ययसिद्धो ऽयमर्थस्तदिति तस्मादत्र प्रमेये पदं परामर्शं विश्रमयन् विश्वकर्तृत्वलक्षणमैश्वर्यमात्मनो विभाव्य दार्ढ्येन यदा परामृशति तर्हि तत् परामर्शमात्रादेव तावज्जीवन्मुक्तो भगवान् शिव एव । यथोक्तं परमेष्ठिपादैः ।

ज्ञाते शिवत्वे सर्वस्थे प्रतिपत्त्या दृढात्मना ।
करणेन नास्ति कृत्यं क्वापि भावनया ऽपि वा ॥
सकृज्ज्ञाते सुवर्णे किं भावनाकरणादिना ।
सर्वथा पितृमात्रादितुल्यदार्ढ्येन सत्यता ॥

इत्यादि । तां विभाव्य यद्यनिशमाविशति शरीरप्राणबुद्धिशून्येभ्यो ऽन्यतमं द्वयं सर्वं वा तत्रैव निमज्जयत्यनवरतं ततांतां विभूतिं परविभूतिपर्यन्तां लभते ।

"ननु यद्यात्माख्यं वस्तु तदेव, तर्हि तस्य प्रत्यभिज्ञानाप्रत्यभिज्ञानयोरविशेषः, नहि बीजमप्रत्यभिज्ञातं सति सहकारिसाकल्ये नाङ्कुरं जनयति, तत्क आत्मप्रत्यभिज्ञाने निर्बन्धः" उच्यते, द्विविधा ऽर्थक्रियास्ति, बाह्या चाङ्कुरादिका, प्रमातृविश्रान्तिचमत्कारसारा च प्रीत्यादिरूपा, तत्राद्या सत्यं प्रत्यभिज्ञानं नापेक्षते, द्वितीया तु तदपेक्षते एव, इह चाहं महेश्वर इत्येवंभूतचमत्कारसारा परापरसिद्धिलक्षणा जीवन्मुक्तिविभूतियोगमय्यर्थक्रियेतीश्वरप्रत्यभिज्ञानमत्रावश्यापेक्षणीयम् ॥

Digitized by Google

ननु प्रमातृविश्रान्तिसारार्थक्रिया प्रत्यभिज्ञानेन विना न दृष्टा, सति तत्र दृष्टेति क्वैतदुपलब्धमित्याशङ्क्याह ।

(१५) तैस्तैरप्युपयाचितैरुपनतस्तन्व्याः स्थिते ऽप्यन्तिके
कान्तो लोकसमान एवमपरिज्ञातो न रन्तुं यथा ।
लोकस्यैष तथानवेक्षितगुणः स्वात्मापि विश्वेश्वरो
नैवालं निजवैभवाय तदियं तत्प्रत्यभिज्ञोदिता ॥

यदा नायकगुणसंश्रवणप्रवृद्धानुरागा कामिनी तद्दर्शनमेव परममुपादेयमाकाङ्क्षन्ती दिवानिशमवशहृदया दयितोपयाचितानि दूतीसंप्रेषणानि मदनलेखकद्वारकात्मावस्थानिवेदनानि कुर्वाणा विरहक्षामीभवद्गात्रलतिका तिष्ठति, तदा तदुपयाचितवशादशङ्कितमेव सविधवर्तिनि प्रियतमे ऽवलोकिते तैस्तैरुत्कर्षविशेषैः परामर्शपदवीमगच्छद्भिर्जनसाधारणतामापादिते संपन्नमपि तत्प्रियतमावलोकनं न हृदयं पूर्णीकरोति, तथा स्वात्मनि विश्वेश्वरे सततं निर्भासमाने ऽपि तन्निर्भासनं न हृदयस्य पूर्णतामाधत्ते, यतः सो ऽपि स्वात्मा विश्वज्ञत्वकर्तृत्वाद्यप्रतिहतस्वशक्तिलक्षणपारमेश्वर्योत्कर्षयोगेन न परामृष्ट इति भासमानघटादितुल्यवृत्तान्तो जातः, यदा तु दूतीवचनाद्वा तल्लक्षणाभिज्ञानाद्वोपायान्तराद्वा तानुत्कर्षान्हृदयंगमीकरणेनामृशति, तदा तत्क्षणमुद्भूतफुल्लन्यायेनैव तावत्कामपि पूर्णतामभ्येति, परिभोगाभ्यासरसे तु विश्रान्त्यन्तराण्यपि लभते, तद्वदात्मनि गुरुवचनाज्ज्ञानक्रियालक्षणशक्त्यभिज्ञानादेर्वा यदा पारमेश्वर्योत्कर्षहृदयंगमीभावो जायते, तदा तत्क्षणमेव पूर्णतात्मिका जीवन्मुक्तिः, समावेशाभ्यासरसे तु विभूतिलाभ, इति तस्य प्रत्यभिज्ञैव परापरसिद्धिप्रदायिनी भवति ॥

सर्वोपकारकं महाफलमिदं शास्त्रं प्रसिद्धान्वययोगेन नामधेयप्रसिद्ध्या च तदुत्कर्षस्मरणद्वारजनितसंभावनाप्रत्ययलक्षणाप्रवर्तकसंवेदनया जनं प्रवर्तयितुं पितुर्नाम्ना स्वनाम्ना चोपसंहारं दर्शयति ।

(१६) जनस्यायत्नसिद्ध्यर्थमुदयाकरसूनुना ।
ईश्वरप्रत्यभिज्ञेयमुत्पलेनोपपादिता ॥

यस्य कस्य चिज्जन्तोरिति नात्र जात्याद्यपेक्षा का चिदिति सर्वोपकारित्वमुक्तम्, अयत्नेन सिद्धिः परापररूपा यथा स्यादिति महाफलत्वम्, उदयाकरपुत्रः श्रीमानुत्पलदेवो ऽस्मत्परमगुरुरिदं शास्त्रमकार्षीदिति तत्प्रसिद्ध्या जनः प्रवर्तते इति प्रवर्तनाद्वारेण सो ऽनुगृहीतो भवतीत्युभयनामनिर्देशः, इयमिति हृदयंगमतामुपपत्तिशतैरानीतेति शिवम् ॥१८॥

आदितः सूत्रश्लोकाः १९२ व्याख्याताः ।

इति श्रीमन्महामाहेश्वरश्रीमदाचार्याभिनवगुप्तविरचितायामीश्वरप्रत्यभिज्ञासूत्रविमर्शिन्यामागमाधिकारे तत्त्वार्थसंग्रहस्तृतीयमाह्निकम् ॥

॥ इति पञ्चदशमाह्निकम् ॥

॥ संपूर्णो ऽयमागमाधिकारस्तृतीयो विमर्शः ॥

एषा ऽभिनवगुप्तेन सूत्रार्थप्रविमर्शिनी ।
रचिता प्रत्यभिज्ञायां लघ्वी वृत्तिरभङ्गुरा ॥
वाक्यप्रमाणपदतत्त्वसदागमार्थाः
स्वात्मोपयोगमुपयान्त्यमुतः सुशास्त्रात् ।
भौमान् रसाञ्जलमयांश्च न सस्यपुष्टो
मुक्त्वा ऽर्कमेकमिह योजयितुं क्षमो ऽन्यः ॥
आत्मानमनभिज्ञाय विवेक्तुं यो ऽन्यदिच्छति ।
तेन भौतेन किं वाच्यं प्रश्ने ऽस्मिन् को भवानिति ॥

श्रीसदाशिवभट्टारकाय नमः ।

॥ संपूर्णो ऽयमीश्वरप्रत्यभिज्ञासूत्रविमर्शिनीनामधेयो निबन्धः ॥

॥ श्रीः ॥

॥ ईश्वरप्रत्यभिज्ञासूत्रविमर्शिन्युपसंहरणम् ॥

तदिदं निबन्धरत्नं दशभिरङ्कैः काशीविद्यासुधानिधिना प्रकाश्यमानं बुद्धिमन्मानसानन्दोत्पादनेन सफलयतु शोधनटिप्पणप्रभृतीन् मामकप्रयत्नानिति सविनयं परमशिवं प्रार्थये ।

अथैतद्विस्तृतनिबन्धावलोकनासमर्थरसिकजनमनःकुतूहलाय संक्षेपतो ऽस्य प्रतिपाद्यं संगृह्यते ।

इह खलु घटमहमन्वभवमभ्यजानामित्यादिसंविदस्त्रीण्यालम्बनानि प्रसिध्यन्ति । ज्ञानं ज्ञेयं ज्ञाता चेति । तत्र ज्ञानं विषयप्रकाशलक्षणभूते विषयवैचित्र्याच्च स्वात्मनि किं चिद्वैचित्र्यमादधाति । तथाहि । घटज्ञानात्पटज्ञाने को ऽन्यो विशेषो भवितुमर्हति, विना घटपटाभ्याम् । घटादिरूपो विशेषश्च स्वात्मनि वैलक्षण्यमादधदपि प्रकाशपरमार्थे ज्ञाने किं वैलक्षण्यमादधीत । आहितमपि तदौपाधिकं भवेच्च तु वास्तवमिति वस्तुतः प्रकाशस्यैकरूप्यलक्षणमेकरसत्वमेव ।

ज्ञेयञ्च तावद् ज्ञानाच्चातिरिक्तं सिध्यति । अतिरिक्तविषयं विना ऽनुपपद्यमानेन हि तेन प्रकाशेनातिरिक्तो विषयः साध्यः । तस्य च स्वप्नभ्रममदादौ विना ऽप्यतिरिक्तज्ञेयं सर्वानुभवसिद्धतया ऽनुपपद्यमानत्वाभावात् । "अथासत्यतिरिक्ते ज्ञेये घटादिज्ञानेषु पटादिज्ञानेभ्यः को विशेष उच्यताम्, पामरपर्यन्तं प्रसिद्धो हि तयोर्भेदः, सर्व एव हि माता घटव्यवसायोत्तरं घटमन्वभवं न पटमित्यनुव्यवस्यति, नहि तत्र प्रकाशांशे क-

Digitized by Google

श्चन विशेषो यस्तादृशीं संविदं व्यवच्छिन्द्यात्” । उच्यते । अतिरिक्तत्ववादिनैवोच्यताम्, किं स्वाप्नप्रभृतिसंवित्सु घटं विषयीकुर्वाणासु पटं विषयीकुर्वन्त्याः संविदो व्यावृत्तं रूपमस्ति, अथोच्येत पूर्वानुभूतघटादेः स्मरणरूपा एव स्वप्नादिसंविद इत्यनुभूयमानघटादिरेव व्यवच्छेदक इति, तथाप्यतीतघटादिविषयकसंविदतीतपटादिविषयकसंविदो भेदकं किं कल्पनीयम्, घटादेरत्ययेन भेदकत्वासंभवात्, अथ कापिलनयमनुसृत्यातीतावस्थं घटमुपगम्य समाधीयते, तत्रापि प्रतिवदामो नरविषाणगगनकुसुमस्वशिरश्छेदादिज्ञानेषु को ऽनुभूतो विषयः परिकल्पयितुं शक्यते । अथ सांख्यप्रवचननयमनुसृत्यैव बुद्धिपरिकल्पितो विषयः परिच्छेदक उपेयते । तर्हि हन्त भोः स्वाप्नादिसंविदामनुभवत्वमेवोपगम्यतां, किं स्मरणत्वाभ्युपगमेन । अथ तदपीष्टमेव समापन्नमित्युच्यते, तर्हि आयातं मार्गेण, स्वाप्नानुसारेण बाह्यसंविदोऽपि बौद्धेनैव विषयेण सविषयकत्वमास्तां ततश्च सिद्धमनतिरिक्तत्वं विषयस्य, बौद्धो हि विषयः प्रकाशस्यैव कल्पिताकारविशेषो वस्तुतः प्रकाशादनतिरिक्त एव, अपि च योगिना क्षणमात्रादेव निर्मीयमाणं विचित्रपुरसेनादिकमवश्यं योगिसंविदात्म वाच्यम् । अन्यथा सामग्रीसंघटनपुरःसरं घटं घटयन् योगी कुम्भकारव्यावृत्तां कामीशितां स्वस्मिन्समपादयत्, प्रसिद्धकार्यकारणव्यवहारानुल्लङ्घनायैव हि किल योगिनिर्माणस्य सामग्रीसमर्जनपूर्वकत्वं वाच्यम्, तत् खलु क्षणमात्रेण योगिनिर्मिते घटे न्यग्रोधे षोडशवर्षपुरुषशरीरे वा न संभवितुमर्हतीति योगीच्छामात्रेण झटिति पुञ्जभावमापन्नाः परमाणव एवारम्भका वाच्याः, न खलु लोके परमाणूनां घटारम्भकत्वं प्रसिद्ध्यति, किन्तु द्व्यणुकप्रभृतिकपालपर्यन्तं क्रमेण घटमानानामवयविनां तत्रापि नियतसहकारिसमवहितानां, नापि न्यग्रोधधाना अह्नायैव निपीतमार्तण्डमण्डलं सुविस्तीर्णशाखाकाण्डमण्डितं न्यग्रोधतरुमारभन्ते, अपि त्वङ्कुरादिक्रमेण, एवं पुरुषशरीरारम्भकशुक्रशोणितयोरपि चिन्त्यम् । इत्थं च योगिनिर्माणस्थले लोकप्रसिद्ध्युल्लङ्घनस्यावश्यकतया ऽलं बाह्योपादानसमवधानचिन्तया, योगिसंविदेव नानाविधवस्तुवैचित्र्यावभासस्वातन्त्र्यं स्वस्मिन् समाधत्ताम्, तथा च संविद एव विचित्रावभासलक्षणैश्वर्यस्य सिद्धौ विश्वजातमपि माहेश्वरसंविदेव स्वान्तर्निमग्नमीशितृत्वलक्षणस्वातन्त्र्यवशादिवावभासयतीति संतुष्यत । तदुक्तमुत्पलदेवेन ।

चिदात्मैव हि देवोन्तःस्थितमिच्छावशाद् बहिः ।
योगीव निरुपादानमर्थजातं प्रकाशयेद् ॥

इति । इत्थं च विषयः प्रकाशात्मनो ज्ञानान्नातिरिक्त इति सिद्धम् ।

ज्ञाता तावदन्तर्मुखविमर्शात्मा प्रकाशस्वभावः सकलसंविदां प्रतिष्ठाभूतो निम्नगानामिव सागरः । तस्य स्वप्रकाशत्वादेव न साधनापेक्षा, प्रमाणं हि अप्रकाशमानस्य प्रकाशनायापेक्ष्यते, स यदि स्वयमप्रकाशमानः प्रमाणप्रकाश्यः स्यात्तर्हि घटादितुल्ययोगक्षेमो जड इति नात्मा, अथ चेदलुप्तचिद्रूपः स्वप्रकाशस्तर्हि स सिद्ध एवेति का ऽस्य सिद्धिः साधनैः कर्त्तव्यत्वेनावशिष्यते । स चायं नानाविधस्वातन्त्र्यपूर्णो ऽहमित्याकारो विमर्शस्तैस्तैर्वस्तुभिर्विषयविधया ऽवच्छेदकविधया वा परिच्छिन्नेभ्यः प्रकाशेभ्यः परमार्थतो ऽभिन्न एव । इत्थं च चैत्रीयः प्रकाशः कतिपयवस्तूनि विषयीकरोति मैत्रीयः कतिपयानीत्येवंक्रमेण सकलप्रकाशः सर्वविषयकः प्रकाशसमष्टिरेव चाहंविमर्शः प्रमातेत्यनायासतः प्रमातुः सार्वज्ञ्यमपि सिद्धम् ।

अथायं प्रमाता यद्येवं प्रमाणातीतस्तर्हि किं शास्त्रेण, परार्थानुमानात्मकं हि तदिति चेद्, उच्यते, यैषा भगवतो विमोहिनी नाम मायाशक्तिस्तत्कृतं यत् पूर्णत्वस्वातन्त्र्यादेः प्रकाशमानस्याप्यप्रकाशमानतया ऽभिमननं मौढ्यापरपर्यायं तदुन्मूलनसाधनं यत्सोऽहमित्याकारकं प्रत्यभिज्ञानं तन्मननोपायभूतयुक्तिशतोपपादनमुखेन हृदयंगमीभावं प्राप्यते ऽनेन शास्त्रेणेति परमपुरुषार्थसाधनं शास्त्रं महाफलमेव ।

अस्य चानवरतजननमरणपीडितजनमात्रमधिकारि, समस्तसंपत्समवाप्तिलक्षणः परमपुरुषार्थः प्रयोजनम्, ईश्वरप्रत्यभिज्ञानं च विषय, इत्यनुबन्धाः प्रथमसूत्रेण सुव्यक्तमुक्ताः ।

अथैतद्दर्शनानुसारेण संक्षेपतो विश्वं निरूप्यते । सर्वेषु तावन्मुख्यं प्रकाशपरमार्थमहमित्याकारकविमर्शात्म स्मृतिज्ञानापोहनशक्तिभिः क्रियाशक्त्या चावियुक्तं शिवतत्त्वं स एव महेश्वर इत्युच्यते । येयं तस्योन्मेषशक्तिर्यतो जगत उदयो या च निमेषशक्तिर्यतो जगतस्तिरोभावस्ते द्वे क्रमेणेश्वरतत्त्वसदाशिवतत्त्वे । तदधिष्ठातृदेवते अपि तन्नामिके । यदेतद्योगिप्रभृत्यपशुप्रमातृषु पारमार्थिकं प्रथनं तत्प्रयोजिका विद्याशक्तिः । या खलु पशुप्रमातॄणां शून्ये बुद्धौ शरीरे वा प्रमातृताभिमानमुद्बोधयति भावांश्च चितो भेदेनाभिमानयति सा विमोहिनी नाम मायाशक्तिः । इदमित्याकारको यो बहिर्मुखो विमर्शस्तदात्मकमेव मेयं, तच्चतुर्विंशतिधा । तथाहि । कार्यकरणवर्गस्य यन्मूलभूतं कारणं तत् प्रधानं नाम । ततो ऽध्यवसायव्यापारं महत्तत्वं बुद्धिर्नाम प्रादुर्भवति । ततश्चाभिमानात्मा ऽहंकारः । तस्माच्च सात्विकात् संकल्पकं मनः, राजसाच्च दशेन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थानि, सर्वाणि चैतान्यतीन्द्रियाणि, तामसाच्चाहंकारात् शब्दस्पर्शरूपरसगन्धतन्मात्राणि । तेभ्यश्च क्रमेणैकैकवृद्ध्या गगनपवनानलसलि-

Digitized by Google

लवसुन्धराभिधानि पञ्च भूतानीत्येवं चतुर्विंशतिधा मेयम् । तदेतत्प्रपञ्चजातं यस्मादुदेति यत्र च लीयते सोऽन्तर्मुखविमर्शात्मा महेश्वरस्तत्सत्यभिज्ञया च भवति जनस्य परमपुरुषार्थोऽपवर्ग इति शम् ॥

सांख्य॰ बालशास्त्री

॥ श्रीः ॥

॥ अथ बालरामायणाख्यनाटकस्याष्टमोऽङ्कः ॥

अतः परं वीरविलासो भविष्यति ।

ततः प्रविशतो राक्षसौ ।

एकः । सखे दुर्मुख किमपि महान् सत्त्वभ्रंशो रावणस्य यत्कुमारसिंहनादवधमप्याकर्ण्य न शोकः कृतो नाप्यमर्षः केवलमेकं तुलाद्यूतं प्रवर्त्तितं तत्र च लङ्काधिपत्यं सीतापहारिता न पुनरर्पिता ।

दुर्मुखः । अज्ज सुमुह सामिणीए तिअडाए समादिट्ठं जह गच्छह अङ्गदणरन्तआणं एक्कतुलं पेक्खह जेण तुह्ममुहादो सुणिअ सीदादेवीए णिवेदइस्सं ता दुवे वि अह्मे गदत्ति एत्तिअ मह्नं जाणामि ण उण कारणं ता कहीअदु जहा पडिवण्णम् * ।

सुमुखः । परं लङ्केश्वरेण शुकसारणौ प्रहितौ दाशरथिमभिधातुमभिहितं च ताभ्याम् ।

वक्त्राम्भोजार्चनाभिः फलमभिलषितं हेलया यस्य लिप्सोः
सोत्कण्ठं कण्ठकाण्डेष्वहमहमिकया खड्गधारायणेषु ।
स्थोति त्यक्तप्रणामप्रकुपितगिरिजाकृष्टवामार्धपाणिस्तोषोदस्तान्यहस्ता झटिति न घटिता शाम्भवी ताललीला ॥१॥

स निशाचरचक्रवर्ती त्वामाह यदुत किमखिलवानरराक्षसक्षयकरेण संग्रामेण तदेकं तुलाद्यूतं प्रवर्तयावः । तत्र च ।

त्वत्काङ्कारविजये तव राम लङ्का
सीता च ते पुनरियं भवतोऽस्तु दाराः ।
मत्काङ्कारविजये तु ममाधिपत्यं
तस्यां च ते पुरि कलत्रजने च तत्र ॥ २ ॥

दुर्मुखः । तदोतदो † ।

सुमुखः । ततश्च हासलवलाञ्छिताधरमुद्रेण रामभद्रेणाभिहितं यदाह द्रुहिणप्रणप्ता । किं पुनरावयोरङ्कारत्वमुचितं ययोरन्तरङ्गो ऽभियोगः ।

दुर्मुखः । तदोतदो * ।

सुमुखः । ततश्च निरुपमानरामपराक्रमशङ्किताभ्यामुक्तं शुकसारणाभ्यां यदुत महानायकयोर्नायं क्रम इति कुम्भकर्णाग्रजस्त्वामिदमाह ।

दुर्मुखः । तदोतदो † ।

सुमुखः । ततश्च सौमित्रिसुग्रीवबिभीषणजाम्बवदाञ्जनेयप्रभृतिभिर्निषिद्धेनापि तथेत्यभ्युपगम्याङ्कारीकृतः कुमारोऽङ्गदो रघूद्वहेन निजपुत्रो नरान्तकस्तु लङ्केश्वरेण ।

दुर्मुखः । भोः किं पुण णिअभुअदण्डमण्डलीपरक्कमे आसंसा देवस्स जेण णरन्तअवाहुसु समारोविअं लङ्कारज्जम् ‡ ।

सुमुखः । असमञ्जसकारितायां किमुच्यते स्वामी । किञ्च ।

मृत्युं यदेव गमितो युधि सिंहनादः
शक्तिर्यदेव च वृथा भरताग्रजेऽभूत् ।
सीतार्पणं नृपसुताय तदैव युक्तं
मोहस्तु तत्र रजनीचरकालरात्रिः ॥ ३ ॥

दुर्मुखः । जुवराअमेहणादस्स उण का वत्ता § ।

सुमुखः ।

यद्बद्धो नागपाशैः प्रचुरतमतमःश्यामले रात्रिमध्ये
यच्चुद्धं यन्नभस्तः शरपतनविधिर्मायया छन्नमूर्तेः ।
यद्भक्तिर्मन्त्रजिव्हे प्रसरति च रथं नित्यजैत्रं सुवाने
तन्मन्ये मेघनादोऽप्यनुभवति भयं राघवादुग्रमन्तः ॥४॥

अपिच ।

लङ्का दुर्गं जलधिपरिखादुर्गमं राक्षसेन्द्रस्तस्याः स्वामी सुरजनवधूचामरैर्वीज्यमानः ।
रामः शाखामृगपरिगतो मानुषस्तद्विपक्षस्तच्चैतस्मिन् जयविधिरिति व्रीडया नः कलङ्कः ॥ ५ ॥

दुर्मुखः । जं णिम्मलमदिचक्खुणो पेक्खन्ति तं दिट्ठं अज्जसुमुहेण ‖ ।

सुमुखः । अलममुना राक्षसविरुद्धकथानुबन्धेन यथादिष्टमेव कुर्वः । उभौ परिक्रामतः ।

---

* आर्य सुमुख स्वामिन्या त्रिजटया समादिष्टं यथा गच्छतं अङ्गदनरान्तकयोरेकतुलां प्रेक्षेथां येन युष्मन्मुखात् श्रुत्वा सीतादेव्यै निवेदयिष्यामि तद्वावप्यावां च गतावित्येतावदहं जानामि न पुनः कारणं तत् कथ्यतां यथा प्रतिपन्नम् ।

† ततस्ततः ।

* ततस्ततः ।

† ततस्ततः ।

‡ किं पुनर्निजभुजमण्डलीपराक्रमे नाशंसा देवस्य येन नरान्तकबाहुषु समारोपितं लङ्काराज्यम् ।

§ युवराजमेघनादस्य पुनः का वार्ता ।

‖ यन्निर्मलमतिचक्षुषः पश्यन्ति तद् दृष्टमार्यसुमुखेन ।

दुर्मुखः । एसा सामिणी तिअडा अह्मे पडिवालअन्ती चिट्ठइ ता एहि उवसप्पह्म * तथा कुरुतः ।

ततः प्रविशति त्रिजटा ।

त्रिजटा । सौत्सुक्यमालोक्य हंहो दुम्मुह सुमुह तुरिअं उवसप्पह णिवेदेह जुज्झउत्तन्तम् † उभौ प्रणम्योपविशतः ।

सुमुखः । स्वामिनि त्रिजटे लङ्कापुरीं पूर्वेण सुवेलाचलं च पाश्चर्मेन उभयतो मञ्चः परिमितप्राकारपरिष्कृतः स्तोकसमुन्नतः समुन्नतसमस्तजनप्रेक्षणीयो रक्षावशाटे कारितो राक्षसराजेन तत्र च प्राच्यमञ्चाधिरूढे ससौमित्रिसुग्रीवविभीषणे रामे नीलाधिष्ठिते च वानरबले प्रतीच्यमञ्चाधिरूढे च सशुकसारणे दशकण्ठे प्रहस्ताधिष्ठिते च राक्षसबले गगनाङ्गणागतासु च वीरजनचरितकुतूहलिनीषु सुरसुन्दरीषु ताडितमल्लभटीतूर्यौ माङ्गल्यकलशानुगतौ निशितकृपाणपाणी प्रविष्टावङ्ककारौ । ततश्च ।

रत्नत्रिकङ्कणविभूषितदोःप्रकाण्डं
श्रीखण्डपाण्डुरितदेहभरं च रूपम् ।
युद्धाङ्गणेऽङ्गदनरान्तकयोर्निरीक्ष्य
चक्षुर्निमेषविमुखं स्तुतमप्सरोभिः ॥ ६ ॥

त्रिजटा । तदोतदो ‡ ।

दुर्मुखः । तदो अ समोत्तीरिअ मञ्चादो णीलपहत्थेहिं सेणावईहिं कट्टिएसु अन्तरदण्डेसु णिरइआलीढपाआ दोवि संमुहं संठिआ अङ्कआए पउत्ता अ रणमण्डले मण्डलीए भमिउं § ।

त्रिजटा । तदोतदो || ।

दुर्मुखः । तदो अ ताणं विविहं वगन्ताणं उपरि ताडणे णमन्ताणं तलताडणे उप्पयताणं अणवरअपहारपरम्परं पेसअंताणं पेसिअं पडिच्छन्ताणं दिट्ठिं वञ्चअन्ताणं अरक्खिअमग्गं रक्खिन्ताणं अण्णदो दंसिअ अण्णदो पहरन्ताणं संभरिआसेसधीरत्तणेण वंसविसेसं छुरिआजुअलं उक्खिविअ अण्णुण्णमाहरन्ताणं पयट्टं तं जुज्झ ¶ ।

* यथा स्वामिनी त्रिजटाऽस्मां प्रतिपालयन्ती तिष्ठति तदेह्युपसर्पावः ।

† हंहो दुर्मुख सुमुख त्वरितमुपसर्पतं निवेदयतं युद्धवृत्तान्तम् ।

‡ ततस्ततः ।

§ ततश्च समुत्तीर्य मञ्चात् नीलप्रहस्ताभ्यां सेनापतिभ्यां कृष्टयोरन्तरदण्डयोर्निरचितालीढपादौ द्वावपि संमुखं संस्थितावङ्ककारौ प्रवृत्तौ च रणमण्डले मण्डल्या भ्रमितुम् ।

|| ततस्ततः ।

¶ ततश्च तयोर्विविधं वल्गतोरुपरि ताडने नमतोस्तलताडन उत्पततोरनवरतप्रहारपरम्परां प्रेषयतोः प्रेषितं प्रतीच्छतोर्दृष्टिं वञ्चयतोररक्षितमङ्गं रक्षतोरन्यतो दर्शयित्वाऽन्यतः प्रहरतोः संभृताशेषधीरत्वेन वंशविशेषं छुरिकायुगलमुत्क्षिप्यान्योन्यमाहरतोः प्रवृत्तं तद् युद्धम् ।

त्रिजटा । तदोतदो * ।

सुमुखः ।

चारी सुचित्रपदता स्थिरता च दृष्टेः
क्रान्तिर्भुवः प्रहृतियोजनवञ्चनेन ।
सर्वाङ्ककाररणकर्मणि मात्रिकेय-
मुत्कीर्य तत्र समये कथितेव ताभ्याम् ॥ ७ ॥

अपिच ।

यथायथा प्रहरति वालिनन्दन-
स्तथातथा हरिहरिभिः स्थितं मुदा ।
यथायथा प्रहरति रावणात्मज-
स्तथातथा किलिकिलितं च राक्षसैः ॥ ८ ॥

त्रिजटा । तदोतदो † ।

दुर्मुखः । तदो अ ताणं णिब्भरं पअट्टे समरसंघट्टे चरणेण चरणमप्फालिअ दरणमन्तस्स णरन्तअस्स रोमञ्चणिविडरअणङ्गदेणाङ्गदेण कन्धराकण्डबुड्ढबन्धे खित्ता छुरिआ । उट्ठिदो अ खेडासंखोहो वाणरबले जायाइं अ मउलन्तकमलमण्डलच्छायाइं रावणवअणाइं वञ्चिअणिसाअरलोअलोअणं परोप्परदिण्णहत्थआलं च पहसिआऊ अच्छराऊ खरसमीरणमूलिअफुल्लपालिभद्ददुम्मो विअ पहारविवसो समं णिसाअरीणअणिन्दीवरणीरन्धणीरधाराहिं धरणिं गऊ रावणङ्कआरो ‡ ।

त्रिजटा । हा वच्छ कहिं सि देहि मे पडिवअणं भद्द कहेसु कीदिसी उअ णरन्तअवहे देवाणं मुहच्छाआ आसि § ।

सुमुखः । यादृशी प्रतिपक्षपराभवे सति भवति स्वामिनि त्रिजटे कथं कथ्यते देवतापक्षपातः क्षत्रियकुमारे विजेतरि तत्र यद्वा को नाम धर्मविनयिनि जने न स्निह्यति यतः ।

हर्षोदेकं नयनमुशना नेत्रयुग्मानि देवा-
स्त्रीण्यध्यक्षीणि त्रिपुरविजयी पद्मसद्मा ऽष्टदृष्टीः ।
चक्षुःषट्कं द्विगुणगुणितं शार्ङ्गरिदृक्सहस्रं
नीत्वोल्लासं स च सुरपतिर्दृष्टवान् वालिपुत्रम् ॥ ९ ॥

* ततस्ततः ।

† ततस्ततः ।

‡ ततश्च तयोर्निर्भरं प्रवृत्ते समरसंघट्टे चरणेन चरणमास्फाल्य दरनमतो नरान्तकस्य रोमाञ्चनिबिडरत्नाङ्गदेन कन्धराकाण्डबुध्नबन्धे क्षिप्ता छुरिका । उत्थितश्च क्ष्वेडासंक्षोभो वानरबले । जातानि च मुकुलायमानकमलमण्डलच्छायानि रावणवदनानि । वञ्चितनिशाचरलोकलोचनं परस्परदत्तहस्ततालं च प्रहसिता अप्सरसः । खरसमीरणोन्मूलितफुल्लपारिभद्रद्रुम इव प्रहारविवशः समं निशाचरीनयनेन्दीवरनीरन्ध्रनीरधाराभिर्धरणीं गतो रावणाङ्ककारः ।

§ हा वत्स क्वासि देहि मे प्रतिवचनं भद्र कथय कीदृशी पुनर्नरान्तकवधे देवानां मुखच्छायाऽऽसीत् ।

त्रिजटा । तदो तदो अज्जदसकण्ठेण किं पडिवण्णं * ।

सुमुखः । इदमभिहितम् ।

मा भङ्गसङ्गमवयच्छ नरान्तकस्य
जातः पराङ्मुखगतिर्न पुरा सुरेशः ।
तत्सांप्रतं भवतु तत् पुनराजिकर्म
साधारणं यदिह वानरराक्षसानाम् ॥ १० ॥

त्रिजटा । कहं अज्जेण दिण्णो जलञ्जली लज्जादेवीए तदो तदो † ॥

सुमुखः । ततश्च सविभीषणहस्ततालं हसति रामदेवे कुम्भकर्णप्रबोधनाय निकुम्भिलानिर्गतस्य च मेघनादस्य समाह्वानाय शुकसारणौ प्रेष्य लङ्कामेव प्रविष्टो देवः ।

त्रिजटा । ता गच्छह वुत्तन्तरं उअलहिउं अहं वि सीआदेवीए पिअणिवेदिआ भविस्सम् ‡ । इति निष्क्रान्ताः । मिश्रविष्कम्भः ।

ततः प्रविशति सुप्तोत्थितो रावणः । पार्श्वयोर्द्वौ परिचारराक्षसौ प्रतीहारी च ।

प्रतीहारी । स्वगतमहो अवत्थादिरेओ दशकण्ठदेवस्स जेण इमस्सिं एव्व केलिविमाणाहिट्ठाणे रअणट्टालए पओसाहिपच्चूसं जाव रअणीरणं वेक्खिअ वासरसमरसंरम्भदंसणसुअत्तणेण ट्ठिदोवि इसि णिद्दामुद्दिअणअणन्दीवरवणो किंवि किंवि चिन्तअन्तो चिट्ठइ § ।

रावणः । भद्रे वेत्रवति यो यत्र परमभिज्ञः स तेन सुतरामावर्ज्यते यद्विभावरीसमरसंमर्दव्यतिकरेण वयमपि विस्मायिताः । विशेषस्मृतिनाटितकेन ।

प्रेयान् मे दन्तिदन्तप्रवसदसुरयं वल्लभो मे विपक्षं
कुन्तप्रोतोऽपि योऽयं सरति मम रुचिस्ताण्डवी यत्कबन्धः ।
अत्रास्मत्प्रेमबद्धभ्रुकुटिमुखमिदं यस्य लूनेऽपि कण्ठे
स्वःस्त्रीणां नक्तमाजाविति वरवरणे तोषिताः के न वाग्भिः ॥११॥

ऊर्ध्वमवलोक्य किमयमतिसत्वरः सुरजनसमाजः । शङ्के कतिपययातुधानवधात्तापसं प्रति संप्रति प्रीयते । सक्रोधम् ।

हर्षोत्कर्षः किमयममराः क्षुद्ररक्षोवधाद्व-
स्तन्मे दोष्णां विजितजगतां विक्रमं विस्मृताः स्थ ।

* तत आर्य दशकण्ठेन किं प्रतिपन्नम् ।

† आर्य्येण दत्तो जलाञ्जलिर्लज्जादेव्यै । ततस्ततः ।

‡ तद् गच्छतं वृत्तान्तरमुपलब्धुम् । अहमपि सीतादेव्यै प्रियनिवेदिका भविष्यामि ।

§ अहो अवस्यातिरेको दशकण्ठदेवस्य येनास्मिन्नेव केलिविमानाधिष्ठाने रत्नाट्टालके प्रदोषाधिप्रत्यूषं यावत् रजनीरणं प्रेक्ष्य वासरसमरसंरम्भदर्शनोत्सुकत्वेन स्थितो ऽपीषन्निद्रामुद्रितनयनेन्दीवरवना: किमपि किमपि चिन्तयन् तिष्ठति ।

किस्वाद्भेव प्रियरणरसो बोध्यते कुम्भकर्ण-
स्तूर्णं जेता स च दिविषदां बोध्यते मेघनादः ॥१२॥

प्रतीहारी । अवसरसंतोसणिज्जो सामिजणोत्ति चिन्तअन्ता उच्चावचसंचारिणो सुरसंघादा देवं एव्व सेवन्ति * ।

नेपथ्ये । हंहो लङ्काउरीपाआरपालआ अदिक्कन्तजामिणीजुज्झजणिअं बलीमुहवलविद्धंसणं पडिकरेह उत्तम्भेह विहिदुम्मूलणाइं तोरणाइं अगाहीकरेह रिक्खरक्खसवाणरकरङ्कसंछादिअं परिहं समीकरेह विहडिअकंचणसिलालिओ पओलिओ पुण णवीकरेह मन्दुक्किअं कडक्किअं सज्जेह भग्गं पाआरखण्डिममग्गं एअं पि किं ण पेक्खह डालिअं अट्टालिअं विहडिअं अरण्डिआपखण्डं जज्जरिअं जन्तसंताणं णिउंचिआओ कंदणीयाओ ताव परिकरेह खेवणिआइं सज्जह मज्जावसातेल्लाइं आणेध आव ट्टिअपरिक्खेवणिज्जओ आणेह सिज्जरससित्थजदुजादीओ णिअडेह पवेसपज्जोलणिज्जइं खोमसणकप्पासपट्टसुत्तसरतन्तुसंताणाइं विरएह कीलिआकड्ढणपाडणिज्जं गोउरदुवारं ढोएह विविहपहरणसअणाहदसहस्साइं † ।

रावणः । आकर्ण्य विहस्य च अये किमयमलीकः संरम्भो मनुष्यबुद्धिदुर्गं दुर्गं कथयन्ति । ततश्च ।

सति सर्वामरोच्चण्डे मम दोर्दण्डमण्डले ।
शङ्के प्राकारविभ्रंशो लङ्काऽलङ्कारकारणम् ॥ १३ ॥

राक्षसान् प्रति साक्षेपं रेरे कारङ्कक रेरे कङ्कालक विबोधयतं कुम्भकर्णं ज्येष्ठक्षत्रियतापससंरम्भाय ।

उभौ पदान्तरे भवतः ।

कारङ्ककः । जनान्तिकं सखे कङ्कालक देवः कुम्भकर्णं प्रबोधयति न पुनरात्मानं किं च प्रथमप्रबोधितोऽप्यसौ रामेण दीर्घं शाययितव्य एव ।

कङ्कालकः । कण्णे विभीषणं वज्जिअ सव्वस्स एसा गइ ।

कारङ्ककः । तथैव ।

धिक् शौण्डीर्यमदोद्धतं भुजवनं धिक् चन्द्रहासं च ते
धिग्वक्त्राणि निकृत्तकण्ठवलयप्रीतेन्दुमौलीनि च ।

* अवसरसंतोषणीयः स्वामिजन इति चिन्तयन्त उच्चावचसंचारिणः सुरसंघाता देवमेव सेवन्ते ।

† हंहो लङ्कापुरीप्राकारपालका अतिक्रान्तयामिनीयुद्धजनितं बलीमुखबलविध्वंसनं प्रतिकुरुत । उत्तम्भयत विहितोन्मूलनानि । तोरणानि । अगाधीकुरुत ऋक्षराक्षसवानरकरङ्कसंछादितां परिखां । समीकुरुत विघटितकाञ्चनशिलालीः प्रतोलीः । पुनर्नवीकुरुत मन्दीकृतं कपाटकिद्वारं सज्जयत भग्नं प्राकारखण्डीमार्गम् । एतत् किं न पश्यथ । दोलितं अट्टालिकं विघटितं वरण्डिकाप्रखण्डं जर्जरितं यन्त्रसंतानं निकुञ्चिताः काञ्चनिकाः तावत् परिकुरुत क्षेपणीयानि सज्जयत मज्जावसातैलानि आनयतावर्त्तितपरिक्षेपणीयाः सर्जरससिक्थजतुजातीः निकटयत प्रवेशप्रज्वलनीयानि क्षौमशणकार्पासपट्टसूत्रतसरतन्तुसन्तानानि विरचयत कीलिकाकर्षणपातनीयं गोपुरद्वारं वहत विविधप्रहरणशताहतसहस्राणि ।

Digitized by Google

निद्रालावतिघस्मरे प्रतिदिनं स्वापान्महामेदुरे
प्रत्याशा चिरविस्मृतायुधविधौ यत् कुम्भकर्णे स्थिता ॥ १४ ॥

रावणः । सुमुखदुर्मुखौ निकुम्भिलानिर्यायिनः कुमारमेघनादस्य कनिष्ठतापसेन सह समरसंरम्भं निवेदयतं ।

उभौ प्रणम्य यदान्तरे भवतः ।

सुमुखः । जनान्तिकं सखे दुर्मुख किमपि शौर्यातिरेको रामानुजस्य यदमुना निकुम्भिलां प्रति प्रस्थितस्य कुमारमेघनादस्य संदिष्टं यदुत ।

यावन्नैव निकुम्भिलायजनतः सिद्धे हविर्लेहिनि
प्राप्तस्यन्दनचापकाण्डकवचं स्वं मन्यसे दुर्जयम् ।
वैदेहीविरहव्यथाविधुरितेऽप्यार्ये विधाय क्रुधो
वन्ध्यास्तावदयं सशक्रविजयिं त्वां लक्ष्मणो जेष्यति ॥ १५ ॥

दुर्मुखः । तह एव्व किं भणीअदु विराहविद्धंसणस्स कणिट्ठभादा लक्खणो क्खु एसो मिअङ्कमण्डलेण समं जादस्स तत्तो ण परिहीअन्ति गुणा पेऊसस्स * ।

सुमुखः । सवीरगोष्ठीषु पुनरिदमभिहितम् ।

स्मर्तव्यस्मितमाननं विरचितं येनामरीणां रणा-
चित्यं भोगवती कृता निपतितद्वारार्गला येन च ।
धिग्धिग्भीमनिकुम्भिलागुरुगुहागर्तैकसाध्ये स्थितं
तत्संप्रत्यभिचारकर्मणि महावीरस्य शौर्यव्रतम् ॥ १६ ॥

करङ्कः पुरोऽवलोक्य ।

सोऽयं पुरः शयनसद्मनि कुम्भकर्णः
संसेवितस्त्रिदशयामिककामिनीभिः ।
श्वासोत्करं स्वपिति जर्जरकङ्कणौघै-
स्तत्पाणिभिस्ताडति ताडितपादभागः ॥ १७ ॥

कङ्कालकः । सुट्ठु क्खु परिचिदं भणासि णिबिडणिद्दाणन्दट्ठिओ कुमारो कुम्भकण्णो † ।

रावणः । यत्सत्यं भगवतः कमलसंभवाद्गरीयसापि तपसा निद्रानन्दमेव वृतवान् मे वत्सः कुम्भकर्णः ।

सुमुखः । कर्णे ।

यात्यैरावणवारणो रणभुवो भग्ने तरौ डिण्डिमो
यः क्रुष्टश्च कृतश्च सङ्गरविधावाघोषणादुन्दुभिः ।
यस्तस्यैव रवो रयेण विदधद्दिक्पालशून्या दिशः
कामं क्रामति रोदसि स्वयमयं तन्मेघनादः पुरः ॥ १८ ॥

पुनराकर्ण्य ।

* तथैव किं भण्यतां विराधविध्वंसनस्य कनिष्ठभ्राता लक्ष्मणः खल्वेषः । मृगाङ्कमण्डलेन समं जातस्य ततो न परिहीयन्ते गुणाः पीयूषस्य ।

† सुष्ठु खलु परिचितं भणसि निबिडनिद्रानन्दस्थितः कुमारः कुम्भकर्णः ।

यद्वैरवाक्रान्तिकरालकपालपाणि-
फेट्कारडामरतरो निनदानुबन्धः ।
तद्धूनमत्र हनुमान् समराय पत्त्रं
सौमित्रिणा विरचितोऽयमखर्वगर्वः ॥ १९ ॥

दुर्मुखः । हंहो देव कहं तुए संदेहदोलअमधिरोविदाइं मत्तण्डपुलत्थाणं कुलाइं * ।

रावणः ।

वामानि पश्यत समेत्य मुखानि पञ्च
रामं सहास्मदनुजेन रणे चरन्तम् ।
रामानुजं च सह शक्रजिता हसन्ति
हे दक्षिणानि दशकण्ठनियोग एषः ॥ २० ॥

कङ्कालकः । ता कीरउ विबोहविडम्बणाडम्बरो कुमारकुम्भकण्णस्स † ।

करङ्कः कथं पुनर्विबोधयितव्यः ।

कङ्कालकः । समन्तादवलोक्य । अअं अट्ठारहकुलविभेअविहिण्णो सेवासमागओ भुअङ्गमवग्गो ता इमस्सिं केवि गरिट्ठवरिट्ठे समादिस ‡ ।

करङ्कः । साधु सखे साधु महाभोगभोगयष्टिभिः संवेष्ट्य विबोधयितारः खल्वेते किञ्चिदुच्चैः ।

वक्षस्तक्षक ताड्यतां फणशतैस्त्वं वासुके नासिका-
रन्ध्रे हन्धि निषेवतां श्रवणयोः कर्कोटकः कोटरे ।
कालः कालियपन्नगश्च कुरुतां कण्ठे कठोराञ्चनं
लङ्केन्द्रानुज एष येन विहरेत्त्रिद्राणनिद्रारसः ॥ २१ ॥

रावणः । विहस्य किमेभिर्मृणालकोमलकायकाण्डैः प्रचण्डैरपि फणावद्भिर्वत्सस्य क्रियते ।

कङ्कालकः । अमहाभाअजणमणोरहा विअ वंझीभूदा फणिन्दा § ।

दक्षिणतो नेपथ्ये ।

यन्मातामहतो मयात्परिगतं मायारहस्यं मया
तत्सर्वं रचितं गतं विफलतामासाद्य तौ तापसौ ।
यः शिष्येण सता नु चापनिगमो लब्धः पितुस्तोषिता-
दाचार्याद्दशकण्ठतः किमपरं तस्यैव जातः वधः ॥ २२ ॥

रावणः । वत्स किं स्विघसे करुणामयस्य मायामयास्ते केलयो निष्करुणे पुनः कर्मणि वीराणां प्रथमोऽसि ।

* हंहो देव कथं त्वया संदेहदोलकमधिरोपितानि मार्तण्डपुलस्त्ययोः कुलानि ।

† तत् क्रियतां विबोधविडम्बनाडम्बरः कुमारकुम्भकर्णस्य ।

‡ अयमष्टादशकुलविभेदविभिन्नः सेवासमागतो भुजङ्गमवर्गः । तदस्मिन् कानपि गरिष्ठवरिष्ठान् समादिश ।

§ अमहाभागमनोरथा इव वन्ध्यीभूताः फणीन्द्राः ।

दुर्मुखः । देव किलिकिलाइअहणुमन्तमिमाणो सज्जीकिदचण्डकोअण्डमण्डिअ पाणी कणिट्ठतावसो मेहणादस्स पुरदो भविअ वत्तुकामो वट्टइ * ।

वामतः । कङ्कालकः । ता इमस्सिं केलिविमाणरअणट्टालअपेरन्तचरे गिरिन्दसंदोहे दसाणणदेवस्स अण्णा णिवेसीअदु † ।

करङ्कः ।

संवाह्यौ सह्य पादौ तव तुहिनगिरे कर्म मर्मप्रबाधि
विन्ध्याद्रे हन्धि रक्षो वलयतु मलयः पर्वतः सर्वतोऽङ्गम् ।
त्वं नेत्रे पारियात्राचल वलय करौ सज्जतां मन्दराद्रि-
र्निर्निद्रामुद्र एष प्रसरति समरे येन भोः कुम्भकर्णः ॥ २३ ॥

रावणः । विहस्य वत्सस्य कठोरे वपुषि पतितोत्पतिता अतिगरीयांसो गिरयः कन्दुकायन्ते ।

कङ्कालकः । अविद्धे विअ मोत्तिए तन्तुणा अकिअकज्जेण कुमारे बाहिरदो लुट्ठिअं महिहरचक्केण ‡ ।

दक्षिणतो नेपथ्ये ।

मायां मुञ्च गृहाण कौतुकरसं वीरप्रशस्ये रणे
स्वर्नारीजन एष नूतनपतिप्राप्त्या ऽस्तु बद्धोत्सवः ।
मद्बाणाः खरदूषणत्रिशिरसां सैन्योपमर्दोद्यमी
रक्षःशोणितपानलम्पटमुखास्त्वत्तोऽपि वाञ्छन्त्यसृक् ॥ २४ ॥

रावणः । अये कुमारमेघनादोचितवचनदुर्मुखो लक्ष्मणः । तदेनं वत्स एव शिक्षयिता ।

पुनर्नेपथ्ये । सुमित्रापुत्र स्वशस्त्रकथामारभसे कः पुनस्तव शस्त्रग्रहणे ऽधिकारः ।

धीमान्प्रमानयमिति स्तुवता जनेन
न्यासीकृता ननु सनिर्वृति यत्र दाराः ।
तस्यच्छलादपि परापहृतेषु तेषु
कुक्षत्रियप्रहरणानि विडम्बनाय ॥ २५ ॥

सुमुखः । नेपथ्याभिमुखमवलोकितकेन किमाह लक्ष्मणः । रेरे ब्रह्मराक्षस वीरजनमर्यादानभिज्ञोऽसि यदप्रतीकारे कर्मणि प्रहरणानि विडम्बनाय विपरीते पुनर्मण्डनाय ।

रावणः । अहो धृष्टता मानुषस्य यत्कुमारमेघनादेन सह वीरव्रतचर्यायामुक्तिप्रत्युक्तिभिर्भाषिता ।

कङ्कालकः । अन्यतोऽवलोक्य । एदे गुरुगलन्तदाणवारिपक्खालिअगण्डमण्डला गलगुहाकुहरणिरग्गलणिग्गलन्तगुलगुलारवा दिक्करिणो ता इमे समादिस * ।

करङ्कः ।

वप्रक्रियाक्रमकरालकरप्रहार-
पादावमर्दरहसोल्लिखनादि कर्म ।
दिग्दन्तिनः किमपि यद्गुणितं भवद्भि-
स्तत्कुम्भकर्णपरिबोधविधावुपाध्वम् ॥ २६ ॥

रावणः । युक्तमेवैतत् । जङ्गमानि दुर्गाणि दिक्करिणः ।

करङ्कः । देव दृश्यतां द्रष्टव्यम् ।

निस्तन्द्रैर्दिग्द्विपेन्द्रैर्युगपदधिगतैर्बोधनायाधिवक्षः
प्रारब्धे द्वन्द्वयुद्धे प्रचुरमदचयोच्चण्डगण्डैश्चतुर्धा ।
निद्रामुद्रां न मुञ्चत्यपि च घुरघुराघोषगर्भात्कघोणा-
घूत्कारैर्घोरतारैः स्वपिति पिहितदृग्निर्भरं कुम्भकर्णः ॥ २७ ॥

कङ्कालकः । विहस्य तं कदं कुमारकुम्भकण्णे दिक्करिचक्कवालेण जं जम्माबहिरे पञ्चमतरङ्गुग्गारेहिं कीरइ † ।

दक्षिणतो नेपथ्ये रेरे दुर्मुख मुखर लक्ष्मण ।

तं रामं कथयन्ति विक्रमधनं तन्मे मनाक्प्रीतये
तस्मिन् सङ्गरकेलिकर्म यदयं वीरप्रियो रावणिः ।
भ्रातृत्वेन तु तस्य लक्ष्मण कथं धैर्योद्धुरं चेष्टसे
दायादाव्र च रिक्थवत्क्व चन भो शौर्यक्रिया क्रामति ॥ २८ ॥

पुनस्तत्रैव ।

लङ्केश्वरेण यदि शङ्करपादमूले
लूत्वा शिरांसि भुवनाधिपतित्वमाप्तम् ।
तन्मेघनाद यदि किं तव सूर्यभक्त्या
भास्वन्मणिर्ज्वलति किं स्फटिकोपलस्य ॥ २९ ॥

पुनस्तत्रैव रेरे विनोधनकुलपांसन कैरलीसुत लक्ष्मल रणप्रवणं रावणयुवराजं इन्द्रजितमपि मां न जानासि तदेव ज्ञाप्यसे ।

पुनस्तत्रैव रेरे पुलस्त्यकुलकलङ्क सहोढासुत रामचन्द्रानुचरं लक्ष्मणमपि मां न जानासि तदेव ज्ञाप्यसे ।

सुमुखः । देव लङ्काधिपते तदित्थमन्योन्यमाक्षिपद्भ्यां पुलस्त्यककुत्स्थकुलकुमाराभ्याम् ।

उद्बालनीलनलिनानि नभोह्रदस्य
दूताः समित्परिगमाय चमूकटाक्षाः ।

* देव किलिकिलायितहनूमद्धिमानः सज्जीकृतकोदण्डपाणिः कनिष्ठतापसो मेघनादस्य पुरतो भूत्वा वक्तुकामो वर्तते ।

† तदस्मिन् केलिविमानरत्नाट्टालकपर्यन्तचरे गिरीन्द्रसंदोहे दशाननदेवस्याज्ञा निवेश्यताम् ।

‡ अविद्ध इव मौक्तिके तन्तुनाऽकृतकार्येण कुमारे बहिस्तो लुलितं महीधरचक्रेण ।

* एते गुरुगलद्दानवारिप्रक्षालितगण्डमण्डला गलगुहाकुहरनिरर्गलनिर्गलद्गुलुगुलारवा दिक्करिणस्तद्विमान् समादिश ।

† तत् कृतं कुमारकुम्भकर्णे दिक्करिचक्रवालेन यज्जन्मबधिरे पञ्चमतरङ्गोद्गारैः क्रियते ।

आभ्यां परस्परमपि प्रहिताः कृतान्त-
केलीशकुन्तय इमे विशिखाः सहस्रम् ॥ ३० ॥

वामतः । कङ्कालकः । करङ्कअं प्रति ता अण्णा केवि स-
मादिस * ।

करङ्ककः । भवतु रावणावरजविबोधनाय भगवन्तं सप-
रिवारं भर्गमभ्यर्थये । सप्रश्रयम् ।

हेरम्बः कण्ठगर्जं रचयतु मुरजानावृतो हन्तु नन्दी
चण्डी चण्डाट्टहासं किरतु डमरुकं ताडयत्विन्दुमौलिः ।
येनाकाण्डप्रबोधप्रभवगुरुतरक्रोधदीप्तारुणाक्षः
संग्रामग्रामलुण्ठोद्भटभुजपरिघो जायते कुम्भकर्णः ॥ ३१ ॥

रावणः । साधु भोः साधु सुषुप्तस्यापि महाचिनदः प्र-
तिबोधहेतुः किं पुनर्विबोधोपचारा वत्से सावित्रे महसीव
सर्वतेजांसि प्रलीयन्ते ।

कङ्कालकः । स्वगतम् । विबोहीअइ कुमारो जइ सलिले
सिलाहिं उत्तरीअइ अलाबूहिं वा णिमज्जीयइ † ।

दक्षिणतो दुर्मुखः । देव लङ्कापरमेसर कुमारमेहणाअं
लक्खणं अ अणुवदन्ताणं रक्खसवाणरबलाणं भीसणभीसणं
वट्टइ ‡ ।

सुमुखः । देव सुभीषणमेव वर्त्तते । पश्य ।

युद्धोर्वीष्वद्र्धमग्नैः कुवलयसरसां सूचिता पत्त्रिभिः श्री-
र्नाराचैः पाशबन्धागतभुजगभयं लम्भिता वानरेन्द्राः ।
भल्लैस्तिर्यक्पतद्भिश्चलिचिमचर्यिनो दर्शिताः सादिमार्गाः
प्राप्ताश्च द्राक् क्षुरप्रैर्वियति नखतुला वीरवक्त्राब्जलावैः ॥ ३२ ॥

दुर्मुखः । देव पेक्ख ।

कोअण्डचक्ककरवालकिवाणधेसु
मल्लत्तणक्कमणिवेसिदसङ्करेसु ।
वीरेसु पेक्ख णिवडन्ति समं पहारा
वेएणा दिव्वतरुणीणअफुल्लमाला § ॥ ३३ ॥

वामतः । कङ्कालकः । सविषादं कहं पुण एअं भविस्सदि || ।

करङ्ककः ।

हे कामिन्यः कनककलशीपीवराभ्यां स्तनाभ्यां
गाढाश्लिष्टं रचयत लसद्दोर्लताः कुम्भकर्णम् ।

---

* तदन्यान्कानपि समादिश ।

† विबोध्यते कुमारो यदि सलिले शिलाभिरुत्तीर्यतेऽलाबूभिर्वा नि-
मज्ज्यते ।

‡ देव लङ्कापरमेश्वर कुमारमेघनादं लक्ष्मणं चानुवर्तमानानां राक्ष-
सवानरबलानां भीषणभीषणं वर्तते ।

§ देव पश्य ।
कोदण्डचक्रकरवालकृपाणधेषु
मल्लत्वक्रमनिवेशितसङ्गरेषु ।
वीरेषु पश्य निपतन्ति समं प्रहारा
वेगेन दिव्यतरुणीनवफुल्लमाला ॥

|| कथं पुनरेतद् भविष्यति ।

कामक्रीडानिबिडरचितः सेवितः स्वर्वधूभि-
र्जायेतायं त्रिभुवनजयी येन निद्रादरिद्रः ॥ ३४ ॥

रावणः । विलोक्य सहर्षं कथं विबुद्धो मे वत्सः ।

करङ्ककः । विबुद्धः कुम्भकर्णो यातश्च तापसाभ्यर्णम् ।

दुर्मुखः ।

एक्केहिं चण्डखग्गावहणविहडिदुट्टङ्कसीसावमुक्के
हुंकारे रोसहेलावलिअभडचमूलोअणिब्भच्छिएहिम् ।
अण्णेहिं दिव्वणारीणिबिडभुअलयाबद्धकण्ठेहिं देहिं
देहेहिं पेक्ख जाआ समरमरणिणो तक्खणं वीरलक्खा * ॥ ३५ ॥

करङ्ककः । वामतो नेपथ्याभिमुखमवलोक्य विबुद्धः कुम्भ-
कर्णः परिजनादुपलब्धवृत्तान्तः किमाह ।

सूते नान्या जगति जननी तादृशं पुत्ररत्नं
रामो यादृग्लवणजलधेः सेतुसीमन्तकारः ।
शङ्के शङ्कां वहति च ततो राक्षसेन्द्रोऽप्यकाण्डे
निद्राभङ्गः कथमितरथा कारितः किङ्करैर्मे ॥ ३६ ॥

विचिन्त्य । तदश्रुतमेवैतत् प्रकृतिरोषणेन रावणेन वचनमा-
स्तां मा कदा चन विभीषणवृत्तान्तः स्यात् । प्रकाशम् । किमाह
कुम्भकर्णः ।

आस्तां धनुः किमपि नापरतो भुशुण्डी-
चक्रैरलं भवतु पट्टिशमुद्गरौघैः ।
धावत्प्लवङ्गपृतनाकवलक्रमेण
प्राप्स्याम्यहं सुहितता च रिपुक्षयं च ॥ ३७ ॥

रावणः । साधु वत्स साधु सत्यं मदनुजोऽसि ।

दुर्मुखः । देव उप्पडिओ कुमारमेहणादस्स रहो † ।

सुमुखः ।

निश्चक्रचीत्कृतिरलब्धमहीतलत्वात्
तूर्णाम्बुदोदरपयोमयगर्भसारः ।
धूस्तुण्डघट्टनविवर्त्तितचक्रलक्षः
पुत्रस्य ते गगनमुत्पतितो रथोऽयम् ॥ ३८ ॥

दुर्मुखः । पभञ्जणणन्दणोवि वाणरिन्दो अणुप्पडिओ मे-
हणादस्स रहवरं ‡ ।

सुमुखः ।

मेघोदरद्रुतपरिप्लुतमोचिताम्भाः
संस्तभ्यसप्ततुरगानरुणेन दृष्टः ।

---

* एकैश्चण्डखड्गापतनविघटितोट्टङ्कशीर्षावमुक्ते
हुङ्कारे रोषहेलावलितभटचमूलोकनिर्भर्त्सितैः ।
अन्यैर्दिव्यनारीनिबिडभुजलताबद्धकण्ठैर्द्वयैः
देहैः पश्य जाताः समरमरणिनस्तत्क्षणं वीरलक्षाः ।

† देव उत्पतितः कुमारमेघनादस्य रथः ।

‡ प्रभञ्जननन्दनोऽपि वानरेन्द्रोऽनूत्पतितो मेघनादस्य रथवरम् ।

Digitized by Google

वैमानिकैः स्तुत इतः क्षणमुक्तमार्गः
सौमित्रिणा सह समुत्पतितो हनूमान् ॥ ३९ ॥

वामतः करङ्कः ।

दिग्मातङ्गैः कमठपतिना भोगिभर्त्रा च शङ्के
कृत्वा बद्धां कथमपि धृता दूरतन्वी धरित्री ।
स्वप्राग्भागस्थगितगगने कुम्भकर्णे विनिर्या-
त्युच्चैर्नीतो दिनमणिरथस्त्रस्यता वारणेन ॥ ४० ॥

नेपथ्ये । कः कोऽत्र भोः विज्ञाप्यतां देवो दशकण्ठस्तदिदं तवानुजः प्रतिजानीते ।

सीताप्रियं च दलितेश्वरकार्मुकं च
वालिद्रुहं च रचिताम्बुधिबन्धनं च ।
रक्षोहणं च विजिगीषुविभीषणं च
रामं निहत्य चरणौ तव वन्दिताहे ॥ ४१ ॥

रावणः । साधु वत्स कुम्भकर्ण साधु कथमन्यथा समरसीमनि रावणस्त्वत्प्रवणः ।

दक्षिणतो नेपथ्ये । सुमुखः । देव दृश्यतां क्षत्रियतापसव्यवसायः ।

पौलोमीकुचसिचयं हठेन हृत्वा
यः क्लृप्तो नृहरिसटौघचामराङ्कः ।
त्वत्सूनोः शिखिरथकेतने च तस्मिन्
सौमित्रेः सपदि पतन्ति बाणदण्डाः ॥ ४२ ॥

पुनरवलोक्य । साधु भोः कुमारमेघनाद साधु साधु संक्रान्तकार्मुकोपनिषदाचार्याद्दशकण्ठतोऽसि ।
देव पुलस्त्यनन्दन ।

यन्मङ्गले स्नपितमञ्जनयाऽऽर्द्रनेत्र्या
यन्मारुतश्च परिचुम्बति कौतुकेन ।
न्यस्तः शरः शिरसि तत्र हनूमतोऽस्य
पुत्रेण ते रभसलङ्घितसागरस्य ॥ ४३ ॥

रावणः । तर्हि प्रतिकृतो लङ्कादाहपरिभवः कुमाराक्षवधपरिभवश्च वत्समेघनादेन ।

सुमुखः ।

यावूर्मिलापतिरयं च तवात्मजश्च
बाणोत्करान् विकिरतो रचितान्धकारान् ।
तेऽन्योन्यखण्डनवशाद्विफलीभवन्ति
रत्युत्सवे बधिरयोरिव कण्ठनादाः ॥ ४४ ॥

वामतः कङ्कालकः । किं पुण एस विडम्बिअहेरम्बगलगुञ्जारवो विणिज्जिदसङ्करकरप्फालिअगड्डुमरडमरुअकोलाहलो कुण्ठिअवेउण्ठसूअरघोरघुक्कारप्पसरो णिउञ्जिअणरसिंहमुक्कपुक्कलबुक्कारवइअरो असेससद्दसंमद्दो सुणीअदि * ।

करङ्कः । कर्णौ पिधाय देव यथाऽभिहितं कङ्कालकेन ।

कुर्वन्नुत्कर्णतालान् दिशिदिशि करिणो धौर्जटीनां जटानां
बन्धाहिग्रन्थिमुद्रां सपदि शिथिलयन् खण्डितोपेन्द्रनिद्रः ।
कुन्दानो नन्दिवाक्यं मुरजमुखरतं भग्नविश्वप्रमोदो
रोदोरन्ध्रं निरुद्धं प्रसरति किमिदं निष्ठुरज्यानिनादः ॥ ४५ ॥

रावणः । जाने वत्सस्य साम्मुख्यं भजता ज्याबन्धबन्धुरितं धनुरास्फालितं ज्येष्ठतापसेन ।

दक्षिणतो नेपथ्ये । सुमुखः । गगनाङ्गणचारिणोरुभयोरपि सायकैर्विचित्रमाचेष्टितं तथाहि ।

अमी पुरो ऽभ्राणि विभिद्य पत्रिणः
प्रयान्ति धारासलिलैः सह क्षितिम् ।
वहन्त्यथैतानि च पश्य विश्वतः
पृषत्करन्ध्रैः स्थितयोरनुक्रियाम् ॥ ४६ ॥

अपि च । अत्रान्तरिक्षकुक्षौ निरन्तरे शरव्यतिकरे ।

अन्तर्धाय परिक्रमन्ति सभियः सिद्धाः प्रसिद्धा अमी
नात्यर्थं च सुधाभुजो वयमिति त्रस्यन्ति नाकौकसः ।
दारानन्तरयद्भिरात्मवपुषा नष्टं च विद्याधरै-
रभ्यस्यन्ति च काण्डवारणकरां विद्यां गणश्रेणयः ॥ ४७ ॥

वामतः कङ्कालकः । कहं परिअणसमप्पिअं प्पहरणसंदोहमवमण्णिअ पसरिओ कुम्भअण्णो † ।

करङ्कः । किमाह कुम्भकर्णः । आस्तां धनुरित्यादि पठति ।

रावणः । साधु वत्स साधु सत्यं मदनुजोसि तदुद्धृतं रावणहृदयशल्यम् ।

दुर्मुखः । हाहा किं एअं वट्टइ जदो सव्वदो सदसहस्सलक्खसंखा पज्जलन्ति हुयवहा जहं अ अञ्जणगिरिकुडविअडो पसरइ धूमुप्पीडो मेरुसिहरदीहरसिहाघट्टा विसट्टन्ति जालाओ सञ्झारविमण्डलपज्जलङ्गा विप्फुरन्ति फुलिङ्गा ‡ ।

रावणः ।

अनेन लङ्का यदकारि मत्पुरी
हनूमता गात्रगतेन भस्मसात् ।

---

* किं पुनरेष विडम्बितहेरम्बगलगुञ्जारवो विनिर्जितशङ्करकरास्फालितोड्डामरडमरुककोलाहलः कुण्ठितवैकुण्ठसूकरघोरघूत्कारप्रसरो निकुञ्जितनरसिंहमुक्तपुष्कलबुक्कारव्यतिकरोऽशेषशब्दसंमर्दः श्रूयते ।

† कथं परिजनसमर्पितं प्रहरणसंदोहमवमत्य प्रसृतः कुम्भकर्णः ।

‡ हाहा किमेतद् वर्तते । यतः सर्वतः शतसहस्रलक्षसंख्याः प्रज्वलन्ति हुतवहा यथ। चाञ्जनगिरिकूटविकटः प्रसरति धूमोत्पीडो मेरुशिखरदीर्घशिखासंघा विसरन्ति ज्वालाः संध्यारविमण्डलप्रज्वलाङ्गा विस्फुरन्ति स्फुलिङ्गाः ।

Digitized by Google

निजापराधप्रशमाय नद्ध ध्रुवं
निषेवितुं मामयमेति पावकः ॥ ४८ ॥

सुमुखः । देव पद्मातिलकस्तु सुमुखो ऽभिमन्यते लक्ष्मणादिधक्षया कुमारमेघनादेन प्रहितमाग्नेयमस्त्रं तत एष भुवनाप्लोषः । अङ्गुल्या निर्दिशन् ।

सद्यः सिञ्चति विष्टराम्बुजमयं देवः श्रुतीनां कविस्तारान्तःपुरवानुपैति गगनाच्चन्द्रो जलार्द्रावृतः ।
गङ्गा च द्युमणेः सुता च सरितावन्योन्यमाश्लिष्यतः
किंचास्नानलडम्बरे करिमुखः क्षीराब्धिमाधावति॥४९॥

अपिच ।

दुग्धाब्धेः क्वथनाविलं तत इतो धत्ते पयः पिण्डतां
शैलेन्द्रः प्रविलीनकृत्स्नतुहिनः पाषाणशेषः स्थितः ।
सान्द्राभिः करकाश्मवृष्टिभिरमी गर्भं क्षरन्त्यम्बुदाः
प्लोषार्तिं च समश्नुते रविरपि स्वाहापतेः पत्रिभिः ॥ ५० ॥

वामतः कङ्कालकः । देव पेक्ख दाव दावसभुवदण्डकोअण्डप्फालणाणन्तरं परिहरिअ पहरणाइं रहसुम्मूलिदतमालमालं सहत्थब्भामिदपहरणसज्जसज्जं समुहागदहिन्तालतालं दूरुल्लासिदकुसुमपाडलपाडलं गअणन्दोलिदविसालसालं रहसुच्छलिदपडन्तकेसरकेसरं गहिदसव्वङ्गसरलसरलं लोलिदकुसुमसंदणसंदणं पअट्टिअरिद्ध सव्वंसव्वंसं पअण्डकरकलिदपलासपलासं करजुअलबन्धरअवसपडन्तपीपलपीपलं णिसग्गकठिणकक्करकक्करं णहप्पहारुक्खाअपत्थरपत्थरं पहरणीकदपडन्तगण्डगण्डसेलं सम्मुहोच्छलिदं प्पहारप्पबलं वाणरबलम् * ।

रावणः । का पुनरमीभिर्गणना शलभायन्ते कुम्भकर्णे वानरबलानि ।

दक्षिणतो दुर्मुखः । किं पुण एदं दसदिसापसरिदचउस्समुद्दं विअ जलअन्ताअन्तगिरिन्दसंदोहं विअ सलिलीभूदगअणवलअं विअ वारिसिट्ठिमेत्तपअट्टप्पआवदवावारं विअ भुवणाभन्तरं वट्टदि † ।

सुमुखः । एवमेवैतत् ।

* देव प्रेक्षस्व तावत् तापसभुजदण्डकोदण्डास्फालनानन्तरं परिहृत्य प्रहरणानि रभसोन्मूलिततमालमालं स्वहस्तभ्रामितप्रहरणसज्जसर्जं संमुखागतहिन्तालतालं दूरोल्लासितकुसुमपाटलपाटलं गगनान्दोलितविशालशालं रभसोच्छलितपतत्केसरकेसरं गृहीतसर्वाङ्गसरलसरलं लोलितकुसुमस्यन्दनस्यन्दनं प्रयत्नोद्धृतसर्वांशवंशं प्रचण्डकरकलितपलाशपलाशं करयुगलबन्धरयवशपतत्पिप्पलपिप्पलं निसर्गकठिनकर्करकर्करं नखप्रहारोत्खातप्रस्तरप्रस्तरं प्रहरणीकृतपतद्गण्डगण्डशैलं संमुखोच्छलितं प्रहारप्रबलं वानरबलम् ।

† किं पुनरेतद् दशदिशाप्रसृतचतुःसमुद्रमिव ज्वलयन्त्रायमाणगिरीन्द्रसंदोहमिव सलिलीभूतगगनवलयमिव वारिसृष्टिमात्रप्रवृत्तप्रजापतिव्यापारमिव भुवनाभ्यन्तरं वर्तते ।

न्यस्यत्क्रान्तिं हुतवह इव स्वर्गपद्माकराणां
ज्वालाधौतान्यपि विशदयन्नग्निशौचांशुकानि ।
रिक्ताभाणां भरणकरणं स्थान एव स्थितानां
किं नामायं प्लवयति पुरो रोदसी वारिपूरः ॥ ५१ ॥

रावणः । विचिन्त्य सेयमनभ्रवृष्टिः । विमृश्य भवतु ज्ञातम् ।

लक्षीकरोमि वरुणं न शरावलीनां
वार्यन्तरां व्रणशतैर्यदयं बिभर्ति ।
मोक्तुर्महाकरुणयेत्युपकारिणो मे
सीतावियोगदवथुं स हि मार्ष्टि तृष्णा ॥ ५२ ॥

सुमुखः । अहं पुनर्जाने चैत्रभानवमस्त्रमवजेतुं वारुणबाणप्रवणो लक्ष्मणः ।

कङ्कालकः । अध तत्थ केवि कइणो कुम्भअण्णस्स चण्डिलणहसिहरेहिं खण्डिदकम्मा वराहा विअ पाएसु पडन्ति उपणिमन्तिणोव्व जङ्घासु लग्गन्ति पुरिसकडिलग्गपडव्व ऊरूसु मव्वन्ति अस्सवारकरवालव्व णिअम्बबिम्बे दोलन्ति सुअणव्व मज्झत्था होन्ति विहुरकुडुम्बव्व पासेसु चिट्ठन्ति तरुणीथणव्व वच्छत्थले वित्थरन्ति वेणिदण्डव्व पुट्ठट्ठाणे घोलन्ति चिरमिलिअबन्धवव्व कण्ठे लग्गन्ति कवोलगलिअजलबिन्दुव्व चिवुअग्गे ललन्ति चुम्बणरसिअव्व अहरं पीडअन्ति सुरहिपरिमलव्व जहिच्छं णासाविवरेसु सञ्चरन्ति सुहासिअव्व कण्णेसु प्पविसन्ति सिविणअव्व अच्छीसु लम्बन्ति प्पट्ठाणतिलअव्व भाले विप्फुरन्ति णीचव्व समालम्बिदा सीसे समारुहन्ति भुअंङ्गाव्व केसगाहे अहिरमन्ति * ।

रावणः । अथ प्लवङ्गयूथपतिषु किं कुरुते कुम्भकर्णः ।

कङ्कालकः । तदो तेण ताणं मज्झे केवि हदा पादेहिं कुप्परिदा कुप्परपहारेहिं कीलिदा कीलेहिं सक्करीकदा करसंपुडुप्पीडणेण अप्फालिदा तलप्फालेहिं चप्पडिदा चवेडाहिं णिव्वाविदा मुट्ठीहिं वधिदा अ चलणेहि † ।

कङ्कालकः । एवमेवैतत् ।

* अथ तत्र केऽपि कपयः कुम्भकर्णस्य चण्डिलनखशिखरैः खण्डितकर्म वराहा इव पादयोः पतन्ति उपनिमन्त्रिता इव जङ्घासु लगन्ति पुरुषकटिलग्नपटा इवोर्वोर्मज्जन्ति अश्ववारकरवाला इव नितम्बबिम्बे दोलन्ति सुजना इव मध्यस्था भवन्ति विधुरकुटुम्बा इव पार्श्वयोस्तिष्ठन्ति तरुणीस्तना इव वक्षस्थले विस्तरन्ति वेणीदण्डा इव पृष्ठस्थाने घूर्णन्ति चिरमिलितबन्धव इव कण्ठे लगन्ति कपोलगलितजलबिन्दव इव चुबुकाग्रे ललन्ति चुम्बनरसिका इवाधरं पीडयन्ति सुरभिपरिमला इव यथेच्छं नासाविवरयोः संचरन्ति सुभाषितमिव कर्णयोः प्रविशन्ति स्वप्ना इवाक्ष्णोर्लम्बन्ते प्रस्थानतिलका इव भाले विस्फुरन्ति नीचा इव समालम्बिताः शीर्षे समारोहन्ति भुजङ्गा इव केशग्रहे ऽभिरमन्ते ।

† ततस्तेन तेषां मध्ये केऽपि हताः पद्भ्यां कूर्परिताः कूर्परप्रहारैः कीलिताः कीलैः शर्करीकृताः करसंपुटोत्पीडनैरास्फालितास्तलास्फालैश्चपिटीकृताश्चपेटाभिर्निर्वापिता मुष्टीभिर्व्यथिताश्च चरणाभ्याम् ।

मुष्ट्या पिनष्टि सुदृढैश्च तलैस्तृणोति
पद्भ्यां निशुम्भति करेण च हन्त हन्ति ।
तूर्णं च कर्णमतिकुप्यति कूर्परोभ्या-
मस्थायितावयव एष तवानुजन्मा ॥ ५३ ॥

सुमुखः । जलपीडापगममभिनीय देव दिष्ट्या युगपत्स्वपरबलविनाशशङ्कितेन सौमित्रिणा संहृतं वारुणमस्त्रं तथाहि ।

ज्वालापल्लविता भवत्यतितरां नाग्नाय्यं पावकः
संवृत्तो रणरेणुधूसरवपुः स्नात्वा रविर्भास्वरम् ।
शान्तः स्थाणुविलोचने च विषमच्छात्कारनादो महान्
प्रक्षाल्याम्बरमुर्वरां च विरते दिव्यास्त्रजे वारिणि ॥ ५४॥

वामतः करङ्कः ।

नासारन्ध्रनिरोधतः श्रवणयोश्छिद्रद्वयाच्छादना-
च्चक्षुःसंपुटघट्टनान्मुखमहाव्यादानसंकोचनात् ।
दोर्मूलद्वयपीडनाच्च कुरुते क्रुद्धस्तवात्रानुजो
दिङ्नातङ्गपराक्रमानपि कपीन् हाहारवस्यास्पदम् ॥५५॥

अपि च लङ्कापते पैालस्त्य ।

धुतानां भवतो भ्रात्रा कपीनां तनुकम्पनः ।
रोमावलम्बनभ्रष्टा विनष्टाः पञ्च कोटयः ॥ ५६ ॥

दक्षिणतो दुर्मुखः सत्रासं । किं पुण बहलतेल्लकल्लविदकज्जलविल्लिदं विअ तरुणताविच्छरिच्छोलिच्छरणं विअ ससलिलजलअजालमालिदं विअ सिदिकण्ठकण्ठप्पहापिहिदं विअ अवणुरणारात्रणकन्तिसव्वस्सं विअ जममहिसविसाणेहिं क्खिण्णं विअ हेरम्बदाणकद्दमकरम्बिअं विअ भुवणङ्गणं वट्टदि * ।

रावणः । ननु क्व पुनस्तमस्काण्डैकचण्डो मार्तण्डो वर्तते । विचिन्त्य विहस्य च ।

अराममपलक्ष्मणं भुवनमद्य निर्वानरं
विधाय शरवीथिभिर्नियतमिन्द्रजिद्रोषितः ।
जिघांस्यति स मां गुरुं रघुभुवामितीव क्वचि-
द्भिया दिनकरे गते त्रिजगदेतदन्धं स्थितम् ॥ ५७ ॥

भूयो विहस्य तदहो दिनकरः क्व न दृश्यते वत्समेघनादस्य ।

दक्षिणतः सुमुखः । देव पदातिलवस्तु सुमुखो मन्यते । रणाङ्गणचारिणो वैरिणोऽन्धीकरणकारणतामिस्रमस्त्रमवतारितं युवराजेन्द्रजिता यतः ।

चक्रद्वन्द्वैर्विरहकलनाकातरैर्दीनदृष्टो
दत्तोत्सुक्यः कुवलयदृशां साभिसारव्रतानाम् ।
दृग्दोर्बल्यं विदधदधिकं हस्तहार्यान्धकारो
राजावर्तद्युतिविरचितां क्ष्मां च खं चातनोति ॥ ५८ ॥

वामतः कङ्कालकः । तथा च दृढदहिज्जन्तकलेवरं जज्जरिज्जन्तमवलोइअ पवङ्गवग्गं पधाविदो समं दलिदञ्जणणीलेण णीलेण रहसुग्गीवो सुग्गीवो किदा अ सरलीकदभुअदण्डमण्डले सुवेलसेलमूलादो उप्पाडिअ णिज्झरजम्बालपिच्छिला सिला * ।

करङ्कः । यथाऽभिहितं कङ्कालेन ।

अन्धीनितम्बफलकस्य नरोत्तमानां
वक्षःस्थलस्य च दधत्युपमानमुद्राम् ।
भ्रातुस्तवात्र हृदि साहसकेलितल्पे
प्रक्षिप्यते हरिनरेण शिलेयमुर्वी ॥ ५९ ॥

रावणः । विहस्य तदिदं मृणालकाण्डेन गण्डशैलताडनम् ।

करङ्कः । कथं क्षिप्तैव । रावणमुद्दिश्य ।

संग्रामभीषणविभीषणपूर्वजस्य
मुष्ट्या दृढं शकलिताश्म तथा शिलेयम् ।
खण्डं यथा पतति मेदुरमुर्वरायां
दृष्टं तदम्बुजपरागकणप्रमाणम् ॥ ६० ॥

रावणः । विहस्य त एवं वर्णयन्ते येभ्यः कुप्यति कुमारकुम्भकर्णः ।

दक्षिणतो दुर्मुखः । अच्छरिअं किं पुण एदे णासन्तणीरन्धन्धआरा प्फुरन्तससिकन्तमणिणो विसट्टन्तकन्दोट्टवलआ संप्फुडिदपुण्डरीकुसुमा सरसाअमाणपाणगोट्ठिणो णिट्टविज्जन्तमाणंसिणीमाणा निसिज्जन्तवम्महसिलीमुहा भमन्तमअणुमत्तकामिणीसत्था दिउणरोवाविदविरहिणीणअणा तिउणहरिसाविदवल्लहसङ्गदङ्गणा चउग्गुणपच्छाविदपरिहरिअपिअप्पसाअणप्पणामा पञ्चउणपअदाविदसुरअमोहिदमिहुणा अ समन्तदो मिअङ्का वट्टन्ति † ।

रावणः । सोल्लासमाकाशे । भोः सेवाविदग्ध सुधादीधिते जानासि लङ्केश्वरमाराधयितुम् ।

सदा दिगन्तस्थितसान्द्रचन्द्रिकाः
सुखाय नक्तञ्चरचक्रवर्तिनः ।

* किं पुनर्बहलतैलमिश्रितकज्जलविलिप्तमिव तरुणतापिच्छकान्तिकर्बुरमिव ससलिलजलदजालमालितमिव शितिकण्ठकण्ठप्रभापिहितमिवावनुनारायणकान्तिसर्वस्वमिव यममहिषविषाणाभ्यां क्षुण्णमिव हेरम्बदानकर्दमकरम्बितमिव भुवनाङ्गणं वर्तते ।

* तथा च दृढदह्यमानकलेवरं जर्जरितमवलोक्य प्लवङ्गवर्गं प्रधावितः समं दलिताञ्जननीलेन नीलेन रभसोद्ग्रीवः सुग्रीवः कृता च सरलीकृतभुजदण्डमण्डले सुवेलशैलमूलादुत्पाट्य निर्झरजम्बालपिच्छिला शिला ।

† आश्चर्यं किं पुनरेते नाशितनीरन्ध्रान्धकाराः स्फुरच्छशिकान्तमणयो विकसत्कमलवलयाः संस्फुटितकमलिनीकुसुमाः सरसायमानपानगोष्ठयो निस्तापितमनस्विनीमाना निषिध्यमानमन्मथशिलीमुखा भ्रमन्मदनोन्मत्तकामिनीसार्था द्विगुणरोदितविरहिणीनयनाः त्रिगुणहर्षितवल्लभसंगताङ्गनाश्चतुर्गुणप्रच्छादितपरिहृतप्रियप्रसादनप्रणामाः पञ्चगुणप्रकटितसुरतमोहितमिथुनाश्च समन्ततो मृगाङ्का वर्तन्ते ।

इति स्थितोऽयं बहुभिः स्वमूर्तिभि-
र्दिवाऽपि मां शीतरुचिर्निषेवितुम् ॥ ६१ ॥

सुमुखः । देव चिन्तयामि तामिस्रमस्त्रं तिरयितुं चान्द्र-मस्त्रमायुधमाहूतं सुमित्रापुत्रेण यतः ।

कन्दर्पस्य प्रथमसुहृदः शोषयन्तोऽम्बुराशीन्
शेफालीनां धुतसुमनसो लीढभासश्चकोरैः ।
निर्यान्त्येते त्रिशिखमुखतः पश्य राकामृगाङ्काः
पङ्कश्यामं तिमिरशिबिरं दूरमुत्सारयन्तः ॥ ६२ ॥

करङ्कः । देव शिलोद्धूलनवेलत्ये ।

उद्धूल्लितोरगजनोज्झितचन्दनेन
कर्पूरपादपसरद्रसनिर्भरेण ।
खण्डेन देव मलयस्य वलीमुखेन्द्रो
हेलोद्धृतेन निजिघांसति कुम्भकर्णम् ॥ ६३ ॥

रावणः । अहो मर्कटकीटस्याध्यवसायः ।

दक्षिणतो दुर्मुखः । रक्खसेसर पेक्ख णिअमहणसंकासकुडन्तबिम्बचन्दरविणो बहुराहुदंसणचमक्कन्तकामिणीदिण्णविसण्णच्छिविच्छोहभग्गपल्लत्थङ्गुलीकिसलअममुप्पोसिदा अप्पसरणावअणरन्तीसूइदा चमक्किदचन्दंतेउरविच्छरन्तविविहवहुबप्पघोसा भुअणुद्देसा दीसंति * ।

रावणः । सविमर्शम् ।

ममासुरस्य त्रिदशाः परं द्विषो
विबाधयिष्ये दशकन्धरेण तान् ।
इहेति मां राहुरयं सबान्धवो
रणेऽद्य पूर्वोपचिकीर्षुरागतः ॥ ६४ ॥

आकाशे । स्वर्भानो मा भैषीः शरणार्थिनामभयकारणं रावणः ।

सुमुखः । शङ्के श्वेतांशवमायुधं बाधितुं राहवीयमस्त्रमिदमुदीरितं देवयुवराजेन यतः ।

रयचलितविमानैः स्वर्गिभिर्मुक्तमार्गा
ग्रहचरितविदां च व्यञ्जितातङ्कमुद्राः ।
ग्रहणशतसहस्रोल्लासनासूत्रधाराः
प्रतिशशि शितदंष्ट्रा राहवः संपतन्ति ॥ ६५ ॥

वामतः करङ्कः ।

अचालरं त्वदनुजेन धनुर्विधूय
संधानकर्मणि कृतश्च समीरणास्त्रः ।

सार्धं महीध्रशकलेन सुवेलमूला-
द्दूरं निधौ निपतितः कपिचक्रवर्ती ॥ ६६ ॥

रावणः । सहर्षक्रोधं तर्हि सलिलेन्धने वडवाग्नावाहुतीभूतः ।

करङ्कः ।

यावच्च पाणिमपि संवृणुते ऽनुजस्ते
यावच्च शाम्यति च धिक्करणं सुराणाम् ।
तावद्वियोऽम्बुदधेः प्रथमः कपीना-
मस्य स्थितस्तडिति ताडितदोः पुरस्तात् ॥ ६७ ॥

रावणः । स्वगतम् । वेगवत्तया वालिनमप्यतिशेते । विचिन्त्य प्रकाशम् । प्रतिप्रधानैव वानरजातिः ।

दक्षिणतो दुर्मुखः । लङ्कापरमेसर पेक्खपेक्ख कोत्थुहमणिणिवेसलंच्छिदवच्छत्थलवणमालाप्पालम्बचुम्बणागददिव्वमहुअरमञ्जुगञ्जारवविकिण्णकण्णा गरुडप्पहापुञ्जपिञ्जरिदरोदसीगब्भवित्थारा णिज्जिददलिदिन्दीवरदामकन्तिणो चाकण्णाकड्ढिअसारङ्गधारिणो मुरारिणो संचरन्ति * ।

रावणः । ससंभ्रमम् ।

अयं हि सेतुरचितार्द्रमानसो
न वक्षसो मे कमलां हरिष्यति ।
इति स्वशक्त्या कृतमूर्तिविस्तरै-
रजोऽपि मां रञ्जयितुं समागतः ॥ ६८ ॥

आकाशे हंहो नारायण न प्रणतदारापहारी दशकण्ठः ।

सुमुखः । देव संभावयामि सैंहिकेयहेतिविहतये वैष्णवं प्रहरणमिदं विस्तारितं लक्ष्मणेन यतः ।

लक्ष्मीकण्ठग्रहणरसिकाः संचरत्पाञ्चजन्य-
ध्वानश्रेणीभरितककुभो दोर्भिरुच्चैश्चतुर्भिः ।
क्रामन्त्यन्तर्भुवनभवनं विष्णवो जिष्णवोऽमी
श्यामाश्चक्रग्रहणनमद्राहुसंहारकाराः ॥ ६९ ॥

वामतः कङ्कालकः । पुरो भूदेव मग्गवत्तिणा वाअरवीरेण तक्खणसज्जिज्जंतकुम्भअण्णबाणासणमक्खिविअ खित्तं धरणिपिट्ठे रोसभरविब्भत्तमज्जिट्ठाए दिट्ठीए दट्ठूण देवकण्णिट्ठेण मुक्का चक्कावली पसदिदा पट्ठिसा पेसिदा हंसिदमारणवेसट्टी भुसुण्डी खित्ता णीसङ्कं सङ्कुमाला आक्खित्तं मोग्गरोक्खित्तं उप्फोडिदपुलअफारपञ्चक्कमेण कम्पाविदो कण्णालग्गो खग्गो वाणरचक्कवट्टिणा वि परिहरिअ उहकडुप्पेण खित्तो भुजङ्गमबहिअ अप्फोडिदो भुअदण्डो किलिकिलिदं अ सहुमंदोहभरिअभुव-

---

* राक्षसेश्वर प्रेक्षस्व निजग्रहणशङ्कासङ्कुचद्बिम्बचन्द्ररवयो बहुराहुदर्शनचमत्कृतकामिनीदत्तविषण्णाक्षिविक्षोभभग्नपर्यस्ताङ्गुलीकिसलयसमुत्पोषिता अप्रसरणावचनरात्रिसूचिताश्चमत्कृतचन्द्रान्तःपुरविस्तारद्विविधबहुशङ्खघोषा भुवनोद्देशा दृश्यन्ते ।

* लंकापरमेश्वर प्रेक्षस्वप्रेक्षस्व कौस्तुभमणिनिवेशलाञ्छितवक्षःस्थलवनमालाप्रालम्बचुम्बनागतदिव्यमधुकरमञ्जुगुञ्जारवविकीर्णकर्णा गरुडप्रभापुञ्जपिञ्जरितरोदसीगर्भविस्तारा निर्जितदलितेन्दीवरदामकान्तय आकर्णाकृष्टशार्ङ्गधारिणो मुरारयः संचरन्ति ।

णन्तरं पधाविदाओ संदंसणकोदूहलफुल्लगल्लफलआओ सुरसुन्दरीओ समारूढो लङ्काउरीपाआरसिहरेसु णिसाअरजणो वसुधाणिवेसिदसिलासंघादेण वाणरलोएण पाससंठाविदविविहाउहेण अ रक्खसवग्गेण अ अङ्गीकदमुदासीणत्तणं तदो दो वि समं वम्भिअमलीणा मल्लजुज्झेण तहिं अ गाढअरं हत्थग्गहं मग्गन्ति सिरेण सिरणिवेसिणो हुडुक्कविक्कमेण परिक्कमन्ति कक्खाबन्धविणिहितहत्था उच्छलन्ति भुअदण्डसंदंसेण कन्धरां धरन्ति जङ्घन्तरं कत्तरीहिं पीडन्ति कुक्कुडभडप्पेहिं मिल्लन्ति हुङ्कारेहिं हुक्कन्ति अप्फोडतिरिच्छपाअप्पक्खेवेण केवलं करिसन्ति केसेसु ण णअणाइं हणन्ति ण णासावंसे पहरन्ति ण दलन्ति दन्तेहिं ण खण्डन्ति नखेहिं एदाणं च पडणुप्पडणेसु उप्पडन्ति सत्तसाअरा गलन्तगण्डसेला होन्ति कुलसेला दिक्करिकादरत्तणप्पमुक्कचिक्कारपूरिदा घुण्णदि वसुन्दरा पडिखो हणणमन्तधरित्तीभारवङ्किदखन्धरो कम्पदि महाकुम्मो ता जुज्जदि देवस्स धणुग्गहो * ।

रावणः । विहस्य का पुनरेषा द्वन्द्वयुद्धमर्यादा ।

दक्षिणतो दुर्मुखः । एदे पअट्टिदतरट्ठीविब्भमणच्चा सुसद्दीकदकादम्बरीपाणविहिदुम्मादा जुवदीकदजरदीजणा उपणीदकुसुममग्गणप्पअरा विरहिणीकण्ठवड्ढिदपञ्चमतरङ्गा मिअङ्कबालमित्ता दूदीकददक्खिणसमीरणा सव्वदो संचरन्ति मदणा † ।

रावणः । सहर्षम् ।

यावन्ति लोकहृदयानि जगत्त्रये ऽत्र
तावद्भिरनुगतो मदनैर्मनोभूः ।

---

* पुरोभूतेन मार्गवर्तिना वानरवीरेण तत्क्षणसज्ज्यमानकुम्भकर्णबाणासनमाक्षिप्य क्षिप्तं धरणीपृष्ठे । रोषभरमञ्जिष्ठया दृष्ट्या दृष्ट्वा देवकनिष्ठेन मुक्ता चक्रावली प्रवर्तिताः पट्टिशाः प्रेषिता दंशितमारणपेशला भुशुण्डी क्षिप्ता निःशङ्कं शङ्कुमाला आक्षिप्तं मुद्गरोद्गारणम् उत्प्रेरितपुलकस्फारपदक्रमेण कम्पितः करोपलग्नः खड्गः । वानरचक्रवर्तिनापि परिकृतायुधकलापेन नियुद्धमध्यवस्यास्फोटितो भुजदण्डः किलकिलितं च शब्दसन्दोहभरितभुवनान्तरं प्रधाविताः सन्दर्शनकौतूहलफुल्लगल्लफलकाः सुरसुन्दर्यः समारूढो लङ्कापुरीप्राकारशिखरेषु निशाचरजनो वसुधानिवेशितशिलासंघातेन वानरलोकेन पार्श्वसंस्थापितविविधायुधेन राक्षसवर्गेण चाङ्गीकृतमुदासीनत्वम् । ततो द्वावपि समं वल्गितकर्णौ मल्लयुद्धेन तदा च गाढतरं हस्तग्राहं मार्गते शिरसा शिरोनिवेशिनौ हुडुक्कविक्रमैः परिक्रामतः । कक्षाबन्धविनिहितहस्तावुच्छलतः । भुजदण्डसंदंशेन कन्धरां धरतः । जङ्घान्तरकर्तरीभ्यां पीडयतः । कुक्कुटझम्पैर्मिलतः । हुङ्कारैर्हुङ्कुरुतः । आस्फोटतिर्यक्पादप्रक्षेपेण न केवलं कर्षतः केशेषु । न नयने घ्नतः । न नासावंशे प्रहरतः । न दलतो दन्तैः । न खण्डयतो नखैः । एतयोश्च पतनोत्पतनेषूत्प्लवन्ति । गलद्गण्डशैला भवन्ति कुलशैलाः । दिक्करिकातरत्वप्रमुक्तचीत्कारपूरिता घूर्णति वसुन्धरा । प्रतिक्षोभणनमद्धरित्रीभारवक्रितकन्धरः कम्पते महाकूर्मः । तद्युज्यते देवस्य धनुर्ग्रहः ।

† एते प्रकटितनर्तकीविभ्रमनृत्याः सुस्वादीकृतकादम्बरीपानविहितोन्मादा युवतीकृतजरतीजना उपनीतकुसुमबाणप्रकरा विरहिणीकण्ठवर्द्धितपञ्चमतरङ्गा मृगाङ्कबालमित्रा दूतीकृतदक्षिणसमीरणाः सर्वतः संचरन्ति मदनाः ।

शम्भोर्भिया भगवतः शरणाय शङ्के
मां रावणं समरचण्डभुजं प्रपन्नः ॥ ७० ॥

आकाशे । हे मकरध्वज मदनुग्रहेण मत्परिग्रहेण च न त्वां देवदेवोऽपि बाधिष्यते ।

सुमुखः । जाने वैष्णवमस्त्रं स्तम्भयितुं पौष्पकेतनमायुधमातन्यते मन्दोदरीनन्दनेन यतः ।

चिह्नोत्सङ्गस्फुरितमकराः पुष्पधन्वान एते
द्राक् तन्वन्तो मधुसहचरं पञ्चमं रागराजम् ।
लक्ष्मीलीलाललितचरितैरच्युतान् वञ्चयित्वा
श्वेतद्वीपं रतिरतिकृतो मन्मथाः प्रापयन्ति ॥ ७१ ॥

वामतः कङ्कालकः । सव्वङ्गसंङ्गदणिबिडणिपीडणापरव्वसगात्तपडन्तभुअबलेण गअणङ्गणे अन्दोलिअ कुमारकुम्भअण्णेण धरणिवट्ठे तडित्ति ताडिदो सुग्गीवो * ।

रावणः । सहर्षम् । तर्हि मत्तकरेणुकरगतस्य कदलीकन्दस्य दशां लम्भितः ।

करङ्कः ।

कक्षापञ्जरदात्यूहं कपीनां चक्रवर्तिनम् ।
कृत्वा त्वदनुजोऽभ्येति दिष्ट्या त्वं देव वर्धसे ॥ ७२ ॥

रावणः । स्वगतम् ।

यदर्पितं प्राज्यबलेन वालिना
विधाय दोर्मूलवशं दशाननम् ।
तदुद्धृतं शल्यमनेन मानिना
विधाय कक्षाकुहरे हरीश्वरम् ॥ ७३ ॥

कङ्कालकः । कुम्भअण्णकक्खन्तरगदं सुग्गीवमवलोइअ रहसभणक्किअरसणाणेउरकेऊरं णच्चिदुं पउत्ताओ सअलविंदारअविन्दबन्दिसुन्दरीओ ता पेक्खदु देवो † ।

रावणः । सहर्षम् ।

किं शच्या परतो रतिर्धनपतेर्दूरे भवन्तु स्त्रिय-
श्चन्द्रान्तःपुरमेतदस्तु च पृथक्कौबेरिणीषूत्सवः ।
साकं शक्रजितः कलत्रनिवहैः सार्धं च दारैर्मम
प्रीत्युल्लासितपाणिपल्लवयुगं मन्दोदरी नृत्यतु ॥ ७४ ॥

दक्षिणतो दुर्मुखः । किं पुण एदे ते पेक्खोल्लिदखट्टङ्गा खहलपअट्टट्टहासा प्पसहमुक्कडक्कारडामरा णक्खन्तरहस्सुत्तालवेआला चमक्किदसुरासुरपुरन्धिणो ललन्तच्चूडामणिचन्दखण्डा खलखलन्तवेल्लिदामरकल्लोलिणीपवाहा तडतडित्ति ताडिदडमरडमरुअरवरोद्दा खणखणितदाहिणमुहकुहरगम्भीरनिबिडमिलिद-

---

* सर्वाङ्गसङ्गतनिबिडनिपीडनापरवशगतः प्रचण्डभुजबलेन गगनाङ्गणे आन्दोल्य कुमारकुम्भकर्णेन धरणीपृष्ठे तडिति ताडितः सुग्रीवः ।

† कुम्भकर्णकक्षान्तरगतं सुग्रीवमवलोक्य रभसभणत्कृतरशनानूपुरकेयूरं नर्तितुं प्रवृत्ताः सकलवृन्दारकवृन्दवन्दिसुन्दर्यः । तत्प्रेक्षतां देवः ।

Digitized by Google

जरठदाढा रोसफुक्कारपुल्लिदफणाभारहाराहिहारिणो पअण्ड-कण्डधारिणो चण्डीसा संचरन्ति * ।

रावणः । सहर्षम् ।

मह्यं तदा धृतमुदा शशिशेखरेण
दत्तो वरो न शिरसां सदृशश्छिदा यः ।
तत्सांप्रतं स भगवान् कृतभूरिमूर्ति-
रभ्यागतः पुनरनुग्रहवाञ्छया माम् ॥ ७५ ॥

सुमुखः । देव संभावयामि कन्दर्पबाणविहतये खाण्डपरशवमस्त्रमातन्यते तृतीयेन दाशरथिना यतः ।

ऊर्ध्वोत्तिष्ठोडकुण्डोल्लसितहुतवहज्योतिरुत्तम्भणाभिः
कुर्व्वन्तो देहदाहं पुरमथनमनोन्माथिनां मन्मथानाम् ।
चूडाबद्धार्धचन्द्राश्चलसुरसरितो भूषिताः पन्नगेन्द्रैः
श्रीकण्ठाः श्यामकण्ठाः प्रणतसुरशताः साट्टहासाश्चरन्ति॥७६॥

रावणः । भगवन् भर्ग स्वल्पकण्ठवनच्छेदसाहसमनल्पःप्रसादः ।

वामतो नेपथ्ये करङ्कः ।

वेगोत्खातान्त्रतन्त्रीचयचलचरणः सज्वरद्धन्तयन्त्र-
प्रान्तग्रस्तोरुनासासरणिरहणदृक् त्रुभ्यतः कुम्भकर्णात् ।
लूनव्याकीर्णकर्णः खरनखशिखरैरेव शाखामृगेन्द्र-
स्त्वङ्गल्लाङ्गूलयष्ट्या तडतडिति शिरस्ताडयन् खं प्रपन्नः॥७७॥

रावणः । सविषादम् । अहो प्रमादः छलप्रहारित्वं वानराणां नावधारितं वत्सेन ।

कङ्कालकः । एस सुग्गीवो कुमारकुम्भअण्णं विच्छिन्नम-वक्करिअ गअणं उप्पअन्तो गदो ज्जेव्व तावससआसम् † ।

करङ्कः । कपिचक्रवर्तिचापलकोपितश्च मध्यमपौलस्त्यः समरसमारम्भमेव शरणं मन्यमानो लङ्कापुरीगोपुरादुपावृत्तः संमुखीभूतश्चास्य सकलवाहिनीपरिवृतः स्वयमेव तापसः ।

कङ्कालकः । पुरदो ऽवसरिअचउद्दिसंपरिवुदो वानरसेणाव-दीहिं तस्स पुरदो जम्बवन्तमणिमन्तमहामुहदुस्सहप्पहुदिणो दीदा रिक्खाहिवा गअगवअगवक्खकडक्खपुरस्सरा पच्छादो गोलाङ्गुलबलाधिवा दहिमुहदरीमुहदुम्मुहपहाणा वामदो सरभकेसरिकिसोरप्पमुहा पदक्खिणदो हुविअ वग्गिदुं पउत्ता * ।

रावणः । सोऽयं पिपीलिकापन्नगन्यायः ।

कङ्कालकः । तदो अ मोग्गरपहारपरम्पराहिं मुच्छाविअ-अतिरिच्छभल्लो णिरग्गलगिलिदगोलंगूलवग्गो चुण्णिअवाण-रवाहिणीसंणिवेसो पअदो तावसाभिमुहं समासादितमुच्छा-विच्छेदेहिं अ तेहिं चउद्दिसं अक्कामिज्जन्तो णीरन्धरोसन्धआ-रन्धदाए समं पासससरिदेण णिअपरिअणेण विविहवलीमुहाणं कवलकेलिकम्मणि पअट्टो † ।

नेपथ्ये । देव दाशरथे त्वर्यतां वानरपरित्राणाय ।

विद्रुमातङ्कशिरस्तटीचिपिटितं प्रेतप्रभोः सैरिभे
भूयो दर्शितशृङ्गभङ्गविपदं बिभ्रन्महामुद्गरम् ।
बाणाशोणितसारणीकवलनक्षीबो ऽमरप्रेयसी-
हासः स्वांश्च परांश्च खादति रणे नक्तंचरेन्द्रानुजः॥७८॥

रावणः । अहो अतृप्तिः अध्यवसायश्च वत्सस्य ।

करङ्कः । देव दोर्बन्धबन्धुरितधनुर्दाशरथिरभ्यर्णो वर्तते-कुम्भकर्णस्य कुम्भकर्णेनापि गुरुमुद्गरचूडामणिः पाणिरनणीयानुत्तम्भितस्तापसवधाय ।

रावणः । अभङ्गुरः सङ्गरः सदा मे वत्सस्य ।

काक्कः । हाहा धिक्कष्टम् ।

हस्तः स्थितो नभसि शत्रुजिघांसयेव
मस्ताङ्गनातिलकदानविधानदक्षः ।
उद्दामरामशरखण्डनतः प्रकोष्ठात्
पृष्ठे भुवो निपतितः सह मुद्गरेण ॥ ७९ ॥

कङ्कालकः । देव पाणी विअ बाहुदण्डो वि से खण्डिदो ‡ ।

रावणः । सास्रम् ।

मुर्च्छानमत्प्लवगपुङ्गवरक्तसिक्तः
स्वर्दन्तिदन्तवलयैः कृतकङ्कणश्रीः ।
आमूलतो मदनुजस्य भुजो भुजङ्ग-
भीमाकृतिर्झटिति हा नृशरेण लूनः ॥ ८० ॥

इति मूर्च्छति ।

---

* किं पुनरेते ते प्रेङ्खोलितखट्वाङ्गा बहलप्रकटाट्टहासाः प्रसभमुक्तडात्कारडामरा वृत्यद्भैरवोत्तालवेतालास्त्रस्तसुरपुरन्ध्रयो ललच्चूडामणिचन्द्रखण्डाः खलखलायमानवेल्लितामरकल्लोलिनीप्रकाशास्तडलडितितरडितोड्डमरडमरुकरवरौद्राः खणखणितिदर्विणमुखकुहरगर्भनिविडमिलज्जरठदंष्ट्रा रोषफूत्कारपूल्लितफणाभारहाराहिधारिणः प्रचण्डकण्डधारिणश्चण्डीशाः संचरन्ति ।

† एष सुग्रीवः कुमारकुम्भकर्णं विच्छिन्नमवकृत्य गगनमुत्पतन् गत एव तापससकाशम् ।

* पुरतोऽपसृत्य चतुर्दिशं परिवृतो वानरसेनापतिभिः । तस्य पुरतो जाम्बवन्मणिमन्महामुखदुःसहप्रभृतयः स्थिता ऋक्षाधिपाः । गयागवयगवाक्षकटाक्षपुरःसराः पश्चाद् गोलाङ्गूलबलाधिपाः । दधिमुखदरीमुखदुर्मुखप्रधाना वामतः । शरभकेसरिकिशोरप्रमुखाः प्रदक्षिणतो भूत्वा वल्गितुं प्रवृत्ताः ।

† ततश्च मुद्गरप्रहारपरंपराभिर्मूर्च्छायितातिरश्चाच्छभल्लो निरर्गलनिलितगोलाङ्गूलवर्गश्चूर्णितवाहिनीसंनिवेशः प्रवृत्तस्तापसाभिमुखं समासादितमूर्च्छाविच्छेदैश्च तैश्चतुर्दिशमाक्रम्यमाणो नीरन्ध्ररोषान्धकारान्धतया समं पार्श्वचरितेन निजपरिजनेन विविधवलीमुखानां कवलकेलिकर्मणि प्रवृत्तः ।

‡ देव पाणिरिव बाहुदण्डोऽप्यस्य खण्डितः ।

कञ्चुकी । समाश्वसितु देवो वामपाणिप्रणीतमुद्गरः किम-
पि दुर्मेदो राममाक्रामति तवानुजः ।

रावणः । किञ्चिदुत्थायावलोकयति ।

नेपथ्ये ।

एतद्विलूनमिषुणाऽर्धविधूपमेन
लङ्केश्वरानुजशिरो दशनार्दितोष्ठम् ।
संस्कारसंकलितकोपकषायगण्डं
चण्डाञ्चितभ्रु पतति स्थिरदृष्टि रामे ॥ ८१ ॥

सर्वे क्षोभं नाटयन्ति ।

पुनर्नेपथ्ये ।

सद्यो राक्षसमल्लभल्लदलितग्रीवाप्रकाण्डं पत-
च्छिद्रालोद्रुहिणप्रणप्तुरशद्रुग्दंष्ट्राकरालं शिरः ।
द्राक् शाखामृगचक्रचूर्णनभयादादाय तारापथात्
प्रक्षिप्तं च महार्णवे हनुमता दृष्टं च गत्वासुरैः ॥ ८२ ॥

रावणः । हा वत्स कां दशां दशकण्ठेन नीतोऽसि ।

नेपथ्ये ।

देवाः सर्वे विमानान्यपनयत रविस्यन्दनो यातु दूरे
विश्वे शाखामृगेन्द्राः परिहरत रणप्राङ्गणं राक्षसाश्च ।
वेगध्वस्ताञ्जनाद्रिप्रतिनिधिरवधिः सर्वविस्मापकानां
लङ्कातङ्कैकहेतुर्निपतति वियतः कौम्भकर्णः कबन्धः ॥ ८३ ॥

रावणः । शोकनाटितकेन ।

शेषः सोढाऽपि शङ्कां त्यजति न भवता कण्ठसूत्रार्धकृष्टो
गौरीसिंहेन्द्रदन्तिद्रुतपरणावधिं त्वत्प्रणीतं स्मरामि ।
तच्चास्ते त्वच्चरित्रं लिखितमिव पुरो मद्दृशां यत्सुमेरु-
धैर्येणोदस्यमानो रचितचटुशतं मोचितः स्वर्गिवर्गैः ॥ ८४ ॥

इति रोदिति ।

दक्षिणतः सुमुखः । अयमपरः हते धारासेकः ।
आकर्णाकृष्टचापोन्मुखविशिखशिखाशेखरः शूलपाणि-
र्विद्याणो भैरवस्त्वं बहलकहकहारावरौद्राट्टहासः ।
ध्यातः सौमित्रिणाऽथ प्रसरदुरुतरोत्तालवेतालमाल-
ल्लहुल्कादुद्रुवद्भिः समजनि शिखिभिर्भस्मसादिन्द्रजिच्च ॥ ८५ ॥

राक्षसाः मूर्च्छेति सर्वे यथोचितमुपचरन्ति ।

रावणः । मूर्च्छाविच्छेदनाटितकेन ।

शेतां संप्रति वासवश्चिरभयविद्राजडैर्लोचने-
र्जायन्तां विबुधोपयोग्यकुसुमाः सर्वेऽपि दिव्यद्रुमाः ।
बन्धाः स्वर्गसदां च सन्तु निगडाः प्राप्तोऽसि तं गोचरं
मद्दृक्तेरपि वत्स नाम दशभिर्वक्तुं न यः शक्यते ॥ ८६ ॥

साक्रन्दं रुदित्वा । हहो किङ्करा मन्दोदरीं द्रष्टुमिच्छामि
इति परिक्रम्य सर्वे निष्क्रान्ताः ।

॥ इति वीरविलासो नामाष्टमोऽङ्कः ॥

THE VAIS'ESHIKA APHORISMS OF KAṆÁDA.

FIRST BOOK. FIRST DAILY LESSON.

INTRODUCTION. [1] All students who wish to shun the multitude of pains engendered in this world by birth, old age, death and the like, learn from revelation, tradition, the epics, the Purâṇas and other sources, that the means of escaping them is investigation of the real nature of soul. Now, certain disciples who had in the prescribed manner studied the Vedas and their subordinate sciences, unenvious, and attentive hearers, in quest of knowledge reverentially approached the great and holy sage Kaṇáda. The sage full of compassion taught them a treatise in ten sections. Enunciation, Definition, Investigation [of the adequacy of definitions],—such is the threefold method of this system. Division is a particular kind of enunciation; hence there is no addition [to be made.] Although description of the Categories is the chief subject of this treatise, yet from the importance of Merit as the instrumental cause of real knowledge of the Categories, he in the first place promises a description of that. *Vivṛiti.*

Procemium. अथातो धर्मं व्याख्यास्यामः ॥ १ ॥

Aph. 1. Now, then, we will explain [what] Merit [is.]

[2] "'Now,' means after being requested by his disciples. 'Then', since pupils quick in hearing &c., and unenvious have approached. Or else the word 'Now' *(atha)* has an auspicious sense. Thus it is said, "The syllable *Om* and the word *atha*, these two cleft of old the throat of Brahmá and issued forth; therefore both are of happy omen." *Upaskára.*

Merit defined. यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः ॥ २ ॥

Aph. 2. Merit is that from which [results] attainment of Elevation and of the Highest Good.

---

1 इह खलु जन्मजरामरणादिजनिततापकलापं जिहासवः सर्व एवान्ते-वासिनस्तन्निदानमात्मतत्त्वदर्शनमाकर्णयन्ति श्रुतिस्मृतीतिहासपुरा-णादिषु । अथ केचिदन्तेवासिनो विधिवदधीतवेदवेदाङ्गा अनसूयकाः स-म्यक्श्रवणा मननार्थं भगवन्तं कणादमहर्षिं विधिवदुपसेदुः । ततः परम-कारुणिकः स मुनिर्दशाध्यायीतन्त्रं तानुपदिदेश । उद्देशो लक्षणं परीक्षा चेति त्रिविधा ऽस्य शास्त्रस्य प्रवृत्तिः विभागस्तु विशेषोद्देश एवेति नाधि-क्यम् । यद्यप्यत्र तन्त्रे पदार्थनिरूपणस्यैव प्राचुर्यं तथापि पदार्थतत्त्वज्ञान-निदानतया धर्मस्यैव प्राधान्यात् तन्निरूपणमेव प्रथमं प्रतिजानीते ॥

2 अथेति शिष्याकाङ्क्षानन्तर्यमाह । अत इति । यतः श्रवणादिपटवो ऽनसूयकाश्चान्तेवासिन उपसेदुरित्यर्थः । यद्वा अथशब्दो मङ्गलार्थः । त-दुक्तम् ।

ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभौ ॥ इति ॥

Digitized by Google

[1] It might be objected that because Merit is not productive of any result, a description of it is useless. Hence he states its characteristic, shewing that to Merit belongs the attainment of the highest object of man. Exaltation is paradise; the Highest Good is emancipation; that cause from which [results] the attainment,—production—, of these is Merit: and therefore it is fitting that Merit should be explained, inasmuch as, by reason of its effecting the highest object of man which consists of paradise and liberation [of the soul], it is to be acquired by those who are desirous of enjoyment and of emancipation. V.

[2] Exaltation is knowledge of the truth, the Highest Good is final cessation of pain, that from which both [result] is Merit. The Highest Good is [attained] by means of Exaltation. If this be the meaning the compound [*abhyudaya-nihśreyasa*] has an ellipse of a central member or is a Tat-purusha ablatively dependent, and Merit is implied to be characterised by Cessation [of pain]; but if Merit to be attained by practices such as devout meditation &c., and [synonymous with] the result of good actions done in a former state of being, then the compound is regular in form. U.

Note. Exaltation according to the Upaskára means either knowledge of the truth *(tatva-jnána)* or the result of good works done in a former birth *(adrishta)*. If it signify knowledge of the truth, the aphorism must be translated, 'That is Merit from which [results] the Highest Good by means of Exaltation.' If the result of actions done in a former life be intended by Exaltation, the aphorism is to be rendered as above.

[3] The attainment of paradise by Merit is with visible means, while the attainment of liberation is by means of knowledge of the truth; consequently there is a distinction. V.

1 ननु धर्मस्याकिञ्चित्करत्वेन तन्निरूपणं व्यर्थमतो धर्मस्य परमपुरुषार्थसाधनत्वं दर्शयन् तल्लक्षणमाह । अभ्युदयः स्वर्गः निःश्रेयसं मोक्षस्तयोः सिद्धिरुत्पत्तिर्यतः कारणात् स धर्मः तथा च स्वर्गापवर्गरूपपरमपुरुषार्थसाधनतया बुभुक्षूणां मुमुक्षूणाञ्चोपादेयत्वाद्धर्मस्य व्याख्यानं युक्तमेव ॥

2 अभ्युदयस्तत्त्वज्ञानं निःश्रेयसमात्यन्तिकी दुःखनिवृत्तिः तदुभयं यतः स धर्मः अभ्युदयद्वारकं निःश्रेयसमिति मध्यपदलोपी समासः पञ्चमीतत्पुरुषो वा स च धर्मो निवृत्तिलक्षणो वक्ष्यते यदि तु निदिध्यासनादियोगसाध्यो धर्मोऽदृष्टमेव तदा विधिरूपः ॥

3 धर्मस्य स्वर्गसाधनता साक्षादेव अपवर्गसाधनता तु तत्त्वज्ञानद्वारेति विशेषः ॥

[1] He proceeds to remove the doubt, "What proof is there of [the existence of] Merit and of its being the means of attaining to knowledge of the truth &c. If [you say], the Veda, [we reply] not so, for the authority of that is doubted, and accordingly an aphorism of Aksha-charana says, That [Veda] is unauthoritative being vitiated by falsity, self-contradictoriness, and repetition." V.

INDRA
AS REPRESENTED IN THE HYMNS OF THE RIGVEDA.
A METRICAL SKETCH.

BY J. MUIR, ESQ. D. C. L.

In the following verses I have endeavoured to combine in one picture the most salient and characteristic points in the representations of the god Indra, the Jupiter Pluvius, or Thunderer, of the oldest Indian mythology, which are contained in the hymns of the Rigveda. Some part of my sketch are translations, nearly literal, of verses occurring in those hymns; other portions are condensed summaries of epithets, or descriptions, which are by far too numerous and too similar to each other to be all reproduced in detail; while a third class of passages contains an amplification, and not an approximate rendering, of the texts of the original on which they are founded.

The reader who is not familiarly acquainted with the hymns of the Veda, either in the original or by translations, may think that he perceives an incompatibility between the conceptions of the god, which he will find in different parts of this sketch. And, strictly speaking, there is an incompatibility. The naïve familiarity with which Indra is treated in some places seems irreconcileable with the lofty ideas of his greatness, which other portions express. And more particularly the sensual character, which is generally attributed to the god, seems to be in opposition to the moral perfection which is elsewhere described as an essential feature of his nature. But however incompatible, according to our ideas, both of these sets of representations occur side by side in the same hymns; and we must account for their co-existence and juxtaposition by supposing that the ancient Indian poets regarded the deity who was the object of their adoration, as anthropopathically partaking in a higher degree of the elements, sensuous as well as intellectual and moral, which, on the evidence of their own consciousness, they knew to be equally constituent parts of their own nature.

1 ननु धर्मे तस्य तत्त्वज्ञानादिसाधनत्वे च किं मानं वेद एव मानमिति चेत् न तत्प्रामाण्यस्यापि सन्दिग्धत्वात् तथा चाक्षचरणसूत्रं तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्य इतीत्याशङ्कां निरस्यति ॥

Digitized by Google

I.—*Invitation of Indra to the Sacrifice.*

HEAR, Indra, mighty Thunderer, hear,
Bright regent of the middle sphere;
List while we sweetly sing thy praise,
In new, and well-constructed, lays;
Hymns deftly framed by poet skilled,
As artizans a chariot build.
Come, Indra, come, thou much-invoked,
Our potent hymn thy steeds has yoked;
Thy golden car already waits
Thy pleasure at thy palace-gates:
Friend Indra, from the sky descend,
Thy course propitious hither bend;
Come straight, and let no rival priest
Prevail to draw thee from our feast.
All is prepared; the Soma draught
Is sweet as thou hast ever quaffed;
And we will feed with corn, and tend,
Thy coursers at their journey's end.
But, Indra, though of us thou thinkest,
And our libations gladly drinkest,
We, mortal men, can only share
A humble portion of thy care.
We know how many potent ties
Enchain thee in thy paradise.
Thou hast at home a lovely wife,
The charm and solace of thy life;
Thou hast a ceaseless round of joys,
Which all thy circling hours employs—
Joys such as gods immortal know,
Unguessed by mortals here below.
But, brother Indra, come, benign,
Accept our gifts, thou friend divine.
Come, hear our sweet and grateful song;
Come, we will not detain thee long.

II.—*Indra's birth.*

Hear, Indra, while thy birth we sing,
The deeds, thy greatness, glorious king.
Old father Sky* and mother Earth
Both quaked, confounded at thy birth.
The Sky exclaimed, at that great sight,
"Thy father was a stalwart wight;
Of most consummate skill was he,
The god whose genius fashioned thee."
This infant of unrivalled force
Sprang forth from a transcendent source.
A blessed mother bore the child,
And fondly on her offspring smiled,
Foretelling then, with pride and joy,
The might and glory of the boy.
He needed not a tedious length
Of autumns to mature his strength;
His force he felt as soon as born,
And viewed all hostile powers with scorn.
Grasping his deadly shafts, in pride
Of prowess, thus the infant cried:—
"Where, mother, dwell those warriors fierce
Whose haughty hearts these bolts must pierce?"
And when thy father proved thy foe,
Thy fury, Indra, laid him low.
Who vainly sought thy life to take,
When thou didst sleep, when thou didst wake?
Who, Indra, in his vengeful mood,
Thy mother doomed to widowhood?
What god stood by, thy wrath to fire,
When, seizing by the foot thy sire,
Thou smot'st him dead, in youthful ire?

* Dyaus = Ζεύς.

III.—*Indra's arrival.*

Fulfilling now our ardent prayer,
The god aproaches through the air.
On, on, he comes, majestic, bright,
Our longed-for friend appears in sight.
His brilliant form, beheld afar,
Towers stately on his golden car.
Fair sunlike lustre, godlike grace,
And martial fire illume his face.
Yet not one from alone he bears,
But various shapes of glory wears,
His aspects changing at his will,
Transmuted yet resplendent still.
In warlike semblance see him stand,
Red lightnings wielding in his hand.
The heavenly steeds, his shining team,
With all the peacock's colours gleam.
Resistless, snorting, on they fly,
As swift as thought, across the sky;
And soon bring nigh their mighty lord,
To us, his friends, a friend adored.
Now Indra from the sky descends;
Yes, yes, to us his way he wends.
Although we see him not, we know
He now is present here below.
Within our hallowed precincts placed,
He longs our grateful feast to taste.

IV.—*Indra invited to drink the Soma draught.*

Thou, Indra, oft of old hast quaffed
With keen delight our Soma draught.
All gods the luscious Soma love,
But thou all other gods above.
Thy mother knew how well this juice
Was fitted for her infant's use.
Into a cup she crushed the sap,
Which thou didst sip upon her lap.

Digitized by Google

Yes, Indra, on thy natal morn,
The very hour that thou wast born,
Thou didst those jovial tastes display
Which still survive in strength to-day.
And once, thou prince of genial souls,
Men say thou drainedst thirty bowls.
Our cup is foaming to the brim
With Soma pressed to sound of hymn.
Come, drink, until thou hast enough,
Like thirsty deer from water-trough.
Indulge thy taste, and quaff at will;
Drink, drink again, profusely swill,
Drink, thy capacious stomach fill.

V.—*Praise of Soma.*

This Soma is a god;* he cures
The sharpest ills that man endures.
He heals the sick, the sad he cheers,
He nerves the weak, dispels their fears,
The faint with martial ardour fires,
With lofty thoughts the bard inspires,
The soul from earth to heaven he lifts;—
So great and wondrous are his gifts.
Men feel the god within their veins,
And cry in loud exulting strains:
"We've quaffed the Soma bright,
"And are immortal grown;
"We've entered into light,
"And all the gods have known,
"What mortal now can harm,
"Or foeman vex us more?
"Through thee beyond alarm
"Immortal god we soar." *
The gods themselves with pleasure feel
King Soma's influence o'er them steal;
And Indra once, as bards have told,
Thus sang in merry mood of old:—

(To be continued.)

REVIEW.

The Árya-vidyá-sudhákara by Pandit Yajneśvara Śarman of Surat presents us with a brief summary of the literature, religious, political, and philosophical, of the Áryans of India. The aim of the author, as an orthodox Hindu, is to provide native students, whose time is much occupied in the study of modern science, with a short review of the revelation, tradition, and philosophy of their ancestors. This he accomplishes in the compass of some two hundred and fifty octavo pages. The first section of the work treats of the creation of the world, the origin of the Áryas and of the four castes, the antiquity of the arts of civil life and especially of that of writing. Here the writer undertakes to vindicate Hindu orthodoxy against modern objections. Next follows an account of the Vedic literature, and, in the second section, of the Vedic ritual. The third division treats of the civil and religious duties prescribed by the Smriti, and the fourth exhibits a lucid analysis of the philosophical systems orthodox and unorthodox. The fifth has a practical scope. Systems differ, but it is generally agreed that righteousness leads to knowledge and knowledge to emancipation of the soul. The old paths are the way of safety.

येनास्य पितरो याता येन याताः पितामहाः ।
तेन यायात् सतां मार्गं तेन गच्छन् न रिष्यते ॥ Manu IV. 178.

The author's style is every where methodical, easy, and perspicuous, and his only failure is the attempt to disprove or to reconcile with religious dogmas, adverse facts relating to the early Áryans, which we owe to the free research of European scholars. Thus we are told that all other races of men being, as Manu teaches, sprung from the four castes, whose original seat was Kuru-kshetra and other parts of India, their languages resemble Sanskrit by retaining some of its words in a corrupt form. Of course it is well known that languages other than Sanskrit belonging to the Indo-European group exhibit occasionally grammatical forms more organic than those of Sanskrit, as, for instance, in the case of nouns of agency and relationship and of the substantive verb. Yáska's interpretation of the phrase पञ्च जनाः, is an inadequate reply to the mass of evidence respecting the origin of caste collected in Dr. Muir's Sanskrit Texts. It is not likely that any one will suppose the earliest Áryans to have been destitute of skill in science and art and merely brutish. (विद्याशिल्पादिकुशलत्वहीनाः केवलं पशुकल्पाः P. 12.)

That they were acquainted with the arts of agriculture &c., even before the Vedic period is established by the testimony of the various Áryan languages. The answer (p. 19) to Prof. Max Müller's statement that writing was unknown before the Sútra period of Vedic literature appears equally unsatisfactory with the author's objections to other modern inductions. But while such objections arising from strong religious feeling are seldom stated, the work as a whole will be valued by those who know the assistance of such summaries as this in the appropriation or in the mental arrangement of large masses of facts. With a few modifications a translation of the work, and especially of the philosophical portion, would be of great service to English students of Sanskrit. A. E. G.

* He bears, as the reader will perceive, a certain analogy to the Greek Dionysus.

* These two verses are a nearly literal translation of Rigveda, viii 48, 3.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीमद्गणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 33. Benares February 1st, 1869. Vol. III.

॥ श्रीपरमेश्वराय नमः ॥

॥ उपदेशसहस्रीप्रस्तावना ॥

तत्र भवान् भगवान् परमकारुणिकः श्री ६ शंकराचार्यो विस्तरेण ब्रह्ममीमांसां व्याख्याय निबन्धविस्तरदर्शनसंजातालस्यमानतस्तत्तत्पठनादावधिकारिणोऽप्यप्रवर्त्तमानान् धीमतः समनुग्रहीतुकामो वेदान्तशास्त्रमहोदधेः सारसुधां समुद्धृत्य पाययन्निव वेदान्तनिबन्धानां शिरोभूषणमुपदेशसहस्रीसमाख्यं निबन्धमुपनिबबन्ध। तस्मिंश्च श्रोतृबुद्धिसमवधानाय प्रथमतो गद्यप्रबन्धेन संक्षेपतः प्रतिपाद्यं संगृह्य पुनः पद्यप्रबन्धेन तदेव नानाविधप्रमाणोपन्यासपुरःसरं विशदीचकार । अथ च तस्य स्थानेस्थाने गम्भीरार्थतया दुरवगमत्वं समीक्ष्य श्रीमान् रामतीर्थनामा विबुधो व्यक्तार्थामत्यक्तव्याख्येयभागां पदयोजनिकां नाम टीकां रचयामास । तस्य चास्य निबन्धस्य टीकासहितस्य जीर्णमेकं पुस्तकं कस्य चिन्महाराष्ट्रस्य पुस्तकालयेऽहमुपलभ्य प्राचीनप्रौढनिबन्धदर्शनरसिकजनान् मोदयितुकाम एतत्पत्रद्वारा टीकासहितमेतन्निबन्धं प्रकाशयितुमुत्सहे । अवश्यं चायं निबन्धो रसिकानां हृदयंगमीभावमापन्नस्तान् प्रमोदयेत् सफलयेच्च तेन मामकं परिश्रममिति निर्भरेणाशासे । नमस्यामि चैतदारम्भे मङ्गलाय श्रीपरमेश्वरं भगवत्पादं शङ्कराचार्यं च बद्धाञ्जलिपुटः परमादरपुरस्सरमिति शम् ॥

सांख्य०बालशास्त्री

॥ उपदेशसहस्र्या गद्यप्रबन्धः ॥

॥ श्रीगणेशाय नमः ॥

॥ समस्तब्रह्मविद्यासंप्रदायप्रवर्त्तकाचार्येभ्यो नमः ॥

॥ ओंनमो भगवते सर्वात्मने वासुदेवाय नमः ॥

प्रणम्य रामाभिधमात्मधीपदं
जगत्प्रसूतिस्थितिसंयमायनम् ।
तदात्मकाञ्शंकरपूर्वकान् गुरून्
मयोपदेशार्थविभाग उच्यते ॥

इह भगवत्पादाभिधो भगवान् भाष्यकारः सर्वोपनिषदर्थसारसंग्राहिकामुपदेशसहस्रीं गद्यपद्यविभागवन्यरचनया प्रकटीकुर्वन्नादौ गद्यबन्धमारभमाणः प्रारिप्सितपरिसमाप्तिप्रचयगमनादिप्रयोजनं शिष्टाचारविशेषपरिप्राप्तं मङ्गलमाचरति । अथेति ।

(१) अथ मोक्षसाधनज्ञानोपदेशविधिं व्याख्यास्यामो मुमुक्षूणां श्रद्दधानानामर्थिनामर्थाय, तदिदं मोक्षज्ञानं साधनसाध्यादनित्यात्सर्वस्माद्विरक्ताय त्यक्तपुत्रवित्तलोकैषणाय प्रतिपन्नपरमहंसपारिव्राज्याय शमदमदयादियुक्ताय शास्त्रप्रसिद्धशिष्यगुणसंपन्नाय शुचये ब्राह्मणाय विधिवदुपसन्नाय शिष्याय जातिकर्मवृत्तविद्याभिजनैः परीक्षिताय ब्रूयात् पुनःपुनर्यावद्ग्रहणं दृढीभवति ॥

ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥

Digitized by Google

इति स्मृतावथशब्दस्य माङ्गलिकत्वावगमात्, अथ वा आनन्तर्यार्थ एवायमथशब्द उच्चारणमात्रेण मङ्गलप्रयोजनो ऽपि भवति, अन्यार्थं क्रियमाणमृदङ्गादिध्वनिश्रवणादिवत् । किमानन्तर्यार्थतेति चेद्, विस्तरेणानेकशास्त्रार्थनिबन्धनिर्माणानन्तर्यार्थतेति वदामः । प्रश्नप्रतिवचनाक्षेपसमाधानप्रकारैरनेकप्रमाणयुक्तिविशेषैर्निपुणतरमवधारिते समस्तोपनिषच्छास्त्रार्थे ऽनेकवाक्ययुक्त्यनुसन्धानव्यवधानमन्तरेण साक्षादनुभवोदयाय संग्रहनिरूपणप्रवृत्त्युपपत्तेरिति । अत्र चिकीर्षितं प्रतिजानानः प्रवृत्त्यङ्गतया शास्त्रीयानुबन्धजातं संगृह्णाति मोक्षसाधनेति । अर्थविस्तरेण शास्त्रार्थनिरूपणानन्तरं मोक्षो निष्प्रपञ्चब्रह्मात्मताविर्भावस्तस्य साधनमौपनिषदाद्वितीयात्मतत्त्वज्ञानं तस्योपदेशः उपदेशनमुपदेशस्तदर्थवाक्यानामर्थविभागेन शिष्यं प्रति प्रतिपादनं तस्य विधिः प्रकारविशेषस्तैर्विस्पष्टमाख्यास्यामः कथयिष्यामः । मोक्षशब्देन प्रत्यक्तत्त्वं ब्रह्म विषयो निर्दिष्टः । साधनशब्देन तत्त्वज्ञानस्योक्तत्वात् तत्साध्याज्ञानादिबन्धनिवृत्तिः प्रयोजनं सूचितम् । उपदेशविधिशब्देन संबन्धो बोध्यबोधकलक्षणः शास्त्रविषयो दर्शितः । इदानीमधिकारिणमाह । मुमुक्षूणामिति । मुमुक्षूणां मोक्षमात्रमिच्छतामित्यनेनैहिकामुष्मिकार्थतृष्णालेशवतामप्यत्रानधिकार इति सूचितं, श्रद्दधानानामस्मिन्नुपदेशशास्त्रार्थे विश्वासवतामित्यनेन मुमुक्षवो ऽपि सन्तो ये कर्मस्वन्यशास्त्रेष्वपि वा श्रद्दधते तेषामिहानधिकारः सूच्यते, अर्थिनामेतच्छास्त्रार्थज्ञानार्थिनामित्यनेन श्रद्दधाना अपि ये पाण्डित्यविस्तरप्रवणमतयस्तेषामिहानधिकारो ध्वनितः । तथा चैवंविधानामधिकारिणामर्थायोपकाराय व्याख्यास्याम इत्यन्वयः । संग्रहेणोक्तमर्थं विवृणोति । तदिदमिति । तदिदं मोक्षसाधनं ज्ञानं विधिवदुपसन्नाय शिष्याय ब्रूयादित्यन्वयः, तद् ग्रन्थान्तरेषु विस्तरेण प्रतिपादितमिदमिदानीमिह वक्ष्यमाणमित्यर्थः, किं तद्, मोक्षसाधनं सहेतुबन्धनिवृत्त्या ब्रह्मात्माविर्भावस्य निमित्तं यदुक्तं तदिदं ज्ञानं वक्ष्यमाणमित्यर्थः । मोक्षसाधनपदं व्याख्यातमुपदेशविधिपदमग्रे शिष्याचार्यप्रश्नादिपरंपरया व्याख्यास्यन्मुमुक्षूणामित्याद्युक्तमधिकारिणं व्याचष्टे । साधनेत्यादिना । संग्रहे ऽधिकारिबहुत्वनिर्देशः प्रदर्शनार्थो न तु विवक्षितो ऽत एव विवरण एकवचनम्, एकात्मवादे बहूनां निरपेक्षाणां मुमुक्षूणामसंभवादिति ।

“नाविरक्ताय संसारान्नानिरस्तैषणायच” ।

इत्यादिशास्त्रमुररीकृत्याह । साधनसाध्यादिति । साधनैर्दृष्टादृष्टार्थैः कृष्यादियागादिभिः साध्यादैहिकादामुष्मिकाच्च भोग्यजातादत एवानित्यादशाश्वतात्सर्वस्माद्ब्रह्मलोकान्तादपि विरक्ताय विगतरागाय निवृत्ताभिलाषायेत्यर्थः । कथमवगम्यते ऽयं विरक्त इत्यपेक्षायां विशेषणान्तरेण विरक्तचिह्नमाह । त्यक्तेति । अत्रैषणाशब्देन कामापरपर्यायेण तत्प्रयुक्ता प्रवृत्तिर्लक्ष्यते । तत्र पुत्रार्थं दारसंग्रहे प्रवृत्तिः पुत्रैषणा, कर्माद्यनुष्ठानार्थमपरविद्यागवादिरूपोभयविधवित्तपरिग्रहो वित्तैषणा, पुत्रकर्मापरविद्यासाध्यैतल्लोकपितृलोकदेवलोकफलैषणा लोकैषणा, एता एषणास्त्यक्ता येन तस्मै साधनेषु प्रवृत्त्यौत्सुक्यत्यागादेव साध्याभिलाषशून्यता गम्यत इत्यर्थः । तथा च श्रुतिः ।

“न कर्मणा न प्रजया न धनेन त्यागेनैकेनामृतत्वमानशुः”।

इति । इदानीम् “एतमेव प्रव्राजिनो लोकमीप्सन्तः प्रव्रजन्ति” “तानि वा एतान्यवराणि तपांसि न्यास एवात्यरेचयद्” इत्यादि शास्त्रमनुरुध्याह । प्रतिपन्नेति । परमहंसविशेषणं कुटीचकादिस्मार्तसंन्यासिव्यावृत्त्यर्थं, नहि द्वैताद्वैतवादिनामद्वितीयात्मतत्त्वोपदेशग्रहणाधिकार इति भावः । एतावता मुमुक्षुपदं व्याख्यातम् । अत्राप्याश्रमधर्ममात्रनिष्ठस्याधिकारो नास्तीति विवक्षन् पुनर्विशिनष्टि । शमदमदयादियुक्तायेति । शमो ऽन्तःकरणस्यानात्मविषयेभ्यो व्यावृत्तिः, दमो बाह्येन्द्रियाणां, दया भूतेष्वद्रोहः, आदिपदेनोपरतितितिक्षासमाधानश्रद्धाः संगृह्यन्ते । एतेन श्रद्दधानानामित्येतद् व्याख्यातम् ।

“अमान्यमत्सरो दक्षो निर्ममो दृढसौहृदः ।
असत्वरो ऽर्थजिज्ञासुरनसूयुरमोघवाग्” ॥

इत्यादिवचनमनुसृत्य पुनर्विशिनष्टि । शास्त्रप्रसिद्धेति । एतेनार्थिनामिति व्याख्यातम् । “नाशुचिर्ब्रह्म कीर्तयेत्” “त्रिसंध्यादौ स्नानमाचरेद्” इत्यादिशास्त्रमाश्रित्याह । शुचय इति । सबाह्याभ्यन्तरशौचसंपन्नायेत्यर्थः । “ब्राह्मणो निर्वेदमायाद्” “एतद्ध स्म वै तत्सर्वे ब्राह्मणा अनूचाना विद्वांसः प्रजा न कामयन्ते” “एतं वै तमात्मानं विदित्वा ब्राह्मणा” इत्यादिशास्त्राण्यनुसृत्याह । ब्राह्मणायेति । विविदिषवो ऽपि क्षत्रियादयो न पारमहंस्ये संन्यासधर्मे ऽधिक्रियन्त इति भावः । अत एवोत्पन्नज्ञाना अपि जनकादयो न गार्हस्थ्यं परित्यक्तवन्त इति श्रूयते । इदं च शास्त्रं यथोक्तसंन्यासाधिकारिकमेव नाश्रमान्तराधिकारिकम् । आश्रमान्तरस्य प्रवृत्तिधर्मपरत्वेन तदत्यागे तद्विरुद्धनिवृत्तिनिष्ठापरत्वायोगात्, त्यागे चाश्रमान्तरत्वानुपपत्तेः । वक्ष्यति च भगवान् भाष्यकारः ।

अहं ब्रह्मा ऽस्मि कर्ता च भोक्ता चास्मीति ये विदुः ।
ते नष्टा ज्ञानकर्मभ्यां नास्तिकाः स्युर्न संशयः ॥

इति ।

Digitized by Google

संन्यासिभ्यः प्रवक्तव्यः शान्तेभ्यः शिष्टबुद्धिना ।

इति च । अतः पारिव्राज्यविशेषणं नित्याधिकारित्वख्यापनार्थं नाश्रमान्तरव्यावृत्त्यर्थमिति केषांचिद्व्याख्यानं चिन्त्यं, "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियम्" इत्यादिश्रुतिमाश्रित्याह । विधिवदुपसन्नायेति । विद्याग्रहणार्थं गुरुपादग्रहणपूर्वकम् "अधीहि भगव" इत्यादिमन्त्रोच्चारणेनाभिसंवादनमुपसत्तिस्तां कृतवत इत्यर्थः । शिष्याय शासनार्हाय पूर्वश्रुतत्वादिनिमित्तौद्धत्यरहिताय विनययुक्तायेत्यर्थः । "किंगोत्रो नु सोम्यासि तान् ह स ऋषिरुवाच । भूय एव तपसा श्रद्धया ब्रह्मचर्येण संवत्सरं संवत्स्यथ नासंवत्सरवासिने प्रब्रूयाद्" इति श्रौतलिङ्गमवष्टभ्याह । जातिकर्मेत्यादिना । जातिपरीक्षणं कुण्डगोलकक्षत्रियादिव्यावृत्त्यर्थं, कर्मपरीक्षणं पतितत्वाभिशस्तत्वादिराहित्येन शिष्टताज्ञानाय, वृत्तमाचारः शीलं वा तत्परीक्षणं विद्याग्रहणोत्तरकालमपि तत्परिपालनयोग्यताज्ञानार्थं, विद्या पूर्वाधीतवेदशास्त्रादिरूपा उपास्यदेवतादिविशेषविषया वा सापि परीक्षणीया उक्तार्थग्रहणधारणादियोग्यत्वायोग्यत्वनिश्चयाय, । तथा च श्रुतिः ।

"नाप्रशान्ताय दातव्यं नापुत्रायाशिष्याय वा पुनः"

इति । अभिजनः कुलं जन्मस्थानं तदपि परीक्षणीयं मातापितृभ्यां गुरुभिश्च शिक्षितत्वाशिक्षितत्वज्ञानार्थं,"यथा मातृमान् पितृमानाचार्यवान् ब्रूयाद्" इति श्रौतलिङ्गाद् । एवं विशिष्टाय शिष्याय ब्रूयादित्याचार्यं शिक्षयति । उपदेशस्य दृष्टार्थतामभिप्रेत्याह । पुनःपुनरिति । अवधिमाह । यावद्ग्रहणं दृढीभवतीति । शिष्यस्येतिशेषः ॥ १ ॥

एवमुक्तविशेषणेन शिष्येण गुरूपसत्तिः कार्या गुरुश्च तमुपदिशेद्विद्यामित्युक्तेऽर्थे श्रुतिमुदाहरति । श्रुतिश्चेति ।

(२) श्रुतिश्च, परीक्ष्य तत्त्वतो ब्रह्मविद्यामिति, दृढगृहीता हि विद्याऽऽत्मनः श्रेयसे संतत्यै च भवति, विद्यासंततिश्च प्राण्यनुग्रहाय भवति नौरिव नदीं तितीर्षोः, शास्त्रं च, यद्यप्यस्मा इमामद्भिः परिगृहीतां धनस्य पूर्णां दद्यादेतदेव ततो भूय इति ॥

"परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायाद्"

इत्युपक्रम्य ।

"येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्"

इत्यन्तेन ग्रन्थेनोक्तोऽर्थो निरूपित इत्यर्थः । शिष्यस्य दृढग्रहणपर्यन्तं गुरुणा पुनःपुनर्विद्योपदेष्टव्येत्यत्र हेतुमाह । दृढगृहीता हीति। आत्मनः श्रेयोऽविद्यादिदोषसंसारनिवृत्तिः, संततिः शिष्यप्रशिष्यादिसंचारेण विद्याया अविच्छेदः। विद्यासंततेः क्वोपयोग इत्यत्राह । विद्येति । यथा नदीतरणाय तत्र प्रविष्टस्यागाधे निमज्जतो नरस्य पारं प्रापयितुं नौरुप' स्थाप्यते कृपालुना, तथा संसारसागरे निमज्जतः प्राणिन उद्धरणेन तत्पारं विष्णोः परमं पदं प्रापयितुं विद्यासंतानसंरक्षणमित्यर्थः । पूर्वोक्तशिष्यगुणसंपन्नाय परीक्षिताय विधिवदुपसन्नायैव विद्या देया न यथाकथंचित्प्राप्ताय धनादिलोभाद्वेति गुरोर्नियमार्थं श्रुतिशासनमुदाहरति। शास्त्रं चेति। नियामकं शास्त्रं चात्रास्तीत्यर्थः । तदेवाह । यद्यपीति । इमां पृथिवीमद्भिः परिगृहीतां समुद्रपरिवेष्टितां धनस्य पूर्णां वित्तेनोपचितां दद्यात्कश्चिद्यद्यपि तथापि नैतद्दर्शनं तस्मै दद्याद्यत एतत्ततो वित्तपूर्णपृथिवीदानादपि भूयोऽधिकतरमिति योजना । नह्याकाशादिसमस्तभूतभौतिकाधिष्ठानस्य ततोऽप्यधिकतरस्यापरिच्छिन्नस्य ब्रह्मणो दानस्येदमनुरूपमिति भावः । तथा च श्रुतिः ।

"पादोस्य विश्वाभूतानि त्रिपादस्यामृतं दिवि" ।

इति। तदेवमाचार्येण परीक्षिताय शिष्याय कृपयैव विद्या वक्तव्येत्युक्तम् ॥ २ ॥

तत्र किमाचार्योपगमेन कार्यं, स्वयमेव जिज्ञासोर्न्यायाद्यनुसरणतो विद्योदयसंभवादिति शङ्कायामाहान्यथेति । यद्वा किमित्येवं संकटमवष्टभ्याचार्येण विद्या देया, शिष्यः स्वयमेव तां किं न संपादयेदित्यत आह । अन्यथा चेति ।

(३) अन्यथा च ज्ञानप्राप्त्यभावादाचार्यवान् पुरुषो वेदाचार्याद्धैव विद्याचार्यप्राविता सम्यग्ज्ञानं प्लव इहोच्यते इत्यादिश्रुतिभ्यः, उपदेक्ष्यन्ति ते ज्ञानमित्यादिस्मृतेश्च ॥

तत्र श्रुतिस्मृती प्रमाणयत्याचार्यवानित्यादिना। आचार्याद्धैव विद्या विदिता साभीष्टं प्रापयतीति वाक्यशेषः। आदिपदात्

"तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः,, ॥

इत्यादिवचनं गृह्यते । तथा चातिसूक्ष्मपरमार्थनिर्णयस्य स्वबुद्धिसामर्थ्यमात्रेण संपादयितुमशक्यत्वमेतैर्वाक्यैर्गम्यत इत्यर्थः ॥ ३ ॥

ननु जिज्ञासोरुक्तविशेषणस्य शिष्यस्य सकृदुपदेशग्रहणादेव विद्यादार्ढ्योपपत्तेः किमिति पुनःपुनरुपदेशः कार्य इत्युक्तमत आह । शिष्यस्येति ।

Digitized by Google

(४) शिष्यस्य ज्ञानाग्रहणं च लिङ्गैर्बुध्वा ऽग्रहणे हेतून् अधर्मलौकिकप्रमादनित्यानित्यवस्तुविवेकविषयासंजातदृढपूर्वश्रुतत्वलोकचिन्तावेक्षणजात्याद्यभिमानादींस्तत्प्रतिपक्षैः श्रुतिस्मृतिविहितैरपनयेदक्रोधादिभिरहिंसादिभिश्च यमैर्ज्ञानाविरुद्धैश्च नियमैरमानित्वादिगुणं च ज्ञानोपायं सम्यग् ग्राहयेत् ॥

शिष्यस्य ज्ञानाग्रहणं चकाराद्विपर्ययग्रहणं च मुखादिचेष्टावचनव्यत्ययादिलिङ्गैर्बुध्वा ऽग्रहणादिहेतूंस्तत्प्रतिपक्षैस्तन्निवर्तकैः श्रुतिस्मृतिविहितैरपनयेदिति संबन्धः । तानेवाहाधर्मेत्यादिना । अधर्मः संचितः, लौकिक इहानीतनः, प्रमादः कामचारवादभक्षणादिः, तत्र सूर्यादिदेवतोपासनादिनियमोपदेशेनाधर्मक्षपणं कारणीयं, वर्ज्यावर्ज्यादियतिधर्मशास्त्रेण प्रमादनिरासः, नित्यानित्यविवेकस्य यो विषयश्चेतनाचेतनरूपस्तस्मिन्नसंजातं तत्पर्यन्तं न प्रसृतं यद्दृढपूर्वश्रुतत्वं तद्युक्तिविशेषाद्युपन्यासेनापनीयविवेकपर्यन्ततां नयेदित्यर्थः । लोकचिन्तावेक्षणं लोकानां व्यवहारसाधुत्वासाधुत्वविचारलक्षणं, लोकेभ्यः पूजासन्मानाद्यपेक्षया तत्संसर्गोपरोधेन व्यवहरणं वा । एतच्च वक्ष्यमाणामानित्वमदम्भित्वमित्यादिशास्त्रोक्तनिष्ठोपदेशेनापनेतव्यम् । जात्यादीत्यादिपदात्कुलविद्यादि गृह्यते । त्वंपदार्थपरिशोधनोपदेशेन जात्याद्यभिमानं त्याजयेदित्यर्थः । अभिमानादीनित्यादिपदेन तत्प्रयुक्तो व्यवहारो ऽन्यधिक्करणादिर्गृह्यते । अक्रोधादिभिरित्यत्रादिपदेनाक्रामादयो गृह्यन्ते । अहिंसादिभिश्चेत्यादिपदात्सत्यास्तेयब्रह्मचर्यापरिग्रहा गृह्यन्ते । अक्रोधादीनामहिंसादीनामुपायोपेयभावेनोपदेशो बोद्धव्यः । शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमा उच्यन्ते । तेषां ज्ञानाविरुद्धैरिति विशेषणेन तीर्थयात्राचान्द्रायणोपवासादिकर्मकाण्डपरायणबाह्यसाधनक्रियाप्रधानेश्वरपूजानिष्ठादि च यज्ज्ञाननिष्ठाविक्षेपकं तस्यानादरणीयतां दर्शयति । यमनियमोपदेशस्तु सर्वदोषनिरासाधारणोपाय इति द्रष्टव्यम् । एवं ज्ञानग्रहणप्रतिबन्धकनिवर्तकमुपदिश्य ज्ञानोदयहेतुजातमुपदिशति । अमानित्वादिगुणमिति । आदिपदाददम्भित्वादितत्त्वज्ञानार्थदर्शनान्तं गृह्यते । यद्वा ऽमानित्वेनादम्भित्वादिकं सह पठितत्वेनोपलक्ष्यादिपदेनाद्वेष्टा सर्वभूतानामित्यादिनोक्ता अद्वेष्टृत्वादयो धर्मा ग्राह्याः । अत्र सम्यक्पदमेतन्निष्ठसर्वदोषपरिहारेणायत्नलभ्यं ज्ञानदार्ढ्यमिति दर्शयितुम् । अयं भावः । नहि सकृद्ग्रहणमात्राद्विद्या दृढोत्पद्यते, आवृत्तिरसकृदुपदेशादिति न्यायात्, श्रवणोत्तरकालं मननादिविधानसामर्थ्याच्च । दृढत्वं हि फलपर्यन्तत्वं विद्याया विवक्षित,मतः फलानुकूलतया यावन्निर्विचिकित्सं तत्संजायते तावद्गुरुणा शिष्यं कृतार्थं कर्तुं प्रवृत्तेन विद्योपयोगार्थं वा प्रवृत्तेनोपदेशः कार्य एवेति ॥ ४॥

एवमाचार्यकृत्यमुक्त्वा तस्य लक्षणमाह । आचार्यस्त्विति ।

(५) आचार्यस्तूहापोहग्रहणधारणशमदमदयानुग्रहादिसंपन्नो लब्धागमो दृष्टादृष्टभोगेष्वनासक्तः त्यक्तसर्वकर्मसाधनो ब्रह्मविद्ब्रह्मणिस्थितो ऽभिन्नवृत्तो दम्भदर्पकुहकशाठ्यमायामात्सर्यानृताहङ्कारममत्वादिदोषविवर्जितः केवलपरानुग्रहप्रयोजनो विद्योपयोगार्थी पूर्वमुपदिशेत् ॥

एतच्च तत्त्वजिज्ञासुनाधिकारिणा एवंविध आचार्य उपगन्तव्यो नान्यादृश इति दर्शयितुं, न त्वाचार्येणैवंविधगुणेन भवितव्यमिति नियोगः क्रियते, तस्य कृतार्थत्वादिति द्रष्टव्यम् । शिष्येणानुक्तस्याप्यूहनमूहः, उपदेशसमसमयं शिष्यप्रतिपत्त्यनुकूला ऽपूर्वयुक्तिकल्पनं वा । शिष्यस्य मिथ्याग्रहणापाकरणसामर्थ्यमपोहः, सिद्धान्तप्रतिपक्षनिराकरणसामर्थ्यं वा । शिष्यकृतप्रश्नाश्रयवाक्यार्थानां सद्योवधारणसामर्थ्यं ग्रहणं, गृहीतानां तेषां सारासारावधारणपूर्वकं प्रत्युक्तिसमये स्मरणयोग्यतापादनं धारणं, शमदमौ व्याख्यातौ, दया दुःखिनं प्रत्यनुजिघृक्षा, तदनन्तरं दुःखिनो दुःखापाकरणे प्रवृत्तिरनुग्रहः । आदिशब्दादुपसन्नस्य विनीतस्यानुगृहीतस्यापरित्यागो गृह्यते । यस्तु हिंसानुग्रहयोरनारम्भीति गौतमेन संन्यासिधर्मो दर्शितो, यच्च न व्याख्यानपरो यतिरित्यादिवचनं, तत्ख्यातिलाभपूजापाण्डित्यवृद्ध्यादिहेतुप्रवृत्तिविषयमित्यदोषः । संपन्न इति पूर्वोक्तगुणैराढ्यतोच्यते, लब्धागमः स्वगुरुभ्यः प्राप्तविद्योपदेशः, अनेन विशेषणेन गुरोः साम्प्रदायिकत्वमपि शिष्येणान्वेषणीयमिति सूचयति । दृष्टा भोगा ऐहिकाः, अदृष्टाः पारलौकिकास्तेष्वनासक्तस्तत्साधनलोकाराधनतपोयज्ञादिप्रवृत्तिशून्य इत्यर्थः । यतस्त्यक्तानि सर्वकर्मणां साधनानि धनदारसंग्रहशिखायज्ञोपवीतादीनि येन स तथा, अतो भोगानासक्त इति विदित इत्यर्थः । ब्रह्मविद् महावाक्यार्थप्रत्यगात्मतत्त्वज्ञानवानित्यर्थः । तत्किं परोक्षतयैव, नेत्याह । ब्रह्मणि स्थित इति । ब्रह्मणि स्थितिर्नाम नित्यापरोक्षं ब्रह्मैवाहमस्मीति स्फुटानुभावेनावस्थानम् । एवंविधो ऽपि न यथेष्टचेष्टावानित्याहाभिन्नवृत्त इति । न भिन्नं नोल्लङ्घितं वृत्तमाचारो येन स तथा शिष्टविगर्हितो न भवतीत्यर्थः । दम्भो धर्मध्वजित्वमात्मनो लोके धार्मिकत्वख्यापनमिति यावत् । कुहकं परप्रतारणं, शाठ्यं नैष्ठुर्यं, माया परव्यामोहनं, मात्सर्यं गुणेषु दोषख्यापनम्, अनृतं मिथ्याभाषणम्, अहंकारो देहा-

Digitized by Google

भिमानः, ममत्वं पुत्रशिष्यादिषु स्वत्वाभिमान, एतैर्दम्भादिभिर्दोषैर्वर्जित इत्यर्थः । एवंविधस्य किमित्यन्योपदेशे प्रवृत्तिरित्यत आह । केवलेति । परस्य संसारसागरान्निर्विण्णस्य यः परमपदपारप्रापणरूपो ऽनुग्रहस्तदेव प्रयोजनं यस्य स तथा, केवलविशेषणेनानुषङ्गिकमपि प्रयोजनान्तरं प्रवृत्तिहेतुं वारयति । तर्हि किं निर्निमित्तमेव परानुग्रहे ऽस्य प्रवृत्तिरुन्मत्तप्रवृत्तिवद्यादृष्टिच्छकी, नेत्याह । विद्योपयोगार्थीति । उपयोगो विनियोगः, चात्वाले कृष्णविषाणां प्रास्यतीत्यादिवत् ।

त्यज धर्ममधर्मं च उभे सत्यानृते त्यज ।
उभे सत्यानृते त्यक्त्वा येन त्यजसि तत्त्यज ॥

इत्यत्र येन ज्ञानेन धर्मादिषु प्रवृत्तिनिरोधेन तानि परित्यजसि तज्ज्ञानं परित्यजेत्युक्ते ज्ञानस्यामूर्त्तत्वात्स्वरूपेण त्यागायोगाद्विशिष्टे शिष्ये प्रतिपादनं प्रतिपत्तिकर्म क्रियते, तच्च वस्तुमहिम्ना परानुग्रहतां प्रतिपद्यत इति भावः ॥ ५ ॥

एवंविध आचार्यः पूर्वमुपदिशेदित्युक्तं तत्रोपदेशक्रमं दर्शयति । प्रथमं किमुपदिशेदित्यपेक्षायामात्मैकत्वप्रतिपादकवाक्यान्युपदिशेदिति वाक्यानि पठति । सदेवेत्यादिना ।

(६) सदेव सोम्येदमग्र आसी, देकमेवाद्वितीयं, यत्र नान्यत्पश्यति, आत्मैवेदं सर्वं, ब्रह्मैवेदं सर्वम्, आत्मा वा इदमेक एवाग्र आसीत्, सर्वं खल्विदं ब्रह्मेत्याद्या आत्मैक्यप्रतिपादनपराः श्रुतीरुपदिश्य च ग्राहयेद् ब्रह्मणो लक्षणं, य आत्मापहतपाप्मा यत्साक्षादपरोक्षाद्ब्रह्मयोशनायापिपासे,नेति नेति अस्थूलमनणु स एष नेति नेति, अदृष्टं द्रष्टृ विज्ञानमानन्दं, सत्यं ज्ञानमनन्त,मदृश्ये नात्म्ये, स वा एषो महाज आत्मा ऽप्राणो ह्यमनाः स बाह्याभ्यन्तरो ह्यजो विज्ञानघन एवानन्तरमाबाह्यमन्यदेव तद्विदितादथो विदितात् ॥

इत्यात्मैकत्वप्रतिपादनपराः श्रुतीः पूर्वमुपदिशेदिति संबन्धः । यत्र नान्यत्पश्यतीत्यत्र नान्यच्छृणोति नान्यद्विजानाति स भूमेति वाक्यशेषः । ब्रह्मैवेदं विश्वमिदं वरिष्ठमिति शेषः । अत्र सद्भूमात्मब्रह्मशब्दाः पर्यायाः । अनेकशाखादिगतवाक्योदाहरणं गतिसामान्यादिति न्यायेनाविरोधतः स्वार्थपरत्वख्यापनार्थम् । किं तद्ब्रह्मादिशब्दैर्वस्तूच्यते, कथं च तदद्वितीयमवगम्यते इत्यपेक्षायामाह । उपदिश्य च ग्राहयेद् ब्रह्मणो लक्षणमिति । योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येतीति शेषः । आनन्दमनन्तमित्युभयत्र ब्रह्मेति वाक्यशेषः । एवं सर्वत्र वाक्येषु शेषाक्षराणि श्रुतिपरिचयेन पूरणीयानि, ग्रन्थभूयस्त्वाच्च सर्वत्र प्रदर्श्यन्ते । य आत्मापहतपाप्मेत्यादिप्राजापत्यवाक्येन जाग्रदाद्यवस्थासु द्रष्टृत्वेनानुगतः अवस्थाधर्मरहितो ऽशरीरः प्रियाप्रियाभ्यामसंस्पृष्टः प्रत्यगात्मैव परं ज्योतिः परं ब्रह्म उपास्यं ज्ञेयं चेति प्रकरणार्थोपन्यासेन प्रत्यग्ब्रह्मैक्यमुपलक्षयेदित्यर्थः । य आत्मा सर्वान्तरो दृष्टेर्बुद्धिवृत्तिलक्षणाया द्रष्टा प्राणनादिव्यापारोपलक्षितः स एवाशनायादिप्राणान्तःकरणशरीरधर्मातीतः साक्षादपरोक्षाद्ब्रह्मेति द्वितीयवाक्यार्थः । नेतिनेत्यादिवाक्यानां सकलदृश्यप्रविलापनेनाद्वितीयात्मतत्त्वोपलक्षणपरत्वम् । अदृष्टं द्रष्टृ इत्यादिना नान्यदतोऽस्ति द्रष्ट्रित्यादिवाक्यैः सह सर्वसाक्षिप्रत्यगात्मैवाक्षरं यस्मिन्नव्याकृताकाशादिधरिण्यन्तं जगदोतं च प्रोतं चेत्युपलक्षितं तत्त्वमित्यर्थः । विज्ञानमानन्दं ब्रह्मेति ।

कोऽन्वेनं जनयेत्पुनः ।
मर्त्यः सन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति ॥

इति पृष्टस्य जगन्मूलकारणत्वेनोपलक्षितस्य स्वरूपं विज्ञानानन्दलक्षणमिति तत्पदार्थतत्त्वमुपलक्षितमित्यर्थः । एवं "ब्रह्मविदाप्नोति पर"मिति प्रकृतस्य ब्रह्मणः "सत्यं ज्ञानमनन्तं ब्रह्मेति" स्वरूपं निर्दिश्य "तस्माद्वा एतस्मादात्मन आकाशः संभूत" इत्यादिना जगत्कारणत्वेनोपलक्ष्य तस्यैव सृष्टेषु कार्यकारणसंघातेषु प्रवेशं दर्शयित्वा "अदृश्येनात्म्ये निरुक्त" इत्यादिना प्रपञ्चापवादेन सर्वाधारं सर्वसाक्षिणमात्मानमानन्दरूपं "ब्रह्मपुच्छं प्रतिष्ठेति", "अथ सो ऽभयं गतो भवति" "स यश्चायं पुरुषे यश्चासावादित्ये स एक" इति च तत्त्वमुपलक्षयेदित्यर्थः । "स वा एष महानज आत्मा यो ऽयं विज्ञानमयः प्राणेषु य एषो ऽन्तर्हृदय आकाशस्तस्मिञ्छेते स सर्वस्य वशी"त्यादिना जाग्रदाद्यवस्थाधर्मैरनन्वागतस्यासङ्गस्य कामाकामाभ्यां संसारमोक्षावनुभवतो बुद्ध्यादिसाक्षिणश्चिदात्मनो ऽन्तर्हृदये आकाशशब्दवाच्याजरामराभयादिलक्षणब्रह्मभेद इति तत्त्वमुपलक्षितमित्यर्थः ।

"दिव्यो ह्यमूर्त्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः ।
अप्राणो ह्यमनाः शुभ्रो ऽक्षरात्परतः परः" ॥

इति । "अथ परा यया तदक्षरमधिगम्यते यत्तददृश्य"मित्यादिना ग्राह्यग्राहकाद्यनेकोपाधिप्रतिषेधेनोपलक्षितस्य सर्वभूतयोनित्वेन च संभावितस्य सर्वज्ञस्य सर्वविदोऽग्निविस्फुलिङ्गादिवज्जीवरूपेण विभक्तत्वेनास्य प्राप्तपरिच्छेदशङ्कानिराकरणेन प्रत्यक्त्वमुपलक्षितं "ब्रह्मैवेदं विश्वमिदं वरिष्ठ"मित्यन्तेनेत्यर्थः । "इदं सर्वं यदयमात्मे"ति सर्वस्य दृश्यस्यात्मव्यतिरेकेण स्वरूपाभावमुक्तं दुन्दुभ्यादिदृष्टान्तैरुपपाद्य किं तदात्मनः स्वरूपमित्यपेक्षायां महद्भूतमनन्तमपारं विज्ञानघन

एवेति तत्त्वमुपदिष्टमित्यर्थः । "तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभू"रिति तत्त्वं पदार्थपरिशोधनपूर्वकं वाक्यार्थो दर्शितः । तत्रापूर्वमित्यादिना कार्यकारणत्वादिधर्मरहितत्वेन तत्पदार्थ उपलक्षितः, सर्वानुभूरिति सर्वसाक्षितया त्वंपदार्थः, अयमात्मा ब्रह्मेति वाक्यार्थ, इति विभागः । मनःप्राणादिषु प्रकाशकत्वेन प्रेरकत्वेन चोपलक्षितमात्मतत्त्वं ब्रह्म, विदिताविदिताभ्यां कार्यकारणाभ्यामन्यदिति तत्स्वरूपं निवेद्यते "ऽन्यदेव तद्विदितादथो अविदितादधी"-त्यनेनेत्यर्थः ॥ ६ ॥

क्व चिदाकाशशब्देनापि ब्रह्म लक्ष्यत इत्याह । आकाशो वै नामेति ।

(७) आकाशो वै नामेत्यादिश्रुतिभिः, स्मृतिभिश्च, "न जायते म्रियते" "नादत्ते कस्य चित्पापं" "यथाऽऽकाशः स्थितो नित्यं" "क्षेत्रज्ञं चापि मां विद्धि" "न सत्तन्नासदुच्यते" "अनादित्वान्निर्गुणत्वात्" "समं सर्वेषु भूतेषु" "उत्तमः पुरुष" इत्यादिभिः श्रुत्युक्तलक्षणाविरुद्धाभिः परमात्मासंसारित्वप्रतिपादनपराभिस्तस्य सर्वेणानन्यत्वप्रतिपादनपराभिश्च ॥

नामरूपयोर्जगद्बीजभूतयोरव्याकृतयोर्यो निर्वहिता व्याकर्त्ता ते नामरूपे यदन्तरा यस्य मध्ये वर्त्तेते न ततः पृथक् स्वतन्त्रे तद्ब्रह्म तदमृतं स आत्मेति वाक्यशेषाद्दहरोऽस्मिन्नन्तराकाश इत्यत्राकाशशब्देनापि ब्रह्म लक्ष्यत इत्यर्थः । आदिपदा"त्प्राणोऽस्मि प्रज्ञात्मा प्राण इति होवाचे,,त्याद्याः श्रुतयो गृह्यन्ते । न केवलं श्रुतिभिरेव ब्रह्मणो लक्षणं ग्राहयेदपि तु स्मृतिभिश्चेत्याह । स्मृतिभिश्चेति, श्रुत्युक्तलक्षणाविरुद्धाभिरिति स्मृतिविशेषणं, श्रुत्युक्तेर्थे स्मृत्युदाहरणं प्रतिपत्तिदार्ढ्यार्थं, न श्रुतेः प्रामाण्यसिध्यर्थं, विशेषणं च सांख्यादिस्मृतावतिप्रसङ्गव्यावृत्त्यर्थमिति च द्रष्टव्यं, परमात्मासंसारित्वप्रतिपादनपराभिरित्यादिविशेषणद्वयं श्रुतिस्मृत्योः साधारणं, परमश्चासावात्मा च परमात्मा, परमत्वं चास्याविद्यातत्कार्यसंघाततदवस्थासाक्षितया ऽव्यभिचार्यलुप्तप्रकाशस्वभावत्वं, तस्यासंसारित्वप्रतिपादनं संघातादवस्थात्रयोपाधेः सम्यग्विवेचनं तत्पराभिरित्यर्थः । तस्य शोधितस्य त्वंपदार्थस्य सर्वेण सर्वमस्मिन्निति सर्वं सर्वाधिष्ठानं ब्रह्म तेनानन्यत्वं तदेकात्मत्वं तत्प्रतिपादनपराभिरित्यर्थः । न्यायानुगृहीताभिश्चेत्यस्मिन्नर्थे चकारः ॥ ७ ॥

एवं वाक्योपदेशेन तदर्थोपलक्षणपरश्रुतिस्मृतिव्याख्यानेन च प्रतिबोधितं शिष्यमज्ञानसंशयविपर्यासापोहेनोपदिष्टार्थे मतिनैश्चल्याय पुनः पृच्छेदाचार्य इत्याचार्यकृत्यमाह । एवं श्रुतिस्मृतिभिश्चेति ।

(८) एवं श्रुतिस्मृतिभिर्गृहीतपरमात्मलक्षणं शिष्यं संसारसागरादुत्तितीर्षुं पृच्छेत्, कस्त्वमसि सोम्येति, स यदि ब्रूयाद्, ब्राह्मणपुत्रो ऽदोन्वयो ब्रह्मचार्यासं गृहस्थो वेदानीमस्मि परमहंसपरिव्राट् संसारसागराज्जन्ममृत्युमहाग्राहादुत्तितीर्षुरि,त्याचार्यो ब्रूया,दिहैव ते सोम्य मृतस्य शरीरं वयोभिरद्यते मृद्भावं चापद्यते तत्र कथं संसारादुद्धर्त्तुमिच्छसीति, नहि नद्याः अवरे कूले भस्मीभूतो नद्याः पारं तरिष्यतीति, स यदि ब्रूयाद्, अन्यो ऽहं शरीरात् ॥

तथा च शिष्यप्रतिपत्तिपरीक्षणार्था श्रुतिर्भवति "यदि मन्यसे सुवेदेति दहरमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूप" मित्याद्या । हे सोम्य प्रियदर्शन कस्त्वं किमात्मक इति गुरुणा पृष्टो यदि शिष्यो ऽप्रतिपत्त्यादिदोषप्रतिबन्धवशाद् ब्रूयाद्ब्राह्मणपुत्र इत्यादि, तदाचार्यो ब्रूयादिति संबन्धः । असावन्वयो वंशो यस्य सोऽहमदोन्वयः, अमुकदीक्षितवंश्यो ऽहमित्यर्थः, महाग्राहो नक्रः तिमिङ्गिलो वा, अहो ऽयमद्यापि देहाभिमानप्रतिबद्धज्ञानोदय इति तं त्याजयत्याचार्यः । इहैव तव इत्यादिना । वयोभिः पक्षिभिर्गृध्रादिभिरित्यर्थः । एवं स्थूलदेहाभिमाने त्याजिते ततो विविक्तमात्मानं मन्यमानः सन्स यदि शिष्यो ब्रूयादन्यो ऽहं शरीरादित्यादि तदा इत्याचार्यो ब्रूयादित्युत्तरेणान्वयः ॥ ८ ॥

कथं शरीरादन्यत्वमवगतमित्यत आह । शरीरं तु जायत इत्यादिना ।

(९) शरीरं तु जायते म्रियते वयोभिरद्यते मृद्भावमापद्यते शस्त्राग्न्यादिभिश्च विनाश्यते व्याधिभिश्च प्रयुज्यते, तस्मिन्नहं सुकृतधर्माधर्मवशात्पक्षीव नीडमिव प्रविष्टः पुनःपुनः शरीरविनाशे धर्माधर्मवशाच्छरीरान्तरं यास्यामि पूर्वनीडविनाशे पक्षीव नीडान्तरम्, एवमेवाहमनादौ संसारे देवमनुष्यतिर्यङ्निरयस्थानेषु स्वकर्मवशादुपात्तमुपात्तं शरीरं त्यजन्नवंनवं चान्यदुपाददानो जन्ममरणप्रबन्धचक्रे घटीयन्त्रवत्स्वकर्मणा भ्राम्यमाणः क्रमेणेदं शरीरमासाद्य संसारचक्रभ्रमणादस्मान्निर्विण्णो भगवन्तमुपसन्नो ऽस्मि संसारचक्रभ्रमणप्रशमायेति, तस्मान्नित्य एवाहं शरीरादन्यः, शरीराण्यागच्छन्त्यपगच्छन्ति च वासांसीव पुरुषस्येति । इत्याचार्यो ब्रूया,त्साध्ववादीः सम्यक् पश्यसि ॥

Digitized by Google

शरीरावस्थाद्रष्टृत्वाद्दृश्याद्विकारिणो ऽहं द्रष्टा ऽविकार्यन्य इत्यर्थः। कथं तर्हि देहादन्यस्य तव देहाभिमानपूर्वको व्यवहार इति चेदविद्याप्रयुक्तकामप्रवर्त्तितधर्माधर्मवशादित्याह। तस्मिन्नहमिति। सुकृतविशेषणेनाहंकारपूर्वकत्वद्योतनादहंकारस्य चाविद्यां विना केवले आत्मन्यसंभवादविद्याप्रयुक्ताभिमानमूलत्वं धर्माधर्मयोरिति भावः। यद्येवं जानासि मा तर्हि कर्म कार्षीरिति चेत्पूर्वकृतकर्मवासनापरवशतयोत्तरोत्तरकर्मप्रवृत्तेर्न शक्नोम्यहं निरोद्धुमित्यभिप्रेत्याह। अनादाविति। ह्रियमाणकालनद्याः क्व चित्तरति क्व चिदेत्यादिन्यायेनाह। क्रमेणेदं शरीरमासाद्येति। बहूनां कर्मणां संचितत्वे ऽपि क्रमेणैव फलारम्भो न युगपदित्येकभविकत्ववादः क्रमशब्देन निरस्यते। एतेन नित्यानित्यविवेक आत्मनो जात इति फलितमाह। तस्मान्नित्य एवेति। आचार्यस्तु विवेकिनं प्रशंसन्नभ्यनुजानाति, साध्ववादीरिति ॥ ९ ॥

एवं विवेकवतस्तव वर्णाश्रमाद्यभिमानो भ्रान्तिमूल एवेत्याह। कथं मृषावादीरिति।

(१०) कथं मृषावादी,र्ब्राह्मणपुत्रो ऽदोन्वयो ब्रह्मचार्यासं गृहस्थो वेदानीमस्मि परमहंसपरिव्राडिति, स यदि ब्रूयाद् भगवन्कथमहं मृषावादिषमिति, तं प्रति ब्रूयादाचार्यो, यतस्त्वं भिन्नजात्यन्वयसंस्कारं शरीरं जात्यन्वयसंस्कारवर्जितस्यात्मनः प्रत्यभ्यधाःसौर्ब्राह्मणपुत्रो ऽदोन्वय इत्यादिना वाक्येनेति, स यदि पृच्छेत्कथं भिन्नजात्यन्वयसंस्कारं शरीरं, कथं वा जात्यन्वयसंस्कारवर्जित इत्या,-चार्यो ब्रूयाद्, शृणु सोम्य, यथेदं शरीरं त्वत्तो भिन्नं भिन्नजात्यन्वयसंस्कारं त्वं च जात्यन्वयसंस्कारवर्जित इत्युक्त्वा, तं स्मारये,त्स्मर्तुमर्हसि सोम्य परमात्मानं सर्वात्मानं यथोक्तलक्षणं श्रावितो ऽसि, "सदेव सोम्येद"मित्यादिभिः श्रुतिभिः स्मृतिभिश्च लक्षणं च तस्य श्रुतिभिः स्मृतिभिश्च ॥

कथं भ्रान्तिर्ममेति पृष्टवन्तमाचार्यो ब्रूयादित्याह। तमिति। किं ब्रूयादित्येतदाह। यतस्त्वमित्यादिना। जातिर्जन्म, अन्वयः पित्रादिः, संस्कारो जातकर्मादिरुपनयनादिश्च, भिन्ना अनात्मभूता जात्यन्वयसंस्कारा यस्य शरीरस्य तत्तथा जात्यन्वयसंस्कारवर्जितस्यात्मनः कूटस्थस्य स्वरूपमेवाहमित्युल्लिखन् शरीरं प्रति ज्ञातवान् ब्राह्मणपुत्र इत्यादिना वाक्येन, अतो विपर्ययदर्शित्वान्मृषावादीरित्यर्थः। उक्तमर्थं विशदीकर्तुं शिष्यप्रश्नमुत्थापयति। स यदीति। गुरोरुत्तरदानाय प्रवृत्तिमाहाचार्येति। वक्तव्यस्यार्थस्यातिसूक्ष्मदृष्टिगम्यत्वात्सावधानो भवेत्याह। शृणु सोम्येति। यथेदमित्यादि वर्जित इत्यन्तं शिष्योक्त्यनुवादवाक्यमुक्त्वा तं शिष्यं पूर्वोक्तं परमात्मलक्षणं स्मारयेदिति योजना। यस्मात् सदेवेत्यादिश्रुतिभिस्तदर्थानुकूलाभिः स्मृतिभिश्च यथोक्तलक्षणं परमात्मानं सर्वात्मानं श्रावितो ऽसि तस्मात्स्मर्तुमर्हसि सोम्येति योजनीयो ग्रन्थः। "य आत्मापहतपाप्मे"त्यादिभिः श्रुतिभि"र्न जायत" इत्यादिस्मृतिभिश्च। पूर्वोक्तं ब्रह्मोपलक्षणं च तस्यात्मनः स्मर्तुमर्हसीत्यन्वयः ॥ १० ॥

॥ श्रीः ॥

॥ अथ बालरामायणाख्यनाटकस्य ॥

॥ नवमोऽङ्कः ॥

अतः परं रावणवधो भविष्यति ।

ततः प्रविशति यमपुरुषः तत्रभवतो लुलायलक्ष्मणः सकलप्राणभृतां विहितविनाशस्य कीनाशस्य किमपि विश्वातिशायिनी प्रभविष्णुता । यतः ।

नित्यस्मिताम्बुरुहविष्टरसंनिविष्टः
स्वेच्छाविनिर्मितचतुर्दशलोक एकः ।
ब्रह्मेति यः किमपरं कविता श्रुतीनां
तस्यापि निःश्वसितसंहृति न्यक्कृतान्तात् ॥ १ ॥

परिक्रम्य पार्श्वे विलोक्य च। अहो नक्तंचरचक्रवर्त्तिनो वीरकचूडामणेः किमपि निष्प्रतीपमाज्ञातं यद्देषोऽस्मि तेनापि भगवता भूर्भुवःस्वस्त्रयविहितनियमेन यमेन विजनेऽपि श्रवसि समादिष्टः यथाज्ञापितोऽस्मि पुरुहूतेन यदुत विनतानन्दनः स्यन्दनरूपतामारोप्यास्माभिः परिकल्पितमातलिसूतसुनीतः सारथिर्दाशरथेः समरसीम्नि जैत्रं पत्रं कृतः संप्रति तु तादृशस्य रामभद्रस्य तादृशेन रावणेन सह द्वन्द्वयुद्धमनुमन्यामहे दिदृक्षामहे च तदुद्धृतनिजाक्षपटलपटलीभ्यो लङ्कालोकलेखमानमयेन जानीमः ।

कदा केषां च केभ्यश्च क्षयो लङ्कानिवासिनां ।
रामात्तु दशकण्ठस्य किंविधो भविता वधः ॥ २ ॥

येन तत्रैव क्षणे चारणोपदिश्यमानमहावीरप्रकाण्डप्रचाराः पुत्रदर्शनकुतूहलिना दिव्यरूपेण परमसुहृदा दशरथेन सह संग्राममसीमानमवतराम इति तद्द्रुममुत्र महाक्षपटलिकं मद्वचनाच्चित्रगुप्तमादिश येन लङ्कालेख्यकमुद्धृत्य समर्पयति पुरंदरश्रावणाय तद्यावच्चित्रगुप्तमेवोपसर्पामि परिक्रामितकेन विचिन्त्य अहो दशाननः सर्वेषामुपरि पराक्रमेण तथाहि ।

यत्र दृष्टे हरेरक्ष्णां सहस्रं कुड्मलायते ।
कृतान्तदण्डः सोऽप्यस्य कण्ठे किमपि कुण्ठितः ॥ ३ ॥

अपिच ।

अवतरति विधाय ब्रह्मदण्डं प्रचण्डं
सकलजननभाजां कल्पितान्ते कृतान्ते ।
समरशिरसि यस्य प्राप भङ्गं धुताङ्गः
खुरदलितधरित्रीचित्रकायो लुलायः ॥ ४ ॥

कथमयं चित्रगुप्तः ।

ततः प्रविशति चित्रगुप्तः अङ्गभङ्गनाटितकेन ।

दिवानिशं राक्षसमण्डलस्य
प्रचण्डरामानुचरैर्जितस्य ।
निबध्नतो मे निधनप्रपञ्चं
स्थितः करः खेदजडाङ्गुलीकः ॥ ५ ॥

पुरुहूतः । उपसृत्य कर्णे एवमेवं ।

चित्रगुप्तः यदादिशति स्वामी इदमर्प्यते निबन्धोद्धरणनाटितकेन न खलु कश्चिदिह प्रच्छन्नो वा मत्तो वा योऽपि मन्त्रं निर्भेदयेत् साक्षात्करणाय तत् प्रतिवाचय । पुरुषो वाचयति ।

अतिक्रान्ते कृते काले प्राप्ते त्रेतादिवत्सरे ।
कृष्णकार्तिकपक्षाद्यदिवसोदययोगिनि ॥ ६ ॥
रामैकरतसुग्रीवप्लवङ्गमबलैर्बलात् ।
लङ्काऽलङ्कारतां बिभ्रत्युपरुद्धा महोदधेः ॥ ७ ॥
धूम्राक्षं क्रोधधूम्राक्षमकम्पनमकम्पनं ।
हतवानञ्जनाजन्मा भिन्नाञ्जनसमप्रभं ॥ ८ ॥
प्रहस्तो दीर्घहस्तेन नीलेनाशु निमीलितः ।
द्वितीयेऽह्नि द्विधा चक्रे कुम्भकर्णं रघूद्वहः ॥ ९ ॥
नरान्तकस्यान्तकोऽभूदङ्गदो रुचिराङ्गदः ।
नीतो देवान्तकश्चान्तं त्रिशिराश्च हनूमता ॥ १० ॥
ऋषभेण महापार्श्वः पार्श्वपीडनतो हतः ।
चक्रेऽतिकायं निष्कायं तृतीयेऽह्नि च लक्ष्मणः ॥ ११ ॥
कुम्भकर्णोद्भवौ कुम्भनिकुम्भौ दम्भपण्डितौ ।
हरिराजहनूमद्भ्यां चक्राते यमसेवकौ ॥ १२ ॥
मकराक्षं सरोजाक्षः खरपुत्रं खरान्तकः ।
रामो गुणद्रुमारामो निजघान घनौजसं ॥ १३ ॥
मेघनादं महानादं सायकैर्हतनायकैः ।
लक्ष्मणः सिंहलक्ष्माणं बबाध प्रियबान्धवः ॥ १४ ॥
महोदरो विरूपाक्षो विरूपाक्षो महोदरः ।
चतुरेण चतुर्थेऽह्नि सुग्रीवेण रणे हतौ ॥ १५ ॥
संग्रामे वीरसंग्रामे राजितः समराजितः ।
चक्रे रणमहाचक्रे मार्गणैर्मर्ममार्गणैः ॥ १६ ॥
दशकण्ठो धृतोत्कण्ठो राघवादस्त्रलाघवात् ।
पञ्चमेऽहनि पञ्चत्वं प्रयासेन प्रयास्यति ॥ १७ ॥

युगलकं । चित्रगुप्तः । तदपरिहीणकालं भगवन्तमुपतिष्ठ येन पुरंदरादेशमनुतिष्ठति स्वामी ।

इति निष्क्रान्तौ विष्कम्भकः ।

ततः प्रविशतः पुरंदरदशरथौ चारणमिथुनं च । चारणः । आर्ये मातले सकलदानवेश्वरपराक्रमणं सौत्रामणं अतिकुतूहलोत्तानितलोकलोचनपक्ष्माणमैरावणलक्ष्माणं गगनाङ्गणसंचरणवेगतरलितमाणिक्यं किंकिणीनिनदनिःस्यन्दनं स्यन्दनमितः कुरु अयमसावतिसुरासुरसंगरनिवेशो रामरावणयोः समरसंरम्भोद्देशः । सर्वे रथवेगं नाटयन्ति ।

दशरथः । भगवन् गीर्वाणनाथ इतः प्रसादं विधाय निधीयन्तां दृष्टयः ।

अयमनुकृतवल्लीफुल्लतापिच्छगुच्छो
रणभुवमवतीर्णः कार्मुकी रामभद्रः ।
अयमपि दशकण्ठः कुण्ठिताम्भोदशोभः
परिकलयति बाणं भ्रान्तकोदण्डदण्डः ॥ १८ ॥

कर्णं दत्वा आकाशे । किमाह रभसोल्लासितहृदयामोदमुद्रो रामभद्रः ।

भो लङ्केश्वर दीयतां जनकजा रामः स्वयं याचते
कोऽयं ते मतिविभ्रमः स्मर नयं नाद्यापि किंचिद्गतं ।
नैवं चेत् खरदूषणत्रिशिरसां कण्ठासृजा पङ्किलः
पत्री नैव सहिष्यते मम धनुर्ज्याबन्धबन्धूकृतः ॥ १९ ॥

पुरंदरः । सखे भूकाश्यप कतिहायनः पुनरयं वत्सो रामभद्रः, येनेदृशान्यतिपरिणतप्रणेयानि च वचांसि वक्तुं शिक्षितः ।

दशरथः । सविनयं । देव भवदनुग्रहस्यैव प्रभावः स खल्वयस्कान्तमणेरनुभावो यदयो द्रवति । आकाशे कर्णं दत्वा । किमाह राक्षसराजः रेरे रावण दोर्दण्डचण्डिमाहृतराम त्वत्पूर्वपुरुषस्यापि प्रहरणैर्नैव सोढमासीत् तथाहि । स मया ।

भृङ्गः स्तम्बेरमेणेव मदलम्पटचेष्टितः ।
अनरण्यो वरेण्यश्रीश्चपेटी चिपिटीकृतः ॥ २० ॥

किंच रे अनरण्यकुलकुमार ।

चक्रे चक्रं मुरारेर्मयि कुपितवधूकुण्डलक्षेपलीला-
मस्मिन्वंसे विभिन्नस्तडिति बिसलता काण्डवत् कालदण्डः ।
वक्षस्यूर्जस्वि वज्रं गतमिह च तुलां स्त्रैणहारप्रहारै-
र्यत् सत्यं पत्रिणस्ते मम वपुषि घने मन्मथास्त्रीभवन्ति ॥ २१ ॥

पुरंदरः । विचिन्त्य । अहो महदन्तरं रामरावणयोर्वचनचातुर्यं प्रति यद्वा मतिः परिणमन्ती पुरुषमुदात्तयति न वयः ।

चारणः । कर्णं दत्त्वा आकाशे । किमाह रामभद्रः तर्हि सत्यनामयमनङ्गबाणोपमानो बाणः ।

चारणी । ससंभ्रमं प्रणम्य । भअवं पुरंदर णिवेसीअंतु विसदकंदोदकाणणमणोहरा इदोइदो अच्छिविक्खेवा । जदो पढमं कोदंडमंडलादो पलअकेउदंडप्पमाणो बाणो पच्छा कोसलणरिंदणंदणस्स वअणादो वाणी णिग्गता भअवं इंदाणीवल्लह असुदपुव्वं अदिट्ठपुव्वं च रामचंदचरिदं जं दाणिं दसाणणस्स मंदोदरीचडुलचुंबणविलुत्ततिलअबंधे णिडालवट्टे जअधअदंडत्तणमुवणीदो बाणो * ।

चारणः । सुगेहिनि सुदृष्टिरसि ।

यस्मिन्नम्बकमम्बिकापतिरसौ देवस्तृतीयं च हत्
पावं यत्र च रोचनाम्बुतिलकं न्यस्यन्ति पृथ्वीभुजः ।
क्रोधेऽप्युं भुकुटीपुटेन घटते यच्च त्रिभङ्गात्मना
तत्रैव त्रिदिवद्रुहः प्रथमतो रामेण बाणोऽर्पितः ॥ २२ ॥

चारणी । सविषादं । हध्धीहध्धी हदासदसकन्धरेण विणिब्भरदलदिंदीवरवजाहिरामस्स रामस्स गिरिसिलाविसालं वच्छत्थलमुद्दिसिअ कअंतदाढाजरठो सरो सन्धिदो † ।

दशरथः । कः कोऽत्र धनुर्धनुः पुरंदरप्रसादीकृतसखिभावे सति दशरथे कथमिव रावणो रामभद्रं प्रहरतु ।

पुरंदरः । सखे दशरथ द्वन्द्वयुद्धमनुचितं क्षत्रधर्मस्य दिव्यभावस्य च यद्द्वन्द्ववृत्तिरपि शस्त्रं गृह्णाति ।

दशरथः । तत् कथयतु वन्द्यः किमत्र सांप्रतं ।

पुरंदरः । यदत्र सांप्रतमसांप्रतं वा राघवधुरंधरो रामदेव एव तद्वेद ।

चारणः ।

यन्मैथिलीमदनतल्पतलं यदास्त-
मारीचरक्षमृगचर्मशिलाघनं च ।
रामस्य वक्षसि चिरोज्झितहारदाम्नि
तस्मिन्नयं दशमुखेन शरो निखातः ॥ २३ ॥

दशरथः । कथं रावण निपुणोऽसि यदेकेन बाणेन हृदये द्वयं ताडितं रामो दशरथश्च ।

---

* भगवन् पुरन्दर निवेश्यन्तां विशदकमलकाननमनोहरा इतइतोऽक्षिविक्षेपाः । यतः प्रथमं कोदण्डमण्डलात् प्रलयकेतुदण्डप्रमाणो बाणः पश्चात् कोशलनरेन्द्रनन्दनस्य वदनाद्वाणी निष्क्रान्ता । भगवन्निन्द्राणीवल्लभ अश्रुतपूर्वमदृष्टपूर्वं च रामचन्द्रचरितं यदिदानीं दशाननस्य मन्दोदरीचटुलचुम्बनविलुप्ततिलकबन्धे ललाटपट्टे जयध्वजदण्डत्वमुपनीतो बाणः ।

† हाधिक्हाधिक् हताशदशकन्धरेणापि निर्भरदलदिन्दीवरव्रजाभिरामस्य रामस्य गिरिशिलाविशालं वक्षस्थलमुद्दिश्य कृतान्तदंष्ट्राजरठः शरः संहितः ।

चारणः ।

मन्दोदरीस्तनविसूत्रितकुङ्कुमं य-
दुद्धातकणचूर्णविकीर्णहारं ।
लङ्केश्वरस्य हृदि तत्र भवद्भुवाऽपि
मारीचरक्तपिहितो निहितः पृषत्कः ॥ २४ ॥

चारणी । सचमत्कारं आअण्णापादिदकोदंडमंडलनिग्गलंतसरधोरणीणीरंध्रणिरुध्धभुअणकंदरो सुट्ठु खु रामरावणाणं णिब्भरो समरसंरंभो अहह का वि लक्खणजेट्ठस्स दसरहणंदणस्स धाणुक्कदा जेण अदिक्कमिअ रधवरकेउदंडं सरप्पदा पअट्टंति * ।

पुरंदरः । सखे महीमहाराज अमुना रामशरविद्यावैशारद्येन देवं त्रिपुरान्तकरं शंकरमनुस्मारितोऽस्मि ।

दशरथः । रावणावलोकनाटितकेन कथं रामभद्रचरितप्रमोदवते भगवते महेन्द्रायापि कुप्यति दशास्यः कर्णं दत्त्वा आकाशे । किमाह रावणः ।

स्मर्तुं युक्तः स तव समयः संयतं त्वां विमोक्तुं
शच्या यस्मिन्नहमतिशुचा याचितो भर्तृभिक्षाम् ।
यद्वा क्षुद्रो जन इव कथं कथ्यतां राक्षसेन्द्रः
पाणौ यस्य स्मयगरजुषामौषधं चन्द्रहासः ॥ २५ ॥

अपिच रे कपिललोमशवाहो अहल्याजार ।

बाणान् स्यन्दनकेतुयष्टिसुहृदो रामस्य नामाङ्कितान्
दृष्ट्वा वासव किं दृशां दशशती निःशल्यमुत्फुल्लति ।
सद्यस्तापसकामिनोऽस्य विमतेराज्ञो तु कृत्त्वा शिर-
स्त्वां कारागृहदत्तगाढनिगडं कर्ता प्रगे रावणः ॥ २६ ॥

दशरथः । भूय आकाशे कर्णं दत्त्वा । किमाह वत्सो मे रामभद्रः अहो बालिवालवयस्य पौलस्त्य भवादृशेभ्यो वीरवरपरिभाषाः प्रवर्तन्ते तत् किमिदं नाम यदन्यः प्रतिपक्षोऽन्यस्मै कुप्यते तदेहि मामेव योधय । यद्दुर्म्मार्गमार्गणादपि दाशरथिना क्षत्रियेण भवान् विनेय एव । विचिन्त्य, । किमाह रावणः रेरे मानुषीपुत्रायमसावक्षत्रियो रावणः स भवान् क्षत्रियो रामः तद् दृश्यतां कतरो विनेयः कतरो विनेतेति, किमाह रामभद्रः हंहो अमानुषीपुत्र अयमसौ क्षत्रियो रामः स भवानक्षत्रियो रावणस्तदत्र दृश्यतां कतरो विनेयः कतरो विनेतेति ।

चारणः । विलोक्य । कथममर्षेण दर्पिताभ्यां रामरावणाभ्यां परस्परं प्रत्युपक्रान्तमिषुवर्षाद्वैतं ।

---

* आकर्णाकृष्टकोदण्डमण्डलनिर्गलच्छरधोरणीनीरन्ध्रनिरुद्धभुवनकन्दरः सुष्ठु खलु रामरावणयोर्निर्भरः समरसंरम्भः । अहह कापि लक्ष्मणज्येष्ठस्य दशरथनन्दनस्य धानुष्कता येनातिक्रम्य रथवरकेतुदण्डं शरच्छटाः प्रवर्त्तन्ते ।

Digitized by Google

चारणी । ससंभ्रमं । सुरपरमेसर भीसणं वट्टदि । जदो णिविडपाडिदपडाआवडा विधुरिदबंधुरधुराबंधा तक्खणद्दोखंडिदक्खदंडा तारणभंगिभंगुरिदपगाहपरिगाहा णिगिहीदगमणपबलचक्कचंकमणा उद्दाउद्दलिददीहकूबरपबरा इमाणं असमाणा परिप्फुरंति दीहप्पमाणा बाणा । अविअ पडिक्खलिदजरकपक्खा भग्गचारणसंचरणा मंथरिदणिरवज्जविज्जाहरविहारा रभसुंमूलिदसुरासुरप्पसरा वित्थण्णायणट्ठिअपवचविथडविच्छारा णिट्ठुरणिट्टाविदगंधव्वगव्वा पअडविध्धंसिदसिध्धसिध्धा गअणंगणुत्तासिदसउत्तसंताणा कहिं दाणिं पुण इमाणं ण पसरिदा सरसंघाआ * ।

चारणः । सम्यग्विभाव्य । अति हि सुदूरमन्तरं कार्मुककर्मणि विरञ्चिविरोचनकुलतिलकयोरनयोर्हस्तलाघवस्य तथाहि ।

रघुपतिवदनेन्दौ कार्मुकैः पङ्क्तिसंख्यै-
र्दश विकिरति बाणान् यातुधानप्रधानः ।
दशभिरपि च काण्डैरेककोदण्डबाही
प्रहरति दशवक्त्रौ राघवो रावणस्य ॥ २७ ॥

अपिच । सुरचक्रवर्तिन् इह हि कामिनामनुरागपरिग्रहो गुणलवलाभलोभेन दोषप्रमोषमावहति तथाहि ।

रामक्षिप्तान् प्रतीच्छत्ययमिह विशिखान् वक्षसा राक्षसेन्द्रः
सीताहस्ताम्बुजार्पितमलयभवस्थासकान्तर्वनेषु ।
सोल्लासं हारवल्लीकवचपरिचिते ते तु तस्मिन् विशन्तः
स्वेदाम्भः प्रारभन्ते पुलकमुपनयन्त्युद्धतं चार्पयन्ति ॥२८॥

आकाशे कर्णं दत्त्वा । किमाह सविचिकित्सक्रोधं ।

रामः । न केवलममुना समबाणवर्षेण रावणप्रमार आरभ्यते अपित्वेतस्य जानकीकरतलस्पर्शकेलिसंभावनोपा गात्रेषु पत्रिषु रोमाञ्चकञ्चुकं यावदामोच्यते तद्भवतु विश्वामित्रोपदिष्टमन्त्रैर्दिव्यास्त्रैरमुमायोधयामि ।

चारणी । सचमत्कारं किं उण एदं आमूलफलिदफुलिंगजडिलजालावलीविलीणतुहिणसरणिसारणीपूरिज्जमाणमंदाइणीचंदभाआपहुदिनदीसत्थमंथरिदवित्थारो सअलकुलसेलचक्कवट्टी कुवेराधिट्ठिदं दिसमधिवसंतो हिमवंतो संतवणुत्तरलसिलाजदुणीसंदणिज्झरट्टुइभंतवरणचंकमणक्कंदिअकरिंदपवेससमूससंतसेत्तसलिलमदप्फालिदतडंतणिवतंडप्रच्छरविच्छारपअदसद्दसंदोहभरिदगंभीरगुरुगुहाकुहरम्मसे विंझो सिमिसिमाअंतसंततसिरिखंडमंडलीतड्डपणट्ठभुअंदभोअभरिज्जंतत्तंववण्णीसोत्तसंत्तासिदसिप्पिसंपुडमुहपलोट्टमोत्ताहलकरंबिदतंरवणीपवणविच्छिरणणिअंबडंबरालंकिददरिकणमहीवलओ मलओ डाहकुविदकुंभसंभवमहामुणिगेहिणीदिवविवणदिट्ठिच्छडाकडप्पसंकोडिदवहुलजालुधीउपीडापरिहरिज्जमाणमाणिक्कचक्कवालवेल्लिअलदाभवणगब्भसंभाविदहदवहुच्छेदमुहुत्तसुहपसुत्तविज्जाहरमिहुणजणिदमणमोहणो रोहणो * ।

पुरंदरः । ध्रुवं शस्त्रमाग्नेयमामन्त्रितं पौलस्त्यदमनविधावस्ततन्द्रेण रामचन्द्रेण । यतः ।

रामनर्तितमहाधनुर्मुखा-
द्यत्रयत्र निपतन्ति सायकाः ।
तत्रतत्र जलधेर्जलोच्चये
कार्यतो विरचयन्ति वाडवं ॥ २९ ॥

अपिच ।

सद्यः कल्पद्रुमाणां मणिकुसुमवतां वर्तते दावदाहः
क्रन्दन्त्युत्तप्तधाराद्रुतिकृतकरकावृष्टयस्तोयवाहाः ।
रामस्योच्चण्डचापप्रणिहितहुतभुङ्मार्गणार्चिःप्रपञ्चै-
स्तूर्णोत्तीर्णः समुद्रं सरति च त्रिसरो मेरुहेमद्रवस्य ॥३०॥

चारणः । आकाशे कर्णं दत्त्वा । किमाह रावणः कथं दिव्यास्त्रसमरसमारम्भी रामस्तदहमपि समारभे । यद्वा ।

आग्नेयास्त्रं हृदयदवथुर्वारुणं हन्त शास्त्रं
धाराबाष्पं पवनशरतां यान्ति च श्वासदण्डाः ।
तज्जानक्या किमिव न कृतं रक्षसां स्वामिनो मे
दिव्यास्त्रैर्यदयमपरं तापसः कर्तुकामः ॥ ३१ ॥

चारणी । आमूलुद्दलिअपारिआअतरुराअराइणो उक्कंपिदाणप्पकप्पपादवा विसुतिदसंताणअतरुसंताणा विमद्दिदामंदमंदारुदुमा णिद्दलिदणंदणवणाहारअंदणा इमे आसुतिदसत्तभुअ-

* सुरपरमेश्वर भीषणं वर्तते यतो निबिडपाटितपताकापटा विधुरितबन्धुरधुराबन्धास्तत्क्षणातः खण्डिताक्षदण्डास्ताडनभङ्गिभङ्गुरितप्रग्रहपरिग्रहा निगृहीतगमनप्रबलचक्रचङ्क्रमणा उद्दामदलितदीर्घकूबरप्रवरा अनयोरसमानाः परिस्फुरन्ति दीर्घप्रमाणा बाणाः । अपिच परिस्खलितजरठपक्षा भग्नचारणसंचरणा मन्थरितनिरवद्यविद्याधरविहारा रभसोन्मूलितसुरप्रसरा विषण्णापन्नगप्रपञ्चविस्तरविस्तारा निष्ठुरनिष्ठापितगन्धर्वगर्वाः प्रकटविध्वंसितसिद्धसिद्धा गगनाङ्गणोत्त्रासितशकुन्तसन्तानाः क्वेदानीं पुनरेतयोर्न प्रसृताः शरसङ्घाताः ।

* किं पुनरिदमामूलफलितस्फुलिङ्गजटिलज्वालावलीविलीनतुहिनसरणिसारणीपूर्यमाणमन्दाकिनीचन्द्रभागाप्रभृतिनदीसार्थमन्थरितविस्तरः सकलकुलशैलचक्रपतिः कुबेराधिष्ठितां दिशमधिवसन् हिमवान् सन्तपनोत्तरलशिलाजतुनिस्यन्दनिर्भरदह्यमानचरणचङ्क्रमणाक्रन्दितकरीन्द्रप्रवेशसमुच्छ्वसत्स्रोतःसलिलस्फालिततटान्तनिपतत्प्रस्तरविस्तारप्रवृत्तशब्दसन्दोहभरितगम्भीरगुरुगुहाकुहरमध्यो विंध्यः सिमसिमायमानसन्ततश्रीखण्डमण्डलीभ्रष्टभुजगेन्द्रभोगभ्रियमाणताम्रपर्णीस्रोतस्सन्त्रासितशुक्तिसंपुटमुखप्रपतितमुक्ताफलकरम्बिततास्रपर्णीपवनविच्छिन्नवनितम्बडम्बरालंकृतदक्षिणमहीवलयो मलयो दाहकुपितकुम्भसंभवमहामुनिगेहिनीदत्तविवर्णदृष्टिच्छटाकलापसंकोटितचटुलजलौघपीडापरिह्रियमाणमाणिक्यचक्रवालवेल्लितलताभवनगर्भसंभावितहुतवहोच्छेदमुहूर्तसुखसुप्तविद्याधरमिथुनजनितमनोमोहनो रोहणः ।

णावसाणा वव्रमाणा पवट्टंति * ।

पुरंदरः । नूनमात्मनि कार्शानवमस्त्रमसमर्थं समर्थयता त्रिभुवनाभोगभङ्गनिमित्तमग्निमारुतसंयोग इति सामीरणमासूत्रितं राक्षसराजेन तथाहि ।

दिव्यानां पानपङ्क्तीर्दिशिदिशि विकिरन् भग्नचिह्नोरुदण्डः
पञ्चानां स्वर्द्रुमाणाममरमधुलिहां रुग्णशाखाप्रकाण्डः ।
भञ्जन् बर्हावतंसं हरसुतशिखिनः पिच्छविच्छेदनाभि-
र्वायुर्वात्येष चण्डो जलधितटरुहां मर्दनो विद्रुमाणां ॥ ३२ ॥

चारणी । किं पुण मसिणवट्टिदराअवट्टसिणिद्धमुद्धमुद्धेणाहामलच्छाएण विच्छाइज्जइ ठाअणं दुद्दिणेण आवज्जिज्जइ कलकलरवुक्कंठाविसंठुलकंठाहिं तंडवाडंवरो सिहिडिमंडलीहिं णिविडिइ मिणालदंडपंडुराहिं मंडिदवह्मंडकंदडहराहिं जलधाराधोरणीहिं गज्जिज्जइ णिविडुल्लासिअवंसकरिकरिल्लविदुरिल्लेहिं फारफालिदगंभीरभेरीभीसणेहिं जलहरेहिं † ।

पुरंदरः । मन्ये पवनोद्दीपितदहनास्त्रशान्तये जलधरास्त्रमिदमाहूतं रामभद्रेण तथाहि ।

तैलस्निग्धान्ध्रनारीचिकुरविरचनामेचकाः शक्रचाप-
ज्योतिर्लक्ष्माण एते निचुलपरिचिताश्चातकाचान्तवारः ।
न्यस्यन्तः केतकीनां मुकुलपरिकरं केकिनां नृत्तकारा-
स्तारावर्त्मावमन्तः कमलकवलनाः पूरयन्त्यम्बुवाहाः ॥३३॥

ततश्च ।

रोदसीकन्दराभोगमानयष्टिसमक्रमैः ।
क्रियतेऽर्णवमग्नेव धाराम्भोभिर्जगत्त्रयी ॥ ३४ ॥

चारणी । पेक्खदु देवो अण्णोण्णजुझ्झंतजलहत्थिसच्छा कल्लोलकेलिणिलुक्कंतगिरिपक्खिणो लक्खिज्जंततिअसिंदसिंधुरबंधवा समुल्लसंतपोऊसससेसा दीसंतदेवदुमवादवालवाला अवलोइज्जंतनाराअणसूअरसमुध्धरिदधरणिवेढणिलुक्कणट्ठाणा विच्छरंतकोत्थुहसगोत्तमणिकरंविदपाआलजंवाला उक्कलंतलच्छीवालविलासुद्देसा सप्पवंचपंचजणजणणीसंखिणीसणाहा ससंभमभमंतकच्छवडिंभगभ्भा पअडिज्जंतदामोदरणिद्दाविमद्दसअणिज्जसेसरमणिज्जा माहवमहातिमिगेलगिलिज्जंततिमिंगिला णिभ्भरं भरंति भुअणाइं इमे समुद्दा * ।

पुरंदरः । नूनमात्मनि वारुणास्त्रमप्यतन्त्रं मन्यमानेन त्रिभुवनाभोगगर्भमहाकन्दरप्लावनाय जलं जलसंपृक्तं महाजलाय कल्पत इत्यौदन्वतमस्त्रमाहूतं पौलस्त्येन तथाहि ।

कुर्वन्तो वाडवाग्नेर्द्रुतकरिमकरग्रासमर्चिःप्रकारं
दैत्यस्त्रीमुक्तहाहारवचकितबलच्छक्तिनिर्मुक्तमुक्ताः ।
पक्षोत्क्षेपेण चण्डाड्डमरितपयसः पक्षिणां क्ष्माधराणां
त्रीन् लोकान् प्लावयन्ति प्रसभविरचितावर्तमुद्राः समुद्राः ॥३५॥

चारणी । भअवं दससदक्ख पेक्ख पेक्ख कलिदकलिकालकवलणा सत्तसाअरपाणप्पवीणा णिव्वाणणअरराअमग्गा धम्मदुममहारामा कोधपाअवप्पसरपरसुणो णिविडिदजडाजूडबंधा कमंडलुमंडिदहत्था पअडिदजोअपट्टा वंभसुत्तपवित्तिदखंधबंधा भअवंतो अगत्थिमहेसिणोऽलक्खसंखा संचरंति † ।

पुरंदरः । मन्ये त्रिभुवनपरिप्लावनपयः पाननिमित्तमगस्त्योपदिष्टमगस्त्यास्त्रं धनुषि संहितं रघुकुलराजपुत्रेण तथाहि ।

लोपामुद्रानिबद्धोपचरणविधयो धौतवल्कोत्तरीया
रक्षानामाधिराज्ये विरचितरतयो ब्रह्मसूत्राञ्चितांसाः ।
एते निर्यान्त्यगस्त्याश्चुलुकपुराचान्तसप्ताब्धिवारो
रुद्राक्षाक्षावलीभिर्द्विगुणवलयिता बिभ्रतः कर्णपालीः ॥३६॥

चारणः । सविस्मयं नमुचिमथनमन्थरितमन्यो शतमन्यो दिव्येनास्त्रजातेन दिव्यमस्त्रजातं विजित्य तत् किमपि कृतं रक्षोलक्ष्मीविरामेण रामेण यदनिशं विमृशतोऽपि मे न चेतः प्रत्येति न वाच उच्चरन्ति निरङ्कुशा दशाननस्याज्ञा विभाव्य सावष्टम्भं । यदिदं निवेद्यते ।

विश्वाज्ञादानदक्षाक्षरमुखरमुखं चन्द्रहासोपपाद्य-
च्छेदक्रीडारसज्ञं तदिदमनवधिक्रोधहुंकारधारि ।
सार्धं शुद्धान्तनारीनयनजपयसा सूचितं देवदारै-
राकण्ठाद्दाशकण्ठं भुवि पतति शिरो रामभल्लायलूनं ॥३७॥

* आमूलोत्क्षलितपारिजाततरुराजा उत्कम्पितानल्पकल्पपादपाविसूत्रितसंतानतरुसंताना विमर्दितामन्दमन्दारद्रुमा निर्गलितनन्दनवनहरिचन्दना इमे आसूतसप्तभुवनावसानाः पवमानाः प्रवर्त्तन्ते ।

† किं पुनर्मसृणावर्त्तितराजपट्टस्निग्धमुग्धेन श्यामलच्छायेनापि छाद्यते गगनाङ्गणं दुर्दिनेन । आवर्ज्यते कलकलरवोत्कण्ठाविसंष्ठुलकण्ठाभिस्ताण्डवाडम्बरः शिखण्डिमण्डलीभिः । निबिडायते मृणालदण्डपाण्डुराभिर्मण्डितब्रह्माण्डकन्दराभिर्जलधाराधोरणीभिः । गर्ज्यते निबिडोल्लासितवंशकरिकरीन्द्रसदृशैः स्फारोत्स्फारितगम्भीरभेरीभीषणैर्जलधरैः ।

* प्रेक्षतां देवः अन्योन्ययुध्यमानजलहस्तिसार्थाः कल्लोलकेलिनिकृत्कान्तगिरिपक्षिणो लक्ष्यमाणत्रिदशेन्द्रसिन्धुरबान्धवाः समुल्लसत्पीयूषशेषा दृश्यमानदेवद्रुमपादपालवाला अवलोक्यमाननारायणसूकरसमुद्धृतधरणिपृष्ठनिलयनस्थाना विस्तार्यमाणकौस्तुभसगोत्रमणिकरम्बितपातालजम्बाला उत्क्रान्तलक्ष्मीबालविलासोद्देशा सप्रपञ्चपञ्चजनजननीशङ्खिनीसनाथाः ससंभ्रमभ्रमत्कच्छपडिम्भगर्भाः प्रकटायमानदामोदरनिद्राविमर्दशयनीयशेषरमणीया माधवमहातिमिगेलगिल्यमानतिमिंगिला निर्भरं भरन्ति भुवनानीमे समुद्राः ।

† भगवन् दशशताक्ष प्रेक्षस्वप्रेक्षस्व कलितकलिकालकवलनाः सप्तसागरपानप्रवीणा निर्वाणनगरराजमार्गा धर्मद्रुममहारामाः क्रोधपादपप्रसरपरशवो निबिडितजटाजूटबन्धाः कमण्डलुमण्डितहस्ताः प्रकटितयोग द्दा ब्रह्मसूत्रपवित्रितस्कन्धबन्धा भगवन्तोऽगस्त्यमहर्षयोऽलक्ष्यसंख्याः संचरन्ति ।

Digitized by Google

पुरंदरः । हंहो ऐन्दुमतेय अतिदुष्करं कृतं रामभद्रेण यतः ।

शम्भोरर्येनिजकरचरच्चन्द्रहासप्रसूतां
लङ्कानाथः किमपि सुबहोर्विस्मरन्नेव कालात् ।
धाराज्योतिस्तरलितशिखैः सांप्रतं रामबाणैः
कण्ठच्छेदव्यतिकररुजं लम्भितः स्मारितश्च ॥ ३८ ॥

दशरथः । शौर्यगाम्भीर्ये त्रिभुवनातिशायिनी राक्षसराजस्य यदित्थं गते ऽपि न चलितं प्राचाहंकारेण तथाहि ।

एतल्लूनं दशमुखशिरः स्रंसते कण्ठपीठा-
च्चतुर्धत्ते धनुषि सशरे चैतदुच्चाट्टहासं ।
एतद्रामं प्रति च कुरुते धिक्शतं क्रोधवाचा-
मेतल्लङ्कामभि च भवति स्त्रीजनाश्वासनाय ॥ ३९ ॥

चारणी । विहस्य । ता अज्जपहुदि दसाणणं णवाणणं वाहरिस्सामो * ।

चारणः । प्रिये मञ्जुवादिनि जानाम्यहमेव निराननमप्यभिधास्यसि नन्वयमोंकारो रावणशिरोमण्डलच्छेदविद्यायाः ।

दशरथः । प्रतिगृहीता प्रतिभोदयिनी दिव्यवाक्, बद्धो वाससि ग्रन्थिः ।

चारणः । कर्णं दत्त्वा आकाशे । किमाह रामभद्रः रेरे राक्षसीपुत्र ।

यद्गौरीचरणाब्जयोः प्रथमतस्त्यक्तप्रणामक्रियं
प्रेमार्द्रेण सविभ्रमेण च पुरा येनेक्षिता जानकी ।
लूनं ते तदिदं च राक्षसशिरोजातं च शान्तं मनः
शेषच्छेदविधिस्तु संप्रति परं स्वर्वन्दिमोक्षाय मे ॥ ४० ॥

पुनः कर्णं दत्त्वा आकाशे । किमाह रावणः रेरे क्षत्रियापुत्र सुलभविभ्रमचर्मचक्षुरसि तदवलोकय कतमदत्र लूनं शिरः ।

दशरथः । विमृश्य । सप्रणामं सकलभूर्भुवःस्वस्त्रयैकवीर शुनासीर मायाविनिर्मितलङ्केश्वरशिरोदर्शनेन विलक्षं क्रुद्धो रामः शितकाण्डमण्डलीभिरकाण्डचण्डाभिरन्तरितमार्तण्डमण्डलाभिरखण्डोड्डुमरितत्रिभुवनाभोगाभिर्भाभिरभिवर्षितुं प्रवृत्तः ।

चारणी । देव पेक्खपेक्ख निविडभिउडीकोडिकुडिललडालवट्टाइं जरठदाठदंडवरणिट्ठुरदट्ठाहरुट्ठुट्ठाणाइं रहसणीसरंतदीहहुंकारदारुणणासावंसविवरंतराइं रामसरधाराधोरणीहिं चउद्दिसं स्सहु त्ति निवडंति छिण्णविवण्णाइं लंकेसरसिराइं † ।

दशरथः । चमत्कृत्य ।

यस्यांयस्यां ककुभि रभसस्पष्टदंष्ट्राकरालं
लङ्काभर्तुर्निपतति शिरो भल्लनिर्लूनकण्ठं ।
तस्यास्तस्यास्तरलितदृशा स्वर्गिवर्गेण नष्टं
प्राक्संस्कारक्रमभयवता योजनानां शतानि ॥ ४१ ॥

सहसावलोक्य । अहो मायाविता राक्षसस्य ।

रामबाणक्षतः पातो न यावदवधार्यते ।
क्रियते तावदुद्भेदो मूर्ध्नां रावणमायया ॥ ४२ ॥

अतश्च ।

लङ्कावीरस्य मायाचयचतुरमतेर्मैथिलीनाथचाप-
व्यापारोद्भ्रान्तबाणव्रणनधृतरुषः स्वां प्रतिज्ञां विवक्षोः ।
ग्रीवागर्भप्रणालीमरणिसमुचितैकैकवर्णक्रमेण-
च्छिन्नोद्भिन्नैर्मुखाब्जैः कथमपि हि गिरामेति पङ्क्तिः समाप्तिं ॥४३॥

कर्णं दत्त्वा आकाशे । किमाह रामभद्रः प्रतिकूलं हि दैवं स्वारब्धमपि कार्यं विपर्यासयति तथाहि ।

शत्रुध्वंसः किल जनकजासंगमस्यैकहेतु-
स्तेनारब्धं दशमुखवधाडम्बरं राघवेण ।
छिन्नंछिन्नं पतति च शिरो जायते चान्यदन्य-
ल्लङ्काभर्तुस्तदिह करवै हा कथं मन्दभाग्यः ॥ ४४ ॥

पुनराकाशे । किमाह रावणः हंहो राम किमलीकशिरःखण्डनाडम्बरेण विडम्बयस्यात्मानं, क्व पुनः स्वेच्छाजन्मनां रावणावयवानां विच्छेदः, पुनराकाशे । किमाह रामः रावण अयं मे प्रीतये भवज्जम्भकभावः तथाहि ।

यन्मूलतो दशशिरांसि भवन्ति यच्च
छेदेषु तानि शतशोऽथ सहस्रशश्च ।
तत् साधु राक्षसपते कथमन्यथाऽय-
मुत्सृज्यतां जनकजाहरणापवादः ॥ ४५ ॥

पुनराकाशे । किमाह रावणः आः क्षत्रियखेट कापटिकतापस धनुरारोपणसमयप्रथमगृहीतां सीतामभिलषन्नुपपतिरिव शीर्षच्छेद्योऽसि पुनराकाशे । किमाह रामः रेरे पिशाचापसद ।

रम्भोपभोगरभसेन निरर्गलोऽसि
सो मैथिलीहरणनामसहोऽपि रामः ।
नन्वस्मि भास्करकुलप्रभवो ब्रुभूषा
पूषा स एव हि निजान्वयकर्मसाक्षी ॥ ४६ ॥

तदित्थमभिदधानमपवित्रं वक्त्रमितो निर्विशतु ते शुद्धिम् ।

चारणः । विभाव्य संत्रस्य च । किमपि निरुपमानं राघवकोदण्डपाण्डित्यमसदृशाकारश्च पौलस्त्यपुरुषकारः यतः ।

* तदद्यप्रभृति दशाननं नवाननं व्याहरिष्यामः ।

† देव प्रेक्षस्वप्रेक्षस्व निबिडभ्रुकुटीकोटिकुटिलललाटपट्टानि जरठदंष्ट्रादण्डवरनिष्ठुरदंष्ट्राधरोष्ठानि रभसनिस्सरद्दीर्घहुंकारदारुणनासावंशविवरान्तराणि रामशरधाराधोरणीभिश्चतुर्दिशं झटिति निपतन्तिच्छिन्नविवर्णानि लङ्केश्वरशिरांसि ।

Digitized by Google

छिन्नं शिरो निपतदन्तरतस्तदेत-
दादाय देव निजमेव दशाननेन ।
मुक्तं च वक्षसि ककुत्स्थकुलध्वजस्य
जातश्च कुड्मलितपङ्कजचारुचक्षुः ॥ ४८ ॥

दशरथः । हा वत्स रामभद्र कतरदिदं प्रहरणं यदमुनापि मूर्छितोऽसि ।

पुरंदरः । सखे दशरथ रामभद्रं प्रति कृतं करुणावाणीभिः नन्वेष सकलवीरप्रकाण्डचन्द्रचूडकोदण्डस्य दलयिता ।

चारणः । कर्णं दत्त्वा आकाशे । किमाह रामः तद्वयवान्तरच्छेदपुरःसरं शिरःखण्डनकर्म विरचयामि मा कश्चन नियतप्रतिबन्धो मायाविधिः स्यात् ।

चारणः । न केवलमभिहितमनुष्ठितं च । पुनराकाशे कर्णं दत्त्वा । किमाह रामः ।

छिन्नोद्गतो वहति कार्मुकमस्य मुष्टि-
र्लूनोद्गतः शरवरं च करो बिभर्ति ।
कृत्तोत्थितं च मुखमर्पितदृष्टि लक्ष्ये
धिक् तन्ममेव विफलोऽम्बुधिसेतुबन्धः ॥ ४८ ॥

दशरथः । सद्यश्छिद्यमानमुण्डमण्डलीमायाप्रपञ्चवञ्चितराघवशरलाघवमनल्पमवगच्छन्नेव विंशत्यर्धकन्धरो दुर्धरधनुर्धरोऽप्युत्खण्डचित्रकवचसञ्जनिजशरीर सहस्रनिर्माणच्छद्मकर्मणि परां प्रवीणतामुपदर्शयति तत्र विद्मः किमत्र प्रतिपत्स्यते रामभद्रः ।

पुरंदरः । यत् कुलाचलसंदोहदहनकर्मणि भगवान् कालाग्निरुद्रः ।

चारणः । ससंभ्रमं । यदादिशति त्रिदशचक्रवर्ती पश्य ।

यावन्तो भुवि चाम्बरे च ककुभां कोणोपकोणेषु च
व्यावल्गन्ति धनुर्धराः कवचिनो मायामया रावणाः ।
रामः स्वर्गजनाशिषां पदमसावेकोऽपि कोपोद्धत-
स्तावद्रूपप्रतिरूपयोजितशरश्रेणीभिरालक्ष्यते ॥ ४९ ॥

दशरथः । अद्य फलितं मे पुरंदरप्रसादेन यत् समरसीमनि वत्सरामभद्रं दशाननादुत्कर्षवन्तं पश्यामि ।

चारणः । कर्णं दत्त्वा आकाशे । किमाह रामः भवतु भगवतः कुशिकनन्दनाज्जृम्भकास्त्रप्रदानप्रसंगोपात्तं मायाहरमस्त्रं संदधामि ।

चारणः । सम्यगवलोक्य । दशरथं प्रति । महाराज कारय चक्षुषी पारणां दृश्यतां द्रष्टव्यं ।

मायाहरशरन्यासादेष नक्तंचरेश्वरः
एकशेषशिराः संप्रत्येकाकी रथे स्थितः ॥ ५० ॥

सर्वतोऽवलोक्य । रावणभयशरणागतसमयनाकिनि पिनाकिनि त्रिभुवनस्वस्त्ययननिमित्तमुदाहृतब्रह्मणि ब्रह्मणि निरन्तरचिन्तानिश्चेतसि प्रचेतसि संभावितजगन्नाशे कीनाशे समुपालब्धविधौ भगवति विधौ परिम्लायति रिपुग्रामनिधनदे धनदे दूरोत्क्षिप्तप्राणे समीरणे विगलितवसौ विभावसौ दुरपत्यजननिन्दितपुलस्त्येऽगस्त्ये कल्याणमनुध्यायति ध्यानचक्षुषि मुनिवरिष्ठे वशिष्ठे गायति सामविश्वाम्बुजविकाशमित्रे विश्वामित्रे भयालापस्फुरिताधरे विद्याधरे निर्वारणोद्यतचारणहाहारवमुखरवृन्दारकवृन्दं भुवनाभोगं विदधता जीवितनिरपेक्षेण राक्षसराजेन निजस्यन्दन संनिधीकृत्य समुद्भ्रान्तसारथिर्दाशरथिरथः सपदि दोर्दण्डमण्डलेन धूर्बन्धे विधृतो भ्रामितश्च ।

दशरथः । साकूतं प्रणम्य । भगवत्यो रघुकुलदेवता दशरथमनुगृह्णीत भगवन्निन्द्र गृहाण दम्भोलिमम्भोधरलाञ्छनं धनुर्वा नन्वेष कवलीक्रियते रामचन्द्रो रावणराहुणेति मूर्छति ।

पुरंदरः । प्रियवयस्य किमाकुलोऽसि कियत्कालं जलदतिरस्कारिणी मार्त्तण्डमण्डलमन्तरयति ।

दशरथः । ससंभ्रममवलोकयन् हस्तमुद्यम्य समरसुन्दर पुरंदर पश्यपश्य ।

वत्सस्य साश्वः सासूतश्च सचक्रध्वजधूर्युगः ।
व्योम्नि भ्रमरकभ्रामं भ्राम्यतेऽनेन हा रथः ॥ ५१ ॥

इति पतति ।

पुरन्दरः । अये किमपि महाबलपराक्रमो राक्षसराजः ।

चारणः । कियद्वा वर्णनमर्णवस्यायं मकरालय इति ।

वेल्लद्विद्युल्लतालीच्छुरितपरिकरैरम्बुदैर्वान्तवार्भि-
र्दिव्यानां व्योमयानैर्भयचकितवधूवक्त्रमुक्तार्तनादैः ।
लङ्केन्द्रेणाग्रहस्तभ्रमितरथपथप्रस्थितैस्तारकाणा-
मुत्तालैश्चक्रवालैरिव च विरचिता वक्त्रनीराजनश्रीः ॥ ५२ ॥

नेपथ्ये कलकलानन्तरं ।

यद्वक्त्राणां दशानामिव दश ककुभः शासितुं सृष्टिरासी-
द्विंशत्या यश्च दोर्भिर्दशगुणितमिव प्राप्तवान् वीरधर्मं ।
लङ्केन्द्रः संयतेन्द्रो रणभुवि दशभिर्मैथिलीवल्लभेन
ज्योतिर्दीप्तैः क्षुरप्रैः स खलु विरचितो निर्विबन्धः कबन्धः ॥ ५३ ॥

दशरथः । आकर्ण्य । कः पुनरयमकारणबन्धुः श्रवणामृतवर्षिणा वचनेनास्मानाश्वासयति ।

चारणः । नेयमाश्वासना किं पुनर्बिभीषणप्रियकरणाय लङ्कावैतालिक एष निवेदयति ।

दशरथः । तत् किमिव नेदं सहस्रचक्षुषापि भगवता नयनाञ्जलिपुटपेयीकृतं ।

चारणः । शृणु यथा ।

यावल्लीलाचलचक्रध्वजहरितरलालातचक्रायमाणं
भूगोलास्फालहेतोर्भ्रमयति नभसि स्यन्दनं राक्षसेन्द्रः ।
दोर्दण्डैश्चण्डवेगोद्धृतहरगिरिभिः

दशरथः । किंचिदुत्थाय सुप्रपाता रावणकरान्दोलितस्यन्दनभ्रमणभङ्गिः तद्वारय तद्वारय वत्सं ।

चारणः । सहर्षं । द्राक् तुरगेण तावत् ।

तस्यैवाक्षय्यं वार्त्तां दशममपि शिरश्छिन्नवान् नाम रामः ।

पुरंदरः । विहस्य शङ्के भवत एव शब्दवेधित्वं शिक्षितमभ्यस्तं च रामभद्रेण किं पुनरुपाध्यायादधिकः संवृत्तः, विमृश्य तदेतदुद्दामरामरपुरप्रवेशिनो ब्रह्मास्त्रस्य भूर्भुवःस्वस्त्रितयचारं सूचितदशकन्धरमदं भद्रमारम्भितं ।

दशरथः । तत् प्रियं नः ।

चारणौ । ता किण पडुपडहझल्लरीविहुरिअं संवंसकंसतालमिस्सं णिस्संकसंकं भूरिभेरीविपंचीपवंचभंकारझंकारभंगिगब्भिणीकुसुमवरिसपुव्वं अमच्चवच्छणमप्फालिदो देवदाहिं विअअदुंदुही * ।

चारणः । शृणु यथा ।

हेलाखण्डितचण्डहेमहरिणैर्बाणैः कुलं रक्षसां
शेषीभूतविभीषणं गुणनिधौ हत्वापि रामे स्थिते ।
प्रत्युज्जीवनशङ्कया यमजितो लङ्कापतेः कातरै-
र्नो मुक्ताः कुसुमस्रजो न च सुरैरास्फालितो दुन्दुभिः ॥

नेपथ्ये ।

बाणैर्लोञ्छिन्नकेतुयष्टिशिखरो मूर्च्छानमत्सारथि-
र्मांसास्वादनलुब्धगृध्रविहगश्रेणीभिरासेवितः ।
रक्षोनाथमहाकबन्धपतनक्षुण्णाक्षदण्डो हयै-
र्दूषित्वा स्मृतमन्दुरास्थितिहृतैर्लङ्कां रथो नीयते ॥

पुरंदरः । सखे दशरथ अयमनन्यसदृशाकारो रामभद्रपुरुषकारः, अतश्च ।

निर्दग्धत्रिपुरेन्धनोऽस्तु गिरिशः क्रौञ्चाचलच्छेदने
पाण्डित्यं विदितं गुहस्य किमुतावज्ञातयुद्धोत्सवो
लूत्वा पङ्कजलावमाननवनं चैतस्य लङ्कापते-
र्वीराणां चरिताद्भुतस्य परमे रामः स्थितः सीमनि ॥

चारणः । विहस्य । अवगतदशकन्धरवधोद्बुधैरिदानीं सत्वरैर्दाशरथेर्हर्षपुष्पवर्षमारभ्यते । नेपथ्ये ।

सर्वा गीर्वाणवन्द्यो व्रजत निजगृहान् दन्तुमाधोरणा द्राक्
स्वर्गेभस्तम्भशालां नय सुरकरिणं यामिका यान देवाः ।
भूयो दिव्यद्रुमाणां ननु भवतु वने नन्दने संनिवेशो
द्वारि क्षिप्रं यदैन्द्रे दशवदनशिरः किंकरैरन्तकस्य ॥

चारणः । नाकनरलोकनायकौ दिष्ट्या वर्धेथे पुरंदरप्रतीहारवचनेन अपरिचितेन च रामशरीरसौन्दर्येण । तथाहि ।

स्मरसिकसुरस्त्रीमुक्तमन्दारदामा
स्वयमयमवतीर्णो लक्ष्मणान्यस्तहस्तः
विरचितजयशब्दो बन्दिभिः स्यन्दनाङ्का-
द्दिनकरकुललक्ष्मीवल्लभो रामचन्द्रः ॥

इति निष्क्रान्ताः सर्वे रावणवधो नाम नवमोऽङ्कः ॥

---

* तत् किमिति न पटुपटहझल्लरीमिश्रं सवंशकांस्यतालमिश्रं निःशङ्कध्वनं भूरिभेरीविपञ्चीप्रपञ्चभाङ्कारझङ्कारभङ्गिगर्भिणीकुसुमवर्षपूर्वममर्त्यवर्त्मन्यास्फालितो देवताभिर्विजयदुन्दुभिः ।

THE VAIŚESHIKA APHORISMS KAṆÁDA.

FIRST BOOK FIRST DAILY LESSON.

(*Continued from page* 185.)

The Veda is authoritative.

तद्वचनादाम्नायस्य प्रामाण्यम् ॥ ३ ॥

Aph. 3. Authoritativeness belongs to revelation because it was declared by Him.

¹ The word He (*tat*) signifies God though He has not been previously mentioned, it being inferred from His being universally known, just as in the aphorism of Gautama, 'That is unauthoritative being vitiated by falsity, self-contradictoriness and repetition,' by the word 'That' the Veda is signified though not previously mentioned. Accordingly authoritativeness belongs to revelation—the Veda—, because it was declared by Him—revealed by God. Or else 'That' signifies the contiguous [word] Merit, and accordingly authoritativeness belongs to revelation—the Veda—because it declares—expounds—Merit: for whatever statement expounds a matter held to be authoritative is an authority. U.

² By the word 'That' expressive of something already known God is signified, though not previously mentioned. And accordingly the sense is that the authoritativeness of the Veda must necessarily be admitted since it was declared by an everlasting, all-wise, and all holy Spirit. V.

Means of attaining the highest good.

धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम् ॥ ४ ॥

Aph. 4. The Highest Good [results] from knowledge of the truth which springs from particular Merit [and is obtained] by means of the similarity and dissimilarity of the Categories, Substance, Attribute, Action, Generality, Particularity, and Inhesion.

---

¹ तदित्यनुपक्रान्तमपि प्रसिद्धिसिद्धतयेश्वरं परामृशति यथा तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्य इति गौतमीयसूत्रे तच्छब्देनानुपक्रान्तोऽपि वेदः परामृश्यते । तथा च तद्वचनात् तेनेश्वरेण प्रणयनादाम्नायस्य वेदस्य प्रामाण्यं यद्वा तदिति संनिहितं धर्ममेव परामृशति तथा च धर्मस्य वचनात् प्रतिपादनात् आम्नायस्य वेदस्य प्रामाण्यं यद्धि वाक्यं प्रामाणिकमर्थं प्रतिपादयति तत्प्रमाणमेव यत इत्यर्थः ॥

² ईश्वरस्याप्रक्रान्तत्वेऽपि प्रसिद्धार्थकेन तच्छब्देन परामर्शो भवत्येव तथाच नित्यसर्वज्ञनिर्दोषपुरुषप्रणीतत्वात् वेदस्य प्रामाण्यमवश्यमेवाभ्युपेयमित्यर्थः ॥

Digitized by Google

[1] Such knowlege of the truth depends upon the Vaiśeshika system, hence even causation of the Highest Good belongs to that [system.] Between the system and the Highest Good the connection of relation of cause to effect, between the system and knowledge of the truth the connection of relation of agency to the agent, between the Highest Good and knowledge of the truth the connection of relation of effect to cause, between the Categories Substance &c. and the system the connection of relation of matter expounded to exposition, is understood to exist. It is from knowledge of these connections that in this world seekers of the Highest Good apply themselves to this system. The Highest Good is final cessation of pain. Finality of cessation of pain is non-simultaneity with antecedent non-existence (potential existence) of pain in the common substratum, or simultaneity with subsequent non-existence (destruction) of all particular qualities of soul which are produced at the same time and have a common substratum. Or emancipation [of the soul] is potential existence of pain terminated by cessation of all particular qualities [of the soul.] In the second aphorism of Gautama it is stated that on the successive removal of pain, birth, activity, vice, and false knowledge, and on their consequent non-existence emancipation ensues. Here the argument from non-existence of cause to non-existence of effect proves emancipation to be characterised by antecedent non-existence of pain, for with respect to the removal of activity, consequent upon the removal of vice, the removal of birth on the removal of activity and the removal of pain on the removal of birth, such removal is not subsequent non-existence but non-production, and non-production is antecedent non-existence. 'From knowledge of the truth which springs from particular merit,—such is the special character of that [knowledge], and accordingly particular Merit is Merit differentiated by finality: but if by knowledge of the truth the [Vaiśeshika] system be intended (the truth being known by means of that system), then particular Merit must be explained as characterised by the ordinance and grace of God, for it is a tradition that the great saint Kaṇâda revealed the system in consequence of having obtained the ordinance and grace of God. U.

[1] Particular merit is particular good works done either in this life or in a former state of existence. By particular good works knowledge of the truth is produced by means of the similarity and dissimilarity of Substance and the other Categories. Next meditation on the soul is produced, next, by means of meditation, a [mental] representation of the soul is produced, and after that, by means of destruction of false knowledge &c., Emancipation ensues. In this place there is mention of six Categories spoken of as existing, but in reality Non-existence is also implied by the sage as another Category. Accordingly there is no discrepancy in such aphorisms as the following, in the second daily lesson, 'From non-existence of cause is non-existence of effect', and in the ninth book, ['An effect has no antecedent existence] because of the non-existence of ascription to it of actions and attributes.' V.

Division of Substance.

पृथिव्यापस्तेजो वायुराकाशं कालो दिगात्मा मन इति द्रव्याणि ॥ ५ ॥

Aph. 5.—Earth, Water, Light, Air, Ether, Time, Space, Soul, and the Internal Organ,—are the Substances.

[2] The particle *iti* is expressive of limitation, therefore the meaning is that there are nine Substances, neither more nor less. If it be objected, What is the use of the particle *iti* when the exclusion of a lesser or greater number [of Substances] is effected by the mere force of the division? this is to be determined, that it is by reason of the use of the particle *iti* after the mere enunciation [of Substances] in the construction of

---

[1] एतादृशं तत्त्वज्ञानं वैशेषिकशास्त्राधीनमिति तस्यापि निःश्रेयसहेतुत्वं दण्डापूपायितम् शास्त्रनिःश्रेयसयोर्हेतुहेतुमद्भावः शास्त्रतत्त्वज्ञानयोर्व्यापारव्यापारिभावः निःश्रेयसतत्त्वज्ञानयोः कार्यकारणभावः द्रव्यादिपदार्थशास्त्रयोः प्रतिपाद्यप्रतिपादकभावः सम्बन्धो ऽवगम्यते एतेषाञ्च सम्बन्धानां ज्ञानान्निःश्रेयसार्थिनामिह शास्त्रे प्रवृत्तिः । निःश्रेयसमात्यन्तिकी दुःखनिवृत्तिः । दुःखनिवृत्तेश्चात्यन्तिकत्वं समानाधिकरणदुःखप्रागभावासमानकालीनत्वं युगपदुत्पन्नसमानाधिकरणसर्वात्मविशेषगुणध्वंससमानकालीनत्वं वा । अशेषविशेषगुणध्वंसावधिकदुःखप्रागभावो वा मुक्तिः । गौतमीयद्वितीयसूत्रे दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्ग इत्यत्र कारणाभावात् कार्याभावाभिधानं दुःखप्रागभावरूपामेव मुक्तिं द्रढयति नहि दोषापाये प्रवृत्त्यपायः प्रवृत्त्यपाये जन्मापायः जन्मापाये दुःखापाय इत्यपायो ध्वंसः किन्त्वनुत्पत्तिः सा च प्रागभाव एव । धर्मविशेषप्रसूतादिति तत्त्वज्ञानादित्यस्य विशेषणं तत्र धर्मविशेषो निवृत्तिलक्षणो धर्मः यदि तु तत्त्वं ज्ञायते ऽनेनेति तत्त्वज्ञानं शास्त्रमुच्यते तदा धर्मविशेष ईश्वरनियोगप्रसादरूपो वक्तव्यः श्रूयते हीश्वरनियोगप्रसादावधिगम्य कणादो महर्षिः शास्त्रं प्रणीतवानिति ॥

[1] धर्मविशेषः ऐहिको जन्मान्तरीणो वा सुकृतविशेषः । सुकृतविशेषेण द्रव्यादिपदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानं जायते तत आत्ममननमनन्तरं निदिध्यासनेनात्मसाक्षात्कारो जायते तदनन्तरं मिथ्याज्ञानादिनाशक्रमेण मोक्षो भवतीत्यर्थः । अत्र षट्पदार्थकीर्त्तनं भावाभिप्रायेण वस्तुतो ऽभावो ऽपि पदार्थान्तरतया मुनेरभिप्रेतः । अत एव द्वितीयाह्निके कारणाभावात् कार्याभाव इति सूत्रस्य नवमाध्याये क्रियागुणव्यपदेशाभावात् इत्यादि सूत्राणाञ्च नासङ्गतिः ॥

[2] इतिकारो ऽवधारणार्थः तेन नवैव द्रव्याणि नाधिकानि न न्यूनानीत्यर्थः । ननु विभागबलादेव न्यूनाधिकसंख्याव्यवच्छेदसिद्धौ किमितिकारेणेति चेत् उद्देशमात्रपरतया ऽपि सूत्रसम्भवे विभागतात्पर्यस्फोरणार्थमेवेतिकाराभिधानात् सुवर्णादीनामीश्वरस्य चात्रैवान्तर्भावात् अन्धकारस्य चाधिकत्वेनाशङ्क्यमानस्याभावत्वव्युत्पादनादेतदध्यवसेयम् । समासकलं तु सर्वेषां साधर्म्यप्रदर्शनाय लक्षणमेतेषां तु वैधर्म्यावसरे सूत्रकृदेव दर्शयिष्यति ॥

Digitized by Google

the aphorism, in amplifying the sense of the division, since gold &c., and God are included in this [enumeration], and since it is explained [in V. 2,19] that darkness suspected [by some] of being additional is a non-existence. The construction without the use of compound words is to shew the importance of all [the Substances]; and the author of the aphorisms himself will point out their differentiæ when treating of their dissimilarities. U.

Note.—Cp. the Muktávalí on Bháshá-parichchheda 3. [1] If it be objected, "There is a tenth substance, Darkness; why is it not enumerated? for it is cognised by preception; and substantiality belongs to it because it is possessed of colour and action; and, because devoid of odour, it is not Earth; and, because it possesses dark colour, it is not water &c.; and the eye deprived of light is the organ [used] in perceiving it." [We reply that] it is not so, because it is illogical to imagine another Substance, when it is necessarily produced by non-existence of light. The notion that it is possessed of colour is erroneous. The notion that it possesses action is also an error occasioned by the departure of light. It will be declared how it is that gold is included in light.'

Darkness was affirmed to be a substance by the Sánkhyas, Gold by the Mímánsakas.

[2] The construction without [the use of] compound words is designed to shew that all [the Substances] independently of one another produce particular effects, or is intended to teach that they all equally produce effects which inhere in them. Among these nine divisions of Substance, Ether, Time, and Space do not form any class since they have only a single existence, but the rest form classes. V.

A. E. Gough.

[1] ननु दशमं द्रव्यं तमः कुतो नोक्तं । तद्धि प्रत्यक्षेण गृह्यते । तस्य च रूपवत्त्वात् कर्मवत्त्वाच्च द्रव्यत्वम् । तच्च गन्धशून्यत्वात् न पृथिवी । नीलरूपवत्त्वाच्च न जलादिकम् । तत्प्रत्यक्षे चालोकनिरपेक्षं चक्षुः करणमिति चेत् । न । आवश्यकतेजोऽभावेनोपपत्तौ द्रव्यान्तरकल्पनाया अन्याय्यत्वात् । रूपवत्ताप्रतीतिस्तु भ्रमरूपा । कर्मवत्त्वप्रतीतिरपि आलोकापसारणोपाधिकी भ्रान्तिरेव । स्वर्णस्य यथा तेजस्यन्तर्भावस्तथा वक्ष्यते ॥

[2] असमासकरणं तु सर्वेषामितरनैरपेक्ष्येण कार्यविशेषोत्पादकताप्रदर्शनार्थं स्वसमवेतकार्यजनने सर्वेषां तुल्यताज्ञापनार्थं वा । अत्र नवसु द्रव्यविभाजकेषु गगनत्वकालत्वदिक्त्वानामेकैकमात्रवृत्तित्वान्न जातित्वं शेषाणां पुनर् जातित्वमेवेति ॥

SCENES FROM THE RAMAYANA.

TIDINGS OF SITA.

'As on the breezy hill I stood,
That rises o'er the pathless wood,
High o'er me flew a monstrous form,
Dark as the cloud that heralds storm.
I saw the giant's flashing eye;
I heard a woman's piteous cry.
A voice from out the still air came
Of weeping mixt with Rama's name.
A dove, whom eagle talons grasp,
She struggled in the giant's clasp.
I heard again a wilder shriek:
She saw me on the mountain peak.
An anklet from her foot she drew,
And with it cast her garland too.
The token I have guarded well
Some tidings of thy love may tell.'
Quick to the mountain cave he went,
And brought the treasured ornament.
Then burst the tear from Rama's eyes
As, gazing on the well-known prize,
'O Sita, O my love!' he said;
Then swooned and fell as fall the dead.

RAVAN'S PALACE.

Then sweetly to his ear were borne
The blended notes of drum and horn,
Cymbal and tabour, deep and loud,
Like thunder from a distant cloud.
Awhile he stood, then nearer drew,
Till flashed upon his startled view
The car of Ravan, long and wide,
A measured league from side to side:
The car that flew o'er flood and hill
Obedient to the master's will.
Its jewelled arches high o'erhead
An ever-changing lustre shed
From ruby, pearl, and every gem,
On golden pillars under them.
Delicious came the tempered air
That breathed a heavenly summer there,
Stealing through bloomy trees that bore
Each pleasant fruit in endless store:
Enclosed within that pearly bound,
The wondering chief a palace found,
Of vast extent and stately height
With doors of gold and lazulite,
And decked with every lovely thing,
The mansion of the Giant King.
No check was there from jealous guard,
No door was fast, no portal barred.

Digitized by Google

Only a sweet air breathed to meet
The stranger, as a host should greet
A wanderer of his kith and kin
And woo his weary steps within.
He stood within a spacious hall
With fretted roof and painted wall,
The giant Ravan's boast and pride,
Loved even as a lovely bride.
'Twere long to tell each marvel there,
The crystal floor, the jewelled stair,
The gold, the silver, and the shine
Of chrysolite and almandine.
There breathed the fairest blooms of spring,
There flashed the proud swan's silver wing,
The splendour of whose feathers broke
Through fragrant wreaths of aloe smoke.
'Tis Indra's heaven,' the chieftain cried,
Gazing in joy from side to side:
'The home of all the Gods is this:
The mansion of eternal bliss!'
There were the softest carpets spread,
Delightful to the sight and tread,
Where troops of fairest women lay
O'ercome by sleep, fatigued with play.
The cup no longer cheered the feast;
The sound of revelry had ceased;
The tinkling feet no longer stirred;
No chiming of a zone was heard.
So when each bird has sought her nest,
And swans are mute and wild bees rest,
Sleep the fair daughters of the lake
Till the sun's kiss shall bid them wake.
Like the calm field of autumn's sky
Which stars unnumbered glorify,
So shone the tyrant's sumptuous room
With living stars that chased the gloom.
'These are the stars,' the chieftain cried,
'In summer nights that earthward glide;
In brighter form they re-appear.
To shine in matchless lustre here,'
With wondering eyes awhile he viewed
Each graceful form and attitude.
One lady's head was backward thrown,
Bare was her arm and loosed her zone.
The garland that her brow had graced
Hung closely round another's waist.
Here gleamed two little feet, all bare
Of anklets that had sparkled there.
Here lay a queenly dame at rest
In all her glorious garments dressed.
There slept another whose small hand
Had loosened every tie and band.
In careless grace another lay
With gems and jewels cast away,
Like a young creeper when the tread
Of the wild elephant has spread
Destruction and confusion round,
And hurled it flowerless to the ground.
Here lay a slumberer still as death,
Save only that her balmy breath
Raised ever and anon the lace
That floated o'er her sleeping face.
There, sunk in sleep, an amorous maid
Her sweet head on a mirror laid,
Like a fair lily bending till
Her petals float upon the rill.
Another black-eyed damsel pressed
Her lute upon her heaving breast,
As though her happy arms were twined
Round him for whom she long had pined.
Another pretty sleeper round
A silver vase her arms had wound,
That seemed—so fresh and fair and young—
A wreath of flowers that o'er it hung.
In sweet disorder lay a throng
Weary of dance and play and song:
Where heedless girls had sunk to rest,
One pillowed on another's breast,
Her tender cheek scarce seen beneath
Red roses of the falling wreath,
The while her long soft hair concealed
The beauties that her friend revealed.
With limbs at random interlaced
Round arm and leg and throat and waist,
That wreath of women lay asleep
Like blossoms in a careless heap.

THE DESCENT OF GANGA.

He stood upon the lofty crest
That crowns the Lord of Snow,
And bade the river of the Blest
Descend on earth below.

Himalaya's child, adored of all,
The haughty mandate heard,
And her proud bosom at the call
With furious wrath was stirred.

Down from her channel in the skies
With awful might she sped,
In a giant's rush, in a giant's size,
On Siva's holy head.

'He calls me,' in her wrath she cried
And all my flood shall sweep

And whirl him in its whelming tide
 To hell's profoundest deep!'
He held the river on his head,
 And kept her wandering where,
Dense as Himalaya's woods, were spread
 The tangles of his hair.

No way to earth she found, ashamed,
 Though long and sore she strove,
Condemned, until her pride were tamed,
 Amid his locks to rove.

At length when many a year had past
 He bade her wanderings end;
Bade the delighted flood at last
 Upon the earth descend.

With deafening roar upon the rock
 Down sped the heavenly tide,
And earth, who trembled at the shock,
 With hollow voice replied.

On countless glittering scales the beam
 Of rosy morning flashed,
Where fish and dolphins in the stream,
 Fallen and falling, flashed.

Then Bards who chant celestial lays,
 And Nymphs of heavenly birth,
Flocked round upon the flood to gaze
 That streamed from sky to earth.

The Gods themselves from every sphere,
 Incomparably bright,
Borne in their golden cars drew near
 To see the wondrous sight.

The cloudless sky was all aflame
 With the light of a hundred suns,
Where'er the shining chariots came
 That bore those holy ones.

So flashed the air with crested snakes
 And fish of every hue,
As when the lightning's glory breaks
 Through fields of summer blue..

And white foam-clouds and silver spray
 Were wildly tossed on high,
Like swans that urge their homeward way
 Across the autumn sky.

Now flowed the river calm and clear
 With current deep and strong,
Now slowly broadened to a mere,
 Or scarcely moved along.

Now o'er a length of sandy plain
 Her tranquil course she held:
Now rose her waves and sank again
 By refluent waves repelled.

INDRA

AS REPRESENTED IN THE HYMNS OF THE RIGVEDA.

A METRICAL SKETCH.

BY J. MUIR, ESQ. D. C. L.

(Concluded from page 188.)

VI.—*Indra's Drinking Song.*

"Yes, yes, I will be generous now,
"And grant the bard a horse and cow:
"I've quaffed the Soma-draught.
"These draughts impel me with the force
"Of blasts that sweep in furious course:
"I've quaffed the Soma-draught.
"They drive me like a car that speeds,
"When whirled along by flying steeds.
"These hymns approach me fondly now,
"As hastes to calf the mother-cow.
"I turn them over as I muse,
"As carpenter the log he hews.
"The tribes of men, the nations all,
"I count as something very small.
"Both worlds, how vast soe'er they be,
"Don't equal even the half of me.
"The heaven in greatness I surpass,
"And this broad earth, though vast her mass.
"Come, let me as a plaything seize,
"And toss her wheresoe'er I please.
"Come, let me smite with vigorous blow,
"And send her flying to and fro.
"My half is in the heavenly sphere,
"I've drawn the other half down here.
"How great my glory and my power!
"Aloft into the skies I tower.
"I'm ready now to mount in air,
"Oblations to the gods to bear:
"I've quaffed the Soma-draught.*

VII.—*Indra drinks the libation.*

And not in vain the mortal prays,
For nothing loth the god obeys,
 The proffered bowl he takes;
Well trained the generous juice to drain,
He quaffs it once, he quaffs again,
 Till all his thirst he slakes.
And soon its power the Soma shows,
Through Indra's veins the influence flows;
 With fervour flushed he stands;
His forehead glows, his eyes are fired,
His mighty frame with force inspired,
 His towering form expands.
He straightway calls his brave allies,
To valorous deeds exhorts, and cries—
 "Stride, Vishnu, forward stride;
Come, Maruts, forth with me to war,
See yonder Vrittra stands afar,

* This "drinking Song" is a translation, nearly literal, of the 119th hymn of the 10th Book of the Rigveda.

Digitized by Google

And waits the coming of my car;
We soon shall crush his pride."

VIII.—*Indra, attended by the Maruts, sets out to encounter Vrittra.*

Amid the plaudits, long and loud,
Which burst from all the heavenly crowd,
Charmed by the sweet and magic sound
Of hymns pronounced by bards renowned,
Viewed by admiring troops of friends,
The valiant god his car ascends.
Swept by his fervid bounding steed,
Athwart the sky the hero speeds.
The Marut-hosts his escort form,
Impetuous spirits of the storm.
On flashing lightning cars they ride,
And gleam in warlike pomp and pride:
Each head a golden helmet crests,
And glittering mail adorns their breasts;
Spears on their shoulders rest, their hands
Bear arrows, bows, and lightning-brands.
Bright tinkling anklets deck their feet,
And thought than they is not more fleet;
Like lions' roar their voice of doom;
With iron force their teeth consume.
The hills, the earth itself they shake,
All creatures at their coming quake;
Their headlong fury none can stay,
All obstacles are swept away.
The forest's leafy monarchs tall
Before their onset crashing fall,
As when in fierce destructive mood
Wild elephants invade a wood.

IX.—*Indra's conflict with Vrittra.*

Who is it that, without alarm,
Defies the might of Indra's arm;
That stands and sees without dismay
The approaching Maruts' dread array;
That does not shun, in wild affright,
The terrors of the deadly fight?
'Tis Vrittra,* he whose magic powers
From earth withhold the genial showers,
Of mortal men the foe malign,
And rival of the race divine,
Whose demon hosts from age to age
With Indra war unceasing wage,
Who, times unnumbered, crushed and slain,
Is ever newly born again,
And evermore renews the strife,
In which again he forfeits life.
Perched on a steep aerial height,
Shone Vrittra's stately fortress bright.
Upon the wall, in martial mood,
The bold gigantic demon stood,
Confiding in his magic arts,
And armed with store of fiery darts.
And then was seen a dreadful sight,
When god and demon met in fight.
His sharpest missiles Vrittra shot,
His thunderbolts and lightnings hot
He hurled as thick as rain.
The god his fiercest rage defied,
His blunted weapons glanced aside,
At Indra launched in vain.
When thus he long had vainly toiled,
When all his weapons had recoiled,
His final efforts had been foiled,
And all his force consumed,—
In gloomy and despairing mood
The baffled demon helpless stood,
And knew his end was doomed.
The lightnings then began to flash,
The direful thunderbolts to crash,
By Indra proudly hurled;
The gods themselves with awe were stilled
And stood aghast, and terror filled
The universal world.
Even Tvashtri sage, whose master-hand
Had forged the bolts his art had planned,
Who well their temper knew,—
Quailed when he heard the dreadful clang
That o'er the quivering welkin rang,
As through the sky they flew.
And who the arrowy shower could stand,
Discharged by Indra's red right hand,—
The thunderbolts with hundred joints,
The iron shafts with thousand points,
Which blaze and hiss athwart the sky,
Swift to their mark unerring fly,
And lay the proudest foemen low,
With sudden and resistless blow,
Whose very sound can put to flight
The fools who dare the Thunderer's might?
And soon the knell of Vrittra's doom
Was sounded by the clang and boom
Of Indra's iron shower;
Pierced, cloven, crushed, with horrid yell
The dying demon headlong fell
Down from his cloud-built tower.
Now bound by Sushna's spell no more,
The clouds discharge their liquid store;
And, long by torrid sunbeams baked,
The plains by copious showers are slaked;
The rivers swell, and sea-ward sweep
Their turbid torrents broad and deep.
The peasant views, with deep delight
And thankful heart, the auspicious sight.
His leafless fields, so sere and sad,
Will soon with waving crops be clad,
And mother Earth, now brown and bare,
A robe of brilliant green will wear.
And now the clouds disperse, the blue
Of heaven once more comes forth to view.
The sun shines out, all nature smiles,
Redeemed from Vrittra's power and wiles;
The gods, with gratulations meet,
And loud acclaim, the victor greet;
While Indra's mortal votaries sing
The praises of their friend and king.
The frogs, too, dormant long, awake,
And floating on the brimming lake,
In loud responsive croak unite,
And swell the chorus of delight.

X.—*Indra's greatness.*

What poet now, what sage of old,
The greatness of that god hath told,

* The demon who personifies drought, and is also called Sushna and Ahi.

Who from his body-vast gave birth
To father Sky and mother Earth,
Who hung the heavens in empty space,
And gave the earth a stable base,
Who framed and lighted up the sun,
And made a path for him to run?
In greatness who with Him can vie,
Who fills the earth, the air, the sky,
Whose presence unperceived extends
Beyond the world's remotest ends?
A hundred earths, if such there be,
A hundred skies fall short of thee;
A thousand suns would not outshine
The effulgence of thy light divine.
The worlds, which mortals boundless deem,
To thee but as a handful seem.
Thou, Indra, art without a peer
On earth, or yonder heavenly sphere.
Thee, god, such matchless powers adorn,
That thou without a foe wast born.
Thou art the universal lord,
By gods revered, by men adored.
Should all the other gods conspire,
They could not frustrate thy desire.
The circling years, which wear away
All else, to thee bring no decay;
Thou bloomest on in youthful force,
While countless ages run their course.
Unvexed by cares, or fears, or strife,
In bliss serene flows on thy life.

XI.—*Indra's relations to his worshippers.*

Thou, Indra, art a friend, a brother,
A kinsman dear, a father, mother.
Though thou hast troops of friends, yet we
Can boast no other friend but thee.
With this our hymn thy skirt we grasp,
As boys their father's garments clasp.
Our ardent prayers thy form embrace,
As women's arms their lords enlace;
They round thee cling with gentle force,
Like saddle-girth around a horse.
With faith we claim thine aid divine,
For thou art ours, and we are thine.
And be not like a lazy priest,
Who battens at the dainty feast,
Sits still in self-indulgent ease,
And only cares himself to please.
Come, dole not out with niggard hand
The abundant boons at thy command.
If I were thou, and thou wert I,
My suppliant should not vainly cry.
Wert thou a mortal, I divine,
In want I ne'er would let thee pine.
Had I, like thee, unbounded power,
I wealth on all my friends would shower.
Thy strong right hand, great god, we hold
With eager grasp, imploring gold.
Thou canst our longings all fulfil,
All hangs on thy resistless will.
Abundant aids shoot forth from thee,
As leafy boughs from vigorous tree.
To wifeless men thou givest wives,
And joyful mak'st their joyless lives.
Thou givest sons, courageous, strong,
To guard their aged sires from wrong.
Lands, jewels, horses, herds of kine,—
All kinds of wealth are gifts of thine.
Thy friend is never slain; his might
Is never worsted in the fight.
Yes, those who in the battle's shock,
Thine aid, victorious god, invoke,
With force inspired, with deafening shout
Of triumph, put their foes to rout.
Thou blessest those thy praise who sing,
And plenteous gifts devoutly bring;
But thou chastisest all the proud,
The niggard, and the faithless crowd,
Who thine existence doubt, and cry
In scorn, "No Indra rules on high."
The rich can ne'er thy favourites be,
The rich who never think of thee.
When storms are lulled, and skies are bright,
Wine-swillers treat thee with despite.
When clouds collect and thunders roar,
The scoffers tremble and adore.
No deed is done but thou dost see;
No word is said unheard by thee.
The fates of mortals thou dost wield;
To thy decree the strongest yield.
Thou dost the high and fierce abase,
The lowly raisest in their place.
Thine own true friends secure repose,
By thee redeemed from all their woes,
From straits brought forth to ample room,
To glorious light from thickest gloom.
And thou dost view with special grace,
The fair-complexioned Aryan race,
Who own the gods, their laws obey,
And pious homage duly pay.
Thou giv'st us horses, cattle, gold,
As thou didst give our sires of old.
Thou sweep'st away the dark-skinned brood,
Inhuman, lawless, senseless, rude,
Who know not Indra, hate his friends,
And spoil the race which he defends.
Chase, far away the robbers chase,
Slay those barbarians black and base.
And save us, Indra, from the spite
Of sprites that haunt us in the night,
Our rites disturb by contact vile,
Our sacred offerings defile.
Preserve us, friend, dispel our fears,
And let us live a hundred years.
And when our earthly course we've run,
And gain'd the region of the Sun,
Then let us live in ceaseless glee,
Sweet nectar quaffing there with thee.

Communications of a literary nature should be addressed to the EDITOR : *all letters on business, to the Proprietors,* MESSRS. E. J. LAZARUS & CO., *to whom Drafts should be made payable.* ADVERTISEMENTS *will be inserted at four annas per line.*

The PANDIT may be ordered of the Publishers, or through MESSRS. TRÜBNER and CO., LONDON.

Annual subscription, in advance, including postage, Rs. 12.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 34. Benares March 1st, 1869. Vol. III.

॥ उपदेशसहस्र्या गद्यप्रबन्धः ॥

एवमुक्तं स्वरूपं स्मारयित्वा शरीरस्य भिन्नजात्यन्वयसंस्कारत्वज्ञापनाय तदुत्पत्तिप्रकारमुपदिशेदित्याह । लब्धपरमात्मेति ।

(११) लब्धपरमात्मलक्षणस्मृतये ब्रूयाद्योऽसावाकाशनामा नामरूपाभ्यामर्थान्तरभूतोऽशरीरोऽस्थूलादिलक्षणोऽपहतपाप्मादिलक्षणश्च सर्वैः संसारधर्मैरनागन्धितः ॥

लब्धपरमात्मलक्षणविषया स्मृतिरनुसंधानं येन तस्मै शिष्याय ब्रूयादित्यर्थः । उपलक्षणत्वेनोक्तवाक्यार्थमेव प्रकटयन्नात्मनः सकाशात्संघातोत्पत्तिप्रकारमाह । योऽसावित्यादिना । यः शाखान्तरे प्रकरणान्तरे चात्मादिशब्दैः प्रसिद्धो "ऽसावाकाशो वै नामरूपयोर्निर्वहिता ते यदन्तरे" इत्यत्र छान्दोग्ये निर्दिष्ट आकाशनामा स्वात्मविलक्षणयोर्नामरूपयोर्व्याकर्त्ता स सर्वस्यात्मेत्यन्वयः । आकाशनामेत्युक्ते भूताकाशशङ्का स्यात्तामाकाशोऽर्थान्तरत्वादिव्यपदेशादिति न्यायेन परिहरति । नामरूपाभ्यामर्थान्तरभूत इति । भूताकाशस्य नामरूपान्तःपातित्वात्तयोराधारभूत आत्मा आधेयादाकाशादेरन्य इत्यर्थः । असङ्गत्वादिभिराकाशसाम्यात्परमात्माप्याकाशशब्देन श्रुतिषु क्वचिन्निर्दिश्यते गौण्यावृत्त्येति द्रष्टव्यम् । अत एवाशरीरो मूर्त्तिवर्जितः । अशरीरपदमनिन्द्रियत्वादेरप्युपलक्षणमित्यभिप्रेत्य विशिनष्ट्यस्थूलादिलक्षण इति । अथ वा अशरीरः शरीरादिसंघातरहित इत्यत्र प्रमाणं सूचयत्यस्थूलादिलक्षण इति । यतः शरीरेन्द्रियमनःप्राणादिरहितोऽत एवापहतपाप्मादिलक्षणोऽभिमन्यमानस्याभावेऽभिमानाभावादित्यर्थः । चशब्देन स्वतो विकाररहित्यं समुच्चीयते । सर्वविशेषणैः सिद्धमर्थमाह । सर्वैरिति । अनागन्धितोऽसंश्लिष्ट इत्यर्थः ॥ ११ ॥

नन्वेवं परमात्मनोऽशरीरादिलक्षणत्वेऽपि जीवः शरीरादिलक्षण एव स्यादित्याशङ्क्य तस्य तेनानन्यत्वश्रवणान्मैवमित्यभिप्रेत्याह । यत्साक्षादित्यादिना ।

(१२) यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरोऽदृष्टो द्रष्टाऽश्रुतः श्रोताऽमतो मन्ताऽविज्ञातो विज्ञाता नित्यविज्ञानस्वरूपोऽनन्तरोऽबाह्यो विज्ञानघन एव परिपूर्ण आकाशवदनन्तशक्तिरात्मा सर्वस्याशनायादिवर्ज्जित आविर्भावतिरोभाववर्ज्जितश्च स्वात्मविलक्षणयोर्नामरूपयोर्जगद्बीजभूतयोः स्वात्मस्थयोस्तत्त्वान्यत्त्वाभ्यामनिर्वचनीययोः स्वसंवेद्ययोः सद्भावमात्रेणाचिन्त्यशक्तित्वाद्व्याकर्त्ताऽव्याकृतयोः ॥

विज्ञातेत्युक्ते प्राप्तं विज्ञानकर्तृत्वं वारयति । नित्यविज्ञानस्वरूप इति । तत्र प्रमाणमाहानन्तर इत्यादिना । आकाशवत्परिपूर्ण इत्यन्वयः । पूर्ण इति निष्ठाप्रत्ययो न कर्मणि, किंतु कर्त्तरि, परिच्छेदाभाववद्योतीत्याकाशदृष्टान्तः, कथमेवंलक्षणस्य द्रष्टृत्वादिकमुक्तमित्यत आहानन्तशक्तिरिति । "इन्द्रो मायाभिः पुरुरूप ईयते" इति श्रुतेः । अनन्ता अनवच्छिन्ना दुर्लक्ष्या मायावस्थारूपाः शक्तय उपाधयो यस्य सोऽनन्तशक्तिर्मायाकार्यान्तःकरणेन्द्रियोपाधिभिर्द्रष्टृत्वादिव्यपदेशभाग्भवतीत्यर्थः । सर्वस्य स्थावरजङ्गमरूपस्य प्रपञ्चस्यात्मा स्वरूपमित्यर्थः । तस्य नित्यमसंसारित्वं स्वाभाविकमाहाशना-

Digitized by Google

यादीति । आविर्भावतिरोभावसाक्षित्वादेव तद्विवर्जित इत्यर्थः । एवमात्मस्वभावमुक्त्वा नामरूपात्मकानात्मस्वभावं प्रपञ्चयति । स्वात्मविलक्षणयोरित्यादिना । अचेतनयोरित्यर्थः । जगद्बीजभूतयोरित्युपादानत्वमुच्यते । कथं तर्ह्यात्मोपादानत्वश्रुतिरित्यत आह । स्वात्मस्थयोरिति । उपादानाधारतामात्रेण कथमुपादानत्वसिद्धिरित्यत आह । सद्भावमात्रेणेति । सद्भावो नाम सत्त्वं आत्मसत्तामात्रेणैवात्मनि स्थितयोर्न पृथक् सतोरात्मनिष्ठयोरित्यर्थः । तथा च स्वात्मैकतां गतयोर्नामरूपयोर्व्याकर्त्ता स्वात्मन एव व्याकर्त्तेत्युपादानत्वसिद्धिरात्मन इत्यभिप्रायः । कुत एवं चिद्रूपस्यात्मनोऽचिद्रूपेण स्वात्मव्याकरणमित्यत आह । अचिन्त्यशक्तित्वादिति । अव्याकृतयोरनभिव्यक्तयोरित्यर्थः । अनभिव्यक्ततया स्थितं हि व्यक्तीक्रियते न प्रागसदतिप्रसङ्गादिति भावः ॥ १२ ॥

उक्तलक्षणयोर्नामरूपयोर्यदासौ निष्पादयिता तदा किमात्मके ते प्रथमं निष्पाद्येते इति, तदाह । ते नाम रूपे इत्यादिना ।

(१३) ते नामरूपे अव्याकृते व्याक्रियमाणे तस्मादेतस्मादात्मन आकाशनामाकृती संवृत्ते, तच्चाकाशाख्यं भूतमनेन प्रकारेण परमात्मनः संभूतं, प्रसन्नादिव सलिलान्मलमिव फेनं, न सलिलं न च सलिलादत्यन्तभिन्नं, फेनस्य सलिलव्यतिरेकेणादर्शनात्सलिलं तु स्वच्छमन्यत्फेनान्मलरूपादेवं परमात्मा नामरूपाभ्यामन्यः फेनस्थानीयाभ्यां शुद्धः प्रसन्नस्तद्विलक्षणस्ते नामरूपे अव्याकृते सती व्याक्रियमाणे फेनस्थानीये आकाशनामाकृती संवृत्ते ॥

तस्मादपहतपाप्मत्वादिलक्षणादेतस्मादचिन्त्यशक्तेः सर्वज्ञादाकाश इति नाम वाचकः शब्द आकृतिर्वाच्याकार इत्येवमाकारे संवृत्ते एवं व्यवहारयोग्ये अभूतामित्यर्थः । वाच्यवाचकाकारेण सदात्मकं ब्रह्मैव मायावशादभिव्यक्तमाकाशादिशब्दार्थात्मकमिति तात्पर्यार्थः । ननु कथं चिदात्मनोऽचिदात्मकाकाशात्मना निष्पत्तिरिति शङ्कां दृष्टान्तेन प्रत्याचष्टे । तच्चाकाशाख्यमित्यादिना । दृष्टान्तं विवृण्वन्नात्मनः परिणामित्वशङ्कां वारयति । न सलिलमित्यादिना । सलिलव्यतिरेकेण स्वरूपतः पृथगनुपलम्भादित्यर्थः । फेनस्य सलिलाद्भेदाभावे सलिलस्यापि न ततो भेद इत्यत आह । सलिलं त्विति । अतो न सलिलमेव फेनं नापि ततो भिन्नं किं त्वनिर्वचनीयमित्यर्थः । तथा च श्रुतिः "वाचारम्भणं विकारो नामधेय" मिति । दार्ष्टान्तिकमाह । एवं परमात्मेति । निरूपिताकाशोत्पत्तिं निगमयति । ते नामरूपे इति ॥ १३ ॥

इदानीं ततो वाय्वाद्युत्पत्तिं प्रतिपादयति । ततोपीत्यादिना ।

(१४) ततोपि स्थूलभावमापद्यमाने नामरूपे व्याक्रियमाणे वायुभावमापद्येते, ततोप्यग्निभाव,मग्नेरब्भावं, ततः पृथ्वीभाव,मित्येवं क्रमेण पूर्वपूर्वोत्तरोत्तरानुप्रवेशेन पञ्च महाभूतानि पृथिव्यन्तान्युत्पन्नानि, ततः पञ्चमहाभूतगुणविशिष्टा पृथ्वी, पृथिव्याश्च पञ्चात्मक्यो व्रीहियवाद्या ओषधयो जायन्ते, ताभ्यो भक्षिताभ्यो लोहितं शुक्रं च स्त्रीपुंसशरीरसंबन्धि जायते, तदुभयमृतुकालेऽविद्याप्रयुक्तकामखजनिर्मथनोद्भूतं मन्त्रसंस्कृतं गर्भाशये निषिच्यते, तत्स्वयोनिरसानुप्रवेशेन विवर्द्धमानं गर्भीभूतं नवमे दशमे वा मासि संजायते ॥

आकाशात्मना स्थिते नामरूपे तदनुगतेनात्मना व्याक्रियमाणे ततोप्याकाशादपि स्थूलभावमापद्यमाने सती वायुभावमापद्येते इति योजना । स्थूलभावः स्पर्शगुणेनोपचयः, ये नामरूपे आकाशात्मतां प्राप्ते ते एव व्याक्रियमाणे वायुभावमापद्येते इति वदन् विकारस्य विकारान्तरोपादानत्वं वारयति । एवमुत्तरत्रापि द्रष्टव्यं । तदेवं भूतोत्पत्तिमुक्त्वा तेभ्यः संघातस्य स्थूलस्योत्पत्तिप्रकारमाह । पृथिव्याश्चेति । पञ्चात्मक्य इति पञ्चीकृतपञ्चभूतनिर्वर्त्तिता इत्यर्थः । तदुभयं, स्त्रियाः लोहितं पुंसः शुक्रं चेत्यर्थः । काम एव खजो विलोडको मन्थास्तेन निर्मथनोद्भूतमित्यर्थः । "गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वती"त्यादिगर्भाधानमन्त्रैः संस्कृतमित्यर्थः ॥ १४ ॥

एवं शरीरोत्पत्तिमुपोद्घाततयोपदिश्य तस्य भिन्नजात्यन्वयसंस्कारं पृष्टं प्रतिपादयति । तज्जातमित्यादिना ।

(१५) तज्जातं लब्धनामाकृतिकं जातकर्मादिभिर्मन्त्रसंस्कृतं पुनरुपनयनसंस्कारयोगेन ब्रह्मचारिसंज्ञं भवति, तदेव शरीरं पत्नीयोगसंस्कारयोगेन गृहस्थसंज्ञं भवति, तदेव वनस्थसंस्कारेण तापससंज्ञं भवति, तदेव क्रियाविनिवृत्तिनिमित्तसंस्कारेण परिव्राट्त्संज्ञं भवति, इत्येवं त्वत्तोभिन्नं भिन्नजात्यन्वयसंस्कारशरीरं मनश्चेन्द्रियाणि च नामरूपात्मकान्येवा"न्नमयं हि सोम्य मन" इत्यादिश्रुतिभ्यः । कथं चाहं भिन्नजात्यन्वयसंस्कारवर्जित इत्येतच्छृणु, योऽसौ नामरूपयोर्व्याकर्त्ता नामरूपधर्मविलक्षणः स एव नामरूपे व्याकुर्वन् सृष्ट्वेदं शरीरं स्वयं संस्कारधर्मवर्जितो नामरूपे इह प्रविष्टः ॥

ज्ञातमित्यस्य व्याख्या लब्धनामाकृतिकमिति । भूतोपादानकत्वेन पित्रादिनिमित्तकत्वेन च भिन्नजात्यन्वयौ शरीरस्योक्तौ । इदानीं संस्कारमाह । जातकर्मादिभिरिति । एवं स्थूलशरीराभिमानाच्छिष्यं व्युत्थाप्य सूक्ष्मशरीराभिमानमपि तस्य त्याजयंस्तस्यापि भौतिकत्वमाह । मनश्चेत्यादिना । नामरूपात्मकान्येव भौतिकान्येवेत्यर्थः । तत्र प्रमाणमाहान्नमयमिति । अतो मनआदिसूक्ष्मसंघातो ऽपि नात्मा भौतिकत्वात् स्थूलवदित्यर्थः । कथं भिन्नजात्यन्वयसंस्कारं शरीरमित्यस्य प्रश्नस्योत्तरमभिधाय, कथं चाहं जात्यन्वयसंस्कारवर्जित इति शिष्योक्तिमनूद्योत्तरमाह । कथं चेत्यादिना, यस्तु नामरूपविलक्षणः पूर्वोक्तविलक्षणो नामरूपात्मकस्य सर्वस्य स्रष्टा जात्यन्वयसंस्कारवर्जितः स एवाविकृतः सृष्टेषु कार्यकरणसंघातेषु प्रविष्टो जीवात्मेति श्रुतिस्मृतिप्रसिद्धत्वाच्च तस्य जात्यन्वयसंस्कारसंबन्ध इति प्रतिपादयन्नाह । योसावित्यादिना ॥ १५ ॥

ननु परमात्मैव चेदिह प्रविष्टः पक्षीव नीडं तर्हि कथं स सर्वैर्नोपलभ्यत इति तत्राह । अन्यैरदृष्ट इति ।

(१६) अन्यैरदृष्टः स्वयं पश्यंस्तथा ऽश्रुतः शृण्वन्नमतो मन्वानो ऽविज्ञातो विजानन्, सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वा ऽभिवदन्यदास्ते, इत्यस्मिन्नर्थे श्रुतयः सहस्रशः, तत्सृष्ट्वा तदेवानुप्राविश, दन्तः प्रविष्टः शास्ता जनानां, स एष इह प्रविष्टः, एष त आत्मा स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यते,ष सर्वेषु भूतेषु गूढोत्मा सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता, इत्याद्याः श्रुतयः । स्मृतयो ऽपि, आत्मैव देवताः सर्वाः, नवद्वारे पुरे देही, क्षेत्रज्ञं चापि मां विद्धि, समः सर्वेषु भूतेषु, उपद्रष्टा ऽनुमन्ता च, उत्तमः पुरुषस्त्वन्यो, ऽशरीरं शरीरेष्वित्याद्याः तस्माज्जात्यन्वयसंस्कारवर्जितत्वमिति सिद्धम् ॥

अदृष्टो द्रष्टेत्यादिश्रुतिरिहार्थतो दर्शिता । सर्वस्य यो विज्ञाता सर्वावभासकत्वान्नान्यैरवभास्यते सोस्त्येवेह प्रविष्ट इति भावः । अत्र मन्त्रमुदाहरति । सर्वाणीति । रूपाणि शरीराणि विचित्य विरचय्य धीरो धीमान्सर्वज्ञस्तत्र प्रविश्य नामानि कृत्वा देवोहं मनुष्योहमित्यभिवादनादिव्यापारं कुर्वन् यदास्ते यो वर्त्तते तं वेदाहमेतमिति पूर्वार्द्धेनान्वयः । अस्मिन्नर्थ इति । स्रष्टुरेव जीवरूपेण प्रवेश इत्यत्रेत्यर्थः । ब्राह्मणवाक्यान्यप्यत्रोदाहरति । तत्सृष्ट्वेत्यादिना । एष त आत्मा अन्तर्याम्यमृत इति वाक्यशेषः । स ईक्षणपूर्वकं जगत्स्रष्टा एतमेव प्रसिद्धं सीमानं शिरःकपालसंधिं विदार्य भित्त्वा एतया ब्रह्मरन्ध्रवाच्यया द्वारा छिद्रेण प्रापद्यत देहमध्ये प्रविष्ट इत्यर्थः । अन्तः प्रविष्टं कर्त्तारमेतं, भर्त्ता सन् ध्रियमाणो बिभर्त्ति, एको देवो बहुधा निविष्टः, ।

"इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ।
एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः" ॥

इत्यादिमन्त्रब्राह्मणवादानप्यत्र सूचयन्तीत्याद्याः श्रुतय इति । परमात्मैव क्षेत्रज्ञ इति श्रुत्युक्तेर्थे स्मृतीरप्युदाहरन्ति । स्मृतयोपीति । शरीरे वर्त्तमानस्यापि शरीरधर्मासंस्पर्शित्वे श्रुतिं प्रमाणयत्यशरीरं शरीरेष्विति ।

"स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम्"

इत्यादिश्रुतय आदिशब्दार्थः । यस्मादेवं श्रुतिस्मृतिन्यायैरात्मा देहादेर्भिन्नो ऽसङ्गस्तद्धर्मासंस्पृष्टश्च तस्मादिति प्रकृतमुपसंहरति । तस्मादिति ॥ १६ ॥

एवं परमात्माभेदोपदेशेन जीवस्य जात्यन्वयसंस्कारराहित्यमुक्तमवधार्य तत्र स्वानुभवविरोधं शङ्कते । स यदीति ।

(१७) स यदि ब्रूयादन्य एवाहमन्यः सुखी दुःखी बद्धः संसार्यन्योसौ मद्विलक्षणो ऽसंसारी देवस्तमहं बल्युपहारनमस्कारादिभिर्वर्णाश्रमकर्मभिश्चाराध्य संसारसागरादुत्तितीर्षुरस्मि, कथमहं स एवेत्याचार्यो ब्रूयान्नैवं सोम्य प्रतिपत्तुमर्हसि प्रतिषिद्धत्वाद्भेदप्रतिपत्तेः, कथं प्रतिषिद्धा भेदप्रतिपत्तिरित्यत आह, अन्यो ऽसावन्यो ऽहमस्मीति न स वेद, ब्रह्म तं परादाद्यो ऽन्यत्रात्मनो ब्रह्म वेद, मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति, इत्येवमाद्याः ॥

अज्ञत्वादेः स्वात्मन्यनुभवसिद्धत्वात्तद्विलक्षणेश्वरात्मत्वं श्रुत्यादिभिरुक्तमपि न संभावयामि, किं तु भिन्नमेव तमहं मन्ये, उत्कृष्टमीश्वरं निकृष्टसंसार्यात्मना पश्यतः प्रत्यवायापत्ते,रतस्तं देवं स्वकर्मणा भक्त्या चाराध्य तत्प्रसादान्मुक्तसंसारो भविष्यामीति मे मतिरिति शिष्याभिप्राय इत्यर्थः । मैवं वादीः, भेददर्शन एव प्रत्यवायश्रवणादिति गुरुः परिहरति । नैवं सोम्येति । संग्रहवाक्यमाक्षेपसमाधानाभ्यां विवृणोति । कथमित्यादिना । प्रत्यक्षसिद्धस्य भेदस्य कथं तद्विरुद्धप्रमाणान्तरेण प्रतिषेध इत्याक्षेपार्थः । असंसारीश्वरस्या ऽप्रत्यक्षत्वात्तद्भेदस्य स्वात्मनि प्रत्यक्षत्वाभावात्सुखित्वाद्यनुभवस्य भ्रान्त्याप्युपपत्तेस्तद्बलाद्भेदाध्यवसायायोगादनन्यथासिद्धार्थश्रुतिनिषिद्धो भेदो न मानमर्हतीति समाधानाभिप्रायः ॥ १७ ॥

उदाहृताः श्रुतयो न भेददर्शनमात्रं निषेधन्ति, किं तु भेददर्शिनः प्रत्यवायमप्यनर्थप्राप्तिरूपमावेदयन्तीत्याह । एता एवेति ।

Digitized by Google

(१८) एता एव श्रुतयो भेदप्रतिपत्तेः संसारगमनं दर्शयन्त्यभेदप्रतिपत्तेश्च मोक्षं दर्शयन्ति सहस्रशः स आत्मा तत्त्वमसीति परमात्मभावं विधायाचार्यवान्पुरुषो वेदेत्युक्त्वा तस्य तावदेव चिरमिति मोक्षं दर्शयन्त्यभेदविज्ञानादेव, सत्यसंधस्यातस्करस्येव दाहाद्यभाववत्संसाराभावं दर्शयन्ति दृष्टान्तेन, भेददर्शनादसत्याभिसंधस्य संसारगमनं दर्शयन्ति तस्करस्येव दाहादिदृष्टान्तेन ॥

तथाहि अन्योऽसौ परमेश्वरो मद्विलक्षणो ऽन्योऽहं तद्विलक्षणः संसार्येवेति योऽन्यां देवतामुपास्ते तात्पर्येण पश्यति न स वेद तत्त्वमिति भेददर्शनस्याविद्यामूलत्वमुक्त्वा यथा पशुरेवं स देवानामिति देवपशुत्वप्राप्तिं तस्य दर्शयन्ति । नहि पराधीनात्मत्वतो ऽन्यद्दैन्यं कष्टं वा वर्त्तत इति । तथा योऽन्यत्रान्यदेवेदमित्यात्मनः पृथगेव ब्रह्म ब्राह्मणजातिं वेद तं तदेव ब्रह्म ब्राह्मणत्वजातिः परादात्पराकुर्यात् तत्त्वविमुखं कुर्यादात्मरूपं मामनात्मतया पश्यतीति द्विष्टेव न तु हितमावहतीत्यर्थः । एवं क्षत्रं तं परादादित्यादि सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेदेत्यन्तमुदाहरणं द्रष्टव्यम् । इहात्मनि यो नानेव पश्यति इवशब्दो नानात्वदर्शनस्याभासत्वद्योतनार्थः, स मृत्योर्मृत्युं संसारात्संसारमनर्थपरंपरामेवाप्नोतीत्यर्थः । इत्येवमाद्या इति । नेह नानास्ति किं चन, उदरमन्तरं कुरुते अथ तस्य भयं भवतीत्याद्याः श्रुतय उच्यन्ते । भेददृष्टिं निन्दित्वा ऽभेददृष्टिं फलवत्तया प्रशंसन्त्यो एषोपादेयतां दर्शयति । अभेदप्रतिपत्तेश्चेति । तत्र श्रुत्येकदेशमुदाहृत्य व्याचष्टे । स आत्मेत्यादिना । तत्रैवान्वयव्यतिरेकोपपत्तिपरश्रुत्यर्थमुदाहरन्नुक्तमर्थं द्रढयति । अभेदविज्ञानादेवेति । पुरुष सोम्येति हस्तं गृहीतमानयन्तीति खण्डे इममर्थं दर्शयतीत्यर्थः ॥ १८ ॥

सुषुप्तौ परमात्मन्यभेदसंपत्तावपि तथाज्ञानाभावापराधादेव पुनरपि व्याघ्रादिभावेनोत्थितानां संसाराविच्छेदं दर्शयन्ती श्रुतिः परमात्माभेदेनात्मज्ञानमेव मोक्षहेतुरिति सूचयतीत्यभिप्रेत्याह । तद्द्व व्याघ्रो वेत्यादिना चेति ।

(१९) तद्द्व व्याघ्रो वेत्यादिना चाऽभेददर्शनात्स्वराड्भवतीत्युक्त्वा तद्विपरीतेन भेददर्शनेन संसारगमनं दर्शयन्त्यथ ये ऽन्यथातो विदुरन्यराजानस्ते क्षय्यलोका भवन्तीति प्रतिशाखं, तस्मान्मृषैवेममवादीर्ब्राह्मणपुत्रो ऽदोऽन्यः संसारी परमात्मविलक्षण इति, । तस्मात्प्रतिषिद्धत्वाद्भेददर्शनस्य भेदविषयत्वाच्च कर्मोपादानस्य कर्मसाधनत्वाच्च यज्ञोपवीतादेः कर्मसाधनोपादानस्य परमात्माभेदप्रतिपत्त्या प्रतिषेधः कृतो वेदितव्यः ॥

अत्रैवोदाहरणान्तरमाह । भेददर्शनात्स्वराडित्यादिना । यदा ह्येवैष एतस्मिन्नदृश्ये ऽनात्म्ये ऽनिरुक्ते ऽनिलयने ऽभयं प्रतिष्ठां विन्दते अथ सो ऽभयं गतो भवति यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवतीत्याद्याः श्रुतयो ऽप्युदाहर्त्तव्या इत्याह । इति प्रतिशाखमिति । यस्मादेवं भेददर्शननिन्दया ऽभेददर्शनस्तुत्या च जीवस्य ब्रह्माभेदो ऽवधारितो ऽतो ब्राह्मणत्वाद्यभिमानस्यात्मनि मिथ्यादृष्टित्वं सिद्धमिति प्रकृतमुपसंहरति । तस्मादिति । यत्तूक्तं तमहं बल्युपहारनमस्कारादिभिर्वर्णाश्रमकर्मभिश्चाराध्येति सापि दृष्टिर्भेददर्शनापवादादेव न सम्यग् दृष्टिरित्याह । तस्मात्प्रतिषिद्धत्वादिति । भेदविषयत्वाच्च कर्मोपादानस्येति । क्रियाकारकफलभेदाश्रयमन्तरेण कर्मणः स्वरूपासिद्धिरित्यर्थः । यज्ञोपवीत्येवाधीयीत याजयेद्यजेत वेति श्रुतेर्यज्ञोपवीतधारणादेः कर्मसाधनत्वावगमात्साध्यकर्माभावे तत्साधनपरिग्रहो निरर्थक इत्यभिप्रेत्याह । कर्मसाधनत्वाच्च यज्ञोपवीतादेरिति । कर्मसाधनयोरुपादानं कर्मसाधनोपादानं तस्येति विग्रहः ॥ १९ ॥

कथमभेदप्रतिपत्तिमात्रेण कर्मतत्साधनप्रतिषेधसिद्धिः, कर्मणोऽप्यभेदप्रतिपत्तिसंभवादित्याशङ्क्याह । कर्मणामिति ।

(२०) कर्मणां तत्साधनानां च यज्ञोपवीतादीनां परमात्माभेदप्रतिपत्तिविरुद्धत्वा,त्संसारिणो हि कर्माणि विधीयन्ते, तत्साधनानि च यज्ञोपवीतादीनि न परमात्मनो ऽभेददर्शिनः, भेददर्शनमात्रेण च ततोऽन्यत्वं, यदि कर्माणि कर्त्तव्यानि न निविवर्त्तयिषितानि कर्मसाधनाऽसंबन्धिनः कर्मनिमित्तजात्याश्रमाद्यसंबन्धिनश्च परमात्मनश्च आत्मनैवाभेदप्रतिपत्तिं नावक्ष्य,त्स आत्मा तत्त्वमसीत्येवमादिभिर्निश्चितरूपैर्वाक्यैर्भेदप्रतिपत्तिनिन्दां च नाभ्यधास्यदेष नित्यो महिमा ब्राह्मणस्याऽनन्वागतं पुण्येनानन्वागतं पापेनाच स्तेनोऽस्तेन इत्यादिना ॥

ब्रह्माहं कर्त्ता चाहमिति विरुद्धप्रतिपत्त्योरेकस्मिन्पुरुषे समुच्चयायोगादित्यर्थः । तर्ह्यधिकार्यभावाद्विराल्लम्बनं कर्मकाण्डमप्रमाणं स्यादिति, नेत्याह । संसारिणो हीति । संसारिणो जात्याद्यभिमानवत इत्यर्थः । न परमात्मनो ऽभेददर्शिन इत्यर्थः । संसारिणोऽपि परमात्मानन्यत्वात्कथं तस्य कर्मविधिरित्यत आह । भेददर्शनमात्रेण च ततोऽन्यत्वमिति । न वस्तुवृत्त्या भेदापेक्षा कर्मविधेरिति भावः । यदुक्तं ब्रह्मात्मैक्यप्रतिपत्त्या कर्मणां तत्साधनानां च श्रुत्या प्रतिषेधः कृत इति, तद्व्यतिरेकमुखेन साधयति । यदि कर्माणीत्यादिना । परमात्मनश्चेति चकारादात्मनो ब्रह्मणैवाभेदप्रतिपत्तिमिति योज्यम् ।

Digitized by Google

एवमादिभिरित्यहं ब्रह्मास्मीत्यादिवाक्यं गृह्यते । निश्चितरूपैर्वाक्यैरिति । संवादिविसंवादिप्रमाणान्तरासिद्धविषयत्वे सत्यनन्यशेषतया च स्वार्थैकपरत्वेन निर्णीतस्वभावैरित्यर्थः । भेदप्रतिपत्तिनिन्दामिति । मृत्योः स मृत्युमित्यादिभिर्वाक्यैरिति शेषः । ब्राह्मणस्य ब्रह्मविदः स हि मुख्यो ब्राह्मणः स ब्राह्मणः इति श्रुतेरित्यर्थः ॥ २० ॥

उदाहृतवाक्यानां क्रमेण तात्पर्यमाह । कर्मासंबन्धीत्यादिना ।

(२१) कर्माऽसंबन्धिस्वरूपत्वं कर्मनिमित्तवर्णाद्यसंबन्धतां च नाभ्यधास्यत्कर्माणि च कर्मसाधनानि च यज्ञोपवीतादीनि यद्यपरितित्याजयिषितानि, तस्मात्ससाधनं कर्म परित्यक्तव्यं मुमुक्षुणा, परमात्माभेददर्शनविरोधादात्मा चापर एवेति प्रतिपत्तव्यो यथाश्रुत्युक्तलक्षणः । स यदि ब्रूयाद्भगवन्दह्यमाने छिद्यमाने वा देहे प्रत्यक्षा वेदना ऽशनायादिनिमित्तं च प्रत्यक्षं दुःखं मम परश्चात्मा ऽयमात्मापहतपाप्मा विरजो विमृत्युर्विशोको ऽविजिघत्सो ऽपिपासः सर्वसंसारधर्मवर्जितः श्रूयते सर्वश्रुतिषु स्मृतिषु च, कथं तद्विलक्षणो ऽनेकसंसारधर्मसंयुक्तः परमात्मानमात्मत्वेन च मां संसारिणं परमात्मत्वेनाग्निमिव शीतत्वेन प्रतिसंपद्येयं, संसारी च सन् सर्वाभ्युदयनिःश्रेयससाधने ऽधिकृतो ऽभ्युदयनिःश्रेयससाधनानि कर्माणि तत्साधनानि च यज्ञोपवीतादीनि कथं परित्यजेयमिति । तं प्रतिब्रूयाद्यदवोचो दह्यमाने छिद्यमाने वा देहे प्रत्यक्षा वेदनोपलभ्यते ममेति ॥

यदि कर्मादीनि न परितित्याजयिषितानि, तर्ह्येवमुक्तं सर्वं नाभ्यधास्यदिति संबन्धः । अभिधत्ते तु श्रुतिस्तंतमर्थमतो ब्रह्मात्मज्ञानमिच्छता कर्मादीनि परित्याज्यानीत्याह । तस्मादिति । तदेवमागमावष्टम्भेन निरूपितं ब्रह्मात्मैक्यं युक्त्यापि व्यवस्थापयितुमुत्तरो ग्रन्थः । तत्राक्षेप्ता शिष्यो जीवपरमात्मानौ वस्तुतो भिन्नौ विरुद्धधर्मसंसर्गित्वाच्छीतोष्णवदित्यनुमानेन प्रत्यवतिष्ठत इत्याह । स यदि इत्यादिना । एवं विरुद्धधर्मवत्त्वहेतुमुपपाद्यानुमानमाह । कथं तद्विलक्षण इति । एवं सति भेदस्य तात्त्विकत्वेन कर्मतत्साधनपरित्यागात्मकस्य संन्यासस्य नास्त्यवसर इत्याह । संसारी चेति । तत्रानुमाने तावद्धेत्वसिद्धिं दर्शयितुमुपक्रमते । तं प्रतिब्रूयादित्यादिना ॥ २१ ॥

जीवपरमात्मानाविति । किमुपाधिभेदविशिष्टं वस्तु यथा प्रतिपत्तिर्निर्दिश्यते, किं वा चैतन्यमात्राकारम्, आद्ये बाधव्यभिचारौ, आकाशभेदवदौपाधिकस्य भेदस्यावास्तवत्वाद्भेदमात्रसाधने सिद्धसाधनत्वाच्चेत्यभिप्रेत्य द्वितीये ऽसिद्धिमुक्त्वा तामुपपादयति । तदसत्कस्मादित्यादिना ।

(२२) तदसत्कस्माद्दह्यमाने छिद्यमान इव वृक्ष उपलब्धुरुपलभ्यमाने कर्मणि शरीरे दाहच्छेदवेदनाया उपलभ्यमानत्वाद्दाहादिसमानाश्रयैव वेदना, यत्र हि दाहश्छेदो वा क्रियते तत्रैव व्यपदिशति दाहादिवेदनां लोको न वेदनादाहाद्युपलब्धरीति, कथं, क्व ते वेदनेति पृष्टः शिरसि मे वेदनोरस्युदर इति वा यत्र दाहादिस्तत्रैव व्यपदिशति, न तूपलब्धरि इति, यद्युपलब्धरि वेदना स्याद् वेदनानिमित्तं वा दाहच्छेदादि वेदनाश्रयत्वेनोपदिशेद्दाहाद्याश्रयवत् ॥

वृक्ष इव दह्यमाने छिद्यमाने शरीरे दाहच्छेदवेदनाया उपलभ्यमानत्वाद् दाहादिसमानाश्रयैव दाहच्छेदादिवेदनेति योजना । शरीरस्यैव तदुपलब्धृत्वशङ्कां वारयितुं तद्विशिनष्टि । कर्मणीति । कर्मत्वं साधयत्युपलब्धुरुपलभ्यमान इति । उक्तमर्थं लोकप्रसिद्ध्या द्रढयति । यत्र हीति । तत्रैवानुभवमपि प्रश्नपूर्वकमभिनयति । कथमित्यादिना । पुनस्तदेव व्यतिरेकमुखेनोपपादयति । यद्युपलब्धरीति । उपदिशेदित्यस्मात्पूर्वमुपलब्धारमित्यध्याहारः,यद्युपलब्धरि वेदना स्यात्तदा दाहाद्याश्रयदेहदेशवद्वेदनानिमित्तं दाहच्छेदादिजवेदनाश्रयत्वेनोपलब्धारमुपदिशेल्लोको, नैवमुपदिशन्नुपलभ्यते, अतो दाहच्छेदादिसमानाश्रयैव वेदनेति योजना ॥ २२ ॥

तत्रैव युक्त्यन्तरमाह । स्वयं चेति ।

(२३) स्वयं च नोपलभ्येत चक्षुर्गतरूपवत्तस्माद्दाहच्छेदादिसमानाश्रयत्वेनोपलभ्यमानत्वाद्दाहादिवत् कर्मभूतैव वेदना भावरूपत्वाच्च साश्रया तण्डुलपाकवद्वेदनासमानाश्रय एव तत्संस्कारः स्मृतिसमानकाल एवोपलभ्यमानत्वाद्वेदनाविषयस्तन्निमित्तविषयश्च द्वेषोपि संस्कारसमानाश्रय एव, तथाचोक्तम् ।

रूपसंस्कारतुल्याधी रागद्वेषौ भयं च यत् ।
गृह्यते धीश्रयं तस्माज्ज्ञाता शुद्धो ऽभयः सदा ॥

किमाश्रयाः पुनः रूपादिसंस्कारादय इ,त्युच्यते यत्र कामादयः, क्व पुनस्ते कामादयः, कामः संकल्पो विचिकित्सेत्यादिश्रुतेर्बुद्धावेव ॥

Digitized by Google

यथा चक्षुर्गतं रूपं न चक्षुषा दृश्यते तथात्मगता वेदनात्मना न गृह्यते कर्मकर्तृत्वविरोधादित्यर्थः । आत्मनो वेदनाश्रयत्वनिराकरणमुपसंहरति । तस्मादिति । ननु वेदना नाम दुःखं, न तदचेतने देहे संभवति, सुखदुःखादिधर्माणां चेतनाश्रयत्वनियमात् । यदि पुनश्चेतनोऽप्यात्मा न वेदनाश्रयस्तदा शरीरमप्यचेतनं न तदाश्रय इत्यनाश्रयैव वेदनास्तु, बौद्धैरपि तथाभ्युपगमादित्यत आह । भावरूपत्वाच्चेति । भावरूपत्वं कार्यत्वं, वेदना साश्रया कार्यत्वात्तण्डुलपाकादिवद् इत्यर्थः । हेतोरप्रयोजकतामाशङ्क्य विपक्षे बाधकमाह । वेदनासमानाश्रयइति । वेदनाया निराश्रयत्वे तन्नाशे संस्काराभावात्कालान्तरे स्मरणं न स्यादित्यर्थः । यद्वा हेत्वसिद्धिं परिहरति । वेदनासमानाश्रय एव तत्संस्कार इति वेदनाया अकार्यत्वे तत्संस्कारस्मृत्योरसंभवात्कालान्तरे पादे मे वेदनाभूदित्यादिव्यवहारो न स्यादित्यभिप्रायः । अथ वा साश्रया यदि वेदना तर्ह्यात्माश्रयैव स्यादात्मन्येव तत्संस्कारस्मृत्यादेरुपलम्भादित्याशङ्क्याह । वेदनासमानाश्रय एव तत्संस्कार इति । यस्या वेदनोपलभ्यते तस्य एव तज्जन्यसंस्कारादिः, वेदनातत्संस्कारस्मृतीनामेकाश्रयत्वनियमाद्वेदनायाश्चोपलब्धिकर्मनिष्ठत्वोपपादनाच्चोपलब्धर्यात्मनि तत्संस्कारादीत्यर्थः । तदेवानुमानेन साधयति । स्मृतिसमानकाल एवेति । स्मृतेर्यः कालो जाग्रत्स्वप्नावस्थारूपस्तत्रैवोपलभ्यमानत्वात्सुषुप्त्यादावनुपलभ्यमानत्वाद्वेदनाविषयो वेदनासमानविषयः समानाश्रय एव तत्संस्कार इति अक्षरार्थः । तथा चायं प्रयोगः । वेदनादिरनात्माश्रयो ऽनात्मप्रत्ययकाल एवोपलब्धिगोचरत्वाद्देहकार्श्यादिवद् इति । इतोऽप्यनात्माश्रय एव वेदनादिरित्याह । तन्निमित्तविषयश्चेति । तत्तस्या वेदनाया यन्निमित्तं दाहच्छेदादि तद्विषयो द्वेषो ऽपि संस्कारतुल्याश्रयो ऽनात्माश्रय इत्यर्थः । अयमिह प्रघट्टकाभिप्रायः । देहे छिद्यमाने दह्यमाने चाहं छिन्नो दग्ध इति च देहाभिन्नमात्मानं मन्यमानः संतप्यते जनस्तन्निमित्तकवेदनातत्संस्कारस्मृतिद्वेषांश्च देहाभिन्न एवात्मन्युपलभते, न देहाभिमानहीनावस्थायां देहश्चोपलभ्यमानत्वादुपलब्धिकर्मैव नोपलब्ध्याश्रय इति संघातस्यैव वेदनादि नासंहतस्य साक्षिण आत्मन इति नित्यशुद्ध एवात्मेति । एवं निरूपितेर्थे वृद्धसंमतिमाह । तथा चोक्तं रूपेति । रूपं नीलपीतादिविषयस्तस्य संस्कारः सूक्ष्मावस्था तदनुभवसंस्कारो वा स्मृतिहेतुः स रूपसंस्कारस्तेन सह तुल्यः समान आधिरूपाधिराश्रयोययो रागद्वेषयोस्तौ रूपसंस्कारतुल्याधी यच्च भयं त्रासस्तदपि रूपसंस्कारतुल्याधीत्यर्थः । किमाश्रयत्वमेषामित्यत आह । दृश्यते धीश्रयमिति । दृश्यते तदाश्रयमेतदिति शेषः । संकल्पविचिकित्सादेरप्युपलक्षणमेतत् । यस्मस्माद् रूपादिसंस्कारः तज्जन्यरागादि सर्वं धीसंश्रितमेवोपलभ्यते न तत्साक्षिसंश्रितं तत्तस्माज्ज्ञाता आत्मा सदा शुद्धो रागद्वेषरहितो ऽभयश्च संसाररहित इत्यर्थः । युक्त्या संमत्या चोपपादितं वेदनादीनामप्यनात्मधर्मत्वं पुनः प्रश्नपूर्वकं श्रुत्या प्रतिपादयंस्तदाश्रयविशेषं निर्द्धारयति । किमाश्रया इत्यादिना । इत्यादिश्रुतेरेतत्सर्वं मन एवेत्यवधारणान्मनोबुद्ध्योश्चान्तःकरणात्मनैकत्वाद्बुद्धावेव कामादयो नात्मनीत्यवधारितमित्यर्थः ॥ २३ ॥

कामादेर्बुद्ध्याश्रयत्वेऽपि कथं रूपादिसंस्कारसमानाश्रयत्वसिद्धिरित्याशङ्क्य रूपादेरपि बुद्ध्याश्रयत्वे श्रुतिमाह । तत्रैवेत्यादिना ।

(२४) तत्रैव रूपादिसंस्कारादयोऽपि कस्मिन् रूपाणि प्रतिष्ठितानीति हृदय इति श्रुतेः कामा येस्य हृदि श्रितास्तीर्णो हि तदा सर्वान् शोकान् हृदयस्यासङ्गो ह्ययं, तद्वा अस्यैतदतिच्छन्दा, इत्यादिश्रुतिशतेभ्यो ऽविकार्योऽयमुच्यते, अनादित्वान्निर्गुणत्वादित्यादि इच्छाद्वेषादि च क्षेत्रस्यैव विषयस्य धर्मो नात्मन इति स्मृतिभ्यश्च कर्मस्यैवाशुद्धिर्नात्मस्येति ॥

कामादेरन्तःकरणनिष्ठत्वे वाक्यान्तरं पठति । कामा येस्येति । तीर्णो हि तदा सर्वाञ्छोकान् हृदयस्येत्युक्तेः सन्निदानानामेव तेषां हृदाश्रयत्वं गम्यते, तस्माच्छोकनिमित्तरूपादिसंस्काराणामपि बुद्ध्याश्रयत्वमुक्तमेव । अन्यथा सर्वविशेषणानुपपत्तेरित्यर्थः । इदानीमात्मनो वेदनाकामद्वेषाद्यसंसृष्टत्वे श्रुतिस्मृती पठति । असङ्गो हीत्यादिना । अतिच्छन्दा इति छान्दसं रूपविशेषणात्वादतिच्छन्दः छन्दः कामो ऽतिगतकाममसंसृष्टकामादिदोषमेतदात्मरूपमित्यर्थः । निर्गुणत्वादित्यादिस्मृतिभ्यश्चेति संबन्धः । इदानीं सिंहावलोकनेन कामादेरनात्मधर्मत्वे श्रुत्युक्ते स्मृतिमाह । इच्छाद्वेषादिचेति ।

इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः ।
एतद् क्षेत्रं समासेन सविकारमुदाहृतम् ॥

इत्यादिस्मृतिभ्यश्चेच्छादिः क्षेत्रस्यैव धर्मो नात्मन इति योजना । क्षेत्रस्यानात्मत्वं द्योतयितुं विषयस्येति विशेषणं, श्रुतिस्मृतिसिद्धमर्थमुपसंहरति । कर्मस्यैवाशुद्धिर्नात्मस्येति इति सिद्धमिति शेषः ॥ २४ ॥

परमप्रकृतमुपसंहरति । अतो रूपादीति ।

Digitized by Google

(२५) अतो रूपादिसंस्काराद्यशुद्धिसंबन्धाभावान्न परस्मादात्मनो विलक्षणत्वमिति प्रत्यक्षादिविरोधाभावाद्युक्तं पर एवात्माहमिति प्रतिपत्तुं तदात्मानमेवावेदहं ब्रह्मास्मि एकधैवानुद्रष्टव्यमहमेवाधस्तादात्मैवाधस्तात्सर्वमात्मानं पश्येद्यत्र त्वस्य सर्वमात्मैवेदं सर्वं यदयमात्मा ॥

रूपादिसंस्काराद्यशुद्धिसंबन्धाभावादेव प्रत्यक्षादिविरोधाभावाच्च परस्मादात्मनो विलक्षणत्वमिति हेतोः पर एवात्माहमिति प्रतिपत्तुं युक्तमिति योजना । आत्माभेदेनैव ब्रह्म प्रतिपत्तव्यमित्युक्तेऽर्थे श्रुतिवाक्यान्युदाहरति । तदात्मानमेवेत्यादिना । आत्मानं प्रत्यञ्चमेवाहं ब्रह्मास्मीत्यवेदवगतवान्तद्ब्रह्मेत्यर्थः । एकधैवैकस्वरूपेणैव न तु विषयत्वेन भेदेन वानुद्रष्टव्यमित्याचार्योपदेशानन्तरमनुसंधेयमेतदप्रमेयं ध्रुवमिति वाक्यशेषः । स एवाधस्तादित्यादिना भूमानं परमात्मानं सर्वाधिष्ठानमुपक्रम्य तस्य ताटस्थ्यशङ्कानिवृत्तये अहंकारात्मत्वमुपदिश्य पुनरहमुपरागकृतपरिच्छेदादिनिवृत्तये तत्साक्षिप्रत्यगेकरसतां तस्य निर्दिशति छान्दोग्यश्रुतिरित्याहाहमेवाधस्तादिति । शमादिसाधनसंपन्नः सन् सर्वमात्मानं पश्येदिति निर्दिष्टेऽर्थे हेतुमिव वचनान्तरमाह । यत्र त्वस्य सर्वमात्मैवेति । अभूत्तत्केन कं पश्येदित्यादिर्वाक्यशेषः । इदं सर्वं यद्भोक्तृभोग्यादिलक्षणं विश्व तत्सर्वमयमात्मा नातोऽन्यद्वस्तुतोऽस्तीत्यर्थः ॥ २५ ॥

स एष इति ।

(२६) स एषो ऽकलो, ऽनन्तरमबाह्यं, सबाह्याभ्यन्तरो ह्यजो, ब्रह्मैवेद,मेतया द्वारा प्रापद्यत प्रज्ञानस्य नामधेयानि, सत्यं ज्ञानमनन्तं ब्रह्म, तस्माद्वा, तत्सृष्ट्वा तदेवानुप्राविश,देको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वम् ॥

स एषो ऽकलो ऽमृत इति प्रश्नोपनिषद्गतं वाक्यं, स एष प्रत्यगात्मा कलाशब्दवाच्यप्राणाद्युपाधिभिर्वियुक्तो ऽमृतो ऽमृतं ब्रह्मैवेति तस्यार्थः । तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्मेति वाक्यं बृहदारण्यकमुदाहरत्यनन्तरमबाह्यमिति । मुण्डकवाक्यं च तत्समानार्थमाह । स बाह्येति । अमूर्त्तः पुरुष एव स बाह्याभ्यन्तरः सर्वस्य सह बाह्याभ्यन्तररूपेण वर्त्तते नान्यो ऽजो न जायते इत्यजः जन्मादिविक्रियारहित इत्यर्थः । ब्रह्मैवेदममृतं पुरस्तादित्यादि चात्रोदाहर्त्तव्यमित्याह । ब्रह्मैवेदमेवेति । इदं सर्वं ब्रह्मैवेत्यर्थः । एवं ब्रह्माद्वयात्मप्रतिपादकानि वाक्यान्युदाहृत्य ब्रह्मण एव जीवात्मना कार्यप्रवेशवादिवाक्यानि च जीवस्य ब्रह्माभेदप्रतिपत्त्यर्थमुदाहरति । एतया द्वारेत्यादिना । स एवमेव सीमानं विदार्यैतया द्वारा प्रापद्यतेति शिरःकपालयोः संधिगतच्छिद्रेण देहे प्रवेशं स्रष्टुरीश्वरस्य दर्शयन्नैतरेयकवाक्यमित्यर्थः । तत्र प्रविष्टस्य स्वरूपनिर्द्धारणपरं वाक्यं येन वा पश्यतीत्यादिप्रज्ञानस्य नामधेयानि भवन्तीत्यन्तं प्रज्ञप्तिमात्रं तत्स्वरूपं प्रज्ञानं ब्रह्मेति तस्य ब्रह्मात्मत्वं च तत्रोक्तमित्यभिप्रेत्याह । प्रज्ञानस्य नामधेयानीति । स्रष्टुरेव सृष्टे कार्ये जीवरूपेण प्रवेश इत्येतदेव तैत्तिरीयकवाक्येन द्रढयति । सत्यं ज्ञानमनन्तमित्यादिना । परमात्मैव सर्वसाक्षी सर्वभूतान्तरात्मेत्यत्र श्वेताश्वतरीयमन्त्रमुदाहरति । एको देव इति ॥ २६ ॥

शरीरादिसंसृष्टतया प्रतीयमानस्यापि आत्मनस्तद्धर्मसंसर्गाभावेन ब्रह्मात्मनो ज्ञेयत्वे काठकवाक्यद्वयमुदाहरति । अशरीरं शरीरेषु न जायते म्रियते वा विपश्चिदिति च ।

(२७) अशरीरं शरीरेषु, न जायते म्रियते, स्वप्नान्तं जागरितान्तं, स मे आत्मेति विद्यात्, यस्तु सर्वाणि भूतानि, तदेजति तन्नैजति, वेनस्तत्पश्यन्, तदेवाग्नि,रहं मनुरभवं सूर्यश्चा,न्तःप्रविष्टः शास्ता जनानां, सदेव सोम्य, तत्सत्यं स आत्मा तत्त्वमसीत्यादिश्रुतिभ्यः स्मृतिभ्यश्च, पूः प्राणिनो गुहाशयस्य, आत्मैव देवताः, नवद्वारे पुरे, समं सर्वेषु भूतेषु, विद्याविनयसंपन्ने,ऽविभक्तं विभक्तेषु, वासुदेवः सर्वमित्यादिभ्य एक एवात्मा परं ब्रह्म सर्वसंसारधर्मविनिर्मुक्तस्त्वमिति सिद्धम् ॥

अवस्थासाक्षिण आत्मनो ऽवस्थाधर्मास्पर्शित्वेन ब्रह्मत्वप्रतिपत्तौ काठकवाक्यमाह । स्वप्नान्तं जागरितान्तमिति । नेम्यारनाभिचक्रनिदर्शनेन दृश्यदर्शनतत्साधनभूतसर्वजगदाश्रयरूपं प्राणशब्दितं ब्रह्मैव स मे म आत्मेति प्रवृत्तं कौषीतकेयोपनिषद्वाक्यमुदाहरति । स मे आत्मेति विद्यादिति । यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति, तदेजति तन्नेजतीति च मन्त्रद्वयमीशावास्यगतमुदाहृतं तत्राद्यो मन्त्रः स्पष्टार्थः । द्वितीयः परोपाधिनिबन्धनं चलनादिप्रतिभानं, स्वतस्तु निर्विकारः शुद्ध एवात्मेति दर्शयितुमित्यर्थः । "वेनस्तत्पश्यन्विश्वा वनानि भुविद्वान्यत्र विश्वं भवत्येकनीड" मिति मन्त्रं तैत्तिरीया आमनन्ति, तस्यार्थः । यत्र यस्मिन्सर्वात्मके सर्वोपादाने पूर्वोत्तरमन्त्रनिर्दिष्टे वस्तुनि विश्वं समस्तमेकनीडं भवति एकायनं भवति तदेव विश्वा भुवनानि सर्वाणि भुवनानि न ततः पृथक् किमप्यस्तीति पश्यन् श्रुत्या ऽऽचार्यप्रसादादनुभवन्विद्वान् ज्ञानी वेनो भवति विनतेः कान्तिकर्मणो वनतेर्वा संभजनीयार्थस्य धातोरिदं रूपं वेनः कान्तिमान्

संभजनीयो वा भवतीश्वर एव भवतीति । पुनरपि विदुष:
सवासनस्थे मन्त्रद्वयं पठति । तद्देवाग्निस्तदादित्य इत्यादिरेक:,
अहं मनुरभवं सूर्यश्चेति वामदेववाक्यरूपो ऽपरश्चेति । “अन्त:
प्रविष्ट: शास्ता जनानामेक: सन्बहुधा विचार इति तैत्तिरी-
यश्रुतिरेकस्यैवान्तर्यामिणो बहुधा विचरणं संसारव्यवहारं वद-
न्ती जीवपरयोरभेदं सूचयतीत्यर्थ: । तत्रैव सोपक्रमं छान्दो-
ग्यवाक्यं पठति । सद्देवेति । श्रुत्युक्ते ऽर्थे स्मृतीरप्याह । स्मृति-
भ्यश्चेति । सर्वप्राणिनो गुहाशयस्यैकस्यैवात्मन: पू: पुराणि
शरीराणि न प्रतिशरीरमात्मभेद इत्यर्थ: । उदाहृतश्रुतिस्मृत्यर्थं
संकलय्य प्रकरणार्थमुपसंहरति । एक एवेति ॥ २७ ॥

॥ श्री: ॥

॥ अथ बालरामायणाख्यनाटकस्य ॥

॥ दशमोऽङ्क: ॥

अत: परं राघवानन्दो भविता ।

तत: प्रविशति सशोका लङ्का ।

लङ्का । हा दुद्धरतववितेसपरितोसिदारविन्दासण तिहु-
अणेक्कमल्ल दसकण्ठ हा हेलाबन्दीकदमहिन्द मेहणाद हा
समरसंरम्भसुप्पसण कुम्भअण्ण कहिंसि देहि मे पडिवअणम् * ।

प्रविश्य सत्वरा अलका पुरोऽवलोक्य कथमियं लङ्काऽ-
स्तमितेऽपि सच्चरितकुण्ठे दशकण्ठे दु:खिता । विमृश्य ।
परिपालनाद्धि भृत्यान् स्वामिन: स्मारयति न गुणग्राम: ।
प्रकाशम् । सखि लङ्के वलीमुखबलबलात्कारमाकर्ण्य निखि-
लनाकतलतिलकायमानयाऽमरावत्या मर्त्यमण्डलशौण्ड्या
चोज्जयिन्या रसातलभोगभङ्गिभूतया च भोगवत्या तदनुचरेण
च त्रिभुवनवासिनाऽपि पुरीचक्रेण कुशलप्रश्नाय भवतीं प्रति
प्रहिता । अहं च सखीस्नेहादागतास्मि ।

छिन्ना न दिव्यतरवस्तव काचिदारात्
कच्चिद् भृता न परिखा: कनकाम्बुजिन्य: ।
प्लुष्टानि कच्चन न रत्नमहागृहाणि
कच्चिच्च काञ्चनमयो दलितश्च साल: ॥ १ ॥

लङ्का । सवाष्पसम्भ्रमम् । सहि केलासुच्छङ्गवासिणि कुबे-
रसच्चरिदे देवणिलये अलए किं णाम ण संपण्णं तधा अ
तेण केसरिकलत्तसंभवेण समीरसंभूदेण वाणरेण सुउमारका-
मिणीकरअलकोमलेहिं किसलएहिं लाडललणाहरोट्ठमञ्जिट्ठे-
क्कसुभअकुसुमत्थवएहिं बन्दीकदसुरसुन्दरीचरणप्पहारदोह-
लग्गसंकन्तालत्तअलंछिदेहिं उक्खबन्धेहिं लीलामन्दिरं मअर-
द्धअस्स कुलभवणं मलअमग्गपअट्टिणो दक्खिणसमीरणस्स
विस्सामट्ठाणं हिअअस्स पढमणिलओ णिच्चं वसन्तस्स पेर-
न्तणिवेसिदकप्पपाअवप्पहुदिपंचविहदेवद्दुमा असोअवणिआ
सव्वा संचुण्णिआ पाआलपरिचुंबी परिहापरिक्खेवोवि त्थल-
त्थिदिं लंभिदो अविच्छिण्णसंचरणचदुरेणावि मत्तण्डमण्ड-
लेण अलङ्घणिज्जं कणअपाआरचक्कं सुमरणसेसं संपादिदं म-
णिभवणविध्धंसणदंसणे उण णिक्करुणस्स वि जणस्स किं भवि-
स्सदि असुधाराधोरणी किं पुण सिणेहमइं पिअसहिं समास-
इअ प्पाणपरिच्चअणववसाएहिं विरदह्मि * ।

अलका । सखि धर्मजेतरि भीषणबिभीषणे बिभीषणे वि-
नेतरि तत्रभवती किं सशोकशङ्कुरेव तद्विधिनाथपूर्ववल्लभे
लङ्के विरमन्तु मध्यस्थगितैकावलीकल्पा बाष्पजलकणश्रेणय: ।
विरज्यतु च जरठकाञ्चनारकुड्मलकोटिपाटला दृष्टि: । धौतमा-
ञ्जिष्टपटच्चरदीनाधरमुद्रा समासादयतु स्वां लक्ष्मीं लघूभव-
न्तु च प्रमाणानुकृतमृणालदण्डा: श्वासदण्डा: ।

लङ्का । जं तिणेत्तमित्तस्स णअरी भणादि † ।

नेपथ्ये ।

रुद्राणि लक्ष्मि वरुणानि सरस्वति द्यौ:
सावित्रि धात्रि सकला: कुलदेवताश्च ।
शुद्ध्यर्थिनी विशति शुष्मणि रामरामा
तत्संनिधत्त सहसा सह लोकपालै: ॥ २ ॥

लङ्का । आकर्णितकेन किं उण विसुद्धिकारणम् ‡ ।

अलका । राक्षसगृहवास: किल । विचिन्त्य । विहस्य च ।

कालुष्यहेतु वैदेह्या न राक्षसगृहस्थिति: ।
ध्वान्तबन्दीकृताऽपीन्दोर्न कला जातु नीलति ॥ ३ ॥

लङ्का । ता एहि गदुअ पेक्खह्म § ।

अलका । कुबेरप्रसादादिहस्थैव दिव्येन चक्षुषा पश्यामि ।

---

* हा दुर्द्धरतपोविशेषपरितोषितारविन्दासन त्रिभुवनैकमल्ल दशकण्ठ
हा हेलाबन्दीकृतमहेन्द्र मेघनाद हा समरसंरम्भसुप्रसन्न कुम्भकर्ण क्वासि
देहि मे प्रतिवचनम् ।

* सखि कैलासोत्सङ्गवासिनि कुबेरसच्चरिते देवनिलयेऽलके किं नाम
न संपन्नं तथा च तेन केसरिकलत्रसंभवेन समीरसंभूतेन वानरेण सुकुमार-
कामिनीकरतलकोमलै: किसलयैर्लाटललनाधरोष्ठमञ्जिष्ठैकसुभगस्तबकै-
र्बन्दीकृतसुरसुन्दरीचरणप्रहारदोहदकसंक्रान्तालक्तकलाञ्छितैरुच्चबन्धैर्लीला
मन्दिरं मकरध्वजस्य कुलभवनं मलयमार्गप्रवर्तिनो दक्षिणसमीरणस्य वि-
श्रामस्थानं हृदयस्य प्रथमनिलयो नित्यं वसन्तस्य पर्यन्तनिवेशितकल्पपाद-
पप्रभृतिपञ्चविधदेवद्रुमाऽशोकवनिका सर्वा संचूर्णिता पातालपरिचुम्बी
परिखाप्रतिक्षेपोऽपि स्थलस्थितिं लम्भितोऽविच्छिन्नसंचरणचतुरेणापि मा-
र्तण्डमण्डलेनालङ्घनीयं कनकप्राकारचक्रं स्मरणशेषं संपादितं मणिभव-
नविध्वंसनदर्शने पुनर्निष्करुणस्यापि जनस्य किं भवत्यश्रुधाराधोरणी ।
किं पुन: स्नेहमयीं प्रियसखीं समासाद्य प्राणपरित्यजनव्यवसायेभ्यो वि-
रताऽस्मि ।

† यत् त्रिनेत्रमित्रस्य नगरी भणति ।

‡ किं पुनर्विशुद्धिकारणम् ।

§ तदेहि गत्वा प्रेक्षामहे ।

Digitized by Google

लङ्का । ता ममावि पिअसही णिवेदेदु * ।

अलका । इयं रामराणी स्वाहावल्लभे भगवत्यात्मानमाहुतीकुर्वाणा कुररीव करुणक्रेङ्कारकातरया गिरा देवीवाचमभिसंधाय स्तौति विशुद्धिकारणं च ब्रूते ।

लङ्का । किं विअ सुणावेदु † ।

अलका ।

यद्ग्रीवाणाः क्रतुबलिलिहो यास्मरश्वित्तजन्मा
सीमोन्माथी न च यदुदधिर्जुह्वते यच्च विप्राः ।
यः कृत्स्नस्य प्रलयदिवसो ये च ये च प्रकाशाः
कृत्स्नः सोऽयं जयति महिमा पावकः पावकस्य ॥ ४ ॥

किञ्च ।

मित्रं मन्त्री गुरुः शिष्यः स्वामी भृत्यश्च मे सदा ।
राम एव यथा नान्यस्तथा मां पातु पावकः ॥ ५ ॥

लङ्कां प्रति नातः परमवज्रहृदयैः श्रोतुं द्रष्टुं च शक्यते ।

लङ्का । तं भणिअं जणअणन्दिणीए जेण रावणप्पदीणं वि दलिआइं हिअआइं गअणङ्गणादो वि बाहबिन्दुसंदोहा णिवडन्ति । तदोतदो ‡ ।

अलका । ततश्च ।

वन्हिर्ज्वालाः सृजति कियतीर्जानकी किं विधत्ते
कीदृक् छाया रघुपतिमुखे कर्म किं लक्ष्मणस्य ।
इत्थं यावद्विमृशति जनः कौतुकोत्तानितास्य-
स्तावच्छन्नं गगनमखिलं द्योतमानैर्विमानैः ॥ ६ ॥

ततश्च ।

सीतामुदीक्ष्य सुमुखीं शिखिनः प्रवेशे
मुक्तास्तथा सुमनसः सुरसुन्दरीभिः ।
स्रग्विक्रयः सकलखेचरमालिकानां
जातो यथा चिरतरं त्रिदिवे महार्घः ॥ ७ ॥

ततश्च । प्रोद्घुष्टमरुन्धतीप्रभृतिभिरन्तर्हिताभिः पतिव्रताभिः ।

यत्पौलस्त्यगृहोषिता प्रविशति त्वां देव शुद्ध्यर्थिनी
सीतेयं प्रथमा सतीषु कुरु तज्ज्योतिर्जलार्द्रांजडम् ।
धर्मम्लानमृणालकाण्डमृदुलान्यङ्गानि दग्धानि चे-
देतस्याः क्व नु शोधकोऽपि भगवन् संशुद्धये यास्यसि ॥ ८ ॥

लङ्का । अहो देवदाणं वि सीदापक्खवादो अधवा सव्वा गुणेसु रज्जदि ण सरीरेसु * ।

अलका । अहो खलु भोः पतिव्रतामयं ज्योतिरनभिभवनीयं ज्योतिरन्तरैः । यतः ।

प्रविशन्त्या चितावन्हिं जानक्या परिशुद्धये ।
भेदः कोऽपि न निर्णीतः पयसः पावकस्य वा ॥ ९ ॥

हाहा किमपि निष्करुणचेता हिरण्यरेताः ।

विशुद्धये प्रविष्टाऽसौ वैदेही हव्यवाहनम् ।
अभ्रंलिहानां ज्वालानां चक्रेण च तिरोहिता ॥ १० ॥

लङ्का । कंकेल्लिकेलिकाणणदहणो णिक्करुणाणं पढमोदाहरणं हुदवहो । अलकां प्रति तदोतदो † ।

अलका । सखि लङ्के अतिक्रान्तासु च कतिपयीषु कालकलासु ।

वह्नेः शुद्धिविधायिनो भगवतस्तेजोभिरत्युद्धते-
रत्नानामनसूयया विरचितां मौलिस्रजं बिभ्रती ।
पादाङ्गुष्ठनखाग्रदत्तनयना नीरन्ध्रविन्यासत-
स्तोकालक्ष्यमुखी चितावलयतो द्राङ् मैथिली निर्गता ॥ ११ ॥

नादौ न मध्ये नान्ते च सीताया हव्यलेहिनि ।
शुद्धस्येव सुवर्णस्य जातो वर्णविपर्ययः ॥ १२ ॥

लङ्का । अणुचिदआरी हुदवहो जं जणअतणआसुद्धिकारणं भोदि ‡ ।

अलका । सखि सर्वाङ्गहिरण्मयि यथा ।

शुध्धायाः क इवात्र शोधनविधिः स्वःसैन्धवीनामपां
पूतानां परिपूतये किमपरं तत्ते सखी मन्यते ।
लावण्यामृतसारणीसरणिभिर्निर्वाणरोचिर्लतो
निर्दग्धुं कलयाऽपि हन्त न शिखी शक्तोऽभवन्मैथिलीम् ॥ १३ ॥

नेपथ्ये ।

योगीन्द्रश्च नरेन्द्रश्च यस्याः स जनकः पिता ।

लङ्का । ता किं तिस्स § ।

नेपथ्ये ।

सा शुद्धा रामगृहिणी वह्नौ दशरथस्नुषा ॥ १४ ॥

ततश्च ।

बद्धः सेतुर्लवणजलधौ क्रोधवह्नेः समित्त्वं
नीतं रक्षःकुलमधिगताः शुद्धिमन्तश्च दाराः ।

---

* तन्ममापि प्रियसखी निवेदयतु ।

† किमिव श्रावयतु ।

‡ तद् भणितं जनकनन्दिन्या येन रावणपत्नीनामपि दलितानि हृदयानि । गगनाङ्गणादपि बाष्पबिन्दुसंदोहा निपतन्ति ततस्ततः ।

* अहो देवतानामपि सीतापक्षपातोऽथवा सर्वा गुणेषु रज्यते न शरीरेषु ।

† कङ्केलिकेलिकाननदहनो निष्करुणानां प्रथमोदाहरणं हुतवहः ततस्ततः ।

‡ अनुचितकारी हुतवहो यज्जनकतनयाशुद्धिकारणं भवति ।

§ तत् किं तस्याः ।

Digitized by Google

तेनेदानीं विपिनवसतावेव पूर्णप्रतिज्ञो
दिष्ट्याऽयोध्यां व्रजति दयिताप्रीतये पुष्पकेण ॥ १५ ॥

तद्भोः प्लवङ्गयूथपतयः सर्वे गोलाङ्गूलसेनानायका निःशेषाच्छभल्लचमूपालकाश्च महाराजसुग्रीवो वः समाज्ञापयति यदुत सज्जीभवन्तु भवन्तस्त्रिभुवनैकमङ्गलकलशेन रघुवंशमुक्तामणिना क्षात्रधर्मरक्षाविधिसिद्धमन्त्रेण रामदेवेन सममयोध्यां गन्तुम् ।

संप्रेषितश्च हनुमान् भरतस्य पार्श्वं
लङ्काङ्गनाचकितनेत्रनिरीक्षितश्रीः ।
यात्येष वारिनिधिलङ्घनदृष्टसारो
राज्याभिषेकसमयोचितकार्यसिद्धै ॥ १६ ॥

अलका । तदावामपि रामभद्रदर्शनसुखमनुभवाव इति निष्क्रान्ते । विष्कम्भः ।

ततः प्रविशतो विमानयानेन रामलक्ष्मणौ सीतात्रिजटे सुग्रीवविभीषणौ च ।

रामः । सीतां प्रति ।

यत्सख्युः शशिशेखरस्य धनदाल्लङ्केश्वरेणाहृतं
तस्मात्याच्च विभीषणे परिहृतं दत्तं च तेनाऽपि नः ।
किञ्चिन्त्यञ्चितकन्धरेण शिरसा धृत्वा प्रसन्नां दृशं
तद्भक्त्या ललिताङ्गि पुष्पकमिदं वन्दस्व मोदस्व च॥१७॥

सीता वन्दते ।

रामः । पश्चादवलोक्य ।

यस्यामजर्जरितचन्द्रिकमर्कपादै-
स्त्रासान्निशाचरपतेरुषसि व्यभासि ।
व्यावर्त्य वक्त्रकमलं कमलाक्षि पश्य
लङ्केति तां नवविभीषणराजधानीम् ॥ १८ ॥

सीता । अवलोक्य । एसा सा विणआणन्दणसमाणीदमेरुमहाजम्बूसाहासमुप्पण्णा सुणीअदि * ।

रामः । आम् । मैथिलि एवं पुराविद आचक्षते । पुरो दर्शयन् ।

अये विलोकय कृशाङ्गि कुतूहलेन
दत्त्वा दृशं तरुणकेतकपत्रदीर्घाम् ।
नानास्त्रमन्त्रणपरं कपिराक्षसानां
युद्धं कचाकचि तलातलि च प्रवृत्तम् ॥ १९ ॥

अन्यतो दर्शयन् ।

अत्रासीत्फणिपाशबन्धनविधिः शक्त्या भवद्देवरे
गाढं वक्षसि ताडिते हनुमता द्रोणाद्रिरत्राहृतः ।
दिव्यैरिन्द्रजिदत्र लक्ष्मणशरैर्लोकान्तरं लम्भितः
केनाप्यत्र मृगाक्षि राक्षसपतेः कृत्ता च कण्ठाटवी॥२०॥

सीता विहस्य अज्जउत्तो जाणदि को उण एसो * ।

रामो लज्जते । सर्वे स्मयन्ते ।

सुग्रीवः ।

लङ्केन्द्रानुज एष मैथिलि महान् योऽयं कबन्धः पुरो
वारां भर्त्तरि शैलसेतुरपरः प्रोतो यथा राजते ।
निद्रालोरतितुन्दिलस्य खलतेः क्षीबस्य घोणाक्षुता-
मोघेनास्य भयस्पृशोऽपि निभृतं स्वर्वासिनो हासिताः ॥२१॥

सीता । अज्जउत्तेण देवा वि पहसणणट्टं पेक्खाविदा † ।

रामः । किञ्चित्स्मित्वा पुष्पकं प्रति हंहो विमानराज विमुच्य वसुधासविधवर्तिनीं गतिं किञ्चिदुच्चैर्भव कुतूहलिनी जानकी दिव्यदर्शनव्यतिकरस्य ।

ऊर्ध्वंगतिनाटितकेन ।

रामः ।

यथायथा रोहति बद्धवेगं
व्योम्नः शिखां पुष्पकमानताङ्गि ।
महाम्बुधीनां वलयैर्विशाले-
स्तथातथा संकुचतीव पृथ्वी ॥ २२ ॥

सीतां प्रति सुरचारणकिन्नरविद्याधरसंकुलं गगनमार्गमीक्षतां मैथिली ।

प्रविश्य विद्याधरः । रामभद्र महेन्द्रादेशादेव रत्नशेखरो विद्याधरकुमारस्ते दिव्यचरितं व्यनक्ति ।

रामभद्रः । अहो महान् प्रसादोऽस्मासु देवराजस्य ।

रत्नशेखरः । सीतां प्रति ।

बन्धे वारिनिधेः कृतेऽपि गिरिभिः सोढः शिरोमण्डल-
च्छेदो राक्षसपुङ्गवेन समरे यस्याः किमन्यत्स्तुते ।
कीदृक् सा जनकात्मजेति रभसाद्विद्याधरैर्द्वन्द्वशः
पाणिच्छत्रनिवारितार्ककिरणैस्त्वं कौतुकाद् दृश्यसे ॥२३॥

सीता । अपवार्य ।

विद्याधराः सहचरीचतुरोक्तिमार्गे
रागस्पृशो गगनगर्भयथेष्टचेष्टाः ।
निस्तल्पमल्पसमयं निबिडाभ्रखण्ड-
कुञ्जान्तरेष्विह रताद्भुतमाद्रियन्ते ॥ २४ ॥

रामः । प्रिये पृथ्वीपुत्रि नीरन्ध्रबन्धमपि वारिवाहव्यूहं द्विधा विधाय पुष्पकं प्रवर्तते विलोक्य विहस्य ।

* एषा सा विनतानन्दनसमानीतमेरुमहाजम्बूशाखासमुत्पन्ना श्रूयते ।

* आर्यपुत्रो जानाति कः पुनरेषः ।

† आर्यपुत्रेण देवा अपि प्रहसननृत्यं प्रेक्षिताः ।

क्षिप्तं त्वया काञ्चनकान्तिदाम
यन्मत्तवारणमुपेत्य कुतूहलिन्या ।
तेनामुना जलधरोऽयमरालकेशि
सव्यस्तडिद्वलयवानिव पश्य जातः ॥ २५ ॥

अपिच ।

हस्ते त्वया हारिणि हारयष्टिभि-
र्विमानवातायनतः कुतूहलात् ।
कृते विदध्यात्सदृशीं प्रतिक्रिया-
मितीव धाराम्बु घनो निरस्यति ॥ २६ ॥

सीता । अज्जउत्त किं उण एवं करिदन्तच्छेदपण्डुरं पुव्वपच्छिमसिन्धुबन्धोभअपेरन्तं तदुत्तरदिसाकुहरपूरणधुरन्धरं दीसदि * ।

रत्नशेखरः । जनकनन्दिनि किमत्र रावणारिणा रत्नशेखरं पृच्छ हिमालयः खल्वयम् ।

सीता । किं जो सो विन्दारअविन्दवन्दिदरुद्दचरणपडिबिम्बचुंबिदसिलुच्चङ्गो गङ्गासोत्तसीमन्तिदणिअंबो हेरम्बदन्तमुसलुल्लिहिदमेहलाबन्धो णिवडिदहरवुसहअरखुरखण्डिदधरणिवट्टो चित्तसिहण्डिमण्डलाअचिदमन्दारकुसुमप्पसरो गोरीगुरुत्ति णिव्विग्घमहग्घिदो सुणीअदि † ।

रत्नशेखरः । स एवायम् ।

श्रीकण्ठश्वशुरः स एष भगवान् मेनापतिः पर्वतः
पुत्रीवानुमया पुरः किमपरं हेरम्बमातामहः ।
यस्यायं महिमा यदत्र शमिनः श्यामाकमुष्टिंपचाः
स्वास्वेवाश्रमभूषु दिव्यवपुषः क्रीडन्ति कामाज्ञया ॥२७॥

अपिच ।

स्त्रीणां जन्ममहातरोः किमपरं सौभाग्यलाभोत्सव-
स्तत्प्राप्तेरधिदैवतं गिरिसुता साप्यस्य कुञ्जान्तरे ।
एकाङ्गुष्ठनिपीडितक्षिति तपस्तप्त्वा सहस्रं समा-
श्चन्द्रापीडशरीरसंविभजनप्रेमाणमापद्यत ॥ २८ ॥

सीता । अज्जउत्त इधज्जेव अद्धनारीसरो हरो संवुत्तो ‡ ।

रत्नशेखरः । आं वासुन्धरेयि ।

अत्रोढायां गिरिदुहितरि प्रीतिमानिन्दुमौलिः
प्रेमावेशाज्झटिति भगवानर्धनारीश्वरः सन् ।
मन्दं देवैः प्रणतचरणः प्रत्यभिज्ञानलेशा-
द्वामे पाणौ तदितरकरं ताडयित्वा जहास ॥ २९ ॥

रामः । किमुच्यते सर्वाश्चर्यनिधानं हि नीहारमहागिरिः ।

रत्नशेखरः । यथाज्ञातं विराधविध्वंसनेन ।

अस्मिन्नूढा मृडानी व्युसरिदिह धृता दन्तिदैत्योऽत्र भिन्न-
श्छिन्नं ब्राह्मं शिरोऽस्मिन्निह गुरुनिधने निर्मिता मातरश्च ।
दृक्श्रोत्रप्रीतिपेयं दलितसुरपुरीदुर्गमद्वारमुद्रं
सिद्धानां पूर्वसिद्धेरिति हरचरितं वर्ण्यते चित्रमत्र ॥ ३० ॥

सीता । इह हिमवन्तमहीहरे चन्दसेहराहिं मअरद्धअणिद्दहणं रहुउलमहत्तरीआओ पसंसंतीओ आसि ता कहिं उण तम् * ।

रत्नशेखरः । यदिदं निर्मितमिव मरकतमणिमरीचिवीचिभिराच्छादितमिव वंशकरीरनीलकान्तिभिः परिकल्पितमिवानूरुसारथिरथतुरङ्गमरोमराजिभिरुत्पादितमिव शितिकण्ठकण्ठमण्डलीमेचकरुचिसंचयैस्तदभिरामपदं भगवतो वृषभध्वजस्य ।

एतत्सुन्दरि देवदारुविपिनं शैलस्य गौरीगुरो-
रस्मिन् वासवशासनेन रहयन् सद्यः समाधिक्रियाम् ।
प्रत्यग्रं गिरिजन्मनः सुरजने स्तोत्राय सज्जाञ्जलौ
रुद्रस्याम्बकपावकेन मदनो वेगादनङ्गीकृतः ॥ ३१ ॥

सीता । परमेसरसरीरपरिक्खिदतिक्खविसिहस्स मअरद्धअस्स कदमो उण णिवेसो † ।

रत्नशेखरः ।

एतन्मैथिलि मन्मथाश्रमपदं रत्या स्वयं वर्धितै-
र्लीलाशाखिभिरञ्चितान्तिकमितः केलीशकुन्ताश्रयैः ।
शृङ्गारश्च रसो मधुश्च समयो देवश्च ताराधिपो
रागः पञ्चमसंज्ञकश्च ललितैस्ते यत्र सिद्धा व्रतैः ॥३२॥

सीता । सकौतुकम् । पुञ्जीकदअज्जउत्तकित्तिसंताणाणुआरी रासीभूदहरट्टहाससरिसणिवेसो पलआणलपिण्डीकदक्खीरसमुद्दुद्दुक्करपडिरूवो कदरो उण एस महिहरो ‡ ।

रामः । रुद्रावासः कैलास इति मे तर्कः ।

रत्नशेखरः । यथावगतं ताडकाताडनेन ।

---

* आर्यपुत्र किं पुनरिदं करिदन्तच्छेदपाण्डुरं पूर्वपश्चिमसिन्धुबन्धोभयपर्यन्तं तदुत्तरदिशाकुहरपूरणधुरन्धरं दृश्यते ।

† किं य एष वृन्दारकवृन्दवन्दितरुद्रचरणप्रतिबिम्बचुम्बितशिलोत्सङ्गो गङ्गास्रोतःसीमन्तितनितम्बो हेरम्बदन्तमुसलोल्लिखितमेखलाबन्धो निपतितहरवृषभवरखुरखण्डितधरणिपृष्ठश्चित्रशिखण्डिमण्डलावचितमन्दारकुसुमप्रसरो गौरीगुरुरिति निर्विघ्नमहार्घितः श्रूयते ।

‡ आर्यपुत्र । इहैवार्धनारीश्वरो हरः संवृत्तः ।

* इह हिमवन्महीधरे चन्द्रशेखरान्मकरध्वजनिर्दहनं रघुकुलमहत्तरिकाः प्रशंसन्त्य आसन् तत् क्व पुनस्तत् ।

† परमेश्वरशरीरपरीक्षिततीक्ष्णविशिखस्य मकरध्वजस्य कतमः पुनर्निवेशः ।

‡ पुञ्जीकृतार्यपुत्रकीर्तिसन्तानानुकारी राशीभूतहराट्टहाससदृशनिवेशः प्रलयानलपिण्डीभूतक्षीरसमुद्रदुष्करप्रतिरूपः कतरः पुनरेष महीधरः ।

कैलासः स्फटिकाद्रिरेव भगवानेनं भवानीसखः
सख्यादैलबिलस्य भक्तिजनिताश्चित्यं शिवः सेवते ।
किञ्चास्मिन्ननुमेखलं नखमुखच्छेदैः समावेक्ष्यते
हेलोत्पाटनपूर्वकालनिहितैर्लङ्कापतेर्विक्रमः ॥ ३३ ॥

अत्र च ।

कैलासाचलकर्णिकेयमलका नेत्रैकपेया पुरी
देवस्य द्रविणप्रभोः किमपरं शृङ्गारसारस्य भूः ।
यस्यामस्तमितेऽद्य राक्षसपतौ यक्षाङ्गनानाममी
वर्तन्ते प्रतिचत्वरं प्रतिगृहं प्रत्यापणं चोत्सवाः ॥ ३४ ॥

रामः । पुरोऽवलोक्य कः पुनरस्तमिताखिलककुद्बन्धः सलिलस्कन्धः ।

रत्नशेखरः । उत्प्रत्तिसदनं कलहंसवयसामाकरः कनकारविन्दानां विलासदीर्घिका देवदेवस्य समवगाढतटान्तरसमदमहोक्षणा हेरम्बेण रभसाचान्तवीतवीचिभङ्गं गगनाङ्गणपरिभ्रामिणा चन्द्रहरिणेन लीलालीढसीकरकणं कूलकुलायकारिणा कुमारमयूरेण प्रसारितकराकृष्यमाणार्णस्कं करिमकरत्रासादैरावतेभसेवितशाद्वलोपकण्ठं नीलकण्ठवृषेण समध्यासितपरिसरं संतानकारण्ये नारायणवराहेण वर्णितवैभवं वैकुण्ठकमठेनाभिलषितगर्भं पद्मनाभमहामत्स्येन नीतनीरं त्रिसन्ध्यमरुन्धतीकराकलितकमलिनीपत्रपात्रैरानन्दितपुरन्दरमानसं मानसं नाम दिव्यं सरः । सीतां प्रति ।

एतन्मानिनि मानसं सुरसरो निर्लूनहेमाम्बुजं
पार्वत्या प्रियपूजनार्थममुतो गङ्गा सरिन्निर्गता ।
अस्माच्चित्रशिखण्डिभिश्च परमे पर्वण्युपादीयते
स्नानोत्तीर्णवृषाङ्कभस्मरजसां सङ्गात्पवित्रं पयः ॥ ३५ ॥

सीता । को उण एसो णिच्चतरुणतरुमण्डलीचुम्बिदमहाणिअम्बनिवेसो मत्तण्डचण्डेक्करहचक्कचुम्बणमसिणसुवण्णसिहरो महीहरो दीसदि * ।

रत्नशेखरः ।

नेत्रं वासुकिरत्र केशवभुजैः संदानितोऽयं पुरा
चक्रुर्वल्लवतां परिभ्रमविधावेतस्य देवासुराः ।
मन्थाः सोऽयमभूत्समुद्रकलशे तस्यैव तां कौतुका
देव श्रोत्रपरम्परापरिचितो दृग्गोचरं मन्दरः ॥ ३६ ॥

* कः पुनरेष नित्यतरुणतरुमण्डलीपरिचुम्बितमहानितम्बसन्निवेशो मार्तण्डचण्डैकरथचक्रचुम्बनमसृणसुवर्णशिखरो महीधरो दृश्यते ।

THE VAIŚESHIKA APHORISMS OF KAṆÁDA.

FIRST BOOK, FIRST DAILY LESSON.

(*Continued from page* 204.)

Qualities enumerated.

रूपरसगन्धस्पर्शाः सङ्ख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नाश्च गुणाः ॥ ६ ॥

Aph. 6. Colour, Taste, Smell and Touch, Numbers, Extensions, Individuality, Conjunction and Disjunction, Priority and Posteriority, Conceptions, Pleasure and Pain, Desire and Aversion, and Volitions are Qualities.

[1] By the particle *cha* he implies in addition to these Gravity, Fluidity, Viscidity, Self-restitution, Merit, Demerit, and Sound; for those being well known to be Qualities are not expressly mentioned. He will explain in the proper place from their characteristic and from their form that these are qualities. The compound 'Colour, Taste, Smell, and Touch,' is intended to point out that there is no common substratum of contemporaneous Colours, Tastes, Smells and Touches. Numbers and Extensions are not made a compound word and are named in the plural number, the design being to indicate that contemporaneous Numbers and Extensions have a common substratum. Although the common substra-

[1] चकारेण गुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दान् समुच्चिनोति ते हि प्रसिद्धगुणभावा एवेति कण्ठतो नोक्ताः । गुणत्वञ्चामीषां यथास्थानं लक्षणतः स्वरूपतश्च वक्ष्यति रूपरसगन्धस्पर्शानां समानकालीनरूपरसगन्धस्पर्शसामानाधिकरण्यं नास्तीति सूचनार्थं समासः । संख्यापरिमाणयोस्तु समानकालीनसंख्यापरिमाणसामानाधिकरण्यसूचनायासमासो बहुवचननिर्देशश्च यद्यप्येकत्वसमानाधिकरणं नैकत्वान्तरं न वा महत्त्वदीर्घत्वसमानाधिकरणं महत्त्वदीर्घत्वान्तरं तथापि द्वित्वादीनामन्योन्यं सामानाधिकरण्यं महत्त्वदीर्घत्वादीनाञ्च विजातीयपरिमाणयोः सामानाधिकरण्यमस्त्येव । पृथक्त्वञ्च यद्यपि द्विपृथक्त्वादिसमानाधिकरणं तेन संख्यावद्बहुत्वेनैव निर्देष्टुमर्हति तथाप्यवधिव्यङ्ग्यत्वलक्षणं संख्यातो वैधर्म्यं सूचयितुमेकवचननिर्देशः । संयोगविभागयोर्द्वयोरप्येककर्मजन्यत्वसूचनाय द्विवचनं परत्वापरत्वयोरन्योन्याश्रयनिरूप्यतया दिक्काललिङ्गत्वावशेषसूचनाय च द्विवचनं बुद्धीनां विद्यादिभेदेन सांख्याभिमतैकमात्रबुद्धिनिराकरणसूचनाय बहुवचनं सुखदुःखयोर्द्वयोरपि भोगत्वावच्छेदेनैककार्यजनकत्वमविशेषेण चादृष्टोत्पादकत्वं सुखस्यापि दुःखेनापि भावनञ्च ख्यापयितुं द्विवचनं इच्छाद्वेषयोर्द्वयोरपि प्रवृत्तिं प्रति कारणत्वसूचनाय द्विवचनं प्रयत्नानां विहितनिषिद्धगोचराणां दशविधानां पुण्यहेतुत्वं दशविधानाञ्च पापहेतुत्वमभिसन्धाय बहुवचनमित्युन्नेयम् । यद्वा रूपरसगन्धस्पर्शानां भौतिकेन्द्रियव्यवस्थाहेतुत्वज्ञापनार्थं पाकजप्रक्रियाव्यवस्थापनार्थं वा ते समस्योक्ताः संख्यायां द्वित्वबहुत्वादौ विप्रतिपत्तिरिति तन्निराकरणसूचनार्थं बहुत्वेनाभिधानं पृथक्त्वे तु संख्याबहुत्वेनैवास्यापि बहुत्वमिति सूचनाय विधिज्ञानव्यञ्जनीयत्वं संख्यातो वैधर्म्यमिति सूचनाय च पृथगभिधानं परिमाणे तु दीर्घत्वह्रस्वत्वादिविप्रतिपत्तिनिरासाय बहुवचनं संयोगविभागयोरन्योन्यविरोधज्ञापनाय द्विवचनं ॥

Digitized by Google

tum of unity is not another unity, and the common substratum of greatness and length, is not another greatness and length, yet duality &c. are the common substratum of each other, and greatness, length &c., form a common substratum for extensions of a different kind. Although Individuality is the common substratum for the Individuality of two &c., and should accordingly be specified in the plural like Numbers, yet the singular is employed to indicate its difference from Numbers on account of its being characterised by the implying of limitation. Conjunction and Disjunction are expressed by [one word in] the dual to indicate that though two they are produced by one Action [or Motion.] Priority and Posteriority are expressed in the dual to imply that they are relative to one another, and to imply that they are indifferently properties of Space and Time. The plural 'Conceptions' is intended to imply an objection to the doctrine of the Sánkhyas that Conception [Intelligence] is one only, on the grounds of their division into Knowledge &c. The dual word Pleasure and Pain is used to establish [the doctrine] that they, though two, produce one effect to be distinguished as fruition, that they indifferently bring to pass the consequences of actions done in a former state, and that even Pleasure must be accounted Pain. Desire and Aversion are in the dual to indicate that both are causes of activity. The plural form of Volitions implies that they are the cause of merit from ten kinds of lawful and prohibited objects, and the cause of sin from ten kinds of objects. "Or else Colour, Taste, Smell, and Touch are mentioned in a compound word to teach that they are the cause of the relation between the elements and the organs of sense, or else to establish the effects which are produced by heat. "There is a contrariety in Number which consists of duality, plurality &c.," it is to imply the denial of this that [Number] is mentioned in the plural. Individuality is enumerated separately to denote that it is manifold by reason of the plurality of Numbers, and to imply that its difference from number consists in revealing the knowledge of a limit. In the case of Extension the plural is used to deny that there is any contrariety between length, breadth, &c. Conjunction and Disjunction are in the dual to denote their mutual opposition. U.

Enumeration of Actions.

उत्क्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्माणि ॥ ७ ॥

Aph. 7. Throwing upwards, Throwing downwards, Contracting, Expanding, and Going are the Actions.

[1] Actions by reason of their production by Substances and by Qualities, and from their Inhesion in Substances possessed of Colour, are known by perception. Accordingly after the enumeration of Substances and Qualities [Kaṇáda] declared the enunciation and division of Actions. U.

[1] *Iti* as before expresses limitation. Action as a class is cognised by perception, so also are Throwing upwards &c., according to the author of the Muktávalí. Going is a particular class comprising revolution, evacuation, dropping, flaming upwards, bending up and down &c., V.

Common element in Substance, Quality, and Action.

सदनित्यं द्रव्यवत् कार्यं कारणं सामान्यविशेषवदिति द्रव्यगुणकर्मणामविशेषः ॥ ८ ॥

Aph. 8. Existence, transitoriness, inhesion in substance, effect. cause and possession of generality and particularity are the not particular [common element] of Substances, Qualities, and Actions.

[2] After *iti* the word *pratyaya* is to be supplied. The general is existence, the particular is substantiality. The notion 'existence' &c., is applicable to Quality and Action as well as to Substance, in this there is no particularity. Therefore existence, opposition to subsequent non-existence [or to destruction], the possession of Substance as a cause of inhesion, opposition to antecedent non-existence, causality, and the constituting of a class contained in existence, are that which is similar in Substances, Qualities, and Actions. Although transitoriness, inhesion in substance, effect, and cause, are not comprehended in an eternal Substance or Quality, or causality in an atom, yet it is here meant that transitoriness is a condition of such members of the categories as exist in virtue of a being opposed to subsequent non-existence, inhesion in Substance is a condition of such members of the categories as exist in virtue of Substance as the cause of inhesion, the being an effect is a condition of such members of the categories as exist in virtue of a being opposed to antecedent non-existence, and causality is a condition of such members of the categories as exist as inherent or non-inherent causes. V.

---

1 कर्मणां द्रव्यजन्यतया गुणाजन्यतया च रूपवद्द्रव्यसमवायाच्च प्रत्यक्षतेति द्रव्यगुणाभिधानानन्तरं कर्मोद्देशविभागावाह ॥

1 इतिः पूर्ववदवधारणपरः । कर्मत्वजातिः प्रत्यक्षसिद्धा एवमुत्क्षेपणत्वादिकमपीति मुक्तावलीकारः । गमनत्वञ्च जातिविशेषो भ्रमणरेचनस्पन्दनोर्ध्वज्वलननमनोन्नमनादिष्वपि ॥

2 इतीत्यनन्तरं प्रत्यय इत्यध्याहार्यं सामान्यं सद्विशेषो द्रव्यत्वादि तद्वत् । सदित्यादिप्रत्ययो यथा द्रव्ये तथा गुणकर्मणोरपि तत्र न कश्चिद्विशेषः । तथा च सत्तावत्त्वं ध्वंसप्रतियोगित्वं द्रव्यसमवायिकारणत्वं प्रागभावप्रतियोगित्वं कारणत्वं सत्ताव्याप्यजातिमत्त्वञ्च द्रव्यगुणकर्मणां साधर्म्यमिति भावः । यद्यप्यनित्यत्वादित्रिकं नित्ये द्रव्ये गुणे चाव्याप्तं कारणत्वञ्च पारिमाण्डल्यादौ तथापि ध्वंसप्रतियोगिभाववृत्तिपदार्थविभाजकोपाधिमत्त्वं द्रव्यवत्त्वं प्रागभावप्रतियोगिभाववृत्तिपदार्थविभाजकोपाधिमत्त्वं कार्यत्वं समवाय्यसमवाय्यन्यतरकारणवृत्तिपदार्थविभाजकोपाधिमत्त्वं कारणत्वं द्रव्यादीनां साधर्म्यमित्यत्र तात्पर्यम् ॥

Digitized by Google

Common element in Substances and Qualities.

द्रव्यगुणयोः सजातीयारम्भकत्वं साधर्म्यम् ॥ ९ ॥

Aph. 9. The common property of Substance and Quality is that they originate things of the same class.

[1] Terrene atoms originate a terrene aggregate of two atoms, blue colour and the like in an atom produce blue colour and the like in an aggregate of two atoms. Such is the origination by Substance and Quality of things of the same class. Although this cannot be predicated of Ether &c., and of simple Substances, and of the Qualities of these, yet the meaning is that there is a similarity in the conditions of the divisions of the Categories existing by reason of the origination of homogeneous things. V.

Cp. Muktávalí on Bháshá-parichchheda 14, [2] That which is of the extent of an atom is not the cause of anything, for that would originate an Extension of Substance commencing by dependence on the extent of the atom itself. But this is impossible, for one Extension is productive of another Extension exceeding that which belongs to things of its own class, as from a great thing a greater is originated, and so consequently that which would be produced from an atom would be smaller than an atom. The same is to be understood to be the case with respect to infinitely great Extension, and Generality transcending sense, and Particularity.

Explanation of the foregoing Aphorism.

द्रव्याणि द्रव्यान्तरमारभन्ते गुणाश्च गुणान्तरम् ॥ १० ॥

Aph. 10. Substances originate another Substance, and Qualities another Quality.

[3] He elucidates what was said before. [The sense is] obvious. V.

Actions do not originate Actions.

कर्म कर्मसाध्यं न विद्यते ॥ ११ ॥

Aph. 11. An Action cannot be effected by [another] Action.

[1] The meaning is that there is no proof that one Action can be effected by another, as there is that Substances and Qualities are produced by things of the same class. It is here intended to be said that if one Action produced another, it would produce it after being itself produced, as in the case of Sound. Now, as the former Action produced a Disjunction from conjunct Substances, from what would the second Action produce a Disjunction? For Disjunction is preceded by Conjunction, and there is not another Conjunction produced in the same Substratum; but if [by the subsequent Action] there is no production of Disjunction, the definition of Action is violated. U.

The characteristic of Action is that it is the immediate cause of Conjunction and Disjunction.

A. E. G.

WIDOW-MARRIAGE.

A great social reform has found a new advocate in Vishnu Paraśu-rám Śástrí Pandit of Bombay, who has recently furnished a reply to the Punarudváha-pratishedha a treatise in which the Benares Pandits undertook to refute the arguments of Pandit Iśvar-chandra Vidyáságar and others in favour of the marriage of Hindu widows. The writer of this reply, which is intitled Vidhavodváha-viveka, maintains that the present restrictions on the marriage of Hindu widows may be unexceptionally removed consistently with the strictest orthodoxy. To prove this he quotes a number of authorities, who all sanction the practice under certain conditions; and maintains the plain and literal interpretation of these as opposed to the traditional. The texts cited allow the giving in marriage of a daughter or ward more than once under certain conditions. Such are the cases of a wife being left a virgin widow, being abandoned by her husband, where the marriage has been contracted under false pretences on the part of the bridegroom, when the husband loses his caste, and the like. One text only appears to give an explicit and unconditional sanction to the marriage of widows. This is a śloka of the Nárada-smṛiti which may have existed in a former and more complete form of the Mánava-dharma-śástra, and occurs in the Bṛihat-paráśara-smṛiti:

नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥

---

[1] पार्थिवाः परमाणवः पार्थिवद्व्यणुकमारभन्ते परमाणुनीलरूपादिकञ्च द्व्यणुकादिगतं नीलरूपादिकमारभते इति द्रव्यगुणयोः सजातीयारम्भकत्वं यद्यपि गगनाद्यन्त्यावयविनि तद्गुणे चाव्याप्तिस्तथापि सजातीयारम्भकवृत्तिपदार्थविभाजकोपाधिमत्त्वस्य साधर्म्यत्वे तात्पर्यम् ॥

[2] अणुपरिमाणं न तु कस्यापि कारणम् । तद्धि स्वाश्रयारब्धद्रव्यपरिमाणारम्भकं भवेत् । तच्च न सम्भवति । परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वात् । महदारब्धस्य महत्तरत्ववत् । अणुजन्यस्याणुतरत्वप्रसङ्गाच्च । एवं परममहत्परिमाणमतीन्द्रियसामान्यं विशेषाश्चेति बोध्यम् ॥

[3] पूर्वोक्तमेव स्पष्टयति । सुगमम् ॥

[1] सजातीयारब्धद्रव्यगुणयोरिव कर्मसाध्ये कर्मणि प्रमाणं नास्तीत्यर्थः । इदमत्राकूतम् । कर्म यदि कर्म जनयेत् स्वोत्पत्त्यनन्तरमेव जनयेत् शब्दवत् । तथा च पूर्वकर्मणैव यावत् संयोगिद्रव्येभ्यो विभागे जनिते द्वितीयं कर्म येन सह विभागं जनयेत् विभागस्य संयोगपूर्वकत्वात् संयोगान्तरस्य च तत्राधिकरणे ऽनुत्पन्नत्वात् विभागाजनने तु कर्मलक्षणक्षतेः ॥

Digitized by Google

In examining the application of the words नष्टे मृते it is only fair to consider the Hindu conception of marriage and its duties as set forth everywhere in the later Sanskṛit literature. A woman is to be always in a state of pupilage. The *patria potestas* passes from her father to her husband, and upon the death of her husband devolves upon her sons. While her husband lives she is to obey and worship him as her deity, looking forward to reunion with him in a future state as the reward of her devotion. It is by becoming her husband's partner in another life that she may expect a higher place hereafter. After his death she is to lead a religious life, protected by and subject to her sons, cherishing her husband's memory, and not so much as mentioning the name of any other. There is no provision made for her ceasing to live as a *brahma-cháriṇí*, and for her being given in marriage by her sons.

बाल्ये पितुर्वशे तिष्ठेत् पाणिग्राहस्य यौवने ।
पुत्राणां भर्तरि प्रेते न भजेत् स्त्री स्वतन्त्रताम् ॥ Manu v. 148.
कामं तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः ।
न तु नामापि गृह्णीयात् पत्यौ प्रेते परस्य च ॥ v. 157.
आसीतामरणात् क्षान्ता नियता ब्रह्मचारिणी ।
यो धर्म एकः पत्नीनां कांक्षन्ती तमनुत्तमम् ॥ v. 158.

From the time when such became the general, and consequently the legal, conception of women's duties, the marriage of widows must at least have been discouraged. If a more express prohibition of the practice is not found, perhaps the want of one was not anticipated by the various writers, after once prescribing the widow's rule of life. There can be little doubt that the spirit of the later Sanskṛit literature is altogether opposed to widow-marriage. A few texts of doubtful interpretation cannot have been intended to affirm the legality of anything inconsistent with duties already clearly defined. Those, then, who seek a reformation in this as in other matters must appeal elswhere than to the later religious books. Not only the interpretation but the authority of these must be freely questioned, and they must be studied from a critical instead of a religious point of view. It is hardly reasonable to innovate upon a religion of authority in one point, and to submit to it without question on every other. A really free inquirer will be able to satisfy himself, from the Veda and the residuum of history in the legends of the epics, that the early Áryas thought and acted differently in this and other matters from their descendants of the present day.

A. E. G.

RAMAYANA,

BOOK I. CANTO I.

THE ARGUMENT.

To sainted Narad, crown of those
Whose lore in sweetest language flows,
Whose chief delight from youth to age
Was rite austere and Scripture's page,
Valmiki, of earth's saints the best,
These words of questioning addressed :

'In all this world, I pray thee, who
Is virtuous and just and true:
Brave, grateful, pure in act and mind,
To every creature good and kind :
Firm, prudent, bounteous, lofty-souled,
With passions checked and wrath controlled ;
To slanderous tale who lends no ear ;
Whose wrath the gods in battle fear;
For whom the task were not too hard
The triple world from ill to guard?
Who is the best of princes, he
Who loves his people's good to see ?
The store of bliss, the living mine
Where brightest joys and virtues shine:
Queen Fortune's best and dearest friend
Whose steps her choicest gifts attend.
Who may with sun and moon compare,
With Indra, Vishnu, Fire and Air ?
Grant, Saint divine, the boon I ask—
For thee, I ween, an easy task,
To whom the power is given to know
If such a man breathe here below.'

Then Narad, open to whose eye
The present, past and future lie,
Made ready answer : 'Hermit, where
May virtues dwell so high and rare ?
Yet listen, and my tongue shall tell
In whom alone these virtues dwell.

From old Ikshvaku's line he came,
Known to the world by Rama's name:
Wise, brave, in Scripture deeply read,
Obedient, pure, his foemen's dread.
Well trained to think and act and speak,
He slays the proud and spares the weak.
Tall and broad-shouldered, strong of limb
Fortune has set her seal on him.

Digitized by Google

Graced, like a shell, with triple line,
His neck displays the auspicious sign.
His chest is broad, his steps are free;
His strong arms reach below his knee.
All fairest graces join to deck
His head, his brow, his stately neck,
And limbs in fair proportion set—
The manliest form e'er fashioned yet.
Graced with each high imperial mark,
His skin is beautifully dark.
Large are his eyes that sweetly shine
With majesty almost divine.
His plighted word he ne'er forgets;
On erring sense a watch he sets.
By nature wise, his teacher's skill
Has trained him to subdue his will.
Good, resolute and strong to bear,
His glory is to save and spare;
And lend his aid, and ne'er in vain,
The cause of justice to maintain.
Well has he studied o'er and o'er
The Vedas and their kindred lore.
Well skilled is he the bow to draw;
Well trained in arts and versed in law;
High-souled and meet for happy fate;
Most tender and compassionate;
The noblest of all lordly givers,
Whom good men follow, as the rivers
Follow their own dear lord, the Sea—
So liberal, so just is he.
The joy of Queen Kausalya's heart,
In every virtue he has part:
Firm as Himalaya's snowy steep,
Unfathomed like the mighty deep;
The peer of Vishnu's power and might,
Yet lovely as the Lord of Night;
Patient as Earth, but, roused to ire,
Fierce as the world-destroying fire;
In bounty like the Lord of Gold,
And Justice' self in human mould.

With him, his best and eldest son,
By all his princely virtues won
King Dasaratha willed to share
His kingdom, as the Regent Heir.
But when Kaikeyi, youngest queen,
With eyes of envious hate had seen
The solemn pomp and regal state
Prepared the Prince to consecrate,
She bade the hapless king bestow
Two gifts he promised long ago,—
That Rama to the woods should flee.
And that her child the heir should be.
By chains of duty firmly tied,
The wretched king perforce complied.
Rama, to please Kaikeyi, went
Obedient forth to banishment.
Then Lakshman's truth was nobly shown;
Then were his love and courage known,
When for his brother's sake he dared
All perils, and his exile shared.
And Sita, Rama's darling wife,
The close companion of his life,
Whom happy signs conspired to bless—
A miracle of loveliness—
Followed her husband, like the light
Attendant on the Lord of Night.
The king and people, sad of mood,
The hero's car awhile pursued.
But when Prince Rama lighted down
At Sringavera's pleasant town,
Where Ganga's gentle waters flow,
He bade his driver turn and go.
King Guha there no aid denied,
And bore him to the farther side.
Then on from wood to wood they strayed,
O'er many a stream, through sun and shade,
As Bharadvaja bade them, till
They came to Chitrakuta's hill.
And Rama there, with Lakshman's aid,
A pleasant little cottage made,
And spent his days with Sita, dressed
In coat of bark and deer-skin vest.
And Chitrakuta grew to be
As bright with those illustrious three
As Meru's sacred peaks that shine
With glory, when the Gods recline
Beneath them—Siva's self between
The Lord of Gold and Beauty's Queen.

The aged king for Rama pined,
And for the skies the earth resigned.
Bharat, his son, refused to reign,
Though urged by all the priestly train.
Forth to the woods he fared to meet
His brother, fell before his feet,
And cried: 'Thy claim all men allow:
O come, our lord and king be thou.'
But Rama nobly chose to be
Observant of his sire's decree.
He gave the sandals that he wore—
A pledge that he would come once more—
And bade his brother turn again.
Then Bharat, finding prayer was vain,

The sandals took and went away;
Nor in Ayodhya would he stay,
But went to Nandigrama, where
He ruled the realm with watchful care,
Still longing eagerly to learn
Tidings of Rama's safe return.

Then lest the people should repeat
Their visit to his calm retreat,
Away from Chitrakuta's hill
Fared Rama ever onward till
Beneath the shady trees he stood
Of Dandak's vast primeval wood.
Viradha, giant fiend, he slew,
And then Agastya's friendship knew,
Counselled by him he gained the sword
And bow of Indra, heavenly lord:
A pair of quivers too, that bore
Of arrows an exhaustless store.
While there he dwelt in greenwood shade,
The trembling hermits sought his aid,
And bade him with his sword and bow
Destroy the fiends who worked them woe.
And Rama's falchion left its trace
Deep cut on Surpanakha's face—
A hideous giantess who came
Burning for him with lawless flame.
Their sister's cries the giants heard,
And vengeance in each bosom stirred:
The monster of the triple head,
And Dushan to the contest sped.
But they and myriad fiends beside
Beneath the might of Rama died.

When Ravan, mighty warrior, knew
The slaughter of his giant crew—
Ravan, the King, whose name of fear
Earth, Hell, and Heaven all shook to hear—
He bade the fiend Maricha aid
The vengeful plot his fury laid.
In vain the wise Maricha tried
To turn him from his course aside:
Not Ravan's self, he said, might hope
With Rama and his strength to cope.
Impelled by fate and blind with rage
He came to Rama's hermitage.
There, by Maricha's magic art,
He wiled the princely youths apart.
The vulture slew, and bore away
The wife of Rama as his prey.
The son of Raghu came and found
The vulture slain upon the ground.
He rushed within his leaf-built cot;
He sought his wife, and found her not.
Then, then the hero's senses failed,
In mad despair he wept and wailed.
Then on the pile that bird he laid.
And still in quest of Sita strayed.
A hideous giant then he saw,
Kabandha named, a shape of awe.
The monstrous fiend he smote and slew,
And in the flame the body threw;
When straight from out the funeral flame
In lovely form Kabandha came,
And bade him seek in his distress
A wise and holy hermitess.
By counsel of this saintly dame
To Pampa's gentle stream he came,
And there the steadfast friendship won
Of Hanuman the Wind-God's son.
Counselled by him he told his grief
To great Sugriva, Vanar chief,
Who, warned of all the tale, before
The sacred flame alliance swore.
Sugriva to his new-found friend
Told his own story to the end:
His hate of Bali for the wrong
And insult he had borne so long.
And Rama lent a willing ear
And promised to allay his fear.
Sugriva warned him of the might
Of Bali, matchless in the fight,
And credence for his tale to gain,
Showed the huge foe himself had slain.
The prostrate corse of mountain size
Seemed nothing in the hero's eyes:
He lightly kicked it, as it lay,
And cast it twenty miles away.
To prove his might his arrows through
Seven trees in line, uninjured, flew.
He cleft a mighty hill apart,
And down to hell he hurled his dart.
Then high Sugriva's spirit rose,
Assured of conquest o'er his foes.
With his new champion by his side
To vast Kishkindha's cave he hied.

Then, summoned by his awful shout,
King Bali came in fury out.
One shaft from Rama's deadly bow
The monarch in the dust laid low.
Then Rama bade Sugriva reign
In place of Bali justly slain.
Then speedy envoys hurried forth
Eastward and westward, south and north.

Digitized by Google

Commanded by the grateful king
Tidings of Rama's spouse to bring.

Then by Sampati's counsel led,
Brave Hanuman who mocked at dread,
Sprang at one wild tremendous leap
A hundred leagues across the deep.
To Lanka's town he urged his way,
Where Ravan held his royal sway.
There pensive 'neath Asoka boughs
He found poor Sita, Rama's spouse.
He gave the hapless girl a ring,
A token from her lord and king.
A pledge from her fair hand he bore;
Then battered down the garden door.
Five captains of the host he slew,
And seven great chieftains overthrew;
Left Aksha dead upon the field,
Then to his captors chose to yield.
Soon from their bonds his limbs were free,
But honouring the high decree
Which Brahma had pronounced of yore
He calmly all their insults bore.
The town he burnt with hostile flame,
And spoke again with Rama's dame,
Then swiftly back to Rama flew
With tidings of the interview.

Then with Sugriva for his guide,
Came Rama to the Ocean side.
He smote the sea with shafts as bright
As sunbeams in their summer height,
And quick appeared the Rivers' King
Obedient to the summoning.
A bridge was thrown by Nala o'er
The narrow sea from shore to shore.
They crossed to Lanka's golden town,
Where Rama's hand smote Ravan down.
Vibhishan there was left to reign
Over his brother's wide domain.
To meet her husband Sita came;
But Rama stung with ire and shame,
With bitter words his wife addressed
Before the crowd that round her pressed.
But Sita, touched with noble ire,
Gave her fair body to the fire.
Then straight the God of Wind appeared,
And words from heaven her honour cleared.
And Rama clasped his wife again,
Uninjured, pure from spot or stain,
Obedient to the Lord of Fire
And the high mandate of his sire.
Led by the Lord who rules the sky,
The Gods and heavenly Saints drew nigh,
And honoured him with worthy meed
Rejoicing in each glorious deed.
His task achieved, his foe removed,
He triumphed, by the Gods approved.
By grace of Heaven he raised to life
The chieftains slain in mortal strife;
Then in the magic chariot through
The clouds to Nandigrama flew.
Met by his faithful brothers there
He loosed his votive coil of hair;
Thence fair Ayodhya's town he gained,
And o'er his father's kingdom reigned.
Disease or famine ne'er oppressed
His happy people, richly blest
With all the joys of ample wealth,
Of sweet content and perfect health.
No widow mourned her well-loved mate,
No sire his son's untimely fate.
They feared not storm or robber's hand:
No fire or flood laid waste the land:
The Golden age seemed come again
To bless the days of Rama's reign.

From him, the great and glorious king,
Shall many a princely scion spring.
He, when ten thousand years are past,
To Brahma's world shall go at last.'

BOOK VI. CANTO 76.

Fierce as he who rules the dead,
Ravan forth to battle sped;
Chieftains of his giant band
Followed close on either hand.
Scarce the city gates were past
When the sun was overcast:
Darkness fell on all around,
Roared the clouds and shook the ground.
Startled coursers fled amain
Mid a shower of bloody rain.
Vultures, with ill-omened wing,
Smote the banner of the king;
And the Jackal's hungry cry
Echoed as the car flew by.
Throbbing eye and aching arm
Struck him with a wild alarm:
Pallor sat upon his cheek,
And his voice grew low and weak.
Terrible with flash and flame
Down a hissing meteor came.
Birds that haunt the carnage field

Digitized by Google

Round the head of Ravan wheeled;
And his steeds, as on they swept
To the brunt of battle, wept.
Still the maddened king in spite
Of all omens rushed to fight;
Still by Yama's hand impelled
Toward his fate his course he held.
Earth beneath his chariot shook,
Hill and forest, cave and brook.

BOOK VI. CANTO 93.

Soon as they saw their mighty leader dead,
The giant legions turned and broke and fled;
Some to the mountain height, the wood, the cave,
Some wildly leapt into the ocean wave.
Some with sad fears for wife and children's fate
Ran to their home through Lanka's golden gate.
Sad welcome there in women's weeping eyes,
The groans of age, and tender children's cries.
Behind the routed warriors, fierce and strong
As lordly lions pressed the victor throng:
From street to street in eager quest they strayed,
And all the marvels of the town surveyed:
Eight ample gates that blazed with gems and gold,
Eight mighty walls that girt the giant's hold;
And glittering domes and spires that flashed on high
Like clouds sun-tinted in the autumn sky.

But sad Vibhishan with a brother's grief
Wept o'er the body of the giant chief:
'O glorious hero, bold and brave!' he cried,
'Skilled in all arms, in many a battle tried!
Spoiled of thy crown, with mighty limbs outspread,
Why dost thou lie upon this gory bed?
Why wilt thou sleep upon the earth's cold breast,
When silken couches woo their lord to rest?
Ah me, my brother! over bold,
Thine is the fate my heart foretold;
But love and pride forbade to hear
The friend who blamed thy wild career.
Fallen is our sun that shone so bright;
Our lordly moon is veiled in night:
Our beacon fire is dead and cold;
A hundred waves have o'er it rolled.
What could his light and fire avail
Against Lord Rama's arrowy hail?
Woe for the giants' royal tree,
Whose stately height was fair to see!
His buds were deeds of kingly grace;
His bloom, the sons who decked his race.
His penance was the glorious fruit,
And his own noble soul the root.
With rifled bloom and mangled bough
The royal tree lies prostrate now!'

'Nay, idly mourn not,' Rama cried,
'The warrior chief has nobly died.
Intrepid hero, firm through all,
So fell he as the brave should fall;
And ill beseems it men like us
To weep for those who perish thus.
Be firm: thy causeless grief restrain.
And pay the dues that yet remain.'

Again the sad Vibhishan spoke:
'His was the hero's arm that broke
Embattled Gods and Indra's might,
Unconquered ere to-day in fight.
He rushed against thee, strove, and fell.
As Ocean, when his waters swell,
Hurling his might against the rock,
Falls spent and shattered by the shock.
Woe for our chief's untimely end,
The generous lord, the trusty friend.
The cup of bliss he loved to drain,
And wealth upon his friends to rain.
Our sure defence when fear arose,
A bitter scourge to stubborn foes.
In Holy Scripture deeply read,
The sacred flame he duly fed,
Of ready hand, of fearless heart,
In sternest penance bore his part.
O, let the foe thy hand has slain
The honours of the dead obtain.'
Then Rama answered: 'Hatred dies
When low in dust the foeman lies.
Now triumph bids our contest cease,
And knits us in the bonds of peace.
Let funeral rites be duly paid,
And be it mine thy toil to aid.'

RAGHUVANSA.

CANTO VIII.

SPRING.

Now lovely Spring, descending gently, rests
Mid his dear woods that wave their shady crests.
Softly he comes—at first the floweret's birth
Proclaims his advent to the longing earth;
Then burst the tendrils from the leafy trees,
Then comes the Koïl, then the song of bees.
See, as the gentle breeze from MALAYA blows,
Loaded with flowers the scented Mango throws

Her boughs about in play—a sight to steal
Hearts dead to earth, that love nor hate can feel!
The rich Asoka, with its glorious dyes,
Enthrals the spirit as it charms the eyes;
And to the lover every spray is dear
That lends new beauty to his darling's ear.
To deck the forests, Spring delights to choose
The lovely crimson of the Amaranth's hues,
Fair tree, beloved by labouring bees that throng
Round its sweet blossoms with their ceaseless song.
Or cling upon the Vakul's buds, and sip
Flowers fed with nectar from a woman's lip.
Now is the time when maidens love to pull
That glorious flower, so bright, so beautiful,
That decks in Spring the waving woods, and wear
Its golden blossoms twisted in their hair.
Now, like a lovely bride, 'tis sweet to see
The creeping jasmin clasp her husband tree,
As a sweet smile of wifelike transport plays
Over her teeth of flowers, her lips of sprays.
Robes like the morn when first the sun appears—
Bright barley drooping o'er the maiden's ears—
The Koïl's music from the Mango bough—
These are love's weapons, and resistless now.
The golden pollen, wafted by the breeze,
Brightens the Tíla's spray all dark with bees,
Till each young bud, and every blossom there
Shines like the pearls that deck a maiden's hair.
Faint, far away, through woods in blossom floats
The music of the Koïl's earliest notes,
As when some modest maiden sweetly tries
To tell the love that sparkles in her eyes.
The woods are all alive; the busy throng
Of bees at labour charm the ears with song.
Like women's flashing teeth, the trees display
Boughs rich with blossoms pure and white as they,
And wave their leaves, like taper hands, in glee,
Moving in concert with the melody.

The laughing maiden in the flying swing
Keeps with delight the Festival of Spring,
Yet slow to seize in her soft hand the cord,
And leave the rest her lover's arms afford.
Both dames and maidens listen, and rejoice,
While comes sweet counsel in the Koïl's voice:—
"Resist no more!" it says, or seems to say—
"Youth lasts not ever, love ye while ye may!"

THE HUNT.

In hunter's garb the glorious King is drest,
His bow hangs ready on his sturdy breast;
And, as he goes, thick clouds of dust arise
Beneath his horses' feet, and veil the skies.
A leafy wreath upon his head he wears,
Green, like the trees around, the shield he bears;
The only glitter, when his ear-ring shakes
At every step his prancing courser takes.

First, with their mouths still full of holy grass,
The hunter sees a flock of wild-goats pass;
The male in triumph proudly leads the way,
The thirsty kids each mother oft delay.
Straight to the mark the hunter's arrow flies;
Their ranks are broken, and their tremulous eyes
Peer through the trees, as, when a gale has blown,
Shine lotus-leaves upon the waters thrown.
Now gainst a noble buck he bends his bow,
But moved by pity for the gentle doe
That comes herself between, his tender heart
Forbids his hand to send the ready dart.
In vain he aims at many a startled deer,
Their large eyes quickly trembling in their fear
Recal the maiden's timid look, and how,
With these sweet memories, can he slay them now?

While angry boars in wild confusion fly
From the cool marshes where they love to lie
Their dripping feet and trodden grass betray
To the keen hunter's eye their secret way.

The huge rhinoceros is forced to mourn,
Cut by the hunter's shaft, his mighty horn.
The King delights to check the haughty foe,
So spares his life, but brings his glory low.
Spotted like broken boughs, fierce tigers spring
From their dark caverns towards the fearless King:
One moment, and his hand by practice skilled
Their mouths, like quivers, with his shafts has filled.
Loud as the rushing wind, his bow-string's sound
Wakes lions slumbering on the shady ground;
Their royal dignity and matchless might
The rival Monarch's jealous rage excite.
Foes of the elephant, their claws are red
With blood-stained pearls torn from his mangled head:
He, his avenger, now delights to pay
The service rendered in the doubtful fray.

Now towards a herd of bulls he turns his horse,
And shoots swift arrows in his rapid course;
Like trembling Princes when the conqueror's nigh,
In wild confusion through the wood they fly;
He checks the chase and spares their lives, content
With their broad tails, their boasted ornament.

(To be continued.)

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 35. Benares April 1st, 1869. Vol. III.

॥ उपदेशसहस्त्या गद्यप्रबन्धः ॥

तदेवं श्रुतिस्मृतिन्यायसिद्धे ब्रह्मात्मैकत्वे ऽभिहिते लौकिकवैदिकव्यवहारविरोधं शङ्कते । स यदीति ।

(२८) स यदि ब्रूयाद्, यदि भगवन्ननन्तरो ऽबाह्यः स बाह्याभ्यन्तरो ह्यजः कृत्स्नः प्रज्ञानघन एव सैन्धवघनवदात्मा सर्वमूर्त्तिभेदवर्जित आकाशवदेकरसः, किमिदं दृश्यते श्रूयते वा साध्यं साधनं वा साधकश्चेति श्रुतिस्मृतिलोकप्रसिद्धं वादिशतविप्रतिपत्तिविषय इति ॥

गृहक्षेत्रदेशकोशादिकं साध्यमैहिकं लौकिकं दृश्यते, तत्साधनं वा प्रतिग्रहसेवाविजययुद्धादि, तत्साधकश्च तदर्थिवर्गो ब्राह्मणादिर्दृश्यते, तथा यागादि साधनं, स्वर्गादि साध्यं, तत्कामश्च साधक, इति पारलौकिकमपि त्रिकं श्रूयते स्वर्गकामो यजेतेत्येवमादावित्यर्थः । कुत्र दृश्यते श्रूयत इत्याकाङ्क्षायामाह । श्रुतिस्मृतिलोकप्रसिद्धमिति । लोक इति व्यवहर्तृजन उच्यते । देहात्मप्रसिद्धिवल्लोकप्रसिद्धेरतन्त्रत्वशङ्कायामाह । वादिशतेति । वादिशतविप्रतिपत्तीनां विषयो विषयत्वं यस्मिन्युक्तत्रितये तत्तथोक्तम् ॥ २८ ॥

व्यवहारस्याविद्याविषयत्वान्न तेन पारमार्थिकब्रह्मात्मैक्यं विरुध्यत इति समाधत्ते । आचार्यो ब्रूयादित्यादिना ।

(२९) आचार्यो ब्रूयाद्, अविद्याकृतमेतद्यदिदं दृश्यते श्रूयते वा, परमार्थतस्त्वेक एवात्मा, ऽविद्यादृष्टेरनेकवदाभासते, तिमिरदृष्ट्या ऽनेकचन्द्रवत्, यत्र वान्यदिव स्याद्यत्र हि द्वैतमिव भवति, तदितर इतरं पश्यति, मृत्योः स मृत्युमाप्नोति, अथ यत्रान्यत्पश्यति अन्यच्छृणोति अन्यद्विजानाति तदल्पम्, अथ यदल्पं तन्मर्त्यमिति, वाचारम्भणं विकारो नामधेय, मनृतमन्यो ऽसावन्योऽहमिति भेददर्शननिन्दोपपत्तेरविद्याकृतं द्वैतमेकमेवाद्वितीयं यत्र त्वस्य को मोहः कः शोक इत्याद्येकत्वविधिश्रुतिभ्यश्चेति । यद्येवं भगवन्किमर्थं श्रुत्या साध्यसाधनादिभेद उच्यते उत्पत्तिः प्रलयश्चेति ॥

स्पष्टो ऽस्यार्थः। उक्तेऽर्थे श्रुतीरुदाहरति । यत्र वा इत्यादिना । इवशब्दो ऽन्यदर्शनस्याभासत्वं द्योतयति । स्वप्नावस्थादृष्टान्तार्थो वेवशब्दः । यत्र यदा ऽविद्यावस्थायां द्वैताभावे ऽपि द्वैतमिव द्रष्टृदृश्यदर्शनभेदवद्भवति तत्तदा इतरो द्रष्टा इतरं स्वव्यावृत्तं कर्मभूतं विषयमितरेण चक्षुषा करणेनेत्यर्थात्पश्यतीवेत्यर्थः । यच्च भेददर्शनोपलब्धं तदल्पं परिच्छिन्नं, यच्च परिच्छिन्नं तन्मर्त्यं विनाशि, यच्च विनाशि न तत्सत् "नासतो विद्यते भाव" इति वचनादित्यर्थः । द्वैतस्याविद्याकृतत्वे श्रुतीरुपन्यस्य ब्रह्मात्माद्वयस्य परमार्थत्वे श्रुतीरुपन्यस्यति । एकमेवेत्यादिना । ननु साध्यसाधनभेदश्चेदविद्याविषयस्तर्हि मिथ्यार्थगोचरत्वात्कर्मकाण्डमप्रमाणं स्यादिति शिष्यः शङ्कते । यद्येवमिति । न केवलं कर्मकाण्डाप्रामाण्यापत्तिर्द्वैतमिथ्यात्वे, ऽपि तु ज्ञानकाण्डे ऽपि सृष्ट्यादिवाक्यानां निर्विषयतया प्रामाण्यहानिप्रसङ्ग इत्यभिप्रेत्याह । उत्पत्तिः प्रलयश्चेति । श्रुत्या किमर्थमुच्यत इत्यनुषङ्गः ॥ २९ ॥

Digitized by Google

तत्र वेदान्तवाक्यजनितब्रह्मात्मविज्ञानात्प्राक् कर्मकाण्डाप्रामाण्यापत्तिः शङ्क्यते तदूर्ध्वं वेति विकल्प्याद्यं प्रत्याह । अत्रोच्यत इति ।

(३०) अत्रोच्यते, ऽविद्यावत उपात्तशरीरादिभेदस्येष्टानिष्टयोगिनमात्मानं मन्यमानस्य साधनैरेवेष्टानिष्टप्राप्तिपरिहारोपायविवेकमजानत इष्टप्राप्तिं चानिष्टपरिहारं चेच्छतः शनैस्तद्विषयमज्ञानं निवर्त्तयितुं शास्त्रम् ॥

अविद्यावत उपात्तेति । अप्राप्ते शास्त्रमर्थवदिति न्यायात्कर्तृसाधनफलभेदस्वरूपस्य शास्त्रज्ञानशून्यानामपि प्रसिद्धेस्तत्र वेदस्यातात्पर्यात्तथाप्रसिद्धं भेदमादाय पुंसः पुरुषार्थसाधनमविज्ञातं बोधयतः शास्त्रस्य नाप्रामाण्यशङ्केत्यभिप्रेत्य संगृहीतमर्थं विवृणोति । शरीरादिभेदस्येत्यादिना । साधनैरेवेष्टप्राप्तिं चानिष्टपरिहारं चेच्छत इष्टानिष्टप्राप्तिपरिहारोपायविवेकमजानतः शनैस्तद्विषयमज्ञानं निवर्त्तयितुं शास्त्रमित्यन्वयः । साधनैरेवेष्टानिष्टप्राप्तिपरिहारेच्छायां निमित्तं विशेषणान्तरेण द्योतयन्नाह । शरीरेति । शरीरादिभेदस्य शरीरेन्द्रियादिसङ्घातविशेषस्य संबन्धिनी ये इष्टानिष्टे तद्युक्तमात्मानं मन्यमानस्येति योजना । अयं भावः । अनाद्यविद्यावृतनिजस्वभावस्य शरीरेन्द्रियमनोबुद्धिप्राणेष्वध्यस्तात्मभावस्य परिच्छिन्नमात्मानं मन्यमानस्य स्वातिरिक्तविषयसंबन्धाधीनमेव पुरुषार्थमिच्छतस्तदुपायं पर्येषमाणस्य साक्षात्पुरुषार्थमात्मतत्त्वं बोद्धुमसमर्थत्वात्प्रथमं तदभिलषितस्वर्गादिसुखादिसाधनं मानान्तरादविज्ञातं बोधयच्छास्त्रं तं विधिनिषेधयोर्व्यवस्थापयति, ततो विहितानुष्ठानान्निषिद्धपरिवर्ज्जनाच्चाहरहरेधमानात्मशुद्धेरनुपचीयमानपाप्मनो निषिद्धफलमिव काम्यफलमप्यनित्याशुचिदुःखरूपं संसार एवेति काम्यकर्मपरित्यागेनावश्यकमेव कर्मेश्वराराधनरूपमनुतिष्ठतो ऽतितरां शुद्धान्तःकरणस्य सूक्ष्मवस्तुतत्त्वप्रतिपत्तियोग्योयमिदानीं जात इति आत्मतत्त्वज्ञानमज्ञातं परमपुरुषार्थसाधनमुत्पादयेदनया प्रणालिकया ऽज्ञातार्थबोधनेनाज्ञानं पुंसो निवर्त्तयितुं शास्त्रं प्रवृत्तमित्येतदभिप्रेत्य शनैरित्युक्तमिति ॥ ३० ॥

ननु किमित्येवं तात्पर्यं वर्ण्यते प्रतीयमानसाध्यसाधनभेदस्वरूपस्यापि शब्दशक्तितात्पर्यगोचरता किं न स्यादित्याशङ्क्योभयपरत्वे वाक्यभेदापत्तेर्मैवमित्याह । न साध्येति ।

(३१) न साध्यसाधनादिभेदं विधत्ते, ऽनिष्टरूपः संसारो हि स इति तद्भेददृष्टिमेवाविद्यां संसारमूलमुन्मूलयत्युत्पत्तिप्रलयाद्ययुक्तत्वोपपत्तिप्रदर्शनेनाविद्यायामुन्मूलितायां श्रुतिस्मृतिन्यायेभ्यो ऽनन्तरमबाह्यं स बाह्याभ्यन्तरो ह्यजः सैन्धवघनवत्प्रज्ञानघन एवैकरस आत्मा ऽऽकाशवत्परिपूर्ण इत्यत्रैवैका प्रज्ञाप्रतिष्ठा परमार्थदर्शिनो भवति, न साध्यसाधनोत्पत्तिप्रलयादिभेदेनाशुद्धिगन्धोप्युपपद्यते ॥

कस्मादन्यपरत्वेपि वस्तुसत्त्वपरत्वं नेष्यते इत्याशङ्क्यापुरुषार्थे तात्पर्यायोगादित्यभिप्रेत्याहानिष्टरूपः संसारो हि स इति । एवं कर्मकाण्डस्याज्ञातार्थावबोधने तात्पर्यं न भेदस्य वस्तुत्वबोधने इत्यप्रामाण्यशङ्कां तस्यापाकृत्य सृष्ट्यादिवाक्यस्य साक्षादद्वैतवस्तुप्रतिपत्तिपरत्वाच्चाप्रामाण्यशङ्केत्याह । तद्भेददृष्टिमिति । उत्पत्तिप्रलयादेरित्यादिपदात् स्थितिप्रवेशनियमनानि गृह्यन्ते । उत्पत्तिप्रलयादेरयुक्तत्वोपपत्तिदर्शनेनाद्वैते युक्तिदर्शनद्वारेण संसारमूलमविद्यामेवोन्मूलयति सृष्ट्यादिवाक्यमित्यध्याहारेण योजना । अविद्यायाः संसारमूलत्वं द्योतयितुं तां विशिनष्टि । तद्भेददृष्टिमिति । तस्य साध्यसाधनसाधकरूपस्य भेदस्य दृष्टिः प्रतिभासो यस्याः सा तथोक्ता तामित्यर्थः । अविद्योन्मूलने च किं स्यादित्यत आह । अविद्यायामुन्मीलितायामित्यादिना । एवं प्रतिष्ठितप्रज्ञस्य परमार्थदर्शिनः साध्यसाधनविशेषबुद्ध्यजनकत्वात्तदा कर्मकाण्डस्यैव स्वरूपतो ऽप्रतीतेरप्रामाण्यमिष्टमेवेति विकल्पान्तरपरिहार उक्तो वेदितव्यः ॥ ३१ ॥

एवं सति यदुक्तं प्राग् "यद्येवं संसारी च सचित्यादि" तदप्यज्ञानविलसितं, मुमुक्षायामुत्पन्नायां कर्मतत्साधनापरित्यागे हेत्वभावादित्यभिप्रेत्याह । तच्चैतदिति ।

(३२) तच्चैतत्परमार्थदर्शनं प्रतिपत्तुमिच्छता वर्णाश्रमाद्यभिमानकृतपाङ्क्तरूपपुत्रवित्तलोकैषणादिभ्यो व्युत्थानं कर्त्तव्यं सम्यक्प्रत्ययविरोधात्तदभिमानस्य भेददर्शनप्रतिषेधार्थोपपत्तिश्चोपपद्यते, नह्येकस्मिन्नात्मन्यसंसारित्वबुद्धौ शास्त्रन्यायोत्पादितायां तद्विपरीता बुद्धिर्भवति, नह्यग्नौ शीतत्वबुद्धिः शरीरे वा ऽजरामरणबुद्धिः, तस्मादविद्याकार्यत्वात्सर्वकर्मणां तत्साधनानां च यज्ञोपवीतादीनां परमार्थदर्शननिष्ठेन त्यागः कर्त्तव्यः ॥

॥ इति शिष्यप्रतिबोधनविधिः ॥

पाङ्क्तरूपेति । पञ्चप्रकारेत्यर्थः । यजमानपत्नीपुत्रवित्तद्वयसाध्यकर्मफलभूतैतल्लोकपितृलोकदेवलोकैषणाभ्यो व्युत्थानं वैपरीत्येनोत्थानं तत्र निःस्पृहतया तत्साधनसर्वकर्मतदुपकरणसंन्यासरूपं पारिव्राज्यं कर्त्तव्यमित्यर्थः । आपाततः परोक्षतो वा ऽधिगतब्रह्मात्मभावस्य तदा ऽपरोक्षोन्मुखस्य ब्राह्मणत्वादिदेहाध्यासनिबन्धनकर्माधिकारित्वाभिमानशैथिल्यात्त

Digitized by Google

स्योद्देश्यविरोधाच्च त्याज्यमेव ससाधनं कर्मेत्युक्ते ऽर्थे हेतुमाह । सम्यगिति । अभेददर्शनमेव सम्यग् ज्ञानं तदिच्छता च तद्विरुद्धाभिमानतदास्पदं सर्वं त्याज्यमित्यत्रैव श्रुतार्थापत्तिमाह । भेददर्शनेति । "मृत्योः स मृत्युमाप्नोति, य इह नानेव पश्यति" "उदरमन्तरं कुरुते अथ तस्य भयं भवति"इत्यादिभेददर्शनप्रतिषेधरूपो यो ऽर्थस्तस्योपपत्तिरुपपादनं चोपपद्यते इत्यक्षरार्थः । भेदस्य तत्प्रयुक्ताभिमानस्य च प्रामाणिकत्वे श्रुत्या तन्निषेधो न घटेत, नहि प्रमाणसिद्धस्य प्रमाणेन प्रतिषेधः संभवति, न च प्रतिषेधश्रुतेर्विषयान्तरमुत्प्रेक्ष्यते, अतः प्रतिषेधकवाक्यानां भेदापवादपरत्वाभावे तदाम्नानमनर्थकं स्यात्तच्चानिष्टमध्ययनविधिविरोधादिति भावः । ननु सम्यग्ज्ञानस्य कर्मसमुच्चितस्यैव मोक्षसाधनत्वाच्च विहितकर्मत्यागो युक्त इत्यत आह । नहीति । विरोधादेव समुच्चयस्यानुष्ठानमशक्यत्वात्तद्विधानासंभवात्कर्मजन्यस्य चानित्यत्वान्मोक्षत्वानुपपत्तेर्न ज्ञानकर्मसमुच्चयो मोक्षसाधनमिति भावः । यद्वोक्तमेव विरोधं दृष्टान्तोक्त्या द्रढयति । नहीत्यादिना । निरूपितमर्थसारमुपसंहरति । तस्मादिति ॥ ३२ ॥

॥ इति शिष्यप्रतिबोधनविधिर्नाम प्रकरणं विवृतम् ॥

तदेवं शिष्यस्य देहद्वयाभिमानापोहेन ब्रह्मरूपत्वमुपदिश्य, तस्यामवस्थायां कर्मतत्साधनसंन्यासो न्यायत उपपादितो ब्रह्मस्वभावविपरीतं चाविद्याकृतमित्युपक्षिप्तं, तदिदानीमब्रह्मरूपत्वस्याविद्यात्मकत्वमात्मनः कूटस्थतया स्वाभाविकं ब्रह्मरूपत्वं चोपपादयितुं प्रकरणान्तरमारभमाणः कृतसंन्यासस्य मुमुक्षोः कृत्यं श्रवणं विधितः सूचयन् शिष्यप्रश्नमवतारयति । सुखमिति ॥

(३३) सुखमासीनं ब्राह्मणं ब्रह्मनिष्ठं कश्चिद्ब्रह्मचारी जन्ममरणलक्षणात्संसारान्निर्विण्णो मुमुक्षुर्विधिवदुपसन्नः पप्रच्छ, भगवन् कथमहं संसारान्मोक्षिष्ये, ॥

सुखमासीनमित्यनेनाविक्षिप्तचित्ततया प्रसन्नतोक्ता, व्यावहारिकदृष्ट्या ब्राह्मणमित्युक्त्या ऽनापदि ब्राह्मणेतरवर्णाच्चोपदेशो ग्राह्य इति सूचयति । परमार्थतो ब्रह्मनिष्ठमित्युक्त्या शिष्यप्रतिबोधनसामर्थ्यं सूच्यते । कश्चिदिति । प्रागुक्तगुणगणाढ्यः सुपरीक्षितः शिष्य उक्तस्तस्योपदेशग्रहणकाले एकाकित्वं सूचयितुं कश्चिदित्युक्तं, तस्य विशेषणानि ब्रह्मचारीत्यादीनि । ब्रह्मणि प्रत्यक्तत्वे चरितुं विचरितुं शीलमस्यास्तीति ब्रह्मचारी ब्रह्मविचारतत्पर इत्यर्थः । अनेन नित्यानित्यवस्तुविवेको दर्शितः । विशेषणान्तरेण वैराग्यमुक्तम् । विवेकवैराग्ययुक्तस्य शान्त्यादिरर्थप्राप्त इति मत्वा चरमं विशेषणमाह । मुमुक्षुरिति । तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् । समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमित्यादि शास्त्रमनुसरन्नाह । विधिवदुपसन्न इति । प्रश्नप्रकारमेवाह । भगवन्नित्यादिना, नैमित्तिक इत्यन्तेन ग्रन्थेन । संसारमोक्षविषय एकः प्रश्नो, दुःखानुभवस्यात्मस्वभावत्वविषयो ऽपरः किमयमित्यादिप्रश्न इति विवेकः ॥ ३३ ॥

प्रथमप्रश्नस्य निमित्तमाह । शरीरेति ।

(३४) शरीरेन्द्रियविषयवेदनावान् जागरिते दुःखमनुभवामि तथा स्वप्ने ऽनुभवामि च पुनःपुनः सुषुप्तिप्रतिपत्त्या विश्रम्यविश्रम्य किमयमेव मम स्वभावः किं वा ऽन्यस्वभावस्य सतो नैमित्तिक इति । यदि स्वभावो, न मे मोक्षाशा स्वभावस्यावर्ज्जनीयत्वा,दथ नैमित्तिको, निमित्तपरिहारे स्यान्मोक्षोपपत्तिः । तं गुरुरुवाच । शृणु वत्स, न तवायं स्वभावो, नैमित्तिक इत्युक्तः । शिष्य उवाच । किं निमित्तं, किं वा तस्य निवर्त्तकं, को वा मम स्वभावो यस्मिन्निमित्ते निवर्त्तिते नैमित्तिकाभावः रोगनिमित्तनिवृत्ताविव रोगी स्वभावं प्रपद्येयमिति ॥

शरीरेन्द्रियविषयनिमित्तवेदनानुभवो हि संसारस्तद्वानसहं कथं संसारान्मोक्षिष्य इति जागरित इति द्वितीयप्रश्नस्य बीजमुक्तं, जाग्रत्स्वप्नयोर्दुःखानुभवात्सुषुप्ते चात्मनि तदननुभवात्संशयोत्थानमित्यर्थः । नैमित्तिक इति च पप्रच्छेत्यन्वयः । उभयत्र फलमाह । यदि स्वभाव इत्यादिना । अस्वभावपक्षमवलम्ब्य गुरुरुत्तरं वदन्न भेतव्यं त्वयेति शिष्यमाश्वासयतीत्याह ग्रन्थकारस्तं गुरुरिति । किं त्विति मध्ये ऽध्याहारः कर्त्तव्यः । कृताऽऽश्वासः शिष्य उवाच । किं निमित्तमिति । निमित्तनिवृत्तिमन्तरेण नैमित्तिकस्यात्यन्तिकनिवृत्त्यनुपपत्तेस्तत्स्वरूपमविदित्वा तत्परिहारायोगात्तस्य प्रश्नः कृतः, निवर्त्तकप्रश्नस्तु तत्स्वभावपरिज्ञानेन तदवलम्बनार्थः, सुखदुःखादिमत्त्वस्यास्वभावत्वोक्तौ तर्हि किं स्वभाव आत्मेति निःस्वभावं वस्तु नास्तीति मन्वानः पृच्छति । को वेति । यस्मिन्निमित्ते निवर्त्तिते नैमित्तिकाभावस्तत्किं निमित्तं किं वा तस्य निवर्त्तकमित्यन्वयः, इवशब्दो यथाशब्दार्थः । रोगी रोगनिमित्तनिवृत्तौ यथा स्वभावं प्रतिपद्यते तथा दुःखनिमित्तनिवृत्तौ यं स्वभावमहं प्रतिपद्येयं स को वा मम स्वभावः इति योजना । इति शिष्य उवाचेति संबन्धः ॥ ३४ ॥

पृष्टवस्तुस्वरूपकथनेनोत्तरं गुरुरुवाचाविद्येत्यादिना ।

Digitized by Google

(३५) गुरुरुवाच । अविद्यानिमित्तं, विद्या तस्या निवर्त्तिका, ऽविद्यायां निवृत्तायां तन्निमित्ताभावान्मोक्ष्यसे जन्ममरणलक्षणात्संसारात्, स्वप्नजाग्रद्दुःखं च नानुभविष्यसीति । शिष्य उवाच । का सा ऽविद्या किंविषया वा, विद्या च का ऽविद्यानिवर्त्तिका, यया स्वभावं प्रतिपद्येयेति । गुरुरुवाच । त्वं परमात्मानं सन्तमसंसारिणं संसार्यहमस्मि इति विपरीतं प्रतिपद्यसे, ऽकर्त्तारं सन्तं कर्त्तेति, अभोक्तारं सन्तं भोक्तेति, विद्यमानं चाविद्यमानमिति, इयमविद्या ॥

सा ऽविद्या निमित्तं निदानं यस्य स संसारस्तन्निमित्तस्तस्याभावादिति विग्रहः । तदा स्वप्नजागरितदुःखं चात्मधर्मत्वेन नानुभविष्यसीत्यर्थः । स्वरूपतो ऽवगतपदार्थानां विशेषबुभुत्सया विनेयः पृच्छतीत्याह । शिष्य उवाचेति । वाशब्दश्चार्थे, किमाश्रया च सेत्यर्थः । स्वभावं प्रतिपद्येय जाग्रदादावपि दुःखाद्यनुभवहीनमात्मतत्त्वमुपसंपद्येयेत्यर्थः । तव स्वरूपावरणविपर्ययाध्यासलक्षणा त्वत्स्वरूपाश्रयविषया ऽविद्येति प्रथमप्रश्नस्योत्तरं गुरुरुवाचेत्याह । गुरुरिति । परमात्मानं परिपूर्णस्वरूपं विपरीतं परिच्छिन्नस्वरूपमहमस्मीति त्वं प्रतिपद्यसे इति प्रतिद्वन्द्वं योज्यं, यन्निमित्तमेवं संसार्यात्मतामेव प्रतिपद्यसे, परिपूर्णत्वाद्यात्मत्वं विद्यमानमपि न प्रतिपद्यसे, सेयमविद्या त्वदाश्रया त्वद्विषया चेति स्वदनुभवसिद्धा, त्वं तु चिदानन्दैकरसः कूटस्थ इत्यभिप्रायः । विद्यमानं चाविद्यमानमिति नित्यं सन्तमनित्यमित्यर्थः ॥३५॥

शिष्यस्त्वात्मनो नित्यत्वमुक्तमङ्गीकृत्यासंसार्याद्यात्मत्वमुक्तमाक्षिपतीत्याह ।

(३६) शिष्य उवाच । यद्यप्यहं विद्यमानस्तथापि न परमात्मा, कर्तृत्वभोक्तृत्वलक्षणः संसारो मम स्वभावः, प्रत्यक्षादिभिः प्रमाणैरनुभूयमानत्वा,न्नाविद्यानिमित्तो, ऽविद्यायाः स्वात्मविषयत्वानुपपत्ते,रविद्या नामान्यस्मिन्नन्यधर्माध्यारोपणा, यथा प्रसिद्धं रजतं प्रसिद्धायां शुक्तिकायां, यथा प्रसिद्धं पुरुषं स्थाणावध्यारोपयति, प्रसिद्धं वा स्थाणुं पुरुषे, नाप्रसिद्धं प्रसिद्धे प्रसिद्धं चाप्रसिद्धे, न चात्मन्यनात्मानमध्यारोपयत्यात्मनो ऽप्रसिद्धत्वात्तथात्मानमनात्मन्यात्मनो ऽप्रसिद्धत्वादेव ॥

शिष्य उवाचेति । प्रत्यक्षमहं कर्तेत्यादिप्रत्ययः, कर्तृत्वादिः साश्रयो धर्मत्वाद्रूपादिवदिति साश्रयत्वे सिद्धे नाचेतने सुखदुःखं पाषाणादौ तददर्शनात्परिशेषाच्चेतनाश्रयत्वसिद्धिरनुमानम् । "गुणान्वयो यः फलकर्मकर्ता कृतस्य तस्यैव स चोपभोक्ता" । "परावसुप्तेषु जागर्त्ति कामंकामं पुरुषो निर्मिमाणः" ।

इत्यादिरागमश्चादिशब्दार्थः । विपक्षे बाधिकां युक्तिं संगृह्णाति । अविद्यायाश्चात्मविषयत्वानुपपत्तेरिति । अविद्यास्वरूपोपन्यासपूर्वकं संगृहीतमर्थं विवृणोति । अविद्या नामेत्यादिना । मिथ्या ज्ञानमेवाविद्योक्तेति मन्वानस्यायमुपन्यासः शुक्तिकायामध्यारोपयतीति वक्ष्यमाणस्यानुषङ्गः । एवमुत्तरत्राप्यनुषङ्गो द्रष्टव्यः । कस्मिंश्चिद्विषयभूते ऽर्थे ऽन्यतः प्रसिद्धस्य विषयान्तरस्याध्यारोपो ह्यविद्येति प्रसिद्धि,स्तत्रात्मा यदि प्रसिद्ध एव स्यात् तदा तस्याध्यासविरोधिप्रकाशात्मकत्वाच्च तस्मिन्नतद्धर्मप्रतिभासः स्याद्, यद्यप्रसिद्धस्तदा विषयास्फुरणात्कुत्रातद्धर्मप्रतिभासो भवेत्तथा च कर्तृत्वादेरात्मन्याविद्यकत्वानुपपत्तिरतः स्वाभाविक एवात्मनः कर्तृत्वादिलक्षणो धर्म इत्यभिप्रायः ॥ ३६ ॥

तत्राधिष्ठानाध्यस्यमानयोः पृथक् प्रसिद्धिमन्तरेणाध्यासानुपपत्तिरिति ते मतं किं वा प्रसिद्धिमात्रं विनेति विकल्प्य नान्त्यः प्रसिद्धिमात्रस्याङ्गीकारादित्यभिप्रेत्याद्यं निराकरोति ॥

(३७) तं गुरुराह । न, व्यभिचाराद्, नहि वत्स प्रसिद्धं प्रसिद्ध एवाध्यारोपयतीति नियन्तुं शक्यमात्मन्यध्यारोपणदर्शनाद्, गौरो ऽहं कृष्णो ऽहमिति देहधर्मस्याहंप्रत्ययविषये आत्मनि, अहंप्रत्ययविषयस्य च देहे ऽहमयमस्मीति । शिष्य आह । प्रसिद्ध एव तर्ह्यात्मा ऽहंप्रत्ययविषयतया देहश्चायमिति । तत्रैवं सति प्रसिद्धयोरेव देहात्मनोरितरेतराध्यारोपणात्स्थाणुपुरुषयोः शुक्तिकारजतयोरिव तत्र कं विशेषमाश्रित्य भगवतोक्तं प्रसिद्धयोरितरेतराध्यारोपणेति नियन्तुं न शक्यत इति । गुरुराह । शृणु, सत्यं प्रसिद्धौ देहात्मानौ न तु, स्थाणुपुरुषाविव विविक्तप्रत्ययविषयतया सर्वलोकप्रसिद्धौ ॥

गुरुराह न व्यभिचारादिति । सुषुप्त्यादावात्मन्यवभासमाने ऽपि कर्तृत्वाद्याकारस्यानवभासाद्विशिष्टात्मविषयत्वमेव प्रत्यक्षानुमानागमानामित्यविद्यात्मत्वाबाधकत्वमिति द्रष्टव्यं, हे वत्सेति संबोधयन्नद्यापि त्वं बाल एव न न्यायमार्गे व्युत्पन्न इति दर्शयति । अन्यत्र पृथक् प्रसिद्धमेवान्यत्र प्रसिद्धे ऽध्यारोपयतीति नहि नियन्तुं शक्यते व्यभिचारादित्यन्वयः । कुत्र व्यभिचार इति तत्राहात्मनीति । संग्रहं विवृणोति । गौरो ऽहमिति । देहातिरिक्तात्मवादिभिः कृशो ऽहमित्यादिदेहधर्मावभास आत्मन्यहंप्रत्ययविषये तस्य च देहे मनुष्यो ऽहं

Digitized by Google

जानामीत्यवभासो ऽप्यध्यासो ऽङ्गीक्रियते, नहि देहात्मनोः पृथक् प्रसिद्धिरस्ति, अतस्तयोर्नानियमभङ्ग इत्यर्थः । यथा स्थाणुपुरुषयोः प्रसिद्धयोरन्योन्यस्मिन्नध्यासस्तथा देहात्मनोरपीन्द्रियविषयत्वेनाहंप्रत्ययविषयत्वेन च प्रसिद्धयोरेवेतरेतरस्मिन्नितराध्यासे विशेषाभावाच्च व्यभिचार इति शङ्कते । शिष्य आहेति । तथा चाहंकर्तृचिदात्मनोः पृथगवभासाभावादितरेतराध्यास इति दार्ष्टान्तिकासिद्धिरिति भावः । आचार्यस्तु देहात्मनोः प्रसिद्धत्वे ऽपि त्वदभिमतनियमस्तत्र नास्तीत्यभिप्रेत्य व्यभिचारं द्रढयतीत्याह । गुरुरिति । सत्यं प्रसिद्धौ देहात्मानौ तत्र शृणु विशेषमिति योजना, विशेषमेवाह नन्विति ॥ ३७ ॥

अविविक्तप्रत्ययविषयतया प्रसिद्धमेवाभिनयति ।

(३८) कथं तर्हि नित्यमेव निरन्तराविविक्तप्रत्ययविषयतया नह्ययं देहो ऽयमात्मेति विविक्ताभ्यां प्रत्ययाभ्यां देहात्मानौ गृह्णाति यतः कश्चित्,दत एव हि मोमुह्यते लोक आत्मानात्मविषये एवमात्मा नैवमात्मेति, इमं विशेषमाश्रित्यावोचं नैवं नियन्तुं शक्यमिति, नन्वविद्याध्यारोपितं यच्च यत्तदसत्तच्च दृष्टं यथा रजतं शुक्तिकायां स्थाणौ पुरुषो रज्ज्वां सर्प आकाशे तलमलिनत्वमित्यादि तथा देहात्मनोरपि नित्यमेव निरन्तराविविक्तप्रत्ययतया नेतरेतराध्यारोपणा कृता स्यात् ॥

नह्ययमित्यादिना । तत्र लिङ्गमाहात एव हि मोमुह्यते लोक इति । मोहातिशयमेवाभिनयत्येवमात्मेति । देह आत्मा इन्द्रियाण्यात्मा कर्तात्मा अकर्तात्मा व्यापकः परिच्छिन्नः सगुणो निर्गुण इति लोकवादिविप्रतिपत्तेः सर्वो लोको मोमुह्यमानो दृश्यते, विविक्ततयोपलम्भे त्विदं न स्यादित्यस्ति विशेष इत्युपसंहरतीमं विशेषमिति । तस्मादेकज्ञानोपरक्ततयोपलभ्यमानाधिष्ठानयोः सिद्धिरध्यासे ऽपेक्ष्यते, न पृथक्सिद्धि,रित्यतो ऽहं कर्ता भोक्तेत्यस्याप्यहं मनुष्य इतिवत् तद्धाकारप्रतिभासादध्यारोपत्वसिद्धिरिति भावः । नन्वात्मानात्मनोरुभयोरपि यद्यध्यासगोचरता तदा ऽध्यस्तस्य मिथ्यात्वादात्मनः सत्यत्वानुपपत्तिप्रसङ्ग इति शिष्यः शङ्कते । नन्विति । यद्यदविद्याध्यारोपितं तत्तदसद्दृष्टं यथा शुक्तिकादौ रजतादीति व्याप्तिमुक्त्वा पक्षधर्मतामाह । तथा देहात्मनोरपीति ॥ ३८ ॥

अनुमानं प्रयुङ्क्ते ।

(३९) तदितरेतरयोर्नित्यमेवासत्त्वं स्याद्यथा शुक्तिकादिष्वविद्याध्यारोपितानां रजतादीनां नित्यमेवात्यन्तासत्त्वं तद्विपरीतानां च विपरीतेषु तद्वद्देहात्मनोरविद्ययैवेतरेतराध्यारोपणा कृता स्यात्तच्चैवं सति देहात्मनोरसत्त्वं प्रसज्येत, तच्चानिष्टं, वैनाशिकपक्षत्वादयं तद्विपर्ययेण देह आत्मन्यविद्यया ऽध्यारोपितो देहस्यात्मनि इति असत्त्वं प्रसज्येत, तच्चानिष्टं, प्रत्यक्षादिविरोधात्, तस्माद्देहात्मानौ नाविद्ययेतरेतरस्मिन्नध्यारोपितौ ॥

तदितरेतरयोरित्यादिना तत्र व्याप्तिपक्षधर्मत्वसिद्धौ सत्यामिति यावत् । आत्मन्यनात्मा अनात्मनि चात्मा नित्यमेवासन् भवितुमर्हति, नित्यमेवेतरेतरत्राध्यस्तत्वात्, शुक्तिकादौ रजतादिवद्रजतादौ शुक्त्यादिवच्चेत्यवयवत्रयमभिधायोपनयनिगमने निर्दिशति । तद्वद्देहात्मनोरिति । सिद्धसाध्यत्वाशङ्कां निराकरोति । तच्चानिष्टमिति । ननु नेतरेतराध्यासोऽङ्गीक्रियते येनात्मनो ऽप्यसत्त्वप्रसङ्गः स्यात्,किं त्वन्यतराध्यास एवान्यत्राङ्गीक्रियत इत्याशङ्कते । गुरुरयेति । तद्विपर्ययेणानात्माधिष्ठानविपर्ययेणेत्यर्थः । तदेव स्पष्टयति । देह इति । शिष्यो निराकरोति । देहस्यात्मनि सतीति । यथा शुक्तिकादौ सत्येव नेदं रजतमित्यादिना तदसत्त्वं प्रतीयते तथा ऽऽत्मन्यहमवभासे सत्येव देहस्यासत्त्वमनुभूयेत, नह्यनुभूयते,अनुभूयत एवेत्यभ्युपगमः प्रमाणविरोधादयुक्त इत्यर्थः । यस्मादेवं युक्तिं न सहते तस्मान्नाध्यास इत्युपसंहरति । तस्मादिति ॥ ३९ ॥

कथं तर्ह्यहं मनुष्य इत्यादिव्यवहारो लोकस्येति गुरुः शङ्कते ।

(४०) कथं तर्हि,वंशस्तम्भवन्नित्यसंयुक्तो, नानित्यत्वं परार्थत्वप्रसङ्गात्संहतत्वात्परार्थत्वमनित्यत्वं च वंशस्तम्भादिवदेव, किं च यस्तु परैर्देहेन संहतः कल्पित आत्मा स संहतत्वात्परार्थस्तेनासंहतः परो ऽन्यो नित्यसिद्धस्तावत्स्यासंहतस्य ॥

तर्हि कथमिति । शिष्यो मीमांसकादिमतमाश्रित्य संयोगसंबन्धादिति सदृष्टान्तमाह । वंशस्तम्भवदिति । यथा वंशानां स्तम्भानामाधाराधेयभावेन परस्परं संयोगविशेषे सति गृहमित्येकशब्दप्रत्ययगोचरत्वमेवं देहात्मनोरपि संयोगविशेषादहं मनुष्य इत्यादिसामानाधिकरण्यव्यवहारगोचरत्वमित्यर्थः । सिद्धान्ती परिशेषेणेतरेतराध्यासं साधयितुमुक्तसंबन्धं प्रत्याचष्टे । नानित्यत्वेति । यत्संहतं तदनित्यं परार्थं च दृष्टं यथा वंशस्तम्भादि तथा यद्यात्मापि देहादिभिः संहत एव स्यात् तदा सो ऽप्यनित्यः परार्थश्च स्या,त्तच्चानिष्ट,मनित्यत्वे संघातात्मवादापत्तेः, परार्थत्वे चाचेतनत्वापत्तेरित्य-

Digitized by Google

र्थः । एवं परपक्षनिराकरणेनार्थोत्थितः स्वार्थश्चात्माभ्युपेय इत्युक्तं तदेवानुक्त्वास्तिकैः सुदूरमपि गत्वा सो ऽभ्युपगन्तव्य इत्यभिप्रेत्य स्वपक्षं साधयति । किं चेति । तेन परार्थेनानित्येन संघातेन लिङ्गेन परः संघातादन्यो विलक्षणस्तादृगात्मा नित्यः सिद्ध इति योजना । विमतः स्वविलक्षणशेषः संहतत्वाद्गृहवदित्यर्थः । ननु सत्यं संघातादचेतनादन्य आत्मा, तस्य संघातासंबन्धे अहं मनुष्य इति व्यवहारानुपपत्तेस्तत्संबन्धो वाच्यः, तत्र संयोगविशेषस्यानङ्गीकारे तादात्म्याध्यासः संबन्ध इत्यायातं, तथा च निरात्मवादापत्तिरिति प्रागुक्तं शिष्यः स्मारयति । तस्यासंहतस्य संघातसाक्षिणो देहे स्वस्मिन्नध्यस्ते इति योज्यं, देहस्य स्वातन्त्र्येण सिद्ध्यनङ्गीकारादित्यर्थः ॥ ४० ॥

(४१) देहे देहमात्रतयाध्यारोपितत्वेनासत्त्वानित्यत्वादिदोषप्रसङ्गो भवति तत्र निरात्मको देह इति वैनाशिकपक्षप्राप्तिदोषः स्याद् न स्वत एवात्मन आकाशस्येवासंहतत्वाभ्युपगमात्सर्वथासंहतः स चात्मेति न निरात्मको देहादिः सर्वः स्यात् ॥

तथा च तादृशे देहे ऽध्यारोपितत्वेन हेतुना आत्मनो देहमात्रतयासत्त्वानित्यत्वादिदोषप्रसङ्गो भवति, तत्र, एवं परस्पराध्यासाभ्युपगमे सतीति यावत् । अध्यस्तस्य मिथ्यात्वनियमाच्चिरात्मको देहो निर्देहकश्चात्मेति शून्यवादप्रसङ्ग इत्यर्थः । किं शून्यवादप्रसङ्गात्तादात्म्यावभासस्याध्यासनिबन्धनत्वं नेष्यते भवता, किं वा ऽऽधाराधेयभावादिसंबन्धस्य प्रामाणिकस्य तद्धेतोः सत्त्वादिति विकल्प्याद्यं निराकरोति गुरुः । न स्वत एवेति । अयमर्थः । देहादिर्हि रूपादिमत्त्वात्सावयवत्वाद्वा घटादिवज्जडो ऽपि संस्तद्विलक्षणश्चेतनात्मतयोपलभ्यते, ततश्च तप्तायःपिण्डवत्तस्य चेतनसंश्लेषो वक्तव्यः, तथात्मनः संघातसाक्षिणश्चैतन्यमात्रस्वभावस्य निरवयवस्याकाशवत्स्वतः परिच्छेदाशुच्यादिधर्मयोगासंभवाद् देहसंश्लेषकृतस्तस्मिंस्तत्प्रतिभास इति वक्तव्यं तथा चेतरेतरधर्मसंसर्गितयोभयोरितरेतराध्यासे ऽनुभवानुसारेणैव सिद्धे निरधिष्ठानस्यारोपस्यादृष्टचरत्वादारोपज्ञाने स्फुरतोर्मध्ये यदन्योपरागमन्तरेण कदापि स्वातन्त्र्येण न स्फुरति तत्स्वरूपेणैवारोपितं भवति, यथा गगनोपरक्ततया स्फुरन्मालिन्यादि, यत्तु तद्विपरीतं तदितरस्मिन्न स्वरूपेणारोपितं भवति, किं तु संसृष्टरूपेणैव, यथा शुक्तीदमंशादि रूप्यादौ, तत्रात्मनो देहाद्युपरागं विनापि सुषुप्त्यादौ स्वतः स्फुरणात्तस्य संघाते स्वरूपेण नाध्यासः, किं तु संसृष्टत्वेनैव देहादेस्तद्विपरीतत्वात्स्वरूपेणैवेति नानित्यत्वादिदोषप्रसङ्गश्चिदात्मनो नापि देहादेर्निरात्मकत्वप्रसङ्ग इति न शून्यवादप्रसङ्गावकाशः, देहस्य तु चैतन्याध्यासव्याप्ततया चिद्धर्माध्यारोपाधिष्ठानत्वमुपचर्यत इति न परस्पराध्यासपक्षे कश्चिद्दोष इति, स्वतो ऽसंहतस्यात्मनः सर्वत्र सर्वदा विद्यमानत्वाच्च संघातो निरात्मकः स्यान्नाप्यात्मानित्यत्वादिदोषवान्स्यादित्यर्थः ॥

आकाशस्येवेत्युक्तं दृष्टान्तं विवृणोति ।

(४२) यथा चाकाशं सर्वथासंहतमिति सर्वं न निराकाशं भवत्येवं तस्मान्न वैनाशिकपक्षप्राप्तिदोषः स्या,द्यत्पुनरुक्तं देहस्यात्मन्यसत्त्वे प्रत्यक्षादिविरोधः स्यादिति, तन्न, प्रत्यक्षादिभिरात्मनि देहस्य सत्त्वानुपलब्धे,र्नह्यात्मनि कुण्डे बदरं क्षीरे सर्पिस्तिले तैलं भित्तौ चित्रमिव च प्रत्यक्षादिभिर्देह उपलभ्यते, तस्मान्न प्रत्यक्षादिविरोधः । कथं तर्हि प्रत्यक्षाद्यप्रसिद्धात्मनि देहाध्यारोपणा देहे चात्मारोपणा ॥

यथा चाकाशमिति । स्वपक्षदूषणोद्धारमुपसंहरति । तस्मादिति । तदेवं दूषणोद्धारेणेतरेतराध्यासतादात्म्यव्यवहारहेतुं ग्राहयित्वा आद्यं विकल्पं निराकार्षीदिदानीं परमते दूषणमापादयितुं द्वितीयमुत्थापयति । यत्पुनरुक्तमिति । निराकरोति । तन्नेति । आत्मनि देहो ऽस्तीत्येवं प्रत्यक्षं तावन्न संभवति, चक्षुःस्पर्शनाभ्यां देहस्य गृहीतत्वे ऽप्यात्मनस्ताभ्यामगृहीतत्वात्तद्ग्रहणाभावे च तत्रेदमिति ग्रहणानुपपत्तेः, "पराञ्चि खानि" इति श्रुतेश्च । नात्मेन्द्रियविषयो ऽतो न तस्मिन् देहसंबन्धः प्रत्यक्षः । अत एव नानुमानादिगोचरत्वमपीत्यभिप्रेत्यानुपलब्धिं व्यतिरेकदृष्टान्तैर्विवृणोति । नहीत्यादिना । आद्यः प्रत्यक्षस्य द्वितीयो ऽनुमानस्य तृतीयो ऽर्थापत्तेः, नहि कुण्डे बदरवद्देहात्मानावेकदेशसंलग्नावुपलभ्येते इत्युक्ते भित्तिचित्रयोर्भेदेनानुपलम्भो ऽपि यथाधाराधेयभावस्तथा ऽत्रापीत्याशङ्क्याह । भित्तौ चित्रमिवेति । चित्राङ्कितायां भित्तेरुपलम्भवद्देहाकाराङ्कित आत्मा नोपलभ्यते, तथा सति मयि मनुष्यो देहो ऽयमस्तीति व्यवहारः स्या,न्न तु मनुष्यो ऽहं स्थूलो ऽहमित्यादिरिति समुदायार्थः । ननु सामान्यतो गृहीते विशेषतश्चागृहीते विषये विषयान्तराध्यासो दृष्टः, तदिहात्मनः प्रत्यक्षाद्यविषयत्वे कथं तत्रानात्माध्यारोपो ऽनात्मनि वा कथमात्माध्यारोपस्तस्यात्यन्तासत्त्वे इत्यभिप्रेत्य शिष्यः शङ्कते । कथं तर्हीति ॥ ४२ ॥

किमात्मनः स्फुरणाभावात्तत्राध्यासो न संभवतीत्युच्यते, किं वा विषयत्वेन स्फुरणाभावाद् गृहीतसामान्यांशागृह्यमाणविशेषांशाभावाद्वा, तत्र नाद्य इत्याह ।

(४३) नायं दोषः, स्वभावप्रसिद्धत्वादात्मनो, नहि कादाचित्कसिद्धावेवाध्यारोपणा न नित्यसिद्धाविति नियन्तुं शक्य,माकाशे तलमलाद्यध्यारोपणदर्शना,त्किं भगवन्देहात्मनोरितरेतराध्यारोपणा देहादिसंघातकृता ऽथवात्मकृतेति । गुरुरुवाच । यदि देहादिसंघातकृता यदि वात्मकृता किं तव स्या,दित्युक्तः ।

नायं दोषः स्वभावप्रसिद्धत्वादात्मन इति । स्वप्रकाशस्यात्मनः स्वमहिम्नैव स्फुरणादित्यर्थः । न द्वितीय इत्याह । नहीति । आकाशे ऽप्रत्यक्षे ऽपीति शेषः । अनैन्द्रियके ऽप्याकाशे ऐन्द्रियकभ्रमदर्शनादविषये ऽपि स्वतः स्फुरत्यात्मनि विषयाध्यासो नासंभावित इत्यर्थः । न चरमो, बहिरर्थेषु विद्यमानयोरपि सामान्यविशेषांशयोरग्निपैङ्गल्यादिवद्भ्रमादावध्यासं प्रत्यतन्त्रत्वात्स्वरूपमात्रेण स्फुरणमध्यासविरोध्याकारेणास्फुरणं चाधिष्ठानस्याध्यासे ऽपेक्ष्यते तदिहात्मनः स्वरूपतः स्फुरणे ऽप्यनृतजडदुःखान्तवस्त्वानात्मव्यावृत्ताकारेण वेदान्तजनितज्ञाने ऽध्यासविरोधिनि स्फुरणाभावादध्यासोपपत्तेर्न कश्चिद्दोष इति द्रष्टव्यम् । नन्वध्यासज्ञानाकारपरिणामः किमात्मन उतानात्मनः किं वोभयोः । नाद्यः । तस्य विकारित्वापत्तेरनित्यत्वादिदोषप्रसङ्गा,च्च द्वितीयो, ऽचेतनस्य तदनुपपत्ते,रत एव न तृतीय, इत्यभिप्रेत्य शिष्यः पृच्छति । किं भगवन्निति । शिष्याभिप्रायं श्रोतुकामो गुरुः कस्मिन् सति किं स्यादिति पृच्छति । यदीति । किं तत्र स्यात्तवेति शेषः । स्वाभिप्रायं शिष्यः प्रकटयतीत्याह । इत्युक्त इति ॥ ४३ ॥

अनात्मनः स्वरूपेणाध्यस्तत्वाच्चिःस्वभावस्य तस्याध्यासकर्तृतानुपपत्तेरात्मैव तत्कर्त्तेति स्वयमूहमानो ऽहमवभासस्यात्मप्रत्ययत्वात्संघाते च तद्दर्शनात्स चाहमन्यो वा ऽध्यासकर्त्तेत्युभयत्र दोषमुपन्यस्यति ।

(४४) शिष्य आह । यद्यहं देहादिसंघातमात्रस्ततो ममाचेतनत्वात्परार्थत्वमिति न मत्कृता देहात्मनोरितरेतराध्यारोपणा, ऽथाहमात्मा परो ऽन्यः संघाताच्चितिमत्त्वात्स्वार्थ इति मयैव चितिमता ऽऽत्मन्यध्यारोपणा क्रियते सर्वानर्थबीजभूतेत्युक्तो गुरुरुवाच । अनर्थबीजभूतां चेन्मिथ्याध्यारोपणां जानीषे माकार्षीस्तर्हि, नैव भगवन् शक्नोमि न कर्तुमन्येन केन चित्प्रयुक्तो ऽहं न स्वतन्त्र इति ॥

शिष्य आह । यद्यहमित्यादिना । आद्ये पक्षे चाध्यासकर्तुरभावात्संसारदर्शनं न स्यादिति भावः । द्वितीये स्वयमेव स्वानर्थाय प्रवृत्तत्वादनिर्मोक्षत्वापत्तिरिति भावः । चिन्मात्रात्मन्यज्ञानादनिर्वचनीयाविद्यावेशवशाच्चिदात्मैवाविद्यापरिकल्पिताहंकारादिस्थूलशरीरान्तमात्मत्वेनाभिमन्यमानो मिथ्याध्यासकर्त्तेति प्रसिद्धं [illegible] परमार्थतस्तु कूटस्थ एवात्माविद्यानिवृत्त्या च संसारनिवृत्तिर्निद्रानिवृत्त्येव स्वप्ननिवृत्तिरिति नावगच्छं किं चिदित्यभिप्रेत्य शनैः शनैस्तत्त्वार्थं शिष्यबुद्धिमारोहयति गुरुरित्याह । इत्युक्तो गुरुरित्यादिना । देहाद्यात्मभावनामनर्थार्थां चेदवगच्छसि किमिति तर्हि तां न मुञ्चसि स्वतन्त्रत्वात्त्वमेवेति तावत्संघातविलक्षणतां तस्य सूचयत्यनर्थबीजभूतामिति । साक्षिणः कूटस्थत्वाच्चानर्थसंबन्धः परमार्थत इत्युक्ताभिप्रायमनवबुध्यमानः शिष्यः प्राह । नैव भगवन्निति । हे भगवन्न कर्तुं नैव शक्नोमीत्यन्वयः । अनिच्छतो ऽपि मे निवृत्त्यभावान्नाहं स्वतन्त्रो ऽन्येन केन चित्प्रेर्यमाण एवेति मन्ये इत्यर्थः ॥ ४४ ॥

यद्येवं मन्यसे तदा चितिमत्त्वात्स्वार्थ इति मयैवेत्यादिनोक्तं मृषेति गुरुः स्वाभिप्रायं प्रकटयति ।

(४५) न तर्ह्यचितिमत्त्वात्स्वार्थस्त्वं येन प्रयुक्तो ऽस्वतन्त्रः प्रवर्त्तसे स चितिमान् स्वार्थः संघात एव त्वं, यद्यचेतनो ऽहं कथं सुखदुःखवेदनां भवदुक्तं च जानामि । गुरुरुवाच । किं सुखदुःखवेदनाया मदुक्ताच्चान्यस्त्वं किं वा ऽनन्य एवेति । शिष्य उवाच । नाहं तावदनन्यः, कस्माद्, यस्मात्तदुभयं कर्मभूतं घटादिकमिव जानामि, यद्यनन्यो ऽहं तेन तदुभयं न जानीयां, किं तु जानामि, तस्मादन्यः सुखदुःखवेदना विक्रिया च स्वार्थैव प्राप्नोति त्वदुक्तं चानन्यत्वे ॥

न तर्ह्यचितिमत्त्वादिति । ननु कथमहं संघातो ज्ञातृत्वादिति शिष्य आह । यद्यचेतन इति । भवदुक्तमिति संघात एव त्वमित्यादीत्यर्थः । मिथ्याध्यासप्रयुक्तकर्तृत्वाद्यवभासस्य देहेन्द्रियान्तःकरणगतचिदाभासाविविक्ततया तद्विशिष्टात्मविषयत्वात्तस्य चाविवेकविवेकाभ्यामात्मनः परतन्त्रत्वस्वतन्त्रत्वप्रतिभासगोचरत्वादविवेकनिराकरणेनास्य स्वरूपप्रतिष्ठा बुद्धिः संपाद्येत्यभिप्रेत्याचार्यः पृच्छतीत्याह । गुरुः किमित्यादिना । शिष्यः पुनः स्वानुभवमनुस्मरन्नुत्तरमाहेति दर्शयति । शिष्य इति । नाहं संघातानन्यस्तद्द्रष्टृत्वाद्यो यद्द्रष्टा न स तदनन्यो यथा घटद्रष्टेत्यर्थः । हेतोरप्रयोजकताशङ्कामनवकाशयति । यदीति । तेनेत्यनन्यत्वेन हेतुनेत्यर्थः । नहि स्वयं स्ववेद्यं किमपि भवति स्वात्मनि वृत्तिविरोधाज्जडस्य च स्वप्रकाशतानुपपत्तेः । स्वान्यद्रष्टृविषयत्वाभावे तदसिद्धिप्रसङ्गात्तद्व्यवहारलोपः प्रसज्येतेति भावः । उपनयनिगमने दर्श-

यति । किं तु जानामि तस्मादन्य इति । अनन्यत्वे विषयत्वानुपपत्तिरूपं बाधकमभिधाय स्वेतरभावात्संघातस्य स्वशेषित्वापत्तिं बाधकान्तरमाह । सुखदुःखेति । विक्रिया कर्तृत्वादिलक्षणेत्यर्थः । त्वदुक्तं चेति । असत्त्वानित्यत्वादिपूर्वोक्तदोषश्च प्राप्नोतीत्यर्थः ॥ ४५ ॥

॥ अथ बालरामायणाख्यनाटकम् ॥

रामं प्रति इतो विषनिष्यन्दिनीं विद्धेषि प्रसादामृतवीचिमालिनीं सुहृत्सु निवेशय दृशम् ।

क्षीराम्भाः परितोऽयमर्णवपतिर्जातं मृगाङ्कादिकं
पीयूषावधि रत्नजातममुतः किं चास्य तीरान्तरे ।
मुक्त्वा कल्पभृतः स्वयंवरसुरान् सौभाग्यदानाचणी-
लक्ष्म्याऽस्मिन् कुसुमावली वरयितुं वैकुण्ठकण्ठेऽर्पिता ॥ ३७ ॥

रामचन्द्र इतइतोपि दृश्यतां द्रष्टव्यम् ।

यं नित्यं भगवान् प्रदक्षिणयति भ्राम्यत्प्रभावेसर-
ध्वान्तश्रेणिविभक्तवासरनिशाविन्यासरेखं रविः ।
धत्ते कां चन काञ्चनश्रियमसौ मेरुर्गिरीणां गुरु-
र्देवैः सार्द्धमधित्यकामधिवसत्यस्यामरावामणीः ॥ ३८ ॥

सीतां प्रति ।

एतां पश्य पुरः सुमेरुशिखरे दम्भोलिपाणेः पुरीं
त्वत्कालोकनकौतुकात्तरलितैर्व्याप्तां पुरन्ध्रीजनैः ।
अस्यास्तोरणगोपुरप्रणयिभिर्नीमाङ्कितैर्मे गणैः
पौलस्त्यस्य विनापि वर्णरचनां न्यस्ता प्रशस्तिः स्थिरा ॥ ३९ ॥

रामः । हंहो पुष्पक इतोऽपि किञ्चिदुच्चैर्भव न तृप्यति चेतो दिव्यदर्शनकुतूहलस्य सर्वे विमानोर्ध्वगतिं नाटयन्ति ।

सीता । केअईकेसरपराअपडिरूवो पिङ्गघणसारपंसुपसरसरिच्छच्छवी मुत्ताहलविसदसोहासंणिवेसो णिव्वेसिदाणंदकंदो हिअअस्स कुदो उण एत्तावंतो जोण्हापवित्थरो * ।

रामः । मन्ये चन्द्रलोकसमीपे वर्तामहे ।

रत्नशेखरः । यथाह मारीचहरिणारिः ।

सद्यश्चन्दनपङ्कपिच्छिलमिव व्योमाङ्गणं कल्पयन्
पश्यैरावतकान्तदन्तमुशलच्छेदोपमेयाकृतिः ।
उन्मीलत्ययमच्छमौक्तिकलताप्रालम्बलम्बैः करैः
कान्तानां स्मरलेखवाचनकलाकेलिप्रदीपः शशी ॥ ४० ॥

सीतां प्रति ।

* केतकीकेसरपरागप्रतिरूपः पङ्कघनसारपांसुप्रसरसदृशच्छविर्मुक्ताफलविशदशोभासंनिवेशो निर्वेशितानन्दकन्दो हृदयस्य कुतः पुनरेतावान् ज्योत्स्नाप्रसरः ।

गौराङ्गीवदनोपमापरिचितस्तारावधूवल्लभः
सद्यो मार्जितदाक्षिणात्यतरुणीदन्तावदातद्युतिः ।
चन्द्रः सुन्दरि दृश्यतामयमसौ चण्डीशचूडामणिः
संबन्धी रघुभूभुजां मनसिजव्यापारदीक्षागुरुः ॥ ४१ ॥

अतः परमगम्या अस्मादृशां भुवः स च ब्रह्मलोक इति श्रूयते तत्र च किल ब्रह्मर्षिपरिषत्परिवादो परमेष्ठी गरिष्ठं तपस्तप्यते ।

रामः ।

लक्ष्मीं वक्षसि कौस्तुभस्तबकिनि प्रेम्णा करोत्यच्युतो
देहार्धे वहति त्रिविष्टपगुरुर्गौरीं स्वयं शङ्करः ।
शङ्के पङ्कजसंभवस्तु भगवानद्यापि बाल्यावधेः
सर्वाङ्गप्रणयां प्रियां कलयितुं दीर्घं तपस्तप्यते ॥ ४२ ॥

सर्वे स्मयन्ते ।

सीता । भअवं गअणपुप्फ पुप्फअ संपदं परिक्कमिअ अंबुरासिलंबी भव जेण त्थिरं जलणिहिजाणपत्तं सीमंतरेहं वाहणीतरुणीए अज्जउत्तप्पआवप्पसरपढममग्गं महासेदुबंधं पेक्खह्म * । विमानावतरणं नाटितकेन ।

रत्नशेखरः । स्वस्ति रामभद्राय साधयामि सम्प्रति इति निष्क्रान्तः ।

त्रिजटा । सीतां प्रति । णीलमणिकुट्टिमं विअ वरुणभवणंगणस्स णिग्गममग्गं विअ पाआलतलतिमिरचक्कवालस्स आलवालं विअ भुअणमहामहीरुहस्स गोट्ठिट्ठाणं विअ दिसाविलासिणीणं दप्पणं विअ गअणाभोअस्स महोअहिं पिअसहि पसदृयमाणायसारिअच्छी देक्ख † ।

लक्ष्मणः ।

यत्खातः सगरेण मर्त्यमरितं मन्दाकिनीं कुर्वता
पूर्णो यश्च भगीरथेन गिरिभिर्बद्धो यदार्येण च ।
तत्ते चित्रविचेष्टितं श्वशुरयोर्भर्तुश्च वारां निधिं
वीक्षस्वैनमधो निधाय नलिनच्छायामुषी चक्षुषी ॥ ४३ ॥

सीता । आदिकंदं लच्छीलदाकंदलीए उदयद्दिं हरचूडाचंदस्स वारीवंधमेरावणस्स महाकलसं पेऊसस्स पणमामि भअवंतमुद्दंतं ‡ ।

* भगवन् गगनाङ्गणपुष्प पुष्पक साम्प्रतं परिक्रम्याम्बुराशिलम्बी भव येन स्थिरं जलनिधियानपत्रं सीमन्तरेखां वारुणीतरुण्या आर्यपुत्रप्रतापप्रसरप्रथममार्गं महासेतुबन्धं पश्यामः ।

† नीलमणिकुट्टिममिव वरुणभवनाङ्गणस्य निर्गममार्गमिव पातालतलतिमिरचक्रवालस्यालवालमिव भुवनमहामहीरुहस्य गोष्ठीस्थानमिव दिशाविलासिनीनां दर्पणमिव गगनाभोगस्य महोदधिं प्रियसखि प्रसृतीकृतायतप्रसारिताक्षी पश्य ।

‡ आदिकन्दं लक्ष्मीलताकन्दल्या उदयाद्रिं हरचूडाचन्द्रस्य वारीबन्धमैरावणस्य महाकलशं पीयूषस्य प्रणमामि भगवन्तमुदन्वन्तम् ।

Digitized by Google

रामः ।

धत्ते यत्किलकिञ्चितैकगुरुतामेणीदृशां वारुणी
वैधुर्यं विदधाति दम्पतिदृशां यच्चन्द्रिकार्द्रं नभः ।
यत्पीयूषभुजां च मन्मथसुहृन्नित्यं वयः संपदां
यल्लक्ष्मीरधिदैवतं जलनिधेस्तच्चित्रमाचेष्टितम् ॥४४॥

लक्ष्मणः ।

वह्निं योऽम्भःसमिद्भिर्ज्वलयति जगतीद्वीपखण्डानि यस्य
स्वादिष्ठा यत्प्रसूतिस्त्रिदशयुवतयः श्रीः सुधा वारुणी च ।
सोऽपि क्ष्माभृद्भिरन्तर्निलीनैः शरपतनभयादद्रिभिः कुम्भपादै-
र्देवि त्वद्भर्तुराज्ञामिव वहति महाशैलसेतुच्छलेन ॥ ४५ ॥

सुग्रीवः । देवि मैथिलि किमपि महिमातिरेकस्त्रिभुवन-
जयपताकायते भगवतो भागीरथीवल्लभस्य ।

या स्त्रीणामधिदैवतं गिरिसुता तत्सोदरः सानुमान्
मैनाको रजताकरः सुतनयः शैलेश्वरो येन सः ।
पक्षच्छेदसमुद्यतेन्द्रकुलिशत्रासाद्विलीय स्थितः
सोऽप्येतस्य करालकुक्षिकुहरे पातालजम्बालिनि ॥ ४६ ॥

बिभीषणः ।

हेरम्बमज्जनविधाविह दानगन्धा-
द्द्वार्दन्तिनो धुतकरालकरं पतन्तः ।
पश्चादुपेत्य सपदि प्रमथैर्ध्रियन्ते
रुद्राङ्कुशैर्विरचिताङ्कुशकेलयोऽमी ॥ ४७ ॥

तिर्यग्विमानगतिनाटितकेन ।

सीता । अखण्डिताखण्डलकोदण्डमण्डलपडिरूवो कदरो
उण एसुद्देसो * ।

बिभीषणः ।

पश्यस्यये जलधिपरिखं मण्डलं सिंहलानां
विच्छिन्नांसं मणिमयभुवा रोहणेनाचलेन ।
दूर्वाकाण्डच्छविषु चतुरं मण्डनं यद्वधूनां
गात्रेष्वम्भो भवति गमितं रत्नतां शुक्तिगर्भैः ॥ ४८ ॥

किञ्च ।

जनश्च वाक्सुधासूतिर्मणिसूतिश्च रोहणः ।
नान्यत्र सिंहलद्वीपान्मुक्तासूतिश्च सागरः ॥ ४९ ॥

सीता । इह किल भअवं अगस्थिमहेसी णिवसदि † ।

रामः । इदं हि भगवतो रत्नाधिपतेरधित्यकायामाश्रमपदं
धर्माश्रमपदं पुनरये ।

सुग्रीवः ।

* अखण्डिताखण्डलकोदण्डमण्डलप्रतिरूपः कतरः पुनरेष उद्देशः ।

† इह किल भगवानगस्त्यमहर्षिर्निवसति ।

क्रान्त्वा स्फुटस्फुटितशुक्तिविमुक्तमुक्त-
मम्भोनिधिं विधुतविद्रुमविभागमेतत् ।
प्राप्ता वयं नवरसाञ्जनपुञ्जनीलं
कूलं कुलायगशकुन्ततमालमालि ॥ ५० ॥

सीतां प्रति ।

चटुचटुलनिमीलस्पर्शलीलातिमील-
न्नयनयुगमतङ्गारब्धनिद्राविनोदम् ।
शुकहरितनितम्बं पश्य वंशीवनान्तै-
रचलमखिलपृथ्वीमाल्यवन्माल्यवन्तम्

सीता । जहिं किल तुम्हाणं वासारत्तो अदिक्कन्तो * ।

रामः ।

आं वैदेहि ।

द्युतिजितकरवालः सूतवंशीप्रवालः
स्फुटितकुटजमालः स्पष्टनीलतमालः ।
इह हि गतमरालः केतकालीकरालः
शिखरिणि मम कालः सोऽभवन्मघकालः ॥ ५२ ॥

पुरो दर्शयन् ।

अयं स ते चण्डि शिखण्डिपुत्रको
गिरेस्तटात्तत्क्षणमूर्ध्वकन्धरः ।
निरीक्ष्य नौ स्नेहरसार्द्रया दृशा
प्रियां पुरस्कृत्य करोति ताण्डवम् ॥ ५३ ॥

सीता । पुत्त एहि उड्डिअ विमाणसिहरं समारुह † ।

रामः । अतिसुमुखी जानकी ।

सुग्रीवः । सीतां प्रति ।

गुणवति फणिवीरुद्वद्धपूगप्रकाण्डः
प्रचुरमरिचवल्लीवल्लरीकः पुरस्तात् ।
मलय इह महाद्रिर्नन्दनश्चन्दनाना-
मयमधिलुठवेलाश्लिष्टकङ्कोलयष्टिः ॥ ५४ ॥

सीता । रणरणअकारणं कामिमिहुणाणं माणिणीमाण-
गण्ठिणिट्ठवणो जत्तो किल समीरणो पअट्टदि ‡ ।

रामः । देवि यथा श्रुतवत्यसि ।

ये दोलाकेलिदानव्यतिकरगुरवो ये लतागर्भकाराः
कोदण्डाभ्यासविद्याविधिषु विजयिनो ये स्मरस्वेदवाराम् ।
सन्वन्तश्चैत्रमित्रं मलयशिखरिणस्ते विनिर्यान्त्यमुष्मादा-
कैलासं समीराः सुरतमहमहासाक्षिणो दाक्षिणात्याः ॥ ५५ ॥

* यत्र किल युष्माकं वर्षर्तुरतिक्रान्तः ।

† पुत्र एहि उड्डीय विमानशिखरं समारोह ।

‡ रणरणककारणं कामिमिथुनानां कामिनीमानग्रन्थिनिष्ठापनो यतः किल समीरणः प्रवर्तते ।

अपि च पुनः पश्य ।

रत्नप्रसूरिति समस्तसरित्सु कीर्त्या
वारां निधेर्भगवतः सुभगं कलत्रम् ।
अस्मिन्निरन्तरनितम्बिनि ताम्रपर्णी
चक्षुःपथं व्रजतु मौक्तिककामधेनुः ॥ ५६ ॥

अस्यां पुनरिदं सौभाग्यकारणम् ।

रोधोरेखे चन्दनारण्यरूपे
वारि स्वाद्यं नारिकेलाम्भसोऽपि ।
यच्चैवान्यः संभवो मौक्तिकानां
तेनाम्भोधेर्वल्लभा ताम्रपर्णी ॥ ५७ ॥

विमानवेगनाटितकेन रामः । पुरोऽवलोक्य ।

दन्तोलूखलिभिः शिलोञ्छिभिरियं कन्दाशनैः फेनपैः
पर्णप्राशनिभिः कुटीचरकुलैः काले च पक्वाशिभिः ।
नीवारप्रसृतिंपचैश्च परितः पूतं मुनेराश्रमं
पश्यन्ती भव पावना भगवतः पातुर्निधेरम्भसाम् ॥ ५८ ॥

हस्तमुद्यम्य ।

हंहो पुष्पक वायुवेग मुनिना धूमः पुरः पीयते
छायां मा कुरु कोऽप्ययं दिनमणावेकाग्रदृष्टिः स्थितः ।
दूरादत्र भव प्रदक्षिणगतिः स्थाणोरिदं मन्दिरं
किञ्चित्तिष्ठ तपस्विनस्तव पुरो यावत्प्रयान्त्यन्यतः ॥ ५९ ॥

सीता । अज्जउत्त होमोहिज्जंतहुदवहा विव्वरिज्जंतकथामुत्ता पठिज्जन्तबटुचरणा वणिज्जन्तधम्मसात्था उवदिसिज्जंतसमाधिमग्गा वरिवसिज्जंतअदिहिवग्गा पण्णसालासणिवेसं अम्हारीसाणं संसारगंठिणिट्ठवणा * ।

रामः । प्रकृष्टं हि तपः किमपि कामदुघम् । अग्रतो दर्शयन् ।

एते व्योमनि शोषयन्ति हरिणत्रासाञ्चितं चीवरं
संध्याचामविधौ कमण्डलुमिमं पश्यन्ति रिक्तं क्षणम् ।
भिक्षन्ते च फलान्यमी करपुटीपात्रे वनानोकहा-
नेषामर्घविधौ च सन्निधिगताः पुष्यन्त्यकाण्डे लताः ॥ ६० ॥

समंताद्दवलोक्य कारय चक्षुषी पारणामवलोकय कुम्भसंभवमुनेराश्रमतरून् ।

स्वाध्यायान्ते बटुपरिषदां येषु विश्रान्तिसौख्यं
लोपामुद्राकरपुटजलैः प्रत्यहं येऽवसिक्ताः ।
आगस्त्येऽस्मिन् विधुतरजसामाश्रमे पादपानां
केऽप्युत्कर्षो यदतिथिकृते सर्वकालं फलन्ति ॥ ६१ ॥

लक्ष्मणः । अति हि तपस्विसंकट भुवः ।

रामः । हंहो विमानराज कञ्चिदेकदेशमलङ्कुरु यावदहमग्निमारुतसंभवं मुनिमनुवर्ते । सर्वे विमानावरोहणं नाटयन्ति ।

सुग्रीवविभीषणौ । देव त्वय्यंतामेव मैत्रावरुणो विकङ्कतहस्तले भगवत्या लोपामुद्रया सममस्मान् वीक्षमाणास्तिष्ठति ।

ततः प्रविशत्यगस्त्यो लोपामुद्रा च ।

अगस्त्यः । भवति धर्मसुते लोपामुद्रे ।

प्रीतिस्निग्धैः खेचरैरर्च्यमानो
विभ्रश्यन्नोः सीम्नि वैमानिकस्त्वम् ।
सेतोर्बन्धाद्राक्षसानां निरोधा-
द्दिष्ट्या रामो दृश्यते पूर्णकामः ॥ ६२ ॥

रामः । उपसृत्य सपादोपग्रहम् ।

काशपुष्पप्रतीकाश वन्हिमारुतसंभव ।
मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते ॥ ६३ ॥

सर्वे प्रणमन्ति ।

अगस्त्यः ।

का दीयतां तव रघूद्वह सम्यगाशी-
र्निष्कण्टकानि विहितानि जगन्ति येन ।
आशास्महे ननु तथापि सह स्थविरै-
र्भूकाश्यपोपमसुतद्वितया वधूः स्यात् ॥ ६४ ॥

रामः । परमनुगृहीतं रघुकुलम् ।

लोपामुद्रा ।

एह्येहि वत्स रघुनन्दन रामचन्द्र
चुम्बामि तेऽद्य वदनं करचूचुकेन ।
सोढाः कथं कथय ते दशकण्ठबाणा-
श्छिन्नानि रावणशिरांसि कथं च तानि ॥ ६५ ॥

रामो लज्जते । अहो महानुभावापि लोपामुद्रा स्त्रीस्वभावसुलभं ब्रूते ।

लोपामुद्रा । रामं शिरसि स्पृष्ट्वा ।

अभ्युद्धृतैर्गिरिभिरम्बुधिसेतुहेतोः
श्वश्रूरियं भगवती कुपिता किमुर्वी ।
कुम्भोद्भवस्य कथितं न पुनः किमस्य
जाता यदेकचुलुके न चतुःसमुद्री ॥ ६६ ॥

अगस्त्यः । सुतपस्विनि लोपामुद्रे वसिष्ठप्रतिष्ठितो राज्याभिषेकसमयो नातिदूरवर्ती तद्विसर्ज्जय रामभद्रम् ।

लोपामुद्रा । गच्छ रामचन्द्र गच्छ सगरभगीरथसदृशो भव ।

सर्वे समुत्थाय विमानावरोहं नाटयन्ति ।

* होमोह्यमानहुतवहा विव्रियमाणकथामुक्ताः पठ्यमानबटुचरणा वर्ण्यमानधर्मशास्त्रा उपदिश्यमानसमाधिमार्गा वरिवस्यमानातिथिवर्गाः पर्णशालासंनिवेशमस्मादृशानामपि संसारग्रन्थिनिष्टपनाः ।

Digitized by Google

सीता । दिट्ठिआ संपदं वसुमदी दीसदि * ।

रामः । तथापि द्रविडाः ।

पर्णं नागरखण्डमार्द्रसुभगं पूगीफलैलास्तथा
कर्पूरस्य च यत्र कोऽपि चतुरस्ताम्बूलयोगक्रमः ।
देशः केरल एष केलिसदनं देवस्य शृङ्गारिण-
स्तद् दृष्ट्वा कुरु कोमलाङ्गि सफले द्राघीयसी लोचने॥६७॥

किञ्च ।

नेत्रयात्राशरक्षेपैस्त्र्यम्बकस्यापि ताडनी ।
भ्रूलता द्रविडस्त्रीणां द्वितीयं कामकार्मुकम् ॥ ६८ ॥

सुग्रीवः । दक्षिणतो दर्शयन् देव सप्तगोदावरीतीरे भीमो भगवान् भर्गः । प्रणम्यतामयम् ।

रामः ।

नमो नागावलीबद्धमहाधवलमूर्तये ।
जटापल्लवकम्राय हरचन्दनशाखिने ॥ ६९ ॥

सर्वे प्रणमन्ति ।

रामः ।

वाक्सत्त्वाङ्गसमुद्भवैरभिनयैर्नित्यं रसोल्लासतो
वामाङ्ग्यः प्रणयन्ति यत्र मदनक्रीडामहानाटकम् ।
यत्रान्ध्रास्तव दक्षिणेन त इमे गोदावरीस्रोतसां
सप्तानामपि वार्निधिप्रणयिनां द्वीपान्तराणि स्थिताः॥७०॥

किं वा ।

हरनेत्राग्निदग्धस्य केतौ मकरलक्ष्मणः ।
दृष्टिरन्ध्रपुरन्ध्रीणां सज्जा संजीवनौषधिः ॥ ७१ ॥

विभीषणः । उभयकूलप्ररूढनारिकेलनिकरक्रमुककुलपाली-क्षिप्ता कावेरी सरिदियम् ।

रामः ।

कावेरी कबरीव भामिनि भुवो देव्याः पुरो दृश्यतां
पूगैर्नागलताश्रितैरुपदिशत्याश्लेषविद्यामिव ।
कर्णाटीजनमज्जनेषु जघनैर्यस्याः पयः प्लावितं
पीत्वा नाभिगुहाभिरात्तरुचिभिः प्राचीं दिशं नीयते॥७२॥

किञ्च ।

कर्णाट्यो यत्रयत्रैव निक्षिपन्ति दृशो दिशि ।
विक्षेपावसरः कामस्तत्रतत्रैव धावति ॥ ७३ ॥

सुग्रीवः । भरताग्रजायमग्रे महाराष्ट्रविषयः ।

रामः ।

यत् क्षेमं त्रिदिवाय वर्त्म निगमस्याङ्गं च यत्सप्तमं
स्वादिष्ठं च यदैक्षवादपि रसात्स्वस्रुश्च यद्वाङ्मयम् ।
तद्यस्मिन् मधुरं प्रसादि रसवत् कान्तं च काव्यामृतं
सोऽयं सुभ्रु पुरो विदर्भविषयः सारस्वतीजन्मभूः ॥ ७४ ॥

किञ्च ।

रतिविद्याविदग्धानां विभ्रमोल्लेखलम्पटः ।
नित्यं कुन्तलकान्तानां किङ्करो मकरध्वजः ॥ ७५ ॥

सीता । जहिं उप्पणा मे पिदामहससुरस्स घरिणी इंदुमदी * ।

त्रिजटा । संस्कृतमाश्रित्य ।

कौतुककेलिकलस्य किल भवति सखी सुखधाम ।
का च सुता शशितिलकस्य विन्ध्यमहीधरधाम ॥

सीता । संस्कृतमाश्रित्य । नर्मदा ।

त्रिजटा । इयं णम्मदा दीसदि † ।

सीता । इदो अम्हाणं अज्जसुमंतो णिवुत्तो ‡ ।

रामः । अपवार्य ।

अव्यस्तदक्षकरयन्त्रनिपीडितानां
धाराम्भसां स्मरसि मज्जनकेलिकाले ।
सुभ्रु त्वया निजकुचावरणैकयोग्य-
मत्राब्जवल्लिदलमावरणाय दत्तम् ॥ ७६ ॥

किञ्च ।

तदिह कलहकेलौ सैकते नर्मदायाः
स्मरसि सुतनु कच्चिद्वो पराधीनसुप्तम् ।
यदुक्तं चितिमतश्चितिमदर्थत्वं नोपपद्यते समत्वादिति तत्र व्यभिचारं शङ्कते ।

(४७) ननु चितिमत्त्वे समे ऽपि भृत्यस्वामिनोरन्योन्यार्थत्वं दृष्टं, नैव,मग्नेरुष्णप्रकाशवत्तव चितिमत्त्वस्य विवक्षितत्वा,त्प्रदर्शितश्च दृष्टान्तः प्रदीपप्रकाशयोरिवेति, तत्रैवं सति स्वबुद्ध्यारूढमेव सर्वमुपलभसे ऽग्न्युष्णप्रकाशतुल्येन कूटस्थनित्यचैतन्यस्वरूपेण, यदि चैवमात्मनः सर्वदा निर्विशेषत्वमुपगच्छसि किमित्यूचिवान् सुषुप्ते विश्रम्यविश्रम्य जाग्रत्स्वप्नयोः दुःखमनुभवामि, किमयमेव मम स्वभावः किं वा नैमित्तिक इति च, किमसौ व्यामोहो ऽपगतः किं वा नेति —

नन्विति । स्वामिचैतन्यस्य भृत्यदेह एवाचेतनभाग उपकरोति न तन्निरपेक्षं चिन्मात्रं, तथा भृत्यचैतन्यस्य स्वामिदेह एवाचेतनभाग उपकरोति न चैतन्यमात्रं, तथा ऽदर्शनादित्यभिप्रेत्य परिहरति । नैवमग्नेरिति । तदेवं चेतनस्यानन्यशेषत्वे सति तस्येश्वरात्मत्वं सिद्धमतः कूटस्थ एवात्मेत्युपसं-

Digitized by Google

हरति । तच्चैवं सतीति । चितिमतः स्वार्थत्वमेव न परार्थत्वं सर्वदेति स्थिते सतीत्यर्थः । स्वबुद्ध्यारूढमेव स्वाध्यस्तान्तःकरणवृत्तिकवलितमेव सर्वमध्यात्माधिभूताधिदैवं संघातमन्युब्धप्रकाशवत्स्वरूपभूतेन निर्विकारनित्यचैतन्यस्वभावेनोपलभसे त्वमतो नित्यमुक्तो ऽहं न संघाताध्यासकर्त्ता न मे संघातधर्मसंसर्गो ऽस्तीति स्वस्थो भवेत्यर्थः । ओमिति चेत्स ब्रूयात् तदा गुरुरेवं ब्रूयादित्याह । यदि चैवमिति । मोहादेवाब्रवमिति चेत्स ब्रूयात्तदा तं प्रति गुरुणा वक्तव्यमाह । किमसाविति ॥ ४७ ॥

ननु संसार्यहं दुःखी नित्यमुक्तस्वभावादीश्वरादन्य इत्यादिभ्रमहेतुर्यो व्यामोहो ऽविवेकलक्षण आसीन्मम स इदानीं त्वत्प्रसादाद्विवृत्तः परं तु कूटस्थचैतन्यस्वरूपेणेति यदिदं मम कूटस्थत्वमूचिवान् भवान् तत्र प्रतिविषयं ज्ञानकर्तृत्वात्कथं कूटस्थचित्स्वभावतेति संशयो जायत इति शिष्यप्रश्नमुत्थापयति ।

(४८) इत्युक्तः शिष्य उवाच । भगवन्नपगतो व्यामोहस्त्वत्प्रसादात्, किं तु मम कूटस्थतायां संशयः, कथं, शब्दादीनां स्वतः सिद्धिर्नास्ति, अचेतनत्वाद्, शब्दाद्याकारप्रत्ययोत्पत्तेस्तु तेषां, प्रत्ययानामितरेतरव्यावृत्तविशेषणानां नीलपीताद्याकारवत्तायाः स्वतः सिद्ध्यसंभवात्, तस्माद्बाह्याकारनिमित्तत्वं गम्यत इति बाह्याकारत्ववद् शब्दाद्याकारत्वसिद्धिः ॥

इत्युक्तः शिष्य उवाचेति । अपगतो मोह इत्यनुषङ्गः, संघातसाक्षिणो निर्विकारस्योक्तत्वात्कथं संशय इति तन्मुखेनैव कूटस्थतामवगमयितुं गुरुः पृच्छति । कथमिति । संशय इत्यनुषङ्गः । शिष्यः स्वविदितमर्थं निवेदयति । शब्दादीनामिति । शब्दस्पर्शरूपरसगन्धास्तावद्विषयाः प्रसिद्धास्तेषामचिद्रूपत्वात्स्वतः स्फुरणं नास्तीत्यविवादं, कथं तर्हि तेषां स्फूर्त्तिरिति तदाह । शब्दाद्याकारप्रत्ययोत्पत्तेस्तु तेषामिति । सिद्धिरित्यनुषङ्गः । शब्दाद्याकाराणां प्रत्ययरूपत्वाच्च स्वातिरिक्तग्राह्यतेति विज्ञानवादिमतमाशङ्क्य मध्ये निराकरोति । प्रत्ययानामित्यारभ्यसिद्धिरित्यन्तेन । इतरेतरव्यावृत्तानि विशेषणानि शब्दाद्याकाररूपाणि येषां ते तथा हेतुगर्भविशेषणं, प्रकाशस्वभावत्वात्प्रत्ययानां स्वत एव परोपरागं विना नीलपीताद्याकारवत्ताया असंभवाच्च प्रत्ययमात्रस्वरूपाः शब्दादय इत्यध्याहारेण योजना । परमतनिराकरणमुपसंहरति । तस्मादिति । बाह्य आकारः शब्दादिरूप इन्द्रियसंसृष्टो ऽर्थो निमित्तं येषां प्रत्ययानां तेषां भावो बाह्याकारनिमित्तत्वमिति विग्रहः । इति यतस्तस्मात्प्रत्ययानां बाह्याकारवच्छब्दाद्याकारत्वसिद्धिरित्यन्वयः । चैतन्यात्पृथगाकारवन्तो ये शब्दादयः प्रत्यक्षव्यवहारयोग्यास्तत्कृताकारत्वसिद्धिः प्रत्ययानां न स्वत इत्यर्थः ॥ ४८ ॥

एवं शब्दादीनां विषयाणां स्वव्यतिरिक्तप्रत्ययग्राह्यत्वं चेद्व्यवस्यसि तर्हि प्रत्ययस्वरूपे विशेषाभावसिद्धेः कूटस्थत्वसिद्धिरित्याशङ्क्याह ।

(४९) तथा प्रत्ययानामप्यहंप्रत्ययालम्बनवस्तुभेदानां संहतत्वादचैतन्योपपत्तेः स्वार्थत्वासंभवात्स्वरूपव्यतिरिक्तग्राहकग्राह्यत्वेन सिद्धिः शब्दादिवदेवासंहतत्वे सति चैतन्यात्मकत्वात्स्वार्थो ऽप्यहंप्रत्ययानां नीलपीताद्याकाराणामुपलब्धेति विक्रियावानेव कूटस्थ इति संशयः । तं गुरुरुवाच । न युक्तस्तव संशयः ॥

तथा प्रत्ययानामपीति । नहि विषयसंसृष्टतया भासमाना विषयाकाराः प्रत्ययाः स्वप्रकाशचैतन्यरूपा भवन्त्यागमापायित्वात्किं त्वन्यसाक्षिका एवेत्यभिप्रेत्य तत्स्वरूपविशेषं विशेषणनिर्देशेन कथयत्यहंप्रत्ययालम्बनवस्तुभेदानामिति । अहंप्रत्ययालम्बनं वस्त्वहंकरणं तस्य भेदा वृत्तिविशेषास्तदात्मकानामित्यर्थः । विमताः प्रत्यया न चित्स्वभावाः संहतत्वात्संहतत्वं चागमापायित्वात् शब्दादिवद्देहादिवद्वा तथा विमताः स्वातिरिक्तग्राहकग्राह्या अचेतनत्वाच्छब्दादिवदेवेत्यर्थः । अतः परमाकाराभावात्प्रत्ययोत्पत्त्याद्यवस्थासाक्षी निर्विशेषश्चिदात्मा सिद्ध एवेति कुतः कूटस्थतायां संशय इति न वाच्यमित्याहासंहतत्वे सतीति । यद्यपि संघातादन्यश्चैतन्यस्वभावः स्वार्थ एवात्मा तथाप्यहंप्रत्ययानामन्तःकरणवृत्तीनां नीलपीताद्याकाराणामुपलब्धोपलब्धिकर्त्ता इति हेतोर्विक्रियावानेवायं कथं कूटस्थ इति मे संशय इत्यर्थः । एवं चेद्दृश्यदर्शने विवेचयसि न तर्हि ते संशयावकाश इति परिहरति । तं गुरुरुवाच न युक्त इत्यादिना ॥ ४९ ॥

संशयायोगे हेतुमाह ।

(५०) यतस्तेषां प्रत्ययानां नियमेनाशेषत उपलब्धेरेवापरिणामित्वात्कूटस्थत्वसिद्धौ निश्चयहेतुमेवाशेषचित्तप्रचारोपलब्धिं संशयहेतुमात्थ, यदि हि तव परिणामित्वं स्यादशेषस्वविषयचित्तप्रचारोपलब्धिर्न स्याच्चित्तस्येव स्वविषये यथा चेन्द्रियाणां स्वविषयेषु न च तथात्मनस्तव स्वविषयैकदेशोपलब्धिरतः कूटस्थतैव तवेति । तथाह्युपलब्धिर्नाम धात्वर्थो विक्रियैवोपलब्धुः कूटस्थात्मता चे-

ति विरुद्धं, न धात्वर्थविक्रियायामुपलब्ध्य उपचाराद्यो हि बोद्धुः प्रत्ययः स धात्वर्थो विक्रियात्मकः ॥

यत इति । यः परिणामी चित्तादिस्तस्य क्रमेण स्वविषयग्राहकत्वमकृत्स्नग्राहकत्वं सकलस्वविषयावस्थाग्राहकत्वं च दृष्टं तद्व्यापकमात्मनः प्रत्ययसाक्षिणः सकाशाद्व्यावर्त्तमानं स्वव्याप्य परिणामित्वमपि तस्य व्यावर्त्तयतीति व्यापकविरुद्धोपलब्धेः कूटस्थत्वसिद्धौ निश्चय एव युक्तो न संशय इत्यर्थः । उक्तमेवार्थं व्यतिरेकव्याप्तिं विवृण्वन्नुपपादयति । यदि हीति । इदानीं प्रकृतिप्रत्ययार्थपर्यालोचनयोपलब्धा कूटस्थ इति विरुद्धमिति शिष्यः शङ्कामुद्भावयति। तत्राहेति। उपोपसर्गस्य लभतेर्धातोः कर्त्तरि तृचो विधानाद्धात्वर्थस्य च क्रियात्वात्क्रियायाश्चोत्पत्तिविनाशवत्त्वात्तत्कर्त्तरि कथं विक्रियाराहित्यमित्यर्थः। क्रियैव हि प्रकृतिभूतधात्वर्थः कर्त्तैव च प्रत्ययार्थः सर्वत्र मुख्य इति नास्ति नियमो गडिवद्गनैकदेशे सविता प्रकाशते सविता प्रकाशयतीत्यत्र व्यभिचारादित्यभिप्रेत्य प्रकृते धात्वर्थकर्तृवचनस्योपलब्धिशब्दस्य गौणार्थत्वमेव युक्तमित्याह । गुरुर्न धात्वर्थेति । संग्रहं विवृणोति । यो हि बोद्धुरिति । बोद्धुर्बुद्धिपरिणामः स प्रतिविषयमयति गच्छतीति प्रत्ययः । ननु बुद्धेरन्तःकरणस्य द्रव्यत्वात्तत्परिणामस्य च मृत्परिणामघटादिवद् द्रव्यत्वोपपत्तेः कथं क्रियात्वमिति तत्राह । स धात्वर्थो विक्रियात्मक इति । विशिष्टक्रियात्मक इत्यर्थः । नहि मृदादिवत्स्वाकारतिरोधानेनान्तःकरणपरिणाम इष्यते, किं तु अलोकाकारालोकवद्वा संकोचविकासरूपेण, तादृशस्तु परिणामः परिणामिचेष्टारूपत्वात्क्रियेति वक्तुं युक्त इत्यभिप्रायः ॥ ५० ॥

तस्याः क्रियाया उपलब्धिशब्दोपचारे निमित्तमाह ।

(५१) आत्मन उपलब्ध्याभासफलावसान इत्युपलब्धिशब्देनोपचर्यते, यथा छिदिक्रिया द्वैधीभावफलावसानेति धात्वर्थेनोपचर्यते तद्वदित्युक्तः शिष्य आह । ननु भगवन्ममोक्तकूटस्थत्वप्रतिपादनं प्रत्यसमर्थो दृष्टान्तः । कथम् ॥

आत्मन इति । आत्मनः स्वरूपभूता योपलब्धिः सत्यज्ञानं विज्ञानघन एवेत्यादिश्रुतिसिद्धा तस्या आभासो वन्हिव्याप्तायःपिण्डस्य वह्न्याकारत्ववच्चिदात्मव्याप्ततया चिच्छायापत्तिः तदेव फलं तदवसानस्तत्पर्यन्त इति कृत्वोपलब्धिशब्देनोपचर्यते इत्यर्थः । तत्रानुकूलं दृष्टान्तमाह । यथेति । अयं भावः । अर्थप्रकाशो ह्युपलब्धिशब्दार्थः प्रसिद्धः, स नार्थधर्मो ऽर्थानां जडत्वादित्युक्तं, नाप्यन्तःकरणधर्मस्तस्यापि करणत्वाच्चैतन्यप्रकाशाश्रयत्वायोगात्, तथापि स्वयंप्रकाशमाननित्यचैतन्यात्मन्यव्यवधानेनाहंतयैवाध्यासात्स्वसत्तायां प्रकाशाव्यतिरेकादात्मचैतन्यव्याप्तस्तत्तदर्थाकारा वृत्तीः कुर्वदन्तःकरणमुपलब्धा कर्त्ता प्रमाता भोक्तेति च प्रमातृत्वकर्तृत्वभोक्तृत्वानुभवितृत्वव्यपदेशास्पदं भवति, यथा ऽयःपिण्डो दहति प्रकाशयतीति तद्वद्, आत्मा त्वाकाशवदविक्रियत्वात्कूटस्थो ऽपि संसर्गादन्तःकरणगतस्वाभासाविवेकात्तद्धर्मैस्तदवस्थाभिश्च मिथ्यैव व्यपदिश्यते, चतुष्कोणो वर्त्तुलः कृशः स्थूलो जातो नष्टो ऽग्निरिति यथा ऽयःपिण्डगताभासाविवेकादग्निर्व्यपदिश्यते तद्वत् । तस्मादन्तःकरणस्य विकारिणः कर्तृत्वे ऽप्युपलब्धेः क्रियमाणत्वाभावादुपलब्धिस्वरूपस्यात्मनः सिद्धं कूटस्थत्वमिति । तत्रोक्तमर्थं विशदीकर्तुं दृष्टान्तस्य दार्ष्टान्तिकाननुरूपत्वं शङ्कयतीत्युक्तः शिष्य आह नन्विति । उभयत्र प्रकृतिप्रत्ययार्थयोरौपचारिकत्वस्योक्तत्वात्कथं दृष्टान्तासामर्थ्यमिति गुरुराह । कथमिति ॥ ५१ ॥

उपचरितत्वे ऽप्युपलब्धेर्विक्रिया दुर्वारा यतः छिदिक्रियासाध्यद्वैधीभावाख्यं फलं विक्रियैवमुपलब्धिफलस्यापि फलत्वाविशेषात्साध्यतया विक्रियात्वोपपत्तेः कथमुपलब्धा कूटस्थः स्यादिति शिष्यो दृष्टान्तासामर्थ्यमुपपादयति ।

(५२) छिदिः छेद्यविक्रियावसानोपचर्यते यथा धात्वर्थेन, तथोपलब्धिशब्दोपचरितो ऽपि धात्वर्थो बोद्धृप्रत्यय आत्मोपलब्धिविक्रियावसानश्चेन्नात्मनः कूटस्थतां प्रतिपादयितुं समर्थः । गुरुरुवाच । सत्यमेवं स्याद्यद्युपलब्ध्युपलब्ध्रोर्विशेषो, नित्योपलब्धिमात्र एव ह्युपलब्धा न तु तार्किकसमय इवान्योपलब्धिरन्य उपलब्धा । ननूपलब्धिफलावसानो धात्वर्थः कथमित्युच्यते ॥

छिदिः छेद्येत्यादिना । छिदिक्रियायाः छेद्यविक्रियावसानत्ववद् बौद्धो धात्वर्थ उपलब्धिशब्दोपचरितो ऽपि आत्मोपलब्धिविक्रियावसानश्चेदिति योजना । छिदिक्रियायाः छेत्तृकृतद्वैधीभावपर्यन्तत्ववदात्मकृतोपलब्धिविकारपर्यन्त उपलब्धिर्धात्वर्थश्चेदित्यर्थः । उपलब्धेः स्वरूपेणैव फलत्वं विवक्षित्वा दृष्टान्ताननुगुणत्वमध्यवस्यसि किं वोपाधिवशादिति विकल्प्याद्यं दूषयति । सत्यमेवमिति । विशेषो भेदः, नित्यशब्देन बौद्धमताद्व्यावृत्तिः । मात्रपदेन भेदाभेदमतात् । प्रज्ञानघन एव प्रज्ञानं ब्रह्मेत्यादिश्रुतिप्रसिद्धिहेतुमाह । हीति । एवकारव्यावर्त्यमाह । न तु तार्किकेति । यद्येवमात्मतत्त्वं कथं तर्हि धात्वर्थफलत्ववचनमिति शिष्यः शङ्कते । नन्विति ॥ ५२ ॥

Digitized by Google

उपाधिवशात्फलत्वोपचार उपलब्धेर्न स्वरूपत इत्युक्तं स्मारयन् पक्षान्तरमविरुद्धमित्याह गुरुः ।

(५३) शृणु, उपलब्ध्याभासफलावसान इत्युक्तं किं न श्रुतं तत् त्वया, न त्वात्मा विक्रियोत्पादनावसान इति मयोक्तम् । शिष्य उवाच । कथं तर्हि कूटस्थे मय्यशेषस्वविषयचित्तप्रचारोपलब्धृत्वमित्यात्थ । तं गुरुरुवाच । सत्यमवोचं तेनैव कूटस्थतामब्रवं तव ॥

शृण्विति । अन्तःकरणवृत्तीनामाविर्भावतिरोभावधर्मवत्त्वात्तद्विशिष्टतया स्फुरणमङ्गीकृत्य विषयस्थचैतन्याभेदेन प्रकाशमानवृत्तितत्स्थाभासाश्रयतया भासमान आत्मा प्रमातेत्युच्यते, कर्मेन्द्रियाण्यधिष्ठाय क्रियावत्प्राणप्रधानान्तःकरणलिङ्गगताभासाविवेकात्कर्त्तेति चोच्यते, शुभाशुभकर्मोपस्थापितान्तःकरणपरिणामविशेषं तदविवेकात्स्वगतमिव पश्यन्नात्मा भोक्तेत्युच्यते, एतां सर्वामेव चित्तविलासावस्थां स्वरूपचैतन्यानुगममात्रेण साक्षादवभासयन्निव भासमानो ऽलुप्तप्रकाशो ऽसंदिग्धो ऽविपर्यस्तो ऽविषयः साक्षी उपलब्धा ज्ञातेति च व्यपदिश्यते, वृत्तिविनाशात्तद्गतचिदाभासस्यापि विलयात्तत्संस्कारसंभवे सति समयान्तरे पूर्वावगतविषयाकारस्मृतिवृत्त्युदये तद्गताभासद्वारा स एव स्मर्त्तेति व्यपदिश्यते, स एव तु चिदात्मा समस्तकार्यकारणप्रपञ्चोपलक्षितस्तदनुवृत्तसत्ताभेदेन सर्वाधिष्ठानमित्युच्यते, कारणोपाध्यविवेकेनालुप्तज्ञानशक्तितया चान्तर्यामिशब्दवाच्यो ऽपि भवति । तस्मात्केन चिदुपाधिना क्व चित्तथातथा व्यवहारास्पदत्वेनाविद्यादशायां भासमानोप्यात्मा स्वरूपतो निर्विकारो निर्धर्मको ऽसङ्गः कूटस्थ एवेत्येतत्सर्वमभिप्रेत्योक्तमर्थं प्रश्नमुत्थाप्योपसंहरति । शिष्यः कथं तर्हि इत्यारभ्य तवेत्यन्तेन । तेनैवाशेषस्वविषयचित्तप्रचारोपलब्धृत्वेनेत्यर्थः । अतः कुतस्तत्र तवानाश्वासो जायत इत्यभिप्रायः ॥ ५३ ॥

आत्मनो नित्यनिवृत्ताशेषस्वगतविशेषतया कूटस्थत्वे ऽवबोधिते ऽवबुद्धस्वरूपः शिष्यः स्वभ्रान्तिबीजमपश्यन् पृच्छति ।

(५४) यद्येवं भगवन् कूटस्थनित्योपलब्धिस्वरूपे मयि शब्दाद्याकारबोद्धृप्रत्ययेषु च मत्स्वरूपोपलब्ध्याभासफलावसानवत्सूत्पद्यमानेषु कस्त्वपराधो मम, सत्यं नास्त्यपराधः, किं त्वविद्यामात्रस्त्वपराध इति प्रागेवावोचं, यदि भगवन् सुषुप्त इव मम विक्रिया नास्ति कथं स्वप्नजागरिते, तं गुरुरुवाच । किं त्वनुभूयेते त्वया सततं, बाढमनुभवामि, किं तु विच्छिद्यविच्छिद्य न तु सततं, तं गुरुरुवाच । तर्ह्यागन्तुके त्वेते न तवात्मभूते ॥

यद्येवमिति । अथ वा बोद्धृप्रत्ययाश्चेदुपलब्ध्याभासफलावसाना जायन्ते तदा तानात्मनि नित्यं पश्यतो मम को ऽपराध इत्याक्षिपति । यद्येवमिति । प्रश्नस्योत्तरमाह । सत्यं नास्त्यपराध इति । कथं तर्हि किं न श्रुतं त्वयेति मामात्थेति शङ्कते । किं त्विति । जिज्ञासोस्तव प्रेक्षावत उक्तार्थानवधानं नागन्तुकदोषनिमित्तकं संभाव्यत इत्यभिप्रेत्य मयोक्तमिति परिहरत्यविद्येति । यद्वा ऽऽक्षेपं परिहरति । सत्यमिति । नास्त्यपराधस्तव स्वानुभवाप्रच्छादकत्वात्कथं तर्हि त्वयोक्तं ममानाश्वासो जात इति पृच्छति । किं त्विति । अन्यो ऽस्त्यपराध इत्युत्तरमाहाविद्येति । तदेवं यथावदात्मनः स्वरूपानवभासाविज्ञानिबन्धन एव संसारित्वमधिकृतत्वमित्यात्मगतधर्मावभासो न परमार्थो ऽस्तीत्युपपत्तितो ऽवगतमात्मनः कूटस्थनित्यत्वमिदानीमवस्थात्रयसाक्षितया ऽवस्थाधर्मास्पर्शित्वेन पुनः कूटस्थतां प्रतिपादयितुमाक्षेपमुत्थापयति । यदि भगवन्निति । स्वप्नजागरिते ममेति शेषः । स्वचैतन्यप्रकाश्यत्वाच्च तव स्वभावभूते ते अवस्थे इति परिहरति । तं गुरुराहेति । सततमिति । यदा ते भवतस्तदा नाननुभूयमाने भवत इत्यर्थः । अनुभूयमानत्वमङ्गीकृत्य सततानुभवशब्दार्थमजानानः शिष्य आह । बाढमिति । तं गुरुराह । आगन्तुके त्वेते इति । सुषुप्तावात्मस्वरूपे भासमाने ऽपि तयोरनवभासादात्मनः स्वरूपभूते ते अवस्थे अतो विच्छिद्यविच्छिद्यानुभूयेते त्वया ते इत्यर्थः ॥ ५४ ॥

विमते अनात्मभूते व्यभिचारित्वाद्वस्त्रादिवदित्युक्त्वा व्यतिरेकेणैतदेव द्रढयति ।

(५५) यदि तवात्मभूते चैतन्यस्वरूपवत्स्वतः सिद्धे संतते एव स्यातां, नहि यस्य यत्स्वरूपं तत्तद्व्यभिचारि दृष्टं, स्वप्नजागरिते तु चैतन्यमात्रत्वाद्व्यभिचरतः, सुषुप्ते चेत्स्वरूपं व्यभिचरेत्तन्नष्टं नास्तीति बाध्यमेव स्यादागन्तुकानामतद्धर्माणामुभयात्मकत्वदर्शनात् । यथा धनवस्त्रादीनां नाशो दृष्टः स्वप्नभ्रान्तिलब्धानां त्वभावो दृष्टः । नन्वेवं भगवन् चैतन्यस्वरूपमप्यागन्तुकं प्राप्तं स्वप्नजागरितयोरिव सुषुप्ते ऽनुपलब्धेरचैतन्यस्वरूपो वा स्यामहं, न, पश्य तदनुपपत्तेश्चैतन्यस्वरूपं चेदागन्तुकं पश्यसि, पश्य नैतद्वर्षशतेनाप्युपपत्त्या कलयितुं शक्नुमो वयमन्यो वा ऽचेतन्यो ऽपि ॥

यदीत्यादिना । चैतन्यमात्रत्वादिति । चित्स्वभावादित्यर्थः । यत्र यदनुभवगोचरस्तत्रैव चेत्तदानुभूयते तदा तस्य ध्वंसो बाधो वा स्यादुभयथापि तस्य नाधिष्ठानधर्मत्वमिति

Digitized by Google

सदृष्टान्तमुपपादयति । सुषुप्ते चेदित्यादिना । नाशो ध्वंसः अभावो बाधः तत्र मिथ्या ऽतिप्रसङ्गं शङ्कते । नन्वेवमिति । दृष्टिश्रुतिमतिविज्ञातिलक्षणे हि स्वप्नजागरिते दृष्ट्यादिमच्चैतन्यमेव, अतो यदि सुषुप्ते स्वप्नजागरिते नोपलभ्येते इति तत्र ते न स्तस्तदा चैतन्यमेव सुषुप्ते नास्तीत्यात्मा आगन्तुकचैतन्यो वा स्यादचैतन्यस्वरूपो वा गत्यन्तराभावादित्यर्थः । गुरुः परिहरति । नेति । नैवं वक्तुमुचितमित्यर्थः । कथमिति चेत्तत्राह । पश्येति । पर्यालोचयेत्यर्थः । वस्तुस्वभावे आलोच्यमाने चैतन्यस्यागन्तुकत्वानुपपत्तेर्नैवं वक्तुमुचितमिति वाक्यार्थः । ननु सुषुप्ते दृष्ट्यादिरूपस्य चैतन्यस्यादर्शनाज्जाग्रदादौ दर्शनादागन्तुकमेव चैतन्यं पर्यालोचयामीति चे,त्तत्र वक्तव्यं, किं निरुपाधिचित्स्वरूपमेवागन्तुकं पश्यसि किं वा नयनादिद्वारकबुद्धिवृत्त्युपहितमिति विकल्प्याद्यं प्रत्याह । चैतन्यस्वरूपं चेदिति । अलौकिकप्रज्ञस्त्वं चेच्चैतन्यस्वरूपमागन्तुकं पश्यसि तर्हि पश्य, वयं तु न्यायप्रमाणकुशला अपि तच्चैतन्यस्वरूपमागन्तुकं द्रष्टुं घटयितुं वा न वर्षशतेनापि शक्नुमो ऽन्यो वा कश्चिदचेतनो ऽपि मूढो ऽपि न शक्नुयादित्यर्थः । अयं भावः । चैतन्यस्यागन्तुकत्वं चैतन्येन गृह्यते किं वा ऽचैतन्येन, नाद्यः, स्वग्राह्यत्वे स्ववृत्तिविरोधाद्, नह्यङ्गुल्यग्रेण तदेव स्पृश्यते ऽसिधारया वा ऽसिधारा छिद्यते, नाप्यन्यचैतन्येनान्यचैतन्यस्यागन्तुकत्वं ग्राह्यमन्यत्वस्याद्याप्यसिद्धेः । न द्वितीयो, जडस्य चिदधीनप्रकाशतया चित्प्रकाशकत्वायोगादतश्चैतन्यं नागन्तुकमिति । श्रुतिश्च भवति, यद्वै तन्न पश्यति पश्यन् वै तन्न पश्यति नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते ऽविनाशित्वान्न तु तद् द्वितीयमस्ति ततो ऽन्यद्विभक्तं यः पश्येदित्याद्याः ॥ ५५ ॥

एवमाद्यं कल्पमनुपपत्त्या निराकृत्य द्वितीयमचैतन्यापादनेन निराकरोति ।

(५६) संहतत्वात्पारार्थ्यमनेकत्वान्नाशित्वं च न केनचिदुपपत्त्या वारयितुं शक्यमस्वार्थस्य स्वतः सिद्ध्यभावादित्यवोचाम । चैतन्यस्वरूपस्य त्वात्मनः स्वतः सिद्धेरन्यानपेक्षत्वं न केनचिद्वारयितुं शक्यमव्यभिचारात् । ननु व्यभिचारो दर्शितो मया सुषुप्ते न पश्यामीति, न, व्याहतत्वा,त्कथं व्याघातः, पश्यतस्तव न पश्यामीति व्याहतं वचनं, नहि कदाचिद्भगवन् सुषुप्ते मया चैतन्यमन्यद्वा किंचिद्दृष्टं, पश्यंस्तर्हि सुषुप्ते त्वं, यस्माद्दृष्टमेव प्रतिषेधसि, न दृष्टिं, या तव दृष्टिस्तच्चैतन्यमिति मयोक्तं, यया त्वं विद्यमानया न किंचिद्दृष्टमिति प्रतिषेधसि सा दृष्टिस्तच्चैतन्यं, तर्हि सर्वत्राव्यभिचारात्कूटस्थनित्यत्वं सिद्धं स्वत एव, न प्रमाणापेक्षम् ॥

संहतत्वादिति । नयनादिद्वारकबुद्धिवृत्त्युपाधिकस्तस्य तु संहतत्वात्परार्थत्वादिकं पूर्वमेवोपपादितमिति नेदानीमुपपत्तिर्वक्तव्येत्याह । इत्यवोचामेति । अत्रापि श्रुतिर्भवति । न दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारं शृणुयान्न मतेर्मन्तारं मन्वीथा न विज्ञातेर्विज्ञातारं विजानीया इत्याद्या । अस्मिंस्तु श्रुतिवाक्ये षष्ठ्यन्तशब्दवाच्यदृष्ट्यादेरन्यद्द्रष्टृव्याप्यतया ऽचैतन्यस्वभावत्वोक्तेस्तदन्यो दृष्ट्यादिस्वरूपप्रकाशकत्वेन द्रष्ट्रादिशब्दनिर्दिष्टः साक्षी नित्यचैतन्यस्वभावः सिद्ध इत्युपसंहरति । चैतन्यस्वरूपस्य त्विति । उक्तमेवार्थं युक्त्यन्तरेणोपपादयितुं शङ्कामुद्भावयति । नन्विति । उत्तरं संग्रहेणाह । न व्याहतत्वादिति । व्याहतत्वमेव प्रश्नपूर्वकं विवृणोति । कथमित्यादिना । न किंचिदिति पुनः शिष्यप्रश्नः । पश्यंस्तर्हीति गुरोरुक्तिः । पश्यन् द्रष्टा दृष्टिमानेव त्वं सुषुप्त इत्यर्थः । यस्मादित्यादिस्तदुपपादनपरो ग्रन्थः स्पष्टार्थः । सुषुप्ते मया किं चिन्न दृष्टमित्युत्थितस्य परामर्शानुपपत्त्या सौषुप्तानुभवस्यावश्यंभावात्तदाकारेणोपसंहारादागन्तुकानुभवासंभवात्स्वरूपचैतन्यमनागन्तुकं कूटस्थात्मस्वरूपं सिद्धमित्युपसंहरति । यथेत्यादिना ॥ ५६ ॥

चैतन्यस्य स्वतः सिद्धिमुपपादयति ।

(५७) स्वतः सिद्धस्य हि प्रमातुरन्यस्य प्रमेयस्य परिच्छित्तिं प्रति प्रमाणापेक्षा, या त्वन्या नित्या परिच्छित्तिरपेक्ष्यते ऽन्यस्यापरिच्छित्तिरूपस्य परिच्छेदाय सा हि नित्यैव कूटस्था स्वयंज्योतिःस्वभावात्मनि प्रमाणत्वे प्रमातृत्वे वा न तां प्रति प्रमाणापेक्षा तत्स्वभावत्वाद्, यथा प्रकाशनमुष्णत्वं वा लोहोदकादिषु परतो ऽपेक्ष्यते ऽग्न्यादित्यादिभ्यो ऽतत्स्वभावत्वान्नाग्न्यादित्यादीनां तदपेक्षा सर्वदा तत्स्वभावत्वात् ॥

स्वतः सिद्धस्य हि प्रमातुरिति । हिशब्दो लोकानुभवप्रसिद्धिद्योतनार्थः, स्वतः सिद्धः, प्रमाणनिरपेक्षत्वेनैव सिद्धः, प्रमाणप्रवृत्तेः प्रागेव प्रकाशमान इति यावद्, एवंविधस्य प्रमातुर्यदन्यत्प्रमेयं दृश्यं तस्य परिच्छित्तिं स्फूर्तिं प्रति प्रमाणापेक्षा न प्रमातृस्वरूपपरिच्छित्तिं प्रति प्रमाणापेक्षेत्यर्थः । या त्वन्यस्यापरिच्छित्तिरूपस्याचेतनस्य परिच्छेदायावभासनाय नित्या स्वतः सिद्धा अन्या परिच्छित्तिः संविदपेक्ष्यते, सा हि कूटस्थैव, यतो नित्या स्वयंज्योतिःस्वभावा चेति योजना । तां प्रति स्वरूपकूटस्थनित्यसंविदं प्रति आत्मनि संविद्रूपे विषये प्रमाणत्वे तत्सत्तानिश्चयफलव्यापारात्मत्वे प्रमातृत्वे वा त-

Digitized by Google

व्यापाराश्रयत्वे वा न प्रमाणापेक्षा प्रमात्रपेक्षा वास्तीत्यर्थः । अयं भावः । अन्तःकरणवृत्तिप्रतिबिम्बितं हि चैतन्यं प्रमाणमिष्यते, वृत्तिमदन्तःकरणप्रतिबिम्बितं प्रमातृ, तदुभयं प्रमेयावभाससमये नानवभासमानं भवति, तथा सति प्रमेयस्यैव स्वतःस्फुरणशङ्कापातादिदोषप्रसङ्गात्तदवभासश्च न प्रमात्रन्तरात्प्रमाणान्तराद्वा भवति अनवस्थाप्रसङ्गादनुपपत्तेश्चेत्यतः स्वप्रकाशतयैव प्रमातृप्रमाणप्रमेयानामवभासकस्यात्मनः सिद्धिरिति तस्य सिद्धा नित्यस्वप्रकाशकूटस्थचिदात्मतेति । अप्रकाशस्वभावस्यैव प्रकाशकान्तरापेक्षा न प्रकाशस्वभावस्येत्युक्तमर्थं दृष्टान्तोक्त्या बुद्धिमारोहयति । यथा प्रकाशनमिति ॥ ५७ ॥

ननु संविदः प्रमाणफलत्वप्रसिद्धौ कथं नित्यत्वमित्याक्षिपति ।

(५८) अनित्यत्व एव प्रमा स्यान्न नित्यत्व इति चेन्नावगतेर्नित्यत्वानित्यत्वयोर्विशेषानुपपत्तेः, नह्यवगतेः प्रमात्वे ऽनित्यावगतिः प्रमा न नित्येति विशेषो ऽवगम्यते, नित्यायां प्रमातुरपेक्षाभावो ऽनित्यायां तु यत्नान्तरितत्वादवगतिरपेक्ष्यत इति विशेषः स्यादिति चेत्, सिद्धा तर्ह्यात्मनः प्रमातुः स्वतः सिद्धिः प्रमाणनिरपेक्षतयैवेत्यभावे ऽपि अपेक्षाभावो नित्यत्वादिति चेन्नावगतेरेवात्मनि सद्भावादिति परिहृतमेतत् ॥

अनित्यत्व एवेति । अर्थावगतिर्हि प्रमा न तस्याः स्वरूपत एवानित्यत्वे कल्पकमस्तीति समाधत्ते । नावगतेरिति । संग्रहं विवृणोति । नहीति । चक्षुरादिद्वारकबुद्धिवृत्तिव्यक्ताया अवगतेः प्रमात्वे सति नित्यायाः प्रमात्वं न भवत्यनित्यायास्तु भवतीति विशेषो नहि गम्यते विनिगमनाभावादित्यर्थः । तत्र विनिगमनाभावो ऽसिद्ध इति शिष्यः शङ्कते । नित्यायामिति । अवगतेर्नित्यत्वे कारकव्यापारवैयर्थ्यं स्यादित्येवं विशेष इत्यर्थः । प्रमातुः स्वावगतेर्नित्यत्वे प्रमाणव्यापारवैयर्थ्यमापद्यते किं वा विषयावगतेर्नित्यत्वे, नाद्यः, इष्टापत्तेरित्याह । सिद्धा तर्हीति । नित्यावगतिपक्षे प्रमाणनैरपेक्ष्यं चेत्त्वया ऽनुमंस्यते तर्हि प्रमातुरात्मनः स्वरूपस्य स्वतः सिद्धिः स्वप्रकाशता प्रमाणनिरपेक्षतयैव सिद्धेत्यर्थः । अनित्यस्यास्वप्रकाशस्य च जडत्वादात्मत्वानुपपत्तेरित्यभिप्रायः । नन्वात्मप्रमाया नित्यत्वाद्यदि प्रमाणानपेक्षा तर्हि प्रमाभावस्यैव तत्र नित्यत्वात्प्रमाणानपेक्षा किं न स्यादिति शङ्कते । अभावे ऽपीति । प्रमाभावे ऽपीत्यर्थः । परिहरति । नावगतेरिति । अवगतेरात्मनि सद्भावादेव प्रमाणानपेक्षा नह्यवगत्यभावशङ्कावकाशो ऽसंहतस्य संघातसाक्षिणश्चितिमत्त्वोपपादनादित्यर्थः । अथ वा आत्मसिद्धिः प्रमाणं नापेक्षत इति वदता प्रमाणाभावमपेक्षत इत्युक्तं स्यादिति मत्वा तदपेक्षापि तत्र नोपपद्यते ऽनन्यसिद्धिर्नित्यत्वादेवेति शङ्कते । अभावे ऽपीति । स्वतः सिद्धिप्रमाणनैरपेक्ष्यशब्दाभ्यां सर्वानपेक्षप्रकाशमानात्मस्वरूपस्यैव विवक्षितत्वान्नात्र शङ्कावकाश इति परिहरति । नावगतेरिति ॥ ५८ ॥

इदानीं प्रमातुः स्वसिद्धिर्निरपेक्षैवेत्येतद्विपक्षबाधकोपन्यासेन साधयन्नित्याया अपि प्रमाया विषयावगतित्वसिद्धये विषयस्थत्वं संपादयितुं प्रमाणव्यापारापेक्षास्तीति सूचयन् पक्षान्तरमपाकरोति ।

(५९) प्रमातुश्चेत्प्रमाणापेक्षा सिद्धिः कस्य प्रमित्सा स्या,द्यस्य प्रमित्सा स एव प्रमाता ऽभ्युपगम्यते, तदीया च प्रमित्सा प्रमेयविषयैव न प्रमातृविषया प्रमातृविषयत्वे ऽनवस्थाप्रसङ्गात् प्रमातुस्तदिच्छायाश्च तस्याप्यन्यः प्रमाता तस्याप्यन्य इत्येवमेव इच्छायाः प्रमातृविषयत्वे प्रमातुरात्मनो ऽव्यवहितत्वाच्च प्रमेयत्वानुपपत्तिः, लोके हि प्रमेयं नाम प्रमातुरिच्छास्मृतिप्रयत्नप्रमाणजन्मव्यवहितं सिध्यति ॥

प्रमातुश्चेत्यादिना । अयमर्थः । सर्वं वस्तु ज्ञाततया ऽज्ञाततया वा साक्षिचैतन्यस्य विषय एवेति स्थिते कदाचिदज्ञातत्वेन निर्विकल्पकसाक्ष्यवगतस्य ज्ञातत्वव्यवहारसिद्धये यस्य प्रमित्सोपपद्यते स एव तदा प्रमाता प्रमाणव्यापाराश्रय इत्युच्यते' तत्र प्रमातुः स्वरूपसिद्धिश्चेत्प्रमाणापेक्षा स्यात्तदा कस्य प्रमित्सा स्यात् तस्यैवान्यस्य वा प्रमातुमिच्छा च स्वविषयान्यविषया वा सर्वथापि नोपपद्यत इति । तत्रेच्छाश्रयस्येच्छागोचरत्वं निराकुर्वन्स्वप्रमातृकत्वमात्मनो निराकरोति । तदीया चेति । कर्मविषया न कर्तृविषयेत्यर्थः । कर्त्रैव कर्मापि किं न स्यादित्याशङ्क्यैकस्यां क्रियायामेकस्यैव गुणप्रधानभावेन कर्तृकर्मतया वैरूप्यप्रसङ्गान्नैवमित्यभिप्रेत्यान्यप्रमातृकत्वे स्वयमसिद्धस्यान्यसाधकत्वानुपपत्तेरकरणस्य च निलीनतया साधकत्वासंभवात्तस्यापि सिद्धावन्यापेक्षायां तस्यापि तथात्वमित्यनवस्थामाह । प्रमातृविषयत्व इति । प्रमातुरनवस्थामभिनयत्यप्यन्य इति । उक्तामनवस्थामिच्छायामतिदिशति । एवमेवेति । आत्मनो ऽप्रमेयत्वे हेत्वन्तरमाह । प्रमातुरिति । एतदेव स्पष्टयति । लोके हीति । इच्छाजन्मव्यवहितमिष्यमाणं भवति स्मृतिजन्मव्यवहितं स्मर्तव्यं प्रयत्नजन्मव्यवहितं च क्रियासाध्यं प्रयतितव्यं प्रमाकरणव्यापारोत्पत्तिव्यवहितं प्रमेयमिति हि लोकप्रसिद्धमित्यर्थः । सिद्ध्यतीति निष्पत्तिप्रकाशयोर्निर्देशः ॥ ५९ ॥

Digitized by Google

अन्वयमुक्त्वा व्यतिरेकमाह ।

(६०) नान्यथा, ऽवगतिः प्रमेयविषया दृष्टा, न च प्रमातुः प्रमाता स्वस्य स्वयमेव केन चिद्व्यवहितः कल्पयितुं शक्य इच्छादीनामन्यतमेनापि स्मृतिश्च स्मर्तव्यविषया न स्मर्तृविषया तथेच्छाया इष्टविषयत्वमेव नेच्छावद्विषयत्वं स्मर्त्रिच्छावद्विषयत्वे ह्युभयोरनवस्था पूर्ववदपरिहार्या स्यात्, ननु प्रमातृविषयावगत्यनुत्पत्तावनवगत एव प्रमाता स्यादिति चेन्नावगन्तुरवगतेरवगन्तव्यविषयत्वादवगन्तृविषयत्वे चानवस्था पूर्ववत्स्यात् ॥

नान्यथेति । अवगतिशब्दश्च प्रकाशप्राप्त्योः साधारणः, सुषुप्तस्यापि प्रमेयसिद्धिप्रसङ्गादिति भावः । तर्हि प्रमातुरपि सिद्धिरिच्छादिजन्मव्यवहितैव भवतु, नेत्याह । न चेति । स्वयमेव प्रमाता स्वस्यैव प्रमातुरिच्छादीनामन्यतमेनापि व्यवहितं कल्पयितुं न च केन चिच्छक्य इत्यन्वयः । तत्र हेतुमाह । स्मृतिश्चेत्यादिना । स्मृतीच्छयोः स्वाश्रयविषयकत्वे बाधकमाह । स्मर्त्रिच्छावद्विषयत्वे हीति । स्मर्ता च इच्छावांश्च स्मर्त्रिच्छावन्तौ स्मर्त्रिच्छाविषयौ ययोस्तयोर्भावः स्मर्त्रिच्छावद्विषयत्वं तस्मिन्निति विग्रहः उभयोः स्मृतीच्छयोरित्यर्थः । स्मर्तुः स्ववृत्तिव्याप्यत्वायोगात्स्मर्त्रन्तरस्मृतिविषयता वक्तव्या तथा चैकस्मिन्नात्मनि स्मर्त्रन्तराभ्युपगमे तस्यापि पूर्वसमानयोगक्षेमतया स्मृत्यनवस्था स्यादित्यर्थः । तुल्यमिच्छायाः प्रयत्नस्येति च द्रष्टव्यं, तदेवमात्मनि न प्रमाणव्यापारापेक्षा प्रमातुः स्वविषयप्रमाणक्रियाश्रयत्वायोगात्प्रमात्रन्तरकल्पनायामनवस्थानादप्रमेय एवात्मा सिध्यति, तस्य च बाह्यविषयावच्छेदाय प्रमाणव्यापारापेक्षासंभवाच्च तद्वैयर्थ्यमिति चोक्त्यावगतेः स्वतो नित्यत्वं साधितमिदानीं प्रकारान्तरेण तदेव साधयितुं पूर्वपक्षयति । प्रमातृविषयेति । यद्विषया ऽवगतिरुत्पद्यते सो ऽवगतः सिद्ध इति चोच्यते प्रमातुश्चावगत्यनुत्पत्तौ प्रमाता सुषुप्त एव सदा स्यादित्यर्थः । तत्र किं सुषुप्तसाम्यपरिहारायात्मनो ऽवगतिविषयत्वं वक्तव्यमित्यभिप्रायः किं वा सुषुप्तसाम्यपरिहारमात्रं वक्तव्यमिति तत्र नाद्य इत्याह । नावगन्तुरिति । अवगन्तुरवगतिविषयत्वे स्वाश्रयावगतिव्याप्यत्वायोगादवगन्त्रन्तरावगतिविषयत्वं वाच्यं तथा चानवस्था पूर्ववत्स्मृतीच्छाविषयत्ववत्स्यादित्यर्थः ॥ ६० ॥

द्वितीयं प्रत्याह ।

(६१) अवगतिश्चात्मनि कूटस्थनित्यात्मज्योतिरन्यतो ऽनपेक्षैव सिद्धाग्न्यादित्याद्युष्णप्रकाशवदिति पूर्वमेव प्रसाधितमवगतेश्चैतन्यात्मज्योतिषः स्वात्मन्यनित्यत्वे आत्मनः स्वार्थतानुपपत्तिः कार्यकारणसंघातवत्संहतत्वात्पारार्थ्यं दोषवत्त्वं चावोचाम, कथं, चैतन्यात्मज्योतिषः स्वात्मन्यनित्यत्वे स्मृत्यादिव्यवधानात्सान्तरत्वं ततश्च तस्य चैतन्यज्योतिषः प्रागुत्पत्तेः प्रध्वंसाच्चोर्ध्वमात्मन्येवाभावाच्चक्षुरादीनामिव संहतत्वात्पारार्थ्यं स्याद्यदा च तदुत्पन्नमात्मनि विद्यते न तदात्मनः स्वार्थत्वं तद्भावाभावापेक्षा ह्यात्मानात्मनोः स्वार्थत्वपरार्थत्वसिद्धिस्तस्मादात्मनो ऽन्यनिरपेक्षमेव नित्यचैतन्यज्योतिष्ट्वं सिद्धम् ॥

अवगतिश्चेति । "अत्रायं पुरुषः स्वयंज्योतिरात्मैवास्य ज्योतिरेषो ऽस्य परमो लोको न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते,, इत्यादिश्रुतेरात्मनो नित्यप्रकाशस्वभावत्वावगमादग्न्युष्णप्रकाशवदलुप्तावगतिरूपे ऽवगत्युत्पत्त्यपेक्षाभावाच्च सुषुप्ततुल्यता तस्येति भावः । विपक्षे चोक्तं दोषं स्मारयत्यवगतेश्चैतन्यात्मज्योतिष इति । उक्तामेवानुपपत्तिं प्रश्नपूर्वकमुपन्यस्यति । कथमित्यादिना । स्मृत्यादेः स्मृतीच्छादिरूपाद्व्यवधानाद्विच्छेदाच्चैतन्यज्योतिषः सान्तरत्वमिच्छादिवृत्त्यन्तरपूर्वकत्वमित्यर्थः । किं तत्र स्यात्तदाह । ततश्चेति । आत्मा यद्यागन्तुकचित्प्रकाशविषयः स्यात्तदा संहतः परार्थश्च स्यादिन्द्रियान्तःकरणप्राणादिवदिति फलितमाह । यदा चेति । चैतन्यज्योतिस्तच्छब्दार्थः । यदा चात्मनि तदुत्पन्नं विद्यते तदा नैवात्मनः स्वार्थत्वं संभवतीत्यन्वयः । तत्र हेतुमाह । तद्भावेति । तस्य संहतत्वस्य भावाभावौ तदपेक्षा हीति योजना । आगन्तुकचित्प्रकाशगम्यस्यानात्मत्वनियमात्तस्य च पारार्थ्यात्तद्विलक्षण आत्मा नित्यचैतन्यस्वरूप एव सन् सर्वत्रावभासत इत्युपसंहरति । तस्मादिति ॥ ६१ ॥

इदानीं नित्यचैतन्यस्वरूपत्वे प्रमातृत्वानुपपत्तिं शङ्कते ।

(६२) नन्वेवं सत्यसति प्रमाश्रयत्वे कथं प्रमातुः प्रमातृत्वमुच्यते, प्रमाया नित्यत्वे ऽनित्यत्वे च रूपविशेषाभावादवगतिर्हि प्रमा तस्याः स्मृतीच्छादिपूर्विकाया अनित्यायाः कूटस्थनित्याया वा न स्वरूपविशेषो विद्यते, यथा धात्वर्थस्य तिष्ठत्यादेः फलस्य गत्यादिपूर्वकस्यानित्यस्यापूर्वस्य नित्यस्य वा रूपविशेषो नास्तीति तुल्यो व्यपदेशो दृष्टस्तिष्ठन्ति मनुष्यास्तिष्ठन्ति पर्वता इत्यादि, तथा नित्यावगतिस्वरूपे ऽपि प्रमातरि प्रमातृत्वव्यपदेशो न विरुध्यते फलसामान्यादिति, अत्राह शिष्यः, नित्या-

Digitized by Google

वगतिस्वरूपस्यात्मनो ऽविक्रियत्वात्कार्यकारणयोरसंहत्य तक्षादीनामिव वास्यादिभिः कर्तृत्वं नोपपद्यते, असंहतस्वभावस्य च कार्यकारणोपादाने अनवस्था प्रसज्यते ॥

नन्विति । अन्यप्रमाश्रयत्वाभावे ऽपि प्रमातृत्वव्यपदेश उपपद्यते इति परिहरति । उच्यते इत्यादिना । रूपविशेषः स्वरूपविशेषः । संवहं विवृणोति । अवगतिर्हीति । तत्र दृष्टान्तमाह । यथेति । तिष्ठतिर्ह्यचलत्वे ऽर्थे प्रयुज्यते तत्र किं चिद्गतिपूर्वकमेवाचलं भवति यथा जङ्गमजातं किं चित्त्वचलमेव सदा यथा स्थावरजातमुभयत्र तिष्ठतिव्यपदेशे न कश्चिद्विशेषो ऽवगम्यते तथा प्रमातेति नित्यप्रमाश्रयत्वे ऽपि व्यपदेशो न विरुध्यत इत्यर्थः । फलसामान्यादिति । फलस्वरूपे प्रमायां विशेषाभावादित्यर्थः । अयमाशयः । प्रमाणफलं हि प्रमा, सा च चित्प्रकाशरूपा प्रमातृगतैव वक्तव्या, अन्यथा विषयगतत्वे मयेदं विदितमिति स्वात्मनि ज्ञानज्ञेयसंबन्धानुभवानुपपत्तेः । जडस्य चान्तःकरणादेर्व्यापाराश्रयत्वे ऽपि चिदाश्रयत्वायोगात् प्रमातृत्वानुपपत्तेः, चिदात्मनस्तु कूटस्थत्वाद्व्यापारवत्त्वायोगात्प्रमां प्रति कर्तृत्वानुपपत्तेः, मुख्यया वृत्त्या जडाजडयोरुभयोरपि प्रमातृत्वव्यपदेशायोग्यत्वात्परस्पराध्यासेन व्यवहारप्रवृत्तेर्मिथ्यैवात्मनो बाह्यविषये ऽपि प्रमातृत्वमिति स्थितौ स्वात्मनि स्वयंप्रकाशस्वभावे कुतः प्रमातृत्वप्रसङ्गावकाशः कुतस्तरामनवभासप्रसङ्गः कुतस्तमां च प्रमाणापेक्षेति । एवं कूटस्थनित्यचैतन्यज्योतिषो ऽन्तःकरणोपाधिसंबन्धप्राप्तमौपाधिकं प्रमातृत्वमुपपाद्येदानीं कर्तृत्वमपि तथैवेति प्रतिपादयितुं चोद्यमुद्भावयत्यथाहेति । तक्षादीनामिवेति व्यतिरेकदृष्टान्तः, तक्षा काष्ठवर्द्धकः, वासी तदायुधविशेषः, कस्मान्नोपपद्यते इत्यत आहासंहतस्वभावस्येति ॥ ६२ ॥

॥ श्रीगणेशाय नमः ॥

॥ अथ वृषभानुजानामनाटिकाप्रस्तावः ॥

विगलितविषयान्तरं हृदन्तः-
परिगतमम्बुदमञ्जितं तडिद्भिः ।
अविरतममृतानि वर्षयन्तं
सकलजनोदयकारिणं भयेऽहम् ॥ १ ॥

अथेदानीमहमेषु दिवसेषु सत्कविविरचितानां सहृदयहृदयाह्लादकानां विरलप्रचाराणां निबन्धानां प्रचुरतरं प्रचिचारयिषयानुदिनं सादृङ्ग्रन्थान्वेषणैकप्रवणमना निश्चितधियां विपश्चितां नितान्तं चेतोविनोदसमर्थामष्टादशविधोपरूपकेषु प्रथमतामुपगतां कदाचिदप्यनवलोकितचरीमश्रुतचरीमनन्यसदृशीं सत्कविसारस्वतद्विजाख्यश्रीमल्लक्ष्मीनारायणाभिधप्रियसुहृदा सुप्रयत्य सुधामिवाब्धिमध्यादाविर्भाविताम् वृषभानुजानामिकां सचाटिकामुपलभ्य नैकविबुधजनास्वाद्यमानविविधविद्यासुधारसे श्रीमति काशीविद्यासुधानिधौ युक्तयोगां विशेषेणाकलय्यान्तर्वर्तिप्राकृतभाषोद्धारभूताभिः सुटिप्पणीभिर्विभूषितां विधायैकामपि प्रायोऽतिविशुद्धतया पुस्तकान्तरनिरपेक्षामादितः सम्यगवलोक्य शोधनादिना सुज्ञातां विरचय्य काशीविद्यासुधानिधौ रसिकजननयनपथमुपनेतुं प्रकाशयितुमीहे ।

इयं च चतुरङ्किका, नायकोऽत्र निखिलनृपतिमाननीयो नायकप्रकरशेखरभूतोऽद्भुतप्रभावो भगवान् नन्दनन्दनः, नायिका च सकलनायिकाचूडामणिरननुभूतोपयमना कन्यारत्नं श्रीमद्वृषभानुनामधेयव्रजमण्डलनृपतितनया नवानुरागा राधिकाभिधाना, इति नाटिकालक्षणं साहित्यदर्पणोक्तं सम्यगन्वेति, तद्यथा,

“ अथोपरूपकाणि, तत्र,
नाटिका कॢप्तवृत्ता स्यात् स्त्रीप्राया चतुरङ्किका ।
प्रख्यातो धीरललितस्तत्र स्यान्नायको नृपः ॥
स्यादन्तःपुरसंबद्धा संगीतव्यापृताथवा ।
नवानुरागा कन्यात्र नायिका नृपवंशजा„ ॥

इति ।

अथच रुचिरतरनामधेया नाटिकेयं गङ्गायमुनातीरान्तरालवर्तिमध्यदेशशेखरीभूतसुवर्णशेखरनामकनगरसमवाप्तजन्मना कायस्थकुलावतंसेन मथुरादासाभिधानेन सत्कविना स्वयं निरमायि, इदं चातीव विदुषां मनःसु चमत्कृतिचिततिविभवविधायि, यत् श्रीमन्नृपवरसकलविद्याविनोदैकरसिकगुणिगणसंमानैकनिदानसत्कीर्तिविराजमानभोजराजराजादनन्तरमपि आत्यन्तरेष्वपि यन्याकारा आसन्निति ।

तथास्य सुवर्णशेखरनामनगरस्य संप्रति कथमपि चिह्नानामनुपलभ्यमानतया नाममात्रावशेषस्यातिप्राचीनकालिकतयानुमीयमानस्यावकलनाद्देवाच्चोपलब्धजनुषः प्रोक्तवराभिधानस्य कायस्थान्वयशिरोमणेरतिप्राचीनत्वमवसीयते, अत एव च समयसहस्ररश्मिनिपीतप्रचारसुधारसाया अस्या नाटिकाया अपि प्राचीनत्वमवगम्यत एव ।

अथ चेयं विविधविद्वज्जनदृग्गोचरीभूय स्वप्रचारातिशयेनाधिगतजननसाफल्या परमां मुदमादधातु विद्वज्जनानामित्यायासो ममापि निष्पक्षपातलेशमखिलजनानुकम्पनपरपरमेश्वरकृपया सफलीभवेदित्यनवरतमीश्वरमाशंसे इति शिवम् ।

॥ सांख्यशास्त्राध्यापको भेचनरामशर्मा ॥

॥ श्रीराधावल्लभो जयति ॥

॥ अथ वृषभानुजा नाम नाटिका ॥

कपोले पत्रालीं पुलकिनि विधातुं व्यवसितः
स्वयं श्रीराधायाः करकलितवर्तिर्मधुरिपुः ।
अभूद्युत्कम्पो यदवहिततनयनः कम्पितभुज-
स्तदेतत् सामर्थ्यं तदभिनवरूपस्य जयति ॥ १ ॥

अपिच,

सुधाधाम्नः कान्तिस्तव वदनपङ्केरुहगुणै-
र्जितेव म्लानत्वं व्रजति सहसा प्राणदयिते ।
वदन्त्येवं कान्ते दिवसविरहातङ्कचकिता
तदङ्के संलग्ना तव दिशतु राधा प्रियशतम् ॥ २ ॥

अपिच,

वामांसस्थलचुम्बिकुण्डलरुचा जातोत्तरीयच्छविं
वंशीगीतिभवत्त्रिभङ्गवपुषं भ्रूलास्यलीलापरम् ।
किंचित्स्वस्तशिखण्डशेखरमतिस्निग्धालिनीलालकं
राधाविभ्रमदास्यतावृतमहं वन्दे किशोराकृतिम् ॥ ३ ॥

अपिच,

नीलाम्भोरुहकोशकोमलतनुं स्मेराननं मालिनं
सुस्निग्धं दधतं दुकूलयुगलं वाञ्छाभवस्यास्पदम् ।
स्वीयानामुदितामृतेन हृदयं संतर्पयन्तं सदा
राधाकेलिकथासु संततरतं ध्यायामि कृष्णाभिधम् ॥ ४ ॥

नान्द्यन्ते[1] सूत्रधारः । अलमतिव्याहृतेन, अद्य खलु वल्लवविलासिनीभिर्विनिद्रारविन्दवदनाभिः पद्मिनीभिरिव विलोभ्यमानमानसहंसस्य श्रीमद्वृषभानुनन्दिनीपादपद्मरजोरञ्जितोपान्तेन मयूरमुकुटेनालंकृतमौलेरुन्मदकलहंसकामिनीकुलकोलाहलेन पुलिनवलयेन मुखरमेखलया परिगतानितम्बबिम्बेनेव विराजितायास्तपनतनयायास्तीरान्तर्वलितलतामण्डपेषु समारब्धकन्दर्पकेलिकलाकलापस्य यशोदानन्दयोर्नन्दमानन्दवनस्य त्रिभुवनविलोभनीयाभिनवकिशोरवयसः श्रीराधामोहनस्य वृन्दारण्यान्तर्गतानां विहारवनस्थलीनामवलोकनसुखमनुभवितुमनेकदेशान्तरादुपस्थितेन साधुजनवृन्देन समाहूय सादरमभिहितोऽस्मि । यथा,

अस्मत्प्रियसुहृदातिप्रबलया भगवद्भक्त्या कायस्थकुलावतंसतामुपगतेन जह्नुकन्यकाकालिन्दीतीरान्तरालमध्यदेशशिरःशेखरीभूते सुवर्णशेखरनाम्नि नगरे समवाप्तपरार्ध्यजन्मना श्रीमथुरादासेन या विरचिता विदग्धजनहृदयकुमुदानन्दैककौमुदी वृषभानुजा नामापूर्वनाटिका सा भवताभिनेतव्या, यावन्नेपथ्यविधानं रचयित्वा यथासमीहितं समाचरामि । परितोऽवलोक्य । सानन्दम् । अये सुहृद्भूयिष्ठेयं परिषत् कौतुकापहृतावित्तवृत्तिर्लक्ष्यते, तदुपतिष्ठे ।

अञ्जलिं बद्ध्वा । भो व्रजेन्द्रनन्दनलीलामृतरसाविष्टचित्तचञ्चरीकाः सभ्यां दत्तावधाना भवत, सोऽहं रङ्गतरङ्गनामधेयो नटस्तेन कविना कृतामभ्यर्थनामुदाहर्तुकामः ।

प्रणिपत्य ।

प्रयोगबन्धः सरसः कवीनां
दृष्टो भवद्भिर्बहुशः सुकान्तः ।
गुणेन शून्योऽपि मम प्रबन्धः
कृष्णप्रसङ्गादवलोकनीयः ॥ ५ ॥

सर्वतो निर्वर्ण्य । सशङ्कम् । ननु तद्धर्मानभिज्ञः कश्चिदिह न भवेत् । विचिन्त्य, भवतु,

ये वाञ्छन्ति भवच्छिदश्चलमतयो ज्ञानं परं मुक्तये
ते सायुज्यपदं व्रजन्ति सुतरां श्रान्ताः स्वविस्मारकम् ।
ये वैकुण्ठपतेश्च वासवसतौ स्निग्धाः स तैः सेव्यतामेते तन्मुहुरो जयन्ति रसिका राधाधवाराधने ॥ ६ ॥

तदिदानीं गृहं गत्वा जायामाहूय रङ्गमङ्गलानि संपादयामि । परिक्रम्य । नेपथ्याभिमुखमवलोक्य च । आर्ये इतस्तावत् ।

प्रविश्य नटी । अज्जउत्त इअ म्हि, आणवेदु अज्जो, को णिओओ अणुचिट्ठीअदु त्ति[1] ।

सूत्रधारः । आर्ये वृषभानुजाप्रयोगाभिनयत्रिलोकनाय कुतूहलिनः पारिषदाः, हृतहृदयोऽस्मि सहजसुहृदामेतेषां प्रीतिप्रकर्षेण प्रेमपुरःसरेण च सततमेवंप्रायेणालापेन,

कदा वृन्दारण्ये नवघननिभं नन्दतनयं
परीतं गोपीभिः सकलविमनोज्ञाभिरभितः ।
गमिष्यामस्तोषं नयनविषयीकृत्य कृतिनो
वयं प्रेमोद्रेकस्खलितगतयो वेपथुभृतः ॥ ७ ॥

---

[1] इयं च पञ्चपादान् पदानि मत्वाभिनवगुप्ताचार्यमते चतुरस्रतालानुगता षोडशपदा नान्दी सिध्यति, यतः,

"देवद्विजनृपादीनामाशीर्वचनपूर्विका ।
नन्दन्त्यस्यां सुरा यस्मात् तस्मान्नान्दीति कीर्त्यते ॥
सूत्रधारः पठेन्नान्दीं मध्यमं स्वरमाश्रितः ।
नान्दी पदैर्द्वादशभिरष्टभिर्वाप्यलंकृता," ॥

इति भरतवचनव्याख्यावसरे "अनेन त्र्यस्रतालानुगता त्रिपदा षट्पदा द्वादशपदेति, चतुरस्रतालानुगता चतुष्पदाष्टपदा षोडशपदा चेति षडेव त्रिविधेव, नातः परमपि भूयस्त्वादादृता, पदानि श्लोकावयवभूतानि सुबन्तानि, तिङन्तानि वा, श्लोकतुरीयांशभूतानि वा, अवान्तरवाक्यरूपाणि वा, तदभिप्रायेण नाट्यप्रदीपे,

श्लोकपादं पदं केचित् सुप्तिङन्तमथापरे ।
परेऽवान्तरवाक्यं च पदमाहुर्मनीषिणः," ॥

इत्यादिना ग्रन्थेनाभिनवगुप्ताचार्येण तथाभिधानात् ।

[1] आर्यपुत्र इयमस्मि, आज्ञापयत्वार्यः, को नियोगोऽनुष्ठीयतामिति ।

तेन हि सत्वरमारभ्यतां संगीतकमहोत्सवः ।

नटी । साश्चर्यम् । अज्जउत्त देसंतरादो आअदेहिं एदेहिं सह पढमदंसणेण जेव्व कुदो दे ईरिसी पीई संवुत्ता, जं अज्ज भोअणादिअं वि ण अहिणंदसि [1] ।

सूत्रधारः । आर्ये कुत ईदृशी प्रीतिः संवृत्तेत्यलमाशङ्कितेन । यतः,

हेतुर्नैसर्गिकः कोऽपि प्रीतेर्यद्धि न वर्तते ।
मालती मधुरास्तीति मधुपः केन शिक्ष्यते ॥ ८ ॥

नेपथ्ये ।

साधु भरताधिराज साधु, सत्यमेवैतत्, कः संशयः ।
'हेतुर्नैसर्गिकः कोऽपि, इति पठति ।

सूत्रधारः । समाकर्ण्य । नेपथ्याभिमुखमवलोक्य च । आर्ये किमत्र कालातिपातेन, नन्वेष विरचितवृन्दावेषः समागत एव ममान्तेवासी मधुरप्रियः, गृहीतवनरचिकाभूमिकश्च सखा मे रङ्गमङ्गलः, तदावामपि गत्वा रङ्गप्रवेशाय संनद्धौ भवावः । इति निष्क्रान्तौ । प्रस्तावना ।

ततः प्रविशति यथा निर्दिष्टा वृन्दा वनरचिका च,

वृन्दा । सत्यमेवैतत्, कः संशयः । 'हेतुर्नैसर्गिकः कोऽपि, इति पुनः पठति, अन्यथा राधाकृष्णयोः कुमुदिनीकुमुदबान्धवयोरिव कथं तादृशी प्रीतिः ।

वचो विमृश्य । सखि वनरचिके मयाप्यस्मिन् व्यतिकरे किंचिदिव साधु विहितम् ।

वनरचिका । आवेदेदु भअवदी कधं विअ [2] ।

वृन्दा । सखि समाकर्ण्यताम्, गता यदृच्छयाहं वृषभानुगोपनिकेतनम्, तत्तनयां राधां सुमृष्टमणिकुट्टिमे प्राङ्गणैकप्रदेशे कन्यकासहस्रमध्यवर्तिनीं कुमारीभावोचितानेकलीलारसमनुभवन्तीं परिस्फुरन्त्या निजाङ्गकान्त्या काञ्चनमयीमिव कुर्वतीं स्वपरिसरभुवं विदूरादेवावलोक्य मनसि कृतवत्यस्मि ।

वनरचिका । तदो तदो [3] ।

वृन्दा । इयं हि,

आत्मानुरूपरमणीयगुणेन तन्वी
सौदामिनीव रुचिरेण नवाम्बुदेन ।
नन्दात्मजेन सह येन लभेत योगं
यत्नः स एव निपुणोऽत्र मया विधेयः ॥ ९ ॥

[1] आर्यपुत्र देशान्तरादागतैरेतैः सह प्रथमदर्शनेनैव कुतस्ते ईदृशी प्रीतिः संवृत्ता, यदद्य भोजनादिकमपि नाभिनन्दसि ।

[2] आवेदयतु भगवती कथमिव ।

[3] ततस्ततः ।

वनरचिका । भअवदि तुह मुहचन्दादो णिक्कमिदं इमं राहामोहणमिहुणस्स अण्णोण्णवइअरकहासुधारसं सुदिसुत्तिआहिं समापिबन्तिं आमूलादो आकण्णेदुं तुवरेदि मं तुवाणुग्गहजणिदो मणोरहो [1] ।

वृन्दा ।

अत्रान्तरे स वृषभानुरुपाजगाम
श्रुत्वा ममागमनमाशु तयानुयातः ।
वत्से समानय करौ सबहुप्रणामं
तामित्यभाषत ततश्च मया स उक्तः ॥ १० ॥

महाभाग किमायासयसि महानुभावामिमाम् । यतः,

इयमतिललिताङ्गी रोचिषामग्रभूमिः
कुसुमशरजयश्रीरूपसीमान्तलेखा ।
समगुणवरयोगात् प्रेमपात्रीभविन्त्री
व्रजपतिरिव कृष्णं पालय त्वं तदेनाम् ॥ ११ ॥

वनरचिका । भअवदि सा महाणुभावा राहिआ एवं आकण्णिअ तदो कीरिसी संवुत्ता [2] ।

वृन्दा । मुग्धतया स्नेहरसानभिज्ञापि सा मदभिहितमुपश्रुत्य मुहुः श्रुतिपरिसरं प्रियवचनमाकर्णयितुमिवोपगतेन तिर्यगपाङ्गेन चक्षुषा मामवलोकयन्ती तत्कालोपजातलज्जयेव किंचिदवनतमुखी स्थिता ।

वनरचिका । अध गोउलेंदणंदणस्स वि अणुराओ केण विहिणा समुल्लासिदो भअवदीए [3] ।

वृन्दा । सखि श्रूयताम्, तदाहमिति चिन्तितवती, यदेनां महाभागां स्पृशतीव लज्जादिभावः, कृतकृत्याहं संप्रति गोकुलं गत्वा बल्लवेन्द्रनन्दनस्यापि कर्णपथमुपनयाम्यप्रतिममाधुरीं दधानं राधाभिधानं केनचित् प्रसङ्गेन ।

वनरचिका । तदो तदो [4] ।

वृन्दा । ततो मुहूर्तादिव गोकुलमुपगत्य कलवर्तिभ्रमत्तमधुकरकुलैरभ्यर्थ्यमानमकरन्दस्योपवनसहकारस्य वेदिकायां तत्र स्थिता सविस्मयं तस्य प्रदेशस्य रमणीयतां निरूपितवत्यस्मि ।

तथाहि,

[1] भगवति तव मुखचन्द्रान्निर्गतमिमं राधामोहनमिथुनस्यान्योन्यव्यतिकरकथासुधारसं श्रुतिशुक्तिकाभ्यां समापिबन्तीमामूलादाकर्णयितुं त्वरयति मां तवानुग्रहजनितो मनोरथः ।

[2] भगवति सा महानुभावा राधिकैतदाकर्ण्य तदा कीदृशी संवृत्ता ।

[3] अथ गोकुलेन्द्रनन्दनस्याप्यनुरागः केन विधिना समुल्लासितो भगवत्या ।

[4] ततस्ततः ।

प्रतानैर्दूर्वाणां क्वचिदमलनीलोपललघुं
क्वचित् सद्यः सूतैस्तरुकिसलयैर्विद्रुमरुचिम् ।
क्वचिन्मुक्ताकान्तिं सितमुकुलकैर्यत्परिसरे
हरत्येषा भूमिर्नयनसुभगं गोकुलमिदम् ॥ १२ ॥

अपिच,

यस्योपान्ते तपनतनयातीरमासाद्य वत्सा
वीताशङ्कैः सह खगमृगैर्मन्दमन्दं चरन्ति ।
गोशालानां ततिभिरभितः कल्पितानां शिलोच्चैः
प्राकारस्य श्रियमविरलां यच्च कामं बिभर्ति ॥ १३ ॥

धन्यास्ते खलु येऽत्र सततं नन्दसूनोर्मुखपङ्कजमापिबन्तो निवसन्ति ।

वनरचिका । तदो तदो[1] ।

वृन्दा । एवमादिकं चिन्तयन्त्यामेव मयि परिजनादुपलभ्य मदागमनं गोपाधिपतिर्नन्दः सत्वरमुपागतः । सबहुमानं च मामितस्ततः संचरद्युवतिजनसहस्रमणिनूपुररवाहूतानां गृहदीर्घिकाकलहंससारसानां निनादैर्मनोहरं प्रस्फुरत्पताकाकोटिविलिखितनभस्तलाभिरायामिनीभिरुच्चैर्मणिस्तम्भसहस्रमुद्वहन्तीभिरतितुङ्गशालाभिरभिभूषितं देहलीवलयविनिर्मितनीलरत्नकिरणान् प्रमृष्टमणिकुट्टिमे प्राङ्गणे निपतितान् प्रत्ययदूर्वाप्रतानशङ्कया सलीलमालिहद्भिश्चटुलबालवत्सशतैः समुपशोभितं कैश्चिद्रत्नभित्तिषु संक्रान्तात्मप्रतिबिम्बकान्युद्वीक्ष्योद्वीक्ष्य कदाचित् समालिङ्गितुमायासितबाहुभिः कदाचिदन्तःशून्यं मुधामुकुलीकृताङ्गुलिदलं करकमलकं गृह्यतामेतदिति संज्ञया प्रहितमनन्तरमाकृष्योपहसद्भिः कदाचित् स्वयमुपरचितमुखभङ्गिविकारतयात्मानं विडम्ब्यमानमधिगम्य समुपजाताभिषङ्गमङ्गुल्या तर्जयद्भिः कदाचिच्च रत्नमालिकालंकृतानि संभाव्य ससंभ्रमं निजकण्ठदेशं स्पृशद्भिः कैश्चिदनुसृतभवनमृगशावकैः कैश्चिन्मुक्ताफलशकलप्रदानानन्दितकलहंसपोतकैः कैश्चिद्वनचरोपनीतदाडिमीफलमर्थयिभिरनेकलीलामनोहारिभिर्गोपकुमारकैर्विराजितं समुत्तमस्तम्भतटप्रेङ्खोलितस्थूलमुक्ताफलदामभिः प्रचलत्कनकवलयानुविद्धविविधरत्नोन्मुखमयूखैर्नेत्रत्विषा विभिन्नैर्व्योमाभोगं सेन्द्रायुधमिव कुर्वतीभिः धरसान्दोलनसंक्षोभोत्सर्पितैर्बिन्दुविसरैर्दुर्दिनतामिवोत्पादयन्तीभिर्गोपवधूभिर्निर्मथ्यमानदधिसमुज्जृम्भितेन तासां च जघनतटास्फालनरणितमणिकिङ्किणीझङ्काररवपीवरेण मङ्गलगीतिस्निग्धगम्भीरसप्रस्वरोपबृंहितेन वियद्व्यापिना निर्घोषेण जलदसंपदमुत्प्रेक्ष्य ससंभ्रममुन्मुक्तकेकानां कलापिकदम्बकानां प्रमोदनर्तितैरलंकृतमनेकशुकसारिकाभिरुद्बुध्यमानमङ्गल्यामृदङ्गमचरित्रमेकत्रैकदेशविनिहितैरनेकरसपूर्णैः सुवर्णरजतादिभाजनसहस्रैरुद्भासितमेकदेशे च मनोहारिणा क्रीडापर्वतेन विराजमानमेकदेशे च हुताशनमुपर्युपरि स्थापिताभिः पयःपरिपूरितपात्रपङ्क्तिभिर्दिवसेऽपि भुवि विस्फूर्जिततारकावलीभिरिव संशोभमानं सर्वसिद्धीनामुत्पत्तिस्थानभूतं स्वभवनं नीतवान् ।

वनरचिका । स्वगतम् । अहो ससिरिअत्तणं णन्दगेहस्स, अहवा सअललोअणिवासी भअवं वासुदेवो सअं जत्थ पडिवसइ तत्थ किं अच्चरिअं[1] । प्रकाशम् । तदो तदो[2] ।

वृन्दा । तस्यैवंविधस्याङ्गणमध्यभागेऽशेषभुवनश्रियः प्रासादस्येव पारिजातस्याधस्तादलंकृतपद्मरागवेदिकां प्रस्फुरन्तीभिर्निजाभरणप्रभाभिरावृतविग्रहां वनगमनकामं सुतं प्रहर्षगर्भस्निग्धमधुरैर्वचोभिर्लालयन्तीं तत्रभवतीं यशोदाम्, इति वागसमाप्तावेव ।

वनरचिका । प्रेमावेशेन बाष्पपूरोपरुद्धकण्ठा कथं कथमपि । भअवदि ताए महाभाआए सिणेहसिणिद्धमहुरवअणसवणत्थं सवणाइं मे आउलाइं होन्ति, ता वण्णेदु भअवदी[3] ।

वृन्दा । तद्यथा,

त्वन्मुखाम्बुजविलोकनं विना
नो मुहूर्तमपि नेतुमुत्सहे ।
त्वां कथं हि विपिनेऽनुवासरं
प्रेष्य तात बत धारयाम्यसून् ॥ १४ ॥

वनरचिका । सविस्मयमात्मगतम् । हन्त पआसिदो एत्थ महं पेम्मसंवलिदवच्छलरसो[4] । प्रकाशम् । तदो तदो[5] ।

वृन्दा । विलोक्य । भक्तिप्रवणेन मनसा प्रणामं गतवत्यस्मि ।

वनरचिका । तदो केण प्पसंगेण समक्खं पिदिरोणं कहस्स कण्णावदंसीकिदं राहाअभिधाणत्तणं भअवदीए[6] ।

वृन्दा । ततश्च समुचितातिथिसत्कारसंभारैरुपकल्पितोपचारां मां व्रजेश्वरः सप्रश्रयं 'कच्चित् कमुद्दिश्यमनुग्रहोऽयमागमनं भगवत्याः', इत्यपृच्छत्, ततश्चावनतकन्धराहं तदा तं प्रति भग-

---

[1] ततस्ततः ।

---

[1] अहो सश्रीकत्वं नन्दगेहस्य, अथवा सकललोकनिवासी भगवान् वासुदेवः स्वयं यत्र प्रतिवसति तत्र किमाश्चर्यम् ।

[2] ततस्ततः ।

[3] भगवति तस्या महाभागायाः स्निग्धमधुरवचनश्रवणार्थं श्रवणौ मे आकुलौ भवतः, तद्वर्णयतु भगवती ।

[4] हन्त प्रकाशितोऽत्र महान् प्रेमसंवलितवत्सलरसः ।

[5] ततस्ततः ।

[6] तदा केन प्रसङ्गेन समक्षं पित्रोः कृष्णस्य कर्णावतंसीकृतं राधाभिधानत्वं भगवत्या ।

Digitized by Google

यवस्मिन् मधुमङ्गले कौतुकेन संचरमाणाहं राधाभिधां वृषभानुगोपतनयाममलिनशीलरूपसंपन्नां सर्वलक्षणोपेततयातिधीरप्रकृतितया च विश्रम्भयन्तीमिव श्रियं विलोक्य रूपमाधुर्यवयःसद्भूततया तव सूनुं स्मरन्ती समुपजातदर्शनकुतूहलाचायाता, इत्यलम् ।

वनरत्निका । तदो तदो [1] ।

वृन्दा । अस्मिंश्चान्तरे समुदपादि महान् कलकलः, तमाकर्णयति चिन्तितं मया, यद्देव आपूर्यमाणशङ्खसहस्ररवापूरितदिक्चक्रवालं समभिहन्यमानभेरीमृदङ्गकाहलानकमन्द्रमाङ्गलिकनिध्वानमधुरमिदमायष्यतामिदमानीयतामित एवागम्यतामेवंप्रायैर्गोपकुमाराणां ससंभ्रमालापैर्मुखरितरथ्यामुखं समुल्लसति कोलाहलः, तत् तर्कयामि, वनमभि प्रस्थितः कृष्णः ।

वनरत्निका । तदो तदो [2] ।

वृन्दा । तदा च परिक्रम्यावलोक्य, तं निर्व्याजसुन्दरं मनस्येवं विचारितवत्यस्मि ।

भूषाविभूषणमपि स्फुरदङ्गकान्त्या
मङ्गल्यमेतदिति यं जननी यशोदा ।
प्रायः प्रसाधितवती ननु दीप्तिवृद्ध्यै
सोऽयं सुहृत्परिवृतः समुपैति कृष्णः ॥ १५ ॥

वनरत्निका । सप्रेमातिशयं तत्पादयोः पतति ।

वृन्दा । पादावाचिप्य । सखि इदानीं गत्वा कार्यान्तरमनुतिष्ठावः ।

इति निष्क्रान्ते । विष्कम्भकः ।

ततः प्रविशति श्रीकृष्णः प्रियालापश्च ।

कृष्णः । स्वगतम् । हन्त यस्या अभिधानमात्राकर्णनादेवाकुलीभूतं चेतः परवशतामुपैति, दुर्लभदर्शनां तामनालोक्य कथमात्मानं विनोदयिष्ये तावत्, भवत्वेवम् । प्रकाशम् । सखे प्रियालाप,

प्रियालापः । आणवेदु भवं [3] ।

कृष्णः ।

संकल्प्य न भवेदियं समुदितैर्यावत् सुहृन्मण्डलैवृन्दारण्यविहारभूमिरभितस्तावत् पुरस्ताद्वयम् ।
वीक्ष्यैनां सफलप्रसूनसुभगां भृङ्गाङ्गनानिःस्वनां
नृत्यासक्तशिखण्डिमण्डितवरां दृष्टिं प्रयामो मुदा ॥१६॥

[1] ततस्ततः ।
[2] ततस्ततः ।
[3] आज्ञापयतु भवान् ।

प्रियालापः । साहु भणिदं पिअवअस्सेण, अण्णो वि को वि अधिअदररमणिज्जो कोदुअविसेसो तस्सिं पदेसे संभावीअदि त्ति [1] ।

कृष्णः । साभिलाषम् । क इव ।

प्रियालापः । सुदं क्खु मए, एदेसु महुवासरेसु विसहाणुपुरादो भाणुणन्दिणीमज्जणव्ववदेसेण मअणमहूसवं माणेदुं पभादे पभादे राहापमुहो कुमारिआअणो वुन्दाडईणिउंजवीहिआसंणिवेसं आअच्छदि [2] ।

कृष्णः । सस्पृहम् । ततस्ततः ।

प्रियालापः । तहिं उण बालतमालविडवमूले पडिट्ठाविदकुसुमाउहस्स णिव्वत्तिदपूआसक्कारो विविहसुउमारकुसुमेहिं अत्ताणं मण्डिअ जहासुहं लीलारसं च णिव्विसिअ अलंकरेदि सअरमेअं [3] ।

कृष्णः । सपुलकमात्मगतम् । श्रुतं तथा तावद्भगवती वृन्दामुखादयमप्येवं वदति, निवेदयति च निमित्तं किंचिदुत्कुसितेन मम बाहुः, इति सत्वरमनुसरामि ।

प्रियालापः । कृष्णं किंचिदन्यादृशमालोक्यात्मगतम् । गाढं उक्कण्ठिदो लक्खीअदि एसो, होदु एव्वं दाव [4] । प्रकाशम् । भो वअस्स कधं दाणिं मं उवेक्खिअ तुण्हीभूदो सि तुमं [5] ।

कृष्णः । किमपि चिन्तयता मया न संभावितोऽसि ।

प्रियालापः । विहस्य । सुदिमग्गेण हिअए पविट्ठं विसहाणुकुमारिअं जेव्व किं ण भणासि [6] ।

कृष्णः । स्वगतम् । लक्षितोऽस्मि धूर्तेन बटुना । स्मित्वा । प्रकाशम् । तदविलम्बेनैवादेशय वृन्दाटवीमार्गम्,

प्रियालापः । परिक्रम्य । एदु एदु पिअवअस्सो एदं क्खु णादिदूरे रमणिज्जं वुंदावणं [7] ।

कृष्णः । परिक्रामन् पुरोऽवलोक्य । सहर्षम् । अहो अभिरामता वृन्दारण्यस्य, वयस्य पश्य पश्य,

[1] साधु भणितं प्रियवयस्येन, अन्योऽपि कोऽप्यधिकतररमणीयः कौतुकविशेषस्तस्मिन् प्रदेशे संभाव्यत इति ।
[2] श्रुतं खलु मया, एतेषु मधुवासरेषु वृषभानुपुराद्भानुनन्दिनीमज्जनव्यपदेशेन मदनमहोत्सवं मानयितुं प्रभाते प्रभाते राधाप्रमुखः कुमारिकाजनो वृन्दाटवीनिकुञ्जवीथिकासंनिवेशमागच्छति ।
[3] तत्र पुनर्बालतमालविटपमूले प्रतिष्ठापितकुसुमायुधस्य निर्वर्तितपूजासत्कारो विविधसुकुमारकुसुमैरात्मानं मण्डयित्वा यथासुखं लीलारसं च निर्विश्यालंकरोति स्वयमार्यम् ।
[4] गाढमुत्कण्ठितो लक्ष्यत एषः, भवत्वेवं तावत् ।
[5] भो वयस्य कथमिदानीं मामुपेक्ष्य तूष्णीं भूतस्त्वम् ।
[6] श्रुतिमार्गेण हृदये प्रविष्टां वृषभानुकुमारिकामेव किं न भणसि ।
[7] आगच्छत्वागच्छतु प्रियवयस्यो नातिदूरे रमणीयं वृन्दावनम् ।

Digitized by Google

इदं मधुरगीतिभिर्मधुकराङ्गनानां सखे
कलापिकुलनर्तितैः पिककदम्बकोलाहलैः ।
लतानववधूलसत्किसलयानुरागोद्गमै-
र्ममागमनमङ्गलं परितनोति मन्ये वनम् ॥ १७ ॥

अपिच,

भृङ्गालीनयनैर्निमेषविमुखं दूरात् समालोक्य मा-
मानन्दाश्रुजलं स्रवन्ति विगलन्माध्वीकबिन्दुच्छलात् ।
आह्वानं मलयानिलप्रचलितैः शाखाग्रहस्तैश्च मे
सप्रेम प्रथयन्त्युपायनफलैर्नम्राः किलैते द्रुमाः ॥ १८ ॥

तद्वृन्दारण्यनिवासिनां मनोरथसिद्धये त्वरिततरमुपगच्छावः ।

प्रियालापः । सस्मितम् । कधं अत्तणो वि मणोरहसिद्धी फुडं ण कहीअदि[1] ।

कृष्णः । स्मित्वा । अलं परिहासेन गच्छावतः ।

प्रियालापः । नाट्येन तथा करोति ।

कृष्णः । परिक्रम्य । समन्ततो निरूप्य । सखे प्रियालाप परिश्रान्तोऽस्मि, मुहूर्तकमेतेषु मधुमासकुसुमसमृद्धिमधुपानमत्तमधुकरनिकरमधुरझङ्कारमुखरेषु मज्जद्व्रजाङ्गनाजनकदम्बनयनाञ्जनप्रसरसंपर्कतयातितरां श्यामायमानैः संसर्पितसीमन्तसिन्दूरप्रवाहलोहितीकृतैः स्तनतटावगलितनवकुङ्कुमपङ्कपुञ्जपिञ्जरितैरतिविमलतया प्रतिमागतैरम्बरतलोल्लसितैरिवेन्द्रायुधशतैस्तरङ्गलेखानिवहैः संशोभिते यमुनाम्भसि समुन्मिषत्कुवलयकह्लारमकरन्दबिन्दुनिकुरम्बकरम्बितानतिशिशिरसीकरानुद्वहता लुलितपल्लवाङ्गुलिलतालास्यलीलोपदेशदक्षेण दक्षिणानिलेन संसेवितेषु लतानिकुञ्जेषु परिश्रममपनयावस्तावत् ।

प्रियालापः । अपवार्य । कुदो तस्सिं कण्णारण्णे समुप्पण्णाणुराअस्स दे परिस्समावणअणं[2] । प्रकाशम् । जं भवं आणवेदि[3] । उभौ परिक्रम्योपविशतः ।

नेपथ्ये, चंपअलदे उवहर कुसुमाइं[4] ।

प्रियालापः । पुरः कर्णौ दत्त्वा । किंचिदिव परिवर्तितकन्धरो नातिप्रकाशम् । तुवरदु तुवरदु पिअवअस्सो, इमस्सिं माहवीमण्डवे मुद्धकण्णआणं मिदुसद्दो सुणीअदि[5] ।

[1] कथमात्मनोऽपि मनोरथसिद्धिः स्फुटं न कथ्यते ।
[2] कुतस्तस्मिन् कन्यारण्ये समुत्पन्नानुरागस्य ते परिश्रमापनयनम् ।
[3] यद्भवानाज्ञापयति ।
[4] चम्पकलते उपहर कुसुमानि ।
[5] त्वरयतु त्वरयतु प्रियवयस्यः, अस्मिन् माधवीमण्डपे मुग्धकन्यकानां मृदुशब्दः श्रूयते ।

कृष्णः । समुपसृत्य । लतारन्ध्रे किंचिदाकुञ्चितचक्षुः सहर्षकौतुकं स्थितो विलोकयति ।

ततः प्रविशति ससखीजना राधा ।

राधा । हला तमालिए कुसुमावचअणिमित्तं गदा मे पिअसही चंपअलदा अज्ज वि ण पडिणिउत्ता[1] ।

प्रविश्य पुष्पपूर्णपर्णपुटहस्ता सस्मिता चम्पकलता । पिअसहि राहे दिट्ठिआ वड्ढसे, कुसुमिदा दाणिं णो मणोरहलदा[2] ।

राधा । सभ्रूभङ्गम् । अइ केरिसो मणोरहो[3] ।

चम्पकलता । जइ कुदूहलं तदो अवहिदं सुणादु पिअसही, अज्ज णिसावसाणे दिट्ठो को वि सिविणो मए, विसुमरिदो आसि[4] ।

राधा । सकौतुकम् । तदो तदो[5] ।

चम्पकलता । संपदं कुसुमावचअकिदे परिक्कमन्तीए मए का वि सुवण्णजूहिआ तमालसंगदा पुलोइदा[6] ।

राधा । सलज्जमिव । स्मेरमुखी तमालिकां सस्नेहं विलोकयति ।

चित्तज्ञा तमालिका चम्पकलतां प्रति । सहि तदो किम्[7] ।

चम्पकलता । सरिसदंसणेण मे सिमिविणं आरोहिदो त्ति[8] ।

प्रियालापः । स्वगतम् । दिढं विमुद्धो क्खु एसो राहारूवलावण्णविब्भमेहिं एत्थ, भोदु एव्वं[9] ।

समीपतरमागत्योत्सर्पितमुखः साकूतम् ।

भो वअस्स चिरं इह ट्ठिदेण तुए जं एव्वं पुलोईअदि, इन्दीवरकोमलं लोअणजुअलं दे अलसत्तणं णो वअच्छदि[10] ।

कृष्णः । मुखं कथंचिन्निवर्त्याव्यक्तमिव । सखे, ब्रवीमि भूतार्थम्,

[1] हे तमालिके कुसुमावचयनिमित्तं गता मे प्रियसखी चम्पकलताद्यापि न प्रतिनिवृत्ता ।
[2] प्रियसखि राधे दिष्ट्या वर्धसे, कुसुमितेदानीं नो मनोरथलता ।
[3] अयि कीदृशो मनोरथः ।
[4] यदि कुतूहलं तदावहितं शृणोतु प्रियसखी, अद्य निशावसाने दृष्टः कोऽपि स्वप्नो मया, विस्मृत आसीत् ।
[5] ततस्ततः ।
[6] सांप्रतं कुसुमावचयकृते परिक्रामन्त्या मया कापि सुवर्णयूथिका तमालसंगता विलोकिता ।
[7] सखि तदा किम् ।
[8] सदृशदर्शनेन मे स्मृतिपथमारूढ इति ।
[9] दृढं विमुग्धः खल्वेष राधारूपलावण्यविभ्रमैरत्र, भवत्वेवम् ।
[10] भो वयस्य चिरमिह स्थितेन त्वया यदेवं विलोक्यते, इन्दीवरकोमलं लोचनयुगलं तेऽलसत्वं नोपगच्छति ।

गच्छति न तृप्तिमेतत् सुललितमस्याः समापिबद्रूपम् ।
नयनयुगं मम नूनं संप्रति समुपैति सफलतां चैवम् ॥१९॥

प्रियालापः । किंचिद्विवर्णतामापद्यमानं तन्मुखं निर्वर्ण्या-पज्ञातकारुण्य इवात्मगतम् । हन्त लक्खीकिदो दाणिं लद्धावसरेण कुसुमाउहेण राहारुवस्स अत्तणो अमोघप्पहरणस्स कोमलक्खो एसो [1] । प्रकाशम् । अध सुदं सव्वं इमाणं मंतिदं [2] ।

कृष्णः । सखे मधुरमासां मन्त्रितम्, अन्यदपि श्रोतुमिच्छामि तावत् ।

राधा । आत्मगतम् । अवि णाम वदेदि इअं तं जेव्व दुल्लहजणं मं अहिकदुअ, जो भअवदीए वुन्दाए तदो तादस्स समीवे पसङ्गेण अभिहिदो आसि [3] । दक्षिणेतराक्षिस्फुरणं नाटयित्वा । होदु पुच्छेमि दाव [4] । प्रकाशम् । कधं विअ [5] ।

चम्पकलता । मनाग्भावानुविद्धं तदाकारं विभाव्य साकूतम् । सहि फलेण जेव्व जाणिस्ससि पुणरुत्तेण किं [6] । विचिन्त्य । अहवा कधइस्सं, सुणाहि इमस्सिं जेव्व अदिमुत्तलदामण्डवपरिसरे तुमं किल कस्स वि अणुरूववल्लहस्स समीवे णवजलहरस्स विज्जुल्लदा विअ जह तमालविडवसंगदा सुवण्णजूहिआ लदा सोहमाणा सुहं कीलन्ती चिट्ठसि त्ति [7] ।

कृष्णः । आत्मगतम् । कष्टं भोः कष्टम्, मम हि,

स्वप्नेनोदीरितं सख्याः श्रुत्वा श्रुतिसुखावहम् ।
आशाबन्धेन सोत्सुक्यं किंचिदुच्छ्वसितं मनः ॥ २० ॥
तथाप्येवाभिधानेन धन्यं कमभिधास्यति ।
इति संशयमापन्नं धृतिं न प्रतिपद्यते ॥ २१ ॥

प्रियालापः । सहर्षोद्वेगमात्मगतम् । जं एदीए उदाहिदं जइ वि तं अणण्णसाहारणं पिअवअस्सस्स जेव्व सरूवं तह वि जइ से मुहादो अभिधाणं फुडं कधिदं भवे [8] । उपसृत्य । किंचित्-

[1] हन्त लक्ष्यीकृत इदानीं लब्धावसरेण कुसुमायुधेन राधारूपस्यात्मनोऽमोघप्रहरणस्य कोमलाङ्क एषः ।

[2] अथ श्रुतं सर्वमासां मन्त्रितम् ।

[3] अपि नाम वदेदियं तमेव दुर्लभजनं मामधिकृत्य, यो भगवत्या वृन्दया तदा तातस्य समीपे प्रसङ्गेनाभिहित आसीत् ।

[4] भवतु प्रक्ष्यामि तावत् ।

[5] कथमिव ।

[6] सखि फलेनैव ज्ञास्यसि पुनरुक्तेन किम् ।

[7] अथवा कथयिष्ये, अस्मिन्नेवातिमुक्तलतामण्डपपरिसरे त्वं किल कस्याप्यनुरूपवल्लभस्य समीपे नवजलधरस्य विद्युल्लतेव यथा तमालविटपसंगता सुवर्णयूथिका लता शोभमाना सुखं क्रीडन्ती तिष्ठसीति ।

[8] यदेतयोदाहृतं यदपि तदनन्यसाधारणं प्रियवयस्यस्यैव स्वरूपं तथापि यद्यस्या मुखतोऽभिधानं स्फुटं कथितं भवेत् ।

प्रकाशम् । भो वअस्स दिट्ठिआ वड्ढसे, सुदं पिअवअस्सेण से वअणं, तक्केमि, भवं जेव्व वल्लहो त्ति [1] ।

कृष्णः । सोच्छ्वासं नीचैः ।

प्रसन्नस्ते तर्को यदपि मम चेतोऽपि नितरा
तमेवार्थं सत्यं कलयति सखेऽतीव मधुरम् ।
तथाप्यस्या अङ्गं निरुपममथो मे वपुरिदं
न किंचित् सादृश्यं लभत इति हत्वास्मि विधुरः ॥ २२ ॥

प्रियालापः । विहस्य, अदो क्खु तुए अणण्णव्वदं समारद्धं [2] ।

राधा । सप्रणयकोपम् । सहि जा लदा तुए सिविणे तह पुलोइदा, सा चंपअलदा, ण उण सुवण्णजूहिआ, तुमं क्खु अत्तणो मणोगदं सिविणे वि पेक्खसि त्ति अलं अलीओवहासेण, उवणेहि पूआउवअरणाइं तमालमूले [3] ।

नेपथ्ये,

आणत्तम्हि महादेवीए, जह हं जेव्व, सुमदिए वच्छं मे राहिअं सिग्घं गदुअ मम सआसं आणेहि, ता कहिं दाणिं पेक्खिस्सं तं भट्टदारिअं [4] ।

राधा । समाकर्ण्य । नेपथ्याभिमुखमवलोक्य च । हला चंपअलदे एसा दुट्ठचेडी वसुमदिआ समाअदा, उट्ठेहि अम्बासमीवे गदुअ तुरिदं जेव्व मअणपूआत्थं आअमिस्सम्ह [5] । इति सखीभिः परिक्रामति ।

कृष्णः । सदुःखातिशयम् । सखे प्रियालाप तावदावामपि गत्वा गोकुलपरिसरादायान्तं गोव्रजं परिपालयावः ।

प्रियालापः । अध इं [6] ।

कृष्णः । लतारन्ध्रे विलोक्य । सोच्छ्वासम् ।

गच्छन्ती स्वनिकेतं मनसिजभवनप्रदीपिकेवैषा ।
हरति ममेन्द्रियवृत्तिं शरदिव हंसावलीं प्रसभम् ॥२३॥

इति निष्क्रान्ताः सर्वे ॥

इति श्रीमथुरादासेन विरचितायां श्रीवृषभानुजानामनाटिकायां प्रथमोऽङ्कः ॥ १ ॥

[1] भो वयस्य दिष्ट्या वर्धसे, श्रुतं प्रियवयस्येनास्या वचनम्, तर्कयामि, भवानेव वल्लभ इति ।

[2] अतः खलु त्वयानन्यव्रतं समारब्धम् ।

[3] सखि या लता त्वया स्वप्ने तथा विलोकिता, सा चम्पकलता, न पुनः सुवर्णयूथिका, त्वं खल्वात्मनो मनोगतं स्वप्नेऽपि प्रेक्षस इत्यलमलीकोपहासेन, उपनय पूजोपकरणानि तमालमूले ।

[4] आज्ञप्तास्मि महादेव्या, यथाहमेव, सुमतिके वत्सां मे राधिकां शीघ्रं गत्वा मम सकाशमानय, तत् कुत्रेदानीं प्रेक्षिष्ये तां भर्तृदारिकाम् ।

[5] हे चम्पकलते एषा दुष्टचेटी वसुमतिका समागता, उत्तिष्ठाम्बासमीपे गत्वा त्वरितमेव मदनपूजार्थमागमिष्यामः ।

[6] अथ किम् ।

॥ श्रीगणेशाय नमः ॥

॥ विधवोद्वाहविवेकमधिकृत्य किं चिदुच्यते ॥

कश्चिद्दक्षिणदेशीयो भट्टविष्णुशास्त्र्यभिधानो ऽस्मद्गुरुवरश्री ६ राजारामशास्त्रिनिर्मितविधवोद्वाहशङ्कासमाधिसमाख्यनिबन्धखण्डनदुरभिनिवेशपिशाचावेशदूषितचित्तो "यत्तु" "तच्च" "बालिशोक्तिः" "स्वीयापाटवं प्रकाशयांचक्रुः" इत्यादयः प्रलापा एव परमतखण्डनसाधनमित्यभिसंदधानो महताडम्बरेण विधवोद्वाहविवेकं रचयामास। तमिमं समीक्ष्य कथमयमात्मानमपरिज्ञाय साहसिकः पर्वतोत्तोलने मशक इव प्रवृत्त इति संजातविस्मयाः पुरा यत्र सकलभारतवर्षालङ्करणभूता व्युत्पन्ना आसंस्तस्येदानीं दक्षिणदेशस्येदृशी दुर्दशा यत्रैवंविधा अव्युत्पन्ना निःशङ्कं खेलन्ति निर्भया निर्व्रीडाश्च प्रलपन्तीति समुत्पन्नखेदास्तद्व्युत्पत्तिं प्रकाशयितुमुद्यतामहे। यद्यप्येतादृशस्य महात्मनः स्वत एव प्रकाशमानतया नास्ति तद्व्युत्पत्तिप्रकाशने परव्यापारापेक्षा तथापि रसिकजनमनःकुतूहलाय द्वित्रस्थलीयतत्पाटवं प्रदर्श्यते।

अत्रायमुपक्रमग्रन्थो विधवोद्वाहशङ्कासमाधेः।

"स्वत्वान्तरमिव विवाहप्रयोज्यं स्वत्वं पतिनिष्ठेन क्लीबत्वादिना दोषेण न विनश्यति, न वा नोत्पद्यते, इति। क्लीबत्वपातित्ययोर्दायनिमित्तस्वत्वातिरिक्तस्वत्वनाशकत्वे तथाविधस्वत्वोत्पत्तिप्रतिबन्धकत्वे च मानाभावाद्"। इति।

अत्र विधवोद्वाहविवेकः।

स्वत्वान्तरमिव विवाहप्रयोज्यं स्वत्वं पतिनिष्ठक्लीबत्वपातित्यादिस्मृत्युक्तदोषमूलकान्यविवाहजन्यस्वत्वोत्पत्त्यव्यवहितपूर्वक्षणे विनश्यति, न वा उत्पद्यते, तादृशदोषाणां वचनबलाद्दायनिष्ठस्वत्वनाशकत्वतदुत्पत्तिप्रतिबन्धकत्ववद् विवाहविधिवाक्योक्तदोषमूलकवैधविवाहस्यापि पूर्वविवाहप्रयोज्यस्वत्वनाशकत्वकल्पनाया दोषाणां तदुत्पत्तिप्रतिबन्धकत्वकल्पनायाश्च स्वरसत एवौचित्यम्। पतिदोषमूलकपुनर्विवाहविधायकमन्वादिवचनेभ्यस्तथैव प्रतीतेः। यथा क्लीबपतितादीनां दाये स्वत्वानुत्पत्तौ तेषां दायनियामकवाक्येषु वर्ज्यत्वेन परिगणनं प्रमाणं तथा विवाहविधिवाक्येष्वपि कतिपयदोषविशिष्टानां वराणां वर्ज्यत्वेन परिगणनमेव तेषां स्वत्वनाशे तदनुत्पत्तौ च प्रमाणम्। इति।

अत्रेदं विभाव्यताम्। यद्यपि पुनर्विवाहप्रापकत्वेन भवदभिमतानां वचनानां नास्ति विधवोद्वाहप्रापकत्वमिति स्पष्टं निरूपितं विधवोद्वाहशङ्कासमाधौ, निरूपयिष्यते च विस्तरेणास्माभिरपि विधवोद्वाहविवेकपरीक्षायां तथापि तेषां वचनानां तत्प्रापकत्वमभ्युपेत्यापि वदामः, प्रथमविवाहकालावच्छिन्नानां पातित्यादीनां दोषाणामेव स्वत्वोत्पत्तिं प्रति प्रतिबन्धकत्वं पूर्वविवाहजनितस्वत्वनाशकत्वं तु दोषमूलकपुनर्विवाहस्येति वैषम्यं कुतः प्रतीतम्। का वा भवतां साध्यसिद्धिक्षतिर्दोषाणामेव स्वत्वनाशकत्वकल्पनायां येन दोषमूलकद्वितीयविवाहस्य स्वत्वनाशकत्वं कल्प्यते। महांश्चात्र स्वरसो यद् दृष्टान्ते दोषाणामेव स्वत्वनाशकत्वं दार्ष्टान्तिके च दोषमूलकविवाहान्तरस्य तदुत्प्रेक्ष्यते। इदं चात्यन्तोपहासास्पदं यदस्मदीयनिबन्धस्थितं स्वत्वान्तरमिवेत्येतदविचार्यैव स्वयमपि लिख्यते। किं चान्यत् स्वत्वं द्वितीयविवाहविनाश्यं संभाव्यते यद् दृष्टान्तभूतं सत् स्वत्वान्तरमिवेति प्रयोक्तारं भवन्तमिक्ष्वाकूणामस्माकूणामित्यादिन्यायविषयपरिहासात् समुद्धरेत्। अस्माकं तु क्रयादिनिमित्तकं स्वत्वं दृष्टान्तभूतं भवितुमर्हतीति नानुपपत्तिः। किं च "न वोत्पद्यते" इत्यन्तोल्लेख्यप्रतिज्ञाया हेतोः प्रदर्शनं "स्वरसत एवौचित्य"मित्यन्तेन, तथा च तस्य प्रथमान्तत्वमयुक्तम्। यत इतिप्रभृतिपदाध्याहारेण योजयितुं शक्यत इति चेदध्याहारेण लक्षणया वा किंकिं न योजयितुं शक्यते। किं च "यथेत्यादिना प्रमाण"मित्यन्तेन पूर्ववाक्यप्रतिपादितादधिकं किं प्रतिपादितमिति निरूप्यताम्।

विधवोद्वाहशङ्कासमाधिः।

"लोके क्रयप्रतिग्रहादिभिः क्लीबपतितयोरपि स्वत्वोत्पत्तिदर्शनात्"

अत्र विधवोद्वाहविवेचकस्याक्षेपः।

"तथा स्वत्वोत्पत्तौ क्लीबपतितादीनां मन्वाद्युक्तमनंशित्वमपि न स्यात्। अस्मन्मते त्ववैधक्रयप्रतिग्रहाद्युत्पन्नस्वत्वस्याप्यवैधत्वेन तस्य विवाहादिप्रयोज्यस्वत्वेन तौल्याभावेनादोषाद्" इति।

अत्रोच्यते। "क्लीबोऽथ पतितस्तज्ज" इतिप्रभृतिवचनैः पुत्रत्वादेर्दायस्वत्वनिमित्तता तत्तद्वचनैर्बोध्यमाना क्लैब्यादिदोषाभावविशिष्टपुत्रत्वादौ निर्धार्यते, पुत्रत्वादिना दाये स्वत्वोत्पत्तौ दोषाभावस्य सहकारित्वं वा प्रतिपाद्यते। क्रयादिना स्वत्वोत्पत्तौ तु नैवं, मानाभावात्। नहि यत्किंचित्स्वत्वस्य कारणतावच्छेदकं सहकारिकारणं वा स्वत्वमात्रस्य भवितुमर्हति। तथासति दुहितृत्वनिष्ठस्वत्वकारणताया अवच्छेदकस्य तादृशस्वत्वकारणस्य वा पत्यभावस्य पुत्रत्वनिष्ठकारणतावच्छेदकत्वस्य पुत्रत्वजन्यस्वत्वं प्रति कारणत्वस्य वाऽऽपत्तेः। तस्माद् यस्य यादृशस्वत्वं प्रति निमित्तत्वं प्रमाणप्रमितं तदेव तत् प्रति निमित्तं क्लैब्याद्यभावस्य च क्रयादिनिमित्तकस्वत्वं

Digitized by Google

प्रति कारणत्वं कारणतावच्छेदकत्वं वा न प्रमाणप्रमितमिति न क्रयादिनिमित्तकस्वत्वं प्रति स्वत्वसामान्यं प्रति वा तस्य कारणत्वं तदवच्छेदकत्वं वा वक्तुं शक्यते । इत्थं च दायनिमित्तकस्वत्ववृत्त्यसाधारणो धर्म एव क्लैब्याद्यभावावच्छिन्ना क्लैब्याद्यभावनिष्ठा वा या कारणता तन्निरूपितकार्यताया अवच्छेदकस्तस्य च वैवाहिके स्वत्वे ऽभावादेव न तत्र क्लैब्याद्यभावस्यापेक्षा । एवं स्थिते क्लैब्याद्यप्रतिबध्यत्वाविनाश्यत्वाभ्यां तुल्यमेव वैवाहिकं स्वत्वं क्रयादिनिमित्तकेन स्वत्वेन । यत्तु वैधत्वावैधत्वाभ्यां भेदो वैवाहिकस्वत्वक्रयादिनिमित्तकस्वत्वयोरित्युच्यते, तत्र वैधत्वं विधेयत्वं विहितजन्यत्वं वा, नाद्यः । वैवाहिकेऽपि तदसंभवात् । नान्त्यः । उद्वहेदितिवत् क्रीणीयात् प्रतिगृह्णीयादितिप्रभृतिविधिबोधितनिमित्तकत्वस्य क्रयादिनिमित्तकस्वत्वेऽप्यविशिष्टत्वात् । अस्तु वा कथं चित्तयोर्विशेषस्तथापि क्लैब्याद्यनाश्यत्वादौ को विशेषः । न च नष्टे मृते इत्यादिना वैवाहिकस्वत्वस्य क्लैब्यादिप्रतिबध्यत्वादस्ति विशेषः । दायलाभादिषु वित्तागमेषु विवाहस्य पृथगनिर्देशेन प्रतिग्रहक्रयादिष्वेव विवाहस्याप्यन्तर्भावेण वस्त्वन्तरनिष्ठक्रयादिनिमित्तकस्वत्वं प्रति क्लृप्तसामग्र्यैव वैवाहिकस्वत्वस्याप्युपपत्तौ क्लैब्याद्यभावादेस्तत्सामग्रीघटकत्वकल्पने गौरवात् नष्टे मृतइत्यादेर्वरदोषस्यानुशयहेतोर्बाधकत्वेनैवोपन्यासस्योपपादितत्वात् ।

यत्तु कन्यादानं न पितृस्वत्वनिवर्तकमिति प्रतिज्ञाय तत्रोपोद्बलकतया कन्यादानवाक्ये कन्यां० इत्यादि संप्रददे इत्युत्तरं न ममेति त्यागोच्चारणाभाव इति केचिदित्युक्तं प्रयोगरत्नकृता, दौहित्रस्यानपत्यमातामहरिक्थाधिकारः पुत्रिकाधर्मश्च संगच्छते, इत्युक्तं, तदत्यन्तमसमञ्जसम् । दाधातुनैव संप्रोपसृष्टेन दातृस्वत्वनिवृत्तिलाभेन न ममेत्युच्चारणे पौनरुक्त्यप्रसङ्गात् तन्नोच्चारणीयमित्याशयेन कैश्चित्तत्प्रयोगस्य प्रतिषेधात् । न ममेतिवाक्ये संबन्ध्यन्तरसमर्पकपदापेक्षायां पूर्वप्रक्रान्तकन्यापदस्यैवावश्ययोजनीयतया सन्निरूपकार्थकसमभिव्याहृतषष्ठ्या आकाङ्क्ष्यमाणसंबन्धेतरसंबन्धबोधकताया अस्वारसिकतया कन्यात्वे दातृनिरूपितत्वाभाव एव नञा स्वरसतः प्रतीयेतेत्यभिप्रायेण तत्प्रतिषेधाद्वा । रिक्थाधिकारे स्वत्वस्य तु कथमप्युपयोगो न संभाव्यते इति मातामहरिक्थाधिकारमात्रेण का ऽऽशा स्वत्वस्य । एवं हि रिक्थाधिकारिणो पितुर्गुरो राज्ञश्चापि निर्देशात्तेष्वपि स्वत्वमापद्येतेति साधु धर्मशास्त्रे व्युत्पत्तिं समपादयद् भवान् ।

एवं पितुः स्वत्वनिवृत्तावपि दुहितरि दौहित्रे वा पुत्रिकाधर्मस्य पुत्रत्वसंपादकत्वे का ऽसंगतिः । नहि पुत्रत्वं स्वत्वव्याप्यं येन स्वत्वमाक्षिपेत् । गर्भदासादौ स्वत्वाभावे ऽपि पुत्रत्वदर्शनेन व्यभिचारात् ।

इदं महदाश्चर्यं, यद्

"विधवा या भवेत्कन्या निर्दोषा भर्तृवर्ज्जिता ।
तस्या वासः पितुर्वेश्म सलज्जा चैव सर्वदा ,, ॥

इति वदता पराशरेण विधवायाः पितृवेश्मनि वासविधानात् पितुः स्वत्वमाक्षिप्यते, पितृस्वत्वनाशे तु तदसंगतिरिति चोच्यते,, नहि कस्य चिद्गृहे वासविधानेन तस्य स्वत्वं कल्पयितुं युक्तं, नहि यो यस्य स्वं स एव तस्य गृहे वसतीति नियमः । नहि पथिकब्राह्मणस्य कुलालगृहे वासस्य विहितत्वे ऽपि कुलालस्वत्वं तस्मिन् भवादृशाद्व्युत्पन्नादृते कश्चिदुत्प्रेक्षेत ।

यदपि दानजन्यस्वत्वस्य संबन्धतया समवायातिरिक्तसंबन्धसामान्यस्य चानित्यतया स्वत्वसंबन्धस्याप्यनित्यत्वेनान्यविवाहस्वत्वोत्पत्तिपूर्वक्षणे नाश एवेति स्वीयतार्किकत्वप्रदर्शनायोक्तं,

तेन चातीव नैयायिकधुरीणत्वं प्रकाशितम् । क्व वयं स्वत्वस्य नित्यतां वदामो यत्रैतावान् भवतः स्वत्वस्यानित्यत्वोपपादने फटाटोपः, विवाहनिमित्तकस्वत्वस्य क्लैब्याद्यनाश्यत्वं परं वदामस्तत्रानित्यत्वोपपादनेनापि किम् । नह्यनित्यं स्वत्वमित्येतावता भवदभिमतक्षणविशेषे तन्नाश उचितः । समवायातिरिक्तसंबन्धमात्रस्यानित्यत्वकथनं तु महतः पदार्थपरिचयपरिपाकस्य फलम् । गमने कालभेदस्य यः संबन्धो भेदे च कालस्य यः संबन्धो भेदे चाखण्डोपाधेरभावत्वस्य च यः संबन्धस्ते किमनित्या अथ च किं समवायातिरिक्ता न भवन्तीति न किं चिदेतत् ।

विधवोद्वाहशङ्कासमाधिः ।

न चैवं सति क्लीबाय वाग्दत्ताया अन्यस्मै दानमसंगतं स्यादिति वाच्यम् । नहि तत्रान्यस्मै दानं क्लीबादिस्वत्वोत्पत्त्यभावात्, किं तु दात्रनुशयजन्यप्रतिग्रहीतृस्वत्वनाशात् । यथा क्रीतानुशयादौ"

दुष्टाय दाने सप्तपद्युत्तरं तु न दात्रनुशयः । तत्र देवानां दातृत्वात्" इति ।

अत्र विधवोद्वाहविवेचकः ।

यत्तु मनुष्यकर्तृकवाग्दाने दात्रनुशयस्य सत्त्वात्तदुत्तरं दोषदर्शनेन तादृशदाननिवृत्तावपि देवानां सर्वज्ञत्वात्तत्कर्तृकदाने ऽनुशयासंभवाच्च तद्दानोत्तरं विवाहसंस्कारनिवृत्तिरित्युक्तं तन्न । मनुष्यकर्तृकदानवद्देवकर्तृकदाने ऽपि मनुष्यानुशय-

Digitized by Google

स्यावश्यकत्वात् । अन्यथा तद्दानोत्तरं कुत्रापि दोषनिश्चयज्ञाने देवानां सर्वज्ञत्वभङ्गापत्तिः" इति प्रलपति ।

तत्रायमेतस्य महान् दुर्विनयो यदयमनुक्तमेवानुवदति, आर्यचरणैस्तु दात्रनुशयेन प्रतिग्रहीतृस्वत्वनाश उच्यते, सप्तपद्युत्तरं तु प्रतिग्रहीतृस्वत्वनाशको दात्रनुशयो न संभवतीत्युच्यते, तत्रायं "दाननिवृत्तावपि" इति "न विवाहसंस्कारनिवृत्ति"रिति चानुवदति । क चते भवतो दानस्येच्छारूपस्यानुशयशतेनाप्यनिवर्तनीयस्य तेन निवृत्तिं वदेत् । तस्यैव च व्युत्पत्तिशिरोमणेर्भवत एव "मनुष्यानुशये स्वकर्तृकदानजन्यस्वत्वनिवर्तकत्वस्यैव देवकर्तृकदानजन्यस्वत्वनिवर्तकत्वस्याप्यवश्यवक्तव्यत्वात्" इत्येतदर्थतात्पर्येण "मनुष्यकर्तृकदानवद्दैवकर्तृकदानेऽपि मनुष्यानुशयस्यावश्यकत्वात्" इति लेखः शोभते । दाने कथमप्यनुशयस्यावश्यकताया वक्तुमशक्यत्वात् । यदि च "दाने" इत्यस्य लक्षणया "दानजन्यस्वत्वनिवृत्तौ" इत्यर्थोऽभिप्रेयते, तर्हि चैत्रो मूर्ख इत्युक्त्वा चैत्रोयपर्यनुयोगकाले चैत्रपदेन लक्षणया चैत्रशत्रुरभिप्रेत इति व्याचक्षाणोऽप्यप्रतिवक्तव्यः स्यात् । सर्वस्यापि वाक्यजातस्यैवं क्रमेण विपरीतार्थकत्वसंभावनया सर्वस्यैव वाग्व्यवहारस्य लेखव्यवहारस्य च समुच्छेदप्रसङ्गः स्यात् । अत एवोक्तं शिरोमणिभिः "वादिवाक्ये न लक्षणा" इति । तस्मात् स्पष्टमेवैतस्य दानपदार्थानुशयादिपदार्थाज्ञानं निश्चीयते । एवं कासां चित् स्त्रीणां दुरदृष्टानां तद्विपाकाय बुद्धिपूर्वमेव दैवेदुष्टाय दानस्य संभाव्यमानत्वेन सप्तपद्युत्तरं दोषनिश्चये कथं देवानां सर्वज्ञत्वभङ्गप्रसङ्ग इत्यादि सुधियो विदांकुर्वन्तु ॥ शम् ।

तदित्थं स्थालीपुलाकन्यायेन किं चित् पुनरुद्वाहविवेचकव्युत्पत्तिपाटवं प्रकटीकृतम् । इतः स्वल्पेनैव कालेन तदीयशङ्काभासानां सर्वेषां निराकरणं सङ्क्षेपत उपनिबध्य काशीविद्यासुधानिधिचकोरविचारगोचरीकरिष्यते ॥

काशीस्थराजकीयपाठालये
सांख्यशास्त्राध्यापकेन बालशास्त्रिणा

THE VAIŚESHIKA APHORISMS OF KAṆÁDA.

FIRST BOOK, SECOND DAILY LESSON.

(*Continued from page* 245.)

Causation. कारणाभावात् कार्याभावः ॥ १ ॥

Aph. 1. From Non-existence of cause is Non-existence of effect.

[1] It may be said, "In the foregoing daily lesson similarity [between the Categories, Substance, Quality, and Action], as constituted by the notion of effect and the notion of cause, has been explained. How is this possible? for while the relation between effect and cause is not demonstrated it is like [talking about] the horn of a hare." To obviate this [Kaṇáda] establishes the relation between effect and cause. V.

[2] For it is seen that even when earth, a potter's wheel, water, a potter, thread &c., are brought together, from Non-existence of a potter's staff there is Non-existence of the pot, and though earth, water &c., be brought together, from Non-existence of a seed there is Non-existence of a shoot. This [relation] between the potter's staff and the pot, and between the seed and the shoot, is impossible without the relation of cause and effect; for otherwise there would be Non-existence of the pot also in the case of Non-existence of a loom, and Non-existence of the shoot even in the case of Non-existence of fragment of stone &c. Moreover it is observed that a pot, a piece of cloth, and the like exist only from time to time. This too would be impossible without the relation between cause and effect; for existence from time to time of things which are, which consists in their being at one time and not being at another, is impossible without connexion with a cause. For in this case [were there no connexion with a cause] a thing might be or not be but could not be from time to time, since an existing thing is not Non-existent, nor does it come into existence without a cause, nor does it come into existence fortuitously, nor does it come into existence from anything unreal such as the horn of a hare, but from a really existing limit such as a staff or a loom, as is seen in effects such as a pot or a piece of cloth. Now the limit is the cause. Moreover were there no relation of cause and effect there would no activity or inactivity, for in

[1] ननु पूर्वाह्निके कार्यत्वघटितं कारणत्वघटितञ्च साधर्म्यमुक्तं तत्कथं सङ्गच्छते कार्यकारणभावस्यासिद्धत्वेन शशविषाणसमानत्वादित्यतः कार्यकारणभावमेव व्यवस्थापयति ॥

[2] दृश्यते हि मृच्चक्रसलिलकुलालसूत्रादौ समवहितेऽपि दण्डाभावाद्घटाभावः मृत्सलिलादौ समवहितेऽपि बीजाभावादङ्कुराभावः स च दण्डघटयोर्बीजाङ्कुरयोर्वा कार्यकारणभावमन्तरेणानुपपन्नः । अन्यथा वेमाद्यभावेऽपि घटाभावः शिलाशकलाद्यभावेऽप्यङ्कुराभावः स्यात् किञ्च घटपटादीनां कादाचित्कत्वमनुभूयते तदपि हेतुफलभावमन्तरेणानुपपन्नं न हि किञ्चित्कालासत्त्वे सति किञ्चित्कालसत्त्वरूपं कादाचित्कत्वं भावानां कारणापेक्षामन्तरेण सम्भवति तदा हि स्यादेव न स्यादेव वा न तु कदाचित् स्यात् न हि भावो न भवत्येव नाप्यहेतोर्भवति नाप्यकस्मादेव भवति न वा निरुपाख्यादेव शशविषाणादेर्भवति किन्तु दण्डवेमादेः सोपाख्यस्यावधेर्घटपटादौ कार्ये दर्शनादवधिस्तु कारणमेव एवं कार्यकारणभावाभावे प्रवृत्तिनिवृत्ती न स्यातां तथा च निरीहं जगज्जायेत न हीष्टसाधनताज्ञानमन्तरेण प्रवृत्तिरनिष्टसाधनताज्ञानमन्तरेण निवृत्तिः ॥

Digitized by Google

such a case the universe would be desireless, since without a knowledge of the means of attaining that which is desired there would be no such thing as activity, and without the knowledge of the means of avoiding that which is undesired there would be no such thing as inactivity. U.

Continued. न तु कार्याभावात् कारणाभावः ॥ २ ॥

Aph. 2. But there is not from Non-existence of effect Non-existence of cause.

[1] If there were not a restriction in the relation between cause and effect, it would follow also that if the effect should not exist, the cause would not exist. The rule is not that Non-existence of effect results in Non-existence of cause, but that Non-existence of cause results in Non-existence of effect. Therefore the practical application of this introductory section of two aphorisms is that persons desirous of emancipation are concerned in Non-existence of birth for the sake of Non-existence of pain, in Non-existence of activity for the sake of Non-existence of birth, in Non-existence of faults for the sake of Non-existence of activity, in the cessation of false knowledge for the sake of Non-existence of faults, and in forming a mental representation of the soul for the sake of cessation of false knowledge. U.

Generality and Particularity. सामान्यं विशेष इति बुद्ध्यपेक्षम् ॥ ३ ॥

Aph. 3. Generality and Particularity both depend upon Conception.

[2] After the enunciation and definition of the [first] three Categories he now states the definition (characteristic) of the Category Generality [formerly] enunciated. Generality is twofold, highest and not highest. The highest is being, the not-highest is substantiality &c., included under being. The distinguishing property of Generality and Particularity is Conception. Extensive conception is that of Generality, exclusive Conception is that of Particularity.

[1] यदि कार्यकारणभावनियमो न भवति तदा कार्याभावादपि कारणाभावः स्यात् कार्याभावः कारणाभावं प्रत्यतन्त्रं कारणाभावस्तु कार्यभावं प्रति तन्त्रं तेन दुःखाभावार्थं जन्माभावे जन्माभावार्थं प्रवृत्त्यभावे तदर्थञ्च दोषाभावे तदर्थं मिथ्याज्ञाननिवृत्तये तदर्थञ्चात्मसाक्षात्काराय मुमुक्षूणां प्रवृत्तिः प्रयोजनमौपोद्घातिकस्यास्य द्विसूत्रप्रकरणस्य ॥

[2] पदार्थत्रयोद्देशलक्षणानन्तरमिदानीमुद्दिष्टस्य सामान्यपदार्थस्य लक्षणमाह । सामान्यं द्विविधं परमपरञ्च तत्र परं सत्ता अपरं सत्ताव्याप्यं द्रव्यत्वादि तत्र सामान्यस्य तद्विशेषस्य च लक्षणं बुद्धिरेव । अनुवृत्तबुद्धिः सामान्यस्य व्यावृत्तबुद्धिर्विशेषस्य ॥

[1] Generality is the highest, and Particularity the not-highest, Generality. Accordingly there are two [kinds of Generality.] That is dependant upon Conception which has Conception for its chracteristic. Generality then, is twofold, highest and not-highest. The highest Generality is being, the not-highest Generality is Substantiality &c. The distinguishing property of the highest and not-highest kinds of Generality is Conception, the Conception of extensiveness being the characteristic of Generality (i. e. of highest Generality) and the Conception of non-extensiveness the characteristic of Particularity (i. e. of not-highest Generality). Extensiveness is existence in many places, non-extensiveness is existence in few places. Being, therefore, is the highest because it exists in more places than any other Generality, and the classes Substantiality &c., are not-highest because they exist in fewer places than being, but are also highest because they exist in more places than the notion of earth &c., so that, Generality or the highest and Particularity or the not-highest are not absolute but dependant on (i. e. relative to) Conception. The following hindrances to [the formation of] classes are enumerated by the Nyáya teachers, 'Indivisibility of the individual, identity confusion, infinite regression, loss of form, and absence of connection are the aggregate of things preventing classes.' Thus the notion of Ether is not a class because it exists only as one individual. The notions of a pitcher and a water-pot are not two classes because there are neither more nor less individuals [included in either]. The notions of substance and form are not a class because of the confusion pervading the one individual by reason of two common substrata of absolute mutual Non-existence. Generality is not a class, for were it so, there would be a regress to infinity. The notion of Particularity is prevented from being a class by loss of form, for

[1] सामान्यं परं विशेषः अपरं सामान्यम् इति द्वयं बुद्ध्यपेक्षं बुद्धिरपेक्षा लक्षणं यस्य तत् तथा च सामान्यं द्विविधं परमपरञ्च तत्र परसामान्यं सत्ता द्रव्यत्वादिकन्त्वपरसामान्यं तत्र सामान्यविशेषयोः परापरयोर्लक्षणं बुद्धिरेव अनुवृत्तत्वबुद्धिः सामान्यस्य व्यावृत्तत्वबुद्धिर्विशेषस्य लक्षणम् अनुवृत्तत्वम् अधिकदेशवृत्तित्वं व्यावृत्तत्वमल्पदेशवृत्तित्वं तथा च सत्तायाः सर्वसामान्यापेक्षया ऽधिकदेशवृत्तित्वात् परत्वमेव द्रव्यत्वादिजातेस्तु सत्तापेक्षया न्यूनदेशवृत्तित्वादपरत्वं पृथिवीत्वाद्यपेक्षया ऽधिकदेशवृत्तित्वात् परत्वमपीति परत्वरूपं सामान्यत्वम् अपरत्वरूपं विशेषत्वञ्च न नियतं किन्तु बुद्ध्यपेक्षमिति । जातिबाधका उक्ता न्यायाचार्यैः व्यक्तेरभेदस्तुल्यत्वं सङ्करो ऽथानवस्थितिः । रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रह इति । तत्रैकव्यक्तिकत्वादाकाशत्वं न जातिः अन्यूनानातिरिक्तव्यक्तिकत्वाद् घटत्वं कलसत्वञ्च न जातिद्वयं परस्परात्यन्ताभावसमानाधिकरणयोरेकव्यक्तिसमावेशेन सङ्करेण भूतत्वं मूर्तत्वञ्च न जातिः अनवस्थाभयात् सामान्यत्वं न जातिः विशेषत्वं व्यावृत्तस्वभावस्य रूपहानिर्विशेषत्वजातिबाधिका समवायसम्बन्धाभावात् समवायत्वं न जातिः समवाये समवायान्तरस्वीकारे ऽनवस्थाप्रसङ्गात् ॥

Digitized by Google

particularity is naturally exclusive...... The notion of Inhesion is not a class, because of the Non-existence of connection by Inhesion, for from the assumption that Inhesion inheres in anything else a regression to infinity would follow. V.

Cp. The Muktávalí on Bháshá-parichchheda, 8. [1] 'The characteristic of Generality is Inhesion in more than one, together with eternity. It is said, 'Together with eternity', because Inhesion in more than one belongs also to Conjunction &c. It is said 'In more than one,' because Inhesion together with eternity belongs also to Ether, to Extension, and the like.

A. E. G.

To be continued.

RAMAYANA

BOOK I. CANTO II.

The wondrous tale Valmiki heard,
And treasured in his heart each word.
To him whose fame the lay rehearsed
He paid his mental worship first;
Then with his pupil humbly bent
Before the saint most eloquent.
Thus honoured and dismissed the seer
Rose upward to his heavenly sphere.
Valmiki bent his footsteps where
The Tamasa flows cool and fair.
He stood and saw the ripples roll
Pellucid o'er a pebbly shoal.
To Bharadvaja by his side
He turned in ecstasy, and cried:
'See, pupil dear, this lovely sight,
The liquid crystal pure and bright
With not a speck or shade to mar,
And clear as good men's bosoms are.
Here on the brink thy pitcher lay,
And bring my zone of bark, I pray.
Here will I bathe: the rill has not,
For men to bathe, a fairer spot.
Do quickly as I bid, nor waste
The precious time; away, and haste.'

Obedient to his master's hest
Quick from the cot he brought the vest;
The hermit took it from his hand,
And tightened round his waist the band;
Then duly dipped and bathed him there,
And muttered low his secret prayer.
To spirits and to gods he made
Libation of the stream, and strayed
Viewing the forest deep and wide
That spread its shade on every side.
Close by the stream he saw a pair
Of curlews sporting fearless there.
But suddenly with evil mind
An outcast fowler stole behind,
And, with an aim too sure and true,
The male bird near the hermit slew.
The wretched hen in wild despair
With fluttering pinions beat the air,
And shrieked a long and bitter cry
When low on earth she saw him lie,
Her loved companion, quivering, dead,
His dear wings with his lifeblood red;
And for her golden-crested mate
She mourned, and was disconsolate.

The hermit saw the slaughtered bird,
And all his heart with ruth was stirred.
The fowler's impious deed distressed
His gentle sympathetic breast,
And while the curlew's sad cries rang
Within his ears, the hermit sang:
'No fame be thine for endless time,
Because, base outcast, of thy crime,
Whose cruel hand was fain to slay
One of this gentle pair at play!'
E'en as he spoke his bosom wrought
And laboured with the wondering thought
What was the speech his ready tongue
Had uttered when his heart was wrung.
He pondered long upon the speech,
Recalled the words and measured each,
And thus to Bharadvaja cried,
Aye ready by his master's side:
'With equal lines of even feet,
With rhythm and time and tone complete,
The measured form of words I spoke
In shock of grief be termed a sloke.'
And Bharadvaja, nothing slow
His faithful love and zeal to show,
Answered those words of wisdom: 'Be
The name, my lord, as pleases thee.'

Still on this thing the hermit's thought
Kept brooding, as his home he sought;
And Bharadvaja paced behind,
A pupil sage of lowly mind,
And in his hand a vase he bore
With pure fresh water brimming o'er.
Soon as they reached their calm retreat
The holy hermit took his seat;

---

[1] सामान्यमिति। तल्लक्षणन्तु नित्यत्वे सत्यनेकसमवेतत्वम्। अनेकसमवेतत्वं संयोगादीनामप्यस्त्यत उक्तम्। नित्यत्वे सतीति। नित्यत्वे सति समवेतत्वं गगनपरिमाणादीनामप्यस्त्यत उक्तम् अनेकेति॥

His mind from worldly cares recalled,
And mused in deepest thought enthralled.

Then glorious Brahmá, Lord Most High,
Creator of the earth and sky,
The four-faced God, to see the sage
Came to that humble hermitage.
Soon as the mighty God he saw,
Up sprang the saint in wondering awe.
Mute, with clasped hands, his head he bent,
And stood before him reverent.
With greeting as beseems such guest
He spoke, and prayed the God to rest;
Gave water for his blessed feet,
Brought offerings, and prepared a seat.
In honoured place the God Most High
Sat down, and bade the saint sit nigh.
There sat before Valmiki's eyes
The Father of the earth and skies;
But still the hermit's thoughts were bent
On one thing only, all intent
On that poor hen bird's mournful fate
Lamenting for her slaughtered mate;
And still his lips in absent mood,
The verse that told his grief, renewed:
'Woe to the fowler's impious hand
That did the deed that folly planned;
That could to needless death devote
The curlew of the tuneful throat!'

The heavenly Father smiled in glee,
And said, 'O best of hermits, see,
A verse, unconscious, thou hast made;
No longer be the task delayed.
The tuneful lines thy lips rehearsed
Spontaneous from thy bosom burst.
Then come, O best of seers, relate
The tale of Rama good and great.
The tale thou hast from Narad heard:
Anew compose it, and reword.
Of all the deeds his arm has done
Upon this earth, omit not one,
And thus the glorious life record
Of that wise, brave, and virtuous lord.
His every act to day displayed,
His secret life to none betrayed:
What Lakshman, what the Giants wrought,
Both high emprise and hidden thought:
And all that Janak's child befell
Where all could see, where none could tell:
The whole of this shall truly be
Made known, O best of saints, to thee.
In all thy poem, by my grace,
No word of falsehood shall have place.
Begin the story, and rehearse
The tale divine in charming verse.
As long as in this firm-set land
The streams shall flow, the mountains stand,
So long in all the world, be sure,
The great Ramayan shall endure.
And while the poem made by thee
Thus famous on the earth shall be,
To higher spheres shalt thou arise
And dwell with me above the skies.'

He spoke, and vanished into air,
And left Valmiki wondering there.
The pupils of the holy man,
Moved by their love of him, began
To chant that verse, and ever more
They marvelled as they sang it o'er.
And thus the four-lined balanced rime,
Repeated over many a time,
In words that from the hermit broke
In shock of grief, became the sloke.
This measure now Valmiki chose
In which his story to compose.
In hundreds of such verses, sweet
With equal lines and even feet,
The saintly poet, might-souled,
The glorious deeds of Rama told.

NOTICES OF BOOKS.

Damayantí, A Tale in Sanskrit Prose, rendered from the Mahábhárata by Rámagati Nyáyaratna. We are glad to recommend to Sanskrit students this useful little school-book, a simple but generally elegant paraphrase of the first part of that charming episode of the Mahábhárata, the Nalopákhyána. The work does credit to the author's scholarship, reflecting, as it does, no faint glimmering of the beauty of the original.

Kávyaprakáśiká, Part VI, Sakuntalá and Kumára-Sambhava; Part VII, Mṛichchhakatiká,—with notes and Bengali Translation. This serial publication maintains its credit for the manner in which both the edition and version of the Sanskrit classics are being executed. The translations, faithful and often in the style of explanation, will be a help to the Bengali youth in understanding the original, and written as they are in neat and idiomatic language, they will be valuable acquisitions to Bengali literature.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

॥ ऋग्वेदसूचीपत्रम् ॥

ग्रन्थनामानि	पूर्णापूर्णविवेकः	पत्रसंख्या	लिपिकालः	लिपिभेदः	ग्रन्थकर्तृनामादिविवरणम्
१८ वेष्टनम्					
१ निरुक्तम्	खं	७५	१६६६	दे	सप्तमाध्यायमारभ्य त्रयोदशाध्यायपर्यन्तं शुद्धं प्राचीनं च
२ ऋग्वेदसंहिता	खं	७४	१६४५	दे	द्वितीयाष्टकं प्राचीनं शुद्धं च
३ संस्कारपद्धतिः	खं	१२५	०	दे	नारायणभट्टकृता जीर्णाऽशुद्धा च
४ शिक्षाभाष्यम्	सं	१५	१०३३	दे	प्राचीनमशुद्धं च
५ चातुर्मास्यम्	सं	३२	१०१४	दे	प्राचीनमशुद्धं च
१९ वेष्टनम्					
१ आप्तोर्यामप्रयोगः	खं	८८	०	दे	नृसिंहकृतः प्राचीनोऽशुद्धश्च
२ प्रयोगदीपिका	खं	३०	१६६२	दे	मञ्जुनाचार्यकृताऽशुद्धा जीर्णा च
३ दर्शपौर्णमासहौत्रम्	खं	३१	१६३३	दे	अशुद्धं जीर्णम्
४ आश्वलायनसूत्रव्याख्या	सं	१८४	१६६६	दे	महादेवकृता शुद्धा जीर्णा च
आश्वलायनगृह्यसूत्रम्	सं	३६	१५६६	दे	जीर्णं शुद्धं च
२० वेष्टनम्					
१ ऋग्विधानम्	खं	५	०	दे	जीर्णं शुद्धं च
२ ऋक्संहितापदम्	सं	५८	१०२१	दे	सप्तमाष्टकं जीर्णमशुद्धं च
३ आश्वलायनसूत्रम्	सं	२८	१६४५	दे	जीर्णं शुद्धं च
४ प्रातिशाख्यम्	खं	३१	०	दे	नवीनमशुद्धं च

॥ यजुर्वेदसूचीपत्रम् ॥

ग्रन्थनामानि	पूर्णापूर्णविवेकः	पत्रसंख्या	लिपिकालः	लिपिभेदः	ग्रन्थकर्तृनामादिविवरणम्
१ वेष्टनम्					
१ यजुर्वेदसंहिता	सं	४३२	१८४६	दे	पूर्णा प्राचीना शुद्धा च
२ वेष्टनम्					
१ प्रयोगवैजयन्ती	सं	३८५	१८०४	दे	महादेवकृता हिरण्यकेशिसूत्रव्याख्यारूपाऽशुद्धा च
३ वेष्टनम्					
१ गृह्यसूत्रभाष्यम्	सं	२००	१६१८	दे	गदाधरयाज्ञिककृतं प्राचीनमशुद्धं च
२ स्मार्तपदार्थसंग्रहः	सं	०	१८८०	दे	गङ्गाधरकृतः प्राचीनोऽशुद्धश्च
३ संस्कारपद्धतिः	सं	३४	१०६५	दे	आनन्दरामयाज्ञिककृता गर्भाधानादिविचारमयी शुद्धा प्राचीना च
४ पाकयज्ञपद्धतिः	सं	२३	०	दे	नवीनाऽशुद्धा च
५ निगमपरिशिष्टम्	सं	१८	१०१८	दे	कात्यायनकृतं शुद्धं प्राचीनं च

Digitized by Google

॥ यजुर्वेदसूचीपत्रम् ॥

ग्रन्थनामानि	पूर्णापूर्णविवेकः	पत्रसङ्ख्या	लिपिकालः	लिपिभेदः	ग्रन्थकर्तृनामादिविवरणम्
६ स्वाचारचतुर्दशीपरिशिष्टम्	सं	५	१७०६	दे	द्विवेदनारायणकृतं शुद्धं प्राचीनं च
७ रुद्रविधानम्	सं	४६	१८४५	दे	अशुद्धं प्राचीनम्
८ व्रतबन्धपद्धतिः	सं	२४	१८६७	दे	अशुद्धा नवीना
९ विवाहपद्धतिः	सं	२३	१८६७	दे	अशुद्धा नवीना
१० प्रयोगपद्धतिः	खं	२६	१६४५	दे	गङ्गाधरभट्टकृताऽशुद्धा प्राचीना च
११ प्रयोगपद्धतिः	सं	१४२	०	दे	हरिहरकृतगृह्यसूत्रव्याख्यारूपा शुद्धा प्राचीना
१२ सज्जनवल्लभः	सं	७८	१८४६	दे	जयरामकृतः कात्यायनगृह्यभाष्यापरनामा नवीनोऽशुद्धश्च
१३ परिशिष्टम्	सं	७	१८४५	दे	शुद्धं प्राचीनं च
४ वेष्टनम्					
१ शतपथब्राह्मणम्	सं	६२३	१८३८	दे	शुद्धं प्राचीनं च
५ वेष्टनम्					
२ देवभाष्यम्	सं	२०५	१८०१	दे	कात्यायनसूत्रव्याख्यानरूपं प्रथमद्वितीयतृतीयपञ्चमाध्यायात्मकं प्राचीनमशुद्धं च
६ वेष्टनम्					
१ यजुर्भाष्यम्	सं	२१६	१८३४	दे	उव्वटकृतं प्राचीनं शुद्धं च
७ वेष्टनम्					
१ शतपथब्राह्मणभाष्यम्	सं	२०८	१८४६	दे	हरिहरस्वामिकृतं हविर्यज्ञकाण्डात्मकं नवीनमशुद्धं च
२ शतपथब्राह्मणभाष्यम्	सं	२२४	१८५२	दे	माधवकृतं माध्यंदिनं द्वितीयकाण्डात्मकं नवीनमशुद्धं च
३ शतपथब्राह्मणभाष्यम्	सं	५६	१८५२	दे	माध्यंदिनं प्रथमकाण्डात्मकं नवीनमशुद्धं च
४ शतपथब्राह्मणभाष्यम्	सं	२११	०	दे	माध्यंदिनं प्रथमकाण्डात्मकं नवीनमशुद्धं च
५ ब्राह्मणभाष्यम्	खं	१२	०	दे	तैत्तिरीयशाखीयंसायनाचार्यकृतंनवीनमशुद्धंच
८ वेष्टनम्					
१ आपस्तम्बश्रौतसूत्रम्	खं	६१२	१६२४	दे	संकीर्णं प्राचीनमशुद्धम्
९ वेष्टनम्					
१ चयनपद्धतिः	सं	५३	१७८०	दे	नृसिंहकृता प्रचीनाऽशुद्धा च
२ सोमप्रयोगपद्धतिः	सं	१३०	१७८५	दे	प्राचीना शुद्धा
१० वेष्टनम्					
१ कात्यायनसूत्रभाष्यम्	खं	१३६	१६५०	दे	देवकृतं प्रथमाध्यायरूपं प्राचीनं शुद्धम्

Digitized by Google

॥ यजुर्वेदसूचीपत्रम् ॥

ग्रन्थनामानि	पूर्णापूर्णविवेकः	पत्रसङ्ख्या	लिपिकालः	लिपिभेदः	ग्रन्थकर्तृनामादिविवरणम्
२ कात्यायनसूत्रभाष्यम्	सं	६४	१००३	दे	देवकृतमेकोनविंशत्यध्यायात्मकं सोत्राम-णिविवरणं प्राचीनं शुद्धम्
३ कात्यायनसूत्रभाष्यम्	सं	११०	१६३३	दे	देवकृतं पञ्चविंशतितमाध्यायात्मकं प्राचीनं शुद्धम्
४ कात्यायनसूत्रपूर्वार्धम्	सं	७०	१५३१	दे	शुद्धतरं प्राचीनं च
११ वेष्टनम्					
१ आचारादर्शः	खं	५५	१००१	दे	श्रौतग्रन्थः प्राचीनः शुद्धश्च
२ वेददीपः	खं	६४३	१६६०	दे	महीधरकृतो यजुर्वेदपूर्वार्द्धविवृतिरूपः
१२ वेष्टनम्					
१ कल्पकारिकासारः	सं	५१	१०४५	दे	प्राचीनः शुद्धो मयूरवाहनकृतश्च
२ शुल्वसूत्रम्	सं	८	०	दे	प्राचीनं शुद्धं बोधायनीयम्
३ शुल्वसूत्रदीपिका	सं	५८	१६६६	दे	द्वारकानाथभट्टकृता प्राचीना शुद्धाऽशुद्धा च
४ प्रवर्ग्यसूत्रम्	सं	१६	०	दे	प्राचीनं शुद्धिरहितं बोधायनीयम्
५ सोमसूत्रम्	सं	७९	१६४६	दे	प्राचीनं शुद्धप्रायं च
६ प्रयोगसारः	सं	९१	०	दे	केशवस्वामिकृतः शुद्धः प्राचीनश्च
७ श्रौतचन्द्रिका	सं	९६	१६६०	दे	महादेववाजपेयिकृता प्राचीना शुद्धिरहिता च
८ कल्पभाष्यम्	सं	१२६	१८२४	दे	विद्यारण्यकृतं प्राचीनमशुद्धं च
९ दर्शपौर्णमासपद्धतिभाष्यम्	खं	११५	०	दे	विद्यारण्यकृतं प्राचीनमशुद्धं च
१० दर्शपौर्णमासमन्त्रार्थचन्द्रिका	सं	४३	१६३९	दे	पायगुण्डोपनामकवैद्यनाथकृताऽशुद्धा प्राचीना
११ अग्निष्टोमपद्धतिः	सं	१२०	१६९२	दे	केशवस्वामिकृताऽशुद्धा प्राचीना च
१३ वेष्टनम्					
१ पाकयज्ञपद्धतिः	सं	११५	१८५२	दे	चन्द्रचूडभट्टकृताऽशुद्धा प्राचीना च
२ अनाकुला वृत्तिः	खं	३०	०	दे	हरदत्तकृता शुद्धतरा प्राचीना च
३ प्रयोगरत्नम्	खं	१३५	०	दे	काशीदीक्षितकृतमशुद्धं प्राचीनं च
४ संस्कारपद्धतिः	खं	८०	०	दे	मञ्जुनाचार्यशिङ्ग्यकृता प्राचीना शुद्धप्राया च
५ पाकयज्ञादिपद्धतिः	सं	६५	१०६७	दे	चन्द्रचूडकृता प्राचीनाऽशुद्धा च
६ धर्मसूत्रम्	सं	३४	१०६७	दे	प्राचीनं शुद्धं च
७ गृह्यसूत्रम्	सं	४३	१६४०	दे	अध्यायषट्कं प्राचीनमशुद्धं च
८ मन्त्रप्रश्नः	सं	३९	१८०४	दे	नवीनोऽशुद्धश्च
९ गृह्यकारिका	खं	४६	०	दे	प्राचीनाऽशुद्धा च
१० मन्त्रपाठः	सं	१९	१००५	दे	प्राचीनोऽशुद्धश्च
११ धर्मसूत्रम्	सं	२४	१०३१	दे	प्राचीनमशुद्धं च

Digitized by Google

॥ यजुर्वेदग्रन्थोपचयम् ॥

ग्रन्थनामानि	सम्पूर्णासम्पूर्णविवेकः	पत्रसंख्या	लिपिकालः	लिपिभेदः	ग्रन्थकर्तृनामादिविवर्णनम्
१४ वेष्टनम्					
१ सोमप्रतिप्रस्थातृत्वप्रयोगः	सं	१७	०	दे	जीर्णः शोधनरहितश्च
२ सोमयाजनप्रयोगः	सं	३८	१८१५	दे	शुद्धः प्राचीनश्च
३ सोमयाजनप्रयोगः	सं	२४	१७३५	दे	शुद्धः प्राचीनश्च
४ सोमप्रयोगः	सं	५०	१७३५	दे	बोधायनकृतः शुद्धः प्राचीनश्च
५ सोमप्रयोगः	सं	१०२	१८५५	दे	गोविन्दकृतो नवीनः शुद्धश्च
६ पञ्चकाठकप्रयोगवृत्तिः	सं	१७	१७०५	दे	केशवस्वामिकृता प्राचीना शुद्धा च
७ आरुणकेतुप्रयोगः	सं	२१	१८५८	दे	तिलकभैरवकृतः शुद्धो नवीनश्च
८ महाग्निचयनप्रयोगः	सं	५३	१८०२	दे	बोधायनीयः प्राचीनः शुद्धश्च
९ प्रायश्चित्तप्रदीपः	सं	७७	१७६६	दे	सोमप्रायश्चित्तपर्यन्तो गोपालकृतः प्राचीनोऽशुद्धश्च
१० ऐष्टिकप्रायश्चित्तम्	सं	४१	१८६५	दे	बोधायनीयं नवीनं शुद्धं च
११ प्रायश्चित्तसारः	खं	२६	०	दे	दर्शपौर्णमासात्मकः प्राचीनः शुद्धश्च
१२ प्रायश्चित्तकारिका	सं	३२	१७४८	दे	गोपालकृता परिष्कृतिशून्या नवीना च
१३ दर्शपौर्णमासयज्ञतन्त्रम्	सं	३९	१६३९	दे	सायनाचार्यकृतं प्राचीनमशुद्धं च
१५ वेष्टनम्					
१ कात्यायनसूत्रपद्धतिः	खं	२००	१८१२	दे	अशुद्धा प्राचीना च
२ शुल्बभाष्यम्	सं	४२	१८२५	दे	कपर्दिस्वामिकृतमापस्तम्बशाखीयमशुद्धं प्राचीनं च
३ कात्यायनसूत्रभाष्यम्	खं	१११	१७००	दे	संक्षिप्तसूत्रार्थापरनामकं प्राचीनं शुद्धिरहितम्
४ याज्ञिकवल्लभा	खं	५८	१६३८	दे	महादेवसूनुदीक्षितयाज्ञिककृता जीर्णा शुद्धा च
५ श्रौतपद्धतिः	खं	८७	०	दे	जीर्णाऽऽकुला च
६ कर्कभाष्यम्	खं	३१	०	दे	संक्षिप्तभाष्यापरनामकं जीर्णमशुद्धं च
१६ वेष्टनम्					
१ प्रायश्चित्तचन्द्रिका	सं	६७	१८४८	दे	विश्वनाथदीक्षितकृता जीर्णाऽशुद्धा च
२ आधानयज्ञतन्त्रम्	खं	१००	१६५९	दे	सायनाचार्यकृतं यज्ञतन्त्रसुधानिधिस्थाग्निहोत्रप्रकरणीयं जीर्णं शुद्धं च
३ आधानपद्धतिः	खं	३९	०	दे	शुद्धतरा प्राचीना च
४ दर्शपौर्णमासप्रयोगः	सं	६४	१६९७	दे	अशुद्धः प्राचीनश्च
५ दर्शपौर्णमासपद्धतिः	सं	२९	१६६५	दे	बोधायनीया जीर्णा शोधनरहिता
६ चातुर्मास्यप्रयोगः	सं	१८	१७६५	दे	नारायणदीक्षितकृतोऽशुद्धः प्राचीनः
७ चातुर्मास्यपद्धतिः	सं	२६	०	दे	बोधायनीया शुद्धा प्राचीना च

Digitized by Google

॥ यजुर्वेदसूचीपत्रम् ॥

ग्रन्थनामानि	पूर्णापूर्णविवेकः	पत्रसङ्ख्या	लिपिकालः	लिपिभेदः	ग्रन्थकर्तृनामादिविवरणम्
८ नक्षत्रेष्टिपद्धतिः	सं	२६	१८४५	दे	बोधायनीया जीर्णाऽशुद्धा च
९ आपस्तम्बसूत्रविवरणम्	सं	३४	१८३७	दे	गोपालकृतमशुद्धं प्राचीनं च
१० रहस्येष्टिपद्धतिः	सं	११	५८१८	दे	बोधायनीया शोधनरहिता प्राचीना
११ दर्शपौर्णमासपद्धतिः	सं	३५	१८४५	दे	बोधायनीया शोधशून्या प्राचीना च
१२ प्रायश्चित्तेष्टिचन्द्रिका	सं	२१	०	दे	बोधायनीया जीर्णा शुद्धा च
१३ पशुबन्धप्रयोगः	सं	१५	१७६९	दे	प्राचीनः शुद्धतरश्च
१४ पशुकल्पपद्धतिः	खं	२२	०	दे	शुद्धतरा प्राचीना च
१५ पशुबन्धप्रयोगपद्धतिः	सं	१८	०	दे	अशुद्धा प्राचीना च
१६ पशुप्रतिप्रस्थातृप्रयोगः	सं	७	०	दे	अशुद्धः प्राचीनश्च
१७ सौत्रामणीपद्धतिः	सं	१४	१८५७	दे	बोधायनीया कोकिलप्रयोगरूपा शुद्धा नूतना च
१७ वेष्टनम्					
१ प्रायश्चित्तसारः	सं	३०	१७६३	दे	त्र्यम्बककृतः प्राचीनः शुद्धप्रायश्च
२ अग्निष्टोमप्रयोगः	सं	११६	१७९७	दे	नारायणकृतः प्राचीनः शुद्धश्च
३ द्वादशाहाविठ्ठला	खं	३९	०	दे	शुद्धा नवीना च
४ दर्शपौर्णमासाविठ्ठला	सं	३६	१८१६	दे	शुद्धप्राया प्राचीना च
५ आपस्तम्बसूत्रवृत्तिः	खं	७३	०	दे	अग्निचयनपर्यन्ता शुद्धा जीर्णा च
१८ वेष्टनम्					
१ हविर्यज्ञकाण्डम्	सं	२०४	१७६३	दे	शुद्धं जीर्णं च
२ एकपाइकाण्डम्	सं	१२१	१७६३	दे	शुद्धं जीर्णं च
३ अध्वरकाण्डम्	सं	१३६	१६४५	दे	शुद्धं प्राचीनं च
४ ग्रहकाण्डम्	सं	११४	१६६४	दे	प्राचीनं शुद्धं च
५ सवकाण्डम्	सं	१६५	१६६२	दे	समीचीनं प्राचीनं च
६ उखासंभरणकाण्डम्	खं	६५	०	दे	शुद्धतरं प्राचीनं च
७ हस्तिकाण्डम्	सं	९३	१६६३	दे	प्राचीनं शुद्धं च
१९ वेष्टनम्					
१ काण्वसंहिता	सं	४९	१८५१	दे	प्रथमदशकरूपा नवीना शुद्धा च
२ काण्वसंहिता	सं	६१	१८५३	दे	द्वितीयदशकरूपा नूतना शुद्धा च
३ काण्वब्राह्मणम्	सं	१६९	१६२५	दे	शुद्धं नूतनं मध्यमकाण्डात्मकम्
४ षडङ्गपाठः	खं	२	०	ते	नवीनोऽशुद्धश्च
५ काण्वब्राह्मणम्	सं	८९	१६१५	दे	नूतनमशुद्धं मध्यमकाण्डात्मकम्
६ काण्वब्राह्मणम्	सं	१००	१६४९	दे	शुद्धं प्राचीनं बृहदारण्यकाण्डात्मकम्
७ काण्वब्राह्मणम्	सं	३७	१६५१	दे	जीर्णं शुद्धं बृहदारण्यकाण्डात्मकम्

Digitized by Google

॥ यजुर्वेदसूचीपत्रम् ॥

ग्रन्थनामानि	पत्रपूर्णापूर्णविवेकः	पत्रसंख्या	लिपिकालः	लिपिभेदः	ग्रन्थकर्तृनामादिविवरणम्
८ कपिष्ठलसंहिता	खं	४८	१७०६	दे	प्राचीना शुद्धा प्रथमाष्टककृपा
९ कपिष्ठलसंहिता	सं	५२	१७०६	दे	प्राचीना शुद्धा चतुर्थाष्टककृपा
१० कपिष्ठलसंहिता	सं	५७	१७०६	दे	प्राचीना शुद्धा षष्ठाष्टककृपा
११ मैत्रायणीयसंहिता	सं	१०५	१५२६	दे	जीर्णा शुद्धा खिलकाण्डात्मिका
१२ मैत्रायणीयसंहिता	सं	६४	१५२६	दे	जीर्णा शुद्धा खिलकाण्डात्मिका
२० वेष्टनम्					
१ अन्त्यकर्मपद्धतिः	सं	५१	१७८५	दे	शुद्धा प्राचीना च
२ शान्तिविधानम्	सं	७	१८१५	दे	कात्यायनकृतं प्राचीनमशुद्धं च
३ यजुर्विधानम्	सं	५०	१६६२	दे	जीर्णमशुद्धं च
४ मन्त्रसंहिता	सं	३०	१७१६	दे	शुद्धा प्राचीना च
५ मन्त्रसंहिता	सं	३५	१८१७	दे	प्राचीना शुद्धा च
६ मन्त्रसंहिता	सं	४४	१७६३	दे	प्राचीना शुद्धतरा
७ मन्त्रसंहिता	सं	४७	१७४६	दे	अशुद्धा प्राचीना च
८ व्रतबन्धपद्धतिः	खं	१७	0	दे	प्राचीना शोधरहिता च
९ व्रतबन्धपद्धतिः	सं	११	0	दे	शुद्धा प्राचीना च
१० व्रतबन्धपद्धतिः	सं	२३	१९०४	दे	शोधरहिता नूतना च
११ गदाधरभाष्यम्	सं	८0	0	दे	जीर्णं शुद्धं च
१२ भाषिकसूत्रम्	सं	३	0	दे	शुद्धं प्राचीनं च
१३ षडङ्गपाठः	खं	२	0	क	नवीनोऽशुद्धश्च
२१ वेष्टनम्					
१ दीपिका	सं	१८	0	दे	तालवृन्तनिवासिकृता, आपस्तम्बीयाधानप्रकरणात्मिका नूतनाऽशुद्धा च
२ अग्निष्टोमभाष्यम्	सं	२०१	१६७७	दे	जीर्णमशुद्धं धूर्तस्वामिकृतं च
३ सूत्रवृत्तिः	सं	३०	१८१५	दे	रुद्रदत्तप्रणीता प्रथमप्रश्नरूपा प्राचीना शुद्धा च
४ परिभाषाभाष्यम्	सं	४५	१७२५	दे	कपर्दिस्वामिकृतं प्राचीनमशुद्धं च
५ शुल्वसूत्रभाष्यवार्त्तिकव्याख्या	खं	४६	0	दे	रामकृता जीर्णतराऽशुद्धा च
२२ वेष्टनम्					
१ आधानपद्धतिः	सं	७३	१७६५	दे	त्र्यम्बककृता प्राचीना प्रायः शुद्धा च
२ आधानपद्धतिः	खं	१८	0	दे	प्राचीना शुद्धा च
३ आधानपद्धतिः	सं	३२	१७६८	दे	आपस्तम्बीयाऽशुद्धा प्राचीना च
४ पवित्रेष्टिपद्धतिः	सं	४	0	दे	शुद्धा प्राचीना च
५ पवित्रेष्टिपद्धतिः	सं	२	१६४८	दे	शुद्धा प्राचीना च

Digitized by Google

॥ यजुर्वेदपुस्तकसूचीपत्रम् ॥

ग्रन्थनामानि	ग्रन्थपूर्त्यपूर्तिविवेकः	पत्रसंख्या	लिपिकालः	लिपिभेदः	ग्रन्थकर्तृनामादिविवरणम्
६ मृगारेष्टिपद्धतिः	सं	१४	१६६६	दे	प्राचीना शुद्धा च
७ चातुर्मास्यपद्धतिः	खं	८६	०	दे	प्राचीना शुद्धा च
८ चातुर्मास्यपद्धतिः	सं	३०	१८८०	दे	त्र्यम्बककृता प्राचीना शुद्धा च
९ चातुर्मास्यपद्धतिः	सं	४८	१७६३	दे	त्र्यम्बककृता प्राचीना शुद्धा च
१० पशुबन्धपतिः	सं	२१	१७६७	दे	शुद्धा प्राचीना च
११ कोकिलसौत्रामणिप्रयोगः	सं	१०	१७८८	दे	बौधायनीयः शुद्धः प्राचीनश्च
१२ सौत्रामणिप्रयोगः	सं	२०	१७६६	दे	चन्द्रचूडकृतः शुद्धः प्राचीनश्च
१३ चातुर्मास्यहौत्रप्रयोगः	सं	२६	०	दे	प्राचीनः शुद्धश्च
१४ सोमप्रयोगपद्धतिः	खं	११७	०	दे	आपस्तम्बशाखीया प्राचीनाऽशुद्धा च
१५ सोमप्रयोगपद्धतिः	खं	८०	०	दे	आपस्तम्बशाखीया प्राचीना शुद्धा च
१६ शुल्वोपधानपद्धतिः	सं	४	१७०७	दे	आपस्तम्बशाखीया प्राचीना शुद्धा च
१७ सावित्रचयनपद्धतिः	सं	६	०	दे	प्राचीना शुद्धा च
२३ वेष्टनम्					
१ तैत्तिरीयब्राह्मणम्	सं	३५४	१७६५	दे	शुद्धं प्राचीनं च
२४ वेष्टनम्					
१ साचीकाण्डम्	सं	१११	१६६८	दे	जीर्णं शुद्धं च
२ अग्निरहस्यकाण्डम्	सं	१३०	१६५२	दे	जीर्णं शुद्धं च
३ अष्टाध्यायीकाण्डम्	सं	११४	१६६७	दे	जीर्णं शुद्धं च
४ मध्यमकाण्डम्	सं	८१	१५४४	दे	जीर्णं शुद्धं च
५ अश्वमेधकाण्डम्	सं	८७	१६४६	दे	जीर्णं शुद्धं च
६ प्रवर्ग्यकाण्डम्	सं	३०	१६४७	दे	जीर्णं शुद्धं च
७ प्रवर्ग्यकाण्डम्	सं	६०	०	दे	जीर्णं शुद्धं च
८ पितृकाण्डम्	सं	६	१६४६	दे	प्राचीनं शुद्धं च
२५ वेष्टनम्					
१ कात्यायनसूत्रम्	खं	५६	१६१८	दे	जीर्णमशुद्धं च
२ वास्तुशान्तिः	सं	८	१८४७	दे	प्राचीनाऽशुद्धा च
३ संन्यासपद्धतिः	सं	२६	१८३६	दे	आनन्दकृताऽशुद्धा प्राचीना च
४ द्रोणचितस्येष्टकापूरणम्	सं	४	०	दे	प्राचीनं शुद्धम्
५ कात्यायनसूत्रम्	सं	६४८	१६६५	दे	प्राचीनं शुद्धं च
२६ वेष्टनम्					
१ ब्राह्मणम्	खं	३७१	१६१५	दे	प्राचीनं शुद्धं नवीनमशुद्धं च
२ चीकाण्डम्	खं	१५२	०	दे	प्राचीनं शुद्धम्

Digitized by Google

॥ यजुर्वेदसूचीपत्रम् ॥

ग्रन्थनामानि	पूर्णापूर्णविवेकः	पत्रसंख्या	लिपिकालः	लिपिभेदः	ग्रन्थकर्तृनामादिविवरणम्
२७ वेष्टनम्					
१ कात्यायनसूत्रभाष्यम्	सं	४१	१६९५	दे	देवकृतं पञ्चमाध्यायात्मकं जीर्णमशुद्धं च
२ कात्यायनसूत्रभाष्यम्	सं	२४	१५५०	दे	एकविंशत्यध्यायात्मकं देवकृतव्याख्यारूपं प्राचीनं शुद्धं च :
३ कात्यायनसूत्रम्	सं	६४	१६००	दे	प्राचीनं शुद्धमुत्तरार्द्धरूपम्
४ कात्यायनसूत्रभाष्यम्	सं	६५	१६६६	दे	चतुर्थाध्यायात्मकं प्राचीनं शुद्धं च
२८ वेष्टनम्					
१ आपस्तम्बसूत्रध्वनितार्थकारिका	सं	३१	१७८४	दे	सोमयाजिभास्करकृताऽशुद्धा प्राचीना च
२ आपस्तम्बसूत्रध्वनितार्थकारिका	खं	१९	१६६६	दे	सोमयाजिभास्करकृता जीर्णा शुद्धा च
३ आपस्तम्बसूत्रध्वनितार्थकारिका	सं	२२	०	दे	सोमयाजिभास्करकृता जीर्णा शुद्धा च
४ अग्निष्टोमः	खं	१२४	१६५२	दे	प्राचीनोऽशुद्धश्च
५ प्रायश्चित्तसारः	सं	३२	१७१५	दे	त्र्यम्बककृतः प्राचीनोऽशुद्धश्च
६ नवशेष्टिः	सं	२५	१७५८	दे	आपस्तम्बीया केशवस्वामिकृता प्राचीनाऽशुद्धा च
७ काम्येष्टयज्ञावली	सं	४८	१७६५	दे	आपस्तम्बीया प्राचीना शुद्धा च
८ एकाहिकचातुर्मास्यप्रयोगः	सं	७	०	दे	प्राचीनः शुद्धश्च
९ अग्निष्टोमप्रयोगः	खं	१०	०	दे	प्राचीनः शुद्धश्च
१० होत्रप्रयोगः	सं	२६	०	दे	बृहस्पतिसवात्मकः प्राचीनः शुद्धश्च
११ ब्राह्मणभाष्यम्	खं	११४	१६४१	दे	प्राचीनं शुद्धं च
२९ वेष्टनम्					
१ कात्यायनसूत्रभाष्यम्	सं	४९	१७८६	दे	विंशतितमाध्यायात्मकं प्राचीनं शुद्धं च
२ ब्रह्मत्वपद्धतिः	सं	११	१६७०	दे	प्राचीना शुद्धा च
३ मैत्रावरुणप्रयोगः	सं	१८	१८०४	दे	प्राचीनः शुद्धश्च
४ कारीरिष्टिः	सं	७	१७७०	दे	प्राचीनाऽशुद्धा च
५ सोत्रामणिहोत्रम्	सं	६	१७९५	दे	नूतनमशुद्धं च
६ मैत्रावरुणप्रयोगः	सं	६	१७९५	दे	आपस्तम्बशाखीयः प्राचीनः शुद्धश्च
७ अग्निहोत्रहोमः	सं	९	१८०४	दे	नवीनोऽशुद्धश्च
८ नवशेष्टिहोमः	सं	९	०	दे	अशुद्धः प्राचीनश्च
९ चातुर्मास्यहोत्रपद्धतिः	सं	३४	१६९२	दे	शुद्धा प्राचीना च
१० दर्शपौर्णमासहोत्रम्	सं	११	१६६१	दे	प्राचीनमशुद्धं च
३० वेष्टनम्					
१ शाङ्खायनसूत्रभाष्यम्	खं	१२१	०	दे	प्राचीनमशुद्धं च

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

INDEX TO VOL III.

	Page.
Bála-ramáyana-nâṭaka, ...	8,34,51,75,99,124,150,173,195,216,236
Benares, Ancient and Medieval : A monograph, ...	137,163
Indra, as represented in the Hymns of the Rigveda, ...	186,206
Ingratitude, ...	136
Iśwara-pratyabhijná-sútra-vimarśiní, ...	1,27,43,67,93,117,143,169
Kâśi-rája-kánana-śatakam, ...	18,40,60,84,105
Kumára-sambhava, A Critical Comparison of Mallinátha's and Premachandra's Commentaries on the 8th Canto of the,...	61
" A Discussion on the Origin of the, ...	19,85
Mahábhárata, Letter regarding a couplet of the, ...	42
Notices of Books, ...	136,163,188,268
' Pandit,' Letter on the Plan of the, ...	22
Pandits, and their manner of teaching, ...	22
Prasanna-rághava-nátakasya upasanhárah, ...	8
Raghu, ...	42,64
Raghu's Campaign, ...	65,90
Raghuvanśa, Canto viii, Spring, ...	227
Ráma in the Spring, ...	135
Rámáyana, ...	223,267
" Scenes from the, ...	204
Śita in Prison, ...	92,113
Speech, A Sanskrit version of the, delivered, at the distribution of prizes, in the Benares College, by the Honourable Sir William Muir, K. C. S. I., Lieutenant Governor, North Western Provinces, ...	16
Tárá's Lament, ...	135
Transliteration of Oriental words into Roman Characters, Letters on the, ...	114,245
Upadeśa-sáhasri-prastávaná, ...	189
Upadeśa-sáhasryá gadya-prabandhah, ...	189,209,229,249
Vaiśeshika Aphorisms of Kanáda, ...	185,202,220,242,265
Vidhavodvahavivekam adhikritya kinchid uchyate, ...	263
Vrishabhánujá-nátiká, ...	257
Widow-marriage, ...	222
Yathoddeśa-káryakála-paksha-tippaní-paríkshá-śeshah, ...	108
Yoga Philosophy, Aphorisms of the, continued from Dr. Ballantyne's work, ...	88,111,134,161

SUPPLEMENT.

Rájakíya-váránasi-vidyá-mandira-saraswatí-bhavana-varti-pustakánám súchí-pattram,	No. 35. A, p. i., v.
Transliteration of Oriental words into Roman Characters, Memo. on the, ...	No. 28. A. p. i.

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

This book should be returned to the Library on or before the last date stamped below.

A fine of five cents a day is incurred by retaining it beyond the specified time.

Please return promptly.

STALL-STUDY CHARGE

OCT 8 62 H

CANCELLED

Digitized by Google

3 2044 107 353 039

Digitized by Google